॥दृष्ट्वेंद्रं नय संविग्नस्तक्षकः शरणं ययौ ॥१७॥ अपश्यंस्तक्षकं तत्र राजा पारिक्षितो [illegible] द्विजान् ॥ उवाच तक्षकः कस्मान्न ह[illegible]येतो
रगाधमः ॥१८॥ तं गोपायति राजेंद्र शक्रः शरणमागतं । तेन संस्तंभितः सर्पस्तस्मान्नाग्नौ पतत्यसौ ॥१९॥ पारिक्षित इति श्रुत्वा प्राह
द्विजवरान्धीः । स इंद्रस्तक्षको विप्रा नाग्नौ किमिति पात्यते ॥२०॥ तच्छ्रुत्वा जुहुवुर्विप्राः सहेंद्रं [illegible] तक्षकं मखे । तक्षकाश्रु पतत्स्वेदस
हेंद्रेण मरुत्वता ॥२१॥ इति ब्रह्मोदितात्क्षेपैः स्थानादिंद्रः प्रचालितः । बभूव संभ्रांतमतिः सविमानः सतक्षकः ॥२२॥ तं पतंतं विमानेन
सहतक्षकमंबरात् । [illegible]लोक्यांगिरसः प्राह राजानं तं बृहस्पतिः ॥२३॥
वि

॥ सहक्षेपमाकानंदयिति ॥ तक्षकेति ॥ इहाग्नावाशु पतमरुत्वताम रुजणवना इंद्रेण सह ॥२१॥ ब्राह्मणैरुक्तैराक्षेपैः परुषवाक्यैः सः तक्षकः २२ आंगिरसः ॥
पुत्रो बृहस्पतिः प्राह ॥२३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द्वा० १६

नैषेति ॥

२४ न वस्तु नामाजरामरः तथापि पितृमारकं धक्ष्यामीति चेत्तत्राह जीवितमिति ॥ गतिः परलोकः ॥ अतो दुर्मरणनिमित्तापि तु दुर्गतिरनेन लब्धेत्यपि न शंकनीयमि

त्यर्थः ॥२५॥ कथमन्यः सुखदुःखप्रदाता नास्ति सर्पादीनामुपलभ्यमानत्वादिति चेत्तत्राह सर्पादिनाजंतुः पंचत्वं मृत्युं ऋच्छति प्राप्नोतीति यत् तत्प्रारब्धकर्मैव

भुंक्ते स्वकर्मप्रयुक्ता एव सर्पादयो न स्वतंत्रा इतिभावः ॥२६॥ संस्थीयेत समाप्यतां आभिचारिकं हि साफल्यं दृष्टं प्राचीनकर्म अतः सर्पादिष्ट प्रयुक्तस्य तवाप्ययं

नैषत्वयामनुष्येंद्र वधमर्हतिसर्पराट् । अनेनपीतममृतंमथवाप्यजरामरः ॥२४॥ जीवितंमरणंजंतोर्गतिः स्वेनैवकर्मणा । राजंस्ततोन्यो

स्य नान्योऽस्ति प्रदातासुखदुःखयोः ॥२५॥ सर्पचौराग्निविद्युद्भ्यः क्षुत्तृड्व्याध्यादिभिर्नृप । पंचत्वमृच्छते जंतुर्भुंक्ते प्रारब्धकर्मतत् ॥२६॥ तस्मात्

त्वमिदंराजन्संस्थीयेताभिचारकं । सर्पाश्च नागसो दग्धाजनैर्दृष्टिं हि भुज्यते ॥२७॥ इत्युक्तःसतथेत्याह महर्षेर्मानयन्वचः । सर्प

सत्रादुपरतःपूजयामासवाक्पतिं ॥२८॥ सैषाविष्णोर्महामायाबाधयालक्षणायया । मुह्यंत्यस्यैवात्मभूता भूतेषुगुणवृत्ति

भिः ॥२९॥ ॥

नापराध इतिभावः ॥२७॥ वाक्पतिं बृहस्पतिं ॥२८॥ ननु कथं विदुषामप्येवं संमोहः यतो ब्रह्मकोपात्परीक्षितो मृत्युः जन्मेजयकोपात्सर्पाणामित्यादि तत्राह सैषेति । त राम

स्या महत्वं दर्शयति अलक्षणा न लक्ष्यत इत्यलक्षणा अप्रतर्क्येत्यर्थः । कामा विसतत्राह ययास्य विष्णोरेवात्मांशाभूताः प्राणिनः गुणवृत्तिभिः क्रोधादिभिः सह ॥ १६

भूतेषु देहेषु मुह्यंति बाध्यबाधकतां व्रजंतीत्यर्थः ॥ ननु श्रवणादिना बाधितया तया कुतो मोहः स्यात्तत्राह अबाधया बाधितुमशक्यया ॥२९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथंतर्हिमायातत्कार्य्यनिवृत्तिरित्याशंक्यश्रीविष्णुस्वरूपनिरूपणपूर्वकंतद्भजनात्सर्वानर्थनिवृत्तिरितिशास्त्रार्थमुपसंहरतिनयत्रेतिपंचभिः दंभीति पा माया
कपटवानयंपुमानित्येवंभूतायाबुधानसक्तदुष्टिरस्यमानायामायाइत्यर्थः। साचात्मवादेक्रियमाणे। आत्मवादिभिर्यत्रात्मयानविराजितानप्रकाशिताकिं
तुनीतेवस्वकार्य्यमोहादिकमकुर्वंतीकथंविदन्नेतश्शक्तिप्रतिपादितेत्यर्थः। तदुक्तं। तस्मैनमोभगवतेवासुदेवायधीमहि। यन्माययादुर्जययामांब्रुवंतिजगद्गुरु
विलज्जमानयायस्यस्थातुमीक्षापथेऽमुया। विमोहिताविकत्थंते ममाहमितिदुर्धियइति।।किंच।।यद्यस्मिन्तदाश्रयोमयाश्रयोविविधोवादोऽपिनास्ति वि

नयत्रदंभीत्यभयाविराजितामायात्मवादेऽसकृदात्मवादिभिः।नयद्विवादोविविधस्तदाश्रयोमनश्चसंकल्पविकल्पवृत्तियत्।
३०।नयत्रसृज्यंसृजतोभयोःपरंश्रेयश्चजीवस्त्रिभिरन्वितस्त्वहं।तदेतदुत्सादितबाध्यबाधकंनिषिध्यचोर्मीन्विरमेत्स्वयंमुनिः।३१

शेषविषयत्वाद्विवादानांतस्यचाविशेषातीतत्वादितिभावः।संकल्पविकल्पाभ्यांवृत्तयोयस्यतन्मनोऽपियत्रनास्तिसंकल्पविकल्पानामपिविशेषविषयत्वात्।३०।किं वि
चसृज्यंकर्मसृजताकारकवर्गेणसह।उभयोःसृज्यस्रष्ट्रोःपरंसाध्यंश्रेयःफलमपि।अतस्त्रिभिःसृज्यस्रष्टृफलैरन्वितोजीवश्चअहंकारात्मकोयत्रना
स्ति।अतएवोत्सादितौनिरस्तौबाध्यबाधकौयस्मिन्तदेतत्।स्वयंआत्मस्वरूपमित्यर्थः।तत्रास्मिन्ऊर्मीनहंकारादीन्निषिध्यविरमेत।विशेषेणक्री
डेदित्यर्थः।।३१।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द्वा०
१२

यतस्तद्वैष्णवं पदमामनंतीत्याह। परमिति। यदेतत्तदेव परं वैष्णवं पदं स्वरूपमामनंति कोऽसौ। अतत् आत्मव्यतिरिक्तं उत्सिसृक्षवः। त्यक्तुमिष्टवंतः। अनन्यसौ
हृदाः। नास्ति अन्यस्मिन् सौहृदं येषां ते। कुतः दौरात्म्यं देहाद्यहंभावं विसृज्य। देहे अहंकाराभावादन्यत्र सौहृदं नास्ति। अतस्तं कुमिष्टवद्स्त्यर्थः। कथं नेतिने
तीत्येवं अतद्विहद्नुत्सवमपि प्रमाणयति। हृदोपगुह्य ध्यानादिना। ततः समाहितैरवसितं निश्चितं यथा अवगमितमवबद्धं आत्मतया गृहीतमित्यर्थः ॥३२॥
एवं प्राप्तावधिकारिणं दर्शयति त एतदिति। देहजमिति। गेहजं ममेति ३३ प्राप्तुपायमाह। अतिवादानिति ३४ तत्स्वसमाप्तौ गुरुं प्रणमति नमति

परं पदं वैष्णवमामनंति तत्तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः। विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यावसितं समाहितैः ३२ त ए
तदधिगच्छंति विष्णोर्यत्परमं पदं। अहं ममेति दौर्जन्यं न येषां देहगेहजम् ३३ अतिवादांस्तितिक्षेत नावमन्येत कंचन। न चेमं देह
माश्रित्य वैरं कुर्वीत केनचित् ३४ नमो भगवते तस्मै कृष्णायाकुंठमेधसे। यत्पादांबुरुहध्यानात्संहितामध्यगामिमां ३५ ॥
शौनक उवाच ॥ ॥ पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः। वेदाश्च कथिता व्यस्ता एतत्सौम्याभिधेहि नः ३६ ॥ सूत उवाच
समाहितात्मनो ब्रह्मन्ब्रह्मणः परमेष्ठिनः। हृदाकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ३७॥

कृष्णाय व्यासाय॥ अध्यगां अधिगतवानस्मि
३५ इमां संहितामध्यगामित्युक्तं तत्र पुराणसंहिताविभागविशेषातो बुभुत्सुर्वेदविभागमपि प्रसंगात्पृच्छति ३६ तत्र प्रथमं वेदाविर्भावप्रकारमाह। समा राम
हितात्मन इत्यादिः। ब्रह्मणो हृदयाकाशात्तस्मात्तन्नादोऽभूत् यः कर्णपुटपिधाने श्रोत्रवृत्तिनिरोधादस्मदादिष्वपि विभाव्यते विलक्ष्यते ३७॥ ॥ ॥ १२



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रि२

य

प्रसंगाद्ब्रह्मादोपासकानांमोक्षफलमाह। यस्यनादस्योपासनया आत्मनोमूलंधूत्वाअपोह्य। कथंभूतंमलंतमाह। इत्यमधिभूतं। क्रियाअध्यात्मंकारकमधिदैवं एवंत्रिधाभूतामात्स्यांस्येतितथातं। ३०। वृत्तत्रिमात्रः कंठोष्ठादिनिरुच्चार्यमाणस्योंकारस्याक्षरसमाम्नायांतर्भावात्। सदृमतयातंविशिनष्टि। अव्यक्तःप्रन वोयस्यसः। तदेवाह॥ स्वराट्स्वतएवशब्दप्रकाशमानः तमेवकार्येणलक्षयति॥ यत्तदिति॥ नपुंसकत्वंलिंगशब्दविशेषणत्वात्॥ लिंगंगमकं॥ ३९॥ कोसौ परमात्मातमाह। शृणोतीति। इमंस्फोटंअव्यक्तमोंकारं। ननुजीवएवतंशृणोतुइत्याह। सुप्तश्रोत्रकर्णपिधानादिना अवृत्तिकेश्रोत्रेमतिजीवाःखुकरण धीनत्वानत्वात्। नतदाश्रोता। तदुपलब्धिस्तुतस्यपरमात्मद्वारिकैवेतिभावः। ईश्वरस्तुनैवंयतः अस्पृहकश्रोत्रे पीडियवर्गेदृक्त्वानंयस्यतथाहि। सुप्तोयदाश्रहं

यदुपासनयाब्रह्मन्योगिनोमलमात्मनः॥ द्रव्यक्रियाकारकाख्यंधूत्वायांत्यपुनर्भवं॥ ३८॥ ततोभूत्त्रिवृदोंकारोयोव्यक्तप्रभवस्वराट्॥ य त्तत्लिंगंभगवतोब्रह्मणःपरमात्मनः॥ ३९॥ शृणोतियइमंस्फोटंसुप्तश्रोत्रेचशून्यदृक्। येनवाक्व्यज्यतेयस्यव्यक्तिराकाश आत्मनः॥ ४०॥ स्वधाम्नोब्रह्मणःसाक्षाद्वाचकःपरमात्मनः॥ ससर्वमंत्रोपनिषद्वेदबीजंसनातनं॥ ४१॥ ॥

श्रुत्वाप्रबुध्यतेनतदाजीवःश्रोता। लीनेंद्रियत्वात्। अतोयस्तदाशब्दंश्रुत्वा। जीवंप्रबोधयति। सयथापरमात्मैवतद्वत्। कोसावोंकारःतंविशिनष्टिसार्धेन। ये नवाक्बृहतीव्यज्यते यस्यचहृदयाकाशेआत्मनःसकाशात्। यक्तिःअभिव्यक्तिः। किंस्वधाम्नःस्वस्याश्रयःकारणंयत्ब्रह्मतस्यापिकिंचपरमात्मांशात्भूतस्य मस्तदेवतावाचकोपीत्याशयेनाह। सइतिसर्वमंत्राणामुपनिषद्रहस्यंस्वदंरूपमित्यर्थः॥ तत्रहेतुःवेदानांबीजंकारणंबीजत्वेप्यविकारितमाह सना तनंसदेकरूपंतस्यब्रह्मरूपत्वात्॥ ४१॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०व्रा०
१८

तत्त्वयोजगन्नाथा॥

इदानींततः सर्वप्रपंचोत्पत्तिप्रकारमाह। तस्पहीति॥ त्रयस्त्रिंसंख्यायुक्तानावाः यैरकारोकारमकारैः धार्यंते। तत्कारणत्वात्॥ तानेवाह गुणसत्वादयः ना
मानि ऋग्यजुःसामानि॥ ऋरथ्यांश्चतुर्विः स्वर्लोकोः॥४०॥ ततस्तेभ्योवर्णेभ्यः अक्षराणां समाम्नायसमाहारं तमेवाह। अंतस्थाः यरलवाः॥ ऊष्माणः शषसहाः स्वरा
ः आकाराद्याः स्पर्शाः कादयः॥ ह्रस्वदीर्घप्लुताः आदिशब्दाज्जिह्वामूलीयादयः॥ तएव लक्षणं स्वरूपं यस्यतं॥४१॥ विभुः चतुर्मुखस्वरूपोभगवान् असृजदितिपूर्व

नृ२

तस्यत्वासंस्त्रयोवर्णास्त्रिकाराद्यास्त्रयुद्व॥ धार्यंतेयैस्त्रयोभावागुणनामार्थहेत्वयः॥ ततोक्षरसमाम्नायमसृजद्भगवानजः॥ अंतस्थो
ष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणं॥४१॥ तेनासौचतुरोवेदांश्चतुर्भिर्वदनैर्विभुः सव्याहृतिकान्सोंकारांश्चातुर्होत्रविवक्षया॥४२॥ पुत्रा नृ२
नध्यापयत्तांस्तुब्रह्मर्षीन्ब्रह्मकोविदान्॥ तेतुधर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन्॥४३॥ तेपरंपरयाप्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः॥ च
तुर्युगेष्वथव्यस्ताद्वापरादौमहर्षिभिः॥४४॥ क्षीणायुषः क्षीणसत्वान्दुर्मेधान्वीक्ष्यकालतः॥ वेदान्ब्रह्मर्षयोव्यस्यन्हृदिस्थाच्युतनोदि
ताः॥४५॥

नृ

स्यैवानुषंगः॥ चातुर्होत्रविवक्षयाचत्वारोहोत्रोपलक्षिताऋत्विजश्चतुर्होतारः तैरनुष्ठेयं हौत्राध्वर्यवादिकंकर्मचातुर्होत्रं तद्विवक्षया॥४२॥ पु
त्रादीन् तानृवेदान्॥ ब्रह्मकोविदानवेदोच्चारणादिविनिपुणान्॥४३॥ एवंचतुर्युगेषुआसाद्वापरादौद्वापरमादिर्यस्यतदंतांशलक्षणस्यकालस्यतस्मिन्
नृमीप्या द्वापरांतेवेदविनाशःप्रसिद्धः तंतनुसमकालव्यासावतारप्रसिद्धिश्चव्यस्तोविनक्ता॥४४॥ तत्रहेतुः क्षीणायुषोजनान् तद्दृष्टिपुरुषबुद्धिप्रेरकत्वात् अनाद राम वेदः
रणीयंस्याद्दिस्यात्रांकयाह॥४५॥ ॥ वीक्ष्यक्षीणसत्वान्सत्वगुणरहितान्दुर्मेधान् ग्रंथंका १८

हृदिस्थेति रयितुमशक्तान्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंसामान्यतोवेदविभागक्रममुक्त्वावैवस्वतमन्वंतरेविशेषतोनिरूपयितुमाह अस्मिन्नपीति। ४६ अंशांशोमायातस्यांशाः सत्वंतस्यकलयाअंशेनावती
र्णः मन ४७ चातुर्विध्यमेवाह ऋगिति ऋगादिमंत्राणांराशीन्वर्गशः। तत्तत्प्रकरणान्नैदरुध्दृत्ययथाऽनेकविधमणिराशेर्मणिगणाः पद्मरागादयोविविच्यो
ध्रियंतेतद्वदुध्दृत्यतैर्मंत्रैश्चतस्रःऋगासंहिताश्चक्रे ४८। तासांसंहितानांमध्येएकैकां ४९ ऋक्समुदायरूपत्वात् बह्वृचाख्यंनितरांप्रश्लेषेणगद्यमान

अस्मिन्नप्यंतरेब्रह्मन्भगवांल्लोकभावनः॥ ब्रह्मेशाद्यैर्लोकपालैर्याचितोधर्मगुप्तये ४६ पराशरात्सत्यवत्यामंशांशकलयाविभुः॥
अवतीर्णोमहाभागवेदंचक्रेचतुर्विधं ४७ ऋगथर्वयजुःसाम्नांराशीनुध्दृत्यवर्गशः चतस्रःसंहिताश्चक्रेमंत्रैर्मणिगणाइव ४८ ता
सांसचतुरःशिष्यानुपाहूयमहामतिः॥ एकैकांसंहितांब्रह्मन्नेकैकस्मैददौविभुः ४९ पैलायसंहितामाद्यांबह्वृचाख्यामुवाचह
वैशंपायनसंज्ञायनिगदाख्यंयजुर्गणं ५० साम्नांजैमिनयेप्राहतथाछंदोगसंहितां॥ अथर्वांगिरसीनामस्वशिष्यायसुमंतवे
५१ पैलःस्वांसंहितामूचेइंद्रप्रमितयेमुनिः बाष्कलायचसोप्याहशिष्येभ्यःसंहितांस्वकां ५२ चतुर्धाव्यस्यबोध्याययाज्ञवल्क्याय
भार्गव॥ पराशरायाग्निमित्रेइंद्रप्रमितिरात्मवान् ५४ अध्यापयन्संहितांस्वांमांडुकेयमृषिंकविः॥ तस्यशिष्योदेवमित्र
ःसौभर्यादिभ्यऊचिवान् ५५॥ ॥

त्वात्॥ निगदाख्यं ॥५०॥ छंदःसुगीयमानत्वात्छंदोगाख्यांसंहितां ॥५१॥ तत्रऋग्वेदेशाखाविभागमाह॥ पैलइति॥ स्वसंहितांद्वेधाविभज्य इंद्रप्रमितये
बाष्कलायचऊचे॥५२॥ सबाष्कलोपिस्वसंहितांचतुर्धाव्यस्यबोध्यादिभ्यःशिष्येभ्यआह॥ हे भार्गव ५३ इंद्रप्रमितिरपिस्वांसंहितांस्वसुतंमांडुकेयमध्याप
यामास तस्यमांडूकेयस्यशिष्योदेवमित्रः॥५५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततस्सुतः मंडूकेयस्ततः शाकल्यो वाऽस्मादिषु पंच स्वधात् ॥ तानध्यापयामासेत्यर्थः ॥५४॥ तच्छिष्यः शाकल्यशिष्यः स्वसंहितां द्वेधा विभज्य चतुर्थं वैदिकपदार्थमारभ्या
नरूपं निरुक्तं च कृत्वा बभ्रुकाशादिभ्यः स्वशिष्येभ्यो ददौ ॥५७॥ बाष्कलिः पूर्वोक्तस्य बाष्कलस्य पुत्रः प्रतिशाखास्य उक्तः सर्वशाखासः बालायन्यादयस्तामादधुः स्व
धीतवंतः ॥५८॥ ऋक्शाखोपसंहारपूर्वकं तच्छ्रवणफलमाह ॥ बह्वृचा इति ॥ एतच्छंदसां ॥ एतेषां छंदसां ॥५९॥ यजुर्वेदे तैत्तिरीयशाखोत्पत्तिप्रस्तावमाह ॥ वैशंपा

ती

शाकल्यस्तत्सुतस्तां तु पंचधा व्यस्य संहितां ॥ वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात् ॥५६॥ जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसं
हितां ॥ बलाकपैजवैतालविरजेभ्यो ददौ मुनिः ॥५७॥ बाष्कलिः प्रतिशाखाभ्यो वालखिल्याख्यसंहितां ॥ चक्रे बालायनिभज्यकाशारास्ते
वतां दधुः ॥५८॥ बह्वृचाः संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः ॥ श्रुत्वैतच्छंदसां व्यासं सर्वपापैः प्रमुच्यते ॥५९॥ वैशंपायनशिष्या वै चरका
ध्वर्यवोऽभवन् ॥ यच्चेरुर्ब्रह्महत्यांहः क्षपणं स्वगुरोर्व्रतं ॥६०॥ याज्ञवल्क्यश्च तच्छिष्य आह हो भगवन् कियत् ॥ चरितेनाल्पसाराणां
चरिष्येऽहं सुदुश्चरं ॥ इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया ॥६१॥ विप्रावमंत्रा शिष्येण मदधीतं त्यजाश्विति ॥ देवरातसुतः सोऽपि
छर्दित्वा यजुषां गणं ॥ ततो गतोऽथ मुनयो ददृशुस्तान्यजुर्गणान् ॥६२॥ ॥

यन शिष्य इत्यादिना ॥ चरकनामनिरुक्तिमाह ॥ यस्माच्चेरुरिति ॥ ब्रह्महत्यारूपमंहः क्षपयतीति तथा ॥ ततः स्वगुरोरनुष्ठेयं व्रतं तच्चरणाच्चरका इत्यर्थः ॥६०॥
तच्छिष्यः वैशंपायनशिष्यः ॥ अल्पसाराणामेतेषां चरितेन कियत् ॥ सुदुश्चरमहं चरिष्यामीति ॥ विप्राणामवमंत्रा ॥ अवज्ञाकर्त्रा ॥ मत्तोऽधीतमाशु त्य राम
जेति ॥ देवरातसुतो याज्ञवल्क्यः ॥ ॥ छर्दित्वा वमित्वा मुनयः स्वरकाः तान् यजुर्गणान् संजीवान् ददृशुः ॥६२॥ १९
त्वया शिष्येणालं ॥६१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हृदि तस्मादानं विप्ररूपेणानुचितमिति भावः। तित्तिराः पक्षिविशेषाः भूत्वा आददुः। ततश्च तैत्तिरीया इति प्रसिद्धाः। सुपेशलाः अतिरम्याः॥ ६२॥ बहुवचनमवांतर
भेदविवक्षया काण्वमाध्यंदिनादिशाखाप्रसंगमाह। याज्ञवल्क्य इत्यादिना। गुरोर्वैशंपायनस्य व्यासेन विनियोज्यानुक्तत्वाद विद्यमानान्यधिकानि गवेषयेत्
मृगयेत् सूपतस्थे सम्यक् तुष्टाव॥ ६३॥ ईश्वरं ऋगादिवेदानां। तथा च श्रुतिः। ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदेन तिष्ठति मध्ये अह्नः सामवेदेनास्तमये मही

यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाददुः। तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः॥ ६३॥ याज्ञवल्क्यस्ततो ब्रह्मंश्छंदांस्यधिगवेष
यत्। गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरं॥ ६४॥ ॥ याज्ञवल्क्य उवाच॥ ॥ ॐ नमो भगवते आदित्यायाखिलजगतामात्मरूपे स्व
ण कालस्वरूपेण चतुर्विधभूतनिकायानां ब्रह्मादिस्तंबपर्यंतानामंतर्हृदयेषु बहिरपि चाकाश इवोपाधिनाऽव्यवधीयमानो
भगवानेक एव क्षणलवनिमेषावयवोपचितसंवत्सरगणेनापादानविसर्गाभ्यामिमां लोकयात्रामनुवहति॥ ६५॥ ॥

यते। वेदैरशून्यस्त्रिभिरिति सूर्य इति॥ ६४॥ नमो भगवते तुभ्यं आदित्याय यो भगवानेक एवेमां लोकयात्रामनुवहतीत्यन्वयः। तदेव दर्शयति। अखिलजगतामा
त्मस्वरूपेणांतर्हृदयेषु कालस्वरूपेण च बहिरपि वर्तमान इति। अखिलजगतामित्यस्य प्रपंचः। चतुर्विधेति। हृदयांतर्वर्तित्वेऽपि जीववत्तेनोपाधिनाऽव्यव
धीयमानः अनाच्छाद्यमानः। कालस्वरूपेण चेत्यस्य प्रपंचः क्षणेति। क्षणलवादयो ये अवयवास्तैरुपचिताः संवत्सरास्तेषां गणेन अपां पृष्ठमर्यादानं शोषणं
विसर्गो वृष्टिस्ताभ्यां॥ ६५॥ ॥

आ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सां०का०
२०

ए

अनेन गायत्री प्रथमपादोक्तवरेण्यपदार्थानुवर्णितो द्वितीयपादार्थानुवर्णनेन स्तौति यदुहेति हे विबुधर्षभ हे सवितः यद्प्पदो भगवतः तव मंडलं त
पतितं तत् समभिधीमहि सम्यगभिमुखेन ध्यायेम पुनस्तथैव संबोधनं प्रसवदं त्रिषवणं वैदिकं कर्म मार्गस्तुं तं न क्वाकांयाम्यखिलानि दुरितानि तस्य
लानि वहवृजिनानि दुःखानि तेषां बीजमज्ञानं च तेषामवमर्जनं विनाशकहेतुपन इति ॥ छ ॥ तृतीयपादेन स्तौति यदुहेति यो भवान् स्थावरजंगमसमूहा
नां स्वाश्रयाणां जीवानां मनइंद्रियप्राणगणानां अनात्मनो जडान् स्वयमात्मैवांतर्यामी प्रचोदयती प्रवर्त्तयति ॥ छ ॥ तृतीयपादमेव मंडलस्थ परतया व्या

यदुहवाव विबुधर्षभ सवितरहस्तपत्यनुसवनमहरहराम्नायविधिनोपतिष्ठमानानामखिलदुरितवृजिनबीजावमर्जन भग
वतः समभिधीमहि तपनमंडलम् ॥ छ ॥ यदुहवाव स्थिरचरनिकराणां निजनिकेतनानां मनइंद्रियासुगणाननात्मनः स्वयमात्मां
तर्यामी प्रचोदयति ॥ छ ॥ य एवेमं लोकमतिकरालवदनांधकारसंज्ञाजगरग्रहगिलितं मृतकमिव विचेतनमवलोक्यानुकंप
या परमकारुणिक ईक्षयैवोत्थाप्याहरहरनुसवनं श्रेयसि स्वधर्माख्यात्मावस्थाने प्रवर्त्तयत्यवनिपतिरिवासाधूनां भयमु
दीरयन्नटति परितश्चाशापालैस्तत्र तत्र कमलकोशांजलिभिरुपहृतार्हणः ॥ छ ॥ ॥

हारणस्तौति य एवेति य एक एव भगवान् अतिकरालवदनो योंधकारसंज्ञोऽजगरग्रहस्तेन गिलितं अत एव मृतकमिव विचेतनं स्वधर्माख्यं यदात्मावस्थानं
प्रसक्त प्रवण एतं त देवश्रेयसि स्मिन् प्रवर्त्तयति किं च यो भवान् अवनिपतिरिव अटति गच्छति आशापालैर्दिगादिभिः कमलकोशयुक्तैः तत्तुल्यैर्वांजलिभिरु २०
पहृतार्हणः दत्तार्घः ॥ छ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत एवंभूतस्त्वमयातः स्फुटं अयातयामानि अन्यैर्यथावेदविज्ञातानि यजूंषि तत्कामोऽहं उपसरामि गच्छामि ॥ ६९ ॥ एवं स्तुतः प्रसादितश्च ॥ ७० ॥ पंचदश शाखाः याः
शतैः परिमितैर्यजुर्भिर्निरकरोत् तास्तैरिति पाठे स एष याज्ञवल्क्यस्तैर्यजुर्भिर्निरकरोदिति जगृहुरधीतवंतः रविणा ॥ अश्वरूपेण वाजेभ्यः केसरेभ्यः वाजेन वेगेन वा
सम्प्रस्ताः शाखाः वाजसनी संज्ञास्ताः शाखा इति वा ॥ ७१ ॥ साम्नः शाखैर्विना गमाह जैमिनेरिति त्वत्सुतः समंतु सुतः तासां पुत्रपौत्राणां क्रमेणैकैकां प्राह ॥ ७२ ॥

त्यक्ताः

संहितां

स१

अथैनं भगवंतं त्वच्चरणनलिनयुगलं त्रिभुवनगुरुभिर्वंदितमहमयातयामयजुःकाम उपसरामीति ॥ ६९ ॥ ॥ स्तुतं त्वाञ्च ॥ श्री ॥
एवं स्तुतः स भगवान् वाजिरूपधरो हरिः ॥ यजूंष्ययातयामानि मुनयेऽदात् प्रसादितः ॥ ७० ॥ यजुर्भिरकरोच्छाखा दश पंचशतैर्वि-
भुः ॥ जगृहुर्वाजसन्यस्ताः काण्वमाध्यंदिनादयः ॥ ७१ ॥ जैमिनेः सामगस्यासीत् सुमंतुस्तनयो मुनिः ॥ सुत्वांस्तु तत्सुतस्ताभ्यामेकैकां प्रा-
ह संहितां ॥ ७२ ॥ सुकर्मा चापि तच्छिष्यः सामवेदतरोर्महान् ॥ सहस्रसंहिताभेदं चक्रे साम्नां ततो द्विज ॥ ७३ ॥ हिरण्यनाभः कौशल्यः
पौष्यंजिश्च सुकर्मणः ॥ शिष्यौ जगृहतुश्चान्य आवंत्यो ब्रह्मवित्तमः ॥ ७४ ॥ ॥

तच्छिष्यः जैमिनेः शिष्यः महान् अतिमेधावी सहस्रसंहितारूपं भेदं चक्रे ॥ साम्नां तं संहिताभेदं ततस्तदनंतरं ॥ ७३ ॥ सुकर्मणः शिष्यौ एकः कौशल्यो हिरण्यनाभः पौष्यं-
जिनामिकस्तौ जगृहतुः ॥ आवंत्यश्चान्यस्तस्यैव शिष्यः सोऽपि जग्राह ॥ ७४ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द्वा०
२१

॰पौष्यंज्यावंत्ययोरपिचकारात्हिरण्यनाभस्यापिपंचशतानिशिष्याआसन्। तेतावतीःशाखायथायथंजगृहुः। तानुदीच्यानुसतःकालतःकांश्चित्प्राच्यांश्चप्रचक्षतेश
सर्वः।यथैवोक्तंवैष्णवे।उदीच्याःसामगाःशिष्याःतस्यपंचशतंस्मृताः।हिरण्यनाभात्तावत्यःसंहितायैर्द्विजोत्तमैः।गृहीतास्तेपिचोच्यंतेपंडितैःप्राच्यसामगाइति।७५।पु
वरप्येतेषांत्रयाणांसुकर्म्मणःशिष्याणांशिष्यांतरेशाखाबाहुल्यंदर्शयंतिलौगाक्षिरितिद्वाभ्यां।७६।कृतोनामहिरण्यनाभस्यशिष्यःस्वशिष्येभ्यःऊचे।शेषाआ

च

उदीच्याःसामगाःशिष्याआसन्पंचशतानिवै। पौष्यंज्यावंत्ययोश्चापितांश्चप्राच्यान्प्रचक्षते।७५। लौगाक्षिर्मांगलिःकुल्यःकुशीदःकु
क्षिरेव। पौष्यंजिशिष्याजगृहुःसंहितांतेशतंशतं।७६। कृतोहिरण्यनाभस्यचतुर्विंशतिसंहिताः। शिष्यऊचेस्वशिष्येभ्यःशेषाआ
वंत्यआत्मवान्।७७। ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेवेदशाखाप्रणयनंषष्ठोध्यायः।६। ॥ सूतउवाच ॥ ॥
अथर्ववित्सुमंतुश्चशिष्यमध्यापयन्स्वकां। संहितांसोपिपथ्यायवेददर्शायचोक्तवान्।१। ॥

पियाःप्रसिद्धाःशाखाः। ताश्चावंत्यःस्वशिष्येभ्यःऊचइति।७७। ॥ इतिद्वादशेषष्ठः। सप्तमेथर्वविस्तारःपुराणव्यसनंततः। पुराणलक्षणादीनिफलंभागवतेश्रुतेः
॥ क्रमप्राप्तमथर्ववेदविभागमाह। शिष्यंकबंधनामानंस्वकांस्वकीयांसंहितांसोपिशिष्योपितंद्विधाविभज्यतदुक्तंवैष्णवे। अथर्ववेदंसमुनिःसुमंतुरमि २१
तद्युतिः शिष्यमध्यापयामासकबंधंसोपितंद्विधा। कृत्वातुवेददर्शायतथापथ्यायदत्तवानिति।१। ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शौल्कायनिप्रभृतीन्

तत्र वेददर्शी स्वसंहितां चतुर्धा विभज्य तुरः शिष्यानध्यापयामास पथ्यश्च त्रिधा विभज्य त्रीनिति । सार्धेन चाह शौल्कायनिरिति । २ अंगिरसः शुनकस्य । शिष्यो बभ्रुः
सैंधवायनश्चेति तदुक्तं । शुनकस्तु द्विधा कृत्वा ददावेकां तु बभ्रवे । द्वितीयां संहितां प्रादात् सैंधवायनसंज्ञित इति । सावर्णाद्याः सैंधवायदीनां शिष्याः । नक्षत्रकल्पः
शांतिकल्पश्चेति । तेनोक्तं । नक्षत्रकल्पो वेदानां संहितानां तथैव च । चतुर्थः स्यादांगिरसः शांतिकल्पश्च पंचम इति । नक्षत्रकल्पादीनां कर्तारित्तत्रा

शौल्कायनिर्ब्रह्मबलिर्मोदोषः पिप्पलायनिः । वेददर्शस्य शिष्यास्ते पथ्यशिष्यानथो शृणु ॥ २ ॥ कुमुदः शुनको ब्रह्मन् जाजलिश्चाप्य
थर्ववित् । ३ बभ्रुः शिष्योथांगिरसः सैंधवायन एव च । अधीयेतां संहिते द्वे सावर्णाद्यास्तथापरे ॥ ३ ॥ नक्षत्रकल्पः शांतिश्च कश्यपांगि
रसादयः । एते आथर्वणाचार्याः शृणु पौराणिकान् मुने ॥ ४ ॥ त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः । वैशंपायनहारीतौ षड् वै
पौराणिका इमे ॥ ५ ॥ अधीयंत व्यासशिष्यात् संहितां मत्पितुर्मुखात् । एकैकामहमेतेषां शिष्यः सर्वाः समध्यगाम् ॥ ६ ॥ कश्यपोहं च
सावर्णी रामशिष्योकृतव्रणः । अधीमहि व्यासशिष्याच्चत्वारो मूलसंहिताः ॥ ७ ॥ पुराणलक्षणं ब्रह्मन् ब्रह्मर्षिभिर्निरूपितं । शृणु
ष्व बुद्धिमाश्रित्य वेदशास्त्रानुसारतः ॥ ८ ॥ ॥

मत्पितुर्मुखंतो ४ । ५ मत्पितुर्मुखादिति प्रथमं व्यासः षट् संहिताः कृत्वा मत्पित्रे रोमहर्षणाय प्रादात् तस्य च मुखादेते त्रय्यारुणादयः एकैकां संहितां अधी
यंत एतेषां षण्णां शिष्योऽहं ताः सर्वाः समधीतवान् । ६ । रामशिष्यो योकृतव्रण एवं चत्वारो वयं व्यासशिष्यात् मूलसंहिता इत्यनेन ततः संहिता बाहुल्यं सूचितं । ७ ॥
शुकपरीक्षित्संवादे निरूपितमपि पुराणलक्षणं तद्वदकथनाय दर्शयति ॥ पुराणेति ॥ ८ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰भा॰
२२

अस्यविश्वस्य। अत्रसर्गोविसर्गश्चस्थानंपोषणमूतयः। मन्वंतरेशानुकथानिरोधोमुक्तिराश्रयइत्यत्रोक्तेः स्थानपोषणेवृत्तिरक्षाशब्दोपात्तेमते। अंतराणि
मन्वंतराणि। वंशोवंशानुचरितमिति। ईशानुकथाः संस्थानिरोधः। अनेनैवात्यंतिकलयरूपामुक्तिरप्युक्ता। हेतुशब्देनजीवाश्रयवासनाशब्दवाच्यमात्मतयो
ता॰ गृहीताः। एवंदशानिरूतैर्लक्षणैरर्थैर्युक्तंमहापुराणंविदुः। केचित्पंचविधं। सर्गश्चप्रतिसर्गश्चवंशोमन्वंतराणिच। वंशानुचरितंचेतिपुराणंपंचलक्षणमिति। महत्
अ सुराणं। अल्पंचेतिव्यवस्थयायत्रदशापिलक्षणानिपृथक्निरूपितंतन्महापुराणं। यत्रत्वन्येषांपंचस्वेवांतर्भावस्तद्विवक्षातस्तदल्पमितिव्यवस्थयेत्यर्थः। १०
सर्गादिलक्षणानिव्याचष्टे। अव्याकृतेत्यादिना। प्रधानस्यगुणानांक्षोभात् योमहान्। तस्मात्त्रिविधहंकारस्तस्माद्भूतमात्राणांसूक्ष्माणांइंद्रियाणांचत

सर्गोस्याथविसर्गश्चवृत्तिरक्षांतराणिच॥ वंशोवंशानुचरितंसंस्थाहेतुरपाश्रयः॥९॥ दशभिर्लक्षणैर्युक्तंपुराणंतद्विदोविदुः। केचित्पंच
विधंब्रह्मन्महदल्पव्यवस्थया॥१०॥ अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः॥ भूतसूक्ष्मेंद्रियार्थानांसंभवःसर्गउच्यते॥११॥ पुरुषा
नुगृहीतानामेतेषांवासनामयः॥ विसर्गोऽयंसमाहारोबीजाद्बीजंचराचरं॥१२॥ वृत्तिर्भूतानिभूतानांचराणामचराणिच। कृता
स्वेननृणांतत्रकामाच्चोदनयाऽपिवा॥१३॥ ॥ या

यं

दर्थानांचस्थूलानांचदेवतानांचसंभवः सर्गः कारणसृष्टिःसर्गइत्यर्थः॥ उच्यतइतियथापेक्षमुत्तरत्राप्यनुषंगः॥११॥ विसर्गंव्याचष्टे पुरुषेणेश्वरेणानुगृहीतानामे ना
तेषांमहदादीनां। पूर्वकर्मवासनाप्रधानोऽयंसमाहारः कार्यभूतश्चराचरप्राणिरूपोबीजाद्बीजमिवप्रवाहापन्नोविसर्गउच्यतेइत्यर्थः॥१२॥ चराणांभूतानामचरा राम
णिचराणिचकाराच्चराणिचकामाद्वृत्तिः॥ तत्रतुनृणांस्वेनस्वभावेनकामाच्चोदनयापिवायानियतावृत्तिर्जीविकाकृतासावृत्तिरुच्यतइत्यर्थः॥१३॥ २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिर्यङ्मर्त्यर्षिदेवेषु ये ऽच्युतावताराः तेषामीहा लीला सा विश्वस्य रक्षोच्यत इत्यर्थः। यैरवतारैरिति समासान्निष्कृष्य कथंचित्संबंधः। त्रयीद्विषो दैत्याः १४ षड्विध
मन्वंतरमुच्यते षड्विधत्वमेवाह मनुरिति मन्वादयः षडेते वर्ण्णाः गी। स्वस्वाधिकारेण यदा प्रवर्तंते तदा मन्वंतराणीत्यर्थः १५ वंशमाह ब्रह्मणः सकाशात्प्र
सूतिर्येषां ब्रह्मप्रसूतानामित्यर्थः तेषामन्वयो वंशः तत्र भवा वंश्याः तेषां वृत्तं ये च तद्वंशधरास्तेषां च वृत्तं वंश्यानुचरितमुच्यते अस्य विश्वस्य स्वभावतो मायातो निष्पन्नस्य

रक्षाच्युतावतारेहा विश्वस्यानु युगे युगे। तिर्यङ्मर्त्यर्षिदेवेषु हन्यंते यैस्त्रयीद्विषः १४ मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वराः। ऋषयोंऽशा
वतारश्च हरेः षड्विधमुच्यते १५ राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकान्वयः। वंश्यानुचरितं तेषां वृत्तं वंशधराश्च ये १६ नैमित्तिकः प्रा
कृतिको नित्य आत्यंतिको लयः। संस्थेति कविभिः प्रोक्तश्चतु[illegible]र्धास्य स्वभावतः १७ हेतुर्जीवोऽस्य सर्गादे
रविद्याकर्मकारकः। यं चानुशायिनं प्राहुरव्याकृतमुतापरे १८ व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु। मायामयेषु तद्ब्रह्म
जीववृत्तिष्वपाश्रयः॥ १९॥ ॥

यद्वा मायातस्तस्य चतुर्विधो लय इति १७ अस्य जगतः सर्गादेर्हेतुर्निमित्तं जीवः सोऽत्र हेतुरुच्यत इत्यर्थः तस्य निमित्ततामाह अविद्याकर्मकारकः कर्मकर्ता जी
वादृष्टप्रयुक्तत्वाद्विश्वसर्गादेः स तु तत्र हेतुरित्यर्थः ननु तु शायी निमित्तमिति केचित् अव्याकृतमित्यपरे तत्राह यमिति चैतन्यप्राधान्येनानुशायिनं उपाधिप्रा
धान्यविवक्षया अव्याकृतं १८ अपाश्रयमाह व्यतिरिकेति जाग्रदादिष्ववस्थासु जीवतया वर्तत इति जीववृत्तयो विश्वतैजसप्राज्ञास्तेषु मायामयेषु साक्षितयान्व
यः समाध्यादौ च व्यतिरेको यस्य तद्ब्रह्म संसारे प्रतीतिबाधयोरधिष्ठानावधिभूतमपाश्रयः॥ १९॥ ॥

च्यत इत्यर्थः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०द्वा०　　　　पंचता अंतो या सां

तदेवमदृष्टांतं प्रपंचयति । पदार्थेषु घटादिषु द्रव्यं मृदादि यथा युतं अन्वितं अयुतं च बहिरप्यवस्थानात् । रूपनामसु च सन्मात्रं सत्तामात्रं यथा एवं बीजं गर्भाधानमादि येषां तासु देहावस्थासु जन्मस्वपि अधिष्ठानत्वेन युतमयुतं च यत्तदपाश्रय इति । २० एवं दशलक्षणानि व्याख्याय तत्त्वं वर्णयति महात्मानमिति । यदुक्तं तदाह । विरमेतेति यदा सर्गादीनां मायामयत्वानुसंधानेन । वामदेवादेरिव स्वयमेव चित्तं विरमेत् । इहैवानुष्ठितेन योगेन वा देवहूत्यादिवत् । तदा वृत्तित्रयाश्रयात्मानं वेद तदा वा विद्यानिवृत्ते रीहायाः निवर्तत इत्यर्थः । २१ पुराणविभागप्रस्तावेन तल्लक्षणादिप्रासंगिकमुक्त्वा प्रस्तुतमाह । एवंविधैर्लक्षणैर्लक्ष्याणि

पदार्थेषु यथा द्रव्यं सन्मात्रं रूपनामसु । बीजादिपंचतांतासु ह्यवस्थासु युतायुतं । २० विरमेत यदा चित्तं हित्वा वृत्तित्रयं स्वयं । योगेन वा तदात्मानं वेदेहाया निवर्तते । २१ एवं लक्षणलक्ष्याणि पुराणानि पुराविदः । मुनयोष्टादश प्राहुः क्षुल्लकानि महांति च । २२ ब्राह्मं पाद्मं वैष्णवं च शैवं लैंगं सगारुडं । नारदीयं भागवतमाग्नेयं स्कांदसंज्ञितं । २३ भविष्यं ब्रह्मवैवर्तं मार्कंडेयं सवामनं । वाराहं मात्स्यं कौर्मं च ब्रह्मांडाख्यमिति त्रिषट् । २४ ब्रह्मन्निदं समाख्यातं शाखाप्रणयनं मुनेः । शिष्यशिष्यप्रशिष्याणां ब्रह्मतेजोविवर्धनं । २५ ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे सप्तमोऽध्यायः ॥ ॥ शौनक उवाच ॥ ॥

२३ २४ । त्रिषट् अष्टादश । २४ । उपसंहरति । ब्रह्मन्निति । मुनेर्व्यासस्य तच्छिष्यादीनां च ब्रह्मतेजो ब्रह्मवर्चसं तद्विवर्धनं श्रोतॄणामिति शेषः । २५ ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे टीकायां सप्तमोऽध्यायः ॥ ॥ अष्टमे तु तपश्चर्यां मार्कंडेयस्य मोहकैः । कामादिभिरसंमोहो नरनारायणस्तुतिः ॥ ८ ॥ २३

क

पुराणविभागप्रसंगेनपुराणैर्तुर्मार्कंडेयस्यचरितंप्रस्तुतमाह। सूतेति। त्वमेववक्तुंयोग्यइत्याह। तमसिसंसारेत्वमतांपारदर्शनिस्त्वन्निवर्त्तकः। ॥१॥ वक्तव्यमाह
आकुरिति। उर्वरितः अवशिष्टः येनकस्मांतेनैतत्कथंघटतइत्येकःप्रश्नः। २ प्रलयानावहत्येतन्नघटतइत्याहसर्वाशति। यतोभार्गवर्षभःकोपिप्राकृतिकोनैमि
त्तिकोवा। ३ अन्यदप्यघटितमेवेत्याह। एकएवेति। तोकंबालकं। ४ कौतुहलमौत्सुक्यं। तंसंशयं। नकेवलंत्वंमहायोगीकिंतुपुराणेष्वपिज्ञात्वत्वेनसंमतः। ५ प्रश्नम

शौनकउवाच॥ ॥सूतजीवचिरंसाधोवदनोवदतांवर॥ तमस्यपारेत्वमतांनृणांत्वंपारदर्शनिः॥१॥ आहुश्चिरायुषमृषिंमृकंडतन
यंजनाः॥ यःकल्पांतेउर्वरितोयेनग्रस्तमिदंजगत्॥२॥ सवाअस्मत्कुलोत्पन्नःकल्पेस्मिन्भार्गवर्षभः॥ नैवाधुनापिभूतानांसंप्लवःको
६ पिजायते॥३॥ एकएवार्णवेभ्राम्यन्ददर्शपुरुषंकिल॥ वटपत्रपुटेतोकंशयानंत्वेकमद्भुतं॥४॥ एषनःसंशयोभूयान्सूतकौतूहलंय
तः॥ तन्नश्छिंधिमहायोगिन्पुराणेष्वपिसंमतः॥५॥ सूतउवाच॥ ॥प्रश्नस्त्वयामहर्षेयंकृतोलोकभ्रमापहः॥ नारायणकथायं
त्रगीताकलिमलापहा॥६॥ प्राप्तद्विजातिसंस्कारोमार्कंडेयःपितुःक्रमात्॥ छंदांस्यधीत्यधर्मेणतपःस्वाध्यायसंयुतः॥७॥ ॥

मिनंदति। हे महर्षे अयंप्रश्नः तत्रहेतुःनारायणेति। यत्रप्रश्नविषये ॥६॥ तेनमार्कंडेयस्तपसाभगवंतमाराध्यमायादर्शनंवव्रे। ततश्चतेनैवभगवन्मायया
सप्तकल्पादृष्टानान्यैरित्युत्तरंवक्तुमादितश्चारभ्यतस्यचरितमाहप्राप्तेत्यादिना। मार्कंडेयोमृत्युंजिगायेतिपंचमश्लोकेनान्वयः मध्यमग्रंथेनतस्यधर्मःक
थ्यते। प्राप्तोद्विजातिसंस्कारः। उपनयनाख्योयेनसः पितुःसकाशात्गर्भाधानादिक्रमात्छंदांसिवेदान्॥७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा०श०
२४

बृहद्व्रतधरः नैष्ठिकः ब्रह्मचारी सन् ॥ ८ नियमर्द्धये धर्मर्द्धये श्रग्न्यादिषु पंचसु हरिमर्चयन् ॥ ९ नैत्यं गुर्वर्थमाहृत्य तेनानुज्ञातश्चेत्तर्हि बुभुजे नो चेत् सकृत्
दापि उपोषितो भवति ॥ १० तेन मृत्युंजयेन ॥ ११ ॥ १२ ध्वस्ताः क्लेशरागादयो यस्य तेनांतरात्मना ध्वेसा हृतात्मनसा ॥ १३ ॥ १४ तस्य तपोनिष्ठा मितिहासेन वर्णयति ॥

बृहद्व्रतधरः शांतो जटिलो वल्कलांबरः । बिभ्रत्कमंडलुं दंडमुपवीतं समेखलं ॥ ७ कृष्णाजिनं साक्षसूत्रं कुशांश्च नियमर्द्धये श्रग्न्यर्क
गुरुविप्रात्मसु अर्चयन् संध्ययोर्हरिं ॥ ९ सायंप्रातः स गुरवे भैक्ष्यमाहृत्य वाग्यतः । बुभुजे गुर्वनुज्ञातः सकृन्नो चेदुपोषितः ॥ १० ॥ ए
वं तपः स्वाध्यायपरो वर्षाणामयुतायुतं । आराधयन् हृषीकेशं जिग्ये मृत्युं सुदुर्जयं ॥ ११ ब्रह्मा भृगुर्भवो दक्षो ब्रह्मपुत्राश्च ये परे ॥
नृदेवपितृभूतानि तेनासन्नतिविस्मिताः ॥ १२ इत्थं बृहद्व्रतधरस्तपःस्वाध्यायसंयमैः । दध्यावधोक्षजं योगी ध्वस्तक्लेशांतरात्मना
॥ १३ तस्यैवं युंजतश्चित्तं महायोगेन योगिनः । व्यतीयाय महान् कालो मन्वंतरषडात्मकः ॥ १४ एतत्पुरंदरो ज्ञात्वा सप्तमेऽस्मिन्
किलांतरे । तपो विशंकितो ब्रह्मन्नारेभे तद्विघातनं ॥ १५ गंधर्वाप्सरसः कामं वसंतमलयानिलौ । मुनये प्रेषयामास रजस्तोकमदौ त
था ॥ १६ ते वै तदाश्रमं जग्मुर्हिमाद्रेः पार्श्व उत्तरे । पुष्पभद्रा नदी यत्र चित्राख्या च शिला विभो ॥ १७ तदाश्रमपदं पुण्यं पुण्यद्रुमलतांचितं
पुण्यद्विजकुलाकीर्णं पुण्यामलजलाशयं ॥ १८ ॥

एतदित्यादिना अस्मिन् सप्तमे मन्वंतरे तपसा मत्पदं गृहीष्यतीति विशंकितः मुनये मत्सरिणो प्रेषयामास
यितुं रजस्तोकमिति प्रियं मपत्यं लोभः मदश्चतौ ॥ १५ ॥ १७ तदाश्रमपदं प्रविष्टो वायुर्ववाति द्वितीयेनान्वयः ॥ पुण्यैर्द्रुमैर्लताभिश्चांचितं पूजितं पुण्यद्विजानां कु
लीनानां कुलै राकीर्णं पुण्याश्च मलाश्च जलाशया यस्मिन् ॥ १८ ॥ ॥ राम
१ प्रीतः सन् तपसो विघ्नमारेभे ॥ १५ ॥ २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मत्तभ्रमराणां संगीतं संगीतं यस्मिन्। मत्तकोकिलानां कूजितं यस्मिन्। मत्तबर्हिणां एव नटास्तेषामाटोपः संभ्रमो यस्मिन्। मत्तद्विजानां पक्षिणां कुलैराकुलं व्याप्तं। १९॥
एवं वृत्तं तदाश्रमपदं प्रविष्टः मन्दवायुर्मलयानिलो ववौ वौ प्रससार। उत्कं नयत् उद्दीपयन्। तत्र वृक्षेषु प्रवेशान्माद्यं। हिमनिर्झरिकणानामादाना तत्रोहं सं पुष्पप
रिष्वं गात् सौगंध्यं चोक्तं। २०। किंच। उद्यच्चंद्रो यस्मिन् तन्निशावक्त्रं रजनीमुखं यस्मिन्सः। प्रवालाः स्तबकानामालयः श्रेण्यो येषु तैः। पुष्पं तिविटपैः संश्लिष्यंती तिगोपा

मत्तभ्रमरसंगीतं मत्तकोकिलकूजितं। मत्तबर्हिनटाटोपं मत्तद्विजकुलाकुलं। १९। वायुः प्रविष्ट आदाय हिमनिर्झरशीकरान्। सुम
नोभिः परिष्वक्तो ववावृत्तं नयन् स्मरं। २०॥ उद्यच्चंद्रनिशावक्त्रः प्रवालस्तबकालिभिः। गोपद्रुमलताजालैस्तत्रासीत् कुसुमाकरः। २१॥
स्तूयमानो गंधर्वैर्गीतवादित्रयूथकैः। अदृश्यतात्तचापेषुः स्वस्त्रीयूथपतिः स्मरः। २२। कृत्वाग्निं समुपासीनं दहस्त्रः शक्रकिंक
राः। मीलिताक्षं दुराधर्षं मूर्त्तिमंतमिवानलं। २३। ननृतुस्तस्य पुरतः स्त्रियो यो गायका जगुः। मृदंगवीणापणवैर्वाद्यं चक्रुर्मनोरमं
२४। संदधे स्वधनुषि कामः पंचमुखं तदा। मधुर्मनोरजस्तोकं दंतस्यात्मकं पयन्। २५॥ ॥

कुसुमाः लताश्च तेषां जालैः समूहैश्चाविर्बभूव। २१। किंच। तदा गीतवादित्रयूथकैः कायकादिसमुदायिभिः। गंधर्वैः स्तूयमानः तथा स्वस्त्रियो अप्सरसः तासां यूथपतिः
आत्तं चापमिषुश्च येन स स्मरः आत्तचापेषुः अदृश्यत। २२। दुराधर्षं अग्निमिव तिस्मंतं शक्राः। २३। शोषणदीपनसंमोहनतापनोन्मादनाख्यानि पंचमुखानि यस्य तं शरं सं
दधे। तदैव मधुर्वसंतः। रजस्तोकं अम्बुपुत्त्रमार्षं अन्ये चैवं जनता आत्मनस्य मनीप्यकं पयन्। २५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०प्र०
२५

किंच। वायुर्मलयानिलः पुंजिकस्थल्यास्तत्सूक्ष्मं वासो जहार॥२७॥ सर्वं तेषां कर्म तत्र तस्मिन् मोघं व्यर्थं श्रीनीशास्य निर्देवस्य॥२८॥ मुनेरपकुर्वतः प्रतिकूलमाच
रतः। हे मुने श्रेष्ठत्वः अहंकारस्यभावं विकारं ३० निस्तेजसं स्नानवृत्तं स्वराडिंद्रः ३१ नरनारायणरूपी हरिः ३२ तावनुवक्ष्यति शोभांगौ रोवंलसन्नाजिनं
कृष्णलंचांबरं ययोस्तौ। पवित्रे पाणौ ययोस्तौ त्रिवृत् त्रिगुणं नवतंतुकमिति वा॥ त्रिवृद्वा हि॥ पवमानमित्यादौ नवकैःप्रयोगादिति नवतंतवा दिमयं ३३ वेदं च

क्रीडंत्याः पुंजिकस्थल्याः कंदुकैः स्तनगौरवात् भृशमुद्विग्नमध्यायाः केशविस्रंसितस्रजः २६ इतस्ततो भ्रमद्दृष्टेश्चलंत्या अनुकंदु
कं। वायुर्जहार तद्वासः सूक्ष्मं त्रुटितमेखलम् २७ विससर्ज तदा बाणं मत्वा तं स्वजितं स्मरः। सर्वं तत्राभवन्मोघमनीशस्य यथो
द्यमः २८ इत्थं तमपकुर्वंतो मुनेस्तत्तेजसा मुने दह्यमानानि वहतु प्रबोध्याहिमिवार्भकाः २९ इतीशानुचरैर्ब्रह्मन्न धर्षितो
पि महामुनिः। यन्नागादहमो भावं न तच्चित्रं महत्सु हि ३० दृष्ट्वा निस्तेजसं कामं सगणं भगवान् स्वराट्। श्रुत्वानुभावं ब्रह्मर्षेः
विस्मयं समगात् परं ३१ तस्यैवं युंजतश्चित्तं तपःस्वाध्यायसंयमैः। अनुग्रहायाविरासीन्नरनारायणो हरिः ३२ गौरश्यामलौ
नवकंजलोचनौ चतुर्भुजौ रौरववल्कलांबरौ पवित्रपाणी उपवीतकं त्रिवृत्कमंडलुं दंडमृजुं च वैणवं ३३ पद्माक्षमालामुत
जंतुमार्जनं वेदं च साक्षात्तप एव रूपिणौ तपत्त
डि
डिद्वर्णपिशंगरोचिषा प्रांशू दधानौ विबुधर्षभार्चितौ ३४

दुर्निरीक्ष्यं॥ किंच साक्षात्तप एव
एतौ तत्र हेतुं तप्तडिद्वर्णादीदीप्यमानविद्युत्संकाशं यत्पिशंगरोचिस्तेन रूपिणौ मूर्तिमंतौ तादृक्तेजोयुक्तं मूर्तिमान्तपोमयत्वेन प्रकाशमानाविव्स
र्थः प्रांशू उन्नतौ ३४ ॥

राम
२५

उच्चैर्मधुरतायाः आदरेण।३५। तयोः संदर्शनेन यः आनंदस्तेन निर्वृत्ता उपशांता आत्मेंद्रियाशयाः देहेंद्रियमनांसि यस्य सः। न सेहे नाशक्नोत्।३६। आश्लिषन् आलि-
घ्नन् आलिंगयन्निव।३७। पादयोरवनिज्य मानं पादौ प्रक्षाल्यार्हणेन अर्घेण।३८। पादाम्भसा पादौ आनम्य गरिष्ठौ पूज्यमानौ तौ प्रति।३९। अन्तर्यामिणस्तस्यैव प्रवर्तक- प्राणादि
त्वादात्मनस्त्वस्वतंत्रत्वात्तं प्रपरपन्नाह किमिति। हे विभो तव तां किं अहं वर्णये कथं [stain] स्तौमि यत् येन त्वयैव उदीरितः प्रेरितोऽसुः प्राणः संस्पंदते प्रवर्तते। तमनु

तेवै भगवतो रूपे नरनारायणावृषी ॥ दृष्ट्वोत्थायादरेणोच्चैर्ननामांगेन दंडवत् ॥३५॥ स तत्संदर्शनानंदनिर्वृतात्मेंद्रियाशयः ॥ हृष्ट
रोमाश्रुपूर्णाक्षो न सेहे तावुदीक्षितुं ॥३६॥ उत्थाय प्रांजलिः प्रह्व औत्सुक्यादाश्लिषन्निव ॥ नमो नम इतीशानौ बभाषे गद्गदाक्षरं ॥३७॥
तयोरासनमादाय पादयोरवनिज्य च ॥ अर्हणेनानुलेपेन धूपमाल्यैरपूजयत् ॥३८॥ सुखमासनमासीनौ प्रसादाभिमुखौ मुनी
पुनरानम्य पादाभ्यां गरिष्ठाविदमब्रवीत् ॥३९॥ मार्कंडेय उवाच ॥ ॥ किं वर्णये तव विभो यदुदीरितोसुः संस्पंदते तमनु वाङ्
मन इंद्रियाणि ॥ स्पंदंति वै तनुभृतामजशर्वयोश्च स्वस्याप्यथापि भजतामसि भावबंधुः ॥४०॥ ॥

च वागादयः संस्पंदंति। अत्र हेतुः। वैश्रन्वयव्यतिरेकाभ्यां श्रोत्रस्य श्रोत्रमित्यादिश्रुतिभिश्च तत्त्वसिद्धमित्यर्थः। न केवलं प्राकृतानां तनुभृतां किंत्वजशर्वयोश्चातःस्व
स्य ममापि तथैव॥ एवं यद्यपि न कचिदपि कस्यापि स्वातंत्र्यं। यथा दारुयंत्रवत्तत्त्वं वर्तितैरपि वर्गादि निर्वर्जितानां पुंसां भावबं[stain]धुः आत्मबंधुरिष्यिनतु पिप्रा
दिवद्देहमात्रबंधुः। अहो स्वपालुता तवेत्यर्थः।४०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०भा०
२६

ननुकथमावांप्राणादिप्रवर्त्तकौधर्मपुत्रत्वादावयोरितिचेत्तत्राह ॥ भूरीणीति ॥ हेभगवन्भगवतस्तववश्मेभूरीणीत्रिलोक्याः क्षेमायपालनायतापविरमायदुःखनिवृत्त्यै
मृत्युजित्यैमोक्षाय ॥ ननुत्वंकस्याःपितुत्रइत्यर्थः ॥ अत्रदृष्टांतः ॥ यथेदंविश्वमवितुंश्रमास्त्वनुमस्मिकूर्मादिलक्षणाःनानाअनेकप्रकाराबिनर्षितिवत् ॥ नकेवलंपालनादि
मात्रंतवकर्म ॥ किंतुसृष्टिःलयावपीत्याह ॥ सृष्टेति ॥ तत्राप्यन्यनिरपेक्षत्वेदृष्टांतः ॥ ऊर्णनाभिरिवेति ॥ ४१ ॥ यस्माद्देवंतस्मात्तवांघ्रिमूलंनःशरणंगामीत्याहतस्येति ॥ त
स्यावितुंवितुःपालकस्यस्थावरजंगमानामीश्वरस्यतस्यजीमितितृतीयश्लोकस्यानुषंगः ॥ कथंभूतमंघ्रिमूलं ॥ यत्स्वयंयत्रस्थितंकर्मगुणकालानांरजोमलं ॥ अ
न्यच्चपूर्वोक्तंतापादयोनस्पृशंतितिरूजइतिपाठः ॥ यत्तवेदोरुदयेयेषांतेवेदतात्पर्यविदोमुनयः ॥ यदेवस्तुवंति ॥ नितरांनिमंतितितत्तत्त्वमाश्रयेएवंस्तवनादि
पा जनं२

मा
मूर्त्तीइमेभगवतोभगवंस्त्रिलोक्याःक्षेमायतापविरमायचमृत्युजित्यै ॥ नानाबिभर्ष्यवितुमन्यतनूर्यथेदंसृष्ट्वापुनर्ग्रससिसर्वमिवोर्णना
भिः ॥ ४१ ॥ तस्मादिवतुःस्थिरचरेशितुरंघ्रिमूलंयत्स्थंनकर्मगुणकालरजःस्पृशंति ॥ यद्वैस्तुवंतिनिनमंतियजंत्यभीक्ष्णंध्यायंतिवेदहृदया
मुनयस्तदाप्त्यै ॥ ४२ ॥ नान्यंतवांघ्र्युपनयादपवर्गमूर्त्तेः ॥ क्षेमंजनस्यपरितोभियईशविद्मः ॥ ब्रह्माबिभेत्यलमतोद्विपरार्ध्यधिष्ण्यः ॥ कालस्य
तेकिमुततत्कृतभौतिकानाम् ॥ ४३ ॥ ॥

कुर्वंति ॥ ४२ ॥ यतःअन्यःपुरुषार्थोनास्तीत्याह ॥ नान्यमिति ॥ अंघ्र्युपनयात्श्रीमच्चरणाश्रयात्अन्यत्क्षेमंनविद्मःपरि
तःसर्वेष्वपिलोकेषुभीर्यस्मितस्यजनस्यतदेवाह ॥ द्विपरार्ध्यं धिष्ण्यंस्थानंयस्यसः ॥ ब्रह्मापितेकालस्यत्वद्भ्रूविजृंभरूपात्कालात् लंबिभेतीति अतःकिमुत
वक्तव्यंतेनब्रह्मणाकृतानांभौतिकानांप्राणिनांभयमितिभावः ॥ ४३ ॥ ॥

राम
२६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मादेवंतत्तस्मात्तवपादमूलंभजामि। कथंभूतस्य। ऋतधियः सत्यज्ञानस्वरूपस्य। यद्वा ऋतासत्याधीर्यस्य यस्मिन्वातस्य। आत्मागुरोर्जीवस्यनियंतुः। अतः का
रणात्परस्य। किंकृत्वा। आत्मछदिं। स्वात्मावरकं। अपार्थंचनिःफलं असच्चतुछं। अस्यंचनश्वरं। इदंदेहादि हित्वादेहादिभजनंत्यक्त्वा। अमच्चेत्कथंप्रतीयते
त तत्राह। अभिज्ञमात्रं। नद्यसंतमसत्। किंवात्ममात्रं। नततः पृथगस्तीत्यर्थः। नन्वपवर्गायेतन्नवतु। मद्भजनंफलांतरार्थंत्विन्मद्भजनंकार्यमेवतत्राह। त
र्हीति यदित्वांभजति पुरुषः। तर्हितेत्वत्त एवसर्वमनीषितमर्थंविंदेतेति। ४४। ननुब्रह्मरुद्रावपिममैवमूर्तीं अतोमामेवकिमित्यंतमाद्रियसे। तत्राह सत्वमि

तद्वैभजा ऋतधियस्तवपादमूलंहित्वेदमात्मछदिचात्मगुरोःपरस्य। देहाद्यपार्थमसदंत्यमभिज्ञमात्रंविंदेतते तर्हिसर्वमनीषितार्थं
४४ सत्वंरजस्तमइतीशतवात्मबंधोमायामयाःस्थितिलयोदयहेतवोऽस्य। लीलाधृतायदपि। सत्वमयीप्रसांत्यैनान्येनृणांम् न्ये
सनयो मोहभियश्चयाभ्यां। ४५ तस्मात्तवेह भगवन्नथतावकानांशुक्लांतनुंस्वदयितांकुशलाभजंति। यत्सात्वताःपुरुषरू
पमुशंतिसत्वंलोकोयतोऽभयमुतात्मसुखंनचान्यत्। ४६। ॥

ति। यदपियद्यपितवैवमायया आकृता एतालीलास्त्वयैवधृताः तथापियासत्वमयीसैवप्रशांत्यैमोक्षाय। नकेवलंअस्यप्रशांत्यभावमात्रमस्मद्भजनेकिंत्वनिष्टंचकिं
चिदन्यथात्वेनवेदित्याह व्यसनेति। ४५ तदेवसदाचारेणद्रढयति। तस्मादिति। हेभगवन्नतवशुक्लांतांतनुंश्रीनारायणाख्यां अत्रहेतुः यतःसत्वादेः अथतावका
नांच शुक्लांतनुंनराख्यां यद्यस्मात्सात्वताःसत्वमेवपुरुषस्येश्वरस्यरूपमुशंतिमन्यंते नत्वन्यत् रजतमश्चेति। अत्रहेतुः। यतःसत्वात्लोकोवैकुंठाख्यः। लो
कत्वेमत्सप्पन्नयंच मोगेसत्यपात्मसुखंच। ४६। ॥

ना०भा०
२७

अतस्तं प्रणमति। तस्मै नमस्यंतीदं सायमुद्रायसंयतगिरेति यतवाचे। अथ च निगमेश्वराय वेदमार्गप्रवर्तकाय।४७। वेदार्थसंप्रदायप्रवर्तनहेतुत्वं वदन्स्तौ
तियमिति। कपटेंद्रियमार्गैर्भ्रमधीः विभ्रमबुद्धिः पुमान्। स्वे[ं]द्रियादिषु नियंतृत्वेन संतमपि यं त्वां न वेद॥ इंद्रियार्थेषु विषयेषु। बुद्धिविक्षेपहेतुः। तन्मायया तस्य
तवैव मायया आवृता आत्मनिष्ठा मतिर्यस्य सः। सोऽपि आद्य एव पूर्वमिश्रावेव। अखिलगुरोस्तव तत्त्वकीर्तिं वेदमुपसाद्य प्राप्य तं त्वां साक्षाद्वेद।४८। वेदेनैव तत्
ज्ञानमित्युपपादयन्प्रणमति। तस्य तद्दर्शनं निगमेन भवतीति कथंभूतं। आत्मनस्तव रहः। रहस्यप्रकाशकं। अन्यथा दुर्ज्ञेयत्वमाह। अत्र परा ब्रह्मसुख्याःक

३२

तस्मै नमो भगवते पुरुषाय भूम्ने विश्वाय विश्वगुरवे परदेवतायै। नारायणाय ऋषये च नरोत्तमाय हंसाय सं[य]तगिरे निगमेश्वराय।४७। यं वै न
वेद वितथाक्षपथैर्भ्रमद्धीः संतं स्व[खे]ष्वसुषु हृद्यपि दृक्पथेषु॥ तन्मायया आवृतमतिः स उ एव साक्षादाद्यस्तवाखिलगुरोरुपसाद्य वेदं।४८॥
यद्दर्शनं निगममात्मरहःप्रकाशं मुह्यंति यत्र कवयोऽजपरा यतंतः॥ तं सर्ववादविषयप्रतिरूपशीलं वंदे महापुरुषमात्मनिगू
ढबोधं।४९॥ ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे अष्टमोऽध्यायः॥ ॥

वयोऽपि सांख्ययोगादिभिर्यतमानाः यत्र त्वयि मुह्यंति। कुत इत्यत आह। सर्वेषां सांख्यादिवादानां विषया भेदादयस्तेषां प्रतिरूपं तत्तदनुसारि शीलं स्वभावो यस्य तं॥
कुतः आत्मना देहादिसंघाते नु निगूढो बोधो यस्य तं। एवंभूतं महापुरुषं त्वां वंदे।४९॥ ॥ इति द्वादशे अष्टमोऽध्यायः॥ नवमे भगवन्मायादिदृक्षोर्दर्शनं मुनेः॥
मायाशिशोर्लयाब्धौ च मुनेर्निर्वेशनिर्गमौ।१॥ ॥ २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवतः परि[तो]तोषपूर्वकं तदपेक्षितवरदानं कथयितुमाह संस्तुत इत्यादिना । आत्मसमाधिना चित्तैकाग्र्येण वयं ते परितुष्टाः स्मेति बहुवचनं सर्वदेवाभिप्राये-
ण । वरदेशादित्येकवचनं तयोरैक्याभिप्रायेण प्रतीच्छ गृहाण । वरेणैतं दयतावताऽलं जितमुत्कर्षो दर्शितः ॥ मम तु वराकाङ्क्षा नास्तीत्याह वरेणेति । ५ यस्य श्रीमत्पा

सूत उवाच ॥ ॥ संस्तुतो भगवानित्थं मार्कंडेयेन धीमता । नारायणो नरसखः प्रीत आह भृगूद्वहं ॥१॥ श्रीभगवानुवाच ॥ ॥ भो भो ब्र-
ह्मर्षिवर्योऽसि सिद्ध आत्मसमाधिना । मयि भक्त्यानपायिन्या तपःस्वाध्यायसंयमैः ॥२॥ वयं ते परितुष्टाः स्म त्वद्बृहद्व्रतचर्यया ॥ वरं प्रती-
च्छ भद्रं ते वरदेशाद्दभीप्सितं ॥३॥ ऋषिरुवाच ॥ ॥ जितं ते देवदेवेश प्रपन्नार्तिहराच्युत ॥ वरेणैतावतालं नो यद्भवान्समदृश्यत
॥ गृहीत्वाजादयो यस्य श्रीमत्पादाब्जदर्शनं ॥ मनसा योगपक्वेन स भवान्मेऽक्षिगोचरः ॥५॥ अथाप्यंबुजपत्राक्ष पुण्यश्लोकशिखामणे
द्रक्ष्ये मा[यां] यया लोकः सपालो वेद सद्भिदां ॥६॥ सूत उवाच ॥ ॥ इतीडितोऽर्चितः काममृषिणा भगवान्मुने ॥ तथेति स स्मयन्प्रागाद्ब-
दर्याश्रममीश्वरः ॥७॥ तमेव चिंतयन्नर्थमृषिः स्वाश्रम एव सः ॥ वसन्नग्न्यर्कसोमांबुभूवायुवियदात्मसु ॥८॥ ॥

दाब्जदर्शनं मनसा परिगृहीत्वा प्राप्य अजादयो भजंति स भवान्मेऽक्षिगोचरो जातोऽस्ति किमतः परं वरेण प्रयोजनं ॥५॥ द्रक्ष्ये इति द्रष्टुमिच्छामि । लोकपालैर्ब्रह्मादिभिः सहि-
तोऽयं लोको जनः सद्भिदां सति वस्तुनि भिदां यया वेत्ति ६ तथेति भद्रमस्त्विति । ईश्वरः स्मयन्प्रागात् ॥ प्राग अंतरे क्रियाविशेषणं ॥७॥ तमेवार्थं मायादर्शनरूपं चिंतयन्
अग्न्यादिमूर्तिषु ॥८॥

पश्यति तां मायां द्रक्ष्ये

या किंरूपा कदा वा द्रक्ष्यामीति चिंतयन् स्वाश्रमे आस्ते किं कुर्वन्

तमेव हरिं ध्यायन्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नावबद्धैर्मनोमयैर्दृश्यैः क्वचित्कदाचित्क्षेम॥रसंप्लुतः प्रमोदेकं प्राप्तः ।९। मायादर्शितमाहात्म्येसत्यादिना ।१०। तं वायुर्बलाहकामेघाश्च नवनश्चाविर्बभूवुः । ते मनु
च तडिद्भिः सहिता उच्चैः स्वनंतो गर्जितैः । अहोरंध्रागंतं घनं तस्य विष्टाः । अग्नि॥नोवर्षधारा मुमुचुः ।११। चतुर्दिक्षु वर्तमानाः । संसृष्टा । समीरवेगेनोर्मयस्तै
र्भूतलं ग्रसंतः । नयानकाश्येषु महानयास्वावर्तायिषु गंभीरघोषेषु तेष्वतेष्व ।१२। आत्मनासहजरायुजादिचतुर्विधंजगदंतर्बहिश्चोपतापितं वीक्ष्य मां

ध्यायन्सर्वत्रं च हरिं नावबद्धै॥र्वैरपूजयत । क्वचित्सूज्ञां विसस्मार त्वक्वचित्सरसंप्लुतः ।९। तस्मै कदाचिद्गुरुश्रेष्ठ पुष्पभद्रातटे मुने । उ
पासीनस्य संध्यायां ब्रह्मन्वायुरभून्महान् ।१०। तं चंडशब्दं समुदीरयंतं बलाहकाश्चन्वनवकरालाः । अह्नस्य विष्टा मुमुचुस्तडिद्भिः स्व
नंतउच्चैरभिवर्षधाराः ।११। ततो व्यदृश्यंत चत्वारः समुद्राः समंततः । समातल्लमाग्रसंतः । समीरवेगोर्मिभिरुग्रनक्रमहाभयावर्तगंभीरघो
षाः ।१२। अंतर्बहिश्चाद्भिरतिद्युभिः खरैः शतह्रदाभीरुपतापितं जगत् । चतुर्विधं वीक्ष्य सहात्मना मुनिर्जलाप्लुतां क्ष्मां विमनाः समत्रस
त् ।१३। तस्यैवमुद्वीक्षतऊर्मिभीषणः प्रभंजनाघूर्णितवार्महार्णवः । आपूर्यमाणो वर्षद्भिरंबुदैः क्ष्मामप्यधाद्वीपवर्षाद्रिभिः सम
म् ।१४। ॥

चजलाप्लुतां वीक्ष्य मुनिः समत्रसत् भयं प्रापकेनोपतापितं । अद्भिः कथं भूताभिः अतिद्युभिः अतिक्रांता द्यौर्याभिः खरैश्च सूर्यरश्मिभिः वायुर्निर्वर्तितैर्घोषः शतह्रदाभि 
श्च विद्युद्भिः दीर्घमार्गं छंदोनुसारेण ।१३। प्रभंजनेन आघूर्णितं वा उदकं यस्मिन्सः अप्यधात् आच्छादयामाससम॥ ।१४। ॥
त

जडांधवत् बभ्राम १

सद्भ्रांतरिक्षं भूम्यंतरिक्षं स्थप्राणिसहितं सदिवं स्वर्गसदेवसहितं भागणं ज्योतिर्गणास्तैः सहितं जटाः विक्षिप्य विकीर्य १५ परिश्रमेण तृषितः गतः आपद्व्यर्थः १६
पृथुसर्पग्राहस्तस्मात् ... अन्योन्यघातिभिः तद्भक्षणाय परस्परं युध्यद्भिः १७ विष्णुमायावृतात्मन इति स तथा दृष्टवान् इत्यर्थः १९ ककुदि उन्नतप्रदेशे न्य
ग्रोधपोतं कोमलं वटं २० तस्य प्रागानदिक् शाखायां शिशुमपि २१ श्रीमत् रम्यं वदनपंकजं यस्य तं कंबुवत् त्रिरेखावृता ग्रीवा यस्य तं महोरस्कं विशालव

सद्भ्रांतरिक्षं सदिवं सभागणं त्रैलोक्यमासीत्सह दिग्भिराप्लुतं। स एक एवोर्वरितो महामुनिर्बभ्राम विक्षिप्य जटाः जडांधवत् १५॥
क्षुत्तृट्परीतो मकरैस्तिमिंगिलैरुपद्रुतो वीचिनभस्वताहतः। तमस्यपारे पतितो भ्रमन् दिशो न वेद खं गां च परिश्रमेषितः॥ १६॥
क्वचिद्गतो महावर्ते तरंगैस्ताडितः क्वचित्। यादोभिर्भक्ष्यते क्वापि स्वयमन्योन्यघातिभिः॥ १७॥ क्वचिच्छोकं क्वचिन्मोहं क्वचिद्दुःखं सुखं
भयं। क्वचिन्मृत्युमवाप्नोति व्याध्यादिभिरुतार्दितः॥ १८॥ अयुतायुतवर्षाणां सहस्राणि शतानि च। व्यतीयुर्भ्रमतस्तस्मिन् विष्णुमाया
वृतात्मनः॥ १९॥ स कदाचिद्भ्रमंस्तस्मिन् पृथिव्याः ककुदि द्विजः। न्यग्रोधपोतं ददृशे फलपल्लवशोभितं॥ २०॥ प्रागुत्तरस्यां शाखायां तस्या
पि ददृशे शिशुं। शयानं पर्णपुटके ग्रसंतं प्रभया तमः॥ २१॥ महामरकतश्यामं श्रीमद्वदनपंकजं। कंबुग्रीवं महोरस्कं सुनासं सुंद
रभ्रुवं॥ २२॥ श्वासैजदलकाभातं कंबुश्रीकर्णदाडिमं। विद्रुमाधरभासेषच्छोणायितसुधास्मितं॥ २३॥ ॥

... सुनासं शोभना नासा यस्य तं सुंदरे भ्रुवौ य
स्य तं॥ २२॥ श्वासैः एजंतः कंपायमानाः अलकास्तैः आभातं शोभितं कंबुवत् आवर्तवलयेन श्रीर्ययोस्तौ कंबुश्रियौ तयोः कर्णयोः दाडिमपुष्पे यस्य तं विद्रुमतुल्यः अध
रस्तस्य भासा ईषच्छोणायितं सुधातुल्यं स्मितं यस्य तं॥ २३॥ ॥

चा०आ०टी०
२९

वीक्ष्यविस्मितोबभूवर

पद्मगर्भवत्आशुषतत्अरुणोअपागौनेत्रांतौयस्यतं। ऋद्धोहासोयस्मिन्। तदवलोकनंयस्यतं। श्वासैरेजंत्यश्चलंत्योवलयस्त्रियर्कनिम्नरेखास्तासिः संविग्नाचंचला
निम्नागंनीरस्नाभिर्यस्मिन्नतत्। दलवत्अश्वत्थपत्रसंकाशंउदरंयस्यतं। २४। चारवःअंगुलयोययोस्तास्यां। उन्नीयआरुष्यधयंतंपिबंतं। २५। तस्यअंचविलो
चनांबुजेचप्रोत्कुल्लानितानिराः यस्यसः। अद्भुतभावंआत्माश्चर्यरूपंतेनशंकितः सन्नपितंपृष्टुपुरःप्रससारसमीपंगतः। २६। अदःइदंजगत्यथापुराप्रल

पद्मगर्भारुणापांगंहृद्यहासावलोकनं॥ श्वासैजद्वलिसंविग्ननिम्ननाभिदलोदरं॥२४॥ चार्वंगुलिभ्यांपाणिभ्यामुन्नीयचरणांबुजं
मुखेनिधायविप्रेंद्रोधयंतंवीक्ष्यविस्मितः॥२५॥ तद्दर्शनाद्वीतपरिश्रमोमुदाप्रोत्फुल्लहृत्पद्मविलोचनांबुजः॥ प्रहृष्टरोमाद्भुतभाव
शंकितः प्रष्टुंपुरस्तंप्रससारबालकं॥२६॥ तावच्छिशोर्वैश्वसितेनभार्गवः सोंतःशरीरंमशकोयथाविशत्॥ तत्राप्यदोन्यस्तमचष्ट
कृत्स्नशोयथापुरामुह्यदतीवविस्मितः॥२७॥ खंरोदसीभगणानद्रिसागरान्द्वीपान्सवर्षान्ककुभःसुरासुरान्॥ वनानिदेशा
न्सरितःपुराकरान्खेटान्व्रजानाश्रमवर्णवृत्तयः॥२८॥ महांतिभूतान्यथभौतिकान्यसौकालंचनानायुगकल्पकल्पनं॥ यत्किं
चिदन्यद्व्यवहारकारणंददर्शविश्वंसदिवावभासितं॥२९॥ ॥

यात्सर्वंन्यस्तंविन्यस्तं॥ दृष्ट्वाचातिविस्मितःसन्नमुह्यत्॥२७॥ कृत्स्नशोदर्शनंप्रपंचयति॥ खमित्यादिना॥ ककुभोदिशः पुराणिआकरांश्चखेटान्कर्षकग्रामान्॥ व्र
जान्गोकुलानिआश्रमांश्चवर्णांश्चतेषांवृत्तीश्चेत्यर्थः॥२८॥ नानायुगानिकल्पांश्चकल्पयतितैर्वाकल्प्यतइतितथातंकालंचसदिवपरमार्थइवेत्याभासितंतेनैव॥
२९॥ ६१ ल्यव

राम
॥२९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वटं च तो कं च वीक्ष्य तस्य प्रेम्णा सुधातुल्यस्मितयुक्तेनापाङ्गनिरीक्षणेन निरीक्षितः सन् ॥ ३२ ॥ कथंभूतं बालकं अधोक्षजं परिष्वक्तुम् अभ्ययात् इति द्वयोरन्वयः कथंभूतं नेत्रा
भ्यां हृदि धिष्ठितं ॥ ३३ ॥ तावत्स रिषिं गलात् पूर्वमेव तत्रऋषेस्तस्मात् हित्वा बभूव तदुद्यमवैफल्ये दृष्टांतः ॥ अनीशो निर्दैवस्तेन निर्मिता इहा क्रीडा यथेति ॥ ३४ ॥ अंतर्हि

हिमालयं पुष्पवहां च तां नदीं निजाश्रमं तत्र ऋषीनपश्यत् ॥ विश्वं विपश्यन् श्वसितात् शिशोर्वै बहिर्निरस्तो न्यपतल्लयाब्धौ ॥ ३१ ॥ तस्मि
न्पृथिव्याः ककुदि प्ररूढं वटं च तत्पर्णपुटे शयानं ॥ तोकं च तत्प्रेमसुधास्मितेन निरीक्षितोऽपाङ्गनिरीक्षणेन ॥ ३२ ॥ अथ तं बालकं
वीक्ष्य नेत्राभ्यां धिष्ठितं हृदि ॥ अभ्ययादतिसंक्लिष्टः परिष्वक्तुमधोक्षजं ॥ ३३ ॥ तावत्स भगवान्साक्षात् योगाधीशो गुहाशयः ॥ अंतर्द
धे ऋषेः सद्यो यथेहानीशनिर्मिता ॥ ३४ ॥ तमन्वथ वटो ब्रह्मन् सलिलं लोकसंप्लवः ॥ तिरोधायि क्षणादस्य स्वाश्रमे पूर्ववत्स्थितः ॥
॥ ३५ ॥ ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे मायादर्शनं नाम नवमोऽध्यायः ॥ ॥ सूत उवाच ॥ स एवमनुभूयेदं नाराय
णविनिर्मितं ॥ वैभवं योगमायायास्तमेव शरणं ययौ ॥ १ ॥ मार्कंडेय उवाच ॥ प्रपन्नोऽस्म्यंघ्रिमूलं ते प्रपन्नाभयदं हरे ॥ यन्मायया
पि विबुधा मुह्यंति ज्ञानकाशया ॥ २ ॥ ॥

तं भगवंतमनु वटः सलिलं लोकसंप्लवश्च तिरोधायि क्षणं तर्हितः स च स्वाश्रममेव यथापूर्वं स्थित इति ॥ ३५ ॥ इति श्रीभागव
ते द्वादशे नवमः ॥ ॥ ९ ॥ दशमे शिवश्चागत्य मुनेस्तुष्टो वरानदात् ॥ तेन साकमतिप्रीत्या समाजगाम्य सन्नाजयत् ॥ १ ॥ ज्ञानकाशया ज्ञानवस्त्रकाशमानया विज्ञ
नैर्विद्वांसो नियस्य तव मायया ज्ञानिनो वयमिस्म हं कारेण मुह्यंतीत्यर्थः ॥ २ ॥ ॥
विना

यद्वा ज्ञानेन काश्यते नाश्यत तद् ज्ञानकाशा तया
कारा हिंसायामिति धातोः २

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनारायणएवस्वमायादर्शनश्रांतंश्रीशिवस्वरूपेणसांत्वयामास। तदाहतमेवमित्यादिना। निभृतात्मानंसमाहितचित्तं। रुद्राण्यापार्वत्या ३ निभृतानिश्चला आत्मे
न्द्रियाशयादेहेंद्रियमनांसियस्यतं ४ निभृतंनिश्चलमुद्दकंझषव्रातश्चयस्मिन्सः संसिद्धिंफलंसाक्षात्कुरुप्रकटीकुरु। यतोभवान्सिद्धिदः ५ यतोह्याशिषः अ
मुदयलक्षणाः उतस्वित्। अत्रहेतुः। नकिमिति ६ संवदिष्यामः संवादंकरिष्यामः ७ सात्वतांसतांगतित्वेहेतुः। ईशानइति। रुद्धाधियोंऽतःकरणस्यवृत्तयोयेन

सूतउवाच॥ ॥तमेवंनिभृतात्मानंवृषेणदिविपर्यटन्॥ रुद्राण्याभगवान्रुद्रोददर्शस्वगणैर्वृतः ३ अथोमातमृषिंवीक्ष्यगिरिशं
समभाषत। पश्येमंभगवन्विप्रंनिभृतात्मेंद्रियाशयं ४॥ निभृतोदझषव्रातोवातापायेयथार्णवः। कुर्वस्यतपसःसा[illegible]क्षात्संसिद्धिं
सिद्धिदोभवान् ५ श्रीभगवानुवाच॥ नैवे[illegible]च्छत्याशिषःक्वापिब्रह्मर्षिर्मोक्षमप्युत। नकिंपरांभगवतिलब्धवान्पुरुषेऽव्यये ६॥ अथा
पिसंवदिष्यामोभवान्येतेनसाधुना। अयंहिपरमोलाभोनृणांसाधुसमागमः ७ सूतउवाच॥ ॥इत्युक्त्वातमुपेयायभगवान्सात्व
तांगतिः। ईशानःसर्वविद्यानामीश्वरःसर्वदेहिनां ८॥ तयोरागमनंसाक्षादीशयोर्जगदात्मनोः॥ नवेदरुद्धधीवृत्तिरात्मानंविश्वमेवच
९ भगवांस्तदभिज्ञायगिरिशोयोगमायया। आविशत्तद्गुहाकाशंवायुश्छिद्रमिवेश्वरः १० आत्मन्यपिशिवंप्राप्तंतडित्पिंग[illegible]जटाध
रं। त्र्यक्षंदशभुजंप्रांशुमुद्यंतमिवभास्करं ११॥ ॥

सः ९॥ १०॥ नकेवलंबहिरेव आत्मन्यपिप्राप्तंशिवंवीक्ष्यविस्मितः। कथंप्राप्तंसहसाऽकस्मादेवबुद्धिनावृतं। कथंभूतंतडित्पिंगांजटांधारयतीतितथातं। त्री
ण्यक्षीणियस्यतं ११॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शूलादिभिः सहाक्षमालादीन् बिभ्राणमित्यन्वयः । अक्षमालादीनामेकैकं । १२ । विस्मयपूर्वकं बहिर्दृष्टिर्निमाह किमिदमिति । सोमया उमया सहागतं रुद्रं ददर्श । १३ । तत्तेनना
म । १४ । पूर्णकामस्त्वं यन्न किं येन त्वया जगन्निर्वर्तितं नवनीति । १५ । निर्गुणत्वेन त्रिगुणत्वेन च नमस्करोति । नमः शिवाय निर्गुणाय सत्त्वाय सत्त्वाधिष्ठात्रे । अत एवं मृडाय

गर

घ्रचर्मांबरं शूलधनुरिष्वसिचर्मभिः । अक्षमालाडमरुकं कपालपरशुं सह । बिभ्राणं सहसा भातं विचक्ष्य हृदि विस्मितः । १२ । किमिदं
कुत एवेति समाधेर्विरतो मुनिः । नेत्रे उन्मील्य ददृशे सगणं सोमयागतं । १३ । रुद्रं त्रिलोकैकगुरुं ननाम शिरसा मुनिः । तस्मै सपर्यामिद
धात्सगणाय सहोमया । स्वागतासनपाद्यार्घ्यगंधस्रग्धूपदीपकैः । १४ । आह त्वात्मानुभावेन पूर्णकामस्य ते विभो । करवाम किमी
शान येनेदं निर्वृतं जगत् । १५ । नमः शिवाय शांताय सत्त्वाय प्रमृडाय च । रजोजुषेऽथ घोराय नमस्तुभ्यं तमोजुषे । १६ । सूत उवाच ।
एवं स्तुतः स भगवानादिदेवः सतां गतिः । परितुष्टः प्रसन्नात्मा प्र हसंस्त मभाषयत । १७ । श्रीभगवानुवाच । वरं वृ
णीष्व नः कामं वरदेशा वयं त्रयः । अमोघं दर्शनं येषां मर्त्यो यद्विंदते मृतं । १८ । ब्राह्मणाः साधवः शांता निःसंगा भूतवत्सलाः ।
एकांतभक्ता अस्मासु निर्वैराः समदर्शिनः । सलोका लोकपालास्तान् वंदंत्यर्चंत्युपासते । अहं च भगवान् ब्रह्मा स्वयं च हरिरीश्वरः । २० ।

सुखयति

तीति तथा तस्मै । १६ । १७ । नोऽस्माकं । त्रयः ब्रह्मविष्णुमहेश्वराः यत् येषां ते वयं । १८ । वरदानादिनामवश्यं वेवास्माभिः क्रियते त्वं तु यद्वः जगद्वंद्यत्वान्नवत्नामिति ब्राह्मणा
न् स्तौति ब्राह्मणा इत्यादि ये साधवः सदाचाराः शांताः मत्सरादिरहिताः निःसंगाः निष्कामाः । १९ । न केवलं त एव किंच अहं चेत्यादि । २० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूज्यतमत्वेहेत्वंतरमाहनेति। अएवपिअणुमात्रमपिचक्ष्पतेपक्षंपति। तत्तस्मात्एवंभूतान्युष्मान् ईमहिभजेम। २१ २२ २३ ब्राह्मणेभ्यः ब्राह्मणान् आत्मसमाधानं॥
विवेक अंतःपर्यालोचनं स्वाध्यायः अध्ययनसंयमः तैः। २३। किंच श्रवणादित्यादि। २४। चंडालोलोमोन्नूषणं यस्य तस्य धर्मरहस्ययुक्तं अमृतायस्य दंवचः क

नतेमय्यच्युतेऽजेचनिदामणवपिच्छ्रते॥ नात्मनश्चजनस्यापितद्युष्मान्वयमीमहि। २१॥ नद्यंमयानितीर्थानिनदेवाश्चेतनोज्झिताः। तेपुनं
त्युरुकालेननूयंदर्शनमात्रतः॥२२॥ ब्राह्मणेभ्योनमस्यामोयेऽस्मद्रूपंत्रयीमयं॥ बिभ्रत्यात्मसमाधानतपःस्वाध्यायसंयमैः॥२३॥ श्रवणा
द्दर्शनाद्वापिमहापातकिनोपिवः॥ शुध्येरन्नंत्यजाश्चापिकिमुसंभाषणादिभिः॥२४॥ ॥सूतउवाच॥ इतिचंडाललामस्यधर्मगुह्यो
पबृंहितं॥ वचोमृतायनमृषिर्नतृप्यत्कर्णयोःपिबन्॥२५॥ सचिरंमाययाविष्णोर्भ्रामितःकर्शितोन्नृवां॥ शिववागमृतध्वस्तक्लेशपुंज
स्तमब्रवीत्॥२६॥ ऋषिरुवाच॥ ॥अहोईश्वरस्यचेष्टेयंदुर्विज्ञायाशरीरिणां॥ यन्नमंतीश्वितव्यानिस्तुवंतिजगदीश्वराः॥२७॥ धर्मंग्रा
हयितुंप्रायःप्रवक्तारश्चदेहिनां॥ आचरंत्यनुमोदंतेक्रियमाणंस्तुवंतिच॥२८॥ ॥

एणमांपिबन्। नातृप्यत्। अलमितिनामन्यत्। कर्णयोरमृतायनं इतिवान्वयः। २५। शिवस्यवागेवामृतंतेनध्वस्तःक्लेशपुंजोयस्यसः। २६। इयंलीलादुर्विज्ञाया॥ राम
मत्यमाश्रितकौविद्यया ईशितव्यानिस्वनियम्यानियानिभूतानिजगदीश्वराःस्वयंनमंतिस्तुवंतिचेति। २७। अथवालोकसंग्रहमात्रमेतदित्याहधर्ममिति। प्रवक्तारो ३१
पियत्स्वयंदेहिनांधर्ममाचरंति। २८। ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेतत्स्वप्रभावतिरस्कारकं कथं मया क्रियते । तत्राह नैतेति । एतावता लोकसंग्रहमात्रेण तैर्नमनादिभिः कथंभूतैः स्वमायामयीवृत्तिर्येषु तैः भगवतो मायिनः तवानुभा
वो न दुष्येत । यतः प्रसिद्धस्य मायिनः कुहकं [illegible] कपटं [illegible] यथा तथैव ननिनमनादीनि श्रुतस्य यथा कुहकैरात्मानुभावो न दुष्यत एवं तव । न दुष्येतेति पाठेन कार
स्य दृष्टांते ऽनुषंगः ॥२९॥ मायया चेष्टितं प्रपंचयति सृष्ट्वेति स्वप्नदृक् यथा स्वविद्याचेष्टिते दृष्टांतः ॥३०॥ त्रिगुणत्वेऽपि न जीववद्भेद इत्याह कित्तु गुणानामात्मने नियंत्रे ॥३१॥

भविता सर्वकामस्ते

नैतावता भगवतः स्वमायामयवृत्तिभिः ॥ न दुष्येतानुभावस्तैर्मायिनः कुहकं यथा ॥२९॥ सृष्ट्वेदं मनसा विश्वमात्मनानुप्रविश्य यः ॥ गुणैः कु
र्वद्भिराभाति कर्तेव स्वप्नदृक् यथा ॥३०॥ तस्मै नमो भगवते त्रिगुणाय महात्मने ॥ केवलायाद्वितीयाय गुरवे ब्रह्ममूर्तये ॥३१॥ कं वृणे नु प
रं भूमन् वरं त्वद्वरदर्शनात् ॥ यद्दर्शनात्पूर्णकामः सत्यकामः पुमान् भवेत् ॥३२॥ वरमेकं वृणेऽथापि पूर्णात्कामाभिवर्षणात् ॥ भगव
त्यच्युतां भक्तिं तत्परेषु तथा त्वयि ॥३३॥ ॥ सूत उवाच ॥ इत्यर्चितोऽभिष्टुतश्च मुनिना सूक्तया गिरा ॥ तमाह भगवान् शर्वः शर्वया चाभि
नंदितः ॥३४॥ कामस्तेयं महर्षेस्तु भक्तिमांस्त्वमधोक्षजे ॥ आकल्पान्ताद्यशः पुण्यमजरामरता तथा ॥३५॥ ज्ञानं त्रैकालिकं ब्रह्मन् विज्ञानं
च विरक्तिमत् ॥ ब्रह्मवर्चस्विनो भूयात् पुराणाचार्यतास्तु ते ॥३६॥ ॥

वरं वृणीष्वेति यदुक्तं तत्राह ॥ किमिति वरं दर्शनं यस्य तस्मात्त्वत्तः परं कं वरं वृणे यस्य तव दर्शनात् पूर्णकामः सर्वानंदसंदोहरूपः सत्यकामः यथेच्छं प्राप्तसर्वानंदः ॥३२॥ वरदा
नाय स्वयमेव प्रवृत्तः शर्वया उमया चाभिनंदितः अनुमोदितः सन्नाह ॥३४॥ कामोयं सर्वोपि ॥ अन्यच्च यत्पुण्यं यशः इत्यादि ब्रह्मवर्चस्विनस्ते भूयादिति उत्तरेणान्वयः यतस्त्व
मधोक्षजे भक्तिमान् ॥३५॥३६॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य कर्म्मतिपश्चादिमुनेः पुरानुभूतं च भगवन्मायावैभवं तच्च कथयन् ॥ ३७ ॥ अवाप्तो महायोगमहिमा येन सः ॥ ३८ ॥ तन्मार्कंडेयस्य चरितं तेनानुभूतं च भगवन्मायावै
भवं तेऽनुवर्णितं ॥ ३९ ॥ नन्वेतदसम्मदस्मत्कुलोत्पन्नस्यास्य सप्तकल्पायुषं वदतो रूच्यमानं विरुद्धमेव तत्राह ॥ एतन्मार्कंडेयेनानुभूतं भगवन्मायावैभवं नानाकल्परूपं का
दाचित्कं इश्वरे च यानस्यैवाकस्मिकं न तु सर्वसाधारणं ॥ एतत्केचिदनादिबद्धकालं आवर्तितं देवयुगसहस्रद्वयमानेन पुनः परिवर्तितं प्रचक्षते केते नृणां संसृ

सूत उवाच ॥ ॥ एवं वरान्स मुनये दत्वागात्त्र्यक्ष ईश्वरः ॥ देव्यै तत्कर्म कथयन्ननुभूतं पुरामुनेः ॥ ३७ ॥ सोऽप्यवाप्तमहायोगमहिमा भार्ग
वोत्तमः ॥ विचरत्यधुनाप्यद्धा हरावेकांततां गतः ॥ ३८ ॥ अनुवर्णितमेतत्ते मार्कंडेयस्य धीमतः ॥ अनुभूतं भगवतो मायावैभवमद्भुतं
॥ ३९ ॥ एतत्केचिदविद्वांसो मायासंसृतिमात्मनः ॥ अनाद्यावर्तितं नृणां कादाचित्कं प्रचक्षते ॥ ४० ॥ य एवमेतद्भृगुवर्यवर्णितं रथांगपा
णेरनुभावभावितं ॥ संश्रावयेत्संशृणुयादु तावुभौ तयोर्न कर्माशयसंसृतिर्भवेत् ॥ ४१ ॥ ॥ इति श्रीभागवते महापुराणे द्वादश
स्कंधे दशमोऽध्यायः ॥ १० ॥ ॥ शौनक उवाच ॥ अथेमर्थं पृच्छामो भवंतं बहुवित्तमं ॥ समस्ततंत्रराद्धांते भवान्भागवततत्व
वित् ॥ १ ॥ ॥

तिसर्गप्रलयादिलक्षणां आत्मनो भगवतो मायात्येवमविद्वांसः ॥ विद्वांसस्तु मायाशिशोः श्वासोच्छ्वासाभ्यां सप्तकल्पस्तदुदरप्रवेशनिर्गमतः सप्तकल्पत्वं त
त्क्षणमात्रेणेति वदंति अतो न विरोध इत्यर्थः ॥ ४० ॥ तं शृणुयात् ॥ उत संश्रावयेद्वा ॥ यौ तावुभौ तयोः कर्मवासनाकृता संसृतिर्न भवेदिति ॥ ४१ ॥ इति द्वादशे दशमः ॥ एका
दशे तु पूजार्थं महापुरुषवर्णनं ॥ रवेर्व्यूहस्य चाख्यानं प्रतिमासं पृथक्पृथक् ॥ येनामृत्युमापन्नो मत्स्योऽसौ भार्गवोत्तमः ॥ तं पृच्छति क्रियायोगं सांगोपांगादिकल्पितं ॥ अ
हे यत्रि भागवत यतो भवान्समस्ततंत्रराद्धांते तत्ववित् ॥ १ ॥ ल ३२

पृष्टव्यमाह तांत्रिका इति। परिचर्यायां उपासनायां विग्रहे केवलस्यैतस्य घनस्यांगानि पादादीनि। उपांगानि गरुडादीनि। आयुधानि सुदर्शनादीनि। आकल्पाः कौस्तुभाद
यः। तेषां कल्पनां यथा कल्पयंति। यैश्च तत्वैः कल्पयंति। २। तन्न इति। ३। गुरूपदेशागम्यत्वादस्यार्थस्य तन्नमस्कारपूर्वमाह। नमस्कृत्येति। विभूतीः विराड्विग्र
हाद्याः। ४। अंगादिकल्पनां भूरादिभिर्दिदर्शयिषुः प्रथमं तावद्यथा कल्पयंतीति प्रश्नस्य वैराजरूपेण उत्तरं वक्तुं विग्रहमाह। विराड्विग्रह[illegible] मायाद्यैः प्रकृतिसूत्रमहदहंका भा॰ ६
रपंचतन्मात्रैर्नवभिस्तत्वैः। विकाराः एकादशेंद्रियाणि पंचमहाभूतानीति षोडश। तन्मयो विराट् स प्रसिद्धो निर्मितः। यत्र विराजि सचित्के चेतनाधिष्ठिते भुवनत्र

तांत्रिकाः परिचर्यायां केवलस्य श्रियः पतेः। अंगोपांगायुधाकल्पं कल्पयंति यथैव यैः॥ २॥ तन्नो वर्णय भद्रं ते क्रियायोगं बुभुत्सतां। येन
क्रियानैपुणेन मर्त्यो यायादमर्त्यतां॥ ३॥ सूत उवाच॥ नमस्कृत्वा गुरून् वक्ष्ये विभूतीर्वैष्णवीरपि। याः प्रोक्ता वेदतंत्राभ्यामा
चार्यैः पद्मजादिभिः॥ ४॥ माया द्यैर्नवभिस्तत्वैः स विकारमयो विराट्। निर्मितो दृश्यते यत्र सचित्के भुवनत्रयं॥ ५॥ एतद्वै पौरुषं रूपं
भूः पादौ द्यौः शिरो नभः। नाभिः सूर्योऽक्षिणी नासे वायुः कर्णौ दिशः प्रभोः॥ ६॥ प्रजापतिः प्रजननमपानो मृत्युरीशितुः। तद्बाहवो लोक
पाला मनश्चंद्रो भ्रुवौ यमः॥ ७॥ लज्जोत्तरोऽधरो लोभो दंता ज्योत्स्ना स्मयो भ्रमः। रोमाणि भूरुहा भूम्नो मेघाः पुरुषमूर्धजाः॥ ८॥ ॥ ॥

यं दृश्यते। अनेनांगादिकल्पना सौलभ्यं दर्शितं। ५। एतद्वै पौरुषं रूपं पुरुषस्य वैराजस्य स्वरूपमेवेश्वरेणाधिष्ठितत्वात् तदभेदविवक्षया तत्स्वरूपमुच्यते। अंगकल्प
नामाह भूः पादावित्यादि त्रिभिः। भूराद्यनुवादेन भगवत्पादादिभावना विधीयते। ६। प्रजननं मेढ्रं अपानः पायुः। ७।८। ॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा०द्वा०

२ गायत्र्युष्णिगनुष्टुब्बृहतीपंक्त्यादिछंदोमयं पीतं वासः॥२ ॥ तावानसावपि स्वमानतः सप्तवितस्तिसंस्थया॥

अनुक्तमन्यदप्येवमूह्यमित्याह। यावानयं व्यष्टिपुरुषः स्वमानतः सप्तवितस्तिसंस्थया। अवयवसन्निवेशेन मितः ९ ए नृपणादीन्याह कौस्तुभेत्यादिना स्वात्मज्योतिः शुद्धजीवचैतन्यं यात्तस्य कौस्तुभस्य प्रभा तामेव श्रीवत्सं बिभर्ति १० त्रिवृत्स्वरं त्रिमात्रं प्रणवं ११ पारमेष्ठ्यं पदं ब्रह्मलोकं १२ अव्याकृतं प्रधानं यदधिष्ठितः अधिष्ठाय स्थितः तदासनमनन्तं पद्मं सत्त्वं सत्त्वगुणः १३ मुख्यतत्त्वं प्राणतत्त्वं प्राणो वै मुख्य इति श्रुतेः दरवरं शंखं १४ १५ आकूतीः क्रियाशक्तियुतं मनः अस्य रथस्याभिव्यक्तिं बहिरभिव्यक्तिरूपं मुद्रया धृतया स्वर्थक्रियात्मतां वरदाभयदादिरूपत्वं बिभर्ति तन्मात्रमुद्रया तया तथोतयो भावयेदित्यर्थः १६ मंडलं देवयजनं देवपू

तन्मात्राभिव्यक्तं अकार उकार मकारात्मकं प्रणवं

यावानयं वै पुरुषो यावत्या संस्थया मितः। तावानसावपि महापुरुषो लोकसंस्थया॥ कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः। तत्प्रभा व्यापिनी साक्षात्श्रीवत्समुरसा विभुः॥ १० स्वमायां वनमालाख्यां नानागुणमयीं दधत्। वासः छंदोमयं पीतं ब्रह्मसूत्रं त्रिवृत्स्वरं॥ ११ बिभर्ति सांख्यं योगं च देवो मकरकुंडले। मौलिं पदं पारमेष्ठ्यं सर्वलोकाभयंकरं॥ १२ अव्याकृतमनंताख्यमासनं यदधिष्ठितः। धर्मज्ञानादिभिर्युक्तं सत्त्वं पद्ममिहोच्यते॥ १३ ओजः सहो बलयुतं मुख्यतत्त्वं गदां दधत्। अपां तत्त्वं दरवरं तेजस्तत्त्वं सुदर्शनं॥ १४ नभोनिभं नभस्तत्त्वमसिं चर्म तमोमयं। कालरूपं धनुः शार्ङ्गं तथा कर्ममयेषुधिं॥ १५ इंद्रियाणि शरानाहुराकूतीरस्य स्यंदनं। तन्मात्राण्यस्याभिव्यक्तिं मुद्रयार्थक्रियात्मतां॥ १६ मंडलं देवयजनं दीक्षा संस्कार आत्मनः। परिचर्या भगवत आत्मनो दुरितक्षयः॥ १७॥

चिंतये

जाभूमिः। सूर्यमंडलत्वेन भावयेदित्यर्थः। अंतर्बहिर्मंडलं वा दीक्षा संस्कार आत्मनः गुरुकृतां मंत्रदीक्षामेवात्मनस्तत्पूजायोग्यतां भावयेदित्यर्थः। परिचर्येति भगवतस्तां परिचर्यां स्वस्य सकलपाप क्षयाय एवंरूपां भावयेदित्यर्थः।१७। ३३

आत्मनः

पूर्वमासनपद्ममुक्तं इदानीं करस्थं पद्ममाह। भगवानिति। भगवच्छब्दार्थमैश्वर्यादि ... षाड्गुण्यं ॥ १७ हे द्विज॥ एकवचनांतो वा पाठः॥ अकुतोभयं कैवल्यं धर्ममयं गृहं॥
सम भजत। यद्वा वैकुंठस्य विशेषणं। अकुतोभयं यत्धामेति। त्रिवृत् ऋग्यजुः सामरूपो वेदः। सुपर्णोसि गरुत्मांस्त्रि... वृत्ते शिर इत्यादि मंत्रलिंगात्। यज्ञं यज्ञरू
पं यज्ञो वै विष्णुरिति श्रुतेः॥ १८ अनपायिनी हरेः अक्तिस्तत्र हेतुः साक्षादात्मनः स्वस्वरूपस्य चिद्रूपता तस्मात्तदभेदादित्यर्थः॥ तंत्रमूर्तिः पंचरात्राद्यागमरूपं ये
पार्षदादि पो विष्वक्सेन॥

भगवान् भगशब्दार्थं लीलाकमलमुद्वहन्। धर्मं यशश्च भगवांश्चामरव्यजनेभजन्॥ १७ आतपत्रं तु वैकुंठं द्विजा धामाकुतोभयं
त्रिवृद्वेदः सुपर्णाख्यो यज्ञं वहति पुरुषं॥ १८॥ अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः॥ विष्वक्सेनस्तंत्रमूर्तिर्विदितः पा
र्षदाधिपः॥ नंदादयोऽष्टौ द्वाःस्थाश्च तेऽणिमाद्या हरेर्गुणाः॥ २०॥ वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयं॥ अनिरुद्ध इति ब्र
ह्मन् मूर्तिव्यूहोऽभिधीयते॥ २१॥ स विश्वस्तैजसः प्राज्ञस्तुरीय इति वृत्तिभिः॥ अर्थेंद्रियाशयज्ञानैर्भगवान्परिभाव्यते॥ २२॥ ॥

ऽणिमादयोऽष्टौ गुणास्ते हरेरैश्वर्यपालानंदानंदयः॥ तस्यैव चतुर्व्यूहोपासनामाह। वासुदेवादिशब्दैर्वृत्तिभिर्जाग्रदाद्यवस्थाभिः परिभाव्यते। तद्धेतुमुपाधीनाह। अर्था
बाह्याः ... इंद्रियं मनः॥ आशयस्तद्भुतयसंस्कारयुक्तमज्ञानं तानं त्रितयसाक्षितैः॥ २२॥ तस्यैवाध्यात्मनिश्चितुर्धोपासनमाह। सएव भगवान् विश्वादीत्राष्टैः मु
रुषाः श्रीनारायण एव स्वयं मूर्तिभिरुपास्य इत्यभिधीयते॥ २१॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०भा०
३४

उक्तंचतुर्व्यूहहृद्योपासने ऽपि पूर्वोक्तिमंगाद्युपासनमाह अंगेति अंगादिभिरुपलक्षितो भगवान् हरिर्वासुदेवादिचतुर्मूर्त्तिः सन् विश्वादिचतुष्टयं बिभर्त्ति स्म
विश्वादिनावेपितन्नियंतुस्तस्यपन जीवत्वमित्याह । विश्वादिश्चतुष्टयं बिभ्रदपि भगवानीश्वर एवेति ॥२३॥ तस्य ब्रह्मादिविभूतिर्निता मोहाद्विजऋषभेति । स एष एवन
गवान् ब्रह्मयोनिर्वेदस्य कारणमित्यादिहेतुत्रयं । वस्तुतो नेदं नावेपि च स्वगतमायया सृजति हरति पाति । तिष्ठत्वात्मरम्यया ब्रह्मादिरूपया ऽनाहततत्वः अना

अंगोपांगायुधाकल्पैर्भगवांस्तच्चतुष्टयं ॥ बिभर्त्ति स्म चतुर्मूर्त्तिर्भगवान् हरिरीश्वरः ॥२३॥ द्विजऋषभ स एष ब्रह्मयोनिः स्वयंदृक
स्वमहिमपरिपूर्णो मायया च स्वयैतत् ॥ सृजति हरति पातीत्याख्ययाऽनावृताक्षो विहत इव निरुक्तस्तत्परैरात्मलभ्यः ॥२४॥
श्रीकृष्णकृष्णसखवृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य गोविंद गोपवनिताव्रजभृत्यगीततीर्थश्रवः श्रव
णमंगल पाहि भृत्यान् ॥२५॥ य इदं कल्य उत्थाय महापुरुषलक्षणं ॥ तच्चित्तः प्रयतो जप्त्वा ब्रह्म वेद गुहाशयं ॥२६॥ ॥

क्ष

हि॰२
छन्नज्ञानोऽपि विहत इ
व भिन्न इव निरुक्तः शास्त्रेषु न तु भिन्न अत्र विद्वदनुभवं प्रमाणयति । यतस्तत्परैरात्मत्वेनैव लभ्यत इति ॥२४॥ पूर्वोक्तमुपासनमुक्तं तं श्रीकृष्णं प्रार्थयते ॥ कृ
ष्णसखस्यार्जुनस्य सखे वृष्णिश्रेष्ठ अवनिध्रुहो राजन्याः तेषां वंशस्य दहन अनपवर्गं अक्षीणं वीर्यं यस्य गोपवनितानां व्रजाः समूहाः भृत्या नारदादयः तैर्गीतं तीर्थं पूतं श्र
वः कीर्त्तिर्यस्य श्रवणमेव मंगलं यस्य ॥२५॥ एतज्जपमात्रस्यापि ब्रह्मज्ञानफलमित्याह य इति कल्ये उषःकाले यस्तच्चित्तः प्रयतः शुचिश्च सन् जप्त्वा गुहाशयं हृदिस्थं ब्र
ह्म प्रपश्यति ॥२६॥ ॥ ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंडलं देवयजनमित्युक्त्या बुद्धिमागतः मूर्तिर्मूर्तं वर्गसंगेन रविमूर्तेः २४ क्रान्ते शुक्र इति पंचमे पदाहतयान्मे च रूपयोगं धवत्रिप्रसरसो नागा ग्रामणी मन्तु
धन्नादेवाः प्रत्येकैकशो गणाः सप्तेत्यादिना सौरः सूर्यसंबंधी सप्तानां गणः २७ तेषां सप्तानां मध्ये सूरैस्तत्र तपति निरुक्तन्मासाधिष्ठितसूर्यैर्व्यूहं विभागं ॥२८॥
तत्र तावत् मुख्यं निरूपयितुं प्रथमं सूर्यस्वरूपमाह ॥ अनाद्यविद्यया मायया ऽयं सूर्यीकृतं तत्रः लोकयात्राप्रवर्तकः ॥२९॥ अतः तस्य क्रियाभेदो

शौनक उवाच ॥ ॥ शुकोयुदाह भगवान् विष्णुरात्मयश्च एव ते ॥ सौरो गणो मासि मासि नानावसति सप्तकः २७ तेषां नामानि क
र्माणि संयुक्तानामधीश्वरैः ॥ ब्रूहि नः श्रद्दधानानां व्यूहं सूर्यात्मनो हरेः ॥२८॥ सूत उवाच ॥ ॥ अनाद्यविद्यया [illegible] विष्णोरात्मनः
सर्वदेहिनां ॥ निर्मितो लोकतंत्रोयं लोकेषु परिवर्त्तते ॥२९॥ एक एव हि लोकानां सूर्य आत्मादिकृद्धरिः सर्ववेदक्रियामूलमृषिभिर्ब
हुधोदितः ॥३०॥ कालो देशः क्रिया कर्त्ता करणं कार्यमागमः ॥ द्रव्यं फलमिति ब्रह्मन् नवधोक्तो जयाहरिः ३१

पाधिकमेव नानात्वं न स्वतः इत्याह एक एवेति सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतेः जगदात्मा आदिकृत् सृष्टिकर्ता हरिरेव सूर्यः स च सर्वासां वेदोक्तक्रि
याणां मूलं सन् तेनोपाधिना बहुधोक्तः ३० कालरूपधारिणो हरेर्हरिश्चादित्यरूपेण नंदं क्रियोपाधिकं दर्शयितुं प्रथमं सर्वकर्मप्रवृत्तये मायाकृतं नवधा भेदमा
ह काल इति कालः प्रातरादिः देशः ग्रामादिः क्रिया अनुष्ठानं कर्त्ता ब्राह्मणादिः करणं स्रुगादि कार्यं यागादि आगमः मंत्रादि द्रव्यं व्रीह्यादिः फलं स्वर्गादि ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द्वा०

एते चैत्रमासं २

तत्र च कालस्वरूपधारी भगवान् पृथक्चरति मध्वादिषु चैत्रादिषु लोकतंत्राय लोकयात्रानिर्वाहाय ॥ ३२ ॥ तानेव गणानाह धातेति ॥ द्वादशभिः ॥ धाता सूर्यः कृ
तस्थली अप्सराः हेतिः राक्षसः वासुकिर्नागः रथकृत् यक्षः पुलस्त्य ऋषिः तुंबुरुर्गंधर्वः नयंति अनुवर्त्तयंति ॥ ३३ ॥ अथौजा यक्षः प्रहेतिः राक्षसः नारदो गंध
र्वः ॥ कच्छनीरो नागः ॥ माधवं वैशाखं ॥ ३४ ॥ मित्रः सूर्यः पौरुषेयो राक्षसः ॥ रथस्वनो यक्षः शुक्रमासं ज्येष्ठं ॥ वरुणः सूर्यः सहजन्यो यक्षः ॥ शुक्रो नागः चित्रस्वनो
३५

मध्वादिषु द्वादशसु भगवान् कालरूपधृक् ॥ लोकतंत्राय चरति पृथक् द्वादशभिर्गणैः ॥ ३२ ॥ धाता कृतस्थली हेतिर्वासुकी रथकृन्मुने ॥
पुलस्त्यस्तुंबुरुरिति मधुमासं नयंत्यमी ॥ ३३ ॥ अर्यमा पुलहोऽथौजाः प्रहेतिः पुंजिकस्थली ॥ नारदः कच्छनीरश्च नयंत्येते स्म माधवं ॥
मित्रोऽत्रिः पौरुषेयोऽथ तक्षको मेनका हहा ॥ रथस्वन इति ह्येते शुक्रमासं नयंत्यमी ॥ ३५ ॥ वसिष्ठो वरुणो रंभा सहजन्यस्तथा हुहूः
॥ शुक्रश्चित्रस्वनश्चैव शुचिमासं नयंत्यमी ॥ ३७ ॥ विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृगुः ॥ अनुम्लोचा शंखपालो नभस्याख्यं
नयंत्यमी ॥ ३८ ॥ ॥ २ इंद्रो विश्वावसुः श्रोता एलापत्रस्तथांगिराः ॥ प्रम्लोचा राक्षसो वर्यो नभोमासं नयंत्यमी ॥ ३६ ॥

३६
राक्षसः ॥ शुचिमासमाषाढं ॥ इंद्रः सूर्यः विश्वावसुर्गंधर्वः ॥ श्रोता यक्षः ॥ एलापत्रो नागः ॥ वर्यो राक्षसः शिष्टं स्वयमेव व्याख्यातं ॥ न ॥ नभोमासं श्राव
णं ॥ २ विवस्वान् सूर्यः उग्रसेनो गंधर्वः ॥ व्याघ्रो राक्षसः ॥ आसारणो यक्षः ॥ शंखपालो नागः ॥ नभस्याख्यं भाद्रपदं ॥ ३८ ॥ ॥

राम
३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धनंजयोनागः वातोराक्षसः सुषेणोगंधर्वः सुरुचिर्यक्षः तपोमासंमाघं। मासक्रमातिलंघनं कौर्मोक्तादिक्रमानुसारेण वैष्णवेतु मासक्रमेणोक्तिः। कश्चिन्नामु
मस्य यस्त्र कल्पभेदेनेति ज्ञेयं ॥४१॥ ऋतुर्यक्षः वर्चाराक्षसः पर्जन्यः सूर्यः सेनजित् अप्सराः विश्वोगंधर्वः ऐरावतोनागः तपस्यारंभं फाल्गुनं ॥४०॥ अंशुः सूर्यः
अप्सराऽतिवापावः ताक्ष्योयक्षः ऋतसेनोगंधर्वः विद्युच्छत्रुराक्षसः महाशंखोनागः सहोमासंमार्गशीर्षं ॥४१॥ भगः सूर्यः स्फूर्जोराक्षसः अरिष्टनेमिर्गंधर्वः॥

पूषाधनंजयोवातः सुषेणः सुरुचिस्तथा। घृताची गौतमश्चेतितपोमासंनयंत्यमी ॥३९॥ ऋतुर्वर्चाभरद्वाजः पर्जन्यः सेनजित्तथा। वि
श्वऐरावतश्चैवतपस्याख्यंनयंत्यमी ॥४०॥ अथांशुः कश्यपस्तार्क्ष्यऋतसेनस्तथोर्वशी। विद्युच्छत्रुर्महाशंखः सहोमासंनयंत्यमी॥
स्फूर्जो ॥४१॥ भगः स्फूर्जोरिष्टनेमिस्तूर्णआयुश्चपंचमः। कर्कोटकः पूर्वचित्तिः पुष्यमासंनयंत्यमी ॥४२॥ त्वष्टाऋचीकतनयः कंबलश्च
तिलोत्तमा। ब्रह्मापेतोथशतजिद्धृतराष्ट्रइषंभराः ॥४३॥ विष्णुरश्वतरोरंभासूर्यवर्चाश्चसत्यजित्। विश्वामित्रोमखापेतऊर्जमा
संनयंत्यमी ॥४४॥ ॥

ऊर्णोयक्षः॥ आयुर्ऋषिः॥ कर्कोटिकोनागः॥४२॥ ऋचीकतनयोजमदग्निः कंबलोनागः॥ ब्रह्मापेतोराक्षसः शतजित्यक्षः॥ धृतराष्ट्रोगंधर्वः॥ इषंभराऽप्सराआश्विनपाल
का॥४३॥ विष्णुरादित्यः अश्वतरोनागः॥ सूर्यवर्चागंधर्वः सत्यजित्यक्षः॥ मखापेतोराक्षसः॥ ऊर्जमासंकार्तिकं ॥४४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतेन्चादित्यादयः कौर्मे [illegible] विनज्योकाः धातार्यमाच मित्रश्च वरुणोंश एवच। विवस्वानथ पूषाच पर्जन्यश्चांशुरेवच। भगस्त्वष्टाच विष्णुश्च आदित्यादाद
शाःस्मृताः २ पुलस्त्यः पुलहश्चात्रिर्वसिष्ठोथांगिरा भृगुः। गौतमोथ भरद्वाजो कश्यपः क्रतुरेवच। जमदग्निः कौशिकश्च मुनयो ब्रह्मवादिनः ३ रथकृच्चोरि
ष्टनेमिः ग्रामणीश्चरथस्वनः। रथचित्रः स्वनः श्रोताश्च रुरुणः सेनजित्तथा। तार्क्ष्यश्चारिष्टनेमिश्च ऋतजित्सत्यजित्तथा एतेयक्षाः श्वथहेतिः प्रहेतिश्च पौ
रुषेयो वधस्तथा। वर्ष्योव्याघ्रस्तथापश्च वायुर्विद्युद्दिवाकरः। ब्रह्मापेतश्च विप्रेंद्र यज्ञापेतश्च राक्षसाः। वासुकिः कच्छनीरश्च तक्षकः सर्पपुंगवः एलापत्र

एताभगवतो विष्णोरादित्यस्य विभूतयः। स्मरतां संध्ययोर्नॄणां हरंत्यंहो दिने दिने ४७॥ ॥

शंखपालः तथैरावतसंज्ञिकः। धनंजयो
महापद्मस्तथा कर्कोटको द्विजाः। कंब[illegible]लोश्वतरश्चैव वहंत्येवं यथाक्रमं। तुंबरुर्नारदो हाहा हूहूर्विश्वावसुस्तथा उग्रसेनो वसुरुचिर्विश्वावसुरथाप
रः। चित्रसेनस्तथोर्णायुर्धृतराष्ट्रो द्विजोत्तमाः। सूर्यवर्चा द्वादशैते गंधर्वा गायतांवराः। कृतस्थलाप्सरोवर्यातथान्या [illegible]पुंजिकस्थली मेनका सहजन्याच प्रम्लो
चाच द्विजोत्तमा। अनुम्लोचा घृताचीच विश्वाची चोर्वशी तथा। अन्याच पूर्वचित्तिः स्यादन्याचैव तिलोत्तमाः। रंभाच्चेति द्विजश्रेष्ठास्तथैवाप्सरसः स्मृताः इति ४५



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषांपृथककर्माणिनिरूपयतिद्वादशस्वपीतित्रिभिः॥असौदेवोसूर्यःषड्भिर्गंधर्वादिभिः।अस्यजनस्यसमंताच्चरनस्तुवामतिंतनुतेगायन्नयोऽनेनस्तूचि

द्वादशेष्वपिमासेषुदेवोऽसौषड्भिरस्यवै॥चरन्समंतात्तनुतेपरत्रेहचसन्मतिं॥४६॥ सामर्ग्यजुर्भिस्तल्लिंगैरृषयःसंस्तुवंत्यमुं॥
गंधर्वास्तंप्रगायंतिनृत्यंत्यप्सरसोऽग्रतः॥४७॥ उन्नह्यंतिरथंनागाग्रामण्योरथयोजकाः॥ चोदयंतिरथंपृष्ठेनैरृतावलशालिनः॥४८॥
वालखिल्याःसहस्राणिषष्टिर्ब्रह्मर्षयोमलाः॥ पुरतोभिमुखंयांतिस्तुवंतिस्तुतिभिर्विभुं॥४९॥ एवंह्यनादिनिधनोभगवान्हरिरी
श्वरः॥ कल्पेकल्पेस्वमात्मानंव्यूह्यलोकानवत्यजः॥५०॥ ॥इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेआदित्यव्यूहविवरणंनामैका
दशोऽध्यायः॥११॥ ॥

तः॥४६॥ तल्लिंगैःसूर्यप्रकाशकैः॥४७॥ उन्नह्यंतिदृढंबध्नंति।ग्रामण्योयक्षाः।नैरृताराक्षसाः॥४८॥ किंच वालखिल्याइति।एवंप्रतिमासंतएवविभुंसूर्यं॥४९॥ व्यू
ह्यविभज्य॥५०॥ इतिश्रीभागवतभावार्थदीपिकायांद्वादशेएकादशोऽध्यायःसमाप्तः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वादशे तु पुराणोक्तमवधिन्तिक्रमः कृतः। प्रथमस्कंधमारभ्य प्राधान्येन समासतः॥१॥ तदेवमस्मिन्पुराणोक्तानर्थान्संक्षेपतो वर्णयिष्यन्धर्मादीन्प्रणम
ति नम इति महते हरिनकिल्वरणाय। ब्राह्मणेभ्यः ब्राह्मणान्सनातनानधर्मानित्युपलक्षणं पुराणोक्तार्थानि॥१॥ पुरुषत्वे तु चितं श्रवणादियोग्यं॥२॥ एतत्प्रपंच
यति अत्रेति भगवानैश्वर्यादिषड्गुणः साक्षात्संकीर्त्तित इति देवकांडार्थः॥३॥ ब्रह्मकांडार्थमाह अत्र ब्रह्मेति गुह्यं निर्गुणं प्रभवाप्ययं प्रभवंति अस्मादिति प्र
व अप्येत्यस्मिन्निति अप्ययः तत्त्वं तत्त्वं अनेनाश्रयत्राष्टायोदिशितिः। विज्ञानसंयुक्तं अपरोक्षज्ञानपर्यंतं ज्ञानं तदुपाख्यानेन ज्ञानमुपाख्यायते प्रकाश्यते येन तत्

सूत उवाच। नमो धर्माय महते नमः कृष्णाय वेधसे। ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्ये सनातनान्॥१॥ एतद्वः कथितं विप्रा विष्णोश्चरित
मद्भुतं। भवद्भिर्यदहं पृष्टो नराणां पुरुषोचितं॥२॥ अत्र संकीर्त्तितः साक्षात्सर्वपापहरो हरिः। नारायणो हृषीकेशो भगवान्सात्वतांपति
ः॥३॥ अत्र ब्रह्मपरं गुह्यं जगतः प्रभवाप्ययं। ज्ञानं च तदुपाख्यानं प्रोक्तं विज्ञानसंयुतं॥४॥ भक्तियोगः समाख्यातो वैराग्यं च तदाश्रयं। पा
रीक्षितमुपाख्यानं नारदाख्यानमेव च॥५॥ प्रायोपवेशो राजर्षेर्विप्रशापात्परीक्षितः। शुकस्य च ब्रह्मर्षेः संवादश्च परीक्षितः॥६॥

ज्ञानसाधनमित्यर्थः। कर्मकांडार्थमाह भक्तियोगश्च साध्यसाधनरूपः तदाश्रयं भक्तियोगेन निःपादितं एवं सामान्यतो निरूप्येदानीं द्वादशस्कंधे प्रकरणार्था
नुक्रमति पारीक्षितमुपाख्यानं परीक्षिज्जन्मादि तत्स्तावाय नारदाख्यानं च॥५॥ ब्रह्मर्षेर्ब्राह्मणोत्तमस्य इति प्रथमस्कंधार्थः॥६॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उक्तांतिरश्चिरादिगतिप्राधानिकः प्रधानकार्यविराड्रूपः सर्गः अथतः आदितः महदादिक्रमेणोत्पत्यर्थः इतिद्वितीयार्थः ॥ ७ ॥ महापुरुषस्य संस्थितिः प्रलये तूष्णीमवस्थानं ८ ॥
प्राकृतिकप्रकृतिनवगुणक्षोभरूपः वैकृतिकोमहदादयः त्वकाराद्विकाराश्रये तयोस्तेषां च सर्गः गतिः स्वरूपं उच्चारणोच्चारणे ॥ ९ ॥ अथ सीमां नारी च नर

योगधारणयोक्तांतिः संवादो नारदाजयोः ॥ अवतारानुगीतं च सर्गः प्राधानिको ग्रतः ॥ ७ ॥ विदुरोद्धवसंवादः क्षत्तुमैत्रेययोस्ततः ॥ पुराणसंह
िताप्रश्नो महापुरुषसंस्थितिः ॥ ८ ॥ ततः प्राकृतिकः सर्गः सप्तवैकृतिकाश्रये ॥ ततो ब्रह्मांडसंभूतिर्वैराजः पुरुषो यतः ॥ ९ ॥ कालस्य स्थूलसू
क्ष्मस्य गतिः पद्मसमुद्भवः ॥ भुव उद्धरणेंभोधौ हिरण्याक्षवधो यथा ॥ १० ॥ ऊर्ध्वतिर्यगवाक्सर्गो रुद्रसर्गस्तथैव च ॥ अर्धनारीनरस्याथ
यतः स्वायंभुवो मनुः ॥ ११ ॥ शतरूपा च या स्त्रीणामाद्या प्रकृतिरुत्तमा ॥ संतानो धर्मपत्नीनां कर्दमस्य प्रजापतेः ॥ १२ ॥ अवतारो भगवतः क
पिलस्य महात्मनः ॥ देवहूत्याश्च संवादः कपिलेन च धीमता ॥ १३ ॥ नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनं ॥ ध्रुवस्य चरितं पश्चात्पृथोः प्राचि
नबर्हिषः ॥ १४ ॥ नारदस्य च संवादः ततः प्रैयव्रतं द्विजाः ॥ नाभेस्ततोनुचरितमृषभस्य भरतस्य च ॥ १५ ॥ ततो द्वीपसमुद्राद्रिवर्षनद्युपव
र्णनं ॥ ज्योतिश्चक्रस्य संस्थानं पातालनरकस्थितिः ॥ १६ ॥ ॥

इति तृतीयः

अथ तस्य ॥ ११ ॥ संतानो धर्मपत्नीनामिति नवब्रह्मसमुत्पत्तिरित्यस्यानंतरं द्रष्टव्यं ॥ १४ ॥ चतुर्थस्कंधार्थमाह न च ब्रह्मणां मरीच्यादीनां समुत्पत्तिः संतानः ॥ १५ ॥ पंचमस्कं
धार्थमाह ततः प्रैयव्रतं प्रियव्रतस्य चरितं ॥ १५ ॥ द्वीपाद्युपवर्णनं प्रथमं संक्षेपतः ततो द्वीपादीनां गिरयो नद्यश्च तेषामुपवर्णनं ॥ पातालनरकादीनां च स्थितिः अ
नेनैव नरके मज्जाति लोपाख्यानं गृहीतं ततः पुरस्चीनं ॥ १६ ॥ ॥

मिवर्तीक

भा॰टी॰

षष्ठार्थमाह दक्षजन्मेति। १७ सप्तमार्थमाह पुत्रयोश्चेति १८ अष्टमार्थमाह। मन्वंतरानुचरितमिति। क्वचित्कस्यचिदनुक्तिः। युक्रमोक्तिश्च नक्रिरमानुकूलत्वेने

दक्षजन्मप्रचेतोभ्यस्तत्पुत्रीणांच संततिः। यतोदेवासुरनरास्तिर्यङ्नगखगादयः॥ १७॥ त्वाष्ट्रस्यजन्मनिधनंपुत्रयोश्चदितेर्द्विजाः॥ दैत्येश्वरस्य
चरितंप्रह्लादस्यमहात्मनः॥ मन्वंतरानुचरितंगजेंद्रस्यविमोक्षणं॥ मन्वंतरावताराश्चविष्णोर्हयशिरादयः॥ १९॥ कौर्मंमात्स्यंनारसिं
हंवामनंचजगत्पतेः॥ क्षीरोदमथनंतद्वदमृतार्थेदिवौकसां॥ २०॥ देवासुरंमहायुद्धंराजवंशानुकीर्तनं॥ इक्ष्वाकुजन्मतद्वंशः सु
द्युम्नस्यमहात्मनः॥ २१॥ इलोपाख्यानमत्रोक्तंतारोपाख्यानमेवच॥ सूर्यवंशानुकथनंशशादाद्यानृपादयः॥ २२॥ सौकन्यंचाथ
शर्यातेःककुत्स्थस्यचधीमतः॥ खट्वांगस्यचमांधातुःसौभरेःसगरस्यच॥ २३॥ रामस्यकोशलेंद्रस्यचरितंकिल्बिषापहं॥ निमेरंगप
रित्यागोजनकानांचसंभवः॥ २४॥ रामस्यभार्गवेंद्रस्यनिःक्षत्रकरणंभुवः॥ ऐलस्यसोमवंशस्यययातेर्नहुषस्यच॥ २५॥ दौष्यं
तेर्भरतस्यापिशंतनोस्तत्सुतस्यच॥ ययातेर्ज्येष्ठपुत्रस्ययदोर्वंशानुकीर्तितः॥ २६॥ यत्रावतीर्णोभगवान्कृष्णाख्योजगदीश्वरः॥
॥वसुदेवगृहेजन्मततोवृद्धिश्चगोकुले॥ २७॥ तस्यकर्माण्यपाराणिकीर्तितान्यसुरद्विषः॥ पूतनासुपयःपानंशकटोच्चाटनंशि
शोः॥ २८॥ तृणावर्तस्यनिःपेषस्तथैवबकवत्सयोः॥ धेनुकस्यसहभ्रातुःप्रलंबस्यचसंक्षयः॥ २९॥ ॥

ति। १९ द्रष्टव्यं। १९। २०। नवमार्थमाह राजवंशेति २१ सोमवंशादिभूतस्यैलस्य चरितं। २२ तत्सुतस्य भीष्मस्य। २६। २७। दशमार्थमाह। तस्य कर्माण्यपाराणि राम
तिपूतनायाश्च असु सहितस्य स्तन्यपानं २८ सहभ्रातुः ससखस्य। २९॥ ॥ ३८
पयसः

यज्ञाभिषेकं यतः पूजाम्यभिषेकश्रुतयो वंदेवं ॥ २४ ॥ विषतः शत्रून्समथ्य ॥ २९ ॥ ३० ॥ येच शंबरादयस्तेषां ॥ ३९ ॥ माहात्म्यं प्रभावः ॥ ४० ॥ एकादशार्थमाह ॥ विप्रशा

गोपानांच परित्राणं दावाग्नेः परिसर्पतः ॥ दमनं कालियस्याहेर्महाहेर्नंदमोक्षणं ॥ ३० ॥ व्रतचर्यातु कन्यानां यत्र तुष्टोऽच्युतो व्रतैः ॥ प्रसा
दो यज्ञपत्नीभ्यो विप्राणांचानुतापनं ॥ ३१ ॥ गोवर्धनोद्धरणंच शक्रस्य सुरभेरथ ॥ यज्ञाभिषेकं कृष्णस्य स्त्रीभिः क्रीडाच रात्रिषु ॥ ३२ ॥ शं
खचूडस्य दुर्बुद्धेर्वधोऽरिष्टस्य केशिनः ॥ अक्रूरागमनं पश्चात्प्रस्थानं रामकृष्णयोः ॥ ३३ ॥ व्रजस्त्रीणां विलापश्च मथुरालोकनं ततः
॥ गजमुष्टिकचाणूरकंसादीनांच यो वधः ॥ मृतस्यानयनं सूनोः पुनः सांदीपिनेर्गुरोः ॥ ३४ ॥ मथुरायां निवसता यदुचक्रस्य यत्प्रियं ॥
कृतमुद्धवरामाभ्यां युतेन हरिणा द्विजाः ॥ ३५ ॥ जरासंधसमानीतसैन्यस्य बहुशो वधः ॥ घातनं यवनेंद्रस्य कुशस्थल्यां निवेशनं ॥ ३६
आदानं पारिजातस्य सुधर्मायाः सुरालयात् ॥ रुक्मिण्याहरणं युद्धे प्रमथ्य द्विषतो हरेः ॥ ३७ ॥ हरस्य जृंभणं युद्धे बाणस्य भुजकृंतनं
प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणंच यत् ॥ ३८ ॥ चैद्यपौंड्रकशाल्वानां दंतवक्रस्य दुर्मतेः ॥ शंबरो द्विविदः पीठो मुरः पंचजनादयः ॥
३९ ॥ माहात्म्यंच वधस्तेषां वाराणस्याश्च दाहनं ॥ भारावतरणं भूमेर्निमित्तीकृत्य पांडवान् ॥ ४० ॥ विप्रशापापदेशेन संहारः स्वकुलस्य
च ॥ उद्धवस्यच संवादो वासुदेवस्य चाद्भुतः ॥ ४१ ॥ यत्रात्मविद्या ह्यखिला प्रोक्ता धर्मविनिर्णयः ॥ ततो मर्त्यपरित्याग आत्मयोगानुभाव
तः ॥ ४२ ॥ ॥

पेति ॥ धर्मविनिर्णयः ॥ वर्णाश्रमधर्मनिश्चयः ॥ ४१ ॥ मर्त्यपरित्यागः मनुष्यत्वसांतर्धानं ॥ ४२ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द्वा० गादन्नार्थमाह युगेति युगलक्षणंतदनुरूपावृत्तिश्चेत्यर्थः त्रिविधा प्राकृतिकी नैमित्तिकी नित्या चेति ४३ ऋषेर्व्यासस्य सूर्यस्य च विन्यासः कृत्यर्थः ४४ इति
८ चोक्तमिति चकारादन्योपि वा पुष्पगिरिं इत्यत्र श्लोके स्मृतमुक्तमिति किमेवंनानार्थकथनेन तत्राह लीलेति सर्वतः तत्तदर्थकीर्तनद्वारेणेत्यर्थः ४५ तत्कीर्तनेना
पिकिमत्यपेक्षायांतत्फलमाह द्वाभ्यां पतितः कूपादिषु स्खलितः सोपानादिषु आर्तः दुःखितः क्षुत्वा क्षुतं कृत्वा विवशोपि ४६ संकीर्त्यमानः यदा श्रुतोनु

युगलक्षणवृत्तिश्च कलौ नॄणामुपप्लवः चतुर्विधश्च प्रलय उत्पत्तिस्त्रिविधा तथा ४३ देहत्यागश्च राजर्षेर्विष्णुरातस्य धीमतः शाखाप्र
णयनमृषेर्मार्कंडेयस्य सत्कथा महापुरुषविन्यासः सूर्यस्य जगदात्मनः ४४ इति चोक्तं द्विजश्रेष्ठा यत्पृष्टोहमिहास्मि वः लीलाव
तारकर्माणि कीर्तितानीह सर्वशः ४५ पतितः स्खलितश्चार्तः क्षुत्वा वा विवशो ब्रुवन् हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ४६
संकीर्त्यमानो भगवाननंतः श्रुतानुभावो व्यसनं हि पुंसां प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोर्कोभ्रमिवातिवातः ४७ मृषा गिर
स्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः तदेव सत्यं तदु हैव मंगलं तदेव पुण्यं भगवद्गुणोदयं ४८ ॥

ननिवर्त्तयतीत्यपरितोषात् द्वाभ्यां
भावो व्यसनः पुंसां चित्तं प्र
विष्णुपतिः शेषं दुःखं धुनोतीति हीति सतामनुभवं प्रमाणयति अर्को गिरिगुहादिध्वांतं तरसा इति वातोभ्रमिवेति ४७ हरिकीर्तनमेव महाफलं तद्व्य
तिरिक्तं सर्वं मिथ्यालापमात्रमिति प्रपंचयति मृषा गिर इति द्वाभ्यां मृषा गिरः मिथ्या वाचः असतीः असतां कथाः यास्ताः यत्र यासु उत्तमश्लोकस्य यशोनुग ३९
गीयत इति यत्तदेव सत्यं तदेव हि मंगलं हृ इति हर्षे भगवद्गुणानामभ्युदयो यस्मात्तत् ४८ ॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवंनवंयथानवतितथारुचिरंरुचिप्रदं महदुत्सवोयस्मात् ४९ चित्राणिपदानियस्मिन्नुतदपिजगत्पवित्रयतीति तथा तद्धरेर्यशोनप्रगृणीतनवर्ण्यतेत्तद्वचः ध्वांक्षती
र्थंकाकतुल्यंनरमणंरतिस्थानंनतुहंसैर्ज्ञानिभिःसेवितं तत्रहेतुर्यत्रेति ५० सवाग्विसर्गःसएवकाव्यप्रबंधःप्रयोगःजनताघसंप्लवःजनसमूहाघनाशकः यद्यस्मा
त्तान्येवान्यैःकीर्त्यमानानिशृण्वन्ति श्रोतरिसतिगायंतिनोचेत्स्वयमेव गृणंति ५१ इदानींज्ञानकर्मदिरादपिभगवत्कीर्तनादिषुबादरः कर्त्तव्यइतिआह नैःकर्म्यंत्रि

स्वय

तदेवरम्यंरुचिरंनवंनवंतदेवशश्वन्मनसोमहोत्सवं तदेवशोकार्णवशोषणंनृणांयदुत्तमश्लोकयशोऽनुगीयते ४९ नतद्वचश्चित्रपदंह
रेर्यशोजगत्पवित्रंप्रगृहीतकर्हिचित् तद्ध्वांक्षतीर्थंनतुहंससेवितंयत्राच्युतस्तत्रहिसाधवोमलाः ५० सवाग्विसर्गोजनताघसंप्लवोय
स्मिन्प्रतिश्लोकमबद्धवत्यपि नामान्यनंतस्ययशोंकितानियत्शृण्वंतिगायंति गृणंतिसाधवः ५१ नैःकर्म्यमप्यच्युतभाववर्
जितंनशोभतेज्ञानमलंनिरंजनं कुतःपुनःशश्वदभद्रमीश्वरेनचार्पितंकर्मयदप्यनुत्तमं ५२ यशःश्रियामेवपरिश्रमःपरोवर्णा
श्रमाचारतपःश्रुतादिषु अविस्मृतिःश्रीधरपादपद्मयोःगुणानुवादश्रवणादिभिर्हरेः ५३ ॥ ॥

लक्षणंतत्रकाशकं यज्ज्ञानंयतोनिरंजनंनुपाधिनिवर्तकंतदप्यच्युतभक्तिवर्जितंचेत्तर्हिनशोभतेतेनपरोक्षपर्यंतंभवतीत्यर्थः ईश्वरेनचेदर्पितंतर्हि यदनुत्तमंसर्वो
त्तममपिकर्मतदपिपुनःकुतःशोभते यतःशश्वत्साधनकालेफलकालेचाभद्रंदुःखात्मकं ५२ किंच वर्णाश्रमाचारादिषुयःपरोमहान् परिश्रमःसयशःश्रियामेवयुक्ता
यांश्रियामेव कीर्तिःसंपत्तिश्चकेवलंनपरःपुरुषार्थइत्यर्थः गुणानुवादादिभिस्तुश्रीधरपादपद्मयोरविस्मृतिर्भवति ५३ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्कं०
४०

ततः किमत आह अविस्मृतिरिति क्षिणोति नाशयति ५४ अथेदानीं श्रोतॄनात्मानं चाभिनंदन्नाह यूयमिति द्वाभ्यां हे द्विजाग्र्याः यद्यस्मात् आत्मन्यंतःकरणे श्रीनारायणमाविवेश्य स्थाप्य भजत संभावनायां लोट् अतो भूरिभागाः बहुपुण्याः कथंभूतं अखिलात्मकं भूतं सर्वंतर्यामिणं अत एव देवं सर्वोत्कृष्टं अदेवं न देवोऽन्यो यस्मात् कुतः

अविस्मृतिः कृष्णपदारविंदयोः क्षिणोत्यभद्राणि च शं तनोति च। सत्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तं ५४ यूयं द्विजाग्र्या बत भूरिभागा यच्छश्वदात्मन्यखिलात्मभूतं। नारायणं देवमदेवमीशमजस्रभावा भजताविवेश्य ५५ अहं च संस्मारित आत्मतत्वं श्रुतं पुरा मे परमर्षिवक्त्रात्। प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां च शृण्वतां ५६ एतद्वः कथितं विप्रा कथनीयोरुकर्मणः। माहात्म्यं वासुदेवस्य सर्वाशुभविनाशनं ५७ य एवं श्रावयेन्नित्यं यामक्षणमनन्यधीः। श्रद्धावान्योनुशृणुयात्पुनात्यात्मानमेव सः ५८ द्वादश्यामेकादश्यां वा शृण्वन्नायुष्यवान्भवेत्। पठत्यनश्नन्प्रयतस्ततो भवत्यपातकी ५९ पुष्करे मथुरायां च द्वारवत्यां यतात्मवान्। उपोष्य संहितामेतां पठित्वा मुच्यते भयात् ६० देवता मुनयः सिद्धाः पितरो मनवो नृपाः। यच्छंति कामान्गृणतः शृण्वतो यस्य कीर्तनात् ६१ ऋचो यजूंषि सामानि द्विजोधीत्यानुविंदते। मधुकुल्या घृतकुल्याः पयःकुल्याश्च तत्फलं ६२

ईशं यद्वा यस्मात् यूयं भूरिभागाः तपश्चादिसंपन्नाः ततो नारायणं भजतेति विधिः ५५ मे मया श्रुतं ५६ एतत्पुराणकीर्तनादिफलं प्रपंचयितुमाह श्रावयन्मंत्रणं चेसर्थीः? आत्मानमेव साक्षात्पुनाति। न तु स्नानादिविदेहमात्रं ५८ ऋगाद्यधीत्य द्विजो मधुकुल्यादि यदनुविंदते तत्फलमेतां पठित्वाप्यनुविंदत इति ६२

राम
४०

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच प्रोक्तमिति ६३ राजन्य उदधिमेखलां ६४ यो संतिराषः ६५ अस्य पुराणस्यैवं प्रभावातिरेके कारणमाह ॥ कलिमलानां संहतिं समूहं कालयति विनाशयती
ति तथाभूतस्तत्र शास्त्रांतरे ६६ यः च नाम स्वप्रतिपादितं भगवंतं नमस्करोति तमिति द्वाभ्यां ॥ जगदुदयस्थितिसंयमात्मनो रजआदयः शक्तयो यस्य तं ॥ द्युपतिभिर्दे
वैरपि दुरवसितं अज्ञातः स्तवः स्तोत्रं यस्य तं ६७ उपचिताभिः उद्रिक्ताभिर्नवशक्तिभिः प्रकृतिपुरुषमहदहंकारतन्मात्ररूपाभिः स्वआत्मन्येवोपरचि

पुराणसंहितामेतामधीत्य प्रयतो द्विजः ॥ प्रोक्तं भगवता यत्तु तत्पदं परमं व्रजेत् ६३ विप्रोधीत्याप्नुयात् प्रज्ञां राजन्योदधिमेखलां वैश्यो
निधिपतित्वं च शूद्रः शुध्येत पातकात् ६४ कलिमलसंहतिकालनोखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णं इह तु पुनर्भगवानशेषमूर
र्तिः परिपठितोनुपदं कथाप्रसंगैः ६५ तमहमजमनंतमात्मतत्त्वं जगदुदयस्थितिसंयमात्मशक्तिं द्युपतिभिरजशक्रशंकराद्यैर्दु
रवसितस्तवमच्युतं नतोस्मि ६६ उपचितनवशक्तिभिः स्वआत्मन्युपरचितस्थिरजंगमालयाय भगवत उपलब्धिमात्रधाम्ने सुरऋषभा
नाय नमः सनातनाय ६७ स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोप्यजितरुचिरलीलाकृष्टसारस्तदीयं व्यतनुत कृपया यस्तत्त्वदीपं
पुराणं तमखिलवृजिनघ्नं व्याससूनुं नतोस्मि ६८ ॥ इति श्री भागवते महापुराणे द्वादशस्कंधे द्वादशोध्यायः ॥ १२ ॥

तं स्थिरं जंगमं चालयो यस्य तस्मै भगवते ६७ श्रीगुरुं नमस्करोति स्वसुखेनैव निभृतं पूर्णं चेतो यस्य सः तेनैव व्युदस्तोऽन्यस्मिन्भावो यस्य तथाभूतोपि
अजितस्य रुचिरलीलाभिराकृष्टः सारः स्वसुखगतं स्थैर्यं यस्य सः तत्त्वदीपं परमार्थप्रकाशकं श्रीभागवतं यो व्यतनुत तं नतोस्मीति ६८ ॥ इति
श्रीभागवते महापुराणे द्वादशस्कंधे टीकायां द्वादशोध्यायः ॥ १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०भा०
४१

सर्वपुराणसंख्यादीनुपवर्णयिष्यन् तत्स्तौति पाद्यं देवं प्रणमति। यमिति। स्तवैर्वेदैश्च स्तुन्वंति। स्तुवंति उपनिषदः तस्याकारांतत्वं छंदोनुरोधेन ध्यानेनावस्थितं
निश्चलं तद्गतेन मनसा नयं स्यांतं न विदुः सुरासुरगणाः॥१॥ क्षीरोदमथनादौ कूर्मेयित्वमेव पूदर्शयितुं कूर्मावतारमनुस्मरयन्नाशिषं प्रार्थयते पृष्ठे भ्राम्यदमंदगुरु
रिष्टो मंदरगिरिस्तस्य ग्रावाणस्तेषां अग्राणि तैः कंडूयनात्तेन सुखेन निद्रालोर्निद्राशीलस्य येषां श्वासानिलानां संस्कारास्तेषां कलाश्लेषाः तदनुवर्तनवशात् ज

सूत उवाच॥ यं ब्रह्मा वरुणेंद्ररुद्रमरुतः स्तुन्वंति दिव्यैः स्तवैर्वेदैः सांगपदक्रमोपनिषदैर्गायंति यं सामगाः॥ ध्यानावस्थिततद्गतेन म
नसा पश्यंति यं योगिनो यस्यांतं न विदुः सुरासुरगणा देवाय तस्मै नमः॥१॥ पृष्ठे भ्राम्यदमंदमंदरगिरिग्रावाग्रकंडूयनान्निद्रालोः कमठा
कृतेर्भगवतः श्वासानिलाः पांतु वः॥ यत्संस्कारकलानुवर्तनवशाद्वेलानिभेनांभसां यातायातमतंद्रितं जलनिधेर्नाद्यापि विश्राम्यति॥२॥
॥सूत उवाच॥ ॥पुराणसंख्यासंभूतिमस्य वाच्यप्रयोजने। दानं दानस्य माहात्म्यं पाठादेश्च निबोधत॥३॥ ब्राह्मं दश सहस्राणि पाद्मं
पंचोनषष्टि च॥ श्रीवैष्णवं त्रयोविंशच्चतुर्विंशति शैवकं॥४॥ दशाष्टौ श्रीभागवतं नारदं पंचविंशति॥ मार्कंडं नव वाह्नं च दशपंच चतुःशतं॥
५॥ चतुर्दश भविष्यं स्यात्तथा पंचशतानि च॥ दशाष्टौ ब्रह्मवैवर्तं लैंगमेकादशैव तु॥६॥ चतुर्विंशति वाराहमेकाशीतिसहस्रकं॥ स्कांदं शतं
तथा चैकं वामनं दश कीर्तितं॥७॥ तस्य त्तस्य

लनिधेरंभसां यातायातं न विश्राम्यति न वुसमु... इत्यो नादेवतत् नैसंस्कारवशात् तत्राह वेलाद्योनैर्निभेण मिषेण॥२॥ पु
राणसंख्यास्तासां संभूति समाहारं वास्य तु श्रीमद्भागवतस्य वाच्यं विषयः प्रयोजनं च दानं च तस्य पाठादेश्च माहात्म्यं निबोधत॥३॥ त्रयोविंशति च चतुर्विंशति सहस्राणि
शैवकं शिवपुराणं॥४॥ वाह्नं तु अग्निपुराणं दश पंच सहस्राणि चत्वारि शतानि॥५॥६॥ स्कांदं शताधिकैकाशीति सहस्रं॥७॥

य

राम
४१

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

सौपर्णं गारुडपुराणं एकोनविंशात् एकोनविंशतिः। महाभारतं त्वितिहासः। रामायणं चऋषिशीकं काव्यं। अतः पुराणानां संदोहः सम्

कौर्म्मं स्कान्दं शाखमातं मात्स्यं तत्त्रुचतुर्दश। एकोनविंशं सौपर्णं ब्रह्मांडं दशदशैव तु ॥ ८ ॥ एवं पुराणसंदोहश्चतुर्लक्ष उदाहृतः।
।तत्राष्टादशसाहस्रं श्रीभागवतमिष्यते ॥ ९ ॥ इदं भगवता पूर्वं ब्रह्मणे नाभिपंकजे। स्थिताय भवभीताय कारुण्यात्संप्रकार
शितं ॥ १० ॥ आदिमध्यावसानेषु वैराग्याख्यानसंयुतं। हरिलीलाकथाव्रातामृतानंदितसत्सुरं ॥ ११ ॥ सर्ववेदांतसारं यत् ब्र
ह्मात्मैकत्वलक्षणं। वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनम् ॥ १२ ॥

इत्थं चतुर्लक्षसंख्याक एव। इदानीमस्य वाच्यप्रयोजनादीन् दर्शयितुं माहात्म्ये इत्यादिना ॥ ९ ॥ १० ॥ हरिलीलाकथानां व्रातः समूहः स एवामृतं तेनानं
दिताः संतः सुराश्च येन तत् ॥ ११ ॥ तन्निष्ठं तद्विषयं ॥ १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द्वा०
४२ पौष्ठपद्यां भाद्रपद्यां हेममिंहसमन्वितं सुवर्णसिंहासनारूढं ॥ १३ ॥ १४ ॥ तदसएवप्रभृतंतेन दृश्यते ॥ निवृतस्य ॥ १५ ॥ १६ ॥ पारमहंसंपरमहंसैः ॥
आप्तुनेः कर्म्मसर्वकर्मोपरमः ॥ नक्त्रातद्भुवणादिपरीविमुच्यते ॥ ७ ॥ श्रीभागवतंसंप्रदायप्रवर्तकरूपेण भगवध्यानपक्षेणमंगलमाचरतियेन श्रीनारायणेन
शानत्रीप कस्मैब्रह्मणेप्रतुलः ॥ स्वसमः ॥ अयंश्रीभागवतरूपः पुराकल्पादौतद्रूपेणब्रह्मरूपेणतद्रूपिणा नारदरूपिणा ॥ योगींद्रायशुकायव्यासाय व्यासरूपेणहरिणा

पौष्टपद्यांपौर्णमास्यांहेमसिंहसमन्वितं ददातियोभागवतंसयाति ॥ परमांगतिं ॥ १३ ॥ राजंतेतावदन्यानिपुराणानिसतां
नैन गणे यावद्भागवतंपुण्यंश्रूयतेमृतसागरं ॥ १४ ॥ सर्ववेदांतसारंहिश्रीभागवतमिष्यते ॥ तद्रसामृततृप्तस्यनान्यत्रस्या
द्रतिक्वचित् ॥ निम्नगानांयथागंगादेवानामच्युतोयथा ॥ वैष्णवानांयथाशंभुःपुराणानामिदंतथा ॥ १६ ॥ क्षेत्राणांचैवसर्वे
षांयथाकाशीह्यनुत्तमा ॥ तथापुराणव्रातानांश्रीमद्भागवतंद्विजाः ॥ १७ ॥ श्रीमद्भागवतंपुराणममलंयद्वैष्णवानांप्रियंयस्मि
न्पारमहंस्यमेकममलंज्ञानंपरमुगीयते यत्रज्ञानविरागभक्तिसहितंनैःकर्म्यमाविःकृतंतच्छृण्वन्विपठन्विचारण
परोभक्त्याविमुच्येन्नरः ॥ १८ ॥ कस्मैयेनविभासितोयमतुलोज्ञानप्रदीपःपुरातद्रूपेणचनारदायमुनयेकृष्णायतद्रूपिणा योगींद्रायतदात्मनाथभगवद्रातायकारुण्यतस्तच्छुद्धंविमलंविशोकममृतंसत्यंपरंधीमहि ॥ १९ ॥ ॥

भगवद्रातायपरीक्षिते

नदात्मनाशुकरूपेणतस्मैसंसंश्रीनारायणायस्मंतत्वंधीमहि ॥ २० ॥ ॥ ॥श्री॥ ॥ राम
४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिगायत्र्यैवयथोपक्रमस्तामुपसंहरन्गायत्र्याख्यंब्रह्मविचिंत्यमितिदर्शयति॥१९॥तमेवदेवतारूपेणगुरुरूपेणचप्रणमति॥नमस्तस्माइतिसार्धं
माचार्यंव्याख्यातवान्॥२०॥२१॥२२॥भावार्थदीपिकामेतांभगवद्भक्तवत्सलः॥श्रीपरमानंदपादाब्जभृंगःश्रीधरोकरोत्॥१॥स्वबालचपला
श्री

नमस्तस्मैभगवतेवासुदेवायसाक्षिणे॥यइदंकृपयाकस्मैव्याचचक्षेमुमुक्षवे॥१९॥योगींद्रायनमस्तस्मैशुकायब्रह्मरू
पिणे॥संसारसर्पदष्टंयोविष्णुरातममूमुचत्॥२०॥भवेभवेयथाभक्तिःपादयोस्तवजायतेतथाकुरुष्वयोगेशनाथ रु
मे स्त्वंयतःप्रभो॥२१॥नामसंकीर्तनंयस्यसर्वपापप्रणाशनं॥प्रणामोदुःखशमनस्तंनमामिहरिंपरं॥२२॥ ॥इतिश्री
भागवतेमहापुराणेऽष्टादशसाहस्र्यांसंहितायांवैयासिक्यांद्वादशस्कंधेत्रयोदशोऽध्यायः॥१३॥
१९।१०।२३।।३१।२५।१९।१५।२४।२४।१०।३१।१९।२।२२५।।

दापैःस्वलीलापरिनिर्वृतैः॥श्रीयतांपरमानंदनृहरिःसद्गुरुःस्वयं॥२॥श्रीपुरानंदसंप्रीत्यैगुह्यंभागवतंमया॥तन्मतेनेदमाख्यातंनतुस्वमतिवैभवा
त्॥३॥ ॥इतिश्रीभागवतेमहापुराणेभावार्थदीपिकायांश्रीधरस्वामिविरचितायांद्वादशस्कंधःसंपूर्णःसमाप्तमिति॥ ॥ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰

१

ॐ नमो भगवते वासुदेवाय ॥ ॥ ततः पंचाशत्तमे तु जरासंधनयास्विकारम्यिलां बुधौ दुर्गं तन्निर्मितिं जनम् ॥ शकपराजनकुपटे रेवहलादैत्यान
यन्नतः ॥ अजयच्च जरासंधं स्मेर्णो वतु धार्मिकम् ॥ २ ॥ अस्तिप्राप्तिसंज्ञिके ईयतुः जग्मतुः ॥ १ ॥ २ ॥ सेकं शोकः कुलेन्द्रमर्षं तासां सुता ॥ ३ ॥ न्यरुणत
हरोधा ॥ ४ ॥ तस्य बले [illegible] सैन्यं मुद्वेलं लंवित मर्य्यादं सागरमिव तेन तस्य बलेन संरुद्धम् ॥ ५ ॥ किं बलमेव हन्मि न मागधं मागधे हता बलं गृह्णामि । यद्वास

श्रीशुक उवाच ॥ ॥ अस्तिः प्राप्तिश्च कंसस्य महिष्यौ भरतर्षभ ॥ मृते भर्त्तरि दुःखार्ते ईयतुः स्म पितुर्गृहान् ॥ १ ॥ पित्रे मगधराजा
य जरासंधाय दुःखिते ॥ वेदयां चक्रतुः सर्वमात्मवैधव्यकारणं ॥ २ ॥ स तदप्रियमाकर्ण्य शोकामर्षयुतो नृप ॥ अयादवीं महीं
कर्त्तुं चक्रे परममुद्यमं ॥ ३ ॥ अक्षौहिणीभिर्विंशत्या तिसृभिश्चापि संवृतः ॥ यदुराजधानीं मथुरां न्यरुणत्सर्वतो दिशं ॥ ४ ॥
निरीक्ष्य तद्बलं कृष्ण उद्वेलमिव सागरं ॥ स्वपुरं तेन संरुद्धं स्वजनं च भयाकुलं ॥ ५ ॥ चिंतयामास भगवान् हरिः कारणमानु
षः ॥ तद्देशकालानुगुणं स्वावतारप्रयोजनम् ॥ ६ ॥ हनिष्यामि बलं ह्येतद्भुवि भारं समाहितं ॥ मागधेन समानीतं वश्यानां
सर्वभूभुजाम् ॥ ७ ॥ अक्षौहिणीभिः संख्यातं भटाश्वरथकुंजरैः ॥ मागधस्तु न हंतव्यो भूयः कर्त्ता बलोद्यमम् ॥ ८ ॥ ॥ रम॰ १

मागधं सर्वं हन्मीति चिंतयामास ॥ ननु प्रथमं कथं जेष्यामीत्येवं चिंतयितुं युक्तं तत्राह कारणमानुष इति भूभारावतारकारणेन मानुषो न तत्त्वत इति
॥ ६ ॥ एवं द्वाविविचिंत्य प्रथमं पक्षं निर्धारितवान् तत्राह चतुर्भिः ॥ हनिष्यामीति ॥ ७ ॥ भूयः बलोद्यमं कर्त्ता करिष्यति ॥ ८ ॥ ॥ अक्षौहिण्याः संख्या ॥ ॥ रथः
२१८७० ॥ गजाः ॥ पदातयः ॥ १०९३५० ॥ अश्वाः ॥ ६५६१० ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वत एव हंतव्यस्तत्राह। एतदर्थं इति। एतच्छ्रुत्वार्थं स्पष्टयति भूभारहरणायेति॥८॥ अयमेतदर्थो ऽवतार इत्युपलक्षणमित्याह। अन्योपीति।
अन्नवत उज्झितः॥१०॥ समस्तौ सारथिसहितौ परिच्छदः ध्वजकवचादिस्तत्सहितौ॥११॥१२॥ संभवन्नरसको नाथो विद्यते येषां ते तावंतस्तेषां॥१३॥

एतदर्थो ऽवतारो हि भूभारहरणाय मे॥ संरक्षणाय साधूनां हतो ऽस्येषां वधाय च॥८॥ अन्योपि धर्मरक्षायै देहः संभ्रियते मया। विरामायाप्यध
र्मस्य काले प्रभवतः क्वचित्॥१०॥ एवं ध्यायति गोविंदे आकाशात्सूर्यवर्चसौ। रथावुपस्थितौ सद्यः ससूतौ सपरिच्छदौ॥११॥ आयुधानि च
ण दिव्यानि पुराणानि यदृच्छया॥ दृष्ट्वा तानि हृषीकेशः संकर्षणमथाब्रवीत्॥१२॥ पश्यार्य व्यसनं प्राप्तं यदूनां त्वावतां प्रभो। एष ते रथ आया ६७
तो दयितान्यायुधानि च॥१३॥ यानमास्थाय जह्येतं … सनात्स्वान्समुद्धर। एतदर्थं हि नौ जन्म साधूनामीश शर्मकृत्॥१४॥ त्रयोविं
शत्यक्षौहिणीकाख्यं भूमेर्भारमपाकुरु॥ एवं संमंत्र्य दाशार्हौ दंशितौ रथिनौ पुरात्॥१५॥ निर्जग्मतुः स्वायुधाढ्यौ बलेनाल्पीयसा वृतौ॥ शंखं
दध्मौ विनि… गत्य हरिर्दारुकसारथिः॥१६॥ ततो ऽभूत्परसैन्यानां हृदि वित्रासवेपथुः॥ तावाह मागधो वीक्ष्य हे कृष्ण पुरुषाधम॥१७॥ न
त्वया योद्धुमिच्छामि बालेनैकेन लज्जया॥ गुप्तेन हि त्वया मंद न योत्स्ये याहि बंधुहन्॥१८॥ तव राम यदि श्रद्धा युध्यस्व धैर्यमुद्वह॥ हित्वा वा मच्छरैश्छि
न्नं देहं स्वर्याहि मां जहि॥१९॥ श्रीभगवानुवाच॥ न वै शूरा विकत्थंते दर्शयंत्येव पौरुषं॥ न गृह्णीमो वचो राजन्नातुरस्य मुमूर्षतः॥२०॥ ॥

॥१४॥ दंशितौ बद्धकवचौ॥१५॥ स्वायुधाढ्यौ शोभनायुधसंपन्नौ॥१६॥ पुरुषाधम यस्मादिति वा स्तवो ऽर्थः हे पुरुषोत्तमेति॥१७॥ गुप्तेन सर्वतो र
क्षितेन हे मंद बध्नातीति बंधुः रविघातां हंतीति तथा हे अविद्यानिरस्तेति याहि प्राप्नुहि॥१८॥ अच्छेद्यदेहो सावितिस्वयमेव मत्वा परितो
षात्पश्चात्तरमाह। यद्वा मां जहीति॥१९॥ यथाश्रुतार्थं भगवानुवाच न वै शूरा इति। विकत्थंते श्लाघंते॥२०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० उ०
२

माधवौ मधुवंशजौ वौ महता सैन्यसमूहेनावृतवान् वायुरभ्रैः सूर्यं रेणुर्यैर्निश्शान्तिं यथेत्यदर्शनमात्रमेवावरणमिति सूचितम् ॥ २१ ॥ २२ ॥ परस्यानी
कानि सैन्यानि तान्येव पयोमुचो मेघास्तेषां शिलीमुखा बाणास्तेषां मत्तुल्बणं एवं वर्षे तेन पीडिते मस्फूर्जयत् उज्जृंभितवान् ॥ २३ ॥ तदा हरिः गृह्णन्निति निषंगा
दिषुधेः शरान् तत् गृह्णन् अथ तान् गुणे संदधत् गुणे संदधन् गुणे मोक्षविशितबाणसमूहान् मुंचन् निघ्नन् प्रहरन् पत्तिः पदातिः निरंतरमिति यह

श्रीशुक उवाच ॥ ॥ जरासुतस्तावभिसृत्य माधवौ महाबलौघेन बलीयसावृणोत् ॥ ससैन्ययानध्वजवाजिसारथी सूर्यानलौ वायुरिवा
भ्ररेणुभिः ॥ २१ ॥ सुपर्णतालध्वजचिह्नितौ रथावलक्षयन्त्यो हरिरामयोर्मृधे स्त्रियः पुराट्टालकहर्म्यगोपुरं समाश्रिताः संमुमुहुः शुचा-
र्दिताः ॥ २२ ॥ हरिः परानीकपयोमुचां मुहुः शिलीमुखात्युल्बणवर्षपीडितं ॥ स्वसैन्यमालोक्य सुरार्च्चितं व्यस्फूर्जयच्छार्ङ्गशरासनोत्त- सुरा
मं ॥ ... ॥ गृह्णन्निषंगादथ संदधच्छरान् विकृष्य मुंचन् शितबाणपूगान् ॥ निघ्नन् रथान् कुंजरवाजिपत्तीन्निरंतरं यद्वदलातचक्रम् ॥
॥ २४ ॥ निर्भिन्नकुंभाः करिणो निपेतुरनेकशोऽश्वाः शरवृक्णकंधराः ॥ रथा हताश्वध्वजसूतनायकाः पदातयश्छिन्नभुजोरुकंधराः ॥ २५ ॥
संछिद्यमानद्विपदेभवाजिनामंगप्रसूताः शतशोऽसृगापगाः ॥ भुजाहयः पूरुषशीर्षकच्छपा हतद्विपद्वीपहयग्रहाकुलाः ॥ २६ ॥ ॥ राम०
२

एदिक्रियाविशेषणं ज्वलत्काष्ठभ्रमणे यथा चक्रवद्भवति तद्वत् अस्फूर्जयदिति ॥ २४ ॥ हताः अश्वाः ध्वजाः सूताः नायकाः रथिनश्च येषु ते ॥ २५ ॥ सं
छिद्यमाना द्विपदाः इभा वाजिनश्च तेषामंगेभ्यः प्रसृताः असृगापगा रुधिरनद्यः परस्परं प्रवर्तिता धृतिदतीपेतौ त्वयः ॥ प्रसिद्धनदीरूपकमाह भुजा ए
वाहयो यासु ताः ॥ पुरुषाणां शीर्षाण्येव कच्छपा यासु ताः हताः द्विपा एव द्वीपास्तं तत्र वर्तिततया निहया एव ग्रहास्तैश्चाकुला व्याप्ताः ॥ २६ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करोरुखङ्गमीनायासु ताः नराणां केशा एव शैवलं यावसु ताः धनूंष्येव तरंगाः आयुधान्येव गुल्माः तैश्च संकुलाः अच्छुरिकाश्चर्माणि चक्राणि वा तान्येवा
वर्त्ताः तैर्नयानकाममहामणीनां प्रवेकाः उत्तमाः आभरणानि च यथायथं अश्मानः शर्कराश्च यासु ताः॥ २७॥ नीरूणां नयावहाः मनुष्याणां स्त्रीनां णां हर्षकर्यः॥ २८॥
किंच संकर्षणेनापि तद्बलं स्त्रयं प्रणीतं अंगहे राजन् अर्णवदुर्गं दुर्गमं विघ्नैरवं नयं करं च यतः दुरंतपारं अंतोत्रतलं पारमबधिः दुःशक्षेति निषेधे विक्रमेणागाधं

करोरुमीना नरकेशाशैवला धनुस्तरंगायुधगुल्मसंकुलाः॥ अच्छुरिकावर्त्तनयानकाममहामणिप्रवेकाभरणाश्मशार्कराः॥ २७॥ प्रव
र्त्तिता नीरुत्तयावहा मृधे मनस्विनां हर्षकराः परस्परं॥ विनिघ्नतारीन्मुसले न दुर्मदान्संकर्षणेनापरिमेयतेजसा॥ २८॥ बलेतदंगा
र्णवदु॰ विघ्नैरवं दुरंतपारं मगधेंद्रपालितं॥ स्त्रयं प्रणीतं वसुदेवपुत्त्रयोर्विक्रीडितं तत्क्रमदीक्षयोः परं॥ २९॥ स्थित्यक्षुद्रवं तं त्तु वनं त्रय
स्य यः समीहते नेतगुणैः स्वलीलया॥ न तस्य चित्रं परपक्षतियहस्तथापि मर्त्यानुविधस्य वर्ण्यते॥ ३०॥ जयाह विरथं रामो जरासंधं
महाबलं॥ हतानीकावशिष्टासुं सिंहः सिंहमिवौजसा॥ ३१॥ बध्यमानं हताराति पाशैर्वारुणमानुषैः॥ वारयामास गोविंदस्तेन कार्य
चिकीर्षया॥ ३२॥ स मुक्तो लोकनाथाभ्यां व्रीडितो वीरसंमतः॥ तपसे कृतसंकल्पो वारितः पथि राजभिः॥ ३३॥

देवागतश्च निरवधिकमित्यर्थः किंच मगधेंद्रेण च पालितं वर्त्तं य देवं च्युतं राम लक्ष्मयोः कर्मोकं तत्सरं केवलं तयोर्विक्रीडितं न तु पराक्रमः॥ २९॥ न चैतदा
श्चर्यमित्याह॥ स्थित्युद्भवां तमिति तर्हि किमित्याश्चर्यमिव वर्ण्यते तत्राह॥ तथापीति मर्त्याननुविधत्ते अनुकरोतीति मर्त्यानुविधस्तस्य॥ ३०॥ किं जग्राहेति
। हतान्यनीकानि यस्य अवशिष्टा असव एव यस्य तं च॥ ३१॥ ॥ हतावक्रुराः अरातयो येन तथाभूतमपि जरासंबंधं बध्यमानं वारयामासेति॥ ३२॥ ३३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.तु. पवित्रार्थानि धर्मोपदेशपराणि पदानि येषु तैर्वाक्यैः नयनैर्नीतिभिः प्राह। तैर्लौकिकैः तत्र लोकिकस्या ममाकुः स्वकर्मेति यदुनिरलकैः हत्वा ते महतः पराक्रमं
केवलं कर्मबंधेन प्राप्तः च्युतस्त्वया न लक्षितमिति॥ ३४॥ बार्हद्रथो जरासंधः॥ ३५॥ मुकुंदोपि ययाविसन्नुषंगः॥ नसंतं बलं यस्य सः॥ तस्यैकामृतदेष्याश्रुत
३ प्रतिसंधानादिति नाकः॥ निस्त्रीर्णः अनयासेनैव तीर्णोरिबलार्णवो येन साधुसाधु इत्यनुमोदितश्च॥ ३६॥ प्रकृत्य तैर्मधुरवाग्मिभिर्जनैः रत्निसंगम्यमि

वाक्यैः पवित्रार्थपदैर्नयनैः प्राह तैरपि॥ स्वकर्मबंधः प्राप्तोयं यदुभिस्त्वपराक्रमः॥ ३४॥ हते तेषु सर्वानीकेषु नृपो बार्हद्रथस्तदा॥ उपेक्षि
तो नगवता मगधान्दुर्मनाययौ॥ ३५॥ मुकुंदोप्यक्षतबलो निस्तीर्णारिबलार्णवः॥ विकीर्यमाणः कुसुमैस्त्रिदशैरनुमोदितः॥ ३६॥ मा
धुरैरुपसंगम्य विज्वरैर्मुदितात्मभिः॥ उपगीयमानविजयः स्तूतमागधवंदिभिः॥ ३७॥ शंखदुंदुभिनिर्घोषैर्भेरीतूर्यपणैकशः॥ वीणा
वेणुमृदंगानि पुरं प्रविशति प्रभौ॥ ३८॥ सिक्तमार्गां हृष्टजनां पताकाभिरलंकृतां॥ निर्घुष्टां ब्रह्मघोषेण कौतुकाबद्धतोरणां॥ ३९॥ नि
चीयमानो नारीभिर्माल्यदध्यक्षतांकुरैः॥ निरीक्ष्यमाणः सस्नेहं प्रीत्युत्कलितलोचनैः॥ ४०॥ आयोधनगतवित्तमनंतं वीरभूषणं॥ य
दुराजाय तत्सर्वमाहृतं प्रादिशत्प्रभुः॥ ४१॥ एवं सप्तदशकृत्वस्तावत्यक्षौहिणीबलः॥ युयुधे मागधो राजा यदुभिः कृष्णपालितैः॥ ४२॥ ॥

जित्वा॥ ३७॥ तदा प्रभौ पुरं प्रविशति सति शंखवाद्योनेकुः॥ ३८॥ कथंभूतां पुरं तदाह सिक्तमार्गामिति ब्रह्मघोषेण वेदघोषेण निर्घुष्टां निनादितां कौतुकेन
उत्सवेन आसमंततो बद्धानि तोरणानि यस्यां तां॥ ३९॥ निचीयमानः विकीर्यमाणः प्रविवेशेति विपरिणतानुषंगः॥ ४०॥ आयोधने रणे न्हूमितं तत्रस्थं वित्तं
वीराणां भूषणं॥ ४१॥ तावति शत्रिच्छेदः तावति पराजयेवर्त्तमानेपि त्र्यक्षौहिण्या बलं यस्य सः॥ सप्तदशकृत्वः सप्तदशवारान् युयुधे॥ ४२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अक्षिएपन् क्षयंति नृः॥४४॥ अष्टादशमे ऽष्टादशे संग्रामे नामे तन्मध्ये कस्मात्कालयवनः प्राप्तः॥४५॥ आत्मसंमितान् स्वतुल्यान्॥४६॥ वृजिनं दुःखं॥ उ
यतः यवनात् जरासंधाच्च॥४६॥ तदा हृदये ननिरुंधे निरुरोध॥४७॥ अस्मत्त्रनेन॥४८॥४९॥ समुद्रमध्ये दुर्गं तन्मध्ये नगरं कृत्स्नाद्भुतं सर्वाश्चर्यमयं अ
चीकरत् कारयामास॥५०॥ त्वष्टा विश्वकर्मा तदीयं शिल्पनैपुणं पंचक्रियाकौशलं॥ तदाह सार्धैस्त्रिभिः रथ्येति॥ रथ्या राजमार्गाः पुरतः वीथ्यः उपमार्गाः प

अक्षिएवंसप्तदशकृत्वंसर्वेद्वस्मयःक्रमते तस्मा॥ हतेषु त्वेषनीकेषु तस्कोयात्परिनिर्नृपः॥४४॥ अष्टादशसंग्रामे आगामिनितदंतरा॥ ना
रदप्रेषितो वीरो यवनः प्रत्यदृश्यत॥४५॥ रुरोध मथुरामेत्य तिसृभिर्म्लेच्छकोटिभिः॥ नृलोके चाप्रतिद्वंद्वो वृष्णीञ्छ्रुत्वात्मसंमितान्॥
४६॥ तं दृष्ट्वाचिंतयत्कृष्णः संकर्षणसहायवान्॥ अहो यदूनां वृजिनं प्राप्तं ह्युभयतो महत्॥४७॥ यवनोयं निरुंधेस्मानद्य तावन्म
हाबलः॥ मागधोप्यद्य वा श्वो वा परश्वो वागमिष्यति॥४८॥ आवयोर्युध्यतोरस्य यद्यागंता जरासुतः॥ बंधून्वधिष्यत्यथ वा नेष्यते स्व
पुरं बली॥४९॥ तस्माद्द्य विधास्यामो दुर्गं द्विपददुर्गमं॥ तत्र ज्ञातीन्समाधाय यवनं घातयामहे॥ इति संमंत्र्य भगवान्दुर्गं द्वाद
शयोजनं॥ अंतःसमुद्रे नगरं कृत्स्नाद्भुतमचीकरत्॥५०॥ दृश्यते यत्र हि त्वाष्ट्रं विज्ञानं शिल्पनैपुणं॥ रथ्याचत्वरवीथीभिर्यथावा
स्तु विनिर्मितम्॥५१॥ सुरद्रुमलतोद्यानविचित्रोपवनान्वितम्॥ हेमशृंगैर्दिविस्पृग्भिः स्फाटिकाट्टालगोपुरैः॥५२॥ ॥

थमतः उभयतोपि चत्वराणि अंगणानि तन्मध्ये कोष्ठास्ततोप्यंतः॥ सुवर्णमिव तानि तदुपरि स्फाटिकाट्टालिकास्तदुपरि हेमकुंभाश्चेति वस्तु भूमि
कं यथावास्तु गृहादिनिर्माणस्थानं तमनतिक्रम्य विनिर्मितम्॥५१॥ सुराणां द्रुमा लताश्च येषु तान्युद्यानानि विचित्राण्युपवनानि च तैरन्वितं हेममयानि
शृंगाणि येषु तैः दिविस्पृग्भिः॥ अत्युच्चैः स्फाटिकाश्च ह्यट्टाला उपरि भूमिकाः गोपुराणि च द्वाराणि तैर्निर्मितम् इत्युत्तरेणान्वयः॥५२॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त

भा॰ द॰ उ॰ राजतारकूटैः रजतं च आरकूटं च पीतलोहं ताभ्यां निर्मितैः कोष्ठैः अध्वशालान्नशालाभिः शिखिभिः कथंभूतैः हैमकुंभैरलंकृतैः तथा रत्नकूटैः पद्मरागा
दिशिखरैः हैमैः सौवर्णैः महामरकतमयाभिः स्थलीभिर्येषु तैर्गृहैः॥५३॥ किंच नगरगृहादौ वास्तोष्पतीनां देवानां च गृहैर्वलभीभिश्चन्द्रशालिकाभिश्च ४
निर्मितं यद्देवगृहैः राजगृहैः रुक्मसमक्षोभमानं॥५४॥ पारिजातं च प्राहिणोत्प्रस्थापयामास सेतिशुक्लपराशिक्ष्वं वा दास्त्वं ज्ञात्वा वित्वा द्रुतनिर्देशः
॥ मर्त्यधर्मैः॥ क्षुत्पिपासादिषड्भिरूर्मिभिः॥५५॥ निधिपतिः कुवेरः अष्टौ कोशान्निधीन् पद्मश्चैव महापद्मो मकरकूर्मौ तथोदकः नीलो मुकुं

रातांजरकूटैः कोष्ठैर्हैमकुंभैरलंकृतैः॥ रत्नकूटैर्गृहैर्हैमैर्महामरकतस्थलैः॥५३॥ वास्तोष्पतीनां च गृहैर्वलभीभि
श्च निर्मितं॥ चातुर्वर्ण्यजनाकीर्णं यदुदेवगृहोल्लसत्॥५४॥ सुधर्मां पारिजातं च महेंद्रः प्राहिणोद्धरेः॥ यत्र चावस्थितो
मर्त्यो मर्त्यधर्मैर्न युज्यते॥५५॥ श्यामैककर्णान्वरुणो हयान्शुक्लान्मनोजवान्॥ अष्टौ निधिपतिः कोशान्लोकपालो नि
जोदयान्॥५६॥ यद्यद्भगवता दत्तमाधिपत्यं स्वसिद्धये॥ सर्वं प्रत्यर्पयामासुर्हरौ भूमिगते नृप॥५७॥ तत्र योगप्रभा
वेन नीत्वा सर्वजनं हरिः॥ प्रजापालेन रामेण कृष्णः समनुमंत्रितः॥५८॥ निर्जगाम पुरद्वारात्पद्ममाली निरायुधः॥ ॥ राम॰
इति श्रीभागवते महापुराणे दशमस्कंधे दुर्गनिवेशनं पंचाशत्तमः॥ ॥ ४

दः शंखश्च निधयोऽष्टौ प्रकीर्तिता इत्युक्ता नतिप्रसिद्धान् निजोदयान् निजविभूतीः॥५६॥ अन्ये च सिद्धये भगवता स्वाधिकारसिद्धये यद्यदा
धिपत्यं दत्तमासीत्तत्सर्वं प्रत्यर्पयामासुरिति॥५७॥ यथा कालयवनो न वेत्ति न चासौ जनः॥ तथा योगप्रभावेन नीत्वा सर्वमत्र स्थिताः प्रजाः पालयन्नहं
पालयिष्य इति समनुमंत्रितः॥ कृतानुमंत्रण इत्यर्थः॥५८॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे टीकायां पंचाशत्तमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकपंचाशत्तमे हन्मुचुकुंददृग्गा हरिः ॥ यवनं मुचुकुंदेन स्वतस्मन्नक्ष कंपा ता ॥१॥ यवनेंद्रसुतात्कालयवनाद्यदुनीषण्णात् । हरिर्हरगिरःस्वैरं पाल
नायापलायत ॥२॥ यदा गार्ग्यः श्यालोऽनपंढ इत्युक्तस्तदा यादवैरुपहसितेऽकुध्रोऽसौ श्रीमहेशं प्रसाद्य यदुनीषणं पुत्रं वरं लब्धवान् । ततश्च यवनेंद्रेण
पुत्रेण स्वक्षेत्रे पुत्रोत्पादनाय प्रार्थितो गार्ग्यः कालयवनमजीजनदिति पुराणप्रसिधं । पुरद्वारान्निक्रांतमुत्किहानं उरुज्वलंतं ॥१॥२॥ नित्यप्रमुदित

श्रीशुक उवाच ॥ तं विलोक्य विनिःक्रांतमुज्जिहानमिवोडुपं ॥ दर्शनीयतमं श्यामं पीतकौशेयवाससं ॥१॥ श्रीवत्सवक्षसं भ्राजत्कौस्तु
भामुक्तकंधरं ॥ पृथुदीर्घचतुर्बाहुं नवकंजारुणेक्षणं ॥२॥ नित्यप्रमुदितं श्रीमत्सुकपोलं शुचिस्मितम् ॥ मुखारविंदं बिभ्राणं स्फुर
न्मकरकुंडलं ॥३॥ वासुदेवो ह्ययमिति पुमां ॥ श्रीवत्सलांछनः ॥ चतुर्भुजोऽरविंदाक्षो वनमाल्यतिसुंदरः ॥४॥ लक्षणैर्नारदप्रोक्तैर्नान्यो
भवितुमर्हति ॥ निरायुधश्चलन्पद्भ्यां योत्स्येनेन निरायुधः ॥५॥ इति निश्चित्य यवनः प्राद्रवंतं पराङ्मुखम् ॥ अन्वधावज्जिघृक्षुस्तं दुरा
पमपि योगिनां ॥६॥ हस्तप्राप्तमिवात्मानं हरिणा स पदे पदे ॥ नीतो दर्शयता दूरं यवनेशोऽद्रिकंदरम् ॥७॥ पलायनं यदुकुले जातस्य
तव नोचितं ॥ इति क्षिपन्ननुगतो नैनं प्रापाहताशुभः ॥८॥ एवं क्षिप्तोपि भगवान्प्राविशद्गिरिकंदरं ॥ सोपि प्रविष्टस्तत्रान्यं शयानं ददृशे
नरं ॥९॥ नन्वसौ दूरमानीय शेते मामिह साधुवत् ॥१०॥ ॥

तमित्यादि मुखारविंदविशेषणं ॥३॥४॥ नारदोक्तैर्लक्षणैरयं पुमान्
वासुदेव एव नान्यो भवितुमर्हति । स्वयं च निरायुधः । अतो तेन पद्भ्यामेव चलन्निरायुधो हं योत्स्यामीति निश्चित्य तं पराङ्मुखं प्राद्रवंतमन्वधावदित्य
न्वयः ॥५॥६॥ आत्मानं हस्तप्राप्तमिव दर्शयता हरिणा नीतः इत्यन्वयः ॥७॥ अहताशुभः अक्षीणकर्मा ॥८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰ तेशयानमच्युतंमत्वा अताडयदिति॥१०॥११॥तस्यक्रुद्धस्यदृष्टिपातेनसंदीप्तोयःस्वदेहजोग्निस्तेन॥१२॥यवनस ईयतिहि नस्थीतितथासकस्य

५ वंशः किंकीदृशःकीदृक्प्रभावश्चनकिंतेजः कस्यवीर्यंपुत्र इत्यर्थः॥शिरसे॥अशयिष्ट॥१३॥सत्सः संगरोयुद्धंप्रतिज्ञावायस्यसः॥१४॥१५॥गुहेकार्त्तिके

इतिमत्वाच्युतंमूढस्तंपदासमताडत॥१०॥सउत्थायचिरंसुप्तः शनैरुन्मील्यलोचने॥दिशोविलोकयन्पार्श्वेतमद्राक्षीदव
स्थितं॥११॥सतावत्तस्यरुष्टस्यदृष्टिपातेनभारत॥देहजेनाग्निनादग्धोभस्मसादभवत्क्षणात॥१२॥राजोवाच॥॥कोनामस
पुमान्ब्रह्मन्कस्यकिंवीर्यएवच॥कस्माद्गुहांगतःशिश्येकिंतेजोयवनार्दनः॥१३॥॥श्रीशुकउवाच॥॥सइक्ष्वाकुकुलेजातोमां
धातृतनयोमहान्॥मुचुकुंदइतिख्यातोब्रह्मण्यःसत्यसंगरः॥१४॥सयाचितःसुरगणैरिंद्राद्यैरात्मरक्षणे॥असुरेभ्यःपरि
त्रस्तैस्तद्रक्षांसोकरोच्चिरं॥१५॥लब्ध्वागुहंतेस्वःपालंमुचुकुंदमथाब्रुवन्॥राजन्विरमतांकृच्छ्राद्भवान्नःपरिपालनात॥१६॥
नरलोकंपरित्यज्यराज्यंनिहतकंटकं॥अस्मान्पालयतोवीरकामास्तेसर्वउज्झिताः॥१७॥सुतामहिष्योभवतोज्ञातयोमात्यमं एम॰
त्रिणः॥प्रजाश्चतुल्यकालीयानाधुनासंतिकालिताः॥१८॥कालोबलीयान्बलिनांभगवानीश्वरोव्ययः॥२०॥प्रजाःकालयतेक्री ५
डन्पशुपालोयथापशून्॥१९॥वरंवृणीष्वभद्रंतेऋतेकैवल्यमद्यनः॥एकएवेश्वरस्तस्यभगवान्विष्णुरव्ययः॥२०॥ ॥

स्व पोस्वःपालंकैर्गपालकंसेनान्यं॥१६॥उज्झितास्त्यक्तागताइत्यर्थः॥१७॥किंचसुताइतितुल्यकालीयाः॥त्वत्समानकालीनाः॥कालिताःविचालिताः
॥१८॥मत्स्यजाःकोन्यःकालयेदितिचेदत आह कालइति॥कालयतेइतस्ततश्चालयति॥१९॥तस्यकैवल्यस्य॥२०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुहायांप्रविष्टःशेतेस्म॥२१॥२२२३२४२५२६॥अर्षितःअनिन्नूतःदुर्धर्षेअधृष्यं॥२७॥विपनेअरण्येतत्रापिगिरिगह्वरे।प्रवेशस्थानेतत्रापिउरुकंटकेपद्म
पलाशसहशास्तांपद्मांविचरसीति॥२८॥तेजःमूर्त्तिःप्रभवोदीप्तिर्वा॥२९॥सर्वत्रापरितोषाराहुमत्तइति॥पुरुषर्षभश्रीविष्णुगुह्यध्वांतंअंतस्तमं॥३०॥व

एवमुक्तःसवैदेवानत्रिवंशमहायशाः॥अत्रायिष्टगुहाविष्टोनिद्रयादेवदत्तया॥२१॥स्वापयंतंयस्तुमध्येबोधयेत्वामचेतनः॥सत्वयाद
ष्टमात्रस्तुतस्मीनवतुतस्सणात॥२२॥पवनेनस्ससात्रिनेतेगवानसात्वतर्षभः॥ध्यातमानेदर्शयामासमुचुकंदायधीमते॥२३॥तमालो
कघनश्यामंपीतकौशेयवाससं॥श्रीवत्सवक्षसंभ्राजत्कौस्तुभेनविराजितं॥२४॥चतुर्भुजंरोचमानंवैजयंत्याचमालया॥चारुप्रसन्नवदनं
स्फुरन्मकरकुंडलं॥२५॥प्रेक्षणीयंनृलोकस्यसानुरागस्मितेक्षणं॥अपीच्यवयसंमत्तमृगेंद्रोदारविक्रमं॥२६॥पर्यपृच्छन्महाबुधिस्तेजसा
२ तस्यधर्षितः॥शंकितःशनकैराजंदुर्धर्षमिवतेजसा॥२७॥॥मुचुकुंदउवाच॥॥कोभवानिहसंप्राप्तोविपिनेगिरिगह्वरे॥पद्भ्यांपद्मपला
बे शाभ्यांविचरस्युरुकंटके॥२८॥किंस्वित्तेजस्विनांतेजोभगवान्वाविभावसुः॥सूर्यःसोमोमहेंद्रोवालोकपालोपरोपिवा॥२९॥मन्येत्वांदेवदेवा
नांत्रयाणांपुरुषर्षभं॥यद्बाधसेगुहाध्वांतंप्रदीपःप्रभयायथा॥३०॥शुश्रूषतामव्यलीकमस्माकंनरपुंगव॥स्वजन्मकर्मगोत्रंवा
कथ्यतांयदिरोचते॥३१॥वयंतुपुरुषव्याघ्रऐक्ष्वाकाःक्षत्रबंधवः॥मुचुकुंदइतिप्रोक्तोयौवनाश्वात्मजःप्रभो॥३२॥चिरप्रजागरश्रांतो
निद्रयोपहतेंद्रियः॥शयेस्मिन्विजनेकामंकेनाप्युत्थापितोधुना॥३३॥सोपिभस्मीकृतोनूनमात्मीयेनैवपाप्मना॥अनंतरंभवान्
श्रीमांल्लक्षितोमित्रकर्शनः॥३४॥तेजसातेविषह्येणभूरिद्रष्टुंनशक्नुमः॥हतौजसोमहाभागमाननीयोसिदेहिनां॥३५॥ ॥ ॥

येत्वितिवंशपात्रिप्रायेणाबहुवचनं॥तेषुहंमुचुकुंदइतिप्रोक्तइतियुवनाश्वोमांधातुःपिता॥अतोमांधातायौवनाश्वः॥३२॥३३॥३४॥३५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰
६

क्वचित्कदाचित्कश्चित् यद्यपि रजांस्यपि विममे गणितवान् तथापि जन्मानि कर्माणि न विमिमीते ॥ ३८ ॥ ४० ॥ ४१ ॥ ते तिग्मचक्षुषा निमित्तेन मयैव दग्धः ॥ ४२ ॥
४३ ॥ अपृष्टोहमिति शोचितुं पक्षः ॥ अस्मै इत्येषु वरेषु प्रसीयमानेषु यया शोचति नैवं मां प्रपन्नं मद्वरणमस्य प्रख्यापयितिनावः ॥ ४४ ॥ अष्टाविंशतिमे युगे भगवान्
वतरिष्यतीति ॥ इह धर्म गार्ग्यवाक्यं च अनुस्मरन्नित्यर्थः ॥ ४५ ॥ तद्भक्तिरेव केवलं दुर्लभा ॥ कामास्तु तुच्छा न वरणयोग्याः दत्ता अयं चानन्तकानंदं संसारमपहाय निःप्रपंचयन् तत्रैव

एवं संभाषितो राज्ञा भगवान्भूतभावनः ॥ प्रत्याह प्रहसन्वाण्या मेघनादगभीरया ॥ ३६ ॥ श्रीभगवानुवाच ॥ जन्मकर्माभिधानानि संति मेंग
सहस्रशः ॥ न शक्यंतेनुसंख्यातुमनंतत्वान्मयापि हि ॥ ३७ ॥ क्वचिद्रजांसि विममे पार्थिवान्युरुजन्मभिः ॥ गुणकर्माभिधानानि न मे जन्मानि क
र्हिचित् ॥ ३८ ॥ कालत्रयोपपन्नानि जन्मकर्माणि मे नृप ॥ अनुक्रमंतो नैवांतं गच्छंति परमर्षयः ॥ ३९ ॥ तथाप्यद्यतनान्यंग शृणुष्व गदतो मम
विज्ञापितो विरिंचेन पुराहं धर्मगुप्तये ॥ भूमेर्भारायमाणानामसुराणां क्षयाय च ॥ ४० ॥ अवतीर्णो यदुकुले गृह आनकदुंदुभेः ॥ वदंति वासु
देवेति वसुदेवसुतं हि मां ॥ ४१ ॥ कालनेमिर्हतः कंसः प्रलंबाद्याश्च सद्द्विषः ॥ अयं च यवनो दग्धो राजंस्ते तिग्मचक्षुषा ॥ सोहं तवानुग्रहार्थं गुहा
मेतामुपागतः ॥ प्रार्थितः प्रचुरं पूर्वं त्वयाहं भक्तवत्सलः ॥ वरान्वृणीष्व राजर्षे सर्वान्कामान्ददामि ते ॥ मां प्रपन्नो जनः कश्चिन्न भूयोर्हति शोचि
तुं ॥ ४४ ॥ ॥ श्रीशुक उवाच ॥ इत्युक्तस्तं प्रणम्याह मुचुकुंदो मुदान्वितः ॥ ज्ञात्वा नारायणं देवं गर्गवाक्यमनुस्मरन् ॥ ४५ ॥ ॥ मुचुकुंद उ० ॥ विमोहितोयं
जन ईश मायया त्वदीयया त्वां न भजत्यनर्थदृक् ॥ सुखाय दुःखप्रभवेषु सज्जते गृहेषु योषित्पुरुषश्च वंचितः ॥ ४६ ॥ ॥ राम॰
६

तिविमोहित इति ॥ हे ईश योषित्पुरुषश्चेति द्विविधोप्ययं जनः त्वदीयया मायया विमोहितः अतोनर्थदृक् ॥ अनर्थे संसारे दृक् दृष्टिर्यस्य यद्वा ॥ अर्थं परमा ६
र्थस्वरूपं त्वां न पश्यतीति तथा ॥ अतस्त्वां न भजति ॥ किंतु परस्परं वंचितः सन् सुखेच्छया ॥ दुःखानामेव प्रभवो येषु तेषु गृहेषु अव सज्जत इति ॥ ४६ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निकाशोल संस्तहं पणं दूतवान्॥ कैतवं कपटं॥२०॥ नृपर्द्धुदेर दशाकोटिः ग्लहं सुजितो रामत्वाददे॥२१॥ छलमाश्रितो रुक्मी मायाजितमित्याह॥२२॥२३॥२४॥

ततो लक्षं रुक्म्यगृह्णाद्ग्लहं तत्राजयद्बलः॥ जितवानहमित्याह रुक्मी कैतवमाश्रितः॥३०॥ मन्युना क्षुभितः श्रीमान्समुद्र इव पर्वणि॥
जात्यारुणाक्षोऽतिरुषा न्यर्बुदं ग्लहमाददे॥३१॥ तं चापि जितवान्रामो धर्मेण छलमाश्रितः॥ रुक्मी जितं मयात्रेमे वदंतु प्राश्निका इ-
ति॥३२॥ तदाब्रवीन्नभोवाणी बलेनैव जितो ग्लहः॥ धर्मतो वचनेनैव रुक्मी वदति वै मृषा॥३३॥ तामनादृत्य वैदर्भो दुष्टराजन्यचो- न
दितः॥ संकर्षणं परिहसन्बभाषे कालचोदितः॥३४॥ नैवाक्षकोविदा यूयं गोपाला वनगोचराः॥ अक्षैर्दीव्यंति राजानो बाणैश्च
न भवादृशाः॥३५॥ रुक्मिणैवमधिक्षिप्तो राजभिश्चोपहासितः॥ क्रुद्धः परिघमुद्यम्य जघ्नेतं नृम्णसंसदि॥३६॥ कलिंगराजं त-
रसा गृहीत्वा दशमे पदे॥ दंतानपातयत्क्रुद्धो यो हसद्विवृतैर्द्विजैः॥३७॥ अन्ये निर्भिन्नबाहूरुशिरसो रुधिरोक्षिताः॥ राजानो दुद्रु-
रि वुर्भीता बलेन परिघार्दिताः॥३८॥ निहते रुक्मिणि श्याले नाब्रवीत्साध्वसाधु वा॥ रुक्मिणीबलयो राजन्स्नेहभंगभयाद्धरिः॥३९॥ ततो नि-
रुद्धं सह सूर्यया वरं रथं समारोप्य ययुः कुशस्थलीं॥ रामादयो भोजकटाद्दशार्हाः सिद्धाखिलार्था मधुसूदनाश्रयाः॥४०॥ ॥इति
श्रीभागवते महापुराणे दशमस्कंधे ऽनिरुद्धविवाहरुक्मिवधो नामैकषष्टितमोऽध्यायः॥६१॥ ॥राजोवाच॥ ॥बाणस्य तनयां
मुषामुपयेमे यदूत्तमः॥ तत्र युद्धमभूद्घोरं हरिशंकरयोर्महत्॥ एतत्सर्वं महायोगिन्समाख्यातुमर्हसि॥१॥ ॥
मा

॥२५॥ नृम्णसंसदि मंगलसन्नायां॥२६॥२७॥ सूर्यया नवोढया सिद्धा अखिला अर्था अस्सुदयशत्रुवधादयो येषां ते॥४०॥ ॥इति दशमे एकषष्टितमोध्यायः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बाहु

द्वियुकपार्श्वितमेप्रोक्तमनिरुद्धस्य रोधनं ॥ कन्यया रममाणस्य बाणेन बद्धेना ॥४॥ अनिरुद्धो विवाहे तस्मिन् बाणयादवसंयुगे ॥ श्रीकृष्णः श्रीहरं जित्वा बाण
बाहून् तथाच्छिनत् ॥२॥१॥२॥३॥ पुराधिपं पुरपालकं ॥४॥५॥ कामान् स्रवयतीति कामधुक् । स चासावमरांघ्रिपः कल्पतरुः तत्वं ॥६॥७॥ हेत्वा द्युतिमन्ते जीरितैरि
श्रीशुक उवाच ॥ बाणः पुत्रशतज्येष्ठो बलेरासीन्महात्मनः ॥ येन वामनरूपाय हरये दायि मेदिनी ॥१॥ तस्यौरसः सुतो बाणः शिवभक्ति
रतः सदा ॥ मान्यो वदान्यो धीमांश्च सत्यसंधो दृढव्रतः ॥२॥ शोणिताख्ये पुरे रम्ये स राज्यमकरोत्पुरा ॥ तस्य शंभोः प्रसादेन किंकरा इव तेऽमराः ॥
सहस्रबाहुर्वाद्येन तांडवेऽतोषयन्मृडं ॥३॥ भगवान् सर्वभूतेशः शरण्यो भक्तवत्सलः ॥ वरेण छंदयामास स तं वव्रे पुराधिपं ॥ स एकदाह गिरिशं पा
र्श्वस्थं वीर्यदुर्मदः ॥ किरीटेनार्कवर्णेन संस्पृशंस्तत्पदांबुजे ॥५॥ नमस्ये त्वां महादेव लोकानां गुरुमीश्वरं ॥ पुंसामपूर्णकामानां कामपूरामरां
घ्रिपं ॥६॥ दोःसहस्रं त्वया दत्तं परं भाराय मेऽभवत् ॥ त्रिलोक्यां प्रतियोद्धारं न लेभे त्वदृते समं ॥७॥ कंडूत्या निभृतैर्दोर्भिर्युयुत्सुर्दिग्गजानहं ॥ आ[illegible]
यां [illegible] चूर्णयन्नद्रीन् भीतास्तेऽपि प्रदुद्रुवुः ॥८॥ तच्छ्रुत्वा भगवान् क्रुद्धः केतुस्ते भज्यते यदा ॥ त्वद्दर्पघ्नं भवेन्मूढ संयुगं मत्समेन ते ॥९॥ इत्यु
क्तः कुमतिर्हृष्टः स्वगृहं प्राविशन्नृप ॥ प्रतीक्षन् गिरिशादेशं स्ववीर्यनशनं कुधीः ॥१०॥ तस्योषा नाम दुहिता स्वप्ने प्राद्युम्निना रतिं ॥ कन्यालभत
कांतेन प्रागदृष्टश्रुतेन च ॥११॥ सा तत्र तमपश्यंती क्वासि कांतेति वादिनी ॥ सखीनां मध्य उत्तस्थौ विह्वला व्रीडिता भृशं ॥१२॥ बाणस्य मंत्री कुंभा
ण्डश्चित्रलेखा च तत्सुता ॥ सख्यपृच्छत्सखीमूषां कौतूहलसमन्विता ॥१३॥ कं त्वं मृगयसे सुभ्रु कीदृशस्ते मनोरथः ॥ हस्तग्राहं न तेऽद्यापि राजपुत्र्यु
पलक्षये ॥१४॥ ॥
गिरिशं श्रूर्षयन्नुपां अगच्छ ॥८॥९॥ स्ववीर्यस्य नशनं नाशं केतुभंगं प्रतीक्षमाणः ॥१०॥ श्रीमहेशादिष्टसंग्रामस्य प्रसंगमाह ॥
तस्योषेति ॥ प्राद्युम्निनाऽनिरुद्धेन तत्रापि स्वप्ने ॥११॥ तं कांतमपश्यंती सा ॥ उत्तस्थौ ॥१२॥ ततः किं वृत्तं तदाह बाणस्येति ॥१३॥ हस्तग्राहकं भर्तारं ॥१४॥ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१७॥ त्वया दृष्ट एषां मध्ये को वा न वेद्मीति देवारीन्यथावत्पटे लिखत् ॥१८॥ प्रद्युम्नं लिखितं वीक्ष्य श्वसुरो य इति लज्जिता ॥१९॥२०॥२१॥ शोणित
पुरं नीत्वा ॥२२॥ पुंभिः दुःप्रेक्ष्ये प्रेक्षितुमशक्ये ॥२३॥ स च परार्ध्यैरमूल्यैर्वासःस्रगादिभिः ॥ शुश्रूषणपूर्वकमर्चितः सन् ॥२४॥ तया प्रहृतेंद्रियो हर्षणा

उषोवाच ॥ ॥ दृष्टः कश्चिन्नरः स्वप्ने श्यामः कमललोचनः ॥ पीतवासा बृहद्बाहुर्योषितां हृदयंगमः ॥१५॥ तमहं मृगये कांतं पाययित्वा
धरं मधु ॥ क्वापि यातः स्पृहयंतीं क्षिप्त्वा मां वृजिनार्णवे ॥१६॥ ॥ चित्रलेखोवाच ॥ ॥ व्यसनं तेपकर्षामि त्रिलोक्यां यदि भाव्यते ॥ तमानेष्ये व
रं यस्ते मनोहर्त्ता तमादिश ॥१७॥ इत्युक्त्वा देवगंधर्वसिद्धचारणपन्नगान् ॥ दैत्यविद्याधरान्यक्षान्मनुजांश्च यथालिखत् ॥१८॥ मनुजेषु च
सा वृष्णीन् शूरमानकदुंदुभिं ॥ व्यलिखद्रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता ॥१९॥ अनिरुद्धं विलिखितं वीक्ष्योषावाङ्मुखी ह्रिया ॥ सोसा
वसावितिप्राह स्मयमाना महीपते ॥२०॥ चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी ॥ ययौ विहायसा राजन्द्वारकां कृष्णपालितां ॥ २१॥
तत्र सुप्तं सुपर्यंके प्राद्युम्निं योगमास्थिता ॥ गृहीत्वा शोणितपुरं सख्यै प्रियमदर्शयत् ॥२२॥ सा च तं सुंदरवरं विलोक्य मुदितानना ॥ दु
ष्प्रेक्ष्ये स्वगृहे पुंभी रेमे प्राद्युम्निना समं ॥२३॥ परार्ध्यवासःस्रग्गंधधूपदीपासनादिभिः ॥ पानभोजनभक्ष्यैश्च वाक्यैः शुश्रूषयार्चितः ॥२४
॥ गूढः कन्यापुरे शश्वत्प्रवृद्धस्नेहया तया ॥ नाहर्गणान्स बुबुधे उषयापहृतेंद्रियः ॥२५॥ तां तथा यदुवीरेण भुज्यमानां हतव्रतां हे
तुभिर्लक्षयांचक्रुरापीतां दुरवच्छदैः ॥२६॥ भटा आवेदयांचक्रू राजंस्ते दुहितुर्वयं ॥ विचेष्टितं लक्षयामः कन्यायाः कुलदूषणं ॥ २७॥

न्दिवससमूहान्न बुबुधे ॥२५॥ आप्रीतां अतिहृष्टां ॥ दुरवच्छदैः छादयितुमशक्यैः ॥२६॥ विचेष्टितं विरुद्धाचरणं ॥२७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰

३६

अनपायिभिः अपायः अपसर्पणं प्रमादो वा तद्रहितैः ॥ पाठांतरे दुष्प्रेक्ष्या सखीयस्यास्तस्याः पुंभिर्दूषणं कुतो वेति न जानीम इत्यर्थः ॥२८॥ २६॥ कामस्यात्मनो देहो कान्तं ॥२७॥ अभिनृम्णया सर्वसंगतया तस्या अंगसंगेन स्तनकुंकुमं यस्यां स्रजि तां बाह्वोर्मध्ये वसंतं दधानं ॥ मधुमल्लिकाः वसंतमल्लिका

अनपायिभिरस्माभिर्गुप्तायाश्च गृहे प्रभो ॥ कन्याया दूषणं पुंभिर्दुःप्रेक्ष्याया न विद्महे ॥२६॥ ततः प्रव्यथितो बाणो दुहितुः
श्रुतदूषणः ॥ त्वरितः कन्यकागारं प्राप्तोऽद्राक्षीद्यदूद्वहं ॥२७॥ कामात्मजं तं भुवनैकसुंदरं श्यामं पिशंगांबरमंबुजेक्षणम् ॥
बृहद्भुजं कुंडलकुंतलत्विषा स्मितावलोकेन च मंडिताननम् ॥ दीव्यंतमक्षैः प्रिययाभिनृम्णया तदंगसंगस्तनकुं
कुमस्रजं ॥ बाह्वोर्दधानं मधुमल्लिकाश्रितां तस्याग्र आसीनमवेक्ष्य विस्मितः ॥३१॥ स तं प्रविष्टं वृतमाततायिभिर्भ
टैरनेकैरवलोक्य माधवः ॥ उद्यम्य मौर्वं परिघं व्यवस्थितो यथांतको दंडधरो जिघांसया ॥३२॥ जिघृक्षया तान्परितः प्र
सर्पतः शुनो यथा शूकरयूथपोऽहनत् ॥ ते हन्यमाना भवनाद्विनिर्गता निर्भिन्नमूर्धोरुभुजाः प्रदुद्रुवुः ॥३३॥ तं नागपाशै
र्बलिनंदनो बली घ्नंतं स्वसैन्यं कुपितो बबंध ह ॥ उषा भृशं शोकविषादविक्लवा बद्धं निशम्याश्रुकलाक्ष्यरोदीत्
॥३४॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे अनिरुद्धबंधो नाम द्विषष्टितमोऽध्यायः ॥ ॥६२॥ ॥ ॥

॥ तदाश्रितां तस्याग्र इत्यस्यार्षः संधिस्तस्या अग्र इत्यर्थः ॥ ३०॥ आततायिभिरुद्यतशस्त्रैः माधवोऽनिरुद्धः ॥ मौर्वं मुरुर्लोहविशेषस्तस्मिन्निर्मितं ॥३२॥ ३३
॥ शोकविषादाभ्यां विक्लवा व्याकुला ॥ अश्रूणं कलाबिंदवो यस्यां से अक्षिणी यस्याः सा ॥३४॥ ॥ इति भागवत दशमटीकायां द्विषष्टितमोऽध्यायः ॥ ६२॥

राम॰

२६

त्रिपुरघ्न इति तमेवाथ बाणाय स्वसंगरोऽस्तु तिर्ज्वरेण रुद्रेण बाणबाहुच्छिदो हरेः॥१॥ एकर्म चक्रधारिकं॥२॥ रामलक्ष्मानुवर्त्तिन इति तौ अनुरतौ निर्गताविति अर्थः॥३॥ सर्वतो दिशमित्यस्मोत्तरेणान्वयः॥ न त्वमानानि पुरोद्यानादीनि॥ द्वंद्वे कस्य भावः॥ अट्टालाः प्राकारोपरि तनान्युन्न

श्रीशुक उवाच॥ ॥ अपश्यतां चानिरुधं तद्बंधनं च भारत॥ चत्वारो वार्षिका मासा व्यतीयुरनुशोचतां॥१॥ नारदात्तदुपाकर्ण्य वार्त्तां बधस्य कर्म च॥ प्रययुः शोणितपुरं वृष्णयः कृष्णदेवताः॥२॥ प्रद्युम्नो युयुधानश्च गदः सांबोऽथ सारणः॥ नंदोपनंदभद्राद्या रामकृष्णानु वर्त्तिनः॥३॥ अक्षौहिणीभिर्द्वादशभिः समेताः सर्वतो दिशं॥ रुरुधुर्बाणनगरं समंतात्सात्वतर्षभाः॥४॥ भज्यमानपुरोद्यानप्राकाराट्टालगोपुरं॥ प्रेक्षमाणो रुषाविष्टस्तुल्यसैन्योऽभिनिर्ययौ॥५॥ बाणार्थे भगवान्रुद्रः ससुतः प्रमथैर्वृतः॥ आरुह्य नंदिवृषभं युयुधे रामकृष्णयोः॥६॥ आसीत्सुतुमुलं युद्धमद्भुतं लोमहर्षणं॥ कृष्णशंकरयो राजन्प्रद्युम्नगुहयोरपि॥७॥ कुंभांडकूपकर्णाभ्यां बलेन सह संयुगः॥ सांबस्य बाणपुत्रेण बाणेन सह सात्यकेः॥८॥ ब्रह्मादयः सुराधीशा मुनयः सिद्धचारणाः॥ गंधर्वाप्सरसो यक्षा विमानैर्द्रष्टुमागमन्॥९॥ शंकरानुचराञ्छौरिर्भूतप्रमथगुह्यकान्॥ डाकिनीर्यातुधानांश्च वेतालान्सविनायकान्॥१०॥ प्रेतमातृपिशाचांश्च कूष्मांडान्ब्रह्मराक्षसान्॥ द्रावयामास तीक्ष्णाग्रैः शरैः शार्ङ्गधनुश्च्युतैः॥११॥ पृथग्विधानि प्रायुंक्त पिनाक्यस्त्राणि शार्ङ्गिणे॥ प्रत्यस्त्रैः शमयामास शार्ङ्गपाणिरविस्मितः॥१२॥ ब्रह्मास्त्रस्य च ब्रह्मास्त्रं वायव्यस्य च पार्वतं॥ आग्नेयस्य च पार्जन्यं नैजं पाशुपतस्य च॥१३॥ ॥

ले

तस्यानाविध्न॥ अभिनिति॥ अभिनिर्ययौ बाणः॥५॥ सुतः स्कंदः तस्मात् हि तैः प्रमथैर्गणैः रामकृष्णाभ्यां युयुधे॥६॥ ७॥८॥९॥१०॥११॥१२॥ प्रत्यस्त्राण्येवाह ब्रह्मास्त्रस्येति नैजं नारायणास्त्रं॥१३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰
५०

॥१४॥ शिखिनामयूरेण वाहनेन ॥१५॥ तयोरनीकानि हतौ नाथौ येषां तानि ॥१६॥ २०॥ अनिरीक्षमाणस्तिर्यङ्मुखो बभूवेति ॥ २१॥ वरस्तु योधुमसमर्थः इति
॥२२॥ नारायणेनः सृष्टः शीतज्वरः स सृजत माहेश्वरः समाक्रंदन् युयुधे ॥२४॥ आत्मानं परमशक्तिमंतं मतमानः श्रीकृष्णं संतापयितुं प्रवृत्तः स्वयमेव तप्तः सन्न तं परमे
श्वरं ज्ञात्वा स्तुवन्नमस्करोति नमामीति ॥ त्वामनंतशक्तिं नमामि कुतः परेशं ब्रह्मादीनामीशं ॥ तत्र हेतुः सर्वात्मानं सर्वस्यात्मानं चेतयितारं ततः केवलं

मोहयित्वा तु गिरिशं जृंभणास्त्रेण जृंभितं ॥ बाणस्य पृतनां शौरिर्जघानासिगदेषुभिः ॥ १४॥ स्कंदः प्रद्युम्नबाणौघैरर्द्यमानः समंततः ॥ असृग्वि
मुंचन्गात्रेभ्यः शिखिनापाक्रमद्रणात् ॥ १५॥ कुंभांडः कूपकर्णश्च पेततुर्मुसलाहतौ ॥ दुद्रुवुस्तदनीकानि हतनाथानि सर्वतः ॥ १६॥ वि
शीर्यमाणं स्वबलं दृष्ट्वा बाणोऽत्यमर्षणः ॥ कृष्णमभ्यद्रवत्संख्ये रथी हित्वैव सात्यकिं ॥ १७॥ धनूंष्याकृष्य युगपद्बाणः पंचशतानि वै ॥ एकैकस्मि
न् शरौ द्वौ द्वौ संदधे रणदुर्मदः ॥ १८॥ तानि चिच्छेद भगवान् धनूंषि युगपद्धरिः ॥ सारथिं रथमश्वांश्च हत्वा शंखमपूरयत् ॥ १९॥ तन्माता कोटरा ना
म नग्ना मुक्तशिरोरुहा ॥ पुरोवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया ॥ २०॥ ततस्तिर्यङ्मुखो नग्नामनिरीक्षन्गदाग्रजः ॥ बाणश्च तावद्विरथश्छिन्न
धन्वाविशत्पुरं ॥ २१॥ विद्राविते भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात् ॥ अभ्यधावत दाशार्हं दहन्निव दिशो दश ॥ २२॥ अथ नारायणो देवस्तं
दृष्ट्वा व्यसृजज्ज्वरं ॥ माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ ॥ २३॥ माहेश्वरः समाक्रंदन्वैष्णवेन बलार्दितः ॥ अलब्ध्वाभयमन्यत्र भीतो
माहेश्वरो ज्वरः ॥ २४॥ शरणार्थी हृषीकेशं तुष्टाव प्रहितांजलिः ॥ ॥ ज्वर उवाच ॥ ॥ नमामि त्वानंतशक्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिमात्रं
॥ विश्वोत्पत्तिस्थानसंरोधहेतुं यत्तद्ब्रह्म ब्रह्मलिंगं प्रशांतं ॥ २५॥ ॥ वलंशुधंज्ञप्तिमात्रं चैतन्यं यनंत देवं सर्वचेतयितत्वे न परमेश्वरत्व मुक्तं
किं च विश्वस्य स्थित्यादिहेतुत्वादपीत्याह ॥ विश्वोत्पत्तीति ॥ नन्वेवंभूतं ब्रह्म प्रसिद्धं नाहमिति तत्राह ॥ यत्तद्ब्रह्मेति यद्ब्रह्म ततदेव त्वमित्यर्थः ॥ किं तद्ब्रह्मेति
अत आह ब्रह्मलिंगं ब्रह्मणो वेदेन लिंग्यते द्योत्यत इति तत्कुतः प्रशांतं सर्वविक्रियारहितत्वात्त्वसाक्षाद्ब्रह्म त्वमिति भावः ॥ २५॥ ॥

राम॰
५०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच यावत्तद्विशेषं वस्तु तत्त्वं यं प्रपन्नवामः ॥ त्वयि तु सर्वविशेषाती तेन कस्यापि प्रसक्तं किंतु त्वमेव सर्वप्रभुरिति ॥ ज्ञप्तिमात्रं त्वं विहृत एवं तस्यैव किंचका
लइति कालः क्षोभकः कर्म निमित्तं तद्दैवं फलाभिमुखं अदृष्टं दैवं स्वभावः तत्संस्कारः जीवस्तदुपाधिः द्रव्यं भूतसूक्ष्माणि ॥ क्षेत्रं शरीरं प्राणः सूत्रं ॥
आत्मा चाहंकारः ॥ विकाराः एकादशेंद्रियाणि महाभूतानि चेति षोडशकः ॥ तत्संघातो लिंगदेह एतस्य च बीजरोहवत्प्रवाहः ॥ रोहोंकुरः देहादिजरू
पं कर्म ततोंकुररूपो देहः ॥ तत्पुनरेवमिति प्रवाहः ॥ एषा त्वन्माया ॥ तस्या निषेधः अपोहो यस्मिन् तं तल्लनिषेधावधिभूतं त्वां प्रपद्ये भजे इति ॥ २६ ॥ ननु देव

कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः ॥ तत्संघातो बीजरोहप्रवाहस्तन्मायैषा तन्निषेधं प्रपद्ये ॥ २६ ॥
नानाभावैर्लीलयैवोपपन्नैर्देवान्साधून्लोकसेतून्बिभर्षि ॥ हंस्युन्मार्गान्हिंसया वर्तमानान्जन्मैतत्ते भारहाराय भूमेः ॥ २७ ॥
तप्तोहं ते तेजसा दुःसहेन शांतोग्रेणात्युल्बणेन ज्वरेण ॥ तावत्तापो देहिनां तेंघ्रिमूलं नो सेवेरन्यावदाशानुबद्धाः ॥ २८ ॥ ॥

कीर्तनपस्य मे कथमेवंभूतत्वं तत्राह ॥ नानाभावैरिति सर्वोपाधिविनिर्मुक्त एव त्वं यथा लीलया स्वीकृतैर्मत्स्याद्यवतारैः देवान् बिभर्षि पालयसि त
दर्थं लोकसेतून् वर्णाश्रमधर्मान् तदर्थं तदनुष्ठातॄन् साधून् तदर्थं तत उन्मार्गान् दैत्यादीन् हिंसि संहरसि एवमेतत् तदपि तव जन्म भूमेर्भारहरणाय
लीलावतारेण न कस्यापि त्वं तपदत्वर्थः ॥ २७ ॥ अतो ज्ञानतत्त्वदर्शिनं त्वां प्रपन्नं मां तपंरक्षस्य आश्रयेणाहं ततोहमिति ॥ तेजसा तत्त्वस्य दुःसहेन ज्वरेणाहं
तोग्रेण परसंतापकस्य युक्त एव तापस्तिच्चेदत आह तावदिति सेवां न प्रपन्नानामनुचितस्तदिति भावः ॥ २८ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰

४१

हे त्रिशिरः मे तु अपयातु मत्प्रसादात्पालकः मत्सु खं विचर॥ कासा वाञ्छा तामाह यश्चेति॥ नौ आवयोः इमं संवादं यः पठेत् तस्य त्वत्तः न भयं न भवेत् त्वया न भयं नो मा
दनीयमित्यर्थः॥ २९। ३०। ३१॥ नकरस्यार्थे श्रीरुद्रो भगवंतं स्तौति त्वं हीति॥ अयमर्थः लोके अज्ञात्वा अयं युध्यतीति न विज्ञायत त्वं वाङ्मये ब्रह्मणि पि गूढं ब्रह्मणि
श्च विषयत्वात् तत्कृतं पर ज्योतिः सामपि प्रकाशकत्वात् विषय इत्यर्थः॥ कथं तर्हि प्रतीतिरित आह यमिति॥ अमलात्मनो स्वतः प्रकाश से इत्यर्थः॥ ३४॥ आत्मा ताव

श्रीभगवानुवाच॥ त्रिशिरस्ते प्रसन्नोहं मेतु ते मज्ज्वराद्भयं॥ यो नौ स्मरति संवादं तस्य त्वन्न भवेद्भयं॥ २९॥ इत्युक्तो च्युतमा
नम्य गतो माहेश्वरो ज्वरः॥ बाणस्तु रथ मारूढः प्राणाद्योत्स्यन् जनार्दनं॥ ३०॥ ततो बाहुसहस्रेण नानायुधधरो नृप॥ मु
मोच परमक्रुद्धो बाणांश्चक्रायुधे नृप॥ ३१॥ तस्यास्यतोस्त्राण्यसकृच्चक्रेण क्षुरनेमिना॥ चिच्छेद भगवान्बाहून् शाखा इव वन
स्पतेः॥ ३२॥ बाहुषु छिद्यमानेषु बाणस्य भगवान्भवः॥ भक्तानुकंप्युपव्रज्य चक्रायुधमभाषत॥ ३३॥ ॥श्रीरुद्र उवाच॥ ॥
त्वं हि ब्रह्म परं ज्योतिर्गूढं ब्रह्मणि वाङ्मये॥ यं पश्यंत्यमलात्मान आकाशमिव केवलं॥ ३४॥ नाभि[illegible]भोग्निर्मुखमंबु रेतो
द्यौः शीर्षमाशाः श्रुतिरंघ्रिरुर्वी॥ चंद्रो मनो यस्य दृगर्क आत्मा अहं समुद्रो जठरं भुजेंद्रः॥ ३५॥ ॥

त्रिगुणस्य तत्त्वज्ञानं लीलयाधिष्ठितस्य पायो विराड्विग्रहः सोपि न त्वत्तः पृथगित्याह॥ उदुंबरफलांतर्वर्तिमशकैरिवोदुंबरफलमित्याशयेन विराड्रूपेण स्तौति नाभ्यां ना
भिरिति॥ यस्य तव अव्यक्तो नाम्न्याद्यवयवाः सन्भवान् लोककल्पः पुरुष इत्युत्तरेण त्वयः तन्नो पस्य नाभिः अग्निर्मुखं अंबु रेतः द्यौः शीर्षं आशा दिशः श्रुतिः श्रव
णे प्रियं उर्वी अंघ्रिः॥ चंद्रो मनः अर्को दृक्॥ अहं श्रीरुद्रः आत्मा अहंकारः समुद्रो जठरं इंद्रः भुजा बाहुः॥ इंद्रादयो लोकपाला बाहव इत्यर्थः॥ ३५॥ ॥

राम॰

४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

औषधयो रोमाणि यच्छब्दवृत्तिः स्पष्टतार्थो ॥ अंबुवाहाः केशाः विरंचो धिषणा बुद्धिः प्रजापतिर्विसर्गो मेढ्रं धर्मो हृदयं लोकैः कल्पते ऽवकल्प
त इति लोककल्पः ॥ २६ ॥ ननु प्रादेशिकशरीरस्य कथं त्वं नैतानि त्वादीसत अहतवेति ॥ हे अकुंठधामन् अप्रच्युतस्वरूप भवायास्तु दयाय ॥ न के
वलमेवतावत् किंतु अस्मदनुग्रहार्थमपीत्याह वयं चेति ॥ सर्वे लोकपालाः ॥ त्वया पालिताः सम्यापि भुवनानि पालयाम इति ॥ २७ ॥ ननु यदि त्वावयि ता
रो पूर्वं विनाभ्यानि च भुवनानि संतीति तर्हि कथमुक्तं त्वं हि ब्रह्मेति ॥ न हि ब्रह्मत्वे मम सजातीयविजातीयभेदः संभवतीति अत आह त्वमिति ॥ एकः

रोमाणि यस्यौषधयोंबुवाहाः केशा विरिंचो धिषणा विसर्गः ॥ प्रजापतिर्हृदयं यस्य धर्मः स वै भवान्पुरुषो लोककल्पः ॥ २६ ॥
तवावतारोयमकुंठधामन् धर्मस्य गुप्त्यै जगतो भवाय ॥ वयं च सर्वे भवतानुभाविता विभावयामो भुवनानि सप्त ॥ २७ ॥
त्वमेक आद्यः पुरुषोऽद्वितीयस्तुर्यः स्वदृग्घेतुरहेतुरीशः ॥ प्रतीयसेऽथापि यथाविकारं स्वमायया सर्वगुणप्रसिद्ध्यै ॥ २८ ॥

सजातीयभेदरहितः कुतः आद्यः पुरुषः पुरुषाणामवस्थात्रयवतां आद्यः ॥ प्रकृतिभूतः पुरुषः कुतस्तुरीयः शुद्ध इत्यर्थः ॥ तदपि कुतः स्वदृक् स्वप्र
काशज्ञानरूपः ॥ शुद्ध एव ह्युपाधियोगाज्जीवा जायते यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः सर्वाएव आत्मानो व्युच्चरंतीति श्रुतेः ॥
अतः सजातीयरहितः ॥ किं चाद्वितीयः विजातीयरहितोपि ॥ कुतः हेतुः सर्वस्य तथा स्वयं हेतुरहितश्चेति कथं तर्हि प्रतिशरीरं जीवभेदः प्रतीयते ऽत आ
ह प्रतीयस इति ॥ सर्वगुणप्रसिद्ध्यै सर्वविषयप्रकाशनाय ॥ २८ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰ टी॰ उ॰
४२

तर्हि किमहमेव संसारी स्तुत्वन्ते नहि इत्तीति सदृष्टांतमाह ॥ यथैवेति ॥ हे मैत्रेय येन स्वया छायया मेघलक्षणया परदृष्ट्याऽपिहितः छादितोऽपि सू
र्यः ॥ छायां मेघं च रूपाणि च मेघांतरितान् घटादीनपि संचकास्ति प्रकाशयति ॥ एवं गुणेनाहंकारेण स्वकार्येण जीवावरकेण तद्दृष्ट्याऽपिहितोऽपि गुणान्
सत्वादीनुपाधीन् गुणैराच्छादितान् जीवानपि चकास्ति ॥ आत्मप्रदीपः स्वप्रकाशः ॥ अतः सर्वसाक्षीणः स्वस्य न संसार इत्यर्थः ॥ ४२ ॥ किंच मायया अ
यस्मात् अन्धात् मोहयत स्तवकृतः संसृतिरिति मायैव नाहं ॥ यन्माययेति ॥ पुत्रादिषु प्रसक्ता बुद्धिर्जनाः ऊर्ध्वे दुःखसागरे उन्मज्जंति ॥ देवादियोनिषु नि

यथैव सूर्यः पिहितः स्वच्छायया छायां च रूपाणि च संचकास्ति ॥ एवं गुणेनापिहितो गुणांस्त्वमात्मप्रदीपो गुणिनश्च भू
मन् ॥ ४२ ॥ यन्मायया मोहितधीः पुत्रदारगृहादिषु ॥ उन्मज्जति निमज्जति प्रसक्तो वृजिनार्णवे ॥ ४३ ॥ देवदत्तमिमं लब्ध्वा
नृलोकमजितेंद्रियः ॥ यो नाद्रियेत त्वत्पादौ स शोच्यो ह्यात्मवंचकः ॥ ४४ ॥ यस्त्वां विसृजते मर्त्य आत्मानं प्रियमीश्वरं ॥
विपर्ययेंद्रियार्थार्थं विषमत्त्यमृतं त्यजन् ॥ ४५ ॥ अहं ब्रह्माथ विबुधा मुनयश्चामलाशयाः ॥ सर्वात्मनोपपन्ना स्त्वामा
त्मानं प्रेष्ठमीश्वरं ॥ ४६ ॥ ॥

मज्जंति स्थावरादिषु तद्दुःखवापत्वी येवि पर्यय इत्यत्र वति ब्रह्मत्वस्थावरत्वयोरिति ॥ ४३ ॥ एवं जीवेश्वरस्वरूपं
निरूप्य तदाह द्वाभ्यां नीमन्नजंतं निंदति द्वाभ्यां देवेति देवेन त्वया कर्माध्यक्षेण दत्तं नृदेहमिमं लब्ध्वापीति ॥ ४४ ॥ शोच्यत्वे हेतुः ॥ यस्त्वामिति ॥ विपर्ययः विपरी
तः अनात्मा प्रियो यासां इंद्रियार्थाः पुत्रा इत्यस्त्व दर्थं ॥ ४५ ॥ अहं मेवमेवं धमनसत्वामेवान्ना त्वादृतास्य हमिति ॥ ४६ ॥ ॥

राम॰
४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवतोऽर्जनीयत्वे हेतुत्वं वदन् स्तद्धि किं प्रार्थ्यते तं त्वेति समत्वे हेतुः प्रशांतमिति तुसे मत्वमाह सुहृदात्मदैवं ॥ सुहृत् बुधिप्रवर्त्तकत्वात् आत्मा च
सर्वात्मकत्वात् ॥ एवं भूतं देवमीश्वरं तस्मान्न चान्योऽर्जनीयोऽस्तीत्याह ॥ अनन्यमेकं समानजातीयरहितं तत्कुतः ॥ जगदात्मनो चकेतमधिष्टानम् ॥ ४४ ॥ स्व
यं ... किं नाशास्यस्वनकस्यान्नीष्टमाशास्ते अयमिति दैत्यपतौ महाराजे ॥ ४५ ॥ ४६ ॥ वैरोचनि(नौ) बलिर्महतकस्तस्य सुतत्याद्दव ध्वस्ताव तं ॥ किं च प्रह्लादाये

तं त्वा जगत्स्थित्युदयांतहेतुं समं प्रशांतं सुहृदात्मदैवं ॥ अनन्यमेकं जगदात्मकेतं भवापवर्गाय भजाम देवं ॥ ४४ ॥ अयं ममेष्टो दयि
वे तोऽनुवर्त्ती मयाभयं दत्तममुष्य देव ॥ संपाद्यतां तद्भवतः प्रसादो यथा हि ते दैत्यपतौ प्रसादः ॥ ४५ ॥ ॥ श्री भगवान् यदात्थ भगवंस्त्वं नः कर    बु॰बा॰
वाम प्रियं तव ॥ भवतो यद्व्यवसितं तन्मे साध्वनुमोदितं ॥ ४६ ॥ अवध्योऽयं ममाप्येष वैरोचनसुतोऽसुरः ॥ प्रह्लादाय वरो दत्तो न वध्यो मे
तवान्वयः ॥ ४७ ॥ दर्पोपशमनायास्य प्रवृक्णा बाहवो मया ॥ सूदितं च बलं भूरि यच्च भारायितं भुवः ॥ ४८ ॥ चत्वारोऽस्यानुजाः शिष्टा भवि
ष्यत्यजरामरः ॥ पार्षदमुख्यो भवतो न कुतश्चिद्भयोऽसुरः ॥ ४९ ॥ इति लब्ध्वाऽभयं कृष्णं प्रणम्य शिरसाऽसुरः ॥ प्राद्युम्निं रथमारोप्य सवध्वा
समुपानयत ॥ ५० ॥ अक्षौहिण्या परिवृतं सुवासः समलंकृतं ॥ सपत्नीकं पुरस्कृत्य ययौ रुद्रानुमोदितः ॥ ५१ ॥ स्वराजधानीं समलं
कृतां ध्वजैः सतोरणैरुक्षितमार्गचत्वरां विवेश शंखानकदुंदुभिस्वनैरभ्युद्यतः पौरसुहृद्द्विजातिभिः ॥ ५२ ॥ य एवं कृष्णविजयं शंकरेण च
संयुगं ॥ संस्मरेत्प्रातरुत्थाय न तस्य स्यात्पराजयः ॥ ५३ ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे त्रिषष्टितमोऽध्यायः ॥ ॥ ६३ ॥ ॥

ति अन्वयो वंशः ॥ ४७ ॥ तर्हि किमेवं कृतं तत्राह दर्पोपशमनायेति ॥ ४८ ॥ अनुग्रहमाह चत्वार इति ॥ ४९ ॥ सह वध्वा उषया ॥ ५० ॥ रुद्रानुमोदित इति तद
भिप्रेतस्यैव बाणस्यानुजनं मम स्यकृतत्वात् ॥ ५१ ॥ पौरादिभिरभ्युद्यतः अभिमुखमागत्य सत्कृतः ॥ ५२ ॥ ५३ ॥ ॥ इति दशमे त्रिषष्टितमोऽध्यायः ॥ ॥

भा॰ द॰ उ॰ चतुःषष्टितमे ह्यध्यायो नृगं पापादमोचयत्॥ ब्रह्मस्वहारिदोषोत्थाद्घोरात् दृष्टान्तशिक्षयत्॥ ॥ विभूतिनाम्ययोगादिमदोन्नष मनोरथान्॥ अनुज्ञा स
४३ द्युह्नन् ह्यध्यायो नृगोद्धारप्रसंगतः॥ ॥१॥ पिपासिताः तृषिताः जलं विचिन्वंतः सत्वं जीवं॥ २॥ तं च कृकलासं वीक्ष्य॥ ३॥ चर्मजैः चर्ममयैः पाशैः तांतवैस्तु

श्रीशुक उ॰॥ ॥ एकदोपवनं राजन् जग्मुर्यदुकुमारकाः॥ विहर्तुं सांबप्रद्युम्नचारुभानुगदादयः॥ १॥ क्रीडित्वा सुचिरं तत्र विचिन्वंतः
पिपासिताः जलं निरुदके कूपे ददृशुः सत्वमद्भुतं॥ २॥ कृकलासं गिरिनिभं वीक्ष्य विस्मितमानसाः॥ तस्य चोद्धरणे यत्नं चक्रुस्ते कृ
पयान्विताः॥ ३॥ चर्मजैस्तांतवैः पाशैर्बद्ध्वा पतितमर्भकाः॥ नाशक्नुवन् समुद्धर्तुं कृष्णायाचख्युरुत्सुकाः॥ ४॥ तत्रागत्यारविंदाक्षो भ
गवान्विश्वभावनः॥ वीक्ष्योज्जहार वामेन तं करेण स लीलया॥ ५॥ स उत्तमश्लोककराभिमृष्टो विहायसद्यः कृकलासरूपं॥ संतप्तचामी
करचारुवर्णः स्वर्ग्यद्भुतालंकरणांबरस्रक्॥ ६॥ पप्रच्छ विद्वानपि तन्निदानं जनेषु विख्यापयितुं मुकुंदः॥ कस्त्वं महाभाग वरेण्यरू राम॥
पो देवोत्तमं त्वां गणयामि नूनं॥ ७॥ दशामिमां वा कतमेन कर्मणा संप्रापितोस्यतदर्हः सुभद्र॥ आत्मानमाख्याहि विवित्सतां
नो यन्मन्यसे नः क्षममत्र वक्तुं॥ ८॥ ॥ श्रीशुक उ॰॥ ॥ इति स्म राजा संपृष्टः कृष्णेनानंतमूर्तिना॥ माधवं प्रणिपत्याह किरीटेना ४३
र्कवर्चसा॥ ९॥ ॥ नृग उ॰॥ ॥ नृगो नाम नरेंद्रोहमिक्ष्वाकुतनयः प्रभो॥ दानिष्वाख्यायमानेषु यदि ते कर्णमस्पृशं॥ १०॥ ॥

मयैश्च॥ ४॥ ५॥ संतप्तं चामीकरं सुवर्णं तद्वद्वर्णो यस्य सः॥ अद्भुताश्च अलंकाराश्च अंबराणि स्रजो यस्य सः॥ स्वर्गी देवो बभूवेति॥ ६॥ अयतद्यदि स्म सं
योग्यः॥ ८॥ ९॥ यदि ते कर्णमस्पृशमिति अस्य संदेहे संदेहवचनं यदि वेदाः प्रमाणं स्युरिति वत् कर्णपथं नूनं प्राप्तोस्मीत्यर्थः॥ १०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच किंचिदिति सर्वेषां च हृतानामात्मनो बुधैः साक्षिणा ऽस्ते ऽविदितं किंतु न किंचित्॥१२॥१३॥ कृतव्रते स्मै ऽदं नाचारे स्मैः तपसा स्तुताः॥ अस्मात्मा
ते ऽब्रह्मणि वदान्या ऽस्तु दाराः॥ अध्यापनशीलाश्च ते संतश्च ते स्मैः॥१४॥ पूर्त्ते वापीकूपादि चरिते हृते॥१५॥ एवं वर्त्तमानस्य मम संकटं किंचिदापन्नं श्रुणि विता
द्विकस्य चिदिति द्विजसुतस्य स्मप्रतिग्रह निष्टत्रस्या संप्रेक्षमिलिता ऽविदुषा ब्राह्मणे ऽस्मै यमित्यजानता॥१६॥ प्रतिग्राहिणे कं दत्तेति॥ स्वामिनोक्ते ऽप

कितु ते विदितं नाथ सर्वं च हृतात्मसाक्षिणः॥ काले नास्माकृतं दत्तं गोव स्वधापितवान्नया॥११॥ यावंतः सिकता भूमेर्यावंत्यो दिवि तारकाः
वं काः यावंत्यो वर्षधाराश्च तावतीर्ददं स्म गाः॥१२॥ पयस्विनीस्तरुणीः शीलरूपगुणोपपन्नाः कपिला हेमशृंगीः॥ न्यायार्जिता रूप्यखु
राः सवत्सा दुकूलमाला नरेण ददाव हं॥१३॥ स्वलंकृतेभ्यो गुणशीलवद्भ्यः सीदत्कुटुंबेभ्यः कृतव्रतेभ्यः॥ तपः श्रुतब्रह्म वदान्यसद्भ्यः
प्रादां युवभ्यो द्विजपुंगवेभ्यः॥१४॥ गोभूहिरण्यायतनाश्वहस्तिनः कन्याः सदासीस्तिलरूप्यशय्याः॥ वासांसि रत्नानि परिच्छदान्यथानि
ष्टं च यज्ञैश्चरितं च पूर्त्तं॥१५॥ कस्यचिद्द्विजमुख्यस्य भ्रष्टा गौर्मम गोधने॥ संपृक्ताविदुषा सा च मया दत्ता द्विजातये॥१६॥ तां नीयमानां
तस्वामी दृष्ट्वोवाच ममेति तं॥ ममेति प्रतिग्राह्याह नृगो मे दत्तवानिति॥१७॥ विप्रौ विवदमानौ मामूचतुः स्वार्थसाधकौ॥ भवान् दाता प हे
ते र्त्तेति तच्छ्रुत्वा मे न र्वे स्मः॥१८॥ अनुनीतावुभौ विप्रौ धर्मकृच्छ्रगतेन वै॥ गवां लक्षं प्रकृष्टानां दास्याम्येषा प्रदीयतां॥१९॥ भवंतावनु
गृह्णीतां किंकरस्याविजानतः॥ समुद्धरतमां कृच्छ्रात्पतंतं निरये ऽशुचौ॥ नाहं प्रतीच्छे वै राजन्नित्युक्त्वा स्वाम्यपाक्रमत्॥ नान्यत् गवा
मप्ययुतमिच्छामीत्यपरो ययौ॥२०॥ हन्नेति॥ इन नवद्भ्यमः॥ माकुलो नवमित्यर्थः॥१८॥ तदा उभावपि प्रत्येकमनुनीतौ प्रार्थितौ कथं तदा॥ ग
वामिति सार्द्धेन॥१९॥ रत्वा ऽपरः प्रतिग्राही इदं एव होय च वयो क्रमन्यदपि गवामयुतं॥ यदितरस्मीमां विहाय नेच्छामीत्युक्त्वा गतः क्रापयापित्यर्थः॥२१॥

प्राप्ति ष्टं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰उ॰ एतस्मिन्नंतरे इति॥ ॥ इत्यः पूर्वं पापान्नावाप्ते तु समर्थो यतिन्नावः ॥२२॥ उताहो इत्येकं पदं ॥ अथवा पूर्वं श्रुतमितिनांतं इति यमस्य स्वस्य वाचा
कं पदं पेपदं पामि ॥२३॥ हे देहवयम पूर्वमश्रुतं नं खुं जहतिम यो केस यमः पतेति प्राहु ॥२४॥ ॥२५॥ दुर्घटे तस्मी हृत्स्य दर्शनेन विस्मितः सन्नात्मनो नान्यमि
४४ चिंतं इति सत्वमिति हि विज्ञो सत्वं मम अत्र हृप्पथः ॥ लोचनचरः सत्वकथं साक्षात्प्रत्यक्षो सीत्यर्थः ॥ किमित्राश्रयेणैतदाह परः आत्मा अतएव योगे

एतस्मिन्नंतरे यामैर्हं तैनीतो यमक्षयं ॥ यमेन पृष्टस्त्वाहं देवदेव जगत्पते ॥२२॥ पूर्वं त्वमश्रुतं नंतुंक्षे उताहो त्वपते श्रु
तं ॥ नांतेदावस्य धर्म्मस्य पदं पेलोकस्य नास्वतः ॥२३॥ पूर्वं देवाश्रुतं नं तुं जहतिमाह पतेतिसः ॥ तावदद्राक्षमात्मानं हृत्कमलस्थं
पतत्न्मनो ॥२४॥ ब्रह्मणाप्यस्य वदात्युस्य तव दासस्य के वा वा ॥ स्मृतिं ताद्यापिविध्वस्तान्नवसंदर्शनार्थितः ॥२५॥ सत्वं कथं म
ले मविज्ञो ऽक्षपथः परात्मा योगेश्वरैः श्रुतिदृशामृदहविमाव्यः ॥ साक्षाद्दृशो ऽक्षजउरुक्रमसत्तां धबुधैः स्यात्मेतु दृशदृहयस्त राम॰
वापवर्गः ॥२६॥ देवदेव जगन्नाथ गोविंद पुरुषोत्तम नारायण हृषीकेश पुण्यश्लोकाच्युताव्यय ॥२७॥ अनुजानीहि मां ४४
कृष्ण यांतेदेवगतिं विभो ॥ यत्र क्वापि सतश्चेतो नृयान्मेत्वत्पदास्पदं ॥२८॥ ॥

श्वरैरपि श्रुतिदृशा उपनिषच्चक्षुषा अमलेहृदि विभाव्य
श्चिंत्यः ॥ यतो ॥ अधोक्षजेनजः अक्षजमैंद्रियकं ज्ञानं तत् अधः अपर्वागिव यस्मात्सः ॥ यस्येह त्वापवर्गो नवेत्रस्य भावात्त्वदृश्यः स्यात्तु ॥ उरुक्रमसने
नहृत्कमलान्नवहुःखेविनं धबुधेस्तु मभैतच्चित्रं नैमित्यर्थः ॥२६॥ उज्जिर्के बहुधा संबोधयन्नु ॥२७॥ आह देवदेवेति ॥ अनुज्ञापयति ॥ अनुजानीहि
तिदेवलोके पित्तर्नमातस्यात्मनो मनसा संनिधिं प्रार्थयते ॥ यत्र क्वापीति त्वत्पदमास्पदं विषयो यस्य तथाभूतं नृयादिति ॥२८॥ ॥

भा॰टी॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यास्मन्नमितमद्भिः सर्वभावात्संयर्वस्मात्तावोऽनन्ययेत तस्मै ब्रह्मणेऽकर्तृतेऽप्यविकाराय ऊतः अनंतशक्तये अनंतामायायास्मा अशक्तियस्मतस्मै वासुदेवाय
सर्वभूतात्मयायेऽस्तु परानत्वमुक्तं ॥ श्रीकृष्णायसदानंदरूपायेति पुरुषार्थत्वमुक्तं दृषिन्द्वेवाचकः ॥ सृष्टेरेणश्वनिवृत्तिर्वाचकत्वात्तयोरैक्यं परं ब्रह्म
ह्मइस्त्यभिधीयत इति स्मृतेः ॥ किंच योगानां दृष्टपूर्त्तादिकर्मणां पतये फलदात्रेऽयं त्वाक्यः ॥ एवंभूतं त्वां विहाय गंतुमनिच्छुरपि गमिष्यामि त्वदृत्तक
र्मफलभोगायेति ॥ २९ ॥ ३० ॥ ३१ ॥ मनागीषदपिभुक्तं सत् अग्नेः अग्निसदृशस्य तेजीयसः ॥ अतितेजस्विनोपि दुर्जरं ॥ ३२ ॥ ३३ ॥ किंच विषादपि घोरमि

नमः [illegible] र्वभावाय ब्रह्मणेऽनंतशक्तये ॥ कृष्णाय वासुदेवाय योगानां पतये नमः ॥ २९ ॥ इत्युक्त्वा तं परिक्रम्य पादौ स्पृष्ट्वा स्वमौलिना ॥ अ
[illegible]तो विमानाग्र्यमारुह्य लस्यतां नृणां ॥ कृष्णः परिजनं प्राह भगवान् देवकीसुतः ॥ ब्रह्मण्यदेवो धर्मात्मा राजन्यानन्नुशिक्षयन् ॥ ३१ ॥ दु
त र्जरं बत ब्रह्मस्वं भुक्तमग्नेर्मनागपि ॥ तेजीयसोऽपि किमुत राज्ञामीश्वर [illegible] मानिनां ॥ ३२ ॥ नाहं हालाहलं मन्ये विषं यस्य प्रतिक्रिया ॥ ब्रह्मस्वं
हि विषं प्रोक्तं नास्य प्रतिविधिर्भुवि ॥ ३३ ॥ हिनस्ति विषमत्तारं वह्निरद्भिः प्रशाम्यति ॥ कुलं समूलं दहति ब्रह्मस्वारणिपावकः ॥ ३४ ॥ ब्रह्म
स्वं दुरनुज्ञातं भुक्तं हंति त्रिपुरुषं ॥ प्रसह्य तु बलाद्भुक्तं दश पूर्वान् दशापरान् ॥ ३५ ॥ राजानो राजलक्ष्म्यंधा नात्मपातं विचक्षते ॥ निरयं ये
ऽभिमन्यंते ब्रह्मस्वं साधु बालिशाः ॥ ३६ ॥ ॥

त्वाह हिनस्तीति संसर्गि संसर्गेणामारकत्वादग्नितुल्यता स्यात्तत्रापि नेत्याह वह्निरिति अपि च समूलमि
ति वह्निर्मूलान्यस्रोषयति ब्रह्मस्वलक्षणारणिजः पापपावकस्तु कुलं तदपि समूलमिति ॥ ३४ ॥ दुरनुज्ञातं यथावदननुज्ञातं ॥ त्रिपूरुषं कुलं स्वयं पुत्रं पौत्रं च
प्रसह्य हठात् बलात् ॥ ३५ ॥ राज्ञ्या ह्यश्रयः ये ब्रह्मस्वं अभिमन्यंते इच्छंतीति ते निरयमेवाभिमन्यंते ॥ तो बालिश्या अज्ञा आत्मपातं न चक्षत इति ॥ ३६ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपि च गृह्णंतीति ॥३७॥३८॥३९॥ गृध्वाल्पायुष इत्यादि ॥४०॥४१॥ प्रणमे तं नमामि ॥४२॥ न केवलमर्थवादं बिभीषि केयं किं तु भक्तस्य मित्याह ॥ ब्राह्मणार्थ
इति ॥४३॥४४॥ इति श्रीदशमे चतुःषष्टितमोऽध्यायः ॥६४॥ ॥ पंचषष्टितमे रामस्य व्रजे गोकुलमागतः ॥ रममाणस्तु गोपीभिः कालिंद्याकर्षणं स्मृतं ॥ ॥ रामस्य

गृह्णंति यावतः पांसून्कर्तारमस्य बिंदवः ॥ विप्राणां हृतवृत्तीनां वदान्यानां कुटुंबिनां ॥३७॥ राजानो राजकुल्याश्च तावतो
ऽब्दान्निरंकुशाः ॥ कुंभीपाके तु पच्यंते ब्रह्मदायापहारिणः ॥३८॥ स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेच्च यः ॥ षष्टिवर्षसहस्राणि
विष्ठायां जायते कृमिः ॥३९॥ न मे ब्रह्मधनं भूयाद्यद्गृध्वाल्पायुषो नराः ॥ पराजिताश्च्युता राज्याद्भवंत्युद्वेजिनोऽहयः ॥४०॥ विप्रं
कृतागसमपि नैव द्रुह्यत मामकाः ॥ घ्नंतं बहु शपंतं वा नमस्कुरुत नित्यशः ॥४१॥ यथाहं प्रणमे विप्राननुकालं समाहितः ॥
तथा नमत यूयं च योऽन्यथा मे स दंडभाक् ॥४२॥ ब्राह्मणार्थो ह्यपहृतो हर्तारं पातयत्यधः ॥ अजानंतमपि ह्येनं नृगं ब्राह्मण
गौरिव ॥४३॥ एवं विश्राव्य भगवान्मुकुंदो द्वारकौकसः ॥ पावनः सर्वलोकानां विवेश निजमंदिरं ॥४४॥ ॥ इति श्रीभागवते
महापुराणे दशमस्कंधे नृगोपाख्याने चतुःषष्टितमोऽध्यायः ॥ ॥६४॥ ॥ श्रीशुक उवाच ॥ ॥ बलभद्रः कुरुश्रेष्ठ भगवान्रथ
मास्थितः ॥ सुहृद्दिदृक्षुरुत्कंठः प्रययौ नंदगोकुलं ॥ ॥१॥ परिष्वक्तश्चिरोत्कंठैर्गोपैर्गोपीभिरेव च ॥ रामोऽभिवाद्य पितरावा
शीर्भिरभिनंदितः ॥ चिरं नः पाहि दाशार्ह सानुजो जगदीश्वरः ॥ इत्यारोप्यांकमालिंग्य नेत्रैः सिषिचतुर्जलैः ॥ २॥ ॥

चरितं चित्रं कालिंद्याकर्षणादि स्मृतं ॥ पौ हुं कं तादि स्मृतं स्पष्टं गुरुक्रमतः परं ॥२॥ ॥१॥ आशीर्भिरभिनंदितो बभूव ॥ मातरावाह चिरमिति ॥३॥ ॥

राम॰
४५

गोपवृद्धांश्च विधिवदभिवंद्य यविष्ठैरभिवंदितो बन्धुवेसमर्थः अपि च यथावयमिति॥४॥ तेसर्वे स्वेषु यादवेषु तेरामं अनामयमारोग्यं पप्रछुः॥ ते च ते न इष्टा इ
ति॥५॥ कृष्णे कृष्णप्राप्यर्थं संन्यस्ताखिलराधसः सकलसर्वविषया॥६॥ आ रामस्य संदर्शने आदृताः सादरसमार्द्र॥९॥ ॥१०॥ तर्हि तत्र मतेरुष्माभिः प्रतिबंधः किंन

गोपवृद्धांश्च विधिवद्यविष्ठैरभिवंदितः॥ यथावयो यथासख्यं यथासंबंधमात्मनः॥४॥ समुपेत्याथ गोपालान् हास्यहस्तग्रहादिभिः॥
॥४॥ विश्रांतं सुखमासीनं पप्रछुः पर्युपागताः॥ पृष्टाश्चानामयं स्वेषु प्रेमगद्गदया गिरा॥५॥ कृष्णे कमलपत्राक्षे संन्यस्ताखिलराध
सः॥ कच्चिन्नो बांधवा राम सर्वे कुशलमासते॥६॥ कच्चित्स्मरथ नो राम यूयं दारसुतान्विताः॥ दिष्ट्या कंसो हतः पापो दिष्ट्या मुक्ताः
सुहृज्जनाः॥७॥ निहत्य निर्जित्य रिपून् दिष्ट्या दुर्गं समाश्रिताः॥ गोप्यो हसंत्यः पप्रछू रामसंदर्शनादृताः॥८॥ कच्चिदास्ते सुखं कृष्णः
पुरस्त्रीजनवल्लभः॥ कच्चित्स्मरति वा बंधून् पितरं मातरं च सः॥ अप्यसौ मातरं द्रष्टुं सकृदप्यागमिष्यति॥१०॥ अपि वा स्मरतेस्माक
मनुसेवां महाभुजः॥ मातरं पितरं भ्रातॄन् पतीन् पुत्रान् स्वसॄरपि॥ यदर्थे जहिम दाशार्ह दुस्त्यजान् स्वजनान् प्रभो॥११॥ ता नः
सद्यः परित्यज्य गतः संछिन्नसौहृदः॥ कथं नु तादृशं स्त्रीभिर्न श्रद्धीयेत भाषितं॥१२॥ कथं नु गृह्णंत्यनवस्थितात्मनो वचः कृत
घ्नस्य बुधाः पुरस्त्रियः॥ गृह्णंति वै चित्रकथस्य सुंदरस्मितावलोकोच्छ्वसितस्मरातुराः॥१३॥ ॥

कृतघ्नस्य विश्वासादिति चेत्॥ न नु वि
श्वासः किमिति कृतः तत्राहुः॥ कथंन्विति॥११॥ वक्रवक्तृत्वान्नानाविधानि वानि कैर्न तत्राह॥ कथं नु गृह्णंतीति॥ अनाहुस्तु॥ ॥ गृह्णंतीति चित्रक
थस्य चित्रकथाकथनकोविदस्य किंच सुंदरं स्मितं यस्मिन्॥ तेन अवलोकनेन उच्छ्वसितः क्षुभितो यः स्मरस्तेनातुराः॥१३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰ ञ्चपराऊचुःगाकिं नहृति कालस्तावत्रस्य चास्माकं चयावत्येवकिंतु तस्य सुखेनास्माकं तुःखेनेत्येवां तानेवविशेषहृति ध्वनितं॥१३॥१४॥नानाविधेषत्नूनये
४६ श्रुकोविदः॥१५॥मधुंचैत्नेषाधवं वैत्राखंगोपीनां रतिमितिः॥श्रीहृस्तक्रीडासमये तु तत्वानामतिबालानांबाल्यासामित्संनियुक्तप्रसिद्धिः॥१६॥पूर्णचंद्रस्य
दि कलाविमर्शे रौत्निर्मरोमृष्ट उज्वले॥ कौसुदीगंधवायुनाकुमद्दतीनांगंधवातेनसेविते॥पद्माकौसुदीशब्देन तद्विकाशिताविकुसुमरातिलक्ष्यंतेकुमुद

क्त्रिन्नस्तत्कथया गोप्यःकथाकथयतापरः॥यातस्मान्निर्विनाकालो यथातस्यतथैवनः॥१३॥इतिप्रहसितं शौरेर्जल्पितंचारुवीक्षितं॥
गतिंप्रेमपरिष्वंगंस्मरंत्यो रुरुदुस्त्रियः॥१४॥संकर्षणस्ताःकृष्णस्य संदेशैर्हृदयंगमैः सांत्वयामासभगवान्नानानुनयकोविदः॥१५॥द्वौ
मासौतत्रचावात्सीन्मधुंमाधवमेवच॥रामःक्षपासुभगवान्गोपीनांरतिमावहन्॥१६॥पूर्णचंद्रकलामृष्टे कौसुदीगंधवायुना॥य
मुनोपवनेरेमे सेविते स्त्रीगणैर्वृतः॥१७॥वरुणप्रेषितादेवीवारुणीवृक्षकोटरात्॥पतंतीतद्वनंसर्वंस्वगंधेनाध्यवासयत्॥१८॥
तंगंधंमधुधाराया वायुनोपहृतंबलः॥आघ्रायोपगतस्तत्रललनाभिःपपौसमं॥१९॥उपगीयमानचरितो वनिताभिर्हलायुधः॥ रम॰
य वनेषुव्यचरत्क्षीबोमदविकललोचनः॥२०॥स्त्रग्व्येककुंडलोमत्तो वैजयंत्याचमालया॥बिभ्रत्स्मितमुखांभोजंस्वेदप्रालेयभूषितः॥ ४६
षितम्॥२१॥सआजुहावयमुनांजलक्रीडार्थमीश्वरः॥निजंवाक्यमनादृत्यमत्तइत्यापगांबलः॥२२॥अनागतांहलाग्रेण कुपि
तोविचकर्षह॥२३॥पापेत्वंमामवज्ञाय यन्नायासिमयाकुता॥२३॥ गंधवायुनेत्यर्थः॥१७॥वारुणीसुधयासहोत्पन्नामदिरा॥१८॥
॥१९॥क्षीबोमत्तः॥२०॥स्वेदएवप्रालेयंहिमंतेनभूषितं॥२१॥मत्तोयमितिमत्वा इत्यानागतानाम्यापगां नदीं॥२२॥आहृतापद्यस्मान्नागच्छसि॥२३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेष्येनयिष्यामि॥२३॥ चकिता कंपिता॥२४॥ एकांशेनशेषाख्येन॥२५॥२६॥ विजगाह इत्यवगाहनेनक्षुभितवान्॥२७॥ उत्तीर्णापनिर्गताय असितांबरा हानिकांतिर्द
दैः॥ कांतिर्लक्ष्मीः यथोक्तं वैष्णवे॥ वरुणप्रहितां चास्मै मालामम्लानपंकजां॥ समुद्रनेतथा नस्यैनीलेलक्ष्मीररयच्छेति॥ हरिवंशे च बलं प्रति लक्ष्मीवाक्यं जात

नेष्ये त्वां लांगलाग्रेण शतधा कामचारिणीं॥२३॥ एवं निर्भर्त्सिता भीता यमुना यदुनंदनं॥ उवाच चकिता वाचं पतिता पादयोर्नृप॥२४॥ रा
म राम महाबाहो न जाने तव विक्रमं॥ यस्यैकांशेन विधृता जगती जगतः पते॥२५॥ परं भावं भगवतो भगवन्मामजानतीं॥ मोक्तुमर्ह
सि विश्वात्मन्प्रपन्नां भक्तवत्सल॥२६॥ ततो व्यमुंचद्यमुनां याचितो भगवान्बलः॥ विजगाह जलं स्त्रीभिः करेणुभिरिवेभराट्॥२
७॥ कामं विहृत्य सलिलादुत्तीर्णायासितांबरे॥ भूषणानि महार्हाणि ददौ कांतिः शुभां स्रजं॥२८॥ वसित्वा वाससी नीले मालामामु
च्य कांचनीं॥ रेजे स्वलंकृतो लिप्तो माहेंद्र इव वारणः॥२९॥ अद्यापि दृश्यते राजन्यमुनाकृष्टवर्त्मना॥ बलस्यानंतवीर्यस्य सूचय वीर्यस्य
तीव हि॥३०॥ एवं सर्वा निशा याता एकेव रमतो व्रजे॥ रामस्याक्षिप्तचित्तस्य माधुर्यैर्व्रजयोषितां॥३१॥ ॥ इति श्रीभागवते महा
पुराणे दशमस्कंधे बलदेवविजये यमुनाकर्षणं नाम पंचषष्टितमोऽध्यायः॥ ॥६५॥ ॥

रूपमयैर्वैकुंठोद्भवं भूषणं॥ आदिपर्वणि च पद्माख्यं दिव्यं श्रवणभूषणं॥ देवेभ्यो प्रतीमहीक्षीपपौरागीं भूषणं क्रियामित्यादि॥२८॥ वसित्वा परिधा
य आमुच्य कंठे निधाय चंदनादिभिर्लिप्तः॥२९॥३०॥ एकेव एकैव निशा यथा तन्माधुर्यैः विलासैः॥३१॥ इति दशमे टीकायां पंचषष्टितमोऽध्यायः॥६५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षट्कुक्षिस्थितमेकाकी गत्वाहन्पौंड्रकं हरिः॥ तन्मित्रं च ततो हत्वा सुदर्शनवधादिकं॥१॥१॥प्रश्नोत्तरं तु तत्प्रोक्ता हि तैः बालैरज्ञैः॥२॥बालहतो न
पःबालैर्नृपत्वेनक्रीडायां परिकल्पितः॥३॥४॥५॥६॥७॥हे मूढ उक्तं स्वेष्वपि प्रक्षेप्स्यामि येः स्वहृत्वमेवं विकत्थसे ते यथा पीत्यर्थः॥पद्मायैःद्वन्द्वैर्मैः सुदर्शना

श्रीशुक उवाच॥॥नन्दव्रजं गते रामे करूषाधिपतिर्नृपः॥वासुदेवोहमित्यज्ञो दूतं कृष्णाय प्राहिणोत्॥१॥त्वं वासुदेवो भगवानवतीर्णो
जगत्पतिः॥इति प्रस्तोभितो बालैर्मेन आत्मानमच्युतं॥२॥दूतं च प्राहिणोन्मन्दः कृष्णायाव्यक्तवर्त्मने॥द्वारकायां यथा बालो नृपो बालकृत
तोबुधः॥३॥दूतस्तु द्वारकामेत्य सभायामास्थितं प्रभुं॥कृष्णं कमलपत्राक्षं राजसंदेशमब्रवीत्॥४॥वासुदेवोवतीर्णोहमेक एव न चापरः
॥भूतानामनुकंपार्थं त्वं तु मिथ्याभिधां त्यज॥५॥यानि त्वमस्मच्चिह्नानि मौढ्याद्बिभर्षि सात्वत॥त्यक्त्वैहि मां त्वं शरणं नो चेद्देहि ममाहवं॥
॥६॥॥श्रीशुक उ॥॥कत्थनं तदुपाकर्ण्य पौंड्रकस्याल्पमेधसः॥उग्रसेनादयः सभ्या उच्चकैर्जहसुस्तदा॥७॥उवाच दूतं भगवान्परिहा
सकथामनु॥उत्स्रक्ष्ये मूढ चिह्नानि यैस्त्वमेवं विकत्थसे॥८॥मुखं तदपिधायाज्ञ कंकगृध्रवटैर्वृतः॥शयिष्यसे हतस्तत्र भविता
शरणं शुनां॥९॥इति दूतस्तदाक्षेपं स्वामिने सर्वमाहरत्॥कृष्णोपि रथमास्थाय काशीमुपजगाम ह॥१०॥पौंड्रकोपि तदुद्योगमु
पलभ्य महारथः॥अक्षौहिणीभ्यां संयुक्तो निश्चक्राम पुराद्द्रुतं॥११॥तस्य काशिपतिर्मित्रं पार्ष्णिग्राहोन्वयान्नृप॥अक्षौहिणीभिस्तिसृ
भिरपश्यत्पौंड्रकं हरिः॥१२॥॥
द्दिशिस्त्वमेवं श्लाघसे तानि उत्स्रक्ष्ये त्याजयिष्यामीत्यर्थः॥८॥मां शरणमेहीत्यस्योत्तरं मुखमिति॥वटाःकंकादिव
त्पक्षिविशेषाः॥तत्र तदा शुनां शरणमाश्रयो भविता सि॥९॥काशीमिति पौंड्रकस्यापि तदा मित्रपुर एव स्थानात्॥१०॥११॥पार्ष्णिग्राहः पृष्ठतो रक्षकः॥१२॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१३ ॥ गरुडः ह्रनिमो ध्वजो यस्य तं ॥ अमूल्यो ऽनर्घ्यो मौलिः आभरणं यस्य तं ॥ १४ ॥ १५ ॥ १६ ॥ गजस्यंदनादि चतुरंगबलमर्दितवान् पृथक् प्रजाः
चतुर्विधं हतग्रामं यथा युगांताग्निरिति ॥ १७ ॥ आयोधनं रणस्थानं अरिगणचक्रेण चितं आक्रीडनमिव कल्पांते रुद्रस्य क्रीडास्थानमिव ॥ १८ ॥ १९ ॥ २० ॥

शंखचक्रगदासिगदाशार्ङ्गश्रीवत्साद्युपलक्षितं ॥ किंचाणकौस्तुभमणिं वनमालाविभूषितं ॥ २३ ॥ कौशेयवाससी पीतेव सानस्त्रौ गरुडध्वजे ॥ अमूल्य
मौलाभरणं स्फुरन्मकरकुंडलं ॥ २४ ॥ दृष्ट्वा तमात्मनस्तुल्यवेषं हरिमवस्थितं ॥ यथा नटं रंगगतं विजहास जनार्दनः हरिः ॥ २५ ॥ शूलैर्गदा
खंडे भिः परिघैः शक्तिऋष्टिप्रासतोमरैः ॥ असिभिः पट्टिशैर्बाणैः प्राहरन्नरयो हरिं ॥ २६ ॥ हत्वा सहस्तुतत्सैन्यं पौंड्रककाशिराजयोर्बलं गजस्यंदनवाजिपत्ति
मत् ॥ गदासिचक्रेषुभिरार्दयत्त्यन्तं यथा युगांते हुतभुक् पृथक् प्रजाः ॥ २७ ॥ आयोधनं तद्रथवाजिकुंजरैर्द्विपत्खरोष्ट्रैररिणा वखंडि ८१
हंस तैः ॥ बभौ चितं मोदवहं मनस्विनामाक्रीडनं भूतपतेरिवोल्बणं ॥ २८ ॥ अथाह पौंड्रकं शौरिर्भो भो पौंड्रक यद्भवान् ॥ दूतवाक्येन मामाह
तान्यस्त्राण्युत्सृजामि ते ॥ २९ ॥ त्याजयिष्ये ऽभिधानं मे यत्त्वयाज्ञ मृषा धृतं ॥ व्रजामि शरणं ते ऽद्य यदि नेच्छामि संयुगं ॥ ३० ॥ इति क्षिप्त्वा शि
तैर्बाणैर्विरथीकृत्य पौंड्रकं ॥ शिरोवृश्चद्रथांगेन वज्रेणेन्द्रो यथा गिरेः ॥ ३१ ॥ तथा काशिपतेः कायाच्छिरउत्कृत्य पत्रिभिः ॥ न्यपातयत्काशिपुर्यां
पद्मकोशमिवानिलः ॥ ३२ ॥ एवं मत्सरिणं हत्वा पौंड्रकं ससखं हरिः ॥ द्वारकामाविशत्सिद्धैर्गीयमानकथामृतः ॥ ३३ ॥ स नित्यं भगवद्ध्यानप्र
ध्वस्ताखिलबंधनः ॥ बिभ्राणश्च हरे राजन् स्वरूपं तन्मयो ऽभवत् ॥ ३४ ॥ शिरः पतितमालोक्य राजद्वारे सकुंडलं ॥ किमिदं कस्य वा व
क्त्रमिति संशयिरे जनाः ॥ ३५ ॥ राज्ञः काशिपतेर्ज्ञात्वा महिष्यः पुत्रबांधवाः ॥ पौराश्च हा हता राजन्नाथ नाथेति प्रारुदन् ॥ ३६ ॥ ॥

गिरेः शृंगं यथेति ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ प्रथमं किमिदमिति पश्चाद्वक्त्रमिति विभाव्य कस्य चेति संशयिरे ॥ संज्ञापंकृतवंत इति ॥ ३५ ॥ ३६ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ टी॰ उ॰

४९

संस्थाविधिं उत्तरक्रियां अपचितिं निष्कृतिं ॥२७॥ आत्मनाग्निं संधाय बुध्या मनस्य सुदक्षिणः अस्तु दारः ॥२८॥ वरमहीतलें रौ हणी थे स्तुकृ वानित्यर्थः ॥२९॥ ऋ
त्विजं ऋत्विजमिव स्वयोगकारिणं यज्ञस्य देवमृत्विजमिति श्रुतिः ॥३०॥ अब्रह्मण्ये प्रयोजितः इति ॥ ह्लक्षे प्रयोजितो विपरितो न विष्मतीति सूचितं अग्निचर

॥सुदक्षिणस्य स्यसुतः कृत्वा संस्थाविधिं पितुः ॥ निहत्य पितृहंतारं यास्याम्यपचितिं पितुः ॥२७॥ इत्यात्मनाग्निं संधाय सोपाध्यायो महे
श्वरम् ॥ सुदक्षिणोर्च्चयामास परमेणसमाधिना ॥२८॥ प्रीतो विसुक्तो गवांस्त्रस्मै वरमदाद्भवः ॥ पितृहंतृवधोपायं सवत्रेव रमी
प्सितम् ॥२९॥ दक्षिणाग्निं परिचर ब्राह्मणैः सह ऋत्विजं ॥ अग्निचारविधानेन सचाग्निः प्रमथैर्वृतः ॥३०॥ साधयिष्यति संकल्पमब्र
ह्मण्ये प्रयोजितः ॥ इत्यादिष्टस्तथा चक्रे ह्लक्षायाग्निं चरन्नृव्रतीं ॥ ३१॥ ततोग्निरुत्थितः कुंडान्मूर्त्तिमानतिभीषणः ॥ तप्तताम्रशि
खारमश्रुरंगारोक्षारितोचनः ॥ ३२॥ दंष्ट्रोग्रभृकुटी दंडकगोरास्पः स्वतिकृत्यया ॥ आलिहन् सृक्किणी नग्नो बिभ्रत् त्रिशिखंज्वलत् ॥
॥३३॥ पद्भ्यां तालप्रमाणाभ्यां कंपयन्नवनीतलं ॥ सोभ्यधावद् वृतो भूतैर्द्वारकां प्रदहन्नरिशः ॥३४॥ तमाग्निचारदहनमायांतंद्वा
रकौकसः ॥ विलोक्य त्रा तेसुः सर्वे वनदाहे यथा मृगाः ॥३५॥ अक्षैः सन्नायाक्रीडंतं भगवंतं जनमातुराः ॥ त्राहि त्राहि त्रिलोकेश
वह्निः प्रदहतःपुरं ॥३६॥ श्रुत्वा तज्जनवैक्लव्यं दृष्ट्वा स्वानां च साध्वसं ॥ शरण्यः संप्रहस्याह मा भैष्टेत्यविता स्म्यहं ॥३७॥ ॥ ॥

न्नभिचारं कुर्वन्नव्रतीगृहीतनियमः ॥३१॥ तप्तं ताम्रमिव शिखाश्मश्रूणि चयस्य सः ॥ अंगारोक्षारिणी लोचनानि यस्य सः ॥३२॥ दंष्ट्राभिरुग्रैः भृकुटी
दंडैश्च कठोरं क्रूरं आस्यं यस्य सः ॥ त्रिशिखं त्रिशूलं ॥३३॥ दिशः प्रदहन् ॥३४॥३५॥ त्राहि त्राहीत्याकुरितिशेषः ॥ अहमविता स्मि रक्षिता स्मीति ॥३७॥ ॥

राम॰

४९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३८॥ रोदसी च प्रकाशयदिति शेषः॥ यद्वा स्वतेजसा खाद्वा दृशत्प्रति ज्वाज्वल्यमानं॥ अनल्पमर्कप्रकाशमानमिति सर्वं॥ अर्दयत् पीडयत्॥३९॥ अरितोग्निर्यत्स्त
तद्वान् स्वदाहहृत्सानलघृति॥ महद्भिर्भिः जनैश्च वर्त्तमानमभिचर्यते॥ नेनेत्यभिचारः हुतानलः॥४०॥ आद्यादिसहितां अट्टसभां मंचा॥४१॥४२॥४३॥ इति दश
मे षट्षष्टितमोऽध्यायः॥ ॥ सप्तषष्टितमे गिरौ रैवतके मदात्॥ स्वैरं युवतिभिः क्रीडन्नवधीद्द्विविदं खलं॥ कालिंदीविदारणानंतरं रामचरितं द्विविदवधादिकं संग

सर्वस्यांतर्बहिः साक्षी कृत्यां माहेश्वरीं विभुः॥ विज्ञाय तद्विघातार्थं पार्श्वस्थं चक्रमादिशत्॥३८॥ तत्सूर्यकोटिप्रतिमं सुदर्शनं जाज्वल्यमानं प्रलयानलप्रभं॥ स्वतेजसा खं ककुभोथ रोदसी चक्रं मुकुंदास्त्रमथाग्निमार्दयत्॥३९॥ कृत्यानलः प्रतिहतः स रथांगपाणे
रस्त्रौजसा स नृप भग्नमुखो निवृत्तः॥ वाराणसीं परिसमेत्य सुदक्षिणं तं सर्त्विग्जनं समदहत्स्वकृतोभिचारः॥४०॥ चक्रं च विष्णो
स्त दनुप्रविष्टं वाराणसीं साट्टसभालयापणां॥ सगोपुराट्टालककोष्टसंकुलां सकोशहस्त्यश्वरथान्नशालिनीं॥४१॥ दग्ध्वा वाराण
सीं सर्वां विष्णोश्चक्रं सुदर्शनं॥ भूयः पार्श्वमुपातिष्ठत्कृष्णस्याक्लिष्टकर्मणः॥४२॥ य एतं श्रावयेन्मर्त्यांतुत्तमश्लोकविक्रमं॥ स
माहितो वा शृणुयात्सर्वपापैः प्रमुच्यते॥४३॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पौंड्रकवधषट्षष्टितमोऽध्यायः॥ ॥ राजो
वाच॥ ॥ भूयोहं श्रोतुमिच्छामि रामस्याद्भुतकर्मणः॥ अनंतस्याप्रमेयस्य यदन्यत्कृतवान्प्रभुः॥१॥ ॥ शुक उवाच॥ ॥ नर
कस्य सखा कश्चिद्द्विविदो नाम वानरः॥ सुग्रीवसचिवः सोथ भ्राता मैंदस्य वीर्यवान्॥२॥ ॥

तमप्यनुक्त्वा तत्पूर्वं ज्ञावित्वेन पौंड्र
कवधादिति रूप्येरानीतं देवप्रस्तौति भूयोहमित्यादिना रामचरितश्रवणेच्छया मद्भुतकर्मत्वं हेतुस्तत्र चानंतत्वं तत्राप्यप्रमेयत्वमिति॥१॥ नरक
स्य सखेति हरिणा वैरकारणं सुग्रीवसचिव इति तस्य मंत्रबलं मैंदस्य भ्रातेति रामायणेति प्रसिद्धत्वेन वीर्याधिकमुक्तमिति॥२॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना. द. उ सख्युर्नरकस्यापचितिमात्मनृपं ॥२॥ हनुमत्स्य विप्लवो नाशो यथो ऽभवत् ॥ तथासुरादीन्दहन्निति ॥३॥ किंवा ॥ कश्चिदितिकराचिसन्धिविदः ॥ मित्रहा सखिहन्ता ॥

४९ तस्य समुद्रस्य जलेबकुस्मामुक्तिप वेलायांकूलेवर्त्तमानान् देशान्लावयामासेति ॥५॥ आश्रमस्थान्वनस्पतीन्नंकाश्चाहवनीयाद्यग्निष्टपुष्पन्नादि ह

सख्युः सोपचितिं कुर्वन्वानरो राष्ट्रविप्लवं ॥ पुरग्रामाकरान्घोषान्ददहत्क्लिम्सु स्तजनं ॥३॥ कश्चिच्छैलान्तस्थादयतै हेशान्स

मचूर्णयत ॥ आनर्नान्सुतरामेवयत्रास्ते मित्रहा हरिः ॥४॥ कश्चित्समुद्रमध्यस्थो दोर्भ्यामुद्धृत्य तज्जलं ॥ देशान्प्लावयते स्माऽणे

वेलाकूलान्समकम्पयत ॥५॥ आश्रमान्ऋषिमुख्यानां हत्वा नश्यन्वनस्पतीन् ॥ अहूयत हरिस्तन्मूलैरग्नीन्वैतानिकान्खलः ॥६॥

पुरुषान्मोषितो दृष्ट्वा स्मात्तद्धेणीगुहासु सः ॥ निक्षिप्य चाप्यधात्स्थैले पेशस्कारीव कीटकं ॥७॥ एवं देशान्विप्रकुर्वन्नृषभं स्कन्धक [illegible] स्त्रि

यः ॥ श्रुत्वा सुललितं गीतं गिरिं रैवतकं ययौ ॥८॥ तत्रापश्यद्यदुपतिं रामं पुष्करमालिनं ॥ सुदर्शनीयसर्वांगं ललनायूथमध्यगं ॥

॥९॥ गायंतं वारुणीं पीत्वा मदविक्लवलोचनं ॥ विभ्राजमानं वपुषा प्रभिन्नमिव वारणं ॥१०॥ दुष्टः शाखामृगः शाखामारूढः कंप राम.

यन्द्रुमान् ॥ चक्रे किलकिलाशब्दमात्मानं संप्रदर्शयन् ॥ तस्य धार्ष्ट्यं कपेर्वीक्ष्य तरुण्यो जातिचापलाः ॥ हास्यप्रिया विजहसु

र्बलदेवपरिग्रहाः ॥११॥ ता हेलयामास कपिर्भ्रूक्षेपैः संमुखादिभिः ॥ दर्शयन्स्वगुदं तासां रामस्य च निरीक्षतः ॥१२॥ तं ग्राव्णा ४९

प्राहरत्क्रुद्धो बलः प्रहरतां वरः ॥ स वंचयित्वा ग्रावाणं मदिराकलशं कपिः ॥१४॥॥

तवान् ॥६॥ अप्यधात्पिदधे पेशस्कारी भ्रमरः ॥७॥

॥८॥ प्रभिन्नं मत्तं ॥१०॥ जातंस्वभावे नैव चापलं येषां ताः ॥११॥ हेलयामास अवजज्ञे निरीक्षतस्तथा निरीक्षमाणस्य तमनादृत्येत्यर्थः ॥१३॥ १४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१४॥ आस्फालयन्नघोषितां वासांसि आकृष्य पातितवान् ॥ विप्रचक्रे एवमपहृतवान् ॥१५॥१६॥ शालं वृक्षं ॥१७॥ सुनंदेन मुशलेनाहनत ॥ अहन्नित्यर्थः
॥ तं वानरं ॥१८॥ मस्तिकं मस्तकावयवविशेषः ॥ गैरिकया लोहितधातुना नान्वचिंतयत ॥ अर्णं प्रपत ॥१९॥२०॥२१॥२२॥ अरूरुजत् ताजयामास ॥२३॥ जत्रौ

गृहीत्वा हेलयामास धूर्तस्तं कोपयन् हसन् ॥१५॥ निर्भर्त्स्य करजंघ्रं धृष्टेवा संस्प्रास्फालयद्बलं ॥ करदर्थी हि त्सबलत्वान्विप्रचक्रे मदोद्धतः ॥
१५॥ तं तस्याविनयं दृष्ट्वा देशांश्च तदुपद्रुतान् ॥ क्रुद्धो मुशलमादत्त हलं चारिजिघांसया ॥१६॥ द्विविदोपि महावीर्यः शालमुद्यम्य पाणि
ना ॥ अभ्येत्य तरसा तेन बलं मूर्धन्यताडयत् ॥१७॥ तं तु संकर्षणो मूर्ध्नि पतंतमचलो यथा ॥ प्रतिजग्राह भगवान् सुनंदेनाहनच्च तं ॥१८
॥ मुशलाहतमस्तिष्को विरेजे रक्तधारया ॥ गिरिर्यथा गैरिकया प्रहारं नान्वचिंतयत ॥१९॥ पुनरन्यं समुत्क्षिप्य कृत्वा निष्पत्रमोजसा
॥ तेनाहनत्सुसंक्रुद्धस्तं बलः शतधाच्छिनत् ॥२०॥ ततोन्येन रुषा जघ्ने तं चापि शतधाच्छिनत ॥२०॥ एवं युध्यन् भगवता भग्नेन्येन्ये पुनः
पुनः ॥ आकृष्य सर्वतो वृक्षान्निर्वृक्षमकरोद्वनं ॥२१॥ ततोमुंचच्छिलावर्षं बलस्योपर्यमर्षितः ॥ तत्सर्वं चूर्णयामास लीलया मुशलायु
धः ॥ स बाहू तालसंकाशौ मुष्टीकृत्य कपीश्वरः ॥ आसाद्य रोहिणीपुत्रं ताभ्यां वक्षस्यरूरुजत् ॥२३॥ यादवेंद्रोपि तं दोर्भ्यां त्यक्त्वा मुशला
लांगले ॥ जत्रावभ्यर्दयत्क्रुद्धः सोपतद्रुधिरं वमन् ॥२४॥ चकंपे तेन पतता सटंकः सवनस्पतिः ॥ पर्वतः कु[illegible]शार्दूल वायुना नौरि रु
वांभसि ॥२५॥ जयशब्दो नमःशब्दः साधु साध्विति चांबरे ॥ सुरसिद्धमुनींद्राणामासीत्कुसुमवर्षिणां ॥२६॥ एवं निहत्य द्विविदं जग
द्व्यतिकरावहं ॥ संस्तूयमानो भगवान् जनैः स्वपुरमाविशत् ॥२७॥ ॥ इति श्री भा० द० द्विविदवधो नाम सप्तषष्टितमोऽध्यायः ॥ ॥६७॥
कंठबाहुमूले ॥२४॥ टंकाः सतोयविवराणि वक्षहिकाः ॥२५॥२६॥ जगतो व्यतिकरं नाशमावहतीति तथा तं ॥२७॥ ॥ इति सप्तषष्टितमः ॥ ॥६७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टषष्टितमे सांबे निबद्धे कौरवैर्युधि। तद्विमोक्षाय रामेण गजाह्वयविकर्षणं॥१॥ रामचरित्रांतरं निरूपयितुमाह॥ दुर्योधनसुतामिति जयः सं
ग्रामजित्॥१॥२॥ नोऽस्माकं महीं अस्माभिर्दत्तां न ते नृपीपतयः पश्यतिनावः॥३॥ यांति यास्यंति प्राणा इंद्रियाणि वसुसंयताः प्राणायामादिभिर्दमिताः॥४॥

श्रीशुक उवाच॥ दुर्योधनसुतां राजंल्लक्ष्मणां समितिंजयः॥ स्वयंवरस्थामहरत्सांबो जांबवतीसुतः॥१॥ कौरवाः कुपिता
ऊचुर्दुर्विनीतोऽयमर्भकः॥ कदर्थीकृत्य नः कन्यामकामामहरद्बलात्॥२॥ बध्नीतेमं दुर्विनीतं किं करिष्यंति वृष्णयः॥ येऽस्मत्प्रसा
प दोपचितां दत्तां नो भुंजते महीं॥३॥ निगृहीतं सुतं श्रुत्वा यद्येष्यंतीह वृष्णयः॥ भग्नदर्पाः शमं यांति प्राणा इव सुसंयताः॥४॥ इति कर्णः
शलो भूरिर्यज्ञकेतुः सुयोधनः॥ सांबमारेभिरे बद्धुं कुरुवृद्धानुमोदिताः॥५॥ दृष्ट्वानुधावतः सांबो धार्तराष्ट्रान्महारथः॥ प्रगृह्य रुचिरं चा
भि पं तस्थौ सिंह इवैकलः॥६॥ तं ते जिघृक्षवः क्रुद्धास्तिष्ठ तिष्ठेति भाषिणः॥ आसाद्य धन्विनो बाणैः कर्णाग्रण्यः समाकिरन्॥७॥ सोऽप
विद्धः कुरुश्रेष्ठ कुरुभिर्यदुनंदनः॥ नामृष्यत्तदचिंत्यार्भः सिंहः क्षुद्रमृगैरिव॥८॥ विस्फार्य रुचिरं चापं सर्वान्विव्याध सायकैः॥ क
र्णादीन्षड्रथान्वीरस्तावद्भिर्युगपत्पृथक्॥९॥ चतुर्भिश्चतुरो वाहानेकैकेन च सारथीन्॥ रथिनश्च महेष्वासांस्तस्य तत्तेऽभ्य
पूजयन्॥१०॥ तं तु ते विरथं चक्रुश्चत्वारश्चतुरो हयान्॥ एकस्तु सारथिं जघ्ने चिच्छेदान्यः शरासनं॥११॥ तं बद्ध्वा विरथीकृत्य
कृच्छ्रेण कुरवो युधि॥ कुमारं स्वस्य कन्यां च स्वपुरं जयिनोऽविशन्॥१२॥ ॥

कुरुवृद्धो भीष्मः तेनानुमोदिताः तत्सहिताः बद्धुं त इत्यर्थः॥५॥
असहायः॥६॥ कर्णोऽग्रणीर्येषां ते॥७॥ नामृष्यत् असहत॥ अचिंत्यस्य भगवतोऽर्भकः॥ अचिंत्यश्चासावर्भश्चेति वा॥८॥९॥ एतत्ते पंचयति॥ च
तुर्भिश्चतुर इत्यत्र वीप्सानुसंधेया॥ तत्कर्म ते संमानितवंतः॥१०॥११॥ स्वस्य दुर्योधनस्य कन्यां च नीत्वेति शेषः॥१२॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतः कलिं नैच्छत्॥ अतः सांत्वयित्वा जगामेति॥१४॥१५॥ धृतराष्ट्रं प्रति बुभुत्सुस्सपेति अभिप्रायजिज्ञासयेत्यर्थः॥ विधिवदभिवंद्य॥१९॥ तमुधवमर्च
यित्वा सत्कृत्य मंगलपाणयः उपायहस्ताः॥१८॥ इत्यधा अपि प्रणेमुः॥१९॥२०॥ पघूयमित्सुग्रसेनस्यवाक्यं मर्षयसे हे॥ अथास्तुतमानीयसमर्पयतइ

तच्छ्रुत्वा नारदोक्तेन राजन् संजातमन्यवः॥ कुरून् प्रत्युद्यमं चक्रुरुग्रसेनप्रचोदिताः॥१३॥ सांतयित्वा तु तान् रामः संनद्धान् वृष्णिपुंग
वान्॥ नैच्छत्कुरूणां हि स्मीनो कलिं कलिमलापहः॥१४॥ जगाम हास्तिनपुरं रथेनादित्यवर्चसा॥ ब्राह्मणैः कुलवृद्धैश्च वृतश्चंद्र इव
ग्रहैः॥१५॥ गत्वा गजाह्वयं रामो बाह्योपवनमास्थितः॥ उद्धवं प्रेषयामास धृतराष्ट्रं बुभुत्सया॥१६॥ सोभिवंद्यांबिकापुत्रं भीष्मं द्रोणं
सबाह्लिकं॥ दुर्योधनं च विधिवद्राममागतमब्रवीत्॥१७॥ तेतिप्रीतास्तमाकर्ण्य प्राप्तं रामं सुहृत्तमं॥ तमर्चयित्वाभिययुः सर्वे मंगल
पाणयः॥१८॥ तं संगम्य यथान्यायं गामर्घ्यं च न्यवेदयन्॥ तेषां ये तत्प्रभावज्ञाः प्रणेमुः शिरसा बलं॥१९॥ बंधून् कुशलिनः श्रु
त्वा पृष्ट्वा शिवमनामयं॥ परस्परमथो रामो बभाषेविक्लवं वचः॥२०॥ उग्रसेनः क्षितीशेशो यद्व आज्ञापयत्प्रभुः॥ तदव्यग्रधियः श्रु
त्वा कुरुध्वं माविलंबितं॥२१॥ यद्यूयं बहवस्त्वेकं जित्वाऽधर्मेण धार्मिकं॥ अबध्नीताथ तन्मृष्ये बंधूनामैक्यकाम्यया॥२२॥ वीर्यशौ
र्यबलोन्नद्धमात्मशक्तिसमं वचः॥ कुरवो बलदेवस्य निशम्योचुः प्रकोपिताः॥२३॥ अहो महच्चित्रमिदं कालगत्या दुरंतया॥ आरु
रुक्षत्युपानद्वै शिरो मुकुटसेवितं॥२४॥ ॥ तितिक्षोघः॥२२॥ वीर्यप्रभावः शौर्यमुत्साहः॥ बलं सत्वं तैरुन्नद्धं उद्वृत्तं खलं कथं आत्मनः
शक्तेः सममनुरूपं॥२३॥ उपानत्पादरक्षा शिरः आरोढुमिच्छति हीना अस्मानाज्ञापयंतीत्यर्थः॥२४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰

५१

अस्यैव प्रपंचः एतदिति च तुर्भिः यो नेनष्टधायाविवाहेन ॥२५॥ किंच चामरम जने इति भुजंति उपभुजं तदस्यार्थः ॥ अस्मदुपेक्षयाऽस्माकं अनाग्रहेण ॥
॥२६॥ अलमिति ॥ अतः परं ॥ तास्य पहरिष्यामइत्यर्थः ॥२७॥ अवरुधीत स्वीकुर्यात ॥ उरणो मेषः ॥२८॥ जन्मना बंधुमिश्रो पलक्षित यास्मि यो त्र ध

न॰

एते यौ नेन संबधाः सहत्रय्या सतात्रनाः ॥ दृक्षय खुलपतां नीता अस्मद्दत्तनृपासनाः ॥२५॥ चामरं मजने शंखमातपत्रं च
पांडुरं ॥ किरीटमासनं शय्यां भुजंत्यस्मदुपेक्षया ॥२६॥ अलं प्रहर्तोर देवलोकं नैर्दोस्तु प्रतीपैः फणिना मिवास्तु तां ॥ येनः प्रसा
दोपचिता हिया दत्वा आज्ञापर्यंत्य द्यगतत्रपा बत ॥२७॥ कथमिंद्रोपि कुरुश्रेष्ठो नोप्रत्तेर्जुना दिचिरा अरत्तमवरुंधीत सिंहश्र
त्समिवोरणः ॥२८॥ ॥श्रीकृ॰ उ॰॥ ॥जन्मबंधुश्रियो त्र धमदास्तेन रत तर्पभाः ॥ आश्राम्परामेदुर्वाक्यमसत्याः पुरमाविशन् ॥
२९॥ दृष्ट्वा कुरूणां दौःशील्यं श्रुत्वा वाच्यानि चाच्युतः ॥ अवोच कोपसंरब्धो दुःप्रेक्ष्यः संहसन् मुहुः ॥३०॥ नूनं नानाम
दोन्नधाः शांतिं नेछंत्यसाधवः ॥ तेषां हि प्रशमो दंडः पशूनां लकुटो यथा ॥३१॥ अहो यदून् सुसंरब्धान् कृष्णं च कुपितं शनैः
॥ सांत्वयित्वाहमेतेषां शममिच्छन्निहागतः ॥३२॥ त इमे मंदमतयः कलहाभिरताः खलाः ॥ तं मामवज्ञाय मुहुर्दुर्भाषा न्मा
ति नो ब्रुवन् ॥३३॥ नोग्रसेनः किल विभुर्भोजवृष्ण्यंधकेश्वरः ॥ शक्रादयो लोकपाला यस्यादेशानुवर्तिनः ॥ ३४ ॥ ॥

राम॰

५१

उत्कटो मदो येषां ते दुर्वाच्यं परुषं वाक्यं असत्याः दुर्जनाः ॥२९॥३०॥ नाना धनाभिजनादिमदेरुन्नद्धाः ॥ दंड एव प्रशमः प्रकर्षेण शमयतीति ॥ त
यालकुटो दंडः ॥३१॥३२॥ दुर्भाषान् अवाच्यान् शब्दान् ॥३३॥ दुर्भाषणमनुस्मरति षड्भिः नो ग्रसेन इति विभुः आज्ञापयितुं समर्थः ॥३४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽशेषधृष्टाः श्रीहृत्समम्प्यधिक्षिप्तवंतश्चिकृतेपि अहो ॥ सुधर्मे त्सारितिनिस्त्रिंशि ॥२५॥२६॥ मौल्युत्तमैः मौलिपुंकैःकृतमंगैः उमैस्तै मौलिनिरितिवा उपासितानि
तीर्थानि योर्योगिभिस्तेषामपि तीर्थं ॥ यत्का उपासितं सर्वैः सेवितं तीर्थं गंगावस्तु तीर्थं सतिमित्तं किंवा ॥ ब्रह्मानवः श्रीश्चेऽहमपिउत्कृहेम ॥ कथयन्नृता स्वयं यस्य
सुधर्माक्रम्यते येन पारिजातो मरांघ्रिपः ॥ ज्ञानी यन्नुत्पते सोसौ न किलाध्यासतां हृणः ॥२५॥ यस्य पादयुगलं सासीत्बुद्धि रूपास्ते खिलेश्व
री ॥ स नार्हति किल श्रीशो नरदेवपरिच्छदान् ॥२६॥ यस्यांघ्रिपंकजरजो खिललोकपालै मौल्युत्तमै धृतमुपासिततीर्थतीर्थं ॥ ब्रह्मा भवो
हमपि यस्य कलाः कलायाः श्रीश्चोद्वहेम चिरमस्य नृपासनं क्व ॥२७॥ भुंजते कुरुभिर्दत्तं भूखंडं वृष्णयः किल ॥ उपानहः किलवयं स्वयं तु
कुरवः [illegible] शिरः ॥२८॥ अहो ऐश्वर्यमत्तानां मत्तानामिव मानितां ॥ असंबद्धा गिरो रूक्षाः कः सहेतानुशासिता ॥२९॥ अद्य निःकौरवीं पृ
थ्वीं करिष्यामीत्यमर्षितः ॥ गृहीत्वा हलमुत्तस्थौ दहन्निव जगत्त्रयं ॥४०॥ लांगलाग्रेण नगरमुद्विदार्य गजाह्वयं ॥ विचकर्ष स गंगायां प्रह
रिष्यन्नमर्षितः ॥४१॥ जलयानमिवाघूर्णं गंगायां नगरं पतत् ॥ आकृष्यमाणमालो क्य कौरवा जातसंभ्रमाः ॥४२॥ तमेव शरणं ज
ग्मुः सकुटुंबा जिजीविषवः ॥ सलक्ष्मणं पुरस्कृत्य सांबं प्रांजलयः प्रभुं ॥४३॥ राम रामाखिलाधार प्रभावं न विदाम ते ॥ मूढानां नः कुबुद्धी
नां क्षंतुमर्हस्यधीश्वर ॥४४॥ ॥ कलायाः अंशांशस्य कलाः अंशांशाः ॥२७॥२८॥ मत्तानामिव मद्यादिना रूक्षाः परुषाः अनुशासिता स्वयं दंडकः सन् ॥२९॥
॥४०॥ लांगलाग्रेण हलस्याग्रेण तःप्राकारमूले निखातेन उद्विदार्य उत्पाट्य ॥४१॥४२॥ जिजीविषवः स्वस्य जीवितुमिच्छवः ॥४३॥४४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰ ॥४५॥ शेषे शायं त्वं करीषि ॥ शेषः पर्यंगे परिशिष्यमाणो यः स त्वमेवेति वा ॥४६॥ अस्मासु कोपश्च तवायमनुचित एवेत्याशङ्क्याह कोपस्ते इति स्थितिपा
५२ लने तत्परः तात्पर्यवान्कोपः प्रागंतरे संबोधनं ॥४६॥ विश्वं कर्म कृत्यं यस्य स तथा तिति संबोधनं ॥४७॥ वेपमानमयनं येषु रंयेषां तैः ॥४९॥ तुरंगमांश्च दा

स्थित्युत्पत्त्यप्ययानां त्वमेको हेतुर्निराश्रयः ॥ लोकान्क्रीडनकानीश क्रीडतस्ते वदंति हि ॥४५॥ त्वमेव मूर्ध्नीदमनंत लीलया भूमं
डलं बिभर्षि सहस्रमूर्धन् ॥ अंते च यः स्वात्मनिरुद्धविश्वः शेषेऽद्वितीयः परिशिष्यमाणः ॥४६॥ कोपस्ते खलशिक्षार्थं न द्वेषान्न च मत्सरात् ॥
बिभ्रतो भगवन्सत्त्वं स्थितिपालनतत्परः ॥४६॥ नमस्ते सर्वभूतात्मन्सर्वशक्तिधराव्यय ॥ विश्वकर्मन्नमस्तेस्तु त्वां वयं शरणं गताः ॥४७॥
स श्रीशुक उवाच ॥ एवं प्रपन्नैः संविग्नैर्वेपमानायनैर्बलः ॥ प्रसादितः सुप्रसन्नो माभैष्टेत्यभयं ददौ ॥४८॥ दुर्योधनः पारिबर्हं कुंजरान्षष्टि
हायनान् ॥ ददौ च द्वादशशतान्ययुतानि तुरंगमान् ॥४९॥ रथानां षट्सहस्राणि रौक्माणां सूर्यवर्चसां ॥ दासीनां निष्ककंठीनां सहस्रं
त दुहितृवत्सलः ॥५०॥ प्रतिगृह्य तु तत्सर्वं भगवान्सात्वतर्षभः ॥ ससुतः सस्नुषः प्रायात्सुहृद्भिरभिनंदितः ॥५१॥ ततः प्रविष्टः स्वपुरीं हलायुधः राम॰
समेत्य बंधूननुरक्तचेतसः ॥ शशंस सर्वं यदुपुंगवानां मध्ये सभायां कुरुषु स्वचेष्टितं ॥५२॥ अद्यापि च पुरं ह्येतत्सूचयद्रामविक्रमं ५२
॥ समुन्नतं दक्षिणतो गंगायामनुदृश्यते ॥५३॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे बलभद्रविजयो नामाष्टषष्टितमोऽध्यायः ॥ ॥

दत्त्वायुतानि ॥४९॥५०॥ सुहृद्भिः कौरवैः ॥५१॥ मध्ये सभायां सभामध्ये ॥५२॥५३॥ ॥ इति दशमे अष्टषष्टितमः ॥ ॥६८॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकोनसमधतितमेगार्हस्थ्यं प्रतिमंदिरं ॥ द्रष्टुमस्मनारदो दृष्ट्वाविस्मितोगाच्चतःस्तुवत् ॥१॥ दिदृक्षुमगमिनयेताह चित्रमिति ॥ अष्टसहस्रस्त्रीः उदावहत्
॥ परिणीतवान् ॥२॥ तां द्वारवतीमनुवर्णयति सार्धत्रयेण पुष्पितेति पुष्पितेषु पवनेषु आरामेषु उद्यानेषु च द्विजानामलीनां कूजितानि तैर्नादितां ॥३॥ छुरिते
षु व्याप्तेषु ॥४॥ महामरकतैः प्रख्यैरम्यामंतःप्रकाशं तत इति ॥ तथा तैः स्वर्णरत्नमयाः परिच्छदाः परिकरा येषु तैः ॥५॥ पतंतः प्रचलंतः पताका येषु तैः ध्वजैर्वा

श्रीशुक उवाच ॥ ॥ नरकं निहतं श्रुत्वा तथोद्वाहं च योषितां ॥ कृष्णेनैकेन बह्वीनां तद्दिदृक्षुः स्म नारदः ॥१॥ चित्रं बतैतदेकेन वपुषा यु
गपत्पृथक् ॥ गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् ॥२॥ इत्युत्सुको द्वारवतीं देवर्षिर्द्रष्टुमागमत् ॥ पुष्पितोपवनारामद्विजालिकु
लनादितां ॥३॥ उत्फुल्लेंदीवरांभोजकल्हारकुमुदोत्पलैः ॥ छुरितेषु सरस्सूच्चैः कूजितां हंससारसैः ॥४॥ प्रासादलक्षैर्नवभिर्जुष्टां स्फा
टिकराजतैः ॥ महामरकतप्रख्यैः स्वर्णरत्नपरिच्छदैः ॥५॥ विभक्तरथ्यापथचत्वरापणैः [illegible] शालासभाभी रुचिरां सुरालयैः ॥ संसिक्तमा
र्गांगणवीथिदेहलीं पतत्पताकाध्वजवारितातपां ॥६॥ तस्यामंतःपुरं श्रीमदर्चितं सर्वधिष्ण्यपैः ॥ हरेः स्वकौशलं यत्र त्वष्ट्रा कार्त्स्न्येन
दर्शितं ॥७॥ तत्र षोडशभिः सद्मसहस्रैः समलंकृतं ॥ विवेशैकतमं शौरेः पत्नीनां भवनं महत् ॥८॥ विष्टब्धं विद्रुमस्तंभैर्वैदूर्यफल
कोत्तमैः ॥ इंद्रनीलमयैः कुड्यैर्जगत्या चाहतत्विषा ॥९॥ ॥
रितश्चातपो यस्यां तां ॥६॥ तस्यां सर्वैर्धिष्ण्यपैर्लोकपालैरर्चितं ॥ षोडशभिः स
द्मसहस्रैः समलंकृतं हरेरंतःपुरं विवेश तत्र च तस्य शौरेः पत्नीनां भवनेषु एकतमं विवेशेत्यन्वयः ॥ यत्र च कौशलं त्वष्ट्रा दर्शितमित्यंतःपुरस्य वर्णनं यो
र्विशेषणं ॥७॥८॥ तदनुवर्णयति चतुर्भिः ॥ विष्टब्धमिति ॥ विद्रुमस्तंभैर्विष्टब्धं विधृतं वैदूर्यमयानि फलकोत्तमानि स्तंभानामुपर्याच्छादनानि तैः इं
द्रनीलमयैः कुड्यादिभिः शोभमानं शोभितं जगत्या भूमिकया चेंद्रनीलमय्यानहतात्विट् यस्यास्तया ॥९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰ मुक्तादामान्यवलंबाः विविधानि लंबमानानि विद्योतयंतु तैः ॥ मणिपुत्तमैः परिष्कृतैर्भूषितैः ॥१०॥११॥ ईदृशस्मसमीक्ष्य घनो मेघोयमिति बुद्धिर्येषां ते ॥१२॥ अनु
५३ सर्वे सर्वकालमात्मना समानानि गुणरूपवयांसि सुवेषो लंकारश्च यस्य ते तव दासी सहस्रेण युतया गृहिण्या सह ॥१३॥ श्रियः रुक्मिण्याः पर्यंकतः ॥ अवीवि
ज्ञातम् ॥ उपवेशयामास ॥१४॥ अविज्ञात तत्र अविज्ञः ॥ हृष्यरित्यर्थः ॥ विचचदिति ज्ञात्वं तं वा ॥ तदा च संपूज्य भीनाप्यथ सा हेतु नरेण त्वयः ॥ कथं तत्तः ॥ यस्य च

वितानैर्निर्मितैस्त्वष्टुः मुक्तादामविलंबिभिः ॥ दांतैरासनपर्यंकैर्मणिपुत्तमपरिष्कृतैः ॥१०॥ दासीभिर्निष्ककंठीभिः सुवासोभिरलंकृतं
॥ पुंभिः सुकंचुकोष्णीषसुवस्त्रमणिकुंडलैः ॥११॥ रत्नप्रदीपनिकरद्युतिभिर्निरस्तध्वांतं विचित्रवलभीषु शिखंडिनोंग ॥ नृत्यंतिय
त्र विहितागरुधूपमक्षैर्निर्यांतमीक्ष्य घनबुधय उन्नदंतः ॥१२॥ तस्मिन्समानगुणरूपवयः सुवेषदासीसहस्रयुतयानुसवं गृहि
पतिं ण्या विभ्रोदृश्य चमरव्यजने नरुक्ममदंडेन सात्वतपरिवीजयंत्या ॥१३॥ तं सन्निरीक्ष्य भगवान्सहसोत्थितः श्रीपर्यंकतः सकलधर्म
भृतां वरिष्ठः ॥ आनम्य पादयुगलं शिरसा किरीटजुष्टेन सांजलिरवीविशदासने स्वे ॥१४॥ तस्यावनिज्य चरणौ तदपः स्वमूर्ध्ना विभ्र राम॰
ज्जगद्गुरुतरोपि सतां पतिर्हि ॥ ब्रह्मण्यदेव इति यद्गुणनाम युक्तं तस्यैव यच्चरणशौचमशेषतीर्थं ॥१५॥ संपूज्य देवऋषिवर्यमृषिः पुरा ५३
णो नारायणो नरसखो विधिनोदितेन ॥ वाण्याभिभाष्य मितयामृतमृष्टया तं प्राह प्रभो भगवते करवाम हे किम् ॥१६॥ ॥

रणशौचं गंगा अशेषतीर्थं सः ॥ अत एव जगद्गुरुतरोपि सतां धर्मभृतां पतित्वादेवमकरोदित्यर्थः ॥ स तां पतित्वे हेतुः ब्रह्मण्यदेव इति यद्गुण
युक्तं नाम तस्यैव यतोस्य उक्तं समंजसं ॥ अतस्तद्धर्मप्रवर्तनायैव माचरणमित्यर्थः ॥१५॥ अभिभाष्याभिभाष्य दिष्ट्यात्वदागमनमित्यादि प्रियमुक्त्वा ॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवतास्वस्माहैर्णमनर्हणमत्समानस्तस्संनावयन्नाह॥नैवेतिसर्वमित्रत्वादेवमर्हणंनतुममगौरवात्‌तर्हिकथंकंसादिषुमैत्रीतत्राह॥खला
नांदमश्चनैवाद्भुतमितिकुतःजगतःस्थितिर्धारणंरक्षणंपालनंतात्भ्यांसहतस्यनिःश्रेयसायतवायंस्वेच्छावतारइतिसुष्टुसम्यक्‌विग्रहः॥अतःखल
दमःसाधुसन्माननंयुक्तमितिभावः॥१९॥यदुक्तंमनोकिंकरवामेतितत्राह॥दृष्टमिति॥नकजनतायाअपवर्गरूपंकिंच॥अतिदुर्लभंनतयात्र

श्रीनारदउवाच॥॥नैवाद्भुतंत्वयिविभोखिललोकनाथेमैत्रीजनेषुसकलेषुदमःखलानां॥निःश्रेयसायहिजगतस्थिति
रक्षणाभ्यांस्वैरावतारउरुगायविदामसम्यक्‌॥१७॥दृष्टंतवांघ्रियुगलंजनतापवर्गंब्रह्मादिभिर्हृदिविचिंत्यमगाध
बोधैः॥संसारकूपपतितोत्तरणावलंबंध्यायंश्चराम्यनुगृहाणयथास्मृतिःस्यात्‌॥१८॥ततोन्यदाविशरूपेहंह्लप
त्न्याःसनारदः॥योगेश्वरेश्वरस्यांगयोगमायाविविस्मया॥१९॥द्विमंतमस्मैस्तत्रापिप्रियथाचोद्धवेनच॥पूजितःप
रयाभक्त्याप्रत्युत्थानासनादिभिः॥२०॥दृष्टश्चाविदुषेवासौकरायातोन्नवानिति॥क्रियतेकिंनुपूर्णानामपूर्णै
रस्मदादिभिः॥२१॥अथापिब्रूहिनोब्रह्मन्जन्मैतच्छोभनंकुरु॥सतुविस्मितउत्थायतूर्णमन्यदगाद्गृहं॥२२॥
तत्राप्यचष्टगोविंदंलालयंतंसुतान्शिशून्‌॥ततोन्यस्मिन्गृहेपश्यन्मज्जनायकृतोद्यमं॥२३॥ ॥ ॥

ब्रह्मादिभिर्योगेश्वरैरपिहृदिविचिंत्य॥किंच॥संसारकूपेपतितानांउत्तरणायावलंबंआश्रयंएवंभूतंतवांघ्रियुगलंमयादृष्टंअतःकृ
तोस्मि॥तथापित्वत्स्मृतिर्यथास्यात्तथानुगृहाण॥ततस्त्वध्यायन्नेवविचरामीति॥१७॥१८॥अस्मैहीमंतमित्यादौदद्रौतिज्ञातव्यम्‌॥२०॥२१॥२२॥२३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ ठ॰
५४

वितानाग्नीनाह्वनीयादीनग्नीन्होत्रेणपंचभिर्महायज्ञैर्यजंते॥२४॥२५॥२६॥२७॥२८॥२९॥३०॥३१॥कालेतत्रसमयेविधिनोपयापनंप्रापणंविवा
हमित्यर्थःकल्पयंतेघटयंतेविभूतिभिःविभवैः॥३२॥प्रस्थापनंदुहितृजामातादीनांस्वगृहान्नंदंप्रतिनयनंउपानयनंतज्जातस्तनरानयंतेतैर्महोत्सवान्कल्पयं
तउक्तंतंचवितानाग्नीनूपजंतेपंचभिर्मखैः॥भोजयंतंद्विजान्भक्त्यापितृन्ज्ञानमवज्ञोषिते॥२४॥कापिसंध्यामुपासीनंतंजनंपैत्रस्वबागृयतं॥ए
कत्रवासिचर्मासीनांचरंतमसिवर्त्मसु॥२५॥अश्वैर्गजैरथैःकापिविचरंतंगदाग्रजं॥कचिच्छयानंपर्यंकेस्तूयमानंचवंदिभिः॥२६
॥मंत्रयंतंचकस्मिंश्चिन्मंत्रिभिश्चोद्धवादिभिः॥जलक्रीडारतंकापिवारमुख्याबलावृतं॥२७॥कुत्रचिद्द्विजमुख्येभ्योददंतंगाःस्व
लंकृताः॥इतिहासपुराणानिशृण्वंतंमंगलानिच॥२८॥हसंतंहास्यकथयाकदाचित्प्रिययागृहे॥कापिधर्मंसेवमानमर्थकामौ
चकुत्रचित्॥२९॥ध्यायंतमेकमात्मानंपुरुषंप्रकृतेःपरं॥शुश्रूषंतंगुरून्कापिकामैर्भोगैःसपर्यया॥३०॥कुर्वंतंविग्रहंकैश्चित्संधिं
चान्यत्रकेशवं॥कुत्रापिसहरामेणचिंतयंतंसतांशिवं॥३१॥पुत्राणांदुहितॄणांचकालेविध्युपयापनं॥दारैर्वरैस्तत्सदृशैःकल्पयंतं
विभूतिभिः॥३२॥प्रस्थापनोपानयनैरपत्यानांमहोत्सवान्॥वीक्ष्ययोगेश्वरेशस्ययेषांलोकाविसिस्मिरे॥३३॥यजंतंसकलान्देवा सि
न्कवित्क्रतुभिरूर्जितैः॥पूर्तयंतंकचिद्धर्मंकूपारामालयादिभिः॥३४॥चरंतंमृगयांकापिहयमारुह्यसैंधवं॥घ्नंतंततःपशून्मेध्या
न्परीतंयदुपुंगवैः॥३५॥अव्यक्तलिंगंप्रकृतिष्वंतःपुरगृहादिषु॥कचिच्चरंतंयोगेशंतत्तद्भावबुभुत्सया॥३६॥अथोवाचहृषीकेशंनार मु
दःप्रहसन्निव॥योगमायोदयंवीक्ष्यमानुषीमीयुषोरतिं॥३७॥॥
तंयोगेश्वरेशस्य॥येषामपत्यानांमहोत्सवान्वीक्ष्यलोकाःसर्वेवि
सिस्मिरेविस्मयंचक्रुः॥तथाभूतान्कल्पयंतं॥३३॥३४॥३५॥अव्यक्तलिंगंवेषांतरेणाच्छन्नं॥३६॥३७॥ ॥

राम॰
५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे योगेश्वरस्वात्मन् स्वात्मनि ममस्ततसितवस्त्ररूपे वा निर्ज्ञाताः प्रतीतास्तव योगमायाः केवलं विरामविभ्रमः न तु लसरमार्थमिति ज्ञातः॥३६॥ त्वन्मानुष्य ना
अनेन सुह्रामित्रतो मां प्रस्थापयेत्याह अनुजानीहिति॥ तत्र स्मात्लोकत्रिक्षयन्निमं धर्मसंस्थितः न तु तत्वतः हे पुत्र माखिदमो हं माप्राप्नुहीति॥४०॥ इति
एवमनुगृहीतस्तमेकमेव संतं ददर्शेति॥४१॥ मुकुर्मुकुर्दृष्ट्वा जातकौतुको मुनिर्विस्मितो नन्दिदिति॥४२॥ अधितः श्रद्धायुक्तः आत्मा यस्य तेन॥४३॥ नारद

विदाम योगमायास्ते दुर्दर्शा अपि मायिनां॥ योगेश्वरात्मन्निर्भाता भवत्पादनिषेवया॥ अनुजानीहि मां देव लोकांस्ते यशसाप्लुता
न् पर्यटामि तवोद्गायन्लीला भुवनपावनीः॥३७॥ ॥श्रीभगवानुवाच॥ ब्रह्मन्धर्मस्य वक्ताहं कर्त्ता तदनुमोदिता॥ तच्छिक्षयन्लोक
मिममास्थितः पुत्र माखिदः॥४०॥ ॥श्रीशुक उवाच॥ इत्याचरंतं सद्धर्मान्पावनान्गृहमेधिनां॥ तमेव सर्वगेहेषु संतमेकं ददर्श ह॥
४१॥ कृष्णस्यानंतवीर्यस्य योगमायामहोदयं॥ मुहुर्दृष्ट्वा ऋषिरभूद्विस्मितो जातकौतुकः॥४२॥ इत्यर्थकामधर्मेषु कृष्णेन श्रद्धि
तात्मना॥ सम्यक्सभाजितः प्रीतस्तमेवानुस्मरन्ययौ॥४३॥ एवं मनुष्यपदवीमनुवर्त्तमानो नारायणोऽखिलभवाय गृहीतशक्तिः
॥ रेमेंग षोडशसहस्रवरांगनानां सव्रीडसौहृदनिरीक्षणहासजुष्टः॥४४॥ यानीह विश्वविलयोद्भववृत्तिहेतुः कर्माण्यनन्यविषयाणि हरि
श्चकार॥ यस्त्वंग गायति शृणोत्यनुमोदते वा भक्तिर्भवेद्भगवति ह्यपवर्गमार्गे॥४५॥ ॥इति श्रीभा॰ द॰ एकोनसप्ततितमोध्यायः॥ ॥६९॥॥

दृष्टं श्रीकृष्णलीलां तिप्रमयति॥ एवमिति अखिलस्य भवाय उद्भवाय गृहीताः शक्तयो नानामूर्त्तयो येन सः॥ सव्रीडं च तत्सौहृदं च तेन निरीक्ष
णं हासश्च तान्जुष्टः॥४४॥ अनन्यविषयाणि असाधारणानि अपवर्गमार्गे मोक्षप्रदे॥४५॥ ॥इति एकोनसप्ततितमोऽध्यायः॥ ॥६९॥॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततस्तु सप्ततितमे कृष्णस्याह्निककर्म्मणि॥ दूतनारदयोः कार्ये कार्यमंत्रविचारणे॥ १॥ जगन्मंगलचारित्रमाह्निकं जगदीशितुः॥ नारदेन च किंचि
द्दृष्टमाह॥ यथाक्रमं॥ २॥ इत्यर्थधर्मकामेषु तत्क्षणेन त्रयं विधितात्मनेति॥ प्रस्तुतस्य श्रीकृष्णाह्निकस्याधिकारेऽयं श्लोकः॥ उपवृत्तायामासन्नायामुषसि पतिभिः
श्रीकृष्णैः माधव्यो माधवस्य स्त्रियः॥ १॥ एवं विजनं च श्रीकृष्णं बोधयंतीव वयांसि पक्षिणोऽरोरुवन्॥ अतिशयेनाकूजन्॥ मंदारवनवायुभिर्निर्गायत्स्वलि
ष्वनिद्राणि वयांसि॥ २॥ वैदर्भीत्युपलक्षणं परिरंभणविश्लेषात्तत्पर्यालोच्य॥ ३॥४॥ एकमखंडं अत्र हेतुः॥ अनन्यं निरुपाधिं अतएवाव्ययं नित्यं स्वयंज्यो

श्रीशुक उवाच॥ ॥ अथोषस्युपवृत्तायां कुक्कुटान्कूजतोऽशपन्॥ गृहीतकंठ्यः पतिभिर्माधव्यो विरहातुराः॥ १॥ वयांस्यरोरुवन्कृ
ष्णं बोधयंतीव वंदिनः॥ गायत्स्वलिष्वनिद्राणि मंदारवनवायुभिः॥ २॥ मुहूर्त्तं तं तु वैदर्भी नामृष्यदतिशोभनं॥ परिरंभणविश्ले
षात्प्रियबाह्वंतरं गता॥ ३॥ ब्राह्मे मुहूर्त्त उत्थाय वार्युपस्पृश्य माधवः॥ दध्यौ प्रसन्नकरण आत्मानं तमसः परं॥ ४॥ एकं स्वयंज्योति
रनन्यमव्ययं स्वसंस्थया नित्यनिरस्तकल्मषं॥ ब्रह्माख्यमस्योद्भवनाशहेतुभिः स्वशक्तिभिर्लक्षितभावनिर्वृतिं॥ ५॥ अथाप्लु
तोंऽभस्यमले यथावि धि क्रियाकलापं परिधाय वाससी॥ चकार संध्योपगमादि सत्तमो हुतानलो ब्रह्म जजाप वाग्यतः॥ ६॥ ॥

तिष्ट्वे हेतुः॥ नित्यनिरस्तं कल्मषमविद्या यस्मात्तं उपलक्षणमाह॥ अस्येति विश्वस्य लक्षितो भावः सत्ता सौ निर्वृतिश्च याभ्यस्ताभिः शक्तिभिः एनं दध्यौ॥ तथाहि गुण
क्षोभात्पूर्वं सन्मात्रं यः स देवः सौम्येदमग्र आसीदित्यादिश्रुतेः॥ स एवानंदश्च विज्ञानमानंदमित्यादिश्रुतेः॥ तेसरानंदमित्यर्थः॥ आप्लुतः स्नातः
संध्याया उपगम्य उपासनं आदिर्यथा भवति तथा क्रियाकलापं चकार॥ कः एवंभूतः सत्तमः पूर्वमेव हुतानलः ब्रह्म गायत्रीं जजाप॥ ६॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कलाः अंशान् देवान् ऋषीन् पितॄंश्च तर्पयित्वा ॥७॥ गृष्टीनां प्रथमप्रसूतानां ॥८॥ वद्धमिति हिरण्येन परिवृतान् कृष्णान् शुक्लदतो मृगान् मस्मारेन रतो द-
दान्तुतं बध्नाति सप्रचेति मुमुक्षुकानि सन्तोऽन्नरत्नं बध्नात्येकीकृत्य पुराणे चतुर्दशलक्षेण गणितानि ॥ यथोक्तं नरतमेवाभिहत्य नवमस्कंधे मृगान् शुक्ल-
दतः कृष्णान् सुवर्णेन परिष्कृतान् ॥ अष्टाकर्माणि मस्मारेनि सुतानि चतुर्दशेति ॥ ततश्चैवं बध्नं संख्याश्लोकेन संगृह्यते ॥ चतुर्दशानां लक्षाणां सप्ताधिक

उपस्थायार्कमुद्यंतं तर्प्पयित्वात्मनः कलाः ॥ देवानृषीन्पितॄन्वृद्धान्विप्रानभ्यर्च्य चात्मवान् ॥७॥ धेनूनां रुक्मशृंगीणां साध्वीनां मौक्ति-
कस्रजां ॥ पयस्विनीनां गृष्टीनां सवत्सानां सुवाससां ॥८॥ ददौ रूप्यखुराग्राणां क्षौमाजिनतिलैः सह ॥ अलंकृतेभ्यो विप्रेभ्यो बद्धं बद्धं दिने दि-
ने दिने ॥९॥ गोविप्रदेवतावृद्धगुरून्भूतानि सर्वशः ॥ नमस्कृत्यात्मसंभूतीर्मंगलानि समस्पृशत् ॥१०॥ आत्मानं भूषयामास नरलो-
कविभूषणं ॥ वासोभिर्भूषणैः स्वीयैर्दिव्यस्रगनुलेपनैः ॥११॥ अवेक्ष्याज्यं तथादर्शं गोवृषद्विजदेवताः ॥ कामांश्च सर्ववर्णानां पौरांतःपुरचा-
रिणां ॥१२॥ प्रदाप्य प्रकृतीः कामैः प्रतोष्य प्रत्यनंदत ॥१२॥ संविभज्याग्रतो विप्रान्स्रक्तांबूलानुलेपनैः ॥ सुहृदः प्रकृतीर्दारानुपायुंक्त त-
तः स्वयं ॥१३॥ तावत्सूत उपानीय स्यंदनं परमाद्भुतं ॥ सुग्रीवाद्यैर्हयैर्युक्तं प्रणम्यावस्थितोऽग्रतः ॥१४॥ गृहीत्वा पाणिना पाणी सारथेस्त-
मथारुहत् ॥ सात्यक्युद्धवसंयुक्तः पूर्वाद्रिमिव भास्करः ॥१५॥॥

शतांशकः ॥१७०८४॥ चतुरशीत्यग्रसहस्राणि त्रयोदशेति ॥ दिने दिने प्रतिगृहं
चेति ॥९॥ आत्मसंभूतीः स्वविभूतीः मंगलानि कपिलादीनि ॥१०॥ नरलोकस्य विभूषणरूपमात्मानं ॥ स्वीयैः पीतांबरकौस्तुभादिभिः ॥११॥ कामानभिल-
षितार्थान् ॥१२॥ विप्रादीन् स्रक्ताम्बूलादिभिः संविभज्य तेभ्यः तानि दत्वेत्यर्थः ॥ उपायुंक्त भोगार्थमग्रहीत् ॥१४॥ पाणी कृतेंजलौ गृहीत्वा ॥१५॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा॰ द॰ उ॰ ५६ सत्रीडप्रेमवीक्षितैरीक्षितः क्षणं स्थितस्ताभिरेववीक्षितैः हृच्छुद्धिसृष्टेनिरगादिति ॥१६॥ एवं सर्वगृहेभ्यः पृथक्पृथग्विनिर्गत्यानंतरं एकएवसन्सुधर्मां
प्राविशत् ॥ यन्निविष्टानांयत्प्रविष्टानां ॥१७॥ नृसिंहैः नृपुंगवैः ॥१८॥ उपमंत्रिणः परिहासकाः पृथक्पृथक्स्वसमुदायैः ॥१९॥ मृदंगारवः प्र

ईक्षितोंतःपुरस्त्रीणां सत्रीडप्रेमवीक्षितैः ॥ हृच्छुद्धिसृष्टोनिरगाज्जातहासोहरन्मनः ॥१६॥ सुधर्माख्यंसभांसर्वैर्वृष्णिभिः परिवारि
तः ॥ प्राविशद्यन्निविष्टानांनसंत्यंगषडूर्मयः ॥१७॥ तत्रोपविष्टः परमासनेविभुर्बभौस्वभासाककुभोऽवभासयन् ॥ वृतोनृसिं
हैर्यदुभिः ॥ यदूत्तमोयथोडुराजोदिवितारकागणैः ॥१८॥ तत्रोपमंत्रिणोराजन्नानाहास्यरसैर्विभुं ॥ उपतस्थुर्नटाचार्यानर्तक्य
स्तांडवैः पृथक् ॥१९॥ मृदंगवीणामुरजवेणुतालदरस्वनैः ॥ ननृतुर्जगुस्तुष्टुवुश्चसूतमागधवंदिनः ॥२०॥ तत्राहुर्ब्राह्मणाः
केचिदासीनाब्रह्मवादिनः ॥ पूर्वेषांपुण्ययशसांराज्ञांचाकथयन्कथाः ॥२१॥ तत्रैकः पुरुषोराजन्नागतोपूर्वदर्शनः ॥ विज्ञा
पितोभगवतेप्रतीहारैः प्रवेशितः ॥२२॥ सनमस्कृत्यकृष्णायपरमेशायप्रांजलिः ॥ राज्ञामावेदयद्दुःखंजरासंधनिरोधजम् ॥
२३॥ येचदिग्विजयेतस्यसन्नतिंनययुर्नृपाः ॥ प्रसह्यरुद्धास्तेनासन्नयुतेद्वेगिरिव्रजे ॥२४॥ कृष्णकृष्णाप्रमेयात्मन्प्रपन्नभयभंजन
जन ॥ वयंत्वांशरणंयामोभवभीताः पृथग्धियः ॥२५॥ ॥

सिंधादरः शंखः सूतादयस्तुष्टुवुः ॥२०॥ ब्राह्मणाः ब्रह्मवेदमाकुर्वंत्रानूच्यानश्च स
तेतस्पर्धः ॥ वादितः वदनचतुराः ॥२१॥२२॥२३॥ गिरिव्रजेतत्संज्ञके दुर्गेतेरुद्धाश्चासन् तेषांचदुःखमावेदयदित्युत्तरः ॥२४॥ श्रीकृष्णकृष्णेतिराज्ञांषट्
श्लोकीविज्ञप्तिः ॥ तत्रप्रथमेनशरणाश्रयणं द्वितीयेनयानुवादः ॥ कामंप्रार्थनमिति ॥२५॥ ॥ राम॰ ५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृथग्दर्शिनो लोकस्य व्यसनं यं विष्ट एवं ततो न मंति लोक इति। विकर्म निषिद्धं काम्यं च तस्मिन्निरतः। रतः स्वे कुर्वाणे धर्मे न भवतो ऽर्चने॥ तथोदितं उक्तं पंचरा
त्रे सामान्यतश्चागीतासु॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति॥ प्रमत्तो ऽनवहितो मा बद्धे यो लोक
स्तावद्वेवास्य यः सद्यो जीविताशां छिनत्ति तस्मै तुभ्यं अनिमिषाय कालात्मने नमः इति॥२६॥ सेयं लोकस्य गतिः वयं तु नृकाः अतो ऽस्माकं कृत एव
दुःखमापन्नमित्याश्चर्येणाहुः लोक इति चो इत्यादि गतः इनः ईश्वरः त्वयि सद्रक्षणार्थं भवति ऽर्पि चेदस्माकं दुःखं स्यात् तर्हि किमन्यः कश्चित् आह

लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे॥ यस्तावदस्य बलवानिह जीविताशां सद्यश्छि
नत्त्यनिमिषाय नमो ऽस्तु तस्मै॥२६॥ लोके न वा न जगदितः कलयावतीर्णः सद्रक्षणाय खलनिग्रहणाय चान्यः॥ क
श्चित्त्वदीयमतियाति निदेशमीशः किं वा जनः स्वकृतमृच्छति तन्न विद्मः॥२७॥ स्वप्नायितेन नृपसुखं परतंत्रमीश श
श्वद्भयेन मृतकेन धुरं वहामः॥ हित्वा तदात्मनि सुखं त्वदनीहलभ्यं क्लिश्यामहे ऽतिकृपणास्तव माययेह॥२८॥ ॥

संधादिस्तदाज्ञामपि लंघयति किंवा त्वया रक्ष्यमाणो ऽपि जनः स्वकर्मजं दुःखं प्राप्नोत्येवेति न विद्मः॥ न चैतदनुपपन्नमुक्तमिति भावः॥२७॥ किं दुः
खं तदाह दुःस्वप्नायितमिति स्वप्नवज्ज्ञातेन नृपसुखं नृपोचितं सुखं यतः परतंत्रं विषयसाध्यं किंच॥ कीसंप्रति शश्वद्भयं यस्मिंस्तेन मृततुल्येन शरीरे
ण धुरं पुत्रदारादिचिंतां केवलं वहामः॥ अहो कष्टं कृपेव यमितः पूर्वमेव निःकामाः संतः त्वां नाश्रिता इत्याहुः॥ हित्वेति त्वदनीहयत॥ अनीहैः
लभ्यं आत्मनि स्वतः सिद्धं सुखं तद्धित्वा क्लिश्यामः॥२८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰

५७

तन्मा प्रयाहृतं कर्मबंधं त्वमेव निवारयेति प्रार्थयंते तत्त्र इति विमुंचस्व विमोचय मगधो जरासंधः तत्संज्ञकात्कर्मपाशात् तत्र वह्निरेव विक्रम्य ततो निर्ग
म्यतामिति चेत् तत्राह कः प्रभवति॥ य एक एवासुतमतंगजानां वीर्यं बिभ्रत्॥ स त्वं स्वभवने त्युचु जोऽस्मान् रुरोध सिंहो मेषीरिव॥२१॥ किंच युष्मदीयावय
मित्यस्मान्नाधिकं बाधत इत्याह कुर्यो वा इति हे उ रात्र चक्र उद्यत सुदर्शन॥ यो वै द्विनवकृत्वः अष्टादश वारान् त्वया सह मृधे वर्त्तमाने तत्र संप्रदशाहृतः॥ त्वया
तद्योत्नवानभग्न तत्रैक हरांघ्रियुग्मो बधात्विमुं स्व मगधाक्ष्यकर्मपाशात्॥ यो भूभुजो सुतमतंगजवीर्यमेको बिभ्रद्रुरोध
भवने मृगराडिवावीः॥२२॥ यो वै त्वया द्विनवकृत्व उदात्तचक्र भग्नो मृधे खलु भवंतमनंतवीर्यं॥ जित्वा नृलोकनिरतं स
कृदूढदर्पो युष्मत्प्रजा रुजति नो जित तद्विधेहि॥२३॥ इति मागधसंरुद्धा भवद्दर्शनकांक्षिणः॥ प्रपन्ना पादमूलं ते दीनानां
शं विधीयतां॥२४॥ राजदूते ब्रुवत्येवं देवर्षिः परमद्युतिः॥ बिभ्रत्पिंगजटाभारं प्रादुरासीद्यथा रविः॥२५॥ तं दृष्ट्वा भगवान्कृ
ष्णः सर्वलोकेश्वरेश्वरः॥ ववंद उत्थितः शीर्ष्णा ससभ्यः सानुगो मुदा॥ सभाजयित्वा विधिवत्कृतासनपरिग्रहं॥ बभाषे सू
नृतैर्वाक्यैः श्रद्धया तर्पयन्मुनिं॥२७॥ अपिस्विदद्य लोकानां त्रयाणामकुतोभयं॥ ननु भूयान्भगवतो लोकान्पर्यटतो गु
णः॥२८॥ नहि ते विदितं किंचिल्लोकेष्वीश्वरकर्तृषु॥ अथ पृच्छामहे युष्मान्पांडवानां चिकीर्षितं॥२९॥ ॥ स्व लुत्रस्तः पराजितः पश्चा
दनंतवीर्यमपि नृलोके निरतं नरशरीरं बिनोदं भगवंतं स कृज्जित्वा ऊढः दर्पः प्राप्तगर्वो युष्मत्प्रजा नः रुजति पीडयति तत्रत्रय युक्तं तद्विधेही स
र्थः॥२०॥ हृतं व्याहृ दृतीति॥२१॥२२॥२३॥२४॥ नृपान्महागुणो लोकानां नो अस्माकं यः सर्वलोकहत्त्वं तज्ज्ञानमिति॥ ईश्वरः कर्त्तारो येषां तेषु॥२५॥२६॥ ॥

राम॰

५८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमविदुषेव सर्वज्ञेन जरासंधवधार्थमेव पांडवचिकीर्षितं पृष्टो नारदो मायेयमिति ज्ञात्वा हृष्टः इति निर्निः॥ विश्वसृजश्च ब्रह्मणोपि मायिनो द
कस्यापि स्वशक्तिभिर्विद्यादिभिर्भूतेषु चरतो अन्तर्यामितया चरतो वर्तमानस्य॥ यद्यहं भूतेषु वर्तेतर्हि भूतानि मां किं न पश्यंति तत्राह वह्नेरिव छन्नरुच इति स्वशक्तिभि
रेव छन्ना रुक् प्रकाशो यस्य तस्य॥ अतस्त्ववेदं प्रश्नादि न मेद्भुतं॥ ३७॥ इदं जगत्कथंभूतं॥ असदेव यत्तवमायया विद्यमानात्मतयावभासते तत्कगरूज

नारद उवाच॥ ॥ दृष्टा मया ते बहुशो दुरत्यया माया विभो विश्वसृजश्च मायिनः॥ भूतेषु भूमंश्चरतः स्वशक्तिभिर्वह्नेरिव छ
न्नरुचो न मेद्भुतं॥ ३७॥ तवेहितं कोर्हति साधु वेदितुं स्वमाययेदं सृजतो नियच्छतः॥ यद्विद्यमानात्मतयावभासते तस्मै
नमस्ते स्वविलक्षणात्मने॥ ३८॥ जीवस्य यः संसरतो विमोक्षणं न जानतो नर्थवहाच्छरीरतः॥ लीलावतारैः स्वयशःप्रदी
पकं प्राज्वालयत्त्वां तमहं प्रपद्ये॥ ३९॥ अथाप्याश्रावये ब्रह्म नरलोकविडंबनम्॥ राज्ञः पैतृष्वस्रेयस्य भक्तस्य च चि
कीर्षितं॥ ४०॥ यक्ष्यति त्वां महेंद्रेण राजसूयेन पांडवः॥ पारमेष्ठ्यकामो नृपतिस्तद्भवाननुमोदतां॥ ४१॥ ॥

तः किं तु केवलं तेतु सं नमनमेव शक्यमित्याह तस्मै नम इति कुतः स्वेन स्वरूपेण सर्वतो विलक्षणात्मने अविसायेत्यर्थः॥ ३८॥ ननु एवं भूतस्य किं मायया चे
ष्टितैरित्यत आह॥ जीवस्येति॥ अविद्यतमसा वृतत्वेन अनर्थप्रापकाच्छरीरात् संसरतः स्वेनैव तमसा तस्माच्छरीरादि मोक्षोपायं जानतः प्राज्वालयत् शरीरदीपी म
तवान् तं त्वा त्वां यशःश्रवणादिभिर्जीवस्य मोक्षार्थमित्यर्थः॥ ३९॥ आश्रावये आश्रावयिष्यामि नरलोकविडंबनं ब्रह्मन्निति पाठेपि हे ब्रह्मन् परमात्मन् न
रलोकानुकारिणं त्वां आश्रावयिष्यामी॥ ४०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰ तचात्रैवोतुभोरतेनकार्यंकिंतुतत्रागंतव्यमित्याशयेनाह॥तस्मिन्निति॥४२॥तत्रागताश्चसर्वेवैखदर्शनादिनापूतान्भविष्यंतीत्याहश्रवणादिति॥श्रं
तेवसायिनःश्वपचाअपित्वल्लमयंस्पर्शस्पर्थनमूर्तेः॥ईशात्वत्रभिमर्शनंस्पर्शचंचतेविद्यतेयेषांते॥४३॥केसुत्समतिशयेनाहयस्येतिहेभुवनानांमं
५९ गलरूपदिविपातालेभूमौचप्रथितंयस्ययशोविश्वंपुनाति॥कथंप्रथितंतदिदिक्षितानंदिग्भवनानांवितानवदलंकरणंतथाचरणांबुचप्रथितंपुना

तस्मिन्देवक्रतुवरेभवंतंवैसुरादयः॥दिदृक्षवःसमेष्यंतिराजानश्चयशस्विनः॥श्रवणात्कीर्तनाध्यानात्पूयंतेते
वसायिनः॥तवब्रह्ममयस्येशकिमुतेक्षाभिमर्शिनः॥४३॥यस्यामलंदिविवशःप्रथितंरसायांभूमौचतेभुवनमंग
लदिग्वितानं॥मंदाकिनीतिदिविभोगवतीतिचाधोगंगेतिचेहचरणांबुपुनातिविश्वं॥४४॥ ॥श्रुकउवाच॥ ॥तत्रते
ष्वात्मपक्षेष्वगृह्णत्सु [illegible] जिगीषया॥वाचःपेशैःस्मयन्भृत्यमुद्धवंप्राहकेशवः॥४५॥त्वंहिनःपरमंचक्षुःसुहृन्मं
त्रार्थतत्ववित्॥तथात्रब्रूह्यनुष्ठेयंश्रद्दध्मःकरवामतत्॥४६॥इत्युपामंत्रितोभर्त्रासर्वज्ञोपिमुग्धवत्॥निदेशंशिर राम॰
साधायउद्धवःप्रत्यभाषत॥४७॥ ॥इतिभागवतेमहापुराणेदशमस्कंधेभगवद्यानेसप्ततितमोऽध्यायः॥७०॥ ॥ ५९

तिकथंतत्प्रथितंदिविमंदाकिनीतिअधश्चभोगवतीतिइहचभूमौगंगेति॥तस्यतवागमनात्सर्वंमंगलंपवित्रंचभविष्यतीतिभावः॥४४॥तत्रैवंना
रदेनोक्तेतेषुतत्रवर्तमानेषुआत्मीयपक्षेषुपादयेषुजरासंधस्यजिगीषयाग्रहणंसुअमन्यमानेषुवाचःपेशैःपेशलवाग्भिरित्यर्थः॥४५॥
चक्षुर्दृष्टिहेतुःमंत्रार्थानांमंत्रसाध्यानांतत्वंवितत्परिपाकवेदिता॥४६॥ ४७॥ ॥इतिश्रीसप्ततितमः॥७०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथैकस्मिन्प्रतीत मे उद्धवस्य तु मंत्रतः॥ इंद्रप्रस्थं गते कृष्णे पार्थानां परमोत्सवैः॥१॥ राजसूयमिषं कृत्वा भीमदुर्योधनादिषु॥ कलिमुत्पादयतश्चारणन्नारस
हरत्नगुः॥२॥ देवर्षेर्मतं राजसूयगमनं तस्मान्नोमतं राजरक्षा कृष्णस्य तु नयं॥१॥ यस्यतः यागं करिष्यतः॥ पैतृष्वस्त्रेयस्य पितृष्वसुः पुत्रस्य साचिव्यं स
हाय्यं तच्च कार्यं तथा शरणार्थीनां राज्ञां रक्षा च कार्या॥२॥ तत्र प्रथमं राजसूयार्थं गतं॥ ततो राजरक्षा कर्तव्येत्याह यष्टुमित्यष्टभिः॥ अतः
दिग्विजय हेतोः उन्नयार्थः राजसूयार्थः॥ शरणागतरक्षणार्थश्च॥२॥४॥ श्रुत्वा सुकतयासद्यःख जरासंधं हंतुमिच्छतो यादवानालक्ष्याह॥ सर्वा इ
श्रीशुक उवाच॥ इत्युदीरितमाकर्ण्य देवर्षेरुद्धवोऽब्रवीत्॥ सभ्यानां मतमाज्ञाय कृष्णस्य च महामतिः॥१॥ ॥उद्धव उवाच॥ ॥यदु
क्तमृषिणा देव साचिव्यं यक्ष्यतस्त्वया॥ कार्यं पैतृष्वस्त्रेयस्य रक्षा च शरणैषिणां॥२॥ यष्टव्यं राजसूयेन दिक्चक्रजयिना विभो॥ अ
तो जरासुतजय उभयार्थो मतो मम॥३॥ अस्माकं च महानर्थो ह्येतेनैव भविष्यति॥ यशश्च तव गोविंद राज्ञो बद्धान्विमुंचतः॥४॥
स वै दुर्विषहो राजा नागायुतसमो बली॥ बलिनामपि चान्येषां भीमं समबलं विना॥५॥ द्वैरथे स तु जेतव्यो मा शताक्षौहिणीयुतः॥ ब्रह्म
ण्योऽभ्यर्थितो विप्रैर्न प्रत्याख्याति कर्हिचित्॥६॥ ब्रह्मवेषधरो गत्वा तं भिक्षेत वृकोदरः॥ हनिष्यति न संदेहो द्वैरथे तव सन्निधौ॥७॥
ति अन्येषां ततो बलिनामपि यद्यपि समबल एव भीमस्तथापि तं विना भीमादेव तस्य मृत्युर्विहित इति भावः॥५॥ ननु स्वबलसाम्येपि सेनाबलं तस्या
धिकमिति चेदत आह द्वैरथ इति द्वंद्वयुद्धे न्याते नाक्षौहिणी नियुतो माभिजेतव्य इत्यर्थः॥ न तु सोऽस्वसैन्यमेव युद्धाय नियुंजीत अत स्त्रे न दैवयमिति
तत्राह॥ ब्रह्मण्य इति॥ न प्रत्याख्याति भिक्षेत द्वंद्वयुद्धं याचेत तां तथापि समबलत्वाच्छाम्यसे कस्मादत आह तव संनिधाविति॥७॥

गधो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰
५९

नं२ स

ननु च किंचित्कुर्वतो मम संनिधानात्किं स्यादत आह॥ निमित्तमिति॥ अयमर्थः॥ यथा तवारूपस्य कालात्मनो विश्वसर्गे निमित्तं केवलं हिरण्यगर्भस्तथा श-
र्वश्च तन्निरोधे तथा त्वमेव सन्निधिमात्रेण हंतानीमो निमित्तमौमिति॥ ९॥ अतो तेनोपायेन त्वया सन्नीध्रं हंतव्य इत्याशयेनाह गायंतीति जरासंध धृ-
तानां राज्ञां देव्यः पत्न्यः ते विशदं कर्म स्वगृहे षु बालकलालनादौ गायंति॥ किं तत्कर्म स्वशत्रोर्जरासंधस्य वधं आत्मनां पतीनां विमोक्षणं च एवं समारो-
दीः श्रीकृष्ण एवं करिष्यतीति॥ अत्र दृष्टांताः॥ गोप्यश्चेत्यादयः॥ यथा गोप्यः शंखचूडवधं स्वमोक्षणं च गायंति तेष्ववतारांतरगतं च कुंजरपतेर्नक्रा-

निमित्तं परमीशस्य विश्वसर्गनिरोधयोः॥ हिरण्यगर्भः शर्वश्च कालस्यारूपिणस्तव॥ ९॥ गायंति ते विशद
कर्म गृहेषु देव्यो राज्ञां स्वशत्रुवधमात्मविमोक्षणं च॥ गोप्यश्च कुंजरपतेर्जनकात्मजायाः पित्रोश्च लब्धश-
रणा मुनयो वयं च॥ १०॥ जरासंधवधः कृष्ण भूर्यर्थायोपकल्पते॥ प्रायः पाकविपाकेन तव चाभिमतः
क्रतुः॥ ११॥ इत्युद्धववचो राजन् सर्वतोभद्रमच्युतम्॥ देवर्षिर्यदुवृद्धाश्च कृष्णश्च प्रत्यपूजयत्॥ १२॥ ॥

त्वं जनकात्मजायाश्च रावणात् पित्रोश्च कंसगृहान्मोक्षं॥ अत एवं भूतानां तासां कृपया त्वया तथैव कर्तव्यमिति भावः॥ १०॥ किंच जरासंधवध इति॥
भूर्यर्थायेति॥ ततः शिशुपालवधादयोऽपि सुखसाध्या भविष्यंतीति भावः॥ एतच्च सर्वं त्वविघ्नेनैवेति स्वभावपन्नाह प्रायः इति पच्यत इति पाकः कर्म-
तस्य विपाकः फलं तेन राज्ञां पुण्यविपाकेन जरासंधादीनां पापविपाकेन पाकांतरे जरासंधस्य पापविपाकेनेति तेनायं क्रतुस्तवाभिप्रेतः॥ तन्न गते
त्वयि सर्वं भविष्यतीत्यर्थः॥ ११॥ अच्युतं उपपत्त्या हृष्टं यदुवृद्धा इति वदन्तं निरुधादयस्तथा न पूजयन्निति स्पष्टमिति॥ १२॥ ॥

राम॰
५९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुज्ञाप्यानुज्ञां प्राप्य॥ गुरून् वसुदेवादीन्॥१२॥ अवरोधान् दारान् निर्गमय्य प्रयाणं कारयित्वा॥१३॥ भटाः पदातयः सादिनः अश्वारोहाः॥ रथादि
नायकैः॥ करालया तीव्रया आत्मसेनया परिवृतो निराक्रमत् निरगात्॥ कुतः सकाशात् मृदंगादिभिर्नादैः॥ प्रघोषेण घोषितायाः ककुभः॥१४॥ नवा
जीति॥ नरयानैः अश्वैः कांचनशिबिकाभिश्चाच्युतं पतिमनुययुः सुव्रताः वराणि अंबरादीनि यासां ताः॥१५॥ नरोष्ट्रादिभिर्यानैः॥ अश्वतरीगर्द्दभांश्च

अथादिशत्प्रयाणाय भगवान् देवकीसुतः॥ नृत्यान् दारुकजैत्रादीननुज्ञाप्य गुरून्विभुः॥१२॥ निर्गमय्यावरोधान् स्वान्
ससुतान् सपरिच्छदान्॥ संकर्षणमनुज्ञाप्य यदुराजं च शत्रुहन्॥१३॥ सूतोपनीतं स्वरथमारुहद्गरुडध्वजः॥१३
॥ ततो रथद्विपभटसादिनायकैः करालया परिवृत आत्मसेनया॥ मृदंगभेर्यानकशंखगोमुखैः प्र घोषितककु
भो निराक्रमत्॥१४॥ नृवाजिकांचनशिबिकाभिरच्युतं सहात्मजाः पतिमनु सुव्रता ययुः॥ वरांबराभरणविलेपनस्र
जः सुसंवृता नृभिरसिचर्मपाणिभिः॥१५॥ नरोष्ट्रगोमहिषखराश्वतर्यनःकरेणुभिः॥ परिजनवारयोषितः॥ स्वलंकृ
ताः कटकुटिकंबलांबराद्युपस्करा ययुरधियुज्य सर्वतः॥१६॥ बलं बृहद्ध्वजपटछत्रचामरैर्वरायुधाभरणकिरीट
वर्म्मभिः॥ दिवांशुभिस्तुमुलरवं बभौ रवेर्यथार्णवः क्षुभिततिमिंगिलोर्मिभिः॥१७॥ ॥

कता॥ अनः शाकटं करेणुर्गजी परिजन
मे योषितो। वारयोषितश्च कटकुटयः उष्ट्रीरादितृणनिर्मितगृहाः कंबलांबरादयश्चोपस्काराः कुट्यादिरूपा यासां ताः॥ अधियुज्य बलीवर्दादि
मेषु तान् उपस्करान् वहनेषु संभृत्य॥१६॥ बले दिवांशुभिः शस्त्रादिकिरणैः बलादिवाबभौ कथंभूतं तुमुलश्चाकुलस्वनं क्षुभितैस्तिमिंगिलैः ऊर्म्मिभिः॥१७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰ मुनिर्नारदो विहायसा यथाविविति शेषः ॥१८॥ मानैश्चेति बकुत्वं राजा निर्माये ण ॥१९॥ प्रसैसैक्षत ॥ प्रत्यैक्षंत ॥ यद्यस्मान्मुमुक्षवः ॥२०॥ आनर्त्तार्द्द योमा
र्गस्थादेशाः ॥ तीर्त्वा ऽतिक्रम्य विनशनं कुरुक्षेत्रमतीयाय अत्यतिक्रम्य पयौ ॥२१॥ शक्रप्रस्थं इंद्रप्रस्थं ॥२२॥२३॥ प्राणं द्विधाणि प्राणं मुखं प्राण

६०

अथो मुनिर्यदुपतिनासनाजितः प्राणमप्यंतं हृदि विदधद्विहायसा ॥ निशाम्यतद्व्यवसितमाहृताहर्णो मुकुंदसंदर्शननिर्वृतेंद्रियः ॥ रा
जाहूतमुवाचेदं भगवान्प्रीणयन्गिरा ॥ माचेष्टं हृत्सनं वो धातपिष्मा मिमागधं ॥१९॥ इत्युक्तः प्रस्थितो हृतो यथावद्दवदन्नपान्
॥ तेपि संदर्शनं शौरेः प्रत्यैक्षंत यन्मुमुक्षवः ॥२०॥ आनर्त्तसौवीरमरूंस्तीर्त्वा विनशनं हरिः ॥ गिरीन्नदीरतीयाय पुरग्रामव्रजाक
रान् ॥२१॥ ततो र षद्वतीं तीर्त्वा मुकुंदोथ सरस्वतीं ॥ पंचालानथ मत्स्यांश्च शक्रप्रस्थमथागमत् ॥ तमुपागतमाकर्ण्य प्रीतो दु
र्दर्शनं नृणां ॥ अजातशत्रुर्निरगात्सोपाध्यायः सुहृद्वृतः ॥२२॥ गीतवादित्रघोषेण ब्रह्मघोषेण भूयसा ॥ अभ्ययात्स हृषीकेशं प्राणाः
प्राणमिवादृताः ॥२४॥ दृष्ट्वा विक्लिन्नहृदयः कृष्णं स्नेहेन पांडवः ॥ चिराद्दृष्टं प्रियतमं सस्वजेथ पुनः पुनः ॥२५॥ दोर्भ्यां परिष्वज्य रमामला ए म॰
लयं मुकुंदगात्रं नृपतिर्हताशुभः ॥ लेभे परां निर्वृतिमश्रुलोचनो हृष्यत्तनुर्विस्मृतलोकविभ्रमः ॥२६॥ तं मातुलेयं परिरभ्य निर्वृतो भीमः स्म
यन्प्रेमजवाकुलेंद्रियः ॥ यमौ किरीटी च सुहृत्तमं मुदा प्रवृद्धबाष्पाः परिरेभिरेच्युतं ॥२७॥ अर्जुनेन परिष्वक्तो यमाभ्यामभिवादितः ॥ ब्रा ६०
ह्मणेभ्यो नमस्कृत्य वृद्धेभ्यश्च यथार्हतः ॥२८॥ मानितो मानयामास कुरुसृंजयकैकयान् ॥ सूतमागधगंधर्वा वंदिनश्चोपमंत्रिणः ॥ २९॥

मिवः ॥२४॥ सस्वजे परिरेभे ॥२५॥ रमाया आश्रमं लं निर्दोषमालैं विस्मृतो लोकविभ्रमो लोकव्यवहारो येन सः ॥२६॥२७॥ अर्जुनेन सख्यात्स
रिष्वक्त एव केवलं पादौ नमस्कुर्वन्नर्जुनः कृष्णेन स्वजातो धृत इति भावः ॥ यमाभ्यां तु अभिवादितश्चेति ॥२८॥२९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२०॥२१॥ चित्रध्वजादिभिर्विराजमानं ॥२२॥ प्रतिसद्म उद्दीपैर्बलिभिः पुष्पादिप्रकरैश्चं जुष्टं ॥ जालेभ्यो गवाक्षेभ्यो निर्गतैर्धूपैः रुचिरं विलसत्सः पताका
यस्मिन्नत ॥ मूर्धन्याः मूर्ध्नि नवाः हेमकलशा येषां तैः ॥ रजतमयानि रूप्यमयानि उरूणि स्थूलानि शृंगाणि कलशाधस्तनभूमिका येषां तैर्नवैः तैर्जुष्टं कुरु
मिर
मृदंगसंखपटहवीणापणवगोमुखैः ॥ ब्राह्मणाश्चारविंदाक्षं तुष्टुवुर्नर्तनतुर्जगुः ॥३०॥ एवं सुहृद्भिः पर्यस्तः पुण्यश्लोकशिखामणिः ॥
संस्तूयमानो भगवान्विवेशालंकृतं पुरं ॥३१॥ संसिक्तकर्मकरिणा मदगंधतोयैश्चित्रध्वजैः कनकतोरणपूर्णकुंभैः ॥ मृष्टात्मभिर्न
वदुकूलविभूषणस्रग्गंधैर्नृभिर्युवतिभिश्च विराजमानं ॥३२॥ उद्दीप्तदीपबलिभिः प्रतिसद्मजालनिर्यातधूपरुचिरं विलसत्पताकं ॥
मूर्धन्यहेमकलशै रजतोरुशृंगैर्जुष्टं ददर्श भवनैः कुरुराजधाम ॥३३॥ प्राप्तं निशम्य नरलोचनपानपात्रमौत्सुक्यविश्लथितकेशदु
कु कूलबंधाः ॥ सद्यो विसृज्य गृहकर्म पतींश्च तल्पे द्रष्टुं ययुर्युवतयः स्म नरेंद्रमार्गे ॥३४॥ तस्मिन्सुसंकुलइभाश्वरथद्विपद्भिः ॥ कृष्णं सभा
र्यमुपलभ्य गृहाधिरूढाः ॥ नार्यो विकीर्य कुसुमैर्मनसोपगुह्य सुस्वागतं विदधुरुस्मयवीक्षितेन ॥३५॥ ऊचुः स्त्रियः पथि निरीक्ष्य
मुकुंदपत्नीस्तारा यथोडुपसहाः किमकार्यमुष्य ॥ यच्चक्षुषां पुरुषमौलिरुदारहासलीलावलोककलयोत्सवमातनोति ॥
३६॥ तत्र तत्रोपसंगम्य पौरा मंगलपाणयः ॥ चक्रुः सपर्यां कृष्णाय श्रेणीमुख्या हतैनसः ॥३७॥ राजस्य धामप्रवरं ददर्श ॥२४॥
नराणां लोचनानि तेषां पानस्य सादरवीक्षणस्य पात्रं विषयं किंपुनर्नारीणामित्यर्थः ॥३४॥ सुष्ठु स्वागतं तत्पश्चादि कं प्रियमुस्मयवीक्षितेनैव विद
धुः ॥३५॥ उडुपसहाः चंद्रसहचरा इत्यर्थः ॥ अमूर्ति किंपुमण्यकारि ॥३६॥ श्रेण्यः एकशिल्पोपजीविनां संघाः तेषु मुख्याः ॥३७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा· द· उ· अभ्युपेतः अभिगमनेन सत्कृतः ॥ ३९ ॥ स तु पाञ्चौपदीसहिताः ॥ ४० ॥ कृतं प्रकारविशेषं प्रमोदेनोपहतो निवृत्तः ॥ गुरुस्त्री एवं कृष्णया द्रौपद्या
६१ भगिन्या सुभद्रया ॥ ४१ ॥ आनर्च अर्चितवती ॥ ४२ ॥ आत्मनाश्रयः कृष्णपत्न्यो मागताः ता अपि ॥ ४३ ॥ प्रस्पष्टं नवं नवं यथा भवति तथा सुखं निवासयामास

अन्तःपुरजनैः प्रीत्या मुकुन्दः फुल्ललोचनैः ॥ ससंभ्रमैरभ्युपेतः प्राविशद्राजमंदिरं ॥ ३८ ॥ पृथा विलोक्य भ्रात्रेयं कृष्णं त्रिभुवनेश्वरं ॥ प्री
तात्मोत्थाय पर्यंकात्सस्नु षा परिषस्वजे ॥ ३९ ॥ गोविंदं गृहमानीय देवदेवेशमादृतः ॥ पूजायां नाविदत्कृत्यं प्रमोदोपहतो नृपः
॥ ४० ॥ पितृष्वसुर्गुरुस्त्रीणां कृष्णश्चक्रेऽभिवादनं ॥ स्वयं च कृष्णया राजन्भगिन्या चाभिवंदितः ॥ ४१ ॥ श्वश्र्वा संचोदिता कृष्णा कृष्ण
पत्नीश्च सर्वशः ॥ आनर्च रु क्मिणीं सत्यां भद्रां जांबवतीं तथा ॥ ४२ ॥ कालिंदीं मित्रविंदां च शैब्यां नाग्नजितीं सतीं ॥ अन्याश्चाभ्याग
ताया स्तु वासःस्रङ्मण्डनादिभिः ॥ ४३ ॥ सुखं निवासयामास धर्मराजो जनार्दनं ॥ ससैन्यं सानुगामात्यं सभार्यं च नवं नवं ॥ ४४ ॥ तर्पयित्वा नवं
खांडवेन वह्निं फाल्गुनसंयुतः ॥ मोचयित्वा मयं येन राज्ञे दिव्या सभा कृता ॥ ४५ ॥ उवास कतिचिन्मासान् राज्ञः प्रियचिकीर्षया ॥ विहरन् रम·
रथमारुह्य फाल्गुनेन भटैर्वृतः ॥ ४६ ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे इंद्रप्रस्थागमने एकसप्ततितमः ॥ ७१ ॥ ॥ ६१

॥ ४४ ॥ कथंभूतं यः प्रेम्णा नित्यं फाल्गुनेन संयुतं अत एव स्वसहायेन खांडवे वह्निं तर्पयित्वा तत्र च मयं मोचं मोचयित्वा तं मयं प्रमुच्य
युधिष्ठिराय दिव्या सभा कृता तं श्रीजनार्दनं ॥ अनेन राज्ञः कृष्णोपकारानुस्मरणं दिमत्वा संभाषणा यामनोरथं सर्वावकाशासमादनं च द
र्शितं ॥ ४५ ॥ ४६ ॥ ॥ इति टीकायामेकसप्ततितमः ॥ ७१ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततोविसृष्टतितमे राज्ञा कार्ये निवेदिते॥ दुर्जयं मागधं बुध्वान्तीमेनाघातयध्वरिः॥१॥ आस्थितः आसन्नमितिशेषः॥ प्यएव तामेवेति यत्त्वमसत्वःकृष्णःक
रोतिनतदन्यःकश्चिदपिकर्तुंसमर्थइतिनिश्चित्यसवनिवतानतारत्सकृष्णमुवाचेत्यर्थः॥ आनाष्मनो नोहक्षमनकवत्सलेत्येवंसंबोध्य॥२॥ विन्दन्तीः
श्रेयांसि॥३॥ एषचक्रवर्त्तिनांमनोरथःकथंत्वयाक्रियतइतिचेत्॥ अतआह त्वत्पादुकेइति॥ परिये चरंतीतिपरिचरःवधानमार्ष्यपरिचरंति दे

श्रीशुक उवाच॥ ॥ एकदा तु सभामध्ये आस्थितो मुनिभिर्वृतः॥ ब्राह्मणैः क्षत्रियैर्वैश्यैर्भ्रातृभिश्च युधिष्टिरः॥१॥ आचार्यैः कु
लवृद्धैश्च ज्ञातिसंबंधबांधवैः॥ शृण्वतामेव चैतेषामाभाष्येदमुवाच ह॥२॥ ॥युधिष्टिर उवाच॥ ॥ क्रतुराजेन गोविंद राजसूयेन
पावनीः॥ यक्ष्ये विभूतीर्भवतस्तत्संपादय नः प्रभो॥३॥ त्वत्पादुके अविरतं परि ये चरंति ध्यायंत्यभद्रनशने शुचयो गृ
णंति॥ विंदंति ते कमलनाभ भवापवर्गमाशासते यदि त आशिष ईश नान्ये॥४॥ तद्देव देवभवतश्चरणारविंदसेवानु ए२
भावमिह पश्यतु लोक एषः॥ ये त्वां भजंति न भजंत्युत वोभयेषां निष्ठां प्रदर्शय विभो कुरुसंजयानाम्॥५॥ ॥ ॥

हेन ध्यायंति मनसा अभद्रस्य नशने नाम्नाके गृणंति वा वा ते भवस्यापवर्गं मोक्षं विंदंति॥ यद्याशासते तर्हि॥ आशिषो पि त एव विंदंति नान्ये च
क्रवर्त्तिनो पि॥४॥ भगवतो भक्तपक्षपातमाविष्कारयन्नाह॥ तद्देवदेवेति॥ तत्तस्मात्पश्यतु साक्षाद्देवं निश्चिते पि ये कर्मादिप्रधानाः॥ केचित्
कुरुसंजयाग्रेवनेन्द्र किं न बकुमन्यंते तेषां मोहनिवृत्तये ये त्वां भजंति यद्वि वा न भजंति तेषामुभयेषां निष्ठां स्थितिं प्रदर्शय॥५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा.द.उ.

६२

ननु रागादिरहितेमपि कथमिदं वैषम्यं स्यादित्याह ॥ नेति ॥ स्वः परः इति भेदमतिस्तव न स्यादेव न स्यादेव कुतः ॥ ब्रह्मणो निरुपाधेः किंच ॥ सर्वस्यात्मनः अतः स
मदृशः ॥ किंच ॥ स्वसुखानुभूतेः ॥ अतो रागाद्यभावादिति भावः ॥ तथापि संसेवमानानामेव तत्तत्संसारो नान्येषां तत्रापि सेवानुरूपमुदयः फलं न तत्र वि
पर्ययोन्यथा भावः ॥ यथा कल्पद्रुमस्य रागादिराहित्येपि सेवकेष्वेव फलजनकत्वं नान्येषु ॥ ६ ॥ सत्यं मद्भक्तानामेव कैवल्यादि नान्येषामित्यनुमोदमान
आह ॥ सम्यगिति शत्रुकर्षणेति संबोधयन् सर्वराजविजयशक्तिं संचारयति अनु न विंभ्यति दृस्यति सर्वलोकस्याप्याप्त भविष्यतीत्यर्थः ॥ ७ ॥ किमत्रेयाम ॥ म

न ब्रह्मणः स्वपरभेदमतिस्तव स्यात्सर्वात्मनः समदृशः स्वसुखानुभूतेः ॥ संसेवतां सुरतरोरिव ते प्रसादः सेवानुरूपमुदयो न विपर्य
योत्र ॥ ६ ॥ श्रीभगवानुवाच ॥ ॥ सम्यग्व्यवसितं राजन् भवता शत्रुकर्षन ॥ कल्याणी येन ते कीर्तिर्लोकाननु भविष्यति ॥ ७ ॥ ऋषी
णांपि देवानां सुहृदामपि नः प्रभो ॥ सर्वेषामपि भूतानामीप्सितः क्रतुराडयं ॥ ८ ॥ विजित्य नृपतीन्सर्वान्ह[illegible]त्वा च जगतीं वशे संभ
त्य सर्वसंभारानाहरस्व महाक्रतुं ॥ ९ ॥ एते ते भ्रातरो राजन् लोकपालांशसंभवाः ॥ जितोस्म्यात्मवता तेहं दुर्जयो योकृतात्मभिः ॥ १० ॥ न
कश्चिन्मत्परं लोके तेजसा यशसा श्रिया ॥ विभूतिभिर्वाभिभवेद्देवोपि किमु पार्थिवाः ॥ ११ ॥ सेनवासंपादनीयं तव सुकरमेव राजसूय

ए.म.

६२

इत्याह ॥ ॥ विजित्येति ॥ जगतीं सर्वां पृथ्वीं संभारान् यज्ञोपस्करान् संभृत्य संपाद्य च आहरस्व आहरस्वानुतिष्ठेत्यर्थः ॥ ९ ॥ ननु नृपतिविजयादिकं कथं शक्यं स्या
दत आह एत इति ॥ किंच ॥ आत्मवता जितेंद्रियेण त्वया सह च जितोस्मि वशीकृतोस्मि अकृतात्मभिः अजितेंद्रियैः ॥ १० ॥ आस्तां तावदेवं भूतस्य त
व परैरभिभव शंका अकिंचनमपि मत्परं कोपि नाभिभवितुं प्रभवतीत्याह न कश्चिदिति तेजसा प्रभावेन विभूतिभिः सैन्यादिसामग्रीभिः ॥ ११ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नयुंक्त निपुक्कवान्॥ तथा विक्षोभे तेजसाउपबृंहितान् संवर्धितान्॥ तेजोपबृंहितानिति संधिरार्षः॥१२॥ नकुलादीनां मत्स्यादिभिः सहायैर्यथासंख्ये
न संबंधः॥१३॥ कथं नुतापयक्ष्यते पार्गं करिष्यते॥१४॥ आद्यो हरिः श्रीकृष्णः॥१५॥ ब्रह्मलिंगधराः ब्राह्मणलिंगधारिणः॥ पतत्यत्रवृहद्रथसुतो जरासं
धः॥१६॥ गृहेषु वर्त्तमानं समयाचेरन् सम्यग्याचते तेत्यर्थः॥१७॥ नन्विदं काम याम ह इति विशेषेण निर्दिष्टं तो अन्यथा यस्य पुत्रादेर्वियोगो दुःसहः

श्रीशुक उवाच॥ ॥ निशम्य भगवद्गीतं प्रीतः फुल्लमुखांबुजः॥ भ्रातॄन् दिग्विजयेयुंक्त विष्णुतेजोपबृंहितान्॥१२॥ सहदेवं दक्षि
णस्यामादिशत् सह सृंजयैः॥ दिशि प्रतीच्यां नकुलमुदीच्यां सव्यसाचिनं॥१३॥ प्राच्यां वृकोदरं मत्स्यैः केकयैः सह मद्रकैः॥१३॥ ते वि
२ जित्य नृपान् वीरा आजह्रुर्दिग्भ्य ओजसा॥ अजातशत्रवे भूरि द्रविणं नृप यक्ष्यते॥१४॥ श्रुत्वाजितं जरासंधं नृपतेर्ध्यायतो हरिः॥ आ
होपायं तमेवाद्य उद्धवो यमुवाच ह॥१५॥ भीमसेनोर्जुनः कृष्णो ब्रह्मलिंगधरास्त्रयः॥ जग्मुर्गिरिव्रजं तात बृहद्रथसुतो यतः॥१६॥ ते
गत्वातिथ्यवेलायां गृहेषु गृहमेधिनं॥ ब्रह्मण्यं समयाचेरन् राजन्या ब्रह्मलिंगिनः॥१७॥ राजन्विद्ध्यतिथीन् प्राप्तानर्थिनो दूरमागतान्
॥ तन्नः प्रयच्छ भद्रं ते यद्वयं कामयामहे॥१८॥ किं दुर्मर्षं तितिक्षूणां किमकार्यमसाधुभिः किं न देयं वदान्यानां कः परः समदर्शिनां॥१९॥

सकथं देयः तथा राजमंडनं किरीटादि देयं यत्राद्भिक्षुभिः कथं देयं तथातिरम्यं रत्नाभरणादि पुत्रादियोग्यं कथं परस्मै देयमिति चेदत आहुः॥ किं दु
र्मर्षमित्यादि॥ अन्नरक्षांतत्वेनार्थांतरमाहुः॥ किमकार्यमिति यथा साधूनां मकार्यं नास्ति तथा तितिक्षूणां दुर्मर्षं दुःसहं नास्ति वदान्यानामत्सुदा
रणां अदेयं नास्ति समदर्शिनां परश्च नास्ति अतः किं विशेषनिर्देशेनेत्यर्थः॥१९॥ ॥

ना॰ द॰ उ॰ किंच दधीचिर्नैधीरेणसुकृतादिवत्प्राणान्‌ अर्पितवं चतीयास्त्वा सर्पेनाकृः॥ योनितिलेनेतिनाचिनोतिनसंपादयति सवाच्यमनिंद्यः॥२०॥ विश्वामित्रार्थान्
६३ एणा यह हरिश्चंद्रो नार्यात्मजादि सर्वं विक्रीयसयं चंडालतां प्राप्तोप्यनिर्विण्णः सहापोष्या वासिनिर्जनैः स्वर्गं गतः॥ रंतिदेवः स कुटुंबो प्यचत्वारिंशद्दिनाम्
लब्धौदकोपिकयचित्तु आन्नोदकाद्यर्थिभ्यो दत्त्वा ब्रह्मलोकं गतः उंछवृत्तिर्मुद्गलः षण्मासं सीदत्कुटुंबोप्यातिथ्यदानेन ब्रह्मलोकं गतः शिबिः शरणा
गतकपोतरक्षणाय स्वमांसं स्वदेहेनाद्य दत्त्वा दिवं गतः॥ बलिः सर्वस्वं ब्राह्मणवेषधारिणे हरये दत्त्वात्मेवात्मसाच्चकार कपोतस्त्वातिथ्यायोत्माध्याय

॥२॥ योविलेतत्रशरीरेणसत्संगेयं यज्ञोध्रुवं॥ नाचिनोतिस्वयंकल्पः सवाच्यः शोच्य एव सः॥२०॥ हरिश्चंद्रो रंतिदेवमुद्गलः शिबि
र्बलिः॥ व्याधः कपोतो बहवो ह्यध्रुवेण ध्रुवं गताः॥२१॥ ॥श्रीशुक उवाच॥ ॥ स्वैरैरात्मानिर्जितं प्रकोष्ठे ज्याहरै रपि॥ राजन्यबंधून्
ज्ञाप दृष्टपूर्वानचिंतयत्॥२२॥ राजन्यबंधवो ह्येते ब्रह्मलिंगानि बिभ्रति॥ ददामि निष्पितं तेभ्यः आत्मानमपि दुर्लभं॥२३॥ बलेर्नु
श्रूयते कीर्तिर्वितता दिक्ष्वकल्मषा रोध्यते शितस्यापि विप्रव्याजेन विष्णुना॥२४॥ श्रियं जिहीर्षतेंद्रस्य विष्णवे द्विजरूपिणे॥ जानन् राम॰
न्नपि महीं प्रादाद्वार्यमाणोपि दैत्यराट्॥२५॥॥ कपोतः सहात्ममांसं दत्त्वा विमानेन दिवं गतः व्याधस्तु यो स तं वीक्ष्य समति निर्विण्णो महाप्र ६३
स्थानेन नाग्निदग्धदेहो निःकल्मषो दिव्यमारुरोह एवमन्ये च बहवो ध्रुवैर्लोकं गता इति॥२१॥ ज्याहतैः ज्याघातकिणांकितैः॥ दृष्टपूर्वान् द्वीपदी स्व
यंवरादिषु॥२२॥२३॥ इंद्रस्य श्रियं जिहीर्षता विप्रव्याजेन विष्णुना क्षितस्यापि बलेर्नु अहो नेतिपाठेन श्रूयते किमापि तु स्तूयत इति॥२४॥ तं श्ला
घयते विष्णवे इति शुक्रेण वार्यमाणोपि अत एव विष्णुरिति जानन्नपि॥२५॥ ॥

पा२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पतमाने नयत ताः स्वत्रबंधुनादेहेन ब्राह्मणार्थाय विपुलं राज्ञोने हताऽने हमानेनासंप्रादयतो कोन्वर्थः नकोपीत्यर्थः ॥२६॥ एवं निश्चित्य प्राह हे विप्रा इति ॥२७॥
२८॥ २९॥ २०॥ राजन्सतामेवमपंचयति ॥ असावितिः ॥३१॥ ३२॥ यतो मह्निया समुद्रं शरणं गतः ॥३३॥ वयसाप्यतुल्यः नातिसत्वः अनति बलश्च नव देहे न मयासमः ॥

जीवता ब्राह्मणार्थाय को न्वर्थः स्वत्रबंधुना ॥ देहेन पतमानेन नेहतां विपुलं यशः ॥२६॥ इत्युदारमतिः प्राह हसार्जुन हे कोदरान् हे विप्रा
ब्रियतां कामो दद्याम्यात्मशिरोपि वः ॥२७॥ श्रीभगवानुवाच ॥ युद्धं नो देहि राजेंद्र द्वंद्वस्योयदि मन्यसे ॥ युधाथिनो वयं प्राप्ता राजन्यान्नान्नकांक्षि
णः ॥२८॥ राजोवाच ॥ किंच देवा वोत गंधर्वाः किन्नरोरगराक्षसाः ॥ ईदृशं ब्रह्मणे ते जो न दृष्टं न मयाश्रुतं ॥२९॥ न विप्राणं मया दृष्टं धनु
र्ज्याविकिंतं भुजं ॥ इति श्रुत्वाह भगवानप्रहस्य मगधाधिपं ॥३०॥ असो वृकोदरः पार्थस्तस्य भ्राताऽर्जुनो ह्ययं ॥ अनयोर्मातुलेयं मां हरिं
जानीहि ते रिपुं ॥३१॥ एवमावेदितो राजा जहासोच्चैः स मागधः ॥ आह चामर्षितो मंदा युध्यं तर्हि द दाम्यहं ॥३२॥ न त्वया भीरुणा योत्स्ये युधि
विक्लवचेतसा ॥ मथुरां स्वपुरीं त्यक्त्वा समुद्रं शरणं गतः ॥३३॥ अयं तु वयसातुल्यो नातिसत्वो न मे समः ॥ अर्जुनो न भवेद्योद्धा भीमस्तुल्यब
लो मम ॥३४॥ इत्युक्त्वा भीमसेनाय प्रदाय महतीं गदां ॥ द्वितीयां स्वयमादाय निर्जगाम पुराद्बहिः ॥३५॥ ततः समखले वीरौ संयुक्तावितरेतरं
॥ जघ्नतुर्वज्रकल्पाभ्यां गदाभ्यां रणदुर्मदौ ॥३६॥ मंडलानि विचित्राणि सव्यं दक्षिणमेव च ॥ चरतोः शुशुभे युद्धं नटयोरिव रंगिणोः ॥३७॥ त
तश्चटचटाशब्दो वज्रनिष्पेषसन्निभः ॥ गदयोः क्षिप्तयो राजन् दंतयोरिव दंतिनोः ॥३८॥
अतोर्जुनो योधा न भवेद्भीमस्तुल्यबेत्यपतो मम तु
ल्यबलः ॥३४॥ ३५॥ समरापदस्ले स्पर्थः ॥ समे खले युधां गणे ॥३६॥ मंडलानि गदायुधगतिभेदान् सव्यं दक्षिणं च यथा भवति तथा रंगिणोः रंगगतयोः नटयोरिव ते भिन्नि
पते नोपमा ॥३७॥ चटचटेति गदयोः परस्पराघातशब्दः ॥ तुकरणं वज्रस्य निःपेषपातस्तस्य स दृशः युध्यतो ईति नोर्हंता घातशब्दः इवेति श्लेषशुभे ॥३८॥

भा॰ द॰ उ॰ शंसक यादीनुपेत्स दीप्तौ मत्तयोर्यरयोस्तयोर्गजयोरर्कशाखामांसमंयुध्यतोर्द्दंतिनोस्वे पथाचूर्णीचूतास्तवता॥४२॥ अपि ष्टंचूर्णीचक्रतु॥४०॥ त्रिशिखाञ्जस्यासः
६७ बलं सत्वमोजः प्रत्याकः समानितानि ययोस्तयोः॥४१॥४२॥४३॥ जन्मशकजरूपंमृतिः पुनःशकली नावः तेविघ्नान्ज्ञानन्तजरानाम रासीत्तत्कृतमविंतयतकथ

तेवेगदेत्तु जन्नवेन निपात्समाने अन्योन्यतोंसकटिपादकरोरू जन्न्नात्वूर्णीबिचूवतुरुपेत्सयथाकर्कशाखेसंयुध्यतोर्द्दिरदयोरिवदीप्तमन्योः॥४३॥
॥इत्थंतयोःप्रहरतयोर्गदयोर्न्दवीरोकधौस्वमुष्टिभिरभ्रःसद्मैरपिष्टौ॥ शस्त्रैस्तयोःप्रहरतोरिन्नयोरिवासीन्निर्घातवज्रपरुस्त्रलताउतोयसः॥४७॥ ७
तयोरेवंप्रहरतोःसमशिखाबलौजसोः॥ निर्विशेषमन्तुयुधमासीत्रावयोर्नृपा॥४८॥ एवंतयोर्महाराजयुध्यतोःसप्तविंशतिः॥ दिनानि निरगं
स्तत्र सुहृद्वन्निशितिष्टतोः॥४९॥ एकदामातुलेयं वैप्राहराजन्नकोदरः॥ नशक्योहंतरासंधेनिर्जेतुंयुधिमाधव॥४२॥ शत्रोर्जन्ममृतीविद्वान्तीवि
तंचजराकृतं॥ पार्थमाप्यायस्वेन तेजसाचिंतयद्धरिः॥४४॥ संचिंत्यारिवधोपायंभीमस्यामोघदर्शनः॥ दर्शयामासविटपंपाटयन्निवसंज्ञया॥
४५॥ तद्विज्ञायमहासत्वोभीमःप्रहरतांवरः॥ गृहीत्वापादयोःशत्रुंपातयामासभूतले॥४६॥ एकंपादंपदाक्रम्यदोर्भ्यामन्यंप्रगृह्यसः॥ गुदतः
पाटयामासशाखामिवमहागजः॥४७॥ एकपादोरुवृषणकटिपृष्टस्तनांशके॥ एकबाह्वक्षिभ्रूकर्णोशकले ददृशुःप्रजाः॥४८॥ हाहाकारो रा॰ म॰
महानासीन्निहतेमगधेश्वरे॥ पूजयामासतुर्भीमंपरिरभ्यजयाच्युतौ॥४९॥ परिरभ्य सुहृत्ले नविरुजोन्भृक्कोदरः॥ सहदेवंतत्तनयंभगवान्भू ६७
तभावनः॥ अभ्यषिंचदमेयात्मामगधानांपतिंप्रभुः॥ मोचयामास राजन्यान्संरुधा मागधेनये॥५०॥ ॥ इतिश्रीभा॰ द॰ द्विसप्ततमः॥ ॥७२॥ मसौशकलीन्न
वेदिति॥४४॥ शाखांकरेविटपंगृहीत्वाहरिर्भीमस्यपथाहंविरपेपाटयामि तथात्वमेनंविपाटयेतिसंज्ञयासंकेतेनारिवधोपायंदर्शयामासेत्यर्थः॥४५॥४७॥
एकैकः पादादिर्ययोस्ते शकटेले॥४८॥४९॥ दुर्वृत्तत्वादसौ हतः नरात्मानिजाघेलोतिदर्शयन्नाहसहदेवमिति॥५०॥ ॥इतिद्विसप्ततितमः॥ ॥७२॥ ॥

ततस्त्रिसप्ततितमे मोचयित्वा नृपान् हरिः॥ राजार्हैर्भोगैः स्वान्देशान् प्रस्थाप्य पुनरागमत्॥१॥ अस्तुत्वध जरासंधवधात्कुधन्नृपतीन् विमोक्ष हप
पा हृष्टोति जरूप महं हूयितः॥२॥ ये निर्जिता जरासंधेन निरुद्धाश्च गिरिद्रोण्यां ते ततो निर्गताः संतो घनश्यामं ददृशुर्हरिं त्वरेणेव पद्मा॥ क्षुत्क्षामाः हृश्या
संरोधेन परिकर्शिताः क्लेशिताः॥३॥३॥ भ्राजत् भ्राजमानो वरमणिः कौस्तुभो यया सा श्रीवायस्य तं॥ निवीतं कंठलंबितं यया आममम्॥४॥ पिबंत इव सादृशानो ह

श्रीशुक उवाच॥ अयुते द्वे शतान्यष्टौ लीलया युधि निर्जिताः॥ ते निर्गता गिरिद्रोण्यां मलिना मलवाससः॥१॥ क्षुत्क्षामाः शुष्कवदनाः संरो
धपरिकर्शिताः॥ ददृशुस्ते घनश्यामं पीतकौशेयवाससं॥२॥ श्रीवत्सांकं चतुर्बाहुं पद्मगर्भारुणेक्षणं॥ चारुप्रसन्नवदनं स्फुरन्मकर
कुंडलं॥३॥ पद्महस्तं ग    दाशंखरथांगैरुपलक्षितं॥ किरीटहारकटककटिसूत्रांगदांचितं॥४॥ भ्राजद्वरमणिग्रीवं निवीतं वनमालया
॥४॥ पिबंत इव चक्षुर्भ्यां लिहंत इव जिह्वया॥ जिघ्रंत इव नासाभ्यां रंभंत इव बाहुभिः॥५॥ प्रणेमुर्हतपाप्मानो मूर्धभिः पादयोर्हरेः॥ कृ
ष्णसंदर्शनाह्लादध्वस्तसंरोधनक्लमाः॥६॥ प्रशशंसुर्हृषीकेशं गीर्भिः प्रांजलयो नृपाः॥ राजान ऊचुः॥ नमस्ते देवदेवेश प्रपन्नार्तिहराव्य
य॥ प्रपन्नान्पाहि नः कृष्ण निर्विण्णान्घोरसंसृतेः॥७॥ नैनं नाथानुसूयामो मागधं मधुसूदन॥ अनुग्रहो यद्भवतो राज्ञां राज्यच्युतिर्विभो॥८॥

रेः पादयोः प्रणेमुरित्युत्तरेणान्वयः॥ रंभंतः परिरंभमाणा इव॥५॥ श्रीकृष्णदर्शनाह्लादेन ध्वस्तः संरोधक्लमो येषां ते॥६॥ संरोधादसितानस्मान् घो
रायाः संसृतेरपि पाहि मोचय॥७॥ ननु नवंतो जरासंधासूयाविष्टा इहास्तु वत्तोगास्तकाश्च कथं संसृतेर्मोचनीया इत्याशंक्य संप्रति न वयं तथाभूता
इत्याहुः॥ नैनमिति पंचभिः॥ हे नाथ वयमेनं नानुसूयामः अत्र तु दोषदृष्ट्या न पश्यामः कृत इत्यत आहुः॥ अनुग्रह इति यस्मात्॥८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ ह॰ उ॰ एतदेवव्यतिरेकेणैवोपपादयंति॥ राज्यैश्वर्येति॥ राज्यैश्वर्येणोन्मत्तं मदस्तेनोन्नद्धः खलो नित्या अचलाश्च संपदा मन्यंते यद्वा अनित्याः सत्यः अचलाः
शाश्वतीर्मन्यते॥ ९॥ किंचावस्तु सद्वस्तुतया पश्यंतीत्याह॥ मृगतृष्णामिति वैकारिकीं सृष्ट्यादिविकारापन्नां अयुक्ताः अविवेकिनः॥ १०॥ राज्यस्य योग
६५ वियोगयोरन्यर्थाथीबाहत्वमस्मास्वेव दृष्टमित्याह॥ वयमिति॥ वासोश्रीमदेन नष्टा दृष्टिर्येषां ते अस्याः श्रियः इतरेतरस्पर्धः परस्परं स्पर्धमा
नाः पुरः पुरतः तां मृत्युमविगणय्य॥ ११॥ पुरा येदुर्मदा वयं॥ हे हृष्टतत एव वयं अद्य विनष्टदर्पास्ते वरणौ स्मरामः॥ स्मर्तुं मा शास्मृहे॥ कथयन्त्र

राज्यैश्वर्यमदोन्नद्धो न श्रेयो विंदते नरः॥ तन्मायामोहितो नित्या मन्यते संपदोचलाः॥ ९॥ मृगतृष्णां यथा बाला मन्यंते
तउदकाशयं॥ एवं वैकारिकीं मायामयुक्ता वस्तु चक्षते॥ १०॥ वयं पुरा श्रीमदनष्टदृष्ट्यो जिगीषयास्या इतरेतरस्पर्धः॥
घ्नंतः प्रजाः स्वा अतिनिर्घृणाः प्रभो मृत्युं पुरस्त्वाविगणय्य दुर्मदाः॥ ११॥ त एव हृष्टाद्य गभीररंहसा दुरंतवीर्येण विचालि
ताश्रियः॥ कालेन तन्वा भवतानुकंपया विनष्टदर्पाश्चरणौ स्मरामहे॥ १२॥ अथो न राज्यं मृगतृष्णिरूपितं देहेन शश्व राम॰
त्पत तारुजां स्नुवा॥ उपासितव्यं स्पृहयामहे विभो क्रियाफलं प्रेत्य च कर्णरोचनम्॥ १३॥ ॥ ॥ ६५

ताः नगैव तस्मन्त्वामनुत्वा कालेन श्रियो विचालितः विच्छेदिताः अतो राज्यच्युतिर्न्नेव दन्तुग्रह एवेत्यर्थः॥ १२॥ अत एवाथोनंतरं मृगतृष्णिसदृशं रा
ज्यं शश्वत्पतता प्रतिक्षणं क्षीयमाणेन तथा रुजां रोगाणां स्नुवा जन्मक्षेत्रेण देहेन उपासितव्यं सेव्यं न स्पृहयामहे तथैव प्रेत्य परलोके च क्रियाफलं स्वर्गा
दि नो गं उपासितव्यं न स्पृहयामहे॥ कथंभूतं कर्णयोः रोचनं रुचिजनकमात्रं तत्र गतस्यापि अवश्यंपतनेन सुखाभावादित्यर्थः॥ १३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्येवं न्नृता स्त्वयं तर्हि मम सचरणौस्मरता॥ ततो नायासेन मुक्तिर्न विपत्तीति किं मदपेक्षयेति चेदत आह॥ कुतः तन्नरतित्वच्चरणस्मृतिरपि त्वत्प्रसादफललभ्ये
वेत्सर्थः॥१४॥१५॥ श्लक्ष्णया मंजुलया॥१६॥ यथा भवद्भिराशंसितं तथा बाढं निश्चितं॥ क्षेमयि भक्तिर्जायते जायतामित्सर्थः॥१७॥ हे नृपाः मद्भजनमेव कर्त्तव्यमि
ति भवद्भिर्व्यवसितं संकल्पितं तद्दिष्ट्या नंदं भवद्भिरुक्तं च सत्यमेवेत्याह॥ भवंत इति श्रीः श्रेयः ऐश्वर्यं च ताभ्यां मदस्तेनोन्नाहं उद्धतत्वं स्वैरचारमित्सर्थः॥ पश्येपश्यशा
मि॥१८॥ तदेवाह हे हयेति॥ हैहयः कार्त्तवीर्यः चक्रवर्त्ती नरेश्वरः पितुः कामधेनुहरणात् रुष्टरामेण सपुत्रो हतः॥ नहुषो देवेंद्रतां प्राप्तः॥ उन्मत्तः शचीसं

तन्नः समादिशोपायं येन ते चरणाब्जयोः॥ स्मृतिर्यथा न विरमेदपि संसरतामिह॥१४॥ कृष्णाय वासुदेवाय हरये परमात्मने॥ प्र
णतक्लेशनाशाय गोविंदाय नमो नमः॥१५॥ ॥शुक उवाच॥ ॥संस्तूयमानो भगवान् राजभिर्मुक्तबंधनैः॥ तानाह करुणस्तात श
रण्यः श्लक्ष्णया गिरा॥१६॥ ॥श्रीभगवानुवाच॥ ॥अद्य प्रभृति वो भूपा मय्यात्मन्यखिलेश्वरे॥ सुदृढा जायते भक्तिर्बाढमाशं
सितं तथा॥१७॥ दिष्ट्या व्यवसितं भूपा भवंत ऋतभाषिणः॥ श्रियैश्वर्यमदोन्नाहं पश्य उन्मादकं नृणां॥१८॥ हैहयो नहुषो वे
नो रावणो नरकोपरे॥ श्रीमदाद्भ्रंशिताः स्थानाद्देवदैत्यनरेश्वराः॥१९॥ भवंत एतद्विज्ञाय देहाद्युत्पाद्यमंतवत्॥ मां यजंतोध्व
रैर्युक्ताः प्रजाधर्मेण रक्षथ॥२०॥ संतन्वतः प्रजातंतून्सुखं दुःखं भवाभवौ॥ प्राप्तं प्राप्तं च सेवंतो मच्चित्ता विचरिष्यथ॥२१॥ ॥

गायत्र्याः स्मरणान् शिबिकां वाहयन् तैरेव ततो भ्रंशितोऽजगरत्वमवाप॥ वेनोपि उन्मत्तो ब्राह्मणानधिक्षिपंस्तैरेव हुंकृते हतः॥ रावणो राक्षसेश्वरः
सीतामभिलषन् राघवेण हतः॥ नरको दैत्येश्वरो दितिकुंडलाद्याहरणान्मयैव हतः॥ अपरेपि श्रीमदात् स्थानाद्भ्रंशिताः॥१९॥ यदुत्पाद्यं देहादि त
दंतवत् विज्ञाय युक्ताः अप्रमत्ता रक्षथ रक्षतेत्सर्थः॥२०॥ प्रजातंतून् प्रजादिसंसततीः प्राप्तं समत्वेन सेवमानाः॥२१॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰ मांश्च ह्यग्रास्यथा॥२२॥ त्रियश्च तेषां समकृतकर्म्मणि अस्मंगस्नानादौ न्ययुंक्त॥२३॥२४॥ सुस्नाता नम्र गलं हृतान्भोगैश्च यक्तान्॥२५॥ वरेणान्नेनमो

६६ उदासीनाश्च देहादावात्मारामा धृतव्रता॥ मय्यावेश्य मनः सम्यङ्मामंते ब्रह्म्यास्यथ॥२२॥ ॥श्रीशुक उवाच॥ ॥इत्यादिश्य नृपान्कृष्णो भग
वान्भुवनेश्वरः॥ तेषां न्ययुंक्त पुरुषान्स्त्रियो मज्जनकर्मणि॥२३॥ सपर्यां कारयामास सहदेवेन भारत॥ नरदेवोचितैर्वस्त्रैर्भूषणैः स्र
ग्विलेपनैः॥२४॥ भोजयित्वा वरान्नेन सुस्नातान्समलंकृतान्॥ भोगैश्च विविधैर्युक्तांस्तांबूलाद्यैर्नृपोचितैः॥२५॥ ते पूजिता मुकुंदेन रा
जानो मृष्टकुंडलाः॥ विरेजुर्मोचिताः क्लेशात्प्रावृडंते यथा ग्रहाः॥२६॥ रथान्सदश्वानारोप्य मणिकांचनभूषितान्॥ प्रीणय्य सूनृतैर्वाक्यैः स्वदे
शान्प्रत्ययापयत्॥२७॥ त एवं मोचिताः कृच्छ्रात्कृष्णेन सुमहात्मना॥ ययुस्तमेव ध्यायंतः कृतानि च जगत्पतेः॥२८॥ जगदुः प्रकृतिभ्यस्ते महापुरु
षचेष्टितं॥ यथान्वशासद्भगवांस्तथा चक्रुरतंद्रिताः॥२९॥ जरासंधं घातयित्वा भीमसेनेन केशवः॥ पार्थाभ्यां संयुतः प्रायात्सहदेवेन पूजितः॥३०॥
गत्वा ते खांडवप्रस्थं शंखान्दध्मुर्जितारयः॥ हर्षयंतः स्वसुहृदो दुर्हृदां चासुखावहं॥३१॥ तच्छ्रुत्वा प्रीतमनस इंद्रप्रस्थनिवासिनः॥ मेनिरे मा राम॰
गधं शांतं राजा चाप्तमनोरथः॥३२॥ अभिवंद्याथ राजानं भीमार्जुनजनार्दनाः॥ सर्वमाश्रावयांचक्रुरात्मना यदनुष्ठितं॥३३॥ निशम्य धर्म
राजस्तत्केशवेनानुकंपितं॥ आनंदाश्रुकलां मुंचन्प्रेम्णा नोवाच किंचन॥३४॥ ॥इति श्रीभागवते महापुराणे दशमस्कंधे राजसूये ६६
जरासंधवधस्त्रिसप्ततितमोऽध्यायः॥७३॥ ॥
जयित्वा पुनस्तेषां सपर्यां सहदेवेन कारयामास ग्राह्यश्च नादयोयथा॥२६॥ प्रीणय्य नंदयित्वा॥२७॥
॥२८॥ जगदुः ऊचुः॥२९॥३०॥ खांडवप्रस्थं इंद्रप्रस्थं॥३१॥ शांतं मृतं॥ आप्तमनोरथो बभूव॥३२॥३४॥ ॥इति दशमे त्रिसप्ततितमोऽध्यायः॥ ॥७३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वतुर्युक्सप्ततितमे राजसूयक्रियाद्विजैः॥ अग्रपूजाप्रसंगेन चैद्यघातादिवर्ण्यते॥१॥ राजसूयमुखे हत्वा जरासंधं तदंतरे॥ चैद्यं तरं ते कुर्वंति बीजं
कलिमिवावपत्॥२॥ कृष्णस्य चानुभावमिति चकारात्तस्य साम्राज्यानुविक्षपित्वं चालक्ष्येत्यर्थः॥१॥ तदाह येस्युरिति॥ ये त्रैलोक्यस्यापि गुरवः स्युः सनकादयः
सर्वे लोकपालाश्च ते शिरसैव तवानुशासनं वहंति॥ दुर्लभं लब्ध्वेति नाप्यैनैतत्सुलभमिति बहुमानेनेत्यर्थः॥२॥ स भवान्परमेश्वरोऽस्माकमनुशासनं धत्ते
तदत्यंतविडंबनं॥ अननुरूपमनुकरणं॥ न तेजोहानिप्रसंगादित्यर्थः॥३॥ अथवा तव परिपूर्णस्याज्ञापनाज्ञाधारणाभ्यां न तेजसो हानिर्वृधीः अ

श्रीशुक उवाच॥ ॥ एवं युधिष्ठिरो राजा जरासंधवधं विभोः॥ कृष्णस्य चानुभावं तं श्रुत्वा प्रीतस्तमब्रवीत्॥१॥ ॥युधिष्ठिर उवाच॥ ॥
ये स्युस्त्रैलोक्यगुरवः सर्वे लोकमहेश्वराः॥ वहंति दुर्लभं लब्ध्वा शिरसैवानुशासनं॥२॥ स भवानरविंदाक्षो दीनाना
मीशमानिनां॥ धत्तेऽनुशासनं भूमंस्तदत्यंतविडंबनं॥३॥ न ह्येकस्याद्वितीयस्य ब्रह्मणः परमात्मनः॥ कर्मभिर्वर्धते तेजो
ह्रसते च यथा रवेः॥४॥ न वै तेऽजित भक्तानां ममाहमिति माधव॥ त्वं तवेति च नानाधीः पशूनामिव वैकृता॥५॥ ॥ ॥

तः कृपया सर्वं संगच्छत इत्याह॥ न ह्येकस्याद्वितीयस्येति॥ समानासमानरहितस्य ब्रह्मणस्तत्त्वतो न यं मायापरमात्मन इति सर्वजीवनियंतुस्तव नि
यम्यत्वेस्तु तर्हि नवास्त्वेवं॥ अतः परमानुग्रहार्थैरेतैः कर्मभिस्तव तेजो न वर्ध्यते॥ न च ह्रसति रवेरिव उदयास्तमयादिकर्मभिरित्यर्थः॥ तथा च श्रुतिः॥ न क
र्मणा वर्धते नो कनीयानिति॥४॥ नन्वेवमप्यहं परमेश्वरः ममेदं नीचं कर्मायोग्यमिति मनसि कथं न भवेदत आह॥ न वै त इति॥ हे अजित तव भ
क्तानामेव तावदियं नानाधीर्भेदमतिर्नास्ति॥ यथा पशूनामज्ञानां वैकृता शरीरविषयात्तवतु नास्तीति किं पुनर्वक्तव्यमित्यर्थः॥५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰उ॰

६७

यज्ञियेयज्ञोचितेवसंतादिकालेयुक्तानन्नियुक्तान्सयुधिष्ठिरःऋत्विजोहेनृपसुस्मान्वव्रेवृतवान् ॥ ६ ॥ तानाहद्वैपायनइतित्रिभिः ॥ ७ ॥ ८ ॥ अह्वतव्रणां
तानेतानृत्विग्पुंगवइष्टिरितिदेनवव्रे ॥ ८ ॥ अन्येचोपहूतायदिदृक्षवस्तत्रेयुरित्यन्वयः ॥ १० ॥ ११ ॥ देवयजनंयज्ञभूमिंहलमाकर्षणादिभिःसंस्कारोऽदीक्ष

श्रीशुकउवाच ॥ इत्युक्तायज्ञियेकालेवव्रेयुक्तान्सऋत्विजः ॥ कृष्णानुमोदितःपार्थोब्राह्मणान्ब्रह्मवादिनः ॥ ६ ॥ द्वैपायनोनरद्वाजोसुमं
तुर्गोतमोसितः ॥ वसिष्ठश्च्यवनःकण्वोमैत्रेयःकवषस्त्रितः ॥ ७ ॥ विश्वामित्रोवामदेवःसुमतिर्जैमिनिःक्रतुः ॥ पैलःपराशरोगर्गोवैशंपायनए
वच ॥ ८ ॥ अथर्वाकश्यपोधौम्योरामोभार्गवआसुरिः ॥ वीतिहोत्रोमधुछंदावीरसेनोकृतव्रणः ॥ ९ ॥ उपहूतास्तथाचान्ये [illegible] द्रोणोभीष्म
कृपादयः ॥ धृतराष्ट्रःसहसुतोविदुरश्चमहामतिः ॥ १० ॥ ब्राह्मणाःक्षत्रियावैश्याःशूद्रायज्ञदिदृक्षवः ॥ तत्रेयुःसर्वराजानोराज्ञांप्रकृतयोनृ
प ॥ ११ ॥ ततस्तेदेवयजनंब्राह्मणाःस्वर्णलांगलैः ॥ कृष्ट्वातत्रयथाम्नायंदीक्षयांचक्रिरेनृपं ॥ १२ ॥ हैमाःकिलोपकरणावरुणस्यय
थापुरा ॥ इंद्रादयोलोकपालाविरंचिभवसंयुताः ॥ सगणाःसिद्धगंधर्वाविद्याधरमहोरगाः ॥ १३ ॥ मुनयोयक्षरक्षांसिखगकिंनरचार
णाः ॥ राजानश्चसमाहूताराजपत्न्यश्चसर्वशः ॥ १४ ॥ राजसूयंसमीयुःस्मराज्ञःपांडुसुतस्यवै ॥ मेनिरेकृष्णभक्तस्यसूपपन्नमविस्मिताः
॥ १५ ॥ अयाजयन्महाराजंयाजकादेववर्चसः ॥ राजसूयेनविधिवत्प्रचेतसमिवामराः ॥ १६ ॥ ॥

यांचक्रिरेदीक्षासंस्कारयुक्तंअकुर्वन् ॥
॥ १२ ॥ उपकरणाउपस्कराः ॥ वरुणस्यराजसूयेयथाआसन्नितिशेषः ॥ १३ ॥ किंच ॥ इंद्रादयइति ॥ येइंद्रादयोदेवगणाःयेचराजादयःसमाहूताः
तत्रसमीयुःस्मतेसर्वेकृष्णभक्तस्यपांडुसुतस्यराज्ञोराजसूयमविस्मिताःसंतःसूपपन्नंसुसंपन्नंमेनिरेइत्यन्वयः ॥ १४ ॥ १५ ॥ याजकाऋत्विजः ॥ १६ ॥

राम॰

६७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तूयेहनि सोमाग्निषवदिते॥१७॥ अग्राह्यएामयपूजा तस्माद्योग्यं॥ अनेकांस्तात् योग्यानांबहुत्वे नैकस्मान्निश्चयात्॥१८॥ १९॥ सांख्यंज्ञानं
योगउपासना॥२०॥ ननुसांख्यंकेवलपरं॥ योगःसविशेषणपरःकथमुनयोरेकपरत्वं तत्राह॥ एकएवाद्वितीयोसौ॥ अतःसांख्यस्यैतत्परत्वंयुक्तं॥
विशेषणन्तत्स्यचसर्वप्रपंचस्यतन्मयत्वात्सविशेषणविषयस्ययोगस्यापियुक्तमद्वितीयपरत्वमित्याह॥ एतदात्म्यमिति॥ एषःश्रीछद्मः आत्मा य
स्ततएवदात्मातस्माद्वएतदात्म्यं नवितर्थैवनावनिर्दिष्टः॥ एतदात्म्यमिदंसर्वमितिश्रुतेः॥ अत्रहेतुः॥ आत्मनेति॥ हेसभ्याः आत्माश्रयःअ

सूर्येहत्स्ववनीपालोयाजकानसदसस्पतीन्॥ अपूजयन्महात्मानागात्यथावत्सुसमाहितः॥१७॥ सदस्याग्राह्यएा
हविर्विमृश्यंतःसन्नासदः॥ नाध्यगच्छन्ननेकात्मास्तहदेवस्तदाब्रवीत्॥१८॥ अर्हतिह्यच्युतःश्रेष्ठो भगवान्सात्वतांप
तिः॥ एषवैदेवताःसर्वादिशाकालधनादयः॥१९॥ यदात्मकमिदंविश्वंक्रतवश्चयदात्मकाः॥ अग्निराहुतयोमन्त्राः
सांख्यंयोगश्चयत्परः॥२०॥ एकएवाद्वितीयोसावेतदात्म्यमिदंजगत्॥ आत्मनात्माश्रयःसभ्याःसृजत्यवतिहंत्यजः॥
॥२१॥ विविधानीहकर्माणिजनयन्यदवेक्षया॥ ईहतेयदयंसर्वःश्रेयोधर्मादिलक्षणं॥२२॥ तस्माल्लक्ष्मा
यमहतेदीयतांपरमार्हणं॥ एवंचेत्सर्वभूतानामात्मनश्चार्हणंभवेत्॥२३॥ ॥ ॥

त्यतिरपेक्षःस्वयमजःइदंजगत्सृजति॥ अवतिहंतिचेति॥२१॥ किंच॥ विविधानीति॥ यस्यावेक्षया अनुग्रहेणविविधानिकर्माणितपो
योगादीनिजनयन्कुर्वन्ति यस्मादयंसर्वोपिजनोधर्मादिलक्षणंश्रेयईहतेसाधयतिकर्माणितत्फलानिच॥ मदधीनानीत्यर्थः॥२२॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मना क्रियमाणमर्हणमात्मनः कथं स्यात्तत्राह ॥ सर्वभूतानामात्मभूताया अनन्यदर्शिनेति निरस्तभेदमतये ॥ २७ ॥ श्रीकृष्णानुभावविस्महृदे वइत्युक्ता
त्वसीमनन्तता ॥ २८ ॥ द्विजेरितं साधु साध्विति घोषं श्रुत्वा ॥ हार्दमभिप्रायं ॥ २९ ॥ ३० ॥ हे सदस्पतयः सर्वे बालस्य भाषितं ॥ मामनन्धं मां जानीत माग्रहीत किं त
त्ययतः कृष्णो हणे संमतः ॥ ३२ ॥ ३३ ॥ तदस्यैवचास्तवोर्घः पूर्ववद्धन्नेयः गोपालइति वेदष्टथिमादिपालकइत्यर्थः ॥ कुत्सितं वेदविपरीतं लपंतीति कुलपाः

सर्वभूतात्मभूताय कृष्णायानन्यदर्शिने ॥ देयं शांताय पूर्णाय दत्तस्यानंत्यमिच्छता ॥ २७ ॥ इत्युक्त्वा स सहदेवोऽभूत्तूष्णीं कृष्णानुभाववि
त् ॥ तच्छ्रुत्वा तुष्टुवुः सर्वे साधु साध्विति सत्तमाः ॥ २८ ॥ श्रुत्वा द्विजेरितं राजा ज्ञात्वा हार्दं सभासदां ॥ समर्हयद्धृषीकेशं प्रीतः प्रणयविह्वलः ॥ २९
॥ तत्पादाववनिज्यापः शिरसा लोकपावनीः ॥ सभार्यः सानुजामात्यः सकुटुंबो वहन्मुदा ॥ ३० ॥ वासोभिः पीतकौशेयैर्भूषणैश्च महाधनैः
अर्हयित्वाश्रुपूर्णाक्षो नाशकत्समवेक्षितुं ॥ ३१ ॥ इत्थं सभाजितं वीक्ष्य सर्वे प्रांजलयो जनाः ॥ नमो जयेति नेमुस्तं निपेतुः पुष्पवृष्टयः ॥ ३२ ॥ राम.
वर्ण इत्थं निशम्य दमघोषसुतः स्वपीठादुत्थाय कृष्णगुणवर्णनजातमन्युः ॥ उत्क्षिप्य बाहुमिदमाह सदस्यमर्षी संश्रावयन्भगवते परुषाण्य
भीतः ॥ ३० ॥ ईशो दुरत्ययः काल इति सत्यवती श्रुतिः ॥ वृद्धानामपि यद्बुद्धिर्बालवाक्यैर्विभिद्यते ॥ ३१ ॥ यूयं पात्रविदां श्रेष्ठा मा मं ध्वं बाल ६८
भाषितं ॥ सदसस्पतयः सर्वे कृष्णो यत्संमतोऽर्हणे ॥ ३२ ॥ तपोविद्याव्रतधरान्ज्ञानविध्वस्तकल्मषान् ॥ परमर्षीन्ब्रह्मनिष्ठान्लोक
पालैश्च पूजितान् ॥ ३३ ॥ सदस्पतीनतिक्रम्य गोपालः कुलपांसनः ॥ यथा काकः पुरोडाशं सपर्यां कथमर्हति ॥ ३४ ॥ ॥ पारंडास्मात्त्वंसते
समाघातयतीति तथासः अकाकः कंच अकंचकाके सुखं दुःखे तेनैव विद्येते यस्य सः ॥ अकाकः ॥ आप्तकाम इत्यर्थः ॥ सायथा आप्तकामोदेवयोग्यं केवलं पुरो
डाशमात्तेनार्हति अपितु सर्वस्वमपि तु सर्वस्वमपि तथायं श्रीकृष्णोऽपि ब्रह्मर्षियोग्यं सपर्यामात्रं कथमर्हतीति किंतु आत्मसमर्पणमप्यर्हतीत्यर्थः ॥ ३४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वर्णाश्रमकुलेन्योपेतः ब्रह्मत्वात्॥ नाऽश्रमगोत्रमितिश्रुतेः॥ अत एवानधिकारित्वात्सर्वैर्धर्मैर्बहिःकृतः स्वैरवर्त्ती परमेश्वरत्वात् अत एव निर्गुणः तमादि
रहितः॥ एवंभूतोभीशानां योग्यं तुच्छं सपर्यामात्रं कथमर्हतीत्यर्थः॥ २५॥ अपि च कथं वर्णानां यो मादृशैरेषां यज्ञानां महिमा यस्मादेषां कुलं ययातिना श
प्तमपि किं सद्भिर्बहिःकृतं अपि तु शिरसा धृतं किंच अस्मदादिकुलवत् किं वृथापानरतं॥ अपि त्वतिनियताचारमित्यर्थः॥ अहो यज्ञानामेव तावदीदृशं॥
माहात्म्यं यदुकुलदृष्टस्य ययातेः शापो न प्रादुरभूदित्यादि अयं तु साक्षादीश्वरः अतः सपर्यमात्रं कथमर्हतीत्यर्थः॥ २६॥ किंच ये राजानो दुष्टानुशात

वर्णाश्रमकुलाचारोपेतः सर्वधर्मबहिष्कृतः॥ स्वैरवर्त्ती निर्गुणैर्हीनः सपर्यां कथमर्हसि॥ २५॥ ययातिनैषां हि कुलं शप्तं स
द्भिर्बहिष्कृतं॥ वृथापानरतं शश्वत्सपर्यां कथमर्हति॥ २६॥ ब्रह्मर्षिसेवितान्देशान्हित्वैते ब्रह्मवर्चसं॥ समु
द्रं दुर्गमाश्रित्य बाधंते दस्यवः प्रजाः॥ २७॥ एवमादीन्यभद्राणि बभाषे नष्टमंगलः॥ नोवाच किंचिद्भगवान्यथा सिंहः शि
वारुतं॥ २८॥ भगवन्निंदनं श्रुत्वा दुःसहं ततसभासदः॥ कर्णौ पिधाय निर्जग्मुः शापंतश्चेदिपं रुषा॥ २९॥ ॥

५ पांति तदर्थं कीराटादिदेशानप्याश्रयंति एते तु ब्रह्मर्षिसेवितानेव देशानाश्रित्य अब्रह्मवर्चसं समुद्रं दुर्गमपि हित्वा अपहायपित्वेत्यर्थः॥ बाधंते॥ तथा
याः स्यवः प्रजास्ताश्च अयमर्थः॥ वेरतस्थानियोगो ब्रह्मवर्चसं तद्विरुद्धमब्रह्मवर्चसं समुद्रा लिंगं तत्सहितं समुद्रं वेदविरुद्धं लिंगधारिणं पाखंडमित्यर्थः
तन्न लिंगं त्याजयित्वा बाधंते तं दंडयंति॥ कथंभूतं दुर्गं धर्मवित्सती तेरधर्मतया दुर्ज्ञेयमित्यर्थः॥ तथा दस्यवः रस्मृतपि प्रजावेषेणैव वर्त्तमाना न
दंडयंति अतो यदुस्मोन्यको नाम धार्मिकोस्तीति पारुष्यं तन्नानार्थमेव॥ २७॥ शिवा फेरुः तस्या रुतं श्रुत्वा यथा सिंहो न किंचिद्ब्रूते तद्वत्॥ २८॥ २९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰

६९

॥४०॥४१॥४२॥ तावदुत्थायेत्यस्यायमभिप्रायः। एष मत्पार्षदो मत्तुल्यबलः सर्वानेतान्हन्यादतो मय्येव शीघ्रं हन्तव्य इति तत्स्मरणमेवोत्थाय शिरोजहारेति॥४
३॥४४॥४५॥ नन्वेवं निंदकस्य कथं वासुदेवे प्रवेशः। तत्राह॥ जन्मत्रयेति॥ जन्मत्रये च्युतगुणितमनुवर्णितं पद्यैरं तेन संरंभमार्गावेशया तन्मयतां त

निंदां च भगवतः श्रुत्वा एवं स्वस्य रस्पजनस्य चा॥ ततो नाथेति पः सोपि यात्यधः सुदुष्टतां श्रुतः॥४०॥ ततः पांडुसुतः कृष्णमस्य केकय
स्तंजयाः॥ उदायुधाः समुत्तस्थुः शिशुपालजिघांसवः॥४२॥ ततः श्चैद्यस्तस्य संभ्रांतो जगृहे खड्गचर्मणी॥ न्यक्षिपत्स दृष्ट्वा पक्षीया
रा नाऽऽगतः सहसि मारत॥४३॥ तावदुत्थाय भगवान्स्वान्निवार्य स्वयं रुषा॥ शिरः क्षुरांतचक्रेण जहारापततो रिपोः॥४४॥ शब्दः कोला
हलो प्यासीच्छिशुपाले हते महान्॥ तस्यानुयायिनो भूपा दुद्रुवुर्जीवितैषिणः॥४४॥ चैद्यदेहोत्थितं ज्योतिर्वासुदेवमुपा
विशत्॥ पश्यतां सर्वभूतानामुल्केव भुवि खाच्च्युता॥४५॥ जन्मत्रयानुगुणितवैरसंरब्धया धिया॥ ध्यायंस्तन्मयतां यातो भावो हि
भवकारणं॥४६॥ ऋत्विग्भ्यः ससदस्येभ्यो द [illegible] क्षिणां विपुलामदात्॥ सर्वान् संपूज्य विधिवच्चक्रेऽवभृथमेकराट्॥४७॥ साधयित्वा
क्रतुं राज्ञः कृष्णो योगेश्वरेश्वरः॥ उवास कतिचिन्मासान्सुहृद्भिरभियाचितः॥४८॥ ततोनुज्ञाप्य राजानमनिच्छंतमपीश्वरः॥ ययौ स
भार्यः सामात्यः स्वपुरं देवकीसुतः॥४९॥ वर्णितं तदुपाख्यानं मया ते बहुविस्तरं॥ वैकुंठवासिनोर्जन्म विप्रशापात्पुनः पुनः॥ रा
जसूयावभृथ्येन स्नातो राजा युधिष्ठिरः॥ ब्रह्मक्षत्रसभामध्ये शुशुभे सुरराडिव॥५०॥ ॥ स्वरूपतो यातः पुनः पार्षदो बभूवेत्यर्थः
॥ अत्र हेतुः भावो नाम तादात्म्यनुध्यानं भवस्य ध्येयाकारजन्मनः कारणं पेशस्कारध्यानेन कीटादौ तथा दृष्टत्वादिति सर्वः॥४६॥ ५०॥५१॥ ॥

राम॰

६९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुरामानवाःखेचराःप्रथमाश्रमाः॥५२॥ पापं धर्मद्विषं त्रहेतुः कलिं कलेरंशं॥ अत एव कुरुकुलस्यामयं व्याधिं नाशकं॥५३॥ विताने यज्ञं॥५४॥ ॥ इति
श्रीभागवते दशमे टीकायां त्रिसप्ततितमः॥७४॥ ॥ पंचयुक्सप्ततितमे यज्ञावभृथसंभ्रमः॥ दुर्योधनस्य चास्मात्सामानने गो हृदि भ्रमात्॥१॥ दुर्योधनस्यै
कस्यैव दुःखे कारणं भक्तमुकुंदमनुवर्तति अजातशत्रोरिति॥२॥ इति श्रुतेत्वन्मुखादेवेत्यर्थः॥३॥ दुर्योधनस्यासहनकारणत्वेन यागमहोत्सवमेव पुनः

एवं सभाजिताः सर्वे सुरमानवखेचराः॥ कृष्णं क्रतुं च शंसंतः स्वधामानि मुदा ययुः॥५२॥ दुर्योधनमृते पापं कलिं कुरुकुलामयं
॥ यो न सेहे श्रियं स्फीतां दृष्ट्वा पांडुसुतस्य तां॥५३॥ य इदं कीर्तयेद्विष्णोः कर्म चैद्यवधादिकं॥ राजमोक्षं वितानं च सर्वपापैः
प्रमुच्यते॥५४॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे शिशुपालवधे चतुःसप्ततितमोऽध्यायः॥७४॥ ॥ राजोवाच॥ ॥ अ
जातशत्रोस्तं दृष्ट्वा राजसूयमहोदयं॥ सर्वे मुमुदिरे ब्रह्मन्नृदेवा ये समागताः॥१॥ दुर्योधनं वर्जयित्वा राजानः सर्षयः सुराः॥ इति
श्रुतं नो भगवंस्तत्र कारणमुच्यतां॥२॥ ॥ श्रीशुक उवाच॥ ॥ पितामहस्य ते यज्ञे राजसूये महात्मनः॥ बांधवाः परिचर्यायां तस्या
सन्प्रेमबंधनाः॥३॥ भीमो महानसाध्यक्षो धनाध्यक्षः सुयोधनः॥ सहदेवस्तु पूजायां नकुलो द्रव्यसाधने॥४॥ सतां शुश्रूष व
णे जिष्णुः कृष्णः पादावनेजने॥ परिवेषणे द्रुपदजा कर्णो दाने महामनाः॥५॥

सिंहावलोकनेन निरूपयति पितामहस्येत्यादिना ए
कादशतः॥ पुरे तस्येसतः प्राक्तनेन संबंधेन प्रेमबंधनाः प्रेमयंत्रिताः॥३॥ पूजायां सम्मानेन नानावस्तुसंपादने॥४॥ शुश्रूषणे चरणालेपनादौ॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰ ॥६॥ निरूपिताः नियुक्ताः संतो नानाकर्म्मसु प्रवर्त्तंते स्म ॥७॥ ऋत्विजश्च सदस्याश्च सभासदः बहुविदश्च ते पुस्विष्टे पुसमकल्पजि ते पुस्त न्दते प्रि
याधाकःसमर्हणमलंकारादिदक्षिणाश्चमसिधाः तामिः ॥ द्युनद्यां गंगायां ॥८॥९॥१०॥ चित्राणि ध्वजपताकाग्राणि येषु तैरि नेंद्रैः स्पंदनैः ॥ त्रवं जि

७० युयुधानो विकर्णश्च हार्दिक्यो विदुरादयः ॥ बाह्लीकपुत्राः भूर्याद्या ये चान्ये संतर्दनादयः ॥६॥ निरूपिता महायज्ञे नानाकर्म्मसु
ते तदा ॥ प्रवर्त्तंते स्म राजेंद्र राज्ञः प्रियचिकीर्षवः ॥७॥ ऋत्विक्सदस्यबहुविन्सुहृत्तमेष्वस्विष्टेषु सूनृत तत्समर्
हणादक्षिणाभिः ॥ चैद्ये च सात्वतपतेश्चरणं प्रविष्टे चक्रे नृपस्त्ववभृथस्नपनं द्युनद्यां ॥८॥ मृदंगशंखपणवधुंधुर्या
नकगोमुखाः ॥ वादित्राणि विचित्राणि नेदुरावभृथोत्सवे ॥९॥ नर्त्तक्यो ननृतुर्हृष्टा गायका यूथशो जगुः ॥ वीणावेणु
तलोन्नादस्तेषां स दिवमस्पृशत् ॥१०॥ चित्रध्वजपताकाग्रैरिभेंद्रस्यंदनार्वभिः ॥ स्वलंकृतैर्भटैर्भूपा निर्ययू रुक्ममा राम॰
लिनः ॥११॥ यदुसृंजयकांबोजकुरुकेकयकोशलाः ॥ कंपयंतो भुवं सैन्यैर्यजमानपुरःसराः ॥१२॥ सदस्यर्त्विक्‌द्वि ७०
जश्रेष्ठा ब्रह्मघोषेण भूयसा ॥ देवर्षिपितृगंधर्वास्तुष्टुवुः पुष्पवर्षिणः ॥१३॥ स्वलंकृता नरा नार्यो गंधस्रक्‌भू
षणांबरैः ॥ विलिंपंत्योऽभिषिंचंत्यो विजह्रुर्विविधै रसैः ॥१४॥ तैलगोरसगंधोदहरिद्रासांद्रकुंकुमैः ॥ पुंभिर्लिप्ताः प्रलिंपंत्यो विजह्रुर्वारयोषितः ॥
॥ अश्वैश्च नैवं चतुरंगैः सैन्यैर्निर्ययुः ॥११॥ यजमानो युधिष्ठि
रः पुरःसरो येषां ते ॥१२॥ सदस्या ऋत्विजो ये च द्विजश्रेष्ठा निर्ययुः ॥१३॥ किंच गंधादिभिः स्वलंकृता नरा नार्यश्च मिथो विजह्रुः ॥१४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसानेवाह तैलेतिकिंच सांद्रकुंकुमादिभिः पुंभिः लिप्ताः तान प्रतिपं स्त्रोवारयोषितश्च विज कुः ॥१५॥ न निर्गुता रथादिया नैर्न, देव्यो राजपत्न्यो नि
रगमत् ॥ निरगुः एतदुपलक्षुं विमानवरे देव्यो यथा तद्वत् ॥ मातुलेयैः सखिभिश्च परितः सिच्यमानाः सव्रीडेन हासेन विकसंतिवदनानि यासां ताः ॥१६

देव्यः तैलगौरसगंधोद्वहरिद्रासांद्रकुंकुमैः ॥ पुंभिर्लिप्ताः प्रलिंपत्स्तोविजकुर्वारयोषितः ॥१५॥ गुप्तान्निर्गिर
गमन्नुपलक्षुमेतद्देव्यो यथादिवि विमानवरैर्नृ ॥ तामातुलेयसखिभिः परिषिच्यमानास्सव्रीडहासवि
कसवदना विरेजुः ॥१६॥ तादेवरानुतसखीन्तसिषिचुर्दतीभिः ॥ क्लीनांबराविवृतगात्रकुचोरुमध्याः ॥ श्रीसुक्र
सुक्ककबराच्यवमानमाल्याः शोनं दधुर्मलधियां रुचिरैर्विहारैः ॥१७॥ ससम्राडुथमारूढः सदश्वं रुक्ममालि
नं ॥ मरीचपत्न्यपत्नीभिः क्रियाभिः कतुराडिव ॥१८॥ पत्नीसंयाजावभृथेष्विरिताते तमृत्विजः ॥ आचांतं स्नाप
यांचक्रुर्गंगायां सहहृष्मया ॥१९॥ देवदुंदुभयो नेदुर्नरदुंदुभिभिः सह ॥ मुमुचुः पुष्पवर्षाणि देवर्षिपितृमानवाः
॥२०॥ सस्नुस्तत्र ततः सर्वे वर्णाश्रमयुता नराः ॥ महापातक्यपि यतः सद्यो मुच्येत किल्बिषात् ॥२१॥

॥ देवरा जनपति च्यातृन् तेउतसखीन् अपि ॥ दतीभिः उदकनोदचर्मयंत्रैः ॥ सेचनपात्रैश्च ॥ मलधियां कामिनां ॥१७॥ क्रियाभिः अंगक्रियाभिः कतु
राट् सम्राट् रोराजसूय इव ॥ १८ ॥ पत्नीसंयाजो यागविशेषः अवभृथसंबंधि आवभृथ्यं च तेष्विरिताता न तु स्नापये त्यर्थः ॥१९॥२०॥२१॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰

अहते नूतने ॥ आनर्च अर्चितवान् ॥२२॥२३॥ सुराणामिव रुक् कांतिर्येषां ते मणिकुंडलैः सहिताः स्रगुष्णीषादयो येषां ते कुंडलयुगेनाल

७९

अथ राजाहिते क्षौमे परिधाय स्वलंकृतः ॥ ऋत्विक्सदस्यब्रह्मादीनानर्चाभरणांबरैः ॥ २२॥ बंधुज्ञातिनृपान्मित्रसुहृदो
न्यांश्च सर्वशः ॥ अभीक्ष्णं पूजयामास नारायणपरो नृपः ॥२३॥ सर्वे जनाः सुररुचो मणिकुंडलस्रगुष्णीषकंचुकदुकूलम र
हार्घ्यहाराः ॥ नार्यश्च कुंडलयुगालकवृंदजुष्टवक्त्रश्रियः कनकमेखलया विरेजुः ॥२४॥ अथर्त्विजो महाशीलाः सदस्या
ब्रह्मवादिनः ॥ ब्रह्मक्षत्रियविट्शूद्रा राजानो ये समागताः ॥ देवर्षिपितृभूतानि लोकपालाः सहानुगाः ॥ पूजितास्तमनुज्ञाप्य
स्वधामानि ययुर्नृप ॥२६॥ हरिदासस्य राजर्षे राजसूयमहोदयं ॥ नैवातृप्यन् प्रशंसंतः पिबन्मर्त्योमृतं यथा ॥२७॥ ततो यु
धिष्ठिरो राजा सुहृत्संबंधिबांधवान् ॥ प्रेम्णा निवारयामास कृष्णं त्यागकातरः ॥२८॥ भगवानपि तत्रैव न्यवासीत्तत्प्रियंक त
रः ॥ प्रस्थाप्य यदुवीरांश्च सांबादींश्च कुशस्थलीं ॥२९॥ इत्थं राजा धर्मसुतो मनोरथमहार्णवं ॥ सुदुस्तरं समुत्तीर्य कृष्णेना
सीद्गतज्वरः ॥३०॥ एकदांतःपुरे तस्य वीक्ष्य दुर्योधनः श्रियं ॥ अतप्यद्राजसूयस्य महित्वं चाच्युतात्मनः ॥ ३१॥ ॥ ॥

राम॰

७९

कवृंदेन जुष्टा वक्त्रश्रीर्यासां ताः ॥२४॥२८॥२९॥ गतज्वरो निश्चिंत आसीत् ॥३०॥ अच्युते आत्मा यस्य तस्य ॥३१॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नरेंद्राणां लक्ष्मीः लक्ष्म्यः विस्तृतयः विश्वसृजा मयेन उपक्लृप्ताः रचिताः रचितास्ताभिः सह कुरुराट् दुर्योधनो तप्यत॥ ३१॥ महिषीसहस्रमिति बहुत्वोप
लक्षणं॥ कणद्भिरंघ्रिभिः शोभा यस्य मध्ये सुचारु चारुमध्यमित्यर्थः॥ कुचकुंकुमैः शोणा हारा यस्य तत्॥ श्रीमंति मुखानि यस्य तत्॥ चलैः कुंडलैः कुंत
लैश्च आढ्यं संपन्नम शोभतेति शेषः॥ ३३॥ कापि करा विसृज विरेजे इति शेषः॥ स्वस्य च स्नुषा हिता हितज्ञा पकेना॥ ३४॥ ३५॥ मानी साहंकारः किरीटं च माला

यस्मिन्नरेंद्रदितिजेंद्रसुरेंद्रलक्ष्मीर्नाना विभांति किल विश्वसृजोपक्लृप्ताः॥ ताभिः पतीन् द्रुपदराजसुतोपतस्थे यस्यां विषक्त
हृदयः कुरुराडतप्यत्॥ ३२॥ यस्मिंस्तदा मधुपतेर्महिषीसहस्रं श्रोणीभरेण नतकैः कणदंघ्रिशोभं॥ मध्ये सुचारु कुचकुं
कुमशोणहारं श्रीमन्मुखं प्रचलकुंडलकुंतलाढ्यं॥ ३३॥ सभायां मयक्लृप्तायां कापि धर्मसुतोधिराट्॥ वृतोनुजैर्बंधुभिश्च स्वदृशाभिश्च स्वहस्मेना
पि स्वचक्षुषा॥ ३४॥ आसीनः कांचने साक्षादासने मघवानिव॥ पारमेष्ठ्यश्रिया जुष्टः स्तूयमानश्च बंदिभिः॥ ३५॥ तत्र दुर्योधनो मानी
परीतो भ्रातृभिर्वृतः॥ किरीटमाली न्यविशदसिहस्तः क्षिपन् रुषा॥ ३६॥ स्थलेभ्यगृह्णाद्वस्त्रांतं जलं मत्वा स्थले पतत्॥ जले च स्थल
वद्भ्रांत्या मयमायाविमोहितः॥ ३७॥ जहास भीमस्तं दृष्ट्वा स्त्रियो नृपतयोपरे॥ निवार्यमाणा अप्यंग राज्ञा कृष्णानुमोदिताः॥ ३८॥

च विद्यते यस्य सः॥ न्यविशत् आविवेश॥ क्षिपन् क्षास्यादीनधिक्षिपन्॥ ३६॥ तत्र स्थले वस्त्रांतमभ्यगृह्णात् आकुंचितवान्॥ कुतः तस्मिन् स्थ
ले एव भ्रांत्या जलं मत्वा जले च अपतत्॥ कुतः स्थलवत् भ्रांत्या॥ ३७॥ ३८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰
७२

त्नुवो भरं जिहीर्षुरिति॥ अथ संपादिते नकुलद्वीजेन कुरूणां संहारं करिष्यामीति मत्वेति किंच॥ यस्य दृशा दृष्टिमात्रेण दुर्योधनो भ्रमति स्म भ्रां
पा तिं प्राप॥ मयमाँतु निमित्तमात्रं॥ सः भूभारहरणस्य बीजं दुर्योधनस्य भ्रमं नीमादिहास्ये न च तस्य पराभवं विधास्यन्तूष्णीमासीदित्यर्थः॥ ३९॥४०॥ ॥

स व्रीडितोवाग्वदनो रुषाज्वलन्निःक्रम्य तूष्णीं प्रययौ गजाह्वयं॥ हाहेति शब्दः सुमहानभूत्सतामजातशत्रुर्विमना इवा
भवत्॥ बभूव तूष्णीं भगवान्भुवो भरं समुज्जिहीर्षुर्भ्रमति स्म यद्दृशा॥ ३९॥ एतत्तेऽभिहितं राजन्यत्पृष्टोहमिह त्व
या सुयोधनस्य दौरात्म्यं राजसूये महाक्रतौ॥ ४०॥ ॥इति श्रीभागवते महापुराणे दशमस्कंधे दुर्योधनमानभंगो ना
म पंचसप्ततितमोऽध्यायः॥ ७५॥ ॥श्रीशुक उवाच॥ ॥अथान्यदपि कृष्णस्य शृणु कर्माद्भुतं नृप॥ क्रीडानरशरीरस्य
यथा सौभपतिर्हतः॥ १॥ शिशुपालसखः शाल्वो रुक्मिण्युद्वाह आगतः॥ यदुभिर्निर्जितः संख्ये जरासंधादयस्तथा
॥ २॥ शाल्वः प्रतिज्ञामकरोच्छृण्वतां सर्वभूभुजां॥ अ यादवीं करिष्ये क्ष्मां पौरुषं मम पश्यत॥ ३॥ ॥ ॥ दम॰ ७२
१

इति श्रीभागवते महापुराणे दशमस्कंधे पंचसप्ततितमोऽध्यायः॥ ॥७५॥ ॥ततः षट्सप्ततितमे हस्मी शाल्वमहामृधे॥ द्युमद्दाप्रहारे
णारणात्प्रद्युम्ननिर्गमः॥ १॥ संपाद्य धर्मराजस्य राजसूयमहोत्सवं॥ निहत्य सौभराजानं रीतमौ धोपारमदच्युतः॥ २॥ ॥१॥ ॥२॥ ॥३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्रतसहं सह्यतत्पांशुमुष्टिमेकां यसन्नजडीक्षयन्॥७॥संवत्सरांत इति॥ आशुतोषोपि भगवान् उमापतिः॥ श्रीहरस्य विदिषि न्नात्मेवरस्य वैफल्यं मन्यमानो
नश्रीघ्रं प्रादुरभूत्॥ तस्यातिनिर्बंधमालक्ष्य संवत्सरांते वरेण छंदयामास इच्छां कारितवान् वरं वृणीष्वेत्युवाचेत्यर्थः॥७६॥ तथेति प्रतिज्ञाय यगिरि

इति मूढः प्रतिज्ञाय देवं पशुपतिं प्रभुं॥ आराधयामास तपपांशुमुष्टिसहस्रभुग् सन्॥४॥ संवत्सरांते भगवानाशुतोष उमापतिः॥
वरेण छंदयामास त्वं त्वं शरणमागतं॥ देवासुरमनुष्याणां गंधर्वोरगरक्षसां॥ अजेयं कामगं चैव बसे सयानं हस्तिनीषणं॥६॥ त
थेति गिरिशा दिष्टो मयः परपुरंजयः॥ पुरं निर्माय शालत्वाय प्राकारौ न मयस्मयं॥७॥ सलज्जाकामगं यानं तमोधाम दुरास
दं॥ पयोधिरवतीत्यालोवैरं हस्ति हतं स्मरन्॥८॥ निरुध्यसेनया शालो महत्यान्नरतर्षभः॥ पुरं सबैजोपवनान्युद्यानानि च स तृ.८.पः
वंशाः॥९॥ सगोपुराणि द्वाराणि प्रासादाट्टालतोलिकाः॥ विहारान् स विमानाग्र्यान्निपेतुः शस्त्रपाणयः॥१०॥ शिलाद्रुमाश्मा श
नयः सर्पा आसारशर्कराः॥ प्रचंडश्चक्रवातोऽभूद्रजसाच्छादिता दिशः॥११॥ ॥

शौनादिष्टः॥ अयस्मयं लोहमयं पुरं सौभसंज्ञं निर्माय रक्षयि
ता प्रादात्॥७॥ तमसोंधकारस्य धाम स्थानं आश्रयं जनैर्दुरासदं दुःप्रापं॥८॥९॥ प्रासादाग्रहाः अट्टालाः तदुपरिगृहाः तोलिकास्तत्सर्थर्यं तक्र द्यानि
ताः विहारान् क्रीडास्थानानि च बने जकिंचविमानाग्र्यान्यात्रस्माछस्त्र दृष्ट्याद्यरूपेतु॥१०॥ आसारशर्कराः धारासंपातवज्जशिलोपमाः॥११॥ ॥
लो:

ना॰ द॰ उ॰

७३

त्रां सुखं तान्स्थापयत॥ १२॥ १३॥ १४॥ १५॥ तुमुले महाकलैरोमहर्षणैरौद्रं॥ २६॥ नैशं निशि जन्वं तमः॥ उष्मगुः सूर्यस्त्वष्टा॥ २७॥ किंच गाधेतिस्व
र्णमयानि पुंखानि १९ श्रृंतायेषां तैः॥ अयोलोहं तन्मयानि मुखाग्राणि येषां तैः॥ ध्वजिनीपालं सेनान्यं सन्नतानि निम्नानि पर्वाणि ग्रंथयो
॥ २० ॥ इत्यर्धमात्रं सौनेन हुत्त्वस्य तगरं त्र्यं॥ नामयपद्यतशं राजनत्रिपुरेणयथा महीं॥ १२॥ प्रद्युम्नो भगवान्वीक्ष्य बाध्यमानानि
जाः प्रजाः॥ मानैश्छेत्तस्य धन्वीरो रथारूढो महारथः॥ १३॥ सात्यकिश्चारुदेष्णश्च सांबोक्रूरः स हानुजैः॥ हार्दिक्यो नानुविंदश्च गदश्च
शुकसारणौ॥ १४॥ अपरे च महेष्वासा रथयूथपयूथपाः॥ निर्ययुर्दंशिता गुप्ता रथेभाश्वपदातिभिः॥ १५॥ ततः प्रववृते युद्धं शाल्वा
नां यदुभिः सह॥ यथाऽसुराणां विबुधैस्तुमुलं रोमहर्षणं॥ १६॥ ताश्च सौभपतेर्मायादिव्यास्त्रै रुक्मिणीसुतः॥ क्षणेन नाशयामा
स नैशं तमइवोष्णगुः॥ १७॥ विव्याध पंचविंशत्या स्वर्णपुंखैरयोमुखैः॥ शाल्वस्य ध्वजिनीपालं शरैः सन्नतपर्वभिः॥ १८॥ शतेना ता
डयच्छाल्वमेकैकेनास्य सैनिकान्॥ दशभिर्दशभिर्नेतॄन्वाहनानि त्रिभिस्त्रिभिः॥ १९॥ तदद्भुतं महत्कर्म प्रद्युम्नस्य महात्मनः॥ दृ
ष्ट्वा तं पूजयामासुः सर्वे स्वपरसैनिकाः॥ २०॥ बहुरूपैकरूपं तद्दृश्यते न च दृश्यते॥ मायामयं मयकृतं दुर्विभाव्यं परैरभूत्॥ २१॥

रामः

७३

येषां तैः॥ १८॥ सैनिकान्नेतॄन्नेतॄन्सारथीन्॥ १९॥ स्वपरसेनयोर्वर्तमानाः सर्वे पूजयामासुः संमानितवंतः॥ २०॥ कदाचिद्बहुरूपं कं
दाचिदेकरूपं कंचिद्दृश्यते॥ कंचिन्न दृश्यते॥ एवं दुर्विज्ञाव्यं परैरवितर्क्यमभूत्॥ २१॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं च क्वचिदिति एवं तद्दुःखस्थितमनवस्थितं चान्ततः ॥२२॥२३॥ अग्निवद्दाहकः ॥ अर्कवद्युगपत्सर्वतः संस्पर्शो येषां तैः ॥ आशीविषवदेकदेशस्पर्श-
मात्रेण मारकत्वाद्दुःसहैः ॥ दुःसहैः पीयमानं पुरमनीकानि च यस्य ॥ पौरैर्यदुभिरीरितैः मुक्तैः ॥२४॥ नष्टा र्दिता अपि स्वं स्वं रणं त्यक्त्वा स्वां स्वां युधभूमिं ॥२५॥

क्वचिद्भूमौ क्वचिद्व्योम्नि गिरिमूर्ध्नि जले क्वचित् ॥ अलातचक्रवद्भ्राम्यत्सौभं तद्दुःखस्थितं ॥२२॥ यत्र यत्रोपलक्ष्येत ससौभः सहसैनिकः ॥ शाल्वस्तत्र तत्रोमुंचञ्छरान्सात्वतयूथपाः ॥२३॥ शरैरग्न्यर्कसंस्पर्शैराशीविषदुरासदैः ॥ पीड्यमानपुरानीकः शाल्वो मुह्यत्परेरितैः ॥२४॥ शाल्वानीकपशस्त्रौघैर्वृष्णिवीरा नृशार्दिताः ॥ न तत्यजू रणं स्वं स्वं लोकद्वयजिगीषवः ॥ २५॥ शाल्वामात्यो द्युमान्नाम प्रद्युम्नं प्राक्प्रपीडितः ॥ आसाद्य गदया मौर्व्या हत्वा व्यनदद्बली ॥२६॥ प्रद्युम्नं गदया शीर्ण- न
वक्षःस्थलमरिंदमं ॥ अपोवाह रणात्सूतो धर्मविद्दारुकात्मजः ॥२७॥ लब्धसंज्ञो मुहूर्त्तेन कार्ष्णिः सारथिमब्रवीत् ॥
अहो असाध्विदं सूत यद्रणान्मेपसर्पणं ॥२८॥ न यदूनां कुले जातः श्रूयते रणविच्युतः ॥ विना मत्क्लीबचित्तेन सूतेन प्राप्तकल्मषात् ॥२९॥ किं नु वक्ष्येभिसंगम्य पितरौ रामकेशवौ ॥ युद्धात्सम्यगपक्रान्तः पृष्टस्तत्रात्मनः क्षमं ॥ ३०॥ ॥

मौर्व्या कार्ष्ण्यायसमय्या महत्या प्रहृत्य ॥२६॥ अपोवाह अपनीतवान् ॥२७॥२८॥ मत्तः मत्तो विना क्लीबं चित्तं यस्य तेन त्वया सूतेन ॥२९॥ पितरौ रामकृष्णावपि संगम्य तत्पार्श्वं गत्वा ताभ्यां पृष्टः तयोः किं नु वक्ष्यामीति ॥ ३०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰ भ्रातृजामयश्च भ्रातृनार्य्यः निश्चितं मत्क्लैब्यं कथयिष्यंति॥ तत्कथनमनुकरोति॥ तत्कथनमनुकरोति॥ ३१॥ विज्ञो हे समर्थ एतत् अपसर्प्पणं धर्म्म मा
७४ हस्तकृतं॥ ३२॥ अपोवाहितः॥ अपनीतः उपसृष्टः॥ उपसर्गं पीडां प्राप्त इति ज्ञात्वा यतः परेण शत्रुणा गदया हतः सन् मूर्छितो विसंज्ञतां गतो भवानिति

क्लैब्यं मे कथयिष्यंति हसंत्यो भ्रातृजामयः॥ क्लैब्यं कथं कथं वीर तवान्यैः कथ्यतां मृधे॥ ३१॥ ॥ सारथिरुवाच॥ ॥ धर्मं विजा
नतायुष्मन्कृतमेतन्मया विभो॥ सूतः कृच्छ्रगतं रक्षेद्रथिनं सारथिं रथी॥ ३२॥ एतद्विदित्वा तु भवान्मयापोवाहितो रणात्॥ उ
पसृष्टः परेणेति मूर्छितो गदया हतः॥ ३३॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे शाल्वयुद्धे षट्सप्ततितमोऽध्यायः॥ ॥
श्रीशुक उ॰॥ ॥ स उपस्पृश्य सलिलं दंशितो धृतकार्मुकः॥ नय मां द्युमतः पार्श्वं वीरस्येत्याह सारथिं॥ १॥ विधमंतं स्वसैन्यानि द्युमंतं
रुक्मिणीसुतः॥ प्रतिहत्य प्रत्यविध्यन्नाराचैरष्टभिः स्मयन्॥ २॥ चतुर्भिश्चतुरो वाहान्सूतमेकेन चाहनत्॥ द्वाभ्यां धनुश्च के राम॰
तुं च शरेणान्येन वै शिरः॥ ३॥ गदसात्यकिसांबाद्या जघ्नुः सौभपतेर्बलं॥ पेतुः समुद्रे सौभेयाः सर्वे संछिन्नकंधराः॥ ४॥ ॥ ७४

॥ ३३॥ ॥ इति श्रीभागवते द॰ षट्सप्ततितमः॥ ७६॥ ॥ सप्तसप्ततितमे नानामायाविचक्षणः॥ कृष्णेनागत्य शाल्वस्तु हतः सौभं च चूर्णितं॥ १॥ दं
शितः सन्नद्धः॥ १॥ विधमंतं क्षेपयंतं॥ प्रतिहत्य प्रतिरुध्य॥ २॥ अष्टानां विनियोगमाह चतुर्भिरिति॥ ३॥ सौभेयाः सौभस्थाः॥ ४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवानां रात्रीणां समाहारो नवरात्रं ॥ त्रयाणां नवरात्राणां समाहारस्त्रिणवरात्रं सप्तविंशतिरहोरात्राणीत्यर्थः ॥ तुमुलमाकुलं उल्बणं घोरं ॥ ५ ॥ प
रमतमुपपन्नस्यापि ॥ इंद्रप्रस्थं गत इत्यादिना ॥ ६ ॥ स्वगतमेव पथि चिंताविजृंभितमान्नाषणं ॥ ७ ॥ आर्यमिश्राभिसंगतो बलनंदसहितः दुर्निमित्तदर्शी

एवं यदूनां शाल्वानां निघ्नतामितरेतरं ॥ युद्धं त्रिनवरात्रं तदभूत्तुमुलमुल्बणं ॥ ५ ॥ ॥ श्रीशुक उवाच ॥ ॥ इंद्रप्रस्थं गतः कृष्ण आ
हूतो धर्मसूनुना ॥ राजसूयेथ निर्वृत्ते शिशुपाले च संस्थिते ॥ ६ ॥ कुरुवृद्धाननुज्ञाप्य मुनींश्च ससुतां पृथां ॥ निमित्तान्यतिघो
राणि पश्यन्द्वारवतीं ययौ ॥ ७ ॥ आह चाहमिहायातश्चार्यमिश्राभिसंगतः ॥ राजन्याश्चैद्यपक्षीया नूनं हन्युः पुरीं मम ॥ ८ ॥
वीक्ष्य तत्कदनं स्वानां निरूप्य पुररक्षणं ॥ सौभं च शाल्वराजं च दारुकं प्राह केशवः ॥ ९ ॥ रथं प्रापय मे सूत शाल्वस्यांतिकमा
शु वै ॥ संभ्रमस्ते न कर्तव्यो मायावी सौभराडयं ॥ १० ॥ इत्युक्तश्चोदयामास रथमास्थाय दारुकः ॥ विशंतं ददृशुः सर्वे स्वे
परे चारुणानुजं ॥ ११ ॥ शाल्वश्च कृष्णमालोक्य हतप्रायबलेश्वरः ॥ प्राहरत्कृष्णसूताय शक्तिं भीमरवां मृधे ॥ १२ ॥ ॥

नोऽहृत्चित्तएव चिंतयत् ॥ ८ ॥ द्वारकामागतस्स्वानां कदनं वीक्ष्य सौभं च शाल्वराजं च वीक्ष्य रामं पुररक्षणं प्रति निरूप्य दारुकं प्राहेत्य
न्वयः ॥ ९ ॥ तेलया ॥ १० ॥ आस्थाय सम्यगधिष्ठाय अरुणानुजं ध्वजे वर्त्तमानं गरुडं ध्वजं ॥ ११ ॥ हतप्रायस्सबलस्येश्वरः ॥ १२ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० उ० ॥१३॥ तं च शाल्वं शरसंदोहैः खे सूर्य इव रश्मिभिरिति॥ सुनीलबलविपुलाभ्रादिनिराकाशोपमासौ नग्न॥ अचिंत्यवेग लब्धा कुलादिशिनिःशराराणां रश्मि
७५ साद्दृश्यमुपयन्नेनैव रश्मिभिव तूशरजालप्रसारणा सूर्यतुल्यः श्रीकृष्ण इति॥१४॥ दोर्बाहुः॥१५॥१६॥ स खलु शिशुपालसखईश्वता अस्माकं प्रमत्तः अन

तामापतंतीं नभसि महोल्कामिव रंहसा॥ भासयंती दिशः शौरिः सायकैः शतधाछिनत्॥१३॥ तं च षोडशभिर्विद्ध्वा बाणैः सौभं
च खे भ्रमत्॥ अविध्यच्छरसंदोहैः खं सूर्य इव रश्मिभिः॥१४॥ शाल्वः शौरेस्तु दोःसव्यं सशार्ङ्गं शार्ङ्गधन्वनः॥ बिभेद न्यपतद्धस्ताच्छार्ङ्ग
मासीत्तदद्भुतं॥१५॥ हाहाकारो महानासीद्भूतानां तत्र पश्यतां॥ विनद्य सौभराडुच्चैरिदमाह जनार्दनं॥१६॥ यत्त्वया मूढ नः सख्यु
र्भ्रातुर्भार्या हृते स तां॥ प्रमत्तः स सभामध्ये त्वया व्यापादितः सखा॥१७॥ तं त्वाद्य निशितैर्बाणैरपराजितमानिनं॥ नयाम्यपुनरावृत्तिं य
दि तिष्ठेर्ममाग्रतः॥१८॥ श्रीभगवानुवाच॥ वृथा त्वं कत्थसे मूढ न पश्यस्यंतिकेंतकं॥ पौरुषं दर्शयंति स्म शूरा न बहुभाषिणः॥ इत्यु
क्त्वा भगवान् शाल्वं गदया भीमवेगया॥ तताड जत्रौ संरब्धः स चकंपे वमन्नसृक्॥ गदायां सन्निवृत्तायां शाल्वस्त्वंतरधीयत॥२०॥ त राम०
तो मुहूर्त आगत्य पुरुषः शिरसाच्युतं॥ देवक्या प्रहितोस्मीति नत्वा प्राह वचो रुदन्॥२१॥ कृष्ण कृष्ण महाबाहो पिता ते पितृवत्सल॥ ७५
बद्ध्वापनीतः शाल्वेन सौनिकेन यथा पशुः॥२२॥ निशम्य विप्रियं कृष्णो मानुषीं प्रकृतिं गतः॥ विमनस्को घृणी स्नेहाद्बभाषे प्राकृतो यथा॥२३॥

बहितः आपादितो निहतः॥१७॥ अपराजितो हमितिमानवंतं॥ अपुनरावृत्तिं मृत्युं यदि तिष्ठेः स्यास्यसि॥१८॥१९॥२०॥२१॥२२॥ घृणी दयावान्॥२३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं॥२४॥ जनिता जनयिता ईशश्चेत॥२६॥२७॥ स्वबोधः स्वतःसिद्धज्ञानवानपि स्वजनस्नेहतः प्रह्वतौ मानुषस्वभावेउपक्रतः निमग्नः॥ आस्ते
अतिष्ठत॥ ततस्तत्र सर्वमासुरीं मायां प्रबुध्य तमायेयमिति ज्ञातवान्॥२८॥ स्वाप्नं स्वप्नपंचेयथा॥२९॥ एवं परमतमुपन्यस्य तं निराकरोति॥ एवमिति

कथं राममसंभ्रांते जित्वाजेयं सुरासुरैः॥ अल्पेनाल्पीयसा नीतः पिता मे बलवान् विधिः॥२४॥ इति ब्रुवाणे गोविंदे सौ
भराट् प्रत्युपस्थितः॥ वसुदेवमिवानीय कृष्णं चेदमुवाच ह॥२५॥ एतेष जनितातातो यदर्थमिह जीवसि॥ वधिष्ये वीक्ष
तस्ते मुमीशश्चेत्पाहि बालिश॥२६॥ एवं निर्भर्त्स्य मायावी खड्गेनानकदुंदुभेः॥ उत्कृत्य शिर आदाय खस्थं सौभं समावि
शत॥२७॥ ततो मुहूर्त्तं प्रकृतावुपप्लुतः स्वबोध आस्ते स्वजनानुषंगतः॥ महानुभावस्तदबुध्यदासुरीं मायां स शा
ल्वप्रसृतां मयोदितां॥२८॥ न तत्र दूतं न पितुः कलेवरं प्रबुध आजौ समपश्यदच्युतः॥ स्वाप्नं यथा चांबरचारिणं रिपुं
सौभस्थमालोक्य निहंतुमुद्यतः॥२९॥ एवं वदंति राजर्षे ऋषयः केच नान्विताः॥ यत्स्ववाचो विरुध्येत नूनं तेन स्मरंत्युत॥३०॥

॥ केचकचन॥ नान्विताः अन्विनेताः पूर्वापरानुसंधानरहिताः नराह॥ यत्स्ववाच इति॥ तन्नानुस्मारयंतीत्यर्थः॥ अयमभिप्रायः॥ न तावत्तएज
स्त्वयार्थः॥ रामेणसहागतः श्रीकृष्णः संकर्षणमनुज्ञाप्येति पूर्वमुक्तवान्॥३०॥ असंभावितं चेत्याह॥ ॥ब्रू॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰

७६

कथं शोकमोहाविति ॥ नयं वायुर्निमित्तदर्शनहतं ॥ नूनं हन्तुः पुरी ममेति यदुक्तं ॥ यच्च हस्तात् शार्ङ्गं स्रंसमपतदित्युक्तं तद्द्वयं शङ्केति ॥ अज्ञे पुंसि संभवो येषां ते ॥ अखंडिता
नि विज्ञानज्ञानैश्वर्याणि यस्य सः ॥ तत्र विज्ञानं स्वरूपविषयं ज्ञानं बाह्यविषयं ॥ ३१ ॥ किं च यस्य पादसेवया ऊर्जिता पुष्कलाया आत्मविद्या तया ॥ अनादिरूपा
या आत्मविपर्यययग्रहस्तं ॥ अहं हन्ता सुखी दुःखीत्यादिलक्षणः ॥ तं हिन्वंति नाशयंति संतः ऐश्वरं परं च ॥ तस्य सतां गतेः कुतो नु मोह इति अतो नैतद्वचनं

कशोकमोहौ स्नेहो वा भयं वा येऽज्ञसंभवाः ॥ क्व चाखंडितविज्ञानज्ञानैश्वर्यस्त्वखंडितः ॥ ३१ ॥ यत्पादसेवोर्जितयात्मविद्यया हिन्वंत्यना
द्यात्मविपर्ययग्रहं ॥ लभन्त आत्मीयमनन्तमैश्वरं कुतो नु मोहः परमस्य सद्गतेः ॥ ३२ ॥ तं शस्त्रपूगैः प्रहरंतमोजसा शाल्वं शरैः शौरि
रमोघविक्रमः ॥ विध्वाच्छिनद्वर्म धनुः शिरोमणिं सौभं च शत्रोर्गदया रुरोज ह ॥ ३३ ॥ तत्कृष्णहस्तेरितया विचूर्णितं पपात तोये गदया
सहस्रधा ॥ विसृज्य तद्भूतलमास्थितो गदामुद्यम्य शाल्वोऽच्युतमभ्यगाद्द्रुतं ॥ ३४ ॥ आधावतः सगदं तस्य बाहुं भल्लेन छित्वाथ रथांगमद्
भुतं ॥ वधाय शाल्वस्य लयार्कसंनिभं बिभ्रद्बभौ सार्क इवोदयाचलः ॥ ३५ ॥ जहार तेनैव शिरः सकुंडलं किरीटयुक्तं पुरुमायिनो हरिः
वज्रेण वृत्रस्य यथा पुरंदरो बभूव हाहेति वचस्तदा नृणां ॥ ३६ ॥ तस्मिन्निपतिते पापे सौभे च गदया हते ॥ नेदुर्दुंदुभयो राजन्दिवि दे
वगणेरिताः ॥ सखीनामपचितिं कुर्वन्दंतवक्रो रुषाभ्यगात् ॥ ३७ ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे सौभशाल्ववधो नाम स
प्तसप्ततितमोऽध्यायः ॥ ७७ ॥ ॥ सत्यमित्यर्थः ॥ ३२ ॥ किं तर्हि सत्यं तदाह तं शस्त्रपूगैरिति ॥ वर्म कवचं ॥ रुरोज बभंज ॥ ३३ ॥ ३४ ॥ लयार्क
संनिभं प्रलयकालीनसूर्यसदृशं ॥ ३५ ॥ ३६ ॥ ३७ ॥ ॥ इति भा॰ टीकायां दशमे सप्तसप्ततितमोऽध्यायः ॥ ॥ ७७ ॥ ॥

राम॰

७६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततोऽष्टसप्ततितमे दंतवक्रविदूरथौ॥ हत्वा हरिः पुरे रेमे रामः सूतं ततोऽवधीत॥१॥ सखीनाम पवितिंकुर्वन्नित्युक्तं तदेवाह॥ शिशुपालस्येति पारोक्ष्यसौहृदं
परोक्षे करणीयं सुहृत्कृत्यं॥१॥२॥मत्स्य धावतिरुरोधः॥३॥ मुकुंदं प्राह दुर्मदइत्यादेरधिक्षेपपर तास्फुटैव परमार्थस्तु दुर्मदः प्राह॥ मुकुंदं तृतीयेजन्मनि सु
क्रियानार्थमागतं अद्येति जन्मत्रयेनिष्पमाणे यत्र स्वज्ञापावस्थानेनवान्ममस्वामी दृष्टिपथंगतः प्राप्तः॥एतद्दिष्ट्या दिष्ट्या नंदनंदनेति हर्षवीप्सा किंच॥४॥
हेश्रीकृष्ण त्वमस्माकं मातुलेयो बंधुः॥ एवमपि मित्रध्रुक् मित्राणि घातितवान् मां च जिघांससि तस्मात्कंत्वत्तो मृत्युः सतकायनुग्रह प्राप्तोनूनं दुर्निवार एवं॥
श्रीशुक उवाच॥ ॥शिशुपालस्य शाल्वस्य पौंड्रकस्यापि दुर्मतिः॥ परलोकगतानां च कुर्वन्पारोक्ष्यसौहृदं॥१॥एकः पदातिः संक्रुद्धो
गदापाणिः प्रकंपयन्॥ पद्भ्यामिमां महाराज महासत्वो व्यदृश्यत॥२॥ तं तथायांतमालोक्य गदामादाय सत्वरः॥ अवप्लुत्य रथात्
कृष्णः सिंधुं वेलेव प्रत्यधात॥३॥गदामुद्यम्य कारूषो मुकुंदं प्राह दुर्मदः॥ दिष्ट्या दिष्ट्या भवानद्य मम दृष्टिपथं गतः॥४॥ त्वं मातु
लेयो नः कृष्ण मित्रध्रुङ्मां जिघांससि॥ अतस्त्वां गदया मंदहनिष्ये वज्रकल्पया॥५॥ तर्ह्यानृण्यमुपैम्यज्ञ मित्राणां मित्रवत्सल
बंधुरूपमरिं हत्वा व्याधिं देहचरं यथा॥६॥ ॥ अतस्त्वामेतावतामात्रमहंपाचेकिं पाचे किं तदाह॥ अमंदसर्वसहनसमर्थस्यास्त्रधर्मेणासे
कोमलवितुं गदपातां हनिष्ये प्रहरिष्यामि॥ तामेकवारं हृपया सहस्वात नुवज्रतुल्यात्वदंगकोवास हेतवे नैमित्याह॥ अवज्रकल्पया उत्पलमाजावदिति को
मैः स्नेहोत्कर्षः॥५॥ ननेहं हतनेकस्त्व पुरुषार्थस्तमाह॥ तहीति॥ अज्ञः न विद्यते ज्ञो यस्मात् सर्वज्ञेत्यर्थः॥ परमार्थतः स्वामिनमेतद्देहसंबंधे नबंधुरूप
बसरः॥ तेन शत्रुत्वे न प्रतीतं त्वां हत्वा मित्राणामानृण्यं उपैमि उपैष्यामि॥ विशेषेण आधीयते मनसि चिंत्यत इति व्याधिः॥ देहे तर्यामि तयाचर
तीति तथा तं स्पीश्वरं हत्वा स्वात्रधर्मेण राधमहं तेर्गतस्य र्थस्य ज्ञानार्थत्वात॥ ज्ञात्वेतिवा तेन यथा पित्रा हीं दीनामानृण्यं सुपयंति तद्वदिति॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰

७७

रूक्षैरित्यादि [..]मतीत्यन्तिप्रायेणातोत्रैरंकुशादिभिः॥७॥१५॥ एवं श्रीकृष्णो भगवान् महाबलानपि लीलया जयत्येवेति॥ हत्वा सकरादिवितत्वजरासंधादिनिर्जि
जितः इति[..]अष्टदृष्टीनां मीयते नित्यजये हेतवः योगेश्वरः भगवान् जगदीश्वर इति। विदूरथां तमाहतस्य पूतनादिदनोकुलं। हत्वा स्तूपारमत॥ माराज्ञामोह नस्तूतव

एवं रूक्षैः सुदुर्वाक्यैः कृष्णं तोत्रैरिव द्विपं॥ गदया ताडयन्मूर्ध्नि सिंहवद्व्यनदच्च सः॥७॥ गदयाभिहतोप्याजौ न चचाल यदूद्वहः॥ कृष्णो
पि तमहन् गुर्व्या कौमोदक्या स्तनान्तरे॥८॥ गदानिर्भिन्नहृदय उद्वमन् रुधिरं मुखात्॥ प्रसार्य केशबा[..]ङ्घ्रीन् धरण्यां न्यपतद्व्य
सुः॥९॥ ततः सूक्ष्मतरं ज्योतिः कृष्णमाविशदद्भुतं॥ पश्यतां सर्वभूतानां यथा चैद्यवधे नृप॥१०॥ विदूरथस्तु तद्भ्राता भ्रातृशोकप
रिप्लुतः॥ आगच्छदसिचर्माभ्यां उच्छ्वसंस्तज्जिघांसया॥११॥ तस्य चापततः कृष्णश्चक्रेण क्षुरनेमिना॥ शिरो जहार राजेन्द्र सकिरीटं स
कुण्डलं॥१२॥ एवं सौभं च शाल्वं च दन्तवक्त्रं वि[..]दूरथं॥ हत्वा दुर्विषहानन्यैरीडितः सुरमानवैः॥१३॥ मुनिभिः सिद्धगन्धर्वैर्विद्याध
रमहोरगैः॥ अप्सरोभिः पितृगणैर्यक्षैः किन्नरचारणैः॥१४॥ उप[..]गीयमानविजयः कुसुमैरभिवर्षितः॥ ततश्च वृष्णिप्रवरैर्विवेशाल
ङ्कृतां पुरीं॥१५॥ एवं योगेश्वरः कृष्णो भगवान् जगदीश्वरः॥ ईयते पशुदृष्टीनां निर्जितो जयतीति सः॥१६॥ श्रुत्वा युद्धोद्यमं [..]रामः कु
रूणां सह पाण्डवैः॥ तीर्थाभिषेकव्याजे[..]न मध्यस्थः प्रययौ किल॥१७॥ स्नात्वा प्रभासे संतर्प्य देवर्षिपितृमानवान्॥ सरस्वतीं प्रति
स्रोतं ययौ ब्राह्मणसंवृतः॥१८॥ पृथूदकं बिन्दुसरस्त्रितकूपं सुदर्शनं॥ विशालं ब्रह्मतीर्थं च चक्रं प्राचीं सरस्वतीं॥ यमुनामनु या
न्येव गंगामनुचरन्नोत॥ जगाम नैमिषं यत्र ऋषयः सत्रमासते॥२०॥ ॥ [..]ल्वलौ॥१६॥ तत्र संग्रमाह। श्रुत्वेति॥१७॥ प्रतिस्रोतं प्रतिलोमं॥
॥१८॥ सुदर्शनं चक्रतीर्थं॥१९॥ यमुनामनु यानि तीर्थानि तानि सर्वाणि गंगामनु च यानि तीर्थानि सर्वाणि गत्वा नैमिषारण्यं जगाम॥२०॥ ॥ ॥

य

राम॰

७७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभिप्रेत्य राम इति ज्ञात्वा ॥२१॥ महर्षेर्भासितस्य ॥२२॥ सूतं प्रतिलोमजं तं कृतं प्रकृणामंजलिश्रयेन तं अध्यासीनं श्रुतान् ॥ तेभ्यो ऽपुच्छैः आसीनमित्यर्थः
॥२३॥ २४॥ अजानन्नध्यास्त इति चेन्नैवमित्याह ॥ ऋषेरिति ॥२५॥ ननु वक्तुरुच्चैः कथमेवं कुर्यात्तत्राहाहांतस्येति गुणाय यथोचितानुष्ठानाय ॥२६॥
विप्रानध्यास्त्वा अस्मद्वा किंचित्करोतु किं तवेति चेदत आह एतदर्थ इति ॥ धर्म्मध्वजिनः ॥ उत्तमलिंगधारिणः ॥२७॥ नाविवादिति न हि न वित मं

तमागतमभिप्रेत्य मुनयो दीर्घसत्रिणः ॥ अनिनंद्य यथान्यायं प्रणम्योत्थाय चार्चयन् ॥२१॥ सोऽर्चितः सपरीवारः कृतासनपरिग्रहः
॥ रोमहर्षणमासीनं महर्षेः शिष्यमैक्षत ॥२२॥ अप्रत्युत्थायिनं सूतमकृतप्रह्वणांजलिं ॥ अध्यासीनं च तान् विप्रान् चुकोपोद्वी
क्ष्य माधवः ॥२३॥ कस्मादसाविमान् विप्रानध्यास्ते प्रतिलोमजः ॥ धर्मपालांस्तथैवास्मान् वधमर्हति दुर्मतिः ॥२४॥ ऋषेर्भगवतो भूत्वा
शि ष्योऽधीत्य बहूनि च ॥ सेतिहासपुराणानि धर्मशास्त्राणि सर्वशः ॥ अदांतस्याविनीतस्य वृथापंडितमानिनः ॥ न गुणाय भवंति स्म
नटस्येवाजितात्मनः ॥२६॥ एतदर्थो हि लोकेस्मिन्नवतारो मया कृतः ॥ वध्या मे धर्मध्वजिनस्ते हि पातकिनोऽधिकाः ॥२७॥ एतावदुक्त्वा भग
वान्निवृत्तोऽसद्वधादपि ॥ भावित्वात्तं कुशाग्रेण करस्थेनाहनत्प्रभुः ॥२८॥ हाहेतिवादिनः सर्वे मुनयः खिन्नमानसाः ॥ ऊचुः संकर्षणं
देवमधर्मस्ते कृतः प्रभो ॥२९॥ अस्य ब्रह्मासनं दत्तमस्माभिर्यदुनंदन ॥ आयुश्चात्माक्लमं तावद्यावत्सत्रं समाप्यते ॥३०॥ ॥

केनापि परिहर्तुं शक्यमित्यर्थः ॥ अहनत् ॥२८॥ तेनत्वया ॥२९॥ अधार्मिकप्रतिलोमजः कोयमधर्म इति चेत्तत्राहुः ॥ अस्येति पुराणप्रवाच
नायात्मने शारीरस्य नास्ति क्लमो यस्मिन् ॥ तदायुश्च दत्तमिति ॥३०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰ ब्रह्मवधे पि किं ममेश्वरस्येति चेत्सत्यमेवं तथापि प्रायश्चित्तं कर्त्तव्यमित्याकूतं योगेश्वरस्येति सार्धेन॥ आत्मा पोब्रास्य णो न हं तम इति त्यादि लक्षण॥ त
७९ याप्येतत्सर्गः ब्रह्महत्यायाः पावनं प्रायश्चित्तं हे लोकपावन त्वमनन्यचोदितः स्वयमेव भवान् यदि करिष्यति तर्हि लोकसंग्रहो भविष्यति नान्यथेति॥ २२॥ वध
स्यापि वैशंपायनप्रायश्चित्तं प्रथमे कल्पे मुख्यकल्पे विधीयतामुपदिश्यताम्॥ २३॥ किंच॥ बत हे मुनयः। तस्य दीर्घमायुः॥ सत्त्वबलं इंद्रियं तत्॥ पारवं चानन्व
च यज्ञवह्निरशासितमपेक्षितं तत्सर्वं ब्रूत॥ २४॥ अस्मादीनां सत्यता यथा भवेदस्माकं पूर्व वचः सत्यं यथा भवेत्तथा विधीयतामित्यर्थः॥ २५॥ तथा संपा

अजानतैवाचरितस्य यो ब्रह्मवधो यथा॥ २१॥ योगेश्वरस्य भवतो नाम्ना योऽपि तिग्रामकः॥ यद्येतद्ब्रह्महत्यायाः पावनं लो
कपावन॥ चरिष्यति भवांल्लोकसंग्रहो नान्यचोदितः॥ २२॥ ॥ श्रीभगवानुवाच॥ ॥ करिष्ये वधनिर्वेशं लोकानुग्रहकाम्यया॥
नियमः प्रथमे कल्पे यावान्स तु विधीयताम्॥ २३॥ दीर्घमायुर्बतैतस्य सत्त्वमिंद्रियमेव च॥ आशासितं यत्तद्ब्रूत साधये
योगमायया॥ २४॥ ॥ ऋषय ऊचुः॥ ॥ अस्त्रस्य तव वीर्यस्य मृत्योरस्माकमेव च॥ यथा भवेद्वचः सत्यं तथा राम विधीयताम्॥ राम॰
॥ २५॥ ॥ राम उवाच॥ ॥ आत्मा वै पुत्र उत्पन्न इति वेदानुशासनं॥ तस्मादस्य भवेद्वक्ता आयुरिंद्रियसत्त्ववान्॥ २६॥ ॥ ७९

दयत्राह॥ आत्मा वा इति॥ अंगादंगात्संभवसि हृदयादभिजायसे॥ आत्मा वै पुत्रनामासि स जीव शरदः शतमिति वेदानुशासनं वेदवचनं॥ तस्मा
दस्य रोमहर्षणस्य पुत्र उग्रश्रवाः भवता पुराणवक्ता भवेत्॥ स चायुरादिमांश्च भवेत्॥ अतः साक्षादजीवनादस्त्रस्य मृत्योश्च सत्यता पुत्ररूपेणाचा स
युरादिसिद्धेर्युष्मद्वचनस्यापि सत्यतास्यादिति भावः॥ २६॥ किंच प्रथमं तावदपेक्षितं कथयत॥ तदहं करिष्यामीत्याह॥ २६॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंवः कामः करवामि॥ किं विषयो वः कामो वर्त्तते। तद्ब्रूतेति। अथानंतरं ब्रह्मदंडं गृहीत्वा॥ अपचितिं निष्कृतिम जानतो मे हेतुधाः॥ यथावच्चिंत्यतामपचि
तिरिति॥३७॥ प्रथमं तावदपेक्षितं कर्त्तव्यं कथयंति इल्वलस्येति द्वाभ्यां॥३८॥३९॥ प्रायश्चित्तमाहुः॥ परीत्य प्रदक्षिणीकृत्य सुसमाधानादिगुणविशेषा
देकाद्दमात्र सुकर्मित्य विरोधः सुसमाहितः कामक्रोधादिरहितः चत्वारस्त्वात्वृष्णि॥४०॥ इति श्री० अष्टसप्ततितमः॥ ॥ ऊनाशीतितमे रामो बल्वलेद्धि

किंवः कामो मुनिश्रेष्ठा ब्रूताहं करवाण्यथ॥ अजानतस्त्वपचितिं यथा मे चिंत्यतां बुधाः॥३७॥ ॥ ऋषय ऊचुः॥ ॥ इल्वलस्य सुतो घोरो ब
ल्वलो नाम दानवः॥ स दूषयति नः सत्रमेत्य पर्वणि पर्वणि॥३८॥ तं पापं जहि दाशार्ह तन्नः शुश्रूषणं परं॥ पूयशोणितविण्मूत्रसुरामां
साभिवर्षिणं॥३९॥ ततश्च भारतं वर्षं परीत्य सुसमाहितः॥ चर्त्वा द्वादशमासांस्तीर्थस्नायी विशुध्यसे॥४०॥ ॥ इति श्रीभागवते म
हापुराणे दशमस्कंधे सूतवधो नामाष्टसप्ततितमोऽध्यायः॥ ॥७८॥ ॥ श्रीशुक उवाच॥ ॥ ततः पर्वण्युपावृत्ते प्रचंडः पांसुवर्षणः॥ भीमो वा
युरभूद्राजन् पूयगंधस्तु सर्वशः॥१॥ ततोमेध्यमयं वर्षं बल्वलेन विनिर्मितं॥ अभवद्यज्ञशालायां सोऽन्वदृश्यत शूलधृक्॥२॥ तं विलो
क्य बृहत्कायं भिन्नांजनचयोपमं॥ तप्तताम्रशिखाश्मश्रुं दंष्ट्रोग्रभ्रुकुटीमुखं॥३॥ सस्मार मुशलं रामः परसैन्यविदारणं॥ हलं च
दैत्यदमनं ते तूर्णमुपतस्थतुः॥४॥ तमाकृष्य हलाग्रेण बल्वलं गगनेचरं॥ मुशलेनाहनत्क्रुद्धो मूर्ध्नि ब्रह्मद्रुहं बलः॥५॥ सोऽप
तद्भुवि निर्भिन्नललाटोऽसृगुत्सृजन्॥ मुंचन्नार्तस्वरं शैलो यथा वज्रहतोऽरुणः॥६॥ संस्तुत्य मुनयो रामं प्रयुज्यावितथाशिषः
॥ अभ्यषिंचन्महाभागा वृत्रघ्नं विबुधा यथा॥७॥ ॥

जतुष्णाये॥ निहत्य तीर्थे स्नाना यैः स्मृत हत्यासमपातु द त॥१॥ उपावृत्ते प्राप्ते॥२॥ भि
न्नो विदीर्णः तत चयः उपमा यस्य तं अति ह्रस्वमित्यर्थः॥ तप्तताम्रवच्छिखा श्मश्रूणि च यस्य तं॥ दंष्ट्राभिरुग्रं भ्रुकुटीमुखं यस्य तं॥३॥४॥५॥ अरुणो रुधि
रेण दैत्यः शैलो धातुभिः॥६॥७॥ ॥

भ्रुकुटीयुतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰द॰उ॰ ॥९॥ किंतत्सरः पत इति॥ आस्रवत उदगात्॥९॥ अनुस्रोतेन अनुलोमतः॥ पुलहाश्रमं हरिक्षेत्रं॥१०॥ गोमत्यां गंडक्यां विपाशायां च स्नात्वा शोणे चआ
प्लुतः॥ दृष्ट्वा स्थंनु त्या॥११॥१२॥ श्रीशैलं श्रीपर्वतं॥१३॥ श्रियो धामानि अम्लानानि पंकजानि यस्यां तां तत्पुरीं कांचीं॥१४॥१५॥ दक्षिणामर्णवं॥१७॥ फाल्गु

७९

वैजयंतीं दद्दुर्मालां श्रीधामाम्लानपंकजां॥ रामाय वाससी दिव्ये दिव्यान्याभरणानि च॥९॥ अथ तैरभ्यनुज्ञातः कौशिकीमेत्य ब्राह्मणैः॥
स्नातासरोवरमगात्प्लुतः सरयुरास्रवत्॥१०॥ अनुस्रोतेन सरयूं प्रयागमुपगम्य सः॥ स्नात्वा संतर्प्य देवादीन् जगाम पुलहाश्रमं॥११॥ गोम
त्यां गंडक्यां स्नात्वा विपाशायां शोणे आप्लुतः॥ गयां गत्वा पितृन्निष्ट्वा गंगासागरसंगमं॥१२॥ उपस्पृश्य महेंद्राद्रौ रामं दृष्ट्वाभिवाद्य च॥ सप्तगोदा
वरीं वेणीं पंपां भीमरथीं ततः॥१२॥ स्कंदं दृष्ट्वा ययौ रामः श्रीशैलं गिरिशालयं॥ द्रविडेषु महापुण्यं दृष्ट्वाद्रिं वेंकटं प्रभुः॥१३॥ कामकोष्णीं पु
रीं कांचीं कावेरीं च सरिद्वरां॥ श्रीरंगाख्यं महापुण्यं यत्र संनिहितो हरिः॥१४॥ ऋषभाद्रिं हरेः क्षेत्रं दक्षिणां मथुरां तथा॥ समुद्रं सेतुमग
मत् महापातकनाशनं॥ तत्राप्लुतम दाधेनूर्ब्राह्मणेभ्यो हलायुधः॥ कृतमालां ताम्रपर्णीं मलयं च कुलाचलं॥१६॥ तत्रागस्त्यं समा
सीनं नमस्कृत्याभिवाद्य च॥ योजितस्तेन चाशीर्भिरनुज्ञातो गतोऽर्णवं॥१७॥ दक्षिणं तत्र कन्याख्यां दुर्गां देवीं ददर्श ह॥ ततः फाल्गुन राम॰
रा॰ मासाद्य पंचाप्सरसमुत्तमं॥१८॥ विष्णुः संनिहितो यत्र स्नात्वा स्पृशद्गवां युतं॥ ततोऽभिव्रज्य भगवान् केरलांस्तु त्रिगर्तकान्॥१९॥ गोक ७९
र्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटेः॥ आर्यां द्वैपायनीं दृष्ट्वा शूर्पारकमगाद्बलः॥२०॥ तापीं पयोष्णीं निर्विंध्यां उपस्पृश्याथ दंडकं॥ प्र
विश्य रेवामगमद्यत्र माहिष्मती पुरी॥२१॥ मनुतीर्थमुपस्पृश्य प्रभासं पुनरागमत्॥ श्रुत्वा द्विजैः कथ्यमानं कुरुपांडवसंयुगं॥
सर्वराजन्यनिधनं भारं मेने हृतं भुवः॥२२॥ स भीमदुर्योधनयोर्गदाभ्यां युध्यतोर्मृधे॥ वारयिष्यन् विनशनं जगाम यदुनंदनः॥२३॥ तंमाश्रत

तत्पुरं पंचाप्सरसं सरः॥१८॥ अस्पर्शत॥ अस्पर्शयत॥ केरलादीन् देशान्॥१९॥ द्वैपायनीं आर्यां॥२०॥२१॥२२॥ विनशनं कुरुक्षेत्रं॥२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विवक्षुः वक्तुमिच्छुः किंवदिष्यतीति निपातः धर्मी मासन्नितो ॥२४॥२४॥ अस्मः पराजयो वा रणः संग्रामः ॥२७॥ अर्थवद्वाक्यं ॥२८॥ दिष्टं प्राचीनं कर्म समुपा
गतः संगतः ॥२९॥ कृतं गयज्ञमूर्तिं ॥३०॥ आत्मनि अधिष्ठाने ॥ विश्वगं सर्वानुस्यूतं ये नैव विदुः पश्यंति तद्विशुद्धं विज्ञानं व्यतरत् ॥३१॥ ॥ इति एकोनाशीतितमे तेः ॥
॥ अथाशीतितमे ह्यस्मिः श्रीदामान्तर्गृहागते ॥ संपूज्य पृष्टे दर्घे स्मुगुरुवासकथां मुदा ॥१॥ सुरारिमारको हरिः पुरा चकार सैशंतो ॥ अतः परं विनैवतांनि जो

युधिष्ठिरस्तु तं दृष्ट्वा यमौ कृष्णार्जुनावपि ॥ अभिवाद्याभवंस्तूष्णीं किं विवक्षुरिहागतः ॥२४॥ गदापाणी उभौ दृष्ट्वा संरब्धौ विजयैषिणौ ॥
मंडलानि विचित्राणि चरंताविदमब्रवीत् ॥२५॥ युवां तुल्यबलौ वीरौ हे राजन्हे वृकोदर ॥ एकं प्राणाधिकं मन्ये उतैकं शिक्षयाधिकं ॥२६॥
तस्मादेकतरस्येह युवयोः समवीर्ययोः ॥ न लक्ष्यते जयोन्योवा विरमत्वफलो रणः ॥२७॥ न तद्वाक्यं जगृहतुर्बद्धवैरौ नृपार्थवत् ॥ अनुस्मरं
तावन्योन्यं दुरुक्तं दुःकृतानि च ॥२८॥ दिष्टं तदनुमन्वानो रामो द्वारवतीं [illegible] ययौ ॥ उग्रसेनादिभिः प्रीतैर्ज्ञातिभिः समुपागतः ॥२९॥ तं पुन
र्नैमिषं प्राप्तमृषयोयाजयन्मुदा ॥ क्रत्वंगं क्रतुभिः सर्वैर्निवृत्ताखिलविग्रहं ॥३०॥ तेभ्यो विशुद्धं विज्ञानं भगवान्व्यतरद्विभुः ॥ येनैवात्मन्यदो विश्वमा
त्मानं विश्वगं विदुः ॥३१॥ स्वपत्न्यावभृथस्नातो ज्ञातिबंधुसुहृद्वृतः ॥ रेजे स्वज्योत्स्नयेवेंदुः सुवासाः सुष्ठ्वलंकृतः ॥३२॥ ईदृग्विधान्यसंख्यानि
बलस्य बलशालिनः ॥ अनंतस्याप्रमेयस्य मायामर्त्यस्य संति हि ॥३३॥ योनुस्मरेत रामस्य कर्माण्यद्भुतकर्मणः ॥ सायंप्रातरनंतस्य विष्णो
स दयितो भवेत् ॥३४॥ ॥ इति श्रीभागवते दशमे देवतीर्थयात्रायां बल्वलवधो नामैकोनाशीतितमोऽध्यायः ॥७९॥ ॥ राजोवाच ॥ भगवन्
यानि चान्यानि मुकुंदस्य महात्मनः ॥ वीर्याण्यनंतवीर्यस्य श्रोतुमिच्छामहे प्रभो ॥१॥ को नु श्रुत्वासकृद्ब्रह्मन्नुत्तमश्लोकसत्कथाः ॥ विरमे
त विशेषज्ञो [illegible]तो विषण्णः काममार्गणैः ॥२॥ ॥ [च] पकारमौरत ॥२॥ एवमचरितानि श्रुत्वा पुनर्मुकुंदवीर्याणि पृच्छति ॥ हे भगवन् श्रोतुमिच्छामीत्यन्वयः ॥१॥ उ
त्तमश्लोकस्य सत्कथाः मनोहराः विषयवैतृष्ण्यजनिकाः कथाः विशेषज्ञः सारवित् ॥ विषण्णः विषादं प्राप्तः ॥२॥ कथाश्रवणे स्तुवक्तृदृष्टांततयाः स्वार्थमाह ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० उ०

८०

स्याद्वागीति॥ यौ तत्कर्मकर्त्तारौ तावेव करौ॥ तदेव मनः यत् स्थिरजंगमेषु वसंतं तं स्मरेत॥ यस्तस्य पुण्याः कथाः शृणोति स एव कर्णः॥ ३॥ उभयलिंगं स्थिरं

जंगमं च तस्यैव लिंगमिति मत्वा आनमेत्तदेव शिरः तदेव तस्य लिंगमित्येव यत्पश्यति॥ तदेव चक्षुः तान्येवांगानि यानि पादोदकं भजंतीति॥ ४॥ ५॥ ६॥ तया

सा वाग्यया तस्य गुणान्गृणीते करौ च तत्कर्मकरौ मनश्च॥ स्मरेद्वसंतं स्थिरजंगमेषु शृणोति तत्पुण्यकथाः स कर्णः॥ शिरस्तु तस्यो

भयलिंगमानमेत्तदेव यत्पश्यति तद्धि चक्षुः॥ अंगानि विष्णोरथ तज्जनानां पादोदकं यानि भजंति नित्यं॥ ४॥ ॥ सूत उवाच॥ ॥ विष्णुरातेन

संपृष्टो भगवान्बादरायणिः॥ वासुदेवे भगवति निमग्नहृदयोऽब्रवीत्॥ ५॥ ॥ श्रीशुक उ०॥ ॥ कृष्णस्यासीत्सखा कश्चिद्ब्राह्मणो ब्रह्मवित्तमः॥ वि

रक्त इंद्रियार्थेषु प्रशांतात्मा जितेंद्रियः॥ ६॥ यदृच्छयोपपन्नेन वर्तमानो गृहाश्रमी॥ तस्य भार्या कुचैलस्य क्षुत्क्षामा च तथाविधा॥ प

तिव्रता पतिं प्राह म्लायता वदनेन सा॥ दरिद्रा सीदमाना सा वेपमानाभिगम्य च॥ ८॥ ननु ब्रह्मन्भगवतः साक्षान्मित्रं श्रियःपतिः॥

ब्रह्मण्यश्च शरण्यश्च भगवान्सात्वतर्षभः॥ ९॥ तमुपैहि महाभाग साधूनां च परायणं॥ दास्यति द्रविणं भूरि सीदते ते कुटुंबिने॥ १०॥

आस्तेऽधुना द्वारवत्यां भोजवृष्ण्यंधकेश्वरः॥ स्मरतः पादकमलमात्मानमपि यच्छति॥ ११॥ किं न्वर्थकामान्भजतो नात्यभीष्टान् जगद्गु

रुः॥ १२॥ स एवं भार्यया विप्रो बहुशः प्रार्थितो मुहुः॥ अयं हि परमो लाभ उत्तमश्लोकदर्शनं॥ १३॥ इति संचिंत्य मनसा गमनाय मतिं द

धे॥ २३॥ अप्यस्त्युपायनं किंचिद्गृहे कल्याणि दीयतां॥ याचित्वा चतुरो मुष्टीन्विप्रान्पृथुकतंदुलान्॥ १४॥ चैलखंडेन तान्बद्ध्वा भर्त्रे प्रा

दादुपायनं॥ स तानादाय विप्राग्र्यः प्रययौ द्वारकां किल॥ १५॥ ॥ विधाकुचैला किंचस्तु तत्क्षामा॥ यत्किंचिदुपपन्नमन्नं तस्मै परिविष्य स्वयं क्षुधा

नीर्ष्मा॥ ७॥ म्लायता शुष्यता सीदमाना भर्त्तुर्निगसंपादनाद्राज्ञ्याव सीदती वेपमाना भयेन कंपमाना॥ ८॥ ९॥ १०॥ भोजवृष्ण्यंधकेश्वर इति॥ तत्स्वीकार

मात्रेण सर्वे ते दास्यंतीति भावः॥ ११॥ नात्यभीष्टान्परिपाकविरसत्वात्॥ १२॥ १३॥ अप्यस्ति किमस्तीति प्रश्नः॥ १४॥ १५॥ ॥

राम०

८०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महांमं स गुल्मान् निरक्षार्थं सैन्यस्थानानि कक्षाः प्रतोलीः अतीयायातिक्रम्य जगाम स द्विजः दितः ॥१६॥ ततश्चागम्या दुर्गमा येंधकवृष्णयश्च तेषां गृहे
षु तथा हरेर्द्व्यष्टसहस्राणां महिषीणां च ये गृहाः तेषु च मध्ये श्रीमदेकतमं गृहं विवेश ॥ तदा स द्विजो ब्रह्मानंदं गतो यथा बभूवेति शेषः ॥१७॥ पर्यंत्र

हर्म्यं संदर्शनं मह्यं कथं स्यादिति चिंतयतः ॥ त्रीणि गुल्मान्यतीयाय तिस्रः कक्षाश्च स द्विजः ॥१६॥ विप्रोगम्यांधकवृष्णीनां गृहेष्वच्युतधर्मि
णां ॥ गृहं द्व्यष्टसहस्राणां महिषीणां हरेर्द्विजः ॥१७॥ विवेशैकतमं श्रीमद्ब्रह्मानंदं गतो यथा ॥ तं विलोक्याच्युतो दूरात्प्रियापर्यंकमा
स्थितः ॥ सहसोत्थाय चाभ्येत्य दोर्भ्यां पर्यग्रहीन्मुदा ॥१८॥ सख्युः प्रियस्य विप्रर्षेरंगसंगातिनिर्वृतः ॥ प्रीतो व्यमुंचदब्बिंदून्नेत्राभ्यां पुष्करेक्षणः ॥१
९॥ अथोपवेश्य पर्यंके स्वयं सख्युः समर्हणं ॥२०॥ उपहृत्यावनिज्यास्य पादौ पादावनेजनीः ॥ अग्रहीच्छिरसा राजन् भगवांल्लोकपावनः ॥२१
॥ व्यलिंपद्दिव्यगंधेन चंदनागरुकुंकुमैः ॥ धूपैः सुरभिभिर्मित्रं प्रदीपावलिभिर्मुदा ॥२२॥ अर्चित्वावेद्य तांबूलं गां च स्वागतमब्रवीत्
॥ कुचैलं मलिनं क्षामं द्विजं धमनिसंततं ॥२३॥ देवी पर्यचरत्साक्षाच्चामरव्यजनेन वै ॥ अंतःपुरजनो दृष्ट्वा कृष्णेनामलकीर्तिना ॥ वि
स्मितोभूदतिप्रीत्या अवधूतं सभाजितं ॥२४॥ किमनेन कृतं पुण्यमवधूतेन भिक्षुणा ॥ श्रिया हीनेन लोकेस्मिन्गर्हितेनाधमेन च ॥२५॥ यो
सौ त्रिलोकगुरुणा श्रीनिवासेन संभृतः ॥ पर्यंकस्थां श्रियं हित्वा परिष्वक्तोग्रजो यथा ॥२६॥ कथयांचक्रतुर्गाथाः पूर्वा गुरुकुले सतोः ॥ आत्म
नोर्ललिता राजन् करौ गृह्य परस्परं ॥२७॥ ॥ हीत्पर्यरन्नत ॥१८॥ अब्बिंदून् आनंदाश्रूणि ॥१९॥ समर्हणमुपायनं ॥२०॥ उपहृत्य समर्प्य पादावनेजनीर
पः ॥२१॥२२॥ धमनीभिः शिराभिः संततं व्याप्तं ॥२३॥ अवधूतं मलिनं ॥२४॥ विस्मयमास्थाय धाम्नां किमनेनेति ॥२५॥ संभृतः संमानितः ॥२६॥ सतोः वसतोः गृह्य गृहीत्वा ॥२७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नार्यऊढापरिणीतानवेति गृहस्थलिंगदर्शनात्तद्भोगादर्शनाच्च संन्यासिवभ्रमः ॥२८॥ अप्रतिषेधादुद्वाहमनुमतं मत्वाह ॥ प्राय इति तर्हि विवि
तं नन्वनमकामविहतं ॥ कामैर्विहतं न भवतीतिमेवविदितं तथाहि धनेषु वस्त्रादिषु नैवातिप्रीयसे हे विद्वन् ॥ इति विदुषस्त्वेतद्युक्तमिति भावः ॥२९॥ का
म...भावे किं गृहधर्मक्लेशेनेत्याशंक्याह केचिदिति दैवीः ईश्वरमायारचिताः प्रवृत्तीः विषयभासनात्यजंतः कामैरनाहताः अपि चेतसामपि कर्म
॥ करणे दृष्टांतः ॥ यथाहमिति लोकसंग्रहं लोकस्य संग्रहणं यथा भवति तथाहमीश्वरोपि कर्माणि यथा करोमि तद्वत् ॥३०॥ नौ आवयोः यतो

श्रीभगवानुवाच ॥ ॥ अपि ब्रह्मन्गुरुकुलाद्भवता लब्धदक्षिणात् ॥ समावृत्तेन धर्मज्ञ त्वया योगासदर्शिनवा ॥२८॥ प्रा
यो गृहेषु ते चित्तमकामविहतं तथा ॥ नैवातिप्रीयसे विद्वन् धनेषु विदितं हि मे ॥२९॥ केचित्कुर्वंति कर्माणि कामैरहतचे
तसः ॥ त्यजंतः प्रकृतीर्दैवीर्यथाहं लोकसंग्रहं ॥३०॥ कच्चिद्गुरुकुले वासं ब्रह्मन्स्मरसि नौ यतः द्विजो विज्ञाय विज्ञेयं त
मसः पारमश्नुते ॥३१॥ स वै सत्कर्मणां साक्षाद्द्विजातेरिह सं[...]भवः ॥ आद्योंग यत्राश्रमिणां यथाहं ज्ञानदो गुरुः ॥३२॥ ॥

गुरोः विज्ञेयं परमात्मतत्त्वं तमसः संसारस्य ॥३१॥ तत्रात्मज्ञानप्रदगुरोरत्यंतं पूज्यत्वं वक्तुं पुरुषस्य त्रीन्गुरूनाह स वा इति ॥ इह संसारे यत्र
संभवो जन्म सा त्रयं स पिता तत्र च आद्यः प्रथमो गुरुः पूज्यः कर्मविद्याप्रदं ॥ गुरुमाह ॥ द्विजातेः संततः पुंसः सत्कर्मणां यतः संभवः उपनीय वेदाध्या
।पकः इत्यर्थः स द्वितीयो गुरुः यथाहमीश्वरः तथा प्रथमादपि पूज्य इत्यर्थः ॥ ब्रह्मविद्याप्रदं गुरुमाह ॥ आश्रमिणां सर्वेषामपि ज्ञानदो यः स तु
साक्षादहमेवेति ॥३२॥ अतः ज्ञानप्रदप्रदगुरुरूपमाश्रित्य ये संसारं तरंति ते बुधिमंत इत्याह ॥ नन्विति ॥३२॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे ब्रह्मन् ते तव वर्णाश्रमवतां मध्ये अर्थकोविदाः इह मनुष्यजन्मनि तत्रापि वर्णाश्रमत्वे सति येन मया गुरुणा गुरुरूपेण वक्त्रा वाचा उपदेशमात्रे
णाश्रमजः सुखेनैव भवार्णवं तरन्ति ॥ ३३ ॥ अज्ञानमदाद्गुरोरधिकः सेव्यो नास्तीत्युक्तम् ॥ अत एव तद्भजनादधिको धर्मश्च नास्तीत्याह ॥ नाहमिति ॥ इज्यागृहस्थधर्मः
प्रजातिः प्रकृष्टं जन्म उपनयनं तेन ब्रह्मचारिधर्मः लक्ष्यते ताभ्यां तथा तपसा वनस्थधर्मेण उपशमेन यतिधर्मेण वा अहं परमेश्वरस्तथा न तुष्येयं ॥ य
था सर्वभूतात्मापि गुरुशुश्रूषयेति ॥ किंच ॥ ३४ ॥ अस्माकं गुरुशुश्रूषणे किमपि दैवादेवं ॥ संपन्नं तत्किं त्वया स्मर्यत इति पृच्छलपित इति गुरौ निवस

नन्वर्थकोविदा ब्रह्मन् वर्णाश्रमवतामिह ॥ येन मया गुरुणा वाचा तरन्त्यंजो भवार्णवं ॥ ३३ ॥ नाहमिज्याप्रजातिभ्यां तपसोपश
मेन च ॥ तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा ॥ ३४ ॥ अपि नः स्मर्यते ब्रह्मन् वृत्तं निवसतां गुरौ ॥ गुरुदारैश्चोदितानामिंध
नानयने क्वचित् ॥ ३५ ॥ प्रविष्टानां महारण्यमपर्त्तौ सुमहद्द्विज ॥ वातवर्षमभूत्तीव्रं निष्ठुराः स्तनयित्नवः ॥ ३६ ॥ सूर्यश्चास्तं गत
स्तावत्तमसा चावृता दिशः ॥ निम्नं कूलं जलमयं न प्राज्ञायत किंचन ॥ ३७ ॥ वयं भृशं तत्र महानिलाम्बुभिर्निहन्यमाना मुहुरम्बुसं
प्लवे ॥ दिशोऽविदंतोऽथ परस्परं वने गृहीतहस्ताः परिबभ्रिमातुराः ॥ ३८ ॥ ॥ तामस्माकं यत्किमपि वृत्तं तत्काचित्कदाचित ॥ ३५ ॥ अपकृतौ
अपगते ऋतौ अकाले इत्यर्थः ॥ वातश्च वर्षं च तयोः समाहारः स्तनयित्नवो गर्जितानि चाभवन् ॥ ३६ ॥ निम्नं कूलं न तत्र सुज्ञातं च स्यात् ॥ ३७ ॥ अंबुनां संप्लव
ः आमिश्रणं यस्मिन्नेकोदके तस्मिन्वने इत्यर्थः ॥ परिबभ्रिम ॥ भ्रमणे इत्यस्य धातोः परिपरितो बभ्रिमः इडागमश्छांदसः आरात् धृतवंत इत्यर्थः ॥ ३८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰ ॥३९॥ उवाचेति हृष्याः श्लोकत्रयीं यथा वयं कृतार्था इत्याह॥ अहो इति आत्मा देहः॥४०॥ गुरोरिति निष्कृतं प्रत्युपकारः सर्वेऽर्था यस्मात्स आत्मा देहः तस्यार्प्पणं

विनियोगः॥४१॥ अयातयामानीति यातयामो यस्य पक्वस्य स्वादस्तत्तद्गतसारं भवति तद्वदस्य रपि गतसारं नो एषां इत्ययातयामानीत्युच्यते॥ अगतसाराणि

८२ छंदांसि मंत्रा अधीयमानानि भवंत्वित्यर्थः॥४२॥ इत्थंविधानि एवं प्रकाराणि अनेकानि हत्रानि किल्बिषा यस्मै तत्र इति शेषः॥ फलितमुपसंहरति॥ गुरोरिति॥

एतद्विदित्वा उदिते रवौ सांदीपनिर्गुरुः॥ अन्वेषमाणो नः शिष्यानाचार्योऽपश्यदातुरान्॥३९॥ अहो हे पुत्रका यूयमस्मदर्थेति

दुःखिताः॥ आत्मा वै प्राणिनां प्रेष्ठस्तमनादृत्य मत्पराः॥४०॥ एतदेव हि सच्छिष्यैः कर्तव्यं गुरुनिष्कृतं॥ यद्वै विशुद्धभावेन सर्वथा

त्मार्प्पणं गुरौ॥४१॥ तुष्टोहं भो द्विजश्रेष्ठाः सत्याः संतु मनोरथाः॥ छंदांस्ययातयामानि भवंत्विह परत्र च॥४२॥ इत्थंविधान्य

रनु नेकानि वसतां गुरुवेश्मसु॥ गुरोरनुग्रहेणैव पुमान् पूर्णः प्रशांतये॥४३॥ ॥श्रीदामा उवाच॥ ॥ किमस्माभिरनिर्वृत्तं देवदे एम॰

वजगद्गुरोर्भवता सत्यकामेन येषां वासो गुरावभूत्॥४४॥ यस्य छंदोमयं ब्रह्म देह आवपनं विभो॥ श्रेयसां तस्य गुरु ८२

षु वासोत्यंतविडंबनं॥४५॥ ॥इति श्रीभागवते महापुराणे दशमस्कंधे सुदामोपाख्याने अशीतितमोऽध्यायः॥ ॥८०॥॥

॥४३॥ अस्माभिः किमनिर्वृत्तं असंपन्नं येषां अस्माकं भवता सह वासो भूत्॥४४॥ भवतस्तु सर्वमेतद्विडंबनमात्रमित्याह॥ यस्येति छंदोमयं वेदा

त्मकं ब्रह्म तथा श्रेयसामावपनं उद्भवस्थानं देहो मूर्तिर्यस्य तस्य तव॥४५॥ ॥इति दशमे टीकायां सुदामोपाख्याने अशीतितमोऽध्यायः॥ ॥८०॥॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकाशीतितमे सम्पुर्जग्ध्वा पृथुकतंदुलान् ॥ श्रियं निर्मितवान् विद्दुर्लभां तु तदाश्रमे ॥ १ ॥ संकथयन् सुखगोष्ठी कुर्वन् सर्वभूतानां मनसोभिज्ञः स्मरन् पृ
थुकानानीयतां तुलकत इति जानन् निःस्पृहः ॥ प्रहसन् स्वेलीं कुर्वन् ॥ २ ॥ लज्जया अकथयतस्तामपश्यन्नाह ॥ अथ एवपीतिम्म्यां ॥ २ ॥ ३ ॥ ४ ॥ सर्वभूताना

श्रीशुक उवाच ॥ ॥ सदृत्थं द्विजमुख्येन सह संकथयन् हरिः ॥ सर्वभूतमनोभिज्ञः स्मयमान उवाच तं ॥ १ ॥ ब्रह्मण्यो ब्राह्मणं कृष्णो भ
गवान् प्रहसन् प्रियं ॥ १ ॥ प्रेम्णा निरीक्षणेनैव प्रेक्षन् खलु सतां गतिः ॥ ॥ श्रीभगवानुवाच ॥ ॥ किमुपायनमानीतं ब्रह्मन् मे भवता गृहा
त् ॥ अण्वप्युपहृतं भक्तैः प्रेम्णा भूर्येव मे भवेत् ॥ ३ ॥ भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते ॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति
॥ तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ ४ ॥ इत्युक्तोपि द्विजस्तस्मै व्रीडितः पतये श्रियः ॥ पृथुकप्रसृतिं राजन्न प्रायच्छदवाङ्मुखः ॥ ५ ॥
सर्वभूतात्मदृक् साक्षी तस्यागमनकारणं ॥ विज्ञायाचिंतयन्नायं श्रीकामो माभजत्पुरा ॥ ५ ॥ पत्न्याः पतिव्रतायास्तु सखा प्रियचिकीर्ष ७
या ॥ प्राप्तो मामस्य दास्यामि संपदोमर्त्यदुर्लभाः ॥ ६ ॥ इत्थं विचिंत्य वसनाच्चीरबद्धान् द्विजन्मनः ॥ स्वयं जहार किमिदमिति पृथुकतंदुला
न् ॥ ७ ॥ नन्वेतदुपनीतं मे परमप्रीणनं सखे ॥ तर्पयंत्यंग मां विश्वमेते पृथुकतंदुलाः ॥ ८ ॥ इति मुष्टिं सकृज्जग्ध्वा द्वितीयां जग्धुमा
ददे ॥ तावच्छ्रीर्जगृहे हस्तं तत्परा परमेष्ठिनः ॥ ९ ॥ ॥ मात्मदृक् ॥ अंतःकरणसाक्षी ॥ ५ ॥ अमर्त्यानां देवानामपि दुर्लभाः ॥ ६ ॥ अतिजीर्ण
त्वाद्वसनस्य पुनस्तन्मध्ये चीरेण बधान् ॥ ७ ॥ अंग हे सखे मां विश्वं विश्वात्मानं मां ॥ ८ ॥ इति वदन् एकां मुष्टिं जग्ध्वा तत्परेति ॥ अपंनावः ॥ ९ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰

८३

एतावतापुंसःइहामुत्रचमत्कत्वासविलासन्नृतानांसंपदांसमृधयेऽत्रलंऽत्रंतःपरंक्षितीयसुध्याऽत्रदनेनमामामेतदधीनोऽकर्षिति॥त्वत्तोषकारणंत
व...षस्यकारणंयथात्रवेत्रथासर्वसंपन्नमृधयेयोनत्कस्यसमृधिंदद्यात्तंतुष्येरित्यर्थः॥१०॥स्वर्गतंस्वर्गवासिनं॥११॥श्वोऽन्तेउदितेरवौविश्वंत्रा
वयतीतिविश्वत्रावःतेनेतिपुरतोमाविनंइंद्रदुर्लभंविन्नवेस्मचयति॥स्वसुखेनस्थातंदपूर्णेननेतिदीनतांदर्शयति॥नंदितोविनयोक्तिभिः॥१२॥क्रीडि

एतावतात्वंविश्वात्मन्सर्वसंपत्समृधये॥अस्मिन्लोकेऽथवामुष्मिन्पुंसस्त्वत्तोषकारणं॥१०॥ब्राह्मणस्तांतुरजनीमुषि
ताच्युतमंदिरे॥भुक्त्वापीत्वासुखंसुप्त्वामेनेचस्वर्गतंसुखं॥११॥श्वोन्तेविश्वभावेनस्वसुखेनाभिवंदितः॥जगामस्वालयंतातप
थ्यनुव्रज्यनंदितः॥१२॥सचालब्ध्वाधनंकृष्णात्तुयाचितवान्स्वयं॥स्वगृहान्व्रीडितोगच्छन्महद्दर्शननिर्वृतः॥१३॥अहोब्रह्म
ण्यदेवस्यदृष्टाब्रह्मण्यतामया॥यद्दरिद्रतमोलक्ष्मीमाश्लिष्टोबिभ्रतोरसि॥१४॥काहंदरिद्रःपापीयान्क्वकृष्णःश्रीनिके
तनः॥ब्रह्मबंधुरितिस्माहंबाहुभ्यांपरिरंभितः॥१५॥निवासितःप्रियाजुष्टेपर्यंकेभ्रातरोयथा॥महिष्यावीजितःश्रांतो
बालव्यजनहस्तया॥१६॥शुश्रूषयापरमयापादसंवाहनादिभिः॥पूजितोदेवदेवेनविप्रदेवेनदेववत्॥१७॥ ॥

तःस्वविक्षकार्पण्येपनलक्षितः॥महतःश्रीकृष्णस्यदर्शनेननिर्वृतः॥१३॥निर्वृतिमेवाहअहोइतिचतुर्भिः॥यतःलक्ष्मीमुरसिविभ्रताआश्लि
ष्टोहं॥१४॥पापीयान्नीचः॥१५॥१६॥पूजितश्चंदनधूपादिभिः॥१७॥एवंसंपूज्यापिधनस्यादानेकारणंकथयतिद्वाभ्यां॥१७॥ ॥ ॥

राम

८३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१८॥ स्वर्गादीनां यद्यपि तस्य चरणार्चनमेव कारणं तथापि कारुणिकत्वात् त्वद्व्यपि धनं मम स्वं नादात्॥१९॥ निजगृहस्यांतिकं तत्स्थानं तस्य विरो
षणं स्पृश्येति॥२०॥ विचित्रोपवनादित्रिस्रवृत्तं कथंभूतैः कूजद्भिर्द्विजकुलै राकुलैः॥ तथा प्रोत्फुल्लानि कुसुमादीनि येषु तानि वारीणि येषु तानि त
थातैः॥२१॥ हरिणीनामिवाक्षीणि यासां ताभिः तदैश्वर्यं दृष्ट्वा वितर्कितवान् ततः आह किमिदमिति॥ प्रथमं तेजःपुंजं दृष्ट्वा किमिदमिति पश्चाद्विमानि

स्वर्गापवर्गयोः पुंसां रसायामपि संपदां॥ सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनं॥१८॥ अधनोयं धनं प्राप्य मा
द्यन्नुच्चैर्न मां स्मरेत्॥ इति कारुणिको नूनं धनं मेन्नूरिना ददात्॥१९॥ इति तच्चिंतयन्नेव ततः प्राप्तो निजगृहांतिकं
॥ सूर्यानलेंदुसंकाशैर्विमानैः सर्वतो वृतं॥२०॥ विचित्रोपवनोद्यानैः कूजद्द्विजकुलाकुलैः॥ प्रोत्फुल्लकुसु
मांभोजकल्हारोत्पलवारिभिः॥२१॥ जुष्टं स्वलंकृतैः पुंभिः स्त्रीभिश्च हरिणाक्षिभिः॥ किमिदं कस्य वा स्थानं क
थं तदिदमित्यभूत्॥२२॥ एवं मीमांसमानं तं पुरुषं प्रमनाः॥ प्रत्यगृह्णन्महाभागं गीतवाद्येन नृत्ययसा पति
मागतमाकर्ण्य पत्नी सुधर्षातिसंभ्रमा॥ निश्चक्राम गृहात्तूर्णं रूपिणी श्रीरिवालयात्॥२४॥ ॥ ॥

दृष्ट्वा कस्य चेति स्थानं च स्वीयमिति ज्ञात्वा कथं तदिदं स्थानमिति एवंरूपमभूदिति॥२२॥ अमरप्रमनास्तत्तुल्यकांतयः प्रत्यगृह्णन्॥ उपा
यनादिभिराहृतवंतः॥२३॥ उद्भूतो हर्षो यस्याः सा अतिसंभ्रमः आदरो यस्याः सा॥ आलयात्कमलवनात् रूपधारिणी॥ श्रीरिव॥२४॥ ॥

मैं लं नरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰ स्वर्गस्य तत्र भगवता आनीतत्वात्॥ स्वर्गिणामिव तयोः रूपं बभूवेति भावः॥ बुध्वा अयमेव वंद्य इति निश्चयेन मनसा संकल्पेत॥२५॥२६॥२७॥ य
त्र मंदिरे पयःफेननिभाः शय्याः आस्तरणानि तस्मिन् संपदः तत्र सर्वसंपदां समृद्धीर्विलोक्य तर्कयामासेति चतुर्थेनान्वयः॥ यत्र दांताः गजदंतमयाः प
९४ र्यंकाः॥२८॥ अत्र आसनानि च मृदूपस्तरणानि तूलादिमयानि येषु तानि यत्र च मुक्तादाम विलंबवंति द्युमंति च वितानानि॥२९॥३०॥ निर्मलः सं

पतिव्रता पतिं दृष्ट्वा प्रेमोत्कंठासमुल्लोचना॥ मीलिताक्ष्यनमद्बुध्वा मनसा परिषस्वजे॥२५॥ पत्नीं वीक्ष्य विस्फुरंतीं दे वै
वीं वैमानिकीमिव॥ दासीनां निष्ककंठीनां मध्ये भांतीं स विस्मितः॥२६॥ प्रीतः स्वयं तया युक्तः प्रविष्टो निजमंदिरं॥ मणिस्तं
भशतोपेतं महेंद्रभवनं यथा॥२७॥ पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः॥ पर्यंका हेमदंडानि चामरव्यजनानि
च॥२८॥ आसनानि च हैमानि मृदूपस्तरणानि च॥ मुक्तादामविलंबीनि वितानानि द्युमंति च॥२९॥ स्वच्छस्फटिककु
ललन ड्येषु महामारकतेषु च॥ रत्नदीपान्भ्राजमानान्ललनारत्नसंयुतान्॥३०॥ विलोक्य ब्राह्मणस्तत्र समृद्धीः सर्वसंपदां॥ तर्कया राम॰
मास निर्व्यग्रः स्वसमृद्धिमहैतुकीं॥३१॥ नूनं बतैतन्मम दुर्भगस्य शश्वद्दरिद्रस्य समृद्धिहेतुः॥ महाविभूतेस्वलोक ९५
तोन्यो नैवोपपद्येत यदूत्तमस्य॥३२॥ ॥ स्थिरः सन्नहैतुकीमाकस्मिकीं स्वस्य समृद्धिं तर्कयामास॥ कुत एषा समृद्धिरागते
ति॥३१॥ निश्चिनोति नूनमिति॥ एतन्ममेति॥ एषच्च या सा वहं च तस्य एतन्मम महती विभूतिर्यस्य तस्य अवलोकादन्यतः॥३२॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु सचेदवलोकनमात्रेण महदैश्वर्यं दत्तवान् तर्हि इदं तुभ्यं दत्तमिति किं नाबोचदत आह नन्विति। ननु मत्समक्षमसमक्षमब्रुवाण एव याचिष्णवे याचकाय भूरि
बह्वपि दिशति ददाति॥ अत्र हेतुः भूरिभोजः स्वयं तद्देयं पर्जन्यवदीक्षमाणः ६ अयमर्थः॥ स्वयं तावद्भूरिभोजः आप्तकामत्वात् लक्ष्मीपतित्वाच्च॥ अतो यथापा
रावारपरिपूर्णोऽपि वदान्यः पर्जन्यः कदाचिदल्पमपि वर्षमल्पमेव मन्यमानो जलरूप्येव समक्षमवर्षदृष्ट्वा निद्राणे कर्षके तत्क्षेत्रमात्रमावमति॥ एवं श्रीकृष्णोऽपि
स्वभोगापेक्षया तद्देयमिदं कादिपदमतितुच्छं मन्यमानः॥ तस्मान्नोक्तं बहु मन्यमानः॥ समक्षमब्रुवाण एव ददाति॥३३॥ तदेवाह किंचिदिति॥ उरु बह्वपि स्वद

नन्वब्रुवाणो दिशते समक्षं याचिष्णवे भूर्यपि भूरिभोजः॥ पर्जन्यवत्तत्स्वयमीक्षमाणो दाशार्हकाणामृषभः सखा मे॥३३॥
किंचित्करोत्युर्वपि यत्स्वदत्तं सुहृत्कृतं फल्ग्वपि भूरिकारी॥ मयोपनीतं पृथुकैकमुष्टिं प्रत्यग्रहीत्प्रीतियुतो महात्मा॥३४॥ त
स्यैव मे सौहृदसख्यमैत्रीदास्यं पुनर्जन्मनि जन्मनि स्यात्॥ महानुभावेन गुणालयेन विषज्जतस्तत्पुरुषप्रसंगः॥३५॥ ॥

त्तं यत्किंचित्करोति अल्पमपि मन्यते सुहृत्कृतं फल्ग्वपि भूरिकारी बहु मन्यत इत्यर्थः॥ अत एव मया उपनीतं समीपं नीतं प्रीतियुतः स्वयमेव प्रतिगृही
तवान्॥३४॥ श्रीकृष्णस्य पुनः क्वाप्यसत्संगं दृष्ट्वा तद्भक्तिं प्रार्थयते तस्यैवेति सौहृदं प्रेम सख्यं हितानुशंसनं च मैत्री उपकारकत्वं च॥ दास्यं सेवकत्वं तत्समाहारैक
वचनं॥ तस्य तत्संबंधिनो मे मम स्यात् न तु विभूतिः किंच महानुभावेन तेनैव विषज्जतो विशेषेण संगं प्राप्नुवतस्तद्भक्तेषु प्रकृष्टसंगः स्यादिति॥३५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰ वनुनकैः फलं संपदं प्राप्य पुनर्न किं किमिति प्रार्थयसे तत्राह ॥ नन्वायेति ॥ संपदः को शाही न राज्यमैश्वर्यं किन्तु तैः फलत्रपुत्रादीन् समर्धयति वदसति
॥ अपितु ददौ न किमेवकृतः अदीर्घबोधाय अविवेकिने मम तु न का नावादेवं जातेऽत तस्मात् किरेवस्यादिति नाक ॥ ३६ ॥ तस्य नत्वातैः ज्ञाने स्वागमस्यसि
९५ न्तर्ज्ञाय पासह बुभुजे ॥ ३७ ॥ ३६ ॥ श्रीकृष्णस्यैवं ब्रह्मण्यतानातिविनमित्याह ॥ तस्येति ॥ अन्तैरजितमपि स्वभृत्यैः पराजितं दृष्ट्वा तस्य ध्यानं तस्य वेगः

भक्ताय चित्रा भगवान् हि संपदो राज्यं विभूतीर्न समर्धयत्यजः ॥ अदीर्घबोधाय विचक्षणः स्वयं पश्यन्निपातं
धनिनां मदोद्भवं ॥ ३६ ॥ इत्थं व्यवसितो बुध्या भक्तोतीव जनार्दने ॥ विषयान् जायया त्यक्ष्यन् बुभुजे नातिलंप
टः ॥ ३७ ॥ तस्य वै देवदेवस्य हरेर्यज्ञपतेः प्रभोः ॥ ब्राह्मणाः प्रभवो दैवं न तेभ्यो विद्यते परं ॥ ३८ ॥ एवं स विप्रो भ
पराजितं गवत्सुहृत्तदा दृष्ट्वा स्व नृत्यैरजितं ॥ तद्ध्यानवेगोद्ग्रथितात्मबंधनस्तद्धाम लेभेऽचिरतः सतां गतिम् ॥ ३९ ॥ एत राम॰
द्ब्रह्मण्यदेवस्य श्रुत्वा ब्रह्मण्यतां नरः ॥ लब्धभावो भगवति कर्मबंधाद्विमुच्यते ॥ ४० ॥ ॥ इति श्री भागवते महा ९५
पुराणे दशमस्कंधे श्रीदामोपाख्याने ब्राह्मणसंपल्लब्धिर्नामैकाशीतितमोऽध्यायः ॥ ॥ ८१ ॥ ॥

तेन उद्ग्रथितमात्मबंधनमहंकारो मैयस्य सः ॥ गतिमिति सा विश्वलिंगं धाम विशेषणं सतां ब्रह्मविदां प्राप्यमित्यर्थः ॥ ३९ ॥ एतदत्युत्कोपाख्
यानं श्रुत्वा तत्र ब्रह्मण्यतां विशेषतः श्रुत्वेति ॥ ४० ॥ ॥ इति श्री भागवते महापुराणे दशमस्कंधे टीकायामेकाशीतितमोऽध्यायः ॥ ॥ ८१ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च्छरीतितमत्रागतः कुरुक्षेत्रं रविग्रहे ॥ हस्मीनहृष्टा सुहृन्नृपाश्च कृष्णकथा मिथः ॥१॥ श्रीरामसुहृदे कृष्णः प्रकल्प्यैं द्वपदं स्तुवि ॥ नंदादिसुहृदानंदी कु
रुक्षेत्रं जगाम सः ॥२॥ कल्पक्षये यथा सर्वग्रास इत्यर्थः ॥१॥ ज्योतिर्विद्भिः कथ्यमानमाशावेवज्ञात्वास्यमंतपंचकं कुरुक्षेत्रं ॥२॥ अब्रह्मण्य क्षत्रियवधस्या
नंतरं परशुरामस्य पापनुत्त्रिस्थानं तेन च क्षेत्रस्य पापनिरासकत्वमाह ॥ निःक्षत्रियामिति षाम्यां ॥३॥ अन्यो विद्वान् यथा ॥४॥ आगन् अगमन् भारती

श्रीशुक उवाच ॥ ॥ अथैकदा द्वारकायां वसतो रामकृष्णयोः ॥ सूर्योपरागः सुमहानासीत्कल्पक्षये यथा ॥१॥ तं ज्ञात्वा मनुजा राजन्
पुरस्तादेव सर्वतः ॥ स्यमंतपंचकं क्षेत्रं ययुः श्रेयोविधित्सया ॥२॥ निःक्षत्रियां महीं कुर्वन् रामः शस्त्रभृतां वरः ॥ नृपाणां रुधिरौघेण
यत्र चक्रे महाह्रदान् ॥३॥ ईजे च भगवान्रामो यत्रास्पृष्टोपि कर्मणा ॥ लोकं संग्राहयन्नीशो यथान्योऽघापनुत्तये ॥४॥ महत्यां ती
र्थयात्रायां तत्रागन् भारतीः प्रजाः ॥ वृष्णयश्च तथाक्रूरवसुदेवाहुकादयः ॥५॥ ययुर्भारत तत्क्षेत्रं स्वमघं क्षपयिष्णवः ॥ गदप्रद्यु
म्नसांबाद्याः सुचंद्रशुकसारणैः ॥६॥ आस्तेऽनिरुद्धो रक्षायां कृतवर्मा च यूथपः ॥ ते रथैर्देवधिष्ण्याभैर्हयैश्च तरलप्लवैः ॥७॥ ग
जैर्नदद्भिरभ्राभैर्नृभिर्विद्याधरद्युभिः ॥ व्यरोचंत महातेजाः पथि कांचनमालिनः ॥ दिव्यस्रग्वस्त्रसन्नाहाः कलत्रैः खेचरा इव
॥८॥ तत्र स्नात्वा महाभागा उपोष्य सुसमाहिताः ॥ ब्राह्मणेभ्यो ददुर्धेनूर्वासःस्रक्रुक्ममालिनीः ॥९॥ ॥

ःभारतः ॥५॥ सुचंद्रशुकसारणैः सहानिरुद्धो द्वारकारक्षायामास्ते तथा हृदिकस्य पुत्रः कृतवर्मा यूथपतिः सेनानी ॥६॥ देवधिष्ण्याभैर्विमानसंकाशैः त
रलास्तरंगास्तद्वत्प्लवो गतिर्येषां तैः विद्याधरद्युभिः ॥ विद्याधराणामिव द्युतिर्येषां ॥७॥ महातेजाः महातेजसः दिव्याश्च स्रग्वस्त्रसन्ना
हा येषां ॥८॥ ते पुनरन्ये पुः आप्लुत्य स्नात्वा तस्मिन्नेवाहनि मुक्तिस्नानं कृता ॥९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰ ८६

स्निग्धा स्त्री तला छाया येषां अंघ्रिपानां तेषां अंघ्रिपेषु मूलेषु ॥११॥१२॥१३॥१४॥ प्रोत्फुल्लैरुपवक्त्रसरोरुहैः श्रीः शोभा येषां ते ॥१५॥ अतिसौहृदेन यत्
स्मितं तेन अमला अपांगे दृशो दृष्टयो यासां ता मिथः संवीक्ष्य दोर्भिरेभिरे आलिंगनं हृष्टः तवत्सः ॥१६॥१७॥ संकथया मिथः प्रेमगोष्ठ्या ॥१८॥

रामकृष्णदेशु विविधवस्तुनराउत्पत्य समयः ॥ ददुः स्वर्णादि जाग्रे संहृष्टसेनोऽनन्ध्रिरक्षिति ॥१०॥ स्वयं च तदनुज्ञाताः स्वमयः हृष्टदेवताः ॥ तु
क्षोपविविशुः कामं स्निग्धच्छायांघ्रिपांघ्रिषु ॥११॥ तत्रागतांस्ते ददृशुः सुहृत्संबंधिनो नृपान् ॥ मत्स्योशीनरकौशल्यविदर्भकुरुसृंजयान्
॥१२॥ काम्बोजकैकयान्मद्रान्कुंतीनानर्तकेरलान् ॥ अन्यांश्चैवात्मपक्षीयान्परांश्च शतशो नृपान् ॥ नंदादीन्सुहृदो गोपान्गोपीश्चोत्कं
ठितांश्चिरं ॥१४॥ अन्योन्यसंदर्शनहर्षरंहसा प्रोत्फुल्लहृद्वक्त्रसरोरुहश्रियः ॥ आश्लिष्य गाढं नयनैः स्रवज्जला हृष्यत्त्वचो रुद्धगिरो य
युर्मुदं ॥१५॥ स्त्रियश्च संवीक्ष्य मिथोतिसौहृदस्मितामलापांगदृशोभिरेभिरे ॥ स्तनैः स्तनान्कुंकुमपंकरूषितान्निहत्य दोर्भिः प्रणया
श्रुलोचनाः ॥१६॥ ततोभिवाद्य ते वृद्धान्यविष्टैरभिवादिताः ॥ स्वागतं कुशलं पृष्ट्वा चक्रुः कृष्णकथा मिथः ॥१७॥ पृथा भ्रातॄन्स्वसॄर्वीक्ष्य
तत्पुत्रान्पितरावपि ॥ भ्रातृपत्नीर्मुकुंदं च जहौ संकथया शुचः ॥१८॥ ॥कुंत्युवाच॥ ॥आर्य भ्रातरहं मन्ये आत्मानमकृताशिषं ॥
यद्वा आपत्सु मद्वार्तां नानुस्मरथ सत्तमाः ॥१९॥ सुहृदो ज्ञातयः पुत्रा भ्रातरः पितरावपि ॥ नानुस्मरंति स्वजनं यस्य दैवमदक्षिणं ॥२०
॥२०॥ ॥वसुदेव उवाच॥ ॥अंब मास्मानसूयेथा दैवक्रीडनकान्नरान् ॥ ईशस्य हि वशे लोकः कुरुते कार्यतेथवा ॥२१॥ ॥ ॥ रम॰ ८६

तामेव वसुदेव पृथयोः कथामाह ॥ आर्येत्यादि चतुर्भिः ॥ अकृताशिषमपूर्णमनोरथं ॥१९॥ यस्य दैवमदक्षिणं ॥ अननुकूलं तं स्वजनम
पि संतं सुहृदादयो नानुस्मरंति ॥ अतो ममैव दैवमतिकूलं युष्माकं कोपमौराढ्य इति भावः ॥२०॥२१॥ ईश्वरवशत्वमेवाह ॥२१॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कंसप्रतापिताः इति हे स्वसः एतर्ह्येव संप्रत्येव ॥२५॥२५॥ युधिष्ठिरं येनुव्रतास्ते राजसूये जितत्वात् ॥२६॥२७॥ जन्मभाजः नृणां मध्ये सफलजन्मनः ॥२८॥ किंच न केवलं
तस्य दर्शनमेवस्मापि त्वत्संतदुर्लभं वयुष्माकं स्वतः संपन्नमित्याह ॥ यद्विश्रुतिरितिवाम्नायदिति इथ्यकरूपं यस्य स्वे त्यर्थः विश्रुतिः कीर्त्तिः श्रुतिनिर्दतुताइदं विश्वमत्य
र्थं पुनाति यस्य पादावनेजनपयो गंगा वचयस्य वचो वास्वरूपं शास्त्रं च वेदाख्यं विश्वं पुनाति ॥ किंच ॥ कालेन नर्कितं दग्धं मग्नं माहात्म्यं यस्याः सा तथाविधापिय
स्या ॥ श्रिपस्य स्पर्शेनोत्थान्नाविर्भूता शक्तिर्यस्याः सा नो स्माकमखिलानर्थान्न भिवर्षति ॥२९॥ दर्शनं च स्पर्शनं च ॥ अनुपथः अनुगतिश्च प्रजल्पो गोष्ठी च शय्या

कंसप्रतापिताः सर्वे वयं याता दिशं दिशं ॥ एतर्ह्येव पुनः स्थानं दैवेनासादिताः स्वसः ॥२१॥ ॥श्रीशुक उवाच ॥ ॥वसुदेवोग्रसेनाद्यैर्यदुभिस्ते
र्चिता नृपाः ॥ आसन्नच्युतसंदर्शपरमानंदनिर्वृताः ॥२२॥ भीष्मो द्रोणोंबिकापुत्रो गांधारी ससुतास्तथा ॥ सदाराः पांडवाः कुंती संजयो वि
दुरः कृपः ॥२३॥ कुंतिभोजो विराटश्च भीष्मको नग्नजिन्महान् ॥ पुरुजित् द्रुपदः शल्यो धृष्टकेतुः स काशिराट् ॥२४॥ दमघोषो विशालाक्षो मै
थिलो मद्रकेकयौ ॥ युधामन्युः सुशर्मा च ससुता बाह्लिकादयः ॥२५॥ राजानो ये च राजेंद्र युधिष्ठिरमनुव्रताः ॥ श्रीनिकेतं वपुः शौरेः सस्त्री
कं वीक्ष्य विस्मिताः ॥२६॥ अथ ते रामकृष्णाभ्यां सम्यक्प्राप्तसमर्हणाः ॥ प्रशशंसुर्मुदा युक्ता वृष्णीन् कृष्णपरिग्रहान् ॥२७॥ अहो भोज
पते यूयं जन्मभाजो नृणामिह ॥ यत्पश्यथासकृत्कृष्णं दुर्दर्शमपि योगिनां ॥२८॥ यद्विश्रुतिः श्रुतिनुतेदमलं पुनाति पादावनेजनपयश्च व
चश्च शास्त्रं ॥ भूः कालभर्जितभगापि यदंघ्रिपद्मस्पर्शोत्थशक्तिरभिवर्षति नोखिलार्थान् ॥२९॥ तद्दर्शनस्पर्शनानुपथप्रजल्पशय्यासना
शन[illegible]यौनसपिंडबंधः ॥ येषां गृहे निरयवर्त्मनि वर्ततां वः स्वर्गापवर्गविरमः स्वयमास विष्णुः ॥३०॥ ॥

शयनं चा आसनं च अशनं च भोजनं यौनबंधः
विवाहसंबंधः सपिंड दैहिकसंबंधः तेन सह वर्तमानः ॥ श्रीकृष्णेन दर्शनाद्युपलक्षितः सयौनः सपिंडबंधो येषां वो स्ति किंच ॥ येषां वो गृहे विष्णुः स्वयमास आविर
भूत् ॥ निरयवर्त्मनि प्रवृत्तिमार्गे वर्तमानानां नः स्वर्गापवर्गयोर्विरमयतीति वितृष्णान्करोति तथा स्मात्ते यूयं जन्मभाजः इति यत्तदिति सामान्यनिर्देशः स इत्यर्थः ॥ स विष्णु
ः स्वयं येषां वो निरयवर्त्मनि संसारकारणे गृहे वर्तमानानामपि वश्यतः इति बंधः दर्शनादिभिः संबंधः सन् स्वर्गापवर्गविरमः आसाम परमसुखप्रदो बभूवेत्यर्थः ॥३०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र. उ.
८७

अनस्थार्थैरिति तत्रैव वासचिकीर्षया शकटेषु स्थापितैरर्थैः सह आगत इत्यर्थः॥३१॥३२॥वसुदेवस्तं परिष्वज्य प्रेमविकलो बभूवेति शेषः॥३३॥३४॥
तौ सुतौ परिरभ्य नंदो यशोदा च विरहशोकान् विजहतुः तत्यजतुः॥ यद्वा शुचः अश्रूणि विजहतुः मुमुचतुरित्यर्थः॥३५॥ व्रजेश्वरीं यशोदां॥३६॥ अनि
वृत्तां निवृत्तिकारणे सत्यपि अनुवर्तमानामैश्वर्यं प्राप्यापि यस्याः प्रतिक्रियां कर्तुं न शक्यं इत्यर्थः॥३७॥ तत्कृतां मैत्रीमाहतुः एताविति॥ न दृष्टौ पितरौ

श्रीशुक उवाच॥ ॥ नंदस्तत्र यदून्प्राप्तान्ज्ञात्वा कृष्णपुरोगमान्॥ तत्रागमद्वृतो गोपैरनस्थार्थैर्दिदृक्षया॥३१॥ तं दृष्ट्वा वृष्णयो हृष्टा
स्तन्वः प्राणमिवोत्थिताः॥ परिषस्वजिरे गाढं चिरदर्शनकातराः॥३२॥ वसुदेवः परिष्वज्य संप्रीतः प्रेमविकलः॥ स्मरन्कंसकृतान्क्लेशा
न्पुत्रन्यासं च गोकुले॥३३॥ कृष्णरामौ परिष्वज्य पितरावभिवाद्य च॥ न किंचनोचतुः प्रेम्णा साश्रुकंठौ कुरूद्वह॥३४॥ तावात्मासनमा
रोप्य बाहुभ्यां परिरभ्य च॥ यशोदा च महाभागा सुतौ विजहतुः शुचः॥३५॥ रोहिणी देवकी चाथ परिष्वज्य व्रजेश्वरीं॥ स्मरंत्यौ तत्कृतां
मैत्रीं बाष्पकंठ्यौ समूचतुः॥ का विस्मरेत वां मैत्रीमनिवृत्तां व्रजेश्वरि॥ अवाप्याप्यैन्द्रमैश्वर्यं यस्या नेह प्रतिक्रिया॥३७॥ एतावदृष्टपि
तरौ युवयोः स्म पित्रोः संप्रीणनाभ्युदयपोषणपालनानि॥ प्राप्योषतुर्भवति पक्ष्म ह यद्वदक्ष्णोर्न्यस्तावकुत्र च भयौ न सतां परः स्व राम. ८७
॥३८॥ ॥ ऋषिरुवाच॥ ॥ गोप्यश्च कृष्णमुपलभ्य चिरादभीष्टं यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपंति॥ दृग्भिर्हृदीकृतमलं परिरभ्य सर्वा
स्तद्भावमापुरपि नित्ययुजां दुरापं॥३९॥ ॥ यास्मां तौ वसुतस्तु अजन्मतो देवा अदृष्टपितरौ॥ हे नंद तव यशोदे युवयोः पित्रोर्न्यस्तावेतौ संप्रीणनादीनि
प्राप्यकुत्र न्यसायोः क्वचिदपि भयरहितौ भूत्वा उषतुः वासं चक्रतुः॥ कथंभूतयोः अक्ष्णोः नेत्रयोः रक्षकं पक्ष्म तद्वत् तथा च रक्षकयोः॥ युक्तं युवयोरेवं
तत्॥ यतः सतां परः स्व इति नास्ति वैषम्यं॥३८॥ अभीष्टलेलिंगं यस्य श्रीकृष्णस्य प्रेक्षणे दृशिषु नेत्रेषु पक्ष्म विधातारं शपंति॥ दृग्भिर्नेत्रद्वारैः हृदीकृतं
हृदये प्रवेशितं परिरभ्य तद्भावं तदात्मतां प्रापुः॥ अपि नित्ययुजां आरूढयोगिनामपि॥३९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४०॥ चिरायितान्विलंबितानत्र हेतुः॥ शत्रूणां पक्षस्य क्षपणे चेतो येषां तान्॥४१॥ अपि स्विद्भस्मान वध्यायथ॥ अवजानीथ अकृतज्ञाएतद्रूपविशं
कयाईषच्छंकया न संकामात्रं निश्चितमेवेतत्परित्यज्य गतवानिति चेत्॥ अत आह नूनमिति॥४२॥ एतस्य दृष्टांतमाह॥ वायुरिति॥ आक्षिपते पृथक्करोतीत्यर्थः॥४३॥
अपिचातिबहुमिदं यदुत भवतीनां मद्वियोगेन मत्प्रेमातिशयो जात इत्याह॥ मयीति॥ मयि भक्तिमात्रमेव तावदमृतत्वाय कल्पते॥ यत्तु भवतीनां मत्स्नेह आसी
त्तद्दिष्ट्याऽतिबहुकृतं मदापनः मत्प्रापण इति॥४४॥ कीदृशांत्वयवयं स्नेहेन माऽस्मान्मद्रूपसपेक्षायामात्मस्वरूपमाह॥ अहं हीति॥ हे अंगनाः भौ ति

भगवांस्तास्तथाभूता विविक्तउपसंगतः॥ आश्लिष्यानामयं पृष्ट्वा प्रहसन्निदमब्रवीत्॥४०॥ अपि स्मरथ नः सख्यः स्वानामर्थचिकी
फ र्षया॥ गतांश्चिरायितांछत्रुपक्षक्षपणचेतसः॥४१॥ अप्यवध्यायथास्मान्स्विद[illegible]कृतज्ञाविशंकया॥ नूनं भूतानि भगवान्युनक्ति
वियुनक्ति च॥४२॥ वायुर्यथा घनानीकं तृणं तूलं रजांसि च॥ संयोज्याक्षिपते भूयस्तथा भूतानि भूतकृत्॥४३॥ मयि भक्तिर्हि भूतानाममृत
त्वाय कल्पते॥ दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापनः॥४४॥ अहं हि सर्वभूतानामादिरंतोऽन्तरं बहिः॥ भौतिकानां यथा खं वा[illegible]र्भूर्वायु
र्ज्योतिरंगनाः॥४५॥ एवं ह्येतानि भूतानि भूतेष्वात्माऽऽत्मना ततः॥ उभयं मय्यथ परे पश्यताभातमक्षरे॥४६॥ ॥

कानां शरावशंखवादीनां य
थाऽकाशादिपंचभूतान्याद्यंतादिरूपाणि एवं सर्वभूतानां जरायुजादीनां महमतो व्यापकं मां भवंतः प्राप्ता एवेति॥४५॥ ननु चतुर्विधभूतग्रामाणां॥ तज्ञे
कात्मैवाद्यंतादिरूपः॥ तस्मिंश्च सर्वव्यापके सर्वभूतानि वर्त्तंत इति॥ कुत स्तत्प्राप्तिरस्माकमित्यत आह॥ एवं हीति॥ अप[illegible]र्यः पृथक् शरावादीनां भौतिकानां
महाभूतान्याद्यंतरूपाणि॥ एवमेवैतानि चतुर्विधानि भूतान्यपि भौतिकत्वाविशेषात्स्वकारणेषु भूतेष्वेव वर्त्तंते न तु भोक्तर्यात्मनि॥ आत्मा तु तेषु व्या ल
नाभोक्तृरूपेण ततः व्याप्तः न कारणत्वेनाद्यंतरूपं भूत[illegible] भौतिकरूपं भोक्तारं चात्मानं मय्यक्षरे परिपूर्णे आभातं पश्यतेति॥४६॥ ॥

भोग्यंच

भा॰ द॰ उ॰
८६

च अध्यात्मशिक्षया स्वरूपोपदेशेन शिक्षिताः बोधिताः तस्यानुस्मरणेन ध्वस्तो जीवकोशो लिंगं यासां ताः ॥ तमेवाध्यगन् प्रापुः ॥४७॥ एवं प्राप्तोपि कृष्णः पुनर्गृहव्या
संगेन मा पराभवितेति तच्चरणस्मरणं प्रार्थयामासुरित्याह ॥ आहुश्चेति ॥ हे नलिननाभ ते पदारविंदं गेहं जुषां गृहसेविनीनामपि नो मनसि सदा उदियात् आ
विर्भवेत् ॥४८॥ दशमे द्व्यशीतितमः ॥ ॥ त्र्यशीतितमे एवं च स्त्रीणां कृष्णकथोद्भवे ॥ द्रौपद्यै कृष्णभार्याभिरुक्ताः स्वस्वकरग्रहाः ॥ ॥ अव्ययं कुशलं ॥१॥ तत्पादे
क्षया हतमंहो येषां ते ॥२॥ महतां मनस्तः सकाशान्मुखद्वारतो निःसृतं क्वचित् कदाचिद् देहभृतां देहधारिणां देहकृच्चासावस्मृतिश्च अविद्या तां छिनत्तीति त

श्रीशुक उवाच ॥ ॥ अध्यात्मशिक्षया गोप्य एवं कृष्णेन शिक्षिताः ॥ तदनुस्मरणध्वस्तजीवकोशास्तमध्यगन् ॥४७॥ आहुश्च ते नलिननाभप
दारविंदं योगेश्वरैर्हृदि विचिंत्यमगाधबोधैः ॥ संसारकूपपतितोत्तरणावलंबं गेहं जुषामपि मनस्युदियात् सदा नः ॥४८॥ ॥ इति श्रीभागव
ते महापुराणे दशमस्कंधे तीर्थयात्रायां वृष्णिकुरुसंगमो नाम द्व्यशीतितमोऽध्यायः ॥ ॥ श्रीशुक उ० ॥ ॥ तथानुगृह्य भगवान् गोपीनां स गु ती॰
तु रुर्गतिः ॥ युधिष्ठिरमथापृच्छत् सर्वांश्च सुहृदोऽव्ययं ॥१॥ त एवं लोकनाथेन परिपृष्टाः सुसत्कृताः ॥ प्रत्यूचुर्हृष्टमनसस्तत्पादेक्षाहतांह राम॰
सः ॥२॥ कुतोऽशिवं त्वच्चरणांबुजासवं महन्मनस्तो मुखनिःसृतं क्वचित् ॥ पिबंति ये कर्णपुटैरलं प्रभो देहंभृतां देहकृदस्मृतिच्छिदं ॥३॥ ८६

था तं देहकृदीश्वरस्तद्विषयाज्ञानं छिंदंतं ॥३॥ विमुखीहे प्रभो त्वच्चरणांबुजासवं कर्णपुटैर्येऽलं पिबंति तेषां तत्कुकृतैर्न शास्त्रकालरूपात् कुतोऽशिवं न भव
तीत्यर्थः कथंभूतं महात्मनां मनसा सारीनं मुखनिःसृतं ॥ क्वचित् कदाचिदपि मासादि वा कैस्ता मामत्वे तजानतो न दुःखं भवतीत्यर्थः ॥ न त्वीश्वरस्मात्तत्वमे
व कथं तत्राह ॥ देहंभृत इति ॥ देहंभृतो जीवाः त्वत्कृते तत्र देहे तु लेन उद्भूसंति जीवंति को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनंदो न स्यादिति श्रुतेः
॥ अथवा त्वन्मुखनिःसृतं त्वच्चरणांबुजासवं ये पिबंति तेषां महात्मनां कुतोऽशिवमित्यन्वयः ॥ त्वत्कृते भगवन्नमस्कारकरणाय ॥३॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हित्वेति पदद्वयं त्वात्वां हि एवं त्वामेव नताः स्म इत्यर्थः॥ कथंभूतं॥ आत्मधाम्ना स्वरूपप्रकाशेन विधुताः निरस्ताः आत्मभूता बुधिनिमित्तास्त्रिस्रोऽवस्था यस्मि
न् तं॥ अत एव आनंदसंप्लवं सर्वानंदकंदं स्वरूपं॥ अखंडं अपरिच्छिन्नं यतः नकुंठः नकुंठितो बोधश्शक्तिर्यस्य तं॥ नन्वेवंरूपता श्रीहरेस्स्मत्कुतोऽस्मदादि
वदेव प्रतीतेत्यत आह॥ कालोपसृष्टेति॥ कालेन उपसृष्टा विप्लुताश्च ते निगमाश्च तेषामवने रक्षार्थं आत्ता उपात्ता योगमायया आकृतिर्नराकारा मूर्तिर्ये
न तं॥ परमहंसानां गतिं त्वां॥ अतस्तवैवंरूपत्वादस्माकं चलन्मायया एतत्सर्वं वैपरीत्यात्त्वामेव नताः स्मेति॥ यद्वा॥ त्वामिति प्रकरणात् तज्ज्ञातमंतं न ताः

हित्वात्मधामविधुतात्मकृतत्र्यवस्थमानंदसंप्लवमखंडमकुंठबोधं॥ कालोपसृष्टनिगमावन आत्तयोगमायाकृतिं परमहंस[illegible]गति
नताः स्म॥ ४॥ ॥ऋषिरुवाच॥ ॥इत्थं त्वमश्लोकशिखामणिं जनेष्वभिष्टुवत्स्वंधककौरवस्त्रियः॥ समेत्य गोविंदकथामिथो गृणंत्यस्त्रिलोकगी
ताः शृणु वर्णयामि ते॥ ५॥ ॥द्रौपद्युवाच॥ ॥हे वैदर्भ्यच्युतो भद्रे हे जांबवति कौशले॥ हे सत्यभामे कालिंदि शैब्ये रोहिणि लक्ष्मणे॥ ६॥ हे
कृष्णपत्न्य एतन्नो ब्रूत वो भगवान्स्वयं॥ उपयेमे यथा लोकमनुकुर्वन्स्वमायया॥ ७॥ ॥श्रीरुक्मिण्युवाच॥ ॥चैद्याय मार्पयितुमुद्यत
कार्मुकेषु राजस्वजेयभटशेखरितांघ्रिरेणुः॥ निन्ये मृगेंद्र इव भागमजावियूथात्तच्छ्रीनिकेतचरणोस्तु ममार्चनाय॥ ८॥ ॥

स्म किंकृत्वा हित्वा किं॥ आत्मधाम आत्मा शरीरं धाम गृहं तच्च तत्संह दैहिकं संगं परित्यज्येत्यर्थः॥ समानमस्तता॥ ४॥ त्रिषु लोकेषु गीताः॥ ५॥ कौश
ले हे सत्ये शैब्ये मित्रविंदे॥ रोहिणी नाम काचित्पट्टमहिषी तुल्या॥ ६॥ हे अनसाः श्रीकृष्णस्य पत्न्यः॥ ७॥ मां मां अर्पयितुं संपादयितुं राजसु जरासंधादिषु॥ उद्यतका
र्मुकेषु सत्सु अजेया ये भटास्तेषां शेखरिता मुकुटवत्कृता अंघ्रिरेणवो येन तेषां मूर्ध्नि पदं दधदित्यर्थः॥ तस्य श्रीनिकेतस्य चरणो ममार्चनायास्तु॥ ८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म·द·उ·
६९

सत्राजितोभ्रातुर्वधेन सिंहहृतेन तन्मंरुध्य स्मतेन मे ततेन त्रितमनिश्चापं इत्यर्थः। अपमार्ष्टुं परिहर्तुं ऋक्षराजं तिलिलार तंस्यमंतकमुपाजहार स्वानीतवा
न्। अथानंतरं मत्पित्रे रत्नमदात्तेन स्वापराधं नीतः समे पिता प्रभवेश्रीहृत्क्षायमामदिशात् तद्दत्ते दत्तामकूरादिभिः प्रतिश्रुतामपीत्यर्थः॥९॥ देहहृत मे
पिता। अमुं श्रीहृत्सं निजं नाथं स्वामिनं देवमीश्वरं सीतापतिं प्राज्ञाय आविज्ञापन्निनवहानि। रुस्वंद्वंद्वोनुरोधेन सप्तविंशतिदिनान्यमुना अस्मयुध्य

सत्यभामा उवाच॥ ॥यो मे सनाभिवधतप्तहृदा ततेन लिप्ताभिशापमपमार्ष्टुमुपाजहार॥ जित्वर्क्षराजमथ रत्नमदात्स तेन भीतः
पितादिशत मां प्रभवेपि दत्तान्॥ ९॥ ॥जांबवत्युवाच॥ ॥प्राज्ञाय देहकृदमुं निजनाथदैवं सीतापतिं त्रिनवहान्यमुनाऽभ्यषित
ज्ञात्वा परीक्षित उपाहरदर्हणं मां पादौ प्र[...]गृह्य मणिना हममुष्य दासी॥१०॥ ॥कालिंद्युवाच॥ ॥तपश्चरंतीमाज्ञाय स्वपादस्प
र्शनाशया॥ सख्योपेत्याग्रहीत्पाणिं योहं तद्गृहमार्जनी॥११॥ ॥मित्रविंदोवाच॥ ॥यो मां स्वयंवर[...]मुपेत्य विजित्य भूपान्निन्ये श्व
यूथग[...]मिवात्मबलिं द्विपारिः॥ भ्रातृंश्च मेपकुरुतः स्वपुरं श्रियौकस्तस्यास्तु मेऽनुभवमंघ्र्यवनेजनत्वम्॥१२॥ ॥

तापरीक्षितः संजाता परीक्षाय स्यसः परीक्षितः॥ तं साक्षात्सीतापतिरेवासाविति ज्ञात्वा पादौ प्रगृह्य मणिना सह मामर्हणमुपाहरत्॥ अर्ह
णं तया समर्पितवान्॥ अहो तर्हि त्वमतिश्रेष्ठासि नेत्याह। अमुष्याहं दासीति॥१०॥ सख्यार्जुनेन तस्य गृहे मार्जनकर्त्री॥११॥ श्वनां यूथगतं स्वबलिं
द्विपारिः सिंह[...]वेईति॥ मे भ्रातृंश्चापकुरुतः अप[...]कारं कुर्वतो विजित्य श्रियौकः लक्ष्मीनिवासः तस्यांघ्र्यवनेजनत्वं चरणक्षालनकर्तृत्वं अनुज
न्मनि जन्ममेऽस्तु॥१२॥ ॥

प्र

सु
प
वे

राम·
६९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्तउक्षणः वृषभान् बलं च वीर्यं प्रभावश्च तीक्ष्णशृंगाणि चातिशयितानि येषां तान् मे पित्रा हृतान् संपादितान् बलीयसे मां दातुं क्षितिपानां ब ति
लस्य वीर्यस्य परीक्षणाय तान् अतिप्रसिद्धान् वीराणां दुर्मदं घ्नंति ये तान् तरसा शीघ्रमेव निगृह्य दमयित्वा क्रीडन्ननायासेनैव बबंध अजतोका
न् अजापत्यानि॥१३॥ वीर्यमेव शुल्कं देयं यस्मात्सो दासीतिः सह चतुरंगिणी गजाश्वादिसेनायुक्तं पुरं निन्ये॥१४॥ हंसो द्रौपदि तस्मिन्नेव

सत्योवाच॥ ॥सप्तोक्षणोतिबलवीर्यसुतीक्ष्णशृंगान् पित्रा हृतान् क्षितिपवीर्यपरीक्षणाय॥ तान्वीरदुर्म्मदहन
स्तरसा निगृह्य क्रीडन्बबंध ह यथा शिशवोजतोकान्॥१३॥ य इत्थं वीर्यशुल्कां मां दासीभिश्चतुरंगिणीं॥ पथि नि
र्जित्य राजन्यान् निन्ये तद्दास्यमस्तु मे॥१४॥ ॥भद्रोवाच॥ ॥पिता मे मातुलेयाय स्वयमाहूय दत्तवान्॥ कृष्णे कृष्णा
य तच्चित्तामक्षौहिण्या सखीजनैः॥१५॥ अस्य मे पादसंस्पर्शो भवेज्जन्मनि जन्मनि॥ कर्म्मभिर्भ्राम्यमाणाया ये
न तच्छ्रेय आत्मनः॥१६॥ लक्ष्मणोवाच॥ ॥ममापि राज्ञ्यच्युतजन्मकर्म्म श्रुत्वा मुहुर्नारदगीतमास ह॥ चित्तं मु
कुंदे किल पद्महस्तया वृतः सुसंमृश्य विहाय लोकपान्॥१७॥ ॥

चित्तं यस्यास्तां माम् अक्षौहिण्या सेनया सह॥ सखीजनैश्च सह॥१५॥ येन पादसंस्पर्शेन आत्मनो मे तत्कैवल्याख्यं श्रेयो भवेत्॥ यद्वा येन
कारणेनात्मनो जीवस्य तत् श्रेयः स एव पुरुषार्थ इति॥१६॥ राज्ञि हे द्रौपदि॥ यथा मित्रविंदायास्तथा ममापि चित्तं मुकुंदविषयमासी
त्॥ सुसंमृश्य सुविचार्य पद्महस्तया श्रिया वृतं किल च्युतोपि मम चित्तं श्रीमुकुंदे आसेति॥१७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰

१०

तत्रश्री हर्षस्याशावचीकरत्कारयामास॥१६॥ यथा राज्ञितवस्वयंवरे पार्थस्य मया प्राप्तुमिच्छया हृतः तथामत्स्यं कारितवान्पांगतरेपार्थस्येषु णाः पाहतः तद्दीममाप्यर्जुन एव किंनाविध्यततन्ना हायंत्विति॥ समस्तोबहिरेवाच्छन्नोनांतः अंतः स्तंत्रसंलग्नयोर्धदृष्ट्या संलक्ष्यते॥ अयंतुनतन्न याकिंतुस्तंभमूलेनिहितकटाहजलेकेवले दृश्यते तोदृष्टिरधस्तादुपरिचलक्ष्यमितिश्रीहर्षस्यातिरेकेणनकस्यापिनेयइतिभावः॥१९॥२०॥

ज्ञात्वामममतंसाध्विपितादुहितवत्सलः॥ द्रुहस्तेनइतिस्मातस्तन्नोपापमचीकरत॥१८॥ यथास्वयंवरेराज्ञिमत्स्यः पार्थेष्वया हृ तः अयंतुबहिरलक्ष्योदृश्यतेस जलेपरं॥१९॥ श्रुत्वैतत्सर्वतो नृपा आययुर्मत्पितुःपुरं॥ सर्वास्त्रशास्त्रतत्वज्ञाः सोपाध्यायाः सह स्वगाः॥२०॥ पित्रासंपूजिताः सर्वेयथावीर्यंयथावयः॥ आददुःसशरंचापंवेधुंपर्षदिमध्यि पः॥२१॥ आदायमसजन्केचित्सज्यंकर्तुं मनीश्वराः॥ आक्रोष्टुंज्यांसमुत्क्षिप्यपेतुरेकेसुताहताः॥२२॥ सज्यंकृत्वापरेवीरामागधांबष्टचेदिपाः॥ नीमोडुर्योधनःकर्णोनाविंदंस्त दवस्थितिं॥२३॥ मत्स्यानासन्जलेवीस्यज्ञात्वाचतदवस्थितिं॥ पार्थोयमत्रो स्तजबाणंनाच्छिनत्स्यलक्ष्योपरं॥२४॥ राजन्येषुनिवृत्तेषुच न्नेमानेषुमानिषु॥ भगवान्धनुरादायसज्यं कृत्वाथलीलया॥२५॥ तस्मिन्संधायविशिखंमत्स्यंवीक्ष्यसकृज्जले॥ छित्वेषुणापा तयत्तं॥ स्र्व्यचानिमितितिस्थिते॥२६॥ दिविदुंदुभयोनेदुर्जयशब्दयुतांभुवि॥ देवाश्चकुसुमासारान्मुमुचुर्हर्षविकलाः॥२७॥

मत्स्यंवेधुंपर्षदिसंसदिमध्यिमध्ये एव धीयेषांमिति॥ छन्नत्विज्ञानवेधुंशक्यइतिभावः॥२१॥ तदेवाह॥ आदायेति॥२२॥ नाविंदंस्तदवस्थितिमि ति॥ मागधादीनां किंपाशक्तिरेवनतुज्ञस्यापि निज्ञता इत्यर्थः॥२३॥ यत्रोपत्रवाक्त्रसजतमुमाचा॥ सबाणेमत्स्यंनाच्छिनतम्॥ परंकेवलं पस्पर्शज्ञानवानप्यर्जुनोबलेनापूर्ण इत्यर्थः॥२४॥२५॥ अनिमिषंतिर्विधिसाधकेमहत्त्वं॥२७॥ ॥

राम॰

१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवत्यामिह र्षनिर्भरेणात्मानमेवानुवर्णयंत्याह द्वाभ्यां ॥ तदंगमितितन्नदाकलौ कलस्वनौ नूपुरौ ययोस्ताभ्यां पद्भ्यां रंगमाविशं ॥ कनकेनोज्वलां
रत्नमालां निविय प्राप्ट्तपरिधाय चनीवीबंधेनकौशिकाग्रे उत्तमकौशेयवस्त्रे सव्रीडो हासो यस्मिन् नतवदनं यस्याः सा कबर्यां धृता स्रजो यया सा ॥ १७ ॥ उ
रवःकुंतला यस्मिन् कुंडलयोस्त्विषो ययोस्ते गंडस्थले यस्मिन्तदेव तच्च शिशिरः संतापहरो हासो येषु तैः करास्त्रमोदैः श्चपांगवीक्षणविलासैरु
रक्तं हृदयं यस्याः सा ॥ १८ ॥ हेमाङ्ग सेनिङ्गोपदिश्री ह्वसे ईशोमयाहृते सति ॥ स्पर्धंतः स्पर्धमानाः ॥ न त्वेवं परमैश्वर्ये दृष्टवतां ऊतः स्पर्धावसरस्तत्राह

तदंगमाविशमहं कलनूपुराभ्यां पद्भ्यां प्रगृह्य कनकोज्वलरत्नमालां ॥ नह्येन्निवीयपरिधाय च कौशिकाग्र्ये सव्रीडहासवदना कब
रीधृतस्रक् ॥ १८ ॥ उन्नीयवक्रमुरुकुंतलकुंडलत्विट्गंडस्थलं शिशिरहाससंकटाक्षमोक्षैः ॥ राज्ञो निरीक्ष्य परितः शनकैर्मुरारेरंसेतु क
रक्तहृदया निदधे स्वमालां ॥ १९ ॥ तावन्मृदंगपटहाः शंखभेर्यानकादयः ॥ निनेदुर्नटनर्तक्यो ननृतुर्गायका जगुः ॥ २० ॥ एवं वृते तु
भगवति मयेशे नृपायूथपाः ॥ न सेहिरे याज्ञसेनि स्पर्धंतो हृच्छयातुराः ॥ २१ ॥ मां तावद्रथमारोप्य हय रत्नचतुष्टये ॥ शार्ङ्गमुद्यम्य
संनद्धस्तस्थावाजौ चतुर्भुजः ॥ २२ ॥ दारुकश्चोदयामास कांचनोपस्करं रथं ॥ मिषतां भूभुजां राज्ञि मृगाणां मृगराडिव ॥ २३ ॥ तेन्व
सज्जंत राजन्या निषेद्धुं पथि केचन ॥ संयत्ता उद्धृतेष्वासा ग्रामसिंहा यथा हरिं ॥ २४ ॥ ॥

हृच्छयातुरा इति ॥ हृच्छयेन कामेनातुराः विव
शाः कामविजृंभितास्पर्धंतीति भावः ॥ २१ ॥ हयरत्नानां चतुष्टयं यस्मिंस्तं रथं ह्वास्यो मामाल्लिंग्य द्वाभ्यां धनुर्बाणौ गृहीत्वा चतुर्भुजस्तस्थौ ॥ २२ ॥ मृ
गाणां मिषतां मृगराडिव तदा हरिर्जगामेति शेषो ज्ञातव्यः ॥ दारुकस्यैव मृगराजोपमाः ॥ २३ ॥ अन्वसज्जंत राजन्याः पृष्ठतः शाक्ताः बभूवुः ॥ निषेद्धुं
प्रतिबंधं कर्तुं केचन पुरतो गत्वा पथि संयत्ता बभूवुरित्यर्थः ॥ उद्धृतेष्वासाः उद्धृतचापाः ग्रामसिंहाः श्वानः हरिं सिंहं यथेति ॥ २४ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रविंछादयंतीति रविछदा ध्वजेषु पटा यस्यां चित्राणि तोरणानि यस्यां सैव सा च तां कुशस्थलीं पुरीं यदुपतिः समाविशत॥ स्वकेतनं मंडलमस्ता
चलेवा॥३५॥ महार्हवासःप्रभृतिभिः सुहृदादीन् पूजयामास॥३६॥ दासीभिः सह आयुधानि पूर्णाय तस्मै अपि ददौ॥३७॥ इमा अष्टौ वयं स

तेऽश्वाद्यैः स्युतबाणौघैः हतबाह्वंघ्रिकंधराः॥ निपेतुः प्रधने केचिदेके संत्यज्य दुद्रुवुः॥३५॥ ततः पुरीं यदुपतिरत्यलंकृतां
रविछदध्वजपटचित्रतोरणां॥ कुशस्थलीं दिवि भुवि चाभिसंस्तुतां समाविशत्तरणिरिव स्वकेतनं॥३६॥ पिता
मे पूजयामास सुहृत्संबंधिबांधवान्॥ महार्हवासोऽलंकारैः शय्यासनपरिच्छदैः॥३७॥ दासीभिः सर्वसंपद्भिर्भटेभर
थवाजिभिः॥ आयुधानि महार्हाणि ददौ पूर्णस्य भक्तितः॥३८॥ आत्मारामस्य तस्येमा वयं वै गृहदासिकाः॥ सर्वसं
गनिवृत्त्याद्धा तपसा च बभूविम॥३९॥ ॥महिष्य ऊचुः॥ भौमं निहत्य सगणं युधि तेन रुद्धा ज्ञात्वाथ नः क्षितिज
ये जितराजकन्याः॥ निर्मुच्य संसृतिविमोक्षमनुस्मरंतीः पादांबुजं परिणिनाय य आप्तकामः॥४०॥ ॥

र्वसंगनिवृत्त्या तपसा स्वधर्मेण अद्धा साक्षात्तस्य गृहदासिका बभूविम॥३९॥ क्षितिजये दिग्विजये जितानां राज्ञां कन्याः ताः अस्मान् तेन रु
द्धाः ज्ञात्वा ततो निर्मुच्य संसृतेर्विमोक्षो यस्मात्॥ तत्पदांबुजमनुस्मरंतीः नः परिणिनाय उद्वाहितवान्॥ आप्तकामोऽपि सः॥४०॥ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न वयमिति साम्राज्यादिकं कामयामहे किं । एतस्य श्रीमत्पादरजो मूर्ध्ना वोढुं कामयामह इति । ननु तस्य गृही एषो यूयं सर्वसंपन्ना जनाः किमेवं कामयते अत आ
हुः हे साध्वि साम्राज्यं सार्वभौमं पदं स्वाराज्यं मैंद्रं पदं ॥ भोज्यं तदुभयभोगयोग्यत्वं विविधं राजत इति विराट् तस्य भावो वैराज्यं अणिमादिसिद्धिनाकं त्वमित्यर्थः
॥ पारमेष्ठ्यं ब्रह्मणः पदं ॥ आनंत्यं मोक्षं हरेः पदं तस्य लोकादि न तु कामयामह इति ॥ पद्मा वक्षस्थले णेकुंकुमेणाग्राणादि दिकुचपृष्ठ्यादिपत्यानि सा
म्राज्यभोज्यस्वाराज्यवैराज्यानि व्याख्यातानि ॥ ४१ ॥ तर्हि किं तत्पादरज एव कामयते ॥ अत आहुः श्रियः कुचकुंकुमगंधाढ्यमिति ॥ ब्रह्मादिसेव्यमानश्रिया

न वयं साध्वि साम्राज्यं स्वाराज्यं भोज्यमप्युत ॥ वैराज्यं पारमेष्ठ्यं च आनंत्यं वा हरेः पदं ॥ ४१ ॥ कामयामह एतस्य श्रीमत्पादरजः श्रियः ॥ कु
चकुंकुमगंधाढ्यं मूर्ध्ना वोढुं गदाभृतः ॥ ४२ ॥ व्रजस्त्रियो यद्वांछंति पुलिंद्यस्तृणवीरुधः ॥ गावश्चारयतो गोपाः पादस्पर्शं महात्मनः ॥
४३ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे त्र्यशीतितमोऽध्यायः ॥ ८३ ॥ ॥ श्रीशुक उवाच ॥ श्रुत्वा पृथा सुबलपुत्र्यथ याज्ञसे
नी माधव्यथ क्षितिपपत्न्य उत स्वगोप्यः ॥ कृष्णेऽखिलात्मनि हरौ प्रणयानुबंधं सर्वा विसिस्म्युरलमश्रुकलाकुलाक्ष्यः ॥ १ ॥ इति सं
भाष्यमाणासु स्त्रीभिः स्त्रीषु नृभिर्नृषु ॥ आययुर्मुनयस्तत्र कृष्णरामदिदृक्षया ॥ २ ॥ द्वैपायनो नारदश्च च्यवनो देवलोऽसितः ॥ विश्वा
मित्रः शतानंदो भरद्वाजोऽथ गौतमः ॥ ३ ॥ पिसेवितत्वादिति भावः ॥ ४२ ॥ ननु तर्हि अतिदुर्लभता तत्किं तत्र छाया अत आहुः ॥ व्रजस्त्रिय इति यत् पद्माभाव-
गा महात्मनोपि गाश्चारयतः पादस्पर्शं व्रजगोप्याय थावांछंति तद्वत् ॥ तत्पादरेणुं सुलभमिति भावः ॥ ४३ ॥ इति दशमे त्र्यशीतितमः ॥ ८३ ॥ चतुरशीतिकाशीतितमे मुनिसमा
गमो वसुदेवस्य मखोत्साह बंधुसमापनादिकं ॥ १ ॥ सुबलपुत्री गांधारी माधवी सुभद्रा क्षितिपानां राज्ञां पत्न्यः स्वगोप्यः कृष्णस्य नः कृष्णगोप्यः विसिस्म्युः विस्मयं चक्रुः ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰द॰उ॰

९२

श्री २

ज्ञानचक्षुः अर्चितवंतः ॥७॥ धर्मगोप्त्री तनुर्यस्य स धर्मगुप्तनुः ॥ यता नियता वाग्यस्य तस्य सदस्यस्य ॥८॥ जन्मभृतः सफलजन्मानः स्वतः फलं जन्मफलं तत् ॥
पयोगेश्वरदर्शनं ॥९॥ किंच ॥ युष्माकं दर्शनमेव तावद्देवानामपि दुःप्रापं अस्माकं तु स्पर्शनादिकमपि कथं घटितमिति विस्मयेनाह ॥ किमिति ॥ स्व
ल्पतपसां ॥ तीर्थस्नानादिमात्रे तपोबुद्धिर्येषां तथा ॥ अर्चायां प्रतिमायां देवदृष्टि चक्षुर्दृष्टिर्येषां तेषां योगेश्वरस्य दर्शनादिकमिदं किं असंभावितमित्यर्थः ॥१०॥

रामः सशिष्यो भगवान् वसिष्ठो गालवो मनुः ॥ पुलस्त्यः कश्यपोत्रिश्च मार्कंडेयो बृहस्पतिः ॥४॥ द्वितस्त्रितश्चैकतश्च ब्रह्मपुत्रस्तथांगि
रः ॥ अगस्त्यो याज्ञवल्क्यश्च वामदेवादयोपरे ॥५॥ तानागतान् दृष्ट्वा सहसोत्थाय प्रागासीता नृपादयः ॥ पांडवाः कृष्णरामौ च प्रणेमु
र्विश्ववंदितान् ॥६॥ तानानर्चुर्यथा सर्वे सहरामोच्युतोर्चयत् ॥ स्वागतासनपाद्यार्घ्यधूपगंधानुलेपनैः ॥७॥ उवाच सुखमा
सीनान् भगवान् धर्मगुप्तनुः ॥ सदस्यस्य महतो यतवाचोनुशृण्वतः ॥८॥ ॥ श्रीभगवानुवाच ॥ ॥ अहो वयं जन्मभृतो लब्धं का
र्त्स्न्येन तत्फलं ॥ देवानामपि दुःप्रापं यद्योगेश्वरदर्शनं ॥९॥ किं स्वल्पतपसां नृणां अर्चायां देवचक्षुषां ॥ दर्शनस्पर्शनप्रश्नः प्रह्वपा
दार्चनादिकं ॥१०॥ न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥ ते पुनंत्युरुकालेन दर्शनादेव साधवः ॥११॥ नाग्निर्न सूर्यो न
च चंद्रतारका न भूर्जलं खं श्वसनोथ वाङ्मनः ॥ उपासिता भेदकृतो हरंत्यघं विपश्चितो घ्नंति मुहूर्तसेवया ॥१२॥ ॥ ॥

एतस्य पंच पवित्रत्वं ममयानीति त्रिभिः ॥११॥ वाङ्मनसयोरप्युपासनाविषयत्वं यो वाचं ब्रह्मेत्युपास्ते यो मनो ब्रह्मेत्युपास्ते इति श्रुतेः ॥ अघं तन्मू
लमज्ञानं न हरंति अत्र हेतुः ॥ भेदकर्तारः यद्यत्नेष्वबुद्धिं कुर्वतः पुंसः विपश्चितो निरस्तभेदाः ते तु मुहूर्तमात्रसेवयैवाघं घ्नंतीति ॥१२॥ ॥

राम॰

९२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतः साधून्न विहायान्यत्रात्मादिबुध्या सक्तमानोति मंद इत्याह ॥ यस्येति ॥ आत्मबुधिरहमिति बुधिः त्रयो धातवो वातपित्तश्लेष्माणः प्रकृतयो यस्य तस्मिन्कु
णपे शरीरे स्वधीः स्वीया इति बुधिः भौमे मृद्विकारे इज्यधीः देवताबुधिः ॥ यत् यस्य तीर्थमिति बुधिः अभिज्ञेषु तत्वविसु यस्य ता बुधयो न संति स एव गोष्वपि खरः तृरु
णः अतत्वविवेकी ॥ यद्वा गवां तृणादिभारवाहः खरो गर्दभ इति ॥१३॥ दुरन्वयं अनतुरूपं भ्रमंती अनवस्थिता बुधिर्येषां ते ॥१४॥ ईशितमंतो अनीश्वरतां कर्माधि
कारितां जनसंग्रहमात्रमेतदित्यभ्युस्मयंतः हसंतः ॥१५॥ अनन्वयं विद्व एवं तः आकुर्वत्संयन्मायपेति तत्वविसु उत्तमा अपि वयं कासौ माया यया विमोहिता इ

यस्यात्मबुधिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः ॥ यत्तीर्थबुधिः सलिले न कर्हिचित् जनेष्वभिज्ञेषु स एव
गोखरः ॥१३॥ ॥श्रीशुक उवाच ॥ ॥ निशम्येत्थं भगवतः कृष्णस्याकुंठमे धसः ॥ वचो दुरन्वयं विप्रास्तूष्णीमासन्भ्रमद्धियः ॥
१४॥ चिरं विमृश्य मुनय ईश्वरस्येशितव्यतां ॥ जनसंग्रह इत्यूचुः स्मयंतस्तं जगद्गुरुं ॥१५॥ ॥ मुनय ऊचुः ॥ ॥ यन्मायया त
त्वविदुत्तमा वयं विमोहिता विश्वसृजामधीश्वराः ॥ यदीशितव्यायति गूढ ईहया अहो विचित्रं भगवद्विचेष्टितं ॥१६॥ अनीह एत
द्बहुधैक आत्मना सृजत्यवत्यत्ति न बध्यते यथा ॥ भौमैर्हि भूमिर्बहुनामरूपिणी अहो विभूम्नश्चरितं विडंबनं ॥१७॥ ॥

ति ॥ तामाहुः ॥ यदिति ॥ यत् यस्मात् ॥ ईहया नरचेष्टितेन गूढः सन् ईशितव्यायति अनीश्वरवदाचरति न वा तु ॥ ननु अहमीश्वरश्चेत्किमित्येवमाचरेयं तत्रा
हुः अहो इति भगवतस्तव विचेष्टितं विचित्रं अतर्क्यं ॥१६॥ भगवत्त्वमेवाहुः ॥ अनीह इति ॥ अनीह इति अक्रिय एव आत्मना स्वरूपमात्रेण एव कुधे
स्यन्न दृष्टांतः ॥ यथा भौमैरिति भौमैर्घटादिविकारैरुपलक्षिता नानाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः ॥ ननु कथमहं जगत्स्रष्टा
दिकर्त्ता वसुदेवपुत्रत्वादिति ॥ तत्राहुः ॥ अहो इति विभूम्नः परिपूर्णस्य तव इदं जन्मादिचरितं विडंबनं अनुकरणमात्रं न तु तत्वमिति ॥१७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰

जनसंग्रहमाह॥ अथापीति त्रिभिः॥ सत्वं शुद्धसत्वात्मकं रूपं बिभर्षि स्वलीलया आचारेण वेदपथं च बिभर्षि॥१८॥ अतएव ब्राह्मणेषु बहुमान
मपि करोषीति सहेतुकमाह॥ ब्रह्मेति॥ ब्रह्म वेदास्तं शुक्लं शुद्धं॥ ते हृदयं अंतरंगरूपं कुतस्तत्र आह॥ यत्रेति॥ यत्र ब्रह्मणि सत्कार्यं असत्कं
१३ सत कारणं ततः परं सन्मात्रं ब्रह्म च तपआदिभिरुपलब्धं तद्ब्रह्म॥१९॥ तस्माद्वेदहृदयत्वाद्वेदप्रवर्त्तकं ब्राह्मणकुलं शास्त्रयोनेर्वेदस्य प्रमाणकस्य
तव सधाम स्वेष्टमुपलब्धिस्थानं संभाजयसि संपूजयसि॥ तत्तस्मादेव कारणात्॥ त्वं ब्रह्मण्यानामग्रणीर्मुख्यः॥ तत्प्रवर्त्तकः सत्कर्माचरसीत्य

स्थयापि काले स्वजनाभिगुप्तये बिभर्षि सत्वं खलनिग्रहाय॥ स्वलीलया वेदपथं सनातनं वर्णाश्रमात्मा पुरुषः परो भवान्॥१८॥ ब्र
ह्म ते हृदयं शुक्लं तपःस्वाध्यायसंयमैः॥ यत्रोपलब्धं सद्व्यक्तमव्यक्तं च ततः परं॥१९॥ तस्माद्ब्रह्मकुलं ब्रह्मन् शास्त्रयोनेस्त्व
मात्मनः सभाजयसि सद्धाम तद्ब्रह्मण्याग्रणीर्भवान्॥२०॥ अद्य नो जन्मसाफल्यं विद्यायास्तपसो दृशः॥ त्वया संगम्य सद्गत्या य
दंतः श्रेयसां परः॥२१॥ नमस्तस्मै भगवते कृष्णायाकुंठमेधसे॥ स्वयोगमाययाच्छन्नमहिम्ने परमात्मने॥२२॥ नायं विदंत्यमी भू राम॰
पा एकारामाश्च वृष्णयः॥ मायाजवनिकाच्छन्नमात्मानं कालमीश्वरं॥२३॥ यथाज्ञयानः पुरुषः आत्मानं गुणतत्वदृक्॥ नाममा १३
त्रेंद्रियाभातं न वेद रहितं परं॥२४॥॥

धः॥२०॥ तस्मादीश्वरस्य तवेदं जनसंग्रहमात्रं वयं तु तव संगत्या कृतार्था इत्याह॥ अद्येति षड्भिः॥ सतां
गत्या त्वया संगम्य संगं प्राप्य यद्यस्मात् त्वं श्रेयसां परोवधिः॥२१॥२२॥ एकस्मिन्नवस्थाने आरामो येषां तेपि कालं सृष्ट्यादिकारणं॥ ईश्वरं नियं
तारं॥२३॥ एतत्सदृष्टांतमाह॥ यथेति॥ अज्ञया नः स्वप्नात्मप्रत्ययत॥ स्वप्नविषयेषु तत्वदृष्टिः नाममात्रमिंद्रियेण मनसा आभाति सिंहव्याघ्रादिरूप
मात्मानं वेद तदहितं परं देवदत्तादिरूपमात्मानं न वेद यथा॥२४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं त्वां त्वां नाममात्रेष्वेषु स्वप्नादितुल्यविषयेष्विंद्रियैर्या ईहा प्रवृत्तिः सैव माया तया विभ्रमच्चित्तो न वेद ॥ स्मृतेर्विवेकस्योपप्लवान्नाशात् ॥२५॥ अघौघस
मर्षं नाशं करोति यत्तद्गंगाख्यं तीर्थं तस्यास्पदमाश्रयं तेंघ्रिं सुपक्वयोगैरपि हृदि कृतं केवलं न तु दृष्टं तस्य तेंघ्रिं ददृशिम दृष्टवंतो वयं बकुसिःस्तुपेः अतोः
स्मान् भक्तान् अनुगृहाण भक्तानां कृतानुग्रहं कुर्वित्यर्थः ॥ ननु किं तत्रायथा पूर्वं तप एव क्रियतामिति तेनेसाकुः ॥ उत्सिक्ता उद्रिक्ता या भक्तिस्तयोपहत आ

एवं त्वां नाममात्रेषु विषयेष्विंद्रियेहया ॥ मायया विभ्रमच्चित्तो न वेद स्मृत्युपप्लवात् ॥२५॥ तस्याद्य ते ददृशिमांघ्रिमघौघमर्षतीर्थास्प
दं हृदि कृतं सुविपक्वयोगैः ॥ उत्सिक्तभक्त्युपहताशयजीवकोशा आपुर्भवद्गतिमथानुगृहाण भक्तान् ॥२६॥ ॥श्रीशुक उवाच
॥ इत्यनुज्ञाप्य दाशार्हं धृतराष्ट्रं युधिष्ठिरं ॥ राजर्षे स्वाश्रमान् गंतुं मुनयो दधिरे मनः ॥२७॥ तद्वीक्ष्य तानुपव्रज्य वसुदेवो महाय
शाः ॥ प्रणम्य चोपसंगृह्य बभाषेदं सुयंत्रितः ॥२८॥ ॥वसुदेव उवाच ॥ ॥ नमो वः सर्वदेवेभ्यः ऋषयः श्रोतुमर्हथ ॥ कर्मणा क
र्मनिर्हारो यथा स्यान्नस्तदुच्यतां ॥२९॥ ॥ नारद उवाच ॥ ॥ नातिचित्रमिदं विप्रा वसुदेवो बुभुत्सया ॥ कृष्णं मत्वार्भकं यन्नः पृ
च्छति श्रेय आत्मनः ॥३०॥ सन्निकर्षोत्र मर्त्यानामनादरणकारणं ॥ गांगं हित्वा यथान्यांभस्तत्रत्यो याति शुद्धये ॥३१॥ ॥

शयलक्षणो जीवकोशो येषां त एव पूर्वे भगवद्गतिमापुर्नान्य इति ॥२६॥ उपसंगृह्य चरणौ पाणिभ्यां धृत्वा बभाषे इदमिति संधिरार्षः ॥२८॥ सर्वे देवा
येषु तेभ्यः यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसंतीति श्रुतेः येन कर्मणा यथाहते न वा कर्मणां निर्हारो निरासो भवति तदुच्यतां ॥२९॥ श्री
कृष्णं हि त्वा अस्मान् पृच्छतीति विस्मितान् प्रत्याह नारदः नापीति बुभुत्सया बोद्धुमिच्छया ॥३०॥ तत्रत्यो गंगातीरवासी ॥३१॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰
६४

श्रीहृष्मेर्नकत्वमानोऽविद्याविजृंभित इत्याह यस्येति क्वा मां अनुभूतिर्ज्ञानं कुतश्चिदपि नारिष्यति न नश्यति तदेवाह कालेन कर्कटिकाफलवत् अस्य
विश्वस्य लयोत्पत्त्यादिनापि स्वतश्च विद्युदादिवत्॥ अन्यस्माच्च मुद्गरादिवत् घटादेः गुणतो रूपाद्यंतरोत्पत्तेः पूर्वरूपादिनाशे ह्यादिवत्॥३२॥ तमेवं कु
तश्चिदप्यप्याह तानुत्तवे अतएव ईश्वरं किंच अद्वितीयं रूपं अन्तः प्राप्तः उपगूढमाछन्नं मनुष्यं मन्येत कैः क्लेशकर्मादिभिः तत्र क्लेशा रागादय
श्च तत्पूर्वकानि कर्माणि च तत्परिपाके सुखदुःखे च सत्वादिगुणा तां पुनः प्रवाहश्चतैः प्राणादिभिश्च स्वविभवैः स्वकार्यैः अन्तर्दृष्टं तः मेघहिमो

यस्यानुभूतिः कालेन लयोत्पत्त्यादिनास्य वै॥ स्वतोऽन्यस्माच्च गुणतो न कुतश्चन रिष्यति॥३३॥ तं क्लेशकर्मपरिपाकगु
णप्रवाहैरव्याहतानुभवमीश्वरमद्वितीयं॥ प्राणादिभिः स्वविभवैरुपगूढमन्यो मन्येत सूर्यमिव मेघहिमोपरागैः॥३४॥ अ
थाप्युभयोरजनत्वाना॰ नाप्यानेक दुःखिनी॥ सर्वे बंधाश्च एवतां राज्ञां तथैवास्युतरामयोः॥३५॥ कर्मणां कर्मनिर्हार एष साधु
निरूपितः॥ यच्छ्रद्धया यजेद्विष्णुं सर्वयज्ञेश्वरं मखैः॥३५॥ चित्तस्योपशमोऽयं वै कविभिः शास्त्रचक्षुषा॥ दर्शितः सुगमो यो
गो धर्मश्चात्ममुदावहः॥३६॥ अयं स्वस्त्ययनः पंथा द्विजातेर्गृहमेधिनः॥ यच्छ्रद्धयाप्तवित्तेन शुक्लेनेज्येत पूरुषः॥३७॥॥

र
परागैः अन्नतुषारा कृतिः स्वविभवैः सूर्यमिवेति॥३३॥३४॥३५॥ चित्तस्योपशमः उपशमहेतुः योगो मोक्षोपायश्च शनैरात्ममुदं आवहतीति तथा
सुगमः श्रद्धया श्रद्धया तात धर्मश्चावश्यकः॥ अन्यथा विहिताकरणे नमाजितप्रसंगात्॥३६॥ ननु न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरि
त्यादिना त्यागस्यैव विहितत्वात् कथं कर्म मोक्षोपाय इत्याशंक्याद्यावेत्त्यागस्याद्याकत्वाद्विप्राशायेनाकुरयामिति॥ सोऽर्थं चतुर्भिः स्वस्त्ययनः॥
स्वस्ति क्षेमं ईयते नेनेति॥ तथा श्रद्धयाभिः कामतयाशुक्लेन शुद्धेनाप्तेन वित्तेन पूरुष ईश्वर ईज्येतेति पदेषः पंथाः॥३७॥ ॥

राम॰
६४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वस्य यत्नवता कुरु॥ वित्तैषणामिति। वित्तफलं तु तैर्यज्ञैर्दानैश्च वित्तैषणां वित्तेच्छां विसृजेत्॥ गृहे गृहेषु विविक्ते न गेहदारसुतैषणां विसृजेत्॥ तद्
नु तन्वे नैव तदौ सुकृतानि हि तैः देहमृते आत्मनः स्वर्गादिलोकैषणां च कालेन तस्यानुसंधानेन विसृजेत्॥ देहेऽवं वसुदेव॥ यद्वा देवकालेन देवानामपि मृत्यु
नामृत्युहेतुत्वं तेनेत्यर्थः॥ ३६॥ अत्रावारं प्रमाणयति। ग्राम इति किंच ऋणैरिति। तथा च श्रुतिः॥ जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते॥ ब्रह्मच

वित्तैषणां यज्ञदानैर्गृहैर्दारसुतैषणां॥ आत्मलोकैषणां देवकालेन विसृजेत् बुधः॥ ३७॥ ग्रामेत्यकैषणाः सर्वे ययुर्धीरास्तपोवनं
ऋणैस्त्रिभिर्द्विजो जातो देवर्षिपितृणां प्रभो॥ ३९॥ यज्ञाध्ययनपुत्रैस्तान्यनिस्तीर्य त्यजन्पते तस्त्वं त्वद्य मुक्तो ऽद्यास्मा वै ऋषिपित्रोर्महामन
ते॥ ४०॥ यज्ञैर्देवर्णमुन्मुच्य निरृणोऽशरणो भव॥ वसुदेव भवान्नूनं भक्त्या परमया हरिं॥ ४१॥ जगतामीश्वरं प्रार्च्य स यद्वां पुत्रतां गतः॥
श्रीशुक उवाच॥ इति तद्वचनं श्रुत्वा वसुदेवो महामनाः॥ ४२॥ तानृषीनृत्विजो वव्रे मूर्ध्नानम्य प्रसाद्य च॥ एत ऋषयो राजन्वृता धर्मेण धा
र्मिकं॥ तस्मिन्नयाजयन्क्षेत्रे मखैरुत्तमकल्पकैः॥ ४३॥ तद्दीक्षायां प्रवृत्तायां वृष्णयः पुष्करस्रजः॥ स्नाताः सुवाससो राजन् राजानः सुष्ठ्वलं
कृताः॥ ४४॥ तन्महिष्यश्च मुदिताः निष्ककण्ठ्यः सुवाससः॥ दीक्षाशालामुपाजग्मुराजिता वस्तुपाणयः॥ ४५॥ ॥

र्येण ऋषिभ्यो यज्ञेन दे
वेभ्यः प्रजया पितृभ्यः इत्यादि तान्यनिस्तीर्य तेषां ऋणानामनपाकृत्य॥ तथा च मनुः॥ ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्॥ अनपाकृत्य मो
क्षं तु सेवमानो व्रजत्यधः इति॥ ३९॥ निरृणः निर्मुक्तऋणः अशरणोऽत्र वगृहान्व्रज॥ ४०॥ किंचाविशुद्धचित्तानां अयं क्रमः। त्वं तु कृतार्थ एवेत्याह कुरु॥ वसु
देवेति प्रार्च्य अर्चितवान्॥ यद्यस्मात् वां युवयोः॥ ४१॥ ४२॥ ४३॥ ४४॥ आलिप्ताः कुंकुमादिभिः वस्तुपाणयः गृहीतार्हणा हस्ताः॥ ४५॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰ अक्रंतेन्नयोरंजनेन ॥ अस्मकं सर्वगिषु नवनीतेन ॥४३॥ पत्नीभिः सहितो दीक्षितो रेजे ॥४४॥ जीवेशो सर्वजीवानामीशो ॥४५॥ अनुयज्ञं प्रतियज्ञं आ
९५ म्नातसर्वांगाः प्राहुताः ज्योतिष्टोमदर्शपौर्णमासादयः ॥ तेभ्य आमोदनालिंगं दिग्निरति देशाम्नाप्रांगाः वैहुताः सौर्यसत्रादयः तैः सर्वैः क्रमं पुरोडाशादि

नेदुर्मृदंगपटहश्च शंखस्तनेर्यानकादयः ॥ ननृतुर्नटनर्तक्यस्तुष्टुवुः सूतमागधाः ॥४६॥ जगुः सुकंम्मोगांधर्मः संगीतं सहर्नैर्नर्तकाः ॥ तम
भ्यषिंचन् विधिवद्क्रमसक्रमृत्विजः ॥४७॥ पत्नीभिरष्टादशभिः सोमराजइवोडुभिः ॥ तानि दुकूलवलये हरिन्नूपुरकुंड
लैः ॥ स्वलंकृतानि विभिन्नवैहो स्मितो जितसंवृतः ॥ तस्यर्त्विजो महाराज रत्नकोशेयवाससः ॥४९॥ ससदस्या विरेजुस्ते यथा वृ
त्रहणोऽध्वरे ॥ तदा रामश्च हनुमांश्च स्वैः स्वैर्बंधुभिरन्वितैः ॥५०॥ रेजतुः स्वसुतैर्द्वारैर्जीवेशो स्वविभूतिभिः ॥ ईजे नु यज्ञं वि
धिनाऽग्निहोत्रादिलक्षणैः ॥५१॥ प्राहुतैर्वैहुतैर्यज्ञैर्द्रव्यज्ञानक्रियेश्वरं ॥ अथर्त्विग्भ्यो ददात्कालेयथाम्नातं सदक्षिणाः ॥५२॥
स्वलंकृतेभ्यो ऽलंकृत्य गोभूकन्या महाधनाः ॥ पत्नीसंयाजावभृथ्यैश्चरित्वामते हर्षयः ॥५३॥ सस्नू रामकुंदे विप्राय जमानपुरः राम॰
सराः ॥ स्नातो ऽलंकारवासांसि बंदिभ्यो दात्तदास्त्रियः ॥५४॥ ततः स्वलंकृतो वर्णान्नाश्वमेधेन पूजयत् ॥ बंधून्सदारान्ससुतान् ९५
पारिबर्हेणभूयसा ॥५५॥ विदर्भकोशलकुरून्काशिकेकयसंजयान् ॥ सदस्यर्त्विक्सुरगणान्नृन्भूतपितृचारणान् ॥ श्री
निकेतमनुज्ञाप्य शंसंतः प्रययुः क्रतुं ॥५६॥ ॥
ज्ञानं मंत्रः क्रिया कर्म तेषामीश्वरं ॥४७॥ सस्नुः स्नानं चकुः ॥५२॥ आश्वमस्नुतोः भिम्याप्यान्ते
नन्नजयत्अपूजयत् ॥५४॥ बंधून्दाराश्चारणान्तान्पारिबर्हेण प्रीतिदानेन चापूजयत् ॥ ते च सर्वे प्रययुः ॥५६॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रयाणे केषांचिद्विशेषमाह ॥ धृतराष्ट्र इति द्वाभ्यां अनुजो विदुरः पार्थो युधिष्ठिरः भीमार्जुनौ यमौ नकुलसहदेवौ ॥ ५७ ॥ सौहृदेन क्लिन्नानि चेतांसि येषां
ते ॥ ५८ ॥ मनोरथो यज्ञविषयस्तमेव महार्णवं ॥ ६० ॥ शूराणां बलेन योगिनां ज्ञानेनापीत्यर्थः ॥ ६१ ॥ तत्कृतस्त्राहास्मास्विति ॥ कृताज्ञेषु कृतसुपकारस
ज्ञानसुसत्तमैर्नवद्भिः प्रतिकल्पास्वनुपमा मैत्री यमर्पिता ॥ अफलापि मत्सुपकारस्तन्नापि कर्हिचिद्य यस्मान्न निवर्त्तेत ॥ तस्मादीश्वरकृतः शापो यं

धृतराष्ट्रेणानुजः पार्थो भीष्मो द्रोणः पृथा यमौ ॥ नारदो भगवान्व्यासः सुहृत्संबंधिबांधवाः ॥ ५७ ॥ बंधुस्नेहस्वजयस्य हृन्नौ रुदा क्लिन्नचेतसः
॥ ययुर्विरहकृच्छ्रेण स्वदेशांश्चापरे जनाः ॥ ५८ ॥ नंदस्तु सह गोपालैर्बृहत्या पूजयार्चितः ॥ कृष्णरामोग्रसेनाद्यैर्न्यवात्सीद्बंधुवत्सलः ॥
५९ ॥ वसुदेवोंजसोत्तीर्य मनोरथमहार्णवं ॥ सुहृद्वृतः प्रीतमना नंदमाह करे स्पृशन् ॥ ६० ॥ ॥ वसुदेव उवाच ॥ ॥ भ्रातरीशकृतः पाशो
नृणां यः स्नेहयंत्रितः ॥ तं दुस्त्यजमहं मन्ये शूराणामपि योगिनां ॥ ६१ ॥ अस्मास्वप्रतिकल्पेयं यत्कृताज्ञेषु सत्तमैः ॥ मैत्र्यर्पिताफला
चापि न निवर्त्तेत कर्हिचित ॥ ६२ ॥ प्रागकल्पाच्च कुशलं भ्रातर्वो नाचराम हि ॥ अधुना श्रीमदांधाक्षा न पश्याम पुरः सतः ॥ ६३ ॥ मारा
ज्यश्रीरभूत्पुंसः श्रेयस्कामस्य मानद ॥ स्वजनानुत बंधून्वा न पश्यति ययांधदृक ॥ ६४ ॥ एवं सौहृदशैथिल्यचित्त आनकदुंदुभिः ॥ रु
रोद तत्कृतां मैत्रीं स्मरन्नश्रुविलोचनः ॥ ६५ ॥ ॥

नैवताममिति गम्यत इत्यर्थः ॥ ६२ ॥ अफलत्वमेवाह प्रागिति ॥ हे भ्रातः अकल्पादसमर्थत्वा
त् ॥ वः कुशलं प्रियं नहि आचराम ॥ कृतवेतोषयं श्रीमदेनांधान्यक्षीणि येषां ते ॥ ६३ ॥ राज्यश्रीर्माभूत् छांदसोऽडागमः ॥ ६४ ॥ २५ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰ अयथस्थ इति प्रीतः निर्गमे ऽयं वापराह्णे गम्यतामिति ॥ अपराह्णे निर्गमे श्वो गम्यतामिति ॥ पुनः पुनरेवं मानितः ॥ ६६ ॥ यापितः महता सैन्येन
२६ प्रस्थापितः ॥ ६७ ॥ ६८ ॥ ७० ॥ यदुदेवस्य वसुदेवस्य महोत्सवं यज्ञादिलक्षणं सुहृत्संदर्शनादिकं चेति ॥ ७१ ॥ इति दशमे चतुरशीतितमः ॥ ८४ ॥

नंदस्तु सख्युः प्रियकृत्प्रेम्णा गोविंदरामयोः ॥ अद्य श्व इति मासांस्त्रीन्यदुभिर्मानितोऽवसत् ॥ ६६ ॥ ततः कामैः पूर्यमा
णः सव्रजः सहबांधवः ॥ परार्ध्याभरणक्षौमनानानर्घ्यपरिच्छदैः ॥ ६७ ॥ वसुदेवोग्रसेनाभ्यां कृष्णोद्धवबलादिभिः ॥ दत्तमादाय पा
रिबर्हं यापितो यदुभिर्ययौ ॥ ६८ ॥ नंदो गोपाश्च गोप्यश्च गोविंदचरणांबुजे ॥ मनः क्षिप्तं पुनर्हर्तुमनीशा मथुरां ययुः ॥ ६९ ॥ बंधु
षु प्रतियातेषु वृष्णयः कृष्णदेवताः ॥ वीक्ष्य प्रावृषमासन्नां ययुर्द्वारवतीं पुनः ॥ ७० ॥ जनेभ्यः कथयांचक्रुर्यदुदेवमहोत्सवं ॥
स॰ यदासीत्तीर्थयात्रायां सुहृत्संदर्शनादिकं ॥ ७१ ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे तीर्थयात्रानुवर्णने चतुर
शीतितमोऽध्यायः ॥ ॥ ८४ ॥ ॥ श्रीशुक उवाच ॥ ॥ अथैकदात्मजौ प्राप्तौ कृतपादाभिवंदनौ ॥ वसुदेवोऽभिनंद्याह प्रीत्या राम॰
संकर्षणाच्युतौ ॥ १ ॥ मुनीनां स वचः श्रुत्वा पुत्रयोर्धामसूचकं ॥ तद्वीर्यैर्जातविस्रंभः परिभाष्याभ्यभाषत ॥ २ ॥ ॥ २६

पंचाशीतितमे रामकृष्णौ संप्रार्थितौ सुतौ ॥ पित्रोर्ज्ञानमयौ मात्रे मृतान्पुत्राननयच्छताम् ॥ नंदयित्वा कुरुक्षेत्रयात्रायां सुहृदो बहून्
॥ तत्त्वज्ञानं ततः पित्रोरादिशन्मृतसूनुभिः ॥ २ ॥ धामप्रभावस्वरूपसूचकं ॥ जातविस्रंभः ॥ उत्पन्नविश्वासः परिभाष्य संबोध्य ॥ २ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽस्य विश्वस्य यत्साक्षात्स्वरूपभूतं कारणं प्रधानपुरुषौ नाम परौ तयोरपि कारणत्वेनेश्वरौ च साक्षाद्युवामिति जाने॥ २॥ नन्विदं विश्वमनेकैः का
रणैर्जायमानं दृष्टं न प्रधानपुरुषात्मकं कुतस्तत्रात्माभावयोस्तत्कारणत्वेनेश्वरत्वं तत्राह॥ यत्रेति॥ यत्राधिकरणे येन कर्त्रा करणेन च यतोऽपादाना
त्। यस्य संबंधेन षष्ठ्यर्थस्याकारकत्वेऽपि निमित्ततोक्ता॥ यस्मै संप्रदानाय यद्यदिति प्रयोज्यकर्तृकर्मकारके दर्शितं ननु तयोर्नास्ति भेदः यथोक्तं करो
ति क्रियमाणेन न कश्चित्कर्म्मणा विना॥ न वस्त्वर्थस्य कर्त्तृत्वं करोतेः कर्म्मजायते॥ तथा करोत्यर्थस्य यः कर्त्तृत्वविवक्षितः भेदतः स प्रयोजकः भविता तमपे

वसुदेव उवाच॥ ॥कृष्ण कृष्ण महायोगिन्संकर्षण सनातन॥ जाने वामस्य यत्साक्षात्प्रधानपुरुषौ
परौ॥ ३॥ यत्र येन यतो यस्य यस्मै यद्यद्यथा यदा॥ स्यादिदं भगवान्साक्षात्प्रधानपुरुषेश्वरः॥ ४॥
एतन्नानाविधं विश्वमात्मसृष्टमधोक्षज॥ आत्मनानुप्रविश्यात्मन्प्राणो जीवो बिभर्ष्यज॥ ५॥ ॥

क्षाप्य प्रयोज्यत्वं प्रपद्यत इति॥ च सत्वं॥ तथा एवमवस्थाभेदेन भेदो विवक्षितः दृश्यते चावस्थाभेदः॥ तंडुलानोदनं पचति॥ मृदं घटं करोति॥ तदेवं
सप्तविभक्त्यर्था दर्शिताः॥ यथेति यदेति॥ च क्रियाविशेषणभूतानामन्येषां चाव्ययानामर्थः॥ स्यात् इति क्रियापदार्थोपलक्षणं॥ एवं सर्वप्रपंचमनूद्य
तत्कारणं भगवद्रूपतां विधत्ते॥ इदं साक्षादिति॥ प्रधानं भोग्यं पुरुषो भोक्ता तयोरीश्वरो भगवांस्त्वमेव साक्षादिति तयोरैक्यमभिप्रेत्यैकवचनं॥
॥ ४॥ किंच॥ धारणपोषणकर्त्तापि त्वमेवेत्याह॥ एतदिति॥ हे आत्मन् प्राणः क्रियाशक्तिः जीवो ज्ञानशक्तिश्च सन् त्वमेव बिभर्षि॥ ५॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० द० उ० ननु प्राणादीनां विचित्रशक्तीनां कारणत्वावगमात्॥ कथं परमेश्वरस्यैव कारणत्वेन सर्वात्मकत्वमुच्यत इत्याशंक्य प्राणादिशक्तयोपि तस्यैवेत्या
६७ हु॥ प्राणादीनामपि॥ प्राणः सूत्रं तदादीनां विश्वसृजां विश्वकारणानां याः शक्तयस्ताः परस्य परमकारणस्य ईश्वरस्यैव॥ कुतः पारतंत्र्यात्॥ यथा वै ध्व न
शक्तिर्न बाणस्यापि तु पुरुषस्य तद्वदित्यर्थः॥ ननु भगवतः प्राणादिवर्गस्य च सादृश्यमेव किं न स्यात्॥ अत आह वैसादृश्यात्॥ द्वयोरिति॥ चेतनाचेतैंले
न विसदृशत्वे न विसदृशत्वात् द्वयोश्चेतनप्राणादिवर्गस्य चेतनपारतंत्र्यमेव युक्तमित्यर्थः॥ यद्वा प्राणादिषु॥ द्वयोर्द्वयोरेव तावद्विसदृश

प्राणादीनां विश्वसृजां शक्तयो याः परस्य ताः॥ पारतं
त्र्याद्वैसादृश्याद्द्वयोश्चेष्टैव चेष्टताम्॥ ६॥ ॥ एम०

त्वं विरुद्धक्रियाकारित्वात्॥ किं पुनर्बहूनां तस्मादेकेन सर्वज्ञेन सर्वशक्तिनाधिष्ठितानामेव विविधकार्यारंभकत्वं युक्तं न स्वतंत्राणामिति॥ तथा चोक्तं ष ६७
॥ यदैते संहता भावा भूतेंद्रियमनोगुणाः॥ यदायतननिर्माणे न शेकुर्ब्रह्मवित्तमाः॥ तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः॥ सदसत्त्वमुपादाय चोभयं
ससृजुर्ह्यद इति तथा॥ नाना तास्तु क्रियानीशाः श्रोत्रचक्षुःप्राणजलपोविन्तुमित्यादि॥ ननु प्राणादीनां क्रियाकारित्वं ज्ञानं भ्रान्तेः कुतः स्यादत आह चेष्टैव
चेष्टतामिति॥ चेष्टमानानामेषां चेष्टैव न शक्तिः॥ यथा वायोः शक्त्या प्राणादीनां चलनं यथा वा पुरुषस्य शक्त्या शराणां भेगद इति॥ ६॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पारतंत्र्यमेवमपेक्षयति॥ कांतिरितिपंचभिः श्लोकैः इंद्रस्य कांतिरग्नेस्तेजः अर्कस्य प्रभा कुक्षस्य विद्युतां सत्ता स्फुरणमात्रेण मलं अर्थतो व स्तुतो भवान् तथा च श्रुतिः
न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति स्मृतिश्च॥ यदादित्यगतं तेजो जगद्भासयते वि
खिलं॥ यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति॥ भूमेर्धृतिः प्राणिनामाधारत्वेन वर्तनं गंधश्च भवान्नतु वैव शक्तिरित्यर्थः॥७॥ किंच देहे देवत्र्य पां तर्पणं
तृप्तिजनकत्वं प्राणनं जीवनहेतुत्वं ता अपश्चतासां रसश्चत्वमेव॥ किंच वायो योरोजः सहादि तवैव शक्तिः॥८॥ दिशामुपाधिकृतावकाशप्रदेशानामवकाशारि

कांतिस्तेजः प्रभा सत्ता चंद्राग्न्यर्कक्षितिविद्युतां॥ यश्चस्थैर्यं भूभृतां भूमेर्धृतिर्गंधोर्थतो भवान्॥७॥ तर्पणं प्राणनमपां देवत्वं ताश्च त
द्रसः॥ ओजः सहो बलं चेष्टा गतिर्वायोस्तवेश्वर॥ दिशां त्वमवकाशोसि दिशः खं स्फोटस्चाश्रयः॥ नादो वर्णास्त्वमोंकार आहतीनां
पृथक्कृतिः॥ इंद्रियं त्विंद्रियाणां त्वं देवाश्च तदनुग्रहः॥ अवबोधो भवान्बुद्धेर्जीवस्यानुस्मृतिः सती॥१०॥ भूतानामसि भूता
दिरिंद्रियाणां च तैजसः॥ वैकारिको विकल्पानां प्रधानमनुशायिनां॥११॥ ॥

शब्दस्त्वं खं च सामान्याकाशस्तदाश्रयः॥ स्फोटश्च शब्द
तन्मात्रपरावस्था वागित्यर्थः॥ नादः पश्यंती उंकारः मध्यमा वर्णाश्च आहतीनां पदार्थानां पृथक्कृतिः पृथक्करणमभिधानं यस्मात्तत्पदं वर्णपदा
त्मिका वैषरी वक्ष्यमित्यर्थः॥ इंद्रियाणामींद्रियं विषयप्रकाशनशक्तिः॥ देवाश्चेंद्रियाधिष्ठातारस्तदनुग्रहस्तेषामधिष्ठानशक्तिश्च त्वं अवबोधो भवसा यश्च
क्तिः अनुस्मृतिः प्रतिसंधानशक्तिः॥१०॥ भूतानां कारणं भूतादिस्तामसोहंकारस्त्वमसि इंद्रियाणां कारणं तैजसोहंकारस्त्वं विविधं अधिदैवाध्यात्म
देन कल्पं तद्वृत्ति विकल्पा देवास्तेषां कारणं वैकारिका सात्विको हंकारश्च त्वं अनुशायिनां जीवानां संसारकारणं प्रधानं त्वं॥११॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपिच नश्वरेषु नानाशरीरेषु देहेतेषु नानावेषु यदनश्वरमवशिष्यमाणं रूपं तत्त्वमसि॥ द्रव्यविकारैर्मृत्सुवर्णादिकार्येषु घटकुंडलादिषु नश्वरेषु
द्रव्यमात्रं मृत्सुवर्णादिमात्रमनश्वरं यथा तद्वत्॥१२॥ ननु त्रिगुणात्मककार्यरूपोपितमित्युक्त्वा तत्कथमनश्वरत्वं तत्राह॥ सत्त्वमिति॥ तत्र ऋषयः तत्त्व
विज्ञाः साक्षान्महदादयश्च यासाक्षात्त्वयि परे ब्रह्मणि कल्पिताः॥१३॥ तस्मात्त्वं संति न वस्ततां कथं प्रतीतिरत आह यर्हीति॥ यदा विकल्पितास्तदैव भांति मा
त्रेण त्वयि संति॥ त्वं चामीषु तदैव कारणतया अनुगतः॥ अन्यदा तु अमावाहारिकोऽविकल्पस्त्वमेवावशिष्यस इत्यर्थः॥१४॥ एवंरूपतादृज्ञानिनि बंध

नश्वरेष्विह जीवेषु तदसि त्वमनश्वरं॥ यथा द्रव्यविकारेषु द्रव्यमात्रं निरूपितं॥१२॥ सत्त्वं रजस्तम इति गुणास्तद्वृत्तयश्च याः॥ त्वय्येव ब्र
ह्मणि परे कल्पिता योगमायया॥१३॥ तस्मान्न संत्यमी भावा यर्हि त्वयि विकल्पिताः॥ त्वं चामीषु विकारेषु ह्यन्यदा व्यावहारिकः॥१४॥
गुणप्रवाह एतस्मिन्नबुधास्त्वखिलात्मनः॥ गतिं सूक्ष्मामबोधेन संसरंतीह कर्मभिः॥१५॥ यदृच्छया नृतां प्राप्य सुकल्पामिह
दुर्लभां॥ स्वार्थे प्रमत्तस्य वयो गतं त्वन्मायेश्वर॥१६॥ असावहं ममैवैते देहे चास्यान्वयादिषु॥ स्नेहपाशैर्निबध्नाति भवा
न्सर्वमिदं जगत्॥१७॥ ॥

नश्च संसार इत्याह गुणप्रवाह इति॥ सूक्ष्मां निःप्रपंचां गतिमबुधा अविद्वांसः॥ अबुद्धेति वा पाठः॥ अतः अबो
धेन देहाभिमानेन कृतैः कर्मभिः संसरंतीति॥१५॥ एवं तयोस्तत्त्वं निरूप्य तदप्राप्त्या शोचयति यदृच्छयेति॥ नृतां मनुष्यतां सुकल्पां पटुतरेंद्रियां॥१६॥
अहो किमिति प्रमत्तोसि त्वया वक्तुमिः पाशैर्निबध्यत्वादित्याह॥ असावहमिति॥ देहे अस्य देहस्यान्वयादिषु पुत्रादिषु च ममैवैते इति॥१७॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो त्वसुत्वयोरावयोः किमिदमारोप्यते अत आह ॥ युवामिति ॥ नूनं भारक्षत्ररूपेणार्थं अवतीर्णोसि तथाहि विश्रुतं आत्थ कथयसि ॥ १७॥ तन्न स्मादरणेञ्च
रणमापन्नानां संसृतिभयमपहंतीति तथा तत ॥ नन्वलमतिसुखी वृथा किं निर्विद्यसे अत आह ॥ इंद्रियलालसेनेंद्रियार्थतृष्णया यत्त्वयेंद्रियलाल
सेन मर्त्यदेहे शरीरे आत्मदृक् आत्मबुधिरहं त्वयि च परे परमेश्वरे अपत्यबुद्धिरस्मिन्ने तन्नालं पर्याप्तमिति ॥ १९॥ ननु कृत एतत् अहं परमेश्वर इ
ति तत्राह ॥ सूतीगृह इति ॥ अनु युगं प्रति युग्मं यदा सुतपाः पृश्निरिति युग्मं नौ आवयोः ॥ यदा च कश्यपोदितिश्चेति युग्मं ॥ अधुना च वसुदेवो देवकी

युवां न नः सुतौ साक्षात्प्रधानपुरुषेश्वरौ ॥ भूभारक्षत्रक्षपण अवतीर्णोसि तथात्थ ह ॥ १८॥ तत्ते गतोस्म्यरणमद्य पदारविंदमापन्नसंसृति
ल भयापहमार्त्तबंधो ॥ एतावतालमलमिंद्रियलालसेन मर्त्यात्मदृक्त्वयि परे यदपत्यबुद्धिः ॥ १९॥ सूतीगृहे ननु जगाद भवानजो नौ संजज्ञ इ
त्यनुयुगं निजधर्मगुप्त्यै ॥ नानातनूर्गगनवद्विदधज्जहासि को वेद भूम्न उरुगाय विभूतिमायां ॥ २०॥ श्रीशुक उ० ॥ आकर्ण्येत्थं पितुर्वाक्यं भ
गवान्सात्वतर्षभः ॥ प्रत्याह प्रश्रयानम्रः प्रहसन् श्लक्ष्णया गिरा ॥ २१॥ श्रीभगवानुवाच ॥ वचो वः समवेतार्थं तातैतदुपमन्महे ॥ य
न्नः पुत्रान्समुद्दिश्य तत्त्वग्राम उदाहृतः ॥ २२॥ अहं यूयमसावार्य इमे च द्वारकौकसः ॥ सर्वेप्येवं यदुश्रेष्ठ विमृग्याः सचराचरं ॥ २३॥ ॥

च युग्मं ॥ एवं हि प्रति युग्मं अजएवाहं संजज्ञे ॥ अवतीर्ण इति भवान्ननु जगाद ॥ न तु नाशो चतुर्भुजो देव इति तत्राह ॥ नानातनूरिति ॥ गगनवदसं
ग एव त्वं भूम्नः सर्वगतस्य विभूतिरूपां मायां ॥ २०॥ २१॥ उपमन्महे उपमन्यामहे ॥ समुद्दिश्य विषयीकृत्य तत्त्वग्रामस्तत्त्वसमूह उदाहृतः सम्यक्प्र
रूपितः ॥ २२॥ इममेवं दृष्टिं सर्वत्र विधत्तेत्याह ॥ अहमिति ॥ अत एवं विमृग्याः ब्रह्मत्वेनैवान्वेषणीयाः किंच सचराचरं जगदपि ॥ २३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰

९९

ननु नानाविकारवतोऽतो ब्रह्मत्वं ब्रह्मण एवोपाधिधर्मैर्बहुधा प्रतीतेरिति॥ स दृष्टान्तमाह॥ यथा भासमाना त्वमाहीति॥२४॥ यथा खादिभूतानि तत्कृतेषु घटादिष्वावि
स्तिरोऽल्पाबाहुल्यादियान्ति एवमसावात्मापि आत्मसृष्टैर्गुणैः कृत्वा तत्कृतेषु बहुधा ईयते॥ पुनश्च यथाशयं यथोपाधि आविर्भावतिरोभावाल्पादिरूपेण प्रतीयते न व
स्तुतः कृतः॥ एको बहुधा स्वयं ज्योतिर्दृश्यत्वेन वित्त्योऽनित्यत्वेन। अन्योऽन्यत्वेन निर्गुणः सगुणत्वेनेत्यादि बहुधात्वं प्रपञ्चनीयं॥२५॥ सुविस्मिता सती॥२७॥

आत्मा ह्येकः स्वयं ज्योतिर्नित्योऽन्यो निर्गुणो गुणैः॥ आत्मसृष्टैस्तत्कृतेषु भूतेषु बहुधेयते॥२४॥ खं वायुर्ज्योतिरापो भूस्तत्कृतेषु यथाशा
यं॥ आविस्तिरोऽल्पभूर्येको नानात्वं यात्यसावपि॥२५॥ ॥श्रीशुक उवाच॥ ॥एवं भगवता राजन्वसुदेव उदाहृतः॥ श्रुत्वा विनष्टनानाधीस्तूष्णीं
प्रीतमना अभूत्॥२६॥ अथ तत्र कुरुश्रेष्ठ देवकी सर्वदेवता॥ श्रुत्वानीतं गुरोः पुत्रमात्मजाभ्यां सुविस्मिता॥२७॥ कृष्णरामौ समाश्राव्य
पुत्रान्कंसविहिंसितान्॥ स्मरन्ती कृपणं प्राह वैक्लव्यादश्रुलोचना॥२८॥ देवक्युवाच॥ राम रामाप्रमेयात्मन्कृष्ण योगेश्वरेश्वर॥ वेदाहं
वां विश्वसृजामीश्वरावादिपूरुषौ॥२९॥ कालविध्वस्तसत्वानां राज्ञामुच्छास्त्रवर्त्तिनां॥ भूमेर्भारायमाणानामवतीर्णौ किलाद्य मे॥३०॥ यस्यां
शांशांशभागेन विश्वोत्पत्तिलयोदयाः॥ भवन्ति किल विश्वात्मन्तं त्वाद्याहं गतिं गता॥३१॥ चिरान्मृतसुतादाने गुरुणा किल चोदितौ॥ आनि
न्यथुः पितृस्थानाद्गुरवे गुरुदक्षिणां॥३२॥ तथा मे कुरुतं कामं युवां योगेश्वरेश्वरौ॥ भोजराजहतान्पुत्रान्कामये द्रष्टुमाहृतान्॥३३॥

समाश्राव्य समं बोध्य॥२८॥ भूमेर्भारायमाणानां राज्ञामर्थे मम यि किलावतीर्णौ हि अद्य॥३०॥ यस्यांशांशः पुरुषस्तस्यांशो मायातस्यांशांशा गुणास्ते
षां भागेन परमाणुमात्रलेशेन विश्वोत्पत्त्यादयो भवन्ति तं त्वामहं गतिं शरणं गतास्मि॥३१॥ आनिन्यथुः आनीतवन्तौ पितृस्थानात् यमसदनात्॥३२॥ ॥

एम॰

९९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दैत्यराट् च बलिः॥ कथं नु तौ विश्वात्मभूतं देवं सान्वयः सपरिवारः॥ २४॥ सहृष्टः सपरिजनः। कथं नु तौ पादाववनिज्य यदंबुययोरवनेजनोदकं च्छाब्रह्म ब्रह्मस्था
णमस्मिमाप्य जगत्पुनत्यविनय कृतेतौ॥ २५॥ इंद्रसेनो बलिः प्रेमविभिन्नयाप्रेमार्द्रयाधिया बिभ्रत्॥ धारयत्॥ २७॥ अनंताय शेषाय महते फणैकदेशेवि
श्वधारणात्कवहत्स्मै नमः स्वायवेधसे जगद्विधात्रे सांख्ययोगवितानाय इत्यादि पदत्रयमैकविवक्षया॥ २८॥ योगेश्वराणामपि दुर्दर्शौ युवामस्माभिर्दृश

ऋषिरुवाच॥॥ एवं संचोदितो मात्रा रामः कृष्णश्च भारत॥ सुतलं संविविशतुर्योगमायामुपाश्रितौ॥ ३३॥ तस्मिन्प्रविष्टावुपलभ्य दै
त्यराट् विश्वात्मदैवं सुतरां तथात्मनः॥ तद्दर्शनाह्लादपरिप्लुताशयः सद्यः समुत्थाय ननाम सान्वयः॥ ३४॥ तयोः समानीय वरासनं मु
दा निविष्टयोस्तत्र महात्मनोस्तयोः॥ दधार पादाववनिज्य तज्जलं स वृंद आब्रह्म पुनद्य दंबु ह॥ ३५॥ समर्हयामास स तौ विभूतिभि
र्महार्हवस्त्राभरणानुलेपनैः॥ तांबूलदीपामृतभक्षणादिभिः स्वगोत्रवित्तात्मसमर्पणेन च॥ ३६॥ स इंद्रसेनो भगवत्पदांबुजं बिभ्रन्मु
हुः प्रेमविभिन्नयाधिया॥ उवाच हानंदजलाकुलेक्षणः प्रहृष्टरोमा नृप गद्गदाक्षरं॥ बलिरुवाच॥॥ नमोऽनंताय बृहते नमः कृष्णाय वे
धसे॥ सांख्ययोगवितानाय ब्रह्मणे परमात्मने॥ ३८॥ दर्शनं वां हि भूतानां दुष्प्रापं चातिदुर्लभं॥ रजस्तमःस्वभावानां यन्नः प्राप्तौ यदृच्छ
या॥ ३९॥ दैत्यदानवगंधर्वाः सिद्धविद्याध्रचारणाः॥ यक्षरक्षःपिशाचाश्च भूतप्रमथनायकाः॥ ४०॥ विशुद्धसत्त्वधाम्न्यद्धा त्वयि शास्त्रश
रीरिणि॥ नित्यं निबद्धवैरास्ते वयं चान्ये च तादृशाः॥ ४१॥ वित्येतन्नातिचित्रमित्याह॥ दर्शनमतिदुःप्रापमपि सुप्राप्यं तपःपाके षांचिद्दुर्लभं
सुलभमपि तदाह रजस्तमःस्वभावानामिति नो दर्शनं प्राप्तौ॥ ३९॥ अहो विधिषो वयं सात्विकनकेभ्यो पि सत्तानाम्या इत्याह॥ दैत्येत्यादित्रिभिः॥ ४०॥ ४१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰ उद्धववैरेणपान्नकिस्त्वयाकेचनेतिचैद्यादयः॥ कामतोनन्क्रागोप्यादयोयथासन्निहृष्टास्त्वदात्मतांप्राप्ताः तथासत्संरक्षाः सन्तोविष्टाः ऋपि सुरादयो
श्रि नसंनिकृष्टाइति॥४१॥ नानुसात्विकेष्वोपिराजसादयः संनिकृष्टाइतिविचेत्तत्राह॥ इदमित्यमिति॥ इदमितिस्वरूपतः इत्यमितिविशेषतश्च॥४२॥ तदेवं
१०० यद्यपिवैरनावेनापित्वत्प्राप्तिर्भवेत्तथापिमांसात्विकंकुर्विति प्रार्थयते तत्रत्वति तत्र धा तः प्रसीदयथानिरपेक्षैराप्तकामैरपिविमृश्यं सुपम्नपदारविं
दंतदेवधिषणामाश्रयत्तस्मादस्य गृहंतदेवांधकूपस्तस्मान्निष्क्रम्यनिर्गत्यविश्वस्यशरणं रसितारोवृक्षास्तेषामंघ्रिषुमूलेषुस्वतएवगलितैः फलादि

केचनोद्धववैरेणभक्त्याकेचनकामतः॥ नतथासत्वसंरब्धाः सन्निकृष्टाः सुरादयः॥४१॥ इदमित्थमितिप्रा
यस्त्वयियोगेश्वरेश्वर॥ नविदंत्यपियोगेशायोगमायांकुतोवयं॥४२॥ तन्नः प्रसीदनिरपेक्षविमृग्ययुष्मत्पा
दारविंदधिषणान्यगृहांधकूपात्‌निःक्रम्यविश्वशरणांघ्र्युपलम्भवृत्तिः शांतोयथैकउतसर्वसखैश्चरामि॥
४४॥ शाध्यस्मान्नोऽनितम्येशानिष्पापान्कुरुतःप्रभो॥ पुमानयच्छ्रद्धयातिष्ठन्चोदनायाविमुच्यते॥४५॥ एम॰ १००

निरुपलक्षाप्राप्ताप्रवृत्तिर्यस्यविकल्पेनसोहंशान्तःसन्‌एकएवचरामि॥ उत अथवासर्वेषांसखायोयेमहान्तस्तैः सहयथाचरामि इति॥४४॥ कथमत्य
पुरुषाणामेवंभावसंभवतः संभवइतिचेत्तत्राह॥ शाधीति हेप्रभो ईशितव्याः सर्वेजीवास्तेषामीशायत्तत्वात्तु
शासनंप्रतिपद्यस्वतुआश्रयत॥ चोदनायाविधिनिषेधलक्षणायाः सकाशाद्विमुच्यतेनखलुतद्भक्तोविधिकिंकरः स्यादितिभावः॥४५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदुक्तं सर्वमनुमोदयस्वागमनकारणं सप्रपंचं कथयति॥ आसन्निति पंचविंशः॥ ऊर्णायां नाम भार्यायां प्रथमेंतरे स्वायंभुवमन्वंतरे ते देवाः सुतां वाचं यभितुं उ
द्युमैथुनेच्छं स्वपितुं उद्यतं उद्युक्तं कं प्रजापतिं जहसुः उपहसितवंतः॥४७॥ तेनावद्यकर्मणा पापेन आसुरीं योनिमगमन्॥ अधुना तत्क्षणमेव हिरण्यकशिपो
र्जाता इत्यर्थः॥ ते च योगमायया ततो नीताः संतो देवक्या उदरे जाताः हे राजन्॥ बलेते च कंसेन विहिंसिताः सा च तान् नात्मजान्मत्वा शोचति। ते चेमे तवांतिके ध्या

श्रीभगवानुवाच॥ आसन्मरीचेः षट् पुत्रा ऊर्णायां प्रथमेंतरे॥ देवाः कं जहसुर्वीक्ष्य सुतां यभितुमुद्यतं॥४७॥ तेनासुरीमगन् योनिमधुनाव
द्यकर्मणा॥ हिरण्यकशिपोर्जाता नीतास्ते योगमायया॥४८॥ देवक्या उदरे जाता राजन् कंसविहिंसिताः॥ सा तान् शोचत्यात्मजान् स्वांस्त इमे
ध्यासतेंतिके॥४९॥ इत एतान् प्रणेष्यामो मातृशोकापनुत्तये॥ ततः शापाद्विनिर्मुक्ता लोकं यास्यंति विज्वराः॥५०॥ स्मरोद्गीथः परिष्वंगः पतंगः क्षु
द्रभृद्घृणी॥ षडिमे मत्प्रसादेन पुनर्यास्यंति सद्गतिं॥५१॥ इत्युक्त्वा तान् समादाय इंद्रसेनेन पूजितौ॥ पुनर्द्वारवतीमेत्य मातुः पुत्रानयच्छतां॥५२
॥ तान् दृष्ट्वा बालकान् देवी पुत्रस्नेहस्नुतस्तनी॥ परिष्वज्यांकमारोप्य मूर्ध्न्यजिघ्रदभीक्ष्णशः॥५३॥ अपाययत्स्तनं प्रीता सुतस्पर्शपरिस्नु
तं॥ मोहिता मायया विष्णोर्यया सृष्टिः प्रवर्तते॥५४॥ पीत्वामृतं पयस्तस्याः पीतशेषं गदाभृतः॥ नारायणांगसंस्पर्शप्रतिलब्धात्मदर्शनाः॥
५५॥ ते नमस्कृत्य गोविंदं देवकीं पितरं बलं॥ मिषतां सर्वभूतानां ययुर्धाम दिवौकसां॥५६॥ ॥

सते॥४९॥ लोकं देवलोकं॥५०॥ स्मरोद्गीथः स्मरस
हितः उद्गीतिं मोक्षं स्मरस्यैव पूर्वं कीर्तिमानिति नाम॥ अतः कीर्तिमंतं प्रथमजं कंसायानकदुंदुभिरर्पयामासेत्युक्तं॥५१॥ अयच्छतां अर्पयामास
तुः॥५२॥ अमृतत्वे हेतुः॥ गदाभृतः पीतशेषमिति॥ नारायणांगसंस्पर्शेन प्रतिलब्धं देवावपुः स्वात्मदर्शनं येस्ते॥५५॥ धाम देवलोकं॥ ५६॥॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰उ॰ मृतानामागमनं निर्गमं च श्री हंसस्य मायां मेने ॥ तेनैवाप स्मारि रूपेण रचितां ॥ ५८ ॥ अमृतं कीर्तिर्यस्य तस्य व्यासपुत्रैरिति बहुवचनं तं पूज्यार्थे जगतः अघं निवर्तनी
१०१ तितयातव ॥ अलंतिः शेषं यथा भवति तथा न हंस्मादि वरिति रैं ते वैमोक्षहे तुलं पापक्षयहेतुत्वं चोक्तं तद्भक्तानां तु सकर्णपूरं परमसुखावहं कर्णाभिरम
णीति ॥ स्वयं सुखरूपतामाह ॥ किंच ॥ भगवति कृतमावेशितं चित्तं येन स तथाभूत्वा तस्य क्षेमधाम कालादिचरं यं हि तं लोकं यातीति ॥ ६० ॥ इति दशमे पं

तं ह्य देवकी देवी मृतागमननिर्गमं ॥ मेने सुविस्मिता मायां हंसस्य रचितां नृप ॥ ५९ ॥ एवंविधान्यद्भुतानि हं[illegible]स्य परमात्मनः ॥ वीर्याण्यन
न्तवीर्यस्य संत्यनंतानि भारत ॥ ५७ ॥ सूत उवाच ॥ य इदमनुश्रृणोति श्रावयेद्वा मुरारेश्चरितममृतकीर्तेर्वर्णितं व्यासपुत्रैः ॥ जगद
घभिद्भलं तद्भक्तसत्कर्णपूरं भगवति कृतचित्तो याति तत्क्षेमधाम ॥ ६० ॥ इति श्री भागवते महापुराणे दशमस्कंधे मृताग्रजानय
नं नाम पंचाशीतितमोऽध्यायः ॥ ८५ ॥ राजोवाच ॥ ब्रह्मन्वेदितुमिच्छामः स्वसारं रामकृष्णयोः ॥ यथोपयेमे विजयो या ममासी राम॰
त्पितामही ॥ १ ॥ श्रीशुक उवाच ॥ अर्जुनस्तीर्थयात्रायां पर्यटन्नवनिं प्रभुः ॥ गतः प्रभासमशृणोन्मातुलेयीं स आत्मनः ॥ २ ॥ दुर्योध
नाय रामस्तां दास्यतीति न चापरे ॥ तल्लिप्सुः स यतिर्भूत्वा त्रिदंडी द्वारकामागात् ॥ ३ ॥ चाशीतितमः ॥ ८५ ॥ षडशीतितमे दं नाम्नु भद्रामर्जु १०१
नो हरत् ॥ गत्वाथ मिथिलां कृष्णो न पविश्रावयंदयत ॥ १ ॥ पित्रोः स्वज्ञातमारिरूप सुभद्रां फाल्गुनाय चाजगाम मिथिलां कृष्णः स्वतक्त प्रियकृत्तमः ॥ देवकामस्
तपुत्रलाभवत ॥ अर्जुनस्य सुभद्रालाभोपि रामस्य प्रातिकूल्यात् दुर्घट इति मन्यमानः प्रसंगात्पृच्छति ॥ ब्रह्मन्निति ॥ १ ॥ २ ॥ कथमशृणोत् ॥ दुर्योधनायेति ॥
अपरे च वसुदेवादयो न दास्यंतीति तल्लिप्सुः तस्यां मातुलेय्यां लिप्सुः रामं वंचयितुं पूज्यत्वं संन्निदंडवेषं विधायागतः ताह ॥ स यतिरिति ॥ ३ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वार्थसाधकः कस्मांप्रेप्सुः॥४॥ तमातिथ्येन निमन्त्र्य गृहमानीय वल्लेनयद्बुधयोपहृतं परिविष्टं तद्भैक्ष्यं किलार्जुनो बुभुजे इत्वयः॥५॥ नावेन रसज्ञाभिप्रायेण भु
ञ्जितं मनोदधे॥६॥ व्रीडितापांगी सव्रीडकटाक्षा तस्मिन्नेव समये हृदयमीक्षणं च ययास॥७॥ अंतरं हर्तुं मनस्मरं प्रेप्सुः प्राप्तुमिच्छुः कामेन तन्मच्चित्तं यस्य सः ३

तत्रैव वार्षिकान्मासान्स वासी स्वार्थसाधकः॥ वीरेः सनाजितो नीक्षणं रामेण राजानता च सः॥४॥ एकदा गृहमानीय स्वातिथ्येन निमंत्र्य ते
बु श्रद्धयोपहृतं तेन भैक्ष्यं बल्लेर्न बुभुजे किल॥५॥ सोपश्यत्तन्महती कस्मांवारमनोहरां॥ प्रीत्युत्फुल्लेक्षणस्तस्यां नावसुञ्जं मनो दधे॥६॥ साधितं च
कमेवीक्ष्य नारीणां हृदयंगमं॥ हसंती व्रीडितापांगी तत्स्य स्वहृदयेक्षणं॥७॥ तां परं समनुध्यायन्नंतरं प्रेप्सुरर्जुनः॥ नलेनेशं स्त्रमचि
त्तः कामेनातिवलीयसा॥८॥ स हेत्सां देवयात्रायां रथस्थां दुर्गतिं गतां॥ जहारानुमतः पित्रोः कृष्णस्य च महारथः॥ रथस्थो धनुरादाय प्रू
रंश्चारुंधतो भटान्॥ विद्रावक्रोशतां स्वानां स्वनागं मृगराडिव॥१०॥ तच्छ्रुत्वाक्षुभितो रामः पर्वणीव महार्णवः॥ गृहीतपादः कृष्णेन
सुहृद्भिश्चान्वशाम्यत॥११॥ प्राहिणोत्पारिबर्हाणि वरवध्वोर्मुदा बलः॥ महाधनोपस्करेभरथाश्वनरयोषितः॥१२॥ ॥श्रीशुक उवाच॥ ॥
कृष्णस्यासीद्द्विजः श्रेष्ठः श्रुतदेव इति श्रुतः॥ कृष्णैकभक्त्या पूर्णार्थः शांतः कविरलंपटः॥१३॥ स उवास विदेहेषु मिथिलायां गृहाश्रमी
॥अनीहयागताहार्यनिवर्तितनिजक्रियः॥ यात्रामात्रं त्वहरहर्दैवादुपनमत्युत॥ नाधिकं तावता तुष्टः क्रियाश्चक्रे यथोचिताः॥१५॥

रामादिसंमाननिमित्तं सुखं॥८॥ असमंताद्रुंधतः आवरणं कुर्वतः॥१०॥ पारिबर्हाणि वरवध्वोः प्रीतिदेयानि॥१२॥ अनीहया अनुद्यमेनैवाग
तं परहार्यं येनोज्यते तेन निवर्तिताः निजक्रिया येन सः॥१४॥ यात्रामात्रं शरीरनिर्वाहमात्रं यो ज्यं उपनमति तं प्रसागच्छति॥१५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिथिलस्य जनकस्य वंश्यो मैथिलकः ॥१६॥ प्रचुरे वस्तयं विदेहान् देशान् प्रययौ ॥१७॥ हलो मासः रामो नार्गवः अहं श्रुकः एवमादि निःसृत ॥१८॥ आनर्त्ता घ्राणं
तास्व तद्देशवर्तिन्यो न नार्यः ॥ उदारहासं स्निग्धमीक्षणं यस्मिन् तत् ॥ दशिचित्तैर्नैत्रैः ॥२०॥ स्वर्वासगरो नैव विनष्टतमिस्रा दृश्येषां तेभ्यः स्वेमं व्रजन्तयंत्रार्य दृष्टं

तथा तन्नाथु पालोंगवकुलाम्बु तिश्कृतः ॥ मैथिलो निरहंमानउ नावष्यच्युतप्रियौ ॥१६॥ तयोः प्रसन्नो नगवान् दारुकेणाहृतं रथं
॥ आरुह्य साकं मुनिभिर्विदेहान् प्रययौ प्रभुः ॥१७॥ नारदो वामदेवोत्रिः कृष्णो रामोसितो रुणिः ॥ अहं बृहस्पतिः कण्वो मैत्रेयश्च्य
वनादयः ॥१८॥ तत्र तत्र तमायांतं पौराजानपदान् प ॥ उपतस्थुः सार्घहस्ता ग्रहैः सूर्यमिवोदितं ॥१९॥ आनर्त्तधन्वकुरुजांगलकं
कमत्स्य ॥ पांचालकुंतिमधुकैकयकोशलार्णाः ॥ अन्ये च तन्मुखसरोजमुदारहासस्निग्धेक्षणं नृपपुर्दृशिभिर्नृ[illegible]र्यः ॥२०॥ तेभ्यः
स्ववीक्षणाविनष्टतमिस्रदृग्भ्यः क्षेमं त्रिलोकगुरुरर्थदृशं च यच्छन् ॥ शृण्वन् दिगंतधवलं स्वयशोशुभघ्नं गीतं सुरैर्नृभिरगाच्छनकैर्वि
देहान् ॥२१॥ तेच्युतं प्राप्तमाकर्ण्य पौरजानपदा नृप ॥ अभीयुर्मुदितास्तस्मै गृहीतार्हणपाणयः ॥२२॥ दृष्ट्वा त उत्तमश्लोकं प्रि
त्युत्फुल्लाननाशयाः ॥ कैर्धृतांजलिभिर्नेमुः श्रुतपूर्वांस्तथा मुनीन् ॥२३॥ स्वानुग्रहाय संप्राप्तं मन्वानौ तं जगद्गुरुं ॥ मैथिलः
श्रुतदेवश्च पादयोः पेततुः प्रभोः ॥२४॥ न्यमंत्रयेतां दाशार्हमातिथ्येन सह द्विजैः ॥ मैथिलः श्रुतदेवश्च युगपत् संहतांजली ॥ २५ ॥

तलज्ञानं च यच्छन् ॥२१॥ अभीयुः प्रत्युज्जग्मुः ॥२२॥ प्रीत्या उत्फुल्लानि आननानि ॥ आशयाश्चांतःकरणानि च येषां ते तैः कैः शिरोभिः ॥ २५॥ ॥

ना.
गीतं

राम.
१०२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदन्निप्रेतं श्रृंगीकृत्य तत्र राउच्चामामपि तास्मां मदृहा दम्नस्पर्गे हुंयातीत्यलक्षितः॥ अविदितः यथा उभास्मां रूपास्मांतदलक्षितःतास्मामलक्षित
इति॥२६॥ उभर्षदं उक्ततहर्षे रुदयं यस्य अस्त्रैराविलेक्लिन्ने ईक्षणे यस्य सएव सच॥२८॥ ईश्वरान्॥ ईश्वरं तन्तुज्यांश्चेत्यर्थः॥२९॥ प्रीणन् प्रीणयन् संस्पृशन्

नगवांस्तदत्निमेत्यद्वयोः प्रियचिकीर्षया॥ उभयोराविशज्जिहुं उनास्मांतदलक्षितः॥२६॥ श्रोतुमपसंतान्राजकनकः स्वगृहागतान्॥ आ
नीतेष्वासनाग्र्येषु सुखासीनान्महामनाः॥२७॥ प्रहृष्ट नन्दाउक्षर्ष रुदयौस्त्राविलेक्षणः॥ नत्वा तदंघ्रीन्प्रक्षाल्य तदपो लोकपावनीः॥ स
कुटुंबो वहन्मूर्ध्ना पूजयांचक्र ईश्वरान्॥ गंधमाल्यांबराकल्पधूपदीपार्घगोवृषैः॥२९॥ वाचामधुरयाप्रीणन्निदमाहान्नतर्पितान्
॥पादावंकगतौ विष्णोः संस्पृशन्शनकैर्मुदा॥३०॥ ॥राजोवाच॥ ॥ नवान्हि सर्वभूतानामात्मासाक्षी स्वदृक्प्रभो॥ अथ नस्त्वत्पदांभोजं
स्मरतां दर्शनंगतः॥३१॥ स्ववचस्तदृतं कर्तुमस्मदृग्गोचरो भवान्॥ यदात्थैकांतभक्तान्मे नानंतः श्रीरजः प्रियः॥३२॥ कोनुत्वच्चरणां
भोजमेवंविद्विसृजेत्पुमान्॥ निष्किंचनानां शांतानां मुनीनां यस्त्वमात्मदः॥३३॥ योवतीर्य यदोर्वंशे नृणां संसरतामिह॥ यशो विते
नेतच्छांत्यै त्रैलोक्यवृजिनापहं॥३४॥ नमस्तुभ्यं भगवते कृष्णायाकुंठमेधसे॥ नारायणाय ऋषये सुशांतं तप ईयुषे॥३५॥ दिनानि कति
चिद्भूमन्गृहान्नो निवस द्विजैः॥ समेतः पादरजसा पुनीहीदं निमेः कुलं॥३६॥ इत्युपामंत्रितो राज्ञा भगवांल्लोकभावनः॥ उवास
कुर्वन्कल्याणं मिथिलानरयोषितां॥३७॥ ॥ संमर्ईतन्॥३०॥ आत्मा चेतयिता साक्षी प्रकाशकः॥ स्वदृक् स्वप्रकाशः॥ अथ अतः करणात्॥३१॥
अनंतो बंधुरपि॥ श्रीर्भार्यापि॥ अजः पुत्रोपि॥३२॥ तच्छांत्यै संसारोपशमाय॥३४॥३५॥ गृहान् गृहेष्वित्यर्थः॥३६॥३७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰ धुन्वन्नुपरि स्थामपतन् ॥ ३९॥ अवनिजे अवनिनिजे प्रक्षालितवान् ॥ ४०॥ फलैराम्रजम्बुकादिभिरर्हणेनो शीरैस्तृणविशेषमूलैः सुवासितैः शिवैरमृतवत्स्वादु

भिरंबुभिः सुरम्या मृदा कस्तूरीप्रमुखया सपर्यया पूजया यथोपपन्नया अनायासेन संपन्नया अन्नतान्नुपद्रवलक्षतास्तलेविवर्धनं यदेषः अन्नं तेन च ॥ ४२

१०३ ॥ अस्य श्रीकृष्णस्यात्मा मूर्तिस्तस्मात् तैः मत्सुतैः सर्वतीर्थास्पदपादरेणुभिः कृष्णादिभिर्यः संगमः स मम कुतो न्वभूदिति ॥ अन्विति विस्मये यद्वा आश्चर्य इति वि

श्रुतदेवोऽच्युतं प्राप्तं स्वगृहान् जनको यथा ॥ नत्वा मुनीश्वरं हृष्टो धुन्वन्वासो ननर्त ह ॥ ३९॥ तृणपीठबृसीष्वेतानानीतेषूप

वेश्य सः ॥ स्वागतेनाभिनंद्यांघ्रीन् सभार्योऽवनिजे मुदा ॥ ४०॥ तदंभसा महाभाग आत्मानं सगृहान्वयं ॥ स्नापयांचक्र उद्धर्षो लब्ध

सर्वमनोरथः ॥ ४१॥ फलार्हणोशीरशिवामृतांबुभिर्मृदा सुरम्या तुलसीकुशांबुजैः ॥ आराधयामास यथोपपन्नया सपर्य

या सत्त्वविवर्द्धनांधसा ॥ ४२॥ स तर्कयामास कुतो ममान्वभूद्गृहांधकूपे पतितस्य संगमः ॥ यः सर्वतीर्थास्पदपादरेणुभिः

कृष्णेन चास्यात्मनिकेतभूसुरैः ॥ ४३॥ सूपविष्टान् कृतातिथ्यान् श्रुतदेव उपस्थितः ॥ सभार्यः स्वजनापत्य उवाचांघ्र्यभिमर्शनः ॥ राम १०३

॥ ४४ ॥ श्रुतदेव उवाच ॥ नाद्य नो दर्शनं प्राप्तः परं परमपूरुषः ॥ यर्हीदं शक्तिभिः सृष्ट्वा प्रविष्टो ह्यात्मसत्तया ॥ ४५॥ ॥

तर्के नु इति विस्मये ॥ ४३॥ उपस्थितः समीप उपविष्टः ॥ भार्या नर्तेमाः स्वजना अपत्यानि च तैः सहितः श्रीकृष्णस्यांघ्रिमभिमृशति संमर्दयतीति अंघ्र्यभि

मर्शनः ॥ ४४॥ यर्हीदं विश्वं स्वशक्तिभिः सत्वादिभिः सृष्ट्वा प्रविष्टस्तदेव दर्शनं प्राप्त इति स एव सन्मात्रो द्यतनीभूतस्तमित्यर्थः ॥ यद्वा नः अस्मान् अद्यैव

प्राप्त इति न किंतु तदैव प्राप्तः यर्हीदं विश्वं स्वशक्तिभिः सत्वादिभिः सृष्ट्वा स्वसत्तया अनुविष्टस्तद्दर्शनं तु परं केवलं अद्यैव प्राप्त इति ॥ ४५॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मायया सृष्टिप्रवेशयोरविद्यासृष्टिप्रवेशौ दृष्टांततयाहयथेति ॥ आत्ममायया स्वाविद्ययेत्यर्थः ॥ यद्वा आत्मनस्त्वमाययेति ॥४६॥ किंच श्रूएतामिति
नित्यं श्रवणकीर्तनादिपराणाममलात्मनामपि दुर्धीवत्वं नास्मिममतुलोचनगोचरः त्वं अहो नाग्पमिति नावः ॥४७॥ ननु सर्वेषां हृदिस्थितः कथं केषांचिदेव
न्नातिमेधैः सूर्यवत् जीवोपाधिभिरंतरितत्वादिति यदुच्यते तर्हि न कस्मापि निर्णयादित्यत आह ॥ हृदिस्थोपीति ॥ कर्मभिर्विवसितं चेतो येषां तेषामात्मज्ञा
क्तिभिरहंकारादिभिरग्राह्यः ॥ असव्यवहितोपि उपेतगुणः प्राप्तश्रवणकीर्तनादिसंस्कारः आत्मान्तःकरणं येषां तेषामंतिसमीपे ऽसव्यवहितस्त्वमित्यर्थः
॥४८॥ एतदेव प्रपंचयन्नमस्यति ॥ नमोस्त्विति ते तुभ्यं नमोस्तु ॥ अध्यात्मविदां निर्दूते देहाद्यहंकारणं परमात्मने परमात्मत्वेन प्रकाशमानाय मोक्षप्रदा

यथात्रयातः पुरुषो मनसैवात्ममायया ॥ सृष्ट्वा लोकं परं स्वास्मन्नुविश्यावभासते ॥४६॥ श्र एवतांश्च श्वदर्च्छं तांतां ॥ निवेदतां ॥ नृणां संव कीर्तनं
दतामंतर्हृदि भास्यमलात्मनां ॥४७॥ हृदिस्थोप्यतिदूरस्थः कर्म्मविक्षिप्तचेतसां ॥ आत्मशक्तिभिरग्राह्योप्यंत्युपेतगुणात्मनां ॥४८॥
नमोस्तु तेध्यात्मविदां परात्मने ह्यनात्मने स्वात्मविभक्तमृत्यवे ॥ सकारणाकारणलिंगमीयुषे स्वमायपासंवृतरुद्धदृष्टये ॥४९॥ ॥

येत्यर्थः ॥ आत्मने देहाद्यभिमानिने जीवाय परमेश्वरेनाप्रकाशमानत्वात् स्वात्मनः सकाशात् विभक्तः समर्पितो मृत्युः संसारो येन तस्मै कृतएतत्त्वज्ञा
द हसकारणं महदादिकार्यं ॥ अकारणं प्रतीतद्रूपं लिंगमुपाधिं नियम्यतया ईयुषे प्राप्नवते ॥ अत एवोन्नयनियंतुः स्वस्मात्सकाशादुन्नयपवरूपाय जीवा
यविभक्तमृत्यव इत्यर्थः ॥ नियंतृनियम्यतेकारणं वदन्नाह ॥ हे स्वमायया संवृतेति ॥ अत्तुमैश्वर्यत्वान्नियंतैव तु संतमः किंच रुद्धदृष्टये माययावि
त्वा देवान्येषां रुद्धा आवृता दृष्टिर्येन तस्मै यद्वा स्वमायया स्वस्मासंवृता अन्येषां च रुद्धा दृष्टिर्येन तस्माविति केंपदम् ॥४९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० उ
१०४

स एवंभूतः परमेश्वरस्त्वं नोऽस्मान्स्वभृत्यान्प्रशाधि श्वतु शिक्षय ॥५०॥ ५०॥ स्वस्मिन्नादरमत्यधिकं ब्राह्मणेषु मंदमिवालक्ष्य लोकसंग्रहपरो भगवान्भक्तो पि
ब्राह्मणेषु श्रद्धातिरेकं कुर्वित्येवं तमनुगृह्णास्त्रि ॥ ब्रह्मन्निति स प्रसन्निःश्रेयसादृदिस्मितेना ॥५२॥ देवादिभ्योऽपि ब्राह्मणाः श्रेष्ठा इत्याह ॥ देवा इति तेऽङ्गैः पुनन्ते ते
तु सद्यः किंच देवादीनियत्पुनंति तदप्यर्हत्तमानामीक्षया ॥५३॥ समकुलपरिकुलनमुपाल्लिखस्य यापुतः ॥५४॥ किंच ब्राह्मणाराधनमेवममप्रेष्टमित्याह

स त्वं प्रशाधि स्वभृत्यान्नः किं देव करवाम ते ॥ एतदंतो नृणां क्लेशो यद्भवानक्षिगोचरः ॥५०॥ श्रीशुक उवाच ॥ ॥ तदुक्तमित्युपाकर्ण्य भगवान् प्र
णतार्तिहा ॥ गृहीत्वा पाणिना पाणिं प्रहसंस्तमुवाच ह ॥५१॥ ॥ श्रीभगवानुवाच ॥ ब्रह्मंस्तेनुग्रहार्थाय संप्राप्तान्विद्ध्यमून्मुनीन् ॥ संचरंति मया
लोकान्पुनंतः पादरेणुभिः ॥५२॥ देवाः क्षेत्राणि तीर्थानि दर्शनस्पर्शनार्चनैः ॥ शनैः पुनंति कालेन तदप्यर्हत्तमेक्षया ॥५३॥ ब्राह्मणो जन्मना श्रेयान्
सर्वेषां प्राणिनामिह ॥ तपसा विद्यया तुष्ट्या किंतु मत्कलया युतः ॥५४॥ न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजं ॥ सर्ववेदमयो विप्रः सर्वदेवम
यो ह्यहं ॥५५॥ दुष्प्रज्ञा अविदित्वैवमवजानंत्यसूयवः ॥ गुरुं मां विप्रमात्मानमर्चादाविज्यदृष्टयः ॥५६॥ चराचरमिदं विश्वं भावा ये चास्य हेतवः
॥ मद्रूपाणीति चेतस्याधत्ते विप्रो मदीक्षया ॥५७॥ तस्माद्ब्रह्मऋषीनेतान्ब्रह्मन्मच्छ्रद्धयार्चय ॥ एवं चेदर्चितोस्म्यद्धा नान्यथा भूरिभूतिभिः ॥
५८॥ ॥ श्रीशुक उ० ॥ स इत्थं प्रभुणादिष्टः सहकृष्णान्द्विजोत्तमान् ॥ आराध्यैकात्मभावेन मैथिलश्चाप सद्गतिं ॥५९॥ एवं स्वभक्तयो राजन्भगवान्भ
क्तभक्तिमान् ॥ उषित्वादिश्य सन्मार्गं पुनर्द्वारवतीमगात् ॥६०॥ ॥ इति श्रीभागवते दशमे षडशीतितमोऽध्यायः ॥८६॥ ॥ नेति हेतुमाह सर्ववेदम
यो हि श्रुतिः ॥ प्रमाणाधीनत्वात्प्रमेयस्य वेदमयो विप्रो देवमयाद्रूपादेष्ट इत्यर्थः ॥५५॥ असूयवो दोषदृष्टयः ईज्यदृष्टयः पूज्यबुद्धयः ॥५६॥ अस्यवि
श्वस्य हेतवो भावाः महदादयः मदीक्षया ममैव सर्वेक्षत्वेन या ॥५७॥ सन्मार्गं सितां वेदानां त्रिकांडविषयाणां प्रवृत्तिप्रकारमादिश्य ॥६०॥ ॥ इति षडशीतितमः ॥८६॥ ॥

राम
१०४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्ताशीतितमे नारायणनारदवादतः॥ वेदैः स्तुतिर्गुणालंबा निर्गुणावधि वर्ण्यते॥१॥ ॐ नमो भगवते वासुदेवाय॥ वागीशा यस्य वदने लक्ष्मीर्यस्य च
वक्षसि॥ यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे॥२॥ संप्रदायविशुद्ध्यर्थं स्वीयनिर्बंधयंत्रितः॥ श्रुतिस्तुतिमितमारंभं करिष्यामि यथामति॥३॥ श्रीमद्भा
गवते पूर्वैः सारतः संनिषेवितं॥ मया तु तदुपस्पृष्टमुच्छिष्टमुपचीयते॥४॥ ॥पूर्वाध्यायांते॥ ॥ एवं स्वभक्तयो राजन्भगवान्भक्तभक्तिमान्॥ उषित्वादिश्य
सन्मार्गं पुनर्द्वारवतीमगात्॥ इत्यत्र सन्मार्गं सतां स्वतःप्रमाणभूतानाम् अप्रामाण्यकारणरहितानां वेदानां मार्गं ब्रह्मपरत्वमुपदिश्य भगवानगादित्यु
क्तं॥ तत्र वेदानां ब्रह्मपरत्वमघटमानं मन्वानः पृच्छति ब्रह्मन्निति। तत्र तावच्छब्दानां लक्षणामुख्याभेदेन द्विधा शब्दप्रवृत्तिः॥ मुख्यापि रूढियोगभेदेन द्विधा
रूढिश्च स्वरूपेण जात्या गुणेन वानिर्देश्यार्हे वस्तुनि संज्ञासंज्ञिसंकेतेन प्रवर्तते यथा डित्थः गौः शुक्ल इति रूढिः लक्षणा च तेनैव संकेतेनाभिहिता

परीक्षिदुवाच॥ ॥ब्रह्मन्ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः॥ कथं चरंति श्रुतयः साक्षात्सदसतः परे॥१॥ ॥

र्थसंबंधिनि यथा गंगायां घोषः प्रतिवसतीति॥ गौणी चाभिहितार्थलक्षितगुणयुक्ते तच्छब्दप्रयोगो यथा सिंहो देवदत्त इति यथा च॥ अभिधेयाविना
भूतप्रवृत्तिर्लक्षणेष्यते॥ लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणतेति॥ योगवृत्तिस्तु एतत्त्रिविधवृत्तिप्रतिपादितपदार्थयोः प्रकृतिप्रत्ययार्थयोर्वा
योगेन यथा चित्रगुः पंकजं औपगवः पाचक इत्यादि॥ तत्र तावद्ब्रह्मणि रूढिवृत्तिर्न संभवतीत्याह॥ साक्षात्कथं चरंतीति तत्र हेतुः॥ अनिर्देश्ये इति
॥ अनिर्देश्यत्वेपि हेतुं वदन्गुणवृत्तिं निराकरोति निर्गुणे गुणवृत्तय इति॥ गुणैर्वर्तमाना अपि निर्गुणे कथं चरंतीत्यर्थः॥ निर्गुणत्वे च हेतुं वदन्
लक्षणां योगं च निराकरोति॥ सदसतः पर इति कार्यकारणाभ्यां परस्मिन्न संगे केनचिदपि संबंधाभावान्न लक्षणायोगवृत्ती संभवत इत्यर्थः॥
एवं पदार्थत्वायोगादपदार्थस्य च वाक्यार्थत्वायोगान्न श्रुतिगोचरत्वं ब्रह्मण इत्यभिप्रायः॥१॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰उ॰ उक्तमोहरं॥ बुद्धीन्द्रियेति। बुद्ध्यादीनुपाधीन्जनानामनुशायिनां जीवानां मात्राद्यर्थं प्रभुरीश्वरोऽसृजत्। मीयंत इति मात्रा विषयास्तदर्थं। भवार्थं भवो ज
१०५ न्मलक्षणं कर्म तत्तत्कर्मकरणार्थमित्यर्थः॥ आत्मने लोकांतरगामिने आत्मनस्तल्लोकभोगायेत्यर्थः॥ अकल्पनाय कल्पना निवृत्तये मुक्तय इत्यर्थः॥ अर्थं ध
र्मकाममोक्षार्थमिति क्रमेण चतुष्टयस्यार्थः॥ जनानामिति वदन्जीवार्थमीश्वरस्य सृष्ट्यादिषु प्रवृत्तिरिति दर्शयति॥ प्रभुरितीश्वरस्योपाधिवश्यताभावेन नित्य
मुक्ततां दर्शयति॥ अयमभिप्रायः सगुणमेव गुणैरनभिभूतं सर्वज्ञं सर्वशक्तिं सर्वेश्वरं सर्वनियंतारं सर्वोपास्यं सर्वकर्मफलदातारं समस्तकल्याणगुण
निलयं सच्चिदानंदं ब्रह्म एवं तच्छ्रुतयः प्रतिपादयंति॥ यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः सर्वस्य वशी सर्वस्येशानः यः पृथिव्यां तिष्ठन् पृथिव्या अंतरः सोका
मयत बहुस्यां प्रजायेयेति स ऐक्षत॥ तत्तेजोऽसृजत सत्यंज्ञानमनंतं ब्रह्मेत्याद्याः तथाभूतेश्वरं तां तावत्संसारिणे जीवस्य तन्निवृत्तये तत्त्वमसीत्यादिवाक्या
निबोधयंति॥ तत्र च तत्त्वंपदयोः समानाधिकरण्यं प्रतीयते॥ तच्च प्रकारांतरेण घटमानं ब्रह्मणि पर्यवसानं गमयति तथाहि॥ न तावद्देश्वदेमामि ह्वेति

श्रीशुक उवाच॥ ॥बुद्धीन्द्रियमनःप्राणान्जनानामसृजत्प्रभुः॥ मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च॥२॥ राम॰

वदुभिन्नयोरेकार्थाभिधानेन सामानाधिकरण्यं यथोक्तं॥ अग्निर्ह्यो देवतामुक्तावदत्वेनैव घटते॥ आभिस्मापदसांनिध्यात्तस्यैव विषयार्पणमिति चेत् भिन्ना १०५
र्थत्वात्॥ न चाजहत्स्वार्थया निरूढलक्षणया विशेष्यविशेषणभावेन नीलमुत्पलमितिवत्॥ यथोक्तं॥ स्वबुध्या रज्यते येन विशेष्यं तद्विशेषणमित्यादि कुतः वि
रुद्धार्थत्वेन तदयोगात्॥ न चाजहत्स्वार्थत्वे न संबंधलक्षणया कुसुमितद्रुमा गंगेतिवत्॥ कुतः एकार्थत्वस्याविवक्षितत्वादतो जहदजहत्स्वार्थलक्षणया सोयं देव
दत्त इति॥ वद्विरुद्धांशत्यागेनानुगतचिदंशेनैकार्थ्येन सामानाधिकरण्येनेति निर्गुणे पर्यवसानं अस्थूलादिवाक्यानां तु साक्षादुपाधिनिषेधेन तत्पदार्थशोध
नउपयोगान्निर्गुण एव पर्यवसानं तथात्रैवोपक्रमे स्वस्य रूपमिदमादावीत्यादिना विशिष्टमालंबनं वक्ष्यति॥ अंते च श्रुतयस्त्वयि हि फलंत्यतन्निरसनेन
भवन्निधनास्त्युपसंहरिष्यति॥ उपासनादिवाक्यानां क्रियार्थप्रवृत्तस्य ह्यावलंबनेन ज्ञानसाधनविधानेन तत्परत्वमित्येषादिक्॥२॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्र चानादिशिष्टपरंपरागततां त्वसंदेहो युक्त इत्याह ॥ सैषेति । सा एषा यथोक्तालंबना नाम्ना ब्राह्मी ब्रह्मपरा श्रद्धया । आदरेण एवैतं त्रिकतकर्तिनितिवेशेन यः श्रवणा
दिना धारयेत् । स अकिंचनः निरस्तदेहाद्युपाधिः सन् परं पदं प्राप्नुयादिति ॥ ३॥ एतदेव सर्वश्रुत्यर्थनिरूपणेन प्रपंचयितुमितिहासमवतारयति । अत्रेति नारायणान्वि
तां नारायणः प्रवक्तृत्वेनान्वितो यस्यां तां गाथामितिहासं ॥ ४॥ ब्रह्मसत्रमिति यथा यजमाना एव सम्यक् ऋत्विगादिरूपेण यत्र कर्म कुर्वंति । तत्कर्मसत्रं प्रसिद्धं तथा न
यत्र समाना एव वक्तृश्रोतृभावेन ब्रह्म समीमांसते तद्ब्रह्मसत्रं ॥ ५॥ अहो तर्हि मया कथं तन्न ज्ञातं इत्यत आह ॥ श्वेतद्वीपमिति । तदीश्वरं तत्र स्वयमामेवानिरुद्ध

सैषा ह्युपनिषद्ब्राह्मी पूर्वेषां पूर्वजैर्धृता ॥ श्रद्धया धारयेद्यस्तां क्षेमं गच्छेदकिंचनः ॥ ३॥ अत्र ते वर्णयिष्यामि गाथां नारायणान्वितां ॥ नारदस्य
च संवादमृषेर्नारायणस्य च ॥ ४॥ एकदा नारदो लोकान् पर्यटन् भगवत्प्रियः ॥ सनातनमृषिं द्रष्टुं ययौ नारायणाश्रमं ॥ यो वै भारतवर्षेऽस्मिन् क्षेमा न्
य स्वस्तये नृणां ॥ धर्मज्ञानशमोपेतमाकल्पादास्थितस्तपः ॥ ६॥ तत्रोपविष्टमृषिभिः कलापग्रामवासिभिः ॥ परीतं प्रणतोऽपृच्छदिदमेव कुरूद्व
ह ॥ ७॥ तस्मै ह्यवोचद्भगवानृषीणां शृण्वतामिदं ॥ यो ब्रह्मवादः पूर्वेषां जनलोकनिवासिनां ॥ ८॥ ॥ श्रीभगवानुवाच ॥ स्वायंभुव ब्रह्मसत्रं जन
लोकेऽभवत्पुरा ॥ तत्रस्थानां मानसानां मुनीनामूर्ध्वरेतसां ॥ ९॥ श्वेतद्वीपं गतवति त्वयि द्रष्टुं तदीश्वरं ॥ ब्रह्मवादः सुसंवृत्तः श्रुतयो यत्र शेर
ते ॥ १०॥ तत्र ह्ययमभूत्प्रश्नस्त्वं मां यमनुपृच्छसि ॥ तुल्यश्रुत [illegible] तपःशीलास्तुल्यस्वीयारिमध्यमाः ॥ ११॥ अपि चक्रुः प्रवचनमेकं शुश्रूषवो
परे ॥ ॥ श्रीसनंदन उवाच ॥ ॥ स्वसृष्टमिदमापीय शयानं सह शक्तिभिः ॥ तदंते बोधयांचक्रुस्तल्लिंगैः श्रुतयः परं ॥ १२॥ यथा शयानं सम्रा
जं वंदिनस्तत्पराक्रमैः ॥ प्रत्यूषेऽभेत्य सु[illegible]श्लोकैर्बोधयंत्यनुजीविनः ॥ १३॥ ॥

मूर्त्ति ॥ १०॥ ननु सर्वज्ञेऽस्मिन्कस्तत्र वक्ता प्रष्टा वा तत्राह ॥ तुल्यश्रुते
ति ॥ श्रुतादिभिरविशेषादरिमित्रोदासीनहीनत्वेऽप्यनिरूपमकरुणाः ॥ अतः सर्वे प्रवचनयोग्या अपि केनापि कौतुकेनैकं प्रवक्तारं कृत्वा अन्ये पप्रच्छुरित्यर्थः ॥
११॥ स्वसृष्टमिति द्वाभ्यां निर्वृतमिदं विश्वं प्रलयसमये आपीय संहृत्य शयानं योगेन निद्रामिव वर्तमानं तदंते प्रलयांते तल्लिंगैस्तत्प्रतिपादकैर्वाक्यैः प
रं ईश्वरं सृष्टिसमये प्रथमानिश्वासप्रसृताः श्रुतयः प्रबोधयामासुः ॥ १२॥ सुश्लोकैः शोभनाः श्लोकाः कीर्तयो येषु तैः पराक्रमैः ॥ १३॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. द. उ. जयजयेति॥ नोऽजित उत्कर्षमाविष्कुरु आदरे वीप्सा॥ केन प्रकारेण॥ अगजगदोकसां अगानि स्थावराणि जगंति जंगमानि च तदोकांसि शरीराणि
१०६ येषां जीवानां तेषामजामविद्यां जहि नाशय॥ किमिति गुणावती हंतस्मे त्यत आह॥ दोषगृभीतगुणां॥ दोषाय आनंदाद्यावरणाय गृहीता गुणा यया तां
तां॥ हृग्रहोर्भः छंदसीति॥ भकारः इयं हि स्वैरिणीव परप्रतारणाय गुणान्गृह्णाति अतो हंतव्येति॥ तर्हि मय्यपि दोषमावहेदिति॥ न मायि तत्र काश
क्तिः स्यात्॥ अत आह॥ त्वमिति यत॥ यस्मात्त्वं आत्मना स्वरूपेणैव समवरुद्धसमस्तभगः संप्राप्तसमस्तैश्वर्योसि वशीकृतमायत्वादिति भावः॥
ननु स्वयमेव ते ज्ञानवैराग्यादिना किं न हन्युरित्यत आह॥ अखिलशक्त्यवबोधकेति॥ तेषां त्वमेवांतर्यामी सर्वशक्त्युद्बोधक अतो न ते ज्ञा

श्रुतय ऊचुः॥ ॥जयजयजह्यजामजित दोषगृभीतगुणां त्वमसि यदात्मना समवरुद्धसमस्तभगः॥
अगजगदोकसामखिलशक्त्यवबोधक ते क्वचिदजयात्मना च चरतोऽनुचरेन्निगमः॥१॥१४॥ ॥

नादौ स्वतंत्रा इति भावः॥ अहमज्ञानैश्वर्यादिगुणो जीवानां कर्मज्ञानादिशक्त्यवबोधनेनाविद्यां हंतेत्यत्र किं प्रमाणमिति चेत्॥ अहमेव राम.
प्रमाणमित्याह॥ निगमः वेदः॥ ननु एवंभूते मयि कथं श्रुतीनां प्रवृत्तिस्तत्राह॥ क्वचिदिति कदाचित्सृष्ट्यादिसमये अजया मायया चरतः क्रीडतः १०६
नित्यं चानुभूतजगतया सत्यज्ञानानंतानंदैकरसेनात्मना च चरतो वर्तमानस्य निगमोनुचरेत् प्रतिपादयेत्॥ कर्मणि षष्ठी॥ यतो वा इमानि भूतानि
जायंते यो ब्रह्माणं विदधाति॥ पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं हि देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये॥ य आत्मनि तिष्ठन् स
त्यं ज्ञानमनंतं ब्रह्म यः सर्ववित् इत्याद्यागमः करणं त्वामेवंभूतं प्रतिपादयतीत्यर्थः॥१॥ जयजयाजित जह्यगजंगमावृतिमजामुपनीतमृषागुणां
॥ न हि भवंतमृते प्रभवंत्यमी निगमगीतगुणार्णवता तव॥१॥१४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अलात्विको न्यथाभावो विवर्तितः यथा
रज्जौ सर्पः तात्विको न्यथाभावः यथा तंडुला
ओदनमिति

ननु कथं मामेव प्रतिपादयंतीत्यत इंद्रो यातो वसितस्य राजेत्यादिभिरिंद्रः यातो जंगमस्य अवसितस्य स्थावरस्य राज्ञेति प्रतिपाद्यते तथा अग्निर्मूर्धादिवइ
त्यादिभिश्चैवं भूततेनास्मादृक्षु प्रतिपाद्यं तेत आह॥ ब्रह्मदुपलब्धमेतदिति॥ अयमर्थः॥ एतदुपलब्धं दृष्टमिंद्रादि सर्वं ब्रह्मतत्त्वमिति सेवा वाचयंति जानंति क
थं ब्रह्मतत्त्वावशेषतया वशिष्यमाणत्वेन॥ कुतः यतो ब्रह्मतः सर्वस्योदयास्तमयौ तत्र स्थितियो सर्वोपादानत्वात्॥ तर्हि किं विकारित्वं ब्रह्मतः नात विह्नतात् विवर्त्ताधि
ष्ठानत्वेनाविकारादित्यर्थः॥ वाशब्द उपमार्थः॥ यथा घटादेर्विह्नतेर्मृदि उदयास्तमयौ तद्वता वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं सर्वं खल्विदं ब्रह्मे

ब्रह्मदुपलब्धमेतदवयंत्यवशेषतयायत उदयास्तमयौ विह्नतेर्मृदिवाविह्नतात्॥ अ
तऋषयोदधुस्त्वयि मनोवचनाचरितं कथमयथाभवंति भुविदत्तपदानि नृणां॥ २॥ १५॥

त्यादिभिस्तथा प्रतिपादनादित्यर्थः॥ अतः कारणात् ऋषयो मंत्रास्तद्द्रष्टारो वा तत्प्रेव मनोवचरितं दधुः मननमिश्वाचरितं तात्पर्येण वचनस्याचरितमभिधानं च च ना
धृतवंतः तद्दृष्टयैव विकारेष्वित्यर्थः॥ अत्र निदर्शनं कथमयथेति नृणां पदन्यस्तान्यपि दत्तानि निक्षिप्तानि पदानि तु विकयथमयथा भवंति अदत्तानि भवंति अतो
यथा मृत्पाषाणेष्टकादिषु दत्तानि पदानि सत्त्वंततव्यभिचरंति तथा यत्किमपि विकारजातं वदंतो वेदास्त्वामेव सर्वकारणं परमार्थभूतं प्रतिपादयं
तीत्यर्थः॥ २॥ इह हि एव क्विरवींद्रमुखामरा जगदिदं न भवेत् पृथगुत्थितं॥ बहुमुखैरपि मंत्रगणैरजस्त्वमुरुमूर्तिरतो विनिगद्यसे॥ २॥ १५॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.द.उ. त्वमेव सर्वनिगमगोचर इति संतां प्रवत्साद् द्ग्यति इति तवेति त्वमेव सर्वकारणत्वेन परमार्थ इति ह त्र्यात्मो त्र्यधिपते त्रिगुणमाया मृगीनर्तक सूरयो विवे-
१०७ किनस्त्वखिललोकमलक्षपणकथामृताब्धिं सकलजनहृत्तिनिरसनहेतुकीर्तिसुधासिंधुमवगाह्य निषेव्य तपंतीति तपांसि पापानि दुःखानि वा जहुः त्य-
क्तवंतः।। त्वदीयकथामात्रेण यदा पापत्यागस्तदा किं वक्तव्यं ये पुनः स्वधामविधुताशयकालगुणाः स्वधाम्नात्मस्वरूपस्फुरणेन विधुता निरस्ता आशयगुणाः अंतः- काल
करणधर्मा रागादयः कालगुणा जरादयश्च यैस्ते तथा।। हे परम तव अजस्रसुखानुभवं अखंडानंदानुभवं परं स्वरूपं भजंति सेवंते ते यामृताः दुःखानि त्य-

इति तव सूरयस्त्र्यधिपतेऽखिललोकमलक्षपणकथामृताब्धिमवगाह्य तपांसि जहुः।। किमु-
त पुनः स्वधामविधुताशयकालगुणाः परम भजंति ये पदमजस्रसुखानुभवम्।।३।।१६।। ।।

एम.
१०९
तीजेंति।। तद्यथा पुष्करपलाश आपो न श्लिष्यंते एवमेवंविदि पापं कर्म न श्लिष्यते।। न कर्मणा लिप्यते पापकेन तत्सुहृत तदुष्कृते विधुनुते एवं ह वाव
न तपति किमहं पापमकरवमित्यादिश्रुतेरित्यर्थः।। स्मृतिश्च।। समस्ततत्त्वांतरसंगतोपि कश्चिन्नमयि चेष्टितो विशुद्धः।। षड्भिर्मिनाथैर्गुणजैर्विकारैर्न लिप्यते
वारिणि वाज्यपत्रमिति।। सकलदेवगणेरितसद्गुणस्त्वमिति सर्वमनीषिजनारताः त्वयि सुत्वद्गुणश्रवणादिनिस्त्वत्पदस्मरणेन गतक्लमाः।।३।।१६।।

किमहं साधुनाकरवं२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असूर्यानामलोतेका अंधेनतमसावृताः॥ तांस्तेप्रेत्याभिगच्छंति येकेचात्महनोजनाः॥ तथा नचेदवेदीन्महतीविनष्टीरित्याद्याः श्रुतयः पूर्वश्लोकोक्तेनानयैवध
नंजवहीनान्निंदंति॥ इतयइवेति॥ असुन्वतो नराःपरितेऽनुविधाः अव्रतेनिर्गतोऽन्नकाः इतियावन्नहिप्रसंतिजीवंति सफलजीवनाभवंतीति इतरथा इतयइव भस्त्रा इव
वृथाश्वासा इत्यर्थः॥ ननुनन्नकानामपिकामादिफलमस्त्येव नकार्यकारणेनु ग्राह्यकत्वेनजीवनहेतोरन्नवाभजनेन्नहतप्राणानां तदपिनसिध्येदित्याह्नयेनाह॥ महद
हमादयइति॥ महानहंकारश्च आदिर्येषांते यदनुग्रहतः यस्मात्प्रवेशेनलब्धसामर्थ्याः संतः अंडं देहंसमष्टिव्यष्टिरूपंसृष्टवंतः॥ तत्रपंचापिकोशा अन्नमया
दीनाविश्वतत्तदाकाराःसन्नयः वेतयतेसत्वंतदाह॥ पुरुषविधइति॥ पुरुषस्यान्नमयादेर्विधेवविधा आकारोयस्यसतथा॥ ननुचिदेकरसस्यकथंतत्तदाकारता
अतआह॥ अन्नयोगेनेति॥ अन्नएवान्नमयादिषुअन्वेतीत्यन्वयः॥ अतस्तत्तदाकारतेति॥ एवंतर्हिसत्यत्वमसंगत्वंचकथंतत्राह॥ चरमोऽन्नमयादिषूपदिश्यमाने

स्मा

इतयइवश्वसंत्यसुन्वतो यदितेऽनुविधा महदादयोऽंडमसृजन्यदनुग्रहतः॥ पुरुषविधो
न्वयोऽन्नचरमोऽन्नमयादिषु यः सदसतःपरंत्वमथयदेषववशेषमृतं॥ ४॥ २७॥ ॥

षुयश्चरमोऽब्रह्मपुच्छंप्रतिष्ठेति॥ पुच्छत्वेनोक्तः सत्वमितिसंबंधः ननुतथाप्यन्नमयादिष्वन्वितत्वेऽसंगत्वमाहतिरेवतत्राह॥ सदसतःपरंत्वमथयदेषववशे
षमृतमिति सदसतः स्थूलसूक्ष्मादन्नमयादेःपरंव्यतिरिक्तं तस्मात्क्षिन्नूतं अवशेषं अवशिष्यतइत्यवशेषमबाध्यं अथ अतएवऋतंसत्यं॥ तर्हिकिमर्थंतेष
न्वयउक्तः अन्नखाचंद्रवद्बुधस्वरूपलक्षणार्थं॥ तथाहि सवाएषपुरुषोऽन्नरसमयस्तस्येदमेवशिर इत्यादिनास्थूलसूक्ष्मक्रमेणपंचकोशानुपादिश्यतस्यपु
रुषविधतान्वयं पुरुषविधइति॥ पुनःपुनस्तत्तदन्वितत्वेनालक्ष्य ब्रह्मपुच्छंप्रतिष्ठेति। सर्वसाक्षिशुद्धस्वरूपनिरूपणमित्यनवद्यं॥ ४॥ २७॥ नरवपुःप्र
तिपद्ययदितत्वयिश्रवणंवर्णनंसंस्मरणादिभिः नरहरेनभजंति तन्नृणमिदं दृतिवदुच्छ्वसितंविफलं ततः॥ ४॥ २७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. द. उ. एवं तावत्सर्वात्मके परमेश्वरे सर्वश्रुतिसमन्वयेन सद्भजनीयत्वमुक्त्वा अन्यकनिंदया च तदेव दृढीकृत्य इदानीमनवगाह्यमहिम्नि प्रथमं तावदुपाध्यालं-
१०८ बनमुपासनमुपासनमुदरं ब्रह्मेति शार्कराक्षा उपासते हृदयं ब्रह्मेत्यारुणयो ब्रह्मा हैवतां इति ऊर्ध्वं त्वेवोदसर्पत्तच्छिरोऽश्रयत तेषां याश्रुतयो विरधतीत्याह ॥ उ-
दरमुपासत इति ऋषिवर्त्मसु ऋषीणां संप्रदायमार्गेषु ये कूर्पदृशस्ते उदरालंबनं मणिपूरकस्थं ब्रह्मोपासते ध्यायंति शार्कराक्षा इति श्रुतिपदस्य प्रतिप-
दं कूर्पदृश इति कूर्पं शर्करा रजो विद्यते दृक्षु अक्षिषु येषां ते तथा रजःपिहितदृष्टयः स्थूलदृष्टय इति यावत् ॥ उदरस्य हृदयापेक्षया स्थूलत्वात् ॥ यद्वा
कूर्पं सूक्ष्मं सूक्ष्मदृश इत्यर्थः तदा हृदयस्थं सूक्ष्ममेवालक्ष्यत इत्यवेशाय प्रथममुदरस्थमुपासत इति नाकः ॥ आरुणयस्तु साक्षाद्धृदयस्थं द-

उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः परिसरपधतिं हृदयमारुणयो दहरं ॥ तत उ-
दगादनंत तव धाम शिरः परमं पुनरिह यत्समेत्य न पतंति कृतांतमुखे ॥ ५ ॥ १८ ॥ ॥

हरं सूक्ष्ममेवोपासते ॥ हृदयविशेषणं परिसरपधतिमिति ॥ परितः सरंति प्रसर्पंतीति परिसरा नाड्यः तासां पधतिं मार्गं प्रसरणस्थानमित्यर्थः ॥ रम.
विशेषणस्य फलमाह ॥ तत इति ॥ ततो हृदयाद्धेऽनंत तव धाम उपलब्धिस्थानं सुषुम्नाख्यं परमं श्रेष्ठं ज्योतिर्मयं शिरः मूर्धानं प्रति उदगात् ॥ उदसर्प- १०८
त् ॥ मूलाधारादारभ्य हृदयमध्यान् ब्रह्मरंध्रं प्रत्युद्गतमित्यर्थः ॥ कथंभूतं धाम यत्समेत्य प्राप्य पुनरिह कृतांतमुखे मृत्युमुखे संसारे न पतंति तथा
च श्रुतिः ॥ शतं चैका च हृदयस्य नाड्यः तासां मूर्धानमभिनिःसृतैका ॥ तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवंतीति ॥ ५ ॥ १८ ॥ ॥ उदरा-
दिषु यः पुंसां चिंतितो मुनिवर्त्मभिः ॥ हंति मृत्युभयं देवो हृद्गतं तमुपास्महे ॥ ५ ॥ १८ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वीश्वरस्यापि तर्हि जीववत् उदरहृदयादि संबंधे तदनुप्रविष्टस्य च तारतम्ये सति केन विशेषेणोपास्यत्वमिता मामाशंकां परिहरंत्य॥ एको देवः सर्वभू
तेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेत्याद्याः श्रुतयः स्तुवंतीत्याह॥ स्वकृतविचित्रयोनिष्वि
ति॥ स्वयं कृतासु उच्चनीचमध्यमासु योनिषु अग्निमकिस्थानेषु कार्येषु देहादिषु हेतुतया उपादानतया प्रागेव विद्यमानत्वेनानुप्रवेशासंभवाद्वि
शन्निव वर्तमानस्तारतमतोऽल्पत्वाधिकत्वाभावेन चकास्सि अवभाससे॥ स्वकृता योनीस्तु करोतीति स्वकृता अनुकृतिः॥ अनलवत् अग्निर्यथा स्वतस्तारतम्य

स्वकृतविचित्रयोनिषु विशन्निव हेतुतया तरतमतश्चकास्स्यनलवत्स्वकृतानुकृतिः॥ अ
थ वितथास्वमूष्ववितथं तव धाम समं विरजधियोऽन्वयंत्यभिविपन्यव एकरसं॥ ६॥ १९॥ ॥

हीनोपि काष्ठानुसारेण तथा तथा प्रकाशते तद्वत्॥ अथ अतो वितथासु मिथ्याभूतास्वमूषु योनिषु अवितथं सत्यं यतः समम् अविशेषं अतः सत्यं त
व धाम स्वरूपं विरजधियो निर्मलमतयः अन्वयंति जानंति नु इति पृथक्रूपदर्शनाभावे हेतुः॥ अभिविपन्यव इति॥ अभितो विगतव्यवहाराः पणो व्यवहार
इत्यस्य रूपं पन्युरिति॥ ऐहिकामुष्मिकफलकर्मरहिता इत्यर्थः॥ अविशेषत्वादेवैकरसं सन्मात्रं यतस्तवोपाधिकृततारतम्याभावात्॥ अप्रच्युतै
श्वर्यस्योपास्यत्वमिति भावः॥ ६॥ १९॥ ॥ स्वनिर्मितेषु कार्येषु तारतम्यविवर्जितं॥ सर्वानुस्यूतसन्मात्रं भगवंतं भजामहे॥ १६॥ १९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० उ०

१०६

अपि च कुतो नियमाशंका स्यात् तद्भगवतो देहाद्युपाधिकृतदोषप्रसंग इति। यतोऽविद्याकामकर्मभिः संसरतो जीवस्यापि भगवद्भावेन लक्षणया बोध-
यं स स्त्वं दोषं निषेधयति॥ स यश्चायं पुरुषे यश्चासावादित्ये स एकः॥ तत्त्वमसीत्याद्याः श्रुतयः। ननु कृतार्थस्यात्मनः स्तुतिरियमीश्वरत्वेन क्रियते॥ ननु त-
स्येश्वरत्वं बोध्यते॥ नैतद्युज्यते यतस्तत्रयपथोक्तं श्वेताश्वतरोपनिषदि॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशंते महा-
त्मन इत्याद्याः श्रुतयः कृतावतारस्य भगवतश्चरणभजनमुपायं वदंतीत्याह॥ स्वकृतपुरेष्विति॥ स्वकर्मोपार्जितेषु पुरेषु देहेष्वमीषु नराहिंदि-
षूच्चोच्चत्वेन वर्तमानं पुरुषं अखिलशक्तिधृतः सर्वशक्तिमतः यस्य पूर्णस्य तवांशकृतं वदंति अंशोऽयं अंशः कृतः अंश इव कृतः स्वरूपं वदंतीत्यर्थः॥ ननु का-

स्वकृतपुरेष्वमीष्वबहिरंतरसंवरणं तव पुरुषं वदंत्यखिलशक्तिधृतोंऽशकृतं॥ इति
नृगतिं विविच्य कवयो निगमावपनं भवत उपासतेंऽघ्रिमभवं भुवि विश्वसिताः॥ ७॥ २०॥

र्यकारणसंहतस्य कृतत्वेनानृतत्वं तत्राह॥ अबहिरंतरसंवरणमिति बहिः कार्यमंतरं कारणं वस्तुतस्तदावरणं शून्यं तयोरसत्त्वादित्यर्थः
॥ इति एवं नृगतिं नु जीवस्य गतिं तत्त्वं विविच्य विशोध्य कवयः अन्यथेदं न प्राप्यत इति ज्ञातं ततः निगमावपनं निगमोक्तकर्मणामावपनं आसमं-
तादुप्यंतेऽस्मिन्नित्यावपनं क्षेत्रं सर्वकर्मार्पणविषयमित्यर्थः॥ यत्रार्पितानि कर्माणि मुक्तिफलं फलंति॥ तं भवतोंऽघ्रिमभवं भवनिवर्तकं विश्वसि-
ताः कृतविश्वासाः उपासते अर्चनवंदनादिभिः सेवंते॥ भुवीति मर्त्यलोके इदमेवोचितमिति दर्शयति॥ ७॥ २०॥ त्वदंशस्य ममेशान त्वन्मायाकृतबंधनं
॥ त्वदंघ्रिसेवामादिश्य परानंदं निवर्त्तय॥ ७॥ २०॥ ॥

मा१ दि२

राम. १०६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यक्तिरैस्तसाधनमितिवचनमनुचितमिवमत्वा नो भक्तिं गुरुं करोति॥ दुरवगमेति॥ नो ईश्वर दुर्बोधं यदात्मतत्त्वं तस्य निगमाय ज्ञापनाय येत वात्त तनो गृहीत
तनू तेश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः चरितमेवमहामृताब्धिस्तस्मिन्परिवर्त्तो विगाहस्तेन परिश्रमणाः॥ परिवर्जनार्थः श्रमणाः श्रमः गतश्रमा इत्य
र्थः॥ अपवर्गमपि केचित्न परिलषंति नेछंति॥ कुतोन्यत् इंद्रियपदादि॥ केचिदिति॥ एवं भूता नक्तिरसिका विरला इति दर्शयति न केवलमन्यन्नेछंति॥ किंतु तेने
व सुखेन पूर्णाः संतः पूर्वसिद्धं गृहादिषु सुखमप्युपेक्षंत इत्याह॥ तव चरणसरोज हंसकुलसंगविसृष्टगृहा इति॥ तव चरणसरोजे हंसा इव रममा

दुरवगमात्मतत्त्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः॥ न
परिलषंति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसंगविसृष्टगृहाः॥ ठ॥ २१॥ ॥

णायेनक्तास्तेषां कुलं तेन संगस्तेन विसृष्टाः गृहा यैस्ते तथा॥ अनेन श्रवणकीर्तनं प्रदर्शितं स्तुतिश्च सुकेरप्याधिक्यं नके दर्शयति॥ यथा वयं हरिस
वेदेवानमतिमुमुक्षवो न्नास्मवादिनश्चेति॥ मा रमात तंच सर्वज्ञैर्निर्गण्यहृद्भिः मुक्ताअपि लीलया विग्रहं हलान जंत इति॥ ठ॥ २१॥ लत्कथामृतपाथो
धौ विहरंतो सुहामुदःकुर्वंति हृतिनः केचिच्चतुर्वर्गं तृणोपमं॥ ठ॥ २१॥ आत्मानमस्य पश्यंति तं न पश्यंति कुश्च न॥ न तं विदाथ य इमा जजानान्य युष्मा
कमतरंबभूव नीहारेण प्रावृता जल्पा चासुतृप उक्थशासश्चरंति इत्याद्याः श्रुतयः अनुक्तौ इंभो जगदात्मनीश्वरे रतिमुपदिशंतीत्याह॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰उ॰

११०

त्वदनुपथमिति॥त्वदनुवर्त्तित्वात्त्वत्सेवोपयिकमिदंकुलायंनीडीयतइतिकुलायंशरीरं॥आत्मसुहृत्प्रियवत्॥आत्मावत्सुहृच्चप्रियश्चतद्वच्चरति
स्वाधीनतयावर्त्ततइत्यर्थः॥तथात्वयिउन्मुखेहितेप्रियेआत्मनिचअप्यर्थेचकारः॥एवंभूतेसुसेव्येपित्वयिवतअहोकष्टंनरमंतिनसक्तादिनाजनं
तिअसदुपासनयादेहाद्युपलालनेनआत्महनःप्रमादिनःकुतःयदनुशयाःयस्यामसदुपासनायांअनुशयोवासनायेषांतेकुशरीरभृतःसंतःउरु
भयेसंसारेभ्रमंतिपरिवर्त्ततेअतआत्महनइतिभावः॥१०॥२२॥त्वमात्मानिजगन्नाथेमन्मनोरमतामिह॥कदाममेदृशंजन्ममानुषंसंभविष्यति॥१०॥
२२॥इदानीमात्मावात्वारेदृष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यइत्याद्याःश्रुतयोध्यानमंगलेनोपदिशंतीत्याहु॥निभृतमरुन्मनोक्षदृढयोगयुज

त्वदनुपथंकुलायमिदमात्मसुहृत्प्रियवच्चरतितथोन्मुखेत्वयिहितेप्रियआत्मनिच॥नवतरमंत्यहो[illegible]दुपासनयात्म
हनोयदनुशयाभ्रमंत्युरुभयेकुशरीरभृतः॥१०॥२२॥निभृतमरुन्मनोक्षदृढयोगयुजोहृदियन्मुनयउपास
तेतदरयोपियियुःस्मरणात्॥स्त्रियउरगेंद्रभोगभुजदंडविषक्तधियोवयमपितेसमाःसमदृशोंघ्रिसरोजसुधाः॥१०॥२३॥ राम॰

इति॥मरुत्प्राणःमनश्चअक्षाणींद्रियाणिचनिभृतानिसंयमितानियैस्तेचतेदृढंयोगंयुंजंतीतिदृढयोगयुजस्तेतथाभूतामुनयोहृदियत्त्वामुपासतेतदरेवार ११०
योपितवस्मरणात्ययुःप्रापुःस्त्रियोपिकामतउरगेंद्रभोगभुजदंडविषक्तधियःअहींद्रदेहसदृशायोर्भुजदंडयोर्विषक्ताधीर्यासांताःपरिछिन्नदृष्टयः॥सम
दृशःसममपरिछिन्नत्वांपश्यंतोवयंश्रुत्यभिमानिन्योदेवताश्चापितेसमाः॥एवंरूपाविषयतयाअंघ्रिसरोजसुधाःअंघ्रिसरोजंसुष्ठुधारयंत्यःअयं
भावः।इत्थंभूतेस्तवस्मरणानुभावःयेयोगिनस्त्वांहृदयोवलंबनंउपासतेयाश्चवयंतांसमंपश्यामःयाश्चस्त्रियःकामतःपरिछिन्नंध्यायंति॥येच
द्वेषिणःसर्वानपितांस्त्वामेवप्रापयंतीति॥१०॥२३॥चरणस्मरणंप्रेम्णातवदेवसुदुर्लभं॥यथाकथंचिन्नृहरेममभूयादहर्निशं॥१०॥२३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म

यतो वाचो निवर्तंते अप्राप्य मनसा सह॥ को अद्धा वेद क इह प्रावोचत्॥ कुत आ जाता कुत इयं विसृष्टिः अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव॥
अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्शत्॥ तद्धावतोऽन्यानत्येति तिष्ठत् तस्मिन्नपो मातरिश्वा दधातीत्याद्याः श्रुतयो भगवन्तं दुर्ज्ञेयं वदंत्यो न कि-
मेवोररीकुर्वंतीत्याह॥ क इह नु वेदेति॥ बत अहो भगवन् इह जगति अग्रसरं पूर्वसिद्धं त्वां अवरजन्मजनः अर्वाचीनोत्पत्तिविनाशवान्॥ को नु पुमान् वेद जा-
नाति॥ ईश्वरस्य पूर्वसिद्धत्वं तस्य चार्वाचीनत्वे प्रमाणं वदन् ज्ञानकारणाभावमाह॥ यत उदगादिति॥ यतः त्वत्तः ऋषिर्ब्रह्मा उत्पन्नः॥ यं ब्रह्माणमनु उभये
अध्यात्मिकाधिदैविका देवगणा उत्पन्नाः॥ ततोऽप्यर्वाचीनाः सर्वे॥ यदा तु भवान् सर्वमवकृष्य उपसंहृत्य शयीत तर्हि तदा अनुशयिनां जीवानां ज्ञानसा-

क इह नु वेद बतावरजन्मलयोऽग्रसरं यत उदगादृषिर्यमनु देवगणा उभये॥ तर्हि न
सन्न चासदुभयं न च कालजवः किमपि न तत्र शास्त्रमवकृष्य शयीत यदा॥१०॥ २४॥

धनं नास्ति॥ यतः तदा न सत् स्थूलं आकाशादि न चासत् सूक्ष्मं महदादि॥ न च उभयं सदसद्भ्यामारब्धं शरीरं न च कालजवः तन्निमित्तभूतं कालवैषम्-
म्यं एवं सति तत्र तदा न किमपि इंद्रियप्राणाद्यपि॥ न च ज्ञापकं शास्त्रमपि अयमभिप्रायः॥ अवकृष्य सृष्टिगतानां देहाद्युपाधिकृतान्तरायाणां जीवानां
कालवशेन च मलिनसत्वानां न तावद्भगवज्ज्ञानसामर्थ्यं तथा च श्रुतिः॥ न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव॥ इत्याद्याः श्रुतयः यदा तु
प्रलयसमये न बकंतरमस्ति॥ तदापि साधनाभावान्न भगवज्ज्ञानं॥ अतस्त्वमेवैकः शरणं तथा श्रवणकीर्तनादिभक्तिरेव सुकरेति॥१०॥२४॥ ॥
क्वाहं बुध्यादिसंरुद्धः क्व च भूमन्महस्तव॥ दीनबंधो दयासिंधो भक्तिं मे नृहरे दिश॥१०॥२४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृतिं

मो॰द॰उ॰ इतोपि नज्ञानं सुशकं उपदिशातामपि न्नमबाकुलादिस्पाकुः जनिमसत इति॥ असतो जगतो जनिमुत्पत्तिं ये वैशेषिका वदंति॥ सत एव ब्रह्मतस्यो
१११ त्पत्तिं ये च पातंजलादयः॥ सत एवैकविंशतिप्रकारस्य दुःखस्य नाशं मोक्षं वदंति॥ ये नैयायिकाः॥ उत अपि ये च सांख्यादयो आत्मनि नित्यं दांते दंये च मीमांसकाः
॥ विपरणं कर्मफलमव्यवहारमृते तस्य स्मरंति वदंति॥ ते सर्वे आरूपितैरारोपितैः अभिरेवोपदिशंति न तत्त्वदृष्ट्या स देवेत्याद्यास्तर्वाः समाधानमसुत्तरन्नूताः
पूर्वोक्तमतनिराकरणभूतपः॥ सदेव सौम्येदमग्र आसीद् ब्रह्मैव सन् ब्रह्माप्येति॥ अनीशया शोचति मुह्यमानः॥ अविद्यायामंतरे वर्तमानाः स्वयं धीराः पं
जघन्य डितं मन्यमानाः जंघन्यमाना अपियंति मूढाः॥ अंधेनैव नीयमाना यथांधाः॥ एकमेवाद्वितीयं ब्रह्म एक एव हि भूतात्मा भूते भूते व्यवस्थितः॥ एकधा बहुः

जनिमसतः सतो मृतिमुतात्मनि नित्ये चानित्यं विपरणमृते स्मरंत्युपदिशंति तआरूपितैः॥ त्रि
गुणमयः पुमानिति निदाय दबोध हृतात्वयि न ततः परत्र सन्नवेदवबोधरसे॥१२॥ २५॥

रम॰ धाचैव दृश्यते जलचंद्रवत्॥ इत्यादिश्रुतिविरोधात्॥ किंच वस्तुतः पुरुषस्य त्रिगुणमयत्वे सर्वमपि दंसंगच्छेत॥ न तु तद्वस्तीत्याह॥ त्रिगुणमयः पुमा
१११ निति निदाय स्वबोधहृतात्वयि इति॥ त्रिगुणमयः पुमानित्यनेन हेतुनायाचिराउपलक्षणमेतज्झिदाहि॥ सायस्मात्त्वयि विषये अबोधहृतात्वद्विषया
ज्ञानविजृंभिता॥ तर्हि किमज्ञानमस्ति वस्तुतः पुंसि नैवेत्याह ततः अबोधात्परत्र परे असंगे स्वबोधरसे ज्ञानघने सत्त्व अबोधोन नवेत॥ न संभवतीत्य
र्थः॥ मिथ्यातर्कसुकर्कशेरितमहावादांधकारांतरे भ्राम्यन्मंदमतेरमंदमहिमं स्वज्ञानवर्त्मास्फुटं॥ श्रीमन्माधववामनत्रिनयनश्रीशंकरश्री
पतेगोविंदेतिमुरावदन्मधुपतेमुक्तः कदास्यामहं॥१२॥ २५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु प्रपञ्च सत्त्वोत्पद्यते परिच्छिन्नगुणमयः॥ पुरुषो न भवति॥ अहो इदं प्रपंचजातं पुरुषस्य पृथक्त्वात्कथं तस्मात्॥ कथं तर्हि तयोः सत्त्वे न प्रतीतिरत आह
॥सदिव मनस्ति॥ मनः मनोमात्रविलसितमिदं त्रिवृत्तगुणात्मकं प्रपंचजातमसदेव सदिव विभाति॥ कथमिति चेत्त्वाह त्वयीति॥ तदधिष्ठानेः मिथ्या तस्य सत्तया
सद्वत्प्रतीयत इत्यर्थः॥ न केवलमिदं कारामं इदं त्वस्मै किं तु आमनुजात॥ मनुजः पुरुषः अभिविधावाक्या ऽपुरुषमभिव्याप्येति॥ पुरुषस्यापि पृथक्सत्वप्रती
मा तिर्मायात्त्रिविलसितेत्यर्थः॥ तथाचश्रुतिः॥ असतो धिमनो सृजत मनः प्रजापतिमसृजत प्रजापतिः प्रजा असृजत तद्वा इदं मनस्येव परमं प्रतिष्ठितं यदिदं
किंचेति॥ न त्वात्मविरामपि विश्वं सदेव स्फुरति॥ अतः कथमसत्यादतस्त्वाह सदभिमृशंतीति॥ आत्मविदस्त्वशेषमिदं नो कुत्रोगात्मकं विश्वमात्मतयैव

सदिव मनस्त्रिवृत्त्वयि विभात्यसदामनुजात्सदभिमृशंत्यशेषमिदमात्मतयात्मविदः॥
नहि विकृतिं त्यजंति कनकस्य तदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयावसितम्॥१३॥२६॥

सदभिमृशंतीति सदिति जानंति॥ आत्मा कार्यत्वान्न पृथगित्यर्थः॥ तथाहि यदुपादानं यत्कार्यं भवति तत्तेनैव रूपेणाप्रतीयते॥ उपादीयते चेति लो
काचारेणादर्शयति॥ नहि विकृतिमिति कनकस्य विकृतिं कुंडलादिकं कनकार्थिनो न हि त्यजंति॥ अत्र हेतुस्तदात्मतया कनकरूपत्वेनेत्यर्थः॥ अतः
स्वकृतमिदं विश्वं अनुप्रविष्टं च पुरुषमिति कनकस्य विकृतिं कुंडलादिकं कनक पुरुषरूपमात्मतयैवावसितं निश्चितं॥१३॥२६॥ यस्मात्त्वतः सदा
भाति जगदेतदसस्त्वतः॥ सदाभासमसत्यस्मिन्भगवंतं भजामहे॥१३॥२६॥॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० उ०
११२

ननु सत्यं ज्ञानमनंतं ब्रह्म नेह नानास्ति किंचन ॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ इत्यादिश्रुतिभिरेवं भूतस्य जगतः प्रतिपादनात् ज्ञानं सुक
रमेवेति चेत्तत्राह । हे अनवरत वपरि ये चरंतीति तवेति कर्मणि षष्ठी । त्वां ये परिचरंति छंदसि व्यवहिताश्चेति यच्छब्देन अवधानमदोषः केन रूपेण अखिल
सत्त्वनिकेततया । अखिलानि सत्त्वानि निकेतो यस्य सः तथा तस्य भावस्तत्ता तया सर्वभूतावासतयेत्यर्थः ॥ उत एवञ्चावगणय्यातिरस्कृत्य तत एव निकृत्तमृत्योः शि
रस्सु अर्पितं पदाघातेनाक्रमंति मृत्योर्मूर्ध्नि पदं रधतीति तरंति सुखमंत इत्यर्थः ॥ ये पुनर्विमुखाः अन्यकास्ते न गिरा नावा पशूनिव विबुधानपि प
रिवयसे बध्नासि कृतस्त्वयि हृतसौहृदास्त्वयि हृतं सौहृदं प्रेम यैस्ते खलु निश्चितं पुनंति पवित्रयंति ॥ आत्मानं अन्यानपीति शेषः ॥ नेतरे तथा वक्ष

तव परि ये चरंत्यखिलसत्त्वनिकेततया त उत पराक्रमंत्यविगणय्य शिरो निर्ऋतेः ॥ परिवय
से पशूनिव गिरा विबुधानपि तांस्त्वयि हृतसौहृदाः खलु पुनंति न ये विमुखाः ॥१४॥२७॥ रा० स०

तिः ॥ तस्य वाक्यं तिर्नामानि दामानि ॥ तदस्मै देवा वाचा तंत्यानामसनि दर्मसनिः सर्वं सितमिति ॥ अयमभिप्रायः सत्यमेवंभूतमात्मानं श्रुतयः प्रतिपादयं ११२
ति तत्र च यद्यपि वस्तुतोऽपरोक्षत्वादपरोक्षमेव ज्ञानमुत्पद्यते ॥ तथाप्यसंभावनाविपरीतभावनाभ्यां तिरस्कृतत्वात्तन्मलिनचित्तेषु परोक्षमिव भातीति ना
परोक्षसंसारभ्रमनिवृत्तिसमर्थं भगवत्परिचर्यया तु सम्यग्गमलरहितचित्तानां तत्प्रसादेन लब्धापरोक्षज्ञानानामयत्नत एव करकलितो मोक्ष इति तथा
श्रुतयः देहांते देवः परं ब्रह्म तारकं व्याचष्टे यमेवैष वृणुते तेन लभ्यः ॥ यस्य देवे परा भक्तिरित्यादयः ॥१४॥२९॥ पतंतु तापैः प्रतपंतु पर्वतादटंतु ती
र्थानि पठंतु चागमान् यजंतु यागैर्विविदंतु योगैः हरिं विना नैव मृतिं तरंति ॥१४॥२८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु यद्यखिलसत्वनिकेतत्वेन भगवतः सेमत्वमुच्यते तर्हि तत्करणसंबंधात्कर्तृणोकत्वे प्रसक्तेतो॥ न वस्तुतस्तथात्वमिति चेत्॥ तर्हि जीवानामपि तत्तुल्य
मितिकेन विशेषेण पुनः सेमसेवकत्वमिति मामाशंकां परिहरंत्यच्छपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः सशृणोत्यकर्णः॥ स वेत्ति वेद्यं न च तस्य वे
त्ता तमाहुरग्र्यं पुरुषं पुराणमित्याद्याः श्रुतयस्त्वं तीत्याकूतः॥ त्वमकरण इति॥ करणसंबंधरहितः वाखिलकारकशक्तिधरः॥ अखिलानां प्राणिनां
यानि कारकानि इंद्रियाणि तेषां शक्तीर्धारयतीति प्रवर्तयतीति तथाकूतः स्वराट् यतः स्वेनैव राजसे दीप्यसे न हि स्वतः सिद्धज्ञानशक्ते रिंद्रियापेक्षेत्य
र्थः॥ अतस्त्व बलिमुद्वहंति पूजां कुर्वंत्यजयाः विद्यया सहितास्तया हृताद्यर्थः॥ अनिमिषा देवाः इंद्रादयः तत्स्रष्टा विश्वसृजो ब्रह्मादयो

त्वमकरणः स्वराडखिलकारकशक्तिधरस्तव बलिमुद्वहंति समदंत्यजयानिमिषाः॥ वर्ष
भुजोऽखिलक्षितिपतेरिव विश्वसृजो विदधति यत्र ये त्वधिकृता भवतश्चकिताः॥१५॥ २८॥

पि यथा सल्लीकाएवाकिंकराः स्वामिनं सेवंते॥ तथा विद्यायुक्ता देवादयस्त्वामिति लोकोक्तिः॥ समदंतीति च मनुष्यैर्दत्तं हुमकर्मादिलक्षणं बलिं
नस्सपंति॥ अत्र दृष्टांतः॥ वर्षभुजोऽखिलक्षितिपतेरिवेति यथा वर्षभुजः खंडमंडलपतयोऽखिलक्षितिपतेर्महामंडलेश्वरस्य सम्राजा दत्तबलिभुजो
बलिं उद्वहंति तद्वदिति॥ कथं बलिमुद्वहंतित दाह॥ विदधतीत्यत्र ये त्वधिकृता भवतश्चकिता इति त्वन्नोनीताः संतो यस्मिन् कर्माणि येति युक्तास्ते
तत्कुर्वंतीति त्वदाज्ञापालनमेव बलिवहनमित्यर्थः॥ तथा च श्रुतिः॥ भीषास्माद्वातः पवते भीषोदेति सूर्यः॥ भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति
पंचम इति॥ २८॥ १७॥ २७॥ अनिंद्रियोपि यो देवः सर्वकारकशक्तिधृक्॥ सर्वज्ञः सर्वकर्ता च सर्वसेव्यं नमामि तं॥१५॥ २८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰उ॰

११३

तदेवंकरणेऽनुवर्त्तकमीश्वरं करणपरतंत्रानराजंतिस्तुकं नकेवलमियदेवकारणं ततउत्पन्नत्वेनापितत्पर तंत्रत्वादितिवदंतियथाग्नेः क्षुद्रा
विस्फुलिंगाव्युच्चरंति॥ एवमेवास्मादात्मनः सर्वेप्राणाः सर्वेलोकाः सर्वेदेवाः सर्वाणिभूतानिसर्वएतआत्मानोव्युच्चरंतीत्यादिश्रुतयः इत्याहस्थिरच
रजातयइतिहेविमुक्तनित्यमुक्तपर्यटितवाजयामाययाविहरः विहारः क्रीडाभवति॥ तदास्थिरचरजातयः स्थिराश्चचराश्चजातयजात्यालिंगितादे
हायेषांतेजीवाः स्युः भवेयुः॥ कथंभूतस्यततः अजातः परस्परं वर्त्तमानस्यासंगस्येत्यर्थः॥ कथंविहारः उदासीनयाईक्षणलेशेननतनुम
यिनीनानोजीवानांकथंजन्मस्यात तत्राह॥ उत्पत्तिनिमित्तयुजः इतिईक्षयैवोत्थितानि आविर्भूतानिनिमित्तानिकर्माणितद्युक्तानिलिंगशरी

परोन

स्थिरचरजातयः स्युरजयोत्थनिमित्तयुजो विहर उदीक्षया यदि परस्य विमुक्त ततः॥ न
हि परमस्य कश्चिदपरो न परश्च भवेद्वियत इवापदस्य तव शून्यतुलां दधतः॥१६॥२२॥ ॥

राम॰

रीराणिवातेस्युर्जंतवइति तेतथाननु किंनिमित्तोऽस्यातेनमदिक्षयाख आविर्भवंतु नतथापि वैषम्यान्नावात॥ विषमसृष्टेरयोगात इत्याहपरम
स्येतितवपरमस्यपरमकारुणिकस्यविमतइव आकाशस्य समस्येत्यर्थः॥ कश्चिदपरः स्वीयश्चनभवेत्॥ नसंभवंतीत्यर्थः॥ असद्वाइदमग्र स्वीयः पा॰ ११२
आसीत ततोवैसदजायतेत्यादिश्रुत्याशून्यपूर्वकत्वमिवप्रतीयतेतदर्थंपुनर्विशिनष्टि॥ शून्यतुलांदधतः॥ शून्यसाम्यंभजतः तदेवदर्श
यितुंपुनर्विशिनष्टि अपदस्येति॥ नपद्यतेइत्यपदस्तस्यवाङ्मनसयोरगोचरस्येत्यर्थः॥१६॥२२॥ त्वदीक्षणावरासोत्रमायाबोधितकर्म
भिः॥ जातान्संसरतः खिन्नान्हरेपाहितः पितः॥१६॥ २२॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं तावत्परमात्मनः सकाशात् अविद्यावृतकार्योपाधयस्त्वंशा एव जीवा जाताः संसरंतोऽनंतीत्युक्तम्॥ तत्र यद्येकाविद्या तदा जीवस्याप्येकत्वादे
कमुक्तौ सर्वमुक्तिप्रसंगः॥ अथ नानाविद्यास्तर्हि तस्यैव ब्रह्मांशांतरेण संसारानपगमादनिर्मोक्ष इत्यादितर्कबलेन वस्तुत एव नानात्मानस्तत्र च ते यद्यणु
त्वे देहव्यापि चैतन्यं न स्यात्॥ देहपरिमाणत्वे च मध्यमपरिमाणत्वेन सावयवत्वे नानित्यत्वं स्यात्॥ अतः सर्वगता नित्याश्चेति केचन मन्यंते तन्न तत्राह उक्त

॥ अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति नियमो ध्रुव नेतरथा॥

दोषप्रसंगः॥ अविद्याभेदेन तद्भक्तिभेदेन चोक्तमवस्थासंभवात्॥ ईश्वरस्य तु न केनापि अंशेन संसारशंका इत्युक्तमेव प्रसिद्धं चात्मैक्यं
सर्वश्रुतिषु किंच॥ इमं परमंतर्यामिब्राह्मणमपि न संगच्छत इत्याह॥ अपरिमिता इति॥ वस्तुत एव अनंता ध्रुवास्ते नैव रूपेण नित्याः सर्वगताश्च
तनुभृतो जीवा यदि स्युस्तर्हि तेषां समत्वात् शास्यता न घटत इति हत्वा ध्रुव नियमो नियमनं त्वया न स्यात्॥ इतरथा तु घटत इति कथं यन्मय उपाधि

बत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचलस्य ज्ञानस्य दुष्टतया दोषश्रवणात्

गो॰ द॰ उ॰ तो यद्विकारस्य प्राप्य जीवात्मं अजनिज्ञातं तत्तस्य स्वविकारस्य नियंतृ निपामकं भवेत॥ अविमुच्यकारणं तया अपरिलुप्य कितं तस्य सममनुस्मृ
११४ तं न नु किं यत्तच्छ्रैः ज्ञायिते चेदुच्यताऽऽइदं तदिति अत आह॥ अनुज्ञानतां पदमतमिति जानीमः इति वेद तां यदमतमविज्ञातप्राप्यं अविषयत्वात्तत्
थाच श्रुतिः॥ यस्यामतं तस्य मतं मतं यस्य न वेद सः अविज्ञातं विजानतां अवचनेनैव प्रोवाच स ह तूष्णीं बभूवेत्यादि॥ किंच मतस्य ज्ञातस्य दुष्टत

॥ अजनिचयन्मयं तद्विमुच्यनियंतृ नवेत्सममनुजानतां पदमतं मतदुष्टतया॥ १६॥ ३०॥ ॥

पादोषश्रवणात्॥ तथाच श्रुतिः॥ यदिमस्मिन्सुखे देति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं यदस्य त्वं यदस्य देवेष्वथ नु इत्यादि॥ तस्माद्यत्र दुष्टा राम॰
वद्योत्तमत कोंकिमपि सर्वानुस्मृतत्वेन संनियंतृ नवेदित्यर्थः॥ १६॥ ३०॥ अखंतं न यंता सर्वलोकस्य गीतः श्रुत्यासु त्वा चैवमेवावसेयः॥ यः सर्वज्ञः सर्व ११४
शक्तिर्नृसिंहः सोऽस्मिन् मंतं तं चेतसैवावलंबे॥ १६॥ ३०॥ ॥ वेदेषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु यदि परमात्मनो जीवा जायंत इतीति येत्त नियमस्त्वावदुच्यते॥ तथा सति जीवानामनित्यत्वप्रसंगेन प्रतिदिनं कृतनाशाकृताभ्यागमप्रसंगः स्या
त्॥ किंच तदा मोक्षो नाम जीवस्य स्वरूपहानिरेव स्यात्॥ न चैतद्युक्तं स्वप्रकाशानंदात्मनो विद्याकृतानर्थनिवृत्तिमात्रस्य मोक्षत्वाभ्युपगमादित्यारि त्या
ह्यौकोपाधिजन्मनैव जन्म जीवानामुच्यते॥ न स्वतो घटनादित्याह॥ न घटत इति॥ तन्न किं प्रकृतेर्जीवरूपेणोद्भवः स्यात्॥ पुरुषस्य वा उभयोर्वाद्ये
जीवानां जडत्वापत्तिः द्वितीये पुरुषस्य विकारित्वप्रसंगः॥ अत एव न तृतीयः इत्याशयेनोक्तं॥ प्रकृतिपुरुषयोरुद्भवो न घटत इति॥ श्रुत्या उक्तप्रतिपाद
नादपीत्याह॥ अजयोरिति॥ तथा च श्रुतिः॥ अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा जनयंतीं सरूपां॥ अजो ह्येको जुषमाणोनुशेते जहात्येनां भु

न घटत उद्भवः प्रकृतिपूरुषयोरजयोरुभययुजा भवंत्यसुभृतो जलबुद्बुदवत्॥ ॥

क्तभोगामजोन्य इति॥ उभययुजा तु भवंतीत्युभयं च तत्त्वयुक्तमिति युक्तसंबंधं परस्पराध्यस्तमिति यावत् तेन असुभृतः प्राणा उपाधयो जी
वा जायंते इत्यर्थः॥ जलबुद्बुदवदिति॥ यथा केवलेन जलेन वा अनिलेन वा जलबुद्बुदा न भवंति किंतु मिलिताभ्यां तद्वत् तत्र च यथा अनिलो निमित्तं जलमु
पादानं एवमत्रापि प्रकृतिर्निमित्तं पुरुष उपादानं तस्माद्वा एतस्मादात्मन आकाशः संभूतः सोकामयत बहु स्यां प्रजायेयेति यथाग्नेः क्षुद्रा विस्फुलिंगाः
व्युच्चरंत्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मनो व्युच्चरंतीत्यादिश्रुतिषु चेतनाचेतनप्रपंचस्य व्यु
लिंगाः व्युच्चारे स्य परमात्मोपादानत्वश्रवणात् तत्र च विकारित्वं परिणामा॥ ॥

एहस्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰
११५

नंगीकाराकेचित्तुतः परिणाममंगीकृत्यात्मनोविकारनियाविपरीतंतंनिमित्तोपादानत्वावमिच्छंतिसर्वथातावत्स्मद्मतिपुरुषैक्याद्भवतीतिसिद्धं॥त
देकमेवाद्वितीयंब्रह्मञ्जजामेकोऽविनाशीवाअरेयमात्मेत्यादिश्रुतिबलात्तउत्पत्तिश्रवणाच्चजीवानामौपाधिकमेवजन्मनस्वतइत्युक्तं॥उपा
धिलयेनपरमात्मनिपुनर्लयश्रवणादपित्वास्त्ववंजन्मेत्साहलयितइति॥लयिकारणात्मतितइमेजीवास्ततइतियतोनवास्तवंजन्मतस्मादिविध
नि नामगुणैरनेकप्रकारकार्योपाधिभिःसहलिनुलीनावच्छ्नृत्तुः॥तत्रसुषुप्तिप्रलयपयोर्मधुन्यशेषरसाइवलीयंतेयथामधुनिकलक्कसुमरसावि स
शेषतोनुपलभ्यमानाअपिसामान्येनोपलभ्यंते॥एवंस्वापादौविशेषमात्रलया॥कारणस्यविद्यमानत्वात्सामान्यतोवर्त्तंते॥सुक्तौतुकारणस्या

त्वयितदमेततोविविधनामगुणैःपरमेसरितइवार्णवेमधुनिलिल्युरशेषरसाः॥१७॥३१॥ ॥

पिलयात्॥त्वयिपरमेनिरुपाधौसरितइवार्णवेलीयंतइतिविवेकः॥तथाचश्रुतयः॥यथासौम्यमधुमधुकृतोनिस्तिष्ठंतिनानात्ययानांवृक्षाणांरसा प्र राम॰
समवहारमेकतांगमयंतितेयथातत्रविवेकंनलभंतेऽमुष्याहंवृक्षस्यरसोस्मीत्येवमेवखलुसौम्येमाःसर्वाःप्रजाःसंतिसंपद्यनविदुःसतिसं ११५
पद्यामहइतियथानद्यःस्यंदमानाःसमुद्रेस्तंगच्छंतिनामरूपेविहायतथाविद्वान्नामरूपाद्विमुक्तःपरात्परंपुरुषमुपैतिदिव्यमित्याद्याः॥१७
॥३१॥ ॥यस्मिन्नुद्यद्विलयमपियज्ञातिविश्वंलयादौजीवोपेतंगुरुकरुणयाकेवलात्मावबोधे॥अत्यंतांतंव्रजतिसहसासिंधुवत्सिंधुमध्ये
मध्येचित्तंत्रिभुवनगुरुंभावयेतंनृसिंहं॥१७॥३१॥ ॥

नि स्थिवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं तावत्परमेश्वरात् जीवा जायंते तेतद्वशेन च कर्माणि कुर्वंति॥ पुनस्तत्त्वलीपंतद्धतिसंसारचक्रे भ्रमणमुक्तं॥ इदानीं तत्त्रिविष्टत्रपेपरीतलोकान्परी
त्यक्तानीपरित्यसर्वाः प्रदिशोदिशश्च॥ उपस्थायप्रथमजामृतस्यात्मनात्मानमभिसंविवेशेत्यात्मानं गवद्तुष्टिं विदधतीत्याह॥ नषुतवेति॥ नषु जी
वेषमीषुतवमायया भ्रमसुक्कालस्त्राम्भवगत्यज्ञात्वा सुधियः कृशलमपि भवनेभवतिवर्त्तके नावं स्वभावमतुष्टिं विदधति कुर्वंति अनुप्रभवं अत्वनु
प्रजवोयस्मिन् तंजन्मं॥ ततः किमतआह॥ कथमिति अनुवर्त्तंतो अनुवर्त्तमानानात्मामेवशरणं जजंतां नर्वेषसंसारजन्यं कथं नेतर कुर्यंचिदपीस

नषु तवमाययाभ्रममभीष्ववगत्य नृशंसमपि सुधियो भवे दधति भावमनुप्रभवं॥ कथमनुव
र्त्तितां भवजनयेतवयपङ्क्तिः सृजति सुरुस्मिणि मिरन्नवच्छरणेषु जपं॥ १७॥ ॥३२॥ ॥

र्थः॥ कुतः यद्यस्मात् भवन्नकृतिः जगद्रूपस्थितेनिमित्ति तेमयद्वावच्छेदकाशीतोभवर्षकालाय स्मसंवत्सरात्मकस्य कालस्य सः अनच्छ
रणेषुजनवांच्छरणं राशितायेषांते भवजनये जन्ममरणादिलक्षणं सृजति करोति अतएवं भूतेसंसारमाकलय्य तत्त्रिहत्त्वये सुधियस्त्वयि भावं
दधतीति॥ १७॥ ३२॥ संसारचक्रककचेविदीर्णमुदीर्णनानाभवतापतप्तं॥ कथंचिदापन्नमिहप्रपन्नं त्वामुद्धरश्रीनृहरे नृलोकं॥ १८॥ ३२॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना. द. उ.

११६

स च न भवति नावो मनोतियमेसति सोपि गुरूपसदनादिति गुरूपसदनं विदधति तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्॥ समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं॥ आचार्यवान्पुरुषो वेद नैषा तर्केण मतिरापनेया॥ प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठेत्याद्याः श्रुतयः॥ इत्याह॥ विजितहृषीकवायुभिरिति। विजितानि हृषीकाणींद्रियाणि वायुश्च प्राणो यैस्तैरपि अदांतमनस्तुरंगं अदांतमदमितं मन एव तुरगः दुर्दमत्वसाम्यात्॥ तं ये यं तुं नियंतुं यतंति प्रयतंते अतिलोलमतिचंचलं गुरोश्चरणौ समवहाय अनाश्रित्य उपाये षु खिद्यंते क्लिश्यंतीत्युपायखिदः संतः व्यसनशतान्विताः बहुव्यसनाकुलाः इह संसारसमुद्रे संति

विजितहृषीकवायुभिरदांतमनस्तुरगं य इह यतंति यंतुमतिलोलमुपायखिदः॥ व्यसनश-
तान्विताः समवहाय गुरोश्चरणं वणिज इवाज संत्यकृतकर्णधरा जलधौ॥१९॥ ३३॥ ॥ ॥

तिष्ठंति दुःखमेव प्राप्नुवंतीत्यर्थः॥ हे अज अकृतकर्णधरा अस्वीकृतनाविकाः वणिजो यथा तद्वत्॥ उक्तं च॥ नृदेहमाद्यं सुलभं प्लवं सुकल्पं गुरुकर्णधारं॥ मयानुकूलेन नभस्वतेरितं पुमान्भवाब्धिं न तरेत्स आत्महा॥ प्राकृतैः संस्कृतैः श्लोकैर्वा गद्यपद्याक्षरैस्तथा॥ देशभाषादिभिः शिष्यं बोधयेत्स गुरुः स्मृतः॥ गुरुणोपदर्शितभगवद्भजनसुखानुभूतौ तु स्वत एव मनो निश्चलं भवतीति भावः॥२४॥ यदा परानंदगुरो भवत्स्वदे पदं मनो मे भगवल्लग्नेनं तदा निरस्ताखिलसाधनश्रमः श्रयेय सौख्यं भवतः प्रपातः॥२०॥ ॥

सुदुर्लभं

रम. ११६

परीक्ष्य लोकान्कर्मचितान्॥ ब्राह्मणो निर्वेदमायात्॥ नास्त्यकृतः कृतेन तथा यदा सर्वे प्रमुच्यंते॥ कामा येस्य च हृदि स्थिताः अथ मर्त्योमृतो भवत्य
त्र ब्रह्म समश्नुत इत्याद्या वैराग्यमंगं विदधती त्याह॥ ॥स्वजनसुतेति॥ ॥ आत्मा देहः धाम गृहं असुः प्राणाः स्वजनादिभिः किं सर्वरसे सर्वे रसाः सुखानि
विद्यंते यस्मिन् तस्मिन् त्वयि परमानंदे॥ एतस्यैवानंदस्यान्यानि मात्रामुपजीवंतीति श्रुतेः॥ श्रयतः तां सेवमानस्य पुंसः आत्मनि सति नृणां तु
च्छैरेतैः किं क उपयोगः॥ इति समस्तस्य परमार्थसुखम जानतां अत एव मिथुनतः स्त्रिया मिथुनीभूय रतये मायासुखाय चरतां वर्तमानानां कर्मीणि

स्वजनसुतात्मदारधनधामधरासुरथैस्त्वयि सति किं नृणां श्रयत आत्मनि सर्वरसे॥ इति
सदजानतां मिथुनतो रतये चरतां सुखयति को न्विह स्वविहते स्वनिरस्तभगे॥ २१॥ ३३॥ ॥

पश्चौ अजानतश्चरतः पुरुषान्को नु अर्थः॥ सुखयति आनंदयति न कोपीत्यर्थः॥ इह संसारे कथंभूते स्वविहते स्वत एव नश्वरे॥ स्वतिरस्तभ
गे स्वत एव गतसारे॥ निरस्तभगवद् इति पाठांतरे तु कोन्वित्यस्यैतद्विशेषणद्वयं अतस्त्वद्भजनमेवोचितमित्यर्थः॥ २१॥ ३३॥ न जतो हि भवान्न सा
क्षात्परमानंदविग्रहतः॥ आत्मैव किमतः कृतं तु तुच्छदारसुतादिभिः॥ २२॥ ३३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰

११७

एवं गुरूपदेशेन तत्त्वमवगम्य सारासारविवेकेन च सर्वतो निर्विद्यतरे एवं महत्संगेनोपपत्तिभिः सम्यगवधारयितुं तीर्थसदनानि मुनयः पर्यटंतीति
श्रोतम्मतं तमङ्गत्यादिश्रुत्यर्थमाह ॥ भुवि पुरुपुण्यतीर्थसदनानीति ते उक्तलक्षणा ऋषयो विमदा निरहंकाराः यतो त्वत्पदांबुजहृदः त्वत्पदांबुजं हृदि ये
षां ते अत एव स्वयमेव अघभिदंघ्रिजलाः अघभिदंघ्रिजलं येषां ते उत अपि तथाविधा अपि पुरूणि बहूनि पुण्यानि तीर्थानि सदनानि च क्षेत्राणि च तान्येवो
पासते सेवंते ॥ भाग्यस्तैव सहसंगो भवतीति अथवा पुरु अधिकं भगवद्भजनलक्षणं पुण्यं येषां तानि च गुरवः महांत इत्यर्थः ॥ तेषां सदनानि आश्रमा तीर्थानि च

भुवि पुरुपुण्यतीर्थसदनान्यृषयो विमदास्त उत त्वत्पदांबुजहृदो घभिदंघ्रिजला ॥ दधति
सकृन्मनस्त्वयि य आत्मनि नित्यसुखे न पुनरुपासते पुरुषसारहरावसथान् ॥ २२ ॥ ३४ ॥ ॥ राम॰

न्यग्याहामरसिंहः ॥ निपानागमयोस्तीर्थमृषिजुष्टजले गुराविति ॥ न पुनः पुरुषसारहरावसथान् उपासते पुरुषाणां सारं विवेकधैर्यक्षमाशांति ११७
प्रमुखं हरंतीति तथा ते च ते आवासथा गृहाः स्तान् ॥ न च ते षां गृहादि न कुत्सितसुखापेक्षेत्याह ॥ दधति सकृन्मनस्त्वयि य आत्मनि नित्यसुखे इति
सकृदपि त्वयि ये मनो दधति ते पि गृहाद्यासक्ता न भवंति किं पुनरेवं भूता इत्यर्थः ॥ २२ ॥ ३४ ॥ सुचिरं गतदंगसंगमनिशं त्वामेव संचिंतयंतः संति यतो
यतो गतमदास्तानाश्रमानौत्सवान् ॥ नित्यं तन्मुखपंकजाद्विगलितत्वत्पुण्यगाथामृतस्रोतः संप्लवसंप्लुता नरहरे न स्याम हं वे हन्त ॥ २२ ॥ ३४ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वत्वाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तद्भूतानां क्रियार्थेन समन्वयः इति तत्र तत्र जैमिनिनाऽपि वेदस्य क्रियापरत्वाभिधानात् उपनिषदामपि तद्वदुक्तं यथो
क्तं तत्र वार्त्तिककृता एतेन कर्त्रर्थकर्तृप्रतिपादनेनोपनिषदां नैरर्थक्यं निराकृतं हंसमाख्यातमिति॥ न एकमेवाद्वितीयं ब्रह्म विज्ञानमानंदं ब्रह्म अपशुरश्रो त्रमि
त्येवं तद्विपरीतात्मप्रतिपादनात्॥ न स्याद्वितीयपरमानंदरूपस्य कर्मांगत्वं प्रयुज्यते अननुमतं चैतद्वार्त्तिककृतः कथं सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्यते प
रांगं चात्मविज्ञानादन्यत्रेत्यवधार्यतामिति तेनैवोक्तत्वात्॥ एतदर्थमेवमनन्यायमुनयः पर्यटंतीत्युक्तं तत्र तावद्वैतस्य सत्त्वे नैर्दृष्ट्ये वं तदेवं तु न संभवतीति वे
प्रश्नोत्तराभ्यां सतत्त्वेन तत्त्वावधारणप्रकारमाह॥ सत इदमुत्थितं सदिति चेदिति इदं विश्वधर्मि सदिति साध्यो धर्मः सत उत्पन्नत्वात्॥ यद्यत उत्पन्नं तत्तदात्मक
मेव दृष्टं यथा कनकादुत्पन्नं कुंडलादि तदात्मकं तद्वदिति॥ तत्र यदि विश्वं सदनेन साध्यते तदोपादानत्वनिर्देशो नैव चेदप्रतीतेर्विरुद्धो हेतुरित्याह॥ न

सत इदमुत्थितं सदिति चेन्ननु तर्कहतं व्यभिचरति क्व च क्व च मृषा न तथोभययुक्॥ ॥

नु तर्कहतमिति॥ ननु नानेदं साधयामः किं तु तदुत्पन्नत्वेन कुंडलादिवद्भेदं प्रतिषेधयामः॥ तत्र अनेदप्येवं स्यादिति चेदित्याशंक्यानैकांतिकत्वेन दू
षयति व्यभिचरति क्व चेति॥ पितृपुत्रादिषु मुद्गरघटप्रध्वंसादिषु तथादर्शनादिति भावः॥ ननु तदुत्पन्नत्वं नाम तदुपादानत्वेन तु तन्निमित्तत्वेनातो नानैकांति
कत्वमित्याशंक्य दूषयति क्व च मृषेति गुणोपादानस्यापि फणिनो न गुणात्वं किंतु मिथ्यात्वं अन्यथा कुंडलादिवद्बाधप्रसंगात्॥ अतः पुनरप्यनैकांतिक
त्वमिति भावः॥ ननु तत्र तर्के केवलं गुणमात्रं फणिउपादानं किंतु अविद्यायुक्तं तथाभूतस्यावस्तुत्वात् युक्तं फणिनो मिथ्यात्वमित्याशंक्य तत्तुल्यमत्रापीति दूष
यति न तथोभययुगित्यस्यार्थः॥ अत्राप्यविद्यायुक्तस्यैव सत उपादानत्वं एवंभूतस्य न वस्तुसत्यत्वं अतः सदुपादानत्वमप्रयोजकमिति॥ न वस्तुसत्त्वं प्रपं
चस्येति॥ ननु मा भूदनेन हेतुना प्रपंचस्य सत्त्वं हेत्वंतरेण साधयामः॥ तथाहि सदिदं अर्थक्रियाकारित्वात्॥ न यदेवं न तदेवं तथा शुक्तिरजतमिति तत्राह

न:३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰ म्यवहृतेऽपि विकल्पः शिषित इति। व्यवहारस्य चार्थक्रियार्थं विकल्पो भ्रमः शिषितः दृष्ट एव॥ कूटकार्षापणादिनापि क्रयविक्रयव्यवहारदर्शनात्॥ ननु केन तर्हि सतो व्य
११८ व्हारोऽपि भ्रमः प्रसिद्धः॥ अत्यंतासत्त्वे कथं प्रपंचो भ्रमः स्यात् सत्त्वे वानादि तत्सिद्धिः॥ उक्तं च नदैः॥ अध्यस्यते खपुष्पत्वमसत्कथमवस्तु निमज्जाते गुणसत्त्वाक
मध्यारोपेतवानवेति॥ नेत्याह॥ अथ परंपरयेति। अथ परंपरया यो विकल्पस्तस्यान्वयः॥ अपंचानाः संस्कारजन्मो भ्रमः संस्कारसिद्धये पूर्वप्रतीतिमात्रम
पेक्षते न वस्तुसत्त्वं प्रतीतौ सत्यां वस्तुसत्त्वाभावे न भ्रमस्य तिरेकादर्शनात्॥ अतो नादित्वात् पूर्वपूर्वभ्रमदृष्टस्योत्तरोत्तरभ्रमारोपो न विरुध्यतीत्यर्थः प
रंपरास्यायेत तेन व्यवहारोऽसत्यस्वतीत्यप्रयोजको हेतुरिति॥ ननु श्रूयते हि वेदोक्तं चातुर्मास्ययाजिनः सुकृतं भवति अपाम सोमममृता अभूमेत्यादिकर्मफल
स्यानित्यत्वप्रतिपादनाद्सत्त्वं व्यवहृते न हि नित्यं वस्तु असत्स्वभावतितस्मादेव प्रतिपादितत्वाद्धि। तत्सदेवेत्याशंक्याह॥ भ्रमयतीति हे भगवन् ते तव भार

म्यवहृत येऽपि विकल्पशिषितोऽथ परंपरया भ्रमयति भारती त उरुवृत्तिभिरुक्थजडान्॥ २२॥ ३५॥ एम॰

तीवेदलक्षणा उरुवृत्तिभिः बह्वीभिर्गौणलक्षणादिवृत्तिभिः उक्थजडान् कर्मश्रद्धानराक्रांतमंदमतीन् भ्रमयतीति मोहयति अज्ञानात्॥ न हि वे ११८
स दः कर्मफलस्यानित्यत्वमभिप्रैति॥ किंतु स्वर्गादिप्राप्तेरूपमात्रं विधिस्तैकवाक्यत्वात् अन्यथा वाक्यभेदप्रसंगात् तद्यथेह कर्मजितो लोकः क्षीयते ए
वमेवामुत्र पुण्यजितो लोकः क्षीयत इति न्यायोपबृंहितश्रुत्यंतरविरोधाच्च॥ अतः कर्मजडानामिदं भ्रममात्रमिति॥ एतेनैव तस्मात्कारणात् तस्मा
दात्मनज्ञाकारणं संभ्रतेत्यादीनामन्यपरत्वं दर्शितं भवति॥ २१॥ ३५॥ उक्तं भगवतः सतोऽपि त्वं भवतेः सत्त्वैव सर्पः स्रजः ऊर्ध्वं तत्कार्यमपीह कूटक
नकं वेदोऽपि नैवं परः॥ अद्वैतं तव सत्परं तु परमानंदं तन्मुदा वंदे सुंदरमिंदिरानुतहरे मामुंचे मामनन्तं॥ २१॥ ३५॥ ॥

५६॥ मा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त देवं प्रपंचस्य सत्त्वे साधकं नास्तीत्युक्तं इदानीमसत्त्वे सृष्टिप्रलयश्रुतयोऽप्यतो वा इमानि भूतानि जायंते इत्याद्याः तन्मूलं चानुमानं प्रमाणमित्याह
न यदिदमिति॥ यस्मादिदं विश्वं सृष्टेः अग्रे पूर्वं न आस न आसीत् सदेव सौम्येदमग्र आसीत्॥ आत्मा वा इदमेक एवाग्र आसीदित्यादिश्रुतेः॥ न च विध
नात् प्रलयात् अनुत्पन्नं तदिदं न विष्यत्॥ न विष्यति॥ नासदासीन्नो सदासीत्तदानीमित्यादिश्रुतेः॥ अतः कारणादंतरा मध्येपि एकरसे केवले लयविषयमपि मि
थ्यारूपमेव विद्मातीति मितं निश्चितं यत एवं अतः कुंभादिविशेषजातिविकल्पपथैर्विशेषजातीनां द्रव्यमात्राणां मृल्लोहकांस्यादीनां सरूपाणां विकल्पा
स्तेषां घटकुंडलादयस्तेषां पंथानो मार्गाः प्रकारास्तैः रूपमीयते सदृश्यते यानि रूप्यते यथा तत्र कार्यकारणानां नामधेयमात्रता कारणं मृदाद्येव तु

न यदिदमग्र आस न भविष्यदतो निधनादनुमितमंतरा त्वयि विभाति मृषैकरसे॥ अत
उपमीयते द्रविणजातिविकल्पपथैर्वितथमनोविलासमृतमित्यवयंत्यबुधाः॥२३॥३६॥

त

सत्त्वं तथान्नाप्याकाशादीनां तावन्मात्रता तत्त्वस्यैव सत्त्वं तथा च श्रुतिः॥ वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं यथा सौम्यैकेन मृत्पिंडेन विज्ञाते
न सर्वं मृन्मयं विज्ञातं भवति यथा एकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात् यथा एकेन नखनिकृंतनेन सर्वं कार्ष्णायसमित्यादि तस्मादस्मत
त्वे प्रमाणाभावादसत्त्वे प्रमाणस्य विद्यमानत्वात्॥ वितथं मनोविलासं कृतं सत्यमिति प्रत्यवयंति ते बुधाः अज्ञा इत्यर्थः॥ अत्रैवं प्रयोगः विवादाध्यासितं
न सत्॥ आद्यंतयोरविद्यमानत्वात् विकारित्वात् दृश्यत्वाच्च शुक्तिरजतादिवदन्वये॥ आत्मवच्चेति व्यतिरेके दृष्टांतः॥ मुकुटकुंडलकंकणकिंकिणी
परिणतं कनकं परमार्थतः॥ महदहंकृतिखप्रमुखं तथा नरहरे न परं परमार्थतः॥२३॥३६॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. द. उ. ननु च यदि प्रपंचो नाम नास्त्येव तत्त्वास ताते न चैतन्यस्य संबंधगंधोपि तर्हि किमपराद्धं जीवेन यतः अयं संसरति किं वा बद्धं पुण्यं ईश्वरस्य यतो
११९ नित्यमुक्तः॥ किंविषयं च तदा कर्मकांडमित्यपेक्षायां जीवेश्वरविशेषं॥ द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते॥ तयोरन्यः पिप्पलं स्वा
द्वत्त्यनश्नन्नन्यो भिचाकशीति॥ अजामेकां लोहितशुक्लकृष्णामित्याद्याः वदंतीत्याह सयदजयेति॥ स तु जीवः यत् यस्मात् अजया मायया अजो
अविद्यां अनुशयीत आलिंगेत ततो गुणांश्च देहेंद्रियादीन् भजन्ननुपतन् सेवमानः आत्मतयाध्यस्यन् तदनु तदनंतरं सरूपतां तद्धर्मयोगं च भजन् अपेत
दि भगः॥ पिहितानंदादिगुणः सन् मृत्युं संसारं भजति प्राप्नोतीति तद्विषयमेव च कर्मकांडमिति भावः॥ त्वमु तु त्वं तु जहासि तामजां मायां॥ ननु सा मय्येवा

स यदजया त्वजामनुशयीत गुणांश्च जुषन् भजति सरूपतां तदनु मृत्युमपेतभगः॥ त्वमुत
जहासि तामहिरिव त्वचमात्तभगो महसि महीयसेऽष्टगुणितेऽपरिमेयभगः॥ २४॥ ३८॥ ॥ दश. ११९

स्ति कथं त्यागस्तत्राह॥ अहिरिव त्वचमिति अयं भावः॥ यथा भुजंगः॥ स्वगतमपि कंचुकं गुणबुध्या नाभिमन्यते तथा त्वमजां न हि निरंतरमज्ञादि संवि
त्कामधेनुवृंदपतेरन्यथा कृत्यमिति तामुपेक्षस इति॥ कुत एतत्तत्राह॥ आत्तभगः नित्यप्राप्तैश्वर्यः महसि परमैश्वर्ये अष्टगुणिते अणिमाद्यष्ट
विभूतिमति महीयसे विराजसे॥ कथंभूतः॥ अपरिमेयभगः॥ अपरिमितैश्वर्यः॥ न ह्यन्येषामिव देशकालादिपरिच्छिन्नं तवाष्टगुणितमैश्वर्यमपि
च परिपूर्णस्वरूपानुबंधित्वादपरिमितमित्यर्थः॥ नृत्यंती तव वीक्षणांगणगता कालस्वभावादिभिर्भावान् सत्वरजस्तमोगुणमयानुन्मीलयंती
बहुलं मां माक्रम्य पदा शिरस्यति भरं संमर्दयंत्यातुरं माया ते शरणं गतोस्मि नृहरे त्वामेव तां वारय॥ २४॥ ३८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं तावदुक्तैः साधनकदंबेन ये भगवंतं भजंति ते मृत्युं तरंति॥ इतरे संसरंतीत्युक्तं इदानीं ये बहिःसंगं परित्यज्य भगवन्मार्गे प्रवृत्ता अपि कथंचिद्दलवर्गातोशिनः कामान्न मुंचंति ते न भगवंतं प्राप्नुवंति न चेह सुखं लभंते केवलं कुयोनीरेव प्राप्नुवंतीति तान् शोचन् कामान् यः कामयते मन्यमानः स कर्मभिर्जायते तत्र तत्रेत्यादिश्रुत्यर्थमाह॥ यदि न समुद्धरंतीति हे भगवन् ये यतयः हृदि स्थिताः कामजटाः कामस्य जटा मूलानि वासना यदि न समुद्धरंति नोत्पाटयंति तेषामसतां भगवान् हृदि गतोपि दुरधिगमः दुःप्रापः कथं अस्मृतकंठमणिः तत्तुल्यः स यथा कंठे वर्त्तमानोपि अस्मृतश्चेदप्राप्त इव भवति तद्वदिति न केवलमेतावत् किंतु असुतृपयोगिनामिंद्रियतर्पणपराणां योगच्छद्मनामुभयतोप्यसुखं इहामुत्र च दुःखमे

यदि न समुद्धरंति यतयो हृदि कामजटा दुरधिगमोऽसतां हृदि गतोस्मृतकंठमणिः॥ असुतृपयोगिनामुभयतोप्यसुखं भगवन्ननपगतांतकादनधिरूढपदाद्भवतः॥२५॥३६॥ ॥

व ततः कुतः अनपगतांतकात् अनिवृत्तात् मृत्योः लोकाराधनधनार्जनादिक्लेशाद्भोगवैभवप्राकट्यभयाच्चेह तावद्दुःखं भवत ईश्वरान्निर्बंदपि दुःखं॥ कथंभूतात्॥ अनधिरूढपदात् अनधिरूढं पदं स्वरूपं यस्य तस्मात् त्वत्स्वरूपप्राप्त्यभावादविद्यावद्विषयत्वे न प्राप्तनिजधर्मातिक्रमनिबंधनत्वदंडरूपनरकप्राप्तेरमुत्राप्यसुखमित्यर्थः॥२५॥३६॥ दंतन्यासमिषे एवं चिंतजनं भोगैकचिंतातुरं संसुप्तं तमहान्निशं विरचितोद्योगक्रमैकाकुलं॥ आज्ञाज्ञालंबिन मज्ज मज्ज जनता संमानना सम्मदं दीनानाथ दयानिधान परमानंद प्रभो पाहि मां॥२५॥३६॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰ ननु यतेन्वीकिमपि हत्यमस्ति प्रारब्धमेव सुखोपभोगे नोपक्षिप्यते अतः किमिति हृष्याऽऽप्यते जनयतोऽप्यसुखमिति श्रूयते च ॥ एष नित्यो म
हिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयानित्यादि तत्राह ॥ त्वदवगमीति ॥ हे सगुण षड्गुणैश्वर्ययुक्त त्वदवगमी त्वज्ज्ञानवान् भवदुत्थशुभाशुभयो
१२० स र्नवतः कर्मफलं त्वीश्वराधीनतोः उत्थयोराविर्भूतयोः शुभाशुभयोः प्राचीनयोः पुण्यापुण्यकर्मणोः फलभूतान् गुणविगुणान्वयान् सुखदुःखसंबंधान्न
वेत्ति नानुसंधत्ते तर्हि तदाभिमानितां प्रवृत्तिनिवृत्तिकराणि गिरः विधिनिषेधलक्षणान् न वेत्ति विगतदेहाभिमानतया कार्याबोधाभावान्न नियुज्य कार्य

न

त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयांस्तर्हि देहभृतां च गिरः ॥ अनु
युगमन्वहं सगुणगीतपरंपरया श्रवणभृतो यतस्त्वमपवर्गगतिर्मनुजैः ॥ २८ ॥ ४० ॥

तद् इत्यर्थः ॥ युक्तं चैतत् ॥ यतः कारणात् मनुजैः अन्वहं श्रवणभृतः अनुदिनं श्रवणेन चेतसि धृतस्त्वं तेषामपवर्गगतिः अपवर्गरूपा गतिर्भवसि राम॰
कथं श्रवणभृतः अनुयुगं प्रतियुगं या गीतपरंपरा उपदेशसंततिस्तया सम्प्रदायानुसारेणेत्यर्थः ॥ एतदुक्तं भवति ॥ ये तावत्त्वज्ज्ञानिनः न तेषां १२०
कर्माधिकारशंकापि येषां निरंतरं त्वत्कथाश्रवणादिनिष्ठा तेषामप्यासन्नभवत्प्रसादानां न विधिनिषेधबाधः इतरेषां तु योगच्छलेनेंद्रियजालं न ला ला
सानामसुखं जनयतोऽप्यसुखमिति ॥ २७ ॥ ४० ॥ अवगमं तव मे दिश माधव स्फुरति यन्न सुखासुखसंगमः ॥ श्रवणवर्णनभावमथापि वा नहि भवा
मि यथा विधिकिंकरः ॥ २८ ॥ ४० ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वदवगमी न वेत्ति सुखदुःखे न विधिनिषेधावित्युक्तं तत्र ननु कथमवगंतुं शक्यं दुरवगमैस्यो कृत्स्नत्वादित्येवमाशंक्य सत्यमेवमनवगाह्यमहिम्नो वाङ्मनसागोचर
त्वादविषयत्वेनैव ब्रह्म नमौघ्रु॥ द्युमिति द्वाभ्याम् यदूर्ध्वं गार्गि दिवो यदर्वाक्पृथिव्या यदंतरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्यादिश्रुतिप्रतिपादितम
परिमितं महिमानमाकृ॥ द्युपतय एवेति हे भगवन् ते अंतं द्युपतयः स्वर्गादिलोकपतयो ब्रह्मादयोपि न ययुः न प्रापुः॥ तत्कुतः यदंतवदस्त तत्किमपि न भ
वति॥ आस्तां द्युपतयो न ययुरिति यद्यस्मात्त्वमपि आत्मनो अंतं न यासि कुतस्तर्हि सर्वशक्तिता वा अत आह अनंततया अंते ताभावे न हि शशविषाणाज्ञाने सर्वज्ञता
सार्वज्ञं तदप्राप्तिर्वा शक्तिवैकल्यं विहंति॥ अनंतत्वमेवाह यदंतरेति॥ यस्य तवांतरा मध्ये एव तु अहो सावरणा उत्तरोत्तरं दशगुणैः सप्तभिरावरणैर्युक्ता अंडनिच
या ब्रह्मांडसमूहा वांति परिभ्रमंतीव यथा कालचक्रेण खे रजांसि वसह एकदैव न तु पर्यायेण हि यस्मादेवं अतः श्रुतयस्त्वयि फलंतीति तात्पर्येदत्वा प

द्युपतय एव ते न ययुरंतमनंततया त्वमपि यदंतरांडनिचया ननु सावरणाः॥ ख इव
रजांसि वांति वयसा सह यच्छ्रुतयस्त्वयि हि फलंत्यतन्निरसनेन भवन्निधनाः॥२६॥ ४१॥

र्यवसंति न तु साक्षाद्वदंत्ययमेतावानिति॥ सगुणस्य गुणानंत्यात् निर्गुणस्य वाङ्मनोगोचरत्वात् कथं तर्हि अपदार्थेतात्पर्यमिति तत्र विधिमुखेनाकोनवे
दयंति यमः॥ पदार्थस्यैवा वाक्यार्थत्वमिति निषेधमुखेन तु नायं नियम इत्याह अतन्निरसनेनेति॥ अन्यदेव तद्विदितादथो अविदितात्॥ अन्यत्र धर्मादन्य
अ त्राधर्मात्॥ अन्यत्रास्मात्कृताकृतात् अस्थूलमनण्वित्यादिप्रकारेण लक्षणया च तत्त्वमसीत्यादयः पर्यवस्यंति॥ न च वाच्यं निषेधैः शून्यमेव ज्ञाप्य
त इति यतः भवन्निधनाः भवति त्वयि निधनं समाप्तिर्यासां तास्तथा॥ न हि निरवधिनिषेधः संभवति॥ अतो अवधिभूते त्वयि फलंतीत्यर्थः॥२८॥ ४१॥
द्युपतयोपि यदंतमनंततेनत्व वाग्गिरः श्रुतिमौलयः॥ त्वयि फलंतीत्येको नमस्तस्मै तोजयजपेति ज्ञे तव तत्पदं॥२७॥ ४१॥ ॥

प१

भा॰ द॰ उ॰

१२१

इत्यत्रोपसमाम्नायपुराणोपनिषद्रस इति॥ सर्वश्रुतिपुराणरहस्यतात्पर्यमित्यर्थः॥४२॥ ब्रह्मरात इति॥ ब्रह्मणैव रातमिव प्राप्तं यन्त प्रा
प्तमत्रिमेव तदित्रि॥ तथा ब्रह्मपुत्रेतिवा॥४४॥ पूर्णः स तत्र ह स्म श्रुतधरः॥ श्रुतमर्थमनतिधारयन् वीरव्रतः नैष्ठिकः॥४५॥ नमः इति त्रिल्लावतार

श्रीभगवानुवाच॥ ॥ इत्येतद्ब्रह्मणः पुत्रा आश्रुत्यात्मानुशासनं॥ सनंदनमथोचुस्ते सिद्धा ज्ञात्वात्मनो गतिं॥४२॥ इत्यशेष
समाम्नाय पुराणोपनिषद्रसः॥ समुद्धृतः पूर्वजातैर्व्योमयानैर्महात्मभिः॥४३॥ त्वं चैतद्ब्रह्मदायाद श्रद्धयात्मानुशास
नं धारयंश्चर गां कामं कामानां भर्जनं नृणां॥४४॥ ॥श्रुक उवाच॥ ॥ एवं स ऋषिणादिष्टं गृहीत्वा श्रद्धयात्मवान्॥ पूर्णः
श्रुतधरो राजन्नाह वीरव्रतो मुनिः॥४५॥ ॥नारद उवाच॥ ॥ नमस्तस्मै भगवते कृष्णायामलकीर्तये॥ यो धत्ते सर्वभू
तानामभवायोशतीः कलाः॥४६॥ इत्याद्यमृषिमानम्य तच्छिष्यांश्च महात्मनः॥ ततोगादाश्रमं साक्षात्पितुर्द्वैपायन
स्य मे॥४७॥ सभाजितो भगवता कृतासनपरिग्रहः॥ तस्मै तद्वर्णयामास नारायणमुखाच्छ्रुतं॥४८॥ इत्येतद्वर्णितं राज
न्यन्नः प्रश्नः कृतस्त्वया॥ यथा ब्रह्मण्यनिर्देश्ये निर्गुणेपि मनश्चरेत्॥४९॥ ॥

तया नारायणनमस्येति॥ उक्तं हि॥ एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयमिति॥४६॥ साक्षात्पितुरिति योनिसंबंधानं विना जनक
स्यामिमथनावसरे कथंचिदरणौ रेतः पतितं मंथव्यासस्तदा एव ततः उत्पन्नः शुक इति हि वदंति॥४७॥ ४०॥ ४९॥ ॥ ॥

एम॰

२२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ममस्तवेदस्तुत्यर्थं संगृह्यानुस्मारयति॥ योऽस्योत्प्रेक्षक इति॥ यः अस्य विश्वस्योत्प्रेक्षकः॥ एवमिदमनुस्मारितानां समस्तपुरुषार्थसिद्धये संक्षिप्य
क्षिप्रलयान्तप्रापणीयमित्यालोचक इत्यर्थः॥ अनेन निमित्तत्वमुक्तं एवमालोच्यास्यादिमध्यनिधने आदिजन्मस्थितिपालनं निधनं ध्वंसः एतेषु कर्मसु
यो वर्त्तते अनेनोपादानत्वमुक्तं॥ ननु प्रकृतिपुरुषयोरुपादाननिमित्तत्वे प्रसिद्धे सत्यं तयोरपि तत एवोद्भूतत्वान्मूलकारणं स एवेत्याह॥ योऽव्यक्तजीवेश्व
र इति यः अव्यक्तजीवयोः प्रकृतिपुरुषयोः स्रोतकः प्रवेशनियमने दर्शयति॥ पूर्वोक्तप्रकारेणेदं सृष्ट्वेत्यर्थमेतत्स्पष्टं तेन ऋषिणा सहेत्कार्येत्र ह
मिति दर्शनाद्दृषिजीवः तेन सहानुप्रविष्टः पुरः शरीराणि तस्य भोगाय तनानि चक्रे॥ ताः पुरः शास्ति तस्य भोगं ददत्सारिपालयति॥ उपासकस्य च

॥छ॥ योऽस्योत्प्रेक्षक आदिमध्यनिधने योऽव्यक्तजीवेश्वरो यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरः शा
स्ति ताः॥ यं संपद्य जहात्यजामनुशयी सुप्तः कुलायं यथा तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिं॥
॥५०॥ इति श्रीभागवते महापुराणे दशमस्कंधे नारायणनारदसंवादे सप्ताशीतितमोऽध्यायः॥ ॥८७॥ ॥

कैवल्यरूपो भवतीत्याह॥ यं संपद्यति यं संपद्य प्राप्यानुशयी अत्र तु देहबन्धनमैश्वरं मूलेनोत इति॥ तथा स जीवः अजां कार्यकारणलक्षणां
मपि त्यजति॥ ननु ब्रह्मसंपन्नस्यापि जीवतस्तत्संबंधो दृश्यते अत आह सुप्तः कुलायं यथेति॥ अयं भावः यथा सुप्तः शरीरं वर्त्तमानमपि न पश्यति॥ स तु नात्मानं
तथा न पश्यति॥ एवं जीवन्मुक्तमप्यन्यो देहवंतं पश्यति॥ स तु न किंचित्पश्यतीति॥ तं हरिं ध्यायेदजस्रमनवरतं ध्यायेत्किमित्यत आह॥ अभयं तन्न यंयस्मा
द्भयमित्यर्थः॥ अत एव कैवल्यनिरस्तयोनिं कैवल्येनात्मस्वरूपावस्थानेन निरस्ता निरस्ता योनिः मूलकारणं माया येन तं॥ सर्व
श्रुतिशिरोरत्ननीराजितपदांबुजम्॥ भोगयोगप्रदं वंदे माधवं कर्मिनम्रयोः॥ ॥५०॥ ॥ इति दशमे टीकायां सप्ताशीतितमोऽध्यायः॥ ॥८७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग.द.उ. अष्टाशीतितमे विष्णुभक्ताः कैवल्यमश्नुते ॥ ततोर्वाग्देवभक्तास्तु विभूतिमिति वर्ण्यते ॥१॥ हरिर्भजतां मुक्तिदस्तु केवलं अन्यं ध्याये इत्यस्मिन्निति तत्र शंकते ॥
१२२ देवासुरेति ॥ अशिवं अवधीरितभोगं भोजा भोगिनः लक्ष्म्याः पतिं सर्वभोगयुक्तं ॥२॥ अन्योन्योपमर्देन तमसस्त्रैविध्यात् त्रिलिंगः त्रिलिंगत्वमाह ॥ वैकारिक इ
ति अहंकारस्त्रिधा ॥३॥ विकारा मन इंद्रियभूतरूपाः ॥ षोडशेति इंद्रियदेवानामभेदविवक्षया कंचनेति यत्किंचिद्विकारोपाधिकं तत्तद्रूपाभिव्यक्तं तज्जनत्वउपाध्यनु
रूपाणां विभूतीनां स्वरूपं प्राप्नोतीति ॥४॥ उपद्रष्टा साक्षी सन्नपतः सर्वदृक् सर्वं पश्यति ॥ अतः प्रकृतेः पर इति अन्वेदं तत्त्वं वस्तुनो गुणसंबंधे रूपद्वय
मिहेष्यते ॥ तद्धर्मायोगयोगाभ्यां बिंबवत्प्रतिबिंबवत् ॥ गुणाः सत्त्वादयः आत्मधोरस्पृष्टाः स्वभावतः ब्रह्मविष्णुशिवानां च गुणनियंतृस्वरूपिणां ॥

राजोवाच ॥ देवासुरमनुष्येषु ये भजंत्यशिवं शिवं ॥ प्रायस्ते धनिनो भोजा न तु लक्ष्म्याः पतिं हरिं ॥२॥ एतद्वेदितुमिच्छामः संदेहोत्र
महान्हि नः ॥ विरुद्धशीलयोः प्रभ्वोर्विरुद्धा भजतां गतिः ॥२॥ श्रीशुक उ० ॥ शिवः शक्तियुतः शश्वत्त्रिलिंगो गुणसंवृतः ॥ वैकारिकस्तैजसश्च ताम गुण
सश्चेत्यहं त्रिधा ॥ ३ ॥ ततो विकारा अभवन्षोडशामीषु कंचन ॥ उपधावन्विभूतीनां सर्वासामश्नुते गतिं ॥४॥ हरिर्हि निर्गुणः सा
क्षात्पुरुषः प्रकृतेः परः ॥ स सर्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेत् ॥५॥ नातिभेदो भवेद्देवो गुणधर्मैरिहांशतः ॥ सत्त्वस्य शांत्या नो जातु विक्षो रा.म.
विक्षेपमृच्छते ॥ रजस्तमोगुणस्यांतु भवेतां ब्रह्मरुद्रयोः ॥ गुणोपमर्दतो भूयस्तदंशानां च भिन्नता ॥ अतः सम्यक्प्रसन्नस्य विष्णोर्मोक्षकरी मतिः ॥ अंशतो भू १२२
तिहेतुश्च तथानंदमयी स्वतः ॥ अंशांतस्यारतमेनब्रह्मरुद्रादिसेविनां विभूतयो भवंत्येवशांतेर्मोक्षो प्यंशतः ॥ इदमेवाभिप्रेत्यतत्तत्रोच्यते श्वेताश्वतरे
खलु सत्वात्परमं तु स्तुरिति ॥ तथा सत्वं यस्य प्रिया मूर्तिरिति ॥ तथा सत्वं तत्वार्थसाधनमिति तथात्र याणामेकभावानां यो न पश्यति वै भिदामिति
॥ तथानंतेमप्यश्नुते ये च भिदाम एव पिबंस्तत इत्यादि एवं च सति न किंचिदसमंजसं तत्तद्भक्तानां तु कल्लोमोहसात्त्विमिति ॥५॥
नो

यस्याहमनुगृह्णामीत्यस्यायमर्थः॥ यो विजयान्तरिजिहीर्षुरपि कश्चिद्विद्यमानेषु सक्तस्तेक्लिश्यति च तस्य विषयापहार एवानुग्रह इति॥ यथा
श्रुतत्वेक्ष्वाकादीनामैश्वर्यविरोधात्॥ अथवा प्रथमं विरक्तीः कामनानुरूपाद्दत्त्वाऽऽशु नैर्विषय्येनोगावसाने तस्य निर्वेदमुत्पाद्य हरिष्यामि परमानु
ग्रहं कर्तुमिति तदुक्तं भगवतैव नमस्यावेष्टितधियां कामः कामाय कल्प्यत इति॥ दुःखदुःखितमिति॥ दुःखादनु पुनर्दुःखितमिव प्रतीयमानमित्यर्थः॥

निवृत्तेष्वश्वमेधेषु राजा युष्मत्पितामहः॥ शृण्वन्भगवतो धर्मानपृच्छदिदमच्युतं॥६॥ स आह भगवांस्तस्मै प्रीतः शुश्रूष
वे प्रभुः॥ नृणां निःश्रेयसार्थाय योऽवतीर्णो यदोः कुले॥७॥ श्रीभगवानुवाच॥ यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः॥ ततोऽधनं
त्यजंत्यस्य स्वजना दुःखदुःखितं॥८॥ स यदा वितथोद्योगो निर्विण्णः स्याद्धनेहया॥ मत्परैः कृतमैत्रस्य करिष्ये मदनुग्रहं॥९॥ तद्ब्र न
ह्म परमं सूक्ष्मं चिन्मात्रं सदनंतकं॥ अतो मां सुदुराराध्यं हित्वान्यान्भजते जनः॥१०॥ ततस्त आशुतोषेभ्यो लब्धराज्यश्रियोद्धताः
॥ मत्ताः प्रमत्ता वरदान्विस्मरंत्यवजानते॥११॥ ॥ ऋषिरुवाच॥ ॥ शापप्रसादयोरीशा ब्रह्मविष्णुशिवादयः॥ सद्यः शापप्र
सादोऽङ्ग शिवो ब्रह्मा न चाच्युतः॥१२॥ अत्रैवोदाहरंतीममितिहासं पुरातनं॥ वृकासुराय गिरिशो वरं दत्त्वाप संकटं॥१३॥ ॥

॥८॥ स पुनर्बंधूनामाग्रहेण धनेहयामद्धत्तोऽपि मदनुग्रहेण यदा निःफलोद्यमो निर्विण्णः स्यात्तदा मदनुग्रहमिति समासाधारणमनुग्रहं
॥९॥ तमेवाह तदिति॥१०॥ अतोपश्चादपि मोक्षमरोचयत॥ अत्यासक्तो न न इत्यर्थः॥११॥ एतदेवेतिहासेन स्पष्टयितुमाह॥ शापप्र
सादयोरिति ब्रह्मा चेत्यन्वयः॥१२॥१३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ
शाकुनेः पुत्रः ॥ १४ ॥ सुसंकटमापके लासोत्सारतं पुर पारतंच ॥ १६ ॥ स्वगात्र तउपाधावत कथमात्म ध्रुवेणास्वमांसे वतु कानदति ॥ १७ ॥ अवृश्चत
१२३
छेतु मुद्यतः ॥ १८ ॥ मूर्त्तिमानग्निरिव देदीप्यमानः वयेञ्च धुनात तनाय थाकोचि दुःखेन मत्तुक्रामं वारयामनः ॥ तद्वदितिस च उपस्पृष्टा वृतिः परिपूर्णादे हो

वृकोनामासुरः पुत्रः शाकुनेः पथिनारदं ॥ दृष्टा श्रुतोषंप प्रच्छ देवेषु त्रिषु दुर्मतिः ॥ १४ ॥ स आह देवं गिरिशमुपाधावाशु सिध्यसि ॥ योल्पा
भ्यां गुणदोषाभ्यामाशु तुष्यति कुप्यति ॥ १५ ॥ दशास्य बाणयोस्तुष्टः स्तुवतो बंदिनोरिव ॥ ऐश्वर्यमतुलं दत्वा तत आप सुसंकटं ॥
१६ ॥ इत्यादिष्टस्तमसुर उपाधावत्स्वगात्रतः ॥ केदार आत्मक्रव्येण जुह्वानोग्निमुखे हरं ॥ १७ ॥ देवोपलब्धिम[illegible]प्राप्य निर्वेदात्सप्तमे हनि ॥ प्रा
शिरो वृश्चत्स्वधितिना तत्तीर्थक्लिन्नमूर्धजं ॥ १८ ॥ तदा महाकारुणिकः स धूर्जटिर्यथा वयं चाग्निरिवोत्थितोऽनलात् ॥ निगृह्य दोर्भ्यां भुजयो न्यवारयत्तत्स्पर्शनाद्भूय उपस्कृताकृतिः ॥ १९ ॥ तमाह चांगालमलं वृणीष्व मे यथाभिकामं वितरामि ते वरं ॥ प्रीयेय तोयेन नृणां प्रपद्यतामहो त्वयात्मा भृशमर्द्यते वृथा ॥ २० ॥ देवं स वव्रे पापीयान्वरं भूतभयावहं ॥ यस्य यस्य करं शीर्ष्णि धास्ये स म्रियतामि एम॰
ति ॥ २१ ॥ तच्छ्रुत्वा भगवान्रुद्रो दुर्मना इव भारत ॥ ॐ मिति प्रहसंस्तस्मै ददेहेरमृतं यथा ॥ २२ ॥ इत्युक्तः सोसुरो नूनं गौरीहरणलाला
५२३
लसः ॥ स तद्वरपरीक्षार्थं शंभोर्मूर्ध्नि किलासुरः ॥ २३ ॥ स्वहस्तं धातुमारेभे सोबिभ्यत्स्वकृताच्छिवः ॥ तेनोपसृष्टः संत्रस्तः पराधावत्सवेपथुः
॥ यावदंतं दिवो भूमेः काष्ठानामुदगादुदक् ॥ २४ ॥ ॥
नव त्तारस्य वारयता एवमाह चकितोये नापि न जत्ता पीतः स्पासत्व यातु देहो वृषापाप्य त
इतिः ॥ २० ॥ दातु मनर्हमपि दत्त्वानात्स सर्पाय क्षीरमिव ॥ २१ ॥ उपसृष्टः अनुगतः सन् उदगात् ॥ अन्वधावत् ॥ उदकुउत्तरतः ॥ २३ ॥ २४ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैकुंठं प्रेतश्रीपं ॥ २५॥२६॥ तं दृष्ट्वा सुरतथाव्यसनं तादृक्व्यसनं यस्त्वतं ॥ वृजिनार्दनः दुःखहंता ॥ दूरत एव दृष्ट्वा मेखलाजिनैरुपलक्षितः प्रत्युदियात् स
न्मुखमागतः ॥ २७॥ मत्कृते निश्चिते किंकिमर्थे आत्मा देहः सर्वपुरुषार्थहेतुः अतो मा पीडयेति ॥ २८॥ प्रायशः पुंभिः धृतैर्नवा न स्वार्थान्समीहते साधयि

अजानंतः प्रतिविधिं तूष्णीमासन्सुरेश्वराः ॥ ततो वैकुंठमगमद्भास्वरं तमसः परं ॥ २५॥ यत्र नारायणः साक्षान्न्यासिनां परमा गतिः ॥ शां
तानां न्यस्तदंडानां यतो नावर्तते गतः ॥ २६॥ तं तथा व्यसनं दृष्ट्वा भगवान्वृजिनार्दनः ॥ दूरात्प्रत्युदियाद्भूत्वा बटुको योगमायया ॥ २७॥
मेखलाजिनदंडाक्षैस्तेजसाग्निरिवज्वलन् ॥ अभिवादयामास च तं कुशपाणिर्विनीतवत् ॥ २८॥ ॥ श्रीभगवानुवाच ॥ ॥ शाकुनेय
भवान्व्यक्तं श्रांतः किं दूरमागतः ॥ क्षणं विश्रम्यतां पुंसः आत्मायं सर्वकामधुक् ॥ २९॥ यदि नः श्रवणायालं युष्मद्व्यवसितं विभो ॥
भण्यतां प्रायशः पुंभिः धृतैः स्वार्थान्समीहते ॥ ३०॥ ॥ श्रीशुक उवाच ॥ ॥ एवं भगवता पृष्टो वचसामृतवर्षिणा ॥ गतक्लमोऽब्रवीत्तस्मै य रा॰भ॰
थापूर्वमनुष्ठितं ॥ ३१॥ ॥ श्रीभगवानुवाच ॥ ॥ एवं चेत्तर्हि तद्वाक्यं न वयं श्रद्दधीमहि ॥ यो दक्षशापात्पैशाच्यं प्राप्तः प्रेतपिशाचराट् ॥ ३२॥
यदि वस्तत्र विश्रंभो दानवेंद्र जगद्गुरौ ॥ तर्ह्यंगाशु स्वशिरसि हस्तं न्यस्य प्रतीयतां ॥ ३३॥ यद्यसत्यं वचः शंभोः कथंचिद्दानवर्षभ ॥ तदैनं ज
ह्यसद्वाचं न यद्वक्तानृतं पुनः ॥ ३४॥ इत्थं भगवतश्चित्रैर्वचोभिः स सुपेशलैः ॥ भिन्नधीर्विस्मितः शीर्ष्णि स्वहस्तं कुमतिर्न्यधात् ॥ ३५॥

तुमिच्छति ॥ अथवा जनः पुंभिः सहायैः स्वकार्याणि साधयति ॥ अतस्तत्कथ्यतामिति ॥ ३०॥ पैशाच्यं पिशाचानामिवद्वत्तिं ॥ ३३॥ यद्यथा वक्ता व
दिष्यति ॥ ३४॥ चित्रैश्चोमकैः सुपेशलैः रतिरम्यैर्भिन्नधीश्चंचलितमितिः ॥ ३५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२

किंसु वक्तव्यं विशेषेण लयिहृत् तागाः हृतापराध इति ॥ ३९ ॥ आमाहृततत्रात्युदन्वतः वाष्पनसोगोचरः शक्तिः समुद्रस्य गिरित्रमोक्षं शिवमोक्षं रूपे पंचरि
त्रसंसृतिनिर्वाणा नानारूपसंसारैः ॥ ४० ॥ तत्कसंकेमालोक्य हृपापूर्णहृदे भुजः गिरित्रं चिरवृकात् त्रमोचयामास केशवः ॥ ॥ इति दशमे अष्टाशीतितमः ॥ ॥ न

अथापतद्भिन्नशिरा वज्राहत इव क्षणात् ॥ जयशब्दो नमः शब्दः साधुशब्दोभवद्दिवि ॥ ३६ ॥ मुमुचुः पुष्पवर्षाणि हते पापे वृ
कासुरे ॥ देवर्षिपितृगंधर्वा मोचितः संकटाच्छिवः ॥ ३७ ॥ मुक्तं गिरिशमभ्याह भगवान्पुरुषोत्तमः ॥ अहो देव महादेव पापो
यं स्वेन पाप्मना ॥ ३८ ॥ हतः को नु महत्स्वीश जंतुर्वै कृतकिल्बिषः ॥ क्षेमी स्यात् किमु विश्वेशे कृतागस्को जगद्गुरौ ॥ ३९ ॥ य एव
ममाकृतशक्त्युदन्वतः परस्य साक्षात्परमात्मनो हरेः ॥ गिरित्रमोक्षं कथयेच्छृणोति वा विमुच्यते संसृतिभिस्तथारिभिः ॥ ४० ॥
इति श्रीभागवते महापुराणे दशमस्कंधे रुद्रमोक्षणं नाम अष्टाशीतितमोऽध्यायः ॥ ८८ ॥ ॥ श्रीशुक उवाच ॥ ॥ सरस्वत्यास्त
टे राजन्नृषयः सत्रमासत ॥ वितर्कः समभूत्तेषां त्रिष्वधीशेषु को महान् ॥ तस्य जिज्ञासया ते वै भृगुं ब्रह्मसुतं नृप ॥ तज्ज्ञप्त्यै प्रे
षयामासुः सोऽभ्यगाद्ब्रह्मणः सभां ॥ २ ॥ न तस्मै प्रह्वणं स्तोत्रं चक्रे सत्वपरीक्षया ॥ तस्मै चुक्रोध भगवान् प्रज्वलन् स्वे
न तेजसा ॥ स आत्मन्युत्थितं मन्युमात्मजायात्मना प्रभुः ॥ अशीशमद्यथा वह्निं स्वयोन्या वारिणा प्रभुः ॥ ४ ॥ ॥

वाशीतितमे देवः को महानिति संशये परीक्ष्य विष्णोरुत्कर्षं मुनिभ्यो वर्ण्य पप्रच्छुः ॥ १ ॥ इतिहासांतरमाह ॥ सरस्वत्या इति ॥ २ ॥ स्वयोन्या स्वस्य वरू
पांतरेण नित्यकिंस्थानेन स्वकार्येणेत्यर्थः ॥ तेन यथा कश्चिद्वह्निं शमयति तथा स्वकार्येण पुत्रेण निमित्तेन क्रोधं शमयामासेत्यर्थः ॥ ४ ॥

भ्रू २



स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीर्थकारिणा तीर्थत्व निमित्तेन ॥११॥ तस्मै मंदयागं चीरस्या गिरा निर्वृतस्तत्र लक्ष्मी बभूवेति शेषः ॥१२॥ विस्मिता अपराधातिरेकोपि पतिर्विक्रमस्तेन नत्भूयांसं श्रद्दधुः ॥ सह त्वमेतिस्त्रिः तवं ततः ॥१२॥ यतः पस्मिन्वैराग्यं चचतुर्विधमिति पाठे तच्चातुर्विध्यमेवं द्रष्टव्यं ॥ विषयोस्मत्कुमश्रकुवतोपि समाने छात्या गोना

ततः कैलासमगमत्तत्र तं देवो महेश्वरः ॥ परिरभ्य समारोप्योत्थाप्य त्वातरं सुरा ॥५॥ नैच्छत्तमस्तु सयथा इति देव अकोपहा ॥ शूलमुद्यम्य तं हंतुमारेभे नेति गमलोचनः ॥६॥ पतित्वा पादयोर्देवी सांत्वयामास तं गिरा ॥ अथो जगाम वैकुंठं यत्र देवो जनार्दनः ॥७॥ शय्यानं श्रियउत्संगे पदा वक्षस्यताडयत् ॥ ततउत्थाय भगवान् सह लक्ष्म्या सतां गतिः ॥८॥ स्वतल्पादवरुह्याशु ननाम शिरसा मुनिं ॥ आह ते स्वागतं ब्रह्मन्निषीदात्रासने क्षणं ॥ अजानतामागतान्वः संतुमर्हथ नः प्रभो ॥९॥ अतीवकोमलौ तात चरणौ ते महामुने ॥ इत्युक्त्वा विप्रचरणौ मर्दयन्स्वेन पाणिना ॥ पुनीहि सहलोकं मां लोकपालांश्च मद्गतान् ॥१०॥ पादोदकेन भगवं स्तीर्थानां तीर्थकारिणा ॥ अथाह भगवल्लक्ष्म्या त्वासमेकांतमानजनं ॥११॥ वक्षस्यतुरसि मे भूतिर्भवत्पाद हतां हसः ॥१२॥ श्रीशुक उवाच ॥ एवं ब्रुवति वैकुंठे भृगुस्तन्मंद्रया गिरा निर्वृतस्तर्पितस्तूष्णीं भक्त्युत्कंठाश्रुलोचनः ॥१३॥ पुनः स सत्रमात्रज्य मुनीनां ब्रह्मवादिनाम् ॥ स्वानुभूतमशेषेण राजन् भृगुरवर्णयत् ॥१४॥ तन्निशम्याथ मुनयो विस्मिता मुक्तसंशयाः ॥ भूयांसं श्रद्दधुर्विष्णुं यतः शांतिर्यतोऽभयम् ॥१५॥ धर्मः साक्षाद्यतो ज्ञानं वैराग्यं च तदन्वितम् ॥ ऐश्वर्यं चाष्टधा यस्माद्यशश्चात्ममलापहम् ॥१६॥ ॥ माद्यं वैराग्यं ॥ ततो विषयाणां मध्ये लवणादिम्मतिरेकेणापि शक्तिर्द्वितीयं ॥ तथा हृत्तावपि मनसि रागग्रन्थिल्येन बाह्येंद्रियै रेव विषयसेवनं तृतीयं ॥ तत्राप्यौदासीन्यं च तुर्थं तथा कुः ॥ वैराग्यमाद्यं यतमानसंज्ञकविविरागोव्यतिरेकसंज्ञः ॥ एकेंद्रियाख्यस्तु रिरागसौक्ष्म्यं तस्मात्परं चावशवशी कृतारव्यमिति ॥१६॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰ तस्य भगवतएव यद्यपि त्रिविधा आहृतमः॥ तत्तथापि सत्त्वमेव तीर्थसाधनं पुरुषार्थहेतुः॥१५॥ इत्थं निश्चित्य सरस्वतीतीरवासिनो विप्रा हरिसेवया मुक्ति
१२५ मापुरिति॥१६॥ माघस्नानेन तस्य तु खपंकजाऽऽदृतगंधयुक्तपीयूषं तु संहरेः॥ प्रसन्नस्तु यशोदः संसारी सेवते स समुक्तो भवतीति॥१६॥ स चोक्तलक्षणेन गेहान्नहि

मुनीनां स्वस्थ दंडानां शांतानां समचेतसां॥ अकिंचनानां साधूनां यमाकूतः परमां गतिं॥१७॥ सत्वं यस्य प्रिया मूर्त्तिर्ब्राह्मणास्त्विष्टदेवताः॥ भ
जंत्यनाशिषः शांता यं वा निपुणबुद्धयः॥१७॥ त्रिविधाहृतयस्तस्य राक्षसा असुराः सुराः॥ गुणिन्या मायया सृष्टाः सत्वं तत्तीर्थसाधनं॥१८॥ श्रीशु
कउवाच॥ इत्थं सारस्वता विप्रा नृणां संशयनुत्तये॥ पुरुषस्य पदांभोजसेवया तद्गतिं गताः॥१९॥ सूतउवाच॥ इत्येतन्मुनितनयास्यप
द्मगंधपीयूषं भवभयभित्परस्य पुंसः॥ सुश्लोकं श्रवणपुटैः पिबत्यभीक्ष्णं पांथोऽध्वभ्रमणपरिश्रमं जहाति॥२०॥ श्रीशुक उ॰॥ एकदा
द्वारवत्यां तु विप्रपत्न्याः कुमारकः॥ जातमात्रो भुवं स्पृष्ट्वा ममार किल भारत॥२१॥ विप्रो गृहीत्वा मृतकं राजद्वार्युपधाय सः॥ इदं प्रोवाच
विलपन्नातुरो दीनमानसः॥२२॥ ब्रह्मद्विषः शठधियो लुब्धस्य विषयात्मनः॥ क्षत्रबंधोः कर्मदोषात्पंचत्वं मे गतोऽर्भकः॥२३॥ हिंसाविहारं नृपतिं
दुःशीलमजितेंद्रियं॥ प्रजा भजंत्यः सीदंति दरिद्रा नित्यदुःखिताः॥२४॥ एवं द्वितीयं विप्रर्षिस्तृतीयं त्वेवमेव च॥ विसृज्य स नृपद्वारि तां गा तृतीये द॰ म॰
थां समगायत॥२५॥ तामर्जुन उपश्रुत्य कर्हिचित्केशवांतिके॥ परेते नवमे बाले ब्राह्मणं समभाषत॥२६॥ किंस्विद्ब्रह्मंस्त्वन्निवासे इह १२५
नास्ति धनुर्धरः॥ राजन्यबंधुरेते वै ब्राह्मणाः सत्र आसते॥२७॥ स एवेति त्रयपि तु आख्यानांतरमाह एकदेति॥ ब्रह्मद्विषस्य तस्य त्वन्निवासे
इत्यादिकां तां गाथां वाक्यं मयि न कश्चिद्दोषः॥ अतो राजदोषेणैव मत्पुत्रा म्रियंत इति वारंवारं चुक्रोशेत्यर्थः॥२६॥ ब्रह्मन् किंस्वित् किमर्थं त्वया रोदिषि
यतस्त्वन्निवासे धनुर्धरमात्रो राजन्यबंधुरपि नास्ति ब्राह्मणास्तु कावा त्वां एते तु सत्रयागइव ब्राह्मणा मिलिता न वक्तुमर्हंतीत्यर्थः॥२७॥ ॥ ॥
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवाह धनदारात्मजाप्टक्ता इति धनादिभिर्वियुक्ता यत्र येषु जीवत्सु शोचंति ते जीवंति केवलं जीविकासेपादयंति॥२९॥ हतकल्मष इति अग्निप्रवे
शेन ब्राह्मणविलापश्रवणपातकात्॥ वृतोन्नवेयमित्यर्थः॥ अह हतकल्मषश्चेदितिवा॥३०॥ नत्रद्दध्महे न संप्रतीमः॥३२॥ एवंप्रोत्साहिवादै विश्रंभितः

धनदारात्मजापृक्ता यत्र शोचंति ब्राह्मणाः॥ ते वै राजन्यवेषेण नटा जीवंत्यसुंभराः॥२९॥ अहं प्रजां वां भगवन् रक्षिष्ये दीनयोरिह॥
अनिस्तीर्णप्रतिज्ञोऽग्निं प्रवेक्ष्ये हतकल्मषः॥३०॥॥ ब्राह्मण उवाच॥ संकर्षणो वासुदेवः प्रद्युम्नो धन्विनां वरः॥ अनिरुद्धोऽप्रतिरथो न
त्रातुं शक्नुवंति यत्॥३१॥ तत्कथं तु भवान्कर्म दुष्करं जगदीश्वरैः॥ चिकीर्षसि त्वं बालिश्यात्तन्न श्रद्दध्महे वयं॥३२॥॥ अर्जुन उवाच॥ ॥
नाहं संकर्षणो ब्रह्मन्न कृष्णः कार्ष्णिरेव च॥ अहं चैवार्जुनो नाम गांडीवं यस्य वै धनुः॥३३॥ मावमंस्था मम ब्रह्मन्वीर्यं त्र्यंबक
तोषणं॥ मृत्युं विजित्य प्रधने आनेष्ये ते प्रजां विभो॥३४॥ एवं विश्रंभितो विप्रः फाल्गुनेन परंतप॥ जगाम स्वगृहं प्रीतः पार्थवीर्यं
निशामयन्॥३५॥ प्रसूतिकाल आसन्ने भार्याया द्विजसत्तमः॥ पाहि पाहि प्रजां मृत्योरित्याहार्जुनमातुरः॥ स उपस्पृश्य शुच्यंभो नमु
स्कृत्य महेश्वरं॥ दिव्यान्यस्त्राणि च संस्मृत्य सज्यं गांडीवमाददे॥३७॥ न्यरुणत्सूतिकागारं शरैर्नानास्त्रयोजितैः॥ तिर्यगूर्ध्वमधः पार्थ
श्चकार शरपंजरं॥३८॥ ततः कुमारः संजातो विप्रपत्न्या रुदन्मुहुः॥ सद्योऽदर्शनमापेदे सशरीरो विहायसा॥३९॥ ॥ ॥

विश्वासं प्रापितः॥ निशामयन् स्मरन्॥३५॥ ब्राह्मणोपेक्षकत्वेन कृष्णावज्ञया महेश्वरं नमस्कृत्य॥३७॥ अरुणत्॥ आहतवान् तदेवाह तीर्य
गूर्ध्वमिति॥ अदर्शनमापेदे देहोऽपि नाविनावशिष्ट इत्यर्थः॥३९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ॰ यस्य प्रजाः तत तत्र ॥४५॥ प्रस्तुकः वारितः उपपत्तिभिः प्रतिषेधं कुर्वता मावज्ञ माव जानीहि ॥४६॥ ये निंदंति त एव मनुष्याः न कीर्तिं स्थापयिष्यंतीति श्व
जोंकरिष्यंति पागं तरं तु छंदो नेगमयात ॥ आगंतुकमिति ॥४७॥ सत्रसत्रसंरमागिर पायेषुद्विपे पुता वृ ॥ हत मिति ॥ प्रहृतिपरिणाम रूपं नालोकानाव

१२६ तराहविषोविज यविनंदन हृक्षसंनिधौ ॥ मौढ्यं परपते मेयोहं स्त्रद्दधे क्लीबकथ्यनं ॥४८॥ न प्रद्युम्नो नानिरुद्धो न रामो न च केशवः य
स्य शेकुः परित्रातुं कोन्यस्तदवितेश्वरः ॥ धिगर्जुनं मृषावादं धिगात्मश्लाघिनो धनुः ॥ दैवोपसृष्टं यो मौढ्यादानिनीषति दुर्मतिः ॥४९॥
एवं शपति विप्रर्षौ विद्यामास्थाय फाल्गुनः ॥ ययौ संयमनीं माश्च यत्रास्ते भगवान् यमः ॥४३॥ विप्रापत्यमचक्षाणस्तत ऐंद्रीमगात् पुरीं
आग्नेयीं नैरृतीं सौम्यां वायव्यां वारुणीमथ ॥४४॥ रसातलं नाकपृष्ठं धिष्ण्यान्यन्यान्युदायुधः ॥ ततोऽलब्धद्विजसुतो ह्यनिस्तीर्णप्रतिश्रु
तः ॥४६॥ अग्निं विविक्षुः कृष्णेन प्रत्युक्तः प्रतिषेधता ॥ दर्शये द्विजसूनूंस्ते मावज्ञात्मानमात्मना ॥४६॥ ये ते हकीर्तिं विमलां मनुष्याः स्थं
पयंति नः ॥ इति संभाष्य भगवानर्जुनेन सहेश्वरः ॥४७॥ दिव्यं स्वरथमास्थाय प्रतीचीं दिशमाविशत् ॥ सप्त द्वीपान् सप्त सिंधून् सप्त सप्त गि
रीनथ ॥४८॥ लोकालोकं तथातीत्य विवेश सुमहत्तमः ॥ तत्राश्वाः शैब्यसुग्रीवमेघपुष्पबलाहकाः ॥ तमसि भ्रष्टगतयो बभूवुर्भरतर्ष राम:
कार्सं भ ॥ तान् दृष्ट्वा भगवान् कृष्णो महायोगेश्वरेश्वरः ॥५०॥ सहस्रादित्यसंकाशं स्वचक्रं प्राहिणोत् पुरः ॥ त :सुघोरं गहनं कृतं महद्विदारयद्भू म: १२६
रितरेण रोचिषा ॥ मनोजवं निर्विविशे सुदर्शनं गुणच्युतो रामशरो यथा चमूः ॥५१॥ द्वारेण चक्रानुपथेन तत्तमः परं परं ज्योतिरनंतपा
रं ॥ समश्नुवानं प्रसमीक्ष्य फाल्गुनः प्रताडिताक्षो पिदधेक्षिणी उभे ॥५२॥ ॥ मात्रं ॥५१॥ चक्रानुपथेन चक्रमनुगतेन द्वारेण तमः परं त
स्मात्तमसः परं दूरे वर्तमानं परं श्रेष्ठं भागवतं ज्योतिः समश्नुवानं व्याप्नुवत् प्रसमीक्ष्य प्रताडिताक्षो नेत्रे न्यमीलयदिति ॥५२॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं जंततः उच्चलितः स्वहस्तः उन्मग्योद्भूषणे यस्य तत्र तत्र सलिले भवनं ॥ महाकालपुरं ॥ द्युमत्तमं द्युतिमत्सुश्रेष्ठं ॥ ५२ ॥ सहस्रं मूर्ध्नि भवाः फणा स्ता
सुमणयस्तेषां कांतिभिर्दिसहस्त्रनेत्रैरूर्जितं स्फटिकगिरेः संकाशं शितिकं ॥ ठजिकं कंठश्च जिका श्वशितयो नीलाः कंवजिका यस्य तं ॥ ५४ ॥ तद्वो

ततः प्रविष्टः सलिलं नभस्वतावलीयसे जह्नुहृदर्मिन्भूषणं ॥ तत्राद्भुतं वै भवनं द्युमत्तमं भ्राजन्मणिस्तंभसहस्रशो
भितं ॥ ५३ ॥ तस्मिन्महाभीममनंतमद्भुतं सहस्रमूर्धन्यफणामणिद्युभिः ॥ बिभ्राजमानं द्विगुणोल्वणेक्षणं सिताचला
भं शितिकंठजिकं ॥ ५४ ॥ ददर्श तत्रोगसुखासनं विभुं महानुभावं पुरुषोत्तमं ॥ सांद्रांबुदाभं सुपिशंगवाससं प्रसन्न नमो
वक्त्रं रुचिरायतेक्षणं ॥ ५५ ॥ महामणिव्रातकिरीटकुंडलप्रभापरिक्षिप्तसहस्रकुंतलं ॥ प्रलंबचार्वष्टभुजं सकौस्तु
भं श्रीवत्सलक्ष्मावनमालया वृतं ॥ ५६ ॥ सुनंदनंदप्रमुखैश्च पार्षदैश्चक्रादिभिर्मूर्तिधरैर्निजायुधैः ॥ पुष्ट्या श्रि
या कीर्त्यजयाखिलर्द्धिभिर्निषेव्यमानं परमेष्ठिनां पतिं ॥ ५७ ॥ ववंद ह्यात्मानमजं तमच्युतो जिष्णुश्च तद्दर्शनजातसा
ध्वसः ॥ तावाहनन्नमापरमेष्ठिनां प्रभुर्बद्धांजलीसस्मितमूर्जया गिरा ॥ ५८ ॥ ॥

गसुखासने तस्मिन्नोगोदेहः सुखकरमासनं य
स्य तं ॥ ५५ ॥ महांतो मणिव्राता येषु तेषां किरीटकुंडलानां प्रभातया परिक्षिप्ताः सर्वज्ञोतः स्फुरंतः सहस्रं अपरिमिताः कुंतला यस्य तं ॥ ५६ ॥ की
र्त्या जयाकीर्त्तिसहितया श्रिया जया खिलर्द्धिभिरणिमादिविभूतिभिर्मूर्त्तिधराभिः ॥ ५७ ॥ ऊर्जितया गिरा ॥ ५८ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ उ मेकलावतीर्णौविवितिसंबोधनाद्भी घ्रंमेत्यंतिसकाशं इतंश्चागछंतं॥ ५९॥ ञ्याचरतां आचरंतं॥ दंदतुःस्मार तद्युश्नात्॥ पूर्वमेवकृतमपि श्री
१२७ कृष्णकथनप्रस्तावे तत्रत्रोक्तं॥ ॥ इति दशमे एकोननवतितमोध्यायः॥ ॥ चरमे तु पुनःप्रोक्ता कृष्णलीला समासतः॥ षडुवं शृंप्रसूता नामानंत्यं

द्विजात्मजा मे युवयोर्दिदृक्षुणा मयोपनीता भुवि धर्मगुप्तये॥ कलावतीर्णाववनेर्भरासुरान् हत्वेह भूयस्त्वरयेतमंतिमे॥ ५९॥
पूर्णकामावपि युवां नरनारायणावृषी॥ धर्ममाचरतां स्थित्यै ऋषभौ लोकसंग्रहं॥ ६०॥ इत्यादिष्टौ भगवता तौ कृष्णौ परमेष्ठि
ना॥ ॐमित्यानम्य भूमानमादाय द्विजदारकान्॥ ६१॥ न्यवर्तेतां स्वकं धाम संप्रहृष्टौ यथागतं॥ विप्राय ददतुः पुत्रान् यथारूपं यथा यथारूपं
वयः॥ निशाम्य वैष्णवं धाम पार्थः परमविस्मितः॥ यत्किंचित्पौरुषं पुंसां मेने कृष्णानुकंपितं॥ ६२॥ इतीदृशान्यनेकानि वी
र्याणीह प्रदर्शयन्॥ बुभुजे विषयान् ग्राम्यानीजे चात्यूर्जितैर्मखैः॥ ६३॥ प्रववर्षाखिलान् कामान् प्रजासु ब्राह्मणादिषु॥ नखिला
यथाकालं यथैवेंद्रो भगवान् श्रैष्ठ्यमास्थितः॥ ६४॥ हत्वा नृपानधर्मिष्ठान् घातयित्वार्जुनादिभिः॥ अंजसा वर्तयामास ध एम॰
र्मं धर्मसुतादिभिः॥ ६५॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे द्विजकुमाराहरणं नाम नवाशीतितमोध्यायः॥ ॥
श्रीशुक उवाच॥ ॥ सुखं स्वपुर्यां निवसन् द्वारकायां श्रियः पतिः॥ सर्वसंपत्समृद्धायां जुष्टायां वृष्णिपुंगवैः॥ १॥ ॥ १२७

स चैंकारणं॥ १॥ श्रीकृष्णविभूतिं समासे वदर्शयति॥ सुखंस्वपुर्यामितिसंपदादिविशिष्टायां॥ १॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रियःपतिः षोडशसहस्रपत्नीनामेकवल्लभः सन् तासां गेहेषु रेमे इत्यन्वयः॥५॥ गेहविशेषणं प्रोत्फुल्लेत्यादिश्लोकेन॥६॥ तथा ह्रदिनीषु च अंभो
विगाह्य विजहार महानुदयो वैनवं यस्य सः॥ योषितां कुचकुंकुमैर्लिप्तांगः यत्तस्मान्निःपरिरब्धः॥७॥ सूतमागधवंदिभिः श्लोपनीयमानः॥८॥ नाकि वि

स्त्रीभिश्चोत्तमवेषाभिर्नववयौवनकांतिभिः॥ कंदुकादिभिर्हर्म्येषु क्रीडंतीभिस्तडिद्द्युभिः॥ नित्यं संकुलमार्गायां मदच्युद्भिर्म
तंगजैः॥ स्वलंकृतैर्भटैरश्वैः रथैश्च कनकोज्ज्वलैः॥३॥ उद्यानोपवनाढ्यायां पुष्पितद्रुमराजिषु॥ निर्विशद्भृंगविहगै
र्नादितायां समंततः॥४॥ रेमे षोडशसाहस्रपत्नीनामेकवल्लभः॥ तावंतिविचित्ररूपाणि तद्गेहेषु महर्द्धिषु॥५॥ प्रो
त्फुल्लोत्पलकह्लारकुमुदांभोजरेणुभिः॥ वासितामलतोयेषु कूजद्द्विजकुलेषु च॥६॥ विजहार विगाह्यांभो
ह्रदिनीषु महोदयः॥ कुचकुंकुमलिप्तांगः परिरब्धश्च योषितां॥७॥ उपगीयमानो गंधर्वैर्मृदंगपणवानकान्॥ वाद
यद्भिर्मुदा वीणां सूतमागधवंदिभिः॥८॥ सिंच्यमानोच्युतस्ताभिर्हसंतीभिः स्म रेचकैः॥ प्रतिसिंचन्विचिक्रीडे
यक्षीभिर्यक्षराडिव॥९॥ ताः क्लिन्नवस्त्रविवृतोरुकुचप्रदेशाः सिंचंत्य उद्धृतबृहत्कबरप्रसूनाः॥ कांतं स्म रेचक
जिहीर्षयोपगूह्य जातस्मरोत्सवलसद्वदना विरेजुः॥१०॥ ॥
क्लिन्नवस्त्राः अत एव विवृतोरुकुचप्रदेशाः॥ उद्धृतानि वि
स्रस्तानि बृहत्कबरेभ्यः प्रसूनानि यासां ताः॥ जातेन स्मरेण यः उत्सवस्तेन लसंति वदनानि यासां ताः॥१०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा॰ ट॰ उ॰ तास्मांस्तनेस्रोविषक्तितेकुंकुमास्त्रग्यस्य सः॥क्रीडया अभिषंगेण निनिवेशो नधुतः कंपितः कुंतलवृंदबंधो यस्य सः॥११॥मुकुंदैकधियः समाहिताः स्वस्य रा
१२९ मणिरसः सत्यः पुनस्तमेवेशं चिंतयंतोजडं यथा भवति तथा यानि वाक्यान्यूचुस्तानि मे मनोगदतः स्फुरंत्वित्यर्थः॥१२॥ईश्वरः श्रीकृष्णः स्वपिति स्वंतु तिशानं गेकुर्व
तीविलपसि न शेषे॥स्वैन पिपिति दनुचितमित्यर्थः॥ अथवा नापराधस्त्वनापि रत्या त्राये नाशः॥कृष्ण नलिननयनस्य हासेनसहितमुदारियच्छीलेक्षि॥ तंते

कृष्णस्तु तत्रस्तनविषक्तितकुंकुमस्त्रक्क्रीडाभिषंगधुतकुंतलवृंदबंधः॥ सिंचन्मुकुंद युवतिभिः प्रतिसि च्यमानो रेमे करेणुभिरि
वेभपतिः परीतः॥१४॥ नदानां नर्तकीनां च गीतवाद्योपजीविनां॥ क्रीडालंकारवासांसि कृष्णोदात्तस्य च स्त्रियः॥१४॥ कृष्णस्यैव विह
रतो गत्यालापेक्षितास्मितैः॥ नर्मक्ष्वेलिपरिष्वंगैः स्त्रीणां किल हृताधियः॥१३॥ ऊचुर्मुकुंदैकधियो गिर उन्मत्तवज्जडं चिंतयंत्योर
विंदाक्षं तानि मे गदतः शृणु॥१४॥ ॥श्रीमहिष्य ऊचुः॥ ॥कुररि विलपसि त्वं वीतनिद्रा न शेषे स्वपिति जगति रात्र्यामीश्वरो गुप्त
बोधः॥ वयमिव सखि कच्चिद्गाढनिर्भिन्नचेता नलिननयनहासोदारलीलेक्षितेन॥१५॥ नेत्रे निमीलयसि नक्तमदृष्टबंधुस्त्वं रो
रवीषि करुणं बत चक्रवाकि॥ दास्यं गता वयमिवाच्युतपादजुष्टां किं वा स्रजं स्पृहयसे कबरेण वोढुं॥१६॥ भो भोः सदा निष्टनसे उद राम॰
न्वन्नलब्धनिद्रो [illegible] धिगतप्रजागरः॥ किंवा मुकुंदापहृतात्मलांछनः॥ प्राप्तां दशां त्वं च गतो दुरत्ययां॥१७॥ ॥ १२९
न कश्चिद्गाढनिर्भिन्नचे
तास्त्वमिति॥१५॥ नक्तं रात्रावदृष्टबंधुः सती रोरवीषि किं किं वा नेता वदपि तु वयमिव स्पृहयसे॥१६॥ अलब्धनिद्रः सदा निष्टनसे क्रोशसि किंवास्माभिः प्राप्तां द
शां त्वमपि गतोसि॥ अहो कष्टं यथा वयं संयोगे न मुकुंदापहृतकुचकुंकुमादिलांछनाः॥ तथा त्वमपि पहृतश्रीः कौस्तुभादिलांछनो ऽस्य सो॥१७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुकुंदगदितानि रहस्यानि विस्मृत्य तदेकचिंतया कच्चित्त्वं शिशिरांशोः स्थिवंयमिव स्थगितगीस्तब्धवाक् हे इंदो नस्त्वथैवोपलस्य से ॥ १९ ॥ अप्रियाचरणं
विनास्मरो दारुणो न मन्मथाजननं मलयानिलतल्पानुचितमित्यर्थः ॥ २० ॥ मेघेति आतपार्तिहरणादिसामान्यात्त्वया हृदयेंद्रस्य नूनं दयितः सखासि अतोऽम्
बांस्त्वं ध्यापति मानेलिंगानाकुः ॥ अस्तु त्वं कं गद्वादि ॥ अहो किमिति त्वया तेन सख्यं कृतं यतोऽदुःखं दुःखदस्तम प्रसंगः इति ॥ २१ ॥ हे कोकिलप्रियरावस्य प्रियं

ल त्वं यक्ष्मणा बलवतासि गृहीत इंदो क्षीणस्तमो न निजदीधितिभिः क्षिणोषि ॥ कच्चिन्मुकुंदगदितानि यथा वयं त्वं विस्मृत्य सन्नोस्थगितगी
रुपेक्ष्यसे नः ॥ १८ ॥ किं त्वाचरितमस्माभिर्मलयानिल ते प्रियं ॥ गोविंदापांगनिर्भिन्ने हृदीरयसि नः स्मरं ॥ १९ ॥ मेघ श्रीमंस्त्वमसि दयि
तो यादवेंद्रस्य नूनं श्रीवत्सांकं वयमिव भवान् ध्यायति प्रेमबद्धः ॥ अस्तु त्वं कं मः सबलेहृद् यास्मद्विधो बाष्पधाराः स्मृत्वास्मृत्वा विसृजसि
मुहुर्दुःखदस्त[illegible]तप्रसंगः ॥ २० ॥ प्रियरावपदानि भाषसे मृतसंजीविकया गिरा ॥ कुरवाणि किमद्य ते प्रियं वद मे वल्गितकंठकोकिल ॥ २१
॥ न चलसि न वदस्युदारबुद्धे क्षितिधर त्वं चिंतयसे महांतमर्थं ॥ अपि बत वसुदेवनंदनांघ्रिं वयमिव कामयसे स्तनैर्विधर्त्तुं ॥ २२ ॥ ॥
नया २
वदस्य श्रीहृल्लस्य परानीवपदानि श्लाघ्यं त्वं भाषसे मृतान्संजीवयतीति तथानया कोमलया गिरा वल्गितकंठ रमणीयकंठ मे कथय किं
तव प्रियं करवाणीति ॥ २१ ॥ हे क्षितिधर त्वं न वदसि न च चलसि अतो नूनं महांतमर्थं चिंतयसे बत तर्हि अपि किं वयं यथास्तनैर्विधर्त्तुं
कामयामहे ॥ तथा त्वं शृंगैः गोविंदं कामयसे तुमिति चेत्तर्हि तव बाष्पस्य द्रवस्थानं विष्यतीति ॥ २२ ॥ ॥
१ त्वं स्तनैस्तु १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ द॰ उ॰

१२९

द्वा

नोसिंधुपत्न्यः नद्यः संप्रति ग्रीष्मे सिंधुर्मेघधारा अमृतदृष्ट्या सुषमान्नानंदयति॥ बत अहो एकः अतः श्रुण्वंतो कादायासांताः॥ अपगताः कमलकोशान्नाः हंसा
अवयंपयाप्रियतमस्य नत्रुर्मधुपतेः स्वप्रसिधं॥२३॥ तदेव दैवाद्यागतं हंसं दृतं कलयितारः॥ हंसेति नः अस्मात्प्रति पुरारहस्युक्तं किंवा चलसौहृदः सै
रति॥ स्मृत्वैव मां प्रस्थापितवानिति चेदतआरुः॥ हे सौहृदसुहृत्स्मृतक स्मात्त्वयं त्वत्तामंक्कामा धर्ममाकयति युष्मदाज्ञेति चेदतआरुः॥ अहो तर्हि तं
दृह्यालापय आकारयतुमिति गच्छंतमिव तं पुनराऊः॥ येऽस्मान्वंचपिला एकाकिनीरमते तां श्रियं रूते तमेकमेवालापयामासेंत देकनिष्ठाकथं परिहर्तुं

हंसालाप

श्रुष्मह राः [illegible] बत सिंधुपत्न्यः संप्रत्यपास्तकमलश्रियइष्टनत्रुः॥ यद्वह्वयं यदुपतेः प्रणयावलोकमप्राप्य सुष्टहृद्याः
ताः पुरुकरिंत्रिस्म॥२३॥ हंसस्वागतमास्यतां पिव पयो नूह्यंगस्मैरिः कथां न्दू तेला तु विरामकश्चिदजितः स्वस्त्यास्त उ कं पुराकिं
वानस्वलसौहृदः स्मरति तं कस्माद्जनामो वयं सौजालापर्ममकामदं श्रियमृते सेचैकनिष्ठास्त्रियाः॥२४॥ इती दृशो न य
न्नावेतन्हृस्ये योगेश्वरेश्वरे॥ क्लिश्यमाणेनमाधव्योलेनिरेपरमां गतिं॥२५॥ श्रुतमात्रोपि पत्नीणां मनसस्याकर्णते मनः
॥उरुगायोरुगीतो वापदं प्रीतानां कृतः पुनः॥२६॥ ॥ शकतइतिचेत॥ अतआरुः॥ स्त्रियां जातावेकवचनं अस्मासु स्त्रीषु मध्ये किं से
वैकनिष्ठानतु वयमित्यर्थः॥ पागंतरे सौहृदं मधुतकन्मधुरालापमानं यस्य तं अकामदं अरति प्रदं श्रियमृते वयं कस्माद्जनामः किंल नाहृतापिस
ती पुनः पुनः॥ सेवत्वजतु यतोऽस्माहृदयोपमानि नः स्त्रिय एकनिष्ठाः एकत्रैव स्वमानसिकी निष्ठा यासामिति॥२४॥ तासां हृत्स्ये एकं न्तौ नावो ना
तिविचित्रमित्याह॥ श्रुतमात्रोपीति उरुभिर्गायैगीतैउरुधागीतैः॥ वा यैः कैश्चिदपिगीतैर्यथा कथंचिदपिगीतो वेत्यर्थः॥२५॥ ॥ ॥

राम॰ १२९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२७॥ पदंस्थानं ॥२८॥ ॥२९॥ याः रुक्मिणीप्रमुखाः अष्टौ ताः उदाहृताः प्रागेव ॥३०॥ एवमष्टोत्तरशतं त्र्यधिकषोडशसहस्रमहिषीणां पुत्राः लक्षमेकमशी

पासंपर्य्यचरत्प्रेम्णा पादसंवाहनादिभिः ॥ जगद्गुरुं भर्तृबुध्या तासां किं वर्ण्यते तपः ॥२७॥ एवं वेदोदितं धर्ममनुतिष्ठन्सतां गतिः ॥ गृहं
धर्मार्थकामानां मुहुश्चादर्शयत्पदं ॥ आस्थितस्य परं धर्मं कृष्णस्य गृहमेधिनाम् ॥ २८॥ आसन्षोडशसाहस्रं महिष्यश्च शताधिकं ॥
तासां स्त्रीरत्नभूतानामष्टौ याः प्रागुदाहृताः ॥२९॥ रुक्मिणीप्रमुखा राजंस्तत्पुत्राश्चानुपूर्वशः ॥ एकैकस्यां दश दश कृष्णोऽजीजनदात्म
जान् ॥३०॥ यावत्य आत्मनो भार्या अमोघगतिरीश्वरः ॥ तेषामुद्दामवीर्याणामष्टादश महारथाः ॥३१॥ आसन्नुदारयशसस्तेषां ना
मानि मे शृणु ॥ प्रद्युम्नश्चानिरुद्धश्च दीप्तिमान्भानुरेव च ॥३२॥ साम्बो मधुर्बृहद्भानुश्चित्रभानुर्वृकोऽरुणः ॥३२॥ पुष्करो वेदबा
हुश्च श्रुतदेवः सुनंदनः ॥ चित्रबाहुर्विरूपश्च कविर्न्यग्रोध एव च ॥ एतेषामपि राजेंद्र तनुजानां मधुद्विषः ॥३३॥ प्रद्युम्न आसीत्प्रथ
मः पितृवद्रुक्मिणीसुतः ॥३४॥ स रुक्मिणो दुहितरमुपयेमे महारथः ॥ तस्मात्सुतोऽनिरुद्धोऽभून्नागायुतबलान्वितः ॥३५॥ स चापि रु
क्मिणः पौत्रीं दौहित्रो जगृहे ततः ॥ वज्रस्तस्याभवद्यस्तु मौसलादवशेषितः ॥३६॥ प्रतिबाहुरभूत्तस्मात्सुबाहुस्तस्य चात्मजः ॥ सुबा
हुः शांतसेनोऽभूत्शतसेनस्तु तत्सुतः ॥३७॥ न ह्येतस्मिन्कुले जाता अधना अबहुप्रजाः ॥ अल्पायुषोऽल्पवीर्याश्च अब्रह्मण्याश्च ज
ज्ञिरे ॥३८॥ यदुवंशप्रसूतानां पुंसां विख्यातकर्मणां ॥ संख्या न शक्यते कर्तुमपि वर्षायुतैर्नृप ॥३९॥४०॥

सुतैरेकषष्टिसहस्राणि च भवंति

॥ अनिरुद्धश्चेति ॥ अतः पुत्राणां मध्ये सप्तदशैव महारथा ज्ञेयाः ॥ अथवा अनिरुद्धनामा कश्चित्सुत एवेति ॥ ३१॥ ३२॥ ३३॥ ३४॥ ३६॥ ३७॥ ३९॥ ४०॥

पूं२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskfit University Ramtek Collection

९.उ सहस्राणाम् अपरिमितानां कुमाराणामित्यन्वयः ॥४१॥ यदा प्रत्येकं बहून्यब्दायुतानामाचार्याणामियं संख्या तदपि श्रुतमात्रं ननु सम्यक्कुज्ञापते ॥ तदा कुमाराणा
१३० मेव संख्या तं कर्त्तुं न शक्यत इत्युक्तः पुनः सर्वेषां या स्वानामिति ॥४२॥ ते चोत्पन्ना इति प्रत्येकं वक्कुचीरूपैरिति ज्ञेयं ॥४३॥ एवमेव यदुकुलेपि देवा इति श्चाचो य
क्तं सहस्रशः समुद्भूता देवा यदुकुले पृथगिति ॥४४॥ तस्मात्कृष्णकीर्त्तेः सर्वतीर्थोत्तमत्वं कृष्णस्य च सर्वदेवोत्तमत्वं न चित्रमित्याह तीर्थचक्र इति ॥ इ
तः पूर्वं स्वःसरिद्देवगंगा सर्वतोधिकं तीर्थमित्यासीत् ॥ इदानीं तु यदुषु यदजनि जातं तीर्थं श्रीकृष्णकीर्त्तिरूपं एतत्स्वःसरिद्रूपं पादशौचं चातीर्थं कुनं च ल्पे

ति स्वःकोद्धः सहस्राणाम् अष्टाशीतिशतानि च ॥ आसन्यदुकुलाचार्याः कुमाराणामिति श्रुतिः ॥४१॥ संख्यानं यादवानां कः करिष्यति महात्म
नां ॥ यत्रायुतानामयुतलक्षेणास्ते स आहुकः ॥४२॥ देवासुराहवहता ये दैतेयाः सुदारुणाः ॥ ते चोत्पन्ना मनुष्येषु प्रजा [illegible] बबाधिरे ॥४३॥ तन्नि सा
ग्रहाय हरिणा प्रोक्ता देवा यदोः कुले ॥ अवतीर्णाः कुलशतं तेषामेकाधिकं नृप ॥४४॥ तेषां प्रमाणं भगवान्प्रभुत्वेनाभवद्धरिः ये चानुवर्त्तिनस्तस्य ववृ
धुः सर्वयादवाः ॥४५॥ शय्यासनाटनालापक्रीडास्नानाशनादिषु ॥ न विदुः सन्तमात्मानं वृष्णयः कृष्णचेतसः ॥४६॥ तीर्थं चक्रे नृपोनं यदजनि यदुषु स्वः रम.
सरित्पादशौचं विद्विट्स्निग्धाः स्वरूपं ययुरजितपराश्रीर्यदर्थेन्ययत्नः ॥ यन्नामामंगलघ्नं श्रुतमथ गदितं यत्कृतो गोत्रधर्मः कृष्णस्यैतन्न चित्रं क्षिति १३०
भरहरणं कालचक्रायुधस्य ॥४७॥ ॥ चक्रे स्वयमेव सर्वतीर्थेभ्योपि विराजत इत्यर्थः ॥ श्रीकृष्णस्य विद्विषः स्निग्धाश्च तत्सारूप्यं ययुरित्यपि नातिचित्रं तस्य परम
कारुणिकत्वात् यथेदं च न चित्रं किं तत् ॥ अजितपराश्रितापि लक्ष्मीः यदर्थे प्रार्थनापरा सर्वतः परिपूर्णा श्रीकृष्णस्यैव नान्यस्येति तदेवाह ॥ यदर्थेऽन्येषां ब्रह्मादीनां
यत्न इति ॥ ननु निरपेक्षं तमेव लक्ष्मीः श्रयत इति चित्रमेवेति चेत् न हि परममंगलं नामधेयमत्रात्र तस्येत्याह ॥ यन्नामेति ॥ तदपि नाश्चर्यं स्मरणापेक्षमित्या
ह ॥ श्रुतमथ गदितमिति ॥ सर्वधर्माश्रयत्वादपीत्याह ॥ यत्कृतो गोत्रधर्म इति ॥ गोत्रेषु तत्तद्वंशेषु धर्मो यत्कृतः येन प्रवर्त्तितः तस्य क्षितिभरहर
णं नैव चित्रमित्याह कृष्णस्यैतदिति कालचक्रायुधस्येति सर्वसंहारककालमन्त्रैः किंशिषतो दुरन्तप्रभावचक्रायुधस्येति किमु देतदित्यर्थः ॥४७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीमतभागवत्षष्टस्कंध॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षेत्रा

यत्रादतः पुत्रायंते महाकल्पषपर्वतोविसर्गसिंतवाजीवास्वमर्यादासुसंस्थितान्
त्स्याषष्टेपोषणं ख्यते अतिलंघितमर्यादिनकरहरणलक्षणं ।२। अजामिलोमतु।
वासवः ।४ अजामिलस्यनकंवेविष्णुदूतैर्निरूपितं संकेतनगवन्नामपुत्रंस्नेहानुष
र्युयंश्रुतुनिर्जयजीवितः ।६ तत्रादौनिचिरध्यायेरजामिलकथोच्यते विष्णुरूपु
नंततोदूत्तिः धाम्नांचमरुदाख्यानमेवंप्रकरणक्रमः ।४ तत्रादौप्रथमेविष्णोर्दूतैः

राजोवाच निवृत्तिमार्गः कथितः आदौभगवतायथा क्रमयोगोपलब्धेनब्रह्मणायदसंसृतिः ।१। प्र
वृत्तिल ... श्चैवत्रैगुणपविषयोमुने योसावलीनप्रकृतेर्गुणसर्गः पुनःपुनः ।२। श्रीरामः ॥ आत्मला ॥

यथा

... तस्यापरव्यापनायोक्तंपाम्येधर्मादिलक्षणं ।९ अथपष्ठस्कंधोव्याख्यायते पूर्वोक्तानुवादपूर्वकंनिरंतरोक्तनरकपरिहारोपायंप्रच्छति।
इतिपद्भिः आदौद्वितीयस्कंधेवैश्वानरंयातीत्यादिनाभगवतात्वयायेयावत् यत् येनमार्गेणयोगेचिरादिप्राप्तिः तेनोपलक्षो ब्रह्मतेनसहा
तोभवति ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंवरे। परस्यांतेकृतात्मानः प्रविशंतिपरंपदमितिवचनात् ।१। त्रैगुणपंस्वर्गादिसुखंतेदेवविषय
...नाप्रकृतिर्यस्यतस्यपुंसः पुनःपुनर्गुणसर्गोभोगार्थंदेहारंभरूपोमार्गः सचकथितः तृतीयेदक्षिणेनयथार्यम्णःपितृलोकंव्रजंति
तद्इत्यादिना ।२। ःरामः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७ सिद्धांतस्तत्रनिर्दहं समतेनीशाब्धः।। सांख्यादिपरिकल्पितप्रधानादिवैदांते षु भलपाद्यते कुतः अशब्द ॥ एवं व्याख्यातीयावति खपुष्पवृत्तशृंगरः।।शशशृंगधनुर्धर इत्यादिभ्यः २
७ देहिसंसिद्धिकर्तृत्वे प्रधानं न जगत्कर्तुः ईक्षणपूर्वकसृष्टिकर्तृत्वात् स ऐक्षतेतिश्रुतिपादितं ॥७ अशब्दं हि तत्तत्कथं ईक्षतेः चेतनत्वश्रवणादित्यर्थः।। न शब्दं वेदः प्रतिपादको यस्य तत्।।७।।

ती

प्रतिपादनाप्रतिपादनाय तदितरस्य मिथ्यात्वमुक्तं। तत्र मृषैवायं त्रिसर्गो न वस्तुतः सन्निति। यत्सत्येन प्रतीतं तदुपाधिसंबंधं वारयति। स्वे
नैव धाम्ना महसा निरस्तं कुहकं कपटं यस्मिन्तं। तटस्थलक्षणमाह। जन्मादीति। अस्य विश्वस्य जन्मस्थितिभंगं यतो भवति तं धीमही
ति। तत्र हेतुः अन्वयादितरतश्चार्थेषु परमेश्वरस्य सद्रूपेणान्वयात् कार्येभ्यश्च खपुष्पादिभ्यश्च व्यतिरेकात्। यद्वा अन्वयशब्देनानुवृत्तिरित
रशब्देन व्यावृत्तिः अनुवृत्तत्वात् सद्रूपं ब्रह्म कारणं मृत्सुवर्णादिवत्। व्यावृत्तत्वात् विश्वं कार्यं घटकुंडलादिवदित्यर्थः। यद्वा सावयवत्वादन्वय
व्यतिरेकाभ्यां यदस्य जन्मादि तद्यतो भवतीति संबंधः। तथा च श्रुतिः। यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंती
त्याद्या। स्मृतिश्च। यतः सर्वाणि भूतानि भवंत्यादियुगागमे। यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये इत्याद्याः। तर्हि किं प्रधानं जगत्कारणत्वा
त्तथेयमभिप्रेतं नेत्याह। अभिज्ञो यः तं स ऐक्षत लोकान्नु सृजा इति। स इमांल्लोकानसृजतेति श्रुतेः। ईक्षतेर्नाशब्दमिति न्यायाच्च तर्हि जीवः
स्यान्नेत्याह। स्वराट् स्वेनैव राजते यः स्वतः सिद्धज्ञानवानित्यर्थः। तर्हि किं ब्रह्मादिरेव। हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीदि
ति श्रुतेः। नेत्याह। तेने इति। आदिकवये ब्रह्मणेऽपि ब्रह्म वेदं यः तेने प्रकाशितवान्। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति श्रुतेः। ननु ब्रह्मणोऽन्यतो वेदाध्ययनमप्रसिद्धं सत्यं तत्तु हृदा मनसैव तेने। अ
नेन बुद्धिवृत्तिप्रवर्तकत्वेन गायत्र्यर्थोऽपि दर्शितः। वक्ष्यति हि। प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि। स्वलक्षणा प्रादु
रभूत्किलास्यतः स मे ऋषीणामृषभः प्रसीदतामिति। ननु ब्रह्मा स्वयमेव सुप्तप्रतिबुद्धन्यायेन वेदमुपलभतां नेत्याह। यद्यस्मिन् ब्रह्म
णि सूरयोऽपि मुह्यंतीति। तस्माद्ब्रह्मणोऽपि पराधीनज्ञानत्वात्। सिद्धज्ञानः परमेश्वर एव जगत्कारणं। अत एव सत्यः अस्मतः सत्ताप्र
त्वाच्च परमार्थसत्यः सर्वज्ञत्वेन च निरस्तकुहकं। तं धीमहीति गायत्र्या प्रारंभेण च गायत्र्याख्यब्रह्मविद्यारूपमेतत्पुराणमिति दर्शितं
यथोक्तं मत्स्यपुराणे पुराणसंख्यानप्रस्तावे। यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः। वृत्रासुरवधोपेतं तद्भागवतमिष्यते। लिखित्वा त

सवितुर्देवस्य तत्पदद्वयं व्याचष्टे।।यत इति वरेण्यमित्यस्य।।
विवरणं परमिति।। भर्गदत्यस्य व्याख्या स्वराडिति धाम्नस्वेन स्व।।
दा निरस्तकुहकमिति वा तत्त्रीयपदस्य व्याख्याने तेने ब्रह्म।।
हृदाय आदिकवय इति।।

७ विपूर्वी ईर्ष्यातिः करोत्यर्थः। पूर्वं कल्पादौ ब्राह्मणो तिद्दातिसर्ग श्यामय यत्राविवक्षाओलोकारवुद्धो प्रकाशलर
७ तित योक्तल तामस्यादिभोक्ता सधीरति व्यापामि त्यर्थः।।प्रारंभे गुरुत्वात् वेंदइति देव विशेषणं ७

नल
७त
ल
तो॰
सं॰
जं॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

। यच्छ्रुत्वा श्रद्धयोपेतो नरो न निरयं व्रजेत् ॥१॥

भा०प्र० न्वयो दद्याद्धेमसिंहसमन्वि[illegible]तं प्रोष्टपद्यां पौर्णमास्यां स याति परमं पदं ॥ अष्टादशसहस्राणि पुराणं तत्प्रकीर्तितं ॥ पुराणांतरे च ॥ ग्रंथो
२ ष्टादशसाहस्रो द्वादशस्कंधसंमितः ॥ हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा ॥ गायत्र्या च समारंभस्तद्वै भागवतं विदुः ॥ पद्मपुराणे अंबरीषं पुराणम् स्ती
प्रति गौतमवचनं ॥ अंबरीष शुकप्रोक्तं नित्यं भागवतं शृणु ॥ पठस्व स्वमुखेनापि यदीच्छसि भवक्षयमिति ॥ अत एव भागवतं नामान्यदित्य
पि न शंकनीयं ॥ इदानीं श्रोतृप्रवर्तनाय श्रीभागवतस्य कांडत्रयविषयेभ्यः सर्वशास्त्रेभ्यः श्रैष्ठ्यं दर्शयति ॥ धर्म इति ॥ अत्र श्रीमति सुंदरे भा
श्री गवते परमो धर्मो निरूप्यते ॥ परमत्वे हेतुः प्रकर्षेणो[illegible]तं कैतवं फलाभिसंधिलक्षणं कपटं यस्मिन् सः प्रशब्देन मोक्षाभिसंधिरपि निरस्तः
केवलमीश्वराराधनलक्षणो धर्मो निरूप्यत इति ॥ अधिकारितोपि धर्मस्य परमत्वमाह ॥ निर्मत्सराणां परोत्कर्षासहनं मत्सरः तद्रहितानां स
तां भूतानुकंपिनां एवं कर्मकांडविषयेभ्यः शास्त्रेभ्यः श्रैष्ठ्यमुक्तं ॥ ज्ञानकांडविषयेभ्योपि श्रैष्ठ्यमाह ॥ वेद्यमिति ॥ वास्तवं परमार्थभूतं वस्तु वेद्यं

॥ धर्मः प्रोज्झितकैतवोत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनं ॥ श्रीमद्भागवते महामुनिकृते ॥
॥ किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥२॥

ननु वैशेषिकादीनां द्रव्यगुणादिरूपं ॥ यद्वा वास्तवत्वा
द्वेन वस्तुनोंशो जीवो वस्तुनः शक्तिर्माया च वस्तुनः कार्यं जग[illegible]च्च तत्सर्वं वस्त्वेव न ततः पृथगिति वे[illegible]द्यं अप्रयत्नेनैव ज्ञातुं शक्यत ततः किमतस्त्वा
ह शिवदं परमसुखदं ॥ किंच ॥ अध्यात्मिकादितापत्रयोन्मूलनं च ॥ अनेन ज्ञानकांडविषयेभ्यः श्रैष्ठ्यं दर्शितं ॥ कर्तृतोपि श्रैष्ठ्यमाह ॥ महामुनिः
श्रीनारायणः तेन प्रथमं संक्षेपतः कृते देवताकांडगतश्रैष्ठ्यमाह ॥ परैः शास्त्रैस्तदुक्तसाधनैर्वा ईश्वरो हृदि किं वा सद्य एवावरुध्यते स्थि राम
री क्रियते वा च शब्दः कटाक्षे ॥ किंतु विलंबेन कथंचिदेव अत्र तु शुश्रूषुभिः श्रोतुमिच्छद्भिरेव तत्क्षणादेवरुध्यते ॥ इदमेव तर्हि किमिति स २
र्वैर्न शृण्वंति तत्राह ॥ कृतिभिरिति ॥ श्रवणेच्छा तु पुण्यैर्विना नोत्पद्यत इत्यर्थः ॥ तस्मात्कांडत्रयार्थस्यापि यथावत्प्रतिपादनादिदमेव स
र्वशास्त्रेभ्यः श्रेष्ठं अतो नित्यमेतदेव श्रोतव्यमिति भावः ॥२॥ ॥श्री॥ ॥श्री॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानीं तु न केवलं सर्वशास्त्रेभ्यः श्रेष्ठत्वादस्य श्रवणं विधीयते । अपि तु सर्वशास्त्रफलरूपमिदम् अतः परमादरेण सेव्यमित्याह ॥ निग
२ ए मेति । निगमो वेदः स कल्पतरुः सर्वपुरुषार्थोपायत्वात् तस्य फलमिदं भागवतं नाम । तत्तु वैकुंठगतं नारदेनानीय मह्यं दत्तं मया च शुक
स्य मुखे निहितं । तच्च तन्मुखाद्भुवि गलितं शिष्यप्रशिष्यादिरूपपल्लवपरंपरया शनैरखंडमेवावतीर्णं न तूच्चनिपातेन स्फुटितमित्यर्थः

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं ॥ ॥

॥ एतच्च न विष्यदपि नूतवत्त्रिविशिष्टं ॥ अनागतास्माने नैवास्य शास्त्रस्य प्रवृत्तेः अत एवामृतरूपेण द्रवेण संयुतं । लोके हि शुकमुखस्पृष्टं फ
लममृतमिव स्वादु भवतीति प्रसिद्धं । अत्र शुको मुनिः अमृतं परमानंदः स एव द्रवो रसः रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीति श्रु
तेः अतः हे रसिकाः हे रसम[illegible]त्त्वापि भावुकाः हे रसविशेषभावनाचतुराः अहो तु विगलितमित्यलम्फलानो निः ॥ इदं भागवतं नाम
फलं मुहुः पिबत ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२५ः

ननुत्वगस्थ्यादिकंविहाय ...द्रसःपीयतेकथंफलमेवपातव्यंतत्राहारसंरसरूपं अतःत्वगस्थ्यादेर्हेयांशस्याभावात्फलमेवकृत्स्नं
पिबत। अत्रचरसतादात्म्यविवक्षयारसवद्वस्तुरसःविवक्षितत्वाद्गुणवचनेपिरसशब्देमतुपःप्रत्ययस्याभावात्तेनविनैवरसंफलमितिसामा
नाधिकरण्यं। तत्रफलमित्युक्तेपानासंभवोहेयांशप्रसक्तिश्चस्यादितितन्निवृत्त्यर्थंरसमित्युक्तं। रसमित्युक्तेपिगलितस्परसस्यपा

पिबतभागवतंरसमालयंमुहुरहोरसिकाभुविभावुकाः॥३॥ ॥

ज्य

रा तृमैक्यत्वात्फलमित्युक्तमितिद्रष्टव्यं॥ ननुभागवतामृतपानंमोक्षेऽपिस्या...मित्याह॥ आलयंलयोमोक्षःअभिविधावाकारःलयमभिव्या राम
प्यनहिइदंस्वर्गादिसुखवत्मुक्तैरुपेक्ष्यतेकिंतुसेव्यतएववक्ष्यतिहि॥ आत्मारामाश्चमुनयोनिर्ग्रंथाअप्युरुक्रमे॥ कुर्वंत्यहैतुकींभक्ति ॥३॥
मित्थंभूतगुणोहरिरिति॥३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवमनेन श्लोकत्रयेण विशिष्टेष्टदेवतानुस्मरणपूर्वकं प्रारिप्सितस्य शास्त्रस्य विषयप्रयोजनादिवैशिष्ट्येन स्वस्य सेव्यत्वेन च श्रोतॄन
भिमुखीकृत्य शास्त्रमारभते। नैमिशे इति। ब्रह्मणा विसृष्टस्य चक्रस्य नेमिः शीर्यते कुण्ठीभवति यत्र तन्नैमिशं नैमिशमेव नैमिशं। तथा च

नैमिशेऽनिमिषक्षेत्रे ऋषयः शौनकादयः। सत्रं स्वर्गाय लोकाय सहस्रसममासत॥४॥ ॥

वायवीये। एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते। यत्रास्य शीर्यते नेमिः स देशस्तपसः शुभः। इत्युक्त्वा सूर्यसंकाशं चक्रं सृष्ट्वा मनोमयं। प्र
णिपत्य महादेवं विससर्ज [illegible]पितामहः। ते पि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुं। प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्यशीर्यत। तद्वनं तेन विख्यातं नै
मिशं मुनिपूजितमिति। नै[illegible] इति पाठे वाराहपुराणोक्तं द्रष्टव्यं॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प्र०
स्तेत

३ स्वः नं २

तथाहिगौर॥ मुखमृषिं [illegible]निगवद्याकं॥ एवंकृत्वाततोदेवोमुनिगौरमुखंतदा॥ उवाचनिमिषेणेदंनिहतंदानवंबलं॥ अरण्येऽस्मिं
स्ततन्नैमिषारण्यसंज्ञितं॥ नविष्यातियथार्थं॥ वैब्राह्मणोंविशेषकमिति॥ अनिमिषः श्रीविष्णुः अभुसहोषित्वात्तस्येदंनैतथाचात्रैव
शौनकादिवचनं॥ क्षेत्रेऽस्मिन्वैस्त्रवेवयमिति॥ स्वर्गेगीयतेइतिस्वर्गीयोहरिःसएवलोकः नक्रानांनिवासस्थानंतस्मैतत्वाभय
इत्यर्थः सहस्रसमाः संवत्सराः अनुष्ठानकालोयस्मतत्सत्रं सत्रसंज्ञकंकर्मोदिश्यआसतउपविविशुः॥ यथाआसतअकुर्वतेत्य
र्थः आलभेत निर्वपति॥ उपयंतीत्यादिवत्प्रत्ययोच्चारणमाचार्यत्वेन आसनधात्वर्थस्याविवक्षितत्वात्॥ ४॥ ॥

वायव्यंश्वेतमालभेत॥ आग्नेयंचरुंनिर्वपति॥ प्रतितिष्ठंतिहवाएतेयएताराचीरुपयंतिइत्यादिवत्रात्रीःसत्राणि॥ ॥ ॥ राम
॥४॥

प्रातःकालेकृताएवहुताअग्नयोयैस्तेअनेननित्यनैमित्तिकहोमसाकल्यंदर्शितं॥ इदंवक्ष्यमाणंआदरात्पप्रच्छुः॥५॥ विविदिषितानर्थान्
पृष्टुंसूतस्यसर्वशास्त्रज्ञानातिशयमाहत्रिभिःत्वयेतित्रिभिःश्लोकैः॥ इतिहासोमहाभारतादिःतत्सहितानिनकेवलमधीतानिअपितुआख्या
तान्यपिआख्यातानिचउतअपियानिधर्मशास्त्राणिएतान्यपि॥६॥ किंच॥ यानीत्यादिविदांविदुषांमध्येश्रेष्ठः॥ यानिवेद॥ परावरेसगु

तएकदातुमुनयःप्रातर्हुतहुताग्नयः॥ सत्कृतंसूतमासीनंपप्रच्छुरिदमादरात्॥५॥ ऋषयऊचुः॥ ॥त्वयाखलुपुरा
णानिसेतिहासानिचानघ॥ आख्यातान्यप्यधीतानिधर्मशास्त्राणियान्युत॥६॥ यानिवेदविदांश्रेष्ठोभगवान्बादरायणः
अन्येचमुनयःसूतपरावरविदोविदुः॥७॥ वेत्थत्वंसौम्यतत्सर्वंतत्त्वतस्तदनुग्रहात्॥ ब्रूयुःस्निग्धस्यशिष्यस्यगुरवोगु
ह्यमप्युत॥८॥ तत्रतत्राञ्जसायुष्मन्भवतायद्विनिश्चितं॥ पुंसामेकांततःश्रेयस्तन्नःशंसितुमर्हसि॥९॥ ॥

णंनिर्गुणंब्रह्मसगुणंविदंतीतितथा॥७॥ वेत्थजानासि॥ सौम्यहेसाधोतेषामनुग्रहात्॥ तत्वतोज्ञानेहेतुमाह॥ ब्रूयुरितिस्निग्धस्यप्रेमवतः॥ उत
एवंरहस्यमपिब्रूयुरेव॥८॥ अंजसायंयाथार्थ्येनएकांततःश्रेयःआत्यन्तिकंश्रेयःसाधनं॥९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्येपि बहुना कालेन बहु[illegible]श्रवणादिति विनिश्चितं तु नेत्याह प्रायेणेति ॥ हे साधो सभ्य अस्मिन् युगे कलौ अल्पायुषो जनाः तत्रापि मं
दा अलसाः तत्रापि सुमंदमतयः तत्रापि मंदभाग्याः विघ्नाकुलाः तत्रापि उपद्रुता रोगादिभिः ॥१०॥ नन्वेवं बहुशास्त्रश्रवणे ॥ पितावतैव फल श्री
सिद्धिरित्याह ॥ भूरीणि कर्माणि अनुष्ठेयानि येषु तानि सन्तु श्रुतस्य यावद्भूतस्य येनो द्धृतवचनेन आत्मा बुद्धिः सुप्रसीदति सम्यगुपशाम्यति

प्रायेणाल्पायुषः साधो कलावस्मिन् युगे जनाः ॥ मंदाः सुमंदमतयो मंदभाग्या ह्युपद्रुताः ॥१०॥ भूरीणि भूरिकर्माणि श्रोतव्या
नि विभागशः ॥ अतः साधोत्र यत्सारं समुद्धृत्य मनीषया ॥११॥ ब्रूहि नः श्रद्दधानानां येनात्मा सुप्रसीदति ॥ सूत जानासि भद्रं
ते भगवान् सात्वतां पतिः ॥ देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया ॥१२॥ तन्नः शुश्रूषमाणानामर्हस्यंगानुवर्णितुं ॥ यस्याव
तारो भूतानां क्षेमाय च भवाय च ॥१३॥ ॥

॥११॥ अस्मांतरं सूत जानासीति पंचमी ॥ भद्रं ते इत्यौत्सुक्येनाशीर्वादः ॥ भगवान् निरतिशयैश्वर्यादिगुणः
सात्वतां सत्वश्रेन सत्वमूर्तिर्भगवान् स उपास्यतया विद्यते येषां इति सत्वतो भक्ताः स्वार्थे अण् सत्वसंबायसा दिवत्तस्य वा श्रवणमाषतं दैवं सातं
तश्च तिनव ति तेषां पतिः पालकः यस्य अर्थविशेषस्य चिकीर्षया वसुदेवस्य भार्यायां देवक्यां जातः ॥१२॥ अंग हे सूत तन्नो वर्णयितुं अर्हसि ॥ सामा राम
न्यतस्तावद्यस्यावतारो भूतानां क्षेमाय पालनाय भवाय समृद्धये ॥१३॥ ॥ ॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२यमोपि२ यं१

तस्य नानावमनुवर्णितस्य यशः श्रवणौत्सुक्यमाविः कुर्वंति। आपन्न इति त्रिभिः। संसृतिमापन्नः प्राप्तः विवशोपि ततः संसृतेः अत्र हेतुः यद्य
तो नाम्नः भयमपि स्वयं बिभेति॥१४॥ किंच यस्य पादः संश्रयो येषां अत एव प्रशमो अयनं वर्त्म आश्रयो वा येषां ते मुनयः उपस्पृष्टाः संनिधिमा
त्रेण सेविताः सद्यः पुनंति स्वर्धुनी गंगा तस्याः आपः तत्पादान्निःसृताः न तत्रैव तिष्ठंति अत तस्य संबंधेन पुनंत्यो पि अनुसेवया पुनंति

आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्॥ ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयम्॥१४॥ यत्पादसंश्रयाः सूत मुनयः प्रश्र
मायनाः॥ सद्यः पुनंत्युपस्पृष्टाः स्वर्धुन्यापो नुसेवया॥१५॥ को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः॥ शुद्धिकामो न शृणुयात्
यशः कलिमलापहं॥१६॥ तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः॥ ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः॥१७॥ ॥
अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः॥ लीला विदधतः स्वैरमीश्वरस्यात्ममायया॥१८॥ ॥

१संसारदुःखोपनाशनं१

तत्र सद्य इति मुनीनामुत्कर्षोक्तिः॥१५॥ पुण्यश्लोकैरीड्यानि स्तुत्यानि कर्माणि यस्य तस्य यशः॥१६॥ प्रश्नांतरं तस्येति उदाराणि महांति विश्व
सृष्ट्यादीनि सूरिभिर्नारदादिभिः कलाः ब्रह्मरुद्रादिमूर्तीः॥१७॥ अथेति प्रश्नांतरे अवतारकथाः स्थित्यर्थमेव तत्तदवसरे ये मत्स्या
द्यवताराः तदाश्रयाः कथा[illegible]वैरं लीलाः कुर्वतः श्रीकृष्णावतारप्रयोजनप्रश्नेनैव तत्त्वरितं प्रश्नोपि [illegible]जात एव॥१८॥ ॥ ॥

१यशः१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ त्रस्य२

एवं श्रद्धयौत्सुक्येन पुनरपि पृच्छ[illegible]रन्तो निम्मेव श्रोतुमिच्छंतस्तत्रात्मनस्तृष्णावमावेदयंति॥ वयंत्विति॥ योगयागादिषु तृप्ताः स्मः उत्‌ ऊर्द्ध्वं तितमो यस्मा
त्स उत्तमः स श्लोकोयशो यस्य तस्य विक्रमे तु विशेषेण न तृप्यामः॥ अलमिति न मन्यामहे॥ तत्र हेतुः यद्विक्रमं शृण्वतां॥ यद्वा अन्ये तृप्यन्तु ना
म वयं तु नेति त्रिकृष्टस्यान्वयः॥ अयमर्थः नेधाद्यलंबुद्धिर्भवति॥ उदरादिभरणेन रसास्वादनेन वा स्वादुविशेषाभावात्तत्र शृण्वतामित्यनेन
श्रोत्रस्याकाशत्वान्न भरणमित्युक्तं॥ रसज्ञानामित्यनेन चाज्ञानतः पशुवत्तृप्तिर्निरस्ता इत्युक्तं पुनरपि बहुसान्तराभावेन तृप्तिं निराकरो

वयं तु न वितृप्याम उत्तमश्लोकविक्रमे॥ यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे॥१९॥ कृतवान्किल वीर्याणि सह रामेण
केशवः॥ अतिमर्त्यानि भगवान्गूढः कपटमानवः॥२०॥ कलिमागतमाज्ञाय क्षेत्रेऽस्मिन्वैष्णवे वयम्॥ आसीना दीर्घ
सत्रेण कथायां सक्षणा हरेः॥२१॥ ॥

ति पदे पदे प्रतिक्षणं स्वादुतोऽपि स्वादु॥१९॥ अतः श्रीकृष्णचरित्राणि कथयेत्याशयेनाह॥ कृतवानिति॥ अतिमर्त्यानि मर्त्यानतिक्रान्तानि गो
वर्द्धनोद्धरणादीनि मनुष्येष्वसंभावितानीत्यर्थः॥२०॥ ननु याजनाध्यापनादिकर्माणि कृतवन्तः एतच्छ्रवणावकाशः स्यात्कथमत आह॥ कलि
मागतं ज्ञात्वा तत्क्रियाविघ्नपदं गन्तुकामाः दीर्घसत्रेण निमित्तेनात्रासीना हरेः कथायां सक्षणाः लब्धावसराः॥२१॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्मिंश्च समये त्वद्दर्शनमीश्वरेणैव संपादितमिति अभिनंदंति । त्वमिति कलिमिस्तर्तुमिच्छतां असएवंतीतिर्षतां कर्णधारो नाविकइ
व ॥ २२ ॥ पुनः प्रश्नांतरं ब्रूहीति धर्मस्य वर्मणि कवचवद्रक्षके स्वां काष्ठां मर्यादां स्वरूपमित्यर्थः ॥ अस्य चोत्तरं कृष्णे स्वधामोपगते धर्मज्ञा
नादिभिः सहेत्यस्यां श्लोके ॥ २३ ॥ ॥ इति श्रीभागवते भावार्थदीपिकायां प्रथमस्कंधे टीकायां प्रथमोऽध्यायः ॥ १ ॥ तदेवं प्रथमेध्याये

त्वन्नः संदर्शितो धात्रा दुस्तरं निस्तितीर्षतां ॥ कलिं सत्वहरं पुंसां कर्णधार इवार्णवं ॥ २२ ॥ ब्रूहि योगेश्वरे कृष्णे ब्रह्म
ण्ये धर्मवर्मणि ॥ स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः ॥ २३ ॥ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे प्रथ
मोऽध्यायः ॥ १ ॥ ॥ व्यास उवाच ॥ इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः ॥ प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्र
मे ॥ १ ॥

षट् प्रश्ना मुनिभिः कृताः ॥ द्वितीये तूत्तरं सूतश्च वर्णमाहतेषु च । विप्राणामिति एवंभूतैः सम्यक् प्रश्नैः सम्यक् हृष्टः रोमहर्षणस्य पुत्रः तु
प्रश्नवाः तेषां वचः प्रतिपूज्य सत्कृत्य प्रवक्तुमुपक्रांतवान् ॥ १ ॥ ॥ श्रेयः ऐकांतिकं सर्वशास्त्रसारं ततः परं सूत जानासि तस्याप्यारंभात् हि
श्रीकृष्णकर्म च ॥ ब्रूहि यो[illegible]श्वरे कृष्णे सूतं सत्कृत्य सादरैः ॥ इत्य ते प्रथमेध्याये षट् प्रश्ना मुनिभिः कृताः ॥ १ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प्र०
७

प्रवचनस्योपक्रमोनामगुरु[illegible]तानमस्कारइति। नमाहमिति। तत्रस्वगुरोःशुकस्यैश्वर्यंतिरस्कारितेनैवद्योतयन्नाह। यंप्रव्रजंतंसंन्यासग
छंतंअनुपेतम। अनुपनयुक्तंअनुपनयनाद्यमनुपसन्नंलौकिकेनाप्यनुपेतंजनैरनुगतमेकाकिनमित्यर्थः। तत्रहेतुः। अपेतकृत्यंकृत्यशून्यं
कर्ममार्गेष्वप्रवर्तमानंनैष्ठिकत्वात्द्वैपायनोव्यासःविरहात्कातरोभीतः पुत्र। इतिप्लुतेनाजुहावआहूतवान्। दूराद्धानेप्लुतेमत्य

सूतउवाच॥ यंप्रव्रजंतमनुपेतमपेतकृत्यंद्वैपायनोविरहकातरआजुहाव॥
पुत्रेतितन्मयतयातरवोऽभिनेदुस्तंसर्वभूतहृदयंमुनिमानतोस्मि॥२॥ ॥

पिसंधिरार्षः। तदातन्मयतयाशुकरूपतयातरवोऽभिनेदुःप्रत्युत्तरमुक्तवंतःपितुःस्नेहानुबंधपरिहाराय योवृक्षरूपेणोत्तरंदत्तवानि राम
त्यर्थः। तंमुनिमानतोस्मितन्मयत्वोपपादनायविशेषणंसर्वभूतानांहृतमनःआश्रयतेयोगबलेनप्रविशतीतिसर्वभूतहृदयस्तं २ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१.तां१

तत्वरूपामुतां दर्शयन्नाह। यइति। अंधं गाढं तमः संसाराख्यमतितर्त्तुमिच्छोः पुराणानां मध्ये गुह्यं गोप्यं तत्र हेतुत्वेन चत्वारि विशेषणानि स्वः
निजः असाधारणः अनुभावः प्रभावो यस्य तत्तथानुभावं अखिलश्रुतीनां सारं। एकमद्वितीयं अनुपममित्यर्थः आत्मानं कार्यकारणसंघात
मधिकृत्य वर्त्तमानमात्मतत्वमध्यात्मं तस्य दीपं साक्षात्प्रकाशकं। उपयामि शरणं व्रजामि ३ एवं स्वगुरुं नमस्कृत्य देवं प्रणमति। जयस
नेन संसारमिति जयो ग्रंथः तमुदीरयेदिति स्वयं तथोदीरयन्नमान् पौराणिकाननुशिक्षयति ४ तेषां कः प्रतिपृच्छेत्येति यदुक्तं तत्प्रति पू

यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमति[illegible]तीर्षतां तमोंऽधं। संसारिणां करुणयाह पुराणगुह्यं तं व्याससूनुमुप
यामि गुरुं मुनीनां ॥३॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमं। देवीं सरस्वतीं व्या[illegible]सं ततो जयमुदीरयेत् ॥४॥ मुनयः साधु पृष्टोऽहं
भवद्भिर्लोकमंगलं। यत्कृतः कृष्णसंप्रश्नो येनात्मा सुप्रसीदति। ५ स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे ॥ अहैतुक्यप्रतिह
ता ययात्मा संप्रसीदति ॥६॥ ॥

जनं करोति। हे मुनयः साधु यथा भवति तदहं पृष्टः। यतो लोकानां मंगलमेतत् यत् यतः कृष्णविषयः संप्रश्नः कृ
तः सर्वशास्त्रार्थसारोद्धारप्रश्नस्यापि कृष्णे पर्यवसानादेवमुक्तं ५ तत्र सत्यधर्मं पृष्टं सर्वशास्त्रसारमेकांतिकं श्रेयो ब्रूहीति तत्रोत्तरं स वै पुंसा स२
मिति। श्रेयमर्थः। धर्मो द्विविधः प्रवृत्तिलक्षणो निवृत्तिलक्षणः [illegible] तत्र यः स्वर्गाद्यर्थः प्रवृत्तिलक्षणः सोऽपरः। यतस्तु धर्मात् श्रवणादरादिज
लक्षणा भक्तिर्भवति स परो धर्मः। स एवैकांतिकं श्रेय इति। कथंभूता भक्तिः अहैतुकी हेतुः फलानुसंधानं तद्रहिता अप्रतिहता विघ्नैरनभिभूताः ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०भा०

नन्वेतमेतमात्मानंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसाऽनाशकेनेत्यादिश्रुतिभिर्धर्मस्यज्ञानांगत्वंप्रसिद्धंतत्कुतोन
किंहेतुत्वमुच्यतेमैवंतत्तुनकिंद्वारेणेत्याह। वासुदेवइति। अहैतुकंशुष्कतर्काद्यगोचरमौपनिषदमित्यर्थः॥७॥ व्यतिरेकमाह। धर्मइ
ति। योधर्मइतिप्रसिद्धःसयदिविष्वक्सेनस्यकथासुरतिं। नोत्पादयेत्तर्हिस्वनुष्ठितोपिसन्श्रमएवज्ञेयः। नन्वमोक्षार्थस्यापि। धर्मस्य

वासुदेवेभगवतिभक्तियोगःप्रयोजितः॥ जनयत्याशुवैराग्यंज्ञानंयत्तदहैतुकं॥७॥ ॥
धर्मःस्वनुष्ठितःपुंसांविष्वक्सेनकथासुयः॥ नोत्पादयेद्यदिरतिंश्रमएवहिकेवलं॥८॥

श्रमत्वमस्यैवकस्मात्तत्राह। केवलंविफलःश्रमइत्यर्थः। नन्वस्तितस्यापिस्वर्गादिफलमित्याशंक्यएवकारेणनिराकरोति। क्षयिष्णुत्वान्नतत्फ
लमित्यर्थः। नन्वक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवतीत्यादिश्रुतेर्नतत्फलस्यक्षयिष्णुत्वमित्याशंक्यहिशब्देनसाधयति। तद्यथेहक
१९७१ र्मजितोलोकःक्षीयतएवमेवामुत्रपुण्यजितोलोकःक्षीयतइतितर्कोपगृहीतयाश्रुत्या। क्षयिष्णुत्वप्रतिपादनात्॥८॥ ॥ राम ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवंहरिन्निष्किंचाराधितरवैराग्यात्मज्ञानपर्यंतः परोधर्मइत्युक्तम्॥ इदानींतुमन्यंतेधर्मस्यार्थः फलंतस्यचकामः फलंतस्यचेंद्रियप्रीतिः
तत्प्रीतेश्चपुनरपिधर्मार्थादिपरंपरेति॥ तथाचोक्तं॥ धर्मादर्थश्चकामश्चसकिमर्थंनसेव्यतइत्यादितन्निराकरोति॥ धर्मस्येतिद्वाभ्यां॥ आप
वर्ग्यस्यतत्क्रमायेनापवर्गपर्यंतस्यधर्मस्यार्थायफलत्वायअर्थोनोपकल्पतेयोग्योनभवति॥ तथार्थस्याप्येवंभूतधर्माव्यभिचारिणः कामोला
भायफलत्वायनहिस्मृतोमुनिभिः॥ एवंकामस्यविषयभोगस्येंद्रियप्रीतिर्लाभःफलंनभवतिकिंतुयावताजीवेततावानेवकामस्य

धर्मस्यह्यापवर्ग्यस्यनार्थोर्थायोपकल्पते॥ नार्थस्यधर्मैकांतस्यकामोलाभायहिस्मृतः॥ ९॥ कामस्यनेंद्रियप्रीतिर्लाभो
जीवेतयावता॥ जीवस्यतत्त्वजिज्ञासानार्थोयश्चेहकर्मभिः॥ १०॥ वदंतितत्तत्त्वविदस्तत्त्वंयज्ज्ञानमद्वयम्॥ ब्रह्मेतिपरमा
त्मेतिभगवानितिशब्द्यते॥ ११॥ ॥

१स्य१ २वदंतीति२
लाभः॥ जीवनपर्याप्तएवकामःसेव्यइत्यर्थः॥ जीवेज्जीवनस्यचपुनःकर्मानुष्ठानद्वाराकर्मभिर्यइहप्रसिद्धःसोऽर्थोनभवतिकिंतुतत्त्वजि
२ण ज्ञासैवेति॥ १०॥ ननुचतत्त्वजिज्ञासानामधर्मजिज्ञासैवधर्मएवहितत्त्वमितिकेचित्तत्राह॥ तत्त्वविदस्तुतदेवतत्त्वंवदंति किंतत्ज्ञानंनाम
अद्वयमितिक्षणिकविज्ञानपक्षंव्यावर्तयति॥ ननुतत्त्वविदोपिविगीतवचनाएवनैवंतस्यैवतत्त्वस्यनामांतरैरभिधानादित्याह॥ पनिष औ१
दैर्ब्रह्मेति॥ हैरण्यगर्भैःप[illegible]रमात्मेतिसात्वतैर्भगवानित्यभिधीयते॥ ११॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰प्र॰
९

तच्छ्रद्दधानासपरिकरयान्भे... श्राप्यतइत्याह। तच्छ्रद्दधाना इति ज्ञानविज्ञानयुक्तयेमच्छ्रद्धानं परोक्षं तत्त्वतत्त्वं आत्मनिष्ठे च क्षेपश्यंतीति किं तत्
आत्मानं परमात्मानं भक्तेन वेदांता दिश्रवणेन गृहीतयावासयेति। नक्केवलं ईदृशी मुक्तिः। १२। धर्मस्य फलं मुक्तिनार्थकामादिकमिती मम
धर्मसुपपाद्योपसंहरति। अतइति। हेद्विजश्रेष्ठाः हरितोषणं हरेराराधनं संसिद्धिः फलं। १३। यस्मादेवं भक्तिविहीनो धर्मः केवलं श्रमए

तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया। पश्यंत्यात्मनि चात्मानं भक्त्याश्रुतगृहीतया। १२। अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रम
विभागशः। स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणं। १३। तस्मादेकेन मनसा भगवान्सात्वतां पतिः। श्रोतव्यः कीर्तितव्यश्च ध्ये
यः पूज्यश्च नित्यदा। १४। यदनुध्यासिना युक्ताः कर्मग्रंथिनिबंधनं। छिंदंति कोविदास्तस्य कोनकुर्यात्कथारतिं। १५॥ ॥ ॥

वतस्माद्भक्तिप्रधान एव धर्मोनुष्ठेय इत्याह। तस्मादिति। एकेन एकाग्रेण मनसा। १४। भक्तिरहितो धर्मः केवलं श्रम इति प्रपंचितं इदानींतु
भक्तेर्मुक्तिफलत्वं प्रपंचयति। यदिति। यस्य अनुध्या अनुध्यानं सैव असिः खड्गः तेन युक्ताः विवेकिनः ग्रंथिमहंकारं निबध्नाति य ॥ ९ ॥
त्कर्मतत् छिंदंतितस्य कथायां रतिं को न कुर्यात्। १५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु सत्यमेव कर्मनिर्मूलिनी हरिकथारतिः तथापि तस्यां रुचिर्नोत्पद्यते किं कर्तव्यं तत्राह ॥ शुश्रूषोरिति पुण्यतीर्थनिषेव[णा]दिभिर्निःपाप
स्य महत्सेवा स्यात्तया च तद्धर्मे श्र[द्धा]धाः ततः श्रवणेच्छा ततो रुचिः स्यादित्यर्थः ॥ १६ ॥ ततश्च शृण्वतामिति ॥ पुण्ये श्रवणकीर्तने यस्य सः सतां
सुहृत् हितकारी हृदि यान्यभद्राणि कामादिवासनाः तानि अंतस्थः हृदयस्थः सन् ॥ १७ ॥ ततश्च नष्टप्रायेष्विति ॥ सर्वनिवृत्तानामसत्त्वान्नोत्तरका
लत्वात् प्रायग्रहणं भागवतानां भागवतशास्त्रस्य वा सेवया नैष्ठिकी निश्चला विक्षेपकाभावात् ॥ १८ ॥ रजश्च तमश्च ये च तत्स्वभावा भावाः का

शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥ १६ ॥ शृण्वतां स्वकथाः कृष्णः पुण्यश्रव
णकीर्तनः हृद्यंतस्थो ह्यभद्राणि विधुनोति सुहृत्सतां ॥ १७ ॥ नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया ॥ भगवत्युत्तमश्लोके भक्तिर्भ
वति नैष्ठिकी ॥ १८ ॥ तदा रजस्तमोभावाः कामलोभादयश्च ये चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति ॥ १९ ॥ एवं प्रसन्नमनसो भगवद्
भक्तियोगतः ॥ भगवत्तत्त्वविज्ञानं मुक्तसंगस्य जायते ॥ २० ॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि दृष्ट
एवात्मनीश्वरे ॥ २१ ॥

मादयः एतैरनाविद्धं अनभिभूतं ॥ प्रसीदति उपशाम्यति ॥ १९ ॥ भगवद्भक्तियोगतः प्रसन्नमनसः [अ]त एव मुक्त
संगस्य भगवानेव तत्त्वम् ॥ २० ॥ ज्ञानफलमाह ॥ भिद्यत इति ॥ हृदयमेव ग्रंथिः चिज्जडग्रथनरूपोऽहंकारः ॥ अत एव सर्वसंशयाः असंभावना
दिरूपाः कर्माणि अनारब्धफलानि ॥ आत्मनि स्वरूपभूते ईश्वरे दृष्टे एवकारेण ज्ञानोंतरमेवेति दर्शयति ॥ २१ ॥ ॥

१३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०पु०
१०

अत्रसदाचारंदर्शयित्वुपसंह[र]ति॥ अतइति॥ आत्मनःप्रसादनींमनःशोधनींवासुदेवेनकिंकुर्वंतीतिनजनीया॥ विशेषदर्शिनः॥ तदेवोपपादयितुंब्रह्मा
दीनांत्रयाणामेकात्मकत्वेपिवासुदेवस्याधिक्यमाह॥ सत्वमिति॥ इहयद्यप्येकएवपरःपुमानस्यविश्वस्यस्थित्यादयेस्थितिसृष्टिप्रलयार्थंसंज्ञा
केवलंनिनाधत्ते॥ हरिविरिंचिहरइतिव्यक्त्येसंधिरार्षः॥ तत्रतेषांमध्येश्रेयांसिशुभफलानिसत्वतनोर्वासुदेवाद्भवेयुः॥२३॥ उपाधिवैशिष्ट्येनफ
लवैशिष्ट्यंसदृष्टांतमाह॥ पार्थिवात्स्त्रैवंप्रवृत्तिप्रकाशरहितात्दारुणःकाष्ठात्सकाशात्धूमःप्रवृत्तिस्वभावस्त्रयीमयः॥ वेदोक्तकर्मप्रचुरःइ
तः१

अतोवैकवयोनित्यंभक्तिंपरमयामुदा॥ वासुदेवेभगवतिकुर्वंत्यात्मप्रसादनीं॥२२॥ सत्वंरजस्तमइतिप्रकृतेर्गुणास्तैर्यु
क्तःपरःपुरुषएकइहास्यधत्ते॥ स्थित्यादयेहरिविरंचिहरेतिसंज्ञाः श्रेयांसितत्रखलुसत्वतनोर्नृणांस्युः॥२३॥ पार्थिवादा
रुणोधूमस्तस्मादग्निस्त्रयीमयः॥ तमसस्तुरजस्तस्मात्सत्वं यद्ब्रह्मदर्शनं॥२४॥ ॥

षत्कर्मप्रत्यास[त्ते]स्तस्मादपिप्रग्निस्त्रयीमयःसाक्षात्कर्मसाधनत्वात्॥ एवंतमसःसकाशाद्रजोब्रह्मदर्शनंब्रह्मदर्शकं॥ तथाहि नलयात्मकात्तमसः
सकाशाद्रजसःसोपाधिकत्मनहेतुत्वेनकिंचिद्ब्रह्मदर्शनप्रसासन्निमात्रमुक्तं॥ नतुसर्वथातत्सकाशाकत्वंविक्षेपकत्वात्सत्वंतत्साक्षाद्ब्रह्मदर्शनंभ्य
तस्तत्रगुणोपाधीनांब्रह्मादीनामपियथोत्तरंवैशिष्ट्यमितिभावः॥२४॥ ॥

राम
१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वासुदेवनिष्ठो पूर्वाचारं प्रमाणयति। भेजिरे इति। अथ अतो हेतोः अग्रे पुरा विशुद्धं सत्त्वमूर्तिं भगवंतमधोक्षजं अतो ये तान् अनुवर्त्तंते त इह संसारे क्षेमाय कल्पंते॥ २५॥ ननु अन्यानपि केचिद्भजंतो दृश्यंते सत्यं मुमुक्षवस्तु असूयान्न भजंति॥ किंतु सकामा एवेत्याह। मुमुक्षव इति द्वाभ्यां। भूतपतीनिति। पितृप्रजेशादीनामुपलक्षणं अनसूयवः देवतांतरानिंदकाः सतः॥ २६॥ रजस्तमसी प्रकृतिः स्वभावो येषां ते अत एव पितृत्वादिभिः स

भेजिरे मुनयोऽथाग्रे भगवंतमधोक्षजं॥ सत्वं विशुद्धं क्षेमाय कल्पंते येनु तानिह॥ २५॥ मुमुक्षवो घोररूपान् हित्वा भूतपती
नथ॥ नारायणकलाः शांता भजंति ह्यनसूयवः॥ २६॥ रजस्तमःप्रकृतयः समशीला भजंति वै॥ पितृभूतप्रजेशादीन् श्रि
यैश्वर्यप्रजेप्सवः॥ २७॥ वासुदेवपरा वेदा वासुदेवपरा मखाः॥ वासुदेवपरा योगा वासुदेवपराः क्रियाः॥ २८॥ ॥

श्वे
समशीलं येषां ते श्रिया सह ऐश्वर्यं प्रजां च इच्छंतीति तथा ते॥ २७॥ मोक्षप्रदत्वाद्वासुदेवो भजनीय इत्युक्तं॥ सर्वशास्त्रतात्पर्यगोचरत्वादपीत्याह द्वाभ्यां॥ वा
सुदेवः परः तात्पर्यगोचरो येषां ते॥ ननु वेदा मखपरा दृश्यंते इत्याशंक्य ते पि तदाराधनार्थत्वात् तत्परा एवेत्युक्तं॥ योगा योगशास्त्राणि तेषामप्या
सनप्राणायामादिक्रियापरत्वमाशंक्य तासामपि तत्त्वाप्त्युपायत्वात् तत्परत्वमुक्तं॥ २८॥ ॥

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प्र०
११

ज्ञानं ज्ञानशास्त्रं ॥ ननु च तत्तज्ज्ञानं परमेव सांख्यज्ञानस्यापि तत्परत्वमुक्तम् ॥ तपोऽत्र ज्ञानं धर्मो धर्मशास्त्रं दानज्ञानादिविषयं ननु तत्स्वर्गपरमित्या
त्रं कृपागम्पत इति गतिः स्वर्गादिफलं सापि तदानंदांशरूपत्वात् तत्परैवेत्युक्तम् ॥ एवं वेदा इत्यनेनैतत् तन्मूलत्वात्सर्वाण्यपि वासुदेवपराणीत्युक्तम् ॥ शास्त्री गिर
तत्र ननु तेषां मुख्ययोगक्रियादीनां नानार्थपरत्वान्न तदेकपरत्वमित्याशंक्य मखवादीनामपि तत्परत्वमित्युक्तमिति द्रष्टव्यं ॥ २९ ॥ ननु जगत्सर्गवैचित्र्या
नियमनादिविलासयुक्ते वस्तुनि सर्वशास्त्रसमन्वयो दृश्यते ॥ कथं वासुदेवपरत्वं सर्वस्येत्यत आह ॥ स एवेति त्रिभिः ॥ एतैरेव श्लोकैः ॥ तस्य कर्माण्यु

वासुदेवपरं ज्ञानं वासुदेवपरं तपः ॥ वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥ २९ ॥ स एवेदं ससर्जाग्रे भगवानात्म
मायया सदसद्रूपया चासौ गुणमय्याऽगुणो विभुः ॥ ३० ॥ तया विलसितेष्वेषु गुणेषु गुणवानिव ॥ अन्तःप्रविष्ट
आभाति विज्ञानेन विजृंभितः ॥ ३१ ॥ ॥

कारणभूतः ॥ इति प्रश्नोत्तरम् ॥ सदसद्रूपया कार्यकारणात्मिकया त्रिगुणमय्येत्यन्वयः ॥ स्वतो निर्गुणोऽपि सन् विभुः समर्थः ॥ ३० ॥ भगवतो जगत्कारणत्व
मुक्तम् ॥ प्रवेशनियमनलक्षणां लीलामाह ॥ तयेति ॥ विलसितेषु उद्भूतेषु गुणेषु आकाशादिगुणेष्वन्तःप्रविष्टः सन् गुणवानिव मदधीना एवैते राम
तेगुणेष्वत्पाभिमानवानिव न तु वस्तुतः तस्य यतो विज्ञानेन चिच्छक्त्या विजृंभितोऽभिव्यक्तमूर्तिः ॥ ३१ ॥ ॥ ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ ननानात्व २ ... ३ ति ३

बकुरूपत्वलीलामात्र॥ यथेति॥ स्वयोनिषु स्वाभिव्यंजकेषु अवहितो निहितः विश्वात्मापुमान्परमेश्वरो भूतेषु प्राणिषु अंतर्यामिणोपिद्व
तियाग्निनानात्वमिवोच्यते दोत्वजरूपेणवा॥ ३२॥ भोगरूपांलीलामाह॥ असौहरिः भूतसूक्ष्माणिच शब्दादीनिच आत्मा मनश्च तैः स्वयंनिर्मि
तेषु चतुर्विधेषु इति॥ भोगस्वातंत्र्यं द्योत्यते॥ तद्गुणान्तत्तदनुरूपान्विषयानिंद्रियानुकूले भोजयतीणिजर्थोविवक्षितः पालयतीतिवात्मनेपद

यथाह्यवहितोवह्निर्दारुष्वेकःस्वयोनिषु नानेवभातिविश्वात्माभूतेषु चतथापुमान्॥ ३२॥ असौगुणमयैर्भावैर्भूतसूक्ष्मे
न्द्रियात्मभिः॥ स्वनिर्मितेषुनिर्विष्टो भुंक्ते भूतेषु तद्गुणान्॥ भावयत्येषसत्वेन लोकान्वैलोकभावनः॥ लीलावतारानुरतो
देवतिर्यङ्नरादिषु॥ ३४॥ ॥इतिश्रीभागवते महापुराणे प्रथमस्कंधे द्वितीयोध्यायः॥ २

मार्षत्वभोनवन्नइतिस्मरणात्॥ ३३॥ इदानीं सूतजानासीतिप्रश्नोत्तरमाह॥ भावयतिपालयति एतच्च सर्वावतारसाधारणम्प्रयोजनंविशेषतः
कस्मावतारस्य कृतीत्युक्तं भवते॥ लोकभावनः लोककर्ता देवादिषु येलीलावतारास्तेष्वनुरक्तः॥ ३४॥ ॥इतिश्रीभागवते महापुराणेप्रथ
मस्कंधे सुबोधिन्यां द्वितीयोध्यायः॥ ॥२॥ ॥

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवतारकथाप्रश्ने तृतीये तूत्तराभिधा। पुरुषाद्यवतारोक्त्या तत्त्वाख्यानं च वर्ण्यते॥ यदुक्तं अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः इ
ति तत्र सर्वेनावतारानुक्रमिष्यन् प्रथमं पुरुषावतारमाह। जगृह इति पंचभिः महदादिभिः महदहंकारपंचतन्मात्रैः एकादशेंद्रियाणि
पंचमहाभूतानीति षोडशकलाः अंशा यस्मिन् यद्यपि भगवद्विग्रहो नैवंभूतः तथापि विराट् जीवांतर्यामिणो भगवतो विराड्रूपेणोपास
नार्थमेवमुक्तमिति द्रष्टव्यं। कोसौ भगवानित्यपेक्षायामाह। यस्यांभसि एकार्णवे शयानस्य विश्रांतस्य तन्त्रे योगः समा
१ यस्येति १

सूत उवाच। जगृहे पौरुषं रूपं भगवान्महदादिभिः संभूतं षोडशकलमादौ लोकसिसृक्षया॥ १ यस्यांभसि शयानस्य योग
निद्रां वितन्वतः। नाभिह्रदांबुजादासीद्ब्रह्मा विश्वसृजां पतिः॥ २ यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः। तद्वै भगवतो
रूपं विशुद्धं सत्त्वमूर्जितं॥ ३॥ ॥

धिः तद्रूपां निद्रां विस्तारयतः। तस्य नाभिरेव ह्रदः तस्मिन्यदंबुजं तस्मात्सकाशाद् ब्रह्मासीत् तच्च भूतपामे कल्पे स पौरुषं रूपं जगृहे॥ २॥ कीदृशं
रूपं तदाह। यस्येति। ननु कीदृशो विग्रहस्तस्य योंभसि शेते स्म तदाह। तस्य भगवतो रूपं तद्विशुद्धं रजआद्यसंभिन्नं अत एवोर्जितं निरतिशयं सत्त्वं १२
ते १
॥३॥

एतच्च योगिनां प्रत्यक्षमित्याह पश्यंतीति अदभ्रमनल्पं ज्ञानात्मकं यच्चक्षुस्तेन सहस्रं सहस्रपरिमितानि पादादीनि तैरद्भुतं सहस्रं मूर्धादियो यस्मि
न्नुत सहस्रं यानि मौल्यादीनि तैरुल्लसद्भ्राजमानं ४ तदेतत्तु कूटस्थं न त्वमावतारवदाविर्भावतिरोभाववदित्याह एतत्ते आदिनारायणरूपं निधी
यते यस्मिन्निति निधानं कार्यावसाने प्रवेशस्थानमित्यर्थः बीजं उद्गमस्थानं बीजत्वेपि नान्यबीजवत्ल्यं किंत्वव्ययं न केवलमवताराणामेव बीजं कि

पश्यंत्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतं सहस्रमूर्धश्रवणाक्षिनासिकं सहस्रमौल्यंबरकुंडलोल्लसत् ४
एतन्नानावताराणां निधानं बीजमव्ययं यस्यांशांशेन सृज्यंते देवतिर्यङ्नरादयः ५ सएव प्रथमं देवः कौमारं सर्गमास्थितः च चाः
चरदुश्चरं ब्रह्मा ब्रह्मचर्यमखंडितं द्वितीयं तु भवायास्य रसातलगतां महीं उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः ॥७॥ ॥

तु सर्वप्राणिनामित्याह यस्यांशो ब्रह्मा तस्यांशो मरीच्यादिस्तेन ५ सनत्कुमाराद्यवतारं तच्चरितं चाह सएवेति कौमारः आर्षः प्राजापत्यो मान
वइत्यादीनि सर्गविशेषनामानि यः पौरुषं रूपं जगृहे सएव कौमाराख्यं सर्गमास्थितः सन् ब्रह्मा ब्राह्मणो भूत्वा ब्रह्मचर्यं चचार प्रथमं द्वितीयादि
त्राद्यानि निर्देशक्रमापेक्षया ६ अस्य विश्वस्य भवाय उद्भवाय महीमुद्धरिष्यन्निति कर्मोक्तिः एवं सर्वत्रावतारस्तत्कर्म चोक्तमित्यनुसंधेयं ॥७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारदावतारमाह । तृतीयमिति । ऋषिसर्गमुपेत्य च देवर्षित्वमुपेत्येत्यर्थः । सात्वतं वैष्णवं तंत्रं पंचरात्रागमं आचष्ट उक्तवान् यतस्तस्मान्निर्ग ॥४॥२
तं कर्मत्वं बंधहेतुत्वं येभ्यः तानि निष्कर्माणि तेषां भावो नैष्कर्म्यं कर्मणामेव मोचकत्वं यतो भवति तदाचष्टेत्यर्थः । तुर्ये ऽवतारे धर्मस्य कलात्रे
त्रः नार्यस्यार्थः । अधर्मवाण एष आत्मनोपशमस्त्री तिक्रुतः तस्याः सर्गे ऋषी भूत्वेत्येकावतारौ दर्शयति ॥ ९ ॥ कपिलावतारमाह । आसुरये त
न्नाम्ने ब्राह्मणाय तत्त्वानां ग्रामस्य संघस्य विनिर्णयो यस्मिन् तत्सांख्यम् ॥ १० ॥ दत्तात्रेयावतारमाह । षष्ठमिति । अत्रेरपत्यत्वं तेन वृत

तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः । तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ॥ ८ ॥ तुर्ये धर्मकलासर्गे नरनारायणावृषी
भूत्वात्मोपशमोपेतमकरोद्दुश्चरं तपः ॥ ९ ॥ पंचमः कपिलो नाम सिद्धेशः कालविप्लुतं । प्रोवाचासुरये सांख्यं तत्त्वग्रामविनि
र्णयम् ॥ १० ॥ षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया । आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥ ११ ॥ ततः सप्तम आकूत्यां रु
चेर्यज्ञोऽभ्यजायत । स यामाद्यैः सुरगणैरपात्स्वायंभुवांतरं ॥ १२ ॥ अष्टमे मेरुदेव्यां तु नाभेर्जात उरुक्रमः । दर्शयन्वर्त्म धीराणां सर्वाश्र
मनमस्कृतं ॥ १३ ॥

तः सन् प्राप्तः अत्रेरपत्यमभिकांक्षत आह तुष्ट इति वृत्तमात्वात्कथं प्राप्तः । अनसूयया मत्सदृशापत्यमिषेण मामेवापसं
वृतवानिति दोषदृष्टिमकुर्वन्नित्यर्थः । आन्वीक्षिकीमात्मविद्यां प्रह्लादादिभ्यश्च ॥ ११ ॥ यज्ञावतारमाह । स यज्ञः यामाद्यैः स्वस्यैव पुत्रैर्यामनामभिर्देवैः
तदा...द्यैः सहस्वायंभुवमन्वंतरं पालितवान् । तदा स्वयमिंद्रोऽभूदित्यर्थः ॥ १२ ॥ ऋषभावतारमाह । सर्वाश्रमनमस्कृतं अत्याश्रमं पारमहंस्यं व
र्त्म धीराणां दर्शयन् नाभेर्नाम्नो राज्ञः पुत्रात् ऋषभो जातः ॥ १३ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृथ्व्यवतारमाह ॥ पार्थिवं वपुः राजेंद्रं पृथुरूपं ॥ पाठांतरे पृथोरिदं पार्थिवं ॥ औषधीरित्युपलक्षणं इमां पृथ्वीं सर्वाणि वस्तूनि दुग्धः स्म दुग्धा ॥ खडा
गमानावस्तार्थः हे विप्रास्तेन पृथुना दोहनेन सोयं अवतारस्तवोत्तमः ॥ कमनीयतमः उरुक्रांतावित्यस्मात् ॥१४॥ मत्स्यावतारमाह ॥ चाक्षुषम
न्वंतरे य उदधिसंप्लवः ॥ तस्मिन् यद्यपि मन्वंतरावसाने प्रलयो नास्ति तथापि केन चित्कौतुकेन सत्यव्रताय मायादर्शिता यथात्र मार्कंडेयो मार्कंडे
यायेति द्रष्टव्यं महीमय्यां नावि नौकारूपायां मह्यामित्यर्थः ॥ अपात्ररक्षितवान् ॥ वैवस्वत इति वा नाविनी संज्ञा ॥१५॥ कूर्मावतारमाह ॥ क

ऋषिभिर्यांचितो भेजे नवमं पार्थिवं वपुः ॥ दुग्धेमामोषधीर्विप्रास्तेनायं स उरुक्रमः ॥१४॥ रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे ॥
नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुम् ॥१५॥ सुरासुराणामुदधिं मथ्नतां मंदराचलं ॥ दध्रे कमठरूपेण पृष्ठ एकादशो विभुः ॥
१६ ॥ धान्वंतरं द्वादशमं त्रयोदशममेव च ॥ अपाययत्सुरानन्यान्मोहिन्या मोहयन् स्त्रिया ॥१७॥ चतुर्दशं नारसिंहं बिभ्रद्दैत्येंद्रमूर्जि
तं ॥ ददार करजैर्वक्षस्येरकां कटकृद्यथा ॥१८॥ पंचदशं वामनकं कृत्वागादध्वरं बलेः ॥ पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपं ॥
१९ ॥

मठः कूर्मः तद्रूपेण एकादशोवतारे विभुर्दध्रे दधार ॥१६॥ धन्वंतर्य्यवतारमाह धान्वंतरं धन्वंतरिरूपं द्वादशमादिप्रयोगस्त्वार्षः ॥ त्रयोदशमं
च रूपं तच्चरितेन सह दर्शयति ॥ अपाययदित्यत्र सुधामित्यध्याहारः मोहिन्या स्त्रिया रूपेण अन्यान् असुरान्मोहयन् धन्वंतरिरूपेणामृतमानी
य मोहिन्या पाययदित्यर्थः ॥ नृसिंहावतारमाह ॥ नारसिंहं रूपं बिभ्रत ॥ एरकां निर्ग्रंथितृणं ॥१८॥ वामनावतारमाह ॥ दुष्टानां मदं वामयतीति वा
मनकं रूपं कृत्वं वा प्रत्यादित्सुः तस्माद्दाच्छिद्य गृहीतुमिच्छुः ॥१९॥ ॥

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२२॥

परशुरामावतारमाह । अवतार इति त्रिः सप्तकृत्वः सप्तवारान् एकविंशतिवारानित्यर्थः ॥२०॥ व्यासावतारमाह । अल्पमे
धसः अल्पप्रज्ञान्पुंसो दृष्ट्वा तदनुग्रहार्थं शाखाश्चक्रे ॥२१॥ रामावतारमाह । नरदेवत्वं राघवरूपेण प्राप्तः सन् अतः परं अष्टादशे रामकृष्णावता
रमाह । विंशतितिम इति वक्तव्ये तकारलोपः छंदोनुरोधेन रामकृष्णाविस्येवं नाम न तु जन्मनी प्राप्य ॥२३॥ अजनस्य सुतः जिनसुत इति पाठे जिनः स

अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान् । त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं ॥२०॥ ततः सप्तदशे जातः सत्यवत्यां परा
शरात् । चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोल्पमेधसः ॥२१॥ नरदेवत्वमापन्नः सुरकार्यचिकीर्षया । समुद्रनिग्रहादीनि चक्रे वीर्याण्य
तः परं ॥२२॥ एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी । रामकृष्णाविति भुवो भगवानहरद्भरं ॥२३॥ ततः कलौ संप्रवृत्ते संमोहाय सु
रद्विषां । बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यति ॥२४॥ अथासौ युगसंध्यायां दस्युप्रायेषु राजसु । जनिता विष्णुयशसो नाम्ना क
ल्किर्जगत्पतिः ॥२५॥ अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः । यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥२६॥ ऋषयो मन
वो देवा मनुपुत्रा महौजसः । कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥२७॥

एवं कीकटेषु मध्ये गयाप्रदेशे ॥२४॥ कल्क्यवतारमाह । युगसंध्यायां
कलेरंते विष्णुयशसो ब्राह्मणस्य सकाशात् जनिता जनिष्यते ॥२५॥ अनुक्तसर्वसंग्रहार्थमाह । अवतारा इति । असंख्येयत्वे दृष्टांतः यथेति । अविदासिनः
उपक्षयशून्यात् दस्युउपक्षय इत्यस्मात्सरसः सकाशात् कुल्याः क्षुद्रप्रवाहाः । विभूतीराह । ऋषय इति ॥२७॥ ॥
१य॰ १॥२६॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ श २ १ म
तत्र विशेषमाह ॥ एते चेति ॥ पुंसः परमेश्वरस्य केचिदंशाः केचित्कलाः ॥ विभूतयश्च ॥ तत्र मत्स्यादीनामवतारत्वेन सर्वज्ञत्वसर्वशक्तित्वेपि यथोपयोगमेव
ज्ञानक्रियाशक्त्याविष्करणं कुमारनारदादिष्वाधिकारिकेषु यथोपयोगमंशकलावेशः ॥ पृथ्वादिषु शक्त्यावेशः ॥ कृष्णस्तु भगवान्साक्षान्नारायण ए
व आविर्भूतसर्वशक्तित्वात् ॥ सर्वेषां प्रयोजनमाह ॥ इंद्रारयो दैत्यास्तैर्व्याकुलमुपद्रुतं लोकं मृडयंति सुखिनं कुर्वंति ॥ २८ ॥ एतत्कीर्तनफलमाह

एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयं ॥ इंद्रारिव्याकुलं लोकं मृडयंति युगे युगे ॥ २८ ॥ जन्म गुह्यं भ
गवतो य एतत्प्रयतो नरः ॥ सायं प्रातर्गृणन्भक्त्या दुःखग्रामाद्विमुच्यते ॥ २९ ॥ एतद्रूपं भगवतो ह्यरूपस्य
चिदात्मनः ॥ मायागुणैर्विरचितं महदादिभिरात्मनि ॥ ३० ॥ ॥

१ विमुच्यते १
॥ जन्मेति ॥ गुह्यमतिरहस्यं जन्म प्रयतः शुचिः सन् दुःखग्रामात् संसारात् ॥ २९ ॥ विमुच्यत इत्युक्तं ॥ तत्र कथं देहद्वयसंबंधे सति ॥ तद्विमुक्तिरित्याशं
क्य देहसंबंधस्य भगवान्मायोत्थाविद्याविलसितत्वादेतच्छ्रवणादिजनितविद्यया तन्निवृत्तिरुपपद्यत इत्याशयेनाह ॥ एतदिति पंचभिः ॥ अरूपस्य चि
देकरसस्यात्मनो जीवस्य एतत्स्थूलं रूपं शरीरं भगवतो मायायातस्यागुणैः महदादिरूपैर्विरचितं क आत्मनि ॥ आत्मस्थाने शरीरं कृतमित्यर्थः ॥ ३० ॥
२ वित्र २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नां०प्र०

३ ६ ३ १ यथानभसीति १

१५ कथमित्यपेक्षायांस्वरूपावरणेनतदध्यासतइतिसदृष्टांतमाह यथावाय्वाश्रितोमेघोननसिस्थाकाशेऽबुद्धिभिरज्ञैरारोपितः यथावापार्थिवोरेणुः
तत्कृतंधूसरत्वादिश्चानिलेएवंद्रष्टरिस्वात्मनिदृश्यत्वंदृश्यत्वादिधर्मकंशरीरंआरोपितमित्यर्थः ३१ किंच अतःस्थूलाद्रूपात्परंअन्यद्द्विरूपमारोपि
तमित्यनुषंगः कथंभूतंतत्त्रयंयदव्यक्तंसूक्ष्मंतत्त्वहेतुः अमूढगुणबृंहितंमूढः करचरणादिपरिणामः तथाअपरिणताःअमूढाःयेगुणाःतैर्गुणै
र्बृंहितंआकारविशेषरहितत्वादव्यक्तमित्यर्थः एतदेवव्यक्तंतत्त्वमाह अदृष्टाश्रुतवस्तुत्वात्आकारविशेषवत्वस्तुनोभावात्यत्राकारविशेषव

यथानभसिमेघौघोरेणुर्वापार्थिवोनिले। एवंद्रष्टरिदृश्यत्वमारोपितमबुद्धिभिः ३१ ॥
अतःपरंयदव्यक्तमव्यूढगुणबृंहितम्। अदृष्टाश्रुतवस्तुत्वात्सजीवोयत्पुनर्भवः ३२

द्व्यक्तंतदस्मदादिवद्दृश्यतेश्रूयतेच इंद्रादिवत् इदंतुनतथातन्न हितस्यसत्वेकिंप्रमाणंतत्राह सजीवः जीवोपाधिः जीवोजीवेननिर्मुक्तोजीवोजीवंवि
हायचेत्यादौजीवोपाधौलिंगदेहेजीवशब्दप्रयोगात् जीवोपाधितयाकल्प्यतइत्यर्थः ननुस्थूलमेवत्वतोगायतनत्वाजीवस्योपाधिरस्तु किमन्यत्कल्पन १५
येत्यतआह यस्मात्सूक्ष्मात्पुनर्भवः पुनर्जन्मसंक्रांतिगत्यागतीनांतेनविनाअसंभवादितिभावः ३२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवमुपाधिद्वयमुक्त्वा तदपवादेन जीवस्य ब्रह्मतामाह । यत्र यदा इमे स्थूलसूक्ष्मे रूपे स्वसंविदा स्वरूपसम्यक्ज्ञानेन प्रतिषिद्धे न भवतः । ज्ञाने
नेन प्रतिषेधार्हत्वे तमेव हेतुमाह । अविद्ययात्मनि कृते कल्पिते इति हेतोः । तद्ब्रह्म तदा जीवो ब्रह्मैव भवतीत्यर्थः । कथंभूतं तद्दर्शनं ज्ञानैकस्वरूपं
३३ तथापि भगवन्मायायाः संसृतिकारणभूताया विद्यमानत्वात्कथं ब्रह्मता तत्राह । यदीति असंदेहे संदेहवचनं यद्विवेदाः प्रमाणं स्मृतिरिति
वत् । वैशारदी विशारदः सर्वज्ञः ईश्वरः तदीया देवी संसारचक्रेण क्रीडंती एषा माया यद्युपरता भवति किमिस्तु परता भवेत् । तत्राह । मतिः वि

यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा । अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनं ॥ ३३ ॥ यद्येषोपरता देवी माया वैशारदी मतिः ।
संपन्न एवेति विदुर्महिम्नि स्वे महीयते ॥ एवं जन्मानि क    र्माणि ह्यकर्तुरजनस्य च । वर्णयंति स्म कवयो वेदगुह्यानि हृ
त्पतेः ॥ ३५ ॥ ॥

द्या अयं भावः यावदेषा विद्यात्मना आवरणविक्षेपौ करोति तावन्नोपरमति । यदा तु सैव विद्यारूपेण परिणता तदा सदसद्रूपं जीवोपाधिं दग्ध्वा
निरिंधनाग्निवत्स्वयमेवोपरमेदिति तदा संपन्नः ब्रह्मस्वरूपं प्राप्त एवेति विदुस्तत्त्वज्ञाः किमतो यद्येवं स्वे महिम्नि परमानंदस्वरूपे महीयते पूज्यते
विराजत इत्यर्थः ३४ यथा जीवस्य जन्मादि मायया एवमीश्वरस्यापि जन्मकर्मादि माययेत्याह एवमिति अकर्तुः कर्माणि अजनस्य जन्मादि हृत्प
तेः अंतर्यामिणः ३५ ॥ ॥

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु यदि कोपि न जानाति तर्हि अनिर्मोक्षप्रसंगस्यादित्याशंक्य

तर्हि जीवादीश्वरस्य को विशेषः स्यात् अमेव विशेषमाह स वा इति षाड्गुणिकं षडिंद्रियषड्गुणविषयं जिघ्रति इत्यादेव गंधर्वकहल्ली निलनुसज्ज
ज्जतेस्मयः कुतः षड्गुणेशः षडिंद्रियनियंता ३४ ननु किमीश्वरस्य सृष्ट्यादिकर्म निर्विषयं नो गेवा तत्राह नचेति धातुर्जगद्विधातुरीश्वरस्य
ऊतीः लीलाः कुमनीषः कुबुद्धिर्निपुणेन तर्कादिकौशलेन न अवैति न जानाति नामानि रूपाणि च वचसा नामानि संतन्वतः सम्यक् विस्तारयतः
वचोभिरिति विकल्पं तस्य निश्रायेण मनोवचोभिः सहेतिवा ३७ कस्तु कथं विजानातीत्याह स वेदेति अमायया अकुटिलभावेन संतत
१॥१

स वा इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेस्मिन् भूतेषु चांतर्हित आत्मतंत्रः षाड्गुणिकं जिघ्रति षड्गुणेशः
३५। न चास्य कश्चिन्निपुणेन धातुरवैति जंतुः कुमनीष ऊतीः नामानि रूपाणि मनोवचोभिः संतन्वतो नटचर्यामिवाज्ञः
३६। स वेद धातुः पदवीं परस्य दुरंतवीर्यस्य रथांगपाणेः योमायया संततयानुवृत्त्या भजेत तत्पादसरोजगंधम् ३७ अ
थेह धन्या भगवंत इत्थं यद्वासुदेवेखिललोकनाथे कुर्वंति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त उग्रः ४०॥ ॥

यानिरंतरया अनुवृत्त्या आनुकूल्येन भजेत ३७ न किमार्गेप्रवृत्तान् कथं न अभिनंदति अथेति यतोनेक एवं भगवत्तत्वं जानाति अथ अत्र तः भ
गवतः सर्वज्ञाः नवंतो धन्याः कृतार्थाः कुतः यद्यस्मात् इत्थं अमुष्मिन् वासुदेवे आत्मभावं मनो वृत्तिं कुर्वंति सर्वात्मकं ऐकांतिकं यत्र यस्मिन् ना
वे सति भूयः परिवर्तो जन्ममरणप्रवाहो न भवति ४०॥ ॥ १६

सूत किमेतच्छास्त्रमपूर्वं कथयसि नेत्याह इदमिति ब्रह्मसंमितं सर्ववेदतुल्यं उत्तमश्लोकस्य चरितं यस्मिन्तत् ऋषिर्व्यासः ४० तच्च संप्रदा
दायप्रवृत्तिमाह तदिदमिति सुतं शुकं ४ प्रायेण मृत्युपर्यंतानशनेनोपविष्टमिति परमवैराग्योक्तिः ४३ हे विप्राः विप्रर्षेः सकाशात् अ

इदं भागवतं नाम पुराणं ब्रह्मसंमितं उत्तमश्लोकचरितं चकार भगवान् ऋषिः निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं म
हत् ४० तदिदं ग्राहयामास सुतमात्मवतां वरं सर्ववेदेतिहासानां सारं सारं समुद्धृतं ४१ स तु संश्रावयामास महाराज
परीक्षितं प्रायोपविष्टं गंगायां परीतं परमर्षिभिः ४२ कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह कलौ नष्टदृशामेष पु
राणार्को ऽधुनोदितः ४३ तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात् सोऽहं वः श्रा
वयिष्यामि यथाधीतं यथामतिः ४४ इति श्रीभागवते महापुराणे प्रथमस्कंधे तृतीयोऽध्यायः ३

अध्यगमं ज्ञातवानस्मि तत्र कीर्तयतः तत्र निविष्टः इति चान्वयभेदात्तत्र पदावृत्तिरदोषः न यथाधीतं न तु स्वयमतिविलसितं तत्तु यथामति
स्वमत्यनुसारेण संक्षेपतः कथितं विस्तरतः श्रावयिष्यामि ४४ इति श्रीभावार्थदीपिकायां प्रथमस्कंधे टीकायां तृतीयोऽध्यायः

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प्र०
१७

चतुर्थेभागवतारंभकारत्वेनूत्पत्ति आसस्यापरितोषस्तुतपःप्रवचनादिभिः २ इतिएवंप्रसन्नतमास्थावयिष्यामीतिब्रुवाणंमुनीनांबहूनां
मध्येएकेनक्रमंनयोःहरूःवृद्धेषुपिबकुषुयःकुलपतिर्गणमुख्यःतेषुपिबकुशुमोबह्वृचःॠग्वेदीतिनवक्रमंअतएवंसूतबातशौनको
॥१॥ ऽब्रवीत्यत्त्यांकथामाहकस्मिन्नुवास्थानेकेनहेतुनेनिमडारतादिधर्मशास्त्राणिकृतंपुनर्रतःसंहिताकरणेकरणेकिंकारणमित्यर्थः॥ क
१तव

इतिब्रुवाणंसंस्तूयमुनीनांदीर्घसत्रिणां वृद्धःकुलपतिःसूतंबह्वृचंशौनकोऽब्रवीत् ४ सूतसूतमहाभागवदनोवदतांवर
कथांभागवतींपुण्यांयदाहभगवान्शुकः ५ कस्मिंयुगेप्रवृत्तेयंस्थानेवाकेनहेतुना कुतःसंनोदितःकृष्णःकृत
वान्संहितांमुनिः ६ तस्यपुत्रोमहायोगीसमदृक्निर्विकल्पकः एकांतमतिरुन्निद्रोगूढोमूढइवेयते ७ ॥ ॥

तत्रइतिसार्वविभक्तिकस्तसिःकेनप्रवर्त्तितइत्यर्थः कृष्णोव्यासः ५ यदुक्तंसंश्रावयामासेतिशुकस्याख्यानादिकंकथंघटितमितिप्रष्टुं
तस्यासंगोदासीनतामहिमानं तस्येतिसमदृक् समंब्रह्मपश्यतिअतोनिर्विकल्पकः स्वार्थेकः निरस्तभेदः किंचएकस्मिन्नेवअंतःसं
माप्तिर्यस्यास्तथाभूतामतिर्यस्यसः यतःउन्निद्रः मायाशयनादुद्बुद्धः यानिशासर्वभूतानांतस्यांजागर्तिसंयमीतिस्मृतेः अतएवगू
ढःअप्रकटःमूढइवप्रतीयते ॥७॥ ॥

राम
१७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्विकल्पकं प्रपंचयति दृष्ट्वेति आत्मजं शुकं प्रव्रजंतमनुयांतं अनुगच्छंतं ऋषिं व्यासं अनग्नमपि ह्रस्वा जले क्रीडंत्यो देव्यः अप्सरसः ह्रियाल
ज्जया वस्त्रपरिधानं कृतवत्यः अनग्नमपीत्यनेन नग्नत्वाभावेपि सुतेन ग्नस्तु केनापि नग्नत्वमस्त्वमपुरतो गच्छतः सुतस्य तु ह्रियानपरिदधुः तच्चित्रं वीक्ष्य इदंस्वी
अपं पुमानिति भेदज्ञानं तस्तवास्ति विविक्ता शुद्धा दृष्टिर्यस्य ५ एवं भूतोसौ कथं मालक्षितः ज्ञातः कुरुजांगलान् देशविशेषान् संप्राप्तः प्रथमं ततो
गजसाह्वये विचरन् गजेन सहितं आह्वयो नाम यस्य तस्मिन् हस्तिनापुरे हस्ती नाम राजा तेन निर्मितत्वात् ६ एवं भूतेन मुनिना सह यत्र संवा
य १

दृष्ट्वानुयांतमृषिमात्मजमप्यनग्नं देव्यो ह्रियापरिदधुर्न सुतस्य चित्रं तद्वीक्ष्य पृच्छति मुनौ जगदुस्तवास्ति स्त्रीपुंभिदा न तु
सुतस्य विविक्तदृष्टेः ५ कथमालक्षितः पौरैः संप्राप्तः कुरुजांगलान् उन्मत्तमूकजडवद्विचरन् गजसाह्वये ६ कथं वा पा
ण्डवेयस्य राजर्षेर्मुनिना सह संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः ७ स गोदोहनमात्रं हि गृहेषु गृहमेधिनां अवेक्षते महा
भागस्तीर्थीकुर्वंस्तदाश्रमं ८ अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमं तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः ९ स सम्रा
ट् कस्य वा हेतोः पांडूनां धर्मवर्धनः प्रायोपविष्टो गंगायामनादृत्याधिराट् श्रियं १०
मान

दे एषा सात्वती भागवती श्रुतिः ७ तत्र एतद्व्याख्यानं ब
हुकालं च स्थानापेक्षं तत्र क्वचिदेकत्रावस्थानं दुर्लभमित्याह स इति गोदोहनमात्रं कालं प्रतीक्षते तदपि न भिक्षार्थं किंतु तेषामाश्रमं गृहं तीर्थीकुर्वन् प
वित्रीकुर्वन् तस्मादेवं भूतो व्यासके सात्वर्यं ८ श्रोतुर्लक्षणं चरितमतिशयेन आश्चर्यं पृष्ट्वा प्रायोपवेशनं पृष्टुमतः कथयेत्याह अभिमन्युसुतमिति पंचभिः
गृणीहि कथय ९ सम्राट् च कुर्वंतं इति वितर्के कस्य वा हेतोः कस्मात्कारणात् अधिराट् श्रियं अधिराजश्रियं संपदमनादृत्य १० ॥ ॥
रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्यपादनिकेतंचरणपीठंस्कुं धनान्यानीयशत्रवोनमंति॥ अंगहेसूतयुवारुणएवैतएछतसञ्चत्यागमात्मनेपूर्वंप्रसुभिःप्राणैःस
ह विरक्तस्यकिंधनादिभिरितिचेत्तत्राह॥ लोकस्यशिवायसुखायभवायसमृध्यै॥ भूतयेऐश्वर्यायचतेजीवंतिनत्वात्मार्थं॥ एवंसतिअसौराजा
निर्विद्यविरज्यापिपरेषामाश्रयंकलेवरंकुतोहेतोर्मुमोचनहिपरोपजीवनंस्वयंत्यक्तुमुचितमित्यर्थः॥१२॥ यत्किंचनपृष्टंत्वांपारंगतं

नमंतियत्पादनिकेतमात्मनःशिवायहानीयधनानिशत्रवः॥ कथंसवीरःश्रियमंगदुस्त्यजांयुवैषतोत्स्रष्टुमहोसहासुभिः
११॥ शिवायलोकस्यभवायभूतयेयउत्तमश्लोकपरायणाजनाः॥ जीवंतिनात्मार्थमसौपराश्रयंमुमोचनिर्विद्यकुतःकले
वरम्॥१२॥ तत्सर्वंनःसमाचक्ष्वपृष्टोयदिहकिंचन॥ मन्येत्वांविषयेवाचांस्नातमन्यत्रछांदसात्॥१३॥ ॥सूतउवाच॥ द्वापरेसम
नुप्राप्तेतृतीयेयुगपर्यये॥ जातःपराशराद्योगीवासव्यांकलयाहरेः॥१४॥ ॥

श्लो॰ सितस्सर्वंनोऽस्माकंसमाचक्ष्वयद्यस्मात्त्वांविषयेगिरांगोचरेयेस्नातंपारंगतंत्वांमन्ये॥ छांदसाद्वस्यवैदिकव्यतिरेकेस्वत्रैवलौकिकत्वात्॥
१३॥ कस्मिन्युगइत्यादिप्रश्नानांव्यासजन्मकथनपूर्वकमुत्तरमाह॥ द्वापरेसमनुप्राप्तेकदेत्यपेक्षायामाह॥ तृतीयेयुगस्यपर्ययेपरिवर्ते
वासव्यांतुपरिस्थितस्यवस्तोःसोवीर्याज्जातायांसत्यवत्यांयोगीज्ञानीव्यासोजातः॥१४॥ ॥ १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰भ॰ १ शाखाविभागमाहतएतइति १ १र्था

स्य व्यधाल्लिंगवंतः ॥ २३ ॥ वेदविभागप्रयोजनमाह तएवेति ॥ येपूर्वमतिमेधाविभिर्धार्यंतेस्मतएव ॥ २४ ॥ किंच ॥ स्त्रीशूद्रेति द्विजबंधवः त्रैवर्णिकेषु
धर्माः तेषांकर्मरूपेश्रेयसिश्रेयःसाधने ॥ एवंभवेत् अनेनैवप्रकारेणभवतीति ॥ २५ अतएवतेषांकृपयाभारताख्यानंमुनिनाकृतं

तएतऋषयोवेदंस्वंस्वंव्यस्यन्ननेकधा ॥ शिष्यैःप्रशिष्यैस्तच्छिष्यैर्वेदास्तेशाखिनोऽभवन् ॥ २३ ॥ तएववेदादुर्मेधैर्धार्यंतेपुरु ते १
षैर्यथा ॥ एवंचकारभगवान्व्यासःकृपणवत्सलः ॥ २४ ॥ स्त्रीशूद्रद्विजबंधूनांत्रयीनश्रुतिगोचरा ॥ कर्मश्रेयसिमूढा
नांश्रेयएवंभवेदिह ॥ २५ ॥ इतिभारतमाख्यानंकृपयामुनिनाकृतम् ॥ एवंप्रवृत्तस्यसदाभूतानांश्रेयसिद्विजाः ॥ २६ ॥ सर्वा
त्मकेनापियदानातुष्यद्धृदयंततः ॥ नातिप्रसीदद्धृदयःसरस्वत्यास्तटेशुचौ ॥ २७ ॥ वितर्कयन्विविक्तस्थइदंचो
वाचधर्मवित् ॥ धृतव्रतेनहिमयाछंदांसिगुरवोऽग्नयः ॥ २८ ॥ मानितानिर्व्यलीकेनगृहीतंचानुशासनम् ॥ भारतव्यपदे
शेनह्याम्नायार्थश्चदर्शितः ॥ दृश्यतेयत्रधर्मादिस्त्रीशूद्रादिभिरप्युत ॥ २९ ॥ ॥

भूतानांश्रेयसिहिते ॥ २६ ॥ सर्वात्मकेनापिकर्मणानातिप्रसीदत्हृदयंयस्यसः ॥ २७ ॥ चित्ताप्रसादेहेतुंवितर्कयन्इदमुवाचस्वगतं
॥ २८ ॥ मानिताःपूजिताः ॥ २९ ॥ अनुशासनंआज्ञा ॥ २८ ॥ १९

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

संकरं

२स जलमुपस्पृश्य जले स्नानादिकं कृत्वेत्यर्थः आसीनो बभूवेति शेषः विविक्ते देश इत्यादि विविक्तैकाग्र्यायमुक्तं ।। अनेन बदरिकाश्रमे स्थानं सूचि-
तं ।१५। तत्र च स ऋषिर्युगधर्मव्यतिकरादिकं वीक्ष्य सर्ववर्णाश्रमाणां यद्धितं तद्दध्याविति तृतीयेनान्वयः परावरज्ञः ।। अतीतानागतवित् ।। अ-
व्यक्तं रंहो वेगो यस्य तेन कालेन युगधर्माणां व्यतिकरं संकरं प्राप्तं वीक्ष्य तथा भुवि युगे युगे ।१६। भौतिकानां शरीरादीनां तत्कृतं कालकृतं

स कदाचित्सरस्वत्या उपस्पृश्य जलं शुचिः ।। विविक्त एक आसीन उदिते रविमंडले ।१५। परावरज्ञः स ऋषिः कालेनाव्यक्त-
रंहसा ।। युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे ।१६। भौतिकानां च भावानां शक्तिह्रासं च तत्कृतं ।। अश्रद्दधानान्निःसत्वान्दु-
र्मेधान्ह्रसितायुषः ।१७। दुर्भगांश्च जनान्वीक्ष्य मुनिर्दिव्येन चक्षुषा ।। सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक ।१८। चातुर्हो-
त्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकम् ।। व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधं ।१९। ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः ।।
इतिहासपुराणं च पंचमो वेद उच्यते ।२०। तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः ।। वैशंपायन एवैको निष्णातो यजुषामुत ।
२१ अथर्वांगिरसामासीत्सुमंतुर्दारुणो मुनिः ।। इतिहासपुराणानां पिता मे रोमहर्षणः ।२२। ।।

निःसत्वान्धैर्यशून्यान् दुर्मेधान् मंदमतीन् ।१७।१८। ततश्च होत्रोपलक्षिताश्चत्वार ऋत्विजश्चातुर्होतारः ।। तैरनुष्ठेयं कर्म चातुर्होत्रं शुद्धं सन्धिकारं
यज्ञसंतत्यै यज्ञानामविच्छेदाय ।१९। चातुर्विध्यमेवाह ऋगिति उद्धृताः पृथक्कृताः ।२०।२१। दारुणः अथर्वोक्ताभिचारादिप्रवृत्तेः ।२२। ।।
प१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देहेभवः दैह्यः आत्माजीवः वस्तुतोविभुः परिपूर्णएव स्वे आत्मनास्वेन रूपेण अप्रसंपन्नः तादात्म्यमप्राप्तइवाभाति ॥ ब्रह्मवर्चसं वेद
अध्ययनाध्यापनोत्कर्षजंतेजः तत्रसाधवोब्रह्मवर्चस्याः तेषुसत्तमः अतिश्रेष्ठोऽपिपक्षान केवलमसंपन्नइवाभातिप्रभुतेब्रह्मवर्चसी
ब्रह्मवर्चसवानपि ॥ असत्तमइवाभाति ॥ पाठांतरेकमनीयतमोऽपीति ॥ ३१ ॥ असंपन्नौहेतुंस्वयमेवाशंकते ॥ किंवेतिप्रायेणान्येयस्त्वेन

अथापिबतमेदैह्योह्यात्माचैवात्मनाविभुः ॥ असंपन्नइवाभातिब्रह्मवर्चस्यसत्तमः ॥ ३० ॥ किंवाभागवताधर्मान
प्रायेणनिरूपिताः ॥ प्रियाःपरमहंसानांतएवह्यच्युतप्रियाः ॥ तस्यैवंखिलमात्मानंमन्यमानस्यखिद्यतः कृष्ण
स्यनारदोऽभ्यागादाश्रमंप्रागुदाहृतम् ॥ ३२ ॥ तमभिज्ञायसहसाप्रत्युत्थायागतंमुनिः ॥ पूजयामासविधिवन्ना
रदंसुरपूजितं ॥ ३३ ॥ ॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेनारदव्याससंगमेचतुर्थोऽध्यायः ॥ ॥

हि यस्मात्तएवधर्माः अच्युतस्यप्रियाः ॥ ३२ ॥ खिलंन्यूनंखिद्यतः खेदंप्राप्नुवतः ॥ कृष्णस्यव्यासस्यप्रागुदाहृतंसरस्वतीतीरस्थं ॥ ३३ ॥ तंना
रदमागतंअभिज्ञायसहसाप्रत्युत्थायविधिवत्पूजयामासेति ॥ ३४ ॥ ॥ इतिप्रथमेचतुर्थोऽध्यायः ॥ ४ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प्र०
२०

पंचमेसर्वधर्मेभ्योहरिकीर्त्तनगौरवम् ॥ व्यासचित्तप्रसादायनारदेनोपदिश्यते ॥ उपसमीपेआसीनंविप्रर्षिंव्यासंबृहच्छ्रवाः महायशाः
यशाःस्मयन्‌ईषद्धसन्‌अनेनसुखेधृसत्वोत्पत्तेयथाउद्देश्यनधिकारार्थंश्रीहोमहान्‌प्रियुद्यतीतिस्मयमानः ॥१॥ शारीरःशरीरा
भिमानीआत्मोआत्मनातेनशरीरेनएकश्चित्किंपरितुष्यति मानसआत्मामनोभिमानीतेनमनसापरितुष्यतिकच्चिन्नोवेति ॥२॥ जि
ज्ञासितंज्ञातुमिष्टंधर्मादियत्तत्सर्वंसुसंपन्नंसम्यक्‌ज्ञातंअपिशाम्यात्‌अनुष्ठितंचेत्यर्थः अपीतिपाठेसंबोधनंसुसंपन्नहे ० वेहेतु ॥

सूतउवाच ॥ अथतंसुखमासीनंउपासीनंबृहच्छ्रवाः देवर्षिःप्राहविप्रर्षिंवीणापाणिःस्मयन्निव ॥१॥ नारदउवाच ॥ ॥
पाराशर्यमहाभागभवतःकच्चिदात्मना ॥ परितुष्यतिशारीरआत्मामानसएववा ॥२॥ जिज्ञासितंसुसंपन्नमपितेम
हदद्भुतं ॥ कृतवान्‌भारतंयस्त्वंसर्वार्थपरिबृंहितं ॥३॥ जिज्ञासितमधीतंचब्रह्मयत्तत्सनातनम् ॥ तथापिशोचस्या
त्मानमकृतार्थइवप्रभो ॥४॥ व्यासउवाच ॥ ॥ अस्त्येवमेसर्वमिदंत्वयोक्तंतथापिनात्मापरितुष्यतेमे ॥ तन्मूलमव्यक्त
मगाधबोधंपृच्छामहेत्वात्मभवात्मभूतं ॥५॥ ॥

महदद्भुतमित्यादिसर्वैरर्थैर्धर्मादिभिःपरिबृंहितंपरिपूर्णं ॥३॥ किंचयत्सनातनंनित्यंपरंब्रह्मतच्चत्वयाजिज्ञासितंविचारितं अधीतमधिगतं
प्राप्तंचेत्यर्थः ॥ तथापिशोचसितत्किमर्थमितिशेषः ॥४॥ आत्माशारीरोमानसश्चतन्मूलंतस्यापरितोषस्यकारणंअव्यक्तमस्फुटंहेनारद
त्वांपृच्छामः ॥ आत्मभवोब्रह्मातस्यात्मनोदेहादुद्भूतस्त्वंअतएवागाधोतिगंभीरोबोधोयस्यतंत्वां ॥५॥ ॥ राम
२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अगाधबोधतां प्रपंचयन्नाह सवा इति षाभ्याम् सर्वगुह्यज्ञानेहेतुः यत यस्मात्पुराणः पुरुषः उपासितस्त्वया कथंभूतः परावरेशः कार्यकारणनियं
तामनसैव संकल्पमात्रेण गुणैः कृत्वा विश्वं सृजतीत्याद्‌दि ३ किंच त्वं त्रिलोकीं पर्यटन्नर्क इव सर्वदर्शी योगबलेन त्वं प्राणवायुरिव सर्वप्रा
णिनामंतश्चरः सन् आत्मसाक्षी बुद्धिवृत्तिसाक्षी अतः परे ब्रह्मणि धर्मतः योगेन निष्णातस्य तदुक्तं याज्ञवल्क्येन इज्याचारदमाहिंसादानस्वाध्याय

सवै भवान्वेद समस्तगुह्यमुपासितो यत्पुरुषः पुराणः परावरेशो मनसैव विश्वं सृजत्यवत्यत्ति गुणैरसंगः ६ त्वं पर्यट
न्नर्क इव त्रिलोकीमंतश्चरो वायुरिवात्मसाक्षी परावरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे न्यूनमलं विचक्ष्व ७ श्रीनारद उ
शो॰२ वाच भवतानुदितप्रायं यशो भगवतोमलम् येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलम् ८ यथा धर्मादयश्चार्था मुनि
वर्यानुकीर्तिताः न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ९ ॥

२अनुक्तप्रायं२ २धर्म२
कर्मणाम् अयं तु परमो धर्मो यद्योगेनात्मदर्शनमिति अवरे च ब्रह्मणि वेदाख्ये व्रतैः स्वाध्यायाध्यायनियमैर्निष्णातस्य मे अलमत्यर्थं यत्
न्यूनं तद्विचक्ष्व विविक्तं कथय ७ अनुदितप्रायं भगवद्यशो विनाय येन वा भागदिज्ञानेनासौ भगवान्न तुष्येत तद्दर्शनं ज्ञानं खिलं न्यूनं मन्ये ८
ननु भगवद्यश एव तत्र तत्रानुवर्णितम् तत्राह यथेति चत्वारो धर्मादिसाधनानि च तथा धर्मादिवत्साधानेन वासुदेवस्य महिमा नोक्त
इत्यर्थः ९ ॥ मलं वि२ ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाग.
२१

वासुदेवव्यतिरिक्तान्यविषयज्ञानवद्देवान्यविषयं वाक्चातुर्यं च खिलमेवेत्याह नेति । चित्रपदमपि यद्वचो हरेर्यशो न प्रगृणीत तत् वायसं
तीर्थं काकतुल्यानां कामिनां रतिस्थानं उशंति मन्यंते । कुतः मानसाः सत्वप्रधाना मनसि वर्तमाना हंसा यतयः यत्र न निरमंति कर्हिचिदपि नि
तरां न रमंते उशिक्क्षयाः उशिक् कमनीयं ब्रह्म तत्र क्षयो निवासो येषां ते । यथा प्रसिद्धा हंसा मानससरसि चरंतः कमनीयपद्मखंडनिवासाः तत्र सउ
४भा विचित्रोद्यानयुक्तेष्वप्युच्छिष्टगर्ते काकक्रीडास्थाने न निरमंत इति । श्रेष: किंभूतं यद्वचः चित्रपदं चित्राणि मनोहराणि पदानि वाक्यानि यस्मिन् कम
लनयनेत्यादि किंलक्षणं यशः । जगत्पवित्रं जगत्पवित्रयतीति जगत्पवित्रं यद्वा जगत्पिबतीति जगत्पः जगत्पा व्रातीति जगत्पवि
त्रं जगत्पातीति जगत्पाः शुकवामनादयस्तैः त्रायते रक्षितश्चेति जगत्पवित्रं ॥ १० ॥ विनापि पदचातुर्यं भगवद्यशः प्रधानं वचः पवित्रमित्याह तद्वाग्विसर्ग इति

न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् । तद्वायसं तीर्थमुशंति मानसा न यत्र हंसा निरमंत्युशिक्क्षयाः ॥ १० ॥ तद्वाग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि । नामान्यनंतस्य यशोंकितानि यच्छृण्वंति गायंति गृणंति साधवः ॥ ११ ॥ ॥

तद्वाग्विसर्गः स चासौ वाग्विसर्गः वाचः प्रयोगः जनानां समूहो जनता तस्या अघं विप्लावयति नाशयतीति तथा यस्मिन् वाग्विसर्गे अबद्धवत्यपि प्रतिश्लोकं अनंतस्य यशोंकितानि नामानि भवंति । तत्र हेतुः यत् यानि नामानि साधवो महांतः वक्तरि सति शृण्वंति श्रोतरि २१
सति गृणंति । अन्यदा तु स्वयमेव गायंति कीर्तयंतीति ॥ ११ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुकिंहीनंकर्मबंधनमेवेतिकैमुतिक न्यायेनदर्शयति नैष्कर्म्यमिति निष्कर्मब्रह्मतदेकाकारत्वान्निष्कर्मतारूपंनैष्कर्म्यं अज्यतेनेनेत्यंजनंउ
पाधिः तन्निवर्तकंनिरंजनं एवंभूतमपिज्ञानंअच्युतेभावोभक्तिस्तद्वर्जितंचेत् अलमत्यर्थंनशोभते सम्यगपरोक्षायनकल्पतइत्यर्थः तदाशश्वत्सा
धनकालेफलकालेचअभद्रंदुःखरूपंयत्काम्यंकर्म यदप्यकारणमकाम्यं तच्चेतिचकार सान्वयः तदपिकर्मईश्वरेनार्पितंचेत् कुतःपुनःशो
भते बहिर्मुखत्वेनसत्वशोधकत्वाभावात् १२ तदेवंनकिंचिदस्मानिज्ञानवाक्चातुर्यकर्मकौशलानि व्यर्थान्येव यतः अतोहरिस्मरितमेवानुवर्णये
त्याह अथोऽतःकारणात् हेमो घायथार्थाहिग्यीर्यस्य शुचिशुश्रवोयस्यसत्येरतः धृतानिदृढानिव्रतानियेनसतथाभवानेवंमहागुणस्तावत् अतउ

१ यशो १

नैष्कर्म्यमप्यच्युतभाववर्जितंनशोभतेज्ञानमलंनिरंजनम् कुतःपुनःशश्वदभद्रमीश्वरेनचार्पितंकर्मयदप्यकारणम् १२
अथोमहाभागभवानमोघदृक्शुचिश्रवाःसत्यरतोधृतव्रतः उरुक्रमस्याखिलबंधमुक्तयेसमाधिनानुस्मरतद्विचेष्टितम्
१३ ततोन्यथाकिंचनयद्विवक्षतःपृथग्दृशस्तत्कृतरूपनामभिः नकर्हिचित्क्वापिचदुःस्थितामतिर्लभेतवाताहतनौरिवास्पदं
१४

२ततोन्यथेति२

२ना उरुक्रमस्यविविधंचेष्टितंलीलांसमाधिनाचित्तैकाग्र्येणअखिलस्यबंधविमुक्तयेत्वमनुस्मरस्मृत्वाचवर्णयेत्यर्थः एतद्वाक्यांतरमितिमध्यम
पुरुषप्रयोगोऽनुपपन्नः १३ विपक्षेदोषांतरमाह ततउरुक्रमचेष्टितात् पृथग्दृशः अतएवान्यथाप्रकारांतरेणयत्तुकंचिदर्थांतरंविवक्षतः
तयाविवक्षयाकृतैःस्फुरितैःरूपैर्नामभिर्निश्चबद्धरूपत्वेनोपस्थितैः दुःस्थिताऽनवस्थितासतीमतिःकदाचित्क्वापिविषयेआस्पदंस्थानंनलभे
त। वातेनाहतानौःआघूर्णितानौरिव तदुक्तंगीतासु व्यवसायात्मिबुधिरेकेहकुरुनंदन बहुशाखाह्यनंताश्चबुधयोऽव्यवसायिनामित्यादि।
तदेवंहरियशोविनाभारतादिषुकृतंधर्मादिवर्णनमकिंचित्करमित्युक्तम् १४ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाप्र
२२

जुगुप्सितमिति । नि७

प्रस्तुतमेवं विरुद्धं जातमित्याह । जुगुप्सितं निंद्यं काम्यकर्मादिषु नावृत एव रक्तस्य तत्र रागिणः पुरुषस्य धर्मकृते धर्मार्थं त्वमनुशासतस्त्वं महानयं
व्यतिक्रमः अन्यायः कुतस्तत्राह यस्य वाक्यतः अयमेव मुख्यो धर्म इति स्थित इतरः प्राकृतो जनः तस्य काम्यकर्मादेः स्वरूपेण तत्त्वज्ञेन क्रियमाणं
निवारणं स्वयमेव वा त्वया क्रियमाणं यथा न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरित्यादिश्रुत्या क्रियमाणं निवारणं यथार्थमिति दि
ति न मन्यते । किंतु प्रवृत्तिमार्गानधिकृतविषयं तदिति कल्पयति तदुक्तं । गीतारोपन्यासेनेदं । तथैवं वाक्यतत्त्वं कुर्युर्ये मे पंथानं यादयो नराः गृहस्थत्वे
नचाशांतिकं तत्तिषु मयं विधिं नैष्ठिकब्रह्मचर्यं वा परिव्राजकतामपि वा तैरवरं परिगृहीतव्यमिति नारदावेत दुच्यते त्यादि । १५ । ननु यद्येवं प्रवृत्तिमार्गो निंद्यते तर्हि निवृत्तिमार्गे
सर्वक्रियात्यागेनैव परमेश्वरसुखस्वरूपानुभूतेः किं तदुपदेशः कथनेनापि तत्राह विचक्षणोऽस्येति निपुणो कश्चिदेव वेदितुं सर्वक्रियानिवृत्त्या अस
विभोर्नो सुखं निर्विकल्पकसुखात्मकं स्वरूपं वेदितुं ज्ञातुमर्हति न पुनरविचक्षणः प्रवृत्तिस्वभावः विभुत्वे हेतुः नत्र अंततः कालतः पारं देशतो यस्य त चे१

जुगुप्सितं धर्मकृतेनुशासतः स्वभावरक्तस्य महान्व्यतिक्रमः । यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः ॥ १५ ॥
विचक्षणोस्यार्हति वेदितुं विभोरनंतपारस्य निवृत्तितः सुखं । प्रवर्तमानस्य गुणैरनात्मनस्ततो भवान्दर्शय चेष्टितं विभो ॥ १६ ॥ त्य चे३
क्त्वा स्वधर्मं चरणांबुजं हरेर्भजन्नपक्वोथ पतेत्ततो यदि । यत्र क्व वाभद्रमभूदमुष्य किं को वार्थ आप्तो[illegible]ऽभजतां स्वधर्मतः ॥ १७ ॥ ॥

स्य विभो

श्चेष्टितं ततः कारणाद्धे विभो अनात्मनो देहाद्यभिमानिनः अत एव गुणैः सत्वादिभिः प्रवर्त्तमानस्य जनस्य दर्शयितव्यानिति विभमित्यर्थः पाठांतरे नवात्रि
ति संबोधनं । १६ । एवं तावत्काम्यधर्मादेरनर्थहेतुत्वात्तं विहाय हरेर्लीलैव वर्णनीयेत्युक्तं इदानीं तु नित्यनैमित्तिकस्वकर्मनिष्ठामप्यनादृत्य केवलं ह
रिभक्तिरेवोपदेष्टव्येत्याशयेनाह त्यक्त्वेति ननु स्वधर्मत्यागेन भजन्भक्तिपरिपाकेन यदि कृतार्थो भवेत्तर्हि तत्र न [illegible] कापि चिंता यदि पुनस्तस्य पक्व एव
उत म्रियेत गोत्रपेत भ्रष्टो वा तदा स्वधर्मत्यागनिमित्तो नर्थः स्यादित्याशंक्याह ततो भजनात्कथंचित्पतेत्तत्र वा म्रियेत वा यदि तदापि न किरातिकस्य कर्मानिधि राम २२
कारान्नानर्थशंकाऽत्र [illegible] अंगीकृतास्मात्पाह वा शब्दः कटाक्षे यत्र क्व वा नीचयोनावपि अमुष्य भक्तिरसिकस्य नाभद्रमभूत्किं नाभूदेवेत्यर्थः नक्रि वासनास
द्भावादिति भावः अभजद्भिस्तु केवलं स्वधर्मतः को वाऽर्थः आप्तः प्राप्तः अभजतामिति षष्ठी तु संबंधमात्रविवक्षया ॥ १७ ॥ ॥

५चेत्र५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्तुस्वधर्ममात्रादपिकर्मणापितृलोकइतिश्रुतेः। पितृलोकप्राप्तिःफलमस्त्येवतत्राह। तस्यैवहेतोस्तदर्थंयत्नंकुर्यात्। यदुपरिब्रह्मपर्यंतंअधः
स्थावरपर्यंतंभ्रमद्भिर्जीवैर्नलभ्यते। षष्ठीतुपूर्ववत्। तत्तुविषयसुखंअन्यतएवप्राचीनकर्मणासर्वत्रनरकादावपिलभ्यते। दुःखवत्यथादुःखं दुः२
प्रयत्नंविनापिलभ्यतेतद्वत्। तदुक्तं। अप्रार्थितानिदुःखानियथैवायांतिदेहिनां। सुखान्यपितथामन्येदैन्यमत्रातिरिच्यतेइति। १८। यदुक्तंयत्र
क्वचाभद्रमभूदिति तदुपपादयति नवाइति। मुकुंदसेवीजनःजातुकदाचित्कथंचनकुयोनिगतोपिसंसृतिंनाव्रजेन्नकिरोत्। अंगअहोअन्य
वत्केवलकर्मनिष्ठवदितिवैधर्म्येदृष्टांतः। कुतइत्यतआहमुकुंदांघ्र्योःउपगूहनंआलिंगनंपुनःस्मरन्विहातुंनेच्छेत्। यतोऽयंजनोर

तस्यैवहेतोःप्रयतेतकोविदोनलभ्यतेयद्भ्रमतामुपर्यधः। तल्लभ्यतेदुःखवदन्यतःसुखंकालेनसर्वत्रगभीररंहसा॥१८॥ नवैज
नोजातुकथंचनाव्रजेन्मुकुंदसेव्यन्यवदंगसंसृतिं। स्मरन्मुकुंदांघ्र्युपगूहनंपुनर्विहातुमिच्छेन्नरसग्रहोयतः॥१९॥ इदंहिवि
श्वंभगवानिवेतरोयतोजगत्स्थाननिरोधसंभवाः। तद्धिस्वयंवेदभवांस्तथापितेप्रादेशमात्रंभवतःप्रदर्शितम्॥२०॥ ॥ ॥

ग२

सग्रहःरसेनरसनीयेनगृह्यतेवशीक्रियते। यद्वारसनीयेग्रहआग्रहोयस्य। तदुक्तंभगवता। यतन्नेवनतोनूयःसंसिद्धोकुरुनंदन। पूर्वाभ्यासेनतेनैव
क्रियतेह्यवशोपिसइति॥१९॥ तदेवंभगवल्लीलांप्राधान्येनानुवर्णयेत्युक्तं। तत्रकोऽसौभगवान्कावातस्यलीलाइत्यपेक्षायामाह। इदंविश्वंभगवानेवस
उत्पत्त्यादिविश्वस्मादितरःईश्वरस्तुप्रपंचोनपृथक्ईश्वरस्तुप्रपंचात्पृथगित्यर्थः। तत्रहेतुः। यतोभगवतोहेतोर्जगत्जगतःस्थित्यादयोभवंति। अन्येनै
वलीलास्त्वपिदर्शिताः। यद्वाइदंविश्वंभगवान्इतरश्चयःसजीवोपिभगवान्चेतनाचेतनप्रपंचस्तद्व्यतिरेकेणनास्ति। सएवैकस्तैमित्यर्थः। ख२
हियस्मात्तेनसर्वंखल्विदंब्रह्मेत्यादिप्रमाणंसूचितं। तद्धिस्वयमेवभगवान्वेदप्रादेशमात्रंएकदेशमात्रंआचार्यवान्पुरुषोवेदेत्यादिस्फ
र्थसंपादनायप्रदर्शितम्॥२०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प्र०
२३

न्यक्तवांश्चायपि ज्ञात्वा ईश्वरावतारत्वादि स्याह । हे त्वम् अमोघदृक् त्वं आत्मनास्वयं आत्मानं अजमेव संतं जगतः शिवाय प्रजातमवैहि । कुतः परस्य पुं
सः कलांशं ततस्तस्मान्महानुभावस्य हरेरभ्युदयः पराक्रमो ऽधिगण्यतां निरूप्यतां २१ अनेनैव तपआदि सर्वं तत्त्वे फलं स्यादित्याह स२
इदं हीति । श्रुतादयो भावे निष्ठा इदमेव हि तपः श्रवणादेरविच्युतो नित्यो ऽर्थः फलं किं तत् उत्तमश्लोकस्य गुणानुवर्णनमिति यत् २२ स्वकृत
तो हरिकथाश्रवणादि फलं स्ववृत्तांतेन प्रपंचयति अहमिति पुरा पूर्वकल्पे अतीतभवे पूर्वजन्मनि वेदवादिनां दास्याः सकाशादहमभवं जातो ऽस्मि

ग
त्वमात्मनात्मानमवैह्यमोघदृक् परस्य पुंसः परमात्मनः कलां । अजं प्रजातं जगतः शिवाय तन्महानुभावाभ्युदयो ऽधिगण्यताम् ॥ २१
इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः । अविच्युतो ऽर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनम् ॥ २२
अहं पुरातीतभवे ऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनाम् । निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि निर्विविक्षतां ॥ ते मय्य
पेताखिलचापलेर्भके दांते [illegible]धृतक्रीडनके ऽनुव[illegible]र्तिनि । चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयो ऽल्पभाषिणि ॥ २४ ॥
उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुंजे तदपास्तकिल्बिषः । एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजायते ॥ २५ ॥

निरूपितः नियुक्तः । कयोगिनां शुश्रूषणे प्रावृषि वर्षोपलक्षिते चातुर्मास्ये निर्विविक्षतां । निर्वेशमेकत्र वासं कर्तुमिच्छतां २३ अपेतान्यखिलानि चा राम
पलानि यस्मात्तस्मिन्नियतेंद्रिये अधृतक्रीडनके स्मक्रीडासाधने अनुवर्तिनि अनुकूले २४ उच्छिष्टलेपान्पात्रलग्नान्तान्द्विजैरनुज्ञा २३
तः भुं[illegible]जे स्म । तेन भोजनेन [illegible]पास्तकिल्बिषो जातो ऽस्मि । तेषां धर्मे परमेश्वरभजने एव आत्मनो मनसो रुचिः प्रजायते स्म अनुपरागः २५ ॥ ॥
भा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१स्वा श्रृण्व एवं श्रुतवानस्मि मे श्रद्धया ममैवं स्वतः सिध्यानलस्येन बलाज्जनितया अतो मम तस्यापौनरुक्त्यं प्रियं श्रवो यशो यस्य तस्मिन्भगवति २६
लब्धरुचेर्ममास्खलिता अप्रतिहता मतिः अनवच्छिन्नानुषंगः ययामत्या परे प्रपंचातीते ब्रह्मरूपे मयि सदसत्स्थूलं सूक्ष्मं च एतच्छरीरं स्वमायया
अविद्यया कल्पितं न तु वस्तुतोस्तीति अहमेव पश्यामि २७ एवं स्थिते त्वंपदार्थे ज्ञाते देहादिकृतविक्षेपनिवृत्तेस्तत्कारणभूतरजस्तमोनिव
र्त्तिकां दृढां भक्तिं जातामाह इत्थमिति हरेर्यशः अनुसवं त्रिकालं २८ तस्येति द्वाभ्यां तत्पदार्थस्पष्टं किमतो मे प्रश्रितस्य विनीतस्य २९ गुह्य

तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाशृणवं मनोहराः ताः श्रद्धया मेनुपदं विशृण्वतः प्रियश्रवस्यंग ममाभवद्रुचिः २६
तस्मिंस्तदा लब्धरुचेर्महामुने प्रियश्रवस्यस्खलिता मतिर्मम ययाहमेतत्सदसत्स्वमायया पश्ये मयि ब्रह्मणि कल्पितं परे २७
इत्थं शरत्प्रावृषिकावृतू हरेर्विशृण्वतो मेनुसवं यशोमलं संकीर्त्यमानं मुनिभिर्महात्मभिर्भक्तिः प्रवृत्तात्मरजस्तमोपहा २८ त
स्यैवं मेनुरक्तस्य प्रश्रितस्य हतैनसः श्रद्दधानस्य बालस्य दांतस्यानुचरस्य च २९ ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितं अन्व
वोचन्गमिष्यंतः कृपया दीनवत्सलाः ३० येनैवाहं भगवतो वासुदेवस्य वेधसः मायानुभावमविदं येन गच्छंति तत्पदं ३१ एतत्संसू
चितं ब्रह्मंस्तापत्रयचिकित्सितं यदीश्वरे भगवति कर्म ब्रह्मणि भावितं ३२ ॥ ॥ म

तं२

तमामिति साधनभूतधर्मतत्वज्ञानं गुह्यं तत्साध्यं विविक्तात्मज्ञानं गुह्यतरं तस्याप्यैश्वरज्ञानं गुह्यतमं भगवतोदितं भागवत वासुदेवं अन्ववोच
न्नुपदिष्टवंतः ३० न हेवज्ञानं पूर्वोक्तं पदार्थज्ञानादि विवेकेन दर्शयति येनैवेति अविदं ज्ञातवानहं ३१ तत्साधनधर्मरहस्यं च सूचितमित्याह
एतदिति तापत्रयस्याध्यात्मिकादेश्चिकित्सितं भेषजं निवर्त्तकं सत्वशोधकमिति यावत् किं तद्भगवति भावितं समर्पितं यत्कर्म तत्कथं
भूते भगवति ईश्वरे सर्वनियंतरि एवमपि च ब्रह्मणि अप्रच्युतपूर्णरूपे ३२ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प्र० २केव२
२४ ननु संसारहेतोः कर्मणः कथं तापत्रयनिवर्त्तकत्वं सामग्रीभेदेन घटत इति सदृष्टांतमाह हेति सार्द्धेन । यः आमयो रोगः येन भूतादिना जायते
तदेव द्रव्यं आमयकारणं भूतं द्रव्यं तमामयं न पुनाति न निवर्त्तयितुं न्त्यर्थः किंतु चिकित्सितं द्रव्यांतरैर्भावितं सत् पुनात्येव यथा ॥३॥ आत्मविना
शाय कर्म निहत्त्रये कल्पते समर्थं न भवति परं ईश्वरे कल्पितान्यर्पिताः सतः अत्र च प्रथमं महत्सेवा ततस्तत्कृपा ततस्तद्धर्मश्रद्धा ततो न३
भगवत्कथाश्रवणं ततो भगवति रतिः तया च देहद्वयविवेकात्मज्ञानं ततो दृढा भक्तिः ततो भगवत्तत्त्वज्ञानं ततस्तत्कृपया सर्वज्ञत्वादि भ

आमयो येन भूतानां जायते यश्च सुव्रत । तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितं ॥३३॥ एवं नृणां क्रियायोगाः सर्वे संसृतिहेत
वः । त एवात्मविनाशाय कल्पंते कल्पिताः परे ॥३४॥ यदत्र क्रियते कर्म भगवत्परितोषणं । ज्ञानं यत्तदधीनं हि भक्तियोगसम
न्वितं ॥३५॥ कुर्वाणा यत्र कर्माणि भगवच्छिक्षयासकृत् । गृणंति गुणनामानि कृष्णस्यानुस्मरंति च ॥३६॥ नमो भगवते तुभ्यं वा स्म२
सुदेवाय धीमहि । प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च ॥३७॥ इति मूर्त्त्यभिधानेन मंत्रमूर्त्तिममूर्त्तिकम् । यजते यज्ञपु
रुषं स सम्यग्दर्शनः पुमान् ॥३८॥

गवद्गुणाविर्भाव इति क्रमो द्रष्टव्य इति ।३४। ननु च ज्ञानेन नाशः न प्राप्त कर्मनाशः तत्त्वज्ञानं च क्रियायोगाद्भवति कथं कर्म
णा कर्मनाशः स्यात्तत्राह यदत्रेति ।३५। भगवदर्पणेन क्रियमाणं कर्म भक्तियोगं जनयतीति सदाचारेण दर्शयति यत्र यदा भगवतः शिक्षया कर्माणि कुर्वाणा
भवंति तदा कृष्णस्य गुणनामानि गृणंति अनुस्मरंति च कृष्णमित्यर्थः । इयं भगवच्छिक्षा यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्तपस्यसि कौंतेय तत्कु २४
रुष्व मदर्पणमिति ।३६। कीर्त्तनस्मरणरूपं भक्तिहेतुत्वमुक्तं ज्ञानहेतुत्वमाह द्वाभ्यां । ॐ नमो भगवते नमो धीमहि मनसा नमनं कुर्वीमहि ।३७। अमूर्त्तिकं मंत्रा
द्व्यतिरिक्तमूर्त्तिशून्यं यज्ञपुरुषं पूजयति स पुमान् सम्यग्दर्शनो भवति ।३८। ॥
२ते२ श्रवण२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१वति१ न३ २विश्रुतं२

एवं च कृतं मयि हरिः स्वसदृशं ज्ञानादिकं दत्तवानित्याह ॥ इमं स्वनिगमं स्वोपदेशं मयानुष्ठितं अवेत्य ज्ञात्वा मम भावं प्रीतिं च ॥ ३९ ॥ अतस्त्वमप्येवं कुरु इत्या-
३श हत्वमिति ॥ अदभ्रं अनल्पं श्रुतं यस्य हे अदभ्रश्रुत यशः प्रख्याहि कथय येन विश्रुतेन बुधेन विदां विदुषां बुभुत्सितं बोद्धुमिष्टं समाप्यते ॥ यतः दुःखैः
पीडितानां क्लेशानां तिः प्रकारांतरेण न मन्यते ॥ ४० ॥ इति प्रथमे पंचमः ॥ ॥ व्यासस्य पृष्टस्य यार्थं विषष्ठे प्राग्जन्मसमन्वितं ॥ स्वजन्मारभ्य नारदः प्राह कृत्स्नं संकथनोद्भवं
॥ स्वयमपि तथा चिकीर्षुर्गुरुस्तद्देशानंतरं नारदस्य चरितं पृच्छति ॥ भिक्षुभिरिति ॥ विप्रवसिते दूरदेशगमने कृते सति विज्ञानस्यादेष्टृभिः ॥ परं वयस्तत्र २॥

इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितं ॥ अदान्मे ज्ञानमैश्वर्यं स्वस्मिन् भावं च केशवः ॥ ३९ ॥ त्वमप्यदभ्रश्रुत विश्रुतं विभोः समाप्यते ये
न विदां बुभुत्सितं ॥ प्रख्याहि दुःखैर्मुहुरर्दितात्मनां संक्लेशनिर्वाणमुशंति नान्यथा ॥ ४० ॥ ॥ इति श्रीभागवते महापुराणे प्रथमस्कं-
धे पंचमोऽध्यायः ॥ ५ ॥ ॥ सूत उवाच ॥ एवं निशम्य भगवान् देवर्षेर्जन्म कर्म च ॥ भूयः पप्रच्छ तं ब्रह्मन् व्यासः सत्यवतीसुतः ॥ १ ॥ ॥ व्या-
स उवाच ॥ भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिस्तव ॥ वर्तमानो वयस्याद्ये ततः किमकरोद्भवान् ॥ २ ॥ स्वायंभुव कया वृत्त्या वर्तितं ते प-
रं वयः ॥ १ ॥ कथं वेदमुदस्राक्षीः काले प्राप्ते कलेवरं ॥ ३ ॥ प्राक्कल्पविषयामेतां स्मृतिं ते सुरसत्तम ॥ न ह्येष व्यवधात्का-
ल एष सर्वनिराकृतिः ॥ ४ ॥ नारद उवाच ॥ भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिर्मम ॥ वर्तमानो वयस्याद्ये तत एतदकारषं ॥ ५ ॥
एकात्मजा मे जननी योषिन्मूढा च किंकरी ॥ मय्यात्मजेऽनन्यगतौ चक्रे स्नेहानुबंधनं ॥ ६ ॥ ॥

रमायुः ते त्वया कथं वर्तितं नीतं ॥ इदमिति ॥ दासीपुत्रभूतं कलेवरं उदस्राक्षीः उत्सृष्टवानसि ॥ ३ ॥ एष कल्पांतलक्षणः कालः ते स्मृतिं कथं
न व्यवधात् न खंडितवान् स भगवान् भावस्यार्षः हि यतः एष सर्वस्य निराकृतिरपलापो यस्मात्सः ॥ ४ ॥ अकारषं कृतवानहं रेफषयोः का-
रयोर्विश्लेषः छंदोऽनुरोधेन ॥ ५ ॥ तत्र गवत्कचित् कालेन तत्रैव मातृस्नेहयंत्रितोऽन्ववसमित्याह द्वाभ्यां एक एवाहमात्मजो यस्याः सा योषि-
न्मूढेति च स्नेहानुबंधे हेतुः ॥ ६ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंकरीत्यस्यार्थं प्रपंचयति अस्त्वतं चासाम्प्रतोनकस्मान समर्थाश्रासीत् दारुमयीयोषेत्यतिपारवेश्यपेहष्टांतः ३ तदेवं समास्नेहं चक्रे अहं च दिगा
दिष्वनभिज्ञः अतस्तत्रैवत्प्यवसमित्याह अहं च तस्मिन् ब्रह्मकुलेतस्याः मातुः स्नेहानुबंधस्याक्षेत्रयाकदाचिंमे दितिप्रतीक्षयाइत्यर्थः ऊषितवान्
त्सुखादत्त ८ तन्मातुर्मरणं शं कस्माएंश्चीप्सतदिशास्मानुग्रहं मन्यमानः प्रातिष्ठं प्रस्थितोस्मि १० स्फीतान्जनपदादीनतियातः सन्महा
दिपिनमशाक्षमितिचतुर्थेनान्वयः जनपदादिषुनानागुणदोषयुक्तेषु समदृष्टिः सन्गतोहमिमितात्पर्यार्थः स्फीतान्समृद्धान्जनपदान्

सास्वतंत्रानकस्मासीद्योगक्षेमं ममेछती ईशस्यहिवशेलोकोयोषादारुमयीयथा ७ अहं च तद्ब्रह्मकुलेऊषिवांस्तदपेक्षया
दिग्देशकालानभिज्ञो बालकः पंचहायनः ८ एकदानिर्गतांगेहाद्दुहंतीनिशिगांपथि सर्पोदशत्पदास्पृष्टः कृपणांकालचोदितः ९
तदातदहमीशस्यभक्तानांशममीप्सतः अनुग्रहंमन्यमानः प्रातिष्ठंदिशमुत्तरां १० स्फीतान्जनपदांस्तत्रपुरग्रामव्रजाकरान्
खेटखर्वटवाटीश्चवनान्युपवनानिच ११ चित्रधातुविचित्राद्रीनिभभग्नभुजद्रुमान् जलाशयान्शिवजलान्नलिनीःसुरसेविताः १२

देशान्तत्रतस्यांदिशिपुरग्रामव्रजाकरान् तत्रपुराणिराजधान्यः ग्रामाः नृपुरोक्ताः विप्राश्चविप्रभृत्याश्चयत्रचैववसंतिवै सत्तुग्रामइतिप्रोक्तो‍ऽशूद्रा
णांवासएवचेति व्रजागोकुलानि आकराःरत्नाद्युत्पत्तिस्थानानि तान् खेटाःकर्षकग्रामाः खर्वटागिरितटग्रामाः नृपुरकावा एकतोयत्रतुग्रामोन
गरस्यैकतःस्थितंमिश्रंतुखर्वटंनामनदीगिरिसमाश्रयमिति वाट्यः पुगद्रुमपुष्पवाटिकास्ताः वनानि स्वतः सिद्धवृक्षाणांसमूहाः उपवनानिरोपित 
वृक्षाणांसमूहास्तानिच ११ चित्रैर्धातुभिःस्वर्णरजताद्यैःस्त्रिवानद्रींश्च इभैर्गजैर्भग्नाभुजाःशाखायेषांतेद्रुमायेषुतान् शिवानिनद्राणिजलानि येषांता 
न्नलिनीःसरसीः १२ ॥

विचाः स्वनाषेषांतैः पत्तरथैः पद्मिनिः वन्नादप्रबुद्धैरित्यर्थः। विन्नमज्ञिन्नमरैः श्रीः शोभा यासांताः नलिनी अनतियातः अतिक्रम्य गतः सन् महद्विपिनं वन
मजाहत्। १३ कीदृशं नलवेणुशरारुणं स्तंबैः कशैः कीचकैश्च गहरं दुर्गमं। तत्र वेणु जात यएव विपुलांतराल्मानः कीचकाः घोरं दुःसहं प्रतिनृयाका
रं चमूकरहृपंष्याला हीनामजिरं क्रीडास्थानं। १४ परिश्रांता नीडिया एवं आत्मा देहस्य यस्य स तृषापरीतो भ्रांतः उपस्पृष्टः आचांतः। १५ पिप्पलोपस्थे
त्य-१ अश्वत्थमूले आश्रितः उपविष्टः आत्मना बुध्याआत्मस्थं हृदिस्थमात्मानं परमात्मानं १६ भावेन भक्त्या निर्जितं वशीकृतं यश्चेतस्तेनौत्कंठेन अश्रुकला
श्रियः
२नद्या२
विचरन्तैः पत्तरथैर्विन्नमजन्मर॥ एकएवातियातोहमद्राक्षं विपिनं महत्॥ १३ नलवेणुशरस्तंबकुशकीचकगहरं॥ घोरं प्रतिभयाका
रं व्यालोलूकशिवाजिरम्॥ १४ परिश्रांतेंद्रियात्माहं तृट्परीतो बुभुक्षितः॥ स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः॥ १५ तस्मिन्निर्मनुजेरण्ये
पिप्पलोपस्थ आश्रितः॥ आत्मनात्मानमात्मस्थं यथाश्रुतमचिंतयं॥ १६ ध्यायतश्चरणांभोजं भावनिर्जितचेतसा॥ औत्कंठ्याश्रुकलाक्ष
स्य हृद्यासीन्मे शनैर्हरिः॥ १७ प्रेमातिभरनिर्भिन्नपुलकांगोतिनिर्वृतः॥ आनंदसंप्लवे लीनो नापश्यमुभयं मुने॥ १८ रूपं भगवतो यत्तन्म
२स्यतंतमि
२तिपाठः
नः कांतं शुचापहं॥ अपश्यन्सहसोत्तस्थे वैक्लव्याद्दुर्मना इव॥ १९ दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि॥ वीक्षमाणोपि नापश्य
मवितृप्त इवातुरः॥ २० एवं यतंतं विजने मामाहागोचरो गिरां॥ गंभीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव॥ २१ हंतास्मिन्जन्मनि भवा
न मां द्रष्टुमिहार्हति॥ अविपक्वकषायाणां दुर्दर्शोहं कुयोगिनां॥ २२॥
सुकेऽश्रुकला। णी यस्य २० प्रेमातिभरेण निर्भिन्नपुलकानि अंगानियस्य
स्य आनंदाख्ये संप्लवे महापूरे परमानंदे उभयमात्मानं परं च मनसः कांतम् मनोज्ञं शुचां शोकं अपहंतीतितथा तत्॥ तस्य सुप्ति
नोऽस्मि। १८ हृदि मनः प्रणिधाय स्थिरीकृत्य अवितृप्तोह मातुर इवा नवमितिशेषः॥ २१ गिरां म गोचरः संवेदनस्याविषय भूत ईश्वरः॥ २१ हंते
ति सानुकंपसंबोधने मां द्रष्टुं नार्हति। न विपक्वाः दग्धाः कषायाः मलाः कामादयो येषां कुयोगिनां अनिष्पन्नयोगानां॥ २२॥ ॥ ॥
४आनंदाख्ये संप्लवे महापूरे परमानंदे उभयमा४
४त्मानं परं च ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाम्प्र.
२६

२निंघ२ ० २६॥

कुतस्त्वं हि दृष्टोसि तत्राह सकृद्दर्शितं मयेति । तदेतत्कामायमय्यनुरागाय । त्वं कामेन किमित्यत आह । मत्कामः पुमान् लब्धयानुकामान् ॥ २२ ॥ दीर्घया मिमतांसि वयाः वर्धयां लोकं देहं मक्रुनतां मस्यार्षदतां गतासि ॥ २४ ॥ प्रजानां सर्गसृष्टौ निरोधे संहारे पि प्रजासर्गस्य निरोध इति वा ॥ २५ ॥ तस्य सिंधुमहद्भूतं श्वस्य महतो भूतस्य निश्वसितमेतदृग्वेद इत्यादिश्रुतेः कीदृशमीश्वरं सर्वनियंतृ न न सिलिंगं मूर्तिर्यस्य तन्न तो सिंगं सं निहितमपि । न लिंगं पतई निश्चलिंगं तस्मै श्व दृष्टा यावता मं पृणमं संविधे कृतवानहं तेनानुकंपितः सन् ॥ २६ ॥ इतत्रपः स्फुल लक्कुः विमत्सरो जातो विशिष्टोषः ॥ २७ ॥ कालेत्वा सर्वरे कालः मृत्युः भाउरन्न्हावि केतत्व । अकस्मात्भाउरनविदृष्टं तेः विद्युदिवैति ॥ सौदामिनी विशेषणं स्फुटत्व प्रदर्शनार्थं सुदाममाला

सकृद्धदर्शितं रूपमेतत्कामायतेनघ । मत्कामः शनकैः साधुः सर्वस्तित्वतिलब्धयान ॥ २३ ॥ स्त्रीवयादीर्घया ते जाता मयि दीर्घामतिः । हित्वा वर्धया मंलोकं गंता मृकनता मसि ॥ २४ ॥ मतिर्मयि निबध्येयं न विपद्येत कर्हिचित् । प्रजासर्गनिरोधे पि स्मृतिश्च मद्नुग्रहात् ॥ २५ ॥ एतावदुक्तोपरराम तन्महद्भूतं नतोलिंगममलिंगमीश्वरं । अहं चतस्मै महतां महीयसे शीर्ष्णावनामं विदधेनुकंपितः ॥ २६ ॥ नामान्यनंतस्य हतत्रपः पठन् गुह्यानि भद्राणि कृतानि च स्मरन् । गां पर्यटंस्तुष्टमना गतस्पृहः कालं प्रतीक्षन्विमदो विमत्सरः ॥ २७ ॥ एवं कृष्णमतेर्ब्रह्मन्नासक्तस्यामलात्मनः । कालः प्रादुरभूत्काले तडित्सौदामिनी यथा ॥ २८ ॥ प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुं । आरब्धकर्मनिर्वा णो न्यपतत्पांचभौतिकः ॥ २९ ॥

२ दि २

१ ति १ भवा १ तत्र सौदामिनी माला कातेत्यर्थः । यथा सुदामा पर्वतः तेनैकदिगितिसूत्रेणा ऽस्फटिकादिमय पर्वत प्रां तिभवा हि विद्युदपि स्फुटा नवतित इत्यर्थः । यथा तादृंतिस्वं तिक इत्यर्थः । तडिदंतिक बाधयो विनिनिरुक्त स्मरणात् । प्रयुज्यमाने मयितामितिभय मर्थः । हित्वावद्य मिमंलोकं गंतामृक्तनतामसीति यांता भागवती तनुरवक्यार्षदरूपा शुद्धा सत्वमयी ततः प्रतिश्रुता तां प्रति भगवता मयि प्रयुज्यमाने बोधमाने आरब्धं यत्कर्म निर्वाणं समाप्तं यस्य आरब्धकर्मणा निर्वाणमेव निर्वाणं यस्य स निर्वाणं पंचभूतात्मको देहो न्यपतत् । अनेन पार्षदतनुनामकमरित्वं नित्यत्वमित्यादि सूचितं भवति ॥ २९ ॥ ॥ २६

२ त १ सः

१दृति१

इदं त्रैलोक्यमादाय उपसंहृत्य उदन्वतः। एकार्णवस्थांन सि शयाने श्रीनारायणे निशायिषोः। शयनेकर्तुमिच्छोर्विभोर्ब्रह्मणः। अंतर्मध्यं अनुप्राणं
निश्वासेन सह विविशे प्रविष्टोहं। ततो वृत्तीय विश्वात्मा देहमाविरूपवृक्किणः। लवापवेशवीनिद्रामेकीभूयाथविलुनेनितिकूर्मेक्किः। स्वाय नैं
न सितीपाशेस्वायनेस्वस्य स्वयनेन सिशिशायिषोर्ब्रह्मणः श्रीनारायणेनाभेदविवक्षयोक्तिः इति विगमयितव्यं। ३० प्राणेभ्यः इन्द्रियेभ्यः अहं मरी
चिमिश्राः तत्सुखाः ऋषयश्च जज्ञिरे। ३१ येकर्मिणस्ते बहिर्नयांति। तपआदिनिर्मललोकं गतास्तु अंतर्न यांति। अहंतु महाविष्णोरनुग्रहाद् अं

कल्पांत इदमादाय शयानेंभस्युदन्वतः। शिशयिषोरनुप्राणं विविशेंतरहं विभोः। ३०। सहस्रयुगपर्यंते उत्थायेदं सिसृक्षतः। म
रीचिमिश्रा ऋषयः प्राणेभ्योऽहं च जज्ञिरे। ३१। अंतर्बहिश्च लोकांस्त्रीन्पर्येम्यस्कंदितव्रतः। अनुग्रहान्महाविष्णोरविघातगतिः क्व
चित्॥ ३२॥ देवदत्तामिमां वीणां स्वरब्रह्मविभूषितां। मूर्छयित्वा हरिकथां गायमानश्चराम्यहं॥ ३३॥ प्रगायतः स्ववीर्याणि तीर्थपा
दः प्रियश्रवाः॥ आहूत इव मे शीघ्रं दर्शनं याति चेतसि॥ ३४॥ एत[illegible]द्धि रचित्तानां मात्रास्पर्शेच्छया मुहुः॥ भवसिंधुप्लवो दृष्टो हरिच
र्यानुवर्णनं॥ ३५॥

३हि३ १ध्या१

स्कंदितं ब्रह्मचर्यव्रतं यस्य अंतर्बहिश्च पर्येमि पर्यटामि। क्वचिदपि अविघातात् अप्रतिहता गतिर्यस्य सः। ३२। किमिति पर्यटसि [illegible] सि इ
श्वराज्ञया लोकमंगलार्थमित्याह चतुर्भिः। देवेन ईश्वरेण दत्तां। स्वराः निषाद ऋषभ गांधार षड्ज मध्यम धैवत पंचमा इति सप्त त एव [illegible] ब्रह्म ब्रह्मा
भिव्यंजकत्वात् तेन विभूषितां। स्वतः सिद्ध[illegible] सप्त स्वरान्मित्यर्थः मूर्छयित्वा। ३३। प्रयोजनमाह प्रगायत इति। ३४। परप्रयोजनमाह। एत[illegible]धी
ति मात्रा विषयास्तेषां स्पर्शा भोगास्तेषामिच्छया। आतुराणि चित्तानि येषां तेषां हरिचर्यानुवर्णनं। एतदेव सिंधोः प्लवः पोतः न केवलं
श्रुतिप्रमाणेन किं तर्हि अयं मातरि कालांहं दृष्ट एवेत्यर्थः। ३५॥ ॥

५मि५ १भव१

एतदेवेत्युक्तमवधारणमस्तु न चैतेन दृढयति। यमादिभिस्तथा न शाम्यति। यथा तु मुकुंदसेवया स्वस्यात्मा साक्षात्कारात्मा मनः शाम्यति। कथंचित्तु मुकुंदसे
वामात्रेण शाम्यति किंपुनस्तद्गुणवर्णनेनेति भावः ३६ सर्वतो मनः परितो विचारमातं ३७ आमंत्र्यानुज्ञाप्य याद्दच्छिकः स्वप्रयोजनं संकल्प
श्रूम ३८ हरिकथागायकं नारदं प्रशंसयति अहो इति माद्यन् हृष्यन् तंत्र्या वीणया ३९ ॥ इति प्रथमे षष्ठः ॥ अथ भागवतश्रोतुर्जन्मवक्तु

यमादिभिर्योगपथैः कामलोभहतो मुहुः। मुकुंदसेवया यद्वत्तथात्माद्धा न शाम्यति ३६ सर्वं तदिदमाख्यातं यत्पृष्टोऽहं त्वयानघ
जन्मकर्मरहस्यं मे भवतश्चात्मतोषणं ३७ सूत उवाच एवं संभाष्य भगवान्नारदो वासवीसुतं। आमंत्र्य वीणां रणयन्ययौ याद्द
च्छिको मुनिः ३८ अहो देवर्षिर्धन्योऽयं यत्कीर्तिं शार्ङ्गधन्वनः। गायन्माद्यन्निदं तंत्र्या रमयत्यातुरं जगत् ३९ ॥ इति श्रीभागवते
महापुराणे प्रथमस्कंधे षष्ठोऽध्यायः ॥ ६ ॥ शौनक उवाच निर्गते नारदे सूत भगवान्बादरायणः। श्रुतवांस्तदभिप्रेतं
ततः किमकरोद्विभुः १ सूत उवाच ब्रह्मनद्यां सरस्वत्यामाश्रमः पश्चिमे तटे। शम्याप्रास इति प्रोक्त ऋषीणां सत्रवर्द्धनः
२ तस्मिन्स्व आश्रमे व्यासो बदरीखंडमंडिते। आसीनोऽप उपस्पृश्य प्रणिदध्यौ मनः स्वयं ३ भक्तियोगेन मनसि सम्यक् ३॥
प्रणिहितेऽमले। अपश्यत्पुरुषं पूर्वं मायां च तदपाश्रयां ४

परीक्षितः सुखबालवधाद्रौणेर्दंडः सप्तमेऽभ्यते। तस्य नारदस्याभिप्रे
स०२ तं कृतवान् १ ब्रह्मनद्यां ब्रह्मदैवत्यायां ब्राह्मणै रक्षितायां वा सत्रं कर्म वर्द्धयतीति तथा २ बदरीणां खंडेन समूहेन मंडिते मनः प्रणिदध्यौ
स्थिरं चकार समाधिनानुस्मरेति नारदोपदिष्टध्यानं कृतवानित्यर्थः ३ प्रणिहिते निश्चले स्वस्थे तद्धेतुः भक्तियोगेनामले पूर्वं प्रथमं पु
रुषमीश्वरमपश्यत् पूर्णमिति वा पाठः तदुपाश्रयामीश्वराश्रयां तदधीनां मायां चापश्यत् ४ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईशमायाकृतांचजीवानांसंसृतिमपश्यत् ॥ दित्याह ॥ ययासंमोहितःस्वरूपावरणौविक्षिप्तः परोपिगुणत्रयात्मव्यतिरिक्तोपितत्कृतंगुणत्रयात्मिमा
नकृतमनर्थंच कर्तृत्वादिकंचप्राप्नोति ॥५॥ अनर्थमुपशमयतियो ऽधोक्षजेसाक्षाद्भक्तियोगस्तंचापश्यत् एतत्सर्वंस्वयंदृष्ट्वाएवमजानतोलो
कस्यार्थेसात्वतसंहितांश्रीभागवताख्यांचक्रे तदनेनश्लोकत्रयेणभागवतार्थः संक्षेपतोदर्शितः एतदुक्तंभवति विद्याशक्त्यामायानियंतानि
त्याविर्भूतपरमानंदस्वरूपः सर्वज्ञःसर्वशक्तिरीश्वरस्तन्मायया संमोहितस्तिरोभूतस्वरूपस्तद्विपरीतधर्माजीवः तस्यचेश्वरस्यभक्त्यालब्धज्ञानेन
मोक्षइतितदुक्तंविष्णुस्वामिनाह्लादिन्यासंविदाश्लिष्टःसच्चिदानंदईश्वरः स्वाविद्यासंवृतोजीवः संक्लेशनिकराकरः ॥ तथा ॥ सईशोयद्वशेमा

ययासंमोहितोजीव आत्मानंत्रिगुणात्मकं ॥ परोपिमनुतेऽनर्थंतत्कृतंचाभिपद्यते ॥५॥ अनर्थोपशमंसाक्षाद्भक्तियोगमधोक्षजे
लोकस्याजानतोविद्वांश्चक्रेसात्वतसंहितां ॥६॥ यस्यांवैश्रूयमाणायांकृष्णेपरमपूरुषे ॥ भक्तिरुत्पद्यतेपुंसःशोकमोहभयापहा ॥७॥ स
संहितांभागवतींकृत्वानुक्रम्यचात्मजं ॥ शुकमध्यापयामासनिवृत्तिनिरतंमुनिः ॥८॥ शौनकउवाच ॥ सवैनिवृत्तिनिरतःसर्वत्रोपे
क्षकोमुनिः कस्यवामहतीमेतामात्मारामःसमभ्यसत् ॥९॥ सूतउवाच ॥ आत्मारामाश्चमुनयोनिर्ग्रंथाअप्युरुक्रमे ॥ कुर्वंत्यहैतु
कींभक्तिमित्थंभूतगुणोहरिः ॥१०॥

मासजीवोयस्तयामोहितः स्वाविर्भूतपरानंदस्वाविर्भूतसुदुःखवान् ॥ स्वादुर्गुण्यविपर्यासभवभेदजभीःशुचः ॥ मन्माययाजुषन्नास्तेतमिमंनृहरिं
नुमः स्ताद्धि ॥ संहितायाअनर्थोपशमकत्वंदर्शयति ॥ यस्यांश्रूयमाणायामेवकिंपुनःश्रुतायामित्यर्थः ॥ अनुकम्प्यशोधयित्वा ॥८॥ कस्यवाहेतोर्म
हतींवितताम् ॥९॥ निर्ग्रंथाःग्रंथेभ्योविनिर्गताः ॥ तदुक्तंगीतासु ॥ यदातेमोहकलिलंबुद्धिर्व्यतितरिष्यति ॥ तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुतस्यचे
ति ॥ यद्वाग्रंथिरेवग्रंथः निर्वृत्तःक्रोधाहंकाररूपोग्रंथिर्येभ्यस्तेनिर्वृत्तहृदयग्रंथयइत्यर्थः ॥ ननुमुक्तानांकिंभक्त्या इत्याहि सर्वापेक्षापरिहारार्थं
माहइत्थंभूतगुणइति ॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाऽप्र०

नन्विति कुर्वंतु नाम एतच्छास्त्रं मा सेध्यत्कस्य किंकारणमित्यत आह हरेरिति। अध्यगात् अधीतवान् विष्णुजनाः प्रिया यस्येति सारस्वतादिभिः संगेन न१
संगतिका मुक्तिभावः एतेन तस्य पुत्रो महायोगी गतादिना शुकस्याख्याने प्रवृत्तिः कथमिति यदुक्तं तस्योत्तरमुक्तं ॥११॥ यदुक्तं तदुक्तं परीक्षि
तः शापोपवेशेन श्रवणं कथमिति। तस्य जन्म महाश्चर्यमित्यादिना तस्योत्तरं वक्तुमाह परीक्षित इति। विप्रापत्तं मुक्तेः मृत्कवासस्य मुहापस्या
नं श्रीकृष्णकथानामुदयो यथा न वर्त्तते तथा ॥१२॥ परीक्षितो जन्म निरूपयिष्यन्नाहौ तावत्कृतस्य एव आश्वत्थाम्नो बलात्कृष्णेन रक्षितः इति
वक्तुं कथां प्रस्तौतीत्यदृस्यादिना। यदा द्रौणिरश्वत्थामा कृष्णासुतानां द्रौपदीपुत्राणां शिरांसि उपाहरत् तदा तन्माता अरुदत् तां च सांत्वय
भ्यः

हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः ॥ अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः ॥११॥ परीक्षितोऽथ राजर्षेर्जन्मकर्मविलापनं ॥ सं
१२॥ स्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयं ॥ यदा मृधे कौरवसृंजयानां वीरेष्वथो वीरगतिं गतेषु ॥ वृकोदराविद्धगदाभिमर्शभग्नोरुदं
डे धृतराष्ट्रपुत्रे ॥१३॥ भर्तुः प्रियं द्रौणिरिति स्म पश्यन् कृष्णासुतानां स्वपतां शिरांसि ॥ उपाहरद्विप्रियमेव तस्य जुगुप्सितं कर्म विग
र्हयंति ॥१४॥ माता शिशूनां निधनं सुतानां निशम्य घोरं परितप्यमाना ॥ तदारुदद्बाष्पकलाकुलाक्षी तां सांत्वयन्नाह किरीटमाली ॥
॥१५

ननु किरीटमाली अर्जुन आहेति। तृतीयेनान्वयः। किमिति बालानां शिरांस्यानीतवानित्यपेक्षायामाह मृधेष्विति यद्यपि पांडवा अपि कौ
रवा एव तथापि संजयवज्ज्ञातेः पृथक्करणं पांडवानां सेनापतिरिति सृंजयानामित्युक्तं वीरगतिं स्वर्गं अथानन्तरं वृकोदरेण विद्धाया गदाया
अभिमर्शेन घातेन भग्नौ ऊरुदंडौ यस्य तथा भूते धृतराष्ट्रस्य पुत्रे दुर्योधने सति। भर्तुर्दुर्योधनस्य मे तिवितर्केऽस्त्वेवं प्रियं स्यादिति पश्यन्। तस्य त
द्विप्रियमेवेति वाक्यांतरं विप्रियत्वे हेतुः जुगुप्सितमिति ॥१४॥ घोरं दुःसहं यथा भवतीति बाष्पकलाभिर्बिंदुभिराकुले अक्षिणी यस्याः सा कि २०
रीटस्य कृत्वे पितरयाणं वकुत्वात् किरीटमालीत्युक्तम् ॥१५॥ ॥
वु३ १३॥

१८

शुचः शोकाश्रूणि प्रमृजामि परिमार्जयामि। यद्यदा ब्रह्मबंधोर्ब्राह्मणाधमस्य आततायिन इति। अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदा
रहरश्चैव षडेते ह्याततायिन इति स्मरणात्। चक्रात्ततायी शास्त्रपाणिः। तेन च पुत्रहंतृत्वं लक्ष्यते। गांडीवाख्यधनुषो मुक्तैर्विशिखैर्बाणैरुपाहरिष्ये त्वत्स रवे२
मीपमानयामि यच्छिरश्चाक्रम्य आसनं विधाय दग्धपुत्रा सती। १६। वल्गुभिः रम्यैर्विचित्रैर्जल्पैः नानाभणितैः सखा अर्जुनः अच्युत एव मित्रं। सू
तश्च यस्य दंशितः बद्धकवचः। उग्रधनुश्चापं यस्य कपिर्हनुमान् ध्वजे यस्य सः गुरोः पुत्रं रथेन अन्वाद्रवत् अन्वधावत। १७। आपतंतं आधावं
तं सद्रौणिः कुमारहा बालघाती। उद्विग्नमनाः कंपितहृदयः प्राणपरीप्सुः प्राणान् लब्धुमिच्छुः न तु कीर्तिं यावत्क्रमं यावद्गंतुं शक्यं तावदुर्व्यां अपरा

तदा शुचस्ते प्रमृजामि भद्रे यद्ब्रह्मबंधोः शिर आततायिनः। गांडीवमुक्तैर्विशिखैरुपाहरे त्वाक्रम्य यत्स्नास्यसि दग्धपुत्रा। १६। इति
प्रियां वल्गुविचित्रजल्पैः स सांत्वयित्वाच्युतमित्रसूतः। अन्वाद्रवद्दंशित उग्रधन्वा कपिध्वजो गुरुपुत्रं रथेन। १७। तमापतंतं स विलक्ष्य
दूरात्कुमारहोद्विग्नमना रथेन। पराद्रवत्प्राणपरीप्सुरुर्व्यां यावक्रमं रुद्रभयाद्यथा कः। १८। यदाशरणमात्मानमैक्षत श्रांतवाजि
नं। अस्त्रं ब्रह्मशिरो मेने आत्मत्राणं द्विजात्मजः। १९। अथोपस्पृश्य सलिलं संदधे तत्समाहितः। अजानन्नपि संहारं प्राणकृच्छ्र उप प्र१
२ के इति पाठः २
स्थिते। २०।

द्रवत् अपलायत। कः ब्रह्मा मृगो भूत्वा सुतां अनुसृयतः मनु। रुद्रस्य भयाद्यथा पलायते स्म। अर्क इति पाठे। वामनपुराणकथा
हि१ सूचिता। तयोर्विद्युन्माली नाम कश्चिद्राक्षसो माहेश्वरः। तेन मेरुं रुद्रेण सौवर्णं विमानं दत्तं। ततो भास्करपृष्ठतो भ्राम्यन् विमानदीप्त्या रात्रिं विलो अ३
पितवान्। ततोऽर्केण निजतेजो द्रावयित्वा तद्विमानं पातितं। तच्छ्रुत्वा कुपितेन रुद्रेण यादर्कः पपाद्रिवत्ततो रुद्रस्य क्रूरदृष्ट्या दंदह्यमानः। पतन्
वाराणस्यां पतितो लोलार्कनाम्ना विख्यातो जातः। १८। अशरणं रक्षकरहितं न तु पलायनमेव रक्षकमस्ति न। तस्यापि कुंठितत्वादित्याह। श्रांता
वाजिनो यस्य तं। ब्रह्मशिरो ब्रह्मास्त्रं द्विजात्मजः इत्यदीर्घदर्शितामाह। १९। तद्ब्रह्मास्त्रं समाहितः कृतध्यानः उपसंहारमजानन्नपि संधाने हेतु
। प्राणकृच्छ्र इति। २०। ॥ ॥ भि३
प्र१

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द्र॰
२०५

ततः प्रादुर्भूतं सर्वतो दिशं प्रादुष्कृतं प्रकटीकृतं तेजो निरीक्ष्य ततः प्राणापदं चाभिप्रेत्य २१ प्रस्तुतं विज्ञापयितुं प्रथमं स्तौति कृष्णेति त्वच्चरणानि ॥
संसृते हेतौ दह्यमानानां तत्स्यापवर्गोऽपवर्गप्रदः पिता नाथः कस्तथैव त्वं यः २२ यतस्त्वमीश्वरः साक्षात् कुतः यतः प्रकृतेः परः पुरुषः तत्कुतः यतस्त्वमाद्यः
कारणं कारणत्वेऽपि विकारतामाह मायां व्युदस्य निजरूपकैवल्यस्वरूपे आत्मन्येवावस्थितत्वात् २३ त्रिवर्गदातापि त्वमेवेत्याह सृजतीति यस्त्वं मायाम्
निजरूपस्थितः स एव मायाति सृजन् सुधर्मादिफलमुपासितः सत्त्वविधस्त्वं वीर्येणाधिनाथे एए २४ तथावाऽनेनावतारेणानवन्साधुपक्षपा

२५।

ततः प्रादुष्कृतं तेजः प्रचण्डं सर्वतो दिशं प्राणापदमभिप्रेत्य विष्णुं जिष्णुरुवाच ह २१ अर्जुन उवाच ॥ कृष्ण कृष्ण महाबाहो नाथ जगन्नाम
नयंकर त्वमेको दह्यमानानामपवर्गोऽसि संसृते २२ त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित
आत्मनि २३ स एव जीवलोकस्य मायामोहितचेतसः विधत्से स्वेन वीर्येण श्रेयो धर्मादिलक्षणं २४ तथायं चावतारस्ते भुवो भारजिहीर्षया
स्वानां चानन्यभावानामनुध्यानाय चासकृत २५ किमिदं स्वित्कुतो वेति देवदेव न वेद्म्यहं सर्वतो मुखमायाति तेजः परमदारुणं
२६ श्रीभगवानुवाच वेत्सीदं मे एतत्पुत्रस्य ब्राह्ममस्त्रं प्रदर्शितं नैवासौ वेद संहारं प्राणबाध उपस्थिते २७ नह्यस्यान्यतमं किंचिद
स्त्रं प्रत्यवकर्षणं जह्यस्त्रतेज उन्नद्धमस्त्रज्ञो ह्यस्त्रतेजसा २८
तोसद्यस्तु स्नात्वा तयेति किंतु मारणं मदिच्छामात्रेणन भवति तत्राह स्वानां
ज्ञातीनां भक्तानामनुध्यानाय च ॥ तथा तन्मनाभावानां एकांतभक्तानां च २५ एवं स्तुत्वा प्रकृतं विज्ञापयति किमात्मकमिदं कुतो वायातीति स्वि
त्वित्कर्के २६ इदं द्रोणपुत्रस्य ब्राह्ममस्त्रं तेन त्वत्प्राणबाधे प्राप्ते प्रदर्शितं केवलं न तु तत्प्रयोगे कृत्स्नलक्षणं प्राप्तः यतोसौ परं संहारं न वेद एतच्च २०५
त्वं वेत्सि यज्ञानासि २७ प्रत्यवकर्षणं निवृत्तिहेतुरस्त्रकिंतु किमित्यर्थः अतः त्वं तदस्त्रतेज उन्नद्धमुत्कटं ब्रह्मास्त्रतेजसैव जहि घातय त्वं मुक्तं चा
स्त्रं तदुपसंहृत्य स्वयमुपशाम्येत्यत आह अस्त्रज्ञोसि २८ ॥

कृ२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्व ३ यो ३

परेशात्रवस्त्र एव वीरास्त्वान्दहंतीति तत्तथा। फाल्गुनोर्जुनः। अपः स्पृष्ट्वाचम्य तं श्रीकृष्णं परिक्रम्य प्रदक्षिणीकृत्य ब्राह्माय ब्राह्मास्त्रं निवर्तयितुं
२९। ततः शरजन्त्वयोर्द्वयोरस्त्रयोस्तेजसी शरैः संवृते संवेष्टिते परस्परं मिलिते आवृत्य ववृधाते वृद्धिं गते। किं कृत्वा रोदसी द्यावापृथिव्यौ खमंतरिक्षं
आवृत्य यथा प्रलये संकर्षणमुखाग्निः उपरिस्थितोर्कश्च संहत्य वर्धते तद्वत्। ३०। तयोर्द्रौणिफाल्गुनयोस्तेन दह्यमानाः सांवर्तकं प्रलयाग्निममं
सत मेनिरे। ३१। लोकानां व्यतिकरं व्यत्ययं नाशमित्यर्थः। वासुदेवस्य मतं चेति ब्रह्मास्त्रद्वयमुपसंहृतवान्। ३२। गौतम्यं वंशजा गौतमी कृपीत

सूतउवाच। श्रुत्वा भगवता प्रोक्तं फाल्गुनः परवीरहा। स्पृष्ट्वापस्तं परिक्रम्य ब्राह्मं ब्राह्माय संदधे। २९। संहत्यान्योन्यमुभयो
स्तेजसी शरसंवृते। आवृत्य रोदसी खं च ववृधातेर्कवह्निवत्। ३०। दृष्ट्वास्त्रतेजस्तु तयोस्त्रींल्लोकान् प्रदहन्महत्। दह्यमानाः प्र
जाः सर्वाः सांवर्तकममंसत। ३१। प्रजोपद्रवमालक्ष्य लोकव्यतिकरं च तत्। मतं च वासुदेवस्य संजहारार्जुनो द्वयं। ३२। तत आसा
द्य तरसा दारुणं गौतमीसुतं। बबंधामर्षताम्राक्षः पशुं रसनया यथा। ३३। शिबिराय निनीषंतं रज्वा बध्वा रिपुं बलात्। प्राहार्जुनं प्र नी०
कुपितो भगवानंबुजेक्षणः। ३४। मैनं पार्थार्हसि त्रातुं ब्रह्मबंधुमिमं जहि। योसावनागसः सुप्तानवधीन्निशि बालकान्। ३५
मु मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडं। प्रपन्नं विरथं भीतं न रिपुं हंति धर्मवित्। ३६। ॥

बा

स्याः सुतं अमर्षेण कोपेन ताम्रे अक्षिणी यस्य सः। निःकृपत्वे दृष्टांतः पशुं यथेति। तस्य बंधनं धर्म इत्यत्र दृष्टांतः यथा याज्ञिकः पशुमिति रश
नया रज्वा। ३३। शोकरोषादियुक्तस्याप्यर्जुनस्य धर्मनिष्ठाख्यापनाय श्रीकृष्णवाक्यं तदाह द्वाभ्यां। शिबिराय राजनिवेशाय नेतुमिष्टं तं प्रकुपित
इवेति। ३४। अनागसो निरपराधान्। ३५। रिपोरपि सुप्तस्य बालस्य च वधो न धर्म इत्यमुमर्थं दर्शयति। मत्तं मद्यादिना। प्रमत्तं अनवहितं उन्मत्तं
ग्रहवातादिना। जडं अनुद्यमं प्रपन्नं शरणागतं विरथं भग्नरथं। ३६। ॥ थं१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वधीद्दंडरूपः तस्यैव श्रेयः पुरुषार्थिः ॥ यद्यतो दंडप्रायश्चित्तरहिता होः ॥ स पुमान् अभीयानीति ॥ तथा च स्मरंती राजानि धृतदंडास्तु कृत्वा पापा ना
नि मानवाः विधूतकल्मषा [illegible] यांति स्वर्गं सुकृतिनो यथेति ॥३७॥ न्याय्यं यद्यपि निर्दिष्टः तथापि हंतुं नैच्छत ॥ आत्महंतुं पुत्रहंतारमपि पैतो महान् ॥४०॥
गोविंदः प्रियः ॥ आराधियस्य सः ॥ आत्मजानां चौचं [illegible] सेविपायो ॥४१॥ तथापरि नवेनाक्रममानातं कर्मणा जुगुप्सितेन दोषेण [illegible] वा अंगुरंक्षप्फले

स्वप्राणान्मः परप्राणैः प्रभुस्मात्मद्दुणः स्वलः ॥ तद्वधस्तस्य हि श्रेयो यद्दोषाद्यात्सधः पुमान् ॥३९॥ प्रतिश्रुतं च नवता पांचालस्यैश्र
एवतोमम ॥ आहरि ष्योशिरस्तस्य यस्तेमा निनि पुत्रहा ॥३८॥ तदसौ वध्यतां पापः आततायान्म बंधुहा ॥ न तु श्रीविप्रियं वीरकृतवा
न् कुलपांसनः ॥३९॥ एवं परीक्षिता धर्मं पार्थः कृष्णेन चोदितः ॥ नैच्छद्धंतुं गुरुसुतं यद्यप्यात्मद्दनं महान् ॥४०॥ अथोपेत्य स्वशिबिरं गो
विंदप्रियसारथिः ॥ न्यवेदयत्तं प्रियायै शोचंत्यै आत्मजान्हतान् ॥४१॥ तथाकृतं पशुवत्पाशबद्धमवाङ्मुखं कर्मजुगुप्सितेन ॥ नि
रीक्ष्य कृष्णापकृतं गुरोः सुतं वामस्वभावा कृपया ननाम च ॥४२॥ उवाच चासहंत्यस्य बंधनानयनं सती ॥ मुच्यतां मुच्यतामेष ब्राह्मणो
नितरां गुरुः ॥४३॥ सरहस्यो धनुर्वेदः सविसर्गोपसंयमः ॥ अस्त्रग्रामश्च नवता शिक्षितो यदनुग्रहात् ॥४४॥ स एष नगवान्द्रोणः प्र
जारूपेण वर्त्तते ॥ तस्यात्मनोर्धं पत्न्यास्ते नान्वगा [illegible] वीरसूः कृपी ॥४५॥

तं अपकारिणं कृपया निरीक्ष्य वामः शोभनः स्वनावो यस्याः सा ननना
म च ॥४२॥ उवाच चेति चकाराभ्यां संभ्रमः सूचितः ॥ बंधनेनानयनं अस्य सहमाना ॥४३॥ सरहस्यः गोप्यमंत्रसहितः ॥ विसर्गो मोक्षप्रयोगः उपसंयम उपसं
हारः ॥ ताभ्यां सहितो अस्त्रसमूहश्च ॥४४॥ किं च तस्य द्रोणस्यात्मा देहस्तस्यार्धं कृपी आस्ते ॥ [illegible] अर्धो वै हेतुः पत्नीः अर्धो वा एष आत्मनो यत्पत्नीति श्रु
तेः ॥ जायापत्योः अग्निमादधीयातामिति श्रुतेः ॥ उभयोरेककार्यकर्तृत्वावगमाच्च न तु भर्तारमनु मृता साक्रथं जीवतीत्याह नान्वगात् भर्तारं यतो वीरसूः
पुत्रवती ॥४५॥ ३०

कर्म

तत्तस्माद्गौरवं गुरोः कुलं न वृजिनः कर्त्तुमर्हसि नेवं दुःखं प्राप्तुमर्हसीति किंतु पूज्यं वंद्यं च ॥४६॥ मृतवत्सा मृतपुत्रा ॥४७॥ विपक्षे दोषमाह यैरिति तेषां रा
जन्यानां कुलं कर्त्तृ । तत्सानुबंधं सपरिवारं शुचार्पितं शोकेनार्पितं प्राप्तं च ब्रह्मकुलं कर्त्तृ प्रदहति ॥४८॥ धर्म्यमित्यादयो ऽचुवसः खड्गुणाः पूर्वश्लोकष
ट्केऽप्येष । तत्र धर्म्यं धर्मादनपेतं मृत्युमतां मृत्युमतामिति न्याय्यं न्यायादनपेतं मृतं गृहस्थ इत्यादि । सकरुणं तन्मात्मनोऽर्धमिति निर्व्यलीकं निःक
पटं तत्र धर्म्यमिति समं पक्षपातशून्यं । मारोदीदिति दुःखसाम्योक्तेः महद्यैः कोपितमिति निष्ठुरी त्वयाहितोपदेशात् एवंभूतं राज्ञ्या वचः हे द्विजाः

तद्धर्मज्ञ महाभाग भवद्भिर्गौरवं कुलं । वृजिनं नार्हति प्राप्तुं पूज्यं वंद्यमभीक्ष्णशः ॥४६॥ मारोदीदस्य जननी गौतमी पतिदेवता । यथा
हं मृतवत्सार्त्ता रोदिम्यश्रुमुखी मुहुः ॥४७॥ यैः कोपितं ब्रह्मकुलं राजन्यैरजितात्मभिः । तत्कुलं प्रदहत्याशु सानुबंधं शुचार्पितं ॥४८॥
सूत उवाच ॥ धर्म्यं न्याय्यं सकरुणं निर्व्यलीकं समं महत् । राजा धर्मसुतो राज्ञ्याः प्रत्यनंदद्वचो द्विजाः ॥४९॥ नकुलः सहदेवश्च युयुधा
नो धनंजयः । भगवान्देवकीपुत्रो ये चान्ये याश्च योषितः ॥५०॥ तत्राहामर्षितो भीमस्तस्य श्रेयान्वधः स्मृतः । न भर्तुर्नात्मनश्चार्थे योऽह ३
न्सुप्तान्शिशून्वृथा ॥५१॥ निशम्य भीमगदितं द्रौपद्याश्च चतुर्भुजः । आलोक्य वदनं सख्युरिदमाह हसन्निव ॥५२॥ श्रीभगवानुवाच ॥
ब्रह्मबंधुर्न हंतव्य आततायी वधार्हणः । मयैवोभयमाम्नातं परिपाह्यनुशासनं ॥५३॥ ॥

प्रत्यनंदत् अनुमोदितवान् ॥४९॥ नकुलादयश्च प्रत्यनंदन् युयुधानः सात्यकिः ॥५०॥ तस्य तथाविधस्य द्रौणेर्वध एव श्रेयः अन्यथास्य नरकपा
तप्रसंगात् । न भर्तुरिति योऽहन् जघान ॥५१॥ चतुर्भुजो हरिः स्वयं भावः भीमे हंतुमुद्यते द्रौपद्यां च सह सौंनिवारणे प्रवृत्ता यामुभयोः
संवारणोपायं विक्षते चतुर्भुज इति संदिहानस्य सख्युरर्जुनस्य ॥५२॥ वधार्हणः वधार्हः मयैव शास्त्रकर्ता ब्राह्मणो न हंतव्यः तथा च आततायि
नमायांतमपि वेदांतपारगं जिघांसंतं जिघांसीयान्न तेन ब्रह्महा भवेत् इत्यादि तत उभयमप्यनुशासनं परिपालय ॥५३॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वच्च प्रतिज्ञां पूरयेत्याह। प्रियां सांत्वयता त्वया अश्लिष्टं तं हननं तत्र समस्तं कुरुप्रियं कुरु। मुख्यं मम तु च वधेन तामस्य प्रियं न वतीति। ब्रवधे द्रौ
पद्या ब्रवीषि श्रीकृष्णस्य ॥५४॥ हार्दं मुनिभार्यायाः आज्ञाय तत्रात्वा लाम्बरा वेशं तं न यं विदध्यात। अत्रैव मनिज्ञाय इति ज्ञात्वेऽस्य। अश्रुसि नाऽरवड्गेनमू
र्धनिं मूर्ध्नि जातं सह मूर्धजं समकंरा [illegible] ॥५५॥ मणिना च ही। अनिरियापर्यन्तं निःसारितवान् ॥५६॥ अनेन श्रीकृष्णोक्तं सर्वं संपादितमित्याह वपो

कुरु प्रतिश्रुतं सत्यं यत्तत्सांत्वयता प्रियां। प्रियं च भीमसेनस्य पांचाल्या मह्यमेव च ॥५४॥ सूत उवाच ॥ अर्जुनः सहसाज्ञाय हरेर्हा
र्दमथासिना। म[illegible]णिं जहार मूर्धन्यं द्विजस्य सहमूर्धजं ॥५५॥ विमुच्य रसनाबंधं बालहत्याहतप्रभं। तेजसा मणिना हीनं शिबिरान्निरया
पयत् ॥५६॥ वपनं द्रविणादानं स्थानान्निर्यापणं तथा। एष हि ब्रह्मबंधूनां वधो नान्योस्ति दैहिकः ॥५७॥ पुत्रशोकातुराः सर्वे पांडवाः
सह कृष्णया। स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकं ॥५८॥ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे द्रौणिनिग्रहो नाम सप्त
मोऽध्यायः ॥७॥ सूत उवाच ॥ अथ ते संपरेतानां स्वानामुदकमिच्छतां। दातुं सकृष्णा गंगायां पुरस्कृत्य [illegible] ययुः ॥ ते निनीयोदकं
सर्वे वि[illegible] च भृशं पुनः। आप्लुता हरिपादाब्जरजःपूतसरिज्जले ॥२॥ तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजं। गांधारीं पुत्रशोकार्तां
पृ[illegible] च माधवः ॥३॥ सांत्वयामास मुनिभिर्हतबंधूञ्छुचार्पितान्। भूतेषु कालस्य गतिं दर्शयन्नप्रतिक्रियां ॥४॥

स्त्रियः

नमिति ॥५८॥ निर्हरणं दा
हार्थं नयनं ॥५८॥ इति प्रथमे सप्तमः ॥ अष्टमे कुंतिका द्रौणेरस्त्रात्परीक्षितः। श्रीकृष्णेन स्तुतिः कुंत्या राज्ञः शोकश्च वर्ण्यते ॥ ते पांडवाः संपरेतानां मृतानां
गंगायामुदकं दातुं सकृष्णाः श्रीकृष्णेन सहिताः स्त्रियः पुरस्कृत्य ययुः ॥१॥ कृत्वा तस्मिन्कार्ये स्त्रीपुरःसरत्वविधानात् निनीय दत्वा हरिपादाब्जरजोभिः पूता
या सरित् गंगा तस्या जले। पुनर्ग्रहणं दोषविस्मृता इति गम्यते ॥२॥ कुरुपतिं युधिष्ठिरं सहानुजं भीमादिभिः सहितं ॥३॥ मुनिभिः सहितः ॥४॥

३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कितवैर्धूर्तैर्दुर्योधनादिभिः द्रौपद्याः कचग्रहणादिना हृतं नष्टमायुर्येषां तान् ॥५॥ याजयित्वेत्यादिना त्रिकथासंक्षेपः ॥ शतमन्योः शतक्रतोरिव ॥६॥ शै तो१ द्रौ १
नेयः शिनेर्नप्ता सात्यकिस्तेन चोद्धवेन च संयुतः ॥७॥ रथमास्थितः सन्नुत्तरां परीक्षिन्मातरं अभिमुखं धावंतीमुपलेभे ददर्श ॥ उत्तरा श्रीकृष्णं प्रार्थ
यते पाहि पाहीति द्वाभ्यां अन्यस्तु प्रार्थना योग्यो नास्तीत्याह त्वत्त्वत्तः अन्यं अभयं भयरहितं न पश्यामि यत्र लोके परस्परं मृत्युर्भवति ॥ यात
च प्रस्तुतं भयमावेदयति अभिद्रवतीति अभिमुखमायातीति तप्तमायसं लोहमयं यस्य स तप्तायसः अतिकारुण्यमेष माह ॥ काममिति कामं यथेष्टं

साधयित्वाजातशत्रोः स्वं राज्यं कितवैर्हृतं ॥ घातयित्वाऽसतो राज्ञः कचस्पर्शहतायुषः ॥५॥ याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः ॥
तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ॥६॥ आमंत्र्य पांडुपुत्रांश्च शैनेयोद्धवसंयुतः ॥ द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः ॥७॥
गंतुं कृतमतिर्ब्रह्मन् द्वारकां रथमास्थितः ॥ उपलेभेऽभिधावंतीमुत्तरां भयविह्वलां ॥८॥ उत्तरोवाच ॥ पाहि पाहि महायोगिन्
देवदेव जगत्पते ॥ नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परम् ॥९॥ अभिद्रवति मामीश शरस्तप्तायसो विभो ॥ कामं दहतु मां नाथ मा मे
गर्भो निपात्यताम् ॥१०॥ सूत उवाच ॥ उपधार्य वचस्तस्या भगवान् भक्तवत्सलः ॥ अपांडवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत ॥११॥
तर्ह्येवाथ मुनिश्रेष्ठ पांडवाः पंच सायकान् ॥ आत्मनोऽभिमुखान् दीप्तानालक्ष्यास्त्राण्युपाददुः ॥१२॥ व्यसनं वीक्ष्य तत्तेषामनन्यवि
षयात्मनां ॥ सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः ॥१३॥ अंतःस्थः सर्वभूतानामात्मा योगेश्वरो हरिः ॥ स्वमायया ऽवृणोद्गर्भं वैराट्याः कु णो१
२ति रुतंतवे ॥१४॥

॥१०॥ परान्वेनापि कृपितस्य द्रौणेः अपांडवं [illegible] पांडवशून्यं इदं विश्वं कर्तुं प्रयुक्तं ब्रह्मास्त्रमबुध्यत ॥११॥ अत एव ब्रह्ममु ख
मागतमित्याह तर्ह्येवेति ॥१२॥ ब्रह्मास्त्रस्यास्त्रांतरैरनिवर्तित्वात् तद्दुःपरिहरं व्यसनं वीक्ष्यानन्य विषयः आत्मा येषां तेषां स्वैकनिष्ठानामित्यर्थः ॥१३॥ अवै
२या राट्या उत्तरायाः अंतःस्थः सन् गर्भमावृतवान् न तत्र हेतुः यतः आत्मा अंतर्यामी योगेश्वर इति बहिःस्थितस्यापि प्रवेशाघटनाशंकां मुक्तं ॥ कुरूणां तंतवे संताना
य पांडवानामपि कुरुवंशजत्वादेवमुक्तं ॥१४॥

१ मुखं तदागतमिति पाठः १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प्र०
३२

प्रतिछंद्र३ ना२

अमोघमप्रतिक्रियं चास्मसुभ्रम्पत्संशांतमासीत् ॥१५॥ एतच्छ्रुत्वाश्चर्यमनंतस्याश्चर्यं मा मंस्थाः मामन्यस्व ॥१६॥ ह स्वयासह ॥१७॥ तात्वांनमस्येनमस्क
रोमि ननु कनिष्ठं मां कथं नमस्करोषि तत्राह आद्यं पुरुषं कुतः प्रकृतेः परं कुतः ईश्वरं प्रकृतेरपि नियंतारं अत एव सर्वभूतानामंतर्बहिश्च पू
र्णत्वेनावस्थितं तथाप्यलक्ष्यं ॥१८॥ तत्र हेतुः मायैव जवनिका तिरस्करिणी तया आच्छन्नमतो हमज्ञा भक्तियोगानभिज्ञा केवलं नमस्यामि अधः
अक्षजं इंद्रियजं ज्ञानं यस्मात्तं अव्ययमपरिच्छिन्नं तस्य पंचुः मूढदृशा देहाभिमानिना पुंसा त्वं न लक्ष्यसे ॥१९॥ किंच परमहंसानामात्मानात्म

यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियं ॥ वैष्णवं तेज आसाद्य समशाम्यद्भृगूद्वह ॥१५॥ मा मंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमयेऽच्यु
ते ॥ य इदं मायया देव्या सृजत्यवति हंत्यजः ॥१६॥ ब्रह्मतेजोविनिर्मुक्तैरात्मजैः सह कृष्णया ॥ प्रयाणाभिमुखं कृष्णमिदमाह पृथा स
ती ॥१७॥ कुंत्युवाच ॥ नमस्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परं ॥ अलक्ष्यं सर्वभूतानामंतर्बहिरवस्थितं ॥१८॥ मायाजवनिकाच्छन्नम
ज्ञाधोक्षजमव्ययं ॥ न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा ॥१९॥ तथा परमहंसानां मुनीनाममलात्मनां ॥ भक्तियोगविधाना
र्थं कथं पश्येम हि स्त्रियः ॥२०॥ कृष्णाय वासुदेवाय देवकीनंदनाय च ॥ नंदगोपकुमाराय गोविंदाय नमो नमः ॥२१॥ नमः पंक
जनाभाय नमः पंकजमालिने ॥ नमः पंकजनेत्राय नमस्ते पंकजांघ्रये ॥२२॥ ॥

विवेकिनां ततो मुनीनां मननशीलानामपि ॥ तत्रापि अमलात्म
नां निवृत्तरागादीनामपि ॥ तथा तेन निजमहिम्ना अलक्ष्यसे ॥ अतो न हि योगविधानं कारयितुं तां वयं स्त्रियः कथं हि पश्येम ॥ यद्वा परमहंसादी
नामपि भक्तियोगविधानार्थं त्वां ॥ आत्मारामाणामप्यवितिलं निर्गुणैराहृष्यन् भक्तियोगविधानं कारयितुं अवतीर्णमित्यर्थः ॥२०॥ ज्ञानं कृष्णो
रद्याकपत्वसुलभो पुनः केवलं नमस्करोति ॥ कृष्णायेति द्वाभ्यां ॥२१॥ पंकजं नाभौ यस्य पंकजानां माला अस्ति यस्य ॥ पंकजवत् प्रसन्ने नेत्रे यस्य ॥ पंकजां
कितौ अंघ्री यस्य तस्मै ॥२२॥ ॥ ॥

उं२

राम
३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वत्कृतोपकाराननुस्मरति यथेति द्वाभ्यां ॥ अयमर्थः ॥ मातुर्ल्लोपि मय्यधिकात्यवप्रीतिः ॥ तथा हि हे हृषीकेश ॥ यथा देवकी कंसेन रुद्धा त्वया विमो
चिता अहं च तथैव किं मोचितेति ॥ काक्वा महान् विशेषस्तत्र कः ॥ तं दर्शयति सा तु चिरं रुद्धा सती तस्मादेव सकृद्विमोचिता तथा शुचार्पिता च सती
न च तस्याः पुत्रा रक्षिताः ॥ अत्र तु मम नाथस्त्वं तस्याः अहं तु विपद्गणात् ॥ तत्रापि मुहुः शीघ्रं च सा सात्मजा च त्वयैव च नाथेनेति ॥ २३ ॥ विपद्गणमेव
दर्शयति विषाद्भीमस्य विषमोदकदानात् ॥ महाग्नेः जतुगृहदाहात् ॥ पुरुषादा हिडिंबादयो राक्षसास्तेषां दर्शनात् ॥ असत्सभायाः द्यूतस्थानात् अभि
तो रक्षिताः ॥ आस्मत्र न वाम ॥ २४ ॥ यद्यासु विपत्सु कीदृशं दर्शनं ॥ नास्ति पुनरपि भवदर्शनं यस्मात् ॥ २५ ॥ संपदस्तु अभ्येयः पारिपंथिन्य इत्याह जन्मेश

यथा हृषीकेश खलेन देवकी कंसेन रुद्धातिचिरं शुचार्पिता ॥ विमोचिताहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणात्
२३ विषान्महाग्नेः पुरुषाददर्शनादसत्सभाया वनवासकृच्छ्रतः ॥ मृधे मृधेनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेभिरक्षिताः
२४ ॥ विपदः संतु ताः शश्वत्तत्र तत्र जगद्गुरो ॥ भवतो दर्शनं यत्स्यादपुनर्भवदर्शनं ॥ २५ ॥ जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान्
नैवार्हत्यभिधातुं वै त्वामकिंचनगोचरम् ॥ २६ ॥ नमोकिंचनवित्ताय निवृत्तगुणवृत्तये ॥ आत्मारामाय शांताय कैवल्यपतये नमः
२७ मन्ये त्वां कालमीशानमनादिनिधनं विभुं ॥ समं चरंतं सर्वत्र भूतानां यन्मिथः कलिः ॥ २८ ॥ ॥

कुले जन्मादिभिरेधमानो मदो यस्य सः ॥ अभिधातुं हे गोविंदेति वक्तुमपि न ॥ अकिंचनानां गोचरं विषयभूतं ॥ २६ ॥ त्वत्कृतमस्मोरथपरिहरणाय प्र ५५
णमति ॥ अकिंचना निष्काः एव वित्तं सर्वस्वं यस्य तस्मै ॥ ततः किं निवृत्ता गुणवृत्तयो ॥ धर्मार्थकामविषया यस्मात्तस्मै ॥ कुतः ॥ आत्मारामाय ॥ तत्कुतः
शांताय रागादिरहिताय ॥ किंच ॥ कैवल्यपतये कैवल्यं दातुं समर्थाय ॥ २७ ॥ ननु देवकीपुत्रं मां कथमेवं स्तौषि तत्राह ॥ मन्ये त्वां कालं नतु देवकी
पुत्रं ॥ तत्र हेतवः ॥ ईशानं नियंतारं ॥ अनादिनिधनं अत एव विभुं प्रभुं समं यथा भवति तथा चरंतं ॥ ननु पार्थरक्षणे कथं मम साम्यं
तत्राह यद्यतः त्वत्तो निमित्तात् भूतानामेव मिथः कलिः कलहो भवति ॥ न तु त्वत्तस्तवापि वैषम्यं ॥ २८ ॥ ॥

ननु निग्रहानुग्रहरूपं मयि वैषम्यं दृश्यते अत आह न वेदेति। नृणां विडंबनम् अनुकरणं ईहमानस्य कुर्वतः यस्मिंस्त्वयि विषमा मतिर्नृणाम्
निग्रहरूपा न वर्तते २९ अजस्य जन्म अकर्तुः कर्म तिर्यक्षु वराहादिरूपेण नृषु रामादिरूपेण ऋषिषु वामनादिरूपेण यादस्सु मत्स्यादिरूपे
ण ३० नरविडंबनमत्याश्चर्यमित्याह गोपीति यशोदा त्वयि कृतागसि दधिभांडस्फोटनं कृतवति यावद्दाम रज्जुं बंधनार्थमादद्दे जग्राह तावत्
एवमेव या ते दशा अश्रुव्याप्ता सा मां विमोहयति किंभूतस्य भयेन अश्रुभिः कलिलं व्याप्तं अंजनं ययोस्ते चंचले संभ्रमेण व्याकुले अक्षिणी यस्मिंस्तद्वक्त्रं

स्क०१ ण

न वेद कश्चिद्भगवंश्चिकीर्षितं तवेहमानस्य नृणां विडंबनं न यस्य कश्चिद्दयितोस्ति कर्हिचिद्द्वेष्यश्च यस्मिन्विषमा मतिर्नृणाम् २९
जन्म कर्म च विश्वात्मन्नजस्याकर्तुरात्मनः तिर्यङ्नृषिषु यादस्सु तदत्यंतविडंबनम् ३० गोप्याददे त्वयि कृतागसि दाम तावद्या
ते दशाश्रुकलिलांजनसंभ्रमाक्षम् वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति भीरपि यद्बिभेति ३१ केचिदाहुर
जं जातं पुण्यश्लोकस्य कीर्तये यदोः प्रियस्यान्ववाये मलयस्येव चंदनम् ३२ अपरे वसुदेवस्य देवक्यां याचितोभ्यगात् अज
स्त्वमस्य क्षेमाय वधाय च सुरद्विषाम् ३३ भारावतरणायान्ये भुवो नाव इवोदधौ सीदंत्या भूरिभारेण जातो ह्यात्मभुवार्थितः ३४

निनीय अधः कृत्वा ताडयिष्यतीति तत्र भयभावनया स्थितस्य यद्यतः त्वत्तः भीरपि स्वयं बिभेतीति तस्य ते दशा ३१ अत एव जगन्मोहनतया अजेयत्वा
त्तज्जन्मादि विबुधा वर्णयंतीत्याह केचिदिति चतुर्भिः पुण्यश्लोकस्य प्रियस्य युधिष्ठिरस्य कीर्तये यदोरन्ववाये कीर्तये इति वा मलयस्य कीर्तये इव
चंदनं तथा वसुदेवस्य नाम्ना प्रियां देवकीं प्रति अजः एव त्वमस्य गात् पुत्रत्वमिति शेषः प्रथमपुरुषस्त्वार्थः अजस्त्वमिति पाठः सुगमः तामेव
पूर्वं सुतपः पृश्निरूपां यां याचितः सन् अस्य जगतः क्षेमाय ३३ आत्मभुवेति ब्रह्मप्रार्थनप्राधान्यविवक्षया [illegible] ३४ ।। ।। ३३
।।३२।।२ स्य

स्व१

मतांतरं। परमानंदरूपाज्ञानमविद्या ततो देहाद्यभिमानात्कामः ततः कर्माणि तैः क्लिश्यमानानां तन्निवृत्तये श्रवणाद्यर्हाणि कर्माणि करिष्य
न्। ३५ अस्य पक्षस्य सिद्धांततामभिप्रेत्य श्रवणादीनां फलमाह। शृण्वंतीति नंदंति अन्ये अन्ये कीर्त्यमानमभिनंदंति ये जनाः ईहितं चरितं तव
वकं त्वदीयं पदांबुजं त एव पश्यंत्येव अचिरेणैवेति च स्वर्वचावधारणं कीदृशं भवप्रवाहस्य जन्मपरंपराया उपरमो यस्मिन् तत् ॥३६॥ इदानीं त
वास्मत्परित्यागोऽनुचित इत्याशयेनाह अपीति। स्वकृतमीहितं यस्य हे प्रभो सुहृदोऽनुजीविनः अद्य अपि स्वित् किंस्वित् त्वं जिहाससि येषामस्माकमन्य
नं१

नवेऽस्मिन्क्लिश्यमानानामविद्याकामकर्मभिः। श्रवणस्मरणार्हाणि करिष्यन्निति केचन ॥३५॥ शृण्वंति गायंति गृणंत्यभीक्ष्णशः
स्मरंति नंदंति तवेहितं जनाः। त एव पश्यंत्यचिरेण तावकं भवप्रवाहोपरमं पदांबुजं ॥३६॥ अप्यद्य नस्त्वं स्वकृतेहित प्रभो जिहा
ससि स्वित्सुहृदोऽनुजीविनः। येषां न चान्यद्भवतः पदांबुजात्परायणं राजसु योजितांहसां ॥३७॥ के वयं नामरूपाभ्यां यदुभिः सह पां यं
डवाः। भवतोऽदर्शनं यर्हि हृषीकाणामिवेशितुः ॥३८॥ नेयं शोभिष्यते तत्र यथेदानीं गदाधर। त्वत्पदैरंकिता भाति स्वलक्षणविल
क्षितैः ॥३९॥ इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः। वनाद्रिनद्युदन्वंतो ह्येधंते तव वीक्षितैः ॥४०॥ ॥

त्परायणं नैवास्ति। कुतः राजसु योजितमंहो दुःखं यैस्तेषां अस्माकं कृतमीहितं मपेक्षितं येन तस्य संबोधनं विसर्गतिपावैत्वं विशेषणं ॥३७॥ ननु तव बं पद१
धवो यादवाः पुत्राश्च पांडवाः शूराः समर्थाश्च तत्किं कार्पण्यं नाथसे अत आह केवयमिति यर्हि भवतो दर्शनं यदा त्वमस्मान्न पश्यसि तदा ना
मा विख्यातास्वरूपेण समृध्या च यदुभिः सहिताः पांडवा नाम के वयं न केपि भवति बुद्धा इत्यर्थः हृषीकाणामीशितुर्जीवस्यादर्शनेन किंचिन्नाम का३
च रूपं तद्वत् ॥३८॥ किंच यथेदानीमियमस्मद्भूमिः स्वैरसाधारणैर्वज्रांकुशादिभिर्लक्षणैर्विलक्षितैश्चिह्नितैस्त्वत्पदैरंकिता राती
नाति तत्र तदा त्वयि निर्गते सति न शोभिष्यते ॥३९॥ अपि च इमे जनपदा देशाः स्वृद्धाः सुसमृद्धाः संत ॥४०॥ ॥ यथा२
म२ स्यो२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाग्व:
३४

१श ध्यं१

गमनेपांडवानामकु॰लं आगमनेयादवानामिसुनयतोआकुलचित्तासतीतिषुस्नेहनिवृत्तिंप्रार्थयते अथेतिविश्वेशेत्यादि ॰बे॰ नानिस्ने
हच्छेदसामर्थ्यमापिनाथंहृदंसंतं ४१ ततः किमतआह त्वयीति अनन्यविषयासतीमेमतिःरतिमुद्वहतात् अनवछिन्नांप्रीतिंकरोत्वित्यर्थः
तृर्षपूरंयथागंगाप्रतिबंधनगणयति एवंमतिरपिविघ्नान्मागणयत्वितिभावः ४२ एवमभ्यर्थ्यपुनःप्रणमति श्रीकृष्णतेनमः उपकारानुनु
स्मरंती बहुधासंबोधयति कृष्णसखअर्जुनस्यसखे वृष्णीनामृषभश्रेष्ठअवन्यैन्नृभ्यैद्रुह्यंतिजेराजन्यास्तेषांवंशस्यदहनेनमप्यनपवर्ग द१

अथविश्वेशविश्वात्मन्विश्वमूर्तेस्वकेषुमे स्नेहपाशमिमं छिं छिंधिदृढंपांडुषुवृष्णिषु ४१ त्वयिमेनन्यविषयामतिर्मधुपतेस
कृत् रतिमुद्वहताददद्धागंगेवौघमुदन्वति ४२ श्रीकृष्णकृष्णसखवृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य गोविंदगो
द्विजसुरार्तिहरावतार योगेश्वराखिलगुरोभगवन्नमस्ते ४३ सूतउवाच पृथयेत्थंकलपदैःपरिणूताखिलोदयः मंदंजहा
२३ विमृश्य विचारयस्व बुध्या ।१९। विविदः गतमोहः पर्यचेष्ट पर्यनाप्त ज्ञातवानितिवा ।२०। अनिधारितमिवब्रुवन् ध्यानकं ज्ञानत्रापि नवदे दृप्येवं रूपं धर्मं बि
वीषि अतो धर्मोसि स्वचन्नेकोदोषः स्यतस्त्राह । यदिति स्यानंनरकादि ।२१। यशास्त्रज्ञानादप्यकथनं नवर्तीत्याह । अथवेति दिवस्य मार्यो गतिर्वधिघात पा॰
कंलक्षणमिति । भूतानां चेतसो वचसश्चागोचरमुत्तेयानमवर्तीति निश्चयः ।२२। धर्मोसीविति ज्ञात्वा तस्य पादानुवादेन व्यवस्थामाह । नपश्रुतिश्चा

अथवतक्यादिनिर्दे त्यादितिबपि निश्चयः । अत्रानुरूपं राजर्षे विमृशस्व मनीषया ॥१९॥ एवं धर्मे प्रवदति स सम्राट् द्वि
जसत्तम । समाहितेन मनसा विखेदः पर्यचेष्टत ॥२०॥ धर्मं ब्रवीषि धर्मज्ञ धर्मोसि वृषरूपधृक् । यदधर्मकृतः स्थानं सूचकस्यापि
तद्भवेत् ॥२१॥ अथवा देवमायाया नूनं गतिरगोचरा । चेतसो वचसश्चापि भूतानामिति निश्चयः ॥२२॥ तपः शौचं दया सत्यमिति पा
दाः प्रकीर्तिताः । अधर्मांशैस्त्रयो भग्नाः स्मयसंगमदैस्तव ॥२३॥ इदानीं धर्म पादस्ते सत्यं निर्वर्तयेद्यतः । तं जिघृक्षत्यधर्मोयमनृतेनै तः धि॰१
कलिः ॥२४॥ ॥

संघ्रधर्मपादेष्विति त्रिंशैः स्तव त्रयः पादा भग्नाः स्मयो विस्मयः ।२३। इदानीं कलौ हे धर्म ते पादः चतुर्थांशः तत्रापि सत्यमेवास्ति । यतः सत्यात्त्वाना
म्लानि निर्वर्तयेत् यतः पुरुषस्त्वां साधयेत् तमपि पादमनृतेन संवर्धितः कलिरूपोयमधर्मो गृहीतुमिच्छति । तत्रेयं स्थितिः । कृतयुगे त्वयं संपूर्णश्च
तुष्पादः धर्मः त्रेतायां चतुर्णामपि पादानां मध्ये स्मयेन तपः संगेन शौचं मदेन दया च अनृतेन सत्यमित्येवं चतुर्थांशो हीयते । द्वापरे त्वर्धं कलौ ६४
चतुर्थांशोवशिष्यते तं नं सतीति ।२४। ॥
३ कथं विधारयेल ३ सोप्यं ते ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प

न्मासितः अन्योन्यद्वारेणावभासितः ऊरू नरीयस्याः कृतं कौतुकं मंगलं यस्याः ।२५। अश्रूणि कलयति मुंचतीत्यश्रुकलातेनत्यक्तामती शूद्राणो सुं
तिमामिति शोचति ।२६। निशातं निशितं अधर्मस्य हेतुर्यः कलिस्तं दंतुमित्यर्थः ।२७। आनिवेस्मज्ञात्वा ।२८। वारणप आश्रयाद्दः शोकाः सकौत्याहि ॥

३प३ प१

इयं च पूर्वं गवतान्मासितोरुन रासती ॥ श्रीमज्जिलसदन्मासैः सर्वतः कृतकौतुका ॥२५॥ शोचत्यश्रुकलासाधुर्जिर्त्तिंगेवो क्षि
ताधुना ॥ अब्रह्मण्यान्नृपव्याजाः शूद्राणोसंतिमामिति ॥२६॥ इति धर्मं मही चैव सांतयित्वा महारथः ॥ निशातमाददे खड्गं कलये ऽ
धर्महेतवे ॥२७॥ तं जिघांसुम निश्चेस विहाय नृपलांछनं तस्माद मूलं शिरसा समगाद्भयविक्लवः ॥२८॥ पतितं पादयो वीरः कृ
पयादीनवत्सलः ॥ शरण्यो नावधीत् श्लोक्य आह चेदं हसन्निव ॥२९॥ राजोवाच ॥ न ते गुडाकेशयशोधराणां बद्धांजलेर्वै न भय
मस्ति किंचित् ॥ न वर्तितव्यं भवता कथंचन क्षेत्रे मदीये त्वमधर्मबंधुः ॥३०॥ त्वां वर्तमानं नरदेवदेहेष्वनुप्रवृत्तोयमधर्मपूगः ॥ लो
भोनृतं चौर्यमनार्यमंहो ज्येष्ठा च माया कलहश्च दंभः ॥ न वर्तितव्यं तदधर्मबंधो धर्मेण सत्येन च वर्तितव्ये ॥ ब्रह्मावर्ते यत्र यजंति
।३१॥
यज्ञैर्यज्ञेश्वरं यज्ञवितानविज्ञाः ॥३२॥ ॥

।न१

२९ गुडाकेशोर्जुनः तस्य यशोधरा ये वयं तेषां तान् प्रति बद्धांजलिर्येन तस्य ते किंतु कथंचन केनाप्यंशेन न वर्तितव्यं यस्मात्त्वमध र्मस्य बंधुः ३०
तदेवाह राजदेहेषु वर्तमानं त्वामनु सर्वतः प्रवृत्तः अनार्यं दौर्जन्यं अंहः स्वधर्मत्यागः ज्येष्ठा अलक्ष्मीः माया कपटं ३१ तत्तस्मादवर्तितव्यमेव
त्रिविमहे ब्रह्मावर्ते देशे यत्र वितानं विस्तारस्तज्ज्ञा विज्ञाः निपुणाः ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰प्र॰
६५

२ तत्र ३ या व

इज्यायागास्तद्रूपामूर्त्तिर्यस्यतंहेमंकामांश्चनविंशाद्योदेवताऽज्यंतेनतुहरिस्त्वाह॥ एवंस्थावरादीनामात्मेतितथापिजीवैर्न्नपरिछिन्नइत्याह
अंतर्बहिरिति॥ यथावायुःप्राणरूपेणांतरस्थोपिबाहिरप्यस्तितद्वत्सर्वांतर्यामीश्वरोपीति॥ ३३॥ उद्यतासिंउद्धृतखड्गंदंडपाणिंयमंतद्वदुद्युक्तं॥ ३४
अवनवत्सत्वमिति॥ यानवाज्ञात यायत्रक्कापिवत्स्यामिकिंतुत्वयापिस्थानाःगृहीतःइत्युःचारासनंचायेनतंत्वामेवलक्षये॥ ३५॥ तस्मान्नियतानिस्थ
लेवत्स्यामि॥ ३६॥ पानंमद्यादेःस्त्रनाःप्राणिवधाः॥ द्यूतेनऋतं।पानेमदः पूर्वमसदेदमानाशकत्वेनोक्तः अत्रतुगर्वद्वारातपोनाशकत्वेन॥ स्त्रीषुसंगः

यस्मिन्नूहरिर्भगवानिज्यमानइज्यामूर्त्तिर्यजतांशंतनोति॥ कामानमोघान्स्थिरजंगमानामंतर्बहिर्वायुरिवैषआत्मा॥ ३३॥ सूतउ
वाच॥ परीक्षितैवमादिष्टःसकलिर्जातवेपथुः॥ तमुद्यतासिमाहेदंदंडपाणिमिवोद्य त॥ ३४॥ यत्रक्कचनवत्स्यामिसार्व भौमत कलिरुवाच२
वाज्ञया॥ लक्षयेत्रतत्रापित्वामात्तेषुशरासनं॥ ३५॥ तन्मेधर्मभृतांश्रेष्ठस्थानंनिर्देष्टुमर्हसि॥ यत्रैवनियतोवत्स्येआतिष्ठंस्ते
नुशासनं॥ ३६॥ सूतउवाच॥ अभ्यर्थितस्तदातस्मैस्थानानिकल ददौ॥ द्यूतंपानंस्त्रियःसूनायत्राधर्मश्चतुर्विधः॥ ३७॥
ये

न
हिंसायांक्रौर्यंदयानाशकमितिज्ञेयं॥ यद्यपिसर्वंसर्वत्रसंभवतितथापिप्राधान्येअनृतादीनांद्यूतादिषुयथासंख्यंज्ञेयं॥ द्वादशेस्कंधेतुअसंदयात्
पोदानमितिपादावि नोनृपिस्त्रतदानंत्राष्टेनशौचमेवोक्तंमनःशुद्धिरूपत्वात्‌अनृतानयदानस्य त्रैत्यायांधर्मपादानांज्ञयंशोहीयतेशनैःअधर्मपादे ६५
रनृतहिंसासंतोषविग्रहैरित्यत्रचासंतोषशब्देनतस्यहेतुर्गर्वोलक्ष्यतेविग्रहशब्देनचतद्धेतुःस्त्रीसंगः॥ ३७॥ ॥
१लिविशेषः१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्विधस्याप्येकत्वेनैवावस्थानं देहीति पुनर्याचमानाय जातरूपं सुवर्णं दत्तवान् ॥ ततः सुवर्णदानादनृतं मदं काममिति ॥ स्त्रीसुसंगं रजश्चतिरजो मूलं हि
सोऽएतानि चत्वारि पंचमं वैरंचोदिति ॥३८॥ अमूनि पंचमीषु स्थानेषु न्यवसदित्यर्थः ॥३९॥ अथैतानि हेतोः ॥ बुभूषुः उन्नतिमिच्छुः स्त्रीसुवर्णयोरसेवनं नाम
तयोरनासक्तिः ॥४१॥ एवं कलिं निगृह्य वृषस्य पादा॰ नृपतिः संदधे तपश्चादीनि प्रवर्तितवानित्यर्थः ॥४१॥ युष्मदीयसत्रप्रवृत्तिरपि तत्प्रभावादेवेत्या

पुनश्च याचमाना॰य जातरूपमदात्प्रभुः ॥ ततोऽनृतं मदं कामं रजो वैरंच पंचमं ॥३८॥ अमूनि पंच स्थानानि ह्यधर्मप्रभवः क
लिः औत्तरेयेण दत्तानि न्यवसत्तन्निदेशकृत् ॥३९॥ अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित् ॥ विशेषतो धर्मशीलो राजा लोकप
तिर्गुरुः ॥४०॥ वृषस्य नष्टांस्त्रीन् पादान् तपः शौचं दयामिति ॥ प्रतिसंदध आश्वास्य महीं च समवर्धयत् ॥४०॥ स एष एत॰र्ह्य
ध्यास्त आसनं पार्थिवोचितं ॥ पितामहेनोपन्यस्तं राज्ञारण्यं विविक्षता ॥४२॥ आस्तेऽधुना स राजर्षिः कौरवेंद्रश्रियोल्लसन् ॥ गजा
ह्वये महाभागश्चक्रवर्ती बृहच्छ्रवाः ॥४३॥ इत्थंभूतानुभावोऽयमभिमन्युसुतो नृपः ॥ यस्य पालयतः क्षौणीं यूयं सत्राय दीक्षिताः
॥४४॥ ॥ इति श्रीभागवते महापुराणे शतसाहस्र्यां संहितायां प्रथमस्कंधे सप्तदशोऽध्यायः ॥ १७ ॥ ॥

ह त्रिभिः एतर्हि इदानीं युधिष्ठिरेणारण्यं प्रवेष्टुमिच्छता उपन्यस्तं समर्पितमासनमध्यास्ते ॥३॥ ४२॥ अधुना पालयत इति वर्तमानसामीप्ये वर्तमान
वन्निर्देशः क्षोण्याः पालयतो वा सत्राय सत्रं कर्तुं दीर्घदीक्षिताः दीक्षां कृतवंतः ॥४३॥ इति प्रथमे सप्तदशोऽध्यायः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प्र०
६६
एतत्स्पष्टादेशातस्य ब्रह्मशापो निरूप्यते । सचानुग्रहएवास्य जातो वैराग्यभावहन् ॥ पारीक्षितो निर्याणं श्रुत्वा साश्चर्यं विकुंठतत्संभावनायुजन्मा मो २
श्चर्यमनुस्मारयति यो वा इति विप्लुष्टो निर्दग्धः सः ॥१॥ ब्रह्मकोपादुत्थितात्तक्षकात्तयः प्राणविप्लवः प्राणनाशस्तस्मादुरुभयं तस्मान्न संमोह ॥ अ
१५२ र्पिताशयः यस्तु भगवत्येवार्पिताशय इति ॥२॥ किंतुत्सृज्येति ॥ वैयासकेः शुकस्य शिष्यः सन् विज्ञाताजितस्य हरेः संस्थितिस्तत्त्वं येन सः ॥३॥ नचैतच्चि
त्रमित्याह ॥ उत्तमश्लोकस्यैव वार्त्तायेषु ते तएव नित्यं तत्कथामृतरूपं अमृतं जुषतां संभ्रमो न स्यात् ॥ तस्मिन् राज्ञि सुतरां तन्न चित्रमित्याशयेना
हतावदिति ॥ आभिमन्यवः पुत्रः एकराट् चक्रवर्ती ईशः पतिः तावत् ॥५॥ ननु तदा कलेर्प्रवेश एवास्तु प्रविष्टोपि न प्रभवेदिति ॥ कुतस्तत्राह

सूत उवाच ॥ यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः ॥ अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्मणः ॥१॥ ब्रह्मकोपोत्थिताद्यस्तु त
क्षकात्प्राणविप्लवात् ॥ न संमुमोहोरुभयाद्भगवत्यर्पिताशयः ॥२॥ उत्सृज्य सर्वतः संगं विज्ञाताजितसंस्थितिः ॥ वैयासकेर्जहौ
शिष्यो गंगायां स्वकलेवरं ॥३॥ नोत्तमश्लोकवार्त्तानां जुषतां तत्कथामृतं ॥ स्यात्संभ्रमोंतकालेपि स्मरतां तत्पदांबुजं ॥४॥ ताव
त्कलिर्न प्रभवेत्प्रविष्टोपीह सर्वतः ॥ यावदीशो महानुर्व्यामाभिमन्यव एकराट् ॥५॥ यस्मिन्नहनि यर्ह्येव भगवानुत्सस ति
र्ज गां ॥ तदैवेहानुवृत्तोसावधर्मप्रभवः कलिः ॥६॥ नानुद्वेष्टि कलिं सम्राट् सारंग इव सारभुक् ॥ कुशलान्याशु सिध्यंति नेतराणि
कृतानि यत् ॥७॥

यस्मिन्नहनि यर्हि यस्मिन्नेव क्षणे गां पृथ्वीं अनुवृत्तः प्रविष्टः अधर्मस्य प्रभवो यस्मिन् ॥६॥ एवं धर्मद्वेष्टं कलिं सर्वथा किं न ह
तवान् तत्राह नानुद्वेष्टीति ॥ सारंगो भ्रमर इव सारग्राही ॥ सारमाह ॥ यस्मिन् कुशलानि पुण्यानि आशु संकल्पमात्रेण फलंति इतराणि पापा ६६
नि आशु न सिध्यंति ॥ यतस्तानि कृतान्येव सिध्यंति न तु संकल्पमात्राणीति ॥७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर

ननुदोषाधिक्यात्द्वेषएवयुक्तः। नधीरेषुतस्याकिंचित्करत्वादित्याह। किंत्विति। ननवेत् बालेषुअधीरेषुअप्रमत्तः अवहितःसन्योवृकइववर्त्तते ण
पारीक्षितमारभ्यानंअपृष्टवंतोयूयं ९ किंबहुनानारैरेतावदेवकर्त्तव्यमितिसर्वशास्त्रसारंकथयतियायाइति। कथनीयान्युरूणिकर्माणिय
स्यतस्यगुणकर्मविषयाः बुभूषुभिः म ज्ञावमिच्छद्भिः १० पुनर्विस्तरेणकथनार्थंस्तौति किंसत्संगंवाभिनंदंतिसूतेतित्रिभिः शाश्वतीःसमाः अनं
तरानवसरान्जीव अत्यंतसंयोगेद्वितीयाविशदंयशः कीर्त्तयसितत्स्वास्माकंमर्त्यानाममृतंमरणनिवर्त्तकम् ११ किंच अस्मिन्कर्मणिसत्रे

(भा)

किंतुबालेषुशूरेणकलिनाधीरनीक्षणा। अप्रमत्तःप्रमत्तेषुयोवृकोनृषुवर्त्तते ण उपवर्णितमेतद्वःपुण्यंपारीक्षितंम
या। वासुदेवकथोपेतमाख्यानंयदपृच्छत ९ यायाःकथाभगवतःकथनीयोरुकर्मणः। गुणकर्माश्रयाःपुंभिः संसेव्या
स्ताबुभूषुभिः १० ऋषयऊचुः॥ सूतजीवसमाःसौम्यशाश्वतीर्विशदंयशः। यस्त्वंशंससिकृष्णस्यमर्त्यानाममृतंहिनः
११ कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनांभवान्। आपाययतिगोविंदपादपद्मासवंमधु १२ तुलयामलवेनापिन
स्वर्गंनपुनर्भवम्। भगवत्संगिसंगस्यमर्त्यानांकिमुताशिषः १३॥ ॥

स्य२

नाश्वासेअविश्वसनीयेवैगुण्यबाहुल्येनफलनिश्चयाभावात् धूमेनधूम्रः विवर्णआत्माशरीरंयेषांतान्अस्मान्कर्मणिषष्ठी आसवंम
करंदंमधुमधुरं १२ भगवत्संगिनोविष्णुभक्ताः तेषांसंगस्ययोलवः अत्यल्पःकालः तेनापिस्वर्गंनतुलयामः समंनपश्यामः चापवर्गंसिंना
वनायंलोट् मर्त्यानांतुच्छा आशिषोराज्याद्याः नतुलयामइतिकिमुतवक्तव्यं १३॥ ॥

१३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰प्र॰
६७

ना  रा२

एवंसत्संगमहिमानंध्यश्रवणेनोत्सुकाः संतोविशेषंपृच्छंति कोनामेति रसवित्रसज्ञःमहत्तमानामेकांतेनपरममयनमाश्रयोयस्तस्यकथायांत्रपुगुणस्य
प्राकृतगुणरहितस्यकस्मात्गुणानामंतंयेयोगेश्वरास्तेपिनजग्मुः एतावंतइतिनपरिगणयांचक्रुः भवःशिवःपाद्मोब्रह्माचमुख्योयेषांते अस्मा
कंमध्येभगवान्प्रधानोमुख्योयस्यसःभवान्नःशुश्रूषतांहरेश्चरितंविस्तारयतु १५ तत्कथंशुकपरीक्षित्संवादेनकथयेत्याह सवाइतिद्वाभ्यां
भंशु२

कोनामतृप्येद्रसवित्कथायांमहत्तमैकांतपरायणस्य नांतंगुणानामगुणस्यजग्मुर्योगेश्वरायेभवपाद्ममुख्याः १४
तन्नोभवान्वैभगवत्प्रधानोमहत्तमैकांतपरायणस्य हरेरुदारंचरितंविशुद्धंशुश्रूषतांनोवितनोतुविद्वन् १५ स
वैमहाभागवतःपरीक्षिद्येनापवर्गाख्यमदभ्रबुद्धिः ज्ञानेनवैयासकिशब्दितेनभेजेखगेंद्रध्वजपादमूलं १६ तन्नःप
रंपुण्यमसंवृतार्थमाख्यानमत्यद्भुतयोगनिष्ठं आख्याह्यनंताचरितोपपन्नंपारीक्षितंभागवताभिरामं ॥१७॥

वैयासकिनाशब्दितेनयेनज्ञानेनसाधनेनापवर्गइत्याख्यायस्यतत्खगेंद्रध्वजस्यहरेःपादमूलंभेजे १६ तदसंवृतार्थंयथातथाआख्याहि
तदेवनिर्दिशति परीक्षितेकथितंपारीक्षितंआख्यानंश्रीभागवतंपुराणंपरंपुण्यंपसत्त्वशोधकंअत्यद्भुतेयोगेनिष्ठायस्यानंतस्यचरितैरुप
पन्नंयुक्तं अतएवभागवतानामभिरामंप्रियंएतैर्विशेषणैःकर्मज्ञानभक्तियोगप्रकाशकत्वदर्शितं १७ ॥
क

६७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभागवतव्याख्यानेलब्धप्रसंगंमहत्तमादरपात्रमात्मानंश्लाघयतेद्वाभ्यां ॥ अहोइत्याश्चर्येहस्मेतिहर्षेवयमितिश्लाघायांप्रतिलोमजाअपिअद्यज
न्मभृतः सफलजन्मानः हास्मजाताः वृद्धानामनुवृत्त्याआदरेणसातवृद्धः शुकः तस्यसेवयेतिवायतो दुःकुलत्वंतन्निमित्तमाधिंचमनःपीडां महत्त त३
मानामभिधानयोगः लौकिकोपिसंभाषणलक्षणः संबंधः विधुनोत्यपनयति ॥१८॥ कुतः पुनः किंपुनर्वक्तव्यंतस्यानंतस्य नामगृणतः पुंसोमहत्तमा
नामभिधानयोगोदौःकुल्यंविधुनोति यद्वानामगृह्णतः पुनः दौःकुल्यमिति यद्वागृणतः पुंसस्तस्यनामदौःकुल्यंविधुनोतीति किंवक्तव्यमिति ॥

सूत उवाच ॥ अहोवयंजन्मभृतोद्य हास्मवृद्धानुवृत्त्यापिविलोमजाताः ॥ दौःकुल्यमाधिंविधुनोतिशीघ्रंमहत्तमानामभि
धानयोगः ॥१८॥ कुतःपुनर्गृणतोनामतस्यमहत्तमैकांतपरायणस्य ॥ योनंतशक्तिर्भगवाननंतोमहद्गुणत्वाद्यमनंतमा
हुः ॥१९॥ एतावतालंननुसूचितेनगुणैरसाम्यानतिशायनस्य ॥ हित्वेतरान्प्रार्थयतोविभूतिर्यस्यांघ्रिरेणुंजुषतेन
भीप्सोः ॥२०॥ ॥

कैमुत्यमेवाह ॥ अनंताः शक्तयोयस्यसतोप्यनंतः ॥ किंच ॥ महद्गुणायस्यसमहद्गुणस्तस्यभावःस्तस्माद्यंगुणतोप्यनंतमाहुः ॥१९॥ एतत्प्रपंचय
तिविभिः ॥ एतावतेति ॥ तस्ययदसाम्यं अनतिशायनंचगुणैस्तत्साम्यंतदाधिक्यंचान्यस्यनास्तीत्यस्यार्थस्यज्ञानंएतावतासूचितेनालंपर्याप्तंकस्त
द्विस्तरेणवक्तुंशक्नोतीतितदेवाह ॥ इतरान्ब्रह्मादीन्प्रार्थयमानान्हित्वाविभूतिः श्रीः अनभीप्सोरपियस्यांघ्रिरेणुंसेवतइति ॥२०॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथेममर्थं निरेयस्य पादनखादवसृष्टं निःसृतमपि विरिंचेनोपहृतं समर्पितमर्हणं अंभः। अथ योदिकमीशामहितं जगत्पुनाति विरिंचोपहृतं सेशामिति
च तयोरप्युपासकत्वमुक्तं तस्मान्मुकुंदव्यतिरिक्तः को नाम भगवच्छब्दार्थः सर्वेश्वर इत्यर्थः॥२१॥ धीराः संतः ऊर्ध्वरेतस अस्मं परमेकाष्ठापन्नं तदाह
॥ यस्मिन्न हिंसा उपशमश्च स्वाभाविको धर्मः॥२२॥ एवं स्वानापमानिर्निदापारी हितोपाख्यानं वक्तुमाह अहं हीति अर्यमाणः हे सूर्याः त्रयीमूर्त्तयः अत्र

अथापि यत्पादनखावसृष्टं जगद्विरिंचोपहृतार्हणांभः। सेशं पुनात्यन्यतमो मुकुंदात्को नाम लोके भगवत्पदार्थः॥२१॥ य-
त्रानुरक्ताः सहसैव धीरा व्यपोह्य देहादिषु संगमूढं। व्रजंति यत्पारमहंस्यमंत्यं यस्मिन्नहिंसोपशमः स्वधर्मः॥२२॥ अहं हि
पृष्टोऽर्यमणो भवद्भिराचक्ष आत्मावगमोऽत्र यावान्। नभः पतंत्यात्मसमं पतत्रिणस्तथा समं विष्णुगतिं विपश्चितः॥२३॥
एकदा धनुरुद्यम्य विचरन्मृगयां वने। मृगाननुगतः श्रांतः क्षुधितस्तृषितो भृशं॥२४॥ जलाशयमचक्षाणः प्रविवेश त-
माश्रमम्। ददर्श मुनिमासीनं शांतं मीलितलोचनं। प्रतिरुद्धेंद्रियप्राणमनोबुद्धिमुपारतं। स्थानत्रयात्परं प्राप्तं ब्र-
ह्मभूतमविक्रियम्॥२६॥

यावानात्मावगमः मम ज्ञानं तत्। आचक्षे वक्ष्यामि। तथा हि पतत्रिणो नभ आत्मसमं स्वशक्त्यानुरूपमेवोत्पतंति
न कृत्स्नं तथा विपश्चितोऽपि विष्णोर्गतिं लीलां समं स्वमत्यनुरूपमेव वदंतीत्यर्थः॥२४॥ अचक्षाणः अपश्यन् तं प्रसिद्धमाश्रमं तस्मिन् मुनिं शमीकं
२५। प्रतिरुद्धाः प्रत्याहारादियोगेन। अत एवोपरतं स्थानत्रयात् जाग्रदादिलक्षणात् परं तुरीयं पदं प्राप्तं अत एव ब्रह्मभूतत्वात् अविक्रि- ६०
यम्॥२६॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विप्रकीर्णनिर्जटानिराच्छन्नं रुरुमृगविशेषः तस्य चर्मणा व्याघ्रचर्मविशेषेण शुष्यन्ताभुयस्य समः तथाभूतं समुनिं २७ नलस्तृणं तृणासनं भूमिरु
पवेशास्यानं चयेन सः न संभाषितोर्घ्यं सूनृतं प्रियवचनं चयेन सः २८ मत्सरः तदुत्कर्षासहनं २९ गता सुमृतं धनुःकोट्या चापाग्रेण ३० स
पनिधाने राज्ञो निध्याय माह एष किं ब्रह्मा हतसर्वेन्द्रियः सन्नमीलितेक्षणः स्थितः यद्वा दत्त बंधुनि रागते वा किंतु स्यादिस्वत्रयामृषा सम्मा १

विप्रकीर्णजटाछन्नं रौरवेणाजिनेन च । विशुष्यन्तालुरुदकं तथाभूतमयाचत ॥ २७ ॥ स्थलस्तृणान्न्याद्दिरसंभाषार्घ
सूनृतः । अवज्ञातमिवात्मानं मन्यमानस्तु कोपहारण ॥ अभूतपूर्वः सहसाहुत्रूटस्यामर्दितात्मनः ॥ ब्राह्मणं प्रस्तुभू
सन्तुमत्सरोमसुरेव च ॥ २९ ॥ सतु ब्रह्मरूपैरसे गतासुमुरगं रुषा । विनिर्गच्छन्धनुःकोट्या निधाय पुरमागमत् ॥ ३० ॥ एष
किं निभृताशेषकरणो मीलितेक्षणः । मृषा समाधिराहो विकिंतु स्यात्त्वत्र बंधुनिः ॥ ३१ ॥ तस्य पुत्रोतितेजस्वी विहरन्
बालकोर्भकैः । राज्ञाघं श्रावितं तात स्कत्वा तत्रेदमब्रवीत् ॥ ३२ ॥ अहोधर्मः पालानां पीव्रां बलिभुजामिव ॥ स्वामिनमघं
यद्दासानां धारयानां शुनामिव ॥ ३३ ॥ ब्राह्मणैः स्वत्र बंधुर्हि विरपालो निरूपितः ॥ स कथं तगृहे द्वास्थः सनांडनो कुम
ईति ॥ ३४ ॥ कस्लेगतेन गवति शास्त्रयुंस्यथगामिनां ॥ तज्जित्वसे त्वनघाहं शास्मि पश्यत मेबलं ॥ ३५ ॥ ॥

१ अर्भक १
धिः सन्निति जिज्ञासयेत्यर्थः ३१ तस्य पुत्रः शृंगीनाम अर्भकं डिंभचक्रमध्ये ३५ पालानां राज्ञां पीव्रां पुष्टानां अधर्ममिव निर्द्दिशति स्वामीनिदासानां
यदघं पापाचरणं बलिभुजां काकानामिवेति ३३ दासस्वं दर्शयति ब्राह्मणैरिति सनांडनौ नांड एव स्थितः ३४ तत्त्वदनं तेश्रहं शास्मितेदंड
यामि ३५ ॥ ॥
१ शुनामिव १ २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१इति१

१व इतिंयस्यानुक्काराषेणतात्रेस्त्रद्दिणीयस्य। कौशि। कीनदीतस्यास्त्रपःसधियार्थःवायुज्वंगपंत ॥३॥ एवंसपर्निक्षेपेण दंक्षतिनत्रयिष्पति पा
गंतरेनत्मीकरिष्पति।स्मेतिपादपूरणे। कुलस्यागारतुल्यमेमयाततेतिकस्त्वमार्थी॥३४॥ गलेसर्पकलेवरं यस्येत्सलुकस्समासः मुक्त कंठः उच्चै

इत्यस्कारोषनाम्नाह्मोवयस्यान्नृषिवालकान्। कौशिकापउपस्पृश्यवायुज्वंविससर्जहि॥३५॥ इतिलंघितमर्यादंतत्वकः
सत्त्वमेहानि। दंक्षतिस्मकलांगारंबोदितीमितततद्गुहं। ततोनेमाश्रमंबालोगलेसर्पकलेवरं। पितरंवीक्ष्यदुःखान्नेमुक्त
कंठोरुरोदह॥३६॥ समवाङ्गागिरसोब्रह्मनश्रुत्वासुतविलापनं। उन्मील्यध्यानकेनेत्रेदृष्ट्वास्वांसेमृतो   रगं॥३७॥ एवविस्
ज्यपुत्रंपप्रच्छवत्सकस्मात्रिरोदिषि। केनवातेप्यपहृतमितुक्तःसन्यवेदयत॥४०॥ निशम्यराजसमृतदहंनरेंद्रस्यब्राह्मणो
नात्मजमस्यनंदत।ध्रुवोहोबलंहीमदेहेन्तत कृतंत्वमीयसिजोहरुदंमोधृत॥४१॥ नवेन्नृसिनरदेवंपराध्रमंसंमातुम
हस्यविपक्वबुद्धे।यत्तेजसादुर्विषहेणगुप्ताविंदंतिनद्रा एपकुतोनयाःप्रजाः॥४२॥ अलक्ष्यमाणेनरदेवनाम्निरथां
गपाणावयमंगलोकः॥ तदाहिचोरप्रचुरोविनंक्ष्यत्यरक्ष्यमाणोविवरूथवत्क्षणेन॥४४॥

रिस्यर्थः॥३७॥३८॥ तंसर्पविस्
ज्यकेनापकारःकृत॥४०॥ अनतिनंदनवाक्यंअहोइत्यादिवतकष्टंनेत्वयामहत्पापंकृतं शोदेअपराधेदमोदंड॥४१॥ परःविष्णुरित्यारव्याखा ६ए
तियस्यतंनरदेवंनृभिःसमास्त्वंस्मर्तुंत्वं॥४२॥ अलक्ष्यमाणेअदृश्यमानेअविरूथवत्मेषसंघवत्॥४३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नष्टेनाथोयस्यलोकस्यतस्यवसोःवसुनोधनस्यविलुंपकादपहर्तुश्चोरादेःहेतोर्यत्पापंनविष्यतितदस्मान्निमित्तत्वादस्मानुपेष्यति।अनन्वैसंबंध
शून्यमेवतद्देवपादेदर्शयति।परस्परमिति।शापंप्रतिपरुषंवदंति।पश्चादीनूहंजतेअपहरंतीति।पुरुदस्यवः।चोरबहुलाः।४४।आर्यधर्मःसदाचारःशु
नांकपीनामिवचार्यकामयोरेवाग्निनिवेशितचित्तानां।४५।एवंराजमात्रस्यशापानर्हत्वमुक्त्वाप्रस्तुतेविशेषमाहधर्मपालइतिसार्द्धेनहयमेधय।

तदघनःपापमुपैत्यनन्वयंयन्नष्टनाथस्यवसोर्विलुंपकात्।परस्परंघ्नंतिशपंतिवृंजतेपशून्स्त्रियोर्थान्पुरुदस्यवोज
नाः।४४।तदार्यधर्मश्चविलीयतेनृणांवर्णाश्रमाचारयुतस्त्रयीमयः।ततोर्थकामाभिनिवेशितात्मनांशुनांकपीनामिव
वर्णसंकरः।४५।धर्मपालोनरपतिःसतुसम्राड्बृहच्छ्रवाः।साक्षान्महाभागवतोराजर्षिर्हयमेधयाट्।क्षुत्तृट्श्रमयुतो
दीनोनैवास्मच्छापमर्हति।४६।अपापेषुस्वभृत्येषुबालेनापक्वबुद्धिना।पापंकृतंतद्भगवान्सर्वात्माक्षंतुमर्हति।४७।
तिरस्कृताविप्रलब्धाःशप्ताःक्षिप्ताहताअपि।नास्यतत्प्रतिकुर्वंतितद्भक्ताःप्रभवोपिहि।४८।इतिपुत्रकृताघेनसोनुत
प्तोमहामुनिः।स्वयंविप्रकृतोराज्ञानैवाघंतदचिंतयत्।४९।प्रायशःसाधवोलोकेपरैर्द्वंद्वेषुयोजिताः।नव्यथंतिन
हृष्यंतियतआत्माऽगुणाश्रयः।५०।

२महा२

हयमेधयाजी।४६।अस्यमहापापस्यान्यप्रायश्चित्तमदृष्ट्वापापमावेदयन्भगवंतंप्रार्थयतेअ
पापेष्विति।४७।राज्ञाचेत्प्रतिशापंदद्यात्तर्हितैःकृतिर्निवेदयितव्यनसंभवतितस्यभागवतत्वादित्याह।तिरस्कृताःनिंदिताःविप्रलब्धावंचिताः।
क्षिप्ताःप्रवसिताःहताः।अस्यतिरस्कारादिकर्तुःनतत्प्रतिकारंकुर्वंतितद्भक्ताःप्रभवःसमर्थाअपि।४८।विप्रकृतःअधमपराधं।४९।युक्तंचैतदि
त्याहप्रायशइति।द्वंद्वेषुसुखदुःखादिषु।अगुणाश्रयःसुखदुःखाद्याश्रयोनभवति।५०। ।।अध्यायःसमाप्तः

२ताडिताः२

२विप्रलभकाः२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाःप्र. २ल स्मिर ॥१॥ प स्प४

॥इति प्रथमे ऽष्टादशोऽध्यायः॥ प्रायोपविष्टे गंगायां राज्ञि योगिजिनाहृते। शुकस्यागमनं तत्र प्रोक्तमेकोनविंशके॥१॥ स्वकृतं तत्कर्म मुनिस्कंधे सर्प्प
प्रक्षेपणं गर्ह्यं निंद्यं चिंतयन् सुदुर्मना जातः। चिंतामेवाह साधर्म्यं। अहो इति नीचं पापं अनार्यं वमिति पाठे स एवार्थः। ब्रह्मणि ब्राह्मणे गूढं युक्तं तेजो दे२
यस्य कृतं यद्देवहेलनं ईश्वरावज्ञा पापमित्यर्थः। तस्मान्मे व्यसनं भविष्यति तत्तु नातिदीर्घकालाद्भविरोचास्तु तत्रापि श्रधासाद्धात्पुत्रादिपरेण
निप्रार्थनाकाममसंकोचतः एवंप्रार्थनायाः प्रयोजनं अघे निष्कृताय प्रायश्चित्ताय यथा पुनरेवं न कुर्यामिति च॥ एवं मांद्धात स्वस्यैव व्यसनं प्रार्थ्य

॥इति श्रीभागवते महापुराणे प्रथमस्कंधे ऽष्टादशोऽध्यायः॥ ॥सूत उवाच॥ महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिंतयन्ना
त्मकृतं सुदुर्मनाः। अहो मया नीचमनार्यवत्कृतं निरागसि ब्रह्मणि गूढतेजसि॥१॥ ध्रुवं ततो मे कृतदेवहेलनाद्दुरत्य तु२
यं व्यसनं नातिदीर्घात्। तदस्तु कामं ह्यघनिष्कृताय मे यथा न कुर्यां पुनरेवमद्धा॥२॥ अद्यैव राज्यं बलमृद्धकोशं प्र
पु२ कोपितब्रह्मकुलानलो मे। दहत्वभद्रस्य पुनर्न मेऽभूत्पापीयसी धीर्द्विजदेवगोभ्यः॥३॥ स चिंतयन्नित्थमथाशृणोद्य
था मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः। स साधु मेने न चिरेण तक्षकानलं प्रसक्तस्य विरक्तिकारणम्॥४॥ ॥ ॥

ततः प्रागेव किंचित्प्रार्थयति॥ अद्यैव मे राज्यादि दहतु प्रकोपितं ब्रह्मकुलमेवानलः पुनर्द्विजादीन्पीडयितुं धीर्मे मा भूत् न भवेदित्यर्थः॥३॥ इत्थं
चिंतयन् स राजा मुनेः सुतेनोक्तः सप्तमेऽहनि निर्ऋतिर्मृत्युर्मध्यान्नविष्यति तथाशृणोत् शमीकशिष्याच्छिष्यात्श्रुत्वा च सः तक्षकस्य विषाग्निं ७०
साधु मेने यतो विषयेषु प्रसक्तस्य विरक्तिकारणं॥

१स्प१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथोनंतरंउभौलोकौपुरस्ताद्राज्यमध्यएवहेयतयाविचारितौतौविहायश्रीकृष्णांघ्रिसेवामेवाधिमन्यमानःसर्वपुरुषार्थाधिकांजानन्प्राय
मनशनंतस्मिन्स्थितः। तत्संकल्पेनोपा वि ष्टादितियावत्। यद्वाप्रायंप्रकृष्टमयनंशरणंयथाभवति ५ अमर्त्यनद्यामितिविशेषणस्यफल
माह।यागंगालसंतीश्रीर्यस्याः तुलस्याः तयाविमिश्राः येकृष्णांघ्रिरेणवस्तैरभ्यधिकंसर्वोत्कृष्टंयदंबुतस्यनेत्रीतद्वाहिनीउभयत्रअंतर्बहि
श्चसेशान्लोकपालैःसहितान्लोकान्पुनातिमरिष्यमाणः। आसन्नमरणः। मरणस्यानियतकालत्वात्सर्वोपितथाचेतस्तांकोनसेवेत ६

हा   न्ना१

अथोविहायेममसुंचलोकंविमर्शितौहेयतयापुरस्तात्। कृष्णांघ्रिसेवामधिमन्यमानउपाविशत्प्रायममर्त्यनद्यां ५ यावैल
सच्छ्रीतुलसीविमिश्रकृष्णांघ्रिरेण्वभ्यधिकांबुनेत्री। पुनातिलोकानुभयत्रसेशान्कस्तांनसेवेतमरिष्यमाणः ६ इतिव्यवछिद्यसपां से२
डवेयःप्रायोपवेशंप्रतिविष्णुपद्यां। दध्यौमुकुंदांघ्रिमनन्यभावोमुनिव्रतोमुक्तसमस्तसंगः ७ तत्रोपजग्मुर्भुवनंपुनानामहानु
भावामुनयःसशिष्याः। प्रायेणतीर्थाभिगमापदेशैःस्वयंहितीर्थानिपुनंतिसंतः ८ अत्रिर्वसिष्ठश्च्यवनःशरद्वानरिष्टनेमिर्भृगुरं
गिराश्चपराशरोगाधिसुतोथरामउतथ्यइंद्रप्रमदेध्मवाहौ ९ ।।

इत्येवंविष्णुपद्यांगंगायांप्रायोपवेशंप्रतिव्यवछिद्यनिश्चित्यसपांडवेयइतितत्कुलेपिविशिष्टंदर्शयति। नास्त्यन्यस्मिन्भावोयस्यसः। कुतःमुनिव्रतःउपरतां
तस्तत्कुतः। मुक्तःसमस्तसंगोयेनसः ७ तत्रचतद्दर्शनार्थंमुनयःउपागताः। नहितीर्थस्नानार्थंकृतार्थत्वात्। ननुतामहशानामपितीर्थयात्राद्दश्यतेत
त्राहप्रायेणेतितीर्थयात्राव्याजैः ८ अत्र्यादयः [illegible] काण्डर्षिविशेषाः [illegible] कृतनिर्दिष्टाः। [illegible] गोत्राणितेषुप्रवरान्।।
गिरसांमुनिवंशस्थाश्ववंदेरन्।। ।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्या॰प्र॰ ७१ ।।१०।। अरुणादयः कांडर्षिश्च विशेषेण प्रदिष्टाः ।। नानायान्यार्षेयाणि ऋषीणां गोत्राणि तेषु प्रवरान् श्रेष्ठान् शिरसा शुभं स्पृष्ट्वा ववंदे ।।११।।
विज्ञापनार्थं पुनः कृतप्रणामः विविक्तस्तुद्धचेतो यस्मात् निगृहीतौ संयोजितौ पाणी येन सः स्वचिकीर्षितं प्रायोपवेशनादियुक्तं चेति विज्ञा-
पयामास ।।१२ अनुमोदनेनानुगृह्यमाणस्तं स्तोत्रात्मानं श्लाघते अहो इति नृपाणां मध्ये महत्तमैरनुगृहणीयं शीलं वृत्तं येषां ते न च राज्ञा मति
दुर्लभमिमाह ब्राह्मणानां पादशौचात् पादप्रक्षालनोदात् ।। दूरादुच्छिष्टविण्मूत्रपादाम्भांसि समुत्सृजेदिति स्मृतेः । दूरहितैः तद्विदुस्ततो
१दक॰१

मेधातिथिर्देवल आर्ष्टिषेणो भारद्वाजो गौतमः पिप्पलादः । मैत्रेय और्वः कवषः कुंभयोनिर्द्वैपायनो भगवान्नारदश्च ।।१०।। अन्ये च देवर्षि
ब्रह्मर्षिवर्या राजर्षिवर्या अरुणादयश्च । नानार्षेयप्रवरान् समेतान् अभ्यर्च्य राजा शिरसा ववंदे ।।११।। सुखोपविष्टेष्वथ तेषु भूयः कृत
प्रणामः स्वचिकीर्षितं यत् । विज्ञापयामास विविक्तचेता उपस्थितोऽग्रे निगृहीतपाणिः ।।१२।। परीक्षिदुवाच ।। अहो वयं धन्यतमा
२णा२ नृपाणां महत्तमानुग्रहणीयशीलाः । राज्ञां कुलं ब्राह्मणपादशौचाद् दूराद्विसृष्टं बत गर्ह्यकर्म ।।१३।। तस्यैव मेऽघस्य परावरेशो व्यासक्तचि
त्तस्य गृहेष्वभीक्ष्णम् । निर्वेदमूलो द्विजशापरूपो यत्र प्रसक्तो भयमाशु धत्ते ।।१४।। ।।
स्व॰२

विदूरादेव विसृष्टं त्यक्तं तथापि अस्माकमुभयोर्गर्ह्यमित्यर्थः ।। गर्ह्यं किमपि अस्तीत्यात्मानमुद्दिश्याह ।।१३।। आस्तां तावदनुग्रहः ब्रह्मशापोऽपि भगवत्प्रसादा
देव जात इत्याह तस्यैव गृह्यकर्मणि एवातः अघस्य पापात्मनः ।। गृहेष्वासक्तचित्तस्य मे यो भयं परावराणामीशः एव द्विजशापतया अभवत् यत्र यस्मि
न् शापे सति गृहेषु प्रसक्तो भयं धत्ते निर्विण्णो भवति । यतो निर्वेदमूलः वैराग्यमूलं प्रातिकारणं यस्मिन् स्वस्य वैराग्यप्राप्यत्वात् तस्य च भयमू ७२
लत्वात् तदर्थं द्विजशापं कारितवानित्यर्थः ।।१४।। ।। १निर्वेदे१
२णा२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ तमिति १

तान्प्रार्थयतैहरम्भामा।। तंमामास्तु पर्यातंनारणागतं प्रतियंत्वृज्ञानंतु देवी देवतारूपां गंगा च प्रत्येत्ववाराष्ट्रः प्रतिक्रियानादरे ।। गाथाः कथाः
।।१४ स्मरआश्रयोयेषां तेषुप्रकृष्टसंगो न्यूयात्तस्मात्तस्यां स्पृष्टो जन्मनि।।१ घोत्रध्यवसायो निश्चयः भागयेषु कुशेषु आस्ते समस्तसुतेजनमे

तंमोपयातंप्रतियंत्वविप्रागंगा च देवी धृतवित्रमीशो द्विजोपसृष्टः कुत्कुकस्तत्रकोवादशात्व लिंगायतविष्णुगाथाः ।।१५ पुनश्च नूत्या
न्नगवस्मनंतेरतिः प्रसंगश्चतदाश्रयेषु महत्सुयायामुपयामि स्पृष्टिमे च सत्तु सर्वत्रिनमो द्विजेभ्यः ।।१६ इति स्म सज्जाध्यवसायमुक्तः प्रा
चीनसूलेषु कुशेषु धीरः ।। तदृष्टुखेदद्विएकूलमास्ते समुद्रपत्न्याः स्वसुतेन्यस्तचार ।। १७ एवंचतस्मिन्नरदेवदेवेशायो प्रविष्टे दिवि
देवसंघाः ।। प्रवास्यन्नमौव्याकिरन्स्मत्नैर्मुदास्तु कुंदुदुनयश्चनेदुः ।। १८ महर्षयो वै समुपागता ये प्रशास्य माधिस्म तमोदमानाः ।। ऊचुः प्र
जानुग्रहशीलसारा यत्त्वमश्लोकगुणं निरूपं ।। १९ ।। नवाइदंराजर्षिवर्य चित्रं भवत्सु कल्लं समन्तवृते षु येध्यासनं राजकिरीट
जुष्टं सद्योजहुर्भगवत्पार्श्वकामाः ।। २० ।। ।।

जयेम्मस्त्रो नारोराजसयेन ।। १४ ।। मुत्साव्य किरन्तु देवसंघैर्वादितानेदुः ।। १८ ।। प्रजानुग्रहे चाखिलं स्वभावः सारो बलं च येषां उत्तमश्लोकगुणैरनिरूपं
सुंदरमिव ।। १९ ।। नवस्तुपांडोर्वंशेषु ये जुहुरितिपु धिष्टिरानिप्रायेण ।। २० ।। ।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प्र०
७२

परस्परं समन्वयंतो मर्वस्तिपरस्मै ह्येतल्लोकं तत्र हेतुः विरजस्कं निर्मर्यं विशोकं च यास्यतीति कृतस्तत्राह अस्य यमिति ॥२१॥ आश्रुत्य तत् आकएवेति समं
पक्षपातशून्यं । मधुच्युत्स्व मृतस्राविगुरुगं भीरार्थी अव्यलीकं सत्यं ॥२२॥ तत्र मारणां लोकानां तद्धेतं परिसत्स्यु लोको वेदा यथा मूर्त्तिधरा भवंति
तद्गुल्माः ज्ञानातिचाय्य मुक्ताहरूपालुता आहा ने हेति । नवतां प्रयोजनं परस्त्वनुग्रहं विना नास्ति न हि श्रिएवार्थः स्यात्तत्राह सं

सर्वे वयं तावदिहास्महेथ कलेवरं यावदसौ विहाय । लोकं परं विरजस्कं विशोकं यास्यत्ययं भागवतप्रधानः ॥२१॥ आश्रुत्य तदृषि
गणवचः परीक्षित्समं मधुच्युत्गुरु चाव्यलीकं । आभाषतैनानभिनंद्य युक्तान्शुश्रूषमाणश्चरितानि विष्णोः ॥२२॥ समागताः सर्वत ए
व सर्वे वेदा यथा मूर्त्तिधरास्त्रिपृष्ठे । नेहाथवामुत्र च कश्चनार्थ ऋते परानुग्रहमात्मशीलम् ॥२३॥ ततश्च वः पृच्छ्यमिमं विपृच्छे विश्र
भ्य विप्रा इति कृत्यतायाम् । सर्वात्मना म्रियमाणैश्च कृत्यं शुद्धं च तत्रामृशताभियुक्ताः ॥२४॥ तत्राभवद्भगवान्व्यासपुत्रो यदृ
च्छया गामटमानोऽनपेक्षः । अलक्ष्यलिंगो निजलाभतुष्टो वृतश्च बालैरवधूतवेषः ॥२५॥ ॥

शीलं स्वभाव मा ॥२३॥ पृच्छ्यं प्रष्टव्यं विस्रभ्य विश्वासं कृत्वा । एवं कर्त्तव्यमित्यस्य भावः इति कृत्यता तस्मिन् विषये सर्वात्मना सर्वावस्थासु कृत्यं य१
विशेषतश्च म्रियमाणैः कृत्यं शुद्धरूपं पापसंपर्करहितं आमृशत विचारयत ॥२४॥ तत्र तेषु यागयोगतपोदादिभिः विविदमानेषु सत्सु य ७२
दृच्छया गां पर्यटन् व्यासपुत्रः । तत्राभवत्प्राप्तः । नलक्ष्म आश्रमादि चिह्नं यस्य । अवधूत अविज्ञाय जनैस्त्यक्तो यः तस्येव वेषो यस्य सः
॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमित्यादीनां प्रत्युत्थिता इति तृतीयश्लोकेनान्वयः। द्विगुणचतुष्टौ वर्षाणि यस्य। सुकुमारौ पादौ करौ ऊरू बाहू अंसौ कपोलौ गात्रं च यस्य चारु
णी आयते अक्षिणी यस्मिन्। तत्र तानामायस्मिन्। लंबकस्वादिविषमं विना तुल्यौ कर्णौ। शोभने नेत्रे भ्रुवौ यस्मिन्नेवंभूतमाननं यस्य। कंबुवद्रेखात्र
यांकितः सुष्टुजातः कंठो यस्य। कंठस्याधो नोगयोः स्थिते अस्थिनी जत्रुणी। मांसेन निगूढे जत्रुणी यस्य। पृथु विस्तीर्णं तुंगमुन्नतं वक्षो यस्य

तमष्टवर्षं सुकुमारपादकरोरुबाह्वंसकपोलगात्रं। चार्वायताक्षं समतुल्यकर्णं सुभ्रूत्राननं कंबुसुजातकंठं॥ २६॥ निगूढजत्रुं पृ
थुतुंगवक्षसं समावर्त्तनाभिं वलिवल्गूदरं च॥ दिगंबरं वक्त्रविकीर्णकेशं प्रलंबबाहुं स्वमरोत्तमाननम्॥ २७॥ तपांसि सदापीव्ययौवनांगल
क्ष्मास्वीणं मनोज्ञं रुचिरस्मितेन॥ प्रत्युत्थितास्ते मुनयः स्वासनेभ्यस्तद्दर्शनज्ञा अपि गूढवर्चसं॥ २८॥ स विष्णुरातोऽतिथयत्त्वा
गताय तस्मै सपर्यां विरसाजहार॥ ततो निवृत्ता ह्यबुधाः स्त्रियो न तु कामहासने सोपविवेश पूजितः॥ २९॥

व आवर्त्तनाभिर्यस्य। वलिभिस्त्रिर्यक्निम्नरेखाभिर्वल्गु रम्यमुदरं यस्य। दिश एव अंबरं यस्य। वक्त्राः विकीर्णकेशा यस्य। प्रलंबौ बाहू यस्य। स्वम ब२
रेषु श्रेष्ठेषु देवेषु उत्तमो हरिस्तद्वदाननं यस्य। २७। सदापि अव्ययमत्संतोत्तमं यद्वयो यौवनं तेन या अंगलक्ष्मीर्देहकांतिस्तया रुचिरस्मितेन। गूढव
र्चसमपि प्रत्युत्थितास्तं दृष्ट्वा उत्थानं कृतवंतः स्वस्य। सपर्यां सेवां सपर्यामाजहार। आत्मनिवेदनं कृतवान्। तेन सहागताः स्त्रियः प्रसादयो
निवृत्ताः स उपविवेश॥ २९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२तं२
सभगवान्ब्रह्मर्षिसंघादिभिःसंवृतःसन्नलंव्यरोचत॥ग्रहाःशुक्रादयःऋक्षाणिअश्विन्यादीनि॥तारास्तारादयः॥३०॥नकुंठासर्वार्थेषुमेधाय
स्यंप्रश्नार्थंपुनर्नत्वा॥३१॥सूनृतांगिरमाह॥अहोइतिपंचभिः॥सतांसेव्याजाताःयतःअतिथिरूपेणहेतुनातीर्थकायोग्याःकृताः॥३२॥३३॥विष्णोः
सान्निध्यादसुराणामिवदयश्व॥३४॥पांडुसुतानांप्रियःश्रीकृष्णःअद्यमेप्रसन्नोजातःअनन्तरंतेषांपैतृष्वसेयानांप्रीत्यर्थंतद्गोत्रस्यमेआत्तो ल सौ त्रस्य२

समंवृतस्तत्रमहान्महीयसांब्रह्मर्षिराजर्षिदेवर्षिसंघैः॥व्यरोचतालंभगवान्यथेंदुर्ग्रहर्क्षताराणिकरैःपरीतः॥३०॥प्रशांतमा
सीनमकुंठमेधसंमुनिंनृपोभागवतोभ्युपेत्यसः॥प्रणम्यमूर्ध्नावहितःकृतांजलिर्नत्वागिरासूनृतयान्वपृच्छत॥३१॥अहोअद्यवयं
ब्रह्मन्सत्सेव्याःक्षत्रबंधवः॥कृपयातिथिरूपेणभवद्भिस्तीर्थकाःकृताः॥३२॥येषांसंस्मरणात्पुंसांसद्यःशुध्यंतिवैगृहाः॥कि
पुनर्दर्शनस्पर्शपादशौचासनादिभिः॥३३॥सान्निध्यात्तेमहायोगिन्पातकानिमहांत्यपि॥सद्योनश्यंतिवैपुंसांविष्णोरिवसु
रेतराः॥३४॥अपिमेभगवान्प्रीतःकृष्णःपांडुसुतप्रियः॥पैतृष्वसेयप्रीत्यर्थंतद्गोत्रस्यात्तबांधवः॥३५॥अन्यथातेव्यक्तगते
र्दर्शनंनःकथंनृणाम्॥नितरांम्रियमाणानांसंसिद्धस्यवनीयसः॥३६॥ ॥

या
कृतंबांधवंबंधुकृत्यंयेनसः॥३५॥अन्यथाश्रीकृष्णप्रसादंविनातवदर्शनंकथमस्मदादीनांतत्रापिनितरांम्रियमाणानांसंसिद्धस्याव्यक्ता
गतिर्यस्य॥वनयितायाचयितोवनयितृतमोवनीयान्तस्यासुदांतयामांचयद्वा॰तिप्रवर्तकस्येत्यर्थः॥३६॥इत्येवंहरिमज्जनेबहि ७३
र्मुखात्याचयित्वाप्रवर्तकस्येत्यर्थः॥१९॥ ॥ १२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतएवसर्वथा म्रियमाणस्य पुरुषस्य यस्मिन्कृते संसिद्धिः मोक्षलक्षणा सिद्धिर्भवति तां योगिनां गुरुं पृच्छामि॥३७॥ यत श्रोतव्यं यज्जाप्यं यत्कर्त्त
व्यं यदाराध्यं तदा ब्रूहि विपर्ययमश्रोतव्यादि॥३८॥



सम्यक्सिद्धिर्यस्मात्तं यत्कार्यं कर्त्तुर्योग्यं कर्त्तव्यं वा तद्रूपकमिति त्रिभेदं॥३७॥ विपर्ययमश्रोतव्यादि॥३८॥ तदर्शनस्य पुनर्दुर्लभत्वा
दिदानीमेव कथनीयमित्याशयेनाह नूनमिति॥ गोदोहनमात्रकालमपि॥३९॥ एवमहोइत्यादिकया मधुरया गिरा श्लक्ष्णा भाषितः श्रुतिः

अतः पृच्छामि संसिद्धिं योगिनां परमं गुरुम्॥ पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा॥३७॥ यच्छ्रोतव्यमथो जाप्यं यत्कर्त्तव्यं
नृभिः प्रभो॥ स्मर्त्तव्यं भजनीयं वा ब्रूहि यद्वा विपर्ययम्॥३८॥ नूनं भगवतो ब्रह्मन्गृहेषु गृहमेधिनां॥ न लक्ष्यते ह्यवस्थानम
पि गोदोहनं क्वचित्॥३९॥ सूत उवाच॥ ॥ एवमाभाषितः पृष्टः स राज्ञा श्लक्ष्णया गिरा॥ प्रत्यभाषत धर्मज्ञो भगवान्बादराय
णिः॥४०॥ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे पारमहंस्यां संहितायां शुकागमनो नाम एकोनविंशतितमोऽध्या
यः॥ ॥

सुखीकृतः पृष्टश्च॥४०॥ आर्यधर्मज्ञमाहतारिमवनौ कृत्वा परीक्षितं रूपं ब्रूत्सात्खेदनिरक्षितं कलिजयरम्यातं चकृत्वा नृविः॥ अंते यः शुकरूपतः स्वपरमज्ञानोपदेशेन तं शापादावदमुं नमामि परमानंदाकृतिं माधवं॥१॥ इति श्रीभागवतभावार्थदीपिकायामेकोनविंश
तितमोऽध्यायः॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ आंध्रद्वितीयस्कंध प्रारंभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीगणेशायनमः ॥ ॥ ॐनमोभगवतेवासुदेवाय ॥ ॥ द्वितीयेतुदशाध्यायैः श्रीभागवतमादितः ॥ उद्देशलक्षणोक्तिभ्यां संक्षेपेणोपवर्ण्यते ॥ १ ॥
तत्रतु प्रथमेध्यायेकीर्त्तनश्रवणादिभिः ॥ स्थविष्ठेभगवद्रूपेमनसोधारणोच्यते ॥ २ यन्नामकीर्त्तनंदानतपोयोगादिसत्फलं ॥ तन्नित्यं परमानंदं हरिंनिरतंनमस्मर ॥ ३ ॥ ॥ अथद्वितीयस्कंधव्याख्या ॥ ॥ उक्तः पूर्वमुपोद्घातः सप्रसंगः शुकागमः ॥ राज्ञाष्टष्टंनृणांकृत्यमथाहशुकसन्मुनिः
ध राज्ञः प्रश्नमभिनंदति ॥ वरीयानिति ॥ तेषुयापुंसांश्रोतव्यादिषुमध्येयः परः श्रेष्ठगोचरः प्रश्नः कृतः एषवरीयान् ॥ यतोलोकहितमेततमो

ॐनमोभगवतेवासुदेवाय ॥ ॥ श्रीशुकउवाच ॥ ॥ वरीयानेषतेप्रश्नः कृतोलोकहितंनृप ॥ आत्मवित्संमतःपुंसांश्रोत
व्यादिषुयःपरः ॥ १ ॥ श्रोतव्यादीनिराजेंद्रनृणांसंतिसहस्रशः ॥ अपश्यतामात्मतत्वंगृहेषुगृहमेधिनां ॥ २ ॥ निद्रयाह्रि
यतेनक्तंव्यवायेनचवावयः ॥ दिवाचार्थेहयाराजन्कुटुंबभरणेनवा ॥ ३ ॥

क्षहेतुत्वात् ॥ आत्मविदांमुक्तानांचसंमतोयतः ॥ १ ॥ तत्रतावत्स्वाभाविकक्रियाणामनर्थहेतुत्वंवदन्ब्रूहियद्वाविपर्ययमित्यस्योत्तरमाह ॥
श्रोतव्यादीनीतित्रिभिः ॥ गृहेषुसक्तानां अतएवगृहमेधिनां तत्रपंचसूनापरायणानांमेधतिहिंसार्थः ॥ २ ॥ नैश्वस्त्रथैवायुर्व्ययोत्वनतीत्याह न
क्तंरात्रौयत्वयश्चायुःतन्निद्रयाव्यवायेनरत्यावाह्रियते दिवाचह्रियतेवयः ततश्चार्थेहयाअर्थार्थमुद्यमेनसिद्धेर्थेकुटुंबपोषणेनवाचकारात्वनुक्तस
मुच्चयार्थौ ॥ ३ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ अपि २
ननु न स्वरक्षकुटुंबार्थं कथमात्मार्थं यत्नं कुर्यात्तत्राह। देहादिषु आत्मनः सैन्येषु परिकरेषु। असत्सु मिथ्याभूतेष्वपि प्रमत्तः प्रसक्तः। तेषां पित्रादिदृष्टां
तेन नाशं पश्यन्नानुसंधत्ते ॥४॥ एवं विपर्ययप्रश्नस्योत्तरमुक्त्वा श्रोतव्यादिप्रश्नोत्तरमाह। तस्मादिति। हे भारत तच्चरतस्य वंश्यस्य सर्वात्मेति श्रेष्ठत्वमा
ह भगवानिति सौंदर्यं ईश्वर इत्यावश्यकत्वं। हरिरिति बंधहारित्वं अभयं मोक्षमिच्छता ॥५॥ अतः परमस्य श्रेयो नान्यदित्याह। एतावानेव जन्मनो
लाभः फलं तमाह। नारायणस्मृतिरिति। सांख्यादिभिः साध्य इति। तेषां स्वातंत्र्येण लाभत्वं वारयति। सांख्यं आत्मानात्मविवेकः। योगोऽष्टांगः स्व
१ त १

देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि। तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति ॥४॥ तस्माद्भारत सर्वात्मा भगवान्हरिरीश्वरः। श्रोत
व्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयं ॥५॥ एतावान्सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया। जन्मलाभः परः पुंसामंते नारायणस्मृतिः ॥६॥
प्रायेण मुनयो राजन्निवृत्ता विधिषेधतः। नैर्गुण्यस्था रमंते स्म गुणानुकथने हरेः ॥७॥ इदं भागवतं नाम पुराणं ब्रह्मसंमितं। अधी
तवान्द्वापरादौ पितुर्द्वैपायनादहं ॥८॥ परिनिष्ठितो नैर्गुण्ये उत्तमश्लोकलीलया। गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥९॥ ॥ त
१ पि १

१ नारायण नैर्गुण्यस्मृतिः। परो लाभः न तस्मादिभावकर्तुं शक्यत इत्यर्थः ॥६॥ तत्र सदाचारं प्रमाणयति प्रायेणेति। विधिषेधतः विधिनिषेधाभ्यां निवृत्ताः। नैर्गुण्ये
ब्रह्मणि स्थिता अपि सप्रसिद्धं। किमिदमपूर्वं कथयसि मम त्वत्पूर्वमेवेदमित्याह। इदं च भगवत्प्रोक्तं। तत्रापि एकप्रधानं पुराणं ब्रह्मसंमितं
सर्ववेदतुल्यं यद्वा ब्रह्मसम्यक् [illegible] मितं येन कृतस्तया द्वापरमतस्मादधीतवानिति ॥८॥ ननु सिद्धस्य तत्कुतोऽध्ययने प्रवृत्तिस्तत्राह। परिनिष्ठितोपी
ति। गृहीतचेताः आकृष्टचित्तः ॥९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द्वि॰
२

महापुरुषो विष्णुः तदीयः यस्य यस्मिन् श्रद्धां कुर्वतां सती श्रद्धैहैतुकी ॥ १० ॥ साधकानां सिद्धानां च नातः परमन्यत् श्रेयोस्तीत्याह ॥ एतदिति ॥ इच्छतां कामि-
नां तत्फलसाधनमेतदेव निर्विद्यमानानां मुमुक्षूणां मोक्षसाधनमेतदेव योगिनां ज्ञानिनां फलं चैतदेव निर्णीतं नात्र प्रमाणं वक्तव्यमित्यर्थः ॥ ११ ॥ स्व-
ल्पमेवायुरवशिष्टं किमहं साधयेयमिति मा शुचेत्याह ॥ किमिति ॥ त्रिभिः ॥ परोक्षैरलक्षितैर्हायनैर्वर्षैः ॥ विदितं ह्यायाति निश्चितं यतो येन ज्ञा-

तदहं ते निधास्यामि महापौरुषिको भवान् ॥ यस्य श्रद्दधतामाशु स्यान्मुकुन्दे मतिः सती ॥ १० ॥ एतन्निर्विद्यमानानामिच्छतामकुतोभयं ॥
योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनं ॥ ११ ॥ किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह ॥ वरं मुहूर्तं विदितं घटेत श्रेयसे यतः ॥ १२ ॥ खट्-
१ कं वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः ॥ मुहूर्तात्सर्वमुत्सृज्य गतवानभयं हरिम् ॥ १३ ॥ तवाप्येतर्हि कौरव्य सप्ताहं जीवितावधिः ॥ उ-
पकल्पय तत्सर्वं तावद्यत्सांपरायिकं ॥ १४ ॥ अंतकाले तु पुरुष आगते गतसाध्वसः ॥ छिंद्यादसंगशस्त्रेण स्पृहां देहेनु ये च तं ॥ १५ ॥ ॥

१ दैत्यान्
नेन घटेत यत्नं करोति ॥ १२ ॥ खट्वांगो हि देवपक्षे स्थित्वा जयत ततः स प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्तः तल्लेनोक्तं प्रथमं तावन्ममायुः कथ्यतामिति ॥ ततो देवै-
रुक्तं तु मुहूर्तमात्रमस्तीति ततः शीघ्रं विमानेनायोध्यामागत्य हरिं शरणं गत इति ॥ यतश्चायं स्वर्गान्नमितोधिका कर्मभूमिः पृथ्वी ॥ १३ ॥ तव त्वेत-
र्हि इदानीमपि तावदस्ति तावता कालेन सांपरायिकं पारलौकिकं साधनं संपादय ॥ १४ ॥ तत्र वैराग्यं तावदाहांतकाल इति गतसाध्वसः मृत्यु- राम २
भयशून्यः असंगो नाम स्वत्वनासक्तिः ॥ तेन शस्त्रेण स्पृहां सुखेच्छां ॥ तं देहमनु ये पुत्रकलत्रादयस्तेष्वपि स्पृहां छिंद्यात् ॥ १५ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच। गृहात्प्रव्रजितः निर्गतः गृहे स्थितस्य पुनरभ्यासः किं संभवति। तत्राष्टांगयोगमाह। धीर इति। ब्रह्मचर्यादिनियमोपलक्षणं। पुण्यतीर्थेति स्नाना
दिनियमोपलक्षणं। आसनमाह। शुचाविति। विविक्ते एकांते। विधिवत् कुशाजिनचैलैः क्रमेण निर्मिते। १६। जपगर्भं प्राणायामं वक्तुं जपमाह त्रि
वृदिति। अकारादित्रिवर्णनिर्मितं ग्रथितं ब्रह्माक्षरं प्रणवं मनसाभ्यसेत् अभ्यावर्त्तयेत् मनसा इंद्रियप्रत्याहारं वक्तुं प्राणायामेन मनो नियमनमा
ह मनो यच्छेदिति ब्रह्मबीजं प्रणवम् अविस्मरंश्चैव जितश्वासः सन्। १७। प्रत्याहारमाह। नियच्छेदिति। अक्षान् इंद्रियाणि निश्चयात्मिका बुद्धिः सार

गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः। शुचौ विविक्त आसीनो विधिवत्कल्पितासने। १६। अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं
परं। मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन्। १७। नियच्छेद्विषयेभ्योक्षान्मनसा बुद्धिसारथिः। मनः कर्मभिराक्षिप्तं शुभार्थे धारये
द्धिया। १८। तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा। मनो निर्विषयं युक्त्वा ततः किंचन न स्मरेत्। १९। पदं तत्परमं विष्णोर्मनो यत्र प्रसी
दति। रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः। यच्छेद्धारणया धीरो हंति या तत्कृतं मलं। २०। ॥

थिर्यस्य सः। धारणामाह। मन इति। पुनश्च कर्मभिः यद्वा सनाभिराक्षिप्तं आकृष्टं शुभार्थे भगवद्रूपे। १८। ध्यानमाह। तत्रेति। एकमेकं पादाद्यवयवं।
अव्युच्छिन्नेन समग्ररूपाद्वियुक्तेन। आश्रयविशेषसामान्यतश्चित्तस्थिरीकरणं धारणा अवयवविभावनया तद्विशेषं ध्यानमिति भेदः। समाधिमाह
२ समाधाय निर्विषयं मनो युक्त्वा स्थिरीकृत्य ततो न किंचित्स्फुरत्परमानंदमात्राकारं कृत्वेत्यर्थः। प्रसीदति उपशाम्यति। १९। एवं चास्य पुनर विक्षेपे सति धारणामे
व स्थिरीकुर्यादित्याह। रजस्तमोभ्यामाक्षिप्तं तमसा विमूढं क्षिप्तं मनो निरुंध्यात्। तत्कृतं रजस्तमोभ्यां कृतम्। २०। ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द्वि॰
२

यतः यस्यां क्रियमाणायां भद्रं सुखात्मकं आश्रयं विषयं प्रपश्यतः तत्रैव प्रीतिर्भवति २१ यथा यत्र यादृशी च चेतिकर्तव्यता विषयतो द्विरो धा ९१
रणां पृच्छ्यते २२ यथेत्यस्योत्तरं जितासन इति विषयमाह स्थूल इति सार्द्धेन २३ विशेषो विराड्देहः स्थविष्ठानामपि स्थूलतरः महत्कार्यं
मात्रं २४ अस्य चोपलक्षणत्वेन विषयत्वं वस्तुत विराड्जीव नियंता भगवानेव विषय इत्याह अंडकोश इति तदवतारिणिकयाह एवं पृथिव्यावरणं

यतः संधार्यमाणायां योगिनो भक्तिलक्षणः आशु संपद्यते योग आश्रयं भद्रमीक्षतः २१ राजोवाच यथा संधार्यते ब्रह्मन्धा
रणा यत्र संमता यादृशी वा हरेदाशु पुरुषस्य मनोमलं २२ श्रीशुक उवाच ॥ जितासनो जितश्वासो जितसंगो जितेंद्रियः स्थूले
भगवतो रूपे मनः संधारयेद्धिया २३ विशेषस्तस्य देहोयं स्थविष्ठश्च स्थवीयसां यत्रेदं व्यज्यते विश्वं भूतं भव्यं भवच्च सत् २४॥
अंडकोशे शरीरेस्मिन् सप्तावरणसंयुते वैराजः पुरुषो योसौ भगवान् धारणाश्रयः २५ पातालमेतस्य हि पादमूलं पठंति पार्ष्णि
प्रपदे रसातलं महातलं विश्वसृजोथ गुल्फौ तलातलं वै पुरुषस्य जंघे २६ द्वे जानुनी सुतलं विश्वमूर्तेरूरुद्वयं वितलं चातलं च म
हीतलं तज्जघनं महीपते नभस्तलं नाभिसरो गृणंति ॥२७॥ ॥

॥२५॥
ततश्च पृथ्व्यप्तेजोवाय्वाकाशाहंकारमहत्तत्वानीति सप्त विराड्देहस्तज्जीवत्वं तं
व धारणामभेदस्मारोप्योपासनं कर्तव्यमित्याशयेनाह पातालं पादमूलं पादस्याधोभागौ पातालादीनां तदवयवता विधीयते पातालादीनां तत्तांता नि भा॰ ३
श्चयस्तनाद्याः समस्तं मिथिरानिपठंति गृणंति तालादिप्रमाणप्रदर्शनं पार्ष्णिप्रपदे पादस्य पश्चात्पुरोभागौ २६ ऊरुद्वयं तस्य अधोभागो वितलं
उत्तरभागे अतलमिति ज्ञेयं नाभिरवसरः ॥२७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्योतिरनीकं ज्योतिषां समूहं स्वर्गं महर्लोकं ग्रीवेति गृणंति। तपोलोकं रराटीं ललाटं सत्यलोकं २८ उस्रा देवाः तेजोमयशरीरत्वात्ते बाहवस्त्वाकुः॥
दिशश्च समस्ता दिशः श्रोत्राधिष्ठात्र्यो देवताः। कर्णौ श्रोत्रस्याधिष्ठानं शष्कुल्यौ श्रोत्रविषयः स तस्य श्रोत्रेंद्रियं एवं नासिकादिष्वपि नासत्यदस्रौ अश्विनौ
नासे नासापुटे इध्मः दीप्तः। २९। द्यौरंतरिक्षं अक्षिणी नेत्रगोलके चक्षुरिंद्रियं। पतंगः सूर्यः अहनी रात्र्यहनी। परमेष्ठिधिष्ण्यं ब्रह्मपदं तालु अधिष्ठा

उरःस्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोस्य। तपो रराटीं विदुरादिपुंसः सत्यं तु शीर्षाणि सहस्रशीर्ष्णः॥ २८॥ इंद्रादयो बाहव
२८ आहुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः॥ नासत्यदस्रौ परमस्य नासे घ्राणोस्य गंधो मुखमग्निरिद्धः॥ २९॥ द्यौरक्षिणी चक्षुरभूत्पतं
गः पक्ष्माणि विष्णोरहनी उभे च॥ तद्भ्रूविजृंभः परमेष्ठिधिष्ण्यमापोस्य तालू रस एव जिह्वा॥ ३०॥ छंदांस्यनंतस्य शिरो गृणंति दंष्ट्रा यमः
स्नेहकला द्विजानि। हासो जनोन्मादकरी च माया दुरंतसर्गो यदपांगमोक्षः॥ ३१॥ व्रीडोत्तरोष्ठोधर एव लोभो धर्मः स्तनोधर्मपथोस्य पृष्ठः
कस्तस्य मेढ्रं वृषणौ च मित्रौ कुक्षिः समुद्रा गिरयोस्थिसंघाः॥ ३२॥ नद्योस्य नाड्योथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेंद्र॥ अनंत
वीर्यः श्वसितं मातरिश्वा गतिर्वयः कर्म गुणप्रवाहः॥ ३३॥ ॥

नं जिह्वा इंद्रियं ३०। छंदांसि वेदाः शिरो ब्रह्मरंध्रं स्नेहकलाः पुत्रादिस्नेहलेशाः द्विजानि दंताः षंढत्वमार्षं। दुरंतः अपारः सर्गः इति यत् स तस्य कटाक्षः
॥३१॥ अधर्ममार्गोस्य पृष्ठं नागः कः प्रजापतिः मित्रौ मित्रावरुणौ ३२ अनंतं वीर्यं यस्य सः वयः कालस्तस्य गमनं। गुणप्रवाहः प्राणिनां संसारः कर्म तस्य
गति
क्रीडा ॥३३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गंधर्वादीनां दैवेकं ३१

सूक्ष्मः विशेः। अव्यक्तं प्रधानं सः प्रसिद्धश्चंद्रमाः तदीयं मनः। सर्वे विकाराणां कोशः स्वाश्रयत्वात् ३४ विज्ञानशक्तिश्चित्तं महिमहत्तत्वं। अंतःक
रणं अहंकारं। गिरित्रं। श्रीरुद्रं गईनाद्देवायामुत्पन्नाश्चस्थावरा ३५ वयांसि पक्षिणः तस्य व्याकरणं नाम रूपे व्याकरवाणीति श्रुत्युक्तं शिल्पं
नैपुण्यं यथाह। येन शुक्लीकृता हंसाः शुकाश्च हरिती कृताः मयूराश्चित्रिता येन स ते वृत्तिं विधास्यतीति। मनुः स्वायंभुवः मनीषा बुद्धिः॥
मनुजः पुरुषः निवासः आश्रयः पुरुषेश्वेवा विस्तारात्मेति श्रुतेः। गंधर्वादयः स्वरस्य तो षड्जादिस्वरस्मृतय इत्यर्थः। असुरानीकं वीर्यं

इशास्यके शान् विदुरंबुवाहान् वासस्तु संध्ये १८ र्कं वदन्ति सूक्ष्मः। अव्यक्तमाहुर्हृदयं मनस्य सचंद्रमाः सर्वविकार कोशं ॥ ३४ ॥ विज्ञानश
क्तिं महिमामनंति सर्वात्मनोंतःकरणं गिरित्रं ॥ अश्वाश्वतर्युष्ट्र गजान नखानि सर्वे मृगाः पशवः श्रोणिदेशं ॥ ३५ ॥ वयांसि तद्व्याक
रणं विचित्रं मनुर्मनीषा मनुजो निवासः ॥ गंधर्वविद्याधरचारणाप्सरः स्वरस्मृतीरसुरानीकवीर्यं ॥ ३६ ॥ ब्रह्माननं क्षत्रभुजो
महात्मा विड्रूरुरंघ्रिश्रितकृष्णवर्णः ॥ नानाभिधानाभिज्यगणोपपन्नो द्रव्यात्मकः कर्मवितानयोगः ॥ ३७ ॥ ॥

स्वरः सुरा

यस्य सः स्मृतिरनीकवीर्यं इति पाठे गंधर्वादयः स्वरः असुरस मूहश्चेष्टः पराक्रमः। स्मृतिस्तस्येति ३६ ब्रह्म विप्रस्तस्याननं मुखं हाक्षत्र
त्रियो भुजा यस्य। विट्वैश्यः उरुर्यस्य। अंघ्रिश्रितः कृष्णवर्णः शूद्रो यस्य नानाभिधाना नामानि येषां ते च ते अभीज्या देवास्तेषां गणैर्वसुरु
द्रादि निरुपपन्नो युक्तः द्रव्यात्मको हविः साध्यः वितानयोगः यज्ञप्रयोगः तस्य कर्मकार्यं आवश्यकोऽभिप्रेत इत्यर्थः ३७ ॥ ॥ राम
४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देह२ वीर

ईयान् एतावान् संनिवेशः अवयवसंस्थानं। अस्मिन् स्वबुध्या मनः संधार्यते मुमुक्षुभिर्यतो व्यतिरिक्तं किंचिन्नास्ति तस्मिन्। ३८। तदेवं चित्तस्थै भि२
र्यार्थं विराड्देहं जीवेश्वरयोर्मनोदेनोपासनमुक्तं। तत्र तु जीवेश्वरे प्रविभाव्य स एव ध्येय इति निर्धारयति। स इति। सर्वेषां धीवृत्तिभिरनुभूतं सर्वं
येन। स एक एव सर्वांतरात्मा आत्मा तमेव सत्यं भजेत। अन्यत्र चोपलक्षणेन न सज्जेत। यतः अन्यासंगात् आत्मनः पातः संसारो भवति। एकस्य तत्तद्धियः दिं३
सर्वानुभूतौ दृष्टांतः। स्वप्नजनानामीक्षिता यथेति। स्वप्ने हि कदाचित् बहून् देहान् प्रकल्प्य जीव एव तत्तद्धियैः सर्वं पश्यति तद्वत्। ईश्वरस्तु भवि

ईयानसावीश्वरविग्रहस्य यः सन्निवेशः कथितो मया ते। संधार्यतेस्मिन् वपुषि स्थविष्ठे मनः स्वबुध्या न यतोस्ति किंचित् ॥ ३८ ॥ स स
र्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः। तं सत्यमानंदनिधिं भजेत नान्यत्र सज्जेद्यत आत्मपातः ॥ ३९ ॥ ॥ इति श्रीभागव
ते महापुराणे द्वितीयस्कंधे महापुरुषसंस्थानुवर्णने प्रथमोध्यायः ॥ १ ॥ ॥ श्रीशुक उवाच ॥ ॥ एवं पुरा धारणयात्मयोनिर्नष्टां
स्मृतिं प्रत्यवरुध्य तुष्टात्। तथा ससर्जेदममोघदृष्टिर्यथाप्ययात् प्राक् व्यवसायबुद्धिः ॥ १ ॥ ॥

यात्राकिलात्र बंधः। ३९। इति द्वितीये प्रथमः ॥ १ ॥ ॥ द्वितीये तु ततः स्थूलधारणया जितं मनः। सर्वसाक्षिणि सर्वेशे विष्णौ धार्यमितीर्यते ॥ १ ॥ इत्था
लंबनरूपैव मुक्ता वैराजधारणा ॥ इहोच्यते तु तस्माध्यासंबंतिर्यामिधारणा ॥ २ ॥ तत्र तावत् पूर्वोक्तधारणायाः अवांतरफलमाह। एवं याधारणा
तयात्तुष्टाद्धरेः पुरा प्रलयसमये नष्टां स्मृतिं प्रत्यवरुध्य लब्ध्वा प्राग् इदं विश्वं यथासीत्तथा ससर्ज। व्यवसायात्मिका बुद्धिर्यस्य।
अत एवामोघा दृष्टिर्यस्येति। च तस्य धारणया विश्वसृष्टिसामर्थ्यं भवति ॥ १ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपासनाफलादपि विरक्तस्य मुमुक्षोरात्मधारणायामधिकारः। अतो वैराग्यार्थं सर्वकर्मफलं निंदति। शाब्दस्य शब्दमयस्य ब्रह्मवेदः तस्य एष पंथाः कर्मफलबोधनप्रकारः। कोसौ स्वर्ग्यनैरैव स्वर्गादिनामभिः। येन साधकस्य धीर्ध्यायति तत्र दृढां करोतीति यत्। अपार्थैरिमेवाह तत्र मायामये पथि सुखमिति वासनया शयानः स्वप्नान्पश्यन्निव परिभ्रमन्नर्थान्न विंदति। तत्र लोकं प्राप्तोपि निरवद्यं सुखं न लभत इत्यर्थः।२। तर्हि सर्वथा कर्मफलत्यागे सद्य एव देहपातः स्यादित्याशंक्याह। अतः कविर्नाममात्रेषु नोपेषु यावता येन अर्थो देहनिर्वाहो यस्य तथा तावन्मात्रः स्यात्

रतत्रेतिपाठः२

शब्दस्य हि ब्रह्मण एष पंथा यन्नामभिर्ध्यायति धीरपार्थैः। परिभ्रमंस्तत्र न विंदतेर्थान्मायामये वासनया शयानः।२। अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः। सिद्धेन्यथार्थे न यतेत तत्र परिश्रमं तत्र समीक्षमाणः।३। सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किं। सत्यंजलौ किं पुरुधान्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः।४॥ चीराणि किं पथि न संति दिशंति भिक्षां नैवांघ्रिपाः परभृतः सरितोप्यशुष्यन्। रुद्धा गुहाः किमजितोवति नोपसन्नान्कस्माद्भजंति कवयो धनदुर्मदांधान्।५॥ ॥

प्रमत्तः तावन्मात्रे प्रयत्नासक्तः व्यवसायबुद्धिः इदं सुखमिति निश्चयवान्। तदपि तत्र तस्मिन्नर्थे श्रमेण यथैव सिद्धे सति। तत्र यत्ने परिश्रमं पश्यन्न यतेत।३। तथा सिद्धिमाह। सत्यां सत्यामिति। कशिपोः शय्यायाः। स्वतः सिद्धे बाहौ सति उपबर्हणैः उच्छीर्षकैः। पुरुधा बहुप्रकारया अन्नपात्र्या भोजनपात्रेण।४। ननु दिक्सर्वावीनाम न भवत्येव। वल्कलमन्नं तोयं वा स्थानं च याञ्चया प्राप्यं तद्विना कथं प्राप्येत तत्राह॥ चीराणि वस्त्रखंडानि। परान् बिभ्रति पुष्णंति फलादिभिर्ये। गुहाः गिरिदर्यः। ननु कदाचिदेषामलाभे किं कार्यं तत्राह। अजितो हरिः उपसन्नान् शरणागतान् किं न अवति न रक्षति किं शास्त्रस्य पूर्वत्रापि संबंधः॥ धनेयो दुर्मदस्तेन अंधान्॥५॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदानेन किं कर्तव्यं हरिस्तु सेव्य इत्याह। एवं विरक्तः सन् तं भजेत न त्वनियतत्वे हेतवः। स्वचित्ते स्वत एव सिद्धः। यतः आत्मा अत एव प्रियः प्रियस्य च से निष्फल
वा सुखरूपैव। अयं अर्थः सत्यः नत्व नात्मवन्मिथ्यान्न गवान् भजनीयगुणश्च। अनंतश्च नित्यः य एवंभूतः तं भजेत। नियतार्थः। निश्चित स्वरूपः॥
३६ तेनु भवानंदेन निर्वृतः सन्निति स्वतः। सुखात्मत्वं दर्शितं। किंच यच्च यस्मिन् भजने सति संसारहेतोरविद्यायाश्च परमो नाशोऽभवति। ६। एतदेवाम
विंता निंदयाहृदयातिकषति। तांतथाभूतां परस्य हरेरनुचिंतां धारणमना हत्स पश्भून् कर्मजडान् विनायथा पशुरेव स देवानामिति श्रुतेः। असतीं

एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियो योऽर्थो भगवाननंतः। तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र। ६। कस्तां त्वना ह्रत्सुप
रानुचिंतां मृते पशून सतीं नाम कुर्यात। पश्यन् जनं पतितं वैतरण्यां स्वकर्मजान्परितापान्जुषाणम्। ७। केचित्स्वदेहांतर्हृदया ८२
वकाशे प्रादेशमात्रं पुरुषं वसंतम्। चतुर्भुजं कंजरथांगशंखगदाधरं धारणया स्मरंति। ८। प्रसन्नवक्त्रं नलिनायतेक्षणं कदंबकिंज
स१ ल्कपिशंगवाससम्। लसन्महारत्नहिरण्मयांगदं स्फुरन्महारत्नकिरीटकुंडलम्। ९॥ ॥

विषयचिंतां को नाम कुर्यात्तत्तया चिंतया वैतरण्यां पतितं। तत्र ये स्वकर्मजान्दुःखात्मिकादिक्लेशान् सेवमानं जनं पश्यन्। वैतरणी यमद्वारस्था
७॥ त नदी तुस्यत्वात्संसृति वैतरणी। तामेव धारणां सविशेषणामाह। केचिदिति षड्भिः स्वदेहस्यांतर्मध्ये यद्धृदयं तत्र यो वकाशस्तस्मिन् संतं। प्रादेशस्त
र्जन्यंगुष्ठयोर्विस्तारः स एव मात्रा प्रमाणं यस्येति। हृदयपरिमाणेन तत्रोपलभ्यमानं। कंजं पद्मं रथांगं चक्रं। ८। नलिनं पद्मं तद्वदायते दीर्घे
ईक्षणे यस्य कदंबकुसुमस्य किंजल्काः केसराः तद्वत्पिशंगे पीते वाससी यस्य। लसंति महारत्नानि येषु तानि सुवर्णमयान्यंगदानि
यस्य। स्फुरंति च तानि महांति रत्नानि च यानि किरीटकुंडलानि यस्य॥ ९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उन्निद्रं विकसितं यत् हृत्पंकजं तस्य कर्णिकैव आलयः स्थानं तस्मिन् योगेश्वरैः स्थापितौ पादपल्लवौ यस्य श्रीरेवलक्ष्म चिह्नं तत्पुरुषं।
पाभादिविहितो मत्वर्थीयो नप्रत्ययः कौस्तुभं रत्नं कंधरायां यस्य। स्वच्छा या नालक्ष्मीः शोभा यस्य स्वया वनमालया आचितं व्याप्तं ॥ १० ॥ स्नि
ग्धत्वादिविशिष्टैः कुंतलैर्विराजमाने आनने यो हासस्तेन पेशलं सुंदरम् ॥ ११ ॥ अदीनमुदारं यल्लीलाहसितं तेन यद्दीक्षणं तस्मिन् तुल्लस
तो ये भ्रूभंगाः ॥ भ्रूक्षेपास्तैः सूचितो भूरिरनुग्रहो येन ॥ चिंतामयं चिंतया आविर्भावितं ॥ १२ ॥ अस्यैव ध्यानमाहात्म्ये केकत्वा इति अनुभावयेद्ध्यायेत् य

उन्निद्रहृत्पंकजकर्णिकालये योगेश्वरास्थापितपादपल्लवं ॥ श्रीलक्ष्मणं कौस्तुभरत्नकंधरं अम्लानलक्ष्म्या वनमालयाचितं ॥ १० ॥ वि
भूषितं मेखलयांगुलीयकैर्महाधनैर्नूपुरकंकणादिभिः ॥ स्निग्धामलाकुंचितनीलकुंतलैर्विराजमानाननहासपेशलं ॥ ११ ॥ अदी
न[illegible]लीलाहसितेक्षणोल्लसतद्भ्रूभंगसंसूचितभूर्यनुग्रहं ॥ ईक्षेत चिंतामयमेनमीश्वरं यावन्मनो धारणयावतिष्ठते ॥ १२ ॥ एकैक
शोंऽगानि धियानुभावयेत्पादादि यावद्धसितं गदाभृतः ॥ जितं जितं स्थानमपोह्य धारयेत्परं परं शुध्यति धीर्यथा यथा ॥ १३ ॥ ताव
त्स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत ॥ यावन्न जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः ॥ १४ ॥ ॥

१२ ध्ययेत्।

॥१३॥

क्रितं ॥ अयं जितः स्फुरितं पादगुल्फादिस्थानं अवयवस्तदपोह्य त्यक्त्वा परं परं जंघाजान्वादिर्धारयेत् शुध्यति तस्मिन् निश्चलो भवति ॥ पूर्वोक्तैर्वैरा जंघा
रणया एतद्धारणं गत्वमाहयावदिति ॥ परब्रह्मादयो ऽवरे यस्मात् कुतः विश्वेश्वरे द्रष्टरि नतु दृश्यरूपे चैतन्यघनत्वात् ॥ भक्तियोगः प्रेमलक्षणः क्रि
यावसाने आवश्यककर्मानुष्ठानानंतरं ॥ अनेन कर्मापि भक्तियोगपर्यंतमेवेत्युक्तम् ॥ १४ ॥ ॥ राम ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंतावदासन्नमृत्योःपुंसःकृत्यमुक्तं इदानींतस्यैवस्वयंदेहंत्यक्तुमिछतः। कृत्यमाह॥ स्थिरमितिसार्धैस्त्रिभिः॥ अंगहेराजन्। एवंभूतोयतिर्यदाइ
२ति मंलोकंदेहंजिहासुःहातुमिछतितदादेशेपुण्यक्षेत्रेकालेचउत्तरायणादौमनोनसज्जयेत्संगंनप्रापयेत्। नदेशकालौयोगिनःसिद्धिहेतूकिंतुयो
गएवेतिदृढनिश्चयोभूत्वास्थिरंसुखकरंचासनमास्थितःप्राणान्नियछेदित्यर्थः।१५।एतांबुद्धिंक्षेत्रज्ञेबुध्यादिद्रष्टरिनिनयेत्प्रविलापयेत्। तंचक्षे
त्रज्ञमात्मनिशुद्धे। तंचशुद्धमात्मानंआत्मन्येवाहमितिब्रह्मणिअवरुध्यएकीकृत्यलब्धोपशांतिःसम्यनिर्वृ तिःसन्कृत्याद्विरमे

स्थिरंसुखंचासनमाश्रितोयतिर्यदाजिहासुरिमममंगलोकं। कालेचदेशेचमनोनसज्ज येत्प्राणान्नियछेन्मनसाजितासुः॥१५॥मनः
स्वबुध्यामलयानियम्यक्षेत्रज्ञएतांनिनयेत्तमात्मनि। आत्मानमात्मन्यवरुध्यधीरोलब्धोपशांतिर्विरमेतकृत्यात्॥१६॥नयत्रका
लोनिमिषांपरःप्रभुःकुतोनुदेवाजगतांयईशिरे। नयत्रसत्वंनरजस्तमश्चनवैविकारोनमहान्प्रधानम्।१७॥ ॥

त॥ ततःपरंप्राप्याभावात्।१६।तदेवाह।नयत्रेति।यत्रात्मस्वरूपेकालेनप्रभुःकिमपिकर्तुंनसमर्थः।अतएवदेवाःनप्रभवइत्याह॥ अनिमिषां
देवानांपरःप्रभुःकालोपियत्रनप्रभुःतत्रकुतोनुदेवाःप्रभवेयुःदेवनियम्यानांतुजगतांप्राणिनांकावार्त्तेत्याह।जगतामितिकुतोनप्रभवंतीत्य
पेक्षायांनिरूपाधित्वादित्याह।नयत्रेति।महाजंत्कारणान्यपिनयस्यसृष्ट्यादौप्रभवंतीत्याह।नयत्रेतिविकारोहंकारः॥१७॥ ॥ ॥
१ग१

ना॰ वि॰
७

२ पदे २

निरुपाधिकत्वं कुत इत्यत आह । परमिति । यस्मात् अतत् आत्माव्यतिरिक्तं नेति नेतीत्येवमुक्त्वा इमिद्यैवो दौरात्म्यं देहाद्यात्मत्वं विसृ॰ उक्तं चाहमस्मि पू
ज्यमस्मि श्रीविष्णोः परं पदं वैष्णवं हृदा उपगूह्य अत्राप्यस्मिन् सौहृदं येषां तथाभूताः संतः तद्वैष्णवं पदं अत एव परं सर्वतः श्रेष्ठमामनंतीत्यन्वयः
१५ तस्मादित्थं ब्रह्मत्वेन अवस्थितो मुनिः परमेत् इत्युरा हेनयदि व्यासत्त्रिति कस्मात्माणात्सकाशाद्विशेषतरुक्तः तमाह । विज्ञायतेनेनेति विज्ञानं शास्त्रं
तेन जाता दृक् ज्ञानं तस्य वीर्यं बलं तेन सुरंधिताः विहिंसिताः । आशया विषयवासनाय स सः । इदानीं तस्य देहत्यागप्रकारमाह । स्वपार्ष्णिना पादमू

परं पदं वैष्णवमामनंति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः । विसृष्टदौरात्म्यमनन्यसौहृदा हृदोपगूह्यार्हपदं पदे पदे ॥ १८ इत्थं मुनिस्तूप
रमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरंधिताशयः । स्वपार्ष्णिनापीड्य गुदं ततोऽनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः ॥ १९ नाभ्यां स्थितं हृद्यधि
रोप्य तस्मादुदानगत्योरसितं नयेन्मुनिः । ततोऽनुसंधाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत ॥ २० तस्माद्भ्रुवोरंतरमुन्नयेत निरुद्धसप्त
सप्ताः स्वयनोऽनपेक्षः । स्थित्वा मुहूर्तार्धमकुंठदृष्टिर्निर्भिद्य मूर्धन्विसृजेत्परं गतः ॥ २१ ॥ ॥ ज्य

लेनगुदं मूलाधारं । आपीड्य निरुध्य अनिलं प्राणं उन्नमयेत् ऊर्ध्वं नयेत् । जितः क्लमो येन षट्सु स्थानेषु नाभ्यादिषु । १९ नाभ्यां मणिपूरके स्थितं हृदि
अनाहतचक्रे अधिरोप्य उरसि कंगदधोदेशे स्थिते विशुद्धिचक्रे । मनस्वी जितचित्तः । स्वतालुमूलं तस्यैव चक्रस्याग्रदेशं । ततो बहुधा गमनसंज्ञवाछनके
रिमुक्तं । २० तस्माद्भ्रुवोरंतरं आज्ञाचक्रं । निरुद्धानि श्रोत्रे नेत्रे नासिके मुखं चेत्येवं सप्तायतनानि यस्य । निष्प्राणमार्गायेन सः । अनपेक्षः अतः परं ब्रह्म गतः स
न् मूर्धनि ब्रह्मरंध्रे । निर्भिद्य देहमिंद्रियाणि च विसृजेत् ॥ २१ ॥

राम
७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ मुक्ति १ नं २

सद्योमुक्तिमुक्त्वा क्रममुक्तिमाह। यदीति द्वाभ्यां। यदि तु पारमेष्ठ्यं पदं प्रयास्यन् भवति। वैहायसानां खेचराणां सिद्धानां यद्विहारं क्रीडास्थानं कीदृशं।। अष्टावाधिपत्यानि अणिमाद्यैश्वर्याणि यस्मिन् तदपि प्रयास्यन्। क्वगुणसंनिवाये गुणसमुदायरूपे ब्रह्मांडे सर्वत्रेत्यर्थः। तर्हि इह सांगावसरे मनश्चेंद्रियाणि च न त्यजेत्। किंतु तैः सहैव तं लोकं गच्छेत् २२ यतः कर्मगतिवन्न योगगतिः परिछिन्नेत्याह। योगेश्वराणां त्रिलोक्या अंतः अंतर्बहिश्च ब्रह्मांडाद्बहिश्च गतिमाहुः। अत्र हेतुः पवनः अंतः आत्मा लिंगशरीरं येषामिति। विद्या उपासना तपो न च धर्मः योगोऽष्टांगः समा

यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारं। अष्टाधिपत्यं गुणसंनिवाये सहैव गच्छेन्मनसेंद्रियैश्च। २२। योगेश्वराणां गतिमाहुरंतर्बहिस्त्रिलोक्याः पवनांतरात्मनां। कर्मभिस्तां गतिमाप्नुवंति विद्यातपोयोगसमाधिभाजां। २३। वैश्वानरं याति विहायसा गतः सुषुम्णया ब्रह्मपथेन शोचिषा। विधूतकल्कोथ हरेरुदस्तात् प्रयाति चक्रं नृप शैशुमारं। २४।। ।।

१ लोक १

धिर्नितरां येन तं तितेषां या गतिस्तां। २३। तामाह। वैश्वानरमित्यष्टभिः। विहायसाऽवकाशेन तत्र ब्रह्मपथेन गतः सन् प्रथमं वैश्वानरं अग्न्यभिमानिनीं देवतां याति केनोपायेन सुषुम्णाया नाड्या सा च देहाद्बहिरपि निर्गतास्तीत्याह। शोचिषा ज्योतिर्मय्या। विधूतः सक्तः कल्को मलं येन सः क्रामं प्रक्रममानइत्यर्थः।। उदस्तात्तु उपरिष्टाद्वर्तमानं हरेः संबंधिनारारूपं नारायणाधिष्ठितमित्यर्थः।। शैशुमारं चक्रं पंचमस्कंधे वक्ष्यमाणं शिशुमाराकारं ज्योतिश्चक्रं। चक्रस्थानि श्वाशादीनि ज्ञ्यांतानि पदानि प्रयातीत्यर्थः। २४।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा०टि०
८

नद्धि लोऽश्वर्कं विष्णुस्य नाभि तूर्यश्चा … | व्याविष्टलिंगता बालानिशात्यस्यनपंदत्वं | अतिवर्षातिक्रम्य । परतस्त्वगिरिणांगस्य नावादौएव निष्कलिन लि
गशरीरेण | ब्रह्मविदांस्थानं ब्रह्मैवनमस्कृतं महर्लोकमुपैति | यद्यस्मिन् विबुधामहा कल्पायुषोत्तृवादय: | २५ | अथोनंतरं कल्पांते सविश्वं वैलोक्यं अति
२तू शयेनदह्यमानं निरीक्ष्य तच्चाप्यूर्ध्वं शाते: | यत्द्विपरार्धस्थायि यित्तमारमेष्ठ्यं पदं प्रतिनिर्याति | सिद्धेश्वरैर्जुष्टानि धिष्ण्यानि विमानानि यस्मिन्तंत | उक्तंति
श्रेष्ठ्यं स्वपितं | २६ | तदेवाह । न यत्रेति । आर्तिः दुःखं उद्वेगो नयं | किंतु चित्ततो हेतोर्यद्दुःखं अदः कृतेतरेकं विनाकुतो न भवति || अनिदं विदां नगव त३

तद्धिश्वनाभिंत्वतिवर्ष्यविष्णोरणीयसाविरजेनात्मनैकः || नमस्कृतं ब्रह्मविदामुपैतिकल्पायुषो यद्विबुधारमंते | २५ | अथो
अनंतस्य मुखानलेन दंदह्यमानं स निरीक्ष्य विश्वं | निर्यातिसिद्धेश्वरजुष्टधिष्ण्यं यद्वैपरार्ध्यं तदुपारमेष्ठ्यं | २६ | नयत्रशोकोन
जरा न मृत्युर्नार्तिर्नचोद्वेग ऋते कुतश्चित | यच्चित्ततोदः कृपयानिदंविदां दुरंतदुःखप्रभवानुदर्शनात् | २७ || ||

१जीवानां१

तोऽध्यानमजानतां प्राणिनां दुरंतदुःखोयः प्रभवो जन्मतस्यानुदर्शनात्तेषां कृपया | यद्वा | तेषां कृपया चित्ततो दोम … नः पीडेतियत्तु तद्विनाकृतश्चि
दपिय च शोकादयो न संतीति | तत्र ब्रह्मलोकं गतानां त्रिविधागतिः | ये तु … ये पुण्योत्कर्षेण गताः ते कल्पांते पुण्यतारतम्येनाधिकारिणं वं गो० रामु
ति | ये तु हिरण्यगर्भाद्युपासनाबलेन गताः | ते ब्रह्मणा सह मुच्यंते | ये तु भगवदुपासकास्ते स्वेच्छया ब्रह्मांडं भि | त्वा वैष्णवं पदमारोहंति | २७ ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रप्रस्तुतस्यभगवद्भक्तस्यब्रह्मांडभेदनप्रकारमाह। ततइत्यादिना। तत्रेयंप्रक्रिया। ईश्वराधिष्ठितायाःप्रकृतेःकेनचिदंशेनमहत्तत्वंभवतितस्मा
शेनाहंकारस्तस्यांशेनशब्दतन्मात्रद्वारानभस्तस्यांशेनस्पर्शःतन्मात्रद्वारावायुःतस्यांशेनरूपंतन्मात्रद्वारातेजः। तस्यांशेनरसःतन्मात्रद्वाराआपः
तदंशेनगंधतन्मात्रद्वारापृथ्वीतैश्चमिलितैश्चतुर्दशभुवनात्मकंविराट्शरीरं। तच्चपंचाशत्कोटियोजनविशालस्यपृथिव्येवांडकटाहविशे
षशब्दवाच्याकोटियोजनविशालंप्रथमावरणं। पंचाशत्कोटियोजनविशालमित्येके। ततश्चाबादीनांयेःपरिणताद्वशाःतान्येवोत्तरोत्तरदश

२१

ततोविशेषंप्रतिपद्यनिर्भयस्तेनात्मनापोनलमूर्तिरत्वरन्। ज्योतिर्मयोवायुमुपेत्यकालेवाय्वात्मनाखंबृहदात्मलिंगम्॥२८॥ घ्रा
णेनगंधंरसनेनवैरसंरूपंचदृष्ट्याश्वसनंत्वचैव। श्रोत्रेणचोपेत्यनभोगुणत्वंप्राणेनचाकूतिमुपैतियोगी॥२९॥ ॥ ॥

ना२

गुणान्यावरणानि। अष्टमंतुप्रकृत्यावरणंव्यापकमेवतदेवंस्थितेपृथिव्याद्यावरणभेदःकथ्यते॥ ततोविशेषंप्रतिपद्यलिंगदेहेनपृथिव्यात्मता
तांप्राप्येत्यर्थः। एवमुत्तरत्रापिद्रष्टव्यंनिर्भयःकथंयास्यामीतिशंकाशून्यः। तेनात्मनापृथिवीरूपेणतन्निरंतरमपःप्रतिपद्यात्वरन्त्वरामकुर्वन्नत्
२ते
वरात्मैनकेदाहादिशंकात्वाद्यष्टमोगानभुंजानइत्यर्थः। एवंज्योतिर्मयःसन्कालेभोगावसानेबृहत्आत्मनोलिंगंपरमात्ममूर्तिस्तेनोपपा
सनेमुक्तं। यद्वावेदशब्दात्ममूर्तिस्तितस्यप्रज्ञापकमिति। २८। इंद्रियार्थानांभूतसूक्ष्माणामतिक्रममाह॥ घ्राणेनाधिष्ठितेनगंधमुपेत्यश्वसनंस्प
र्शंनभोगुणत्वंशब्दात्मतांप्राणेनतत्कर्मेंद्रियेणाकूतिंतन्नक्रियां॥२९॥ ॥

थे२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰वि॰
ए

कार१

तदेवं स्थूलसूक्ष्मभूतातिक्रममुक्त्वा तदावरणभूताहंकारस्यामहदादिष्वानिमाह । सद्योगी विकार्यं संसाद्य विज्ञानतत्त्वं याति विविधं कार्यमस्येति विका न१
र्यो हंकारः । स च त्रिविधस्तामसो राजसः सात्त्विकश्चेति तत्र तामसाज्जडानि भूतसूक्ष्माणि जायंते राजसाद्बहिर्मुखानि दशेंद्रियाणि सात्त्विकान्मनश्चेंद्रिय
देवाश्च तेषां च यस्तत्तदहंकारे तत्र भूतसूक्ष्माणामिंद्रियाणां च संनिकर्षो लयस्थानं तामसं राजसं च मनोमयं देवमयं सात्त्विकं प्राप्य गत्या एवं ग
मनेन तेनाहंकारेण सह विज्ञानतत्त्वं महत्तत्त्वं याति । ततः गुणानां संनिरोधो लयो यस्मिन् तत्प्रधानं याति ॥३०॥ तेनात्मना प्रधानरूपेणानंदमयः
न सत्त्वोपाधीनामवसाने शांतमविकृतमानंदं परमात्मानमुपैति न विषज्जते नावर्त्तत इत्यर्थः ॥३१॥ सृती मार्गौ प्रकाराविवत्यर्थः । हे नृपश्चनपेह्यो निर्विय

भूतसूक्ष्मेंद्रियसंनिकर्षं मनोमयं देवमयं विकार्यं । संसाद्य गत्या सह तेन याति विज्ञानतत्त्वं गुणसंनिरोधम् ॥३०॥ तेनात्मना २
त्मानमुपैति शांतमानंदमानंदमयोवसाने । एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेंग ॥३१॥ एते सृती ते नृप देव २
गीते त्वयाभिपृष्टे ह सनातने च । ये वै पुरा ब्रह्मण आह पृष्ट आराधितो भगवान् वासुदेवः ॥३२॥ १

सै१

१या मूर्धन्विसृजेत्परं गत इति सद्योमुक्तिरेका सृतिः यदि प्रयास्यन्नित्यादिना क्रममुक्तिश्च द्वितीया सृतिः । एते सृती वेदेन गीते उक्ते नन्तु सद्योमुक्तौ श्रुति ॥ त
त्र यदा सर्वे प्रमुच्यंते कामा ये स्य हृदि श्रिताः । अथ मर्त्योमृतो भवत्यत्र ब्रह्म समश्नुत इति सद्योमुक्तिः । तेर्चिरभिसंभवंतीत्यादिना क्रममुक्तिश्च वेदेनोक्ता
प यदा कर्मनिरतास्तां गतिं मा प्रभुवंतीति दक्षिणमार्गस्यापि सृतित्वादेते सृती इति द्विवचनं । त्वयाभिपृष्टे पृष्टो तत्र मित्यादि प्रश्नेनार्थान्मुक्तिविषये देवत्रापि राम
सृती पृष्टे ब्रूहि । यथा विपर्ययमिति दक्षिणमार्गोपि च पृष्टः एवं त्वयाच ये पृष्टे एते सृती इत्यर्थः ॥३२॥ ॥ ए

थी१ न्न र्न१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५२

संनिमंसरतः पुंसो बहवो मोक्षमार्गाः तपोयोगादयः समीचीनस्तथापि अयमेवेत्याह । नहीति । यतोनुष्ठिताद्भक्तियोगो भवेत् । अतोन्यः शिवः सुखरूपो निर्विघ्न

श्च नास्त्येव ॥ ३३ ॥ कुत एतदत आह । भगवान्ब्रह्मा कूटस्थः निर्विकारः एकाग्रचित्तः सन् त्रिः समर्थः । त्रिःवारान् कार्त्स्न्येन साकल्येन ब्रह्म वेदं अन्वीक्ष्य वि

३५ चार्य तस्मिन्नात्मनि हरौ रतिर्भवेत्तदेव मनीषया बुद्ध्याध्यवस्यत् निश्चितवान् ॥ ३४ ॥ ननु अनुभूतेर्धैररतिर्भवतिः अननुभूते तु भगवति कथं रतिः स्यादत्त

आह । भगवानलक्षितः दृष्टः कथं । स्वात्मनाहि जीवजातं तस्मिन्नियाकैः दृश्यैर्बुद्ध्यादिभिः तदेव द्रष्टारं दर्शयंति । दृश्यानां जडानां दर्शनं स्वप्रकाशात्मकं द्रष्टारं प-

नह्यतोन्यः शिवः पंथा विशतः संसृताविह । वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥ ३३ ॥ भगवान्ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनी

षया । तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत् ॥ ३४ ॥ भगवान्सर्वभूतेषु लक्षितः स्वात्मना हरिः । दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैर

नुमापकैः ॥ ३५ ॥ तस्मात्सर्वात्मना राजन्हरिः सर्वत्र सर्वदा । श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणां ॥ ३६ ॥ पिबंति ये भगवत आ

त्मनः सतां कथामृतं श्रवणपुटेषु संभृतं । पुनंति ते विषयविदूषिताशयं व्रजंति तच्चरणसरोरुहांतिकं ॥ ३७ ॥ इति श्रीभागवते महापुरा

णे द्वितीयस्कंधे द्वितीयोऽध्यायः ॥ २ ॥

विना न घटत इत्यनुपपत्तिमुखेन लक्षणैः स्वप्रकाशं अंतर्यामिलक्षकैः । तथा बुद्ध्यादीनि कर्तृ[illegible]प्रयोज्यानि

करणत्वाद्वास्यादिवदिति व्याप्तिमुखेनानुमापकैः स्वतंत्रश्च कर्तेत्येवमीश्वरसिद्धिः ॥ ३५ ॥ यच्छ्रोतव्यमित्यादि प्रश्नोत्तरमुपसंहरति तस्मादिति ३६

श्रवणादिफलमा[illegible] विनयेनाह । पिबंतीति । सतां आत्मनः आत्मत्वेन प्रकाशमानस्य कथैवामृतं । विषयैर्विदूषितं मलिनीकृतं आशयं । पुनंति

शोधयंति तस्य चरणपद्मांतिकं श्रीविष्णुपदं व्रजंति ॥ ३७ ॥ ॥ इति द्वितीये टीकायां द्वितीयोऽध्यायः ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द्वि०
९०

ये२

तृतीयेविष्णुनक्केस्तुवैग्निष्ठंस्थएवंतोमुनेः नकुरुड़ेकेएतत्कर्मश्रवणादरईर्यते १ इदानीमन्यदेवतानजनन्स्यापितृत्वादित्तजनवदेवतुच्छफलैर्हि देन्
यतंवक्तुंपूर्वोक्तमनुवदति। एवमिति। ममेतिमां। कदाचिद्दैवयोगेनमनुष्यत्वंप्राप्तेषुजीवेषुमनीषिणस्तेषांतत्रापिम्रियमाणानां। तेषांत्रिषु वि
तएवमतत्हरिकथाश्रवणादिकंनिगदितंविहितमित्यर्थः १ ब्रह्मणस्पतिंवेदपतिंब्राह्मणंइंद्रियपाटवकाम इंद्रं प्रजाःकामःप्रजापतीं

श्रीशुकउवाच॥ एवमेतन्निगदितंपृष्टवान्यद्भवान्मम। नृणांयन्म्रियमाणानांमनुष्येषुमनीषिणां। १ ब्रह्मवर्चसकामस्तुयजेतब्र
ह्मणस्पतिं इंद्रमिंद्रियकामस्तुप्रजाकामःप्रजापतीन् २ देवींमायांतुश्रीकामस्तेजस्कामोविभावसुं वसुकामोवसून्रुद्रान्वीर्यका
मोथवीर्यवान् ३ अन्नाद्यकामस्त्वदितिंस्वर्गकामोदितेःसुतान्। विश्वान्देवान्राज्यकामःसाध्यान्संसाधकोविशां ४ आयुःकामोश्विनौ ज्य२
देवौपुष्टिकामइलांयजेत् प्रतिष्ठाकामःपुरुषोरोदसीलोकमातरौ ५ रूपाभिकामोगंधर्वान्स्त्रीकामोप्सरउर्वशीं। आधिपत्यकामः
सर्वेषांयजेतपरमेष्ठिनं ६ ॥

त्वरत्वादीनांशमायांदुर्गांविभावसुंअग्निं वसुकामःधनार्थीवीर्यंप्रभावः ततकामोवीर्यवान्सन्रुद्रान्यजेत अन्नाद्यंभोज्यंअन्नंच। अदितेःसु राम
तान्आदित्यान्। विशांदेशस्यप्रजानांस्वाधीनतामिच्छन्साध्यान्यजेत ४ इलांपृथ्वींप्रतिष्ठास्थानादप्रच्युतिः। रोदसीद्यावाभूमी ५ अप्स ९०
रास्त्वासावुर्वशीचतां ६ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यज्ञियज्ञोपाधिविशिष्टं कोशो वसुसंचयः । वसुकामो इत्यत्र धनमात्रमिति भेदः । दांपत्यमन्योन्यप्रीतिः तदेवार्थो यस्य सः ॥ ७ ॥ धर्मार्थः धर्मकामः उत्त
मश्लोकोपाधिविशिष्टं तंतुं तन्वन्नु संतानवृद्धिमन्विच्छन् । रक्षाबाधानिवृत्तिः । तत्कामः पुण्यजनान् यक्षान् । ओजो बलं तत्कामो मरुद्गणान् देवान् ॥ ८ ॥ रा
ज्यं राष्ट्रं तत्कामो मनून् देवान् मन्वंतराधिपान् । राज्ञः कर्म राज्यं तत्कामो विश्वान् देवानिति विशेषः । अभिचरन् शत्रुमरणमिच्छन् निर्ऋतिरा

यज्ञं यजेद्यशस्कामः कोशकामः प्रचेतसं । विद्याकामस्तु गिरिशं दांपत्यार्थ उमां सतीं ॥ ७ ॥ धर्मार्थ उत्तमश्लोकं तंतुं तन्वन् पितॄ
न्यजेत् । रक्षाकामः पुण्यजनान् ओजस्कामो मरुद्गणान् ॥ ८ ॥ राज्यकामो मनून्देवान्निर्ऋतिं त्वभिचरन् यजेत् । कामकामो यजेत् सोम
मकामः पुरुषं परम् ॥ ९ ॥ अकामः सर्वकामो वा मोक्षकाम उदारधीः ॥ तीव्रेण भक्तियोगेन यजेत पुरुषं परं ॥ १० ॥ एतावानेव यजता
मिह निःश्रेयसोदयः । भगवत्यचलो भावो यद्भागवतसंगतः ॥ ११ ॥ ॥

क्षसं । कामकामः भोगेच्छुः ॥ अकामः वैराग्यकामः पुरुषं परं प्रकृतिव्यतिरेकोपाधिमीश्वरं ॥ ९ ॥ अकामः एकांतभक्तः उक्तानुक्तसर्वकामो वा पु
रुषं पूर्णं निरुपाधिं ॥ १० ॥ पूर्वोक्तनानादेवतायजनस्यापि संयोगपृथक्त्वेन भक्तियोगफलत्वमाह एतावानिति । इंद्रादीनामपि यजतामिह तद्यज
नेन भागवतानां संगतो भगवत्यचलो भावो भक्तिर्भवतीति यत् एतावानेव निःश्रेयसस्य परमपुरुषार्थस्योदयः लाभः अन्यत्तु सर्वं तुच्छमित्यर्थः
॥ ११ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द्वि
११

१ अन्यास्वपि कथासु परपरादि ज्ञानं भवत्येव

भागवतसंगतेः इत्यनेन सूचितं हरि...ध्यारति लीति ज्ञानमिति। यया सु कथासु ज्ञानं भवति। कीदृशं सर्वतः प्रतिनिवृत्तं सुपरतं गुणोर्मीणां रा उत शब्दः स्फु सु प्रसादो यथा तथा न
गादीनां चक्रं समूहो यस्मात्तत्। उत अपि च अनंतरं तथैव आत्मप्रसादश्च यत्र यासु मनःप्रसादहेतुः। गुणेषु विषयेषु असंगो वैराग्यं च। उत यत्रेति पाठे इ
हासु च गुणेषु असंगः। कैवल्यमित्येव संमतः पंथा यस्य भक्तियोगः निर्वृत्तः श्रवणसुखेनान्यत्रापि निर्वृत्त इति वा। तासु हरिकथासु को रतिं न कुर्या
त्॥१२॥ अभिव्याहृतं उक्तं। ऋषिपरब्रह्मदर्शनं। कविं शास्त्रविनिष्णातं॥१३॥ श्रवणेच्छायां हेतुः। हरिकथायां एवोदर्कः उत्तरफलं यासु ताः कथाः

क

ज्ञानं यदा प्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसंग। कैवल्यसंमतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु र
तिं न कुर्यात्॥१२॥ शौनक उवाच॥ इत्यभिव्याहृतं राजा निशम्य भरतर्षभः। किमन्यत्पृष्टवान्भूयो वैयासकिमृषिं कविं॥१३॥ एतच्छुश्रूषतां
विद्वन्सूत नोऽर्हसि भाषितुं। कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवं॥१४॥ स वै भागवतो राजा पांडवेयो महारथः। बालक्रीडनकैः क्रीडन्
कृष्णक्रीडां य आददे॥१५॥ वैयासकिश्च भगवान्वासुदेवपरायणः। उरुगायगुणोदाराः सतां स्युर्हि समागमे॥१६॥ आयुर्हरति वै पुंसामुद्यन्न
स्तं च यन्नसौ। तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया॥१७॥

सतां भागवतानां सदसि समायां स्युः॥१४॥ एतत्प्रपंचयति द्वाभ्यां। कृष्णपूजादिरूपां सवार्गति१
क्रीडां यः स्वीकृतवान्॥१५॥ उरुगायस्य गुणैरुदाराः महत्यः कथाः स्युः॥१६॥ किंच दृष्टैर्वैष्ट्यं आयुर्हरिकथया सफलं कुर्वित्याशयेनाह त्रिभिः। आयुरिति राम
असौ सूर्यः उद्यन् उद्गच्छन् अस्तमादर्शनं च यन् गच्छन् यत् येन क्षणो नीतः तस्यायुः ऋते वर्जयित्वा दृष्टैवहरति॥१७॥ ॥ ११
२क्षीयमाणं२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुजीवनमेवतेषामायुषःफलमस्तीतिचाह। तरवइति। ननुतेषांश्वासोनास्ति। तर्हिभस्त्राःचर्मकोशाः। ननुतासामाहारादिकंनास्तितत्राह। नखादंति नामेहंतिनमेहंतिरेतःसेकंमैथुनंकुर्वंतिकिं। उतअपि। नराकारंपशुंमत्वाह। अपरइति। १७। तदेवाह। श्वादिभिःसंस्तुतःसदृशोनिरूपितःयस्य कर्णपथंकदाचिदपिनागतःसः। अवक्तास्पदत्वात्श्वभिःकश्मलविषयासक्तत्वाद्विड्वराहैर्ग्राम्यसुखकरैःकंटकवत्उष्ट्रवद्विषयासक्तत्वात् उष्ट्रैःभारवाहित्वात्खरैस्तुल्यइत्यर्थः। १९। तस्यांगानिचनिःफलानीत्याह। बिलेइतिपंचभिः। नशृण्वतःश्रृण्वतोनरस्ययेकर्णपुटेतेबिलेइव

२ नि

तरवःकिंनजीवंतिभस्त्राःकिंनश्वसंत्युत। नखादंतिनमेहंतिकिंग्रामपशवोपरे। १८। श्वविड्वराहोष्ट्रखरैःसंस्तुतःपुरुषःपशुः। नयत्क र्णपथोपेतोजातुनामगदाग्रजः। १९। बिलेबतोरुक्रमविक्रमान्येनशृण्वतःकर्णपुटेनरस्य। जिह्वासतीदार्दुरिकेवसूतनचोपगा यत्युरुगायगाथाः। २०। भारःपरंपट्टकिरीटजुष्टमप्युत्तमांगंननमेन्मुकुंदं। शावौकरौनोकुरुतःसपर्यांहरेर्लसत्कांचनकंकणौवा। २१। बर्हायितेतेनयनेनराणांलिंगानिविष्णोर्ननिरीक्षतोये। पादौनृणांतौद्रुमजन्मभाजौक्षेत्राणिनानुव्रजतोहरेर्यौ। २२। जीवन्छवोभागवतां घ्रिरेणुंनजातुमर्त्योभिलभेतयस्तु। श्रीविष्णुपद्यामनुजस्तुलस्याःश्वसन्छवोयस्तुनवेदगंधं। २३॥ ॥ दुः१ तः२

यारंध्रे। नचेदुपगायतितस्यजिह्वाअसतीदुष्टा। दर्दुरीभेकस्तद्दीयाजिह्वेव। २०। पट्टवस्त्रोष्णीषेण किरीटेनजुष्टमपिशिरोयदिननमेत्तर्हिकेवलं भारएव। शावौमृतकल्पौतत्करतुल्यौ। लसंतिकांचनकंकणेययोस्तौअपिसपर्यैवाराधः। २१। येनयेनविष्णोर्मूर्तीर्ननिरीक्षेतेतेबर्हायितेमयूरपिच्छ नेत्रतुल्ये। द्रुमवज्जन्मभजतइतितथा। ....मूलानुसारात्वित्यर्थः। २२। नाभिलभेतप्राप्नोतिनस्पृशतितान्धारयेत्। श्रीविष्णुपदलग्नायानवेदेतिग्राय। भा१
श्रीविष्णुपद्याः१ नाभिनंदेदित्यर्थः। २३।

ना०टि० १२

हि

श्रमश्मसारो बलं कातिन्यं यस्य विक्रिया लक्षणमाह अथेति। गात्ररुहेषु रोम हृष्टः उद्गमः। २४। यस्मादन्नकस्य सर्वमेतद्व्यर्थं मनसो नुकूलं चाप्रि
यं नृपे। अथ अतः साधुपृष्टः सन् वैयासकिः नृपतिं प्रति यदोत तदभिधेहीति। २५। इति द्वितीये तृतीयोध्यायः। ३। चतुर्थे परीक्षिता पृष्टः सृष्ट्यादिहरिचे
ष्टितं शुकेन ब्रह्मनारदसंवादेनोपवर्ण्यते। १। राज्ञः प्रश्नः कथयिथेयित्थं तस्य प्राकृती स्थितिमाह चतुर्भिः। वैयासकेः शुकस्य इति एवं आत्मनस्तत्त्वम् भूलं १

तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः। न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः। २४। अथाभिधेह्यंग मनो
नुकूलं प्रभाषसे भागवतप्रधानः। यदाह वैयासकिरात्मविद्याविशारदो नृपतिं साधु पृष्टः। २५। इति श्रीभागवते महापुराणे द्विती
यस्कंधे तृतीयोध्यायः। ॥ सूत उवाच ॥ वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः। उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात्। १। आ
त्मजायासुतागारपशुद्रविणबंधुषु। राज्ये चाविकले नित्यं विरूढां ममतां जहौ। २। पप्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्तमाः। कृष्णानु
भावश्रवणे श्रद्दधानो महामनाः। ३। संस्थां विज्ञाय संन्यस्य कर्म त्रैवर्गिकं च यत्। वासुदेवे भगवति आत्मभावं दृढं गतः। ४। राजोवाच
समीचीनं वचो ब्रह्मन् सर्वज्ञस्य तवानघ। तमो विशीर्यते मह्यं हरेः कथयतः कथां। ५। भूय एव विधित्सामि भगवानात्ममायया। य
येदं सृजते विश्वं दुर्विभाव्यमनीश्वरैः। ६।

निश्चयो यस्मात्तद्वचः उपधार्य आकलय्य मतीं कृष्ण एव सेव्यः नान्य इत्येवं भूतां। १। आत्मादे
हः पुत्र्यो गजादयः। २। इममेवार्थं हरिलीलालक्षणं। ३। संस्थां मृत्युं त्रैवर्गिकं धर्मार्थकामप्रधानं संन्यस्य त्यक्त्वाऽऽत्मभावं परमप्रेमाणं भगवद्रा
त्मत्वं गतः प्राप्तः सन् पप्रच्छ। ४। मह्यं मम तमोऽज्ञानं नश्यति। तव कथयतः अतः समीचीनं। ५। पुनश्च वेदितुमिच्छामि। इदं दुर्विभाव्यं च भवितर्कं विश्वं य राम
या सृजति। ६। १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ सामर्थ्यमाह २

गोपायति पालयति। संयच्छते संहरते। पुरुशक्तिः बहुशक्तिमान् क्रीडन् यथा करोति। आत्मानं ब्रह्मादिरूपिणं क्रीडन् विकरोति विविधं करोति ।९। एकः पुरुषरूपेण युगपत्कर्मभिः ब्रह्माद्यवतारैः क्रमेण वा यथा प्रकृतेर्गुणान् गृह्णाति। एतद्विचिकित्सितं संदिग्धं शाब्दे ब्रह्मणि वृत्तारेण विनिष्णातः परस्मिंश्चानुभवेन ।१०। उपामंत्रितः प्रार्थितः प्रचक्रमे देवतागुरुनमस्कारादिरूपं उपक्रमं अंगीकृतवानित्यर्थः ।११। तदेवाह त्रयो

यथा गोपायति विभुर्यथा संयच्छते पुनः। यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान्। आत्मानं क्रीडयन् क्रीडन् करोति विकरोति च (मायया)
॥ नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्मणः। दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितं। यथा गुणांस्तु प्रकृतेर्युगपत्क्रमशोपि वा॥
बिभर्ति भूरिशस्त्वेकः कुर्वन् कर्माणि जन्मभिः। विचिकित्सितमेतन्मे ब्रवीतु भगवान् यथा। शाब्दे ब्रह्मणि निष्णातः परस्मिंश्च भगवान्
खलु ॥१०॥ ॥सूत उवाच॥ इत्युपामंत्रितो राज्ञा गुणानुकथने हरेः। हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ॥११॥ ॥श्रीशुक उवाच॥ ॥
नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया। गृहीतशक्तित्रितयाय देहिनामंतर्भवायानुपलक्ष्यवर्त्मने ॥१२॥ ॥

दशभिः परस्मै सर्वोत्तमाय। तत्र हेतुः भूयसे अपरिमितमहिम्ने तद्दर्शयति। सतः प्रपंचस्य उद्भवादिषु निमित्तभूता या लीला तया गृहीतं ब्रह्मादिरूपेण रजआदिशक्तित्रितयं येन तस्मै अंतर्भवाय अंतर्यामिणे। अत एव सर्वांतरत्वादनुपलक्ष्यं वर्त्म यस्य ॥१२॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ दि॰
१३

दि२ ज३

विचित्रफलदातृत्वं अनुस्मरन् प्रणमति । नृयश्च पुनश्च नमः सतां धर्म्मवर्त्तिनां हजिन छिदे दुःखहंत्रे । अमतां अधर्म्मवर्त्तिनां अंसंवाया यानुज्ञ
वाहेतवे अखिलसत्वमूर्त्तये तत्तद्देवां रूपेण तत्तत्फलदायेस्मर्थाः । समयसत्वमूर्त्तये इतिवा । पुनरपि पूर्वोक्तो नयवैलक्षण्यमाह । पारमहंसे प्रत्येक
३नो निष्ठारूपे आश्रमे व्यवस्थितानां पुंसां अनुमृग्यंत निरसेन पुनः पुनर्मृग्यं यदात्मतत्वं तस्य दाशुषे दात्रे । १३ । मातत्वानां तद्गानां ऋषभाय पालकाय कु
योगिनां तक्रिहीनानां विदूरकाष्ठाय दिगपियस्य दुर्ज्ञेयाये स्मर्थः । तदेवं वैषम्य प्रतीनाव पितिर्द्विषिता या चित्समै अर्म्यमाह । निरस्तं साम्यं अतिशाय

नृयोनमः । सह जिनच्छिदे सतामसंनवायाखिलसत्वमूर्त्तये । पुंसां पुनः पारमहंस्य आश्रमेव्यवस्थितानामनुमृग्यदाशुषे । १३ । न
मोनमस्तेस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनां निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः । १४
यत्कीर्त्तनं यस्मरणं यदीक्षणं यद्वंदनं यच्छ्रवणं यदर्हणम् । लोकस्य सद्यो विधूनोति कल्मषं तस्मै सुभद्रश्रवसे नमोनमः । १५ ।
विचक्षणा यच्चरणोपसादनात् संगं व्युदस्योभयतोंतरात्मनः । विंदंति हि ब्रह्मगतिं गतक्लमा स्तस्मै सुभद्रश्रवसे नमोनमः । १६

१प अयस्यैदपेक्षयाच्यन्यस्य साम्यमतिशयश्च नास्ति तेन राधसा ऐश्वर्येण स्वधामनि स्वस्वरूपे ब्रह्मणि रममाणाय । १४ । सर्वसाधनेभ्यो भक्तेः श्रेष्ठ्यम
नुस्मरन् प्रणमति । यत्कीर्त्तनमितिद्वाभ्याम् । अर्हणं सुभद्रं मंगलं श्रवः यशो यस्य तस्मै । १५ । विचक्षणाः विवेकिनः यस्य चरणयोरुपसादनादुप राम
सत्वेर्निजनात् अंतरात्मनो मनसः । उभयत्र इहलोक परत्र च संगं व्युदस्य निरस्य गतक्लमाः श्रयासरहिताः । १६ । । । । १३

पूजनं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्किं श्रूयमाणानां सर्वसाधनवैफल्यं दर्शयन्नमति। तपस्विन इति। मनस्विनो योगिनः सुमंगलाः सदाचाराः यस्मिन्नतपआद्यर्पणं विना सुभद्रश्र
वस इति श्रवस्याद्वत्रिर्यशाः श्रवणादेः प्राधान्यज्ञापनाय ॥१७॥ तत्केः परमसुखहेतुत्वं दर्शयन्नाह। किरातादयो ये पापजातयः अन्ये च ये कर्मतः पापरू
पास्ते यदुपाश्रयाः भागवतास्तदाश्रयाः संतः शुध्यंति। तत्संभावनामात्रं कांपरिहरति प्रभ विष्णवे प्रभविष्णवे नमः शलायेति ॥१८॥ सर्वोपास्यत्वं मनुस्म नं

तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगलाः। क्षेमं न विंदंति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः॥१७॥ किरा श्रया
तहूणांध्रपुलिंदपुल्कसा आभीरकंका यवनाः खसादयः। येऽन्ये च पापा यदुपाश्रयाश्रयाः शुध्यंति तस्मै प्रभविष्णवे नमः॥१८॥ स एष
आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः। गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिंगो भगवान् प्रसीदतां॥१९॥ श्रि
यः पतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपतिर्धरापतिः। पतिर्गतिश्चांधकवृष्णिसात्वतां प्रसीदतां मे भगवान् सतां पतिः॥२०॥
यदंघ्र्यनुध्यानसमाधिधौतया धियानुपश्यंति हि तत्त्वमात्मनः। वदंति चैतत्कवयो यथारुचं स मे मुकुंदो भगवान् प्रसीदतां
॥२१॥

रन्प्रार्थयते स एष आत्मवतां धीराणामात्मा गुरुत्वेनोपास्य इत्यर्थः त्रयीमयत्वादिविशेषणैः तत्तन्मार्गेणोपास्यत्वं विवक्षितं। गतव्यलीकैर्नि
ष्कपटैश्च कैर्वितर्क्यं अनुमानेन प्रत्याश्चर्येण वीक्षणीयं लिंगं मूर्तिर्यस्य स प्रसीदतु ॥१९॥ सर्वपालकत्वमनुस्मरन्नाह। श्रिय इति। गतिश्च स एव पितृसुरक्षकः
२० ज्ञानप्रदत्वमनुस्मरन्नाह यदंघ्र्योरनुध्यानमेव समाधिस्तेन धौतया शोधितया धिया यथारुचं रुच्यनुसारेण सगुणं निर्गुणं इत्यादिभेदैः यथा
रुचं प्रतिनाय यथामतीत्यर्थः ॥२१॥ ॥ सः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द्वि॰
५४

१सर१

किंच। पुराकल्पादौ अजस्य हृदि सतीं सृष्टिविषयां स्मृतिं वितन्वता येन प्रचोदिता सती सरस्वती तस्य मुखतः किल प्रादुर्भूता। स्वानिश्वसाधारणनिरि
लक्षणानि शिक्षाद्युक्तानि यस्याः सा ऋषीणां ज्ञानप्रदानां ऋषभः श्रेष्ठः॥२२॥ इदानीं स्ववाचं श्रोतृजनाह्लादिनीं शृंगारकरुणादिशोभितां प्रार्थ
यते। भूतैरिति। स एव वा मे भिन्नलक्षणीष्ट अलंकरोतु। अन्यस्य वचसा मांस्मिन्नालंकारसंभावनाशंकातस्मांत यामिता माविः करोति। यो महद्भि
र्भूतैरिमाः पुरः शरीराणि सृष्ट्वा अमूषु पुर्षु अंतर्यामितया शेते वसति। अत्र पुरुषसमाख्यां प्रमाणयति यस्मात्पुरुष इति। अत एव यः ए

प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि। स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः प्रसीदताम्॥ २२
भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः। भुंक्ते गुणान् षोडश षोडशात्मकः सोऽलंकृषीष्ट भगवान्वचांसि मे॥
२३॥ नमस्तस्मै भगवते वासुदेवाय वेधसे। पपुर्ज्ञानमयं सौम्या यन्मुखांबुरुहासवं॥२४॥ एतदेवात्मभू राजन् नारदाय विपृ
ष्टवते। वेदगर्भोऽभ्यधात्साक्षाद्यदाह हरिरात्मनः॥२५॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे चतुर्थोऽध्यायः॥ ॥४॥

कादशेंद्रियपंचभूतरूपान् षोडश गुणान् कला भुंक्ते प्रकाशयति पालयतीति। वा तदा तात्मने परमार्थस्वरूपत्वेन हेतुः। यतः षोडशानामात्म
चेतयितास्वार्थकि। न तत्त्वजीवतत्त्वमुमुक्षुते पार्थ [illegible] श्रीव्यासं नमस्करोति सौम्या भक्ता यस्य मुखांबुरुहे आसवो मकरंदः तं॥२४॥ इ राम
दानीं प्रश्नोत्तरतया ब्रह्मनारदसंवादं स्तौति। एतदिति। उत्पत्तिसमय एव वेदा गर्भे यस्य। साक्षादपरिगृहीत्वा॥२५॥ इति द्वितीये चतुर्थोऽध्यायः॥४ ५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचमेनारदेनाथपृष्टःस्रष्टादिवक्त्रजः। हरेर्लीलाविराट्सृष्टिकालकर्मादिस्त्रिभिः। नारदायविपृष्टतेवेदगर्भोस्मिधादितुक्तं॥ तत्रनारदप्र
श्नमाह। देवदेवेति। हेभूतभावनभूतएवसर्वेषां[illegible]यतेनेनेतिज्ञानंतत्साधनंयत्तद्विजानीहिविशेषेणज्ञापयेत्यर्थः। कथंभू
तंआत्मतत्वंनितरांदर्शयतेयेनतत्॥ १ ॥ उपलक्षणंभूतविश्वमेवात्मज्ञानसाधनंभूतस्तद्विशेषंपृच्छति। यद्रूपंयेनरूप्यतेप्रकाश्यते। यदधिष्ठा
नंयदाश्रयंयतःयेनसृष्टंयत्संस्थंयस्मिन्लीयते। यत्परंयदधीनं। यच्चेतियदात्मकंसतःसत्कारणतोचेत्यर्थः। तस्मतत्वंयाथार्थ्येनतत्वतोवद॥ थ।२

नारदउवाच॥ ॥देवदेवनमस्तेस्तुभूतभावनपूर्वज॥ तद्विजानीहियज्ज्ञानमात्मतत्वनिदर्शनं॥ १॥ यद्रूपंयदधिष्ठानंयतःसृष्ट२
मिदंप्रभो। यत्संस्थंयत्परंयच्चतत्तत्वंवदतत्वतः॥ २॥ सर्वंह्येतद्भवान्वेदभूतभव्यभवत्प्रभुः। करामलकवद्विश्वंविज्ञानावसितंत
व॥ ३॥ यद्विज्ञानोयदाधारोयत्परस्त्वंयदात्मकः॥ एकःसृजसिभूतानिभूतैरेवात्ममायया॥ ४॥ आत्मनिभावयसेतानिनपराभावय
न्स्वयम्। आत्मशक्तिमवष्टभ्यऊर्णनाभिरिवाक्लमः॥ ५॥ ॥

१मि २नजानामीतिभवक्तव्यंस्याह। सर्वमिति। भूतंजातंभव्यंजनिष्यमाणंभवत्जायमानंतेषांप्रभुर्यः। अतःविशिष्टेनज्ञानेनावसितंनिश्चितं॥३॥ आत्मा
मिदंआहोतावत्त्वामेवकथयेत्याह। यतोविज्ञानंयस्यकस्तवविज्ञानेश्वरत्यर्थः। यदाधारःकस्तवाश्रयः। त्वंयत्परःयदधीनःयदात्मकःयत्स्वरूपः॥
ममतुत्वमेवस्वतंत्रपरमेश्वरइतिबुद्धिः। तवतपश्चरणेनतुपरशंकयापृच्छामीत्याह॥ सार्धैश्चतुर्भिः॥ एकःअसहायः॥४॥ आत्मनिभावयसे
१प पालंसिस्वयमेवपराभवमप्राप्नुवन्। अक्लमःश्रमरहितःयथोर्णनाभिरात्मनएवशक्तिमवष्टभ्यसृजतितद्वत्॥५॥ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वि१ — अनुकृत्वादि१

ना॰ वि॰ १५

तस्मादहं त्वय्यस्मिन्नैश्व स्मिन् परमुत्तमं चापरमधमं समं मध्यमं च। तथापि नाम मनुष्यादिरूपं तद्विपदत्वादि गुणैः तैर्नपि साध्यं तथापि
सदसतस्थूलसूक्ष्मं च किंचिद्दृष्टमस्ति तान वेद किं तु त्वमेव सर्वं भवतीति मन्ये। ८। सत्तया विधोपि भवान्तपोचरदिति यत्तेन नो स्मान्खेद
यसे मोहयसि। यतः पराशंकां ईश्वरांतरशंकां प्रयच्छसि। ९। यथैवाहं त्वयानुशासितः शिक्षितः सन्बुध्येयं तथा विशेषेण विज्ञापय। ७। प्रश्न
मभिनंदति। हे वत्स पुत्र त्वेदं विचिकित्सितं संदेहः तत्पूर्वकः प्रश्नः सम्यगित्यर्थः। यतः कारुणिकस्य तवायं प्रश्नः अत्र हेतुः। यत् यतः परम

नाहं वेद परं ह्यस्मिन्नापरं न समं विभो॥ नामरूपगुणैर्भाव्यं सदसत्किंचिदन्यतः॥ ८॥ सन्ति वान्यवरघोरं यत्तपः सुसमाहितः॥
तेन खेदयसे नस्त्वं पराशंकां प्रयच्छसि। ९॥ एतन्मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर। विजानीहि यथैवेदमहं बुध्येनुशासितः॥
७॥ ब्रह्मोवाच॥ ॥ सम्यक्कारुणिकस्येदं वत्स ते विचिकित्सितं। यदहं चोदितः सौम्य भगवद्वीर्यदर्शने॥ ९॥ नानृतं बत तत्
चापि यथा मां प्रब्रवीषि भोः॥ अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे॥ १०॥ ॥

धर्मे भगवद्वीर्यप्रकाशने वर्तितोस्मि॥ अतस्त्वं जिज्ञासुरपि मयि कृपामेव कृतवानित्यर्थः। ९॥ ननु त्वमेव भगवानित्युक्तं मया एकः सृजसि
भूतानि भूतैरिति॥ सत्यं यथा मामीश्वरत्वेन प्रभाषसे तदपि त्वं भाषणे नासत्यं अनृतं यतः कारणात्। एतावत्त्वं नावस्यभावः एतावत्त्वमेवास्ति। किं
तु मत्तः परमीश्वरमविज्ञाय ब्रूषे। अतः मादृश्यान्तवेयं चातिः नत्वबुधिपूर्वमनृतमित्यर्थः॥ यतः ईश्वरात्मम एतावत्त्वं तमविज्ञायेति वान्वयः राम १५
वर ॥ १०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्हि कोसावीश्वरस्त्वपेक्षायां न त्वां नमस्कुर्वन्नेवं कथयतीति चेन्निः। येनस्वप्रकाशेन रोचितं प्रकाशितमेव प्रकाशयामि। सृष्ट्यादिना व्यक्तं करोमि
यथार्कादयश्चैतन्यप्रकाश्यमेव प्रकाशयंतितथा च श्रुतिः। न तत्र सूर्यो भाति न चंद्रतारकं। नेमा विद्युतो भांति कुतोयमग्निः। तमेव भांतमनुभा
ति सर्वं तस्य भासा सर्वमिदं विभातीति। ११। तस्मै नमो धीमहि यस्य मायया मोहिताः संतो युष्मदादयो मां जगद्गुरुं जगत्कर्तारं वदंति तस्मै। १२। यन्माय
येति मायासंबंधे केन तस्या दुर्जयत्वे कः श्लोकस्तस्या अपि किमस्ति संसारः नैवेत्याह। महत्कपटमसौ जानातीति यस्य दृष्टिपथे स्थातुं विलज्जमानयेव

येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहम्। यथार्कोग्निर्यथा सोमो यथार्क्षग्रहतारकाः। ११। तस्मै नमो भगवते वासुदेवाय धीमहि। य
न्मायया दुर्जयया मां ब्रुवंति जगद्गुरुं। १२। विलज्जमानया यस्य स्थातुमीक्षापथेमुया। विमोहिता विकत्थंते ममाहमिति दुर्धियः। १३। तीर
१व द्रव्यं कर्म च कालश्च स्वभावो जीव एव च। वासुदेवात्परो ब्रह्मन्न चान्योर्थोस्ति तत्त्वतः। १४। ॥

या१
१ष तस्मिन्नेकार्थमकुर्वंत्या अमुया मायया अस्मदादयो दुर्धियः। अविद्यावृतज्ञाना एवं केवलं विकत्थंते श्लाघंते। अनेन यद्रूपमित्यस्य प्रश्नस्य उत्तरमु
क्तं भवति। १३। तदेवं स्वस्मादन्यं परमेश्वरं निरूप्येदानीं यदधिष्ठानमित्यादि नवप्रश्नानां स एवाधिष्ठातादिकं सर्वमित्युत्तरं वक्तुं तद्व्यतिरेकेणान्य
स्यासत्त्वमाह। १४। द्रव्यमिति। द्रव्यं महाभूतानि उपादानरूपाणि कर्म जन्मनिमित्तं। कालस्तत्क्षोभकः स्वभावस्तत्परिणामहेतुः। जीवो भोक्ता। वा
सुदेवात्परोन्योर्थो नास्ति। कारणाव्यतिरेकात्कार्यस्य। ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शा:२ वे१

तत्त्वपंचयतिवाक्यां। नारायणः परः कारणं येषां ते। अनेनैव शास्त्रयोनित्वश्रुतिपादनेनेश्वरे प्रमाणं सर्वज्ञत्वादिकं चोक्तं। देवाश्च तदंगाज्जा
ताः अतो न तद्व्यतिरिक्ताः। लोकाः स्वर्गादयः। तदानंदांशरूपत्वात्तत्साधनभूताः॥ १५॥ योगः प्राणायामादिः तपस्तत्साधनं चित्तैकाग्र्यं। ज्ञानं तत्साध्यं। गति
स्तत्फलम् अनेनैव सर्वं तदधीनमित्युक्तं॥ १६॥ तर्हि त्वं किं करोषीत्यपेक्षायामाह तस्येति। स्रष्टव्यमनर्पितेन सृष्टोऽहं सृजामि। ईक्षया कटाक्षेण। तत्र हेत
वः द्रष्टुरित्यादयः॥ १७॥ ननु कुतोयं जीवेश्वरविभागः यतस्त्वं प्रेर्यः स च प्रेरकः स्यादित्यपेक्षायां जीवेश्वरविभागहेतुमाह। त्रिभिः सत्त्वमिति निर्गु

नारायणपरा वेदा देवा नारायणांगजाः। नारायणपरा लोका नारायणपरा मखाः॥ १५॥ नारायणपरो योगो नारायणपरं तपः। ना
रायणपरं ज्ञानं नारायणपरा गतिः॥ १६॥ तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः। सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः।
सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः। स्थितिसर्गनिरोधेषु गृहीता मायया विभोः॥ १८॥ कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः।
बध्नंति नित्यदा मुक्तं मायिनं पुरुषं गुणाः॥ १९॥ स एष भगवाँल्लिंगैस्त्रिभिरेतैरधोक्षजः। स्वलक्षितगतिर्ब्रह्मन्सर्वेषां मम चेश्व
रः॥ २०॥

णस्यापीश्वरस्यैते त्रयो गुणाः बध्नंतीत्युत्तरेणान्वयः। कथंभूताः तेनैव स्वातंत्र्येण स्थित्याद्यर्थं मायया गृहीताः। वस्तुतः सर्वदा मुक्तमपि मा
यिनं मायाविषयं पुरुषं जीवं बध्नंति। कथं। कार्यमधिभूतं कारणमध्यात्मं कर्ता अधिदेवतं ते तेषां भावस्तत्त्वं तस्मिन्॥ द्रव्यं भूतानि ज्ञानं शब्देन
देवताः। क्रिया इंद्रियाणि तदाश्रयाः तेषां कारणभूताः तत्र दृभिमानेन बध्नंति॥ १९॥ अतः स एव वरूपमायः एभिर्गुणैर्लिंगैर्जीवानां आ
वरकैरूपाधिभिः सुष्ठु अलक्षिता गतिस्तत्त्वं यस्य सः। स्वैर्भक्तैरेव लक्षिता गतिर्यस्येति वा॥ २०॥ ॥ महा२



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य सृष्टिप्रकारमाह। कालमिति। कर्म जीवादृष्टं विभुः प्रभुः विविधं न वितुमिछन्॥२१॥ गुणानां व्यतिकरः क्षोभः साम्यत्यागः स्वभावतः परिणामो रूपां
तरापत्तिः पुरुषः ईश्वरः तेनाधिष्ठितत्वं त्रयाणां विशेषणं। महतः महत्तत्वस्य॥२२॥ महत्तत्वात् विकुर्वाणात् विक्रियमाणात् तस्य च क्रियाज्ञानशक्ति
त्वात् त्रिगुणत्वेपि रजःसत्वाभ्यामुपबृंहितत्वं। अहंकारस्य तावरकत्वात्तमःप्रधानत्वं। अत एवाहंकारकार्येषु तामसमाकाशादिकं बहुराजसं सात्विकं
चाल्पं। एवं तदुपाधिके पुजीवेष्वपि तथैव तामसाधिक्यं॥२३॥ स च विकुर्वन् रूपांतरं गछन् त्रैविध्यमेवाह। वैकारिकः सात्विकस्तैजसो राजसस्तामस इति।

कालं कर्म स्वभावं च मायेशो माययास्वया। आत्मन् यदृछया प्राप्तं विबुभूषुरुपाददे॥२१॥ कालाद्गुणव्यतिकरः परिणामः स्वभावतः। कर्म
णो जन्म महतः पुरुषाधिष्ठितादभूत्॥२२॥ महतस्तु विकुर्वाणात् रजःसत्वोपबृंहितात्। तमःप्रधानस्त्वभव ... द्रव्यज्ञानक्रियात्मकः॥२३॥
सोहंकार इति प्रोक्तो विकुर्वन् समभूत्त्रिधा। वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा॥२४॥ द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो
तामसादपि भूतादेर्विकुर्वाणादभून्नभः। तस्य मात्रा गुणः शब्दो लिंगं यद्द्रष्टृदृश्ययोः॥२५॥ ॥

ल१ च१
यद्भिदा यस्य भेदः द्रव्यशक्तिरित्यादीनि प्रातिलोम्येन त्रयाणां लक्षणानि द्रव्येमहाभूतारंभे शक्तिर्यस्य क्रियासु इंद्रियेषु ज्ञानेषु देवेषु शक्तिर्यस्य। हे प्रभो
वेदं शक्त॥२४॥ भूतादेरिति। तामसस्य विशेषणं। ननु तमसः मात्र प्रथमं शाब्देन वर्तीति प्रसिद्धं सत्यं। सर्वतन्नभसो मात्रा सूक्ष्मं रूपं गुण ... असाधारणः
व्यावर्तको धर्मः। शब्दाश्रयत्वान्नतु तत्स्पर्श इत्यर्थः। एवमेव स्पर्शादिष्वपि द्रष्टव्यं। शब्दस्य लक्षणं लिंगमिति। कथा यं ततरितेन केन चिद् वै र्गजो गाज इत्यु
क्ते। योगजद्रष्टायश्च तेन द्रष्टपो गजः तयोर्लिंगं बोधकं लिंगविशेषेणत्वात् यद्वा ... स्य षंठत्वं॥२५॥ ॥
त२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाद्वि०
१७

परस्मान्नभसः कारणत्वेनानुवृत्तश्छिद्रवांश्च वायुः तस्यैव लक्षणं प्राणो देहधारणं ओजः सहो बलानि । इंद्रियमनःशरीराणां पाटवानि तेषां हेतुरित्यर्थः ॥ २६
स्पर्शरूपवत्तेजः । वायुनभसोः कारणत्वेन तयोरन्वयात्स्पर्शशब्दवच्च । एवमंभसः पृथिव्याश्च परान्वयाधिक्यात् गुणाधिक्यं ॥ २७ ॥ घोषः शब्दः ॥ २८ ॥ विशे
षः पृथ्वी पृथिव्याश्च परान्वयाधिक्यात् गुणाधिक्यं ॥ २९ ॥ मनःशब्देनैव तदधिष्ठाता चंद्रोपि ग्राह्यः । अस्मेच दशदेवा वैकारिका सात्विकाहंकारकार्याः

४

नभसोथ विकुर्वाणात् अभूत्स्पर्शगुणोनिलः ॥ परान्वयाच्छब्दवांश्च प्राण ओजः सहो बलं ॥ २६ ॥ वायोरपि विकुर्वाणात्कालकर्मस्वभावतः ॥
उदपद्यत तेजो वै रूपवत्स्पर्शशब्दवत् ॥ २७ ॥ तेजसस्तु विकुर्वाणादासीदंभो रसात्मकं ॥ रूपवत्स्पर्शवच्चांभो घोषवच्च परान्वयात् ॥ २८ ॥ विशे
षस्तु विकुर्वाणादंभसो गंधवानभूत् ॥ परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः ॥ २९ ॥ वैकारिकान्मनो जज्ञे देवा वैकारिका दश ॥ दिग्वा[illegible]ना
र्कप्रचेतोश्विवह्नींद्रोपेंद्रमित्रकाः ॥ ३० ॥ तैजसात्तु विकुर्वाणादिंद्रियाणि दशाभवन् ॥ ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणस्तु तैजसौ ॥ श्रोत्रं
त्वग्घ्राण द[illegible]जिह्वा वाग्दोर्मेढ्रांघ्रिपायवः ॥ ३१ ॥ ॥

१ तेपंच १

तानाह । दिशश्च वातश्चार्कश्च प्रचेताश्चाश्विनौ चैते श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः वह्निश्चेंद्रश्चोपेंद्रश्च मित्रश्च कश्च प्रजापतिः एते
पंच वाक्पाणिपादपायूपस्थानामधिष्ठातारः ॥ ३० ॥ यतो ज्ञानशक्तिर्बुद्धिः क्रियाशक्तिः प्राणश्च तैजसौ कार्यौ ॥ अतो ज्ञानक्रियाविशेषरूपाणीं
द्रियाण्यपि तैजसानि वक्तव्यानीत्यर्थः ॥ तानाह श्रोत्रमिति दोःपाणिः मेढ्रं उपस्थं क्रमस्त्वत्र न विवक्षितः ॥ ३१ ॥ ॥ एम १७

द१ ना२ हैं२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शरीरस्य १

य

एवं कारणसृष्टिमुक्त्वा कार्यसृष्टिमाह। यदा एते असंगताः अमिलिता आसन्। अत एव यदा आयतनस्य निर्माणे न शेकुः। ३२ तदा सदसत्त्वं प्रधानगुणभावमुपादाय स्वीकृत्य उभयं समष्टिव्यष्ट्यात्मकं शरीरं ससृजुः। ३३ कालकर्मस्वभावानधिष्ठाय स्थितः जीवयतीति जीवः परमात्मा अजीवमचेतनं अजीवयत् चेतयति स्म। ३४ निर्भिद्य पृथक्कृत्य स्थित इत्यर्थः। ३५ तदवयवैर्लोकविस्तारमाह यस्येति कट्यादिरिति। उरुमूलयोः पश्चाद्भागः जघनं पुरोभागः अधःसप्तलोकानतलादीन् ऊर्ध्वं भूरादीन् सप्त ३६ वर्णानां तत उत्पत्तिं दर्शयति पुरुषस्येति ब्रह्म ब्राह्मणः मुखमिति का भा०३

यदैते संगता भावा भूतेन्द्रियमनोगुणाः। यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम॥ ३२ तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः। सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः॥ ३३ वर्षपूगसहस्रान्ते तदण्डमुदकेशयं। कालकर्मस्वभावस्थो जीवोजीवमजीवयत्॥ ३४ स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः। सहस्रोर्वङ्घ्रिबाह्वक्षः सहस्राननशीर्षवान्॥ ३५ यस्येहावयवैर्लोकान् कल्पयन्ति मनीषिणः। कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः॥ ३६ पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः। ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रो व्यजायत॥ ३७ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः। हृदा स्वर्लोक उरसा महर्लोको महात्मनः॥ ३८ ग्रीवायां जनलोकोऽस्य तपोलोकः स्तनद्वयात्। मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः॥ ३९॥ ॥

र्यकारणयोरभेदविवक्षया एकां बाहव इति क्षत्रं क्षत्रियः। ३७ इदानीमुपासनार्थं लोककल्पनाभेदानुदर्शयन् सप्तलोकपक्षमाह द्वाभ्यां भूर्लोकः पातालमारभ्य पद्भ्यां कटिपर्यन्ताभ्यां। ३८ स्तनद्वयादिति उपासनार्थत्वादूर्ध्वाधोभाववैपरीत्यं न दोषः यद्वा अनन्तशीर्षं कुर्वन् यदा दृष्टद्वयं तस्मादित्यर्थः। ब्रह्मलोकः वैकुण्ठाख्यः सनातनः नित्यः न तु सृज्यप्रपंचान्तर्वर्तीत्यर्थः। ३९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰टि॰ २८

इदानीं चतुर्दशलोकपक्षं दर्शयति ॥ तत्र जघनादिभिर्भूरादयः पूर्वोक्ता एव सप्त कट्यादिभिः ॥ अधःसप्तलोका नाहतत्कट्यामितिद्वाभ्यां ॥ भुवंहरिन्न पं
कनिवासत्वात् ४० त्रिलोकपक्षमाह भूर्लोकः पातालादिसहितः ४२ ॥ इति द्वितीये पंचमः ॥ षष्ठे विराड्विभूतिश्च श्रीकाध्यात्मादिनेदितः ॥ इदीकृतंच
पूर्वोक्तं सर्वं पुरुषस्य कृतः ॥ इदानीं वैराजस्य विभूतिः सप्रपंचमनुवर्ण्यते ॥ वाचामस्मदादिवागिंद्रियाणां तदधिष्ठातुर्वह्नेश्चतस्य मुखं क्षेत्रमुत्पत्तिस्था

तलकट्यां चातलं क्लृप्तमूरुभ्यां वितलं विभोः ॥ जानुभ्यां सुतलं शुद्धं जंघाभ्यां तु तलातलं ॥ ४० ॥ महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलं ॥
२८ पातालं पादतलत इति लोकमयः पुमान् ॥ ४१ ॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ॥ स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना
४२ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे पंचमोऽध्यायः ॥ ब्रह्मोवाच ॥ ॥ वाचां वह्नेर्मुखं क्षेत्रं छंदसां सप्त धातवः ॥ हव्यकव्यामृ
तान्नानां जिह्वा सर्वरसस्य च ॥ १ ॥ सर्वासूनां च वायोश्च तन्नासे परमायने ॥ अश्विनोरोषधीनां च घ्राणो मोदप्रमोदयोः ॥ २ ॥ रूपाणां तेज
सां चक्षुर्दिवः सूर्यस्य चाक्षिणी ॥ कर्णौ दिशां च तीर्थानां श्रोत्रमाकाशशब्दयोः ॥ तद्गात्रं वस्तुसाराणां सौभगस्य च भाजनं ॥ ३ ॥ ॥ ॥

नं ॥ छंदसां गायत्र्यादीनां सप्तानां तस्य सप्त धातवः त्वगादयः ॥ हव्यं देवान्नं कव्यं पितॄणां अमृतं तत् यज्ञशेषो मनुष्याणां तेषां अन्नानां सर्वरस स॰१
स्य मधुरादेः षड्विधस्य च कारणं रसनेंद्रियस्य तदधिष्ठातुर्वरुणस्य चैतस्य जिह्वा क्षेत्रमुत्पत्तिस्थानं एवं सर्वत्रानुक्रमुत्रेयं १ सर्वासूना
नामस्मदादिप्राणानां तस्य नासे नासारंध्रे परमायने क्षेत्रे मोदप्रमोदयोः सामान्यविशेषगंधयोः घ्राणः घ्राणेंद्रियं परमायनं २ रूपाणां तेजसां
रूपप्रकाशानां चक्षुरिंद्रियं अक्षिणी नेत्रगोलकौ ॥ सर्वत्र षष्ठ्यंतानां प्रथमांते क्षेत्रे द्रष्टव्यं कर्णौ श्रोत्राधिष्ठाने श्रोत्रमिंद्रियं तस्य गात्रं शरीरं वस्तूनां ये राम
सारांशास्तेषां भाजनं स्थानं ३ ॥ ॥ ति२ २प्रमोद२ २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्पर्शकस्पर्शस्य वायोश्चेत्यर्थः। सर्वस्य मेधस्य यज्ञस्य। उद्भिज्जातीनां सर्ववृक्षाणां ये हविर्द्रव्यैः सम्यक् साधिताः तेषामेव वा। ४। केशाः मेघानां हेतवे पू
र्वं तु लोके। श्मश्रूणि विद्युतां। पादकरनखानि शिलालोहानामिति। सा हरण्या द्वयं। क्षेमकर्मणां पालनकर्तृणां। ५। विक्रमः पादन्यासो भूरादिलोका
नां त्रयाणां तस्याश्रयः। भूरादि शिक्षणानाम व्ययत्वात् षड्धातुक। क्षेमो लब्धस्य रक्षणं शरणं त्वयाज्ञत्वानां सर्वेषां कामानां वरस्य वरणस्यापि हरेरंघ्रिरास्प
दम्। ६। वीर्यस्य शुक्रस्य शिश्नो धिष्ठानं। उपस्थस्त्विंद्रियं। प्रजात्मानंदः संतानार्थं संभोगजन्येन निर्वृतिः। तापहानिस्तस्याः। ७। परिमोक्षस्य मलत्या

त्वगस्य स्पर्शो वायोश्च सर्वमेधस्य चैव हि। रोमाण्युद्भिज्जातीनां यैर्वा यज्ञस्तु संभृतः। केशाश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युतां। बाहवो
लोकपालानां प्रायशः क्षेमकर्मणां। ५। विक्रमो भूर्भुवः स्वश्च क्षेमस्य शरणस्य च। सर्वकामवरस्यापि हरेश्चरण आस्पदं। ६। अपां वीर्य
स्य सर्गस्य पर्जन्यस्य प्रजापतेः। पुंसः शिश्न उपस्थस्तु प्रजात्यानंदनिर्वृतेः। ७। पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद। हिंसाया निर्ऋ
तेर्मृत्योर्निरयस्य गुदः स्मृतः। ८। पराभूतेरधर्मस्य तमसश्चापि पश्चिमः। नाड्यो नदनदीनां तु गोत्राणामस्थिसंहतिः। ९। अव्यक्तरस
सिंधूनां भूतानां निधनस्य च। उदरं विदितं पुंसो हृदयं मनसः पदं। १०। धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च। विज्ञानस्य च सत्वस्य पर
स्यात्मा परायणं। ११॥

गस्य पायुरिंद्रियं। गुदः स्थानं निर्ऋतेरलक्ष्म्याः। ८। तमसोऽज्ञानस्य पश्चिमः पृष्ठभागः। गोत्राणां गिरीणां अस्थिसंघातः। ९।
अव्यक्तं प्रधानं रसः अन्नादिसारः। सिंधवः समुद्रास्तेषां। निधनस्य लयस्य उदरं पदं स्थानं विदितं ज्ञातमिति। मनसः अस्मदादिलिंगशरीरस्य। १०। तु
भ्यं तव कुमाराणां सनकादीनां भवस्य श्रीरुद्रस्य। आत्मा चित्तं परमायनं। ११॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न१ स्य२ सी

ना॰वि॰ १९ स्वेतावत्सरमेश्वराज्ञानंविश्वंततौमित्रंयथाण्डलंसुवर्णान्विष्टथक्‌ [illegible]सर्वेंदियंतामर्वप्रकाशकोनित्यमुक्तस्तस्यापिद्युक्तं एत देवपुरुषसूक्ता
र्थकथनेनदढयति। तत्रसहस्रशीर्षेत्यर्धर्चेब्राह्मणोस्यमुखमौदिसादेश्वरकचतुष्टयस्यार्थः पूर्वाध्यायएवदर्शितः पुरुषएवेदंसर्वमित्यस्यार्थंदर्श
यति। अहंभवानितिसार्धेस्त्रिभिः। तेत्र्यप्रजाश्मेसनकादयः मरीचादयश्च। १३। जलंचस्थलंचननश्चौकांसियेषांते [illegible]नौकस इतिसंधिराषः
१४। सर्वंपुरुषएवनततः पृथगित्यर्थः। प्रपंचेनतस्यापरिच्छेदंवक्तुंमहमिमित्यस्यार्थमाह। तेनपुरुषेणविश्वमिति। महिमपदस्यार्थंवितत्तिमितिद

१८ अहंभवान्भवश्चैवयेश्मेमुनयोग्रजाः। सुरासुरनरानागाःखगामृगसरीसृपाः॥ १३॥ गंधर्वाप्सरसोयक्षाप्रेतभूतगणोरगाः। पशवःपि
तरःसिद्धाःविद्याध्राश्चारणाद्रुमाः॥ १४॥ अन्येचविविधाजीवाजलस्थलनभौकसः। ग्रहर्क्षकेतवस्तारास्तडितस्तनयित्नवः॥ १४॥ सर्वं
प२ पुरुषएवेदंभूतंभव्यंभवच्चयत्‌। तेनेदमावृतंविश्वंवितस्तिमधितिष्ठति॥ १५॥ स्वधिष्ण्यं प्रतपन्प्राणोबहिश्चप्रपतत्यसौ॥ एवं
विराजंप्रतपंस्तपत्यंतर्बहिःपुमान्‌॥ १६॥ सोमृतस्याभयस्येशोमर्त्यमत्त्रंयदत्यगात्‌ ॥

वितस्तिपदस्यार्थस्तिशब्दस्य। सचवितस्तिमधिकंव्याप्यतिष्ठतीत्यधिकमात्रेविव[illegible]तंनप्रमाणं। अनुपयोगादपरिच्छिन्नत्वाच्च। १५। एतस्मिन्दृष्टांत
माह। असौप्राणः आदित्यः असौवाआदित्यइतिश्रुतेः। स्वधिष्ण्यंमंडलंप्रकाशयन्यथाबहिश्चप्रकाशयति। एवंविराट्देहंप्रकाशयन्ब्रह्मांडमंत
र्बहिश्चप्रकाशयति। १६। निर्मुक्तत्वंदर्शयितुंउतामृत[illegible]त्वस्येत्यस्यार्थमाह सइति। अमृतस्येतिमंत्रगतामृतपदव्याख्या। अभयेनेति। पदंविनक्तिअ
तयेनव्याचष्टे। मर्त्यंमरणधर्मकंअन्नंकर्मफलंयस्मादत्यगादतिक्रांतवान्‌। अतोनकेवलंसर्वोकिः किंतुअमृतत्वस्यनिजानंदस्यापीश्वरइत्यर्थः। राम १९
प्राण३ स१
॥१६ ३असौप्राणः आत्माजीवः स्वमधिष्ठानंप्रकाशयन्बहिश्चप्रकाशयति३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्व

प्रपंचात्मकस्य कृतो नित्यमुक्तत्वमित्याशंक्य तत्परिहाराय एतावानस्येत्यस्यार्थमाह महिमेति। प्रपंचात्मकस्याप्यमृतेशानत्वमित्येष महिमा पुरुषस्य यः॥ अ मा१
ते पारः प्रपंचान्निर्मुक्तत्वादिति भावः मंत्रेण च एतावानस्य महिमा विभूतिः सत्वसंख्यायान् महत्तरशक्तिवत्तायमेवार्थ उक्तः। तदेवमीश्वरो नित्यमुक्त इत्यु
क्तं तदाश्रितानां भूतानां बंधमोक्षौ व्यवस्थयेति दर्शयन् पादोस्य विश्वा भूतानीत्यस्यार्थमाह पादेष्विति। तिष्ठंत्यस्मिन्निति स्थितियो भूरादिलोकाः॥ ते पादा
इव पादाः स्वांशायस्यसः। स्थितिपात्तस्य पादेष्वंशभूतेषु लोकेषु सर्वान्जीवान् विदुः मंत्रे पादोस्य विश्वा भूतानीति समानाधिकरण्यमधिष्ठानाश्च
पादाः स्वांशायस्यस॥ स्थितिपात्तस्य पादेष्वंशभूतेषु लोकेषु सर्वान्जीवान् धिष्ठेयानेद विवक्षया। पाद इत्येकवचनं च सामान्याभिप्रायेणेति व्याख्या
नं भवति १७ भूतेषु फलवैचित्र्यं दर्शयन् त्रिपादस्यामृतं दिवीत्यस्यार्थमाह। अस्येश्वरस्य संबंधि पादमृतं नित्यसुखं दिवि ऊर्ध्वलोकेषु नत्रिलोक्या

महिमैष ततो ब्रह्म सुरुषस्य पूरुषस्य यः। पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः॥ १७॥ अमृतं क्षेममभयं त्रिमूर्ध्नो धायि मूर्धसु। पादास्त्र
योबहिश्चासन्नप्रजानां यत्राश्रमाः॥ १८॥ मित्यर्थः॥ तदेवं त्रिपाद्ब्रह्मणोक्तं त्रैविध्यं दर्शयन्नाह। त्रयाणां लोकानां मूर्धमिह महर्लोकिस्त्वस्य मूर्धनि स्तु

पतितन लोकास्तेषु यथाक्रममृतादिकं त्र्यधायि निहितं। तत्र त्रिलोक्यां नश्वरमेव सुखं॥ महर्लोकस्य कृमुक्तिस्थानत्वेपि कल्पांते तत्रत्यानां र
स्थानत्यागाद्भाविना त्रिसुखं। जनलोके त्वमृतममविनाशि सुखं यावज्जीवं स्वस्थानापरित्यागात् किंतु महर्लोकवासिनां कल्पांते त्रिलोक्यां लोकदाहो
ष्मपीडितानां तदा तत्र गमनात् क्षेमदर्शनमभ्यंतरलोके तस्मानावात् क्षेममेव वक्ष्यतीति हि त्रिलोक्यां दह्यमानायां शक्याः संकर्षणाग्निना। यान्तु अपरा
महर्लोकात् जनलोकमागत्य योद्धितां गतिः। सत्यलोके त्वभयं मोक्षः तत्रत्यासन्नैः एतदेव वैचित्र्यमधिकारिभेदेनोपपादयन् त्रिपादूर्ध्व इत्यस्यार्थमाह। नन
...यंते पुत्रादिरूपेणेत्यप्रजाः नैष्ठिकब्रह्मचारिवानप्रस्थयतयस्तेषामाश्रमाः त्रिलोक्याः बहिरासन्॥ १८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१मेध१

ना०द्वि० १२० गृहमेधाः यस्मादबृहद्व्रतः ब्रह्मचर्यव्रतरहितः । अयं चाधिकारभेदेन एकस्यैव । स्थानभेदेन न तु स्वतंत्रं विषय इति दर्शयंस्ततो विष्वग्भिन्नस्या
र्थमाह । विविधं सृत्यं चक्रमे इति विष्वङ् पुरुषः क्षेत्रज्ञः सृती मार्गो दक्षिणोत्तरौ । विचक्रमे चलतिस्म । कथं तत्ते सृती साशनेनोगापवर्गप्राप्तिसाधनत्व ना न२।२
ते अत्र हेतुत्वेन पुनर्विशेषणं । यद्यतः अविद्या कर्मरूपा एका विद्या च तत्साधनोपासनारूपान्या ॥१९॥ तदेवं विराडंतत्वत्रिनिं फलवैचित्र्यमुक्त्वा
२स्ये तत्कारणमीश्वरस्य तद्विलक्षणं पंदर्शयितुं तस्यादिराड्जायते तस्यार्थमाह । यस्मादंडं जज्ञे तत्रैव भूतेंद्रियगुणात्मको विराड् जज्ञे स ईश्वरः । तद्विश्वं वि वे२
राड्देहद्रव्यमंडं चातिक्रांतवान् । सूर्य इवेति पूर्वोक्त एव दृष्टांतः ॥२०॥ नन्वेवं पुरुष एव चेत्सर्वं तर्हि यज्ञस्य तत्साधनानां चाप्रसिद्धत्वात्य

अंतस्त्रिलोक्यास्त्वपरो गृहमेधोऽबृहद्व्रतः ॥१९॥ सृती विचक्रमे विष्वङ् साशनानशने उभे । यदविद्या च विद्या च पुरुषस्तूभयाश्रयः ॥१९॥
यस्मादंडं विराड् जज्ञे भूतेंद्रियगुणात्मकः । तद्द्रव्यमत्यगाद्विश्वं गोभिः सूर्य इवातपन् । यदास्य नाभ्यान्नलिनादहमासं महात्मनः
॥ नाविदं यज्ञसंभारान् पुरुषावयवादृते ॥२१॥ तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः । इदं च देवयजनं कालश्चोरुगुणान्वितः ॥२२॥
वस्तून्योषधयः स्नेहा रसलोहमृदो जलं ॥२३॥

सैः पुरुषाराधनं न सिध्येदित्याशंक्य तस्य परिहाराय यज्ञस्य पुरुषेणाहविश्चेत्यादिमंत्रार्थं संगृह्य दर्शय
तियदेत्यादिना ॥ अस्येति विराड्तर्यामिणः । तस्य एवं कृतत्वात् । नानोन्नवं नास्तं तस्मात् । यज्ञस्य संभारान्साधनानि नापश्यम् ॥२१॥ तदा तेषु संना
हेषु साध्येषु सत्सु पुरुषावयवैरेव ते सभाराः संभृता इति चतुर्भिर्नाप्त्य । वनस्पतयो यूपाः । देवयजनं यज्ञभूमिः । इदं चेति निवनाद्यज्ञार्हस्थाने उपविष्टस्य राम
यती तिगम्यते । बहुगुणानि तो वसंतादिकालः ॥२२॥ वस्तूनि पात्राणि । ओषधयो व्रीह्यादयः स्नेहा घृतादयः रसाः मधुरादयः सुवर्णादीनि २०
लोहानि मृद ॥२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हौत्रा।१ २ [illegible]

चातुर्होत्रं दिकंकर्म्म २३ नामधेयानिज्योतिष्टोमादीनि। ऋगादीनामुक्तत्वात् मंत्राः इति स्वाहाकारादयः देवतानामनुक्रमः उद्देशः कल्पो बौधायना दिकर्मपद्धतिग्रंथः अनेनाहंयक्ष्ये इति संकल्पः तंत्रमनुष्ठानप्रकारः २४ गतयो विष्णुक्रमाद्याः मतयो देवताध्यानानि। कृतस्य भगवति समर्प्पणं २५ संभृताः संपादिताः संभारा येन सोहं तेनैव अनेन यज्ञेन यज्ञमयजं तेतिमंत्रार्थः स्फुटितः २६ तेन देवा अयजंतेत्यस्यार्थं संक्षिप्य पंचं दर्श

ऋचो यजूंषि सामानि चातुर्होत्रं च सत्तम २३ नामधेयानि मंत्राश्च दक्षिणाश्च व्रतानि च देवतानुक्रमः कल्पः संकल्पस्तंत्रमेव च २४ गतयो मतयश्चैव प्रायश्चित्तं समर्प्पणं पुरुषावयवैरेते संभाराः संभृता मया २५ इति संभृत संभारः पुरुषावयवैरहं तमेव पुरुषं यज्ञं तेनैवायजमीश्वरं २६ ततस्ते भ्रातर इमे प्रजानां पतयो नव अयजन् व्यक्तमव्यक्तं पुरुषं सुसमाहिताः २७ ततश्च मनवः काले ईजिरे ऋषयोपरे पितरो विबुधा दैत्या मनुष्याः क्रतुभिर्विभुं २८ नारायणे भगवति तदिदं विश्वमाहितं गृहीतमायोरुगुणः स र्गादावगुणः स्वतः २९ ॥

यति। ततश्चित्रार्थं। व्यक्तं इंद्रादिरूपेण अव्यक्तं स्वतः अनेन पुरुषं जातमग्रत इत्यस्यार्थो दर्शितः २७ काले स्वस्वावसरे २८ यदधिष्ठान मि ति तत्प्रश्नोत्तरार्थमुपसंहरति नारायण इति। आहितं अधिष्ठितं भगवत्येवेत्यर्थः स्वतो गुणः सर्गादौ गृहीता माययात्त रजोगुणः येन तस्मिन् २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना·धि
२१

ना२

दध्वरस्त्वमित्येतत्प्रश्नोत्तरं यदुक्तं स एष भगवान् सर्वेषां मम चेश्वर इति तदुपसंहरति। सृजामीति। पालनं तु स्वयमेव करोतीत्याह। विश्वमिति पुरुष
रूपेण विष्णुरूपेण त्रिशक्तिर्मायातो धरतीति तथा सः। ३०। यच्चेदं विश्वं यदात्मकं च त्वमित्येवमादि सर्वप्रश्नानां सामान्येनोत्तरं यदुक्तं वासुदेवात्प
रो ब्रह्मन् न चान्योऽर्थोऽस्ति तत्वत इति पुरुष एवेदं सर्वमिति श्रुत्या च यद्दृढीकृतं तदुपसंहरति। इतीति। कार्यकारणात्मकं नान्यत् भगवतः स

ले१

सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः। विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक्॥ ३०॥ इति तेऽभिहितं तात यथेदमनुपृच्छसि। नान्य
भगवतः किंचिद्भाव्यं सदसदात्मकं॥ ३१॥ न भारती मेऽङ्ग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः। न मे हृषीकाणि पतन्त्यसत्पथे
यन्मे हृदौत्कंठ्यवता धृतो हरिः॥ ३२॥ सोऽहं समाम्नायमयस्तपोमयः प्रजापतीनामभिवंदितः पतिः। आस्थाय योगं निपुणं समाहि
तस्तन्नाध्यगच्छं यत आत्मसंभवः॥ ३३॥ ॥

कार्यकारणात्मकं भगवतोऽन्यन्नास्तीत्यभिहितं। ३१। यदुक्तं एतावत्त्वं यतो हि मे तमविज्ञाय मामीश्वरं प्रब्रूषीति
तदुपपाद्योपसंहरति। यत् यस्मान्मे मया औत्कंठ्यं भगवत्युद्रेकः तौत्कंठ्यकेन हृदा हरिर्धृतः ध्यातः। अंग हे नारद। अतः मे वाङ्मन इंद्रियाणां त्रयं यः सत्या
र्थः न त्वसत्यभावेनेत्यर्थः। ३२। अत्र स्वानुभवमेवान्वयव्यतिरेकाभ्यां प्रमाणयति द्वाभ्यां। सोऽहं समाम्नायादिभिः सर्वोत्कृष्टोऽपि योगमाश्रित्यापि यतन्त्रा
त्मनो मम संभवो जन्म तमेव न ज्ञातवान्। कुतोऽन्यस्य वा... एतच्च तृतीयस्कंधे प्रपंचेन वक्ष्यते। ३३॥ ॥

चु३

राघ
२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदासमीयुषांशरणागतानांसंसारनिवर्त्तकंमंगलावहंसु[?]स्त्ययंचतस्यचरणंनतोऽस्मितनोऽचिंत्यमहिमत्वेनज्ञातवान्स्मीतिकेमुत्पन्नायेनाहयो
हीति।स्वमा[?]याविस्तारंयःस्वयमपिपर्यगात्परिच्छेत्तुंनिषेधे।एतावानितिनज्ञातवानित्यर्थः।अपरेकुतोज्ञीनीयुःतस्यचरणंनतोऽस्मीतिपूर्वेणसं
बंधःननुसर्वज्ञःकथंनजानातिअनंतत्वादितिदृष्टांतेनाह।यथास्वस्यांतंनभोनाप्नोतितद्वत्।नहि[?]खपुष्पादर्शनंसर्वज्ञत्वंविहंतीतिभावः।तथाच
वसति।श्रुपतएवतेनयमुरंतमनंततयात्मानमपियदंतरांउनिचयानतुसावरणज्ञ[?]स्याशिष्कनिश्च।योस्याध्यक्षःपरमेव्योमन्सोअंगवेदयदि

नतोस्म्यहंतच्चरणंसमीयुषांभवच्छिदंस्वस्त्ययनंसुमंगलं।योह्यात्ममायाविभवंस्मपर्यगाद्यथानभःस्वांतमथापरेकुतः।३४।नाहं
नयूयंयदृतांगतिंविदुर्नवामदेवःकिमुतापरेसुराः।तन्माययामोहितबुद्धयस्त्विदंविनिर्मितंचात्मसमंविचक्ष्महे।३५।यस्यावता
रकर्माणिगायंतिह्यस्मदादयः।नयंविदंतितत्त्वेनतस्मैभगवतेनमः।३६।सएषआद्यःपुरुषःकल्पेकल्पेसृजत्यजः।आत्मात्मन्यात्म
नात्मानंसंयच्छतिचपातिच।३७॥ ॥

वानवेदेति।३४।एतस्यपंचयतिनाहमितिद्वाभ्यां।वामदेवोरुद्रः।यस्यऋतांगतिंपरमार्थस्वरूपंकिंत्विदंप्रपंचरूपंतस्यमायाविनिर्मितंविचक्ष्महे
विद्मः।तदप्यात्मसमंस्वज्ञानानुरूपमेवनतुतत्त्वतः।मोहितबुद्धयइत्यस्ययंतदज्ञानेप्रपंचाज्ञानेचहेतुः।३५।ननुसर्वैरपितंवर्णयंतोदृश्यंतेतत्राह
यस्येति।३६।अवतारकर्माणिसंक्षेपतोदर्शयति।सएषआद्यो[?]भगवान्यःपुरुषावतारःसनसृष्ट्यादिकरोति।आत्मात्मन्यात्मनात्मानमिति।
कर्त्राद्यधिकरणंसाधनंकर्मचस्वयमेवेत्यर्थः।पुरुषावतारःसृष्ट्यादीनिकर्माणीतिसंक्षेपोक्तिः।३७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सां°वि
२२

ऽयं विंदंति नत्वेनेत्युक्तं किं तत्त्वमित्यपेक्षायामाह ज्ञानं केवलं सत्यं तत्त्वं। घटाद्याकाराद्याकारवृत्तिज्ञानमवच्छेदार्थं विशेषणानि विशुद्धं विष
याकारशून्यं। यतः प्रत्यक् सर्वांतरं ॥ अत एव सम्यक् संदेहादिरहितं ॥ अवस्थितं स्थिरं। यतो निर्गुणं गुणकार्यं हि व्यतिकरात्तं चलं न भवति ॥ यद्यपि
वृत्तिज्ञानमपि स्वरूपज्ञानमेवेति तन्वांचस्मादिदोषयुक्तं तथाप्यंतःकरणवृत्तिदोषैस्तथा तथा न भवतीति व्यवच्छिद्यते। एतैरेव विशेषणैः सत्यत्वमि

॥ ॥

विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितं ॥ सत्यं पूर्णमनाद्यंतं निर्गुणं नित्यमव्ययम् ॥३८॥ क्रू पे विंदंति मुन
यः प्रशांतात्मेंद्रियाशयाः ॥ यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतम् ॥३९॥ ॥

तं।

तिसमर्थितं। किंच यद्विकारवत्तत्तदसत्यं दृष्टं ॥ न चास्य जन्मादयः षड्विकाराः संतीत्याह। अनाद्यंतं जन्मनाशरहितं ॥ अत एव जन्मानंतरास्तित्वल
क्षणोपि विकारोनास्ति ॥ वृ द्धि विपरीणामापक्षया अत्र न संति यतः पूर्णं सर्वत्र हेतुः ॥ नित्यमव्ययं च नित्यं सर्वदा वैतप्रतीतिसमये ऽपि परमार्थतो ऽव्य
यमिति ॥३८॥ अत्र विश्वदन्तु न वंप्रमाणयति ॥ हि रूपेनारद। प्रशांतात्मेंद्रियाशयाः प्रसन्नदेहेंद्रियमनसो यदा भवंति तदा विंदंति ॥ अन्यदा तद्ज्ञाने
ना कारणमाह ॥ यत्स्व तदेव प्रकाशमानमेवासत्तर्कैर्विप्लुतं स्यात्तदा तिरोधीयतेति ॥३९॥ ॥

राम
२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्रवतारानूविस्तारेणाह आद्यइत्यादियावत्समाप्तिः परस्यनूम्नः पुरुषः प्रकृतिप्रवर्त्तकः। यस्यसहस्रशीर्षेत्युक्तोलीलाविग्रहः सआद्योवतारः वृक्ष
तिहिभूतैर्यदापंचभिरात्मसृष्टैः पुरंविराजंविरचय्यतस्मिन्‌। स्वांशेनाविष्टः पुरुषाभिधानमवापनारायणआदिदेवः। यथोक्तं। विष्णोस्तुत्रीणिरूपा
णि [illegible] पुरुषाख्यान्ययोविदुः। प्रथमंमहतःस्रष्टृद्वितीयंत्वंडसंस्थितं। तृतीयंसर्वभूतस्थंतानिज्ञात्वाविमुच्यतइति। यद्यपिसर्वेषामविशेषे
णावतारत्वमुच्यते। तथापिकालस्वभावश्चसदसदितिकार्यकारणात्मिकाप्रकृतिश्चएताःशक्तयः। मनआदीनिकार्याणि। ब्रह्मादयोगु

आद्योवतारःपुरुषःपरस्यकालःस्वभावःसदसन्मनश्च॥ द्रव्यंविकारोगुणइंद्रियाणिविराट्‌स्वराट्‌स्थास्नुचरिष्णुभूम्नः॥४०॥ अ
हंभवोयज्ञइमेप्रजेशादक्षादयोयेभवदादयश्च॥ स्वर्लोकपालाःखगलोकपालानृलोकपालास्तललोकपालाः॥४१॥ गंधर्वविद्याध
रचारणेशायेयक्षरक्षोरगनागनाथाः॥ येचाऋषीणामृषभाःपितॄणांदैत्येंद्रसिद्धेश्वरदानवेंद्राः॥४२॥ अन्येचयेप्रेतपिशाचभूतकू
ष्मांडयादोमृगपक्ष्यधीशाः॥ ॥

य१ न१

णावताराः। दक्षादयोविभूतयइतिविवेक्तव्यं। मनःमहत्तत्त्वं। द्रव्यंमहाभूतानिक्रमोत्रैविवक्षितः। विकारोहंकारः। गुणाःसत्त्वादिः। विराट्‌समष्टिशरी
रं। स्वराट्‌वैराजः। स्थास्नुस्थावरं। चरिष्णुजंगमं। चव्यष्टिशरीरं॥४०॥ अहंब्रह्मा। भवोरुद्रः। यज्ञोविष्णुः। दक्षादयोयइमेप्रजेशाः। तललोकेपालाः पाता
लाधिपतयः॥४१॥ गंधर्वादीनामीशाः। यक्षादीनांनाथाः। रक्षोरगेतिसंधिरार्षः। ऋषीणांचपितॄणांचश्रेष्ठाः॥४२॥ प्रेतादीनामधीशाः॥४३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द्वि० किं बहुना यत्किंचिद्भगवदादिनं सर्वं परमेव तत्त्वमित्यन्वयः। भगवत्त्वम् ऐश्वर्ययुक्तं। महत्त्वं तत्तेजोयुक्तं। ओजः सहसी इंद्रियमनःशक्ती तद्युक्तं बलं
२३ दाक्ष्यं श्रीः शोभा ह्रीः कर्मजुगुप्सा विभूतिः संपत्तिः। आत्मा बुद्धिः तद्युक्तं। अर्णो विस्मः। अद्भुतानाम् आश्चर्यवर्णमित्यर्थः। रूपमेव स्वरूपं रूपवत् अरूपं
च यत्तत्सर्वं परं तत्त्वं तद्विभूतिरित्यर्थः॥४४॥ मुख्यसत्त्वावतारान्वक्तुमाह। प्राधान्यतश्चेति। अत्र सत्कथामृतवर्णैकर्णयोः कषायाः मलास्तान्
शोषयंतीति भातान् सुपेशान् सुंदरान् मकारलोपश्चार्षः। हेरुपेते तु स्वयं अनुक्रमिष्ये तदनुक्रमम् अमृतं त्वया पीयतामित्यर्थः। यद्वा पीय

यत्किंच लोके भगवन्महस्वदोजः सहस्वद्बलवत्क्षमावत्। श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परं रूपवदस्वरूपं॥४४॥ प्राधान्यतो
यानृष आमनंति लीलावतारान्पुरुषस्य भूम्नः। आपीयतां कर्णकषायशोषाननुक्रमिष्ये त इमान्सुपेशान्॥४५॥ ॥इ
ति श्रीभागवते महापुराणे द्वितीयस्कंधे षष्ठोध्यायः॥ ॥ब्रह्मोवाच॥ यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्क्रौडीं तनुं सकल
यज्ञमयीमनंतः। अंतर्महार्णव उपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्रधरो ददार॥१॥ ॥

तामिति शेषः। तं ते आपिबतां कर्णकषायशोषा
नित्यर्थः॥४५॥ द्वितीये षष्ठः॥ सप्तमे भगवल्लीलावतारा ब्रह्मणोदिताः॥ नारदाय तु तत्कर्मप्रयोजनगुणैः सह। यत्रेति। क्षितितलोद्धरणार्थं वि ५२
राहीं तनुं बिभ्रत्सन्नुद्यतोनंतः। तदा तं सुप्रसिद्धं हिरण्याक्षं दंष्ट्रया ददार। दंष्ट्रया क्षितितलोद्धरणायोद्यत इत्यन्वयः। अन्यथा करणे कर्म राम
ण्युभे हन्तीति वक्ष्यमाणोक्तिविरोधः। यद्वा। तत्रैवं व्याख्येयं। करणे इति करवत्साधनवदग्रे वर्तमानया दंष्ट्रया हन्तीति॥१॥ ॥ ॥ २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुज्ञावतारमाह। रुचेः प्रजापतेः सकाशात्तद्भार्यायामाकूतेः सूनुः सुतः यज्ञोनामजातः। सच स्वभार्यायां दक्षिणायां सुयमान्देवानजनयत्तस
एवेंद्रः सन् यदार्त्तिमहरत्तदा पूर्वं सुयज्ञ इत्युक्तोपि पश्चात् स्वमनुना मातामहेन हरिरित्युक्तः। अनेन देवोत्पादनं लोकत्रयार्त्तिहरणं च त
स्य कर्मदर्शितं। एवं सर्वत्रावतारस्य कर्म विज्ञेयं ॥२॥ कपिलावतारमाह। कर्दमप्रजापतेर्गृहे च तद्भार्यायां देवहूत्यां जज्ञे नवभिः स्त्रीभिर्भगिनीभिः सह
। सच स्वमात्रे आत्मगतिं ब्रह्मविद्यां उक्तवान्। यया आत्मगत्या सा चात्मनः शमलं मलिनीकरणं गुणसंगरूपं पंकं अस्मिन्नेव जन्मनि विधूय कपिल
स्य गतिं मुक्तिं प्राप्तवती ॥३॥ दत्तात्रेयावतारमाह। मयाहमेव तुभ्यं दत्त इति यद्यतस्त्वाह। ततः स नाम्ना दत्तो जातः। सच तत्क्रमो योगैश्वर्यदानं तच्चरितं

जातोरुचेरजनयत्सुयमान्सुयज्ञ आकूतिसूनुरमरानथदक्षिणायां। लोकत्रयस्य महतीमहरद्यदार्त्तिं स्वायंभुवेन मनुनाहरिरित्यनू
क्तः ॥२॥ जज्ञे च कर्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे। ऊचे ययात्मशमलं गुणसंगपंकमस्मिन्विधूय कपिलस्य ग
तिं प्रपेदे ॥३॥ अत्रेरपत्यमभिकांक्षत आह तुष्टो दत्तो मयाहमिति यद्भगवान्स दत्तः। यत्पादपंकजपरागपवित्रदेहा योगर्धिमापुरुभयीं यदु ग३
हैहयाद्याः ॥४॥ तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात्स्वतपसः स चतुःसनोभूत्। प्राक्कल्पसंप्लवविनष्टमिहात्मतत्वं सम्यक्जगाद मु
नयो यदचक्षतात्मन् ॥५॥

दर्शयति। यस्य पादपंकजयोः परागस्तेन पवित्रा देहा येषां ते उभयीं ऐहिकीं आमुष्मिकीं च भुक्तिमुक्तिरूपां च ॥४॥ कुमारा
वतारमाह। मे मयाद्यादौ यत्तपः तप्तं तस्मात् स्वतपसः मत्तपसो हेतोः स हरिः चतुःसनोभूत्। सनत्कुमारः सनकः सनंदनः सनातन इति चत्वारः सनश
ब्दा नाम्नि यस्य सः। सनातनत्वं अखंडितात् यद्वा स्वतपसः सनात् दानात् समर्पणादित्यर्थः। षष्ठ्युद्दाने स च पूर्वकल्पस्य संप्लवे प्रलये विनष्टं उच्छिन्नसंप्र
दायं आत्मतत्वं इह अस्मिन् कल्पे सम्यक् जगाद उक्तवान्। सम्यक्त्वं दर्शयति। यदुदितमात्रमेव मुनयः आत्मन् मनसि अचक्षत साक्षात् अपश्यन् ॥५॥ आत्मनि१

२ऊ थंभ्रूता स्वतपसः२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द्वि० २४ नरनारायणावतारमाह। धर्मस्य पत्न्यां दक्षदुहितरि मूर्त्तिसंज्ञायां नारायणो नर इति मूर्त्तिद्वयेन जातः। कथंभूतः स्वः असाधारणस्तपःप्रभावो यस्य त
देवाह। अनंगस्य पृतना देव्योऽप्सरसः सन्नगवतः सकाशादात्मनः स्वप्रतिरूपाः उर्वश्याद्याः स्त्रीर्दृष्ट्वा तस्य नियमावलोपं व्रतभंगं घटितुं साधयितुं॥ न
शेकुः। यद्वा। आत्मनः स्वस्य यो नियमः तपोनाशनरूपः तस्य अवलोपं तत्र। दृष्ट्वा भगवतस्तं घटयितुं न शेकुरिति। एतच्चाख्यानमेकादशे भविष्यति
६ यत्र कामविजयी क्रोधोऽपि विजेतेति तत्र कामो न प्रभवतीति किं वक्तव्यमित्याह। काममिति। कृतिनः श्रीरुद्रप्रमुखाः रोषयुक्तया दृष्ट्या कामं दहंति

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्त्यां नारायणो नर इति स्वतपःप्रभावः। दृष्ट्वात्मनो भगवतो नियमावलोपं देव्यस्त्वनंगपृतना घटितुं न
शेकुः॥६॥ कामं दहंति कृतिनो ननु रोषदृष्ट्या रोषं दहंतमुत ते न दहंत्यसह्यं॥ सोऽयं यदंतरमलं निविशन् बिभेति कामः कथं नु पुन
रस्य मनः श्रयेत॥७॥ विद्धः सपत्न्युदितपत्रिभिरंति राज्ञो बालोऽपि सन्नुपगतस्तपसे वनानि॥ तस्मा अदाद् ध्रुवगतिं गृणते प्रसन्नो
दिव्याः स्तुवंति मुनयो यदुपर्यधस्तात्॥८॥ ॥

रोषं आत्मानं दहंतमपि ते न दहंति क्रोधेनाभिभूयंत इत्यर्थः। ननु अहो सोऽयं रोषोऽपि यदंतरं यस्य ध्यं प्रविशन् अलं बिभेति। यद्वा। यस्यांतःमनः कथं नु तं
रतपरा अमलं निर्मलं प्रविशन्निति॥७॥ चरित्रैरेव कमप्यवतारं सूचयति। मातुः सपत्न्या उदितानि उक्तानि वाक्यान्येव पत्रिणो बाणाः तैर्विद्धो ध्रुवः राज्ञ उत्ता
नपादेंतिसमीपे तपसे स्तुवं ध्रुवयति ध्रुवपदं यं पदं उपरिस्थितं अधस्तात्स्थिता दिविष्ठा वा दिव्याः सप्तर्षयः स्तुवंति। यद्वा उपरिस्थिताः भृग्वादयः राम २४
अधस्तात् सप्तर्षय इति॥८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृथ्ववतारमाह।यद्यदारुषिभिर्निरर्थितस्तदावेनं त्रातां चन्नर्थितस्तुत्रइतिपदंनामलेभेन।पुन्नाम्नोनरकाद्यस्मात्पितरंत्रायतेसुतः।तस्मात्पुत्रइतिप्रो
क्तः स्वयमेवस्वयंभुवेति हि पुत्रपदस्युत्पत्तिः कथंभूतं द्विजानां शापवाक्यमेववज्रं तेन विप्लुष्टं दग्धं पौरुषं भगमैश्वर्यं च यस्य तं परित्रांतरमाह॥
येन च जगदर्थं वसूनि रत्नादि दुग्धानि दुग्धा।९।ऋषभावतारमाह।असौ हरिर्नाभेरग्नीध्रपुत्रात्सुदेव्याः स्नुरासमनानेनयियां मेरुदेव्या एव सुदे
वीत्यपि संज्ञा जडवद्योगेन निश्चसमाधिनाचर्या यदिति यां।तत्र हेतुः स्वस्थः स्वरूपे स्थितः यतः प्रशांतेंद्रियः मनेकुतः यतः परितो मुक्तः संगः॥

यद्वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरये पतंतं।त्रात्वार्थितो जगति पुत्रपदं च लेभे दुग्धा वसूनि वसुधा सकलानि ये
न ९ नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृक् जडयोगचर्याम्।यत्पारमहंस्यमृषयः पदमामनंति स्वस्थः प्रशांतकर
२थो णः परिमुक्तसंगः।१०।सत्रे ममास भगवान् हयशीर्ष अथो साक्षात्स यज्ञपुरुषस्तपनीयवर्णः।छंदोमयो मखमयोऽखिलदेवतात्म
त्मा वाचो बभूवुरुशतीः श्वसतोस्य नस्तः।११।मत्स्यो युगांतसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः।विस्रंसितानुरु
भये सलिले मुखान्मे आदाय तत्र विजहार ह वेदमार्गान्।१२।

हयग्रीवावतारमाह।सत्र इति।अथो इत्यर्थांतिरे।स एव साक्षाद्भगवान् मम ब्रह्म
णः सत्रे यज्ञे हयशीर्ष आस। तपनीयं सुवर्णं तद्वद्वर्णो यस्य छंदोमयः वेदमयः तद्विधायाये मखात्मयः अमृतमय इतिवा पाठः मखैर्यजनीया अखिल
देवतास्तदात्मा चास्य श्वसतः श्वासं मुंचतः नस्तः नासापुटात् उशतीः उशत्यः कमनीया वेदलक्षणा वाचो बभूवुः।११।मत्स्यावतारमाह।मत्स्यो नाविना वैवस्व
तेन मनुदृष्टः क्षोणीमयः पृथ्वीप्रधानस्तदाश्रय इत्यर्थः।एवं च तत एव निखिलजीवनिकायानामाश्रयः।मिमुखाद्विस्रंसितान् गलितान् वेदस्य मार्गान्
वेदानादाय तत्र युगांतसलिले विजहार हर्षेण।१२॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना·दि
२५

कूर्म्मावतारमाह। क्षीरोदधौ कछपवपुः सन् गोत्रं मंथनार्थं मंदरं गिरिं पृष्ठेन दि[धृ]तवान्। कदाश्चमृतलब्धये क्षीरा[ब्धि]क्षिप्तुन्मर्थ्येसतां [...] निद्रायाः क्ष-
णाः अवसरस्तस्मिन्वोवायस्यसः। निद्रावसरः कृतस्तमाह। अद्रेः परिवर्त्तः परिभ्रमः स एव कषणाः कर्षणां घर्षणां सुखप्रदो यस्यां सा कंडूर्यस्य सः।
यथा। अद्रिपरिवर्त्त एव कषः कषणं तेना[...]णाति। अपयातीति कषाणा कंडूर्यस्य। १३। श्रीनृसिंहावतारमाह। दैत्यविशेषपादेवाः तेषामसुरुनयं

क्षीरोदधावमरदानवयूथपानामुन्मथ्यताममृतलब्धय आदिदेवः। पृष्ठेन कछपवपुर्विदधार गोत्रं निद्राक्षणोद्रिपरिवर्त्तकषाण-
कंडुः। १३। दैत्यविशेषपोरुषमयहासन्नृसिंहरूपं कृतात्रमकुकुटिदंष्ट्रकरालवक्त्रम्। दैत्येंद्रमाशुगदयाभिपतंतमारादूरौ निपात्य वि-
ददारनखैः स्फुरंतम्। १४। अंतःसरस्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरंबुजहस्त आर्त्तः। आहेदमादिपुरुषाखिललो-
कनाथतीर्थश्रवः श्रवणमंगलनामधेय। १५। श्रुत्वा हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः। चक्रेण नक्र-
वदनं विनिपाट्य तस्माद्धस्ते प्रगृह्य भगवान् कृपयोज्जहार। १६। ॥

हंतीति [...]तया स भगवान् कथंभूतं त्र्यमंसो नृकुकुटौ दंष्ट्रा [...] अथ पश्चिन्नत्करालं वक्त्रं यस्मिन् तत्। दैत्येंद्रं स्फुरंतं आरात् समीप एव गदया उपल-
१ नै क्षितं च निपतंतं नखैर्विददार। १४। हरिसंज्ञकावतारमाह। अंतरिति [...] पुगुले [...] गजयूथपतिः तीर्थरूपं श्रवो यशो यस्य स तीर्थश्रवाः हे तीर्थश्रवः ए म
श्रवणैर्व मंगलं नामधेयं यस्य। १५। तद्वचनं श्रुत्वा आरणार्थिनं तं स्तेहं शुंडायां प्रगृह्य किं कृत्वा नक्रस्य ग्राहस्य वदनं। विनिःपाट्य विदार्य तस्मात् उद्- २५
नात्। १६। ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२वर्त्तमानः२

वामनावतारमाह। अदितेः सुतानां द्वादशादित्यानां मध्ये अधियज्ञः यज्ञाधिष्ठाता विष्णुः अवरजः कनीयानपि गुणैर्ज्यायान् श्रेष्ठः गुणानेवाह। यद्यतः इमान्लोकान्विचक्रमे पादन्यासैः क्रांतवान्। अथ प्रतिश्रुतानंतरमेव हेतुः बलेः क्ष्मां वामनरूपेण जगृहे नन्वीश्वरः स्वयं किमिति न याचके तत्राह याच्ञां विना धर्ममार्गेण चास्मैश्वर्याच्चालयितुं न शक्य इति।१७। ननु तर्हि याच्ञयापि चालनमनुचितमेव सत्यां कुतो धिकं सत्साम्यो क्वादिदासामीत्याशयेन कृतवानित्याह नार्थ इति। अयं विबुधाधिपत्यं इदानीं बलात् स्वात्मन्येवेत्येदीयमानं च अयं बलेः पुरुषार्थो न भवति। कुत इत्यत आह। अ

ज्यायान्गुणैरवरजोप्यदितेः सुतानां लोकान्विचक्रम इमान्यदथाधियज्ञः। क्ष्मां वामनेन जगृहे त्रिपदच्छलेन याच्ञामृते पथि चरन्प्रभुभिर्न चाल्यः।१७। नार्थो बलेरयमुरुक्रमपादशौचमापः शिखाधृतवतो विबुधाधिपत्यं। यो वै प्रतिश्रुतमृते न चिकीर्षदन्यदात्मानमंग शिरसा हरयेभिमेने।१८। तुभ्यं च नारद भृशं भगवान्विवृद्धभावेन साधुपरितुष्ट उवाच योगं। ज्ञानं च भागवतमात्मसतत्त्वदीपं यद्वासुदेवशरणा विदुरंजसैव।१९॥ ॥ च

अप इति छेदः। उरुक्रमस्य पादशौचं चरणक्षालनेन रूपा आपः आसमंततो धृतवतः शिखायां मूर्ध्नीत्यर्थः। किंच शुक्रेण वारितः नाशंको पि अंग हे नारद प्रतिश्रुतं विना अन्यत्तन्न चिकीर्षत कर्तुं नैच्छत्। यः तृतीयपादपूर्णार्थं हरये आत्मानं देहमपि अभिमेने अंगीकृतवान्। एवंसदेहं त्रैलोक्यश्रद्धयादत्तवतो विबुधाधिपत्यमर्थो न भवतीत्यर्थः।१८। हंसावतारमाह। तुभ्यमिति। भृशं विवृद्धेन भावेन अनुग्रहात्मका परितुष्टः सन् नन्विक्रियोगं साधु यथा तथा उवाच ज्ञानं चेति ज्ञानसाधनं। किं तत् भागवतं नाम कथंभूतं तत्त्वमेव सतत्त्वं आत्मतत्त्वदीपकं। विवृद्धभावेनेति विशेषणेन फलमाह यदिति।१९।



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाभि॰ २६

तन्मन्वंतरावतारमाह॥ चक्रमिति॥ स्वतेजः निजंप्रभावमेव चक्रं सुदर्शनं तेजसि चक्रवदप्रतिहतं प्रभावं बिभ्रदित्यर्थः॥ तदेवाह॥ मनुवंशपालकः

सन्नव्याहतेनाणां लोकानां दुष्टेषु परिस्थितेषु सत्सु लोकेपि कमनीयां स्वकीर्त्तिं विस्तारयन् राजसु दंडं विधत्ते॥ ३०॥ धन्वंतर्यवतारमाह॥ लोके चावतीर्य

धन्वंतरिः सन् पुरुरुजां महारोगिणां स्वनाम्नैव रुजः रोगान् हंति॥ स्वयमेव कीर्त्तिरिति कीर्त्यतिशयोक्तिः॥ अमृतं मरणाभावमायुर्यस्मात् सः॥ स्य १

अवरुद्धवान् पूर्वं दैत्यैः प्रतिरुद्धं यज्ञे भागं चावरुंधे लभते अवारुंधं मितिपाठे प्ययमेवार्थः॥ आयुर्विषयं वेदं चानुशास्ति प्रवर्त्तयति॥ ३१॥ परशुरा

चक्रं च दिक्ष्वविहतं दशसु स्वतेजो मन्वंतरेषु मनुवंशधरो बिभर्त्ति दुष्टेषु राजसु दमं व्यदधात्स्वकीर्त्तिं सत्ये त्रिपृष्ठ उशतीं प्रथयंश्च

रिंवैः॥ २०॥ धन्वंतरिश्च भगवान् स्वयमेव कीर्त्तिर्नाम्ना नृणां पुरुरुजां रुज आशु हंति॥ यज्ञे च भागममृतायुरवावरुंधआयुष्यवेदमनु

शास्त्यवतीर्य लोके॥ २१॥ क्षत्रं क्षयाय विधिनोपभृतं महात्मा ब्रह्मध्रुगुज्झितपथं नरकार्त्तिलिप्सु उद्धंत्यसाववनिकंटकमुग्रवीर्यस्त्रिः

सप्तकृत्व उरुधारपरश्वधेन॥ २२॥ अस्मत्प्रसादसुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे तिष्ठन् वनं सदयितानुज

आविवेश यस्मिन् विरुध्य दशकंधर आर्त्तिमार्छत्॥ २३॥

मावतारमाह॥ जगतः क्षयाय विधिना दैवेनउपभृतं संवर्धितं मृत्यवे समर्पितमि

तिवा॥ ब्राह्मणेभ्यो दुह्यतीति तथा अतः उज्झितः पंथा वेदमार्गो येन अतएव नरकार्त्तिलिप्सवो ये एवंभूतमवनेः कंटकं क्षत्रं सौ महात्मा हरिः उद्धं

तित्रोटयति॥ दीर्घतीक्ष्णधारेण परशुना॥ २२॥ रामावतारमाह॥ अस्मदिति॥ अस्माकं ब्रह्मादीनां प्रसादे सुमुखः कलया अन्तरतादिरूपया सह

कलामायातस्याज्ञाः॥ गुरोर्दशरथस्याज्ञायां तिष्ठन् सीतालक्ष्मणाभ्यां सहितो वनमाविवेश यस्मिन् विरोधं कृत्वा रावणो नाशं प्राप्तः॥ २३॥ राम २६

२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मै रामाय उदधिर्मार्गं ददौ। सप दिशि ग्रहरो यंया त्रिपुरं दिधक्षुः तद्वत् त्वरिपुरं लंकां दग्धुमिच्छोः। षष्ठी चतुर्थ्यर्थे। यद्वा पंचमीयं। दिधक्षोः रामा
त्वयज्ञयं यथा तं तेनांगे कंपो यस्येति। कथंभूतः उदधिः। ऊढं प्राप्तं वज्ञयं तेन त्र्यंगेषु वेपः कंपो यस्य। त्वं च हेतुः। हरेर्वर्त्तमाना सुहृत्सीता तया निमि
त्तभूतया मथितं त्वं निर्जितो रोषः तेन सुशोणाभृत्यद्रूणा दृष्टिस्तयात्यंतं तत्प्रमानं मकारणासुरगणानां नकाणां चक्रं यस्मिन्। २४। किंच। सुहेरावणे
रस्य स्ववक्षःस्थलस्पर्शे निरुग्णान्न प्रायेम हेंद्रवाहस्य ऐरावतैर्दंताः तैर्विडंबिताः स्वधवलिम्ना धवलीकृताः तत्र हिप्रपतितैः प्रकाशिता इत्यर्थः। या

यस्मा अदादुदधिरूढनयां गवेपो मार्गं स पद्यरिपुरं हरवद्दिधक्षोः। हरेः सुरुन्मथितरोषसुशोणदृष्टा तात प्रमानमक
ग रोरचैक्रैनेके। २४। वक्षः स्थलस्पर्शरुग्णमहेंद्रवाहदंतैर्विडंबितककुब्जुषऊढहासः। सद्योः सुनिःसह विनेष्यति रा
रहर्त्तुर्विस्फूर्जितैर्धनुषउच्चरितोधिसैन्ये। २५॥ ॥

एवंभूताः ककुभो दिशः जुषते सेवते पालयतीति तया तस्य दशरहर्त्तुरावणस्य अहो मत्समः कोन्योस्तीति महागर्वेन ऊढं प्राप्तं हासं स मुनिः प्राणैः
सह सद्यः शीघ्रं विनेष्यति। कैः धनुषो विस्फूर्जितैः। टंकारघोषैरेव। कथंभूतस्य अधिसैन्ये परसैन्यमध्ये उच्चरतः उत्कर्षेण विचरतः। क
१५ कुब्जुरूढहासमिति पाठे दंतैर्ज्वलितानां ककुभां जयेन योरूढहासः सं[illegible] जातगर्वः तमपनेष्यतीत्यर्थः। २५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द्वि॰
२७

श्रीकृष्णावतारमाह॥ भूमेरिति द्वाभ्यां॥ सुरेतराः असुरांशसंभूताः राजानस्तेषां वरूथैः सैन्यैर्विमर्दितायाः भारेण पीडितायाः कलया रामेण सह जातः भूनुको सौ जातः॥ सितकृष्णौ केशौ यस्य भगवतः स एव साक्षात्। सितकृष्णकेशत्वं तं शोनैव न तु वयः परिणामकृतं अविकारित्वात्। यत्तूक्तं विष्णुपुराणे उज्जहारात्मनः केशौ सितकृष्णौ महामुने इति यच्च भारते स चापि केशो हरिरुच्चवर्ह एकं शुक्लमेकमपरं चापि कृष्णं। तौ चापि केशावाविशेतां यदूनां कुले स्त्रियौ रोहिणीं देवकीं च। तयोरेको बलभद्रो बभूव यो सौ श्वेतस्तस्य देवस्य केशः। कृष्णो द्वितीयः केशवः संबभूव केशो यो सौ वर्णतः

का२

भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय कलया सितकृष्णकेशः। जातः करिष्यति जनानुपलक्ष्यमार्गः कर्माणि चात्ममहिमोपनिबंधनानि॥ २६॥ तोकेन जीवहरणं यदुलूकिकायास्त्रैमासिकस्य च पदा शकटोपवृत्तः॥ यद्रिंगतांतरगतेन दिविस्पृशो वा उन्मूलनं त्वितरथार्जुनयोर्न भाव्यम्॥ २७॥ ॥

कृष्ण इति। तत्तु न केशमात्रावतारत्वाभिप्रायं किंतु भारावतारणरूपं कार्यं कियदेतत्‌ मत्केशावेव तत्कर्तुं शक्ताविति द्योतनार्थं रामकृष्णयोर्वर्णसूचनार्थं च केशोद्धरणमिति गम्यते। अन्यथा तत्रैव पूर्वापरविरोधापत्तेः॥ कृष्णस्तु भगवान्स्वयमित्येतद्विरोधाच्च। कथंभूतः परमेश्वरत्वज्ञानेः अनुपलक्ष्यो मार्गो यस्य। तर्हीश्वरत्वे किं प्रमाणं॥ अतिमानुषकर्मान्यथानुपपत्तिरित्याह॥ आत्मनो महिमा उपनिबध्यते एभिरिति अभिव्यज्यते येषु तानि॥ २६॥ एतदेव प्रपंचयति तोकेनेत्यादिना॥ बालेन पूतनाया जीवहरणं यत्। रिंगता जानुभ्यां गच्छता। अंतरगतेन मध्यं प्राप्तेन। दिविस्पृशोः अर्जुनयोः इतरथा अनीश्वरत्वे तन्न संभवितव्यं॥ २७॥ ॥

वै२

राम
२७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विषतोयपीतान् विषं तोयस्य पीतं पानं येषां । पाल्यान् गोपांश्च कृपादृष्टिसुधावृष्ट्या जीवयिष्यति । इति यमुनायां क्रीडन् उरगं कालियं उच्चाटयिष्यति
तद्धृदये तस्याः ह्रदे दिम्नां निर्विषयत्वा याति विषवीर्येणा विलोला चंचला जिह्वा यस्य ॥ २८ ॥ दिव्यमलौकिकं । इवेति लोकोक्तिः । उन्नेष्यति उद्धरिष्यति सुचिपी
ष्णुः । तत्संबंधिनि वने मुंजकत्स्वयं ॥ अतो दावाग्नेर्हेतोः अवसितो निश्चितो ऽन्तकालो यस्य तं । सबलः सरामः । अनधिगम्यं दुर्ज्ञेयं वीर्यं यस्य
तत्र निशि निःशयानमिति कालियदमनेरात्रौ यमुनातीरे नेत्रे धाप्य पिहिति कारयित्वेति मुंजाटव्यामिति ज्ञेयं ॥ २९ ॥ उपनेष्यते अनेनेति उ

देवैर्व्रजे व्रजपश्यन् विषतोयपीतान् पालांस्त्वं जीवयदनुग्रहदृष्टिवृष्ट्या ॥ तद्धृदये तिविषवीर्यविलोलजिह्वमुच्चाटयिष्यदुरगं विहरन्
ह्रदे त्वम् ॥ २८ ॥ तत्कर्म दिव्यमिव यन्निशि निःशयानं दावाग्निना शुचिवने परिदह्यमाने ॥ उन्नेष्यति व्रजमतो ऽवसितांतकालं नेत्रे पिधाप्य
सबलो ऽनधिगम्यवीर्यः ॥ २९ ॥ गृह्णीतयद् उपबंधमुष्य माता शुल्वं सुतस्य न तु तेन दमुष्य माति ॥ यत्जृंभतो ऽस्य वदने भुवनानि गोपी त्वं
संवीक्ष्य शंकितमनाः प्रतिबोधितासीत् ॥ ३० ॥ नंदं च मोक्ष्यति भयाद्वरुणस्य पाशाद्गोपान्बिलेषु पिहितान्मयसूनुना च ॥ अह्न्याहृतं नि
शि शयानमतिश्रमेण लोके विकुंठमुपनेष्यति गोकुलं स्म ॥ ३१ ॥

यद्बंधनसाधनं शुल्वं दाम । अमुष्य माता यशोदा अगृहीत । अमुष्य न माति
बंधनसंमितं न भवति न पूर्यत इत्यर्थः ॥ गोपी यशोदा संवीक्ष्य दृष्ट्वा प्रबोधिता निजैश्वर्यं ज्ञापिता आसीदिति यत् । तच्च कर्म दिव्यमिवेति सर्वत्र
पूर्वेणैवान्वयः ॥ ३० ॥ वरुणस्य यज्ञयंतं मोचयिष्यति मयस्य सूनुना व्योमनाम्ना आहृतं आहृतं मापारमुकुंदं निशि निःशयानमिति च वैकुंठं
धनानि ... दर्शितः । उपनेष्यति प्रापयिष्यति गोकुलवासिनं ... ॥ ३१ ॥ ॥

पा।श।२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवेंद्रेपशव्दारिरक्षुः रिरक्षिषुरित्यर्थः॥ स्वजदेवेरमरहितेएकस्मिन्नेव करे ... लेयथातथामहीध्रं गोवर्धनं धर्त्तुं धारयिष्यति। तद्विलीध्रंत्यजतं
... वाकमिव सप्तवर्षाणि वयोयस्य सः॥ ३२॥ निशिरात्रौ निशाकररश्मिभिः गौर्यां धवलायां वने क्रीडन्। कल्याणि मंजुलानि पदानि यस्मिन् तच्च तदायतं दी
र्घं मूर्छितं॥ आलापविशेषयुक्तं गीतं तेन उद्दीपितः स्मरएव रुक् यासां तासां गोपीनां हर्त्तुः शंखचूडस्य शिरो हरिष्यति॥ ३३॥ येच प्रलंबादयास्ते सर्वे ह
रिणा हेतुभूतेन तदीयं निलयमदर्शनं ... दर्शनायोग्यं वैकुंठं यास्यंति॥ अलं यास्यंतीत्युत्तरेणान्वयः॥ खरोधेनुकः दर्दुरः खरदर्दुरो बकः॥ इभः कुवलयापीडः

गोपैर्मखे प्रतिहते व्रजविप्लवाय देवेन वर्षति पशून्कृपया रिरक्षुः॥ धर्त्ताबिलीध्रमिव सप्तदिनानि सप्तवर्षो महीध्रमनघैककरे स
लीलम्॥ ३२॥ क्रीडन्वने निशि निशाकररश्मिगौर्यां रासोन्मुखः कलपदायतमूर्छितेन॥ उद्दीपितस्मररुजां व्रजभृद्वधूनां हर्त्तुर्हरि
ष्यति शिरो धनदानुगस्य॥ ३३॥ येच प्रलंबखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौंड्रकाद्याः॥ अन्येप्यविल्वकपिबल्वलदंतवक्त्र
सप्तोक्षशंबरविदूरथरुक्मिमुख्याः॥ ३४॥ येवा मृधे समितिशालिन आत्तचापाः कांबोजमत्स्यकुरुकैकयसृंजयाद्याः॥ यास्यंत्य
दर्शनमलं बलनीमपार्थव्याजाह्वयेन हरिणा निलयं तदीयं॥ ३५॥ ॥

कपिर्द्विविदः कुजोनरकः॥ ३४॥ येचमृधे आत्तचापाः समितौ संग्रामे शालंते श्लाघंते ते समितिशालिनः॥ ननु प्रलंबखरकपिबल्वलरु
क्मिप्रमुखाः बलभद्रेण निहताः कांबोजादयश्च भीमार्जुनादिभिः शंबरः प्रद्युम्नेन यवनो मुचुकुंदेन नतु हरिणा तत्राह॥ बलभीमपा
र्थइत्यादयो व्याजाह्वयाः कपटनामानि यस्य तेन सप्तमीत्राणस्तुतेन दमिताः कालांतरे यास्यंतीति भावः॥ एतच्च सर्वमपि कर्मदिव्यमिव
तच्चान्यथानन्यायमिति पूर्वेणैव संबंधः॥ ३५॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यासावतारमाह । अवनुयुगं मीलिता संकुचिता धीर्येषां स्तोकमल्पमायुर्येषां तेषां स्वनिगमः स्वकृतो वेदराशिः बत अहो दूरेपारं यस्येति दुर्गम इत्यालक्ष्य
सत्त्ववत्यामाविर्भूतः सन् स एव हरिः विटपशः शाखाभेदेन ॥ ३६ ॥ बुद्धावतारमाह । देवद्विषां निष्ठितानां नितरां स्थितानां तत्कालेन च पूर्भिः पुरीभिः अदृश्य
रूपाभिः अलक्ष्यवेगाभिः मतेर्विमोहः यो मयतामार्गो यस्मात् मतेः प्रलोभनस्य च मुक्ते स्वीकारो यस्मात् पाखंडवेषं विधाय तेन औपधर्म्यं खैवायेध्यकृत्य कुला पाखंडधर्मैः
मिष्यत इत्यर्थः ॥ ३७ ॥ कल्क्यवतारमाह । यर्हि यदा सतामप्यालयेषु गृहेषु त्रैवर्णिकाः पाखंडिनः स्युः शूद्राश्च राजानः स्युः तदा कल्किरूपेण कलेः शास्ता

कालेन मीलितधियामवमृश्य नृणां स्तोकायुषां स्वनिगमो बत दूरपारः । आविर्हितस्त्वनुयुगं स हि सत्यवत्यां वेदद्रुमं विटपशो विभजिष्य व
ति स्म ॥ ३६ ॥ देवद्विषां निगमवर्त्मनि निष्ठितानां पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः । लोकान्घ्नतां मतिविमोहमतिप्रलोभं वेषं विधाय बहु भा
ष्यत औपधर्म्यम् ॥ ३७ ॥ यर्ह्यालयेष्वपि सतां न हरेः कथाः स्युः पाखंडिनो द्विजजना वृषला नृदेवाः । स्वाहा स्वधा वषडिति स्म गिरो न यत्र शास्ता भ
विष्यति कलेर्भगवान्युगांते ॥ ३८ ॥ सर्गे तपोऽहमृषयो नव ये प्रजेशाः स्थाने च धर्ममखमन्वमरावनीशाः । अंते त्वधर्महरमन्युवशासुराद्या मा
याविभूतय इमाः पुरु[illegible]शक्तिभाजः ॥ ३९ ॥ ॥

भविष्यति ॥ अत्र च ब्रह्मनारदसंवादात् प्राक् आविर्नो वराहादयः मन्वंतरावतारास्तु भूता नाविनश्च धन्वंतरिपरशुराममौलिरावतीर्णः ॥ श्रीरामादयस्तु
भाविनः तत्र तु कपिलभूतादिभिर्निर्दिष्टाः छांदसः शतिद्रष्टव्यः ॥ ३८ ॥ सृष्ट्यादिकार्यनिर्देशेन मायागुणावतारविभूतीराह ॥ सर्गे इति स्थाने स्थितौ मखो विष्णुः
धर्मश्च मखश्च मनवश्च अमराश्च अवनीशाश्च ॥ अंते संहारे रुद्रः मन्युवशाः सर्पाः [illegible]शक्तिधारिणो भगवत इमा विभूतयः ॥ ३९ ॥ ॥
रा१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाःवि॰
२९

कं३

इदं मया ... पे ... केवि ... रेण ... न ... पि ... पार्थिवाः परमाणूनपि यो विममे गणितवान् तादृशोपि कोपि विष्णोर्वीर्यगणनां कर्तुमर्हति। क
थंभूतस्य यो विष्णुः त्रिपृष्ठं सत्यलोकं चस्कंभ धृतवान् किमिति चस्कंभ यस्मात् वैदिकमेरु स्वस्खलता प्रति ... घात शून्येन स्वरंहसा स्ववेगेन त्रिसाम्यरू
पं सदनमधिष्ठानं प्रधानं तस्मात् उरुकंपमधिकंपमानं कंपेन यानं प्रसेतिवा ॥ स्वतःकारणात् चस्कंभ। अत्र त्रिपृष्ठमिति वा छेदः ॥ सत्यलोकमनिपात्य यः
स्वर्वं धृतवानित्यर्थः ॥ विष्णोर्नु किमिति। अस्यार्थः विष्णोस्तु वीर्याणि कं प्रवोचं कः प्रावोचदित्यर्थः ॥ यः पार्थिवानि रजांस्यपि विममे सोपि यो विष्णुः त्रेधा विचक्रमा

विष्णोर्नुवीर्यगणनां कतमोर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि ॥ चस्कंभ यः स्वरहसास्खलता त्रिपृष्ठं यस्मात्त्रिसाम्यसदनादुरुकंपयानं
४० ॥ नांतं विदाम्यहममी मुनयोग्रजास्ते मायाबलस्य पुरुषस्य कुतोपरे ये। गायन्गुणान्दशशताननआदिदेवः शेषोधुनापि समवस्यति नास्य पा
रं ४१ ॥ येषां स एव भगवान्दययेदनंतः सर्वात्मनाश्रितपदो यदि निर्व्यलीकम् ॥ ते दुस्तरामतितरंति च देवमायां नैषां ममाहमिति धीः श्वशृगा
लभक्ष्ये ४२ ॥

१भ्यधत१

एः त्रिविक्रमं कुर्वन् उत्तरं लोकं आस्कंभयत ॥ अवष्टब्धवान् ॥ कथंभूतं स धस्थं सहस्यस धारेत्राः तिष्ठंती तिस्थाः तत्रस्थैर्देवैः सह वर्तमानं इत्यर्थः ४० ॥
एतस्य पंच यतिनांत मिति। पुरुषस्य यन्मायाबलं तस्यांतं न विदामि न वेद्मि। दशशताननानि यस्य सोपि अस्य गुणान्गायन् पारं न समवस्यति न प्राप्नोति
४१ यदि न केपि विदंति तर्हि कथं मुच्येरन् तत्राह येषामिति दययेत् दयां कुर्यात् तेच यदि निःकपटं आश्रितचरणास्तत्र भवंति ते दुस्तरां देवमायां अ
तितरंति च कारणं तमायावैनवं विदंति च ॥ यदि तिवा पाठः अस्मदंगंवते षां मायाति तरणमित्याह नैषामिति ॥ श्वगालानां भक्ष्ये देहे ४२ ॥ ॥ ॥

तं२ ना२ श्व१

राम
२९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंतर्ज्ञानात्वेपिमायेयमितिज्ञानंततद्रूपयाबद्धानांमस्तीत्याह विदामेतिविति: यूयमितिसनकादीनंततन्वियिबद्धत्वंदैत्यवर्य: प्रह्लाद: मनुस्वायंभु
व: तस्यपत्नीचतदात्मजा: पुत्रौकन्याश्च प्राचीनबर्हिषोविसर्गलोपश्छांदस: ४४ व्रातधनु: धनुश्च संधिरार्ष: रंतिदेवा इति पाठ: सुगम: एकपद्येण

विदामेमायापरमस्यहियोगमायांयूयंनवृश्चनगवानथदैत्यवर्य: पत्नीमनो: सचमनुश्चतदात्मजाश्च प्राचीनबर्हिऋभुरंगउतध्रुवश्च ॥
४३ इक्ष्वाकुरैलमुचुकुंदविदेहगाधिरघ्वंबरीषसगरागयनाहुषाद्या: मांधात्रलर्कशतधन्वनुरंतिदेवादेवव्रतोबलिरमूर्त्तरयोदि ४४॥
लीप: सोन्नर्युतंकशिबिदेवलपिप्पलादा: सारस्वतोद्धवपराशरभूरिषेणा: येन्येबिभीषणहनूमदुपेंद्रदत्तपार्थार्ष्टिषेणविदुरश्रुत
देववर्या: ४५ तेवैविदंत्यतितरंतिचदेवमायांस्त्रीशूद्रहूणशबरा अपिपापजीवा: यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जनाअ
पिकिमुश्रुतधारणाये ४६ ॥

तै: सहितोदेवव्रतइत्यर्थ: ॥ ४४ ॥ उपेंद्रदत्त: शुक: बिभीषणाद्योवर्यामुख्याये षांते ४५ किंबहुनासत्संगेनसर्वेपिविदंतीत्याह तेवाइति। अ
त्वा. कर्मा: पादृत्वासायस्यहरे: तत्परायणा: तद्भक्ता: तेषांशीलेशिक्षायेषांतेतथायदिनवंतितर्हितेपिविदंतीत्यर्थ: अतोभगवतोरूपेधारणा
भ्यो नियमनंयेषांतेविदंतीतिकिमुवक्तव्यं ४६ ॥

श्री १

भा·टि ३०

दि[...]भगवतः स्वरूपं[...]स्मिन्नृतो भारणं विधायस्मायांतर[...]ामां। यद्ब्रह्मेति। विदुर्मुनयः तद्भगवतः स्वरूपं किंतद्ब्रह्म तदा
ह। अजस्रं नित्यं तत् सुखं च विशोकं चेति। अजस्रसुखत्वे हेतुः। शाश्वत् सदा[...]तो नित्यसुखरूपं विशोकत्वे हेतुः। अनयं कुतः यतः समं नेदमूनं सं
पूर्णं नयं द्वितीयाद्भिन्नयं भवतीति श्रुतेः। तत्कुतः यतः प्रतिबोधमात्रं ज्ञानैकरसं। ननु ज्ञानस्यापि नीलपीताद्याकारैर्भेदे न च भेदो दृश्यते। न सुखं चक्षुरादि२
निर्मलं। ननु दृश्यते विषयकरणोपरागरूपो मलः इत्यत आह। सदसतः परं विषयकरणसंगशून्यं दृश्येरेव तद्रूपरागेण ज्ञानस्येति भावः। ननु तथापि ज्ञाता
सह भेदः स्यात् अत आह आत्मतत्वं आत्मनो ज्ञातुः स्वरूपमेव तत्त्वा न ततो भिन्नं। ननु च तत्त्वोपनिषदं पुरुषं पृच्छामीति श्रुत्या शब्दबोध्यत्वप्रतीतेः कुतो बोधरूपत्वं
तत्राह। शब्दोनयत्रेति। आरोपितनिवृत्तावेव शब्दस्य व्यापारो न तद्बोधकत्वमित्यर्थः। ननु च नवत्तु नाम निरस्तभेदज्ञानरूपत्वादिविशोकत्वं। सुखस्य तु नानाकारक
साध्यक्रियाफलत्वात् कथमजस्रसुखत्वं तस्येत्यत आह। यत्र बहुकारकसाध्यः क्रियार्थः उत्पाद्याप्यविकार्यसंस्काररूपं चतुर्विधं क्रियाफलं च नास्तीइति यर्थ७

शाश्वत्प्रशांतमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वं। शब्दो न यत्र पुरुकारकवान् क्रियार्थो माया परैत्यभिमुखे च विलज्जमाना॥
४७। तद्वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद्विदुरजस्रसुखं विशोकं। सध्र्यङ्नियम्य यतयो यमकर्त्तहेतिं जह्युः स्वराडिव निपानखनित्रमिंद्रः।४८

१रा ये[...]नंशगानिराक्रिरिवक्रिया न्निनं दीक्षणानिव्यक्तिमात्रं क्रियते नोत्पाद्यादिकमिति भावः। नन्वेसा यद्भावेपि माया मलापकरणेन विकार्यत्वं स्यादेव व्रीहीणामि
कृत्य२ वतुषापाकरणेनेत्याशंक्याह। मायाऽभिमुखे स्थातुं विलज्जमानेव यस्मात् परैति दूरतोऽपसरति। ४७। तस्मादेवं भूतं भगवति नियमितमनसां कृतार्था
नां न किमपि मस्तीत्याह। सहांचतीति। सध्र्यक् सहचरं मनः यच्छतीति नियम्य यस्मिन् स्थिरीकृत्य यतयः यत्नशीलाः कर्त्तृभिदः तच्चिरामोक्षकर्तृः। तत्त्वे हेतिसाधनं
जह्युः त्यजेयुः अनुपयोगात्तत्रादियंतद्दृष्टांतः। उपयोगाभावेन साधनानां त्यागे दृष्टांतः। निपीयते यस्मिन्निति निपानं कूपः तस्य खनित्रं खननसाधनं यथा स्वराट् स्वयमे राम
वपर्जन्यरूपेण विराजमान इंद्रो नाद्रियेत तद्वदिति॥ यद्वा॥ स्वेनैव राजत इति स्वराट् दरिद्रः स यथा[...]सम्पन्नधः सन् कर्म्मकारदशायां गृहीतं निपानखनित्रं जहाति ३०
तद्वदित्यर्थः। ४८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व२ लर

एवं भगवदर्जन्मसुखं विशोकं ब्रह्मैव भगवतः स्वरूपं तं साक्षान्नांचन प्राप्यं छत्रं वा किंचिदस्तीत्युक्तं । इदानीं ततः श्राकृतः एव सर्वफलदाता सर्वकर्मप्रवर्त्तक
श्चेत्याह । सतां श्रेयसां फलं नां विभुर्दातापि हेतुः । भावानां ब्राह्मणादीनां स्व भावैः शमदमादिभिर्विशेषणैर्विहितस्य सतः शुभस्य कर्मणो यतः प्रव
र्त्तकात् प्रसिद्धिः । यद्वा भावानां महदादीनां स्वभावेन परिणामेन विहितस्य सतः कार्यस्य प्रसिद्धिः स एव सर्गादीनां दातेत्यर्थः । ननु कर्मकर्त्तुर्मृतस्य क
थं स्वर्गादिफलं स्यात्तत्राह । स्वारंभकधातूनां भूतानां विगमे वियोगे सति स्थितं तु विशीर्यमाणेपि देहे तत्र संस्थं व्योमेव यस्तेन सह न विशीर्यते यतः

सतां श्रेयसामपि विभुर्भगवान् यतोस्य भावस्वभावविहितस्य सतः प्रसिद्धिः । देहे स्वधातु विगमेनु विशीर्यमाणे व्योमेव तत्र पुरुषो न वि
शीर्यतेजः ॥४९॥ सोयं तेभिहितस्तात भगवान् विश्वभावनः । समासेन हरेर्नान्यदन्यस्मात् सदसच्च यत् ॥५०॥ इदं भागवतं नाम
यन्मे भगवतोदितं । संग्रहोयं विभूतीनां त्वमेतद्विपुलीकुरु ॥५१॥ यथा हरौ भगवति नृणां भक्तिर्भविष्यति । सर्वात्मन्यखिलाधारे इति संक
ल्प्य वर्णय ॥५२॥ मायां वर्णयतोमुष्य ईश्वरस्यानुमोदतः । शृण्वतः श्रद्धया नित्यं माययात्मा न मुह्यति ॥५३॥ ॥ इति श्रीभागवते म
हापुराणे द्वितीयस्कंधे ब्रह्मनारदसंवादे सप्तमोध्यायः ॥७॥

ती३

ल्पजः तेन सह न जातः । तस्य पुरुषस्य श्रेयसां प्रभुरित्यर्थः ॥४९॥ अध्यायत्रयस्यार्थमुपसंहरति सोयं ते इति समासेन संक्षेपेणाभिहितः तमेवा
ह सदसत्कार्यकारणं च हरेरन्यन्न भवति न तु हरेस्तद्व्यतिरेके तत्कर्तृत्वप्रसंगः स्यात् । न त्वन्यस्मात् कारणभूतो हरिः कार्याद्व्यतिरिक्त इत्यर्थः
५० ॥ अयं च विभूतीनां संग्रह उदितः ॥५१॥ यथा वर्णितेन नृणां भक्तिर्भविष्यति एवं संकल्प्य संवित्स्वतया । हरिलीलाप्राधान्येन श्रीभागवतं वर्ण
य नतु मायिकं सविधाते न केवलं तत्त्व मित्यर्थः ॥५ [illegible] वत्स्नेहेनेत्यत आह । मायामिति ॥५३॥ द्वितीये सप्तमः ॥७

२।वेकार२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाःद्विः
२१

॥२॥३॥ १४॥

अष्टमे देहसंबंधमात्मनिप्पनीशजीवत्सोः ॥ स्कुजं परीक्षिदाप्रछत पुराणं बुबुभित्मन्नुस्तेन विपुलीकृ विसृकं तदेव विपुलीकरणं प्रछति। ब्रह्मणेति त्रिभिः॥ अगुणस्य गुणातीतस्यापि। देवदर्शनो नारदः॥१॥ निःसंगं मनः श्रीकृष्णे निवेश्येति श्रवणस्य दर्शितः सोपि श्रद्धया श्रृण्वतो नान्यदपेक्षत इत्याह। श्रृण्वत इति। स्वप्रयत्नं विना भगवान् स्वयमेव हृदि विशति॥४॥ भावसरोरुहे हृदयपंके लं प्रविष्टः कृष्णस्तं सर्वमलं धुनोति। सलिलस्येति दृष्टांतः अन्यामिश्रणादिना कृतस्य जलेषु शोधितेत देवकेवलं शुध्यति। न तु नदीतडागादिगतं मलं च भवः कृष्णः स्वांतस्थित एव न तु सर्वथा विलीयते। अतएव किंचिच्चलनेन पुनः॥ शुभ्य

राजोवाच॥ ब्रह्मणा चोदितो ब्रह्मन् गुणाख्यानेऽगुणस्य च॥ यस्मै यस्मै यथा प्राह नारदो देवदर्शनः॥१॥ एतद्वेदितुमिच्छामि तत्त्वं वेदविदां वर॥ हरेरद्भुतवीर्यस्य कथा लोकसुमंगलाः॥२॥ कथयस्व महाभाग यथाहमखिलात्मनि॥ कृष्णे निवेश्य निःसंगं मनस्त्यक्ष्ये कलेवरं॥३॥ श्रृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितं॥ कालेन नातिदीर्घेण भगवान् विशते हृदि॥४॥ प्रविष्टः कर्णरंध्रेण स्वानां भावसरोरुहं॥ धुनोति शमलं कृष्णः सलिलस्य यथा शरत॥५॥ धौतात्मा पुरुषः कृष्णपादमूलं न मुंचति॥ मुक्तसर्वपरिक्लेशः पांथः स्वशरणं यथा॥६॥

तिचा। एवं तपोदानादिप्रायश्चित्तं न सर्वथा सर्वेषां सर्वपापं धुनोति किंतु सावशेषं तच्चकस्मिंश्चिदेव किंचिदेव॥ हृदि प्रविष्टमात्रस्तु श्रीकृष्णः सर्वेषां सर्वपापं निःशेषं हरतीत्यनेन दृष्टांतेनोक्तं सलिलस्य मलं यथा शरदिति॥५॥ ततश्च कृतार्थो निवर्त्तत इत्याह। धौतात्मेति। पापमुक्तः सर्वेषां रागद्वेषादयः परिक्लेशाः येन पांथः प्रवासादागतः स्वशरणं गृहं यथा न मुंचति तद्वत्॥६॥ ॥ रामः
३१

श्रव यथा२

तदेवं गोसुकामाविकृत्य संदिग्धानर्थान्पृच्छति। अथ धातुमतः धातवो भूतानि तन्मं बंधुभूतस्य अस्य लौकिकस्यात्मनः धातुनिर्देहारंभ इति यत् एतत् किं यदृच्छया निमित्तं हेतुना वा कर्मादिना भवंतो यथावज्ज्ञानंति। अतः कथयंतितिविशेषः।७। यस्यासावीश्वरः सोप्येतत्तुल्यदेहवान् प्रोक्तः अतस्तस्य को विशेष इत्याशयेन पृच्छति आसीदिति साधेन। लोकानां संस्थानं रचना तदेव लक्षणं स्वरूपं यस्य तत्पद्मं यस्योदरात्। असावीश्वरः इयत्तावयवैः परिमितैरवयवैरयं लौकिकः पुरुषो यावान् महत्संख्याकावयवयुक्तः संस्थावान् अवयववानिव च प्रोक्तः अतः को विशेषस्तस्येति।८। अवयवरूपं च विशेषेण वाच्य इ आसीद्३

तावान् प्रोक्तः

यद्धातुमतो ब्रह्मन्देहारंभोस्य धातुभिः। यदृच्छया हेतुना वा भवंतो जानते यथा॥७॥ आसीद्यदुदरात्पद्मं लोकसंस्थानलक्षणं। यावानयं वै पुरुष इयत्तावयवैः पृथक्। तावानसाविति प्रोक्तः संस्थावयववानिव।८। अजः सृजति भूतानि भूतात्मा यदनुग्रहात्। ददृशे येन तद्रूपं नाभिपद्मसमुद्भवः।९। स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः। मुक्त्वात्ममायां मायेशः शेते सर्वगुहाशयः।१०। पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः। लोकैरमुष्यावयवाः सपालैरिति शुश्रुमः॥११॥ ॥

साह। अजो ब्रह्मा। भूतानां यस्य प्राधान्यात्मा नियंता समष्ट्युपाधित्वात्। येन च यत्तु गृह्णता तस्य रूपं ददृशे दृष्टवान्। एतच्च तस्यापि कूटस्थस्य। किमात्मनः सृजं सृजतो मिश्रष्टोह मीशयैवान्यो वेति। इत्यादिनोक्तमनूद्यते। अग्रेतु स्पष्टं न विप्स्यति। प्रश्नांतरमाह। स चापीति। यत्र शेते येन रूपेण वा निष्टते विश्वस्य स्थित्यादयो यस्मात्। एवमादिप्रश्नानां तत्त्वतो ईहस्मुदाहर्तुमिति सर्वतिक्रियायां संबंध।१०। प्रश्नांतरमाह। पुरुषस्यावयवैः पूर्वं कल्पिता लोका इह अवयवैर्लौकिकान्कथं सपालैरिति लोकैरमुष्य अवयवाः सपालैरिति तस्य हि पादसूक्तमिता दौर्बल्यमुखा कुर्वंतो वयं॥११॥

भा॰ द्वि॰ ३२

एवंसंदेहनिवृत्त्यर्थंयाप्तांष्टष्ट्वाइदानीमन्यान्बहून्पृच्छतियनि[illegible]तिस्यावानित्यादिना [illegible]हान्विकल्पोवांतरम्भूतादिशब्दोयस्मात्यस्यवाचक इति
यासतः। स्थूलदेहाभिमानिनोमनुष्यादिदेवतादेरायुषःप्रमाणंअनुमानप्रकारःइष्टः॥१२॥ विशेषंपृष्ठतिकालस्येति। अनुगतिःप्रवृत्तिःकर्म
गतयःकर्मप्राप्यानिस्थानानितिवादृशीःयादृशःप्र॥१३॥ गुणानांसत्वादीनांपरिणामंदेवादिरूपमिच्छतांगुणिनांजीवानांमध्येयस्मिन्परिणामेकर्म
णांपुण्यपापानांसमावायःसमुदायःकेनकर्मसमुदायेनकर्थंकृतेनकोधिकारीदेवादिभावंप्राप्नोतीत्यर्थः॥१४॥ भूतादीनांसंभवःएतानितौकां

यावान्कल्पोविकल्पोवायथाकालोनुमीयते। भूतभव्यभवच्छब्दःआयुर्मानंचयत्सतः॥१२॥ कालस्यानुगतिर्यात्तुलक्ष्यतेण्वीबृहत्य
पि। यावत्यःकर्मगतयोयादृशीर्द्विजसत्तम॥१३॥ यस्मिन्कर्मसमावायोयथायेनोपगृह्यते। गुणानांगुणिनांचैवपरिणाममभीप्सतां॥१४॥ भू म
पातालककुप्व्योमग्रहनक्षत्रभूभृतां। सरित्समुद्रद्वीपानांसंभवश्चैतदोकसां॥१५॥ प्रमाणमंडकोशस्यबाह्याभ्यंतरभेदतः। महतांचानु
चरितंवर्णाश्रमविनिश्चयः॥१६॥ अवतारानुचरितंयदाश्चर्यतमंहरेः। युगानियुगमानंचधर्मोयश्चयुगेयुगे। नृणांसाधारणोधर्मः
सविशेषश्चयादृशः। श्रेणीनांराजर्षीणांचधर्मःकृच्छ्रेषुजीवतां॥१८॥

सियेषांप्राणिनांतेषांचसंभवःयच्चेतिसर्वत्रानुषंगः॥१५॥ वर्णानामाश्रमाणांचविनिश्चयःतैस्तैर्नावैर्निर्धारः॥१६॥ युगेयुगेप्रतियुगंयोधर्मःय
श्चहरेरवतारानुचरितं॥ सविशेषःवर्णाश्रमनिबंधनःश्रेणीनांतत्तत्व्यवसायोपजीविनांव्यवहारनियमलक्षणोधर्मः॥ राजर्षीणांप्रजापालनाधि राम ३२
कारिणां॥ कृच्छ्रेषुआपत्सुजीवतांसर्वेषां॥१८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त १

सर्वेषां तत्त्वानां महदादीनां परिसंख्यानं संख्या लक्षणं स्वरूपं हेतुतो लक्षणं तत्कार्यहेतुत्वेन लक्षणमित्यर्थः । पुरुषाराधनस्य विधिः देवपूजाप्रकारः अष्टां
गयोगस्य च विधिः । १९ । योगेश्वराणामैश्वर्याण्यणिमादीन्यर्चिरादिगतिः लिंगशरीरस्य भंगः प्रलयः । वेदा ऋग्वेदादयः उपवेदा आयुर्वेदादयः ध
र्मा धर्मशास्त्राणि तेषां इतिहासपुराणयोश्च गतिः स्वरूपं । २० । संप्लवः अवांतरप्रलयः । यद्वा सम्यक् प्लवनं उद्भवः विक्रमः स्थितिः प्रतिसंक्रमो
महाप्रलयः । इष्टं वैदिकं कर्म पूर्तं स्मार्तं वापीकूपतडागादि देवतायतनानि च । अन्नप्रदानमारामः पूर्तमित्यभिधीयत इति । तत्र च काम्यानां

तत्त्वानां परिसंख्यानं लक्षणं हेतुलक्षणं । पु रुषाराधनविधिर्योगस्याध्यात्मिकस्य च । १९ । योगेश्वरैश्वर्यगतिर्लिंगभंगस्य योगिनां
वेदोपवेदधर्माणामितिहासपुराणयोः । २० । संप्लवः सर्वभूतानां विक्रमः प्रतिसंक्रमः । इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः
२१ । यश्चानुशायिनां सर्गः पाखंडस्य च संभवः । आत्मनो बंधमोक्षौ च व्यवस्थानं स्वरूपतः । २२ । यथात्मतंत्रो भगवान् विक्रीडत्यात्ममायया
विसृज्य वा यथा मायामुदास्ते साक्षिवद्विभुः ॥ सर्वमेतन्मृत भगवन् पृच्छतो मेनु पूर्वशः ॥ तत्वतोर्हस्युदाहर्तुं प्रपन्नाय महामुने । अत्र प्रमा
णं भगवान् परमेष्ठीय थात्मभूः । परे चेहानुतिष्ठंति पूर्वेषां पूर्वजैः कृतं । २५ । न मेसवः परायंति ब्रह्मन्ननशनादमी पिबतोच्युतपीयूषम
न्यत्राकुपितात् द्विजात् । २६ ।
मग्निहोत्रादीनां विधिः अविरोधप्रकारः । २१ । अनुशायिनां लीनोपाधीनां जीवानां । आत्मनो जीवस्य अवस्था [illegible] नं
बंधमोक्षातिरिक्तस्वरूपेणावस्थानं । २२ । उदास्ते प्रलये । २३ । चत्वाष्टादष्टष्टमपि । २४ । प्रमाणं सम्यक् ज्ञाता । यतस्त्वं ब्रह्मनारदव्यासक्रमेण संप्र
गयोस्मीति सामान्यन्यायेनाह । परे चेति यद्वा त्वदंशे नाय भ्रोगतानुगतिका एवं तत्तत्वविदस्त्वाह । परे चेति । २५ । ननु तवानशनात् द्विजकोपात्संभाव्याकु
लस्य कृतः श्रवणं तत्राह । नेति । न परायंति नापगच्छंति [illegible] व्याकुलीभवंतीत्यर्थः [illegible] च्युतकीर्त्तिपीयूषं पिबतः । २६ ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द्वि॰
२३

उपामंत्रितः पृष्टः संस्थासौ पतिस्तस्य ॥२७॥ ब्रह्मकल्पे प्रथमकल्पे ॥ भागवता ... नैव प्रश्नानां उत्तरं दातुमुपक्रांतवानित्यर्थः ॥२८॥ पांडुनां
मृषभः श्रेष्ठः आनुपूर्व्येणेति प्रस्तावक्रमोत्र विवक्षितः न प्रश्नक्रमः ॥२९॥ इति द्वितीयेऽष्टमः ॥ राजप्रश्नोत्तरं वक्ष्यन् ब्रह्मणे हरिणोदितं ॥ कथयामा
स नवमे श्लोकैर्भागवतं पुनः ॥ तत्र यत्प्रागुक्तं यद्धातुमतः संतेन जीवस्य कथं देहसंबंध इति तत्रोत्तरमाह ॥ आत्मनो हरेर्मायामंतरेणानुभवरू
पस्यात्मनः अर्थेन द्रव्येण देहादिना संबंधः अंजसा तत्त्वतो न घटते ॥ अत्र हेतुः परस्येति ॥ स्वप्नद्रष्टुर्यथा स्वप्नदेहसंबंधो न घटते तद्वत् ॥१॥ संसारे

सूत उवाच ॥ ॥स उपामंत्रितो राज्ञा कथायामिति सत्पतेः ॥ ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि ॥२७॥ प्राह भागवतं नाम पुराणं ब्र
ह्मसंमितं ॥ ब्रह्मणे भगवत्प्रोक्तं ब्रह्मकल्प उपागते ॥२८॥ यद्यत्परीक्षिदृषभः पांडूनामनुपृच्छति ॥ आनुपूर्व्येण तत्सर्वमाख्यातुमुपचक्रमे ॥ च२
२९॥ ॥इति श्रीभागवते महापुराणे द्वितीयस्कंधेऽष्टमोऽध्यायः ॥८॥ ॥श्रीशुक उवाच ॥ आत्ममायामृते राजन् परस्यानुभवात्मनः ॥
न घटेतार्थसंबंधः स्वप्नद्रष्टुरिवांजसा ॥१॥ बहुरूप इवाभाति मायया बहुरूपया ॥ रममाणो गुणेष्वस्या ममाहमिति मन्यते ॥२॥ यर्हि
वाव महिम्नि स्वे परस्मिन् कालमाययोः ॥ रमेत गतसंमोहस्त्यक्त्वोदास्ते तदोभयं ॥३॥

विमायया एवेत्याह ॥ बहुरूपः बाल्ययुवादिरूपः देवनरादिरूपश्च आभाति गुणैर्देहादिषु ॥२॥ अत एव न क्रियायोगेन तन्निरासे मतिमोक्षोपि घटत इत्या
ह यर्हीति ॥ वावशब्द एवार्थे स्व एव महिम्नि यदा रमेत तदेवाह ॥ कालमाययोः पुरुषप्रकृत्योः परस्मिन् ॥ तदा उभयं अहं ममेति च त्यक्त्वा उदास्ते पूर्णस्व
स्वरूपेणावतिष्ठते ॥ तदुक्तं ॥ यया संमोहितो जीव आत्मानं त्रिगुणात्मकं ॥ परोपि मनुतेनर्थं तत्कृतं चाभिपद्यते ॥ अनर्थोपशमं साक्षात् भक्तियोग राम
मधोक्षजे ॥ लोकस्याजानतो व्यासश्चक्रे सात्वतसंहितामिति ॥३॥ पु२ २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे    य३

यद्येवं परमेश्वरस्यापि देहसंबंधाविशेषात् कथं तर्हि तस्यामोहः स्यादिति । आसीद्यदुदरात्पद्ममित्यादिना तत्राह । आत्मनो जीवस्य तत्त्वविशुद्ध्यर्थं त
त्त्वज्ञानार्थं तद्भवत्स्वेव कथितं यत्तु पद्म आदिना भजनं तं भगवान् ब्रह्मणे ... ह । किं कुर्वन् कृतं सत्यं चिद्घनं रूपं दर्शयन् दर्शने हेतुः अव्यलीकेन व्रतेन
तपसा आदृतः सेवितः सन् । अयं भावः जीवस्याविद्यया मिथ्यारूपदेहसंबंधः ईश्वरस्य तु योगमायया चिद्घनलीलाविग्रहाविर्भाव इति महान् विशे
षः । अतस्तद्भजनात् मोहोपपत्तिरिति ॥ ४ ॥ भगवद्भजनादेव तत्त्वज्ञानमित्येतत्प्रपंचयिष्यन् ब्रह्मणोपि तत्त्वज्ञानं तत्प्रसादादेवेति दर्शयितुं
१ ति ...समाह । स इत्यादिना परो गुरुः त्वक्तिरैर्सोपदेष्टा स्वधिष्ण्यं पद्मं । आस्थाय अधिष्ठाय । तस्य अधिष्ठानान्वेषणाय पूर्वं जले निमग्नः पश्चात्स

आत्म तत्त्वविशुद्ध्यर्थं यदाह भगवान् ऋतं । ब्रह्मणे दर्शयन् रूपमव्यलीकव्रतादृतः ॥ ४ ॥ स आदिदेवो जगतां परो गुरुः स्वधिष्ण्य
मास्थाय सिसृक्षयैक्षत । तां नाध्यगच्छद्दृशमत्र संमतां प्रपंचनिर्माणविधिर्यया भवेत् ॥ ५ ॥ स चिंतयन् द्व्यक्षरमेकदांभस्युपाशृणो
द्द्विर्गदितं वचो विभुः । स्पर्शेषु यत्षोडशमेकविंशं निष्किंचनानां नृप यद्धनं विदुः ॥ ६ ॥

ल१

स्वधिष्ण्ये स्थित्वा सिसृक्षः ऐक्षत कथं स्रष्टव्यमित्यालोचितवान् । तां दृशं प्राज्ञां अत्र सृष्टिविषये संमतां अव्यभिचारिणीं विधिः प्रकारः ॥ ५ ॥
सृष्टिं चिंतयन् कदाचिद् द्व्यक्षरं वचः अंभसि उपाशृणोत् उपसमीपे श्रुतवान् । ते अक्षरे दर्शयति । कादयो मावसानाः स्पर्शाः तेषु यत्षोडशं तकारः । अन्येन विंशं प
...निष्किंचनाः तच्च द्विर्गदितं तप तपेति कारः । यच्चैकविंशं पकारः । वचसो निर्देशार्थं तदर्थमाह हे नृप निष्किंचनानां त्यक्तधनानां धनं यद्विदुः । येन
...तपोधना इति प्रसिद्धाः । तच्च द्विर्गदितं तप तपेति । लोके मध्यमपुरुषैकवचनं ...स्य चान्यार्थं प्रासादं विधिरूपान्वेषणे इत्यर्थः ॥ ६ ॥
सै१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा·द्वि·
३४

एवं निशम्य तस्य वचो वक्तुर्दिदृक्षया ततः प्रचलितः सन् दिशो विलोक्य पु[illegible] धिष्ण्यमास्थाय केन चित्तस्य हं नियुक्त इव तच्चात्मनो हितं विमृ
श्य तपसि मनो धृतवानित्यर्थः ॥७॥ ततश्च सः अखिलानां लोकानां तापनं [illegible] कं तपः अतप्यत कृतवान् । तपस्तेपे तस्य कर्मवत्सोर्थे ऽमोघं द
र्शनं यस्य जितः अनिलः आत्मा मनश्च येन । विजितानि उभयेंद्रियाणि ज्ञानकर्मात्मिकानि येन तपतां तपश्चरतां मध्ये तपीयान् अतिशयेन
तपस्वी ॥८॥ तस्मै ब्रह्मणे स्वं लोकं वैकुंठाख्यं परं श्रेष्ठं । न यत्परं यतः परमुत्कृष्टमन्यन्नास्ति । तमेव लोकमनुवर्णयति पंचभिः व्यपेताः संक्ले

निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्रान्यदपश्यमानः । स्वधि[illegible]मास्थाय विमृश्य तद्धितं तपस्युपादिष्ट इवादधे मनः ॥७॥ दिव्यं स
हस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेंद्रियः । अतप्यत स्माखिललोकतापनं तपस्तपीयांस्तपतां समाहितः ॥८॥ तस्मै स्व
लोकं भगवान् सभाजितः संदर्शयामास परं न यत्परं । व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतं ॥९॥ प्रवर्त्तते य
त्र रजस्तमस्तयोः सत्वं च मिश्रं न च कालविक्रमः । न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः ॥१०॥ श्यामावदाताः श
तपत्रलोचनाः पिशंगवस्त्राः सुरुचः सुपेशसः । सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः ॥११॥ ॥

तयोः
श्रादयो यस्मात् । स्वदृष्टवद्भिः । यथावत्स्वस्य दृष्टं दर्शनमस्ति येषां आत्मविद्भिरित्यर्थः ॥९॥ तामसं मिश्रं सत्वं च न प्रवर्त्तते । किंतु शुद्धमेव सत्वं । कालविक्रमो
नाशः । अपरे रागलोभादयो न संतीति किमुत वक्तव्यं । अनुव्रताः पार्षदाः ॥१०॥ श्यामाश्च ते अवदाताश्च पद्मनेत्राः पीतांबराः सुरुचः अतीव कमनीयाः सुपे
शसः अतिसुकुमाराः ॥ उन्मिषंत इव प्रभावंतो मणिप्रवेका मणिपुत्तमा येषु तानि निष्काणि पदकान्याभरणानि येषां ते सुवर्चसः अतितेजस्विनः ॥११॥

राम
३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दि१ १यत्तः१ जः ११ग

प्रवालादिवत्वर्चोवर्णोयेषांतेपरिस्फुरंतिकुंडलानिमौलयोमौलयोमालाश्चसंतियेषां॥पार्षदाननुवर्ण्यपुनरपिलोकमनुवर्णयति।भ्राजि
ष्णुभिर्दीप्यमानाभिःप्रमदोत्तमानांदिवःकांतयस्ताभिःविद्योतमानःसहविद्युद्भिःवर्त्तमानाःयेविद्युतःताभिरभ्रावलिभिःतत्रविद्युतइव
स्त्रियःअभ्रपंक्तयइवविमानानिनभइवलोकः॥१२॥श्रीःसंपत्तद्रूपिणीमूर्त्तिमती।मानंपूजांविभूतिभिर्नानाविलासैःप्रेंखंआंदोलंसंश्रिता।कु
१२

प्रवालवैडूर्यमृणालवर्चसःपरिस्फुरत्कुंडलमौलिमालिनः॥११॥भ्राजिष्णुभिर्यःपरितोविराजतेलसद्विमानावलिभिर्महात्म
नां।विद्योतमानःप्रमदोत्तमाद्युभिःसविद्युदभ्रावलिभिर्यथानभः॥१२॥श्रीर्यत्ररूपिण्युरुगायपादयोःकरोतिमानंबहुधाविभूति
भिः।प्रेंखंश्रितायाकुसुमाकरानुगैर्विगीयमानाप्रियकर्मगायती॥१३॥ददर्शतत्राखिलसात्वतांपतिंश्रियःपतिंयज्ञपतिंजगत्प
तिं।सुनंदनंदप्रबलार्हणादिभिःस्वपार्षदमुख्यैःपरिसेवितंविभुं॥१४॥भृत्यप्रसादाभिमुखंदृगासवंप्रसन्नहासारुणलोचनान
नं।किरीटिनंकुंडलिनंचतुर्भुजंपीतांबरंवक्षसिलक्षितंश्रिया॥१५॥अध्यर्हणीयासनमास्थितंपरंवृतंचतुःषोडशपंचशक्तिभिः॥१६॥

सुमाकरोवसंतःतस्यानुगाःभ्रमराःतैर्विविधंगीयमाना।स्वयंतुप्रियस्यहरेःकर्मगायंतीवर्त्तते॥१३॥यएवंभूतोलोकःतत्रतस्मिन्॥१४॥भृत्या
नांप्रसादेअभिमुखंदृगेवआसवइवदृग्दृष्टिर्हर्षकरीयस्यतंप्रसन्नहासमरुणलोचनंचाननंयस्य।वक्षसिस्थितयाचश्रियालक्षितंअलंकृतमित्य त२
र्थः॥१५॥अध्यर्हणीयंवरिष्ठंसिंहासनंतत्रस्थितं।प्रकृतिपुरुषमहदहंकाररूपाःषोडशएकादशेंद्रियमहाभूतात्मकाःपंचतन्मात्ररूपाःयाःशक्तयस्ता
भिर्वृतं॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना.टि.
३५ १८।

योगैः स्वात्मविवेकैः ऐश्वर्यादिभिः । इतरैश्च ... मुमुक्षुभिः । आगन्तुकैः तु साधारणैरित्यर्थः । एवं सत्यपि स एव धामन् स्वरूप एव रममाणं अमृत ए-
नमीश्वरं तस्य दर्शनेन यः आह्लादः तेन परिप्लुतं व्याप्तं स्वान्तरम् अन्तःकरणं यस्य । हृष्यन्ती रोमाञ्चिता तनुर्यस्य । प्रेमभरेण अश्रूणि लोचनेषु यस्य विश्वस्र-
क् ब्रह्माणः । पारमहंस्येन पथा ज्ञानमार्गेण । १७ । तं ब्राह्मणं भगवान् ब्रह्मा प्रजाविसर्गे कार्ये निजशासनार्हणं स्वयोगार्हं प्रजाविसर्गे सृष्टौ स्थितम् ५२
इति शेषान्वयः । ईषत्स्मितेन रोचिर्दीप्तिः शोभा यस्याः तया गिरा । १८ । सिसृक्षया हेतुना चिरं संभृतेन तपसाहं सम्यक् सम्यक् तोषितः तुष्टोऽस्मि ते

१२अ१

युक्तं न योगैः स्वैरित्याद्यकैः स एव धामन् रममाणमीश्वरम् ॥ १६ ॥ तद्दर्शनाह्लादपरिप्लुतान्तरो हृष्यत्तनुः प्रेमभराश्रुलोचनः । ननाम पादाम्बु-
जमस्य विश्वसृक् यत्पारमहंस्येन पथाधिगम्यते ॥ १७ ॥ तं प्रीयमाणं समुपस्थितं तदा प्रजाविसर्गे निजशासनार्हणम् । बभाष ईषत्स्मित-
शोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृशन् ॥ १८ ॥ श्रीभगवानुवाच ॥ त्वयाहं तोषितः सम्यक् वेदगर्भ सिसृक्षया । चिरं भृते-
न तपसा दुस्तोषः कूटयोगिनाम् ॥ १९ ॥ वरं वरय भद्रं ते वरेशं माभिवाञ्छितम् । ब्रह्मञ्छ्रेयः परिश्रामः पुंसां मद्दर्शनावधिः ॥ २० ॥ मनी-
षितानुभावोऽयं मम लोकावलोकनम् । यदुपश्रुत्य रहसि चकर्थ परमं तपः ॥ २१ ॥ ॥
य२

षयितुमशक्यः । १९ । मा इति मां श्रेयसां फलानां परिश्रामः साधनप्रयासः मम दर्शनमवधिर्यस्य स तथा अतोऽधिकं तु पुनः फलं नास्तीत्यर्थः । २० । एत-
च्च मृडापयैव त्वया ज्ञातमित्याह । मनीषितमिति तस्य इदं दातव्यमिति याम मेऽच्छा तस्यानुभावोऽयं । कोऽसौ तत्राह । मम लोकस्यावलोकनं यत् । यच्चेदं राम
मम एव तपोबलेन ज्ञातमिति त्वं तं मन्यस्व तत् प्रवृत्तेरपि मत्कृतत्वादित्याह । रहसि तप तपेति यद्वचः उपश्रुत्य परमं तपश्चकर्थ कृतवान- ३५
सि ॥ २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प३ च१

तदपित्वां प्रतिमयैवादिष्टं उपदिष्टं। कदातत्रतु दाम्भ्यारंनेत्वयिकर्मणि विमोहिते सति। किंतु तपोनाम ममैव शक्तिरित्याह। तपोमेहृदयं अंतरं गात्रा
त्कि: आत्मास्वरूपं। यस्यज्ञानमयंतपः शक्तिः कृतेः २२ ग्रसामिसंहरामि बिभर्मि पालयामि वीर्यं शक्तिः २३ अस्मत्तः अधिष्ठाता गुहायां बुधाववस्थि
सन२ तः यद्यपि वेद तथापीतु तरेणान्वयः २४ नाथमानस्य याचमानस्य तप्यमानस्येतिवा। हे नाथ नाथय यत्प्रार्थ्यं संप्रयच्छ नाथितं याचितं ना
१४ थूनां। यासौ पतापैश्वर्यशाली प्रभु। नाथितमेवाह। परं सूक्ष्मं अवरं स्थूलं च ते रूपं यथा जानीयां। यथा च त्वं क्रीडसि तथा तद्विषयां मनीषां मयि धे २३॥

प्रत्यादिष्टं मया तत्र त्वयि कर्मविमोहिते। तपो मे हृदयं साक्षादात्माहं तपसोनघ। २२ सृजामि तपसैवेदं ग्रसामि तपसा पुनः। बिभ
र्मि तपसा विश्वं वीर्यं मे दुश्चरं तपः॥२३॥ ब्रह्मोवाच॥ भगवन् सर्वभूतानामध्यक्षोवस्थितो गुहां। वेद ह्यप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितं॥ २४॥
तथापि नाथमानस्य नाथ नाथय नाथितं। परावरे यथारूपे जानीयां ते त्वरूपिणः। २५ यथात्ममायायोगेन नानाशक्त्युपबृंहितं। वि
लुंपन् विसृजन् गृह्णन् बिभ्रदात्मानमात्मना॥२६॥ क्रीडस्यमोघसंकल्प ऊर्णनाभिर्यथोर्णुते। तथा तद्विषयां धेहि मनीषां मयि मा
धव॥२७॥ भगवच्छिक्षितमहं करवाण्यतंद्रितः। नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात्। २८

१ रूपं१

हीसुतरेणान्वयः। नानाशक्त्युपबृंहितं विश्वं विलुंपन् संहरन् विविधं सृजन् बिभ्रत् पालयन्। आत्मनो मे बहुधा स्वयमात्मानं ब्रह्मादिरूप स्वय१
त्वेन क्रीडसि २६ ऊर्णुते तंतुभिः आत्मानमाच्छादयति। २७ तत्किं सृष्टे किं यदि मुच्ये एवं तत्त्वज्ञानं प्रार्थयसे नेत्याह। भगवता त्वया शिक्षितं अ
नुष्ठितं प्रतंद्रितश्चनैः स्मः करिष्यामि। ...मनेन तत्त्वज्ञानेन तत्राह। यस्मात् ... भूतात्मिवानुग्रहात् प्रजासर्गमीहमानः कुर्वन्नपि अहंकारा
दिनिर्बंधोन न बध्येयमिति २८

ल३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याव

अथवं पंचमदोन विना सत्वकं विकालं स्यात् इति प्रार्थयते यावदिति। गो ईशते तया यावौ किकस्य सखुः सखेवाहं कृतः करस्पर्शनादिना ममत्वेन
संमानितः सन् प्रजासर्गरूपे तव परिकर्मणि सेवायां स्थितो विक्लवो माकुलएवं कुर्वन् विजनजामि तत्र मम मध्यमादिने देन सृजामि तावत् त्वत्सं
मानादहमप्यजः स्वतंत्र इति मानिनो मे समुन्नद्ध उत्कटो मदो मा भूत्। यद्वा। मदो मास समुन्नद्धमासमुन्नद्ध्यतां उक्तेनानवेदित्यर्थः॥२९॥ ज्ञानं
शास्त्रोत्थं विज्ञानमनुभवः। रहस्यं भक्तिः। सुगोप्यमपि वक्ष्यामीत्यादिनिर्दिशात्। तस्यांगं साधनं॥३०॥ यावानस्वरूपतः। यथा भावःया दृक् सत्वा

यावद्वस्वा सखुरविशतेकृतः प्रजाविसर्गे विनजामि नो जनं॥ अविक्लवस्ते परिकर्मणि स्थितो मामे समुन्नद्धमदोजमानिनः
॥२९॥ श्रीभगवानुवाच॥ ॥ ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितं॥ सरहस्यं तदंगं च गृहाण गदितं मया॥३०॥ यावानहं यथाभा
वो यद्रूपगुणकर्मकः॥ तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात्॥३१॥ अहमेवासमेवाग्रे नान्यद्यत्सदसत्परं॥ पश्चादहं यदेतच्च यो
वशिष्येत सोस्म्यहम्॥

वान् यानि रूपाणि यो निर्गुणाः कर्माणि च यस्य॥३१॥ एतदेव सम्यगुपदिशन् यावानित्यस्यार्थं स्फुटयति॥ अहमेवाग्रे सृष्टेः पूर्वमासं स्थितः। नाम
न्त् किंचित् यत् सत् स्थूलं असत् सूक्ष्मं परं तयोः कारणं प्रधानं तस्याप्यंतर्मुखतया तदा मय्येव लीनत्वात्॥ अहं च तदा आसमेव केवलं न त्वान्यद
करवं पश्चात् सृष्टेरनंतरमप्यहमेवास्मि यदेतद्विश्वं तदप्यहमस्मि प्रलये यो वशिष्येत सोप्यहमेव अनेन त्वानादिनात्वंतत्वाद्द्वितीयत्वा
च्च परिपूर्णोहमित्युक्तं भवति॥३२॥ ॥ म१



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या१ तू८

यथात्ममायायोगेनेत्यनेन मायार्थोऽपि प्रदिष्टस्तां वक्ष्यमाणोपयो[illegible]गित्वान्मायां निरूपयति ऋतेऽर्थं विनापि वास्तवमर्थं यद्यतः किमप्यनिरुक्तं आत्मन्यधि
धिष्ठाने प्रतीयेत सदपि च न प्रतीयेत तत् आत्मनो मम मायां विद्यात् । यथा आभासो द्विचंद्रादिरिति अर्थं विना प्रतीतौ दृष्टांतः । यथा तम[illegible]इति त
मो राहुः यथा ग्रहमंडले स्थितोऽपि न दृश्यते सतोऽप्रतीतौ ॥३४॥ यथात्मा वा इत्येतत्स्पष्टयति । यथा महाभूतानि भौतिकेषु अनुसृष्टेरनंतरं प्रविष्टानि
तेषु पूर्वमेव विद्यमानत्वात् । अप्रविष्टानि च प्रागेव कारणतया तेषु विद्यमानत्वांत तथा तेषु भूतभौतिकेषु अहं न च तेषु अहं । एवंभूता मम सत्तेत्यर्थः ॥३५॥

ऋतेऽर्थं यत्प्र[illegible]तीयेत न [illegible]येत चात्मनि । तद्विद्यादात्मनो मायां यथाभासो यथा तमः ॥३४॥ यथा महांति भूतानि भूतेषूच्चावचेष्वनु ॥ प्र
विष्टान्यप्रविष्टानि तथा तेषु न तेष्वहं ॥३५॥ एतावदेव जिज्ञास्यं तत्वजिज्ञासुनात्मनः । अन्वयव्यतिरेकाभ्यां यत्स्या[illegible]त्सर्वत्र सर्वदा ॥३६॥
एतन्मतं समातिष्ठ परमेण समाधिना । भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचित ॥३७॥ श्रीशुक उवाच । संप्रदिश्यैवमजनो जना
नां परमेष्ठिनं ॥ पश्यतस्तस्य तद्रूपमात्मनो न्यरुणद्धरिः ॥३८॥ अंतर्हितेंद्रियार्थाय हरये विहितांजलिः । सर्वभूतमयो विश्वं ससर्जेदं स पूर्व
वत् ॥३९॥ ॥

न प१ तु२

साधनमाह । आत्मनस्तत्वजिज्ञासुना एतावत्तत्वमेव जिज्ञास्यं विचार्यं तदेवाह । अन्वयः कार्येषु कारणत्वेनानुवृत्तिः । कारणावस्थायां च
तेभ्यो व्यतिरेकः तथा जाग्र[illegible]दाद्यवस्थासु तत्साक्षितयान्वयः । व्यतिरेक[illegible]श्च समाध्यादौ । एवमन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा च तदेवात्मेति ३६
॥ यत्प्रार्थितं नेह मनः प्रजासर्गमिति तत्प्रसादीकरोति । एतन्मतं सम्यगातिष्ठ समाधिना चित्तैकाग्र्येण कल्पेषु विकल्पाः विविधाः सृष्टयस्तेषु विमोहं
[illegible]र्त्ताभिमानितेरेशंनयास्यतीति ॥३७॥ एवं संप्र[illegible]दिश्य उपदिश्य जनानां परमेष्ठिनं परमे आधिपत्ये स्थितं ब्रह्माणं आत्मनस्तद्रूपं न्यरुणत् अंतर्हित
वान् ॥३८॥ अंतर्हिताः इंद्रियार्थाः [illegible]प्रत्यक्षं रूपं येन तस्मै बद्धांजलिः सन् ॥३९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द्वि०
३७

तदनंतरं पूर्वोक्तो ब्रह्मनारदसंवादः प्रवृत्त इत्याह । प्रजापतिरिति पंचभिः । प्रजानां भद्रमन्विछन् विमृशन् । सैव स्वार्थकाम्या स्वप्रयोजनेछा तया यम
नियमानतिष्ठत् ॥ ४० रिक्थादानां पुत्राणां मध्ये प्रियतमः । तं पितरं सेवमानः शीलादीनापरितोषयामास ॥ ४१ ॥ किंचिछन् विष्णोर्मायां विविदिषन् ॥ ४२ ॥
निशाम्य दृष्ट्वा ज्ञात्वेत्यर्थः मामां ॥ ४३ भगवता चतुःश्लोक्या संक्षेपेण प्रोक्तं विस्तरेण प्राह । दशलक्षणानि लक्षणानि यस्यार्थाविद्यंते यस्मिन् ततः ॥ ४४

प्रजापतिर्धर्मपतिरेकदा नियमान्यमान् । भद्रं प्रजानामन्विछन्नातिष्ठत्स्वार्थकाम्यया ॥ ४० तं नारदः प्रियतमो रिक्थादानामनुव्रतः
शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ॥ ४१ मायां विविदिषन् विष्णोर्मायेशस्य महामुनिः । महाभागवतो राजन्पितरं पर्यतोषयत् ॥ ४२ तु
ष्टं निशाम्य पितरं लोकानां प्रपितामहं । देवर्षिः परिपप्रछ भवान्यन्मानुपृछति ॥ ४३ तस्मा इदं भागवतं पुराणं दशलक्षणं । प्रोक्तं भगव
ता प्राह प्रीतः पुत्राय भूतकृत् ॥ ४४ नारदः प्राह मुनये सरस्वत्यास्तटे नृप । ध्यायते ब्रह्म परमं व्यासायामिततेजसे ॥ ४५ यदुताहं त्वया
पृष्टो वैराजात्पुरुषादिदं । यथासीत्तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ॥ ४६ इति श्रीभागवते महापुराणे द्वितीयस्कंधे नवमोध्यायः ॥ ९

तच्चं प्रदायतो भागवतं मायाज्ञातमित्याशयेनाह । नारद इति ॥ ४५ ॥ भागवतमाख्यानेनैव तत्प्रश्नानामुत्तरं दास्यामीत्याह । यदुतेति पुरुषावयवैर्लोकाः ए म
सपालाः पूर्वकल्पिताः इत्यादिना वैराजात्पुरुषादिदं विश्वं कथमासीदिति यदहं त्वया पृष्टः तद्यथावदुपाख्यास्यामि अन्यांश्च प्रश्नानिति ॥ ३६ ॥ इति द्वितीये नवमः ॥ ९ ३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततोभागवतमाख्यातंवैवदशमेस्फुटं। राजप्रश्नोत्तरंवक्तुमारेभेबादरायणिः। दशलक्षणंपुराणंप्राहेत्युक्तं। तानिदशलक्षणानिदर्शयति। अत्रे
तिमन्वंतराणिईशानुकथाश्चेतिद्वंद्वः। सर्गादयोत्रदशार्थालक्ष्यंते। नन्वेवमयमिदादशस्कंधेदंस्यात्तत्राह। दशमस्याश्रयस्य। विशुद्ध्यर्थंतत्त्वज्ञानार्थं भं
नवानांलक्षणंस्वरूपं। एकस्यैवप्राधान्यात्तन्मायंदोषइत्यर्थः। ननुतत्रनैवायंप्रतीयतेअतआह। श्रुतेनश्रुत्यैवस्तुत्यादिस्थानेषुअंजसासाक्षा
द्वर्णयंतिअर्थेनतात्पर्यवृत्त्याचतत्रतत्राख्यानेषु।२। सर्गादीनांप्रत्येकंलक्षणमाह। भूतानिआकाशादीनि। मात्राणिचशब्दादीनि। इंद्रियाणिचधी

श्रीशुकउवाच॥ ॥अत्रसर्गोविसर्गश्चस्थानपोषणमूतयः। मन्वंतरेशानुकथानिरोधोमुक्तिराश्रयः। दशमस्यविशुद्ध्यर्थंनवा
नामिहलक्षणं। वर्णयंतिमहात्मानःश्रुतेनार्थेनचांजसा।२। भूतमात्रेंद्रियधियांजन्मसर्गउदाहृतः। ब्रह्मणोगुणवैषम्याद्विसर्गः
पौरुषःस्मृतः।३। स्थितिर्वैकुंठविजयःपोषणंतदनुग्रहः। मन्वंतराणिसद्धर्मऊतयःकर्मवासनाः।४। अवतारानुचरितंहरेरस्या
नुवर्तिनां। पुंसामीशकथाःप्रोक्तानानाख्यानोपबृंहिताः।५॥ ॥

हे भिश्चमहदहंकारो। गुणानांवैषम्यात्परिणामात्ब्रह्मणःपरमेश्वरात्कर्तुर्भूतादीनांयद्विराड्रूपेणस्वरूपतश्चजन्मसंसर्गः। पुरुषोवै
० राजःतत्कृतःपौरुषःचराचरविसर्गोविसर्गइत्यर्थः।३। वैकुंठस्यभगवतोविजयःसृष्टानांतत्तन्मर्यादापालनेनोत्कर्षः। स्थितिः। स्थानंतत्कृतेषु स्व२
तदनुग्रहःपोषणं। तत्रतदनुगृहीतानांमन्वंतराधिपतीनांधर्मः कर्मणांवासनाःवेकृतंसंतानेक्रियंतेकर्मभिःसंतन्वंतइत्यूतयः। यद्वादृष्ट्या
त्संक्षेपार्थमिवयतेधर्मोरिदंरूपंःक्रियंतेकर्मभिर्विवर्धंतेसंक्षिप्यंतेइतिवाऊतयइत्यर्थः। हरेरवतारानुचरितंअस्यानुवर्तिनांचसत्कथाः। ईशा ४॥
नुकथाःप्रोक्ताइत्यर्थः।५॥ सतो ग२ लु२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्यात्मनो जीवस्य हरेर्योगनिद्रामनु पश्चात्तच्छक्तिभिः स्वोपाधिभिः सह शयनं लयः निरोधः अन्यथारूपं अविद्ययाध्यस्तं कर्तृत्वादि हित्वा स्वरू
पेण ब्रह्मतया व्यवस्थितिर्मुक्तिः ॥६॥ आभासः सृष्टिः निरोधो लयश्च यतो भवति ॥ अध्यवसीयते प्रकाशते च स ब्रह्मेति। परमात्मेति प्रसिद्ध आश्र
य उच्यते ॥७॥ आश्रयस्वरूपमसंप्रज्ञानुभवेन स्पष्टं दर्शयितुमध्यात्मादि विविनागमाह। योयमध्यात्मिकः पुरुषश्चक्षुरादिकरणाभिमानी द्र
ष्टा जीवः स एवाधिदैविकः चक्षुर्ध्यधिष्ठाता सूर्यादिस्तत्र कस्मिन्नेतयोर्विरूपो विच्छेदो यस्मात्स आधिभौतिकः चक्षुर्गोलकाद्युपलक्षितो दृश्यो
देहः पुरुष इति पुरुषस्य जीवस्योपाधि सत्त्वाद एष पुरुषोऽन्नरसमय इत्यादि श्रुतेः ॥८॥ एकमेकतराभाव इत्येतेषामन्योन्यसापेक्षसिद्धि

निरोधोस्यानुशयनमात्मनः सह शक्तिभिः ॥ मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ॥६॥ आभासश्च निरोधश्च यतश्चाध्यवसी
यते ॥ स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ॥७॥ योध्यात्मिकोयं पुरुषः सोसावेवाधिदैविकः ॥ यस्तत्रोभयविच्छेदः सस्मृ
तो ह्याधिभौतिकः ॥८॥ एकमेकतराभावे यदा नोपलभामहे ॥ त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ॥९॥

१ खं
द्धिर्न तत्त्वं दर्शयति तथाहि। दृश्यं विना तत्प्रतीत्यनुमेयं करणं न सिध्यति नापि द्रष्टा न च तद्विना करणप्रवृत्त्यनुमेयस्तदधिष्ठाता सूर्या
दिः न च तं विना करणं प्रवर्तते। न च तद्विना दृश्यमित्येवमेकतरस्याभावे एकं नोपलभामहे। तत्र तदा त्रितयं मालोचनात्मकेन यो वेद साक्षि
तया पश्यति परमात्मा आश्रयः। तेषामपि परस्पराश्रयत्वमस्त्येवेति तत्राह स्वाश्रयाश्रय इति विशेषणं स्वाश्रयः अनन्याश्रयः स चासावन्येषामाश्रयश्चेति
तथा च भगवान्कपिलः। दृग्रूपमार्कं वपुरत्र रन्ध्रे परस्परं सिध्यति यः स्वतः खे। आत्मा यदेषामपरो य आद्यः स्वयानुभूत्याखिलसिद्धिसिद्धिरिति
एतेनैव व्यभिचारित्वात्त्रिषांमायामयत्वमप्युक्तं अत एव पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः। लोकैरस्यावयवाः सपालैरित्यनेनोक्तो
विरोधः परिहृतः ॥९॥

राम
३८

१५त१

उक्तमेवाध्यात्मादिविभागं प्रपंचयन् पठुताहं ताहं त्वयाष्टष्टो वैराजात् पुरुषादिदं। यद्यासीत्तदुपाख्यास्य इति प्रतिज्ञातं तदुत्पत्तिप्रकारमाह। पुरुष इ
त्यादिना पुरुषो वैराजः अंडं वि[?] निर्भिद्य पृथक्कृत्य विनिर्गतः पृथक्स्थित इत्यर्थः। अयनं स्थानं अन्विछन् विमृशन् यतः शुचिः स्वयं अतः शु
चीः शुद्धाः अपः गर्भोदकसंज्ञाः असाक्षीत् ससर्ज॥१०॥ अप्सु वासं नारायणनाम निरुक्त्या स्पष्टयति। तेन अप्सु वासेन। यद्यस्मात् पुरुषान्नरः
तस्मादुद्भवो यासां ताः नाराः अपो अयनमस्येति नारायण इत्यर्थः। तदुक्तं आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन

पुरुषोंडं विनिर्भिद्य यदासौ स विनिर्गतः॥ आत्मनो यनमन्विछन्नपो स्राक्षीच्छुचिः शुचीः॥१०॥ तास्ववात्सीत्स्वसृष्टासु सहस्रं परिवत्स
रान्॥ तेन नारायणो नाम यदापः पुरुषोद्भवाः॥११॥ द्रव्यं कर्म च कालो यं स्वभावो जीव एव च॥ यदनुग्रहतः संति न संति यदु
पेक्षया॥१२॥ एको नानात्वमन्विछन् योगतल्पात्समुत्थितः॥ वीर्यं हिरण्मयं देवो मायया व्यसृजत्त्रिधा॥१३॥ अधिदैवमथाध्या
चारायोगात्।परब्रह्मनिष्ठा।तत्वद्योतकमाह।उपशमाश्रयमिति।२१।गुरुरेवात्मादैवतंचयस्यसः।अनुवृत्त्यासेवयायैःधर्मैःविस्तुतस्यात्मा।आत्मप्रदःस्वोपा
सकानां।यथाबलिप्रभृतीनां२२ अथोचितमितिहीनेषुदयां।समेषुमैत्रीं।उत्तमेषुप्रश्रयंचशिक्षेदित्यर्थः।२३।शौचंबाह्यंमृज्जलादिभिः।आन्तरंचाऽदंभमा

तस्माद्गुरुंप्रपद्येतजिज्ञासुःश्रेयउत्तमं।शाब्देपरेचनिष्णातंब्रह्मण्युपशमाश्रयं।२१।।तत्रभागवतान्धर्मान्शिक्षेद्गुर्वात्म
दैवतः।अमाययानुवृत्त्यायैस्तुष्येदात्मात्मदोहरिः।२२।सर्वतोमनसोऽसंगमादौसंगंचसाधुषु।दयांमैत्रींप्रश्रयंचभूतेष्व
द्धायथोचितं।२३।शौचंतपस्तितिक्षांचमौनंस्वाध्यायमार्जवं।ब्रह्मचर्यमहिंसांचसमत्वंद्वंद्वसंज्ञयोः।२४।सर्वत्रात्मेश्वरान्वीक्षां
कैवल्यमनिकेततां।विविक्तचीरवसनंसंतोषंयेनकेनचित्।२५।। ।।

नादिभिर्भावेन।तपस्वधर्माचरणं।।तितिक्षांक्षमां।मौनंवृथावाचामनुच्चारणं।स्वाध्यायंअधिकारानुरूपंवेदपाठादिकं।आर्जवंस्वच्छतां।ब्रह्मचर्यंयस्ययावद
दुचितं।ऋतुस्वदारनियमादि।अहिंसांभूतेष्वद्रोहं।द्वंद्वसंज्ञयोःशीतोष्णसुखदुःखादिरूपयोर्हर्षविषादराहित्यं।२४।आत्मेश्वरान्वीक्षांसर्वत्रचिद्रूपेणात्मेक्षांनियं
तृरूपेणेश्वरान्वीक्षांचकैवल्यमेकांतशीलत्वं।अनिकेततांगृहाद्यभिमानराहित्यं।विविक्तचीरवसनंविजनपतितानांवस्त्रखंडानांकुशानांवावल्क
लानांपरिधानं।२५।। ।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
१३

भागवते भगवद्भक्तिप्रतिपादिके अन्यत्र शास्त्रादौ या अनिंदा तां। मनसः प्राणायामैः वाचो मौनेन कर्मणो निरीहया दंडं। सत्यं यथार्थभाषणं शमदमौ अंतःकर
णबाह्येंद्रियनिग्रहौ २६ हरेर्जन्मकर्मगुणानां श्रवणादि। तदर्थे ईश्वरोद्देशेन सर्वकर्म विशेषतश्च यजनादि यत् तत्तदर्थे शिक्षेत २७ इष्टं दत्तमित्यादयो भावे नि
ष्ठाः वृत्तं सदाचारः आत्मनः प्रियं गंधपुष्पादि दारादीनप्यात्मस्थं परमेश्वराय निवेदनं सेवकतया समर्पणं यत्तच्छिक्षेत् २८ कृष्ण एवात्मा नाथश्च येषां

श्रद्धां भागवते शास्त्रेऽनिंदामन्यत्र चापि हि। मनोवाक्कर्मदंडं च सत्यं शमदमावपि २६ श्रवणं कीर्त्तनं ध्यानं हरेरद्भुतकर्मणः। ज
न्मकर्मगुणानां च तदर्थेऽखिलचेष्टितं २७ इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियं। दारान्सुतान्गृहान्प्राणान्यत्परस्मै निवेदनं २८
कृष्णा एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदं। परिचर्यां चोभयत्र महत्सु नृषु साधुषु २९ परस्परानुकथनं पावनं भगवद्यशः। मिथो रतिर्मि
थस्तुष्टिर्निवृत्तिर्मिथ आत्मनः ३० स्मरंतः स्मारयंतश्च मिथोऽघौघहरं हरिं। भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुं ३१

कृष्ण एवात्मा जीवस्य नाथो येषामिति वा तेषु। उभयत्र जंगमे स्थावरे स्थावरे जंगमे च या परिचर्या तां विशेषतो नृषु तत्रापि साधुषु स्वधर्मशीलेषु ततोऽपि महत्सु श्रीना एम
रदादिषु २९ एतेषु सह संगम्य पावनं भगवद्यशः तस्य परस्परानुकथनं शिक्षेत्। यद्वा यज्ञातत्वसंस्पर्धादिपरित्यागेन मिथो या रतिः रमणं या च तुष्टिः सुखं या च निवृत्ति १३
समस्तदुःखनिवृत्तिः तां च शिक्षेत ३० एवं वर्त्तमानानां परमानंदप्राप्तिमाह स्मरंत इति द्वयेन। भक्त्या साधनभक्त्या संजातया प्रेमलक्षणया भक्त्या ३१ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽप्यजं हरिं। अनुशीलयंति लीलां अभिनयंति। एवं परमेत्य प्राप्य निर्वृताः संतस्तूष्णीं भवंति ३२ उपसंहरति इतीति ३३ भागवतधर्मेति भक्त्या तदुत्थया नारायण
पुरः ... तरतीत्युक्ते पृच्छति नारायणाभिधानस्येति निष्ठां स्वरूपं। अयं भावः। ब्रह्मैव तावत् नारायण इति भगवानिति परमात्मेति चोच्यते। तदुक्तं। वदंति
तत्तत्त्वविदस्तत्त्वं यत् ज्ञानमद्वयं। ब्रह्मेति परमात्मेति भगवानिति शब्द्यत इति। तथा नारायणे भगवति तदिदं विश्वमाहितं। गृहीत मायोरुगुणः सर्गादावगु
णः स्वतः इत्यादिषु तत्र किमेभिः शब्दैर्निर्विशेषं तदेव वस्तूच्यते। आहोस्वित् किंचिद्विशेषोऽत्रेति ३४ अत्रोत्तरं स्थित्युद्भवेति। अयमर्थः। अस्य विश्वस्य

क्वचिद्रुदंत्यच्युतचिंतया क्वचिद्धसंति नंदंति वदंत्यलौकिकाः। नृत्यंति गायंत्यनुशीलयंत्यजं भवंति तूष्णीं परमेत्य निर्वृताः ३२
इति भागवतान्धर्मान् शिक्षन्भक्त्या तदुत्थया। नारायणपरो मायामंजस्तरति दुस्तरां ३३ राजोवाच॥ ॥ नारायणाभिधानस्य ब्र
ह्मणः परमात्मनः। निष्ठामर्हथ नो वक्तुं यूयं हि ब्रह्मवित्तमाः ३४ पिप्पलायन उवाच॥ स्थित्युद्भवप्रलयहेतुरहेतुरस्य य
त्स्वप्नजागरसुषुप्तिषु सद्बहिश्च। देहेंद्रियासुहृदयानि चरंति येन संजीवितानि तदवेहि परं नरेंद्र ३५॥ ॥

अनुवर्तमानं
स्थित्युद्भवप्रलयानां हेतुः स्वयं चाहेतुः हेतुरहितः स नारायण इति परमेव तत्त्वमवेहि। स्वप्नजागरसुषुप्तिषु सत् व्याप्तिश्च तुरीयं त्रिषु संततमिति। बहिश्च
समाध्यादौ यत्सत्तद्ब्रह्मेति परमेव तत् त्वमवेहि देहेंद्रियप्राणमनांसि येन संजीवितानि संति चरंति स्वकार्येषु प्रवर्तंते। तत्परमात्मेति परमेव तत्त्वमवे
हि। एवं लक्षणं नैव नारायणादिनामभिरुच्यमानमपि परमेकमेव तत्त्वं जानीहि ३५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथैवेहित्यनेनविषयत्वंप्राप्तंनिषेधयतिनैतदिति। एतत्परंतत्वंमनोनविज्ञातिनविषयीकरोतिवागुक्तवागपि। चक्षुश्च। आत्माबुद्धिश्चप्राणश्चक्रियाशक्त्या
नप्राप्नोति। अस्मानिचेंद्रियाणि। यथानलंस्वाःस्वांशभूताअर्चिषोविस्फुलिंगादयःनप्रकाशयंतिनदहंतिचतथाजडाःसुमनआदिवृत्तिषु। अभिव्यज्य
मानस्यात्मप्रकाशस्यचतत्प्रवृत्तिप्रकाशकस्यनतत्प्रकाशविषयत्वं। प्राणस्यप्राणमुतचक्षुषश्चक्षुरुतश्रोत्रस्यश्रोत्रम। मनसोमनोयेमनोविदुरि
ति। तथा। यतोवाचोनिवर्तंतेअप्राप्यमनसासहेत्यादिश्रुतेः। ननुतंत्वौपनिषदंपुरुषंपृच्छामीतिश्रुतेः। शाब्दगोचरत्वंप्रतीयतेतत्राहशाब्दोपीति। शा

नैतन्मनोविज्ञातिवागुक्तचक्षुरात्माप्राणेंद्रियाणिचयथाऽनलमर्चिषःस्वाः। शाब्दोपिबोधकनिषेधतयाऽत्ममूलमथोक्तिमाह
यद्वतेननिषेधसिद्धिः। ३६। ॥

ब्दोपिस्वमूलंआत्मानिप्रमाणंमतस्तथोक्तिं अथोक्तिंयथाभवतितथाऽऽहसाक्षात्कृतःबोधकनिषेधतयास्वस्यैवबोधकस्यनिषेधरूपत्वात्। यतोवाचोनि
वर्तंतेअप्राप्यमनसासह। यद्वाचानाभ्युदितंयेनवागभ्युद्यतेतदेवब्रह्मत्वंविद्धि। यन्मनसानमनुते। नचक्षुषापश्यतिकश्चनैनमित्यादिश्रुतेः। ननुतर्हिनेत्याह
किमिदमुच्यतेअथयेकिमाहेतितत्राहयद्वतेइतिअथातआदेशोनेतिनेति। अस्थूलमनणु। यतोवाचोनिवर्तंते। यद्वाचानाभ्युदितमित्यादिनिषे
धस्ययत्अवधिभूतंब्रह्मरूपंतेनविनानिषिद्धिर्नास्ति। सर्वस्यनिषेधस्यसावधित्वात्। ३६। ॥ राम
१४

नचुतर्द्विप्रमाणाविषयत्वान्नास्तिब्रह्मेतिप्रसज्यतेऽत आह सत्वमिति। सतत्स्थूलंकार्यंअसत्सूक्ष्मंकारणंतत्सर्वंब्रह्मैवभाति। कुतः यत् यस्मात्ततयोःस
[illegible]ः परंकारणं कार्यंकारणाद्भिन्नंनभवति। ननुकथमेकंबहुविधस्यकारणंतत्राह। उरुशक्तिःअनेकशक्तिमत्। उरुर्महती मायालक्षणाशक्ति
र्यस्यतदितिवा। बहुधा मानमेवदर्शयति। आदौयदेकंब्रह्मतदेवसत्वंरजस्तमइतित्रिवृत्प्रधानंप्रवदंति। ततःक्रियाशक्त्यासूत्रंज्ञानशक्त्यामहानितिवदे

सत्वंरजस्तमइतित्रिवृदेकमादौसूत्रंमहानहमितिप्रवदंतिजीवं। ज्ञानक्रियार्थफलरूपतयोरुशक्तिब्रह्मैवभातिसदस
च्चतयोःपरंयत्॥३७॥ ॥

तदेवप्रवदंति। ततःअहमितिजीवंजीवोपाधिमहंकारंचतदेवप्रवदंति ततश्चज्ञानक्रियार्थफलरूपतयाज्ञानशक्त्यादेवताःक्रियाशक्त्याइंद्रियाणिअर्थाःवि
षयाःफलंतत्प्रकाशःसुखादिवातद्रूपतयाब्रह्मैवभाति तदित्थंसर्वरूपेणस्वतोनासमानस्यब्रह्मणःस्वसिद्धौप्रमाणापेक्षेतिभावः॥३७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु सर्वात्मकं चेद्ब्रह्म तर्हि सर्वस्य कार्यस्य जन्मादिविकारत्वाद्ब्रह्मणोऽपि तत्प्रसंगः स्यादत आह नात्मेति। आत्मा ब्रह्म न जायते न जातः। जन्माभावादेव
तदनंतरास्तित्व ब्रह्मणोऽपि विकारेणास्ति नैधते न वर्द्धते वृद्ध्यभावादेव विपरिणामोऽपि निरस्तः। कुतः। हि यस्मात् व्यभिचारिणां आगमापायिनां बा
लयुवादिदेहानां सर्वजनवित् तत्तत्कालद्रष्टा न ह्यवस्थावतां द्रष्टा तदवस्थो भवतीत्यर्थः। निरवस्थः को भावात्मा अत आह उपलब्धिमात्रमिति नित्या या

नात्मा न जायते न मरिष्यति नैधतेऽसौ न क्षीयते सर्वजनवित् व्यभिचारिणां हि। सर्वत्र सर्वदनपाय्युपलब्धिमात्रं प्राणो यथेंद्रिय
बलेन विकल्पितमतः ॥ ३० ॥

तं तर्हि ना(?)ऽणिकत्वं नेत्याह सर्वत्रेति। सर्वत्र देशे सर्वदा सर्वदा कालेऽनपायि अनुवर्त्तमानं ननु नीलज्ञानं जातं पीतज्ञानं नष्टमिति प्रतीतेर्ज्ञानस्यानपायित्वं
कथं तत्राह इंद्रियबलेनेति। सदेव ज्ञानं इंद्रियबलेन विविधं कल्पितं नीलाद्याकारा हि तत्र य एव जायंते नश्यंति च न ज्ञानमिति भावः। व्यभिचारि विषय
भिचारदृष्टांतः प्राणो यथेति ॥ ३० ॥ ॥

राम
२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्थंभूतं चित्तमेवं त्विन्द्रियादिविलये न निर्विकारस्योपलब्धिं दर्शयति अंडेष्विति। पेशिषु जरायुजेषु तरुषु उद्भिज्जेषु। अविनिश्चितेषु स्वेदजेषु। उपधावति
अनुवर्तते। एवं दृष्टांते निर्विकारत्वं प्रदर्श्य दार्ष्टान्तिकेपि दर्शयति। कथं। तदैवात्मा सविकार इव प्रतीयते यद्यदा जागरे इंद्रियगणः। यदा स्वप्ने तत्सं- रा
स्कारवानहंकारः। यदा तु प्रसुप्तस्तदा तस्मिन् प्रसुप्ते इंद्रियगणे सन्ने लीने अहमि अहंकारे च सन्नो कूटस्थः निर्विकार एवात्मा। कुतः। आशयमृते
लिंगशरीरमुपाधिं विना विकारहेतोरुपाधेरभावादित्यर्थः। नन्वहंकारपर्यंतस्य सर्वस्य लये शून्यमेवावशिष्येत तत्कथं तदा कूटस्थ आत्मा अत्र तत्रा-

अंडेषु पेशिषु तरुष्वविनिश्चितेषु प्राणो हि जीवमुपधावति तत्र तत्र। सन्ने यदिंद्रियगणेऽहमि च प्रसुप्ते कूटस्थ आशयमृते त-
दनुस्मृतिर्नः॥ ३९॥ ॥

हि। तदनुस्मृतिर्नः तस्य विशेषज्ञानशून्यस्य सुखात्मनः। सुषुप्तिसाक्षिणः स्मृतिर्नोऽस्माकं भवति एतावंतं कालं सुखमहं सुप्तः न किंचिदवेदिषमिति अ-
तोऽननुभूतस्य स्मरणादस्त्येव सुषुप्तावात्मानुभवः। विषयसंबंधाभावात्तु न स्पष्ट इति भावः। तथा च श्रुतिः। यद्वै तन्न पश्यति पश्यन्वै तन्न द्रष्टव्यं न पश्य-
ति। न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इति॥ ३९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा०ग०
१६

ननु मद्दिसुमुमोक्तृत्स्वात्मानुभवोभवेत् कथं पुनरपि संसारस्यात् अविद्यातत्संस्काराणां विद्यमानत्वादिति चेत् कदातर्हि तन्निवर्त्तकोऽनुभवो भवे तत्राह यर्हीति विक्षेपणादिविहाय केवलमञ्जनानस्यैव चरणोर्छयायायाउरुभक्तिस्तया पुमांश्चेतसो मलानि विधमेत् नाशयेत् चेत एव वाकल्पं स्वगतानि मलानि तया भक्त्या क्षालयेत् तदा तस्मिन् विशुद्धे चेतसि तत्तिसाक्षात् व्यवधानेनात्मतत्त्वमुपलभ्यते अमलयोदृष्टिः सत्यैयथा पूर्वमेव भि ध्नः सवित्प्रकाशइतिः ४० नक्षेःकर्मयोगाधीनत्वात्तं प्रष्ठति कर्मयोगमिति नैष्कर्म्यं कर्मनिवृत्तिसाध्यं ज्ञानं ४१ प्रश्नांतरमाह एवमिति प्रश्नं

यर्ह्यंऽज्ञनाभचरणैषणयोरुभक्त्या चेतोमलानि विधमेत् गुणकर्मजानि तस्मिन्विशुद्धउपलभ्यतआत्मतत्त्वं साक्षाद्यथाऽमलदृशोः सवितृप्रकाशः ४० राजोवाच ॥ ॥ कर्मयोगं वदत नः पुरुषो येन संस्कृतः विधूयेहाशु कर्माणि नैष्कर्म्यं विंदते परं ४१ एवंप्रश्नमृषीन्पूर्वमिप्रच्छं पितुरंतिके नाब्रुवन्ब्रह्मणःपुत्रास्तत्र कारणमुच्यतां ४२ आविर्होत्रिरुवाच ॥ ॥ कर्माकर्म विकर्मेति वेदवादो न लौकिकः वेदस्य चेश्वरात्मत्वात्तत्र मुह्यंति सूरयः ४३ ॥ ॥

इत्थमर्थं पितुः इक्ष्वाकोः ब्रह्मणःपुत्राः सनकादयस्सर्वज्ञा अपिनाब्रुवन् ४२ गहनत्वद्योतनाय प्रथमं द्वितीय प्रश्नोत्तरमाह कर्मेति कर्मविहितं अकर्म तद्विपरीतं निषिद्धं विकर्म विगतं कर्म विहितोकरणं ईश्वरात्मत्वात् ईश्वराज्ञत्वात् अपौरुषेयत्वादित्यर्थः एवं वाक्ये हि वकुरभिप्रायतो ऽर्थज्ञा नं शक्यं अपौरुषेये तु केवलं वाक्यपौर्वापर्येणैव तात्पर्यविधारणं तच्च दुष्करमिति तत्र कर्मादौ विद्वांसोपि मुह्यंति किमुतान्ये अतस्तव तदा बाल त्वान्नैवाब्रुवन्निति ४३ ॥ ॥ राम
१६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुर्ज्ञेयं वेदतात्पर्यमाह परोक्षवाद इति। यत्रान्यथास्थितोऽर्थः संगोपयितुमन्यथा कथ्यते स परोक्षवादः तथा च श्रुतिः। तं वा एतं चतुर्होतारं सन्तं चतुर्हो
तेत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवा इति। वेदः परोक्षवादत्वमेवाह कर्ममोक्षायेति। ननु स्वर्गाद्यर्थं कर्माणि विधत्ते न कर्ममोक्षार्थं तत्राह बालानाम
नुशासनं यथा नवतीति यथा। अत्र दृष्टान्तः अगदं औषधं यथा पिता बालम् अगदं पाययन् खंडलड्डुकादिभिः प्रलोभयन् पाययति तद्दानाय निमित्तानि नैताक्ता

परोक्षवादो वेदोऽयं बालानामनुशासनं। कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा ४३ नाचरेद्यस्तु वेदोक्तं स्वयमज्ञोऽजि
डि तेन्द्रियः। विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः ४४ ॥ ॥

ऽगदपानस्य तत्फलं न प्रयोजनं अपि त्वारोग्यं तथा वेदोऽप्यवान्तरफलैः प्रलोभयन् कर्ममोक्षायैव कर्माणि विधत्ते। ४३ ननु कर्ममोक्षश्चेत्पुरुषार्थस्तर्हि प्र
थममेव कर्म त्यज्यतां अत आह नाचरेदिति। अजितेन्द्रियत्वात् अतः स्वयं यदि नाचरेत् तर्हि विकर्मणा कर्माऽनाचरणलक्षणेनाधर्मेण मृत्योरनन्तरं मृ
त्युमेव प्राप्नोति। तथा च श्रुतिः। मृत्वा पुनर्मृत्युमापद्यते अद्यमानः स्वकर्मभिरिति ४४ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्माद्वेदोक्तमेव कुर्वाणो न तु निषिद्धं ननु कर्मणि क्रियमाणे तस्मिन्नासक्तिः तत्फलं च स्यात् न तु नैःकर्म्यसिद्धिप्राप्तिरित्यत आह निःसंगः अन
भिनिवेशवान् ईश्वरेऽर्पितं न तु फलोद्देशेन ननु फलस्य श्रुतत्वात्कर्मणि कृते फलं न वेदेव न रोचनार्थेति कर्मणि रुच्युत्पादनार्थं अगदपाने खंड
लड्डुकादिवत् ततश्च कर्मानिष्ठावेदार्थं सम्यग्विचारयति तदा च यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति स कृपण इत्यनात्मज्ञस्य कृपणतां तु
तं मे वेदानुवचनेन ब्राह्मणा विविदिषंति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चेति यज्ञादीनां ज्ञानशेषतां चावधार्य वैनिःकामेषु कर्मसु प्रवर्त्तते
ततश्च स्वर्गादिकामो यद्येतेनादिनि[illegible]र्गादिः फलत्वेनाभिगमादकामितो सोऽनन्तवत्तीति नैःकर्म्यसिद्धिर्भवतीति भावः ॥४५॥ वैदिककर्मयोगमुक्त्वा
कामितेश्वरस्य

वेदोक्तमेव कुर्वाणो निःसंगोऽर्पितमीश्वरे ॥ नैःकर्म्यं लभते सिद्धिं रोचनार्था फलश्रुतिः ॥४६॥ य आशु हृदयग्रंथिं निर्जिहीर्षुः प
रात्मनः ॥ विधिनोपचरेद्देवं तंत्रोक्तेन च केशवं ॥४६॥ लब्ध्वानुग्रह आचार्यात्तेन संदर्शितागमः ॥ महापुरुषमभ्यर्चेन्मूर्त्याभिमतयात्म
नः ॥४७॥ ॥

तांत्रिकमाह य इति परात्मनः परस्यैव सतश्चात्मनो जीवस्य हृदयग्रंथिमहंकारबंधं निर्हर्त्तुमिच्छुः सः तंत्रोक्तेन च विधिना प्रकारेण त्यजेत् तंत्रमा
[illegible] कारो वैदिकेन सह समुच्चयमाह ॥४६॥ तमेव विधिमाह लब्ध्वानुग्रह इत्यादिना तेनाचार्येण संदर्शितागमः दर्शित प्रकारो यस्य सः ॥४७ ॥ 

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूर्तेः संमुखमासीनः आदिशब्देन भूतशुद्ध्यापि पिंडं देहं विशोध्य मंन्यासैः साङ्गैर्न्यासैः कृतारक्षायेन सः ॥४८॥ अर्चादावेव द्रव्याणि पुष्पादीनि जलादिशोधने
ना॥॥॥ क्षमार्जनादिना आत्मानमस्मयतया लिंगं मूर्तिं च तुलसीपत्रालनादिना निष्पाद्य योग्यानि कृत्वा ॥४९॥ पाद्यादिपात्राण्युपकल्प्य संनिधाप्य हृ
दि संनिहितं श्रीमूर्तौ ध्यात्वा हृदादिभिः हृदयशिरःशिखाकवचनेत्रास्त्रमंत्रैः मूलमंत्रेण च देवे कृतंन्यासो मूलमंत्रेणार्चयेत् ॥५०॥ अंगानि हृदयादीनि

शुचिः संमुखमासीनः प्राणसंयमनादिभिः । पिंडं विशोध्य संन्यासकृतरक्षोऽर्चयेद्धरिं ॥४८॥ अर्चादौ हृदये वापि यथालब्धो
पचारकैः । द्रव्यक्षित्यात्मलिंगानि निष्पाद्य प्रोक्ष्य चासनं ॥४९॥ पाद्यादीनुपकल्प्याथ संनिधाप्य समाहितः ॥ हृदादिभिः कृतन्या
सो मूलमंत्रेण चार्चयेत् ॥५०॥ सांगोपांगां सपार्षदां तां तां मूर्तिं स्वमंत्रतः । पाद्यार्घ्याचमनीयाद्यैः स्नानवासोविभूषणैः ॥५१॥ गं
धमाल्याक्षतस्रग्भिर्धूपदीपोपहारकैः ॥ सांगं संपूज्य विधिवत्स्तवैः स्तुत्वा नमेद्धरिं ॥५२॥ आत्मानं तन्मयं ध्यायन्मूर्तिं संपूज
येद्धरेः । शेषामाधाय शिरसा स्वधाम्न्युद्वास्य सत्कृतं ॥५३॥ एवमग्न्यर्कतोयादावतिथौ हृदये च यः ॥ जयेतीश्वरमात्मानमचिरा
न्मुच्यते हि सः ॥५४॥ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे तृतीयोध्यायः ॥३॥ ॥

उपांगानि सुदर्शनादीनि तत्सहितां सपार्षदां सपरिवारां कैरुपचारैरर्चयेत् तदाह पाद्येति । आद्यशब्देन मधुपर्कमाचमनं च ॥५१॥ अक्षतास्तिलकालंका
रे न तु पूजायां नाक्षतैरर्चयेद्विष्णुं न केतक्या महेश्वरमिति निषेधात् । उपहारो नैवेद्यं ॥५२॥ शेषां निर्माल्यं स्वधाम्नि स्वस्थाने देवं हृदि मूर्तिं करंडके उ
द्वास्य स्थापयित्वा पूजाविधिं समापयेदिति शेषः ॥५३॥ तान्त्रिकं कर्मयोगमुपसंहरति एवमिति ॥५४॥ इत्येकादशे तृतीयोध्यायः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०ए०
१८

चतुर्थेत्विवतारोहाङ्कम्भस्योत्तरमुक्तवान् । जयंतिनंदनेनाम्नाङ्गमिलोनवसप्तमः मूर्त्ताभिः ऽ मतयात्मनस्त्वनेनात्मनः प्रियमवतारं पूजयेदित्युक्ते ऽ
वतारज्ञानमपेक्षितं । तथास्तैवेःस्कृतानमेघरिमितुक्तेगुणकर्मज्ञानंचापेक्षितंअतः एवेतियानियानीति । कर्त्ताकरिष्यति १ त्वयाष्टश्लानिकालत्रयसं
बंधिसकलावतारगुणकर्माणिकथयितुमशक्यानिसंक्षेपतस्कानिचिकथयिष्यामीत्याहयोवाइत्यादिना अनुक्रमिष्यन्गणयितुमिछतियः २

राजोवाच ॥ यानियानीहकर्माणियैर्यैःस्वछंदजन्मभिः चक्रेकरोतिकर्त्तावाहरिस्तानिब्रुवंतुनः १ श्रीभगवानुवाच ॥ योवाअ
नंतस्यगुणाननंताननुक्रमिष्यन्सतुबालबुद्धिः रजांसिभूमेर्गणये[illegible]त्कथंचित्कालेननैवाखिलशक्तिधाम्नः २ भू
तैर्यदापंचविरात्मसृष्टैःपुरंविराजंविरचय्यतस्मिन् स्वांशेनविष्टःपुरुषाभिधानमवापनारायणआदिदेवः ३ ॥ ॥

सतुअथानामिवबुद्धिर्यस्यसमंदमतिःरजांसिगणयेदपि[ये]चअखिलशक्तिधाम्नःसर्वशक्त्याश्रयस्यभगवतोगुणांस्तुनैवगणयेत् । तथाचश्रुतिः वि
ष्णोर्नुकंवीर्याणिप्रावोचंयःपार्थिवानिविममेरजांसीत्यादि २ तत्रादौपुरुषावतारमाहभूतैरिति । यदास्वसृष्टैर्भूतैर्विराजंब्रह्मांडंपुरंनिर्माययतस्मिन्स्वलीला
[illegible]प्रविष्टःसन्पुरुषत्वेनप्रभूतपुरुषस्यजीवस्यतत्रभोक्तृत्वात् ३ ॥ ॥ राम
१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६६ एकाय

गुणकर्मणियाः इतियेन इति यस्याधिष्ठेयः काय एषः कायइतिससमीवा तत्र भूतांसमष्टिव्यष्टिजीवानां के ज्ञानकर्मेंद्रियाणि यस्य स्वतः स्वरू
पभूतात् ज्ञानादनुभूतं ज्ञानं यस्य स्वतः सिद्धज्ञानमितिवा यस्य श्वसनतः प्राणात् बलं देहशक्तिः ओजः इंद्रियशक्तिः ईहाक्रियाः यश्च सत्वादिभिर्निर्विष्टि श्री
स्थितिलयोद्भवे आदिकर्ता ४ आदिकर्तेत्यनेन तत्पूर्वकं कर्तृत्वमपि सूचितं तद्दर्शयितुं गुणावतारधारमवतारांश्च सृष्ट्यादिकर्तृत्वमाह आदाविति यस्येत्यनु
षंगः यस्य रजसा अस्य जगतः सर्गे कार्ये शतधृतिर्ब्रह्मा अभूत् स्थितौ च विष्णुः यस्य सत्वेने ति शेषः क्रतुपतिस्तत्फलदाता द्विजातीनां तद्धर्माणां च सेतु

यत्काय एष भुवनत्रयसंनिवेशो यस्येंद्रियैस्तनुभृतामुभयेंद्रियाणि ज्ञानं स्वतः श्वसनतो बलमोज ईहा सत्वादिभिः स्थितिल
योद्भव आदिकर्ता ४ आदावभूच्छतधृती रजसाऽस्य सर्गे विष्णुः स्थितौ क्रतुपतिर्द्विजधर्मसेतुः रुद्रो यायतमसा पुरुषः स प
आद्य इत्युद्भवस्थितिलयाः सततं प्रजासु ५ धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नरऋषिप्रवरः प्रशांतः नैष्कर्म्य
लक्षणमुवाच चचार कर्म योद्यापि चास्त ऋषिवर्यनिषेवितांघ्रिः ६

च :इति पालक इत्यर्थः यस्य तमसा अस्य अप्ययाय रुद्रोऽभूत् इति एतैर्ब्र
ह्मादिभिर्निमित्तभूतैः प्रजासु उद्भवादयो यतो भवंति स आद्यः पुरुष इत्यन्वयः ५ धर्मस्य जायायां दक्षदुहितरि मूर्तिसंज्ञायां नारायणो नरश्च इति
मूर्तिद्वयेन अजनिष्ट जातः तच्चरितमाह नैष्कर्म्यं आत्मस्वरूपं लक्ष्यते येन तत्कर्म कर्म निहरिरूपं वा तदुवाच नारदादिभ्यः स्वयं च चार च यो द्यापि
कर्माद्याचरन् आस्ते ऋषिवर्यैर्निषेविताविं घ्री यस्य सः ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
१९

भगवद्देवतात्वद्योतकं परमोपमानं दर्शयितुमितिहासमाह इंद्र इति द्वाभ्यां धामस्थानं तपसा गृहीतुमिच्छतीति वा विशंक्य नपोनाशाय कामं सपर
रिवारं प्रेषयामास सः कामः बदरीति रूपाख्यायते याः ततस्याश्रमं अप्सरोगणादिभिः सह गत्वा स्त्रीणां प्रेक्षणान्येव इषवो बाणास्तैः नतस्य महिमहिमा अविध्यत्ताताडयत्
नं जानातीत्यतन्महिज्ञः ७ अक्रमं अपराधं अहो अहह धीर इति विस्मयो गतः तज्जहितः एजमानान् त्रासपूर्वकंपमानान् नो विभ्यो समर्थहि देव

इंद्रो विशंक्य मम धाम जिघृक्षतीति कामं न्ययुंक्त सगणं स बदर्युपाख्यं गत्वाऽप्सरोगणवसंतसुमंदवातैः स्त्रीप्रेक्षणेषुभिरवि
ध्यदतन्महिज्ञः ॥ ७ ॥ विज्ञाय शक्रकृतमक्रममादिदेवः प्राह प्रहस्य गतविस्मय एजमानान् मा भैष्ट भो मदन मारुत देववध्वो गृ
ह्णीत नो बलिमशून्यमिमं कुरुध्वं ॥ ८ ॥ इत्थं ब्रुवत्यभयदे नरदेव देवाः सव्रीडनम्रशिरसः सघृणं तमूचुः ॥ नैतद्विभो त्वयि परे
ऽविकृते विचित्रं स्वारामधीरनिकरानतपादपद्मे ॥ ९ ॥ ॥

वध्वः मा भैष्ट बलिं आतिथ्यं तान् प्रार्थयते इममस्माकं आश्रमं आतिथ्याभावेऽशून्यप्रायं स्यादित्यर्थः ८ हे नरदेव अभयदे श्रीनारायणे इत्थं ब्रुव
ति सति देवाः कामादयः सव्रीडानि नम्राणि शिरांसि येषां ते लज्जानम्रेणैवाऽवनतशिरस्काः इत्यर्थः कृपायुक्तं नमितिवा मायात् परेऽत्रेतोऽ
विकृते स्वारामाश्च ते धीराश्च तेषां निकरैरानतं पादपद्मं यस्य तस्मिन् त्वयि एतत् अस्मदोनानुकंपादि न चित्रं ९ ॥

राम
१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्माकंचापराधाचरणंत्वन्नावलान्नचित्रमित्याकूतं त्वामिति। तांसेवतांसेवमानांसुरैःस्त्रिंशद्भिःकृतान्तरायाविघ्ना भवंति। कस्मादित्यत आकू
:स्त्वौक त्रिविष्टपस्थानंस्वर्गमितिक्रम्यपरमंतत्स्थानंव्रजतां अन्यस्यत्वामसेवमानस्य कुतः बर्हिषियज्ञेस्वभागान्पुरोडाशादीन्बलीन् करान् ल
भिकंस्वराज्येइन्द्रादिभ्योददतःप्रयच्छतः। तर्हिकिंममकोविघ्नस्त्वत्पतिनेत्याकूः धत्त इति यदीतिनिश्चये यतस्त्वंसर्वसुराधीश्वरोऽसि तारक्षकेः अतोऽ
सौविघ्नानांमूर्ध्निपदंमंघ्रिंधत्तेकृतः पुनःत्वयिविघ्नशंकेतिभावः १० तदनंकानांतुकेवलंतपश्चरतांअपिगतिः अस्माकंचावक्रोयातिक्रोधस्यवा तत्रा

तांसेवतांसुरकृताबहवोऽन्तरायाःस्त्वौकोविलंघ्यपरमंव्रजतांपदंते। नाऽन्यस्यबर्हिषिबलीन्ददतःस्वभागान्धत्तेपदं
त्वमवितायदिविघ्नमूर्ध्नि १० क्षुत्तृट्त्रिकालगुणमारुतजैह्वशैश्नानस्मानपारजलधीनतितीर्यकेचित्। क्रोधस्ययांतिवि
फलस्यवशंपदेगोर्मज्जंतिदुश्चरतपश्चवृथोत्सृजंति ११ ॥ ॥

स्यवशाः कामोपभोगमपितावदनुभवंति। क्रोधस्यवशाः पुनरतिमंदाइत्याकूः क्षुत्तृडिति। क्षुच्चतृट्चत्रिकालगुणश्चशीतोष्णवर्षाणिमारुतश्च
घ्राणेबाह्योवाजैह्वाः जिह्वाभोगाश्चशैश्नागुह्योपभोगाश्चएतानस्मान्अपारजलधीनतितीर्यविलंघ्यगोष्पदेमज्जंतिकुतः यतः क्रोधस्यविफ
लस्यवशंयांतिगच्छंतिकिंच जलेमज्जंतोयथाविवशाःसंतोमस्तकारोपितंभारमुत्सृजंति। तथादृष्टैवनमोहायनश्चभोगायशापादिनादुश्चरंतप
उत्सृजंति। ११ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०टी०
२०

पी२

स्त्रियः योगाग्निर्मिताः स्त्रीः शुश्रूषां कुर्वतीः स्वर्चिताः स्रग्भूषालंकृताः तेषां स्वलावण्यपादिदर्पोपित्रामायुद्दर्शयामास १२ ऊर्वीर्णिर्मीनिर्मिताः श्रीरिवताः २
स्त्रीर्दृष्ट्वा तासां तु रूपस्या सौदर्येण महत्त्वेन हृताश्रीः कौन्तेयपाते १३ इध्वंइध्वं क्व वयं वराकाः क्व चेमं प्रतिचेत्तवाह सवर्णं समानरूपां नैकाऽप्यस्मद
नुरूपेत्यविचेतमाभवन्तु तथापि स्वर्गे स्पिन्भूषणरूपा १४ सुरवंदिनः देवनुसाः १५ इंद्रायइंद्रप्रति नारायणबलमूचुः त्राकृत तत्रासत्रासं प्राप्तः विस्मि

इति ब्रुवाणं तं तेषां स्त्रियोऽत्यद्भुतदर्शनाः । दर्शयामास शुश्रूषां स्वर्चिताः कुर्वतीर्विभुः ॥ १४ ॥ ते देवानुचरा दृष्ट्वा स्त्रियः श्रीरिव रू-
पिणीः । गंधेन मुमुहुस्तासां रूपौदार्यहतश्रियः ॥ १५ ॥ तानाह देवदेवेशः प्रणतान्प्रहसन्निव । आसामेकतरां वृङ्ध्वं सवर्णां स्व-
र्गभूषणाम् ॥ १६ ॥ ओमित्यादेशमादाय नत्वा तं सुरवंदिनः । उर्वशीमप्सरःश्रेष्ठां पुरस्कृत्य दिवं ययुः ॥ १७ ॥ इंद्रायानम्य सदसि शृ-
ण्वतां त्रिदिवौकसां । ऊचुर्नारायणबलं शक्रस्तत्रास विस्मितः ॥ १८ ॥ हंसस्वरूप्यवदद्च्युत आत्मयोगं दत्तः कुमार ऋष-
भो भगवान् पिता नः । विष्णुः शिवाय जगतां कलयाऽवतीर्णस्तेनाहृता मधुभिदा श्रुतयो हयास्ये ॥ १९ ॥ ॥
नृपि

तत्र तत्र विस्मित इत्याशयेनैवाः अस्मान् प्रवतारांस्तच्चरितानि चाह हंसस्वरूपीति । दत्तः दत्तात्रेयः कुमारः सनकादिः ...नः पिता ऋषभश्च विष्णुरे
व कलयाऽवतीर्णः सन्नात्मयोगमवदत् तेन विष्णुना हयास्ये हयग्रीवावतारे मधुभिदा सता तेन ततः श्रुतयः आहृताः १९ ॥ ॥ ॥ ॥ ॥

राम
२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इलापृथ्वीओषधयश्च गुप्ताः। क्रोडे वराहाऽवतारे। ग्राहात् गजेन्द्रममुंचत् मोचयामास। एवमादौ पद्मावतारनाम नास्ति तत्र विष्णुः शिवाय जगतां कलयाऽव
तीर्ण इत्यनुवर्तनीयं। १७। संस्तुन्वतः स्तुतिकुर्वाणान् ऋषीन् वालखिल्यान्। कश्यपपार्थ्ये समिदाहरणे गोःपदे निमग्नान् निजेन पहसितान् धृत्वा पदो मोच

गुप्तोप्यये मनुरिलौषधयश्च मात्स्ये क्रोडे हतो दितिज उद्धरतांऽभसः क्ष्मां। कौर्मे धृतोऽद्रिरमृतोन्मथने स्वपृष्टे ग्राहात्प्रपन्नमिभ
राजममुंचदार्तं। १७। संस्तुन्वतोऽब्धिपतितान् श्रमणानृषींश्च शक्रंच वृत्रवधतस्तमसि प्रविष्टं। देवस्त्रियोऽसुरगृहे पिहिता अनाथा
जघ्नेऽसुरेन्द्रमभयाय सतां नृसिंहे। १८। देवासुरे युधि च दैत्यपतीन्सुरार्थे हत्वांतरेषु भुवनान्यदधात्कलाभिः। भूत्वाऽथ वामन इ
मामहरद्बलेः क्ष्मां याच्ञाछलेन समदाददितेः सुतेभ्यः। २०। निःक्षत्रियामकृत गां च त्रिःसप्तकृत्वो रामस्तु हैहयकुलाप्ययभार्ग
ब्धिं वाग्निः। सोऽब्धिं बबंध दशवक्त्रमहन्सलंकं सीतापतिर्जयति लोकमलघ्नकीर्त्तिः। २१।

वयत् तमसि ब्रह्महत्यायां प्रविष्टं मोचयामास। असुरगृहे पिहिता निरुद्धा या देवस्त्रियस्ता अमुंचत् एकावतारे। १९। अंतरेषु सर्वमन्वंतरेषु। कलाभिर्मूर्तिभिर्भुव
नान्यदधात् अपालयत् इमां क्ष्मां समदात् ददौ। २०। हैहयानां कुलस्याप्ययाय नाशाय भार्गवरूपोऽग्निः सरामोदातेत्यराघिः सन् सकलंकं लंकायां स्थितं सचयजति वर्तमानकाली
नोऽवतार इत्यर्थः। २१। ॥
६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०

नाविनंरामं भीमाऽवतारमाह भूमेरिति बुद्धाऽवतारमाह वादैरिति अतदर्हान्नियज्ञानर्हान्देसान्विमोह[illegible]यिष्यति कल्क्यऽवतारमाह शूद्रानिति न्यहन्नि
ष्यत् निहनिष्यति ॥२२॥२३॥ ॥ इत्येकादशे चतुर्थः ॥ पंचमे तु भक्तिहीनानां का निष्ठा को युगे युगे ॥ पूजाविधिरिति प्रश्नद्वयस्योत्तरमुच्यते ॥ तांश्च वक्तुं सुरकृता ब
हवोऽन्तराया इत्यनेन श्रीहरिभक्ता विघ्नमूर्ध्नि पदं दत्वा परां गतिं यांति ॥ अभक्तानां तु विघ्नान्तर्वर्तीत्युक्तं तद्धि तेषां का गतीति भवतीति ष्ठति भगवंतमिति ॥ हे अ

भूमेर्भरावतरणाय यदुष्वजन्मा जातः करिष्यति सुरैरपि दुष्कराणि वादैर्विमोहयति यज्ञकृतोऽतदर्हान् शूद्रान्कलौ क्षितिभुजो
न्यहनिष्यदंते ॥२२॥ एवंविधानि कर्माणि जन्मानि च जगत्पतेः ॥ भूरीणि भूरियशसो वर्णितानि महाभुज ॥२३॥ ॥ इति
श्रीभागवते महापुराणे एकादशस्कंधे चतुर्थोऽध्यायः ॥४॥ ॥ राजोवाच ॥ भगवंतं हरिं प्रायो न भजंत्यात्मवित्तमाः तेषामश
शांतकामानां का निष्ठाविजितात्मनां ॥१॥ चमस उवाच ॥ मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह ॥ चत्वारो जज्ञिरे वर्णा
यएषां गुणैर्विप्रादयः पृथक् ॥२॥ य एषां पुरुषं साक्षादात्मप्रभवमीश्वरं ॥ न भजंत्यवजानंति स्थानाद्भ्रष्टाः पतंत्यधः ॥३॥ ॥ ॥ ॥

तत्रात्मवित्तमाः अविजितात्मनां प्रत्युत एवाशांतकामानां का निष्ठा किं प्राप्यमित्यर्थः ॥१॥ स्वजनकस्य गुरोर्भगवतोऽनादरात् कुरुद्रोहेण दुर्गतिं यांतीति वक्तुं भगव राम
तः स्वकारणत्वमाश्रमाणां तु स्वनिमाह मुखेति ॥ गुणैः सत्वेन विप्रः सत्वरजोभ्यां क्षत्रियः रजस्तमोभ्यां वैश्यः तमसा शूद्र इति ॥२॥ एषां मध्ये ये ज्ञातारो न भजंति येच ११
ऽप्यवजानंति ॥ आत्मनः प्रभवो जन्म यस्मात्तं ॥ तदभजने त्वलब्धकामम्याह इश्वरमिति स्थानाद्वर्णाश्रमात् भ्रष्टाः ॥३॥ ॥

न...शास्त्रेणवेदविधानामानुयाह्याइत्याहद्वाभ्यांदूरइति । दूरेहरिकथाःश्रवणंयेषांते अतएवदूरेचअच्युतकीर्त्तनंयेषांते । दूरेअच्युतकीर्त्तनाश्चेतिवा ४ ज्ञानलवदु
र्विदग्धाःस्त्रियःकिंचत्वाद्युपेक्ष्याइत्याशयेनोक्तविप्रइति । श्रौतेनउपनयनाख्येन उपलक्षणमेतत् अध्ययनादिनापिहरेःपादांतिकंतत्प्राप्तजनेवात्मसाधिकारेप्राप्ता
अपिमुह्यंतिकर्मफलेषुसज्जंते कुतःआम्नायेषुयेवादाःअर्थवादास्तेषुरूढतयाविद्धंतेयेषांते । तदुक्तंगीतासु । यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः वेदवाद
रताःपार्थनान्यदस्तीतिवादिनइत्यादिना ५ नत्किमागदोद्यायितेषामोहंअपंचयन्निंदतिकर्मणीत्यादिना अकोविदाःयथाबंधकंनभवतितथाकर्तुमज्ञाः न

दूरेहरिकथाःकेचिद्दूरेचाऽच्युतकीर्तनाः । स्त्रियःशूद्रादयश्चैवतेनुकंप्याभवादृशां ४ विप्रोराजन्यवैश्यौवाहरेःप्राप्ताः
पदांतिकं । श्रौतेनजन्मनाऽथापिमुह्यंत्याम्नायवादिनः ५ कर्मण्यकोविदाःस्तब्धामूर्खाःपंडितमानिनः । वदंतिचाटु
कान्मूढाययामाध्व्यागिरोत्सुकाः ६ ॥

चाभिरताःएवंतियतःस्तब्धाःअनम्राः । तत्रहेतुः यतोमूर्खाअपिपंडितावयमितिमानवंतः । अतःअप
मसोममस्मतामन्म । अन्यपंहकैवात्रमस्पयाजिनःसुकृतंभवति । यत्ननोत्तंनचखीतस्यान्न ज्ञानिनप्रिरातयइत्यादिकयाययामाध्व्यागिरोत्सुकाःसंतोमूढा
स्तयाचाटुकान्अपरेणःमहदिच्चरिष्यामइत्यादिप्रियांछयसान्वदंति ६ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०ग्र०
२२

किंच। तेषां कर्मनिविष्टानां कामक्रोधदंभादयो वर्द्धंते इत्याह रजसेति। घोरः अभिचारादिसंकल्पो येषां ते। अहितमन्युर्येषां ते ॥७॥ कार्मुकं तं दंभं पंचयति
वदंत। तिनु पासिताः स्त्रियो यैः न लुब्धघाःते। मिथुनं मिथुनसुखमेव परं न तातिथ्यादियेषु गृहेषु तेषु अग्निषि वदंति। इदमध्यमयालक्ष्यमिदं चाभिमनोरथं। इद
मस्त्रीदमपि मेन विष्यति पुनः इति निमिस्याकाराः। हानिकं गाश्च पंचयति यजंतीति। असृष्टान्नविधानदक्षिणं न सृष्टाः स्वनसंपादितान्यन्नविधानदक्षिणा यथा तत्र धाय
जंति। तदाहुः स्वैजीविकार्यं परं केवलं पशुं घ्नंति। अतद्विदः हिंसादोषानभिज्ञाः ॥८॥ मानिनां च पंचयति श्रियेति श्रियाधनादिसंपदा। विभूत्या ऐश्वर्येण श्रियादिना जा

रजसा घोरसंकल्पाः कामुका अहिमन्यवः। दांभिका मानिनः पापा विहसंत्यच्युतप्रियान् ॥७॥ वदंति तेऽन्योन्यमुपासितास्त्रि
यो गृहेषु मैथुन्यपरेषु चाशिषः। यजंत्यसृष्टान्नविधानदक्षिणं वृत्त्यै परं घ्नंति पशूनतद्विदः ॥८॥ श्रिया विभूत्याभिजनेन
विद्यया त्यागेन रूपेण बलेन कर्मणा। जातस्मयेनांधधियः सहेश्वरान्सतोऽवमन्यंत हरिप्रियान्खलाः ॥९॥ सर्वेषु शश्वत्त
नुभृत्स्ववस्थितं यथा खमात्मानमभीष्टमीश्वरं। वेदोपगीतं च न शृण्वतेऽबुधा मनोरथानां प्रवदंति वार्तया ॥१०॥ ॥

तोयः स्मयो गर्वस्तेन अंधा अधीर्येषां ते ईश्वरसहितान्सतोऽवमन्यंते ॥९॥ किंच। एवं वर्त्तमाना अस्ते वेदतत्त्वार्थं स्फुटमपि न जानंतीत्याह सर्वेष्विति केन रूपेणावस्थि
तं तदाह। आत्मानं ईश्वरं। आत्मतया ईश्वरतया चावस्थितं। एवमप्यसंगतामाह। यथा खं पुरुषार्थतामाह अभीष्टं। स्फुटत्वमाह वेदोपगीतं चेति। तत्कृतः यतो
मनोरथानां व्यवायामिषमद्यसेवाविषयाणां वार्त्तया प्रवदंति ॥१०॥ निवृत्तिपरं संतं वेदं प्रवृत्तिपरं वर्णयंतीति ॥ ॥

राम
२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुव्यवायादीनामपिऋतौभार्यामुपेयात्क्रतौग्रोषंनन्नयेदित्यादिनाविहितत्वात्किमेवंनिंद्यतेअतआहलोकमितिशतिः व्यवायःनित्याःरागतएव
नित्यप्राप्ताःजंतोःप्राणिमात्रस्यअतस्तत्रतेषुचोदनोविधिर्नास्ति। ननुऋतावुपेयादित्यादिविधिदर्शनात्सत्यंत्वच्छितिः। तत्रयमपूर्वविधिःरागतःप्राप्त
त्वात्किंतुनियमविधिरूपेणरागिणामनुज्ञामात्रंक्रियते। तदाहव्यवस्थितिरितितेषुव्यवायादिषु केः विवाहैर्यज्ञसुराग्रहैः विवाहविष

लोकेव्यवायामिषमद्यसेवानित्यास्तुजंतोर्नहितत्रचोदना।व्यवस्थितिस्तेषुविवाहयज्ञसुराग्रहैरासुनिवृ
त्तिरिष्टा॥११॥ ॥

यएवकव्यायार्थंकालेयं। यतएवामिषसेवा। सौत्रामण्यांसुराग्रहान्गृह्णातीतिश्रुतेस्तत्रैवमद्यसेवेतिनियमः क्रियते। ननुचनियमपक्षेप्यावश्यकत्वान्न
निंदायुक्ता।अतआह।आसुनिवृत्तिरिष्टेति।अयंभावःनायंनियमविधिरपिनित्यप्राप्तत्वात्अप्रतोनिवृत्तिः परिसंख्यैव। अत्रासुव्यवायामिषमद्यसेवासुविधि
रिष्टःकथंतर्हिव्यवस्थितिरित्युक्तं।उच्यते।नतावत्परिसंख्याविधिना।अन्यत्रानिवृत्तिरुच्यतेतथासतिस्वार्थत्यागात्॥११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नागरु० टी०
॥२३॥

परार्थकल्पना प्राप्तबाधश्चेति दोषत्रयं स्यात् अतः क्वचित्प्राप्ततोऽप्यर्थस्य प्राप्तत्वेनानर्थकमित्यपूर्वविधिप्राप्तेनान्यनिवृत्तिः फलतो भवति तद्यथा
इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यत्र रशनालिंगतो गर्दभाश्वाभिधानीस्त्रानावयेप्राप्तत्वे मंत्रस्य अपूर्वविधिप्राप्ते परिसंख्योच्यते य
योक्तं तन्त्रवार्त्तिके अप्राप्तविधिरेवायमतो मंत्रस्य निश्चितः परिसंख्याफलेनोक्तानविशेषपुनः श्रुतेरिति क्वचित्तु रागतो नित्यप्राप्तस्य अप्राप्तांशपूरणे ल

अश्वाभिधानादानं स्वार्थः तस्य त्यागः गर्दभाभिधान्यादानाभावः विध्यपेक्षया प्ररस्यनिषेधस्यार्थस्तस्य कल्पना
लिंगादुन्नयत्वाश्वाभिधानी गर्दभाभिधानी तो: प्राप्तस्येमामगृभ्णन्रशनामृतस्येति मंत्रस्य गर्दभाभिधान्यादाने बा: ॥
विशेषेः अश्वाभिधान्यां अश्वाभिधानीमादत्त इति पुनः श्रुतेर्न परिसंख्योक्तेत्यर्थः ४ ॥ ॥

... नियमफलस्याप्यन्नावान्नियमविधिप्राप्तफलतः परिसंख्या न भवति यथा पंच पञ्चनखा भक्ष्या इति तथा रागतो नित्यवत्प्राप्तस्य अवायादेर्विवाहादिनियमे ॥राम॥
... परिसंख्यैवेति ननु यद्यस्य नु हामाचमेतद्भवेतां तर्हि क्लिष्टतु स्नातानुयोमायां संनिधौ नोपगच्छति घोरायां कुमुणहस्तायां पच्यतेना त्वरो संशयद ॥२३॥
... स्मात् नेप्रेषः मन्तसिकामेसत्यपितस्यामरुच्या द्वेषादिना वातामनुपगच्छतो दोषश्रवणोपपत्तेरिति सर्वमनवद्यं १९ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं व्यवायादिषु मनोरथाः कलितत्वादभीष्टमात्मानं न श्रुण्वंतीत्युक्तं । इदानीं धनस्यापि धर्मद्वारा परमात्मप्रापकत्वेन दृष्टोपयोगार्थविनियोगाभावात् आत्मज्ञानगंधो
[illegible]चेति । धर्म एवैकः फलं यस्य तत् । कुतः । यतः धर्मात् सविज्ञानं अपरोक्षज्ञानसहितं दृढं अपरोक्षज्ञानं भवति । कथंभूतं । अनुप्रशांति । अनुतत्र
[illegible]सैव प्रलक्षणा शांतिः निर्वाणलक्षणा यस्य तत् । एवंभूतं धनं गृहेषु देहाद्यर्थं युंजंति १२ । किंच व्यवस्थया अपि व्यवायाद्यमनुज्ञानं यथेष्टा अपि रिति नथ्यै
वेत्याह यदिति । यद्यस्मात् सुरायाः घ्राणभक्षः अवघ्राणं स एव विहितः न पानं । तथा पशोरप्यालभनमेव विहितं न तु हिंसा । अयमर्थः देवतोद्देशेन यत्पर

धनं च धर्मैकफलं यतो वै ज्ञानं सविज्ञानमनुप्रशांति । गृहेषु युंजंति कलेवरस्य मृत्युं न पश्यंति दुरंतवीर्यं १२ यद्घ्राणभ
क्षो विहितः सुरायास्तथा पशोरालभनं न हिंसा । एवं व्यवायः प्रजया न रत्या इमं विशुद्धं न विदुः स्वधर्मं १३ ॥ ॥

शुद्धनं तदालभनं । वायव्यं श्वेतमालभेतेत्यादिश्रुतेः । ननु हिंसा या वेदविहिता हिंसा न सा हिंसेति कीर्तितेति वचनात् । ब्रह्मणोद्देशेन तु क्रियमाणं तदालभनं लौ
किकहननवत् हिंसैव । अत आलभनमेव विहितं न तु हिंसा । अतो न यथेष्टं ब्रह्मणमस्तु तेयैस्य धीः । व्यवायोऽपि प्रजया निमित्तभूतया न तु रत्यै । अतो मनो
रथवादिन इमं विशुद्धं स्वधर्मं न विदुरिति १३ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰टी॰
२४

एवं भगवत्पराङ्मुखानां बहुदोषतां प्रपंच्य तन्निष्ठां प्रपंचयन्नतिपंचभिः येत्विति अनेवंविदः न एवं धर्मविदः इति ये ते विस्रब्धाः निःशंकाः अनेन मनोरथेन विष्णु
तिविश्वस्ता वा तदानींतनु योषणेन वा ते पश्नमि विश्वस्ताः तेच परत्र वृ प्रेत्य अमुत्र तान् खादंति मांसभक्षयितामुत्र यस्य मांसमिहाद्म्यहं एतन्मांसस्य मांसत्वं
प्रवदंति मनीषिणः इति वचनात् १४ अनिचारादिना द्विषंतः मृतके देहे सानुबंधसुत्रादिसहिते १५ अप्राप्तत्वं सेरनुकंपिता इति तत्वज्ञाः तक्षस्वतः ये

येत्वनेवंविदोऽसंतः स्तब्धाः सदभिमानिनः पशून्द्रुह्यंति विस्रब्धाः प्रेत्य खादंति ते च तान् १४ द्विषंतः परकायेषु स्वा
त्मानं हरिमीश्वरं मृतके सानुबंधेस्मिन्बद्धस्नेहाः पतंत्यधः १५ ये कैवल्यमसंप्राप्ता ये चातीताश्च मूढतां त्रैवर्गिका ह्य
क्षणिका आत्मानं घातयंति ते १६ एत आत्महनोऽशांता अज्ञाने ज्ञानमानिनः सीदंत्यकृतकृत्या वै कालध्वस्तमनो
रथाः १७ हित्वासायासरचिता गृहापत्यसुहृच्छ्रियः तमो विशंत्यनिच्छंतो वासुदेवपराङ्मुखाः १८

तैः तत्राप्यवर्तिनः पतंतीत्याह्वय इति कैवल्यं तत्वज्ञानमसंप्राप्ताः अत्र हेतुः त्रिवर्गविधानाः अक्षणिकाः उपशांतिक्षणर
[illegible] संतमुखाः न त्वतत्वाशा
[illegible] देहादिस्नेहयुक्तयोवा स्वयमेवात्मानं घातयंति १६ तदाह एत इति आत्महनः आत्मा पत्र ज्ञत्वकर्तरि अनात्मकर्मणि तथा च श्रुतिः असूर्यानाम
[illegible] अंधेनतमसा वृताः तांस्ते प्रेत्याभिगच्छंति ये के चात्महनो जना इति १७ या गृहापत्यसुहृच्छ्रियस्ताः हित्वा १८ शान माना न:

राम
२४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त

५२

त... भगवद्भक्तिरेव कर्त्तव्येति स्थिते तत्र विशेषं पृच्छति कस्मिन्काल इति किंवर्णः कीदृग्वर्णवान् कीदृशः कीदृगाकारः केन वा नाम्ना केन वा विधिना १९ ए
... कारेषु नानाप्रकारा वर्णाभिधाऽकारा यस्य सः नानैव विधिना विविधेनैव मार्गेण २० तदेव वर्णादि चतुष्टयमाह कृत इत्यादिना कृष्णाजिना
... त्वादीतिश्च स्त्वारिविशेषोदर्शितः २१ तपसा ध्यानेन २२ २३ त्रिगुणा दीक्षांगभूता मेखला यस्य सः यज्ञमूर्तिः हिरण्यकेशः पिशंगकेशः २४ त्रय्या

॥राजोवाच॥ ॥कस्मिन्काले स भगवान्किंवर्णः कीदृशो नृभिः॥ नाम्ना वा केन विधिना पूज्यते तदिहोच्यतां॥१९॥ करभा
जन उवाच॥ ॥कृतं त्रेता द्वापरं च कलिरित्येषु केशवः॥ नानावर्णाभिधाकारो नानैव विधिनेज्यते॥२०॥ कृते शुक्लश्चतु
र्बाहुर्जटिलो वल्कलांबरः॥ कृष्णाजिनोपवीताक्षान्बिभ्रद्दंडकमंडलू॥ मनुष्यास्तु तदा शांता निर्वैराः सुहृदः समा
ः यजंति तपसा देवं शमेन च दमेन च॥२२॥ हंसः सुपर्णो वैकुंठो धर्मो योगेश्वरोऽमलः॥ ईश्वरः पुरुषोऽव्यक्तः परमात्मेति
गीयते॥२३॥ त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्त्रिमेखलः॥ हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः॥२४॥ तं तदा म
नुजा देवं सर्वदेवमयं हरिं॥ यजंति विद्यया त्रय्या धर्मिष्ठा ब्रह्मवादिनः॥२५॥ विष्णुर्यज्ञः पृश्निगर्भः सर्वदेव उरुक्रमः
॥वृषाकपिर्जयंतश्च उरुगाय इतीर्यते॥२६॥ द्वापरे भगवान् श्यामः पीतवासा निजायुधः॥ श्रीवत्सादिभिरंकैश्च लक्षणै
रुपलक्षितः॥२७॥ ॥

भक्तानां

विद्यया वेदत्रयोक्तकर्मभिः २५ पृश्निगर्भस्तस्याः पुत्रः वृषाकपिः स्मृतः सन् वर्षति कामान् आकंपयति क्लेशानिति तितथा जयत्येव
सर्वदा जयंतः २६ श्यामः अतसीपुष्पसंकाशः निजानि चक्रादीन्यायुधानि यस्य सः श्रीवत्सो नाम वक्षसो दक्षिणभागे रोमावर्त्तः दक्षिणावर्त्तः सत्त्वादिर्येषां
कस्तूरणादिगतपद्मादीनां तैः अंकैः चिह्नैः लक्षणैर्बाह्यैः कौस्तुभादिभिः २७ ॥

मणिं

महाराजोपलक्षणं छत्रचामरादियुक्तं । वेदतंत्राभ्यां वैदिकेनागमिकेन च मार्गेण यजंति पूजयंति । परं ईश्वरं ज्ञातुमिच्छवः ॥ २८ ॥ नामान्याह नमस्त इति र
२९ ॥ ३० ॥ नानातंत्रविधानेनेति कलौ तंत्रमार्गस्य प्राधान्यं दर्शयति ॥ ३१ ॥ कृष्णं तं वर्णयति त्विषा कांत्याऽकृष्णं इंद्रनीलमणिवदुज्ज्वलं ॥ यद्वा त्विषाऽकृष्णं

तंतदापुरुषंमर्त्यामहाराजोपलक्षणं ॥ यजंतिवेदतंत्राभ्यांपरंजिज्ञासवोनृप ॥ २८ ॥ नमस्तेवासुदेवायनमःसंकर्षणाय
च ॥ प्रद्युम्नायानिरुद्धायतुभ्यंभगवतेनमः ॥ २९ ॥ नारायणायऋषयेपुरुषायमहात्मने ॥ विश्वेश्वरायविश्वायसर्
वभूतात्मनेनमः ॥ ३० ॥ इतिद्वापरउर्वीशस्तुवंतिजगदीश्वरं ॥ नानातंत्रविधानेनकलावपियथाशृणु ॥ ३१ ॥ कृष्णवर्णं
त्विषाऽकृष्णंसांगोपांगास्त्रपार्षदं ॥ यज्ञैःसंकीर्तनप्रायैर्यजंतिहिसुमेधसः ॥ ३२ ॥ ॥

ष्णावतारं ॥ अनेन कलौ कृष्णावतारस्य प्राधान्यं दर्शयति ॥ अंगानि हृदयादीनि उपांगानि कौस्तुभादीनि अस्त्राणि सुदर्शनादीनि पार्षदाः सुनंदादयः त
त्सहितं ॥ यज्ञैः अर्चनैः संकीर्त्तनं नामोच्चारणं स्तुतिश्च तत्प्रधानैः सुमेधसो विवेकिनः ॥ ३२ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकतिमाह ध्येयमिति। हे प्रणतपाल हे महापुरुष ते चरणारविंदं वंदे। कथंभूतं ध्येयं ध्यातुं योग्यं। सदेति सर्वत्र संबध्यते। ध्येयत्वे हेतवः। इंद्रियकुटुंबादिकृ-
तः परिभवस्तिरस्कारः तं हंतीति तथा तत्। किंच। अभीष्टदोहं मनोरथपूरकं। किंच। तीर्थास्पदं गंगाद्याश्रयत्वेन परमपावनं। शिवविरिंचिभ्यां नुतं स्तुतं एकं
महत्तमं। ननु तौ कृतार्थौ विवेकिनौ किमर्थं ताभ्यां नुतं तत्राह। शरण्यं आश्रययोग्यं सुखात्मकमित्यर्थः। तर्हि ब्रह्मादिस्तुतं प्राकृतस्य कथं गोचरः स्यात्। न। भृत्या-
र्तिहं यस्य कस्यापि भृत्यमात्रस्यार्तिहं। न केवलमागंतुकार्तिमात्रं हंति किंतु भवाब्धिपोतं संसारार्णवतारकं च। ३३। इदानीं स्वयमाप्तकामतां नेर

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिंचिनुतं शरण्यं। भृत्यार्तिहं प्रणतपाल भवाब्धिपोतं वंदे महापु-
रुष ते चरणारविंदं। ३३। त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आर्यवचसा यदगादरण्यं। मायामृगं दयित-
येप्सितमन्व[illegible] वंदे महापुरुष ते चरणारविंदं। ३४।

भाग

पेक्षं नैकार्थं च सापेक्षतां दर्शयन् श्रीरामचंद्रं स्तौति त्यक्त्वेति। अन्यैः सुदुस्त्यजा या
सुरेप्सिता राज्यलक्ष्मीस्तां त्यक्त्वा यदिति इत्यर्थः। यः अरण्यमगात्। किं राज्यवैकल्यदर्शनेन। न। धर्मिष्ठो धर्मिष्ठः। कुतः। आर्यस्य गुरोः दशरथस्य वचसा। किंच
एवं स्वराज्यं त्यक्त्वाऽपि भक्तवात्सल्येन दयितया सीतया ईप्सितं मायामृगं स्वर्णकारं योऽन्वधावत्। तस्य भगवतश्चरणारविंदं वंदे। अयमर्थः। हे धर्मिष्ठेति सं-
बोधनं। तथाऽप्युविविक्तितत्वा सा यत्पिदेन संधिनत्ति वति। तथा यदगादिति चरणारविंदमेवाभ्यते। यत् मायामृगमन्वधावत् तत्ते पदारविंदं वंदे इत्यन्व-
यः। अन्यत्समानं। ३४।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०टी०
२६

युगानुरूपाभ्यां नामरूपाभ्यां ॥३५॥ एतेषु चतुर्षु युगेषु कलिरेव श्रेष्ठ इत्याह कलिमिति । गुणज्ञाः कलेर्गुणं जानंतीत्येते । ननु दोषाणां बहुत्वात् कथं सभाजयं-
तीत्याह सारभागिनः । गुणांशग्राहिणः । कोऽसौ गुणः तमाह यत्रेति । तदुक्तं ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् । यदाप्नोति तदाप्नोति कलौ संकी-
र्त्य केशवमिति ॥३६॥ तस्मात्कलौ अतः अस्मात्संकीर्तनात्परमो लाभो नास्ति यतः संकीर्तनात् ॥३७॥ किंच कृतादिष्विति ॥३८॥३९॥ अमलाशयाः संतः प्रा-

एवं युगानुरूपाभ्यां भगवान्युगवर्तिभिः । मनुजैरिज्यते राजन् श्रेयसामीश्वरो हरिः ॥३५॥ कलिं सभाजयंत्यार्या गुणज्ञाः १
सारभागिनः । यत्र संकीर्तनेनैव सर्वस्वार्थोऽभिलभ्यते ॥३६॥ न ह्यतः परमो लाभो देहिनां भ्राम्यतामिह । यतो विंदेत परमां
शांतिं नश्यति संसृतिः ॥३७॥ कृतादिषु प्रजा राजन्कला[illegible]विच्छंति संभवं । कलौ खलु भविष्यंति नारायणपरायणाः ३
८ क्वचित्क्वचिन्महाराज द्राविडेषु च भूयशः । ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी ॥३९॥ कावेरी च महापुण्या प्र-
तीची च महानदी । ये पिबंति जलं तासां मनुजा मनुजेश्वर । प्रायो भक्ता भगवति वासुदेवेऽमलाशयाः ॥४०॥ देवर्षिभूताप्त-
नृणां पितॄणां न किंकरो नायमृणी च राजन् । सर्वात्मना यः शरणं शरण्यं गतो मुकुंदं परिहृत्य कर्तं ॥४१॥ ॥ ॥

यः प्रायशो भगवति भक्ता भवंति ॥४०॥ भक्तस्य विधिनिषेधनिवृत्तिः कृतकृत्यतामाह देवर्षीति । आप्ताः पोष्याः कुटुंबिनः । इतरे देवादयः पंचयज्ञदेवताः एषां य-
थाऽकरणे ऋणी न तथा एव तेषां किंकरः । तदर्थं नित्यपंचयज्ञादिकर्मी । तथा च स्मृतिः हीनजातिं परिक्षीणमृणार्थं कर्म कारयेदिति । अयं तु न तथा कोऽसौ
यः सर्वभावेन श्रीमुकुंदं शरणं गतः । कर्तं कृत्यं परिहृत्य यद्वा कृतं भेदं परिहृत्य कृतीच्छेदनं [illegible] तस्मात् वासुदेवः सर्वमिति बुद्ध्या इत्यर्थः ॥४१॥ ॥ राम
२६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दै

विहितकर्मनिवृत्तिमुक्त्वा निषेधनिमित्तप्रायश्चित्तनिवृत्तिमाह स्वपादमूलमिति त्यक्तः अन्यस्मिन् देहादौ देवतान्तरे वा भावो येन ॥ अत एव तस्य विकर्मणि प्रवृत्तिर्नि
संभवति । यच्च कथंचित्प्रमादादिना उत्पतितं जातं तदपि हृदि हरिर्धुनोति । ननु यमस्तत्र समर्थस्तत्राह परेशः । ननु श्रुतिस्मृती ममैवाज्ञे इति भगवद्वचनात्तस्या
ज्ञालंघनं कथं सहेत तत्राह प्रियस्य । ननु तथापि पापक्षयाय प्रायश्चित्तं न भजते तत्राह हृदि संनिविष्टः न हि वस्तुशक्तिरर्थित्वमपेक्षते इत्यर्थः ॥ ४२ ॥ जायंतेयान् जयंत्याः पुत्रा

स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः । विकर्म यच्चोत्पतितं कथंचिद्धुनोति सर्वं हृदि संनिविष्टः ॥ ४२ ॥
श्रीनारद उवाच ॥ धर्मान्भागवतानित्थं श्रुत्वाथ मिथिलेश्वरः । जायंतेयान्मुनीन्प्रीतः सोपाध्यायो ह्यपूजयत् ॥ ४३ ॥ ततो
ऽन्तर्दधिरे सिद्धाः सर्वलोकस्य पश्यतः । राजा धर्मानुपातिष्ठन्नवाप परमां गतिम् ॥ ४४ ॥ त्वमप्येतान्महाभाग धर्मान्भागवतान्
श्रुतान् । आस्थितः श्रद्धया युक्तो निःसं[illegible]गो यास्यसे परं ॥ ४५ ॥ युवयोः खलु दंपत्योर्यशसा पूरितं जगत् । पुत्रतामगमद्यद्वां
भगवानीश्वरो हरिः ॥ ४६ ॥ दर्शनालिंगनालापैः शयनासनभोजनैः । आत्मा वां पावितः कृष्णे पुत्रस्नेहं प्रकुर्वतोः ॥ ४७ ॥

न् ॥ ४३ ॥ उपातिष्ठन् अनुतिष्ठन् ॥ ४४ ॥ निःसंगो भूत्वा ॥ ४५ ॥ शास्त्रप्रक्रिययोक्त्वा युवां तु संगत एव कृतार्थावित्याह युवयोरिति । वां युवयोः ॥ ४६ ॥
न च सर्वकर्मार्पणादिभागवतधर्मैरपेक्षा भवद्युवयोः सत्त्वशुद्धिरापादनीया पुत्रोपलालनेनैव भागवतधर्मसर्वस्वनिष्पत्तिरित्याह दर्शनेति । कृष्णे पु
त्र इति स्नेहं प्रकुर्वतोर्वां तस्य दर्शनादिभिरात्मा पावितः शोधितः ॥ ४७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतावद्वक्तेमुख्यन्यायेनस्फुटयतिवैरेणेति। यंशयनासनादौवैरेणापिध्यायंतस्तस्यगतिविलासाद्यैःआकृतधियःतत्तदाकाराधीर्येषांतेतत्सारूप्यमापुःकिं
पुनर्वक्तव्यमनुरक्तधियांतत्साम्यंभवतीति॥४८॥ ननुपुत्रस्नेहश्चेन्मोक्षहेतुस्तर्हिसर्वेषांस्याद्येरनंतवाह मापत्यबुद्धिमिति अपत्यबुद्धिमिति अपत्यमितिबुद्धिमा
ऽकृथाअडागमश्छांदसः॥४९॥ ननुकथमीश्वरोमानुषःस्यात्कथंवातस्यविश्वरक्षादिकर्तुःभूतनाशोषणादिकमश्लाघ्यमिवनिरूप्यतेतत्राह भूभारेत्युपा

वैरेणयंन्नृपतयःशिशुपालपौंड्रशाल्वादयोगतिविलासविलोकनाद्यैः॥ध्यायंतआकृतधियःशयनासनादौतत्साम्यमा
पुरनुरक्तधियांपुनःकिं॥४८॥मापत्यबुद्धिमकृथाःकृष्णेसर्वात्मनीश्वरे॥मायामानुष्यभावेनगूढैश्वर्येपरेऽव्यये॥४९॥
भूभारासुरराजन्यहंतवेगुप्तयेसतां॥अवतीर्णस्यनिर्वृत्यैयशोलोकेवितन्यते॥५०॥श्रीशुकउवाच॥एतछ्रुत्वामहाभागोव
सुदेवोतिविस्मितः॥देवकीचमहाभागाजहतुर्मोहमात्मनः॥५१॥इतिहासमिमंपुण्यंधारयेद्यःसमाहितः॥सविधूयेह
शमलंब्रह्मभूयायकल्पते॥५२॥ ॥इतिश्रीभागवतेमहापुराणेएकादशस्कंधेपंचमोऽध्यायः॥५॥ ॥

ज

असुराणएवयेराजन्यास्तेषां
[illegible] त्वंहिं [illegible] यथायोगत्राय॥५०॥ हंसअस्मिन्निर्वेदेहेशमलंमोहंविधूयब्रह्मत्वायकल्पते॥५२॥ इत्येकादशेटीकायांपंचमोऽध्यायः॥५॥ ॥ ॥ राम २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षणे ब्रह्मादिभिः स्तवार्थमागंतुं विज्ञापितैस्तं हरिं उद्धवः प्रार्थयामास स्वधाम नय मामिति अतः परमति विस्तरेणात्मविद्यां निरूपयितुं तत्प्रस्तावमाहस्त्रय थे
तिः आत्मजैः सनकादिभिः अभ्यगात् द्वारकामिति चतुर्थेनान्वयः ३ ननु तेषामुपेंद्रादिरूपं भगवंतं नित्यं पश्यतां के यमिति दिदृक्षा अत आह वपुषेति।

श्रीबादरायणिरुवाच ॥ अथ ब्रह्मात्मजैर्देवैः प्रजेशैरावृतोऽभ्यगात् भवश्च भूतभव्येशो ययौ भूतगणैर्वृतः १ इं
द्रो मरुद्भिर्भगवानादित्या वसवोऽश्विनौ ऋभवोंगिरसो रुद्रा विश्वे साध्याश्च देवताः २ गंधर्वाप्सरसो नागाः सिद्धचारण
गुह्यकाः ऋषयः पितरश्चैव सविद्याधरकिंनराः द्वारकामुपसंजग्मुः सर्वे कृष्णदिदृक्षवः ३ वपुषा येन भगवान्नरलो
कमनोरमः यशो वितेने लोकेषु सर्वलोकमलापहं ४ तस्यां विभ्राजमानायां समृद्धायां महर्द्धिभिः व्यचक्षतावितृप्ता
क्षाः कृष्णमद्भुतदर्शनं ५ स्वर्गोद्यानोपगैर्माल्यैः छादयंतो यदूत्तमं गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरं ६ ॥ ॥

इवे

मः
येन वपुषा सौनः नरलोकमनोरमस्तु सन् सर्वलोकेषु यशो वितेने तदति सुंदरं वपुर्दिदृक्षवः ४ व्यचक्षत अपश्यन् ५ स्वर्गोद्यानस्थैर्माल्यैः चित्राणि शंखवलाबंधप्राया
णि पदानि अर्थाश्च यासु ताभिर्गीर्भिः ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बुद्धींद्रियाः दिग्निर्दिष्टानादिना प्राणेन च बलहेतुना दंडवत्प्राणिपातेन नता वयं नमस्कृतवंतः स्मेति विस्मये यथाहुः दोर्भ्यां पद्भ्यां जानुभ्यामुरसा शिर
सा दृशा मनसा वचसा चेति प्रणामोऽष्टांग ईरितः इति स्मशब्दः कविस्मयाय विशेषणं कर्ममयादुरुपाशान्मुमुक्षुभिर्भावयुक्तैरपि यत्केवलमंतर्हृदि चिंत्यते न तु
दृश्यते तद्वयं नताः अहो भाग्यमित्यर्थः ननु मम मायापि हृष्टा दृष्टकर्मकरणान्न तु कृतो मत्पदारविंदचिंतनं कर्मपाशान्मुमुक्षुभिः क्रियते तत्राहुः त्वमिति हे अजि
त अस्माभिरिदानीं तन्निदमल्पं कर्म विश्वं व्यक्तं महदादि प्रपंचं सृजसि पालयसि संहरसि च तद्गुणस्थः आत्मन्येव न पृथक् दुर्विभाव्यं मनसाप्यन्यैरचिंतनीयं॥

देवा ऊचुः॥ ॥नताः स्म ते नाथ पदारविंदं बुद्धींद्रियप्राणमनोवचोभिः॥ यच्चिंत्यतेंतर्हृदि भावयुक्तैर्मुमुक्षुभिः कर्ममयोरु
पाशात् ७॥ त्वं मायया त्रिगुणयात्मनि दुर्विभाव्यं व्यक्तं सृजस्यवसि लुंपसि तद्गुणस्थः॥ नैतैर्भवानजित कर्मभिरज्यते
वै यः स्वे सुखेऽव्यवहितेऽभिरतोऽनवद्यः ८॥ ॥

तद्गुणस्थत्वमात्मायाया गुणेषु नियंतृत्वेन स्थितः॥ अथ च एतैः कर्मभिः भवान्नाज्यते न लिप्यते कुतः यो भवाननवद्यो रागादिरहितः यतः स्वे आत्मरूपे
सु[illegible]व हिते अनाहतेऽभिरतः॥ अतस्त्वं कर्म कुर्वन्नप्यात्मारामः परमेश्वर इति मुमुक्षुभिश्चिंत्यत इति भावः ८॥ ॥

ग



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्म

...म्मकिंकरणेन अत आह शुद्धिरिति हे ईड्य हे ऋषभ दुराशयानां रागिणां विद्याउपासना । विद्या श्रुतादिभिः तथा शुद्धिर्न भवति । सत्वात्मनां स
...यशसि श्रवणेन संभृतया परिवृद्धया श्रद्धया सम्बुद्धया यथा स्यात् परमपावनस्य यत्र सोविता नायतवक सन्निरएा मितिभावः ।९। तदेवं
हरः स्वदेवस्तुतिहेतुः अस्मानित्युतवांघ्रिदृष्टिः अतस्तवांघ्रिर्नोऽस्माकं अशुभाशयानां विषयवासनानां धूमकेतुः तद्दाहकः स्यात् कथंभूतः । यः

शुद्धिर्नृणां न तु तथेड्य दुराशयानां विद्याश्रुताध्ययनदानतपःक्रियाभिः । सत्वात्मनामृषभ ते यशसि प्रवृद्धसच्छ्रद्धया श्रव
णसंभृतया यथा स्यात् । स्यान्नस्तवांघ्रिरशुभाशयधूमकेतुः क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः । यः सात्वतैः समविभूत
यश्चात्मवद्भिर्व्यू हेर्चितः सवनशः स्वरतिक्रमाय १०

क्षेमाय मोक्षाय मुनिभिः मुमुक्षुभिः क्षेमार्द्रहृदा उह्यमानश्चिंतमानः । पक्षे सात्वतैर्भक्तैः समविभूतये समानैश्वर्याय वासुदेवादिव्यूहेऽर्चितः तेषु च केऽप्यात्म
वद्भिर्धीरैः स्वरतिक्रमाय स्वर्गमतिक्रम्य वैकुंठप्राप्तये सवनशस्त्रिकालं अर्चितः ॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०टी०

त्रि

किंच प्रयतपाणे निःसंयतइस्तैर्हविर्गृहीत्वाध्वरग्नौ आहवनीयादौ यर्ह्निकैर्यश्चिंत्यते नन्नुयस्तैर्देवतायैहविर्गृहीतं स्मात्तं ध्यायेद्वषट्कुरिस्यैनिति वचनात्तत्तद्देवताश्चिंत्यंतेप्रतत्त्वाकुः वप्पानिरुक्तेविधिनाइंद्रादिरूपेणैयज्ञपुरुषश्चिंत्यत इत्यर्थः ततकिंचअध्यात्मयोकैर्ग आत्माधिकारे योगेयोग
न व

यश्चिंत्यतेप्र[illegible]यतपाणिभिरध्वराग्नौ त्रय्यानिरुक्तविधिनेशहविर्गृहीत्वा अध्यात्मयोगउतयोगिभिरात्ममायांजि
ज्ञासुभिःपरमभागवतैःपरीष्टः ॥१९॥ ॥

पर्यायः[illegible] न त्वमायायस्त्वणिमादिस्तांजिज्ञासुभिस्तकामैर्यश्चिंत्यते परमभागवतैस्तुकैर्यःपरीष्टःस्तुतः प्रजितःसत्वांतवांप्रियोस्मनाशायकेतुधूमके
तेपूर्वेणान्वयः ॥२१॥ ॥

राम
२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं [illegible] सात्वतादीनां धर्माणां सेवकानां मध्ये परं भागवते पुलहस्यात्मजपितव प्रीतिरधिकेति स्कवंति पर्युष्टियेतिशदनावः । छंदसः अर्हंयन्नव साभितवैव
व [illegible] पद्धुक्षेतः पीयवसतीतिपत्नि प्रतिपत्तिवत् सपत्नीवत् श्रीसंस्पर्धमानानवतीतथापितांस्पर्धमानाश्रीयमनाहत्सयोजवान्पर्युषितया । पित्र्यमु
यावनमालयाजकैरर्थितियमितिशीत्यासुप्रणीतंसुष्ठुसंपादितंयथान्वतितयाहर्णां पूजामादद्त् स्वीकृतवान् सुप्रणीतमित्यर्हणा विशेषणं वातस्पत
यो द्विर्नाः सुनाशायधूमकेतुर्नयात् यथायो द्विरसुयासुप्रणीतमर्हणामादत्स नोऽस्मुनाशायधूमकेतुर्नयोतरित्यन्वयः अथवैवंसंबंधः एतेभ्योध्या

पर्युष्टियातववितोवनमालयैसंस्पर्धिनीभगवतीप्रतिपत्तिवद्धीः । यः सुप्रणीतमसुपार्हणामादत्तोनूयात्सदांऽग्नि
स्सुनाशायधूमकेतुः । १२ ॥ ॥

नार्चनादिनिष्ठेभ्योऽपि त्वयराभिप्रहर्षंसतम्यंवंतएवकृतार्थाभगवतोयशः प्रियत्वादित्याकूः पर्युष्टियावशाकांतावित्यस्मात्परितसर्वांगिउष्टयाकांता
यशोभितयावनमालयावक्षसिएकदेशेवर्तमानाश्रीः संस्पर्धमानानवति तथाप्याम्नायमधुव्रतैर्बकुधावर्णितियाकीर्तिमिप्यावैजयंत्यावनमालयैवयोन
वान्सुप्रणीतमर्हणामादद्त इत्यादिपूर्ववत् । १३ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धा ... य

त्वच्चरणस्य नन्नः पद्मप्रान्तः प्रसिद्ध एवेति स्तुवंतः प्रार्थयंते केतुरिति बलिबंधने त्रिविक्रमे स्तुतिः तत्र क्षितौ विक्रमे सत्यलोकं गतस्तव पादः केतुः स्वत्फलितो विज
यध्वजइव तत्संपादयति त्रिपथगापताकः नितां पतंती त्रिषु लोकेषु वा पतंती गंगा पताका यस्य तथा असुरदेवयोर्मोः तत्सेनयोरुभयोरपि यथाभयकरः साधुषु सु
रेषु स्वर्गायिरेषु यायिरवलेषु असुरेषु इतरगमन्ययन्नधोगमनाय यय एवं केतुरूपस्ते पादः स नन्नतां नः अघं पुनात्व शोधयतु अघादिति पापेन नन्नतां नः इति कर्माणि ष

केतुस्त्रिविक्रमयुतस्त्रिपतत्पताकोयस्तेभयानयकरोऽसुरदेवसम्व्योः स्वर्गायसाधुषुखलेष्वितरायन्नूमनूपादस्पुनातुभ
गवन्नजतामघंनः १२ ॥ ॥

... तोऽस्मान्पुनात्विति तथाच श्रुतिः चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुःकृतानि तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम ॥ लो
... त मत्पवित्रं ज्योतिर्धाम्नाक्रामन्मानमहसतम् अस्यतत्सधाराबकुधसदोहमानंचरणो नो लोकेषु सुधितां दधात्विति १३ ॥ ॥ ॥ राम
३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२

ननु यस्ते देवासुरादयः परस्परं जयंति जीयंते च किमहं तत्रेत्य तत्राह । नस्मीति मिथुः मथः स्पर्धमानाः युद्धादिभिः पीड्यमानाः ब्रह्मादयोपि यस्य तव वशे न वंति न
ते [illegible] देवास्तं त्वा । कश्चन सिनास्ति कायांतु ताः नासिका मा विघ्नबद्धाः गावो बलीवर्दा इव ऽकृताः । कालस्य कलत्वेतुः प्रकृतिकिस्य । तदेवकृतः प्रकृतिपु
रुषयोरपि परस्पतस्पते पुरुषस्यापादः शंतनोतु ॥४॥ प्रकृतिपुरुषाभ्यां परत्वमुपपादयंतः कालत्वेन पुरुषोत्तमत्वमाह । अस्येति । अस्य जगतः तद्यादीनां हेतु
रसि । कृतः अव्यक्तं प्रकृतिः जीवः पुरुषः महान् महत्तत्वं तेषां कालं नियंतारं त्वामाहुः । अक्षरात्परतः परः । महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं

नस्योत गावश्च वयस्य वशे न वंति ब्रह्मादयस्तनुभृतो मिथुरर्धमानाः । कालस्य ते प्रकृतिपूरुषयोः परस्य शं नस्तनोतु चरण
ः पुरुषोत्तमस्य ॥४॥ अस्यासि हेतुरुदयः स्थिति संयमानामव्यक्तजीवमहतामपि कालमाहुः । सोऽयं त्रिणाभिरखिलापचये
प्रवृत्तः कालो गभीररय उत्तमपूरुषस्त्वं ॥५॥ ॥

ते

किं त्विशाकाष्ठासापरागतिरिसाद्याः कृतयः । किंच अयं संवत्सरात्मको यः कालः त्रिणाभिः त्रीणि चातुर्मास्यानि नाभयो यस्य सोऽपि त्वमेव अतस्त्वमुत्तमपुरुष इ
ति तथा च गीतासु यस्मात्क्षरमतीतोयहमक्षरादपि चोत्तमः । अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः इति ॥५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वमेव प्रकृत्या स्थितराजगरूस्य स्याहिहितुरस्मिन्नुक्तं तत्केन प्रकारेण तदाह ॥ त्वत्त इति ॥ त्वत्तः पुरुषोत्तमवीर्यं त्रिशक्तिं समधिकस्य प्राप्य पयामायया सह महार्णवं धनोकिमिव ॥
[illegible]स्य विश्वस्य गर्भमिव ॥ सोऽयं महान्नतयैवमायया ऽनुगतः सन् आत्मनः सकाशाद्दांडकोशं ससर्जेत्वि यानुगत इति पाठे पितया मायया त्वया ऽधिष्ठितः सन्निति ॥ १६ ॥
ननैवं भूतमीश्वरं त्वं मम कुतोऽवगतं तदाह ॥ तदिति ॥ तत्तस्मात्तत्सुषुः स्थावरस्य जगतो जंगमस्य च भुवनवानधीश्चाः यद्यस्मात्मायया ऽत्मगतं ज्ञातुं नीतायाऽऽगुणवि
क्रियाऽशंकिय वृत्तिः तयोपनीतान् जुषन् जुषमाणोऽपि हि रुषीकपतैकेन लिप्तस्त्वं येत्वमेजीवायोगिनो वास्वतः परिहृत्ता तादृशं पित्र्यविद्यमानात्तत्स्मृतात्त्व विषय

त्वत्तः पुमान्समधिलत्पयया ऽस्यवीर्यं धत्ते महान्तमिवगर्भममोघवीर्यः ॥ सोऽयं तयाऽनुगत आत्मन आंडकोशं हैमं ससर्ज बहि
रावरणैरुपेतं ॥ १६ ॥ तत्तस्थुषश्च जगतश्च भवानधीशो यन्मायया ऽत्थगुणविक्रियया ऽपनीतान् ॥ अर्थान्जुषन्नपि हृषीकपते
न लिप्तो येऽन्ये स्वतः परिहृताद्पि बिभ्यति स्म ॥ १७ ॥ स्मायावलोकलवदर्शितभावहारि भ्रूमंडलप्रहितसौरतमंत्रशौंडैः ॥ प
त्न्यस्तु षोडशसहस्रमनंगबाणैर्यस्येंद्रियं विमथितुं करणैर्न विभ्व्यः ॥ १८ ॥

जोषणाक्षिप्यति वासनामात्रेण संबध्यत इत्यर्थः ॥ [illegible]लिप्तत्वं माह ॥ स्मायेति ॥ स्मायावलोकः मंदस्मितयुक्त स्मितोऽवलोकः तस्य लवः कटाक्षः तेन दर्शितो यश्च भावोऽ
भिप्रायः तेन मनोहारी ॥ यद्भ्रूमंडलं तेन प्रहिता ये सौरता मंत्रास्तैः शौंडैः प्रगल्भैः अनंगबाणैः संमोहनैः करणैः कामकलाभिः षोडशसाहस्रं पत्न्यः यस्येंद्रि
यं ॥ मथितुं क्षोभयितुं न विभ्व्यः न समर्थाः ॥ स भवानलिप्त इति पूर्वेणान्वयः ॥ १८ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...त्वत्कथामृतरूपा याकथा तदेव उदकं वहंतीति तथा कीर्तिनद्यः तथा पादावनेजसरितो गंगाद्याश्च त्रिलोक्याः शमलानि हंतुं विभ्वः केन प्रकारेण आ
नु... [illegible] श्रवणोच्चारणेन अनुश्रूयत इत्यनुश्रवो वेदः तत्र ... कीर्तिरूपं तीर्थं श्रुतिभिः श्रवणेंद्रियैः अंघ्रिजं चांगसंगैः एवं शुचिषदः स्वाश्रमधर्मस्थितास्तव

वि[illegible]स्तवाऽमृतकथोदवहास्त्रिलोक्याः पादावनेजसरितःशामलानिहंतुं । आनुश्रवंश्रुतिभिरंघ्रिजमंगसंगैस्तीर्थद्वयं
शुचिषदस्त उपस्पृशंति ॥ १९ ॥ श्रीशुक उवाच ॥ इत्यभिष्टूय विबुधैः सेशःशतधृतिर्हरिं । अभ्यभाषत गोविंदं प्रणम्यांऽबरमा
श्रितः ॥ २० ॥ ब्रह्मोवाच ॥ भूमेर्भाराऽवतारायपुराविज्ञापितःप्रभो । त्वमस्माभिरशेषात्मंस्तत्तथैवोपपादितं ॥ २१ ॥ धर्मश्च स्थापितः
सत्सु सत्यसंधेषु वै त्वया । कीर्तिश्च दिक्षु विक्षिप्ता सर्वलोकमलापहा ॥ २२ ॥ अवतीर्य यदोर्वंशे बिभ्रद्रूपमनुत्तमं । कर्माण्युद्दामवृत्ता
नि हिताय जगतोऽकृथाः ॥ २३ ॥ यानि ते चरितानीश मनुष्याः साधवः कलौ । शृण्वंतः कीर्तयंतश्च तरिष्यंत्यंऽजसा तमः ॥ २४ ॥ यदुवं
शेऽवतीर्णस्य भवतः पुरुषोत्तम । शरच्छतं व्यतीयाय पंचविंशाधिकं प्रभो । नाऽधुना तेऽखिलाधार देवकार्यावशेषितं । कुलं
च विप्रशापेन नष्टप्रायमभूदिदं ॥ २६ ॥ ततः स्वधाम परमं विशस्व यदि मन्यसे । सलोकान् लोकपालान्नः पाहि वैकुंठ किंक
रान् ॥ २७ ॥ श्रीभगवानुवाच ॥ अवधारितमेतन्मे यदात्थ विबुधेश्वर । कृतं वः कार्यमखिलं भूमेर्भारोऽवतारितः ॥ २८ ॥ त
दिदं यादवकुलं वीर्यशौर्यश्रियोद्धतं । लोकं जिघृक्षद्रुद्धं मे वेलयेव महार्णवः ॥ २९ ॥

तीर्थद्वयमुपस्पृशंति सेवंत इति ॥ १९ ॥ विबुधैः सह ॥
२० विक्षिप्ता विस्तारिता ॥ २२ ॥ उद्दामानि वृत्तानि विक्रमा येषु तानि कर्माणि ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ वीर्यशौर्ययुक्तया श्रिया ॥ २९ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उद्धलेनलंघितंमयादिनं ३० वैकुंठंयास्यनूतवमवनंयास्यामि ३१ ३४ प्रजासंयास्यामश्रुतिवदतोऽयमभिप्रायः एतेदेवांशाःस्वाधिकाराननेवार्हंतिन
नुसद्योमोक्षंशरस्वांमृतासुखेरन् तस्मादत्रकदय फलंचब्रमासंनेष्यामीति ३५ दत्तशापाद्ब्रह्मणाद्गृहीतःश्चैयत्रस्नानमात्रंकृत्वा किल्बिषात्

यद्यसंहृत्यदृप्तानांयदूनांविपुलंकुलं गंतास्म्यऽनेनलोकोयमुद्वेलेनविनंक्ष्यति इदानींनाशआरब्धःकुलस्यद्विजशापजः ||
यास्यामिभवनंब्रह्मन्नेतदंतेतवाऽनघ ३१ श्रीशुकउवाच इत्युक्तोलोकनाथेनस्वयंभूःप्रणिपत्यतं सहदेवगणैर्देवःस्वधा
मसमपद्यत ३२ अथतस्यांमहोत्पातान्द्वारवत्यांसमुत्थितान् विलोक्यभगवानाहयदुवृद्धान्समागतान् ३३ श्रीभगवानुवाच
एतेवैसुमहोत्पाताव्युत्तिष्ठंतीहसर्वतः शापश्चनःकुलस्यासीद्ब्राह्मणेभ्योदुरत्ययः ३४ नवस्तव्यमिहाऽस्माभिर्जिजीविषुभिरा
र्यकाः प्रभासंसुमहत्पुण्यंयास्यामोऽद्यैवमाचिरं ३५ यत्रस्नात्वादक्षशापाद्गृहीतोयक्ष्मणोडुराट् विमुक्तःकिल्बिषात्सद्योभेजे
भूयःकलोदयं ३६ वयंचतस्मिन्नाप्लुत्यतर्पयित्वापितॄन्सुरान् भोजयित्वोशिजोविप्रान्नानागुणवतांऽधसा ३७ तेषुदानानि
पात्रेषुश्रद्धयोप्त्वामहांतिवै वृजिनानितरिष्यामोदानैर्नौभिरिवार्णवं ३८ श्रीशुकउवाच एवंभगवतादिष्टायादवाःकु
रुनंदन गंतुंकृतधियस्तीर्थंस्यंदनान्समयूयुजन् ३९ तन्निरीक्ष्योद्धवोराजन्श्रुत्वाभगवतोदितं दृष्ट्वारिष्टानिघोराणिनित्यंकृ
ष्णमनुव्रतः ४० ||
स्वाङ्गेगडुःखात्सद्योपिविमुक्तःसन्कलाहृद्धिंभेजे ३६ उशिजःकमनीयानन्नंधसांअन्नेन ३७ उप्त्वेति यथासुक्षेत्रेबीजसुसंबद्ध
फलंभवतितथादानंसत्पात्रइतिद्योतयति ३८ ४० || ||



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४१ लोकंमर्त्यलोकंनप्रत्यहन्नप्रतिहतवान् ॥ ४२ ४३ शय्यादिषुत्वांभक्ताः नित्यंसेवितवंतोवयंकथंत्यजेम ॥ ४५ त्यक्तुमशक्यत्वेप्रार्थयतेनमायात्वयादि
त्वाद्दत्वयाति चर्चिताअलंकृताः हिनिश्चितंजयेम ॥ ४६ संन्यासिनोपिबुधभक्तिचर्यादिक्लेशैः कथंचित्तरंतिवयंतुनायासेनैवतरिष्याम इत्याह वातरशनाइति

विविक्तउपसंगम्यजगतामीश्वरेश्वरं प्रणम्यशिरसापादौप्रांजलिस्तमभाषत ॥ ४१ ॥ उद्धवउवाच ॥ देवदेवेशयोगेशपुण्यश्रवण
कीर्त्तन संहृत्यैतत्कुलंनूनंलोकंसंत्यक्ष्यतेभवान् विप्रशापंसमर्थोपिप्रत्यहन्नयदीश्वरः ॥ ४२ ॥ नाहंतवांघ्रिकमलंक्षणार्द्धमपिके
शव त्यक्तुंसमुत्सहेनाथस्वधामनयमामपि ॥ ४३ ॥ तवविक्रीडितंकृष्णनृणांपरममंगलं कर्णपीयूषमास्वाद्यत्यजंत्यन्यस्पृहांजना
॥ ४४ ॥ शय्यासनाटनस्थानस्नानक्रीडाशनादिषु कथंत्वांप्रियमात्मानंवयंभक्तास्त्यजेमहि ॥ ४५ ॥ त्वयोपभुक्तस्रग्गंधवासोलंका
रचर्चिताः उच्छिष्टभोजिनोदासास्तवमायांजयेमहि ॥ ४६ ॥ वातरशनायऋषयः श्रमणाऊर्द्धमंथिनः ब्रह्माख्यंधामतेयांतिशां
तास्संन्यासिनोमलाः ॥ ४७ ॥ वयंत्विहमहायोगिन्भ्रमंतःकर्मवर्त्मसु त्वद्वार्त्तयातरिष्यामस्तावकैर्दुस्तरंतमः ॥ ४८ ॥ स्मरंतःकीर्त्तयं
तस्तेकृतानिगदितानिच गत्युत्स्मितेक्षणक्ष्वेलियन्नृलोकविडंबनं ॥ ४९ ॥ श्रीशुकउवाच ॥ एवंविज्ञापितोराजन्भगवान्देव
कीसुतः एकांतिनंप्रियंभृत्यमुद्धवंसमभाषत ॥ ५० ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेषष्ठोध्यायः ॥

ऊर्द्ध्वमंथिनःऊर्द्ध्वरेतसः ॥ ४७ तावकैर्भक्तैःसहत्वद्वार्त्तया ॥ ४८ क्ष्वेलीपरिहासः दंबैकत्वं ॥ ४९ एकांतिनमित्यादिस्वाभिप्रायावेदनेहेतुः ॥ ५० इत्येकादशेषष्ठ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्तमे तूद्धवस्यात्मज्ञानस्थित्यै हरिः स्वयं अवधूतेतिहासोक्त्या गुरून्ष्टाववर्णयत्॥ यदात्थ संहृत्यैतत्कुलमिति स्वर्वासं वैकुंठवासं प्रति १ २ त्वं च सर्वत्यागेनात्मनि
क्षेमं वेति वक्तुमाह कुलमिति त्रयेण ३ तदेवायं नष्टमंगलो न भविष्यति निराकांतः नितरां आक्रांतः ४ न वस्तव्यमेव त्वया ५ ६ ननु गुणदोषात्मके विषमे लो
के कथं समदृष्टिः स्यात् तत्राह यदिदमिति मनआदिभिः गृह्यमाणं मनोमयत्वान्मायेति विद्धि तदपि न स्थिरं किंतु नश्वरं च विद्धि ७ मनोमयत्वे हेतुः पुंस इति॥

श्रीभगवानुवाच॥ यदात्थ मां महाभाग तच्चिकीर्षितमेव मे॥ ब्रह्मा भवो लोकपालाः स्वर्वासं मेऽभिकांक्षिणः॥ १ मया निष्पादितं ह्य
त्र देवकार्यमशेषतः॥ यदर्थमवतीर्णोऽहमंशेन ब्रह्मणार्थितः॥ २॥ कुलं वै शापनिर्दग्धं नंक्ष्यत्यन्योन्यविग्रहात्॥ समुद्रः सप्त
मे ह्येतां पुरीं च प्लावयिष्यति ३॥ यर्ह्येवायं मया त्यक्तो लोकोऽयं नष्टमंगलः॥ भविष्यत्यचिरात्साधो कलिनापि निराकृतः॥ ४॥ न व
स्तव्यं त्वयैवेह मया त्यक्ते महीतले॥ जनोऽधर्मरुचिर्भद्र भविष्यति कलौ युगे॥ ५॥ त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबंधुषु॥ मय्या
वेश्य मनः सम्यक् समदृग्विचरस्व गां॥ ६॥ यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः॥ नश्वरं गृह्यमाणं च विद्धि मायामनोमयं
७ पुंसोऽयुक्तस्य नानार्थो भ्रमः स गुणदोषभाक्॥ कर्माकर्मविकर्मेति गुणदोषधियो भिदा॥ ८॥

अयुक्तस्य विक्षिप्तमनसः नानार्थो भेदविषयो भ्रमः॥ स भ्रम एव गुणदोषभाक्॥ ननु वेदेनैव विधिनिषेधाभ्यां भेदस्य सत्यतोक्ता न भ्रमविजृंभितगुणदोष
धियो भिदेत्याह कर्म विहितं अकर्म तल्लोपः॥ विकर्म निषिद्धमिति भिदा॥ अविद्यावद्विषय एव वेदप्रवृत्तिः॥ ८॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥९॥

६ मनिपरिछिन्नेविततंजगदीक्षणीयंतत्राह आत्मानमिति। मयिब्रह्मणितद्रूपेणेक्षस्व। नन्वेवंयुक्तचित्तत्वेनकर्माकरणेदेवादयोविघ्नान्करिष्यंतितत्राहज्ञाने
भा. ज्ञानंवेदतात्पर्यनिश्चयः विज्ञानंतदर्थानुभवः ताभ्यांसम्यक्युक्तः ततश्चात्मानुभवेनैवतुष्टचित्तः अतएवशरीरिणांदेवादीनामात्मभूतः अंतरायैर्नविहन्यसे
अयंभावः। यावदनुभवंयथाश्रमंकर्माणिकुर्यादेव। तदनंतरंसर्वेषामात्मभूतत्वान्नकोऽपिविघ्नानाचरतिनत्वाचक्षतितस्यहनदेवाश्चनाऽभूत्याईशते

तस्माद्युक्तेंद्रियग्रामोयुक्तचित्तइदंजगत्। आत्मनीक्षस्वविततमात्मानंमय्यधीश्वरे ९ ज्ञानविज्ञानसंयुक्तआत्मभूतःशरी
रिणां। आत्मानुभवतुष्टात्मानांतरायैर्विहन्यसे १० दोषबुद्ध्योभयातीतोनिषेधान्ननिवर्तते। गुणबुद्ध्याचविहितंनकरोति
तियथार्भकः। ११ सर्वभूतसुहृच्छांतोज्ञानविज्ञाननिश्चयः। पश्यन्मदात्मकंविश्वंनविपद्येतवैपुनः १२ श्रीशुकउवाच॥ ॥इत्या
दिष्टोभगवतामहाभागवतोनृप। उद्धवःप्रणिपत्याहतत्त्वजिज्ञासुरच्युतं १३॥ ॥

नेऽआत्माह्येषांसभवतीति। १० नन्वेवंभूतस्यज्ञानस्यापियथेष्टाचरणप्रसंगइत्याह दोषबुद्ध्येति। गुणदोषबुद्ध्यतीतोऽपिप्राक्तनसंस्कारात्निषेधान्निवर्ततएव किंतुन
दोषबुद्ध्याविहितंचप्रायशःकरोतिनगुणबुद्ध्या। यथाऽर्भकः संकल्पविकल्परहितः किंचित्करोतिकुतश्चिन्निवर्ततेतद्वत्। ११ एवंभूतस्यनपुनःसंसारइत्याहसर्व
भूतेति। नविपद्येतनपुनःसंसरेत्। १३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वंतु सर्वपरिस्कमेसाक्षरूपदेशमात्मनोः योगंपमन्वान्नःएवतियोगेशेति योगफलदायिन् योगविन्यासन्यासोनामातिगोप्योनिक्षेपविशेषः यथा योगविन्यस्यते
क्रियते यस्मिन् योगात्मन्नुयोगेष्वात्माप्रकटोनवतियस्ययोगस्वरूपेतिवा योगस्यसंनवोयस्मात् चतुर्निरितैःसंबोधनैःस्वमहिम्नाकैवल्यंत्वयोपदिष्टंनतुम
दधिकारंपर्यालोच्येतिद्योतितंततदाहनिश्रेयसायेति नवारोग्यायार्थंसर्वस्वदानादिवदयंत्यागः किंतुसंन्यासलक्षणः अप्रसापत्तिरूपः १४ १९ यंप्रतीत्यागा
रूपदिष्टःसोहंमूढमतिःकुतः ममेतिअहमित्यिवसानुबंधेपुत्रादिसहितेत्वन्मायया विरचितेआत्मनिदेहेविगाढोनिमग्नः अतः अतःतत्तु नवतानिगदितंयथाः

उद्धवउवाच॥ ॥योगेशयोगविन्यासयोगात्मन्योगसंनव॥ निश्रेयसायमेप्रोक्तस्त्यागःसंन्यासलक्षणः १४॥ त्यागोयंदुष्करो
भूमन्कामानांविषयात्मभिः॥ सुतरांत्वयिसर्वात्मि न्नभक्तैरितिमेमतिः॥ १५॥ सोहंममाहमितिमूढमतिर्विगाढस्त्वन्मायया वि
रचितात्मनिसानुबंधे॥ तत्त्वंजसानिगदितंनवतायथाऽहंसंसाधयामिनगवन्ननुशाधिनृत्यं॥ १६॥ सत्यस्यतेस्वदृशआत्मनआ
त्मनोऽन्यंवक्तारमीशविबुधेष्वपिनानुचक्षे॥ सर्वेविमोहितधियस्तवमाययेमेब्रह्मादयस्तनुभृतोबहिरर्थनावाः॥ १७॥ ॥

हंसंजसासंसाधयामितथात्वंमामनुशाधिशासनैःशिक्षय॥ १६॥ मयासंक्षेपतउक्तंविस्तरतस्तस्मान्नोब्रूहीतिचेत् अतआहसत्यस्येति स्वदृशःस्वप्रकाशस्यसत्यस्य
...नःआत्मनोमोक्षतिवक्तारंतेत्वत्तःअन्यंनानुचक्षेनपश्यामि स्वदृशःस्वतःसिद्धज्ञानात् त्वत्तोऽन्यमितिवाकुतइत्यतआहसर्वइति बहिरर्थभावाविष
...सः १७॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...लाभवंति केचिच्चैवं विना फलकाले विनश्यंति केचिदशक्ताः केचि... ब्रह्मणेऽसमर्थाः केचित्तु स्थानभ्रष्टाः तस्मात्त्वमेवात्यर्थमनवद्यमित्यादीनि पंचविशेषणानि
ण... न यस्य तः कालतः पारं देशतश्च यस्य तं कालादिभिरकुंठो वैकुंठलोको धिष्ण्यं स्थानं यस्य तं उ हे हे भगवन् ह स्फुटं निर्वेदहेतुः वृजिनैर्दुःखैरभितप्तः
दुःकारगौरवाय ह्रकारो युक्त इव पठनीयः नत्वनवद्यत्वादीनि कुतो ममेत्यत आह नारायणमिति स्वतुकं पितामह नरो जीवः तस्य सखायं भगवंतं शरणं
प्रपद्ये १८ तदेवमसंभावनाविपरीतभावनामात्रोपदिष्टं तत्त्वमनवगाहमानं प्रति तन्निवृत्तये गुरूपदेशं विना ऽपि स्वान्वयव्यतिरेकाभ्यामात्मानमेव तत्त्वम्

तस्माद्भवंतमनवद्यमनंतपारं सर्वज्ञमीश्वरमकुंठविकुंठधिष्ण्यं ॥ निर्विण्णधीरहमु हे वृजिनाभितप्तो नारायणं नरसखं शरणं
प्रपद्ये ॥ १८ ॥ श्रीभगवानुवाच ॥ ॥ प्रायेण मनुजा लोके लोकतत्त्वविचक्षणाः ॥ समुद्धरंति ह्यात्मानमात्मनैवाऽशुभाशयात् ॥ १९
आत्मनो गुरुरात्मैव पुरुषस्य विशेषतः ॥ यत्प्रत्यक्षानुमानाभ्यां श्रेयोऽसावनुविंदते ॥ २० ॥ पुरुषत्वे च मां धीराः सांख्ययोगवि
शारदाः ॥ आविस्तरां प्रपश्यंति सर्वशक्त्युपबृंहितं ॥ २१ ॥ ॥

प्रतिपत्तिनिर्वर्तितेति दर्शयितुमाह प्रायेणेति लोकतत्त्वस्य विचक्षणाः परीक्षकाः ॥ अशुभाशयात् विषयवासनातः ॥ १९ ॥ तदुपपादयति ॥ आत्मनः पश्वादिशरीरेऽप्यात्मैव
हिताहितज्ञानगुरुः २० तत्र प्रत्यक्षं दर्शयति पुरुषत्वे चेति ॥ तथा च श्रुतिः पुरुषत्वे चाविस्तरामात्मा स हि प्रज्ञानेन संपन्नतमो विज्ञातं वदति विज्ञातं पश्यति वे
द श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीप्सत्येवं संपन्नोऽथेतरेषां पशूनामशनापिपासे एवाभिविज्ञानमिति २१ ॥ ॥

का०

भा०ए०टी०
३५

[चित्]

अतः पुरुषोत्तंसौ तिरेकेति ॥२२॥ अनुमानमाह अत्रेति अत्र पौरुष्यां पुरि युक्ता अप्रमत्ताः अयाद्धं अद्धा भ्यो अहंकारादिभ्यो व्यतिरिक्तं मां अद्धा साक्षात् मृगयंति मा
र्गणे प्रकारद्वयमाह गृह्यमाणैर्गुणैर्बुद्ध्यादिभिर्हेतुभिः जडानां प्रकाशाः स्वप्रकाशमेकं विना न घटत इत्यनुपपत्तिमुखेन लक्षकैः तथा तैरेव लिंगैः व्याप्तिमुखेनानु
मानतः ईश्वरं प्रवर्तकं मृगयंते बुद्ध्यादिकरणानि कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदिति तदुक्तं भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः दृश्यैर्बुद्ध्यादिभिर्द्रष्टा ल
क्षणैरनुमापकैरिति नन्वेतावता अनुमानिक आत्मेति मतं देहादिव्यतिरिक्तत्वं पदार्थशुद्धिमात्रस्यैवानुमानेन विवक्षितत्वात् ॥२३॥ भूयोऽन्वयव्यति

एकद्वित्रिचतुष्पादो बहुपादस्तथापदः ॥ बह्व्यः संति पुरः सृष्टास्तासां मे पौरुषी प्रिया ॥२२॥ अत्र मां मार्गयंत्यद्धा युक्ता हेतुभिरीश्व
रं गृह्यमाणैर्गुणैर्लिंगैरग्राह्यमनुमानतः ॥२३॥ अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ अवधूतस्य संवादं यदोरमिततेजसः ॥
२४ ॥ अवधूतं द्विजं कंचिच्चरंतमकुतोभयं ॥ कविं निरीक्ष्य तरुणं यदुः पप्रच्छ धर्मवित् ॥२५॥ यदुरुवाच ॥ ॥ कुतो बुद्धिरियं ब्रह्म
[illegible]न्नकर्तुः सुविशारदा ॥ यामासाद्य भवांल्लोकं विद्वांश्चरति बालवत् ॥२६॥ प्रायो धर्मार्थकामेषु विवित्सायां च मानवाः ॥ हेतुनैव स
मीहंते आयुषो यशसः श्रियः ॥२७॥ ॥

[श्च]

राम
३५

रेकाभ्यां प्रसंभावनादिनिवृत्त्या विविदिषा समाहत्य चापीति ॥२४॥२५॥ सुविशारदा अतिनिपुणा ॥२६॥ सर्वलोकवैलक्षण्यमेवाह प्राय इति ॥ धर्मादिषु विविदिषायां
च [illegible] त्रासेन मानवाः समीहंते प्रवर्तंते तत्रापि आयुरादेर्हेतुना कामनयैव ॥२७॥ शिवाः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२त्वंतुकल्पः समर्थः कविः करणज्ञानसंपन्नः। दक्षः हस्तलाघवादियुक्तः। सुभगः सर्वप्रियः सुन्दरतनुः। मितभाषणः मितं मधुरं वदसि

त्वं [illegible]स्य निष्कर्मणः कर्त्तानिवसि नचकिंचिदीहसइच्छसी नचकिंचिदीहसइच्छसि नन्वबालकवाग्न्नज्ञानेनस्वानैपुण्येनवाविरूपत्वेनवाग्नवाग्मितयावाज्ञी
[illegible]एवंनेत्याहकल्पइत्यादिना २८ महानानंदस्मृतवक्तुनइतिदहेत्तिजिनेषितिति २९ स्पर्शविहीनस्यविषयभोगरहीतस्य अत्रहेतुः केवलमात्मनःक
लत्रा[illegible]दिशून्यस्य ३० बुध्यैवोपाश्रिताःस्वीकृताःनतूपदेशेन अटामिपर्यटामि ३१ ३२ ३३ शोभनंरूपंकीटस्यकरोतीतिसुपेशस्कृत् ३४ मेमयाआश्रा भ्रमरी

त्वंतुकल्पःकविर्दक्षःसुभगोऽमृतभाषणः नकर्त्तानीहसेकिंचिज्जडोन्मत्तपिशाचवत् २८ जनेषुदह्यमानेषुकामलोभदवाग्नि
नानुतप्यसेऽग्निनामुक्तोगंगांभस्थइवद्विपः २९ त्वंहिनःपृच्छतांब्रह्मन्नात्मन्यानंदकारणं ब्रूहिस्पर्शविहीनस्यभव
तःकेवलात्मनः ३० श्रीभगवानुवाच यदुनैवंमहाभागोब्रह्मण्येनसुमेधसा पृष्टःसभाजितःप्राहप्रश्रयावनतंद्विजः
उवाच :३१ ब्राह्मणःसंतिमेगुरवोराजन्बहवोबुद्ध्युपाश्रिताः यतोबुद्धिमुपादायमुक्तोऽटामीहतान्शृणु ३२ पृथिवीवायुराकाश
मापोऽग्निश्चंद्रमारविः कपोतोऽजगरःसिंधुःपतंगोमधुकृद्गजः ३३ मधुहाहरिणोमीनःपिंगलाकुररोऽर्भकः कुमारीशरकृ
त्सर्पऊर्णनाभिःसुपेशस्कृत् ३४ एतेमेगुरवोराजंश्चतुर्विंशतिराश्रिताः शिक्षाःवृत्तिभिरेतेषामन्वशिक्षमिहात्मनः ३५

श्रितास्तदाहः एतेषांवृत्तिभिःआत्मनःशिक्षाःशिक्षणीयानर्थान्हेयोपादेयादीन्अन्वशिक्षंअनुशिक्षितवानस्मि ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०ए०
३६

नापक्रमेयं याति ३६ क्षितेः क्षमां शिक्षितवानित्याह भूतैरिति आक्रम्यमाणः पीड्यमानः तद्विद्वान् भूतानां दैववशानुगतित्वं विद्वान् व्रतं
नियमं ३७ पर्वतरूपा वृक्षरूपा च या पृथिवी तस्याः शिक्षितमाह शश्वदिति सर्वदा परार्थाः सर्वा ईहा यस्य सः परार्थ एव एकान्तेन
संभवो यस्य सः भूभृतः पर्वतात् तस्य हि वृक्षतृणनिर्झरप्रसवक्रियाः परार्था एव यथा तद्वत् तथा नगशिष्यः वृक्षशिष्यः सन् परात्म
तां पराधीनात्मतां वृक्षो यथा परैश्छेदनदाहाद्यानयनसंपर्कमनुमन्यते तद्वत् ३८ वायुरपि द्विविधः प्राणो बाह्यश्च तत्र प्राण
स्य गुरुत्वमाह प्राणवृत्त्येति प्राणवृत्त्याहारादिमात्रेण प्रवर्त्तते रूपरसादीनिन्द्रियविषयांस्तु नापेक्षेत तेन धातुनिरापन्ने वेदित्यर्थः

यतो यदनुशिक्षामि यथा वा नाहुषात्मज तन्नृपापुरुषव्याघ्र निबोध कथयामि ते ३६ भूतैराक्रम्यमाणोऽपि धीरो दैव
वशानुगैः तद्विद्वान्न चलेन्मार्गादन्वशिक्षं क्षितेर्व्रतं ३७ शश्वत्परार्थसर्वेहः परार्थैकान्तसंभवः साधुः शिक्षेत भूभृत्तो
नगशिष्यः परात्मतां ३८ प्राणवृत्त्यैव संतुष्येन्मुनिर्नैवेंद्रियप्रियैः ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः ३९
ना विषयेष्वाविशन् योगी नानाधर्मेषु सर्वतः गुणदोषव्यपेतात्मा न विषज्जेत वायुवत् ४० पार्थिवेष्विह देहेषु प्रविष्टस्तद्गु
णाश्रयः गुणैर्न युज्यते योगी गंधैर्वायुरिवात्मदृक् ४१

प्राणवृत्तेरकरणे मनोवैकल्येन ज्ञाननाशः स्यात् तत्कृतो देहनिर्वाहः
कर्त्तव्यः गुणलिप्सायां तु वाक्मनश्च विक्षिप्येत तस्मान्नाधिकं लिप्सेदित्याह ज्ञानमिति नावकीर्येत न विक्षिप्येत ३९ विषयान् सेव
मानोऽपि तेषु नासक्तिं बाह्यवायोः शिक्षेदित्याह विषयेष्विति नानाधर्मेषु शीतोष्णादिधर्मकेषु न हि वायुर्वने दहने वा सज्जेत
३६
३९ ४० यथा वायुर्गन्धादिधर्मयोगेन प्रतीयमानोऽपि वस्तुतस्तान्न तथा योगी एवं देहादिधर्मयोगेनाहं व्यपेक्षीयमाणोऽप्यात्मानं तद्धर्म
वानिति संतापवित्तिमिति वायोरेव शिक्षितमित्याह पार्थिवेष्विति ४१

एकस्यैवाद्वितीयस्यात्मनः अंतर्बहिर्भावेन वर्तमानस्य मसंगत्वं चेति २

आकाशाच्छिक्षितं संभावयन्नाह अंतर्हित इति द्वयेन अंतर्हितश्च देहांतर्गतोपि मुनिरात्मनो देहाद्यसंगं अत एवाव्यवच्छेदं च भावयेत् कुतः स्थिरजं
गमेषु समन्वयेन तया व्याप्तिस्तया किंभूतः सूत्रेस्येव व्याप्तिः नविततस्य सर्वगतस्यात्कुतः ब्रह्मात्मभावेन ब्रह्मस्वरूपभावनया तत्त्वमसीतिश्रुतेः न
न्वेतत्सर्वं कथं संभवतीत्यत आह नभस्तत्तुल्यत्वं संभावयेत् यथा नभसः सर्वगगतस्य न घटादिभिः परिच्छेदो वा एवमात्मनोपि संभवतीति ४२ किंच कूटस्थत्व संग
स्यात्मनो नागमापायि देहादिसंबंध इत्याह तेजोबन्नमयैः तेजश्च आपश्च अन्नं पृथिवी च तन्मयैः कालसृष्टैर्गुणैर्देहादिभिः पुमान्न संस्पृश्यत इति नभोदृष्टां व

अंतर्हितश्च स्थिरजंगमेषु ब्रह्मात्मभावेन समन्वयेन। व्याप्त्याऽव्यवच्छेदमसंगमात्मनो मुनिर्नभस्त्वं विततस्य
भावयेत् ४२ तेजोबन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः नस्पृश्यते नभस्तद्वत्कालसृष्टैर्गुणैः पुमान् ४३ स्वच्छः प्र
कृतितः स्निग्धो माधुर्यस्तीर्थभूर्नृणां मुनिः पुनात्यपां मित्रमीक्षोपस्पर्शकीर्तनैः ॥४४ तेजस्वी तपसा दीप्तो दुर्द्ध
र्षोदरभाजनः। सर्वभक्ष्योपि युक्तात्मा नादत्ते मलमग्निवत् ४५॥

गतपुना

भवतीति ४३ स्वच्छत्वादिभिर्गुणैः उदकं जगतीतितगुणाः मया
शिक्षिता इत्याह स्वच्छः निर्मलः प्रकृतितः स्वभावतः स्निग्धः जनेषु अनुरागवान् माधुर्यः मधुरालापी तीर्थभूः तीर्थस्थानं अपां मित्रं उदकतुल्यः ईक्षादि
भिः पावेः सेवार्थेभ्यः पुनाति स्वच्छत्वादिगुणैरग्न्यादिकमाह रयां ज्ञातं ४४ अग्नेः शिक्षितमाह तेजस्वीति तेजस्वी ज्ञानातिशयात् विशेषतः तपसा
दीप्तः दुर्धर्षः क्षोभ्यः सर्वभक्षः उदरभाजनश्च अपरिग्रहः युक्तात्मा मुनिः ४५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०टी०
३७

स्वमैस्वशिक्षां बरमाह क्वचिदिति यथाऽग्निः परेच्छयैवव्हविर्गृह्णाति तथायुनिरिसाह दातॄणामिति प्रागुत्तराशुभंभूतं भविष्यच्च पापं ४६ आत्मनो देहोपा
धिकमेवोच्चनीचत्वादि न स्वतो विकमित्यग्निदृष्टांतेन संबोवित मित्याह स्वमाययेति स्वमायया स्वाविद्यया सृष्टं सदसल्लक्षणं देवतीर्यतिर्यगादिरूपं
विप्रशूद्रादिरूपं वा ४७ आत्मनो जन्मादिषड्विकारा नावमंड्ड्दृष्टांतेन संबोवितदृसाह विसर्गाद्याइति विसर्गो जन्मपूर्वं श्मशानं नाशः तत्र यज्ज्योतिशास्त्र
प्रक्रिया आत्मोप्यं मंडलं चंद्रः तेजोमयं मंडलमादित्यः तयोरेकनक्षत्रावस्थाने चंद्रेण हरपतेन्चतुर्थ आदित्यमंडलेन समरेखावस्थितेन व्यवधानात

क्वचित्छन्नः क्वचित्स्पष्ट उपास्यः श्रेय इच्छतां भुंक्ते सर्वत्र दातॄणां दहन्प्रागुत्तराशुभं ४६ स्वमायया सृष्टमि
दं सदसल्लक्षणं विभुः प्रविष्ट ईयते तत्तत्स्वरूपोऽग्निरिवैधसि ४७ विसर्गाद्याः श्मशानांता भावा देहस्य नात्मन
:कलानामिव चंद्रस्य कालेनाऽव्यक्तवर्त्मना ४८ ॥

सा अमावास्या अथ षष्टिघटिकामिश्रं चंद्रोन क्षत्रांतरं गच्छति आदित्यस्त त्रयोदशभिरहोरात्रैः अतः प्रतिपदमारभ्य विषमस्थितस्य आदित्यमंड
... प्रवर्द्धमानाग्ना अप्यमंडले प्रतिबिंबितो हरपते सा कलेत्युच्यते एवं पंचदशो ऋ्षि त्रयोदशभिर्नक्षत्रैरंतरमितिरात्रिच कस्य सप्तवि
... अमकस्य मध्ये संमुखो चंद्रादित्यौ तिष्ठतः तदा सपूर्णप्रतिबिंबं नूछायालोछितं हरपते सा पूर्णिमा तस्या अमावास्या प्रतिबिंबेन सह सो षोडश
द... न्वयते तेन ततः पुनः प्रतिपदमारभ्य मंडलयो विषमीभावात्कलाह्रासस्तत्र यथा कलानामेवोत्पत्त्यादयो नाप्यमंडलस्य तद्वदात्मनोऽपीसाहकालाभ्या
मिवेति ४८ राम ३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिं...त्रलोकेनेनामिह दृष्टांतेनैव देहानां ह्रासएगं च गुरुतयावैराग्यं प्रशिक्षितमित्याह कालेनेति ओघवद्वेगो यस्य तेन आत्मनं संबंधिनां भूतानां देहानामित्यर्थः
[illegible] ...नानां ४९ आदित्याच्छिक्षितमाह द्वेन गुणैरिति गुणैरिंद्रियैर्गुणान्विषयानुपादत्ते यथाकालं च प्रथिमागतेम्भृति विमुंचति च न तेषु युज्यते ल
[illegible] ...तिवा निविवेकं न करोति गोभिः रश्मिभिः गाः जलानि गोपतिः सूर्यो यथा ५० स्वतो भेदमनुन्नस्याप्यात्मनो भेदप्रतीतिरूपाधिकृतेत्यादित्य धि

पिन स्थ इव तद्गतः लक्ष्यते

कालेन ह्योघवेगेन भूतानां प्रभवाप्ययौ नित्यावपि न दृश्येते आत्मनोऽग्नेर्यथार्चिषां ४९ गुणैर्गुणानुपादत्ते यथाकालं
विमुंचति न तेषु युज्यते योगी गोभिर्गा इव गोपतिः ५० बुध्यते स्वेन भेदेन व्यक्तिस्थूलमतिभिरात्मा चावस्थितोऽर्कव
त् ५१ नातिस्नेहः प्रसंगो वा कर्त्तव्यः क्वापि केनचित् कुर्वन्विंदेत संतापं कपोत इव दीनधीः ५२ कपोतः कश्चनार
ण्ये कृतनीडो वनस्पतौ कपोत्या भार्यया सार्द्धमुवास कतिचित्समाः ५३ ॥ ॥

सा

सं

दृष्टांतेनैव संस्थ इव तद्गतः लक्ष्यते भावितमित्याह बुध्यत इति स्वे स्वरूपेऽवस्थित आत्मा भेदेन न बुध्यते अनित्य...न कीति व्यक्तिरूपाधिः व्यक्तिस्थः उपा
धौ प्रतिबिंबितः अत एव तद्गत उपाधिं प्रविष्ट इव भेदेन स्थूलमतिभिर्लक्ष्यते अर्कवदित्यन्वयः ५१ कपोताच्छिक्षितमाह नातिस्नेह इति स्नेहः प्रीतिः प्रसंगः उ
पलालनाद्यासक्तिः ५२ दृष्टांतं प्रपंचयति कपोत इति ५३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तयोर्मिथः स्नेहं प्रसंगं दर्शयति कपोतावितित्रयेण स्नेहेन गुणितं निबद्धं हृदयं ययोस्तौ ।५४। विश्रब्धौ निःशंकौ ।५५। साकपोतीतर्प्पयंतीसहासवीक्षि
तालापादिभिः प्राणयंतीतिष्ठतएवतेनानुकंपितासतीयंयंवांछतितंतंकाममसमनयत्संपादयामासराजन्निति तंप्रत्येतिसंबोधितं ।५६। ७ तेषुजलनरि

कपोतौस्नेहगुणितहृदयौगृहधर्मिणौ। दृष्टिंदृष्ट्यांगमंगेनबुद्धिंबुद्ध्याबबंधतुः ।५४। शय्यासनाटनस्थानवार्ताक्री
डाशनादिकं मिथुनीभूयविश्रब्धौचेरतुर्वनराजिषु ।५५। यंयंवांछतिसाराजंस्तर्प्पयंत्यनुकंपिता तंतंसमनयत्कामं
कृच्छ्रेणाप्यजितेंद्रियः ।५६। कपोतीप्रथमंगर्भंगृह्णतीकालआगते। अंडानिसुषुवेनीडेस्वपत्युःसंनिधौसती ।५
७। तेषुकालेव्यजायंतरचितावयवाहरेः। शक्तिभिर्दुर्विभाव्याभिःकोमलांगतनूरुहाः ।५८। प्रजाःपुपुषतुःप्रीतौदंपती
पुत्रवत्सलौ। शृण्वंतौकूजितंतासांनिर्वृतौकलभाषितैः ।५९। तासांपतत्रैःसुस्पर्शैःकूजितैर्मुग्धचेष्टितैः। प्रत्युद्गमैर
दीनानांपितरौमुदमापतुः ।६०। स्नेहानुबद्धहृदयावन्योन्यंविष्णुमायया। विमोहितौदीनधियौशिशून्पुपुषतुःप्रजाः ।६
१। एकदाजग्मतुस्तासामन्नार्थंतौकुटुंबिनौ। परितःकाननेतस्मिन्नर्थिनौचेरतुश्चिरं ।६२। दृष्ट्वातान्लुब्धकःकश्चिद्य
दृच्छातोवनेचरः। जगृहेजालमातत्यचरतःस्वालयांतिके ।६३।

तेष्वंडेषुहरेः। स्वभावकर्मादिशक्तिभिर्निरूपिताऽवयवाः पत्रिणः कोमलानि अं
गानितनूरुहाश्चयेषांते ।५८। पतत्रैः पक्षैः ।अदीनानां हृष्टानां ।६०। शिशून्बालान्प्रजाः पुत्रान् ।६२। ६२। स्वालयांतिकेचरतःक्रीडतःतान्कपोतपुत्रान्
[illegible] प्रसार्य ।६३। ॥

राम
३८

उ...लादिवञ्चतस्मोत्पण्यं गतौ संतौ पोषणं भक्ष्यं ६३ ६५ शिचाजालेन ६६ आत्मानुरूपं भार्यां विललाप शुशोच ६७ विलापमाह त्रयेण अहो इति अहस

कपोतश्च कपोती च प्रजापोषे सदोत्सुकौ । गतौ पोषणमादाय स्वनीडमुपजग्मतुः ६४ । कपोती स्वात्मजान्वीक्ष्य बालकान् जाल
संवृतान् । तानभ्यधावत्क्रोशंती क्रोशतो भृशदुःखिता ६५ । साऽसकृत्स्नेहगुणिता दीनचित्ताजमायया । स्वयं चाऽबध्यत शिचाब
द्धान्पश्यंत्यपस्मृतिः ६६ कपोतश्चात्मजान्बद्धानात्मनोऽप्यधिकान्प्रियान् । भार्यां चात्मसमां दीनो विललापातिदुःखितः ६७ अ
हो मे पश्यताऽपायमल्पपुण्यस्य दुर्मतेः । अतृप्तस्याऽकृतार्थस्य गृहस्त्रैवर्गिको हतः ६८ अनुरूपानुकूला च यस्य मे पतिदेवता ।
शून्ये गृहे मां संत्यज्य पुत्रैः स्वर्याति साधुभिः ६९ सोऽहं शून्ये गृहे दीनो मृतदारो मृतप्रजः । जिजीविषे किमर्थं वा विधुरो दुःखजीवित
ः ७० तांस्तथैवावृतान् शिग्भिर्मृत्युग्रस्तान् विचेष्टतः । स्वयं च कृपणः शिक्षु पश्यन्नप्यबुधोऽपतत् ७१ तं लब्ध्वा लुब्धकः क्रूरः कपो
तं गृहमेधिनं कपोतकान्कपोतीं च सिद्धार्थः प्रययौ गृहं ७२ एवं कुटुंब्यशांतात्मा द्वंद्वारामः पतत्रिवत् । पुष्णन्कुटुंबं कृपणः
सानुबंधोऽवसीदति ७३ यः प्राप्य मानुषं लोकं मुक्तिद्वारमपावृतं । गृहेषु खगवत्सक्तस्तमारूढच्युतं विदुः ७४ इति श्रीभ
गवते महापुराणे एकादशस्कंधे सप्तमोऽध्यायः ॥ ॥

स्पष्टं सुखेश्च कृत्यार्थस्य स्वदस्ममसंपादयतः ६८ ६९ ७० त्वन्मा हतान्सपिस्वन्नपि शिग्भिर्जालेषु ७१ ७२ दार्ष्टांतिके योजयति एवमिति ७३ एवं गृहासक्तिस्तिर
श्चामप्यनर्थहेतुः मनुष्यस्य त्वति निंदितेत्याह यः प्राप्येति ७४ । इति एकादशे टीकायां सप्तमोऽध्यायः ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०टी० ३९

सहो मनोबलं बलं

अष्टमे ऽजगरादिभ्यो नवभ्यः शिक्षितं हरिः अवधूतगिरा प्राह विवेकायोद्धवं प्रति १ प्रारब्धकर्मणो ऽस्यावश्यंभावित्वात्तदर्थोद्यमैर्नायुर्व्ययो वृथा कर्त्त
व्य इत्यजगराच्छिक्षितमित्याह सुखमित्यादिना यदैन्द्रियकं सुखं तत्स्वर्गे नरके च भवत्येव यथा दुःखं तस्मात्तद्बुधस्तन्नेच्छेत् १ शरीरनिर्वाहमात्रं तु यथा
लब्धेन कर्त्तव्यमित्याह ग्रासमिति आजगरः अजगरवृत्तिः अक्रियः उदासीनः २ यदा नापतति तदा किं कर्त्तव्यमित्यत आह शयीतेति अनुपक्रमः दिष्टभु निरुद्यमः
क् दैवमेवाग्रासकमिति धैर्यवान् ३ ननु समर्थोऽपि शयीतैव किं तु इत्याह ओज इति ओज इन्द्रियबलं शरीरमेव तदुक्तमपि देहमकर्मकमैहेन्नतश ३

श्रीब्राह्मण उवाच ॥ सुखमैन्द्रियकं राजन् स्वर्गे नरक एव च देहिनां यद्यथा दुःखं तस्मान्नेच्छेत तद्बुधः ॥१॥ ग्रासं सुमृष्टं विरसं म
हान्तं स्तोकमेव वा ॥ यदृच्छयैवापतितं ग्रसेदाजगरोऽक्रियः ॥२॥ शयीताहानि भूरीणि निराहारोऽनुपक्रमः ॥ यदि नोपनमेद्ग्रासो म
हाहिरिव दिष्टभुक् ॥३॥ ओजःसहोबलयुतं बिभ्रद्देहमकर्मकं ॥ शयानो वीतनिद्रश्च नेहेतेन्द्रियवानपि ॥४॥ मुनिः प्रसन्नगम्भीरो
दुर्विगाह्यो दुरत्ययः ॥ अनन्तपारो ह्यक्षोभ्यः स्तिमितोद इवार्णवः ॥५॥ ॥

शयान एव भवेत् वीतनिद्रः स्वार्थे दत्तदृष्टिः न चेतनः पुनरीहेत इन्द्रियवानपि तद्दर्शनादिव्यापारमपि निवारयति ४ समुद्राच्छिक्षितमाह मुनिरिति बहिः प्रस
[illegible] रश्च दुर्विगाह्यः एवंभूत इति परिकरैर्यित्तुमशक्यः अगाधाशयत्वात् दुरत्ययः अनतीक्रमणीयः तेजस्वित्वात् अनन्तपारः कालतो राम
[illegible] भ्यः स्वरूपाविर्भावात् अक्षोभ्यः अविकार्यः रागाद्यभावात् स्तिमितोदः निश्चलोदको ऽर्णवो यथा तद्वदेतैर्गुणैर्नविदित्यर्थः ॥५॥ ३९

ल्प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच [...]वर्षास्वपि सरिद्भिः समृद्धोऽपि सागरो यथा नोत्सर्पेत् ग्रीष्मे तद्विहीनोऽपि न शुष्येत् तथा समृद्धकामस्तद्विहीनो वा न हृष्येत् न शोचेदित्यर्थः अत्र हेतुः ना
[...]विषयपर इति ६ रूपगंधस्पर्शशब्दरसैः पंचभिर्विषयैर्मोहिताः पतंगमधुकरगजहरिणमीना हताः अतस्तेषु नासक्तौ पंचैते गुरवः त
[...] [...]तंगकुरंगगजभृंगमीना हताः पंचभिरेव पंच एकः प्रमादी स कथं न हन्यते यः सेव्यते पंचभिरेव पंचेति तत्र रूपविलासमोहितो नश्यतीति प

समृद्धकामो हीनो वा नारायणपरो मुनिः नोत्सर्पेत न शुष्येत सरिद्भिरिव सागरः ६ दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेंद्रियः प्र
लोभितः पतत्यंधे तमस्यग्नौ पतंगवत् ७ योषिद्धिरण्याभरणांबरादिद्रव्येषु मायारचितेषु मूढः प्रलोभितात्मा ह्युपभोगबु
स्तोकं द्ध्या पतंगवन्नश्यति नष्टदृष्टिः ८ स्तोकं ग्रसेद्ग्रासं देहो वर्तेत यावता गृहानहिंसन्नातिष्ठेद्वृत्तिं माधुकरीं मुनिः ९ अणुभ्य
श्च महद्भ्यश्च शास्त्रेभ्यः कु[शलो] नरः सर्वतः सारमादद्यात् पुष्पेभ्य इव षट्पदः १० ॥

तं गाम्भिश्चितमाह दृष्ट्वेति तस्या भावैः प्रलोभितः ७ स्त्रियमुपलक्षणीकृत्यैतत्प्रपंचयति योषिदिति ८ मधुकराद्भिक्षितमाह स्तोकमिति गृहान् गृहस्थान्
अहिंसन् अपीडयन् अयं भावः यथा मधुकरो विशिष्टगंधलालनेनैकस्मिन्नेव पद्मे वसन्नस्तमिते मुकुलिते तस्मिन् बध्यते एवं मुनिरपि गुणलो
भेनैकमेव गृहमाश्रितस्तन्मोहे न बध्यत इति ९ किंच अणुभ्य इति १० ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षितिधीमधुकृत मधुकृतं तिपुष्पाद्याद्विविच्य गृह्णातीति मधुकृद्भ्रमरः मधुकरोतिस्वाहारत्वेन स्वरूपेण चेति मधुमक्षिका च तत्र प्रथमाद्भिक्षितमुक्तं द्वितीया
द्भिक्षितमाह सायमिति द्वाभ्यां भिक्षुः श्वो मे स्यादिति भिक्षितमन्नादि न संगृह्णीत किंतु पाणिपात्रस्तन्मात्रग्राही यद्वा उदरमेवामत्रं पात्रं यस्य सः एकभिक्षा
यामुदरमात्रग्राही न वेत् संगृहीतुमक्षिकेव नश्यति नत्नीवतीत्यर्थः ११ एतद्विवृणोति पुनः सायंतनमिति १२ स्पर्शसिद्धिनाशहेतुरिति गजाच्छि
क्षितमित्याह पदाऽपीति पादेनापि दारवीं दारुमयीमपि गजो हि करिणीं प्रदर्श्य निरवतृणे पिहितगर्ते निपात्य बध्यते १३ किंच नाधिगच्छेदिति

सायंतनंश्वस्तनंवानसंगृह्णीतभिक्षितं पाणिपात्रोदरामत्रोमक्षिकेवनसंग्रही ११ सायंतनंश्वस्तनंवानसंगृह्णीतभिक्षुकः त
ऽमक्षिकाइवसंगृह्णन्सहतेनविनश्यति १२ पदापियुवतींभिक्षुर्नस्पृशेद्दारवीमपि स्पृशन्करीवबध्येतकरिण्याअंगसंग
ः१३ नाधिगच्छेत्स्त्रियंप्राज्ञःकर्हिचिन्मृत्युमात्मनः बलाधिकैःसहन्येतगजैरन्यैर्गजोयथा १४ नदेयंनोपभोग्यंचलुब्धैर्य
द्दुःखसंचितं भुंक्तेतदपितच्चान्योमधुहेवार्थविन्मधु १५ सुदुःखोपार्जितैर्वित्तैराशासानांगृहाशिषः मधुहेवाग्रतोभुं
क्तेयतिर्वैगृहमेधिनां १६

पापगच्छेत् १४ सागज्ञोगविहीनो धनसंचयः परगामी नवत्स्वमधुहा गुरुरित्याह नदेयमिति तद्दत्तो बलवान्भुंक्ते तदप्यन्यस्तच्चान्यः मधुहा मक्षिकान्तिः सं
चितं मधु यथा भुंक्ते तद्वत् ननु सुदुःखं धनं कथमन्यो ज्ञास्यति द्विरिष्यति चेति तत्राह अर्थवित् लिंगैरर्थं वित्तु पायं च वेत्ति सोऽर्थवित् यथा मधुहा तरुकोटरादि राम
स्थं मधु निहरति च १५ सोऽयं मं विनाऽपि भोगः संभवतीत्यत्रापि स एव गुरुरित्याह सुदुःखेति आशासानानामिति विकर्मेव व्यत्ययो पश्चार्थः यतिर्ब्रह्मचा ७०
री [illegible]कान्नस्वामीनावुभौ तयोरन्नं प्रस्तावात् तु मुख्या चा द्वायणं न रेदिति गृहिणामावश्यकत्वेन दान विधानात् १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...ष्ठितमाह ग्राम्येति । भगवद्गीतं तु शृणुयादेव । मृगयोर्लुब्धकस्य ॥ १७ ॥ हरिणवाच्चादेव हरिणीसुत ऋष्यशृंगो ऽपि गुरुर्ज्ञातव्य इत्याह नृत्येति । वश्यो वश्यः ॥ १८ ॥ रसासक्तिर्न सिद्धेर्हेतुरिति मीनाच्छिक्षितमित्याह जिह्वयेति । अतिप्रमाथिन्या अतिक्षोभिकया दुर्जयया । ऋच्छति प्राप्नोति । बडिशैः आमिषयुक्तैर्लोहकंटकैः ॥ १९ ॥ दुर्जयत्वमुपपादयति इंद्रियाणीति ग्राम्यारण्याहाराभावः यतो आहारस्त्यज्यते तद्धर्मेंद्रियजयः केवलं भवति । रसनेंद्रियं वर्धते । यदि तु

ग्राम्यगीतं न शृणुयाद्यतिर्वनचरः क्वचित् । शिक्षेत हरिणाद्बद्धान्मृगयोर्गीतमोहितात् ॥ १७ ॥ नृत्यवादित्रगीतानि जुषन्ग्राम्याणि योषितां । आसां क्रीडनको वश्य ऋष्यशृंगो मृगीसुतः ॥ १८ ॥ जिह्वयातिप्रमाथिन्या जनो रसविमोहितः । मृत्युमृच्छत्यसद्बुधिर्मीनस्तु बडिशैर्यथा ॥ १९ ॥ इंद्रियाणि जयंत्याशु निराहारा मनीषिणः । वर्जयित्वा तु रसनं तन्निरन्नस्य वर्धते ॥ २० ॥ तावज्जितेंद्रियो न स्याद्विजितान्येंद्रियः पुमान् । न जयेद्रसनं यावज्जितं सर्वं जिते रसे ॥ २१ ॥ पिंगला नाम वेश्यासीद्विदेहनगरे पुरा । तस्या मे शिक्षितं किंचिन्निबोध नृपनंदन ॥ सा स्वैरिण्येकदा कांतं संकेत उपनेष्यती । अभूत्काले बहिर्द्वारि बिभ्रती रूपमुत्तमं ॥ २३ ॥ मार्ग आगच्छतो वीक्ष्य पुरुषान्पुरुषर्षभ । तान्शुल्कदान्वित्तवतः कांतान्मेनेऽर्थकामुकी ॥ २४ ॥ ॥

ज्यते तर्हि पुनश्च रसासक्त्या सर्वेंद्रियक्षोभः स्यात् । अतो रसासक्तिं परित्यज्यौषधवद्भुंजीतेति ॥ १ ॥ एवं सैव संतुष्येदित्यत्रोक्तमपि रसनस्यातिदुर्जयत्वज्ञापनायोक्तमिति विशेषः ॥ २० ॥ २१ ॥ पिंगलाया नैराश्यं प्रति शिक्षितमिति वक्तुं तदाख्यानमाह पिंगलेत्यादिना । मे मया यच्छिक्षितं ॥ २२ ॥ स्वैरिणी कामचारिणी । संकेते रतिस्थाने ॥ २३ ॥ तान्वित्तवतः सधनान् अत एव शुल्कदान् मूल्यदान् कांतान् सुरतार्हान् ॥ २४ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपि संभावनायां अन्योऽपि मामुपैष्यतीति एवं दुराशया यत्कर्त्तरेणान्वयः २५ द्वार्यवलंबमाना पुनः प्रविशति पुनर्निर्गच्छति एवं कुर्वती निशीथं अर्द्ध
रात्रं आप २६ निर्वेद अलंबुद्धिः वित्तचिंतैव हेतुर्यस्य सः यथा यथावत् मम मत्तः शृणु २७ ननु किं निर्विण्णया गीतश्रवणेन तत्राह छिय स्मात् पुरु
षस्याशापाशानां निर्वेद असिः यथा तथा छेत्ता तत्र हेतुः नहीति अंग हे राजन् २८ अविजितात्मत्वे हेतुः अविजितात्मत्वे हेतुः याहं बालिशा विवेक

आगतेष्वपयातेषु सा संकेतोपजीविनी । अप्यन्यो वित्तवान्कोऽपि मामुपैष्यति भूरिदः २५ एवं दुराशया ध्वस्तनिद्रा द्वार्यवलंबती नि गो
र्गच्छति प्रविशति निशीथं समपद्यत २६ तस्या वित्ताशया शुष्यद्वक्त्राया दीनचेतसः । निर्वेदः परमो जज्ञे चिंताहेतुः सु[खाव]हः तस्या रव
निर्विण्णचित्ताया गीतं शृणु यथा मम २७ निर्वेद आशापाशानां पुरुषस्य यथा ह्यसिः न ह्यंगाजातनिर्वेदो देहबंधं जिहासति २८ पिं
गलोवाच । अहो मे मोहविततिं पश्यताविजितात्मनः या कांतादसतः कामं कामये येन बालिशा । २९ संतं समीपे रमणं रति
प्रदं वित्तप्रदं नित्यमिमं विहाय अकामदं दुःखभयाधिशोकमोहप्रदं तुच्छमहं भजेऽज्ञा ३० अहो मयात्मा परितापितो वृथा सांकेत्यवृत्त्या
ऽतिविगर्ह्यवार्तया स्त्रैणान्नराद्यार्थतृषोऽनुशोच्यात्क्रीतेन वित्तं रतिमात्मनेच्छती ३१ ॥ ॥

[illegible] येन कारणेन असतः तुच्छान्नरात् कामये २९ बालिशात्वं प्रपंचयति संतमिति च त्रिभिः समीपे संतं अंतर्यामिनं आत्मानं इमं अपरोक्षमीश्व
[illegible] विहाय वित्तेच्छया या वार्त्ता जीविका तया कुतः सांकेत्येन या वृत्तिः तया वा कुत्सितेन स्त्रैणवित्तेन वा परितापं प्रपंचयति स्त्रैणादिति स्त्रीलंपटात् अर्थपरा राम
[illegible] लुब्धात् [illegible] अनुशोच्यात् नरात् याहं वित्तं रतिं चेच्छतीति तया वृथा आत्मा परितापितः केन वित्तमिच्छती । तेन नरेण क्रीतेन स्वयं विक्रीतेनात्मना देहेन ३१ ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...कं मंदया याऽहमतिविनिर्मितं मन्नामीत्याह यदिति। वंशीनामस्थूणासु निहितास्तिर्यग्वेणवः वंशास्तस्मिन्नुन्नयतो निहिता वेणवः अस्थिभिरेव निर्मि
...मादे... अस्मिन्नुतत तत्र एष्टे दीर्घमस्थियत् सवंशाः पार्श्वास्थीनि निःक्षेपो निस्थूणा हस्तपादास्थीनि। तयारोमाणि निर्नखैश्च पिनद्धं बद्धमिति तया अपिद्वारं ति खे
...शायिन्यस्मिन्नुतत एवंभूतागाररूपं शरीरं मे तत्समतत्यक्तोऽन्या का वा कान्तबुद्ध्या उपैति सेवते ३२ सकं गतो सत्याम पहोमे मोह इत्याह विदेहा
नामिति याऽहमसती अच्युतादन्यं काममिच्छामि गमीनता सा ३३ एवं निर्विण्णा सती अतः परमेवं करिष्यामीत्याह सुहृदिति अयमीश्वरः आत्मा नैव आत्मा

यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचा रोमनखैः पिनद्धं। क्षरन्नवद्वारमगारमेतत् विण्मूत्रपूर्णं मदुपैति कान्या ३२ विदेहानां
पुरेह्यस्मिन्नहमेकैव मूढधीः। याऽन्यमिच्छत्यसत्यस्मादात्मदात्काममच्युतात् ३३ सुहृत्प्रेष्ठतमो नाथ आत्मा चायं शरीरिणां। रा
तं विक्रीयात्मनैवाहं रमेऽनेन यथा रमा ३४ कियत्प्रियं ते व्यभजन् कामा ये कामदा नराः। आद्यन्तवन्तो भार्याया देवा वा कालवि
द्रुताः ३५ नूनं मे भगवान्प्रीतो विष्णुः केनापि कर्मणा। निर्वेदोऽयं दुराशाया यन्मे जातः सुखावहः ३६ ॥

ता॰।
न मे इति चेद्यतं विक्रीय विशेषेण क्रीत्वा अनेनैव सह रमे रमा लक्ष्मीर्यथा ३४ कियत्प्रियं ते व्यभजन् कामा ये कामदा नरा आद्यन्तवन्तो भार्याया देवा वा कालविद्रुता
...दर्शयति किं पदिति आद्यन्तवन्तो ये कामं विषयान् कामदा नरा वा देवा वा कालकल्पिताः ते भार्यायाः कियत्प्रियं कृतवन्तः न किंचित् अतो नेहामु
त त्र वा तद्व्यतिरिक्तः कोपि सेव्योस्तीत्यर्थः ३५ एवं निश्चित्य स्वभाग्यमभिनंदति नूनमिति दुराशा आशा यस्यास्तस्या मे ३६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुधनाशयाक्लिष्टास्मिकथंविष्णुःप्रीतःतत्राहमैवमिति मंदभाग्याचेदहंस्यांतर्ह्येवंनिर्वेदहेतवःक्लेशानस्फुरिष्यन् येननिर्वेदेनअनुबंधंगृहादिकंनि
र्हृत्यपरित्यज्य ३७ अतःतेनश्रीविष्णुनाउपकृतंकृतमुपकारंनिर्वेदलक्षणं ग्राम्येषुपुनरेषुविषयेषुवासंगताः ३८ कथंव्रजामितत्राहसंतुष्टेति ३९ ननुब्रह्मा
दीन्हित्वाअमुनैवेतिकोयंनियमःतत्राहसंसारेति मुषितेक्षणंअपहृतविवेकं ४० तर्हिकिमात्मनाप्राणोपाधिनानजिष्यामिनतत्रसर्वतोनिर्विद्यन
मु

मैवंस्फुर्मंदभाग्यायाःक्लेशानिर्वेदहेतवः येनानुबंधंनिर्हृत्यपुरुषःशाममृछति ३७ तेनोपकृतमादायशिरसाग्राम्यसंगताः त्य
क्त्वादुराशाःशरणंव्रजामितमधीश्वरं ३८ संतुष्टाश्रद्दधत्येतद्यथालाभेनजीवती विहराम्यमुनैवाहमात्मनारमणेनवै ३९
संसारकूपेपतितंविषयैर्मुषितेक्षणं ग्रस्तंकालाहिनात्मानंकोऽन्यस्त्रातुमधीश्वरः ४० आत्मैवह्यात्मनोगोप्तानिर्विद्येतयदाखि
लात् अप्रमत्तइदंपश्येत्ग्रस्तंकालाहिनाजगत् ४१ ब्राह्मणउवाच एवंव्यवसितमतिर्दुराशांकांततर्षजां छित्वोपशम
मास्थायशय्यामुपविवेशसा ४२ आशाहिपरमंदुःखंनैराश्यंपरमंसुखं यथासंछिद्यकांताशांसुखंसुष्वापपिंगला ४३ सुखं
॥ ॥इतिश्रीभागवतेमहापुराणेएकादशस्कंधेअष्टमोऽध्यायः ८ ॥ ॥

गवद्भजनेप्रवृत्तस्यात्मनस्सएवसमर्थत्वादित्याहआत्मैवेति यदाएवंज
गत्प्रपश्येत्तदाअप्रमत्तःसंनिखिलात्इहामुत्रभोगात्निर्विद्येततदाहिआत्मैवात्मनोगोप्तेत्यन्वयः अतःकेवलंप्रेम्णैवभजामीतिभावः ४१ कांतस्पृत
र्षां ...जाता ४२ फलितमाहआशाहीति ४३ इतिएकादशेअष्टमोऽध्यायः ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानापमानादिहीनोधन्यइति

तस्य

नवीकुरणदिश्योदेहत॰॰॰॰क्षितंस्त्रतायदुःक्लतायोऽग्नदितिकलेनवक्षितंकुरणछिक्षितमाहपरियहोहीति। यद्यस्प्रियतमंतस्यपरिग्रहःतद्विद्वा
न्परियहोदुखमितिविद्वान्सन्यस्त्वकिंचनःत्यक्तपरिग्रहःनतुदरिद्रः १ तदाहसामिषमिति २ अनेकशिक्षितमाहनेति गेहपुत्रिणांतद्वतांयानवति
साचिंताचमेनास्ति आत्मनैवक्रीडायस्य आत्मनिरतिःप्रीतिर्यस्य ३ नत्वज्ञसर्वज्ञयोःकिंसाहश्यंनेभिंतंपरमसुखमित्याहद्वाविति विमुग्धःअज्ञःजडःअ

ख

श्रीब्राह्मणउवाच ॥ परियहोहिदुःखाययद्यत्प्रियतमंनृणां ॥ अनंतंसुखमाप्नोतितद्विद्वान्यस्त्वकिंचनः १ सामिषंकुररंज
घ्नुर्बलिनोयेनिरामिषाः तदामिषंपरित्यज्यससुखंसमविंदत २ नमेमानावमानौस्तोनचिंतागेहपुत्रिणां ॥ आत्मक्रीडआ—त्म
रतिर्विचरामीहबालवत् ३ द्वावेवचिंतयामुक्तौपरमानंदआप्लुतौ ॥ योविमुग्धोजडोबालोयोगुणेभ्यःपरंगतः ४ ॥
क्वचित्कुमारीत्वात्मानंवृणानान्गृहमागतान् ॥ स्वयंतानर्हयामासक्वापियातेषुबंधुषु ५ तेषामभ्यवहारार्थंशालीन्र
हसिपार्थिव ॥ अवघ्नंत्याःप्रकोष्ठस्थाश्चक्रुःशंखाःस्वनंमहत् ६ सातज्जुगुप्सितंमत्वामहतीव्रीडिताततः ॥ बभंजैकैकशःशं
खान्द्वौद्वौपाण्योरशेषयत् ७ ॥ ॥

कपिंडी यादिषु

बुधःएवंभूतोयोबालःयश्चअतःपरमीश्वरंप्राप्तःतौद्वौ ४ कुमार्याःशिक्षितंवकुमारव्यापिक्षामाहक्वचिदित्यादिना वृणानान्स्ववरणायागतान् बंधुष्वपि
तादिषु ५ शंखाःशंखवलयाःमहध्यानवतितयास्वनंचक्रुः ६ सामहतीबुद्धिमती तस्यस्वयंशाल्यवहननंजुगुप्सितंचदरिद्रताद्योतकं एकैकश
मैत्री
ःक्रमेणैकमेकंबभंजस्वकरादपसारितवती ॥ ७ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी०ए०

निरतिरत्नदृथककृतवती ९ ननुकमार्यास्त्ववचकथंसंगतिः तत्राह लोकानिति ९ वासइतिप्रथममातपात्रेकलहहेतुः बाला गोष्ठी हेतु र्न विद्यते यथा १० विदितः तत्तावैत्ताः स्फूर्तिनिद्रारणसमाधिहेतुरितित्रारकाराद्वितिनमित्याहमनइति तत्रोपायमाह जितेति श्वासनजपेस्वासजयः तेस्पचजपे स्वासा धीनंमनो निश्चलं भवति ननुक्षणं निश्चलं सदपिमनो विषयवासनयायदि विक्षिप्येत तस्तु षुप्ताविवस्तवधालीयेत वा तदा किंतत्राह वैराग्येति वैराग्येण विक्षिप्यमाणं अभ्यासयोगेन लक्ष्यीध्रियमाणं स्थिरीक्रियमाणं ११ एकत्वेति कृत्त्नदाह यस्मिन्निति यत्लयविक्षेपात्मकंमनः एतद्यस्मिन्परमानंद

उभयोरप्यनृतघोषोऽप्यवघ्नंस्तास्मसंरवयोः तत्राप्येकं निरविद्देकस्मात्ज्ञानवत्ध्वनिः ९ अन्वशिक्षमिमंतस्याउपदेशम २
रिदम लोकाननुचरन्नेतांल्लोकतत्त्वविविक्षया ९ वासो बहूनां कलहो भवेद्वार्ता द्वयोरपि एकएवचरेत्तस्मात्कुमार्या एव
कंकणः १० मनएकत्रसंयुज्यात्जितश्वासो जितासनः वैराग्याभ्यासयोगेन ध्रियमाणमतंद्रितः ११ यस्मिन्मनो लब्धपदंय
देतच्छनैः शनैर्मुंचति कर्मरेणून् सत्त्वेनवृद्धेनरजस्तमश्च विधूय निर्वाणमुपैत्यनिंधनं १३

... कुशास्पदं स्यात्कर्मरेणून् कर्मवासनामुंचति तस्मिन् ननुकर्मवासनात्यागेपि सुषुप्ति वल्लयो दुर्वारः नासत्त्वेनेति वृद्धेन त्वपरिमाणात्मके न रजस्तमस
... महामानावृत्तेः निर्वाणं अहर्तिकंध्येयाकारेणावस्थानमुपैति कुतः अनिंधनं इंधनं गुणाः तत्कार्यं चित्तं तद्रहितं तदुक्तं योगशास्त्रे मनसोवृ
... स्यप्रवृत्ता ... त ... छत्तिः या सम्प्रज्ञातनामासौ समाधिरभिधीयत इति १३

एम
४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible]न कैतस्फूर्ति[illegible]देति बहिर्दर्शनादिना अंतरं स्मृत्वा इष्टौ गतात्मा तस्य ऋजुकरणे दत्तचित्तः भेरीघोषैरंतिके व्रजंतं नृपतिमपि न वेदनवत् १३
[illegible]क्षिप्तित[illegible]गाह एकेचारीति योगिसंमतस्यापि त्यागे कुमारीयुरुः तनुसंगत्यागमपः स यथा जनाच्छंकमान एकाकी विचरति नियत निकेतरहितश्च
स[illegible]प्रमत्तश्च एकांतवासी च आचारैर्गतिनिः सविषो निर्विषो वेति न लक्ष्यते च असहायश्च मितभाषी च तत्वत् मुनिर्वर्तेतेत्यर्थः १४ किंच गृहारंभ इति अध्रु

गता
तदेवमात्मन्यवरुद्धचित्तो न वेद किंचिद्बहिरंतरं वा यथेषुकारो नृपतिं व्रजंतमिषौ [illegible]त्मा न ददर्श पार्श्वे १३ एकचार्यनि चौर्य
केतः स्यादप्रमत्तो गुहाशयः अलक्ष्यमाण आचारैर्मुनिरेकोल्पभाषणः १४ गृहारंभो हि दुःखाय विफलश्चाध्रुवात्म
नः सर्पः परकृतं वेश्म प्रविश्य सुखमेधते १५ एको नारायणो देवः पूर्वसृष्टं स्वमायया संहृत्य कालकलया कल्पांत इदमी
श्वरः १६ ॥ ॥

एधते
वाल्मा[illegible]रदेहस्य सुखं यथा न वर्तितं सर्पो वर्तते १५ कारकसामग्रीनिरपेक्षात् केवलादीश्वरादपि सृष्टिसंहारौ कर्तुं शक्याविति दृष्टांतेन मया ज्ञातं विनावितित्युक्तं अथ
संसंहरवकामाह एकप्रतिसार्धत्रयेण एकः कारकनिरपेक्षः पूर्वसृष्टमिदं जगत् कालकलया कालशक्त्या संहृत्य १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वग

एकएवाद्वितीयः सजातीयविजातीयस्वगतभेदशून्योऽन्तः कारणभूतासु सत्वादिषु शक्तिषु पिसाम्यंनीतितासु सतीषु १६ गुणसाम्यंप्रधानंतदुपाधिः पुरुषः त
११ योरीश्वरः परावराणांपरेब्रह्मादयः अवरेभ्यश्चमुक्ताजीवास्तेषांपरमः आप्यआस्तेकुतः कैवल्यसंज्ञितः मोक्षशास्त्राभिधेयः तत्रहेतुः केवलेति निर्विषयः स्वप्र
काशः आनंदानांसंदोहसमूहः परमानंदइत्यर्थः कुतः निरुपाधिकः १७ अनंतकेवलादेवसृष्टिंदर्शयति केवलेनात्मानुभावेनकालेन। सूत्रंक्रियाशक्ति
प्रधानंमहत्तत्वंसृजति जीवसंसारहेतुभूतेसूत्रेसृष्टेपितंमायानिरितिसंबोधयतिअरिंदमः असीन्रागादीन्दमयितुंसमर्थः १९ सूत्रस्यैवव्यक्तिशब्देनो

एकएवाद्वितीयोऽन्तरात्माधारोऽखिलाश्रयः कालेनात्मानुभावेनसाम्यंनीतासुशक्तिषु सत्वादिष्वादिपुरुषः प्रधानपु
रुषेश्वरः परावराणांपरमआस्तेकैवल्यसंज्ञितः केवलानुभवानंदसंदोहोनिरुपाधिकः १८ केवलात्मानुभावेन
स्वमायांत्रिगुणात्मिकां संक्षोभयन्सृजत्यादौतयासूत्रमरिंदम १९ तामाहुःत्रिगुणांव्यक्तिंसृजंतींविश्वतोमुखं य
स्मिन्प्रोतमिदंविश्वंयेनसंसरतेपुमान् २० ॥ ॥

त्वमान एव मितिस्त्रीलिंगेनपरामर्शः त्रिगुणाव्यक्तिं गुणत्रयस्यकार्यभूत एवविश्वतोमुखंनानाविधंत्रिगुणात्मकंविश्वमहंकारद्वारेणसृजंतीं त्रिगुणकार्य
स्यसूत्रस्य वा सांकारणमाह यस्मिन्निति कारणभूतेसमष्टिरूपेयस्मिन्इदंविश्वंप्रोतंग्रथितं वायुर्वैगौतमतत्सूत्रंवायुनावैगौतमसूत्रेणायंचलोकः
परश्चलोकश्चसर्वाणिभूतानिसंदृब्धानीतिश्रुतेः येनबाह्यात्मप्राणरूपेणतुजीवः संसरति २०



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवंशिक्षितमेवार्थमुक्त्वा दृष्टांतमाह यथेति हृदयादूर्णां वक्त्रतः वक्त्रेण संतत्य प्रसार्य विहृत्य क्रीडित्वा २० भगवत्स्वध्यानपराणां तत्सारूप्यं न चित्र स्म
मितिपेशस्कृतोऽन्यस्य विशेषात् ज्ञातमित्याह यत्रयत्रेति सकलं एकाग्रं २२ कुड्यां प्रवेशितः निरुद्धः तयेनध्यायन् सोऽपि तां तत्सारूप्यं सोम्यता मि
तिपाठे तापेन पूर्वरूपमसंत्यजन्नित्यस्याऽयमभिप्रायः यदा तेनैव देहेनात्मसारूप्यं दृश्यते तदा किं वक्तव्यं देहान्तरेण सारूप्यं घटत इति २३ स्वदे

यत्र

यथोर्णनाभिर्हृदयादूर्णां संतत्य वक्त्रतः तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वरः २१ यत्र मनो देही धारयेत्सकलं धि
य स्नेहाद्द्वेषाद्भयाद्वापि याति तत्तत्स्वरूपतां २२ कीटः पेशस्कृतं ध्यायन्कुड्यां तेन प्रवेशितः याति तत्सात्मतां राजन्पू
स्म र्वरूपमसंत्यजन् २३ एवं गुरुभ्य एतेभ्य एषा मे शिक्षिता मतिः स्वात्मोपशिक्षितां बुद्धिं शृणु मे वदतः प्रभो २४ देहो गुरुर्म
मविरक्तिविवेकहेतुर्बिभ्रत्स्म सत्त्वनिधनं सततार्त्युदर्कं तत्त्वान्यनेन विमृशामि यथा तथापि पारक्यमित्यवसितो वि
चराम्यसंगः २५ ॥

इदं देवम्शि--- क्षितमाह स्वात्मेति स्वात्मनो देहाच्छिक्षितां २४ गुरुत्वे हेतु विरक्तिविवेकयोर्हेतुः विरक्तिहेतुत्वमाह सत्त्वनिधनं
उत्पत्तिविनाशौ बिभ्रत् सततमार्त्युदर्कं दुःखमेवोत्तरफलं बिभ्रत् यद्वा सततं निरवच्छिन्नं तदुत्तरफलं यस्य तत्त्वे माह तत्त्वानीति यथा यथावत् एवम
स्य पक्षरितेः पि देहे नैवात्मकत्वमित्याह तथापीति पारक्यं श्वशृगालादिभक्ष्यमिति निश्चितवान् २५ ॥ निधनं बिभ्रत् विवेकहेतुमाह

भा०स०७
४५

मततात्मदेहं कर्तारं प्रपंचयति जायेतिद्वाभ्यां ॥ यस्य देहस्य प्रियचिकीर्षया भोगसंपादनेच्छया जायादिवर्गान्वितत्वनुतिष्ठाला तिपुरुषः ॥ कथंभूतः सन्
कृच्छ्रं यथा भवति तथा वरुद्धानि संचितानि धनानि येन सः ॥ देहविशेष एवं वा स देहः स्यात्तेस्वस्यापुष्येत्तेश्रवमीदति नवपति ॥ किंच देहनाशे भिन्नदुःखस
मास्तिरित्याह अस्य पुरुषस्य देहांतरबीजं कर्म सृष्ट्वेति ॥ इह त्वेवधर्मो यस्य सः ॥२६॥ किंच ॥ जिह्वैकत इति ॥ अस्तु देहं तदभिमानिनं पुरुषं वा एकतः रसन

जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्पुष्णाति यत्प्रियचिकीर्षया वितन्वन् ॥ स्वांते सकृच्छ्रमवरुद्धधनः स देहः सृष्ट्वाऽस्य बीजमवसीदति वृक्षधर्मा ॥२६॥ जिह्वैकतोऽच्युत विकर्षति मावितृप्ता शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् । घ्राणोऽन्यतश्चपलदृक् क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति ॥२७॥

ति जिह्वा अपकर्षति आछिनत्ति ॥ कर्हिकदाचित् तथापि पिपासाजलं प्रति ॥ शिश्नो व्यवायं प्रति ॥ त्वक् स्पर्शं प्रति उदरं अन्नमात्रं प्रति ॥ श्रवणं नादं प्रति
घ्राणो गंधं प्रति ॥ चपलदृक् रूपं प्रति क्वचक्वचित् स्वस्वविषयं प्रति कर्मशक्तिः अन्यदपि कर्मेन्द्रियं लुनन्ति चोदयन्ति ॥२७॥ ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं देहो गुरुरित्यादिभिर्निर्विरक्तिविवेकहेतुत्वमुपपाद्येदानीमस्य देहस्यातिदुर्लभत्वं दर्शयन्नीश्वरनिष्ठां विधत्ते सृष्ट्वेति द्वाभ्यां। पुराणि शरीराणि॥ पुरुषं पुरुषदेहं ब्रह्मणोऽवलोकायाऽपरोक्षाय धिषणा बुद्धिर्यस्मिंस्तं। तदुक्तं। तासां मे पौरुषी प्रियेति। श्रुतिश्च पुरुषत्वे चाविस्तरां आत्मेत्यादि॥ ईश्वरो हि द्वारणाधिष्ठानि ... लोकादिदेवतावागादिभिः सह सृष्टवान् ताभ्यस्तं प्रति नो गार्ध्यशरीरमयाचेत सत्वतासो गोशरीरं अश्वशरीरं पुरुषशरीरं यथाक्रममानीतवान् ततस्ता देवताः सोऽब्रवीत् यथायतनं चतुरादिस्थानं अस्मिन् देहे प्रविशतेति। तदाहुः तास्मै इत्यादि। तथाता सो गामानयत्ता अब्रुवन्न वै नो यम

सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान्सरीसृपपशून्खगदंशमत्स्यान्॥ तैस्तैरतुष्टहृदयः पुरुषं विधाय ब्रह्मावलोकधिषणं मुदमाप देवः॥ २८॥ लब्ध्वा सुदुर्लभमिदं बहुसंभवान्ते मानुष्यमर्थदमनित्यमपीह धीरः॥ तूर्णं यतेत न पतेदनुमृत्यु यावन्निःश्रेयसाय विषयः खलु सर्वतः स्यात्॥ २९॥ एवं संजातवैराग्यो विज्ञानालोक आत्मनि॥ विचरामि महीमेतां मुक्तसंगोऽनहंकृतः॥ ३०॥ ॥

लमिति ता सोऽश्वमानयत्ता अब्रुवन्न वै नोयमलमिति तास्मः पुरुषमानयत्ता अब्रुवन् सुकृतं बतेति च २८ तस्मात् बहूनां संभवानां जन्मनामन्ते मानुष्यं अनित्यमप्यर्थदं पुरुषार्थप्रापकं देवाल्लब्ध्वा इदं अनुमृत्यु अनु निरंतरं मृत्युर्यस्य उपसर्पतत्। यावन्न पतेत्तावदेव तूर्णं निःश्रेयसाय यतेत विषयः पुनः सर्वतः पश्वादियोनिष्वपि स्यादेव २९ तदेवं हेयोपादेयविवेकं बहुधा निरूप्येदानीं यदुक्तं तं तु कल्पः कविर्हितं ड्वा सादितत्त्वोऽत्र रमहमेवमिति। एवं बहुभ्यो गुरुभ्यः शिक्षितेन विशिष्टं ज्ञानमेवालोकः प्रदीपो यस्य सः। सप्तम्यन्तं आत्मविशेषणं आत्मनि स्थित एवं महीं

मिथं ३०

रा मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री·भाग·ए·
४६

ननु किं बहुभिर्गुरुभिः न हि श्रुतिकेतुर्बहुभ्यस्त्वेव बहवो गुरवस्त्वयाश्रिताः त्वयाह नह्येकस्मादिति बहुधागमप्रपंचनिःप्रपंचभेदादिभिः अयं भावः नैते परमा
[illegible]गुरवः किंत्वन्वयव्यतिरेकाभ्यामात्मनः समंतावनादिमात्रनिवर्तकाः तेषां च बहुत्वं स्वगुरुमेव वेति ज्ञानप्रदं गुरुमेकमेव वक्ष्यति मदभिज्ञं गुरुं शांत
[illegible]स्वात्मानिति उक्तं च तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तममिति ३१ विशेषतस्त्वात्रेयः योगर्द्धिमान् गुरुर्मयीयडुहैहयाद्यास्तत्सुकृतात् यथागतं तथैव

नह्येकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात्सुपुष्कलं ॥ ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः ॥ ३१ ॥ श्रीभगवानुवाच ॥ इत्युक्त्वा स य
दुं विप्रस्तमामंत्र्य गभीरधीः ॥ वंदितोऽभ्यर्चितो राज्ञा ययौ प्रीतो यथागतं ॥ ३२ ॥ अवधूतवचः श्रुत्वा पूर्वेषां नः स पूर्वजः ॥ सर्वसं
गविनिर्मुक्तः समचित्तो बभूव ह ॥ ३३ ॥ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे नवमोऽध्यायः ॥ ९ ॥ ॥

पद्धयायस्य विमर्शः ३२ भगवान् स्वीयं ब्रह्मवित् कुलमिति श्लाघ्यते नः पूर्वेषां पूर्वज इति अत्र संग्रहश्लोकाः कपोतमीनहरिणाकुमारी गजपन्नगाः ॥ राम
श्रा पत[illegible] [illegible]रशौ हैयाद्येशुकवो मताः ॥ १ ॥ मधुहन्मधुहन्त्री च पिंगला च कयोस्त्रयः ॥ उपादेयार्थविज्ञाने शेषाः ष्याद्योमताः ॥ २ ॥ तदत्रांतरभेदस्थतत्र ४६
[illegible]हिता[illegible] [illegible]हतीये चाष्टनवाष्टार्थानि नाः क्रमात् ॥ ३३ ॥ इत्येकादशे नवमः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible]शान्ति[illegible] [illegible]संभावनानुव । नूद्धवस्यात्मनस्ताभ्यैः साधनैः कीर्त्यते परैः । दशमे देहसंबंधस्मृतिर्नात्मनः स्मृतः इत्येतद्दर्शयामास मतांतरनिरा
[illegible]तत्तेन व्यतिरिक्तकाम्यासुत्पन्नविवेकज्ञानस्य तत्वज्ञानायादित आरभ्य साधनान्युपदिशति भगवान्मयेति मया पंचरात्रादिकेषु वेदेषु धर्मेष्ववहितः १
[illegible]प्रमत्तः सन् तद्विरोधेन वर्णाश्रमाचारमनुतिष्ठेत् १ कथमकामात्मता संभवति तत्राह अन्वीक्षेतेति स्वधर्मे विशुद्धचित्तः सन् देहिनां विषयेषु सक्तानां

श्रीभगवानुवाच ॥ मयोदितेष्ववहितः स्वधर्मेषु मदाश्रयः ॥ वर्णाश्रमकुलाचारमकामात्मा समाचरेत् १ अन्वीक्षेत वि
शुद्धात्मा देहिनां विषयात्मनां ॥ गुणेषु तत्वध्यानेन सर्वारंभविपर्ययं ॥ २ ॥ सुप्तस्य विषयालोको ध्यायतो वा मनोरथः ॥ नानात्म
कत्वाद्विफलस्तथा भेदात्मधीर्गुणैः ३ निवृत्तं कर्म सेवेत प्रवृत्तं मत्परस्त्यजेत् । जिज्ञासायां संप्रवृत्तो नाद्रियेत्कर्मचोदनां
४

[illegible]ष्टिनिविष्टानां ये सर्वे आरंभास्तेषां फलवैपरीत्यं पश्येत् एवं फलवैपरीत्यादकामः स्यात् २ किंच काम्यविषयाणां मिथ्यात्वाद्दर्शी साह सुप्तस्येति विफलश्चार्थ
[illegible]सूनः । यथैवं प्रयोगः इंद्रियैर्बहिर्नानाबुद्धिः सा विफला नानात्मकत्वादैंद्रियकत्वाद्वा मनोजन्यस्वप्नमनोरथवदिति ३ मोक्षार्थिनि प्रवृत्तेति तत्र काम्य
[illegible]कर्मणोः नित्यनैमित्तिके कुर्यात्तच्च स्ववाय जिहासया इति स्मृतिः अथ प्रवृत्तं कर्म त्यजेन्निवृत्तं नित्यनैमित्तिकमेव कुर्यात् आत्मविचारे तु सम्यक्
प्रवृत्तो निवृत्तं कर्मचोदनामपि नाद्रियेत ४ ॥ ॥
काम्यं

ना०ग० ४७

किंच यमान् अहिंसादीन् अभिहणमादरेण सेवेत शौचादींश्च नियमान् कश्चिन्न यथाशक्ति तदा आत्मज्ञानाविरोधेन यमान् शाहदशा नियमान् अस्यैकेन विशेष्यमाये
वः ... तो किंच यमेषु णादरं परित्यज्य गुरुमुपासीतेत्याह मदभिज्ञमिति मदात्मकं मद्रूपं ५ गुरुमेव कस्य धर्मा बाह्यमानीति दक्षः अनलसः निर्ममः जायादि
षु ... मतान्यून्यः गुरौ तु दृढसौहृदः असत्वरः अव्यग्रः अमोघवाक् हृष्यालापर हितः एतान्येव शिष्यस्य लक्षणानि ज्ञेयानि ६ ननु ससजायादिषु कथं निर्ममः स्यात्
तत्राह जायेति औदासीन्यहेतुं विवेकं दर्शयति आत्मनोऽर्थं प्रयोजनं सर्वत्र सममेव पश्यन्निति अयं भावः सर्वदेहेष्वात्मन एकत्वाज्जायादिदेहे स्वदेहे आत्मनो

...मानमीत्यां सेवेत नियमान्मत्परः क्वचित् मदभिज्ञं गुरुं शान्तमुपासीत मदात्मकं ५ अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः ॥
असत्वरोऽर्थजिज्ञासुरनसूयुरमोघवाक् ६ जायापत्यगृहक्षेत्रस्वजनद्रविणादिषु उदासीनः समं पश्यन् सर्वेष्वर्थमिवात्मनः
७ ... विलक्षणः स्थूलसूक्ष्माद्देहादात्मेक्षिता स्वदृक् यथाऽग्निर्दारुणो दाह्याद्दाहकोऽन्यः प्रकाशकः ८ ॥ ॥

... ... एकेन विशेषेणैतेषु ममत्वाभिनिवेशादुत्पेक्ष्य उदासीनः सन् गुरुं प्रपद्येतेति ७ अहं कोऽसौ यो देहव्यतिरिक्त आत्मा यस्यैकत्वादयं सर्वेषु समः
... ... इति स्थूलसूक्ष्मदेहद्वयादात्मान्यतो विलक्षणः द्वैधा विलक्षणत्वं दर्शयति शब्दितास्वदृगिति ॥ दृष्टा हि दृश्याद्विलक्षणः स्वप्रकाशः अजडः
...क्षणे नयोर ... प्रातेः यथाग्निर्दाहकः प्रकाशकश्च दाह्यात्प्रकाश्याच्च दारुणः काष्ठादन्यः स्वस्वरूपादिति ८ ॥ ॥ स्या

राम ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible]वृद्धयंतेन[illegible]नादित्वविवृत्वेकत्वाद्यपि सिध्यंतीत्याह निरोधेति यथा दारुष्वंतःप्रविष्टोऽग्निस्तत्कृतान्नाशादीननुप्राप्नोति न तु स्वतो नाशादि
[illegible]गुणान् नित्यत्वादीन्देहात्परो नित्यादिस्वरूपोप्यात्माऽनुभवति ततश्च नित्यत्वादिनिरपि वैलक्षण्यपादनमस्त्वमिति भावः ८ ननु भेददृश्यसं
[illegible]बंधनं कथं घटते आत्मनस्त्वसंगत्वात् कथं देहेन तद्धर्मैर्वास्मिन्बंधः संबंधे वा कुतस्तन्निवृत्तिरित्यत आह योसाविति गुरूपस्येश्वरस्याधीनैर्मायागुणै
र्योसौ रचितः अयं च स्थूलो देहो विरचितः पुंसो जीवस्यायं संसारः तन्निबंधनः तदध्यासकृतः इयम्मादेवं तस्मादात्मविद्यात न्निवर्तिकेत्याह आत्म

निरोधोत्पत्त्यणुबृहन्नानात्वं तत्कृतान्गुणान् । अंतःप्रविष्ट आधत्त एवं देहगुणान्परः ॥ ८ ॥ योऽसौ गुणैर्विरचितो देहो यं पु
रुषस्य हि संसारस्तन्निबंधोऽयं पुंसो विद्याच्छिदात्मनः ॥ १० ॥ तस्माज्जिज्ञासयात्मानमात्मस्थं केवलं परं । संगम्य निरसेदेतद्व
स्तुबुद्धिं यथाक्रमं ॥ ११ ॥ आचार्योऽरणिराद्यः स्यादंतेवास्युत्तरारणिः । तत्संधानं प्रवचनं विद्यासंधिः सुखावहः ॥ १२ ॥

नो विद्या विज्ञानं तस्य छिन्नच्छेत्री चासौ छिदिति वा पदच्छेदः । १० । यस्मादेवं तस्माज्जिज्ञासया विचारेण आत्म[illegible]स्थं आत्मनि कार्यकारणसंघात एव स्थितं स
[illegible]ज्ञात्वा एतत् एतस्मिन्देहादौ वस्तुबुद्धिं सूक्ष्मं क्रमेण निरसेत् त्यजेत् । ११ । गुरोः शिष्याविद्यास्य विद्या तत्कार्यं निरसनं क्षेमेति स्फुटीकर्तुं विद्योत्प
त्ति[illegible]प्रकारं निरूपकेन निरूपयति आचार्य इति आद्यः अधरः तत्संधानं तयोर्मध्यमं मंथनं काष्ठं प्रवचनमुपदेशः । विद्या तु संधिः संधौ नवह्निरिव । तथा
चकास्ति आचार्यः पूर्वरूपं अंते वास्युत्तररूपं विद्यासंधिः प्रवचनसंधानमिति । १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०११०

असमिन्नाह रूपमेवाह वैशारदीति । विशारदो निपुणः तेन शिष्येणाप्ता तेन गुरुणोपदिष्टा वा अतिविशुद्धा बुद्धिः गुणकार्यरूपां मायां निवर्तयति यदात्म
ऽ वं तद्विश्वं जीवस्य संसृतिनिमित्तं तान् गुणांश्च दग्ध्वा असमिन्निरिंधनः तस्मात्कार्यकारणेन विद्यया च स्वयं नानावानं तस्माज्ज्ञात्परमानंदरूपो भ
वतीति ॥ १३ ॥ एवं तावत्स्वप्रकाशज्ञानस्वरूपो नित्य एक एवात्मा कर्तृत्वाद्यखिलधर्मास्तस्य देहोपाधिकाः तद्व्यतिरिक्तं च सर्वं मिथ्या मायामयं च अतः स
र्वतो विरक्तः सन्नात्मज्ञानेन मुच्यत इत्युक्तं विलक्षणः स्थूलसूक्ष्मादिभ्य आदिना तदेवं श्रुतिसमन्वयेन निर्णीतेऽप्यर्थे मीमांसकविरोधेन संदेहो मा

वैशारदी सातिविशुद्धबुद्धिर्धुनोति मायां गुणसंप्रसूतां गुणांश्च संदह्य यदात्ममेतत्स्वयं च शाम्यत्यसमिद्यथाग्निः
॥ १३ ॥ अथैषां कर्मकर्तॄणां भोक्तॄणां सुखदुःखयोः नानात्वमथ नित्यत्वं लोककालागमात्मनां ॥ १४ ॥

भूदिति तन्मतं निराकर्तुमुज्ञावयन्नाक्षिपति अथेति अथ मन्यसे एषां जीवात्मनां कर्मकर्तॄणां सुखदुःखयोर्भोक्तॄणां च नानात्वमिति एवं हि जैमिनीयाम राम
ऽते अहंप्रत्ययविज्ञेय एवात्मा स च प्रतिशरीरं भिन्नः कर्ता भोक्ता च स्वरूपश्च न तु तत्स्वरूपं भूतो निर्विकार एकः परमात्मास्तीति यथाहुः अहंप्रत ४८
ऽविज्ञेयो ह्यात्मनः सर्वदैव हीति तथा वैराग्यं च न संभवेति तथा हि लोकस्थानानामनित्यत्वाभावाद्वैराग्यं न भवेत् योगकालस्य चानुपायकर्मवि
नामस्य ज्ञानोऽनुरात्मनो बानत्वे तदस्तीत्याह अथ नित्यत्वं लोककालागमात्मनामन्यस इति १४ देहेंद्रियांतःकरणरूपा धि
लोकांतरे कालांतरे च आगमनरूपा आत्मानो येषां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...र्वजोगानां विछेदात्मा यामयत्वात्वावैराग्यंपस्यादित्याह सर्वत्नावानांसकचंदनादीनां संस्थास्थितिः औत्पत्तिकी प्रवाहरूपेण नित्या तथा च वदंति नकदा
...हृशीदृशंजगदिति अतस्त्वक्त्वाकृश्चिदंभ्युरोपिनास्तीतिभावः किंच यथायथावत् ननुमायामयीत्यर्थः नचात्मस्वरूपभूतं निमिकं ज्ञानमस्तीत्याह तन्नदि ए
...घटपटाकारभेदेनधीर्जायते अतो नित्यानित्याते च अयंगूढोभिप्रायः नहिनित्यज्ञानरुपआत्मा अपितुज्ञानपरिणामवान् नचविकारित्वेनाःनित्यत्वं प्र
सक्तःयथाकुः विक्रियाज्ञानरुपास्यननित्यत्वेविरोस्यतइति अतो मुक्ताविंद्रियादिराहितस्यपरिणामाभावात् तत्कूटस्थत्वेन तत्वासेर पूरुषायत्तोत्पत्तिरिव श्रेय

मन्यसे सर्वभावानां संस्था ह्यौत्पत्तिकी यथा तन्नदाललतिन्ते देन जायते म्रियते च धीः ॥ २५ ॥ एवमप्यंग सर्वेषां देहिनां देहयोगतः ॥
कालावयवतः सन्ति भावा जन्मादयो ऽसकृत् ॥ २६ ॥ अत्रापि कर्मणां कर्त्तुरस्वातंत्र्यं च लक्ष्यते भोक्तुश्च सुखदुःखानां कोन्वर्थो
विवशान्नजेत् ॥ २७ ॥ न देहिनां सुखं किंचित् विद्यते विदुषामपि तथा च दुःखं मूढानां वृथाहंकरणं परं ॥ २८ ॥ ॥

सीननीवृत्तिरिति ॥ २५ ॥ तत्रतावत्तत्क्रमंगीकृत्यवैराग्योपपादनाय प्रवृत्तिमार्गस्याःनर्थहेतुत्वंप्रपंचयति एवमपीत्यादिना लोकानांलोकपण्डानामित्यंतःगेगा
पाकेनग्रंथेन अंगहेउद्धव कालावयवतः संवत्सरादिरूपात् ॥ २६ ॥ अत्रापीतिस्वातंत्र्यपक्षेदुःकर्मणोदुःषिनो गस्यवासंनवादित्यर्थः ॥ २७ ॥ ननुयेसम्यग्योगा
नं ...मकिञ्चुर्जानंतितेसुषिनएवयेतुनजानंतितएवदुःखिनइतिचेन्नत्राह नेति विदुषामपिकश्चित्सुखंनविद्यते तथामूढानामनामपिदुःखंनविद्यते अतोगेव
यकर्मकिंचरालत्वात्सुखिनइतितेषांकेवलंवृथैवाहंकारइत्यर्थः ॥ २८ ॥ ॥ कर्मणांकर्त्तुरस्वातंत्र्यं लक्ष्यते

ॐ रिव

भा०टी०
४९

अंगीकृत्याप्याह यदीति ॥ तं योगं उपायं न विदुर्यथा साक्षान्मृत्युर्न प्रभवेत् ॥ १९ ॥ तथापि यावज्जीवं सुखं न विघ्नतीति चेत्तत्राह को न्विति ॥ यतः अंतिके
वध्यभूमौ मृत्युर्न तुष्टिं ददाति ॥ आघातं वधस्थानं प्रति ॥ २० ॥ एवमस्मिन्लोके सुखं नास्ति अमुष्मिँल्लोकेऽपि तथैवेत्याह श्रुतमिति ॥ श्रुतं स्वर्गादि तदपि दुष्टं
स्पर्धया परसुखासहनेन असूयया परगुणे दोषाविष्करणेन ॥ अत्ययो नाशः व्ययः क्षयः तैर्दुष्टं ॥ यद्वा अत्ययो नाशः अल्पयोऽल्पस्यापि तिरोभावः तं दृष्ट्वा तद्वासा

यदि प्राप्तिं विघातं च जानंति सुखदुःखयोः ॥ तेप्यद्धा न विदुर्योगं मृत्युर्न प्रभवेद्यथा ॥ १९ ॥ को न्वर्थः सुखयत्येनं कामो वा मृत्युरंतिके
आघातं नीयमानस्य वध्यस्येव न तुष्टिदः ॥ २० ॥ श्रुतं च दृष्टवद्दुष्टं स्पर्धासूयात्ययव्ययैः ॥ बह्वंतरायकामत्वात् कृषिवच्चापि निष्फलं
२१ अंतरायैरविहितो यदि धर्मः स्वनुष्ठितः ॥ तेनापि निर्जितं स्थानं यथा गच्छति तच्छृणु ॥ २२ ॥ इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति या-
ज्ञिकः ॥ भुंजीत देववत्तत्र भोगान् दिव्यान्निजार्जितान् ॥ २३ ॥ स्वपुण्योपचिते शुभ्रे विमान उपगीयते ॥ गंधर्वैर्विहरन्मध्ये देवीनां
हृद्यवेषधृक् २४ ॥ स्त्रीभिः कामगयानेन किंकिणीजालमालिना ॥ क्रीडन्न वेदात्मपातं सुराक्रीडेषु निर्वृतः ॥ २५ ॥ ॥

दुःखमित्यर्थः ॥ किंच ॥ बहवोंऽतरायाः वैगुण्यादिरूपा विघ्ना यस्मिन्कामे सुखे तस्य भावस्तत्त्वं तस्मात् कृषिर्यथा बहुविघ्ना ॥ तद्वत् बहु सुखत्वेन श्रुतमपि निःफ-
लं ॥ ॥ वैगुण्याद्यभावे मम गीकृत्यापि नाशः दुःखं दुष्परिहरमित्याह अंतरायैरिति पंचभिः ॥ निर्जितं साधितं ॥ २२ ॥ यज्ञैर्देवता इष्ट्वा दिव्यरूपा इष्ट्वा ॥ २३ ॥ स्व-
रूपचिते सर्वभोगसंपन्ने देवीनां मध्ये विहरन् गंधर्वैरुपगीयते ॥ २४ ॥ कामेन इच्छया गच्छता विमानेन ॥ किंकिणीजालमालिना क्षुद्रघंटिकासमूह-
शोभिता सह ॥ ॥ सुराक्रीडेषु नंदनादिषु क्रीडन्नात्मपातं न वेद ॥ २५ ॥ ॥ राम
४९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालेन चालितः पातितः २६ प्रवृत्तिर्द्विविधा विध्यनुसारेण काम्यकर्माणि वा तल्लंघनेनाधर्मो वा तत्र काम्यकर्मप्रवृत्तेर्गतिरुक्ता । अधर्मप्रवृत्तेर्गतिमाह यदीति
[illegible] अन्वयः अजितेंद्रियत्वात्कामात्मा अयथाकृपणः अतो लुब्धो यो गच्छत्याकुलः अतः स्त्रैणः स्त्रीलंपटः तदर्थं भूतविहिंसकः २७ किंच दुष्टजन प्रवीणनि
[illegible]ऽर्थं पशून् अविधिना हत्वा तमः स्थावरतां याति २८ एवं कर्मसु प्रवृत्तस्य न सुखं न च निवृत्तिरित्युपसंहरति कर्माणीति । तथापि लोकानां नित्य

तव स मोदते स्वर्गे यावत्पुण्यं समाप्यते । क्षीणपुण्यः पतत्यर्वागनिच्छन्कालचालितः २६ यद्यधर्मरतः संगादऽसतां
वाजितेंद्रियः कामात्मा कृपणो लुब्धः स्त्रैणो भूतविहिंसकः २७ पशूनविधिनाऽलभ्य प्रेतभूतगणान्यजन् नरकानऽव
शो जंतुर्गत्वा यात्युल्बणं तमः २८ कर्माणि दुःखोदर्काणि कुर्वन्देहेन तैः पुनः देहमारभते तत्र किं सुखं मर्त्यधर्मिणः
२९ लोकानां लोकपालानां मद्भयं कल्पजीविनां ब्रह्मणोऽपि भयं मत्तो द्विपरार्द्धपरायुषः ३० ॥ ॥

त्वादमर्त्यधर्मत्वाच्च लोकपालानां सुखमस्तीति चेत्तत्राह लोकानामिति । द्वौ परार्द्धौ परमायुर्यस्य तस्य ब्रह्मणोऽपि तथा च श्रुतिः भीषाऽस्माद्वातः पवते भीषोदेति सूर्य
ः भीषाऽस्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति अतः प्रवृत्तिमार्गस्यैवमनर्थहेतुत्वाद्धिरण्यात्मनो निवृत्तिरेव युक्तेति तात्पर्यार्थः । एतेनैवमत्र यमीश्वरत्वाविकारेण
स्वर्गनावांगीकारः परिस्कृतः ३० ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०ए० ष्मा.

अस्यापि पोढश्पूर्वमंगीकृतं निराकरोति चतुर्भिः तत्र यदुक्तं कर्तृभोक्तृरूप एवात्मेति तन्निराकरोति गुणा इति । गुणा इंद्रियाणि कर्माणि सृजंति न त्वात्मा ।
आत्मैवेंद्रियाणि प्रवर्त्य कर्माणि करोतीति चेत्तत्राह गुणा इति । गुणाः सत्वादिगुणा इंद्रियाणि अनुसृजति प्रवर्तयति न त्वात्मा । अतः कर्तृत्वं तावन्नास्ति भो-
क्तृत्वमप्यौपाधिकमित्याह जीवस्त्विति । गुणसंयुक्तः इंद्रियादिसंयुक्तः । कुत इत्यत आह असौ तेषु अहंकारवानित्यर्थः । ३१ । यच्चोक्तमात्मनो नानात्वं तदप्यौ-

गुणाः सृजंति कर्माणि गुणोनुसृजते गुणान् । जीवस्तु गुणसंयुक्तो भुंक्ते कर्मफलान्यसौ ॥ ३१ ॥ यावत्स्याद्गुणवैषम्यं ता-
वन्नानात्वमात्मनः । नानात्वमात्मनो यावत्पारतंत्र्यं [illegible] तदैव हि ॥ ३२ ॥ यावदस्यास्वतंत्रत्वं तावदीश्वरतो भयं । य एतत्समुपासीरं-
स्ते मुह्यंति शुचार्पिताः ॥ ३३ ॥ ॥

[illegible]धिकमित्याह यावत्स्यादिति । गुणानां वैषम्यं अहंकारादिकार्यरूपं तन्न त्वात्मन एकत्वे कथं पारतंत्र्यमुक्तं कथं वा लोकपालादीनामपि भयमित्युक्तं त- रम
[illegible]न्नानात्वमिति । ३२ । यच्चायुद्धम् निषिद्धं प्रवृत्तिरिव श्रेयसी तित्रावाह य एतदिति । एतद्गुणवैषम्यं तत्कृतं भोगं कर्म चेत्यर्थः उपासीरन् सेवेरन् ते लोकादीनि म- ५०
नित्यत्वाच्छुचार्पिताः सन्तो मुह्यंति ॥ ३३ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकेवलंअस्यअनित्यत्वमात्रंकिंतुमायामयत्वमपीत्याहकालइति॥स्वभावोदेवतादिपरिणामहेतुःधर्मस्तज्ज्ञोगकारणंगुणव्यतिकरेमायाक्षोभेसतिमामेवंप्राहुः
...पृथग्व्यतिरिक्ताःसंति ततोनिवृत्तिरेवमुक्तिहेतुत्वाच्छ्रेयसीतिसिद्धं॥३४॥एवंतावदेकएवात्मातस्यचगुणकार्यदेहसंबंधकृतःसंसारःआत्मज्ञानाच्चमुक्ति
...विलक्षणःस्थूलसूक्ष्मादिभ्योरिक्ता॥तदेकत्वमनंतरनिरासेनदृढीकृतंश्रूयेषामित्यादि॥तत्रपृच्छतिगुणेष्विति॥अयमर्थः॥गुणेषुअसत्सुमुक्तिःसत्त्वे
...वात्मज्ञानसाधनाभावान्नमुक्तिःद्वितीयेचगुणेषुवर्त्तमानोपितत्कार्यदेहजेषुकर्मसुसुखादिषुचकथंनबध्यते॥तथापिनैकाकारावदनात्तत्वाने

कालस्त्वात्माऽगमोलोकःस्वभावोधर्मएवच॥इतिमांबहुधाप्राहुर्गुणव्यतिकरेसति॥३४॥उद्धवउवाच॥ ॥गुणेषुवर्त्तमानो
ऽपिदेहजेष्वनपावृतः॥गुणैर्नबध्यतेदेहीबध्यतेवाकथंविभो॥३५॥कथंवर्त्तेतविहरेत्कैर्वाज्ञायेतलक्षणैः॥किंभुंजीतोतविसृ
जेच्छयीतासीतयातिवा॥३६॥एतदच्युतमेब्रूहिप्रश्नंप्रश्नविदांवरः॥नित्यमुक्तोनित्यबद्धएकएवेतिमेभ्रमः॥३७॥ ॥इति
श्रीभागवतेमहापुराणेएकादशस्कंधेदशमोऽध्यायः॥१०॥ ॥

...बध्यतइतिचेत्तर्हिविधेनसंभवतीत्याह॥अनपावृतःकथंबध्यतइति॥३५॥यदितुसत्त्वेवृतदहंकारेणबध्यतेतत्रिहसात्त्वच्युतइतिमतंतर्हितत्कयुंजानमिति
॥३६॥बद्धोमुक्तोवाकथंवर्त्तेतेत्यादि॥किंभुंजीतकथंभुंजीतेत्यर्थः॥३६॥एतत्एतद्विषयप्रश्नं॥किंचएकएवात्मानादिगुणसंबंधान्नित्यबद्धःमुक्तोऽनित्यत्वेऽनि
त्यप्रसंगान्नित्यमुक्तइत्यप्यंगीकार्यंस्यात्॥तत्रमेभ्रमोभवतीत्याहनित्यबद्धइति॥३७॥इत्येकादशेदशमोध्यायः॥१०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकादशेतु बद्धानां मुक्तानांचापि लक्षणं साधूनांच तथा भक्तेर्लक्षणं हरिणेरितं १ नित्यबद्धो नित्यमुक्त एक एवेति विभ्रम इति यदुक्तं तत्किं वस्तुतो विवे
कतो विवर्ता तो वा नायं बंधमोक्षयोर्वास्तवत्वेनावां दिमाह बद्धोमुक्त इति द्वाभ्यां आत्मा बद्धो मुक्तश्च मे गुणतः मदधीन सत्वादि गुणोपाधितः न तु वस्तुतः
१ नन्वौपाधिकत्वेपि तंडुलपाकादिवद्वास्तवत्वं किं न स्यात् तत्राह गुणस्य मायामूलत्वात् बंधनं नास्ति अत एव मोक्षश्च नास्तीति ननु कथं सर्वशास्त्रवि

श्रीभगवानुवाच ॥ बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः गुणस्य मायामूलत्वान्न मे मोक्षो न बंधनं १ शोकमोहौ
सुखं दुःखं देहा[पत्ति]श्च यन्मायया स्वप्नो यथात्मनः ख्यातिः संसृतिर्न तु वास्तवी २ ॥

पत्ति

[सिद्धे]ऽत्राह इति मे व्याख्येति एवं मत्कृतो निर्णयः अलमन्यकृतकैरित्यर्थः अयमेवैवमन्वयः आत्मा बद्धो मुक्त इति व्याख्या उक्तिः सा मे गुणतः म
दधीनगुणपारतंत्र्यात् तत्र हेतुत्वेन गुणनियंतरि तस्मिंस्तद्व्यतिरेकमाह अत एवं मम बंधनं मोक्षश्चेति अन्यत्समानं १ एवं कारणानृतगुणानां मायामय
त्वे ...कार्यस्यापि संसृतिर्मिथ्येति प्रपंचयति शोकमोहाविति यथा स्वप्नः आत्मनः बुद्धिविवर्त्तमाति विवर्त्तः तद्वत् २ ॥ १ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्वे या:
…वस्क विरोधस्तावत्त्वात्विप्रतीतिस्त्वौपाधिकी घटतइत्याह विद्याविद्येइति तन्वेति मोक्षबंधयाम्यामितितन्वाक्षी। कुतः मेमायया विनिर्मिते मायाहत्रि
…त्र बंधमोक्षकरीसेकत्वनंदिकत्वनार्थे। ननुतत्कार्यत्वे बंधमोक्षयोरनादित्वनित्यत्वेनस्यातां न आद्येअनादी अतोवदविद्यांप्रवर्त्तयामितावबंधः
…धा…द…तेदामितदामोक्षःस्फुरतीत्यर्थः। तथाचस्कंदपुराणेबंधकोनवपा…ननवपाशाच्चमोचको कैवल्यः परंब्रह्मविष्णुरेवसनातनइति ३ तत्र दैः पः
शारीरिणामितिबहुवचननिर्देशाद्विषयभेदेनाविरोधउक्तइतिस्वातिंम्याकर्त्तयन्बंधमोक्षव्यवस्थामुपपादयति एकस्यैवेति तर्हिकिमात्मभेदात्तत्वापि
बंधःनित्याहअंशस्यजीवस्यैवेति ननत्वात्माभेदेजीवोनामकोन्यो ऽस्तिपृथक्‌कथंचबंधमोक्षसुखदुःखादिव्यवस्थातत्राह ममांशस्यपत्र्यंभावःयथैकस्यापि

घु
विद्याविद्येममतनूविद्धिउद्धवशरीरिणां। मोक्षबंधकरीआद्येमायया मेविनिर्मिते ३ एकस्यैवममांशस्यजीवस्यैवमहामते बं
धोऽस्याविद्ययानादिर्विद्ययाचतथेतरः ४ ॥

प
चंद्रादेर्जलाद्युपाधिनाबिंबप्रतिबिंबरूपोभेदः। यथाचतत्रजलकृता ऽकंपादयःप्रतिबिंबस्यैव। यथाच तत्रप्रतिबिंबानामुपाधिभेदेनभेदादेकस्मिन्
ब उदककुंभेनष्टेतज्जन्यप्रतिबिंबस्यैव बिंबैक्यं नान्यगतस्यतथा ऽविद्यायांप्रतिबिंबितस्यमदंशस्यजीवस्यैवतत्कृतोबंधः तस्यचोपाधितोभेदान्नाशेऽस्तिति व
…यान्याकुः यथैकस्मिन्घटाकाशेरजोधूमादिभिर्युक्ते नसर्वेसंप्रयुज्यंतेतद्वज्जीवासुखादिभिरिति एतत्सर्वातिरहस्यंस्वबुद्ध्यानिश्चेतव्यमितिसंबोध
यतिहेमहामते इतरोमोक्षः ४ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०ग०

तदेवं बंधमोक्षावुपपाद्य कथं वर्तेते इत्यादि वैलक्षण्यं प्रश्नोत्तरमाह अथेति । तत्र वैलक्षण्यं पद्विविधं जीवेश्वरयोरेकं जीवानां चैकं तत्र जीवेश्वरयोर्वैलक्षण्यमाह वि
रुद्धधर्मिणोरिति सार्धद्वयेन शोकानंदधर्मवतोः एकस्मिन्धर्मिणि शरीरे नियम्यनियंतृत्वेन स्थितयोः ५ सुपर्णौ [illegible]त्मपक्षिणावविदेह्यहृदयके नीडौ स
[illegible]चिद्रूपत्वात् सखायौ अवियोगादेकमत्साच्च यदृच्छया निरुक्तया मायया वृक्षवत्प्रतिक्षयाद्देहः ऊर्ध्वमूलमवाक्शाखं वृक्षं यो वेद स प्रवीतीति श्रुतेः कु
र्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययमिति स्मृतेश्च तस्मिन्कृतं नीडं नीकेतनं हृदयरूपं याभ्यां तौ तयोर्मध्ये एको जीवः पिप्पलान्नं पिप्पलोः स्वत्वः देह

न २

स्यबद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते ॥ विरुद्धधर्मिणोस्तात स्थितयोरेकधर्मिणि ॥ ५ ॥ सुपर्णावेतौ सदृशौ सखायौ यदृच्छया ॥
नीडं कृतनीडौ च वृक्षे एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान् ॥ ६ ॥ आत्मानमन्यं च स वेद विद्वानपिप्प
लादो न तु पिप्पलादः ॥ योऽविद्यया युक् स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः ॥ ७ ॥ ॥

नं स्वदनीयं कर्मफलमित्यर्थः खादति भक्षयति अन्यः ईश्वरः निरन्नः अभोक्तापि निजानंदस्तोबलेन ज्ञानादिशक्त्या भूयान् अधिकः श्रुतिश्च द्वा
सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीति ६ बलाधिक्यमेवाह आत्मानमिति अन्तयो ऽ
विद्यायुक्तः स तु नित्यबद्धः अनादिबद्धः यस्तु विद्याप्रधानः स तु नित्यमुक्तः मायायाश्च नाश्वरकत्वादाश्रयव्यामोहकत्वाच्च ॥ ७ ॥ ॥ ५२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।वा नामैर्वो मिथोवैलक्षण्यमाह देहस्थोऽपीति द्वाभ्यां। विद्वान्मुक्तः संस्कारवशेन देहस्थोऽपि देहस्थो न भवति। यथा स्वप्नाद् उत्थितः स्मर्यमाणे
तेन स्थो न भवति तत्कृतसुखदुःखाद्यभावात् तद्वत्। तथा बद्धस्तु तः अदेहस्थोऽपि कुमतिः अविद्वान् देहस्थः तन्निमित्तसुखदुःखभाक् यथा
गत इति। अपि च हेतुत्वेन वैलक्षण्यांतरमाह द्वाभ्यां। इंद्रियैरिंद्रियार्थेषु गृह्यमाणेष्वपि स्पृष्टो विद्वान् मनः नाहं करोमि। अहं करोमीति मतिं न कुरुते
॥८॥ त्मर्थः। कुतः गुणैर्गुणेषु गृह्यमाणेषु अत एव अविक्रियः रागादिशून्यः। तदुक्तं गीतासु। तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः। गुणा गुणेषु वर्त्तंत इति मत्वा

देहस्थोऽपि न देहस्थो विद्वान् स्वप्नाद्यथोत्थितः। अदेहस्थोऽपि देहस्थः कुमतिः स्वप्नदृग् यथा ॥ इंद्रियैरिंद्रियार्थेषु गुणैरपि गुणेषु द्वि
च। गृह्यमाणेष्वहंकर्म न विद्वान् यस्त्वविक्रियः ॥ दैवाधीने शरीरेऽस्मिन् गुणभाव्येन कर्मणा। वर्त्तमानोऽबुधस्तत्र कर्त्ताऽस्मीति
निबध्यते ॥ ॥१०॥

न सज्जत इति। एवं अबुधस्तु पूर्वकर्माधीनेऽस्मिन् शरीरे वर्त्तमानः गुणैरिंद्रियैर्नमिनेन कर्मणा तत्र देहादौ निबध्यते। कुतः कर्त्ताऽस्मीत्यहंकारेणेति तदुक्तं तत्रैव
प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहंकारविमूढात्मा कर्त्ताहमिति मन्यत इति। एतैस्त्रिभिः श्लोकैः कथं वर्त्तेतेत्यस्य प्रश्नस्य सुखदुःखशून्यो
निरभिमानश्च देहे वर्त्तेतेत्युत्तरमुक्तं भवति १० ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
५३

वैलक्षण्यांतरं वदन् किंतु जितेंद्रियादिप्रश्नोत्तरमाह एवमिति त्रिभिः अनुपगतमेव कर्म मां बध्नातीत्येवं विरक्तो विद्वान् तथाऽविद्वानिव शयनादिषु न बध्यते कु
तः तत्र तत्र विषयेषु गुणानिंद्रियाणि आदयन् भोजयन् तत्साक्षित्वेन वर्तमानः न तु स्वयमदन् ११ एतदेव कुतस्तत्राह प्रकृतिस्थोपीति सार्द्धेन यथा

एवं विरक्तः शयन आसनाटनमज्जने दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु न तथा बध्यते विद्वांस्तत्र तत्रादयन् गुणा
न् ११ प्रकृतिस्थोऽप्यसंसक्तो यथा खं सविता निलः १२ वैशारद्येक्षयासंगशितया छिन्नसंशयः प्रतिबुद्ध इव स्वप्नान्नानात्वाद्वि
त
निवर्तते १३ यस्य स्युर्वीतसंकल्पाः प्राणेंद्रियमनोधियां वृत्तयः स विनिर्मुक्तो देहस्थोपि हि तद्गुणैः १४ ॥ ॥

जलमपि न सज्जते यथा सविता जलेषु प्रतिबिंबितोपि यथा अनिलः सर्वत्र संचरन्नपि न सक्तः १२ असंगेन वैराग्येण शितया तीक्ष्णया छिन्नाः संशया यस्य ५३
वृत्तयो यस्य सः नानात्वान्देहादिप्रपंचात् १३ कथं विहरेदित्यस्योत्तरत्वेन वैलक्षण्यांतरमाह यस्य स्युरिति । तद्गुणैः देहगुणैः । संकल्पशून्यादिभिः प्राणा
दिवृत्तिभिर्विहरन्मुक्त इत्यर्थः १४ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...वमुक्तयोः स्वसंवेद्यमेव वैलक्षण्यमुक्तं इदानीं कैवल्या... पयेतत्पङ्गवैरिस्पर्शमोक्षरतयापरैरपि सु...ज्ञेयं वैलक्षण्यमाह यस्मात्मेति त्रिभिः
...र्नैरन्यैर्वा प्राणिभिः यस्मात्मा देहः पीड्यते यदृच्छया येन केनापि कुत्रचित् किंचिदर्प्यते वा स बुधस्तत्तत्र न व्यतिक्रियते नाति विक्रियत इत्यर्थ
: तच्च कथ्यान्तवल्केन यः कंटकैर्वितुदति निर्वेदनेयश्च लिंपति अकुक्षिः परितुष्टश्च समस्तस्य चैतस्येति १४ किंच साध्वसाधु वा कुर्वन्तमेवदतो वा जनान्

यस्यात्मा हिंस्यते हिंस्रैर्येन किंचित्यदृच्छया । अर्च्यते वा क्वचित्तत्र न व्यतिक्रियते बुधः १५ । न स्तुवीत न निंदेत कुर्वतः साध्वसाधु
वा । वदतो गुणदोषाभ्यां वर्जितः समदृङ्मुनिः १६ । न कुर्यान्न वदेत्किंचित्न ध्यायेत्साध्वसाधु वा । आत्मारामोनया वृत्त्या विचरेज्जड
वन्मुनिः १७ । शब्दब्रह्मणि निष्णातो न निष्णायात्परे यदि । श्रमस्तस्य श्रमफलो ह्य...धेनुमिव रक्षतः १८ ॥

न स्तुवीत न च निंदेत योलौकिकव्यवहारे विमुर्षः समुक्त इत्यर्थः १६ अपि च न कुर्यादिति यो देहिके पिकर्मपि कर्मण्युदासीनः म...लग...स्ततरो वक्तृ
त्वर्थं ...ज्ञानं स्वसर्वा...णि मुमुक्षोः साधनानि ज्ञातव्यानि १७ यस्तु केवलं शाब्दब्रह्म...निज्ञः पांडित्यमात्रसाधनं तर्कैः साधने स्वस्य निष्ठो न वेतत्तं निंद
ति शब्दब्रह्मणि निष्णातः अर्थतः परंगतोपि परे ब्रह्मणि न निष्णायात् ध्यानाय नियोगं न कुर्यात्तस्य शास्त्रश्रमः श्रमैकफलः न तु पुरुषार्थपर्यवसायी अ
धेनुं विरजस्तां १८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
५४

एतद्देवामायनिरसनैः प्रपंचयतिगामिति । उद्धवतस्त्विदोहः पयं घोदेहोनोत्तरत्रदोसोह्योऽस्त्रियुस्याःतोऽत्रयस्मिन्मां । असतींनायंकामसूनां । देहंपरा
धीनंमत्क्विणोदुःखहेतु असत्सनांदृश्यसाधनभूतपुत्र अतीर्थीकृत आगतेषानेऽस्तेविभूःकीर्तिदुरितापारके । अंगहेउद्धव । दुःखानंतरंदुःखमेव
यस्यसःरक्षति । १९ । मयाहीनावाचमित्युक्तंविहरणोति । यस्मामेत्रगतःशोधकंच रिक्तनस्यात्किंतत् । अस्यविश्वस्यस्थित्यादिरूपंतद्धेतुरित्यर्थः । लीलावत

गांदुग्धदोहामसतींचनायां देहंपराधीनमसत्प्रजांच । वित्तंत्वतीर्थीकृतमंगवाचं हीनांमयारक्षतिदुःखदुःखी ॥ १९ ॥ यस्मांनमेपा
वनमंगलकर्मस्थित्युद्भवप्राणनिरोधमस्य । लीलावतारेप्सितजन्मवास्याद्वंध्यांगिरंतांबिभृयान्नधीरः ॥ २० ॥ एवंजिज्ञासयाऽपोह्यना
नात्वभ्रममात्मनि । उपारमेतविरजंमनोमय्यर्प्यसर्वगे ॥ २१ ॥ यद्यनीशोधारयितुंमनोब्रह्मणिनिश्चलं । मयिसर्वाणिकर्माणिनिरपे
क्षःसमाचर ॥ २२ ॥ श्रद्धालुर्मेकथाःशृण्वन्सुभद्रालोकपावनीः । गायन्ननुस्मरन्कर्मजन्मचाभिनयन्मुहुः ॥ २३ ॥

तारेस्वईप्सितंजगतः

क्षेमास्पदंश्रीरामकृष्णादिजन्मवानस्यात्तांनिष्फलांगिरंधीरोधीमान्नधारयेत् । २० । उक्तंज्ञानमार्गमुपसंहरति । एवंनिश्चित्यविचारेणात्मनिनानात्वभ्रमं
–ऽध्यास्यसंनिरस्यनिर्मलंमनोमयिसर्वगेपरिपूर्णेसमर्प्यसंधार्यउपारमेत् । नवागस्त्वपांडित्यमात्रेणेत्यर्थः । २१ । यद्यनीशःअशक्तत्हिस्त्रात्मामिदं मह्त्वपे
क्ष्योनिर्वीप्सीत्याहमयीति । मदर्पणेन । २२ । कर्मनिविशुद्धसत्वस्यानंतरंगानंकिमाहश्रद्धालुरितित्रिभिः । अभिनयन्स्वयमनुकुर्वन् । २३ ॥ ॥

५४

नकिंचिन्कुर्यात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...स्त्विवमानः ।२४। ततश्चानेन प्रकारेण मयि सत्संगेन लब्धया भक्त्या सम्यक् मां उपासिता ध्याता भवति। सच ध्यानशीलः सद्भिर्दर्शितं वै निश्चितं सुखेनैव मे प
...पदं प्राप्नोति ।२५। सत्संगलब्धया भक्त्येत्युक्तं। तत्र सतां लक्षणं भक्तेश्च विशेषं पृच्छति साधुरिति। साधवः सत्सु मत्परिकल्पिताः संति बहवः। भवतः कीदृशाः संमताः। च
...रूपेण कुविधा लोके कीदृशी पुनस्त्वय्युपयुज्येत सद्भिश्च नारदादिभिरादृता ।२६। एतच्च कथ्यतां। इच्छातिशुद्धं तथैव वक्तव्यमिति ... तैश्वर्यमाविष्करोति। हिपु

मदर्थे धर्मकामार्थानाचरन्मदपाश्रयः ।। लभते निश्चलां भक्तिं मय्युद्धव सनातने ।। २४ ।। सत्संगलब्धया भक्त्या मयि मां स उपासि
ता। स वै मे दर्शितं सद्भिरंजसा विंदते पदं ।२५।। उद्धव उवाच ।। ।। साधुस्तवोत्तमश्लोक मतः कीदृग्विधः प्रभो ।। भक्तिस्त्वय्युपयु
ज्येत कीदृशी सद्भिरादृता ।२६।। एतन्मे पुरुषाध्यक्ष लोकाध्यक्ष जगत्प्रभो ।। प्रणतायानुरक्ताय प्रपन्नाय च कथ्यतां ।२७।। त्वं
ब्रह्म परमं व्योम पुरुषः प्रकृतेः परः ।। अवतीर्णोसि भगवन् स्वेच्छोपात्तपृथग्वपुः ।२८। श्रीभगवानुवाच ।। ।। कृपालुरकृतद्रो
हस्तितिक्षुः सर्वदेहिनां ।। सत्यसारोऽनवद्यात्मा समः सर्वोपकारकः ।२९।। ।।

रुषाध्यक्ष इत्यादिना ब्रह्मादिनियंतः ।२७। अत्र हेतुः त्वमिति। व्योमवदसंगा यतः प्रकृतेः परः स्वेच्छामित्युपात्तं पृथक् परिमितं वपुर्येन सः ।२८। तत्र त्रिंशत्
लक्षणैः साधून्निरूपयति कृपालुरिति पंचभिः। कृपालुः परदुःखासहिष्णुः सर्वदेहिनां केषांचिदप्यकृतद्रोहः। तितिक्षुः क्षमावान्। सत्यं सारः स्थिरं बलं
यस्य सः। अनवद्यात्मा असूयादिरहितः। सुखदुःखयोः समः। यथाशक्ति सर्वेषामुपकारकः ।२९। ।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०ए०
५५

कामैरक्षुभितचित्तः। दान्तः संयतबाह्येंद्रियः। मृदुः अकठिनचित्तः। शुचिः सदाचारः। अकिंचनः अपरिग्रहः। अनीहः दृष्टक्रियाशून्यः। मितभुक् लघ्वाहारः।
शांतः नियतांतःकरणः। स्थिरः स्वधर्मे। मच्छरणः मदेकाश्रयः। मुनिः मननशीलः॥ ३०॥ अप्रमत्तः सावधानः। गंभीरात्मा निर्विकारः। धृतिमान् विपद्यप्यकृप
णः। क्षुत्पिपासे शोकमोहौ जरामृत्यू षडूर्मयः एते जिता येन सः। अमानी निर्मानाकांक्षी। अन्येभ्यो मानदः। कल्यः परबोधने दक्षः। मैत्रः अवंचकः। कारुणिकः
करुणयैव प्रवर्तमानः न दृष्टलोभेन। कविः सम्यक्ज्ञानी॥ ३१॥ किंच मया वेदरूपेणादिष्टानपि स्वधर्मान् संत्यज्य यो मां भजेत सोपि एवं पूर्वोक्तवत् सत्तमः।

कामैरहतधीर्दांतो मृदुः शुचिरकिंचनः। अनीहो मितभुक् शांतः स्थिरो मच्छरणो मुनिः॥ ३०॥ अप्रमत्तो गभीरात्मा धृतिमान् जि
तषड्गुणः। अमानी मानदः। कल्यो मैत्रः कारुणिकः। कविः॥ ३१॥ आज्ञायैवं गुणान् दोषान् मयादिष्टानपि स्वकान्। धर्मान् संत्य
ज्य यः सर्वान् मां भजेत स सत्तमः॥ ३२॥ ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि यादृशः। भजंत्यनन्यभावेन ते मे भक्ततमा मताः॥ ३३॥

किमज्ञानान्नास्तिक्याद्वा न। धर्माचरणे सत्वशुद्ध्यादीन् गुणान् विपक्षे दोषांश्च आज्ञाय ज्ञात्वापि मद्ध्यानविक्षेपकतया मद्भक्त्यैव तु सर्वं भविष्यतीति दृढ
निश्चयेनैव धर्मान् संत्यज्य। यद्वा भक्तिदार्ढ्येन निवृत्ताधिकारतया संत्यज्य। अथवा विहितकाद्यकरणे अक्षुपगमासानुपवासा निवेद्य श्राद्धादयो येन किं
धर्मांस्तान् संत्यजेदित्यर्थः॥ ३२॥ किंच यावान् देशकालाद्यपरिच्छिन्नः यश्च सर्वात्मा यादृशः सच्चिदानंदादिरूपः तं मां ज्ञात्वाज्ञात्वापि यथा वि ५५
तः पुनः पुनर्ज्ञात्वा एकांतभावेन भजंतीति॥ ३३॥

न्हृणामुक्तं मक्तेत्यहाणमाह मल्लिंगेत्यष्टभिः लिंगानि प्रतिमादीनि ३४ सर्वलाभोपहरणं सर्वस्य लब्धस्य समर्पणं ३५ पर्वाणि जन्माष्टम्यादीनि
मोदनं ३६ बलिविधानं पुष्पोपहारादिसमर्पणं सर्ववार्षिकपर्वसु चातुर्मास्यैकादश्यादिषु विशेषतः ३७ उद्यानादिकरणे सामर्थ्ये

मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनं । परिचर्या स्तुतिः प्रह्वगुणकर्मानुकीर्तनं ३४ मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव । सर्वलाभोपहरणं दास्येनात्मनिवेदनं ३५ मज्जन्मकर्मकथनं मम पर्वानुमोदनं । गीततांडववादित्रगोष्ठीभिर्मद्गृहोत्सवः ३६ यात्रा बलिविधानं च सर्ववार्षिकपर्वसु । वैदिकी तांत्रिकी दीक्षा मदीयव्रतधारणं ३७ ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः । उद्यानोपवनाक्रीडपुरमंदिरकर्मणि ३८ संमार्जनोपलेपाभ्यां सेकमंडलवर्तनैः । गृहशुश्रूषणं मह्यं दासवद्यदमायया ३९ ॥

सति स्वतः असति चान्यैः संभूय उद्यमः उद्यानं पुष्पप्रधानं उपवनं फलप्रधानं वनं आक्रीडं क्रीडास्थानं ३८ संमार्जनं रजसोऽपाकरणं उपलेपः गोमयोद-
कादिभिरालेपनं सेकः तैरेव प्रोक्षणं मंडलवर्तनं सर्वतोभद्रादिकरणं ३९ ॥

त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वयमन्येन वा निवेदितं न स्वीकुर्यात् एतच्च साधारणद्रव्यविषयं । एकपात्रविषयं वा अन्नमात्रविषयमेव । षड्भिर्मासोपवासैस्तु यत्फलं परिकीर्तितं । वि
ष्णोर्नैवेद्यसिक्थेन तत्फलं तु ... भुंक्ते कलौ । कृमिरूपं सुखेनाम मनैवेद्यं सुदरे हरेः । पादोदकं च निर्माल्यं मस्तके यस्य सोऽच्युत इत्यादिवचनैः । यद्वा अन्यस्मै
निवेदितमन्नोपभुञ्ज्यात् मद्यैन निवेदयेदित्यर्थः । विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरं । पितृभ्यश्चैव तद्देयं तदानन्त्याय कल्पते । पितृशेषं तु यो दद्यात् हरये प

अमानित्वमदंभित्वं कृतस्यापरिकीर्तनं । अपि दीपावलोकं मे नोपयुञ्ज्यान्निवेदितं ॥४०॥ यद्यदिष्टतमं लोके यच्चातिप्रियमा
त्मनः । तत्तन्निवेदयेन्मह्यं तदानंत्याय कल्पते ॥४१॥ सूर्योऽग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलं । भूरात्मा सर्वभूतानि भद्र पूजा
पदानि मे ॥४२॥ सूर्ये तु विद्यया त्रय्या हविषाग्नौ यजेत मां । आतिथ्येन तु विप्राग्र्ये गोष्वंग यवसादिना ॥४३॥ वैष्णवे बंधुसत्कृत्या हृ
दि खे ध्याननिष्ठया । वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः ॥४४॥ स्थंडिले मंत्रहृदयैर्भोगैरात्मानमात्मनि । क्षेत्रज्ञं सर्वभू
तेषु समत्वेन यजेत मां ॥४५॥ ॥

ग्रं २

परमात्मने रेतोदां पितरः स्वस्य नवं तिलकेशानाग्नि इत्यादिवचनैः ॥४०॥४१॥ इदानीमेकादशपूजाधिष्ठानान्याह सूर्य
इति हे भद्र ॥४२॥ अधिष्ठानभेदेन पूजासाधनान्याह सूर्य इति त्रिभिः । त्रय्या विद्यया सूक्तैरुपस्थानादिना । अंग हे उद्धव । यवसादिना तृणादिना ॥४३॥ बंधु
... बंधुवत्संमानेन । हृदि खे हृदयाकाशे । मुख्यधिया प्राणदृष्ट्या । तोये तोयादिभिर्द्रव्यैस्तर्पणादिना ॥४४॥ स्थंडिले तु विमंत्रहृदयैः रहस्यमंत्र ५६
भैः ॥४५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible]धिष्ठानेषु ध्येयमाह धिष्ण्येष्वेष्विति इति अनेन प्रकारेण एषु धिष्ण्येषु ॥ ४६ ॥ उक्तायाः भक्तेः फलमाह इष्टापूर्तेनेति ॥ सद्भक्तिपरां दृढां भक्तिं ॥ अस्यां भक्तौ उत्तरंगं
[illegible]नमाह इत्थं मत्स्मृतिः साधुसेवया भवति यथा स्मृतिज्ञानि ॥ ननु अस्ति दृढभक्तिमतः पुंसः साधुसेवया मत्ज्ञानं भवतीत्यर्थः ॥ ४७ ॥ ज्ञानभक्तिमार्गावुक्तौ ॥ तत्र ज्ञा
[illegible]दपि भक्तिमार्गः श्रेष्ठ इत्याह प्रायेणेति ॥ सत्संगेन यो भक्तियोगः तेन विनोपायः स संसारतरणे न विद्यते ॥ सत्संगे अस्य तत्र हेतुमाह हि यस्मात् सताम्

धिष्ण्येष्वे[illegible]ते मद्रूपं शंखचक्रगदांबुजैः ॥ युक्तं चतुर्भुजं शांतं ध्यायन्नर्चेत्समाहितः ॥ ४६ ॥ इष्टापूर्तेन मामेवं यो यजेत समाहितः
लभते मयि सद्भक्तिं मत्स्मृतिः साधुसेवया ॥ ४७ ॥ प्रायेण भक्तियोगेन सत्संगेन विनोद्धव ॥ नोपायो विद्यते सध्र्यङ् प्रायणं हि स
तामहं ॥ ४८ ॥ अथैतत्परमं गुह्यं शृण्वतो यदुनंदन ॥ सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखा ॥ ४९ ॥ इति श्रीभागवते
महापुराणे एकादशस्कंधे एकादशोऽध्यायः ॥ ११ ॥ ॥

हं प्रायणं प्रकृष्टम् अयनम् आश्रयः अतः सत्संगो मध्यंतरंग इत्यर्थः ॥ ४८ ॥ इदानीं सांख्ययोगादीनि साधनांतराण्यपेक्षाणि अस्मिन् विचाराणि च ॥ सत्संगस्य स्वतंत्रेण
परत्वं यः फलाय न विचारांश्चेति विवरणं पितु माह अथेति ॥ एतत् वक्ष्यमाणं परमं गुह्यं ॥ अतः शृण्वित्यर्थः ॥ ४९ ॥ इति एकादशे टीकायां एकादशोऽध्यायः ॥ ११ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्यतो साधुसंगस्य महिमावस्थितिः पुरा कर्मानुष्ठानतस्यागम्यवस्थान्ततः परं निरोधयतीनवशीकरोति योगः आसनप्राणायामादिः सांख्यं तत्वानां वि
वेकः धर्मः सामान्यतो हिंसादिः स्वाध्यायो वेदजपः तपः कृच्छ्रादि त्यागः सन्यासः इष्टापूर्त इष्टं च पूर्तं च तत्रेष्टमग्निहोत्रादि पूर्तं कूपारामादिनिर्माणं दक्षि
णाशब्देन सामान्यतो दानं लक्ष्यते १ व्रतानि एकादस्युपवासादीनि मन्दे देवपूजा छंदांसि रहस्यमन्त्राः अवरुंधे वशीकरोति २ यातुधाना राक्षसाः ३।४

श्रीभगवानुवाच ॥ ॥ नरोधयति मां योगो न सांख्यं धर्म एव च न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा १ व्रतानि यज्ञः छंदां
सी तीर्थानि नियमा यमाः यथावरुंधे सत्संगः सर्वसंगापहो हि मां २ सत्संगेन हि दैतेया यातुधाना मृगाः खगाः गंधर्वाप्सर
सो नागाः सिद्धाः चारणगुह्यकाः ३ विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोंत्यजाः रजस्तमः प्रकृतयस्तस्मिंस्तस्मिन्युगे युगे ॥
४ बहवो मत्पदं प्राप्तास्त्वाष्ट्रकायाधवादयः वृषपर्वा बलिर्बाणो मयश्चाथ विभीषणः ५ सुग्रीवो हनुमानृक्षो गजो गृध्रो वणिक्पथः
व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथापरे ६ तेनाधीतश्रुतिगणा नोपासितमहत्तमाः अव्रतातप्ततपसो मत्संगान्मामुपागताः ७ ॥ कयाधुर्नाम्नी दानवी तस्या अपत्यं

त्वाष्ट्रो वृत्रः कायाधवः प्रह्लादः ५ ऋक्षो जांबवान् गृध्रो जटायुः वणिक्पथस्तुलाधारः

...धर्मव्याधः यज्ञपत्न्यः दीक्षितनार्यः ६ तेषां सत्संगव्यतिरिक्तसाधनांतरानावश्यकत्वमाह तेनेति न अधीताः श्रुतिगणा यैः तदर्थं च न उपासिता महत्तमा
तथा किं च अव्रताः अतप्ततपसः न व्रतानि येषां न तप्तानि तपांसि यैः ते च ते च तथा मत्संगादिति सद्भिः संगेन मम मयि एव संगः इत्यभिप्रेतोक्तं यद्वा स्वसंगः
...मत्संगत्वं विवक्षते स्वस्यापि सत्वात् पक्षा मत्सीरीयानां संगादित्यर्थः ॥७॥ ॥

तप



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द[...]आदीनां नवतु नामकथं विस्माधनांतरं गोपीप्रभृतीनांतु नान्यदस्तीत्याह केवलेनेति सत्संगलब्धेन केवलेनैव भावेन प्रीत्या नगाः यमलार्जुनादयः ना
[...]लियादयः यद्वा तदानीं तन सर्वत स्तु गुल्मादीनामपि भगवति भावो स्तीति गम्यते तदुक्तं भगवतैव अहो अमी देववरामरार्चितं पादांबुजं ते सुमनः
फलार्हणं नमंत्युपादाय शिखाभिरात्मनस्तमोपहत्यै तरुजन्म यत्कृतमित्यादि सिद्धाः कृतार्थाः संतः ईयुः प्रापुः ७ स्वप्रासेतुलं नितामाहय भिनिः योगा
दिभिः कृतप्रयत्नोऽपि यं न प्राप्नुयात् तं मामीयुरिति पूर्वेणान्वयः अत्र च प्रथमं पागोप्यः पश्चात्तयोगा श्रीकृष्णेन सह संगताः ते मंतः तत्संगेऽन्येषां सत्संगः ते

केवलेन हि भावेन गोप्यो गावो नगा मृगाः ये न्ये मूढधियो नागाः सिद्धा मामीयुरंजसा ८ यं न योगेन सांख्येन दानव्रततपोध्वरैः व्या
ख्यास्वाध्यायसन्यासैः प्राप्नुयाद्यत्नवानपि ९ रामेण सार्धं मथुरां प्रणीते श्वाफल्किना मय्यनुरक्तचित्ताः विगाढभावेन न मे वियो
गतीव्राधयोऽन्यं ददृशुः सुखाय १० तास्ताः क्षपाः प्रेष्ठतमेन नीता मयैव वृंदावनगोचरेण क्षणार्धवत्ताः पुनरंग तासां हीना मयाक
ल्पसमा बभूवुः ११ ॥ ॥

मे

६

नत्वेतावता किमिति ज्ञातव्यं ए गोपीनां भावं प्रपंचयति रामेणेति द्वाभ्यां श्वाफल्किनाक्रूरेण मयि प्रणीते सति मे मत्तो न्यं सुखाय न ददृशुः कुतः वियोगेन
तीव्रो दुःसहो आधिर्यासां ताः अत्र हेतुः मयि विगाढेन अतिदृढेन भावेन प्रेम्णा अनुरक्तानि संसक्तानि चित्तानि यासां ताः १० तीव्राधित्वं प्रपंचयति तास्ता इति मया स
हयाः एव क्षपा रात्रयः क्षणार्धवन्नीतास्ता एव पुनः मया हीनास्तासां कल्पसमा बभूवुः कथंभूतास्तास्ताः वाचामगोचरा इत्यर्थः ११ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०

किंच एवंतीव्राधयस्ताः मोहमिषेण समाधिंप्राप्ता इत्याह इति मय्यनुषंगेण आसक्त्याबद्धाधियोयासांनिष्ठाः (ताः) स्वमात्मानं स्वदेहं अदः दूरस्थं इदंसन्निहितंचना
विदन् यत्र संपत्तिपुत्रादिममतास्पदं आत्मानं अहंकारास्पदं अदः परलोकं इदंइमंलोकंचनाविदन्निति यथाब्धुनयः समाधौनामरूपेनविदुः तद्वत् अ
(ब्धि) तुअश्रितोयेनयद्दवमपिप्रतिष्ठाइत्यन्वयः॥१२॥ अवेत्ताः अबलाः केवलमत्कामाः अस्वरूपविदः स्वरूपमज्ञात्वानंती तथापिसत्संगात् जारंब्रह्मनारबुद्धि

तानाविदन्मय्यनुषंगबद्धधियःस्वमात्मानमदस्तथेदं॥ यथासमाधौमुनयोऽब्धितोयेनद्यःप्रविष्टाइवनामरूपे॥१२॥ मत्कामारमणं
जारमस्वरूपविदोऽबलाः॥ ब्रह्ममांपरमंप्रापुःसंगाच्छतसहस्रशः॥१३॥ तस्मात्त्वमुद्धवोत्सृज्यचोदनांप्रतिचोदनां॥ प्रवृत्तंचनिवृ
सं ४ त्तंचश्रोतव्यंश्रुतमेवच॥१४॥ मामेकमेवशरणमात्मानंसर्वदेहिनां॥ याहिसर्वात्मभावेनमयास्याःह्यकुतोभयः॥१५॥ उद्धवउ
वाच॥ संशयःशृण्वतोवाचंतवयोगेश्वरेश्वर॥ ननिवर्ततआत्मस्थोयेनभ्राम्यतिमेमनः॥१६॥ ॥

वेद्यमपिब्रह्मस्वरूपमेवमांपरमंप्रापुरित्यर्थः॥१३॥ यस्मादेवंमल्लोमस्सतनुप्रभावः तस्मात्त्वंचोदनांश्रुतिंप्रतिचोदनांस्मृतिंच यद्वाविधिंचनिषेधंचउद्धव
१४ मांशरणंयाहिमयैवाकुतोभयःस्याःत्वं॥१५॥ पूर्वंतावन्मयोदितेश्वबाहितःस्वधर्मेष्विस्मादिनाकर्मकर्तव्यमित्युक्तं इदानींतुतत्संन्यस्यका मांशरणंयाही ५८
त्येतत्त्वकिमात्मनःकर्तृत्वाद्यस्तिनास्तिवेत्यात्मस्थःआत्मविषयःसंशयोननिवर्तते यद्वाकर्मकार्यंत्याज्यंवेत्यात्मस्थःहृदिस्थःसंशयोननिवर्ततइति
यइति येनसंशयेन॥१६॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible]त्परस्त्यर्थं निःश्रेयसं नाम भावः| ईश्वरस्यावस्तुमायावशात्प्रपंचात्मना नानि| तत्र पंचाध्याय्यां जीवानामना[illegible]द्यविद्यया कर्तृत्वादि| ततो विधिप्रतिषेधाधि ६३
[illegible]रः तदानीं सत्त्वशुद्ध्यर्थं कर्माणि कर्तव्यानि| सत्त्वशुद्धौ पुनः कर्मजाड्यपरिहाराय न किंचित्क्षेपकं कर्मादरं परित्यज्य दृढविश्वासेन भजेत्कर्म ज्ञातायां तु वि
द्यायां न किंचित्कर्तव्यमस्तीति| तत्र तावदीश्वर एवागमादिद्वारा जीवसंसृतिकारणभूतः प्रपंचोऽहमेवाह| सार्द्धैस्त्रिभिः| स एषः अपरोक्षो जीवयतीति जीवः
चक्रे परमेश्वरः अपरोक्षत्वे हेतुः विवरेषु आधारादिषु प्रसूतिरभिव्यक्तिर्यस्य सः| तामेवाभिव्यक्तिमाह घोषेणेति| घोषेण परास्येनैव नादवता प्राणे
न सह गुहामाधारचक्रं प्रविष्टः सन् मनोमयं सूक्ष्मं रूपं पश्यन्त्याख्यं मध्यमाख्यं च मणिपूरकं च के विशुद्धिचक्रे चोपेत्य प्राप्य वक्त्रे मात्रा ह्रस्वादिः स्व
र उदात्तादिः वर्णः ककाराकारादिरित्येवं वैखर्यारूपः स्थविष्ठः अतिस्थूलो वेदशाखात्मको भवतीति| तथा च श्रुतिः| चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्रा

श्रीभगवानुवाच|| स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः| मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति
स्थविष्ठः||१७|| ||

ह्मणा ये मनीषिणः| गुहायां त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंतीति| अनियुक्तश्लोकश्च| यास्मामित्रावरुणसदनादुच्चरंती त्रिषष्टिं वर्णान्नितः प्र
केटकरणैः प्राणसंगात्प्रसूते| तां पश्यंती प्रथममुदितां मध्यमां बुद्धिसंस्थां वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्य इति|१७|| || आधारो मणिबंधश्च मणिपूर
कं एव च| अनाहतो विशुद्धाख्यचक्राण्येतानि षट् क्रमात्| अ इ उ ऋ ह्रस्वदीर्घप्लुतभेदेन नवधा ऌकारः प्लुतभेदेन द्विविधः|५| एऐओऔ दीर्घप्लुतभेदेनाष्टौ|२२| का
यरलवा दयो मावसानाः स्पर्शाः|२५| अंतस्थाः|४| ऊष्माणः|४| पंचमैर्युक्ताः कादि चत्वारो वर्णाः यमाः|४| जिह्वामूलीयोपध्मानीयौ|२| अनुस्वारविसर्गौ|२| इति त्रिषष्टिवर्णाः
चतुःषष्टिपक्षे तु दुस्पृष्ट एकः| अचो मध्ये डकारं तु ह्रकारं बह्वृचा जगुरिति दुस्पृष्टः ऌकारस्य दीर्घः|१७|| ||

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ता०१०
अव्यक्तस्य सतः सूक्ष्ममध्यमक्रमेणाभिव्यक्तौ दृष्टांतः यथेति यथाग्निः खे उ आकाशे अव्यक्तो ऽरूपः दारुण्यधिकं मथ्यमानः अनिलसहायः सन्नूष्मा अणुः सू
क्ष्मो विस्फुलिंगादिरूपो भवति पुनः प्रवृद्धो जातो हविषा समेधते तथैवेयं वाणी ममाभिव्यक्तिः १८ उक्तां वाग्वृत्तिमुपसंहरन्नितरेंद्रियवृत्तीरपि दर्शयति एवं
गदिः गदनं भाषणं मेऽभिव्यक्तिरित्युपसंहारः कर्म हस्तयोर्वृत्तिः गतिः पादयोः विसर्गः पायूपस्थयोः इति कर्मेंद्रियाणां घ्राणः घ्राणं रसो रसनं दृक् दर्शनं स
र्शः स्पर्शनं श्रुतिः श्रवणमिति ज्ञानेंद्रियाणां संकल्पो मनसः विज्ञानं बुद्धिचित्तयोः अभिमानोऽहंकारस्य सूत्रं प्रधानस्य सत्त्वरजस्तमसां विकारोऽधिदैवा

म म
यथानलः खेऽनिलबंधुरूष्मा बलेन दारुण्यधिमथ्यमानः अणुः प्रजातो हविषा समिध्यते तथैव मे व्यक्तिरियं हि वाणी १८ एवं गदि
:कर्म गतिर्विसर्गो घ्राणो रसो दृक्स्पर्शः श्रुतिश्च संकल्पविज्ञानमथाभिमानः सूत्रं रजःसत्त्वतमोविकारः १९ अयं हि जी
वस्त्रिवृदब्जयोनिरव्यक्त एको वयसा स आद्यः विश्लिष्टशक्तिर्बहुधेव भाति बीजानि योनिं प्रतिपद्य यद्वत् २० ॥

दिः त्रिविधः प्रपंचः मेऽभिव्यक्तिरिति पूर्वेणान्वयः १९ तस्मादीश्वराभिव्यक्तिरूपः प्रपंचो नेश्वरात्पृथगित्याह अयमिति अयं जीवः परमेश्वरः आदौ
अव्यक्त एक एव वयसा कालेन विश्लिष्टशक्तिः आवाङ्गादीन्द्रियरूपाः शक्तयो यस्य यद्वा विशेषेण श्लिष्टाः आलिंगिता मायाशक्तिर्येन स बहुप्रकार इवाभा
ति यतः स एवमाद्यः त्रिवृत् त्रिगुणाश्रयः अब्जयोनिः लोकपद्मस्य कारणभूतः एकस्य बहुधाभाने दृष्टांतः योनिं क्षेत्रं प्रतिपद्य प्राप्य बीजानि य राम
थेति २० ॥ ५९

तस्मात्त्वन्मायाविलसितत्वात्तदाश्रयमिदं जगन्न ततः पृथगिति मिथ दृष्टांतमाह यस्मिन्निति तंतुवितानेसंस्थास्थितिर्यस्य सः पटो यथा तथा यस्मिन्निदं विश्वं
तंतुषु पट इव । प्रोतं तिर्यक् तंतुष्विव । एवंभूतं समष्टिव्यष्ट्यात्मकं विश्वम् विद्ययात्मन्यध्यस्तं तद्रूपं जीवस्य कर्तृत्वादिसंसारहेतुः अतस्तद्विवेकज्ञानेन क
[illegible]दिसर्वं त्याज्यमित्यभिप्रायेनाह य एष इति सार्धैस्त्रिभिः । पुराणः अनादिः कर्मात्मकः प्रवृत्तिस्वभावः । पुष्पफले भोगापवर्गौ किं तत्फले वा प्रसूते
जनयति २१ वृक्षरूपकं प्रपंचयति द्वे इति द्वे पुण्यपापे अस्य बीजे । शतमूलैः शतं अपरिमिताः वासनाः मूलानि यस्य । त्रयो गुणाः नालानि प्रकांडाः

यस्मिन्निदं प्रोतमशेषमोतं पटो यथा तंतुवितानसंस्थः ॥ य एष संसारतरुः पुराणः कर्मात्मकः पुष्पफले प्रसूते २१ द्वे अस्य बी
जे शतमूलस्त्रिनालः पंचस्कंधः पंचरसप्रसूतिः । दशैकशाखो द्विसुपर्णनीडस्त्रिवल्कलो द्विफलोऽर्कं प्रविष्टः २२ ॥

यस्य । पंच भूतानि स्कंधा यस्य । पंच रसाः शब्दादिविषयास्तेषां प्रसूतिर्यस्मात् । दश च एका च शाखा इंद्रियाणि यस्य द्वयोः सुपर्णयोर्जीवपरमात्मनोर्नीडं
यस्मिन् त्रीणि वल्कलानि त्वचो वातपित्तश्लेष्माणो यस्य द्वि सुखदुःखफले यस्य सः अर्कं प्रविष्टः सूर्यमंडलपर्यंतं व्याप्तः तत्त्रिनिर्धिगतस्य संसारानावा
त् २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मायाकल्पिततनाकारं॥

भा०ए० तत्फलमभोक्तृत्वादुःखं गृध्रा इति तिर्यग्ग्राः कामिनः ग्रामेचराः गृहस्थाः अस्य वृक्षस्यैकं फलं दुःखमदंति परिणामतः स्वर्गादेरपि दुःखरूपत्वात् हंसा विविक्ति-
नोऽरण्यवासिनः संन्यासिन एकं फलं सुखमदंति एकं परमात्मानं मायामयमेव बहुरूपं इज्यैः पूज्यैर्गुरुभिः ज्ञात्वा यो वेद स वेदं वेद तत्वार्थं वेद ॥२३॥ तच्चैवं वृक्षत्वात्कल्पित- श्रीनभम्पोः
कल्पः सर्वसाधनं त्यजेत्याह एवमिति एकांतभक्त्या शितेन तीक्ष्णेन ज्ञानकुठारेण स्वतंत्रजीवाशयः तं च भावात् जीवोपाधि त्रिगुणात्मकं लिंगशरीरं वि-
वृश्च्य छित्वा परमात्मानं च संपद्य प्राप्य अथ अस्त्रं साधनं त्यजेति ॥२४॥२५॥ एकादशे द्वादशः ॥१२॥ ॥ त्रयोदशेऽस्य सत्वस्य हृष्यो विद्योदयक्रमः हंसेति

अदंति चैकं फलमस्य गृध्रा ग्रामेचरा एकमरण्यवासाः ॥ हंसा य एकं बहुरूपमिज्यैर्मायामयं वेद स वेद वेदं ॥२३॥ एवं गुरूपासनयैक-
भक्त्या विद्याकुठारेण शितेन धीरः ॥ विवृश्च्य जीवाशयमप्रमत्तः संपद्य चात्मानमथ त्यजास्त्रं ॥२५॥ ॥ इति श्रीभागवते महापुराणे एका-
दशस्कंधे भगवदुद्धवसंवादे द्वादशोऽध्यायः ॥ ॥ श्रीभगवानुवाच ॥ सत्वं रजस्तम इति गुणा बुद्धेर्न चात्मनः ॥ सत्वेनान्यतमौ हन्यात्सत्वं सत्वेन मा
चैव हि ॥१॥ ॥

दासमतस्थित्युत्पत्तिक्रमेण विक्षेपवर्णितं ॥ विद्याकुठारेण जीवाशयं संवृश्च्य साधनं त्यजेत्युक्तं ॥ नन्वेतत्तमआदिगुणत्रयवद्धः क्षिप्रतिबंधे सति कथं विद्योत्पत्तिरि-
त्युक्तं जिज्ञासा विद्योत्पत्तिप्रकारमाह सत्वमिति सप्तभिः ॥ तत्र यद्यानंदादिविदात्मधर्मा गुणाः स्फुरंति हि तत्स्वरूपत्वात्तेषां निवृत्तिः सा विद्योत्पत्तिर्न स्या- रामः
र्मा गुणा बुद्धेः प्रकृतेरेवते गुणाः नत्वात्मन इति ॥ अतः सत्वेन सत्ववृद्ध्या अन्यतमौ हन्यात् रजस्तमो हन्यात्तज्जयेदित्यर्थः ॥ सत्वं च सत्वं मा दिहित्ति ९०॥
प्रमुखस्वात्मकेनसत्वेनैव हन्यात् ॥१॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म३

…यतिर्यो धर्मः सः न किरूप एव वा सत्त्व…दिति। मद्भक्तिलक्षणयति यो धर्मः सः नकिरूप एव वा। सत्त्व
…गुण एव वृद्धानां परस्परोपमर्द्दरूपत्वात् कथं सत्त्ववृद्धेरेवेतरद्वयोर्नियमेन हंतव्यास्तत्राह सत्त्वादिति। २ सत्त्वधर्मो रजस्तमश्च हन्यात्। कुतः। न विद्यते तत्तमो यस्मात्सः सर्वोत्तमः
…जैते आह सात्त्विकानां पदार्थानामुपासया सेवया सत्त्वं वर्धत इत्यर्थः। २ सत्त्वधर्मो रजस्तमश्च हन्यात्। कुतः। न विद्यते तत्तमो यस्मात्सः सर्वोत्तमः
…सत्त्ववृद्धिः सत्त्वस्य वृद्धिर्यस्मिन्कारणे सः अत एव तत्कार्ये धर्मप्रतिबंधोपि नास्तीत्याह। यस्मिन्नुभयस्मिन्हते तेन मूलः तेरजस्तमसी रागद्वेषादिना प्रमा

आशु न
सत्त्वाद्धर्मो भवेद्वृद्धात्पुंसो मद्भक्तिलक्षणः। सात्त्विकोपासया सत्त्वं ततो धर्मः प्रवर्तते॥२॥ धर्मो रजस्तमो हन्यात्सत्त्ववृद्धिरनुत्तमा॥
श्यति तन्मूलो ह्यधर्म उभये हते॥३॥ आगमोऽपः प्रजा देशः कालः कर्म च जन्म च॥ ध्यानं मंत्रोऽथ संस्कारो दशैते गुणहेतवः॥४॥ तत्तत्सात्त्वि
कमेवैषां यद्यद्वृद्धाः प्रचक्षते। निंदंति तामसं तत्तद्राजसं तदुपेक्षितं॥५॥ ॥

आगमः शास्त्रं
ह्यालस्यादिना च मूलं यस्य सः॥३॥ सात्त्विकोपासनया सत्त्वं वर्धत इत्युक्तं। तानेव सत्त्ववृद्धिहेतून्दर्शयितुं सामान्यतो गुणत्रयवृद्धिहेतूनाह। आगमः शास्त्रं प्रम
पः आपः। क्वचिदागमोऽथ इति पाठः आगमः अधीतो वेदः अर्थस्त्वपायोपायः। निर्णीतं विहितं प्रजा लोकः देशः कालस्तु गसंकर प्रवृत्तिः कालो वसंतादिः कर्म वर्णाश्रम
तं विहितं जन्म तनयकुलविशुद्धं दीक्षा कर्मणं ध्यानं देवताविषयो मंत्रो गायत्र्यादि संस्कारो गर्भाधानादिः गुणहेतवः त्रिगुणोत्पत्तिहेतवः॥४॥ एषु सात्त्विका
दिनिर्णयमाह। एषामेव मध्ये प्रचक्षते प्रशंसंति यच्च निंदंति तत्तत् यत्तु वृद्धैरुपेक्षितं तत्तु तत्तद्राजसं॥५॥ ॥
ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०ए०
६२

सात्विकाम्सेवेति । निवृत्तिशास्त्राणेपवसेवेतन प्रवृत्तिपाषंडशास्त्राणि । तीर्थापि एवन्नगंधोदकसुराद्याः । प्रजाः जनाः निवृत्तानू जनानूनप्रवृत्तदुराचारानू विविक्त
देशं [illegible] धूपाधूतदेशानू कालं ब्राह्ममुहूर्तादिकं ध्यानादीन प्रदोषनिशीथादीन् । कर्म्मनित्यंनकाम्यान्निषिद्धादीनि । जन्मवैष्णवशैवदीक्षालक्षणं । नैशाक्त
दुष्टदीक्षां ध्यानं श्रीविष्णोः नकामिनी विद्विषां मंत्रं प्रणवादिकं नकाम्यक्षुद्रादीनू संस्कारमात्मनः शोधकंनतुकेवलंदेहस्य हादीनांनतु ज्ञानं महावाक्यश्र
वणदेवास्य वर्धते किंतत्रसत्वमहत्वाधर्मेणैवाश्रतआह । यावत्स्मृतिः स्मात्मापरोक्षं । यावद्देहद्वयनकारणं नूतयुगणपोहः तावत्पर्यंतं ज्ञानं नवर्धती
त्यर्थः । २२ ननुगुणव्यतिक [illegible] राज्ञ्यलोदेहः कथंस्वाश्रयनत्तानगुणानूस्वतएवोत्पन्नया विद्यया ऽ पोद्यस्वयमप्युपरमेतत्तत्राह । वेणूनां संघर्षाज्जातोग्नि
र्यथा स्वतएवासन्नानिकाष्ठानिस्तवनं संदग्धास्वयं शाम्यति एवं देहोपि । नक्रियः तस्मांमेरिवाक्रियाव्यापारोयस्यसः ॥ ४ ननुनियतेंद्रियतया सात्वि

सात्विकान्येवसेवेतपुमानूसत्वविवृद्धये । ततोधर्मस्ततोज्ञानंयाव [illegible] स्मृतिरपोहनं ॥ २ वेणुसंघर्षजोवह्निर्दग्ध्वाशाम्यतितद्वनं । एवं
गुणव्यत्ययजोदेहः शाम्यतितत्क्रियः ॥ ३ ॥ उद्धवउवाच ॥ विदंति मर्त्याः प्रायेण विषयानूपदमापदां । तथापि भुंजते कृष्ण तत्कथंश्वखर
रजवत् ॥ ८ ॥ श्रीभगवानुवाच ॥ अहमित्यन्यथाबुद्धिप्रमत्तस्ययथाहृदि । उत्सर्पति [illegible] घोरंततो वैकारिकंमनः ॥ ९ ॥ रजो

[illegible] याप्रियानीष्टैस्त्रिपुरुषार्थैः तथापिराजसादीनू विषयानू दुःखमितिजानंतोऽपिकथंसेवंत इतिपृच्छतिविदंतीति । पदंस्थानं श्वानोयथायाम्यस्त्रीमानाद्यपि ॥ ख
[illegible] अपिखरीमनुधावंतीः अजायथानिर्लज्जाहंत्वमानीताऽ अपितद्वत् ॥ ८ ॥ मिथ्याभिनिवेशान्नभुंजत इतिमहेतुकमाह अहमितिविनिः ॥
[illegible] देहाद्यावहमिति मिथ्याबुद्धिर्हृदियथायथावदुत्सर्पति । ततोहंबुद्ध्यवैकारिकंसत्वप्रधानमपिमनः प्रतिघोरंदुःखात्मकं रजः उपसर्पतिम
नोद [illegible] ऽतिपर्यः ॥ ९ ॥ ॥

राम
६२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...मनसि सविकल्पः संकल्पः स्यात् ततश्च अहो रूपम् अहो लावण्यम् इति गुणध्यानात् दुर्भरः कामः स्यात् ॥१०॥ ततो विषयान् अतो किं कर्माणि करोति
...कः ...दुःखनिवृत्तिः स्यादित्याशंक्याह ॥ यदपीति रजस्तमोभ्यां विक्षिप्तधीः अतन्द्रितया विद्वान् विवेकी पुनर्मनो निरुंधन् न सज्जते ॥१२
...दोषदृष्ट्यापि मनोनिरोधात्कौ सुखं तन्निरोधोपायमाह ॥ अप्रमत्त इति ॥ अनिर्विण्णः अनलसः यथाकालं त्रिषवणमपि परमानंदरूपे मय्यर्पयन् समाद

२२ ध्य३

रजोयुक्तस्य मनसः संकल्पः सविकल्पकः ॥ ततः कामो गुणध्यानात् दुःसहः स्याद्धि दुर्मतेः ॥१०॥ करोति कामवशगः कर्माण्यविजितें
२ द्रियः ॥ दुःखोदर्काणि संपश्यन् रजोवेगविमोहितः ॥११॥ रजस्तमोभ्यां यदपि विद्वान्विक्षिप्तधीः पुनः ॥ अतंद्रितो मनो युंजन् दोषदृष्टिर्न ग
सज्जते ॥१२॥ अप्रमत्तोऽनुयुंजीत मनो मय्यर्पयंछनैः ॥ अनिर्विण्णो यथाकालं जितश्वासो जितासनः ॥१३॥ एतावान्योग आदिष्टो मच्छिष्यैः स
नकादिभिः ॥ सर्वतो मन आकृष्य मय्यद्धावेश्यते यथा ॥१४॥ उद्धव उवाच ॥ यदा त्वं सनकादिभ्यो येन रूपेण केशव ॥ योगमादिष्टवा
नेतद्रूपमिच्छामि वेदितुं ॥१५॥ ॥

धत्त ॥१४॥ विषयैः संग्रथितस्य मनसस्तद्वियोगेनेश्वरनिष्ठत्वमसंभावितं मन्यमानं प्रतीतिनिरूपणायेति ह सनकादिभ्य उपदिष्टवानिति ॥ यथावन्मय्यावेश्य
...स्पृष्टं पृच्छति ॥ मच्छिष्यैरित्युक्ते तेषां प्रतिभाय यस्तां मनेन रूपेण निरूपणात् स्वनवात्वदस्छतियेदेति ॥ तं कालं तदेतद्रूपं च वेदितुमिच्छामि तत्कथयेति ॥१५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
६२

मानसाः पुत्राः सूक्ष्मां दुर्ज्ञेयां । एकांतिकीं गतिं परां काष्ठां ॥१६॥ तदेवाह गुणेष्विति । विषयेषु स्वभावतो रागादिवशाच्चेतः प्रविशति तेचानुगता विषयावासनारूपेण य
चेतसि प्रविशंति अतितितीर्षोः विषयानतिक्रमितुमिच्छोः ॥१७॥ एवमिति महान्देवोपि स्वयंभूरपि भूतानां स्रष्टापि ध्यायमानः विचारयन्नपि प्रश्नस्य बीजं पदज्ञाना

श्रीभगवानुवाच ॥ पुत्रा हिरण्यगर्भस्य मानसाः सनकादयः ॥ पप्रच्छुः पितरं सूक्ष्मां योगस्यैकांतिकीं गतिं ॥१६॥ श्रीसनत्कुमार उवाच ॥ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो ॥ कथमन्योन्यसंत्यागो मुमुक्षोरतितितीर्षोः ॥१७॥ श्रीभगवानुवाच ॥ एवं पृष्टो महादेवः स्वयंभूर्भूतभावनः ॥ ध्यायमानः प्रश्नबीजं नाभ्यपद्यत कर्मधीः ॥१८॥ स मामचिंतयद्देवः प्रश्नपारतितीर्षया ॥ तस्याहं हंसरूपेण सकाशमगमं तदा ॥१९॥ दृष्ट्वा मां त उपाव्रज्य कृत्वा पादाभिवंदनं ॥ ब्रह्माणमग्रतः कृत्वा पप्रच्छुः को भवानिति ॥२०॥ इत्यहं मुनिभिः पृष्टस्तत्त्वजिज्ञासुभिस्तदा ॥ यदवोचमहं तेभ्यस्तदुद्धव निबोध मे ॥२१॥ ॥

त्वयं प्रश्नस्यैः तत्त्वाविदत । यतः कर्मविक्षिप्तधीः ॥१८॥ प्रश्नस्य पारमुत्तरमभिप्रायो वा तस्य पतितीर्षया जिज्ञासया । हंसरूपेणेति । यथाहं सो नीरक्षीरस्वपृथक्कर्तुं
[illegible] एवमहं गुणांश्चेतश्चेति विद्योतयितुं हंसरूपेणागतोस्मीति ॥१९॥२०॥ इत्यहं मुनिभिः पृष्टस्तत्त्वजिज्ञासुभिस्तदा इति पृथग्वाक्यं । यदवोचमिति च पृथक् । अतो न समन्वया राम
[illegible]ध्याहारलोपः तेभ्यो यदवोचं तन्मद्वचनं निबोध ॥२१॥ ॥ ६२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्य। हे

॥ दीविक्रात [illegible]ानेसतितन्निष्टस्यरागाद्यसंभवात्स्वयमेवविषयचेतसोविक्षेपोनभवतीतिवक्तुंप्रश्नरूपेणनमिषेणैवतावदात्मानात्मविवेकमाहवक्तेनइतित्रिभिः जु
मनोयंप्रश्नः तदुपाधेर्भूतसंघस्यवा यत्रात्मनः तद्धितस्यवक्तुः नःपरमार्थरूपस्यअनानात्मनिविदुषः वायुष्मान्नि कुतः इहत्वाः वक्तुं निमरणरूपःकथंघटेत
मे वक्तुरुत्तरदातुर्धर्मिममक आश्रयः अविशेषे आत्मनिकं जातिगुणादिविशेषमाश्रित्योत्तरंवक्ष्यामीत्यर्थः २२ भूतसंघविषयत्वेपि अयंवःप्रश्नः वाचारंभः वाचाग्रेणा

वक्तव्योयद्यनानात्वंआत्मनःप्रश्नईदृशः। कथंघटेतवोविप्रा वक्तुर्धर्मिकआश्रयः॥२२॥ पंचात्मकेषुभूतेषुसमानेषुचवस्तुतः। कोनवानितिवःप्र के
श्नोवाचारंभोह्यनर्थकः॥२३॥ मनसावचसादृष्ट्यागृह्यतेन्यैरपींद्रियैः। अहमेवनमत्तोन्यदितिबुध्यध्वमंजसा॥२४॥ ॥

रंभः यतोनर्थकः। कुतः। भूतेषुदेवमनुष्यादिदेहेषुपंचभूतात्मकेषुअतः समानेषुअनित्यत्वेषु पुनश्चवस्तुतः परमकारणात्मनाअभिन्नेषु वाचारंभणं विकारोनामधे
यंमृत्तिकेसेवसत्यमितिश्रुतेः २३ तत्रपंचात्मकंजन्मादि[illegible]सिद्धमेवेतिपरमकारणेनेदमेवोपपादयतिमनसेति मनश्चक्षुरादिनिर्यपगृह्यते तत्त्वहमेवेत्यर्थः अंजसा
तत्त्वविचारेण एतेनैवसर्वात्मकोऽहमित्यंजसाऽपुत्तरस्तुकंभवति २४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी०टी०

एवंअक्षरखंडनमिषेणैवात्मस्वरूपंसामान्यतोनिरूप्यब्रह्मणोऽपिउपरिहरंयत्स्पष्टंतत्रोत्तरमाह॥ गुणेभ्यइत्यादिना यावदध्यायसमाप्तिः॥ अयमभिप्रायः॥ यदिकर्तृत्वभो
क्तृत्वादिरूपतयाविषयैःसंग्रथितंचित्तं बुद्ध्यादिशब्दवाच्यमेवनजीवस्यस्वरूपंनचेतत्तत्त्वतः तद्वियोगेनघटेतेतस्यतुस्वरूपमद्वंद्वमेव॥ चित्ताध्यासेनतत्तत्त्वभावतया
विषयैःसंग्रथितं॥ अतःस्वस्यब्रह्मत्वज्ञानेनया विषयाणांचमिथ्यात्वानुसंधानेनसर्वतोनिर्विषयंभगवंतंभजतोनवस्यैरिपूर्णस्वरूपावस्थानमितिहेतुनाःसूत्रकाः वप
सत्वगुणेभ्युच्चेतन्यश्चाविशातिगुणमयश्चेतसि एवंगुणमयश्चेतश्चानयंग्रथितं॥ महात्मनोब्रह्मस्वरूपस्यनविसंदेहःअबद्धस्त उपाधिःनतुस्वरूपं॥ २५॥ तस्मादनी
धम

गुणेभ्याविशतेचेतोगुणाश्चेतसिचप्रजाः॥ जीवस्यदेहउभयंगुणाश्चेतोमदात्मनः॥ २५॥ गुणेषुचाविशच्चित्तमभीक्ष्णंगुणसेवया॥ गु
णाश्चचित्तप्रभवामद्रूपउभयंत्यजेत्॥ २६॥ जाग्रत्स्वप्नसुषुप्तंचगुणतोबुद्धिवृत्तयः॥ तासांविलक्षणोजीवःसाक्षित्वेनविनिश्चितः॥ २७॥

इत्यंपुनःपुनर्गुणैःपुनर्गुणसेवयात्मसंस्कारेणगुणेभ्याविशच्चित्तंतेचपुनर्वासनारूपेणचित्तेप्रकर्षेणभवंतीतितत्यजेतिगुणाश्चेतश्चएवंयदुभयंत॰न्मद्रूपःसन्नुत्स राम
सृजेत्॥ २६॥ ननुनैवयदाद्यसंभवेतःकुतःकूटस्थत्वरूपतातत्राहजाग्रत्जागरःस्वप्नःसुषुप्तंचेतिबुद्धेरेतावृत्तयः॥ तासुनस्वात्माविकारःकिंतुसतानाजागरणेविद्याऽजसामप्रमा ६२
हिंतानुविद्यावस्तमसाजीतोतुरीयविषुसत्त्यामितिवक्ष्यमाणक्रमेणगुणतएवाजीवस्यविलक्षणःतदवस्थारहितएवविनिश्चितः॥ कुतःतासांसाक्षित्वेन॥ २७॥ ॥
त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प

ननु तर्हि कथं अहं जायमीत्यादिप्रतीतिस्तत्राह यर्हीति यस्मात् सम्यक्स्मृतिः स्मरणमनयेति संसृतिर्बुद्धिः तया बंधो ऽयमात्मनो गुणवृत्तिर्द[illegible]दाति तस्मान्मयि तुर्ये स्थितः सन्निमं संसृतिबंधं जह्यात् तत्र तद्गुणचेतसां गुणानां चेतसश्चासौ त्यागो भवति २८ कथं संसृत्या बंधः कथं च तं जह्यात् तदाह अहंकारेण कृतं बंधं आत्मनः अर्थविपर्ययं आनंदाद्यावरणेनानार्थहेतुं विद्वान् ज्ञानन् निर्विद्य दुःखमेतदिति ज्ञात्वा तुर्ये स्थितो भूत्वा संसारचिंतां संसारो ऽस्तीति बुद्धिः तस्मिन् चिंताम् अभिमानं तत्कृतां गे

यर्हि संसृतिबंधो ऽयमात्मनो गुणवृत्तिदः ॥ मयि तुर्ये स्थितो जह्यात्त्यागस्तद्गुणचेतसां ॥ २८ ॥ अहंकारकृतं बंधमात्मनो ऽर्थविपर्ययं ॥ विद्वान्निर्विद्य संसारचिंतां तुर्ये स्थितस्त्यजेत् ॥ २९ ॥ यावन्नानार्थधीः पुंसो न निवर्तेत युक्तिभिः ॥ जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा ॥ ३० ॥ असत्त्वादात्मनो ऽन्येषां भावानां तत्कृता भिदा ॥ गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ॥ ३१ ॥

प्रा॰

गर्वितां च त्यजेदिति २९ यावदेवं न त्यजेत्तावदस्य कर्मज्ञानादि सर्वमप्यर्थमित्याह यावदिति यद्यपि जागर्ति किं मदिष्टं तथापि स्वपन् स्वप्नान् पश्यन्निव भवति यतो ऽज्ञः असम्यग्दर्शी अज्ञजागरस्य स्वप्नत्वे दृष्टांतः स्वप्न इति ३० ननु कथं वेदप्रमितवर्णाश्रमकर्मादिना बाधो निवर्तेत तत्राह असत्त्वादिति भावानां देहादीनां तत्कृता भिदा वर्णाश्रमादिरूपा गतयः स्वर्गादिफलानि हेतवः कर्माणि चास्यात्मनो मृषा अविद्याविषयो वेद इति भावः ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा॰उ॰ ६४

युक्तिनिरस्तमुक्तं ता एव युक्तीराह । यइति । अर्थात् स्थूलान् देहादीन् समस्तकरणैः चक्षुरादिभिः भुंक्ते । यकयंनतान् । अनुवृत्तएव धर्मिणः क्षणिकबाल्यतारुण्यादिधर्मेषु
तः । यश्च स्वप्ने हृदिस्थमरहतष्ट् सूक्ष्मान् वसनामयान् भुंक्ते । यश्च सुषुप्ते तान् सर्वानुपसंहरति स एकः । कुतः त्रिगुणएव त्रिहेतुकत्ववस्थात्रयद्रष्टा । ननु जाग्रदवस्थायां सर्वेंद्रि
पु याणि प्रवर्तंति । स्वप्ने मनः सुप्तितसंस्कारशेषा बुद्धिः कथमात्मा तु द्रष्टा तत्राह । इंद्रियेत्राः । ननु इंद्रियेत्रा अपि विश्वतैजसप्राज्ञाभिन्नाः । न । कुतः स्मृत्याप्रतिसंधान
नत्सर्वावस्थासु अनुयात यः साप्यानभूतं । यश्च तदनंतरं न किंचिदवेदिषं । सएवतएतर्हि जागर्मीति । उपाधिभेदेन विश्वादिव्यवहारइतिभावः । एतेन बाल्ययुवाद्यवस्था

योजागरे बहिरनुस्तएधर्मिणो यन्निर्भुंक्ते समस्तकरणैर्हृदित स दृष्टान् । स्वप्ने सुषुप्त उपसंहरते स एकः स्मृत्यन्वयात् त्रिगुणहृ त्रि
हगिंद्रियेत्राः ३२ । एवं विमृश्य पूणगेगनसत्त्ववस्थामन्वायया मपिहनाशृनीनिश्चिता थाः । संछिद्य हार्दमनुमानसयुक्तितीक्ष्ण
ज्ञानासिना तजतमाखिलसंशयाधि ३३ ॥

सप्रतिसंधानेनात्मैकं दृष्टयं ३२ । ततः किंभूतः अहमेवमिति त्रिगुणतो जाग्रदाएतामनसर्वं अवस्थाः ताः मूढविद्यया मपिहतानतस्तुतः संतीति निश्चितस्यात्मरू
पधीयैःतेषुयंस्युरखिलसंचायायानामाधिश्चाधीयंते अस्मिन्निस्माधिरहंकारः तं संछिद्य हार्दं हृदि स्थितं मांनजतः केन छित्वा तदाह अनुमानैः सद्युक्तिभिः सतामुपदेशैः ६४
श्रुतिनिश्चितो हृष्णेन ज्ञानखड्गेन ३३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुमानानिदर्शयति ईक्षितेति। इदंजगत्विचित्रमभीक्षितं तच्चहेतुत्वामूनोविजृंभितत्वात् दृष्टत्वात्विनाशित्वाच्चस्वप्नवत् अस्थिरंचलत्वात्अलातचक्रवत्। ननु
मात्रापि निर्विषयः कथंस्यात्तत्राह विज्ञानमिति। निगमनंतस्माद्विधयोऽयंगुणपरिणामकृतो विकल्पो भेदः समायोति ३४ तस्मा... तो हृदया दृष्टिंप्रतिनिव
र्तितसुखानुभवी भवेत्। तन्नैष्कर्म्यार्थं चनिवृत्तरम्भः तूष्णीं निरीहश्च भवेत्। मनोवाक्कायव्यापाररहित इत्यर्थः। ननुदेहवतः सर्वथा द्वैतदृष्टिप्रतिनिवर्त्तनायोग्या

ईक्षितं विचित्रमिदं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रं ॥ विज्ञानमेकमुरुधेव विभाति मायास्वप्नस्त्रिधा गुणविसर्गकृतो
विकल्पः ॥ ३४ ॥ दृष्टिं ततः प्रतिनिवर्त्य निवृत्ततृष्णस्तूष्णीं भवेन्निजसुखानुभवो निरीहः ॥ संदृश्यते क्व च यदीदमवस्तुबुध्या त्यक्तं भ्रमा
य न भवेत्स्मृतिरानिपातात् ॥ ३५ ॥ देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपं दैवादुपेतमुत दैववशाद
पेतं वासो यथा परिकृतं मदिरामदांधः ॥ ३६ ॥

पुनः संसारः स्यादेवतत्राह संदृश्यत इति। क्वचिदाहारपकाद्यादिषु यद्यपीदं संदृश्यते तथापि पूर्वमवस्तुबुध्यात्यक्तं तत्पुनर्मोहाय न भवेत् किंतु देहपातप
र्यंतं स्मृतिरिव स्मृतिः। संस्कारमात्रेणाभासो भवेदित्यर्थः। एतदेवोपपादयति देहमिति। अस्मन्वा उत्थितं उत्थायतत्रैवस्थितं तत्र क्वचिद्यतं निर्गतं पु
नरस्त्रैवोपेतं वा देहमपिनानुसंदधत्येकृतोन्मत् यतः येनदेहेनस्वरूपमध्यगमत् प्राप्तवानू तदेहं। यतः कारणादितिवा। परिकृतं परिहितंवा
सोगतं स्थितं वा यथा न वेत्ति तद्वत् ॥ ३६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु वपुः परिपाल्यमानोपि मुमूर्षति तं चेन्न पश्यति तर्हि पतेदेव नेत्याह देहोपीति दैववशेन गच्छन् स्वारंभकं कर्म यावदस्ति तावत्पर्यंतं प्रतिसमीक्षत एव जी
वन्नेव सासुः प्राणेंद्रियसहितः ननु न हि तस्मिन् कदाचित्सक्तः तापि नेत्याह तमिति स्वाप्नं स्वप्नतुल्यं अधिरूढः प्राप्तः समाधिपर्यंतो योगो येन अतएव प्र
तिबुद्धं ज्ञातं परमार्थवस्तु येन सः तथा च श्रुतिः तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति ॥३७॥ उक्तार्थे तेषां विश्वासार्थं स्वरूपमाह मयेति
सांख्यमात्मानात्मविवेकः योगोऽष्टांगस्तयोः गुह्यं रहस्यं यज्ञं विष्णुं युष्मद्धर्मविवक्षया युष्मभ्यं धर्ममुपदिष्टुं आगतं इति ज्ञेयं अतएव यत्नेन हंसरूपेण

देहोपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः । तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रति
बुद्धवस्तुः ॥३७॥ मयैतदुक्तं वो विप्रा गुह्यं यत्सांख्ययोगयोः । जानीत माऽऽगतं यज्ञं युष्मद्धर्मविवक्षया ॥३८॥ अहं योगस्य सांख्यस्य स
त्यस्यर्तस्य तेजसः । परायणं द्विजश्रेष्ठाः श्रियः कीर्तेर्दमस्य च ॥३९॥ मां भजंति गुणाः सर्वे निर्गुणं निरपेक्षकं । सुहृदं प्रियमात्मानं साम्या
संगादयो गुणाः ॥४०॥ इति मे छिन्नसंदेहा मुनयः सनकादयः । सभाजयित्वा परया भक्त्याऽगृणत संस्तवैः ॥४१॥ तैरहं पूजितः सम्यक्सं
स्तुतः परमर्षिभिः । प्रत्येयाय स्वकं धाम पश्यतः परमेष्ठिनः ॥४२॥ इति श्रीभागवते महापुराणे एकादशस्कंधे त्रयोदशोऽध्यायः ॥

...स्माह्नमाधवेस्मनुवादो न विष्णपति ॥३८॥ ऋतं प्रमा(ती)यमाणो धर्मः सत्यं सम्यगनुष्ठाय मानो धर्मः तेजः प्रभावः एतेषां परमयनं ॥३९॥ किंच मामिति कुथं
हृता अप्यगुणाः गुणपरिणामरूपान्न भवंति किंतु नित्या इत्यर्थः ॥४०॥ मे मया अगृणत मां तुष्टुवुः ॥४१॥ प्रत्येयाय प्रत्यागमोऽस्मि ॥४२॥ इति एकादशे त्रयोद
शः



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्दशे परं श्रेयो भक्तिरेव न चेतरत् । इत्येतद्वर्ण्यते ध्यानयोगश्च सह साधनैः । एवं तावद्भगवतोनन्यामोक्ष इत्युक्तं । अन्ये त्वन्यानि साधनानि वदंति तत्र विशे-
ष निर्धारणार्थं पृच्छति । श्रेयांसि श्रेयःसाधनानि । किं विकल्पेन प्राधान्यमुताहो किंवा एकस्यैव मुख्यताया एकमुख्यतापक्षेप्यन्यानेकारणं नवनेति । अन्यत्र पेक्षितं च
पेक्षायामिन्नयः स्वहेतुकः । अयमर्थः । भवतायो भक्तियोगउक्तः अन्ये च यानि श्रेयःसाधनानि वदंति तेषां किं साक्षात्फलसाधनत्वेन प्राधान्यमेव सर्वेषां उत

उद्धव उवाच । वदंति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः । तेषां विकल्पप्राधान्यमुताहो एकमुख्यता । भवतोदाहृतः स्वामिन्भक्तियोगो-
नपेक्षितः । निरस्य सर्वतः संगं येन त्वय्याविशेन्मनः ॥ २ ॥ श्रीभगवानुवाच । कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता । मयादौ ब्रह्मणे
प्रोक्ता धर्मो यस्यां मदात्मकः ॥ ३ ॥ तेन प्रोक्ता स्वपुत्राय मनवे पूर्वजाय सा । ततो भृग्वादयोगृह्णन्सप्त ब्रह्ममहर्षयः ॥ ४ ॥ तेभ्यः पितृभ्यस्तत्सु-
ता देवदानवगुह्यकाः । मनुष्याः सिद्धगंधर्वाः सविद्याधरचारणाः ॥ ५ ॥

तंतां गतिं प्राधान्ये । अपि किं विकल्पेन सर्वेषां तुल्यफलत्वं यथा काश्चिदतित्ति विशेषयन्ति । १ । भक्तभक्तिरेव महाफलत्वेन मुख्या अन्यानि तु स्वस्वप्रकृत्यनुसारे-
ण पुष्पस्थानीयस्वर्गादिफलत्वबुद्धिभिः प्राधान्येन परिकल्पितानि तुच्छकफलानीति विवेकं प्रकृत्यनुसारेण बहुधा वेदार्थप्रतिपत्तिमाह कालेनेति नैसप्त
तिः मदात्मकं यस्मिं वा मच्चित्तं येन सः ॥ ३ ॥ भृग्वादयः भृगुर्मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुरित्येते च सप्त ब्रह्माणः प्रजापतयः तेजाते महर्षयश्च
॥ ४ ॥ ५ ॥

किंदेवाः कुमसेदद्वौ गंधर्वादिराहित्येन किंदेवाः मनुष्यावेतिसंदेहास्पदभूताः द्वीपांतरमनुष्याः ३ एवं किंनराः किंचिन्नरएवमु[illegible]ख तः शरीरतो वा किंपु
रुषाः किंचित्पुरुषा इव वानरादयः प्रकृतयः वासनाबुध्य [illegible]कृतः रजः सत्वतमांसित्रुवः जन्मस्थानानियामोताः द्द भूतानि देवासुरमनुष्यादीनि विचावान
वेदार्थव्याख्यानविषयाः ७ एवमित्युक्तोपसंहारः केषांचिदध्ययनादिशून्यानामप्युपदेशपारंपर्येण अपरेषां पाषंडमतयः वेदविरुद्धार्थमतयः ५ तत्पुरु
तीनां मायागुणमूलत्वान्मन्मायया मोहितधियः अनेकांतं नानाविधं ए तदेवाह धर्ममिति निसाहेन धर्मं कर्ममीमांसकाः । तदुक्तं । मोक्षार्थी न प्रवर्तेत

किंदेवाः किंनरा नागा रक्षः किंपुरुषादयः बह्व्यस्तेषां प्रकृतयो रजः सत्वतमोभुवः द्द याभिर्भूतानि भिद्यंते भूतानां मतयस्तथा यथाप्रकृति प्र
सर्वेषां चित्रा वाचः स्रवंति हि ९ एवं प्रकृतिवैचित्र्याद्भिद्यंते मतयो नृणां पारंपर्येण केषांचित्पाषंडमतयोपरे ० मन्मायामोहितधियः पु
रुषाः पुरुषर्षभ श्रेयो वदंत्यनेकांतं यथाकर्म यथारुचि ए धर्ममेके यशश्चान्ये कामं सत्यं दमं शमं अन्ये वदंति स्वार्थं वा ऐश्वर्यं त्यागभोज
नं केचि द्यज्ञतपोदानं व्रतानि नियमान्यमान् १० ॥

तत्र कार्म्य निषिद्धयो नित्यनैमित्तिके कुर्यात्स्वप्रत्यवायहानिस्तप्रेप्सा रिपुद्वाः काव्यालंकारकृतं यथाहुः यावत्कीर्तिर्मनुष्यस्य पुण्या लोकेषु गीयते तावद्
वर्ष[illegible]णि स्व[illegible]लोके महीयत इति कामं वात्स्यायनादयः सत्यं दमं च योगशास्त्रकृतः अन्ये दृष्टा धर्वादिनो दंडनीतिकृतः वेदान्तिनोऽपि ऐश्वर्यमेव स्वार्थं ९९
पुरुषार्थं वदंति अतः सामाद्युपाया एव श्रेयःसाधनमिति तेषां मतं तथैव त्यागं भोजनं च लोकायतिकाः यज्ञतपोदानं परोदेवतानां पूजनं तपश्चरणं च
॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषां तुच्छफलत्वमाह आद्यंतवंत इति एषां लोकाः एतैः साध्यानि फलानि तमोनिष्ठा मोहावसानाः भोगकालेऽप्यसूयादिभिः शुचार्पिताः व्याप्ताः ११ नन्वेवं सुखं तु मा
हमयीति यावत्सैश्च मा ति हे सम्यक् मया परमानंदरूपेण आत्मना स्वरूपेणैव स्फुरता १२ किंच अन्येषां [illegible] ब्रह्मलोकादिपरिछिन्नं सुखं नकस्मात्तु परिपूर्णमित्या
हाक [illegible] किंचनस्येति १३ परिपूर्णतामेवाह न पारमेष्ठ्यं इति रसाधिपत्यं पातालादिस्वाम्यं अपुनर्भवं मोक्षमपि मद्विना मादित्वा अन्यन्नेच्छति अहमेव तस्य इष्ट इत्य

आद्यंतवंत एवैषां लोकाः कर्मविनिर्मिताः ॥ दुःखोदर्कास्तमोनिष्ठाः क्षुद्रानंदाः शुचार्पिताः ११ मय्यर्पितात्मनः सभ्य निरपेक्षस्य सर्वतः म
यात्मना सुखं यत्तत्कुतः स्याद्विषयात्मनां १२ अकिंचनस्य दांतस्य शांतस्य समचेतसः मया संतुष्टमनसः सर्वाः सुखमया दिशः १३
न पारमेष्ठ्यं न महेंद्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यं न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत् १४ न तथा मे प्रियतम
आत्मयोनिर्न शंकरः न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान् १५ निरपेक्षं मुनिं शांतं निर्वैरं समदर्शनं अनुव्रजाम्यहं नित्यं
पूयेयेत्यंघ्रिरेणुभिः १६ ॥

१२८॥
यस्य मयापि स एव प्रेष्ठ इत्याह न तथेति द्वाभ्यां आत्मयोनिर्ब्रह्मा पुत्रोऽपि शंकरो मत्स्वरूपभूतोऽपि संकर्षणः भ्रातापि श्रीर्भार्यापि आत्मा मूर्तिरपि ॥ य
था भवान् इति कर्षेण इति हर्षेण इत्थं भवानिति १५ पूयेयमदंतर्वर्त्तिब्रह्मांडानि पवित्रीकरिष्यामि इति भावेनेत्यर्थः १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच मद्भक्तानां सुखं एतावदेवंभूतमिति वा को वक्तुं समर्थः। यतस्तत्स्वसंवेद्यं निरूपममित्याह निःकिंचना इति मद्गतः। निरहंमाना॥ अनालब्धधियः अ
स्पृष्टचित्ताः। निःकिंचनत्वादीनां परस्परं हेतुहेतुमद्भावः एवंभूताः मम मदीयाः यत्सुखं जुषंति मे वा तत्सुखं न एव विदुः लभंते नान्ये कुतः नैरपेक्ष्यं नास्ति अपेक्षा ए
यये षां ते निरपेक्षाः तेषां भावं न तु मोक्षापेक्षा रपीत्यर्थः प्रकाः एवंभूताः संतो ये मम मामित्यर्थः जुषंते प्रेम्णा तेन एव परं नैर पेक्षं सुखं तद्विदुः न तु अन्ये इत्यन्वयः॥
१७॥ अपि च आस्तां तावत् उत्तम भक्त कथा यतः प्राकृतो पि भक्तः उत्तम एवेत्याह बाध्यमानो ऽपि इति द्वाभ्यां विषयैराकृष्यमाणोपि प्रागल्भ्या समर्थया॥

निःकिंचना मय्यनुरक्तचेतसः शांता महांतो ऽखिलजीववत्सलाः। कामैरनालब्धधियो जुषंति ते यन्नैरपेक्ष्यं न विदुः सुखं मम॥ १७
बाध्यमानो ऽपि मद्भक्तो विषयैरजितेंद्रियः। प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते॥ १८॥ यथाग्निः सुसमिद्धार्चिः करोत्येधांसि
भस्मसात्। तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः॥ १९॥ न साधयति मां योगो न सांख्यं धर्म उद्धव। न स्वाध्यायस्तपस्त्यागो यथा भक्ति
र्ममोर्जिता॥ २०॥ भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सतां। भक्तिः पुनाति मन्निष्ठा श्वपाकानपि संभवात्॥ २१॥ धर्मः सत्यदयो
पेतो विद्या वा तपसान्विता। मद्भक्त्यापेतमात्मानं न सम्यक् प्रपुनाति हि॥ २२॥ ॥

१८॥ पाकार्थं प्रज्वालितो ऽप्यग्निर्यथा काष्ठानि भस्मीकरोति तथा रागादिना ऽपि कथंचिन्मद्विषया भक्तिः समस्तपापानीति। भगवानपि स्वभक्तिमहिमाश्चर्ये
ण संबोधयति अहो उद्धव विस्मयं शृणु इति। १९। अत एवंभूतं श्रेयो नान्यदस्तीत्याह न साधयतीति द्वाभ्यां। २०। श्रद्धयात्न किं स्वया। संभवात् जातिदोषाद
पीत्यर्थः॥ २१॥ न केवलं भक्त्यभावे ऽन्यत्साधनं व्यर्थमित्याह धर्म इति। २२॥ ॥

राम
६७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोमहर्षादिकं विनाकथंनकिर्गम्यते। नत्याच विनाकथमाशयःशुध्येत्। २३ किंच। नकिःस्वाश्रयंशोधयतीति किंवक्तव्यं यतोगद्गदवागादिलक्षणोमद्भक्तियु
क्तोऽलंकंसर्वंपुनातीत्याहवागिति। २४ अपिच नकेवलमशुद्धिनिवृत्तिरपि तु महदृष्टांतमाहयथेति। यथाग्निना ध्मातंतापितमेवहेमसुवर्णंअंतर्मलंजहातिनत्वा
लनादिभिः। स्वंनिजंरूपंचभजते कर्मानुशयंकर्मवासनां मांभजते मद्रूपतामापद्यते। २५ ननु ब्रह्मविदोब्रह्मापि परंतमेवविदित्वातिमृत्युमेतिनान्यादिश्रुतिभ्योज्ञाना

कथंविनारोमहर्षंद्रवताचेतसाविना। विनानंदाश्रुकलयाशुध्येत्भक्त्याविनाशयः। २३ वाग्गद्गदाद्रवते यस्यचित्तंरुदत्यभीक्ष्णंहस
तिक्वचिच्च। विलज्जउद्गायतिनृत्यतेच मद्भक्तियुक्तोभुवनंपुनाति। २४ यथाग्निनाहेममलंजहातिध्मातंपुनःस्वंभजतेचरूपं
आत्माचकर्मानुशयंविधूयमद्भक्तियोगेनभजत्यथोमां। २५ यथायथात्मापरिमृज्यतेसौमत्पुण्यगाथाश्रवणाभिधानैः। त
थातथापश्यतिवस्तुसूक्ष्मंच [illegible] क्षुर्यथैवांजनसंप्रयुक्तं। २६ विषयान्ध्यायतश्चित्तंविषयेषुविषज्जते मामनुस्मरतश्चि
त्तंमय्येवप्रविलीयते। २७ ।।

देवाविद्यानिवृत्त्यात्माप्तिर्गम्यते कुतोभक्तियोगेनेत्युच्यते तत्राह यथायथेति। आत्माचित्तंपरिमृज्यतेशोध्यते मत्पुण्यकथानांश्रवणैरभिधानैश्च
तत्तैरेवांतरमापरोक्षज्ञानंनप्रपद्यत इत्यर्थः। २६ किंच ज्ञानंनामचित्तस्यमदाकारपरिणामःसचमांभजतःस्वभावतएवभवतिनचप्रत्यांतरमपेक्षतइतिसदृष्टां
तमाह विषयानिति। २७ ।।



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ए०भा०
६८

यस्मादन्यत्साधनं तत्फलं च स्वप्नमनोरथवदसदभिध्यानमात्रं तस्मात्तद्विहाय मय्येव मनः समाहितं कुर्विति प्रकरणार्थमुपसंहरति तस्मादिति मद्भाव नाभावितं मद्भक्त्या भजनेनैव संशोधितं ॥२८॥ विशेषतो वात्स्यायनादिकृतकामशास्त्रगतिः परित्याज्या इत्याह स्त्रीणामिति ॥ आत्मवान्धीरः सन् ॥ क्षेमे निर्भये देशे विविक्ते विजने ॥२९॥ एतदुपपादयति न तथेति ॥ अस्य पुंसः यथा तत्संगिसंगतः क्लेशो न भवेत् यथा च बंधो योषित्संगतः तथान्यप्रसंगतो न भवेदिति ॥३०॥

तस्मादसदभिध्यानं यथा स्वप्नमनोरथं ॥ हित्वा मयि समाधत्स्व मनो मद्भावभावितं ॥२८॥ स्त्रीणां स्त्रीसंगिनां संगं त्यक्त्वा दूरत आत्मवान् ॥ क्षेमे विविक्त आसीनश्चिंतयेन्मामतंद्रितः ॥२९॥ न तथास्य भवेत्क्लेशो बंधश्चान्यप्रसंगतः ॥ योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ॥३०॥ उद्धव उवाच ॥ यथा त्वामरविंदाक्ष यादृशं वा यदात्मकं ॥ ध्यायेन्मुमुक्षुरेतन्मे ध्यानं मे वक्तुमर्हसि ॥३१॥

मामित्युक्तं तत्प्रकारं पृच्छति ॥ यथेति ध्यानांगप्रश्नः ॥ यादृशमिति ध्येयविशेषणांगप्रश्नः ॥ यदात्मकमिति यस्यैतानि विशेषणानि तत्स्वरूपप्रश्नः ॥ एतन्मे ध्यानं मे वक्तुमर्हसीति पाठः ॥ तत्रायमर्थः ॥ मुमुक्षुस्त्वां यथा ध्यायेत् ॥ तन्मे वक्तुमर्हसि ॥ इति जिज्ञासोः कथनाय ॥ मे पुनरेतत्त्वद्दास्यमेव पुरुषार्थः ॥ न तु ध्यानेन कृत्यमस्तीति ॥ तदुक्तं त्वयोपयुक्तस्रग्गंधेत्यादि ॥ तं वक्तुमर्हसीति पाठस्तु सुगमः ॥३१॥ ॥ ६८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰व्या॰

तत्र ध्यानांगत्वेनासनप्राणायामप्रकारमाह समेति चतुर्भिः समेनासुस्थितेनातिनीचेनासने कंबलादौ समकायः सम्यग्यथासुखमासीत इति नास्ति स्वस्तिका
दिनियमः सुखं नासाग्रनिरीक्षणं चचित्तस्थैर्याय अंतर्दृष्टिर्बहिर्दृष्टिः स्थिरचित्तः सुसंयत इति योगशास्त्रोक्तेः ३३ विपर्ययेणेरेचकपूरककुंभकक्रमेणाणि
या। यथा वामनाड्यापूरितं दक्षिणेन त्यजेत् तथा वापूरितं वामयेत्येवं विपर्ययेण यथोक्तं योगे इडया पूरयेद्वायुं त्यजेत्पिंगलया तत इति निर्जितेंद्रिय इति प्रत्याहा
र उक्तः ३३ प्राणायामो द्विविधः सगर्भोऽगर्भश्चेति तत्र श्रेष्ठत्वात् सगर्भमाह हृदीति द्वाभ्याम् मूलाधारादारभ्याविच्छिन्नं संततं घंटानादतुल्यमोंकारं हृ

श्रीभगवानुवाच समं आसनमासीनः समकायो यथासुखं हस्तावुत्संगे आधाय स्वनासाग्रकृतेक्षणः ३२ प्राणस्य शोधयेन्मा
र्गं पूरकुंभकरेचकैः विपर्ययेणापि शनैः प्रयसेन्निर्जितेंद्रियः ३३ हृद्यविच्छिन्नमोंकारं घंटानादं बिसोर्णवत् प्राणेनोदीर्य तत्राथ
पुनः संवेशयेत्स्वरं ३४ एवं प्रणवसंयुक्तं प्राणमेव समभ्यसेत् दशकृत्वस्त्रिषवणं मासादर्वाग्जितानिलः ३५ ॥

सा
सा

दि संततं प्राणेन उर्ध्वमुदीर्य द्वादशांतपर्यंतं नीत्वा कथं बिसोर्णवत् कमलनालवत्तंतुवत् तत्र मात्रावति स्वरं पंचदशं बिंदुं संवेशयेत् अथ पुनरित्यस्य तं च पि
बिंदुशिरस्कं कुर्यादित्यर्थः यद्वा मूलाधारादारभ्य हृत्पर्यंतं बिसतंतुवत्सूक्ष्ममविच्छिन्नं संततं हृदि मनसि प्राणेनोदीर्य निक्षेपत्र अथ पुनस्तत्रोंकारे
घंटानादतुल्यं स्वरं द्वादशांतनादं शिरो कुर्यादिति ३४ मासादर्वाक् जितानिलो भवति ३५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०९०

एवं ध्यानांग सुस्त्रकायाद्दशामिस्तस्योत्तरं वक्तुं ध्येयं पीवमाह हृत्पुंडरीकमिति सार्धेन ॥ सूत्रं तस्य देहांतर्वर्ति ॥ ऊर्द्ध्वनालमधोमुखं स्त्रुकलितं च हृत्कदलीपुष्पसं
काशं पद्मस्त्रितद्विपरीतं ध्यात्वेत्यर्थः । न्यसेत्तु चिंतयेत् ॥ ३६ ॥ सविशेषणं ध्यानमाह वह्निमध्य इति षड्भिः ॥ ध्यानमंगलं ध्यानस्य प्रशस्तं विषयं ॥ सम्यक्त्वनुरूपावयवं

हृत्पुंडरीकमंतस्थमूर्ध्वनालमधोमुखं ॥ ध्यात्वोर्ध्वमुखमुन्निद्रमष्टपत्रं केसरैर्युतं ॥ कर्णिकायां न्यसेत्सूर्यसोमाग्नीनुत्तरोत्तरं ॥ ३६ ॥ व
ह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमंगलं ॥ समं प्रशांतं सुमुखं दीर्घचारुचतुर्भुजं ॥ ३७ ॥ सुचारुसुंदरग्रीवं सुकपोलं शुचिस्मितं ॥ समानक
र्णविन्यस्तस्फुरन्मकरकुंडलं ॥ ३८ ॥ हेमांबरं घनश्यामं श्रीवत्सश्रीनिकेतनं ॥ शंखचक्रगदापद्मवनमालाविभूषितं ॥ ३९ ॥ नूपुरैर्विल
सत्पादं कौस्तुभप्रभया युतं ॥ द्युमत्किरीटकटककटिसूत्रांगदायुतं ॥ ४० ॥ सर्वांगसुंदरं हृद्यं प्रसादसुमुखेक्षणं ॥ सुकुमारमभिध्या
येत्सर्वांगेषु मनो दधत् ॥ ४१ ॥ ॥

दीर्घाश्चारवश्चत्वारो भुजा यस्मिन् तत् ॥ ३७ ॥ सुचारु अतिरम्यं समानयोः कर्णयोर्विन्यस्ते स्फुरती मकराकारे कुंडले यस्मिन् तत् ॥ ३८ ॥ श्रीवत्सश्रियो निकेतनं व
क्षसि दक्षिणवामतश्च [illegible]लाभ्यां युक्तमित्यर्थः ॥ ३९ ॥ द्युमद्भिः किरीटादिभिः ॥ आसमंताद्युक्तं अलंकृतं ॥ ४० ॥ प्रसादेन शोभनं सुमुखे ईक्षणे च यस्मिन् तत् सुकुमा
रमतिकोमलं ॥ ४१ ॥ ६९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सकुमारेअ
तिकामलं

सविशेषणं ध्यानमुपसंहरति इंद्रियाणीति त्रिभिः कर्षणेनयेत् सर्वतः सर्वांगयुक्ते ॥ ४२ ॥ यादृशामित्यस्योत्तरत्वेन सविशेषणमुक्त्वा यदात्मकमित्यस्योत्तरत्वेनाह नैर्विशे
षण्यं त्यागेन ध्यानमेव समाधिपर्यंतमाह अमितित्रिभिः ॥ एकत्रांगे ॥ अन्यान्यंगानि न चिंतयेत् ॥ एकत्रेति यदुक्तं तदेवांगं दर्शयति सुस्मितमिति ॥ ४३ ॥ व्योम्निकार
णरूपे ॥ तच्च कारणत्वमपि सक्त्वा मदारोहः मयि प्रारूढः ब्रह्मरूपारूढः सन् न किंचिद्ध्यातृध्येयविभागमपि न चिंतयेत् ॥ ४४ ॥ मामेवात्मानं विचष्टे आत्मानं सर्वात्मि

इंद्रियाणींद्रियार्थेभ्यो मनसाकृष्य तन्मनः ॥ बुद्ध्या सारथिना धीरः प्रणयेन्मयि सर्वतः ॥ ४२ ॥ तत्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत् ॥ नान्या
नि चिंतयेद्भूयः सुस्मितं भावयेन्मुखं ॥ ४३ ॥ तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत् ॥ तच्च त्यक्त्वा मदारोहो न किंचिदपि चिंतयेत् ॥ ४४ ॥ ए
वं समाहितमतिर्मामेवात्मानमात्मनि ॥ विचष्टे मयि सर्वात्मन् ज्योतिर्ज्योतिषि संयुतं ॥ ४५ ॥ ध्यानेनेत्थं सुतीव्रेण युंजतो योगिनो मनः ॥ संया
स्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमः ॥ ४६ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे चतुर्दशोऽध्यायः ॥ ॥ १ ॥

त्मनि मयि संयुतं विचष्टे ॥ ज्योतिर्ज्योतिषि संयुक्तमिवेत्यन्वयः ॥ ४५ ॥ एवंभूतसमाधिपर्यंतध्यानस्य फलमाह ध्यानेनेति ॥ मनो युंजतः समादधतः ॥ द्रव्यज्ञानक्रियाभ्रमः
अधिभूताधिदैवाध्यात्मरूपः द्रव्यपदः सद्दशनिरूपो भ्रमः ॥ निर्वाणं शांतिं सम्यग्यास्यतीति ॥ ४६ ॥ ॥ इति एकादशे चतुर्दशोऽध्यायः ॥ १४ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः पंचदशे प्रोक्ताः सिद्धयो धारणानुगाः श्रीविष्णुपदसंप्राप्तावंतरायतया मताः ॥ एवं मनो युंजतो योगिनोऽतरविनिर्वित्यः सिद्धयोप्यंतरायप्राया एव अतस्ताः
परित्यज्य परमेश्वरपर एव भवेदिति वक्तुं सिद्धिराह जितेंद्रियस्येति युक्तस्य स्थिरचित्तस्य ॥१॥ का स्विदिति वितर्के का स्वित् किंनामा कथं स्वित् कीदृशी वा धारणा अस्य

श्रीभगवानुवाच ॥ जितेंद्रियस्य युक्तस्य जितश्वासस्य योगिनः ॥ मयि धारयतश्चेत उपतिष्ठंति सिद्धयः ॥१॥ उद्धव उवाच ॥ कया धारणया
का स्वित्कथं स्वित्किं सिद्धिरच्युत ॥ कति वा सिद्धयो ब्रूहि योगिनां सिद्धिदो भवान् ॥२॥ श्रीभगवानुवाच ॥ सिद्धयोऽष्टादश प्रोक्ता धारणा योगपारगै
ः॥ तासामष्टौ मत्प्रधाना दशैव गुणहेतवः ॥३॥ ॥

कतीति प्रश्नांतरं वा आह त्वमेवैतज्ज्ञातासि नान्य इत्याशयेनाह योगिनामिति ॥२॥ धारणाश्च अष्टादशोऽसनुषंगः ॥ योगपारगैरिति त्रिकालत्वादिक्षुद्रसिद्धी ७०
र[illegible] पि जानंतीति भावः अहमेव प्रधानं मुख्यः स्वभावतश्च आश्रयो यासां ताः मत्सारूप्यं प्राप्तेषु किंचिन्न्यूना न भवंतीति भावः ॥ गुणहेतवः सत्त्वोत्कर्षहेतुकाः
॥३॥

ताःस्वरूपेणोपदिशति अणिमेति सार्द्धैः पंचभिः अणिमा महिमा लघिमा च मूर्तेर्देहस्यैव सिद्धयः प्राप्तिर्नामसिद्धिः सर्वप्राणिनामिंद्रियैः सह तत्तदधिष्ठात् नो
देवतारूपेण संबंध इत्यर्थः श्रुतेषु पारलौकिकेषु दृष्टेषु दर्शनीयेष्वपि सर्वेषु भूविवरादिपिहितेष्वपि प्राकाम्यं भोगदर्शनसामर्थ्यं सिद्धिः शक्तीनां मायांत
र्भूतानां प्रेरणं तत्परमेश्वरे मायायाः अन्येषु तदंशानां प्रेरणं ईशिता नाम सिद्धिः ४ विषयभोगेष्वसंगो वशिता नाम सिद्धिः यत्कामः यद्यत्सुखं कामयते तत्तद

अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिंद्रियैः। प्राकाम्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता ॥ ४ ॥ गुणेष्वसंगो वशिता यत्कामस्तदवस्यति ॥ एता
मे सिद्धयः सौम्य अष्टावौत्पत्तिकीमताः ॥ ५ ॥ अनूर्मिमत्वं देहेस्मिन् दूरश्रवणदर्शनं ॥ मनोजवः कामरूपं परकायप्रवेशनं ॥ ६ ॥ स्वछंदमृत्यु
र्देवानां सहक्रीडानुदर्शनं ॥ यथासंकल्पसंसिद्धिराज्ञाप्रतिहतागतिः ॥ ७ ॥ ॥

वसति तस्य तस्य सीमानं प्राप्नोतीति सिद्धिः औत्पत्तिकीः स्वाभाविकी निरतिशया इत्यर्थः ५ गुणहेतूः सिद्धीराह अनूर्मिमत्वं क्षुत्पिपासादिरहितं दूरश्रवणं
दर्शनं चेति द्वे सिद्धी मनोवेगेन देहस्य गतिः कामतरूपप्राप्तिः परकायप्रवेशः ६ स्वेच्छामृत्युः अप्सरोभिः सह देवानां याः क्रीडास्तासामनुदर्शनं प्राप्तिः संकल्पानुरू
पप्राप्तिः अप्रतिहताया आज्ञा समंतात् नियस्याः सा आज्ञा चेत्येता दश ॥ ७ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नान्ए० ७१ तृइसिद्धीश्चपंचाह त्रिकालज्ञत्वमिति अद्वंद्वं शीतोष्णाद्यनभिभवः अग्न्यादीनां संस्तंभनं ८ तत्र धारणाभिः सह विशेषतो निरूपयति यथेति यावत्समाप्ति
भूतसूक्ष्मोपाधौ मयि तन्मात्रं भूतसूक्ष्माकारं उपासीत यः स तन्मात्रोपासकः मम मदीयमणिमानं १० ज्ञानशक्तिमहत्तत्त्वोपाधौ मयि यथासंस्थं महत्तत्त्वाकारं
भूतानां चेति आकाशादिभूतोपाधौ च मयि मनो धारयन् भूतत्वभूतमहिमानं प्राप्नोतीत्यर्थः ११ वाय्वादिभूतानां ये परमाणवः तन्मये तदुपाधौ चित्तं मयि रंजयन्यो

त्रिकालज्ञत्वमद्वंद्वं परचित्ताद्यभिज्ञता अग्न्यर्कांबुविषादीनां प्रतिष्टंभोऽपराजयः ८ एताश्चोद्देशतः प्रोक्ता योगधारणसिद्धयः यया धार
णया या स्याद्यथा वा स्यान्निबोध मे ९ भूतसूक्ष्मात्मनि मयि तन्मात्रं धारयेन्मनः अणिमानमवाप्नोति तन्मात्रोपासको मम १० म
म हत्यात्मन्मयि परे यथासंस्थं मनो दधत् महिमानमवाप्नोति भूतानां च पृथक्पृथक् ११ परमाणुमये चित्तं भूतानां मयि रंजयन् का
लसूक्ष्मार्थतां योगी लघिमानमवाप्नुयात् १२ धारयन्मय्यहंतत्त्वे मनो वैकारिकेऽखिले सर्वेंद्रियाणामात्मत्वं प्राप्तिं प्राप्नोति मन्मनाः
॥१३॥

गी कालसूक्ष्मार्थतां कालपरमाणूपाधिरूपतामिति लघुत्वविवरणं तदुक्तं स कालः परमाणुर्वै यो भुंक्ते परमाणुतामिति १२ वैकारिकाहंकारोपाधौ मयि
अखिलं एकाग्रं आत्मत्वं अधिष्ठातृत्वं अत्र हेतुः मन्मनाः मयि मनोधारणप्रभावादेव नवनिमात्रानीवहेतुरत्र संधेय इति भावः एवं धारणानुभावेन मद्योग ७१
बलमाश्रय इत्यादिषु द्रष्टव्यं ॥१३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फल

ननु महत्यात्मनीति॥ महिमसाधनत्वेनोक्ते महत्तत्त्वे कथं प्राकाम्यसाधनत्वेनोच्यते। तत्राह॥ सूत्रे सर्वप्राणिलिंगव्यष्टीनां समष्टिरूपे

ऽपि तु समष्टिव्यष्टिभावमनुसृत्य महिमा यात्प्रथमविकारमात्रं महिम फलसाधनत्वेनोक्तं यद्वर्णितं तत्सांवर्ण्यं न शंका कार्या।

क्रियाशक्तिप्रधानं महत्तत्त्वमेव सूत्रं तदुपाधौ मयि सत्सु मे पारमेष्ठ्यं सर्वोत्कृष्टं प्राकाम्यं विंदते कथंभूतस्य मे अव्यक्ताज्जन्म यस्य तस्य सूत्रस्य तदुपाधेर्ममेत्यर्थः॥ १४

त्र्यधीश्वरे त्रिगुणमायानियंतरि अत एव कालविग्रहे आकलयितृरूपे अंतर्यामिणि ईशित्वं विशिनष्टि क्षेत्रज्ञानां जीवानां देहानां तदुपाधीनां च चोदनं प्रेरणं

नन्वविश्वसृष्ट्यादिकर्तृत्वलक्षणमित्यर्थः। १५ तुरीयाख्ये विराड्हिरण्यगर्भकारणं चेत्युपाधित्रयं तस्य द्रष्टा सर्वविन्निद्रीं तत्तुरीयं तत्पदं विदुरित्येवं लक्षणे ऐश्व

महत्यात्मनि यः सूत्रे धारयेन्मयि मानसं। प्राकाम्यं पारमेष्ठ्यं मे विंदतेऽव्यक्तजन्मनः॥ १४॥ विष्णौ त्र्यधीश्वरे चित्तं धारयेत्कालविग्रहे। स ई

शित्वमवाप्नोति क्षेत्रज्ञक्षेत्रचोदनां॥ १५ नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते। मनो मय्यादधद्योगी मद्धर्मा वशितामियात्॥ १६॥ निर्गुणे

ब्रह्मणि मयि धारयन्विशदं मनः। परमानंदमाप्नोति यत्र कामोऽवसीयते॥ १७ श्वेतद्वीपपतौ चित्तं शुद्धे धर्ममये मयि। धारयञ्छ्वेततां

याति षडूर्मिरहितो नरः॥ १८॥ ॥

श्रियः

र्यस्य समग्रस्य धर्मस्य यशसः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा। तद्वति तु भगवच्छब्दशब्दिते षड्गुणैश्वर्यसंपन्ने॥ १६॥ यत्र परमानंदरूपे सर्वोऽपि कामस्त

स्तदंशभूतोऽवसीयते समाप्यते ते॥ १७ अतः परं गुणहेतुकाः सिद्धीराह शुद्धे सत्वात्मके श्वेततां शुद्धरूपतां॥ १८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०ए०
७२

श्वाकाशात्मायःप्राणःसमष्टिरूपस्तद्रूपेमय्यिमनसाघोषंनादंचिंतयन्। असौहंसोजीवः तत्रश्वाकाशोऽपलभ्यागतासन्। तत्रःस्थाविविक्ताःवायुःशृणोतिपु
यात्त्राकाशोपलभ्यानिव्यक्तायाःभूतानांवाचस्त्रादूरतःशृणोतीति। १९। त्वष्टाश्चादित्यस्तस्मिन्नपरिछिन्नेचक्षुःसंयोज्यतेचचक्षुषिसंयोज्यतत्रोन्यसंयोग
मांध्यायन्विश्वंदूरतःप्रपश्यति। २०। मनोदेहंचतत्स्थहविनावायुनासहमय्यिसुसंयोज्ययामधारणाक्रियतेतस्याःप्रभावेनयत्रमनोयातितत्रात्मादेहोयातीति

मय्याकाशात्मनिप्राणेमनसाघोषमुद्वहन्। तत्रोपलब्धाभूतानांद्वंसोवाचःशृणोत्यसौ। १९। चक्षुस्त्वष्टरिसंयोज्यत्वष्टारमपिच
क्षुषि। मांतत्रमनसाध्यायन्विश्वंप्रपश्यतिसूक्ष्मदृक्। २०। मनोमयिसुसंयोज्यदेहंतदनुवायुनामद्धारणानुभावेनतत्रात्मायत्रवैम
नः। २१। यदामनउपादाययद्यद्रूपंबुभूषति। तत्तद्भवेन्मनोरूपंमद्योगबलमाश्रयः। २२॥ ॥
तु

यः। यदामनःकर्तृआत्मानंवायुनासहदेहंचमय्यिसुसंयोज्ययत्रयातितदनुतत्रदेहोयातीति। २१। मनः उपादायउपादानंकारणंकृत्वायद्यद्देवादिरूपंभवितुमि ७२
[illegible]च्छन्मनोरूपंमनसोऽभीष्टरूपंयोगीभवेत्। कुतः यतोमैवमद्योगबलंयोऽहमचिंत्यशक्तिर्नानाकारस्तस्मिन्मयिमनसोयोगोधारणातस्यबलंप्रभावःसएवा
[illegible] श्रयणं। २२॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्र प्रविविक्षति तत्रात्मानं चिंतयेत् । ततः पिंडं स्वदेहं हित्वा प्राणः प्राणप्रधानलिंगशरीरोपाधिः वायुभूतः बाह्यवायौ भूतः प्रविष्टस्तेन मार्गेणेत्यर्थः । षाडंघ्रिवत् त्यक्त्वा गो
... पात्पुष्पांतरं मनाया सिन प्रविशतितद्वत् ॥२३॥ पिंडं हित्वेत्युक्तं तत्प्रकारं कथयन्स्वच्छंदमृत्युमाह । पार्ष्ण्यापीड्य गुदं निरुध्य प्राणं प्राणोपाधिमात्मानं ब्रह्मरंध्रे
... शिरेण ब्रह्मलोकेत्युपलक्षणं । ब्रह्मवाक्यन्यदाधान्त्रे पि नितं स्थानं मनसा नीत्वा ॥२४॥ मदंरं सन्मूर्तिनिरूपं सत्त्वं तत्सत्त्वं चिंतं चिंतयेत् । तदा सत्त्वहृतं ततः चात्वांतरा भूता ॥२५॥

परकायं विशन्सिद्ध आत्मानं तत्र भावयेत् । पिंडं हित्वा विशेत्प्राणो वायुभूतः षडंघ्रिवत् ॥२३॥ पार्ष्ण्यापीड्य गुदं प्राणं हृदुरःकंठमूर्धसु । आ
रोप्य ब्रह्मरंध्रेण ब्रह्म नीत्वोत्सृजेत्तनुम् ॥२४॥ विहरिष्यन्सुराक्रीडे मत्स्थं सत्त्वं विभावयेत् । विमानेनोपतिष्ठंति सत्त्ववृत्तीः सुरस्त्रियः ॥२५॥
यथा संकल्पयेद्बुद्ध्या यदा वा मत्परः पुमान् । मयि सत्ये मनो युंजंस्तथा तत्समुपाश्नुते ॥२६॥ यो वै मद्भावमापन्न ईशितुर्वशितुः पुमान् ।
कुतश्चिन्न विहन्येत तस्य चाज्ञा यथा मम ॥२७॥ ॥

यद्वा
यदा वा अस्मिन्कालेपि । यथा चेति पाठे यथा नायेन केनापि प्रकारेण बुध्या संकल्पयेत् तत्र प्राप्यावस्थाप्नोतीत्यर्थः । यथा संकल्पयेत् । यथा वा मत्परो मयि विश्वासवान्
भवति तथा तदनुरूपं सर्वं प्राप्नोतीत्यर्थः । किं कुर्वन् मत्ये सत्यसंकल्पे विमनो युंजन् ॥२६॥ मदीति ईशित्वं पृथक्पदं ममेत्यर्थः । ईशितुः सर्वनियंतुः । वशितुः स्वतंत्रस्य म
मभावं मनावं प्राप्तस्य गुणहेतवः ॥२७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०

अतः परं तु याः धारणाविदः इति त्रिकालज्ञेश्वरधारणा सूचिता त्रैकालिकी त्रिकालवस्तुविषया स जन्ममृत्युप्रसंगाद्युपबृंहिता तत्र हिता अत्र नयैव परिचिन्वाद्य
चित्ता ऽपि व्याख्याता २० अग्न्यादिसर्वोपघातशून्यो नगवानित्येवं तत्र योगमय्यैतेनाग्निर्न येत अत्र हेतुः सद्योगेति पादसमुद्रकं यथानिघातकं न भवति
तथा तस्य वपुषो नाद्य इत्यर्थः अनयैवा ऽर्थवता ऽपि व्याख्याता २९ मद्विभूतीः समवतारान् ध्वजादिभिः सह ३० उपसंहरति उपासकस्येति एवं स्थयक्

मत्सख्याश्रुद्धसत्त्वस्य योगिनो धारणाविदः तस्य त्रैकालिकी बुद्धिर्जन्ममृत्युपबृंहिता २८ अग्न्यादिभिर्न हन्येत मुनेर्योगमयं व
पुः मद्योगश्रांतचित्तस्य यादसामुदकं यथा २९ मद्विभूतीरभिध्यायन् श्रीवत्सास्त्रविभूषिताः ध्वजातपत्रव्यजनैः स भवेदपराजितः ३०
उपासकस्य मामेवं योगधारणया मुनेः सिद्धयः पूर्वकथिता उपतिष्ठन्त्यशेषतः ३१ जितेंद्रियस्य दांतस्य जितश्वासात्मनो मुनेः मद्धा
रणां धारयतः का सा सिद्धिः सुदुर्लभा ३२ अंतरायान्वदंत्येता युंजतो योगमुत्तमम् मया संपद्यमानस्य कालक्षेपणहेतवः ३३

धार [illegible] नि ३१ यद्वा किं बहुना धारणाभ्यासेन एकयैव सर्वाः सिद्धयो भवंतीत्याह जितेंद्रियस्येति मद्धारणां नारायणे तुरीयाख्ये इत्युक्तां या सा दुर्लभा स्यात्
या [illegible] नकादिसिद्धिरित्यर्थः ३२ यद्यप्येवं तथापि न प्राप्याः इत्याह अंतरायानिति ३३ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्तद्धेतुकीयमेव धारणा कार्या नान्याः काम्याइत्याह जन्मनैव काश्चित्सिद्धयो नवृत्तियथादेवानां यथा च यादसामुदके स्तंभनः पक्ष्यादीनां खेचरत्वादि
... पातंजले जन्मौषधि तपोमंत्रयोगजाः सिद्धय इति योगेन मद्धारणामित्युक्तेन योगगतिं मत्सालोक्यादिरूपां ३४ ननु कुत इत्यत आह सर्वासामिति एवंविधे
प्रभुः ... प्रमदत्तं हेतुः कारणं पतिः पालयिता चेति किंच न केवलं सिद्धिनामेव प्रभुः अपि तु मोक्षादीनामपीत्याह अहमिति योगी मोक्षः सांख्यं तत्साधनं ज्ञानं

जन्मौषधितपोमंत्रैर्यावतीरिह सिद्धयः। योगेनाप्नोति ताः सर्वा नान्यैर्योगगतिं व्रजेत् ३४ सर्वासामपि सिद्धीनां हेतुः पतिरहं प्रभुः। अहं
योगस्य सांख्यस्य धर्मस्य ब्रह्मवादिनां ३५ अहमात्मांतरो बाह्योऽनावृतः सर्वदेहिनां। यथा भूतानि भूतेषु बहिरंतः स्वयं तथा॥ ३६॥ ॥
इति श्रीभागवते महापुराणे एकादशस्कंधे पंचदशोऽध्यायः॥ १५॥ ॥ ॥

धर्मस्य तद्रूपस्यैतेषां ब्रह्मवादिनां ३५ कुतः तत्राह अहमिति सर्वदेहिनां जीवानामात्मा यतः अंतरः अंतर्यामी एष त आत्मांतर्याम्यमृत इति श्रुतेः तर्हि
किमंतर्वर्तित्वात्परिच्छिन्नः नाबाह्योहमस्मि व्यापक इत्यर्थः तत्र हेतुः अनावृतः एतत्सदृष्टांतमाह भूतेषु चतुर्विधेषु महाभूतानि यथा बहिरंतश्च भवंति
स्वयं अहमपि तथेत्यर्थः॥ ३६॥ इति टीकायां एकादशस्कंधे पंचदशोऽध्यायः॥ १५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स

षोडशे तु हरेराविर्भूतविभूतयः। ज्ञानवीर्यप्रभावादिविशेषेणोपवर्णिताः। अंतश्चितेन यद्ध्यानमज्ञाकामकृतात्मनां। अतस्तद्योग्यतापत्त्यै विक्तसादिनिरू
पणं एवं तावन्नवाध्याय्यामष्टपृष्ठानिरूपिताः। ब्रह्मत्वसंन्यस्तावर्ग्गमादिचतुष्टये। बंधमुक्तयोस्तु निर्धरिसंगत्योऽथ ततः परे। षादशेऽनंतरं कर्मस्थितीत्यागव्यवस्थितौ। हं
सेतिहासतो योगनिष्ठायां च त्रयोदशे। श्रेयःसाधननिर्द्धारिध्यानिचैव चतुर्दशे। धारणासिद्धिभेदे च पूर्वसंगेन निरंतरे। उद्धवप्रश्नलीनादध्युत्तरं हरिणेरितं। षोड
शे तु विभूतिविस्तारे द्वयोर्वर्णाश्रमव्रते। ज्ञानादिनिर्णये चाथो यमादीनां च निर्णये। योगत्रयाधिकारे तु विंशे च तदनंतरे। तत्त्वसंख्याविवादे च पुंप्रकृत्योर्विवेचने ज
न्ममृत्युप्रकारे च द्वाविंशे तत्परं। परापराधसहने च त्रिविंशदनंतरे। सप्तविंशे क्रियायोगभक्तितदुपवर्णनं। अष्टाविंशे ततः प्रोक्ता ज्ञानयोगोपसंहृतिः। सं

उद्धव उवाच॥ त्वं ब्रह्म परमं साक्षादनाद्यंतमपावृतं। सर्वेषामपि भावानां त्राणस्थित्यप्ययोद्भवः॥१॥ ॥

सारासंनवत्रश्चेतन्मध्ये दत्तसुत्तरं॥ तदर्शनात्तु नः प्रश्नेन क्रियोयोपसंहृतिः। एवं प्रश्नोत्तरार्थैर्क्रमेणैतानि विंशतिः। अहमात्मांतरो बाह्योऽनावृतः सर्वदेहिनां।
यथा भूतानि भूतेषु बहिरंतः स्वयं तथेत्युक्तं। तत्र भूतानि यथा कश्चित्केन चिद्गुणविशेषेण हृष्टानि वर्त्तते। कश्चित्केन चिद्गुणविशेषेण हृष्टानि वर्त्तते। कश्चिसामा
न्यरूपेणैव तथा त्वमपि कुकथं वर्तसे इति विभूतीः पृष्टुं प्रथमं तावदुक्तमेव सर्वात्मकत्वमनुवदति त्वं ब्रह्मेति। अपावृतं निरावरणं स्वतंत्रं वा। अत एव सर्वेषामपि
भावानां त्राणं स्थितिर्जीवनं। त्राणस्थितिसहितेभ्यो प्ययोद्भवौ यस्मात्त्वं उपादानकारणमित्यर्थः॥१॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दै थे क

अत्र सदाचारं प्रमाणमाह याथातथ्येन याथार्थ्येन सर्वभूतकारणं त्वां ब्राह्मणाः वेदतात्पर्यविदः ॥ २ ॥ एवं कारणत्वेन सर्वात्मत्वमनूद्य विभूतीः पृच्छतीति ये चेति उपासीनाः
सिद्धमानाः सन्तः ॥ ३ ॥ तु धैर्यत्वमेवाह गूढः अस्फुटः भूतानां प्राणिनां मध्ये आत्मत्वेन हेतुः भूतानामात्मा अन्तर्यामी । अत्रापि हेतुः हेतुभूतभावेनेति तेन त्वया ॥ ४ ॥ ता एव साकल्येन पृ
च्छति हे महाविभूते याः काश्चिद् भूम्यादिषु ते विभूतयः रसायां रसातले अनुभाविताः त्वयैव केनचिच्छक्तिविशेषेण संयोजिताः तीर्थानां पदं च तदङ्घ्रिपद्मं च तथा न एवं तारनं

भूतेषु

युष्माकं चेषु भूतेषु ते यमकृतात्मनिः उपासते त्वां भगवन्यथातथ्येन ब्राह्मणाः ॥ २ ॥ येषु येषु च भावेषु भक्त्या त्वां परमर्षयः । उपासी
नाः प्रपद्यन्ते संसिद्धिं तद्वदस्व मे ॥ ३ ॥ गूढश्चरसि भूतात्मा भूतानां भूतभावन । न त्वां पश्यन्ति भूतानि पश्यन्तं मोहितानि ते ॥ ४ ॥ याः काश्च भूमौ
दिवि वै रसायां विभूतयो दिक्षु महाविभूते । ता मह्यमाख्याह्यनुभाविता स्तेन मामि ते तीर्थपदाङ्घ्रिपद्मम् ॥ ५ ॥ श्रीभगवानुवाच ॥ एवमेतद
हं पृष्टः प्रश्नं प्रश्नविदां वर । युयुत्सुना विनशने सपत्नैरर्जुनेन वै ॥ ६ ॥ ज्ञात्वा ज्ञातिवधं गर्ह्यमधर्मं राज्यहेतुकं । ततो निवृत्तो हन्ताहं हतोय
मिति लौकिकः ॥ ७ ॥ ॥ ॥

भूतानि प्रश्नसंवादितां तथायं प्रश्नः ॥ साध्वीयानिति तावदनुमोदते एवमिति त्रिभिः प्रश्नं पृष्टं सपत्नैर्योद्धुमिच्छता विनशने कुरुक्षेत्रे ॥ ६ ॥ युयुत्सोर्वृत्तिं प्रश्नश्लोकः प्रसं
गः स्वजनाहन्ता तेति लौकिकः प्राकृतमतिः सन् ॥ ७ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
१५

सर्वभूतात्मनो ह्यात्मनि विधानि वियुक्तः तस्यासम॥ याप्रतिबोधितः मनुयथात्वमसि नाशयसे एवं संयामुक्तस्वेमामस्य भाषत। तद्देवत्वपि पृच्छथ्य प्रियस्माक्षीतिनावः ॥ ताविनूतीः क
ययति अहमिति अस्य च ष्टसमानाधिकरणः प्रथमांता द्वितीयांताश्च सर्वविभूतयः तास्तास्त्वोपासनार्थं कथ्यंते षष्ठी वक्वचिन्निर्धारणे संबंधे च क्वचिद्यथायोगं द्रष्टव्या
तत्स्वामीषां भूतानां आत्मेति सुहृदिति ईश्वरशक्तिः सामान्येनाहमुपास्य इत्यर्थः एवं सर्वत्रातेषां स्थितिरुक्ता प्ययः तद्धेतुरित्यर्थ ॥८॥ विशेषतो विभूतीराह कल्पयताव

सत्ततद्ब्रा पुरुषव्याघ्रो युक्तामे प्रतिबोधितः ॥ अस्यनाषतमामेवं यथात्वरस्य सूर्द्धनि ॥ अहमात्मोद्धवामीषां भूतानां सुहृदीश्वरः ॥ अहं सर्वाणि
भूतानि तेषां स्थित्युद्भवाप्ययः ॥९॥ अहंगतिर्गतिमतां कालकलयतामहं गुणानां चाप्यहं साम्यं गुणिन्योत्पत्तिको गुणः ॥१०॥ गुणिना
मप्यहं सूत्रं महतां च महानहं सूक्ष्माणामप्यहं जीवो दुर्जयानामहं मनः ॥११॥ हिरण्यगर्भो वेदानां मंत्राणां प्रणवस्त्रिवृत् अक्षराणा
मकारोस्मि पदानि छंदसामहं ॥१२॥ २

त्रीकुर्वतां स्वधे गुणानां मध्ये गुणिनि धर्मिणि उत्पत्तिकः स्वाभाविको यो गुणः सोहं ॥१०॥ सूत्रं प्रथमं कार्यं महान् महत्तत्वं सूक्ष्मोपाधित्वात् दुर्ज्ञेयत्वात्सूक्ष्मजीव
स्य सत्यत्वं बुद्धेर्गुणेनात्मगुणेनैव मारायमात्रो ह्यवरोऽपिदृष्ट इति श्रुतेः ॥११॥ वेदानां संबंधी तेषामध्यापकः पदानि त्रिपदा गायत्रीत्यर्थः ॥१२॥ ॥ ॥ ७५
त्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१३ हविर्धानी कामधेनुः १४ । १५ नक्षत्रौषधीनां प्रभुं सोमं । यक्षरक्षसां प्रभुं १६ याहसां प्रभुं । तपतां तापमतां द्युमतां दीप्तिमतां च मध्ये १७ संयमयतां दंडयमयतामित्य
र्थः १८ शृंगिणां दंष्ट्रिणां च मध्ये तेषां एकैकं वा त्रियसंन्यासः प्रथमः ब्राह्मणः । १९ श्रोतसां प्रवाहानां च सारसां स्थिरोदकाशयानां २० धिष्ण्यानां निवासस्थानानां गहनानां
भु

इंद्रोहं सर्वदेवानां वसूनामस्मि हव्यवाट । आदित्यानामहं विष्णू रुद्राणां नीललोहितः ॥ १३ ॥ ब्रह्मर्षीणां भृगुरहं राजर्षीणामहं मनुः । दे
वर्षीणां नारदोहं हविर्धान्यस्मि धेनुषु ॥ १४ ॥ सिद्धेश्वराणां कपिलः सुपर्णोऽहं पतत्रिणां । प्रजापतीनां दक्षोहं पितॄणामहमर्यमा ॥ १५ ॥ मां
विद्धि वेदस्यानां प्रह्लादमसुरेश्वरं । सोमं नक्षत्रौषधीनां धनेशं यक्षरक्षसां ॥ १६ ॥ ऐरावतं गजेंद्राणां यादसां वरुणं प्रभुं । तपतां द्युमतां
सूर्यं मनुष्याणां च नृपतिं ॥ १७ ॥ उच्चैःश्रवास्तुरंगाणां धातूनामस्मि कांचनं । यमः संयमतां चाहं सर्पाणामस्मि वासुकीः ॥ १८ ॥ नागेंद्राणा
मनंतोहं मृगेंद्रः शृंगिदंष्ट्रिणां । आश्रमाणामहं तूर्यो वर्णानां प्रथमो नघ ॥ १९ ॥ तीर्थानां स्रोतसां गंगा समुद्रः सरसामहं । आयुधानां धनु
रहं त्रिपुरघ्नो धृतुष्मतां ॥ २० ॥ धिष्ण्यानामस्म्यहं मेरुर्गहनानां हिमालयः । वनस्पतीनामश्वत्थ औषधीनामहं यवः ॥ २१ ॥ पुरोधसां वसि
ष्ठोहं ब्रह्मिष्ठानां बृहस्पतिः । स्कंदोहं सर्वसेनान्यामग्र[ण्यां] भगवाननजः ॥ १२ ॥ ॥
ण्यां

दुर्गमानां २१ ब्रह्मिष्ठानां वेदार्थनिष्ठानां । सेनान्यां च भूपतीनां । अग्रण्यां सन्मार्गप्रवर्तकानां । अजः ब्रह्मा ॥ २२ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मत्व

मुनीनांशोधकानामपिमात्ज्ञानितत्त्वगाघर्षणादीनांमध्येवाधवादिरूपःशोधकोहं २३ योगानांयोगाङ्गभूतानांमध्येआत्मसंरोधःसमाधिरहं मंत्रोनीतिः कौशलानां
विवेकादिनैपुणानांमध्येआन्वीक्षिकीआत्मानात्मविवेकविद्या आख्यात्यस्यायाख्यातिशुन्यख्यातस्वत्स्याख्यानिर्वचनीयख्यातिवादिनांएवमिदमेवचैवेतियोऽयंतोविकल्पः
सोहं २४ कुमारःसनत्कुमारः २५ सन्यासःस्वत्यक्त्यदानं क्षेमाणांआश्रमस्थानानांमध्येअबहिर्मतिः आन्तनिष्ठा सूनृतंप्रियवचनंमौनंवचनदिप्रियभाषणेमोनेचपुरु

यज्ञानांब्रह्मयज्ञोस्मि। अहंव्रतानामविहिंसनं। वाघ्रयमकंबुवागात्मासुचीनामप्यहंशुचिः २३ योगानामात्मसंरोधोमंत्रोऽस्मिविजिगी
षितां आन्वीक्षिकीकौशलानांविकल्पःख्यातिवादिनां २४ स्त्रीणांशतरूपाहंपुंसांस्वायंभुवोमनुः। नारायणोमुनीनांचकुमारो नो
ब्रह्मचारिणां २५ धर्माणामस्मिसंन्यासःक्षेमाणामबहिर्मतिः। गुह्यानांसूनृतंमौनंमिथुनानामजस्त्वहं २६ संवत्सरोस्म्यनिमिषामृतू
नांमधुमाधवौ मासानांमार्गशीर्षोहंनक्षत्राणांतथाभिजित् २७ अहंयुगानांचकृतंधीराणांदेवलोऽसितः। द्वैपायनोस्मिव्यासानां
कवीनांकाव्यआत्मवान् २८ ॥

षस्यामिथ्यायोजायते अजःप्रजापतिः। यस्यदेहार्धस्मिंमिथुनमभूत्सएवमुख्यंमिथुनं अर्धोहवाएषआत्मनोयत्पत्नीति
श्रुतेः २६ अनिमिषांअनिमिषाणांअप्रमत्तानां मधुमाधवौवसंतः इत्यर्थः अभिजित्उत्तराषाढाचतुर्थपादः तथाचश्रुतिः अभिजिन्नामनक्षत्रंउपरिष्टाद
षाढानांअवस्तात्श्रोणायाइत्यादि २७ कृतंकृतयुगं देवलःअसितश्च व्यासानांवेदविभागकर्तॄणां कवीनांविदुषांकाव्यःशुक्रः २८ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवतां उत्पत्तिं प्रलयं चैव भूतानामगतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानित्येवं लक्षणानां ॥२०॥ सुपेशसां सुंदराणां दर्भजातीनां काशादूर्वादीनां । हविर्भुक् चरुपु ७
रोडाशादिषु हुतेषु वा ॥२१॥ लक्ष्मीधनादिसंपत् ॥२२॥ बलवतां ऊर्जस्सहश्च सात्वतां भागवतानां नराकृतं कर्महि मित्यर्थः । तेषामेव च तद्व्यूहभेदेवे वासुदेव संकर्षण
प्रद्युम्नानिरुद्ध नारायण हयग्रीव वराह नृसिंह ब्रह्माण इति यान्नवमूर्तयस्तासां मध्ये वासुदेवाख्या ॥२३॥ गंधर्वाणां विश्वावसुः । अप्सराणां पूर्वचित्तिः । गंधमात्रं च अवि

वासुदेवो भगवतां त्वं तु भागवतेष्वहं किंपुरुषाणां हनुमान्विद्याध्राणां सुदर्शनः ॥२०॥ रत्नानां पद्मरागोऽस्मि पद्मकोशः सुपेशसां । कुशोऽस्मि
दर्भजातीनां गव्यमाज्यं हविःष्वहं ॥२१॥ व्यवसायिनामहं लक्ष्मीः कितवानां छलग्रहः । तितिक्षाऽस्मि तितिक्षूणां सत्त्वं सत्त्ववतामहं ॥२२॥ ओ
जः सहो बलवतां कर्माहं विद्धि सात्वतां । सात्वतां नवमूर्तीनां आदिमूर्तिरहं परा ॥२३॥ विश्वावसुः पूर्वचित्तिर्गंधर्वाप्सरसामहं । भूधराणा
महं स्थैर्यं गंधमात्रमहं भुवः ॥२४॥ अपां रसश्च परमस्तेजिष्ठानां विभावसुः । प्रभा सूर्येंदुताराणां शब्दोऽहं नभसः परः ॥२५॥ ब्रह्मण्यानां ब
लिरहं वीराणामहमर्जुनः । भूतानां स्थितिरुत्पत्तिरहं वै प्रतिसंक्रमः ॥२६॥ गत्युक्त्युत्सर्गोपादानमानंदस्पर्शलक्षणं । आस्वादश्रुत्यवघ्रा
णमहं सर्वेंद्रियेंद्रियं ॥२७॥ ॥

कृतं ॥२४॥ परमः मधुरः । परः परात्परः ॥२५॥ अर्जुनः पार्थः । भूतानां प्राणिनां । प्रतिसंक्रमः प्रलयः ॥२६॥ गत्यादयः पंचकर्मेंद्रियव्यापाराः स्पर्शादयो ज्ञानेंद्रियव्यापा
राः तत्तल्लक्षणं दर्शनं । सर्वेंद्रियाणामिंद्रियं तत्तदर्थग्रहणशक्तिरूपमहं ॥२७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं तत्तन्निर्धारणेन तत्तत्संबंधेन च विशेषतो विभूतीर्निरूप्येदानीं सामान्यतः सर्वाण्यपि निरूपयति पृथिवीति सार्द्धद्वयेन पृथिव्यादिशब्दैस्तन्मात्राणि विवि
क्षितानि च अहंकारः महान् महत्तत्त्वम् एताः सप्त प्रकृतिविकृतयः विकाराः पंच महाभूतानि एकादशेंद्रियाणि चेत्येवं षोडशसंख्याकः पुरुषो जीवः अव्यक्तं प्रकृतिः
एवं पंचविंशतितत्त्वानि तदुक्तं मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति किंच रजः सत्त्वं तमश्च
ति प्रकृतेर्गुणास्तेभ्यः परं ब्रह्म च तदेतत्सर्वमहमेव किंच एतत्संख्यानं एतेषां परिगणनं तेषां लक्षणेन ज्ञानं च तत्फलं तत्त्वविनिश्चयश्चाहमेव ३८ एतदेव संक्षि

पृथिवी वायुराकाश आपो ज्योतिरहं महान् ॥ विकारः पुरुषोऽव्यक्तं रजः सत्त्वं तमः परं ॥ अहमेतत्प्रसंख्यानं ज्ञानं तत्त्वविनिश्चयः ॥ ३८ ॥ म
येश्वरेण जीवेन गुणेन गुणिना विना ॥ सर्वात्मनाऽपि सर्वेण न भावो विद्यते क्वचित् ॥ ३९ ॥ संख्यानं परमाणूनां कालेन क्रियते मया ॥ न त
था मे विभूतीनां सृजतोऽण्डानि कोटिशः ॥ ४० ॥ ॥

प्याह मयेति जीवेश्वररूपो द्विविधो यो भावः यश्च गुणगुणिरूपः यश्च देवरूपो नररूपः स सर्वोऽपि मया विना मद्व्यतिरेकेण नास्ति अहमेव सर्वमित्यर्थः ३९ ननु सामान्यतः किमेवं
संक्षिप्य कथयसि पूर्ववन्निर्धारणसंबंधाभ्यां विशेषतः सर्वाः कथयेति चेत्तत्राह संख्यानं पृथिव्याः परमाणूनां कालेन महतापि मयैव क्रियते कृतं वा कुत्राप्यु ते तथा मे विभूतीनां संख्या ७७
नं कर्तुं न शक्यते कुत इत्यत आह सृजतोंडानीति यदा मया सृज्यमानानां ब्रह्मांडानामेव तावत्संख्या नास्ति तदा कुतस्तत्स्थानां विभूतीनां संख्येत्यर्थः ४० ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथापि विशेषत एवं सर्वत्रापि संक्षेपतः कथयामीत्याह। तेजः प्रभावः श्रीः संपत् सौभगं मनोनयनाह्लादकत्वं भगः भाग्यं वीर्यं बलं अंशकः विभूतिः ४० उपसंहरति एता इति
लोके च विभूतिनिदर्शनं यच्चित्रावतारायकथिताः अतो नात्रातीवाभिनिवेशः कर्तव्य इत्याह। मनोविकारा एव न तु परमार्थाः यथा किंचित्खपुष्पादि वाङ्मात्रेणाभिधीयते। ४१॥ २॥

तेजः श्रीः कीर्तिरैश्वर्यं ह्रीस्त्यागः सौभगं भगः। वीर्यं तितिक्षा विज्ञानं यत्र यत्र स मेंऽशकः। ४०। एतास्ते कीर्तिताः सर्वाः संक्षेपेण विभू
तयः। मनोविकारा एवैते यथा वाचाभिधीयते। ४१। वाचं यच्छ मनो यच्छ प्राणान्यच्छेंद्रियाणि च। आत्मानमात्मना यच्छ न भूयः क
ल्पसेऽध्वने। ४२। यो वै वाङ्मनसी सम्यगसंयच्छन्धिया यतिः। तस्य व्रतं तपो दानं स्रवत्यामघटांबुवत्। ४३। तस्माद्वचोमनःप्राणान् ५
नियच्छेन्मत्परायणः। मद्भक्तियुक्तया बुद्ध्या ततः परिसमाप्यते। ४४। ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे विभूति
योगदर्शने षोडशोऽध्यायः। श्रीभवद्धवसंवादे विभूतिवर्णने षोडशोऽध्यायः। १६। ॥
६

तत् तस्माद्वागादीन्नियच्छ। आत्मानं बुद्धिं आत्मना सत्त्वसंपन्नया तयैव नियच्छ अध्वने संसारमार्गाय ४२ असंयमने दोषमाह य इति असंयच्छन् असंयच्छति ४३
परिसमाप्यते कृतकृत्यो भवतीत्यर्थः। ४४। एकादशे षोडशोऽध्यायः। १६। ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः सप्तदशोध्याये स्वधर्मेण निष्किलक्षणे हंसोक्तं धर्ममन्वाह ब्रह्मचारिगृहस्थयोः। कर्मार्द्धिं विधिसाध्यतामित्यत्र भक्त्याकृतं कर्म मोक्षसाधनं भवतीति निरिसृतं। न क्रियासाधन
तं च कर्मणां मयोदितेष्ववहितः स्वधर्मेष्वित्यादिना तत्र तत्रोक्तं नैवकर्मानुष्ठानेन नियमेन न किंचिद्दृश्यते। अथ यः पृच्छति यस्त्वयेति सप्तभिः। पूर्वं किल्माषोत्वं न त्वं किल लक्षणः तन्त्र
ज्ञापकः तत्साधनमित्यर्थः। वर्णाश्रमहीनानामपि द्विपदां नराणां १ यथायेन प्रकारेणानुष्ठीयमानेन स्वधर्मेण २ ननु संप्रदायादेव ज्ञायते। किं पुनर्वर्णनेन तत्राह तु

उद्धव उवाच। यस्त्वयाभिहितः पूर्वं धर्मस्त्वद्भक्तिलक्षणः। वर्णाश्रमाचारवतां सर्वेषां द्विपदामपि ॥ १ ॥ यथाऽनुष्ठीयमानेन त्वयि
भक्तिर्नृणां भवेत्। स्वधर्मेणारविंदाक्ष तत्समाख्यातुमर्हसि ॥ २ ॥ पुरा किल महाबाहो धर्मं परमकं प्रभो। यत्तेन हंसरूपेण ब्रह्मणेऽभ्यात्थ
माधव ॥ ३ ॥ स इदानीं सुमहता कालेनामित्रकर्शन। न प्रायो भविता मर्त्यलोके प्रागनुशासितः ॥ ४ ॥ वक्ता कर्ताऽविता नान्यो धर्मस्या
च्युत ते भुवि। सभायामपि वैरिंच्यां यत्र मूर्तिधराः कलाः ॥ ५ ॥ कर्त्राऽवित्रा प्रवक्त्रा च भवता मधुसूदन। त्यक्ते महीतले देव विनष्टं
कः प्रवक्ष्यति ॥ ६ ॥ तत्त्वं नः सर्वधर्मज्ञ धर्मस्त्वद्भक्तिलक्षणः। यथा यस्य विधीयेत तथा वर्णय मे प्रभो ॥ ७ ॥ ॥

रेति। परमकं परमात्मप्राप्तिसाधकं सुखरूपं स्वतः। यत् त्वं हंसरूपेण धर्मेऽभ्यात्थ उक्तवान् एवं ननु योगमार्गं। जानीत मयागतं यत् तु भुवि धर्मविवक्षायां सकलत्वात् ३ प्रागनुशासितोऽपि न भवि 
तानं न भविष्यति ४ अन्यन्न हेतुमाह वक्तेति द्वाभ्यां। अविता रक्षिता अन्यः। कला वेदाद्याः ५ ६ तत्तस्मात् नः अस्माकं मनुष्याणां मध्ये यस्य यथा विधीयते ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्म्यो धर्मादनपेतः कृतः नैःश्रेयसकरः ज्ञानजनकः अतः मे मत्तः तं धर्मं निबोध ॥१॥ तत्रादौ मदुपासनालक्षण एव सुरम्यो धर्म आसीत् आचारलक्षणस्तु पश्चात्प्रवृत्त
॥ सर्वेष्वमनुष्येष्वितो नकिहेतुरिति वर्णयितुमाह आदाविति । कस्मादेयुत्कर्म्मकृतयुगं तस्मिन् तस्मिन् त्वेचतदा मामुपासत एवं केवर्णं नाम्तत्कुर्वंतीति वक्तुं कृतयुगनाम
निरुक्तिमाह कृतकृत्येति जात्या जन्मनैव ॥२॥ किंच विधायकाभावात् पितदावीनान्तत्कर्मास्तीत्याह वेद इति धर्मश्च मनोविषयो हमेव वृषरूपधृक् ॥ चतुःष्पात् न क्रिया

श्रीभगवानुवाच ॥ धर्म्य एष तव प्रश्नो नैःश्रेयसकरो नृणां ॥ वर्णाश्रमाचारवतां तमुद्धव निबोध मे ॥१॥ आदौ कृतयुगे वर्णो नृणां हंस
इति स्मृतः ॥ कृतकृत्याः प्रजा जात्या तस्मात्कृतयुगं विदुः ॥२॥ वेदः प्रणव एवाग्रे धर्मोऽहं वृषरूपधृक् ॥ उपासंते तपोनिष्ठा हंसं मां मु
क्तकिल्बिषाः ॥३॥ त्रेतामुखे महाभाग प्राणान्मे हृदयात्त्रयी ॥ विद्या प्रादुरभूत्तस्या अहमासं त्रिवृन्मखः ॥४॥ विप्रक्षत्रियविट्शूद्रा मु
खबाहूरुपादजाः ॥ वैराजात्पुरुषाज्जाता य आत्माचारलक्षणाः ॥५॥ गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम ॥ वक्षःस्थलाद्वने वा
सोन्यासः शीर्षणि संस्थितः ॥६॥ ॥

विशेषो यज्ञादिः अतः तपोनिष्ठाः मनसः श्रेंद्रियाणां च स्वैकाग्र्यं परमं तप इति वचनादेकाग्रतयाहं संमुखं मां ध्यायंतीत्यर्थः ॥ पश्चाच्चेत्त्रेतायुगप्रवेशे मे वैराजरूपस्य
प्राणान्निमित्तात् हृदयात्सकाशात् ॥ तस्यास्त्रय्याः सकाशात् होत्राध्वर्यवौद्गात्रैः त्रिवृत्त्रिरूपः ॥ यज्ञो वै विष्णुरिति श्रुतेः ॥४॥ वर्णानामाश्रमाणां च धर्मान्वक्तुं तेषां उत्प
त्तिमाह द्वाभ्यां विप्रेति ॥ आत्माचारं स्वधर्म एव लक्षणं ज्ञापको येषां ॥५॥ मम वैराजरूपस्य हृदः वक्षस्थलात् ब्रह्मचर्यमिति नैष्ठिकानि श्रायं ॥६॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाग० ७९ त

तेषामधिकारी विशेषेण स्वभावानाह वर्णानामिति पंचभिः । जन्मस्थानानुसारिण्यः नीचैरित्यन्वयं अनोयमर्थः । मंदाभिर्जन्मभूमिभिर्मंदाः उत्तमाभिरुत्त
त्तमाश्चेति १४ शौचं आलोचनं १५ तेजः प्रतापः एतैरेवान्त्यजाश्रमस्वभावा अपि ज्ञेयाः १६ १७ १८ तथाश्रयाणां स्वभावानाह अशौचमिति शुष्कविग्रहः नि
ष्फलकलहः तर्षः स्पृहा १९ तत्र तावत्सर्वसाधारणं धर्ममाह अहिंसेति वर्णाश्रमधर्मोपलक्षणं यथं विशिष्टधर्मनियमस्तस्य प्रकरणे वक्ष्यति २० प्रथमं तावदाश्रमे

वर्णानामाश्रमाणां च जन्मभूम्यनुसारिणीः । आसन्प्रकृतयो नृणां नैचैर्नीचोत्तमोत्तमाः ॥ १४ शमो दमः तपः शौचं संतोषः क्षांतिरा
र्जवं । मद्भक्तिश्च दया सत्यं ब्रह्मप्रकृतयस्त्विमा ॥ १५ तेजो बलं धृतिः शौर्यं तितिक्षौदार्यमुद्यमः । स्थैर्यं ब्रह्मण्यतैश्वर्यं क्षत्रप्रकृतय
स्त्विमाः ॥ १६ आस्तिक्यं दाननिष्ठा च अदंभो ब्रह्मसेवनं । अतुष्टिरर्थोपचये वैश्यप्रकृतयस्त्विमा ॥ १७ शुश्रूषणं द्विजगवां देवानां चाप्यमा
यया । तत्र लब्धेन संतोषः शूद्रप्रकृतयस्त्विमाः ॥ १८ अशौचमनृतं स्तेयं नास्तिक्यं शुष्कविग्रहः । कामः क्रोधश्च तर्षश्च स्वभावोंत्यावसायि
नां ॥ १९ अहिंसा सत्यमस्तेयमकामक्रोधलोभता । भूतप्रियहितेहा च धर्मोयं सार्ववर्णिकः ॥ २० द्वितीयं प्राप्यानुपूर्व्याज्जन्मोपनय
नं द्विजः । वसन्गुरुकुले दांतो ब्रह्माधीयीत चाहूतः ॥ २१ ॥ ॥

पूर्वं ब्रह्मचारिणो धर्मं विवृणोति स च द्विविधः । उपकुर्वाणको नैष्ठिकश्च तत्राद्यस्य धर्मानाह द्वितीयमिति त्रिभिः । द्विजः त्रैवर्णिकः आनुपूर्व्यात् गर्भाधानादिसंस्कारक्र ७९
मेण द्वितीयमुपनयनाख्यं जन्म प्राप्याचार्येण आहूतो ब्रह्म वेदमधीयीत चकारात्तदर्थं च विचारयेत् २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच मेखलादीन् कुशांश्च दधत् तत्राक्षशब्देनाक्षमाला कथंभूतः जटिलः अन्नसंगादीनां जटः तथा अधौतदवासोऽरक्तपीठः दंतश्च वासश्च दवासांसि नधौता
नियानि यस्य सः अधौतदवासा सेनासावरक्तपीठश्च नकौतुकादीनारक्तपीठमासनं यस्य सः २२ जपश्च अच्चारो मूत्रपुरीषोत्सर्गश्च जपोच्चारं तस्मिन् वाग्यतः मौनी न
वेत् २३ रेतो बुद्धिपूर्वं न विकिरेत् नोत्सृजेत् ब्रह्मव्रतधरः तु स्वप्ने हठः स्वयमेव कथंचित् विकीर्णे अवगाह्य स्नात्वा यतासुः कृतप्राणायामः त्रिपदीं गायत्रीं जपेत् २४

मेखलाजिनदंडांश्च ब्रह्मसूत्रकमंडलून् ॥ जटिलोऽधौतवासोऽरक्तपीठः क्रशानूद्धरत् २२ स्नानभोजनहोमेषु जपेच्चारे च वाग्यतः नच्छिं
द्यान्नखरोमाणि कक्षोपस्थगतान्यपि २३ रेतो न विकिरेज्जातु ब्रह्मव्रतधरः स्वयं । स्वप्ने कीर्णेऽवगाह्याप्सु यतासुस्त्रिपदीं जपेत् २४ अग्न्य
ग्निकार्यं गोविप्रगुरुवृद्धसुरांछुचिः ॥ समाहितउपासीत संध्ये च यतवाग्जपन् २५ आचार्यं मां विजानीयात् नावमन्येत कर्हिचित् ॥
न मर्त्यबुध्याऽसूयेत सर्वदेवमयो गुरुः २६ सायंप्रातरुपानीय भैक्षं तस्मै निवेदयेत् । यच्चान्य दप्यनुज्ञातमुपयुंजीत संयतः २७
शुश्रूषमाणआचार्यं सदोपासीत नीचवत् । यानशय्यासनस्थानैर्नातिदूरे कृतांजलिः २८ एवं वृत्तो गुरुकुले वसेद्भोगविवर्जितः
विद्यासमाप्तिं यावद्बिभ्रद्व्रतमखंडितं २९ ॥

धे

संध्ये च यतवाक् जपन्नुपासीत मध्याह्ने संध्यानिमित्तं मौनं नास्तीति विशेषवचनं २५ २६ अन्यदपि यत् संप्राप्तं तच्च निवेदयेत् तेनानुज्ञातं तत् संयतः सन्नुपयुंजीतेत्य
र्थः २७ यानशय्यासनस्थानैः यांतं दृष्ट्वा ततो यानेन स्थितमप्रमत्तया समीपशयनेन विश्रांतं पादसंवाहनादिभिः समीपासनेन आसीनं कृतांजलिर्नियोग
प्रतीक्षया नातिदूरेऽवस्थानेनेत्यर्थः २८ एवंभूतं वृत्तं यस्य सः २९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
५०

महर्लोकं

एवमुपकुर्वाणस्य धर्मानुक्त्वा नैष्ठिकस्य विशेषधर्मानाह यदीति षड्भिः। असौ ब्रह्मचारी यदि छंदसां लोकं ततो ब्रह्मलोकं वा रोक्ष्यन् आरोढुमिच्छति तर्हि। यद्वा छं
दसां लोकं महर्लोकमिति ब्रह्मलोक विशेषणं यत्र मूर्त्तिधरा वेदा इत्युक्तात्। तद्विद्धि बृहद्व्रतः सन् बृहत् नैष्ठिकं व्रतं यस्य सः। विन्यसेत् समर्पयेत्। अधिकस्वाध्यायार्थं अधी
तस्य क्रियार्थं वा। ३० ब्रह्मवर्चः वेदाभ्यासजं तेजः तद्वान्। ३१ तस्यैव वनस्थयतिसाधारणधर्मानाह स्त्रीणामिति निरीक्षणादि वागतं क्ष्वेलनं परिहासः एवमादिकं त्य

यद्यसौ छंदसां लोकमारोक्ष्यन् ब्रह्मविष्टपं। गुरवे विन्यसेद्देहं स्वाध्यायार्थं बृहद्व्रतः। ३० अग्नौ गुरावात्मनि च सर्वभूतेषु मां परं। अ
पृथग्धीरुपासीत ब्रह्मवर्चस्व्यकल्मषः। ३१ स्त्रीणां निरीक्षणस्पर्शसंलापक्ष्वेलनादिकं। प्राणिनो मिथुनीभूतानगृहस्थोऽग्रतस्त्यजेत्। ३२
शौचमाचमनं स्नानं संध्योपासनमार्जवं। तीर्थसेवा जपोऽस्पृश्याभक्ष्यासंभाष्यवर्जनं। ३३ सर्वाश्रमप्रयुक्तोऽयं नियमः कुलनंदन। म
द्भावः सर्वभूतेषु मनोवाक्कायसंयमः। ३४ एवं बृहद्व्रतधरो ब्राह्मणोऽग्निरिव ज्वलन्। मद्भक्तस्तीव्रतपसा दग्धकर्माशयोऽमलः।।
३५ अथानंतरमावेक्ष्यन् यथा जिज्ञासितागमः। गुरवे दक्षिणां दत्वा स्नायाद्गुर्वनुमोदितः। ३६।

जेत्। मिथुनीभूतान् यतस्त्यजेत्। न पश्येदि
त्यर्थः। ३२ तस्य सर्वाश्रमसाधारणं धर्ममाह शौचमिति द्वाभ्यां। ३३।३४ निष्कामस्य नैष्ठिकस्य तु मोक्षफलमाह एवमिति। अमलः निःकामश्चेत् दग्धकर्माशयोऽंत
र्हितः स्मृतया भूतः सन् मद्भक्तो न वर्तते ३५ उपकुर्वाणस्य समावर्त्तनमाह अथेति। अनंतरं द्वितीयाश्रमं आवेक्ष्यन् प्रवेष्टुमिच्छन्। यथायथा वेदविद्या रिति वेदा ५०
इच्छा जायात् आश्रमं गणादिकं कृत्वा समावर्त्तेतेत्यर्थः। ३६ स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणं। संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च। एतन्मैथुनमष्टांगं
प्रवदंति मनीषिणः।। एतद्विपरीतं ब्रह्मचर्यं ३६ ।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्याधिकारानुरूपमाश्रमविकल्पसमुच्चयावाह गृहमिति सकामश्चेद्गृहं अंतःकरणशुद्ध्यादिकामश्चेद्वनं प्रविशेत् शुद्धांतःकरणः स च द्विजोत्तमः ब्राह्म
णश्चेत् व्रजेदित्यर्थः पक्षा आश्रमादाश्रमान्तरं गच्छेत् अन्यथा अनाश्रमी भवति लोमं च नाचरेदित्यर्थः अमत्परमिति विच्छेदः स्वस्य कस्याश्रमनियमानावश्यवदसे
मारणत्वात् ३७ विवाहनियमपूर्वकं वर्णधर्मैः सह गृहस्थधर्मानाह गृहार्थीति सदृशीं सवर्णां अजुगुप्सितां कुलतो लक्षणतश्चानिंदितां कामतस्तु यामन्याम्

गृहं वनं वोपविशेत् प्रव्रजेद्वा द्विजोत्तमः ॥ आश्रमादाश्रमं गच्छेन्नान्यथामत्परश्चरेत् ॥ ३७ ॥ गृहार्थी सदृशीं भार्यामुद्वहेदजुगुप्सितां ॥
यवीयसीं तु वयसा यां सवर्णामनुक्रमात् ॥ ३८ ॥ इज्याध्ययनदानानि सर्वेषां च द्विजन्मनां ॥ प्रतिग्रहोऽध्यापनं च ब्राह्मणस्यैव याजनं ॥
३९ ॥ प्रतिग्रहं मन्यमानस्तपस्तेजोयशोनुदं ॥ अन्याभ्यामेव जीवेत शिलैर्वा दोषदृक् तयोः ॥ ४० ॥ ब्राह्मणस्य हि देहोऽयं क्षुद्रकामाय नेष्य
ते ॥ कृच्छ्राय तपसे चेह प्रेत्यानंतसुखाय च ॥ ४१ ॥ ॥

उद्वहेत् तां सवर्णामनु तस्या अनंतरं तत्रापि वर्णक्रमेणोद्वहेदित्यर्थः तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमं ब्राह्मणक्षत्रियविशां भार्याः स्वाः शूद्रजन्मनः इति
स्मृतेः ३८ इज्यादयस्त्रैवर्णिकानामावश्यका धर्माः प्रतिग्रहादित्रयं तु वृत्तिः सा च ब्राह्मणस्यैव ३९ तत्रापि मुख्यां सुरसमतमं चान्यां वृत्तिमाह प्रतिग्रहमिति तयो
र्याजनाध्यापनयोरपि कार्पण्यादिदोषं पश्यन् शिलैः स्वामित्यक्तैः वा च पतितैः कणैः वा ४० एवं च वृत्तिकार्पण्यं ब्राह्मणेन सोढव्यमित्याह ब्राह्मणस्येति ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उंछवृत्तिर्नाम विप्रणादिपतितकणोपादानं तं शिलवृत्त्यैकीकृत्य तया तु वृत्त्यासमो ह्यफलमाह शिलोंछेति महांतं आतिथ्यादिलक्षणं ४२ एवमधनस्य मुद
दृश्कलस्तुक्कासधनानामप्याह वृत्तिः मस्तुवरं तिदारिद्र्याद्धतारयंति विप्रमिल्कपूयद्वाणं मत्सराग्यणं कमपि ४३ राज्ञस्त्वावश्यकमेतद्धिंसाह सर्वाशिनि ४४ ४५ सर्वे
षामापद्वृत्तीराहमिति पण्यैर्विक्रियाहैः नतु सुरालवणाद्यैः तत्राप्यापदाक्रांतश्चेत्खड्गेन न तु वियवृत्त्यावा यद्यपि गीतमोऽनंतरं पापीयसीं वृत्तिमानिष्टेऽप्युतिस्मरेदुख
१२

शिलोंछवृत्त्या परितुष्टचित्तो धर्मं महांतं विरजं जुषाणः मय्यर्पितात्मा गृह एव तिष्ठन्नातिप्रसक्तः समुपैति शांतिं ४२ समुद्ध
रंतिये विप्रं सीदंतं मत्परायणं तान्नुद्धरिष्येन चिरादापद्भ्यो नौरिवार्णवात् ४३ सर्वाः समुद्धरेद्राजा पितेव व्यसनात्प्रजाः आत्मा
नमात्मनाधीरो यथा गजपतिर्गजान् ४४ एवंविधो नरपतिर्विमानेनार्कवर्चसा विधूयेहाशुभं कृत्स्नमिंद्रेण सह मोदते ४५
सीदन्विप्रो वणिक्वृत्त्या पण्यैरेवापदं तरेत् खड्गेन वाऽऽपदाक्रांतो न श्ववृत्त्या कथंचन ४६ वैश्यवृत्त्या तु राजन्यो जीवेन्मृगयया वाप
दि चरेद्वा विप्ररूपेण न श्ववृत्त्या कथंचन ४७ शूद्रवृत्तिं भजेद्वैश्यः शूद्रः कारुकटक्रियां कृच्छ्रान्मुक्तो न गर्ह्येण वृत्तिं लिप्सेत कर्म
णा ४८

जुधरांपण्यविक्रयाद्युत्कृष्टं मन्यते तथापि हिंसात्मकवाणिज्यहानिरेव श्रेष्ठेति भगवतो मतं नतु श्ववृत्त्या नीचसेवया ४६ तत्राप्यापदि मृगयया वा विप्ररूपेण वाध्य
ध्यापनादिना ४७ कारवः प्रतिलोमजविशेषा बरुडादयस्तेषां वृत्तिः कटादिक्रियां आपद्युत्तीर्णस्तु नानुकल्पेन वर्तेतेत्याह कृच्छ्रादिति ४८ ७१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं हि त्रिवर्गस्यासक्तस्य पुनर्गृहस्थस्यावश्यकान्पंचयज्ञानाह। वेदाध्ययनं ब्रह्मयज्ञः तेन ऋषीन् स्वधाकारेण पितॄन्। स्वाहाकारेण देवान्। बलिहरणेन भूतानि। अ-
न्नाद्यैरन्नोदकादिभिर्मनुष्यानिति ज्ञातव्यं यथोदयं विभवं तु सारतः इति श्रीधर हि शिविधत्ते मद्रूपाणीति ४९ आवश्यकं धर्ममुक्त्वा लोकानुसारं धर्ममाह। यदृच्छ-
यानुद्यमं विनाउपार्जितेन वाशुक्लेन स्वरस्यातक्षेन शुक्लेन धनेन वा भृत्यान्पोष्यान् ५० गृहस्थस्यापि निवृत्तिनिष्ठामेवाह कुटुंबेष्विति त्रिभिः। नक्षमाद्येत ईश्वर-

सा नृ

वेदाध्यायस्वधास्वाहाबल्यन्नाद्यैर्यथोदयं। देवर्षिपितृभूतानि मद्रूपाण्यन्वहं यजेत्॥४९॥ यदृच्छयोपपन्नेन शुक्लेनोपार्जितेन वा
धनेनापीडयन्भृत्यान्न्यायेनैवाहरेत्क्रतून्॥५०॥ कुटुंबेषु न सज्जेत न प्रमाद्येत्कुटुंब्यपि। विपश्चिन्नेश्वरंप श्येददृष्टमपि दृष्टवत्॥५१॥ नश्वरं
पुत्रदाराप्तबंधूनां संगमः पांथसंगमः। अनुदेहं वियंत्येते स्वप्नो निद्रानुगो यथा॥५२॥ इत्थं परिमृशन्मुक्तो गृहेष्वतिथिवद्वसन्॥ न
गृहैरनुबध्येत निर्ममो निरहंकृतः॥५३॥ कर्मभिर्गृहमेधीयैरिष्ट्वा मामेव भक्तिमान्। तिष्ठेद्वनं वोपविशेत्प्रजावान्वा परिव्रजेत्॥५४॥

निद्रायां प्रमत्तो न भवेत्। न तु दृष्टादृष्टार्थकर्मासक्तस्य कथमप्रमादः विचारेणेत्याह विपश्चिदिति ५१ तत्रापि दृष्टे वासक्तेरधिकत्वात्तेषां नश्वरतां प्रपंचयति॥
पुत्रादीनामेकत्र संगमः पंथानां प्रपायां संगम इव तत्र हेतुः अनुदेहं प्रतिदेहमेते वियंति नश्यंति निद्रानुवर्ती स्वप्नो निद्रायायेयथापैति ५२ अतिथिवत् उदासीनः॥
५३ अस्याप्याश्रमविकल्पमाह कर्मभिरिति गृहाश्रम एव तिष्ठेत् यदि प्रजावांस्तर्हि प्रव्रजेद्वा ५४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
७२

गृहाश्रेयोऽसंगदोषमाहयस्त्विति त्रिभिः ५५ बंधमेनाज्ञिनयेन दर्शयति अहोइति बाला आत्मजाः स्यास्मा आत्म(आत्म)मां विना अनाथाः संतः कथं जीविष्यंतीति ५६ गृहेयु
क्त आश्रयो वासनातेनआसक्तः विक्षिप्तदृदयं यस्य सःमूढः अधंतमः अतितामसीयोनिं ५७ इत्येकादशेसप्तदशः १७ अथाष्टदशे वृद्धस्य वैनाखस्य यतिगोचरं अधिकारं वि
शेषेणविशेषं चापि तत्र कमशाः नत्वधर्मानिहवक्ष्यमिति आयुषः तृतीयं भागं पंचसप्ततिवर्षपर्यंतं ततः परं क्षीणेंद्रियस्य पक्कविरागेऽपि संन्यासाधिकारः स्यादि

यस्त्वासक्तमतिर्गेहे पुत्रवित्तैषणातुरः स्त्रैणः कृपणधीर्मूढो ममाहमिति बध्यते ५५ अहो मे पितरौ वृद्धौ भार्या बालात्मजात्मजाः ॥ ॥
अनाथा मामृते दीनाः कथं जीवंति दुःखिताः ५६ एवं गृहाशयाक्षिप्तहृदयो मूढधीरयं अतृप्तस्ताननुध्यायन्मृतोंऽधं विशते तमः
५७ इति श्रीभागवते महापुराणे एकादशस्कंधे सप्तदशोऽध्यायः १७ श्रीभगवानुवाच वनं विविक्षुः पुत्रेषु भार्यां न्यस्य सहैव वा
वन एव वसेच्छांतस्तृतीयं भागमायुषः १ कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिं प्रकल्पयेत् वसीत वल्कलं वासस्तृणपर्णाजिनानि च २ केश
रोमनखश्मश्रुमलानि बिभृयाद्दतः नधावेदप्सु मज्जेत त्रिकालं स्थंडिलेशयः ३ ग्रीष्मे तप्येत पंचाग्नीन्वर्षास्वासारषाड्जले आकंठम
ग्नः शिशिरे एवंवृत्तस्तपश्चरेत् ४ ॥ ॥

विभावः १ वसित परीदधीत २ दतः दंतान्नधावेत् नशोधयेत् त्रिकालमप्सुमज्जेत् मुशलवत्स्नायात् स्थंडिलेशायः न्द्रूमी
शायी ३ तप्येत पंचाग्नीन् सूर्येण सह चतुर्दिक्षु अग्नीन् त्रिधा यात्मानं तापयेदित्यर्थः आसारषाट् आसारं धारासंपातं सहत इति तथा अन्याचकारां नाम व्रतं चरेत्
जले आकंठमग्नः उदकवासं नाम व्रतं चरेत् ४ ॥ ॥ ॥

राम
७२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नलूखलेन वाऽश्मना वा कंडूयति कंडयतीति तथा। दंता एवोलूखलं यस्य सः तथा ५ संचिनुयात् आहरेत्। अन्यदा कालांतरे आहृतं कालांतरेणाददीत लक्षे नवेनवे ऽन्नाद्ये
पुराणं तु परित्यजेदिति नारदोक्तेः ६ कालचोदितान् आश्वयुज्यादीन् ७ किंच अग्निहोत्रमिति मुनेश्च निगमे वेदवादिनिः ८ अस्य निष्कामस्य फलमाह एवमिति धमनिति

अग्निपक्वं समश्नीयात्कालपक्वमथापि वा। उलूखलाश्मकुट्टो वा दंतोलूखल एव वा॥५॥ स्वयं संचिनुयात्सर्वमात्मनो वृत्तिकारणं॥
देशकालबलाभिज्ञो ना ददीतान्यदाहृतं॥६॥ वन्यैश्चरुपुरोडाशैर्निर्वपेत्कालचोदितान्॥ न तु श्रौतेन पशुना मांसं यजेत वनाश्रमी॥७॥
अग्निहोत्रं च दर्शश्च पूर्णमासश्च पूर्ववत्। चातुर्मास्यानि च मुनेराम्नातानि च नैगमैः॥८॥ एवं चीर्णेन तपसा मुनिर्धमनिसंततः॥ मां तपो
मयमाराध्य ऋषिलोकादुपैति मां॥९॥ यस्त्वेतत्कृच्छ्रतश्चीर्णं तपो निश्श्रेयसं महत्॥ कामायाल्पीयसे युंज्याद्बालिशः कोऽपरस्ततः॥१०॥

शिराभिः संततः आप्तः यावज्जीवं कृतेन तपसा शुक्रमांसदृश्मयः। ऋषिलोकात् महर्लोकादिक्रमेण अयं नावः। अंतःकरणशुद्धिं किंतु किंवा राऽत्रैव भगवन्मुच्यते इति
बंधकत्वात् फलस्पृहेन नकर्मणा मुच्यत इति ९ तं सकामा निंदति यस्त्विति निश्श्रेयसं मोक्षफलं अल्पीयसे आविरिंच्यादल्पमेव तस्मै १०॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०प०
७३

एवं यावज्जीवं वर्तमानस्य मोक्षस्तृतीयभागावसाने ब्रह्मचर्यं विरागेऽपि संन्यासाधिकारः यदि तु ततोऽप्यागेव स्वधर्मशिक्षितो न चेत्तदपि सम्यग्विरक्तः विरक्तो वा न त्वविरक्तस्य
रुत्यमाह यदेति जातो वेपथुः कंपो देहो यस्य सः ११ विरक्तं प्रत्याह यदेति १२ त्यादोक्तस्य माह इष्ट्वेति यथोपदेशं श्राद्धाष्टकपूर्वकं प्राजापत्येष्टयां मामिष्ट्वा स्वप्राणेष्वात्मनि
१३ संन्यासे विद्वानेव नितान्तं विगणय्य संन्यसेदेवेत्याचार्येनाह विप्रस्येति केनाग्निश्रायेणकर्वतिमाह ह्यस्ययमिति परं परब्रह्म १४ एवं प्रव्रजितस्य धर्मानाह विन्नवाचे

यदासौ नियमे कस्मिञ्ज्वरया जातवेपथुः आत्मन्यग्नीन्समारोप्य मद्भिन्नोऽग्निं समाविशेत् ११ यदा कर्मविपाकेषु लोकेषु निरयात्मसु
विरागो जायते सम्यङ्न्यस्ताग्निः प्रव्रजेत्ततः १२ इष्ट्वा यथोपदेशं मां दत्त्वा सर्वस्वमृत्विजे अग्नीन्स्वप्राण आवेश्य निरपेक्षः परिव्रजेत् १३
विप्रस्यैव संन्यसतो देवा दारादिरूपिणः विघ्नान्कुर्वन्त्ययं ह्यस्मानाक्रम्य समियात्परं १४ बिभृयाच्चेन्मुनिर्वासः कौपीनाच्छादनं परं
त्यक्तं न दंडपात्राभ्यामन्यत्किंचिदनापदि १५ दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलं सत्यपूतं वदेद्वाचं मनःपूतं समाचरेत् १६ मौ
नानीहानिलायामा दंडा वाग्देहचेतसां नह्येते यस्य संत्यंग वेणुभिर्न भवेद्यतिः १७ ॥ ॥

दिति परं कौपीनादन्यद्वासो यदि धारयितुमिच्छति तर्हि कौपीनमाच्छाद्यते यावता तावन्मात्रं धारयेदित्यर्थः त्यक्तं प्रैषोच्चारात्पूर्वमेव अतोऽन्यत्किंचिदपि न बिभृयात् इदं दंडपात्रा
[illegible] पुस्याख्यकजलपात्र रूपलक्षणं १५ मनःपूतं मनसा सम्यग्विचार्य यद्युक्तं तदाचरेत् १६ मौनं वाचो दंडः अनीहा काममम्यकर्मत्यागो देहस्य प्राणायामश्चेतसः॥ ७३
[illegible] यो दंडा यस्य न संति अंग हे उद्धव अंग एव न वेणुभिरिति वा १७ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...र्णेष्विति ब्राह्मणेष्वेव वृत्तिभेदेन चतुर्विधेषु पूर्वपूर्वस्मिन्नेवाभिगर्ह्यानभिशस्तपतितान् असंक्लृप्तानत्रावश्यंलाभोभविष्यतीति पूर्वमनुद्दिष्टान् १८ बहिर्ग्रामात्पा
वितंप्रोक्षणादिभिःशोधितं विभज्य विष्णुब्रह्मार्कभूतेभ्यः शेषमित्यधिकाहरणंनिरस्तं याचितमितिपात्रेमाधुकरेणयाचितमन्नंचेत्तर्हि विभज्यभुंजीतनतुयाचितादि
नैतच्चतुष्टयमित्यर्थः माधुकरेतुनैवेद्यंनैवेद्येनोनेप्सुविध्यतोनैवेद्यकंदिद्यदस्तुभुवितयंनौतिकंबहिरिरितिस्मृतेः मधातदानीकेनापियाचितंचेत्तन्मध्येतस्मिन्नकिंचिद्वि

भिक्षांचतुर्षुवर्णेषुविगर्ह्यान्वर्जयंश्चरेत् सप्तागारानसंक्लृप्तांस्तुष्येल्लब्धेनतावता १८ बहिर्जलाशयंगत्वातत्रोपस्पृश्यवाग्यतः विभ
ज्यपावितंशेषंभुंजीताशेषमाहृतं १९ एकश्चरेन्महीमेतांनिःसंगसंजितेंद्रियः आत्मक्रीड आत्मरत आत्मवान्समदर्शनः २० विवि
क्तक्षेमशरणोमद्भावविमलाशयः आत्मानंचिंतयेदेकमभेदेनमयामुनिः २१ अन्वीक्षेतात्मनोबंधंमोक्षंचज्ञाननिष्ठया बंधइंद्रिय
विक्षेपोमोक्षएषांचसंयमः २२ तस्मान्नियम्यषड्वर्गंमद्भावेनचरेन्मुनिः विरक्तःक्षुद्रकामेभ्योलब्ध्वात्मनिसुखंमहत् २३ ॥ ॥

भज्यदत्त्वा १९ किंच एकश्चरेदिति आत्मन्येवक्रीडाकौतुकंयस्यसः आत्मन्येवचरतःसंतुष्टः आत्मवान्धीरः २० विविक्तंविजनंक्षेमंनिर्भयंशरणंस्थानंयस्यसः मयिना
वेनविमलःआशयोयस्यसः २१ बंधंमोक्षंचकेनबंधःकेनवामोक्षइतिताववाहबंधइति २२ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुराणीह ह्यादिमंति ग्रामास्त्वद्वहिताः व्रजगोष्ठानि गानामार्थानि यात्रिकजनसमूहान् २४ यतः शिलवृत्त्या शालेन तदीयेनांधसा अन्नेन शुद्धसत्वः सन् निवृत्तमोहः संसि
ध्यति मुच्येत २५ ननु मिष्टान्नं विहाय कथं शिलान्नेन वृत्तिः स्यादत आह नेति एतद्दृश्यमानं मिष्टान्नादि वस्तु तया न पश्येत् यतो विनश्यति अतः इहामुत्र च लोके असक्तचि
त्तः सन् चिकीर्षितान्तदर्थं क्रियाद्विरमेत् २६ ननु तथापि ये बंधिनो तां सुखहेतुत्वात्तच्चिंतावतः कुतो विरागः स्यात्तत्राह यदेतदिति एतज्जगत् ममतास्पदं मनोवाक् या

पुरग्रामव्रजान्सार्थान् भिक्षार्थं प्रविशंश्चरेत् । पुण्यदेशसरिच्छैलवनाश्रमवतीं महीं ॥ २४ ॥ वानप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरेत् ।
संसिध्यत्याश्वसंमोहः शुद्धसत्वः शिलांधसा ॥ २५ ॥ नैतद्वस्तुतया पश्येत् दृश्यमानं विनश्यति । असक्तचित्तो विरमेदिहामुत्रचिकीर्षि
तात् ॥ २६ ॥ यदेतदात्मनि जगत् मनोवाक्प्राणसंहतं । सर्वं मायेति तर्केण स्वस्थः त्यक्त्वा न तत्स्मरेत् ॥ २७ ॥ ॥

प्राणैः संहतं सहितमहंकारास्पदं शरीरं च सर्वं तत्स्वर्गं सुखं च आत्मनि तु निमायामात्रमिति तर्केण स्वस्मादिदृष्टं तेन स्वस्थः स्वस्थ आत्मनि स्थः सन् तु न पुनः तत्र स्मरेत् न चिंत
येत् ॥ २७ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंवनस्थादीनांधर्मानुक्त्वापरमहंसधर्मानाहज्ञाननिष्ठइतिसप्तभिः। बहिरविरक्तोमुमुक्षुःसन्योज्ञाननिष्ठोवामोक्षेप्यनपेक्षोमद्भक्तोवासलिंगान्त्रिदंडादिस
हितानाश्रमानाश्रमान्धर्मांस्त्यक्त्वातदासक्तिंत्यक्त्वायथोचितंधर्ममाचरेदित्यर्थः नपुनरत्यंतत्यागएवविवक्षितःपुनर्धर्मविधानात्। अक्रियत्वमपीत्तरार्धस्यायेवत्समागएर
त्वाच्च। नहिपूर्वस्मात्कोविशेषःतमाह। अविधिगोचरःविधिकिंकरोनस्यादिति। एतदेवस्फुटीकरिष्यति।शौचमाचमनंस्नानंनतुचोदनयाचरेदित्यादिना। २८ कथंचरेत्

ज्ञाननिष्ठोविरक्तोवामद्भक्तोवाऽनपेक्षकः। सलिंगानाश्रमांस्त्यक्त्वाचरेदविधिगोचरः २८। बुधोबालकवत्क्रीडेत्कुशलोजडवच्चरेत्
वदेदुन्मत्तवद्विद्वान्गोचर्यांनैगमश्चरेत्॥२९। वेदवादरतोनस्यान्नपाषंडीनहैतुकः।शुष्कवाद विवादे कंचित्पक्षंसमाचरे म
त्।३०।नोद्विजेतजनाद्धीरोजनंचोद्वेजयेन्नतु।अतिवादांस्तितिक्षेतनावमन्येतकंचन।देहमुद्दिश्यपशुवद्वैरंकुर्यान्नकेनचित्
३१।एकएवपरोह्यात्माभूतेष्वात्मन्यवस्थितः।यथेंदुरुदपात्रेषुभूतान्येकात्मकानिच।३२॥ ॥

तदाह। बुधः।विवेकवानपिबालकवत्मानावमानविवेकशून्यः। कुशलःनिपुणोऽपिजडवत्फलानुसंधानाभावेन। विद्वान्पंडितोऽपितन्मत्तवत्लोकरंजनाभावेन
नैगमःवेदार्थनिष्ठोऽपिगोचर्यांअनियताचारम्चर २९। वेदवादरतःकर्मकांडव्याख्यानादिनिष्ठः। हैतुकःकेवलतर्कनिष्ठःशुष्कवादेनिःप्रयोजनगोष्ठ्यांयोविवादस्त
स्मिन् ३०। अतिवादान्दुरुक्तानि ३१। आत्मदृष्ट्यातावद्वैरंकारणंनास्तीत्युक्तं एकएवेति दिहदृष्ट्यापिनास्तीत्याह। भूतानिचदेहाअपिकारणरूपेणैकात्मकानि
॥३२

पारवती श्रुतिवि नस्यात्उपाना

भा॰ए॰टी॰
८५

दैवतंत्रितं दैवाधीनं यतः ॥३३॥ अलंतर्हि निद्राप्रयत्नेनापि तत्राह आहारार्थमात्रार्थं समीहेतैव युतः तस्य प्राणधारणं युक्तं सम्यक् ॥ कथं तेन प्राणधारणेन तत्त्वं विचा
र्यते किं तेनापि तत्राह तद्विज्ञायेति ॥३४॥ तर्हि किं मिष्टान्नादिकमयाच्यमेव केनैव स्तुतमित्याह यदृच्छयेति ॥३५॥ ययाऽहमीश्वरो लीलया चरामि तथा ज्ञानी ज्ञाननिष्ठः अनास
क्तः कथं तत्र विधिः किंकरत्वेन तस्य ज्ञाननिष्ठाविरोधादित्यर्थः ॥३६॥ कुतो विधिकिंकरता नावकृतस्य तत्राह नहि तस्य विकल्पाख्या भेदप्रतीतिः नन्वस्ति सा सत्यं या

अलब्ध्वा न विषीदेत काले कालेऽशनं क्वचित् लब्ध्वा न हृष्येद्धृतिमानुभयं दैवतंत्रितं ॥३३॥ आहारार्थं समीहेत युक्तं तत्प्राणधारणं तत्त्वं
विमृश्यते तेन तद्विज्ञाय विमुच्यते ॥३४॥ यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुतापरं तथा वासस्तथा शय्यां प्राप्तं प्राप्तं भजेन्मुनिः ॥३५॥ शौच
माचमनं स्नानं न तु चोदनया चरेत् अन्यांश्च नियमान् ज्ञानी यथाऽहं लीलयेश्वरः ॥३६॥ नहि तस्य विकल्पाख्या या च मद्वीक्षया हता
आदेहांतात् क्वचित्ख्यातिस्ततः संपद्यते मया ॥३७॥ दुःखोदर्केषु कामेषु जातनिर्वेद आत्मवान् अजिज्ञासितमद्धर्मो गुरुं मुनि
मुपव्रजेत् ॥३८॥ ॥

कदाचित्
चासीन्मा ऽपि मद्वीक्षया ज्ञानेन हता ननु न हता पुनर्दृश्यमानत्वात् तत्राह आदेहांतात् क्वचित् बाधितैव ख्यातिर्भवति ॥३७॥ तदेवं विरक्तस्यापरोक्षज्ञानवतः संन्या
संतद्धर्मांश्चोक्त्वा केवलं वैराग्यवंतं विविदिषुमुत्पाह दुःखोदर्केष्विति नाजिज्ञासितो मद्धर्मो मित्या सिसाधनं येन सः ॥३८॥ ॥

राम
८५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मामेव॰ दृष्टैवगुरुंपरिचरेत् ततंपरमेकश्चरेदित्यादिधर्मैर्वर्तितेतिभावः ३९ अनधिकारीणः संन्यासेनिंदतिक्षसंयस्त्विति प्रचंडोत्यासक्तइंद्रियसारथिर्बुद्धिर्यस्यस

तावत्परिचरेद्भक्तः श्रद्धावाननुसूयकः यावद्ब्रह्मविजानीयात्मामेवगुरुमादृतः ३९ यस्त्वसंयतषड्वर्गः प्रचंडेंद्रियसारथिः॥
ज्ञानवैराग्यरहितस्त्रिदंडमुपजीवति ४० सुरानात्मानमात्मस्थंनिह्नुतेमांचधर्महा अविपक्वकषायोस्मादमुष्माच्चविहीयते ४१
भिक्षोर्धर्मःशमोहिंसातपईक्षावनौकसः गृहिणोभूतरक्षेज्याद्विजस्याचार्यसेवनं ४२ ब्रह्मचर्यंतपःशौचंसंतोषोभूतसौहृदं॥
गृहस्थस्याप्यृतौगंतुःसर्वेषांमदुपासनं ४३॥ ॥

ज्यो

४० सुरान्यष्टव्यान्देवान्स्वात्मानंच आत्मस्थंमांचनिह्नुतेप्रतारयति निह्नवफलमाह अस्मादिति ४१ वर्णाश्रमधर्मानाह भिक्षोरिति ४२ अन्यधर्मान्कांश्चि
त्गृहस्थेऽप्यतिदिशति ब्रह्मचर्यमिति शौचंरागादिराहित्यं तस्यब्रह्मचर्यप्रकारमाह ऋतौगंतुरिति ४३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंभूतवर्णाश्रमधर्मफलमाह इति मामिति ॥ इदानीं मद्भक्तिं विंदते ॥४४॥ ततः किमत आह भक्त्येति ॥ महेश्वरत्वे हेतुः सर्वेषां प्रभवाप्ययं सर्वस्योत्पत्त्यपायौ यस्मात् ॥ अत एव त
त्कारणं मामां ब्रह्मरूपं वैकुंठनिवासिनं ॥ यद्वा ब्रह्मणो वेदस्य कारणं मा उपयाति सामीप्येन प्राप्नोति ॥४५॥ तत्र हेतुः भक्त एवेत्याह ॥ इति एवंभूतेन स्वधर्मेण निर्णिक्तं शुद्धं स
त्वं

इति मां यः स्वधर्मेण भजन्नित्यमनन्यभाक् ॥ सर्वभूतेषु मद्भावो मद्भक्तिं विंदते चिरात् ॥४४॥ भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरं
सर्वेषां प्रभवाप्ययं ब्रह्मकारणं मोपयाति सः ॥४५॥ इति स्वधर्मनिर्णिक्तसत्त्वो निर्ज्ञातमद्गतिः ॥ ज्ञानविज्ञानसंपन्नो न चिरात्समुपैति मां ॥४६॥ व २
र्णाश्रमवतां धर्म एष आचारलक्षणः ॥ स एव मद्भक्तियुतो निःश्रेयसकरः परः ॥४७॥ एतत्तेऽभिहितं साधो भवान्पृच्छति यच्च मां ॥ यथा
स्वधर्मसंयुक्तो भक्तो मां समियात्परं ॥४८॥ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे श्रीभगवदुद्धवसंवादे वर्णाश्रमाचारक
थनं नाम अष्टादशोऽध्यायः ॥१८॥ ॥

प्रस
त्त्वं सः अत एव निर्ज्ञाता मद्गतिरैश्वर्यं येन ॥४६॥ उक्तमर्थं संक्षिप्याह ॥ यश्च आचारलक्षणः पितृलोकप्राप्तिफलः मद्भक्तियुतः मदर्पणेन कृतः ॥४७॥ प्रकरणार्थमुपसंह ७६
रति ॥ एतच्चेति ॥ ते अभिहितं यथा भक्तो भूत्वा मां परं संप्राप्नुयादिति ॥४८॥ इति श्रीभागवते एकादशे अष्टादशः ॥१८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानादेर्निर्णयः पूर्वं ह्युक्तो ह्याश्रमधर्मतः । अथोनविंशतितमे ज्ञानादेस्मा ग उच्यते । तदेवं तर्कतो बाधितोऽपि देहादिप्रपंचो यावदपरोक्षानुभवेन दृष्टो मोहादिरिव न लीयते तावत्
तानाभासस्ततो मुक्तिरित्युक्तं । आदेहांतात्कचित्ख्यातिस्ततः संपद्यते मयेत्यादिना । यस्य तु परोक्षानुभवेन प्रपंचो लीनप्राय स्तस्य न किंचित्कृत्यमस्तीत्याह य । इति विद्या
अनुभवः तत्पर्यंतेन श्रुतेन संपन्नः । अत एवात्मवान् शास्त्रतत्वः । नानुमानिकः केवलपरोक्षज्ञानवान्न भवति । अनेन कारणेन पाकश्रुत्यनुकूलं तर्कतो निर्णीतार्थ इत्यर्थः

श्रीभगवानुवाच । योविद्याश्रुतसंपन्न आत्मवान्नानुमानिकः । मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि संन्यसेत् १ ज्ञानिनस्त्वहमे
वेष्टः स्वार्थो हेतुश्च संमतः । स्वर्गश्चैवापवर्गश्च नान्योऽर्थो मदृते प्रियः २ ज्ञानविज्ञानसंसिद्धाः पदं श्रेष्ठं विदुर्मम । ज्ञानी प्रियतमोऽतो
मे ज्ञानेनासौ बिभर्ति मां ३ तपस्तीर्थं जपो दानं पवित्राणीतराणि च । नालं कुर्वंति तां सिद्धिं या ज्ञानकलया कृता ४ तस्मात् ज्ञानेन
सहितं ज्ञात्वा स्वात्मानमुद्धव । ज्ञानविज्ञानसंपन्नो भज मां भक्तिभावितः ५ ॥ ॥

सद्वैतं तन्निवृत्तिसाधनं च मयि मायामात्रमिति ज्ञात्वा ज्ञानं च तत्साधनं संन्यसेत् । स्वयमेव विध्वंसमायासोनाम । अत्र हेतुमाह ज्ञानिन इति । यस्मादहमेव तस्येष्टः अपे
क्षितः स्वार्थः फलहेतुः तत्साधनं च संमतः । स्वर्गोऽभ्युदयश्च अपवर्गः संसारनिवृत्तिश्च । अतस्तस्य न प्राप्यं कृत्यं वा किंचिदस्तीत्यर्थः २ अत्र विद्वदनुभवं प्रमाणयति ज्ञानेति
यथोक्तं ज्ञानिनमभिन्नं इति ज्ञानीति । यतोऽसौ ज्ञानेन मां धारयति ३ तस्य ज्ञानं स्तौति तप इति । अलं समर्थं ज्ञानस्य कलया लेशेन ४ ज्ञानेन सहितं तत्पर्यंतं यथा न्नवति
तथा ज्ञात्वा तत्संपन्नः सन् मामेव भज अन्यत्सर्वं त्यजेत्यर्थः ५ ॥ ॥

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०टी०
८७

तस्यपृच्छस्यायार्थंपूर्वेषांवृत्तमाहज्ञानेनेति मामेवंसंसिद्धिंप्रापुः ६ तदेवज्ञानंसंक्षेपतउपदिशति त्वयीति त्रिविधः आध्यात्मिकादिविकारःदेहादिःसःमायान्तरापतति परमा
र्थं यदयस्मात्स्वरूपेणमध्यएवापतति रज्जौसर्पमालादिवत् नाद्यपवर्गयोः नत्वादावंतेचास्ति अतःयत्पुनरस्यविकारस्यामीजन्मादयःस्फुरंतितद्रातस्यतत्वाधिष्ठा
ननुतस्यकिंनकिंचिदित्यर्थः तस्यापिवस्तुतोनसंति तस्यासत्वादित्याहआद्यंतयोरिति असतःसर्पादेःआद्यंतयोर्यदस्तिरज्ज्वादितदेवमध्येपिनतुसर्पादि तद्व
दयंविकारोनास्तीत्यर्थः यथाआद्यंतयोर्यदस्तितन्मध्येप्यस्त्येव नतस्यजन्मादयःसंति अतस्त्वंनिर्विकारंब्रह्मेति ७ ज्ञानादेर्विशेषंजिज्ञासुःपृच्छति ज्ञानमिति विशुद्ध
प्य

ज्ञानविज्ञानयज्ञेनमामिष्ट्वाऽत्मानमात्मनि सर्वयज्ञपतिंमांवैसंसिद्धिंमुनयोऽगमन् ॥ ६ ॥ त्वय्युद्धवाश्रयतियस्त्रिविधोविकारो ॥ मायांत
राऽपततिनाद्यपवर्गयोर्यत् ॥ जन्मादयोऽस्ययदमीतवतस्यकिंस्युराद्यंतयोर्यदसतोऽस्तितदेवमध्ये ॥ ७ ॥ उद्धवउवाच ॥ ज्ञानंवि
शुद्धंविपुलंयथैतत्वैराग्यविज्ञानयुतंपुराणं ॥ आख्याहिविश्वेश्वरविश्वमूर्तेत्वद्भक्तियोगंचमहद्विमृग्यं ॥ ८ ॥ तापत्रयेणाभिह
तस्यघोरेसंतप्यमानस्यभवाध्वनीश ॥ पश्यामिनान्यच्छरणंतवांघ्रिद्वंद्वातपत्रादमृताभिवर्षात् ॥ ९ ॥ ॥

मेतत्ज्ञानंविपुलंनिश्चितंयथाभवतितथाकथयेति ॥ महद्भिर्ब्रह्मादिभिर्विमृग्यं ॥ ८ ॥ महद्भिर्मृग्यत्वमभिनयेनाह तापत्रयेणाभितोहतस्यआधिदैविकादितापैरभिहतस्य
[illegible] तप्यमानस्य अंघ्रिद्वंद्वमेवातपत्रंतच्छत्रं त्रिविधतापनिवारत्वात्तुकत्वात् तस्मात् नकेवलंआतपत्रात् किंतुअमृतमप्यभितोवर्षतियत्तस्मात् ॥ ९ ॥ ॥ ८७
वातु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतिकृपामुत्पादयन्नाह दष्टमिति । अस्मिन् विले संसारकूपे पतितं । तत्र च कालाहिना दष्टं । एवमपि क्षुद्रसुखेष्वेव गुरुस्तर्षः तृष्णा यस्य तं । दर्शयमानः कथं समु
द्धरणीय इत्यचिंतयन्नाह । अपवर्ग्यैः अपवर्गबोधकैः वागमृतैरासिंचेति । १० । तद्विषयामाधर्यं विकत्थनायां निर्णीतिमहं कस्मात्सीत्याह इच्छामीति । ११ । १२ । ज्ञानादिभिरु मि

दष्टं जनं संपतितं बिलेऽस्मिन् कालाहिना क्षुद्रसुखोरुतर्षं । समुद्धरैनं कृपयाऽपवर्ग्यैर्वचोभिरासिंच महानुभाव ॥ १० ॥ श्रीभगवा
नुवाच ॥ इत्थमेतत्पुरा राजा भीष्मं धर्मभृतां वरं । अजातशत्रुः पप्रच्छ सर्वेषां नोऽनुशृण्वतां ॥ ११ ॥ निवृत्ते भारते युद्धे सुहृन्निधन
विह्वलः । श्रुत्वा धर्मान्बहून्पश्चान्मोक्षधर्मानपृच्छत ॥ १२ ॥ तानहं तेऽभिधास्यामि देवव्रतमुखाच्छ्रुतान् । ज्ञानवैराग्यविज्ञानश्रद्धा विज्ञान
भक्त्युपबृंहितान् ॥ १३ ॥ नवैकादश पंच त्रीन् भावान्भूतेषु येन वै । ईक्षेताथैकमप्येषु तज्ज्ञानं मम निश्चितं ॥ १४ ॥ ॥ ॥

पबृंहितान् तत्सहितानित्यर्थः । १३ । तत्र ज्ञानं कथयति नवेति । प्रकृतिपुरुषमहदहंकारपंचतन्मात्राणि । एकादशेंद्रियाणि । पंचमहाभूतानि । त्रयो गुणाः । एता
न् भावान् अष्टाविंशतितत्त्वानि भूतेषु ब्रह्मादिस्थावरांतेषु कार्येष्वनुगतानि येन ज्ञानेनेक्षेत । अथ एष्वपि तावेषु एकं परमात्मतत्त्वं अनुगतं येनेक्षेत । कार्यका
रणात्मकं जगत्प्रपन्नं परमकारणात्मकमेवैतत् ननु ततः पृथगिति येन पश्येत् तत् ज्ञानमित्यर्थः । १४ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विज्ञानमाह एतद्देवेति श्लोकार्द्धेन । यत् यदा येनैकेनानुगतानि कालकाष्ठावान्स्पूर्वमेतत्तान्तथापूर्वकेन्देतत्किंतु तदेकं परमकारणं ब्रह्मैव । तदा एतदेव विज्ञान
मुच्यते । एतदुक्तं भवति । परोक्षज्ञानेनापरोक्षज्ञानमसन्दिग्धो हादिविवनिवृत्तम्नोत्रत्राजगत्प्रपञ्चस्यात्मनः पृथक्सदिति । तमस्यतेश्च परोक्षज्ञानेनबाधितमेवजी
वन्मुक्तः संस्कारशेषप्रपञ्चभर्ति । ततः परं नप्रपञ्चप्रतीतिः । अतः परोक्षापरोक्षज्ञानेनज्ञानविज्ञानशब्दाभ्यामुच्यते इति । १५ एकेनसर्वकार्याणामनुगतिं कार्याणां कारणा

एतदेव हि विज्ञानं नतथैकेनयेनयत् । स्थित्युत्पत्त्यप्ययान्पश्येद्भावानां त्रिगुणात्मनां । १५ । आदावन्ते च मध्ये च सृज्यात्सृज्यं यदन्विय
यात् पुनस्तत्प्रतिसंक्रामे यच्छिष्येत तदेव सत् । १६ ॥

द्व [illegible] धगमत्वं चोपपादयति सार्द्धेन । तत्र यदि न कदाचिदपी दृश्यं जगदित्यादिमते नैनैतेषां भावानामुत्पत्त्यादयो न स्युः तर्हि कारणस्यैकस्याभावादेकात्मता मिथ्यात्वं राम
न [illegible] अतस्तेषामुत्पत्त्यादीन्साधयति स्थितीति । त्रिगुणात्मानां सावयवानामित्यर्थः । विमतं भावजातमुत्पत्त्यादिमत् सावयवत्वात् घटादिवदिति प्रयोगः । ततश्च आदौ उत्पत्तेः अन्ते ७७
द [illegible] एवं कारणत्वेन मध्ये चाश्रयत्वेन सृज्यात्सृज्यं कार्यात्कार्यान्तरं प्रतिपद्यन्वियात् अनुगच्छेत् तत्प्रतिसंक्रमे तेषां प्रलये च यदवशिष्येत तदेव सदिति प्रयोदिस
घी: १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वै...प्रमादश्रुतिरितिद्वाभ्यां श्रुतिः नेह नानास्ति किंचनेत्यादि प्रत्यक्षं घटादिकार्यं तंत्वादिव्यतिरेकेण न दृश्यते चैतन्यव्यतिरेकेण च न किंचित् दृश्यत इति ऐति
ह्यं महाजनप्रसिद्धिः अनुमानं विमतं मिथ्या दृश्यत्वात् शुक्तिरजतवत् इत्यादि एवं प्रमाणचतुष्टयं एतेष्वनवस्थानात् एतैर्बाधितत्वात् स एवं सवितृगतं सत्यमात्मतत्त्वं
दि परिपश्यन् विकल्पस्य च मिथ्यात्वात्ततो विरज्यते विरक्तो न वर्तत इत्यर्थः १७ नच वेदोक्तस्वर्गादिसुखाशयो न विरज्यते इत्याह कर्मणामिति आविरिंच्यात् ब्रह्मलोकपर्यंतं अद

श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयं प्रमाणेष्वनवस्थानाद्विकल्पात्स विरज्यते १७ कर्मणां परिणामित्वादाविरिंच्यादमंगलं विप
श्चिन्नश्वरं पश्येदद्दृष्टमपि दृष्टवत् १८ भक्तियोगः पुरैवोक्तः प्रीयमाणाय तेनघ पुनश्च कथयिष्यामि मद्भक्तेः कारणं परं १९
श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनं परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम २० आदरः परिचर्यायां सर्वांगैरभिवंदनं म
द्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः २१

ष्टमपि सुखं अमंगलं दुःखरूपं नश्वरं च पश्येत् १८ भक्तियोगं सकारणमाह भक्तियोगः पूर्वमुक्त एव तथापि तस्मिन् प्रीतिं प्राप्नुवते तुभ्यं पुनश्च कथयिष्यामि
१९ श्रवणादरः श्रद्धेति सर्वत्रानुषज्यते मदनुकीर्तनं श्रवणानंतरं मत्कथाव्याख्यानमित्यर्थः २०

१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
८ए

अंगचेष्टा लौकिकी क्रिया वचसा लौकिकेनापि मद्गुणानामीरणं कथनं २२ मदर्थे मद्भजनार्थं तद्विरोधिनो धर्मस्य परित्यागः भोगस्य तत्साधनस्य चंदनादेः सुखे
सा... गोपलालनादेः दृष्टादि वैदिकं यत्कर्मेति तदपि मदर्थं कृतं भक्तेः कारणमित्यर्थः २३ ननु किं भवं मद्भक्त्या संजायते अस्य जनस्य अन्यः कोऽर्थः साधनरूपः साध्य
रूपो वा अवशिष्यते सर्वोऽपि स्वत एव भवतीत्यर्थः २४ किं बहुना चित्तमेवांतर्बहिर्निविष्टं मया निर्णयोः कारणं तदेवाह यदात्मनीति द्वाभ्यां यदा त्वात्मनि मयीश्वरे नि

मदर्थेष्वंगचेष्टा च वचसा मद्गुणेरणं । मय्यर्पणं च मनसः सर्वकामविवर्जनं २२ मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च । इष्टं दत्तं हुतं
जप्तं मदर्थं यद्व्रतं तपः २३ एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनां । मयि संजायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते २४ यदात्म
न्यर्पितं चित्तं शांतं सत्त्वोपबृंहितं । धर्मं ज्ञानं सवैराग्यमैश्वर्यं चाभिपद्यते २५ यदर्पितं तद्विकल्पे इंद्रियैः परिधावति । रजस्व
लं चासन्निष्ठं चित्तं विद्धि विपर्ययं २६ धर्मो मद्भक्तिकृत्प्रोक्तो ज्ञानं चैकात्म्यदर्शनं । गुणेष्वसंगो वैराग्यमैश्वर्यं चाणिमादयः २७

त्मन्यर्पितं तदा पुमान् धर्मादीन् प्राप्नोत्येव २५ एतद्व्यतिरेकेणाह द्रढयति यत्त्विति यदा तच्चित्तं विकल्पे देहगृहादावर्पितं सत् परिधावति तदाधिकं रजस्वलमस
न्निष्ठं च भवति ततश्च विपर्ययं च अधर्मादिकं विद्धि २६ ध्यानेन प्रेतान् धर्मादीन् व्याचष्टे धर्म इति कृत् यतः स एव प्रोक्तः फलत्वेनोक्तः शास्त्रेषु २७ ८ए

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मादीनां महाजनश्च सिद्धान्तानामन्यथा भास्यात्तत्त्वाद्यमादिष्वपि संस्मातः स्वरूपतो वा किं चिह्नं लक्षणं एवं स्मादिति संभावनया तद्विशेषजिज्ञासुः पृच्छ
[illegible]शतिपञ्चभिः॥२७ इदं प्रश्नसहितं धनं च किं ॥२९ परंतिविद्यादीनां विशेषणं श्रीमंडनं ॥३०॥ प्रश्नानुपसंहरति विपरीतांश्च श्रीमादीन् ॥३२

उद्धव उवाच ॥ ॥यमः कतिविधः प्रोक्तो नियमो वारिकर्षण। कः शमः को दमः कृष्ण का तितिक्षा धृतिः प्रभो ॥२८ किं दानं किं तपः शौ
र्यं किं सत्यमृतमुच्यते। कस्त्यागः किं धनं चेष्टं को यज्ञः का च दक्षिणा ॥२९ पुंसः किंस्विद्बलं श्रीमन्भगो लाभश्च केशव। का विद्या ह्री
:परा का श्रीः किं सुखं दुःखमेव च ॥३० कः पंडितः कश्च मूर्खः कः पंथा उत्पथश्च कः। कः स्वर्गो नरकः कः स्वित्को बंधुरुत किं गृहं ॥३१
क क आढ्यः को दरिद्रो वा कृपणः कः क ईश्वरः। एतान्प्रश्नान्मम ब्रूहि विपरीतांश्च सत्पते ॥३२ श्रीभगवानुवाच ॥ ॥अहिंसा सत्यम
स्तेयमसंगो ह्रीरसंचयः। आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाऽभयं ॥३३ शौचं जपस्तपो होमः श्रद्धाऽऽतिथ्यं मदर्चनं ॥ तीर्थाट
नं परार्थेहा तुष्टिराचार्यसेवनं ॥३४ एते यमाः सनियमा उभयोर्द्वादश स्मृताः। पुंसामुपासितास्तात यथाकामं दुहंति हि ॥३५॥

यमनियमानाह अहिंसेति त्रिभिः। अस्तेयं मनसाऽपि परस्वाग्रहणं। आस्तिक्यं धर्मे विश्वासः॥३३ शौचं बाह्यमाभ्यंतरं चेति द्वयं। एते द्वादश नियमाः श्रद्धा धर्मा
दरः॥३४ उभयोः श्लोकयोर्ये स्मृतास्ते यमा नियमाश्च। यद्वा उभयोः प्रवृत्तनिवृत्तयोः मुमुक्षोर्यमा मुख्याः सकामस्य नियमा मुख्याः स्मृताः तत्र हेतु
माह हि यस्मात्तूपासिताः सेविताः सन्तः पुंसां प्रवृत्तानां निवृत्तानां च यथाकामं कामानुसारेण मोक्षमभ्युदयं च दुहंतीति ॥३५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०ए०
९०

मुमुक्षोरुपादेयान् यमादीन् हेयांश्च दुःखांतं हीन महाजनप्रसिद्धेभ्यो विलक्षणेन नाम्ना आह शम इत्यादिना यावत्समाप्ति। एतेनैव विपरीताश्च शमादयो सूचिते
याः शमो मन्निष्ठता बुद्धेः न तु शांतिमात्रं दम इंद्रियसंयमनं न तु चोरादिदमनं तितिक्षा विहितदुःखस्य संमर्षः सहनं न तु नारादेः जिह्वोपस्थयोर्वेगधारणं
धृतिः न तु खड्गमात्रं ३६ दंडो भूतद्रोहः तन्न्यासः त्यागो दानं न तु धनार्पणं कामत्यागः भोगानपेक्षा तपः न तु कृच्छ्रादि स्वभावो वासना तस्या जयः प्रतिबंधः
शौर्यं न तु विक्रांतिः सम्यग्बलेन तस्य दर्शनं मालोचनं सत्यं विषयत्वात् सत्यं न यथार्थभाषणमात्रं ३७ ऋतं च सूनृतां सत्यां प्रियां च वाकं एवं

शमो मन्निष्ठता बुद्धेर्दम इंद्रियसंयमः। तितिक्षा दुःखसंमर्षो जिह्वोपस्थजयो धृतिः ३६ दंडन्यासः परं दानं कामत्यागस्तपः
स्मृतं। स्वभावविजयः शौर्यं सत्यं च समदर्शनं ३७ ऋतं च सूनृता वाणी कविभिः परिकीर्तिता। कर्मस्वसंगमः शौचं त्यागः सं
न्यास उच्यते ३८ धर्म इष्टं धनं नृणां यज्ञोऽहं भगवत्तमः। दक्षिणा ज्ञानसंदेशः प्राणायामः परं बलं ३९ ॥ ॥

च ऋतं सत्ययोः स्फुट एव विवेकः कर्मण्यसंगं त्यागं व्याख्यातुमादौ ततोऽर्थभेदेन शौचं व्याचष्टे तस्यापि मलत्यागरूपत्वेन त्यागशब्देन प्रतीतेः कर्म
सु असंगमः अनासक्तिः शौचं त्यागस्तु संन्यास इति तयोर्भेद इत्यर्थः ३८ नृणां इष्टं धनं धर्मः न पश्वादिसाधारणं न भगवत्तमः परमैश्वर्यो ऽहमेव यज्ञ
म ... यज्ञोऽनुष्ठेयः न क्रियाबुद्ध्यर्थः यज्ञार्थं दानं दक्षिणा सा च ज्ञानोपदेशः न हिरण्यादिदानं तेन हि यज्ञरूपो विष्णुः प्राप्यते दुर्दमं मनः ९०
बलं तच्च मनोदमनहेतुत्वात् प्राणायाम इति ३९ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लाभं व्याचिख्यासुः प्रथमं भगं ततो भेदेन व्याचष्टे लोके तयोर् भेदप्रसिद्धेः । भगो नाम यत्तन्तु मे ऐश्वरो भावो मदीयं ऐश्वर्यादि षाड्गुण्यमित्यर्थः । उत्तमो ला-
भो मद्भक्तिः न पुत्रादिः विद्यात्वात्मनि भिदा प्रतीतस्य भेदस्य बाधः न शास्त्रमात्रं । अकर्मसु जुगुप्सा ह्रीः यत्त्वदर्शनीयाङ्गी न लज्जामात्रं ॥ ४० ॥ गुणा एव श्रीः मंडनं

भगो मे ऐश्वरो भावो लाभो मद्भक्तिरुत्तमः । विद्यात्मनि भिदा बाधो जुगुप्सा ह्रीरकर्मसु ॥ ४० ॥ श्रीर्गुणा नैरपेक्ष्याद्याः सुखं दुःख-
सुखात्ययः । दुःखं कामसुखापेक्षा पंडितो बंधमोक्षवित् ॥ ४१ ॥ मूर्खो देहाद्यहंबुद्धिः पंथा मन्निगमः स्मृतः । उत्पथश्चित्तविक्षेपः स्व-
र्गः सत्त्वगुणोदयः ॥ ४२ ॥ ॥

न किरीटादिः । दुःखसुखयोरत्ययः अतिक्रमः । अननुसंधानं सुखं न भोगः । विषयभोगापेक्षैव दुःखं न त्वग्निदाहादि बंधान्मोक्षं च यो वा वेत्ति स पंडितः
न विद्वन्मात्रं ॥ ४१ ॥ अहंबुद्धिरित्युपलक्षणं देहगेहादिष्वहं ममेत्यभिमानवानित्यर्थः । मन्निगमः मे मां निरन्तरां गमयति प्रापयतीति यो निवृत्तिमा-
स पं- र्गः स उत्पथः कुमार्गो न तु चोराद्याकुलः । सत्त्वगुणस्योदयः उद्रेकः स्वर्गः नेन्द्रादिलोकः ॥ ४२ ॥ ॥
थाः सन्मार्गः न कंटकादिशून्यः चित्तविक्षेपः प्रवृत्तिमार्गः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥भा०ए०॥
॥१९९॥

तमस्तउत्नाह। उद्धेकः सुनरकः नत्नामिस्वादिः। गुरुरेवबंधुनत्वमादिः सचाहमेवायथाहंजगद्गुरुः। एक एवपरोबंधुर्विषमेसमुपस्थिते गुरुःसकल
धर्मात्मायत्राः किंचनगोहरिरितिसस्माधनं नोगायतनं नृदेहं तञ्च मानुष्यंमानुषरूपंमच्छारीरमेवनहमस्तिगुणोः संपन्नश्चाढ्यउच्यतेनधनी ४२ तुष्ट
संतुष्टोयः सदरिद्रः ननिस्वः योजितेंद्रियः सकृपणः ज्ञोन्यः नदीनः। विषयेष्वनासक्तधीर्यः सईश्वराः स्वतंत्रः नेरस्तादिः। गुणसंगः गुणेषु संगोय
स्यसः विपर्ययः अनीशाः एतच्चसेरामादिविपर्ययोपलक्षणार्थं ४४ उपसंहरति एतइति साधुमेद्धोपयोगितया। एतेस्वसर्वगुणदोषयोर्वि

नरकस्तमउत्नाहो बंधुर्गुरुरहं सखेगृहं शरीरंमानुष्यंगुणाढ्योह्याढ्यउच्यते ४३ दरिद्रोयस्त्वसंतुष्टः कृपणोयोजितेंद्रियः। गुणे
ष्वसक्तधीरीशोगुणसंगोविपर्ययः ४४ एतउद्धवतेप्रश्नाः सर्वेसाधुनिरूपिताः। किंवर्णितेनबहुनालक्षणंगुणदोषयोः। गुणदोष
दृशिर्दोषोगुणस्तूभयवर्जितः ४५ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेभगवदुद्धवसंवादेएकोनविंशोध्यायः॥ १

र्विकार्यो
देकार्येष्वेवनप्रश्नमितियोःसंक्षेपतोलक्षणमाह किंबहुनावर्णितेनगुणदोषयोर्लक्षणमेतावदेवा गुणदोषयोर्दृष्टिर्दर्शनंदोषः। गुणस्तदुभ
यदर्शनवर्जितः स्वभावइति ४५ ॥ इतिश्रीभागवतेएकादशएकोनविंशतितमोध्यायः॥ ॥१९॥ ॥ राम
९९१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विरोधो मद्वयं प्रोक्तं न किञ्चित् किं पुनः कां गुणदोषव्यवस्थार्थमधिकारिविनागतः गुणदोषदृशिर्दोषो गुणस्तूभयवर्जित इत्युक्तं तदाक्षिपति विधि
श्चेति पंचभिः विधिश्च प्रतिषेधश्चेश्वरस्य तव निगमः आज्ञारूपो वेदः स तु विधेयानां प्रतिषेध्यानां च कर्मणां गुणं दोषं च पुण्यपापफलरूपमवेक्ष
ते १ उत्तमाधमत्वेन तदधिकारिणां च वर्णाश्रमाणां विकल्पं भेदं च गुणदोषरूपमवेक्षते प्रतिलोमजाः उत्तमवर्णस्त्रीषु हीन

उद्धव उवाच ॥ ॥ विधिश्च प्रतिषेधश्च निगमो हीश्वरस्य ते ॥ अवेक्षतेऽरविंदाक्ष गुणदोषं च कर्मणां ॥ १ वर्णाश्रमविकल्पं
च प्रतिलोमानुलोमजं ॥ द्रव्यदेशवयःकालान् स्वर्गं नरकमेव च २ ॥ ॥

नवर्णेभ्यः पुरुषेभ्यो जाताः सूतवैदेहकादयः अनुलोमजास्तूत्तमवर्णेभ्यः पुरुषेभ्यो हीनवर्णास्त्रीषु जाताः मूर्द्धावसिक्ताम्बष्ठादयः तेषां
च असंसंतरस्तु विज्ञेयाः प्रातिलोमानुलोमजा इति गुणदोषौ द्रव्यादीन् कर्मार्हितानर्हतां स्वर्गं च नरकं च तत्फलतया गुणदोषमेवावेक्षते
एतच्चोत्तराध्याये प्रपंचयिष्यते ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
९५

तथापि प्रसक्ते किं स्यात् तत्राह ॥ गुणदोषदृशिर्दोषो गुणस्तु गुणदोषयोर्निराकृतत्वात् गुणदोषनिदानदृष्टिमन्तरेण तां विना निषेधविधिलक्षणं कर्मकाण्डं तद्वचः कथं तद्वचनान्तरेण नृणां निःश्रेयसं कथं स्यात् तत्रापि श्रोतव्यो मंतव्य इत्यादि साधनविधेः नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तद्दित्यादि निषेधस्य चावश्यकत्वादितिभावः ॥ यद्वा गुणदोषनिदानदृष्टिमन्तरेण निषेधविधिलक्षणं तव वचो विनैव तु सामानाधिकरण्यमेवाह ॥ यद्वा गुणदोषनिदानदृष्टिमन्तरेण निषेधविधिलक्षणमपि वचः कथं तु तमसादिवाक्यवत् निःश्रेयसपरं स्यात् ॥ सर्वस्य वेदस्य तत्परत्वाङ्गीकारादित्यर्थः ३
ननु पितरो देवाश्च सर्वज्ञाः प्रसन्नाश्चेतो हृष्टमनुष्येभ्यः कथयिष्यन्तीत्याह ॥ पित्रादीनां सर्वेषां तत्वद्यावरूपो वेद एव चक्षुः श्रेयः श्रेष्ठं चक्षुः प्रमापकं

गुणदोषनिदानदृष्टिमन्तरेण वचस्तव ॥ निःश्रेयसं कथं नृणां निषेधविधिलक्षणं ३ पितृदेवमनुष्याणां वेदश्चक्षुस्तवेश्वर ॥ श्रेयस्त्वनुपलब्धेऽर्थे साध्यसाधनयोरपि ॥ गुणदोषनिदानदृष्टिर्निगमात्ते न हि स्वतः ॥ निगमेनापवादश्च निदा पाद इति हन्त मः ॥ ५

कस्य अनुपलब्धेऽर्थे अतीन्द्रिये स्वर्गादौ च तथा साध्यसाधनयोः इदमस्य साध्यं इदमस्य साधनमित्यत्रापि तु ॥ एवं गुणदोषदृष्ट्यभावे निःश्रेयसं न घटते ४ किं च शास्त्रेणैव विहितं नेदं दृष्टं तस्मिन्नेव विषये त्वच्छास्त्रं कथं निवर्तयेदित्याह ॥ तेनिगमात्त्वदाज्ञा पौरुषेयादेव न हि स्वतः यस्मादर्थज्ञस्त्वेनानि ९२
करोति हस्फुटं त्वमो न वदति तं निवर्तयेति ५ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति

विषयानिर्देश्यः धिकारिनिर्देशेना विरोधं वक्तुं त्रयमयोगत्रयमाह योगाइति ॥६॥ योगाउपायाः ब्रह्मकर्मस्वतायोकांडैः प्रोक्ताः कर्मचनिष्कामं श्रेयोवि
धित्सया मोक्षसाधनेच्छया अन्यउपायोनास्ति काम्यकर्मादिकं यावर्त्तयति तथाचोत्तराध्यायेस्फुटीकरिष्यति यएतानिमत्पादिना ॥६॥ तेष्वधिकारिनिर
माह निर्विण्णानामिति द्वाभ्यां इह एषांमध्ये कर्मसु निर्विण्णानां दुःखबुध्यातत्फलेषु विरक्तानां अतएव तत्साधनभूतकर्मन्यासिनां ज्ञानयोगः सि
द्धिदः उत्तरेणान्वयः अनिर्विण्णचित्तानां दुःखबुद्धिशून्यानां अतः कामिनां तत्फलेष्वविरक्तानामित्यर्थः ॥७॥ यदृच्छयाकेनापिभाग्योदयेनत

श्रीभगवानुवाच ॥ ॥ योगास्त्रयोमयाप्रोक्तानृणांश्रेयोविधित्सया ॥ ज्ञानंकर्मचभक्तिश्चनोपायोन्योस्तिकुत्रचित् ॥६॥ निर्विण्ण
नांज्ञानयोगोन्यासिनामिहकर्मसु ॥ तेष्वनिर्विण्णचित्तानांकर्मयोगस्तुकामिनां ॥७॥ यदृच्छयामत्कथादौजातश्रद्धस्तुयःपुमान् ॥ यः
ननिर्विण्णोनातिसक्तोभक्तियोगोस्यसिद्धिदः ॥८॥ तावत्कर्माणिकुर्वीतननिर्विद्येतयावता ॥ मत्कथाश्रवणादौवाश्रद्धायावन्नजा
यते ॥९॥ ॥

त्काम्यकर्मसु प्रवर्त्तमानस्य सर्वात्मनाविधिप्रतिषेधाधिकार इत्युत्तराध्याये वक्ष्यति निष्कामकर्मयोगाधिकारिणः क्रमयथाशक्ति सत्वज्ञानभक्तियो
गाधिकारात्प्रागेवतदधिकृतयोस्तुस्वस्यः तासामसिद्धानांतुनकिंचिदस्ति ॥८॥ सावधिकर्मयोगमाहतावदितिनवभिः ॥ कर्माणिनित्यनैमित्तिकानि
यावत्तायावत् ॥९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मयोगिनो ज्ञानभक्तिभूमिकारोहप्रकारमाह स्वधर्मस्थ इति अनाशीःकामः अफलकामः अन्यत्तु निषिद्धं नरकयानं हि द्वैधैव ॥ विहिताक्रिमा णानिषिद्धाचरणाच्च अतः स्वधर्मस्थित्वान्निषिद्धवर्जनाच्च नरकं न याति अफलकामत्वाच्च स्वर्गमपीत्यर्थः १० किंतु अस्मिंल्लोके अस्मिन्नेव देहे ॥ अनघः निषिद्धत्यागी अतः शुचिः निवृत्तरागादिमलः ॥ यदृच्छयेति केवलज्ञानादपि भक्तेर्दुर्लभत्वं द्योतयति ११ अनेन प्रकारेण ज्ञानभक्तिसाध

स्वधर्मस्थो यजन्यज्ञैरनाशीःकाम उद्धव ॥ न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत् ॥ १० अस्मिंल्लोके वर्त्तमानः स्वधर्मस्थोऽनघः शुचिः
ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया ॥ ११ स्वर्गिणोऽप्येतमिच्छंति लोकं निरयिणस्तथा ॥ साधकं ज्ञानभक्तिभ्यामुभयं तदसा
धकं १२ न नरः स्वर्गतिं कांक्षेन्नारकीं वा विचक्षणः ॥ नेमं लोकं च कांक्षेत देहावेशात्प्रमाद्यति ॥ ॥१३॥ एतद्विद्वान्पुरा मृत्योरभवाय घटेत सः
अप्रमत्त इदं ज्ञात्वा मर्त्यमप्यर्थसिद्धिदं १४ ॥ ॥

नत्वात्त्वान्नरदेहं लोकोत्तमं स्वर्गिणोऽपीति ॥ निरयिणश्च इति दृष्टान्तेनोक्तं ज्ञानभक्तिसाधनं नरयोः ॥ तदुभयं स्वर्गिणां नारकिशरीरं १२ अतो
नरः स्वर्गतिं न कांक्षेत ॥ नारकीमिति दृष्टान्तः यद्वा स्वर्गनरकसाधनकर्माणि न कुर्यादित्यर्थः अस्यातिश्रेष्ठत्वात्पुनरपि मनुष्यो न भवेयमित्यपि न
कांक्षेत ॥ यतो देहावेशात् देहासक्त्या स्वार्थं प्रमाद्यति स्वार्थाद्भ्रश्यन्नरकयोग्यो भवति ॥ १३ अपि तु एतं देहं साधकमिति विद्वांस्त्वरावान्स्यादित्याह इदमपि मर्त्यं ज्ञात्वा
अप्रमत्तः अनलसः सन् मृत्योः पूर्वमेव मोक्षाय घटेत यत्नं कुर्यात् ॥ १४ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभ्यसतो मुक्तसंगः सुखं प्राप्नोतीति सदृष्टांतः छिद्यमानमिति। यमैः यमवन्निर्दयैः पुरुषैः कृतं नीडं यस्मिन्। तं स्वकेतं वृक्षं त्यक्त्वा क्षेमं याति अलंपटः अना
सक्तः। पारमार्थिकमाह। अहोरात्रैः छिद्यमानमायुर्बुद्ध्वा भयेन वेपथुः कंपो यस्य सः। इदं एवमनुवर्तमाने प्रमत्ते निंदति। नृदेहं प्लवं नावं प्राप्य तेन आहारः
२ यो वाब्धिं न तरेत् स आत्महा। तत्र हेतवः। आद्यं सर्वफलानां मूलं। एतेन दुःपार्जितकर्मभिः सर्वप्राप्तेः किंच सुदुर्लभं उद्यमकोटिभिरपि रिपिशामुमत्वावं
तथापि तु सुलभं यदृच्छया लब्धत्वात्। तत्र सुकल्पं पटुतरं। किंच गुरुः संश्रितमात्र एव कर्णधारो नेता यस्य तं। मयानुस्मृतमात्रेणानुकूलमारुतेन प्रेरि

छिद्यमानं यमैरेतैः कृतनीडं वनस्पतिं। खगः स्वकेतमुत्सृज्य क्षेमं याति ह्यलंपटः। १५ अहोरात्रैश्छिद्यमानं बुद्ध्वायुर्भयवेपथुः।
मुक्तसंगः परं बुद्ध्वा निरीह उपशाम्यति। १६ नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं। मयानुकूलेन नभस्वतेरितं पुमा
न्भवाब्धिं न तरेत्स आत्महा। १७ यदारंभेषु निर्विण्णो विरक्तः संयतेंद्रियः। अभ्यासेनात्मनो योगी धारयेदचलं मनः। १८ धार्यमा
णं मनो यर्हि भ्राम्यदाश्वनवस्थितं। अतंद्रितोऽनुरोधेन मार्गेणात्मवशं नयेत्। १९ ॥

तं। १७ एवं तावद्विरक्तस्य वैराग्यद्वारा ज्ञानं तत्किं साधकं कर्मयोगस्तु केदानीं संप्रविरक्तस्य ज्ञानयोगं तत्र च ज्ञानप्राप्तेः पूर्वं किंचित्कृत्यं वर्जनीयं चाह सा
र्द्धैस्त्रिभिः। यदा तु आरंभेषु कर्मसु निर्विण्णः दुःखदर्शनेनोद्विग्नः तत्फलेषु विरक्तश्च तदा संयतेंद्रियः सन् आत्मनोऽभ्यासेन आत्मविषयत्वेन संस्तभ्य आत्म
लंयपान्त्यकितया मनो धारयेत्। १८ तत्र प्रथममेवासंतद्धारणासंभवात्तस्य मनसोऽनुसारेण वशीकरणमेवाह। यर्हि भ्राम्यदाश्वनवस्थितमदनव
स्थितं भवति तदा अनुरोधेन किंचिदपेक्षापूरणद्वारेण। १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु तर्हि यथापूर्वमेव स्यात् तत्राह मनोगतिं तु न विसृजेत् नोपेक्षेत किंतु प्रमत्तः सन् लक्षयेदित्यर्थः २० अनुरोधमार्गं सहेतुकं स्तौति एष इति एषः अनु
वृत्तिमार्गेण मनसः संग्रहः परमो योगः तत्साधनत्वात् उपचारेण उक्तिः यथा अश्वदान्तुः दमनीयस्य अश्ववृत्तिः अश्वस्य हृदयज्ञत्वं स्वाभिप्रायेण गतिमन्वि
च्छन्नुपेक्षमाणः अश्वं धीरः कुत्रयम् किंचिद्गतिमनुवर्तते तदा चरविमनाते धृत्वैव गच्छति न तूपेक्षते तद्वदित्यर्थः २१ एवमीषद्वशीकृतस्य मनसो
ऽत्यन्तनैश्चल्योपायानाह सांख्येनेति त्रिभिः सांख्येन तत्त्वविवेकेन सर्वभावानां महदादिदेहान्तानां अनुलोमतः चक्रस्यादिक्रमेण तत्त्वं प्रतिलोमतः पृथि

मनोगतिं न विसृजेज्जितप्राणो जितेंद्रियः। सत्वसंपन्नया बुध्या मन आत्मवशं नयेत् २० एष वै परमो योगो मनसः संग्रहः
स्मृतः। हृदयज्ञत्वमन्विच्छन् दम्यस्येवार्वतो मुहुः २१ सांख्येन सर्वभावानां प्रतिलोमानुलोमतः। भवाप्ययावनुध्यायेन्मनो या
वत्प्रसीदति २२ निर्विण्णस्य विरक्तस्य पुरुषस्योक्तवेदिनः। मनस्त्यजति दौरात्म्यं चिंतितस्यानुचिंतया २३॥ ॥

विषयाक
नरूपाम सहस्रेणापि मायारिं न त्यजति किं स्मृयो भूय उपदेशेने निचेन वाह निर्विण्णेति॥
मनः

पा.दिक्रमेणाप्ययं च अन्वनुध्यायेत् प्रसीदति निश्चलं भवति २२ ततश्च आगमापायिषु तेषु विविधेषु तत्वात्मदर्शनात् विवेकात् अपक्वसंसारे निर्विण्णस्य
ततो विरक्तस्य उक्तवेदिनः गुरूपदिष्टार्थस्य चिंतकस्य ततः गुरूपदिष्टस्यैव चिंतितस्य पुनः पुनरनुचिंतया दौरात्म्यं देहाद्यभिमानं त्यजति २३ ९०४
रक्तस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वा

किंच। यमादिभिर्योगमार्गैः आन्वीक्षिक्या पदार्थद्वयशोधनेन ममार्चनध्यानादिभिर्वा विशिष्टेनास्य फलस्य स्वातंत्र्यं दर्शयति एतैरुपायैर्योग्यं परमात्मानं मनः स्मरेत् नान्यैः अतोऽन्यं न कुर्यादित्यर्थः २४ ननु पापप्रायश्चित्तं कार्यमेव तत्राह यदीति योगेन ज्ञानाभ्यासेनैव एतच्च न कस्यापि न मर्वानां धर्मपत्न्यर्णमर्थं नास्मत्कृत्यादि २५ ननु नित्यनैमित्तिकं कर्म मलशोधकं कर्म सत्वशोधकत्वात् गुणं हिंसादिकं तत्वशुद्धिहेतुत्वाद्दोषः त न च तत्त्विकं त्वादिवत् कथंचादि प्रायश्चित्तं गुण इति विधिप्रतिषेधाभ्यामुक्तत्वात् प्रायश्चित्तं विना योगेनैव कथं पापं दहेत् तत्राह स्वे स्वे इति सार्धे

यमादिभिर्योगपथैरान्वीक्षिक्या च विद्यया। ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः॥ २४ यदि कुर्यात्प्रमादेन योगी कर्म विगर्हितं योगेनैव दहेदंहो नान्यत्तत्र कदाचन २५ स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः। कर्मणां जात्यशुद्धानामनेन नियमः कृतः। गुणदोषविधानेन संगानां त्याजनेच्छया॥ २६॥

इति। स एव गुणः नेतरः। तदुपपादयति। यस्माद्विधिप्रतिषेधाभ्यामनेन गुणदोषविधानेन कर्मणां नियमः संकोचः। कुत इत्यत आह। जात्या स्वभावाशुद्धानां स्वभावतः प्राप्तानां संगानां त्याजनेच्छया। अयमर्थः पुरुषस्याशुद्धिनिमित्तप्रवृत्तेरन्याः स्वाभाविकप्रवृत्तेरेव तस्य मलिनत्वात्तन्मूलत्वात् सह सा सर्वतो निवृत्तिः कर्तुं शक्यते अतः इदं न कर्तव्यं इदमेव कर्तव्यमिति स्वाभाविकप्रवृत्तिसंकोचद्वारेण निवृत्तिरेव क्रियते यथा च न प्रवृत्तिपरो वेदस्तथोत्तराध्याये वक्ष्यामः। तस्मैव वहि कामेष्वित्यादिना। अतो योगिनः स्वाभाविकप्रवृत्त्यभावान्न प्रायश्चित्तादिविधिगोचरतेति २६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०

मक्त्याधिकारिणो भक्तियोगमाह जातश्रद्ध इति नवभिः मत्कथासु जातश्रद्धः अत एवान्येषु कर्मसु उद्विग्नः न तु तत्फलेषु विरक्तः । तदाह वेदेति ॥
यद्यपि विरक्ततया ऽपि तत्परित्यागे त्वनीश्वरः असमर्थः ॥ १ एवंभूतो यः श्रद्धालुः भक्त्यैव सर्वं निष्पत्स्यतीति दृढनिश्चयः सन् ततः तदनन्तरं मां प्रीतो भजे
त विषयांस्तु सेवमानो ऽपि तेषु प्रीतिं न कुर्यादित्याह गर्हयतीति ॥ २८ कथं भजेत किं वा ततो भवतीति तत्राह प्रोक्तेनेति द्वाभ्यां श्रद्धामृतकथायां

जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु । वेद दुःखात्मकान्कामान्परित्यागे ऽप्यनीश्वरः ॥ २७ ततो भजेत मां प्रीतः श्रद्धालुर्दृढ
निश्चयः । जुषमाणश्च तान्कामान्दुःखोदर्कांश्च गर्हयन् ॥ २८ प्रोक्तेन भक्तियोगेन भजतो मा ऽसकृन्मुनेः । कामा हृदय्या न
श्यन्ति सर्वे मयि हृदि स्थिते ॥ २९ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि मयि दृष्टे ऽखिलात्मनि ॥ ३० तस्मा
न्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥ ३१ ॥ ॥

मे ऽपि श्रुतमद्गुणकीर्तनमित्यादिना तत्र तत्र प्रोक्तेन भक्तियोगेन असकृत् नित्यं भजतः हृदय्याः हृद्गताः कामा नश्यन्ति ॥ २९ हृदयमेव ग्रन्थिः अहंकारः
तस्य छेदो ऽपि सर्वसंशयाः असंभावनादयः कर्माणि अनारब्धफलानि संसारहेतुभूतानि ॥ ३० तदेवं सर्वथाधिकारत्रयमुक्तं तत्र च भक्तेर्ज्ञा र
नि पेक्षत्वादन्यस्य च तत्सापेक्षत्वात् भक्तियोग एव श्रेष्ठ इत्युपसंहरति तस्मादिति त्रिभिः मदात्मनः मयि आत्मा चित्तं यस्य तस्य श्रेयःसाध ९५
नं ॥ ३१ ॥ ॥
श्रेयः

तत्र हेतुः यत्कर्मभिर्यत्तपसेत्यादि । इतरैरपि तीर्थयात्राव्रतादिभिः श्रेयःसाधनैर्यद्भिन्नाख्यं सत्वशुद्ध्यादि तत्सर्वं ३२ अंजसा अनायासेनैव स्वर्गमपवर्गं मद्धाम
वैकुंठं लभते तत एव यद्यपि मद्भक्तस्तु न आस्था सुतरां यदि वांछतीति ३३ तत्र हेतुमाह न किंचिदिति । धीराः धीमंतः यतो मम एकांतिनः मय्येव भक्तियुक्ताः अतो मया
दत्तमपि न गृह्णंति किं वक्तव्यं न वांछंतीत्यर्थः । अपुनर्भवं आत्यंतिकमपि कैवल्यं ३४ तदुपपादयति नैरपेक्ष्यमेव परं श्रेष्ठं अनल्पकं महत् निश्रे
यसं फलं तत्साधनं च प्राहुः मद्भक्तिः निराशिषः प्रार्थनाशून्यस्य निरपेक्षाणस्य प्रार्थनाकरणे ततोपि हार्यहितस्यापि सोनवत्त । यस्मान्निरपेक्षस्य

यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् ॥ योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥ ३२ ॥ सर्वं मद्भक्तियोगेन मद्भक्तो लभतेंजसा
स्वर्गापवर्गं मद्धाम कथंचिद्यदि वांछति ॥ ३३ ॥ न किंचित्साधवो धीरा भक्ता ह्येकांतिनो मम ॥ वांछंत्यपि मया दत्तं कैवल्यमपुनर्भ
वं ॥ ३४ ॥ नैरपेक्ष्यं परं प्राहुर्निश्रेयसमनल्पकं ॥ तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत् ॥ ३५ ॥ न मय्येकांतभक्तानां गुणदोषोद्भवा
घु गुणाः ॥ साधूनां समचित्तानां बुद्धेः परमुपेयुषां ॥ ३६ ॥ एवमेतान्मयाऽदिष्टाननुतिष्ठंति मे पथः ॥ क्षेमं विंदंति मत्स्थानं यद्ब्रह्म परमं विदुः
३७ ॥ इति श्री भागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे विंशतितमोऽध्यायः ॥ ॥ २० ॥ ॥

यान्भक्तिः सा निराशिषो न भवेदित्यर्थः ३५ अनेनैव प्रकारेण निष्ठानां न गुणदोषा इति विरोधपरिहारमुपसंहरति न मयीति । गुणदोषैर्विहितनिषिद्धै
रुद्भवो येषां ते गुणाः पुण्यपापादयो साधूनां निरस्तरागादीनां अतः समचित्तानां अत एव बुद्धेः परमीश्वरं प्राप्तानां ३६ काम्यकर्मनिष्ठानां दि
ष्ट्वैतान्मुक्तिमार्गानुपसंहरति एवमिति मे पथः मत्प्राप्त्युपायान्ये अनुतिष्ठंति ते क्षेमं कालमायादिरहितं मम लोकं विंदंति यत्परमेव ब्रह्म तं
त्त्वविदुः ३७ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे विंशतितमोऽध्यायः २१ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
ए६

जयतिस्वपरानंदः पूर्णानंदनृकेशरी ॥ यत्कृपालवलेशेन श्रीधरः सत्कृतिः कृती ॥ इत्थंनामिभयासंतः इमंतांममसाहसं मयाहिस्वीयबोधायकृतमे
तन्नसर्वतः एकविंशेक्रियाज्ञानभक्तिस्थेष्वनधिकारिणां कामिनां द्रव्यदेशादिगुणदोषाः प्रपंचिताः नदेवंगुणदोषव्यवस्थार्थं योगत्रयमुक्तं
तत्रचज्ञानभक्तिसिद्धानां न किंचिद्गुणदोषौ साधकानांतुपृथग्मतो निवृत्तकर्मनिष्ठानां यथा ज्ञानिनित्यनैमित्तिकं कर्मसत्वशोधकत्वाद्गुणः
तदकरणं निषिद्धकरणंचतन्मत्वोमिसकरणत्वाद्दोषः तन्निवर्तकत्वाच्चप्रायश्चित्तंगुणः विशुद्धसत्वानांतुज्ञाननिष्ठानांज्ञानाभ्यासएववि

श्रीभगवानुवाच ॥ यएतान्मत्पथोहित्वाभक्तिज्ञानक्रियात्मकान् क्षुद्रान्कामांश्चलैः प्राणैर्जुषंतः संसरंतिते १ ॥ स्वेस्वेऽधिका
रेयानिष्ठासगुणः परिकीर्तितः विपर्ययस्तुदोषः स्यादुभयोरेषनिश्चयः ॥ २ ॥ ॥

विहितत्वाद्गुणः भक्तिनिष्ठानांपुनः श्रवणकीर्तनादिभक्तिरेवगुणः नविरुद्धं सर्वमुभयेषांदोषइत्युक्तं इदानीं येत्वेतनस्त्रिविधानामेपिसाधकाः किंतु
केवलंकाम्यकर्मप्रधानाः तेषांसकलगुणदोषान्प्रपंचयिष्यन्स्तद्दीनान् तानतिबहिर्मुखान्निंदति यएतानिति मत्पथः मत्प्राप्तिमार्गान् क्षुद्रान्तुच्छा
न्चलैः अस्थिरैः प्राणैर्देहवायुनिरिंद्रियैर्वाजुषंतः सेवमानाः संततं संसरंति निखिलगुणदोषमात्रेणनानायोनीः प्राप्नुवंतीत्यर्थः १ नन्वेतरेवंकर्म ए६
निःकेचिद्गुणदोषभाजः केचिन्नेति कुतः एवं वैषम्यं नह्यग्निनाकेचिद्दह्यंते केचिन्नेति एवं नवतिन्नाहस्वेस्वेइति अधिकारभेदेनकल्पितोगुणदोषोनवस्तु निष्ठावितिभा
वः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राणरक्षार्थं

तदाहस्युवास्युवीइति विविकिस्सार्थं योगपमयोगं पवेतुिसंदेहसारास्वाना विकृप्रवृत्तिप्रतिबंधार्थमित्यर्थः॥ नव्यस्युवास्युवी योगपत्वायोगपत्वे गुणदोषौ तान्नि मित्रो
पादेपत्वानुपादेपत्वे॥ शुनास्युनौत न्निमित्तावयात्रियौ॥३॥ तत्वेस्युवास्युवीकर्मर्थिस्युकेनधर्मः॥ स्वस्युकेनाधर्मइति॥ गुणदोषौ व्यवहारार्थेस्थित्युवावपिराजादीनामव
तृ हारदर्शनाद्युपादेयंनार्थ्येइति शुनास्युनौमात्रार्थंदोषत्वेऽप्याप स्युचारीरनिवहिमात्रोपादेनेत्तानेनपापफ्लअधिकोपादानेतुपापमिति॥ मयामत्स्यादिरूपेण
धर्मरूपांधुरंमारं कर्मजिज्ञानामित्यर्थः॥४॥ स्युवास्युवीप्रपंचविष्पन्नेरोकत्वेनतदानिनिवेशोमान्तृदितिसमानेष्वपिवस्त्काषितिपउकेतत्वप्रपंचयतिन्न

स्युवास्युवीविधीयेतेसमानेष्वपिवस्तुषु॥ द्रव्यस्पविविकिस्सार्थं गुणदोषौशुनाशुनौ॥ ॥२॥ धर्मार्थं व्यवहारार्थं यात्रार्थमितिचा
नघ॥ दर्शितोयंमयाऽचारो धर्ममुद्वहतांधुरं॥४॥ भूम्यबुग्न्यनिलाकाशाभूतानापंचधातवः॥ स्वाब्रह्मस्थावरादीनांशारीरा
आत्मसंयुताः॥५॥ वेदेननामरूपाणि विषमाणिसमेष्वपि॥ धातुषुद्रवकल्पंतएतेषांस्वार्थसिद्धये॥६॥ ॥

मीतिनिनिः॥ भूतानांप्राणिनांधारयंतीतिधातवःकारणानि॥ शारीराःशारीरारंभकाःदेहतःसाम्यमुक्तांजीवतोऽप्याहआत्मसंयुताइति॥५॥ धातुष्वेहेहे
पुनामरूपाणिवर्णाश्रमादीनि कल्पनायाःप्रयोजनमाहएतेषांप्राणिनांस्वार्थसिद्धयेप्रवृत्तिनियमद्वाराधर्मादिपुरुषार्थसिद्धये॥६॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकेवलंदेहेष्वेवअपितुदेशकालादिष्वावालानामपि अदिशब्देनोपात्तानामुपादेयानां फलनिमित्ताधिकारिणांग्रहणं वस्तूनामुपादेयानांब्रीह्यादीनामपि
ममममानियमार्थमिकोचार्यस्मिन्यी एवंगुणदोषविषयंपरिशोधयतयो शुद्ध्यशुद्धीमूलत्वात्तस्यशुद्ध्यशुद्धीप्रपंचयतिश्रकृष्णसाराद्यष्टभिः देशान्
मध्येकृष्णहरिणरहितोऽशुचिः तत्रापिअब्रह्मण्यः ब्राह्मणानकिंशून्योऽत्यंतमशुचिः कृष्णसारोपिकृत्स्नेनमृगेणसारः श्रेष्ठोयः सोऽपिअसौ

देशकालादिनावानांवस्तूनांममसत्त्रमशः गुणदोषौविधीयेतेनियमार्थहिकर्मणां ७ अकृष्णसारोदेशानामब्रह्मण्योऽशुचिर्नवि
त कृष्णसारोप्यसौवीरकीकटासंस्कृतेरिणं कर्मण्योगुणवान्कालोऽद्भ्यतःस्वतएववा यतोनिवर्ततेकर्मसदोषोकर्मकः स्मृ
तः ८ ॥

वीरः कीकटः सुवीराः सत्पुरुषाः तस्मान्नसौवीरः कीकटोपिअशुचिः तदुक्तं सर्वेपुण्यतमोदेशः सत्पात्रंयत्रलभ्यतइति तद्वर्जितोयःकीकटः अंगवंग
कलिंगादिः असंस्कृतः समार्जनादिशून्यः म्लेच्छबहुलोवा इरिणंऊषरंएकएवभावःतदसुचिःतदन्यःशुचिरित्यर्थःतदुक्तंभवति ० कालस्यशुद्ध्य
शुद्धीदर्शयितिकर्मण्पइतिद्रव्यतःद्रव्यसंपत्त्यास्वतोवापूर्वाह्णादियःकर्मण्यःकर्माहःसकालस्तस्मिन्कर्मणिगुणवान्यतःयस्मिन्द्रव्यालाभेनवा
राष्ट्रविप्लवादिनावाकर्मनिवर्तते यश्चसूतकादौदशाहादिलक्षणोऽकर्मकःकर्मनार्हःस्मृतःसकालोदोषःअशुद्धइत्यर्थः ८ ॥

फ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श ८७

वस्त्रवाह्योपात्तानां द्रव्याणां शुद्ध्यशुद्धी दर्शयति द्रव्यस्येति चतुर्भिः द्रव्येण तोयादिना शुद्धिः मूत्रादिनात्वशुद्धिः वचनेन शुद्धमशुद्धं वेति संदेहे शुद्धमिस्त्वेवं रूपेण ब्राह्म
णवचनेन शुद्धिः विपरीतेनाशुद्धीः संस्कारेण प्रोक्षणादिना पुष्पादेः शुद्धिः श्ववघ्राणादिनात्वशुद्धिः कालेन कालेमेघोदकं यावद्बुर्बुदं वर्षं तु महमेव त्रि। अकाले
दशरात्रं सूतकतः शुद्धिर्विधीयते दशाहादिनानवोदकादेः शुद्धिः विपरीतेनाशुद्धिः पर्युषितान्नादेरशुद्धिः अल्पत्वाद्युपहतानां तडागादेरुदकानां महत्त्वात्
सा महद्बशुद्धी १० तथा ह्यकरा तूलमपि रागादि स्मृतकान्नादेः शा [illegible] न्यसदृशि श्वशफकादीनु द्वानि शुद्धिः बुध्यापुत्र जन्मादोदशाहो ब्रह्मज्ञानेन शुद्धि

द्रव्यस्य शुद्ध्यशुद्धी च द्रव्येण वचनेन च ॥ संस्कारेणाथ कालेन महत्त्वाल्पतयाथवा ॥१०॥ शक्त्याशक्त्याथवा बुद्ध्या समृद्ध्या
च यदात्मने अर्घं कुर्वन्ति हि यथा देशावस्थानुसारतः ॥११॥ ॥

९ अंतज्ञानेनाशुद्धिः समृद्ध्या जीर्णमलवस्त्रादेः समृद्धस्याशुद्धिः दरिद्रस्य तु शुद्धिः तत्रापि विशेषमाह यदिति एते च द्रव्यवचनाद्यो द्रव्याशुद्धिकारणं आत्मनः
नेयदर्घं कुर्वन्ति तद्देशावस्थानुसारतः एव यथा यथावत्कुर्वन्ति न सर्वतः तथाहि निर्णय एव देशे कुर्वन्ति न स्तु चोराद्याकुले तथा रोगादिव्यतिरिक्त युवाद्यवस्था
यामेव कुर्वन्ति न वाल्मे रोगाद्यवस्थायामिति तथा च स्मृतिः देशं कालं तथाऽत्मानं द्रव्यं द्रव्यप्रयोजनं उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति ॥११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा०ए०

सा

द्रव्यादिनिर्दिष्टशुद्धिरिक्तकं तत्र वचनादिशुद्धिरेकरूपेव द्रव्यवस्तुष्यदिविकरूपे तिर्नां प्रपंचयति धान्येति दारुलौकिकं यूहस्य चर्मणादिशुद्धि अग्निगज
दंतादि रसास्तैलघृतादयः तैजसाः सुवर्णादयस्तेषां पार्थिवानां चर[illegible]श्चाकर्दमघटेष्टकादीनां यथायथं कालादिभिः शुद्धिः तत्रापिकाकोन्यजाद्युपघा
ततारम्येन देशकालावस्थाद्यनुसारेण च एतैरम्भसायुतायुतैर्मिलितैः केवलैश्च ॥ कालस्तु पुनर्ग्रहणं युतत्वदर्शनार्थं ॥१२॥ धान्यानां वायुना [illegible]
दारुणां तक्षणपात्रादीनां गोय[illegible]तो[illegible] दकैः [illegible]स्यकालेन तंतूनां तोयेन रसास्तैलघृतादयः तैजसाः सुवर्णादयः तेषामग्निना पार्थिवानां चरण्या
कर्दमघटेष्टकादीनां यथायथं कालादिभिः शुद्धिः स्पर्शरूपस्पर्शशुद्धिस्तु कालेपविषयः प्याहयसौ तपावकरस्यादियेन नतक्षणं दाहाग्निदकादि
॥१२॥

धस्मदार्वस्थितंतूनां रसतैजसचर्म्मणां । कालवाय्वग्निसूर्येन्दुः पार्थिवानां युतायुतैः ॥१४॥ अमेध्यलिप्तं यद्येनगंधलेपं व्ययोहति । न
जतेप्रकृतिं तस्य त[illegible]शौचं तावदिष्यते ॥१५॥ ज्ञानं दानं तपो वस्त्रावीर्यसंस्कारकर्मभिः मृत्साम्यात्मनः शौचं शुद्धः कर्मनिवृत्तेद्वि
जः ॥१६॥ ॥

नागंधं च लेपं च व्यपोहति स्पृशति स्पृगतं त्वमलं स्पष्टा प्रकृतिस्वयमेव रूपं न जते तस्य तत्शौचं शोधकं यावता च तत्क्षणादिना व्यपो
हति तावत्क्रमाणं स्वरूपतश्चादिति बोधनात्कर्तव्यमिष्यते ॥१३॥ एवं तावत्द्रव्यशुद्धिरुक्ता इदानीं कर्तृशुद्धिमाहस्नानेति अवस्थाकौमारादिः वीर्यं
शक्तिः संस्कार उपनयनादिः कर्म संध्योपासनादीन्यादि लक्षणं आत्मनः अहंकारस्य कर्तुः एतैः स्नानादिभिर्यथायथं तत्कायानुसारिणी शुद्धिः
इयं शुद्धिर्नित्यवद्दाराधा किंतु विहितकर्मार्थसाहस्तु वदर ते द्विजस्कुपलक्षणं शूद्रादिरपि ॥१४॥ ॥ रम
एए

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंत्रशुद्धिमाह। मंत्रगुरुमुखाद्यथावत्परिज्ञानं मंत्रस्य शुद्धिः कर्मशुद्धिमाह। ईश्वरार्पणं कर्मणः शुद्धिः धर्माधर्मयोस्स्वरूपं प्रकरणेपि संहरति धर्म
इति देशकालद्रव्यकर्तृमंत्रकर्मभिः षड्भिः शुद्धैः धर्मस्संपद्यते एतेषां यो विपर्ययः सो ऽधर्मः तद्धेतुरित्यर्थः। १५ अयं च गुणदोषविनाशो ऽपवाद इत्या न
ह क्वचिदिति। आपद्विकृतिग्रहो गुणो ऽप्यनापदि निषिद्धत्वाद्दोषः परधर्मस्य परस्य गुणो ऽपि स्वस्य दोषः दोषो ऽपि कुटुंबत्यागादिर्विरक्तादेर्न दोषः॥

मंत्रस्य च परिज्ञानं कर्मशुद्धिर्मदर्पणं। धर्मः संपद्यते षड्भिरधर्मस्तु विपर्ययः १५ क्वचिद्गुणोऽपि दोषः स्याद्दोषोऽपि विधिना गुणः।
गुणदोषार्थनियमस्तद्भिदामेव बाधते। १६ समानकर्माचरणं पतितानां न पातकं। औत्पत्तिको गुणः संगो न शयानः पत
त्यधः १७

अपि तु विधिबलेन गुणः एवं चायं गुणदोषयोरेकस्मिन्नेवार्थे नियमः गुणदोषार्थं यो नियमः नियामकं शास्त्रं स तयोर्भेदमेव बाधते १६ दोषस्य
क्वचित् दोषत्वाभावे गुणत्वे चोदाहरणं दर्शयति समानस्य तस्यैव कर्मणः सुरापानादेराचरणं अपतितानां पतनहेतुरपि जात्या कर्मणा वा पतितानां पुनः
पातकं अधिकाराभावात् न भवति पूर्वमेव पतितत्वात् अतो न दोषस्यापि दोषत्वं नास्तीत्यर्थः। तथा संगोऽपि योयते दोषः स गृहस्थस्यौत्पत्तिकः स्व
र्गस्तीर्णत्वेन दोषः अपि तु गुणः ऋतौ भार्यामुपेयादिति विधानात् अन्यत्र दृष्टांतः पूर्वमेवाधः शयानो यथा न पततीति १७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतोगुणदोषनियमविधीनांप्रवृत्तिसंकोचद्वारेणनिवृत्तावेवतात्पर्यमित्यभिप्रेत्याहयतोयतइति॥१८॥यथाश्रुतप्रवृत्तिपरतांवेदस्यनिराकर्तुंप्रवृत्तिमार्ग
स्यानर्थहेतुत्वंदर्शयतिविषयेष्वितित्रिभिः।संगःआसक्तिः।तत्रतेषुविषयेषु येनप्रीतिस्संभवेत्कामः।तेनसहकामादेवकलिःकलहोविवादः॥१९॥दु
र्विषहःतीव्रः।तमःसंमोहः।तंक्रोधं।चेतनाकार्याकार्यस्मृतिः।द्रुतंशीघ्रं।शून्यायकल्पतेऽसत्तुल्योभवतीत्यर्थः।स्वार्थविभ्रंशःपुरुषार्थहानिः।मूर्छितस्य
मृततुल्यस्य॥२१॥तदुक्तंप्रपंचयति।व्यर्थंवृक्षजीविकयैवयोजीवन्वर्ततेसमूर्छिततुल्यः।अतएवयोनवेत्तिश्वसन्नपिसमृततुल्यः।श्वासः

यतोयतोनिवर्तेतविमुच्येततत्स्ततः॥एषधर्मोनृणांक्षेमःशोकमोहभयापहः॥१८॥विषयेषुगुणाध्यासात्पुंसःसंगस्ततोभवेत्॥सं
गात्तत्रभवेत्कामःकामादेवकलिर्नृणां॥१९॥कलेर्दुर्विषहःक्रोधस्तमस्तमनुवर्तते॥तमसाग्रस्यतेपुंसश्चेतनाव्यापिनीद्रुतं॥२०
तयाविरहितःसाधोजंतुःशून्यायकल्पते।ततोऽस्यस्वार्थविभ्रंशोमूर्छितस्यमृतस्यच॥२१॥विषयाभिनिवेशेननात्मानंवेदना
परं॥वृक्षजीविकयाजीवन्व्यर्थंभस्त्रेवयःश्वसन्॥२२॥फलश्रुतिरियंनृणांनश्रेयोरोचनंपरं॥श्रेयोविवक्षया [illegible] प्रोक्तंयथाभै
षज्यरोचनं॥२३॥

स्थायनात्राऽस्यर्थः॥२२॥ननुप्रवृत्तस्यस्वर्गादिफलश्रवणात्कुतःस्वार्थविभ्रंशःतत्राह।इयंफलश्रुतिःनश्रेयःपरमपुरुषार्थःपरान्नभवतीत्यर्थः॥किं
तुबहिर्मुखानांमोहाविवक्षयाश्रवांतरफलैःकर्मसुरुचकसादयेनमात्रंयथाभैषज्येऔषधेरोचनंरुच्यसादनं।तथाहि॥पिबनिंबंप्रदास्यामिखलुतेखं ९९
खंडलड्डुकान्॥पित्रैवमुक्तःपिबतिनफलंतावदेवतु॥२३॥

पा

ननु कर्मकांडे मोक्षस्य नामापि न श्रूयते कुत एवं व्याख्यायते यथाश्रुतस्याघटनादित्याह उत्पत्त्येति द्वाभ्यां। उत्पत्त्या स्वभावत एव कामेषु पश्वादिषु प्राणेषु आयुरिन्द्रियबलवीर्यादिषु स्वजनेषु पुत्रादिषु अनर्थहेतुषु परिपाकतो दुःखहेतुषु २४ अतस्तान् स्वार्थं परमसुखम् अविदुषः अतो नन्तान् … नेदीयसि धर्ये … तिकृष्णेय … निर्वासितान् निरपवर्गः तानेवंभूतान् वृजिनाध्वनि कामवर्त्मनि देवादियोनिषु भ्राम्यतः ततः पुनः तमः … निर्विशतः पश्वादिकामं … आयुरिन्द्रियादिकामं … स्वर्गादिकाममिति कथं पुनस्तेष्वेव कामेषु स्वयं बुधो वेदो युंज्यात् प्रवर्तयेत् तथा सत्यना

उत्पत्त्यैव हि कामेषु प्राणेषु स्वजनेषु च आसक्तमनसो मर्त्या आत्मनोऽनर्थहेतुषु २४ न तानविदुषः स्वार्थं भ्राम्यतो वृजिनाध्वनि कथं युंज्यात्पुनस्तेषु तांस्तमो विशतो बुधः २५ एवं व्यवसितं केचिदविज्ञाय कुबुद्धयः फलश्रुतिं कुसुमितां न वेदज्ञा वदन्ति हि २६ कामिनः कृपणा लुब्धाः पुष्पेषु फलबुद्धयः अग्निमुग्धा धूमतान्ताः स्वं लोकं न विदन्ति ते २७॥ ॥

र्थः स्यादिति भावः २५ कथं तर्हि केचिन्मीमांसकाः फलपरत्वं वदन्ति वेदस्य तत्राह एवमिति व्यवसितं वेदस्याभिप्रायं कुसुमितां अवान्तरफलरोचनतया रमणीयां परमफलश्रुतिं वदन्ति कुतस्ते कुबुद्धयः यस्मात् न हि वेदज्ञा आसादयन्त्येवं वदन्तीति २६ कुबुद्धित्वं प्रपंचयति कामिन इत्यादि … तिः कामित्वात् कृपणाः ततो लुब्धाः … अतः पुष्पेष्ववान्तरफलेषु परमफलबुद्धयः अत एवाग्निमुग्धाः अग्निसाध्ये कर्मणि निविष्टो … विवेकाः ततश्च धूमतान्ताः धूममार्गेण … स्वं लोकं … न जानन्ति अग्निमुग्धो वै धूमतान्त इति २७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चा०११०
१००

कोसोस्वलोकः तमाह नेति हृदिस्थमात्मानं मां स्वलोकं न तु हृदिस्थमहंकारास्पदं ज्ञानं सेव सत्यं परमात्मानं तु न जानंति तेन जानंतीत्याह य इति इदं प्रप
तिस्किं जगत्यास्ति तत्कुतः यत इत्योस्य भवति यत इदं जगज्जातं तं कुतो ज्ञानं ति द्वियस्मात् उक्थ कर्मैकनिरस्तं शस्त्रं संक्रयनीयं पसुस्तु हिंसा साधनं वाये
षां केप्रतः केवलं स्वसुतृपः प्राणतृपश्च परा नीहारं तमः तेन स्वामात्मानिच दृषिये ष्वंते यथा सन्निहितमपि न जानंति तद्वत् तथा चक्षु नतांवि
दाधयत्रमज्ञानां नास्त तद्वृष्णाक मंतरं बन्नूत्वा नीहारेण प्रावृत्ताजल्पात्वा सुतृप इक्थशस्त्रं रति ति २७ विदतात्पर्यज्ञाना द्वा मां न जानंतीत्याह ते

नते मामंगजानंति हृदिस्थं य इदं यतः उक्थशस्त्रा ह्यसुतृपो यथा नीहारचक्षुषः २७ ते मे मतमविज्ञाय परोक्षं विषयात्मकाः प
ख हिंसायां यदि रागः स्यात् यज्ञ एव न चोदना २९ हिंसाविहारा ह्यालब्धैः पशुभिः स्वसुखेच्छया यजंते देवता यज्ञैः पितृभूतप
तीन् खलाः ३० ॥ ॥

ख परोक्ष स्फुटं मे मतमविज्ञाय वेदवादीनर्जंत इत्युक्तरेणान्वयः स्वमतमेवाह हिंसायां मांसभक्षणार्थं च यदि रागः स्यात्तर्हि यज्ञ एवेत्यनुज्ञा
प्रारापरिसंख्यायं न त्वापूर्वकल्पे न चोदनेत्येवं रूपं मम मतं यद्यपि नित्य नैमित्तिकयोः कामविशेषानुबंधो नास्ति तथापि कर्मणापि तृलोक १००
लिप्सुतः कामस्तुतः पितृलोककामुना श्राद्धे कर्तः करणाद्धि कामनावतिनाव तदुक्तं कामस्य क्रियाकाचित् दृश्यते चेह कर्हिचित्
यद्यद्धि कुरुते जंतुस्तत्तत् कामस्य चेष्टितमिति २९ अज्ञत्वादेव हिंसया विहारः क्रीडा येषां ते ३० ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचते। इति। इमं द्वयं दृष्टुं द्वयस्मात् स्वप्नोपममिति। अमुं परलोकं आशिषश्चास्मिं लोके संकल्प्य न तु निश्चित्य विघ्नबाहुल्यात् त्यजंति कर्मसु विनियोजयंति। यथा कु
[ब]णिक् कुसुमैः समुद्रादिलंघनेन बहुधा[नं]यत्नेन स्वयापि लब्धं धनं त्यजन् बहु नयत्वयशेन वर्तितः दृष्टिस्वर्थः ३१ अस्तु तैः रजःसत्वतमोनिष्ठास्ते रजःसत्वतमोजुषः स्वा
[नु]रूपाणि निंद्रादीनि वोपासते न तु मां यद्यपींद्रादीनामपि मदंशत्वात् मदुपासनमेव तत्तथापि यथावन्नोपासते नेद दर्शितवादित्यर्थः ३२ हृदि संकल्प्यास्तु
कं तमेव संकल्पं दर्शयति इष्ट्वेति। तस्य भोगस्यांते महाशाला महागृहस्थाः ३३ ततः किमित्यत आह एवमिति। अतो मत्प्रवणता भावात् त्रिसंस्कारा

स्वप्नोपमममुं लोकमसंतं श्रवणप्रियं। आशिषो हृदि संकल्प्य त्यजंत्यर्थान्यथा वणिक् ॥ ३१ ॥ रजःसत्वतमोनिष्ठा रजःसत्वत
मोजुषः। उपासत इंद्रमुख्यान् देवादीन्न तथैव मां ॥ ३२ ॥ इष्ट्वेह देवता यज्ञैर्गत्वा रंस्यामहे दिवि। तस्यांत इह भूयास्म महाशाला म
हाकुलाः ॥ ३३ ॥ एवं पुष्पितया वाचा व्याक्षिप्तमनसां नृणां। मानिनां चातिस्तब्धानां मद्वार्तापि न रोचते ॥ ३४ ॥ वेदा ब्रह्मात्मविषया
स्त्रिकांडविषया इमे। परोक्षवादा ऋषयः परोक्षं मम च प्रियं ॥ ३५ ॥

रिगोनवंतीति भावः ३४ तदेवं प्रवृत्तिपरत्वं निराकृत्य प्रकृतं निवृत्तिपरत्व
मेवोपसंहरति वेदा इति। कर्मब्रह्मदेवताकांडविषया इमे वेदाः ब्रह्मात्मविषया ब्रह्मैवात्मा न संसारीति तत्पराः। तत्र रत्नापतीत्योच फलश्रुतिरियं तु
रोचनार्थं श्रेयो रोचनं परं श्रेयो विवक्षया प्रोक्ताय यथा भैषज्यरोचनमित्युक्तमेव कारणमनुस्मारयति परोक्षेति। ऋषयो मंत्रास्तद्द्रष्टारो वा तत्र किमि
ति यतः परोक्षमेव मम च प्रियं। अयं भावः शुद्धांतःकरणैरेवैतद्बोद्धव्यं नान्यैरनधिकारिभिः वृथा कर्मत्यागेन तत्र शास्त्रसंगादिति ॥ ३५ ॥

वेदानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवबेदज्ञास्सपिज्ञेमित्यादयः किमितितथानबुरायंतिमांविनातत्वतोवेदंतदर्थंविज्ञानकोऽपिविदेत्साद्रायेनाद्दयाः६ शब्दब्रह्मेतियावक्रमामित्यरू
पतोः यत्तस्यदुर्विज्ञेयंतच्चसूक्ष्मंस्थूलंचेतिद्विविधंतत्रसूक्ष्मंतावत्स्वरूपतोऽपिदुर्ज्ञेहमित्याह। प्राणेंद्रियमनोमयं। प्रथमंप्राणमयंपरस्वयंततो
मनोमयंपरपत्पारस्यं। ततइंद्रियमयं। यमध्यमारव्यंतस्यवाकमुंजनत्वेनवागिंद्रियप्रधानत्वात्। किंच अनंतपारं। समष्टिप्राणादिमयत्वेनतस्यका निर्विंद्योयस्य
लतोदेशतश्चापरिच्छेदात्। अयोविदुर्ज्ञेयत्वमाह। गंभीरंनिगूढार्थं। अतोदुर्विगाह्यंमतिप्रवेशानर्हं। तथाचश्रुतिः। चत्वारिवाकपरिमितानिपदानितानि
विदुर्ब्राह्मणायेमनीषिणःगुहात्रीणिनिहितानेंगयंतितुरीयंवाचोमनुष्यावदंति। अयमर्थः। वाचःशब्दब्रह्मणःपरिमितानिगणितानिप
यो

शब्दब्रह्मसुदुर्बोधंप्राणेंद्रियम ... मो ... नंतपारंगंभीरंदुर्विगाह्यंसमुद्रवत्॥२६॥ मयोपबृंहितंभूम्नाब्रह्मणानंतशक्ति
ना। भूतेषुघोषरूपेणविसेषूर्णेवलक्ष्यते॥२७॥ ॥

एतेज्ञायतेपरंतत्त्वमेभिरितिपदानिरूपाणिचत्वारि॥ तान्विद्वांसोयेमनीषिणो
ऽत्रहृदयाःतेविदुर्नान्ये॥ यतोगुहायांदेहमध्येत्रीणिनिहितानितेंगयंतिस्वरूपंनप्रकाशयंतिःयतःकेवलंवाचः॥ तुरीयंचतुर्थंत्राशंवैखरी
...यंमनुष्याःप्राणिनोवदंति॥ तमपिवदंत्येवनतुतत्वतोजानंति॥२८॥ तच्चमनीषिभिरवज्ञेयंसूक्ष्मंरूपंदर्शयितिमयेति॥ मयानंतयामिणापरंबृंहि राम
... भूमितं ... महत्त्वेप्यपरिच्छिन्नमाह भूम्नेति॥ अधिष्ठातृत्वेप्यविकारित्वमाहब्रह्मणेति॥ अविकृतस्यापिनियंतृत्वंघटयतिअनंतशक्ति १०१
...भूतेषुसर्वप्राणिषुघोषरूपेणलक्ष्यतेमनीषिभिः॥ अतस्सूक्ष्मत्वेनस्वनिहृष्टात्तःविसेषूर्णेतिंतुरखेवेति॥२७॥ ॥
नादरूपेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...वैराग्य रिव्याया बृहत्या वाच उत्पत्तिप्रकारं सदृष्टांतमाह यथेति त्रिभिः हृदयाकाशात् मुखात् द्वारा एतत् उद्वमते बहिः प्रकटयति दार्ष्टांति
... काशादिति प्राणः तदुपाधिः हिरण्यगर्भरूपः प्रभुर्भगवान् ॐ नितव्ररूपेण छंदोमयो वेदमूर्त्तिः स्वतस्त्वमृतमयः घोषवानुनादो
प्रदानवत्ता मनसा निमित्तभूतेन निमित्तितामेवृद्धयति स्पर्शादीन् वर्णान् रूपयति संकल्पयतीति स्पर्शरूपिणेति तेन स्पर्शग्रहणमुप
लक्षणं हृदयाकाशाद्बृहतीं सृजतीति तृतीयश्लोकेनान्वयः बृहतीत्वाद्यर्थमाख्यानाय विशेषणानि सहस्रपदवीं च मार्गान्कुमार्गांतदेवाह

यथोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात्। आकाशाद्घोषवान्प्राणो मनसा स्पर्शरूपिणा॥ ३९॥ छंदोमयोऽमृतमयः
सहस्रपदवीं प्रभुः। ॐकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषितां। विचित्रभाषाविततां छंदोभिश्चतुरुत्तरैः। अनंतपा
रां बृहतीं सृजत्याक्षिपते स्वयं॥ ४०॥

ॐकारात् स्पर्शः कंठादिसंयोगेन व्यंजितैः स्पर्शादिभिर्भूषितां ॐकारश्चात्र हृद्भूतः सूक्ष्मो विवक्षितः न त्वकारादिवर्णरूपः तस्य व्यंगकोटित्वात्। तत्र स्प
र्शाः कादिपंचवर्गाः स्वराश्च अकारादयः षोडश ऊष्माणः शषसहाः। अंतस्था यरलवाः ३९ विचित्रा नानाविधवैदिकलौकिकभाषाभिर्विततां। यथोत्त
रं चतुरक्षराधिकानि येषां तैः छंदोभिरुपलक्षितां एवमनंतपारां सृजति स्वयमेवाक्षिपते उपसंहरति॥ ४०॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाग०
१०२

तेषु कृतिं चिन्तयंतं मां सिद्दर्शयति गायत्रीति तत्र चतुर्विंशत्यक्षरा गायत्री ततश्चतुरक्षरवृद्ध्योष्णिगादीनि छंदांसि अत्यष्टिः अतीजगती अतिविराडि
त्यर्थः एतैः छंदोभिरुपलक्षितां मामिति पूर्वेणैवान्वयः ॥४१॥ अतो दृहस्यपि साकल्येन स्वरूपतो दुर्ज्ञेये मुक्ते स्पृष्ट्यनिर्गो पि दुर्ज्ञेयत्व माह किमिति कर्म
कांडे विधिवाक्यैः किं विधत्ते देवता कांडे मंत्रवाक्यैः किमाचष्टे प्रकाशयति ज्ञानकांडे च किमनूद्य विकल्पयेत् निषेधार्थमित्येवमस्याः छंदस्यं तात्पर्यं मत
मन्यः कश्चिदपि न वेद ॥४२॥ न तु तर्हि त्वं मह्यं कथय तु मामिति कथयति मामेव यज्ञरूपं विधत्ते मामेव तत्र देवता रूपमनिधत्ते नमंत्रः पृथक् यच्चा

गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च ॥ त्रिष्टुप् जगत्यतिछंदो ह्यत्यष्ट्यतिजगद्विराट् ॥४१॥ किं विधत्ते किमाचष्टे किमनू
द्य विकल्पयेत् ॥ इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन ॥४२॥ मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते त्वहं ॥ एतावान् सर्व
वेदार्थः शब्द आस्थाय मां भिदां ॥ मायामात्रमनूद्यांते प्रतिषिध्य प्रसीदति ॥४३॥ ॥ इति श्रीभागवते महापुराणे एकादशस्कं
धे श्रीभगवदुद्धवसंवादे एकविंशोऽध्यायः ॥२१॥ ॥

काश दिप्रपंचजातं तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिना विकल्प्यापोह्यते तदप्यहमेव न मत्तः पृथगस्ति कुत इत्यपेक्षायां सर्ववेदार्थं सं
क्षेपतः कथयति एतावानेव सर्वेषां वेदानामर्थः तमेवाह शब्दो वेदः मां परमार्थरूपमाश्रित्य भिदां मायामात्रमित्यनूद्य निहन्ता नास्ति किंचनेति प्रतिषि
ध्य प्रसीदति निवृत्तव्यापारो भवति अयं भावः यथा द्युकुरयोरसः स एव तद्विस्तारभूतनानाकांडशाखासु पितैवं प्रणवस्य योऽर्थः परमेश्वरः स ए
व तद्विस्तारभूतानां सर्ववेदकांडशाखानामपि संगच्छते नान्य इति निष्कृष्टः स्वतः एवं विरुद्धसर्ववेदचित् स्वपरज्ञानदायस्तं वंदे गुरुमीश्वरं ॥४३॥ इत्येकादशे ए
ता
कविंशः ॥२१॥ ॥

राम
१०२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वाविंशे तत्त्वसंख्यानामविरोधविधोच्यते पुंप्रकृत्योर्विवेकश्च जन्ममृत्युविधा स्थिता । तदेवं वेदानां प्रवृत्तिपरत्वं नि॥ ... रन्तस्य मोक्षपरत्वं निर्णीतं संक्षिप्य तत्त्व
मेतत्त्वेऽपि तत्त्ववादान्तरविवादाः तथा हि केचित्तत्त्वसंख्यासु विवदन्ते तत्रापि विवादा ॥ द्व्यार्थमिदं मत्वैकत्वनानात्वादिषु तत्र किं सत्यमिति जिज्ञासुः पृच्छति कती
ति कतीति निरागमेषु बहुसंख्यातानि तेषु कति युक्तानीत्यर्थः १ भगवन्मतानुवादपूर्वकं बहुधा संख्यानं प्रपञ्चयति नवेति त्रिभिः त्वं तावदष्टाविंश
तित्त्वानां तत्त्वान्यवयमशुश्रुमैवं ततः २ एतावत्त्वं नानात्वं एतावत्त्वं नानात्वमित्यर्थः यद्विवक्षया यस्य योजनमभिप्रेत्य गायन्ति आयुष्मन्नित्यनु
नेः

उद्धव उवाच । कति तत्त्वानि विश्वेश संख्यातान्यृषिभिः प्रभो । नवैकादश पञ्च त्रीण्यात्थ त्वमिह शुश्रुम ॥ केचित्षड्विंशतिं प्राहुरपरे
पञ्चविंशतिम् । सप्तैके नव षट् केचिच्चत्वार्येकादशापरे । केचित्सप्तदश प्राहुः षोडशैके त्रयोदश ॥ एतावत्त्वं हि संख्यानामृषयो
यद्विवक्षया । गायन्ति पृथगायुष्मन्निदं नो वक्तुमर्हसि ३ ॥ श्रीभगवानुवाच ॥ युक्तं च सन्ति सर्वत्र भाषन्ते ब्राह्मणा
यथा । मायां मदीयामुद्गृह्य वदतां किं नु दुर्घटं ४ ॥

त्रैः ३ विवक्षाभेदेन सर्वमपि युक्तमेव मायया वा किं नामायुक्तमित्याह युक्तमिति यथा ब्राह्मणाः भाषन्ते तथैकं च नवस्तुतः यस्मात्सन्ति सर्वाणि तत्त्वा
नि सर्वाणि तत्त्वानि किं च मायामिति अस्मदीयमायाश्रयत्वात् घटत एवेत्यर्थः उद्गृह्य स्वीकृत्य न हि मरीचिजलपरिमाणादिविवादे किंचिद्घटि
तमिव भवति ४ ॥

ना॰ए॰ १०३

ननु यदि तत्त्वमपि युक्तं कुतो विवादः। यदि स्वमायैवावलंबनं कुतो हेतुं प्रति विवादः। तत्राह नैतदिति। हेतुं प्रति विवदमानानां मदीया दुरतिक्रमाः शक्तय
स्तत्राद्य[illegible]तःकरणवृत्तिविशेषरूपेण परिणता एव ता हेतुरित्यर्थः। एवमसौ विवादहेतुत्वमुपपादयति यासामिति। यासां व्यतिकरात्संक्षोभात्
वदतां पदं विषयः विकल्पो नेदमासीत् अंतःकरणवृत्तिविकल्पो वा तन्मूलं तत्त्वं। एतदेव व्यतिरेकेण दर्शयति शमदमयोरित्येकं तस्मिन्नपोहे वि
कल्पोऽपि निलीयते। तं च विकल्पमनु वादः श्राम्यतीति। ५। संति सर्वत्र तियदुक्तं तत्त्वं प्रपंचयति परस्परेति द्वाभ्यां। अन्योन्यस्मिन्ननुप्रवेशात्तत्त्वकु

नैतदेवं यथाऽऽत्थ त्वं यदहं वच्मि तत्तथा। एवं विवदतां हेतुं शक्तयो मे दुरत्ययाः। ६। यासां व्यतिकरादासीद्विकल्पो वदतां प
दं। प्राप्ते शमदमेऽप्येति वादस्तमनु शाम्यति। ७। परस्परानुप्रवेशात्तत्त्वानां पुरुषर्षभ। पौर्वापर्यप्रसंख्यानं यथा वक्तुर्वि
वक्षितं। एकस्मिन्नपि दृश्यंते प्रविष्टानीतराणि च। पूर्वस्मिन्वा परस्मिन्वा तत्त्वे तत्त्वानि सर्वशः। ८। ॥
८५

[illegible]विवक्षितं तथा पूर्वं कारणं अपरं कार्यं कार्यकारणभावेन प्रसंख्यानं भवति। यदा पूर्वस्मिन्नल्पसंख्या अपरस्मिन्नधिकसंख्या तयोरविः पौर्वाप
[illegible]प्रसंख्यानं गणनमिति। अनुप्रवेशं दर्शयति एकस्मिन्नपीति। पूर्वस्मिन्कारणभूते तत्त्वे कार्यतत्त्वानि सूक्ष्मरूपेण प्रविष्टानि मृदि घटवत्
[illegible]कार्यतत्त्वे कारणतत्त्वान्यनुगततया प्रविष्टानि घटे मृद्वत्। ८। ॥
निभ

१०३

१ स

अविरोधमुपसंहरति अमीषां तत्वानां पौर्वापर्यं कारणकार्यत्वं प्रसंरम्भानं च सूत्राधिकमन्नीषं तां वादिनां मध्ये यथा यथा विविक्तया यद्वक्तं यस्य सु
... तन्सर्वं विविक्तं निश्चितं वयं एको लीनः उक्तस्यायेन सर्वत्र युक्तेः संभवात् ननु कार्यकारणतत्वानां स्वर्धे क विविक्ततया न वस्तुनां मम संरम्भाने का० २५
... श्वरयोरुक्त कथं नेदानेद विविक्तायं यथा षड्विंशति पंचविंशति पक्षो पक्षेत्वेतत्त्वमाह अनादीति स्वतो न संभवति अन्यतस्तु संभवात् स्वतः
... ः परमेश्वरो नान्यो भवितव्य इति षट्विंशति पक्षाभिप्रायं इत्यर्थः ११ कथं तर्हि पंचविंशति पक्षः तत्राह पुरुषेति वैलक्षण्यं विमृश्य तत्वानाति

पौर्वापर्यमितो मीषां प्रसंख्यानममी मितां यथा विविक्तं यद्वक्तं यस्मै मोयुक्ति संभवात् १० अनाद्यविद्यायुक्तस्य पुरुष
स्यात्मवेदनं स्वतो न संभवादन्यस्तत्वज्ञो ज्ञानदो न वेत ११ पुरुषेश्वरयोरत्र न वैलक्षण्यमप्यपि तदन्यकल्पनापा
र्थि ज्ञानं च प्रकृतेर्गुणः प्रकृतिर्गुणसाम्यं वै प्रकृतेनोत्मिनो गुणाः सत्वं रजस्तम इति स्थितुस्तत्संतद्धेतवः १३
॥१२॥

द्वयोरपि चिद्रूपत्वात् अतस्तयोरन्यंतममत्वकल्पनानर्थपायमिर्थ एवं पंचविंशति पक्षाहरितिरिस र्थः नन्वेवममी पीश्वर प्रमादलम्यज्ञान
स्प एव कास्तदा वयमपि तेषेते अनत्वाह ज्ञानं चेति सत्वगुणवृत्तित्वाच्चंदतत्नृतमित्यर्थः १२ ननु ज्ञानं जीवधर्मः कथं प्रकृतेर्गुणः स्यात् अत आह
प्रकृतिरिति गुणसाम्यं हि प्रकृतिः अतस्तद्विशेषरूपा गुणास्तस्मा एव नत्वात्मनो जीवस्य अकर्तृत्वात् तस्य स्थित्यादि हेतुभूतगुणाश्रय
त्वानुपपत्तौ १३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतःसत्वंसत्वमयंज्ञानंप्रकृतेर्गुणइतिपूर्वेणैवान्वयः नन्वत्रत्विकर्मकिम्वीज्ञानंत्वत्वांतरंस्यात् रजः कर्मरजोवृत्तिः अज्ञानंचतमसः अतःकर्म
ज्ञानयोः रजस्तमोधारात्प्रकृतावेवांतर्भावइतिभावः तथापिकालस्वभावयोस्तत्वांतरत्वमस्यात् नयुगणनांव्यतिकरो यस्मात्सईश्वरएवका
लोनाम स्वभावोनामसूत्रं महत्तत्वमेव तस्यसर्वकारिकमुत्वात् ७ तदेवंज्ञानादीनांयथायथमंतर्भावपक्षद्वयेऽपितत्ववृद्धिः एतत्वपक्षांतरे वा
ऽपिज्ञेयंस्वमतेतुगुणानामागमापायित्वात्प्रकृतेर्भेदोविवक्षितः अतोगुणाःत्रीणितत्वानि अपराणिपंचविंशतितत्वानिपूर्ववत्किपक्षद्वये

सत्वंज्ञानंरजःकर्मतमोऽज्ञानमिहोच्यते गुणव्यतिकरःकालःस्वभावःसूत्रमेवच ७ पुरुषःप्रकृतिर्व्यक्तमहंकारोनभोनिलः ज्यो
तिरापःक्षितिरितितत्वान्युक्तानिमेनव ८ श्रोत्रंत्वग्दर्शनंघ्राणोजिह्वेतिज्ञानशक्तयः वाक्पाण्युपस्थपाय्वंघ्रिःकर्माण्यंगोभयंम
नः ९ शब्दःस्पर्शोरसोगंधोरूपंचेत्यर्थजातयः गत्युक्त्युत्सर्गशिल्पानिकर्मायतनसिद्धयः १० ॥ ॥

साधारणानिदर्शयतिपुरुषइतिसार्धद्वाभ्यां व्यक्तंमहत्तत्वं नभआदीनितन्मात्राणिमेमया १५ एकादशात्रदर्शयतिश्रोत्रमिति दर्शनंच
— नयनंकद ज्ञानेंद्रियाणिपंच वागादिपाय्वंतानिपदंघ्रिकोनोक्तानिचत्वारिश्रंघ्रिश्चेति कर्माणिकर्मेंद्रियाणिपंच उभयंउभयात्मकंमनः
म ॰ ॰ द्धयद १८ मेवमेकादशात्पंचदर्शयतिशब्दइति शब्दादीनिविषयत्वयापरिणतानिपंचभूतानि १६ नवगत्यादिविस्तत्वाधिकंपक्षत्रयेति १०४
भावनेसाहगतीति गतिश्चउक्तिश्चउत्सर्गोविसर्गःशिल्पंचतानिकर्मायतनानांकर्मेंद्रियाणांसिद्धयःफलानिनतत्वांतराणीत्यर्थः ॥१७॥

त्वां त

[illegible] मतत्रयेतत्संस्मारितं निरूपयद्विकल्पयन्ति गायन्तीति यस्तदुक्तं तत्र नवमतं तावत्स्वयं दर्शयति सर्गादाविति कार्याणि षोडश विकाराः कारणादीनि महदा
[illegible] तत्कर [illegible] ती प्रकृतिः अस्य विश्वस्य सर्गादौ गुणैः सत्त्वादिभिः कर्त्री धत्ते उपादानकारणरूपत्वात् पुरुषस्तु अव्यक्तः अपरिणामी निमित्त
[illegible] केवलमीक्षते अतः परिणामिन्याः प्रकृतेः पुरुषो भिन्न इति ।१८। तदेवं रस्य कार्यस्य तदेतं नवविधमतिभेदेनाह व्यक्तादयः प्रकृतिव्यक्तादयो महदादयः
प्रकृतेरुत्पन्ना ये धातवस्ते विकुर्वाणाः पुरुषेक्षणेन लब्धवीर्याः संहताः अण्डं कार्यं सृजन्ति प्रकृतेर्बलात् तन्मात्रैरित्येतत्सर्गः ।१९। एवं नवमतं प्रसंहृत्य मतां

सर्गादौ प्रकृतिर्ह्यस्य कार्यकारणरूपिणी । सत्त्वादिभिर्गुणैर्धत्ते पुरुषोऽव्यक्त ईक्षते ।१८ व्यक्तादयो विकुर्वाणा धातवः पुरुषेक्षया
।। लब्धवीर्याः सृजन्त्यण्डं संहताः प्रकृतेर्बलात् ।१९। सप्तैव धातव इति तत्रार्थाः पञ्च खादयः । ज्ञानमात्मोभयाधारस्ततो देहेन्द्रियासवः २०
षडित्यत्रापि भूतानि पञ्च षष्ठः परः पुमान् । तैर्युक्त आत्मसम्भूतैः सृष्ट्वेदं समुपाविशत् ।२१। चत्वार्येवेति तत्रापि तेज आपोऽन्नमात्म
नः । जातानि तैरिदं जातं जन्मावयविनः खलु ।२२। ॥

तदेवमपि सामान्यतो निरूपितं घटनां विशेषतः सप्ततत्त्वपक्षं दर्शयति सप्तैवेति । ज्ञानं ज्ञाता ईतिर्द्रष्टा जीवः उभयोः ईश्वरजीवयोः आधारः आत्मा चेति सप्त त
त्त्वप्रकल्पना [illegible] नां कारणत्वेन खादिषु तत्त्वेषु अन्तर्भावमाह । ततः तेभ्यः सप्तभ्यः देहेन्द्रियासवः कार्याणि जायन्ते ।२०। षडिति मतेऽपि भौ [illegible] ति
कस्य भूतानां नवविं जीवस्य च परमात्मनि अन्तर्भावमाह तैर्युक्त इति ।२१। अन्यत्र हेतु । आत्मनो जातानि आत्मना सह चत्वारि तत्त्वानि अन्तर्भावमाह तैरिति
अवयविनः कार्यस्य ।२२। ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाoएo
१०५

भूतानि पंचतन्मात्राणि चेंद्रियाणि च पंच पंच । एकेन मनसा सह आत्मा सप्तदशः २३ आत्मैव संकल्पं तु मन उच्यते । त्रयोदशपक्षे भूतानि तन्मात्रैरेकीकृ-
तानि पंचैव इंद्रियाणि च तत्कार्यकाणि पंचैव मनश्चैकमिंद्रियाधिष्ठातृ आत्मा च द्विविधः एवं त्रयोदश २४ एकादशपक्षे पंचभूतानि पंचेंद्रियाणि
जीवमनसा एकमात्मानि नैतान्येकादश नवपक्षे अष्टप्रकृतयः पुरुषश्च विकाराणां मतं नवः २४ उपसंहरति इतीति एभिः प्रकारैः प्रकृतिपुरु

संख्याने सप्तदशके भूतमात्रेंद्रियाणि च । पंच पंचैकमनसा आत्मा सप्तदशः स्मृतः २३ तद्वत्षोडशसंख्याने आत्मैव मन उच्यते
भूतेंद्रियाणि पंचैव मन आत्मा त्रयोदश २४ एकादशत्व आत्मासौ महाभूतेंद्रियाणि च । अष्टौ प्रकृतयश्चैव पुरुषश्च नवेत्य-
था २४ इति नानाप्रसंख्यानं तत्त्वानामृषिभिः कृतं सर्वं न्याय्यं युक्तिमत्त्वाद्विदुषां किमशोभनं २५ उद्धव उवाच ॥ प्रकृतिः पु-
रुषश्चोभौ यद्यप्यात्मविलक्षणौ अन्योन्यापाश्रयात्कृष्ण दृश्यते न भिदा तयोः प्रकृतौ लक्ष्यते ह्यात्मा प्रकृतिश्च तथात्मनि २६ ए-
वं मे पुंडरीकाक्ष महांतं संशयं हृदि छेत्तुमर्हसि सर्वज्ञ वचोभिर्नयनैपुणैः २७ ॥

षनेदशापक्षायेत्यर्थः २५ तत्र पृष्टेति प्रकृतिरिति आत्मना जडाजडस्वभावेन विलक्षणौ अन्योन्यापाश्रयात् परस्परपरिहारेण अप्रतीतेरित्यर्थः ॥
तदेवाह किं प्रकृतौ तत्कार्ये देहे प्रकृतिश्चात्मनि तेन विना तस्या अप्रतीतेः अहमित्यभेदप्रतीतेर्न देहात्मनोर्भेदो लक्ष्यत इत्यर्थः २६ इति कर्त- १०५
मानं संशयं नयनैपुण्या ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्व्वं मिथ्युक्तं तत्र हेतुमाह यदि स्मात् त्वत्तः त्वत्प्रसादादेव ज्ञानं प्रमोषः त्वं च अत्र शक्तितः मायातः । ननु च स्वप्रकाशस्यात्मनः कथं ज्ञानप्रमो
षः ज्ञानदाने तत्प्रमोषे वा मम किं प्रयोजनं तत्राह त्वमेव वेत्ति २७ विकाराविकारात्मनोर्नानात्वैकत्वाभ्यां सापेक्षानिरपेक्षाभ्यां प्रकाश्याप्रकाशाभ्यां च वास

त्वत्तो ज्ञानं हि जीवानां प्रमोषस्तेऽत्र शक्तितः । त्वमेव ह्यात्ममायाया गतिं वेत्थ न चापरः ॥ २७ ॥ श्रीभगवानुवाच ॥ प्रकृ
तिः पुरुषश्चेति विकल्पः पुरुषर्षभ । एष वैकारिकः सर्गो गुणव्यतिकरात्मकः ॥ २८ ॥ ममाङ्ग मायागुणमय्यनेकधा विक
ल्पबुद्धीश्च गुणैर्विधत्ते । वैकारिकस्त्रिविधोऽध्यात्ममेकमथाधिदैवमधिभूतमन्यत् ॥ ३० ॥

तत्रेदं वक्तुं गद्य प्रकृतिः पुरुषश्चेति विकल्पोऽयं यत्तु नेद एव कृत तदस्य पेक्षायां प्रकृतिशब्दोक्त देहादिसंघातस्य विकारित्वं तावद्दर्शयति एष इति
द्वाभ्यां एष सर्गः सृज्यत इति सर्गः देहादिसंघातः वैकारिकः विकारवान् अत्र हेतुः गुणव्यतिकरात्मकः गुणक्षोभकृतः २८ नानात्वमाह ममेति विक
ल्पनं इदं तद्बुद्धीश्च अनेकधात्वं प्रपंचयति वैकारिकः अनेकविकारवानपि स्थूलेन मार्गेण तावत्त्रिविधः त्रैविध्यमेवाह अध्यात्ममिति एकं रूपं ३० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तानिरूपाणिदर्शयति। हकश्च अध्यात्मं रूपं अधिभूतं अन्तरंध्रे चक्षुर्गोलके प्रविष्टं आर्कं वपुः अंशोऽधिदैवं [illegible]मिति। सा पेक्षप्रकाशतामाह। परस्परमि
ति चक्षुषा रूपं ज्ञायते तद्दर्शनया ऽनुपपत्तम्य चक्षुस्तत्प्रवृत्त्यनधिष्ठानुपपत्तेरनदाधिष्ठात्रा देवता। ततश्चक्षुः प्रवृत्तिस्ततो रूपज्ञानमित्येवमेतत्त्रयं
परस्परं सिध्यति। अन्तरंध्र इतिविशेषेणाण्वाकशमाने हृदस्थानो पृथोगितमायत्तु रवेश्च आकाशे अर्कोवर्त्ततेमंडलात्मा सतु स्वतः सिध्यति। चक्षुर्विषे
यत्वे पिप्रतियोगपरेक्षानावमान्येणस्वतइत्यर्थः। इदानीमात्मनोविकारित्वाद्यनावेन नेदमाह। यतयस्मात् आत्मा एषामध्यात्मादीनामाद्यः कारणं
अतएकरूपः अभिन्नश्चतस्मादेतेभ्यो परोभिन्नः स्वप्रकाशत्वादपित्याह। स्वयानुभूत्या स्वतः। असिद्ध प्रकाशेनअखिलानां सिद्धानां परस्परं प्रका

हृद्रूपमार्कं वपुरन्तरंध्रे परस्परं सिध्यति यः स्वतः खे। आत्मा यदेषामपरो य आद्यः स्वयानुभूत्याखिलसिद्धसिद्धिः॥ ए
वंत्वगादिश्रवणादि चक्षुर्जिह्वादिनासादि च चित्तयुक्तं॥ ३१॥ ॥

शकानामपिप्रकाशकः सर्वेषामपिमामान्यतः चित्प्रकाशाविषयत्वात्। अतएवतस्यस्वप्रकाशत्वं सिद्धं। चक्षुषि दर्शितं त्रैविध्यमिंद्रियांतरेष्वप्याति
दिशति एवं [illegible]ति। यथा चक्षुः एवं त्वगाद्यपि त्रेधेत्यर्थः। त्वक्स्पर्शो वायुरिति। श्रवणं शब्दो दिश इति जिह्वा रसो वरुण इति नासा गंधो ऽश्विनाविति चित्तेनयु
[illegible]तः करणांतरमपि। तत्र चित्तं चेतयितव्यं वासुदेव इति। मनो मंतव्यं चंद्र इति। बुद्धिर्बोद्धव्यं ब्रह्मेति। अहंकारोऽहंकर्तव्यं रुद्र इत्येवं त्रिविधमि १०६
त्य[illegible]॥ १॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्तु ... पि वैल्लक्षण्यमात्रमेवोक्तं त्रिविधप्रपंचमतिरिक्तात्मप्रातिस्विकतः स्यात् अहंकारनिवृत्त्या तत्कृतः त्रिविध विकल्पनिवृत्तिस्तैवेत्याशयेनाह
... अहं अहंकारः तमेवाह गुणक्षोभं करोतीति तिन मातत्तः परमेश्वरात्कालादिनिमित्तात् प्रधानं मूलमुपादानं यस्य तस्मान्महतः प्रसूतो विकारः स त्रि | सू.
त्रिविधः मोहमयस्य विकल्पस्य हेतुः त्रिविधत्वमेवाह वैकारिक इति ३१ सत्कृतो निवर्तते आत्माज्ञान विलसितत्वात् ज्ञाननैत्याशयेनाह आत्मापरि

योसौगुणक्षोभकृतो विकारः प्रधानमूलात् महतः प्रसूतः । अहं त्रिवृन्मोहविकल्पहेतुर्वैकारिकस्तामस ऐंद्रियश्च ॥ ३२ ॥
आत्मापरिज्ञानमयो विवादो ह्यस्तीतिनास्तीति भिदार्थनिष्ठः । व्यर्थोपि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्वलोकात् ॥ ३३ ॥

ज्ञानमय इति ननु कथं मोहमयत्वं विकल्पस्याहंकारस्य वा केषांचिदस्यत्वांगीकारात्तत्राह विवाद इति अयं भिदार्थनिष्ठो विवादोप्यात्मापरिज्ञानमय
इत्यन्वयः यथा विवादः सर्वोपि भिदार्थनिष्ठ एव न तु वस्तुमात्रनिष्ठः अतः परस्परयुक्तिनिरिवेनैदस्य निराकृतत्वात् मोहमयत्वं सिद्धमिति ननु य
द्यहंकारो विकल्पस्तु नास्ति अलं तर्हि तन्निवृत्तिप्रयासेन तत्राह व्यर्थोपि अर्थरहितोपि स्वरूपनूतात् मत्तो बहिर्मुखानां नैवोपरमेत् यस्तत्कृ
तैः कर्मभिस्स्वनीचदेहेषु तेसंसरन्तीति ३३ ॥

त

तत्र पृच्छति त्वत्त इति प्रापकस्यात्मनो देहांतरगमनं स्वकर्तृकर्माणि निमित्तजन्ममरणादीनि कथमिति तावत् ३४ एतद्विद्वांसो न संति हि यस्मात्ता र अवंचिता मोहिताः ३५ लिंगशरीरं अध्यासेन संबध्यते इत्युत्तरमाह मन इति प्रधानत्वेन पंचविरिति निर्दिशन्निषामप्युपलक्षणार्थः देहाद्देहांतरं इति ३६ ततोन्य एवात्मा तन्मनोनुवर्तते अहंकारेणानुगच्छति ३६ ननु मनसो पि पूर्वदेहवियोगाद्देहांतरयोगश्च कथं न तत्राहेतिचेत् स्मृतिवियो गयोगाभ्यामित्याह ध्यायन्निति कर्मतंत्रात्कर्मोपस्थापितान् दृष्टान्वा अनुश्रुतान्वेदोक्तान्वा विषयान् अनु

उद्धव उवाच॥ त्वत्तः परावृत्तधियः स्वकृतैः कर्मभिः प्रभो। उच्चावचान्यथा देहान् गृह्णंति विसृजंति च ३४ तन्ममाख्याहि गोविंद दु र्विभाव्यमनात्मभिः न ह्येतत्प्रायशो लोके विद्वांसः संति वंचिताः ३५ श्रीभगवानुवाच॥ मनः कर्ममयं नृणामिंद्रियैः पंचभिर्युतं लोकाल्लोकं प्रयात्यन्य आत्मा तदनुवर्तते ३६ ध्यायन्मनोनु विषयान्दृष्टान्वानुश्रुतानथ उद्यत्सीदत्कर्मतंत्रं स्मृतिस्तदनु शाम्य ति ३७ विषयाभिनिवेशेन नात्मानं यत्स्मरेत्पुनः जंतोर्वै कस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः ३८ ॥

ध्यायन् अथ अनंतरं ध्यायमानेषु उद्यत् आविर्भवत् पूर्वविषयेषु च सीदत् लीयमानं भवति तदनंतरं तस्य स्मृतिः पूर्वापरानुसंधानं न शाम्यति ३७ अतः किमत आह विषयेति कर्मोपस्थापितदेवादिदेहात्मताभिनिवेशेन आत्मानं पूर्वदेहं पुनर्मनो न स्मरेत् इति यत्तत्स्यैव या तन्नादेहाभिनिवे शेन यत्र शोकादिहेतुः देवादिदेहाभिनिवेशेन वा हर्षतः पादेहेतोः पूर्वदेहे अत्यंतविस्मृतिः अहंकारनिवृत्तिः तदभिमानिनो जंतो जीवस्य मृत्युरुच्यते न तु देहस्य नाशः ३८ ॥

दि स

१०७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जन्मतु विषयस्य देहस्य आत्मतया स्वीकृतिं अभिमानं प्राहुः नतु देहवद्वस्तुस्पर्शि नवपुत्रादी देहवत्प्रीत्यतिशयमात्रेण किंतु सर्वभावेन अभेदेन अभिनि
म[illegible]मात्रेणोत्पत्तिमरणे दृष्टांतद्वयं यथा स्वप्नस्य मनोरथस्येत्यर्थः ३९ दृष्टांतौ विवृणोति स्वप्नमिति तत्र वर्तमाने स्वप्नादौ पूर्वं चैतं अपूर्वमिवेक्षित्वान्य मि
यः पूर्वसिद्धमप्यात्मानमपूर्वमिवाद्यजातमिव पश्यतीत्यर्थः ४० उपसंहरति इंद्रियाणामयनं मनः तस्य देहांतराणि निवेशेन यासृष्टिः तत्कृतिस्तया
वस्तुनि आत्मनि तदभिमानेनेदं त्रैविध्यं उत्तममध्यमनीचत्वं असदेव भातीत्यन्वयः एवंभूतस्यात्मावा ध्यासो स्य संतरभेदहेतुश्च भवति बाह्यविषयान्

श्री

जन्मत्वाऽत्मतया पुंसः सर्वभावेन भूरिद विषयस्वीकृतिं प्राहुर्यथा स्वप्नमनोरथौ ३९ स्वप्नं मनोरथं चेत्थं प्राक्तनं न स्मरत्यसौ
तत्र पूर्वमिवात्मानमपूर्वं चानुपश्यति ४० इंद्रियायनसृष्ट्येदं त्रैविध्यं भाति वस्तुनि बहिरंतर्भिदाहेतुर्जनोऽसज्जनकृद्यथा ॥
४१ नित्यदा ह्यंग भूतानि भवंति न भवंति च कालेनालक्ष्यवेगेन सूक्ष्मत्वात्तन्न दृश्यते ४२ ॥ ॥

अंतरान्शत्रुमित्रादीश्च पश्यतीत्यर्थः यथा जनो जीवः स्वप्ने बहून्स्वसतो जनान्देहान्[illegible]वन्पश्यन्नेव कुरूपो भाति न तद्वत् यथा इदं त्रैविध्यं अध्यात्मा
दिरूपं भाति असज्जनकृत् दुष्टपुत्रोत्पादकः जनः पिता स्वयं समोपि पुत्राभिमानतस्तद्वैरिमित्रादिषु यथा भेदहेतुर्भवति तद्वदिति भिन्नमप्यसमानं
४१ तदेवं लोकप्रसिद्धे जन्ममृत्यू निरूप्य तत्स्वभावदृष्टावपि तौ वैराग्याय निरूपयति नित्यदा भूतानि क्षणं भूतानि शरीराणि उत्पद्यंते नश्यंति च का
लस्यातिसूक्ष्मत्वात्तत्कृतं नवनं मनवनं वा विवेकिभिर्न लक्ष्यते ४२ ॥ ॥

…शांकर्मनिस्कोर
णुभवतदृति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मतोर्जन्ममरणयोरस्यानेककारणमेतद्भवेत्सत्यमेवतयोः कृतहस्याचांक्यानुमानेन साधयति अर्चिषां परिणामादिभिः स्रोतसां गत्यादिभिः फलानां पादि
निर्यथाऽवस्थाविशेषाः कृताः कालेनेति पूर्वस्यानुषंगः आदिशब्देन तेजोबलकामकौशलादीनामुपादानं किमत्र प्रकृतेऽस्तीत्यत आह अवस्था
नैव बलात् दीपज्वालादिवदित्यनुमानं ४३ कथं तर्हि जन्मनिरोध इति द्वे वृत्ते साहस्र पावलविनीसाहसोयमिति साहस्र्यादवर्षिमेवयथा सोऽयं दीपज्वति
प्रत्यभिज्ञा यथावत्मेवतसाप्रवाहजलानामेवतदिदं जलमिति तथा सोऽयं पुमानिति धीर्गीश्च मृषा नृणां बहूनां शरीरिणां मृषात्वमथमायुर्येषा
स्तो

यथाऽर्चिषां स्रोतसां च फलानां वा वनस्पतेः। तथैव सर्वभूतानां वयोऽवस्थादयः कृताः ४३ सोऽयं दीपोऽर्चिषां यद्वत्स्रोतसां तदिदं ज
लं। सोऽयं पुमानिति नृणां मृषा धीर्गीर्मृषायुषां ४४ मा स्वस्य कर्मबीजेन जायते सोऽप्ययं पुमान्। म्रियते वाऽमरो भ्रान्त्या यथाग्निर्दारु
संयुतः ४५॥ ॥

मविवेकिनां तेषां भवति ४४ ननु कथं देहाध्यासवतः पुंसः कर्मजन्ममरणानि संतिनात्मन इत्यत आह न हि घटते घटस्य पुरुषनेहेन सत्तम
... वेतिन अयं तस्यापि विस्फुरत्ता दत्तावादित्याह मा स्वस्य स्वेनैवात्मनः कर्मणा बीजभूतेन सोऽपि अजोऽपि पुमान् जायते म्रियते वा किंतु अयं पुमा
... अजन्मापि जायत इव अमरोऽपि म्रियत इव यथा महाभूतात्तेजोरूपोऽग्निराकल्पान्तमवस्थितोऽपि दारुयोगवियोगाभ्यां जन्मनाशोत्पार राम
... ४५॥ ॥ १०८

तदुपरि जरा तदुपरि मृत्युः

[illegible]सेकाः नवयोवस्थाः प्रपंचयति निषेको जठरे प्रवेशः गर्भस्तन्मध्ये वृद्धिः बाल्यं आपंचमाब्दात् कौमारं आषोडशाब्दात् ततो यौवनमापंच
[illegible]त्वारिंशतः ततो वयोमध्यमाषष्टिवर्षात् ॥१८॥ देहसंबंधाज्जन्ममरणादीनीत्युपपादितमार्थमुपसंहरति एता इति । हि स्फुटं अन्यस्य देहस्य तनूः
अवस्थाः गुणसंगात् अहंकृत्या अविवेकात् कश्चित्परमेश्वरानुगृहीतः कथंचिज्जहाति अवस्थावतो देहस्य द्रष्टा नावस्थावानिति विवेकज्ञानेन ॥१९॥

निषेकगर्भजन्मानि बाल्यकौमारयौवनं । वयोमध्यं जरा मृत्युरित्यवस्थास्तनोर्नव ॥१८॥ एता मनोरथमयीर्ह्यन्यस्योच्चावचास्त
नूः । गुणसंगादुपादत्ते क्वचित्कश्चित्जहाति च ॥१९॥ आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ । न भवाप्ययवस्तूनामभि
ज्ञो द्वयलक्षणः ॥२०॥ तरोर्बीजविपाकाभ्यां यो विद्वान् जन्मसंयमौ । तरोर्विलक्षणो द्रष्टा एवं द्रष्टा तनोः पृथक् ॥२१॥ ॥

ननु तदानीं मूर्छितत्वेन जन्ममरणवान् देहो न दृश्यते तत्राह आत्मन इति पितृदेहस्य और्ध्वदैहिकं कुर्वताः अपमदर्शनात् पुत्रदेहस्य च जातकर्मणि ज
न्मदर्शनात् आत्मनः स्वदेहस्यापि भवाप्ययावनुमेयौ एवं च द्रष्टृत्वे सति भवाप्ययवतां वस्तूनां देहानामभिज्ञो द्रष्टा द्वयलक्षणः भवाप्ययधर्म
को न भवति ॥२०॥ एतदेव दृष्टांतेन स्पष्टयति तरोरिति तरुद्रष्टैव नो ज्ञानमात्रस्योपलक्षणं फलपाकांतस्य बीजं आरभ्य आदेरित्यर्थः यथा तरोरेवास्य
परिणामो विपाकः बीजाज्जन्म विपाकान्निरोधं संयमं नाशं च विद्वान् ॥२१॥ ॥ किंतु

तरोः स्वामी स विद्वान् पितरो विलक्षणो द्रष्टा एवं तनोर्द्रष्टा ततः पृथक् ॥२१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अविवेकिनः संसारं प्रपंचयति प्रकृतेरिति पंचभिः । तत्त्वेन तत्त्वतो ऽविविच्य तत्स्वहं[ध्या]सास्पदेषु विषयेषु संमूढ इति वा ॥ ५० ॥ गुणभेदेन त्रिविधं २
तत्रापि तत्तारतम्येनानेकं त्रिविधं संसारमाह सत्त्वेति ॥ ५१ ॥ न त्वस्य कर्तुरात्मनः कुतः कर्मनिर्बंधस्तत्राह नृत्यतो गायतोऽन्यान्पश्यन्ननुक
रोति तत्स्वरतालमुद्रागतिभंग्यालेखकरुणादिरसं च मनस्यनुभवं तथा पतीत्यर्थः । अनुकार्यते गुणैर्बलादित्यर्थः । अनेन दृष्टांतेन हृत्वप
धर्मोऽध्यारिस्फुरतीति दर्शितं ॥ ५२ ॥ उपाधिधर्माध्योपहिते ऽवभासंत इत्यत्र दृष्टांतमाह यथांभसेति ॥ तीरस्थास्तरवो धावंत इव दृश्यंते

कं

प्रकृतेरेवमात्मानमविविच्याऽबुधः पुमान् । तत्त्वेन स्पर्शसंमूढः संसारं प्रतिपद्यते ॥ ५० ॥ सत्त्वसंगादृषीन्देवान्रजसाऽसुर
मानुषान् । तमसा भूततिर्यक्त्वं भ्रामितो याति कर्मभिः ॥ ५१ ॥ नृत्यतो गायतः पश्यन्यथैवानुकरोति तान् । एवं बुद्धिगुणान्पश्यन्न
नीहोऽप्यनुकार्यते ॥ ५२ ॥ यथाऽंभसा प्रचलता तरवोऽपि चला इव । चक्षुषा भ्राम्यमाणेन दृश्यते भ्रमतीव भूः ॥ ५३ ॥ यथा मनोरथधि
यो विषयानुभवो मृषा । स्वप्नदृष्टाश्च दाशार्ह तथा संसार आत्मनः ॥ ५४ ॥ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते । ध्यायतो वि
षयानस्य स्वप्नेऽनर्थागमो यथा ॥ ५५ ॥

जले प्रतिबिंबिता गच्छंत इव चलाऽइवेति ॥ विषयग्राहकेण मनसा परिकल्पिता एव ते भ्रमा न तु स्वरूपादृश्यो गुणाः
ऽन्यकृतः संतिष्ठतो मनोनिबंधन एव संसार इत्यनि ऽस्पयाहकगुणग्राह्य एव भासंत इत्यत्र दृष्टांतमाह चक्षुषेति ॥ ५३ ॥ भोगस्यापि मिथ्यात्वे दृष्टांत
मुपमाह यथेति ॥ यथा एताः प्रसिद्धा मनोरथधियः स्वप्नदृष्टाश्च धियो यथा मृषा । एवमात्मनो विषयानुभवः ॥ ५४ ॥ ननु यदि मृषा तर्हि किं तन्निवृ १०९
संसारो मृषा
त्तिश्रमेण तत्राह अर्थे हीति ॥ अस्यात्मनः ॥ ५५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽन्तीनोगोवृमोनकर्त्तमिड्स्माद्रुतस्मादिति ५६ दुःखप्रतिकारोद्यममपि परित्यज्य परमेश्वरनिष्ठेनैव नाश्यमित्याह द्विभिः शतिघ्नामां क्षिप्तस्याक्षि
सःनुन्नइत्विा प्रलब्धउपहसितः ५७ निष्ठितः निष्ठीवनविषयीकृतः मूत्रितः मूत्रेणार्द्रीकृतः प्रकंपितः परमेश्वरनिष्ठातः प्रच्याविश्नतो पिक्लच्छगे

तस्मादुद्धव मास्मत्वं विषयानसदिंद्रियैः आत्माग्रहणनिर्भातं पश्यवैकल्पिकंभ्रमं ५६ क्षिप्तोऽवमानितोऽसद्भिः प्रलब्धोऽसूयि
तोऽथवा ताडितः सन्निरुद्धोवावृत्त्यावापरिहापितः ५७ निष्ठितोमूत्रितोवाज्ञैर्बहुधैवंप्रकंपितः श्रेयकामः कृच्छ्रगत
आत्मनात्मानमुद्धरेत ५८ उद्धवउवाच यथैवमनुबुध्येयंवदतोवदतांवर सुदुःसहमिमंमन्यऽआत्मन्यऽसदतिक्रमं
५९ विदुषामपिविश्वात्मन्प्रकृतिर्हिबलीयसी ऋतेत्वद्धर्मनिरतांछांतांस्तेचरणालयान् ६० इति श्रीभागवते महापुराणे ए
कादशस्कंधे श्रीभगवदुद्धवसंवादे द्वाविंशोऽध्यायः २२

तंकष्टंप्राप्तोऽपि ५८ एवं त्वदुक्तं यथाऽनुबुध्येयं तथानः सर्वनिश्चितिवद ~~स्वकर्म~~ रतानृते विदुषामपि असद्भिः कृतमतिक्रमं अपराधं सुदुःसहं मन्य
इत्यन्वयः प्रकृतिः स्वभावः ५९ निरस्य सर्वसंदेहानेकीकृत मुदर्शनं प्रकाशित रहस्यं तं कृष्णामितरुक्मीश्वरं ६० इत्येकादशेद्वाविंशोऽध्याय

भा॰ए॰
२०१

त्रयोविंशे तिरस्कारसहनोपाय ईर्यते भिक्षुगीताप्रकारेण मनसः संयमो धिया॥१॥ दुर्जनोपद्रवे नूनं दुःसहोऽपि महीयसां अतस्तदुर्निरिध्मायैः सहनो
पायवर्णनं॥२॥ तत्र तावदस्मिन्नध्याये भिक्षुगीतया मनोविजयः उत्तरस्मिन्प्रकृतिपुरुषविवेकः तदुत्तरस्मिन्गुणवृत्तिविजयः ततः परस्मिन्नैलगीतया
विषयसंगत्यागेन सत्संगः इति क्रमेण त्रिभिरध्यायैः पायान्यवक्ताव्यर्पते श्रीशासितः साधितः त्वत्सम्यक्त्वः संकुचत्येनत्प्रतिज्ञाव भाषे॥१॥ तत्र तावदंगीकार

श्रीबादरायणिरुवाच॥ स एवमाशंसित उद्धवेन भागवतमुख्येन दाशार्हमुख्यः॥ सभाजयन्भृत्यवचो मुकुंदस्तमाबभा
षे श्रवणीयवीर्यः॥१॥ श्रीभगवानुवाच॥ बार्हस्पत्य स नैवात्र साधुर्वै दुर्जनेरितैः॥ दुरुक्तैर्भिन्नमात्मानं यः समाधातुमीश्वरः॥२॥
न तथा तप्यते विद्धः पुमान्बाणैर्हि मर्मगैः॥ यथा तुदंति मर्मस्था ह्यसतां परुषेषवः॥३॥ कथयंति महत्पुण्यमितिहासमिहोद्धव॥
तमहं वर्णयिष्यामि निबोध सुसमाहितः॥४॥ केनचिद्भिक्षुणा गीतं परिभूतेन दुर्जनैः॥ स्मरता धृतियुक्तेन विपाकं निजकर्मणां॥५॥

हंसमसवृह

स पूजयति वाग्भिर्हर्षवर्धिताभिः शिष्यः अत्र लोके सुसाधुर्नास्ति यो दुर्जनोक्तैर्भिन्नं दूनितं मनः शमयितुमीश्वरः स्यात्॥२॥ कुत इत्यत आह नेति यथा ११०
ते वृत्तिसंस्थिता वा परुषोक्तिरूपा इषवस्तुदंति व्यथयंति तथा स्वरबाणा न तुदंति अन्तस्तैस्तथा न तप्यत इत्यर्थः॥३॥ तथापि मया व्यवसायेन समा १११
धेयः सर्वमोतुं वाक्यमित्यभिप्रायेणेतिहासं प्रस्तौति महदिति यथा नवनीतं तथा पुण्यमितिहासं गाथां कथयंति॥४॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नि

स ... वृद्धधनाढ्यः कृष्यर्जितस्य धनस्य नाशेन संतप्यमानो निर्विण्णस्य तत्र वृत्तस्य निर्वेदमत्रानुवर्णितरूपद्रुतः प्रकृतोपयोगिनीं गाथामगायतेति वृत्तं
त ...रितमाह अवंतिष्वित्यादिना अवंतिषु मालवेषु वार्तावृत्तिः कृषिवाणिज्यादिरूपा वृत्तिर्यस्य कदर्यस्तु स्वभावतः आत्मानं धर्मं कामं च पुत्रदारा
श्च ...उय ... देवतातिथिपितॄन् सांशसकदर्य इति स्मृत इति ॥६॥ तस्य ये ज्ञातयो बांधवाश्च तिथयो ... धनी नार्चितास्तेन नार्चिता इत्यर्थः ॥ शून्या वसथे धर्महीं कर्म

अवंतिषु द्विजः कश्चिदासीदाढ्यतमः श्रिया वार्तावृत्तिः कदर्यस्तु कामी लुब्धोतिकोपनः ॥६॥ ज्ञातयोतिथयस्तस्य वाङ्मात्रेणापि नार्चिताः ॥ शून्यावसथ आत्मापि काले कामैरनर्चितः ॥७॥ दुःशीलस्य कदर्यस्य द्रुह्यंते पुत्रबांधवाः दारा दुहितरो भृत्या विषण्णा नाचरन् प्रियं ॥ तस्यैवं यक्षवित्तस्य च्युतस्योभयलोकतः ॥ धर्मकामविहीनस्य चुक्रुधुः पंचभागिनः ॥९॥ तदवध्यानविस्रस्तपुण्यस्कंधस्य भूरिद । अर्थोऽप्यगच्छन्निधनं बह्वायासपरिश्रमः ॥१०॥ ज्ञातयो जगृहुः किंचित्किंचिद्दस्यव उद्धव । दैवतः कालतः किंचिद्ब्रह्मबंधोर्नृपार्थिवात् ॥११॥ स एवं द्रविणे नष्टे धर्मकामविवर्जितः । उपेक्षितश्च स्वजनैश्चिंतामाप दुरत्ययां ॥१२॥ ॥ व

नेशं हे देहे वा ॥७॥८॥ पञ्चानां विभक्तमिव केवलं रक्षणीयं वित्तं यस्य पंचभागिनः पंच यज्ञदेवताः ॥९॥ तेषामवधानमनादरः तेन विस्रस्तो विशीर्णः पुण्यस्कंधः धर्मयशो लाभमात्रहेतुः स्कंधो यस्य तस्य बह्वायासैः कृष्यादिभिः केवलं श्रमो यस्मिन् सः ॥१०॥ दैवतः गृहदाहादिः कालतः निखातं धना दिनृणां पार्थिवानां च दंडैकांतस्मात् ॥११॥ ॥

कुतो निधनमगच्छन् तदाह ज्ञातय इति

यो०

नष्टरायः नष्टोराः अर्थो यस्य तस्य तपस्विनः संतप्तस्य ॥ १३ ॥ मे मया आत्मा देहः । वृथा चात्मानुतापनं प्रपंचयति नधर्माय इत्यादिना यस्य ईदृशो ऽर्थायास
स्तेन मया ॥ १४ ॥ नरकाय च समस्य पापस्य धर्माननुष्ठानात् ॥ १५ ॥ श्वित्रः श्वेतकुष्ठं ॥ १६ ॥ सिद्धे पर्यंतस्योत्कर्षे संवर्धने । नाशोपभोग आयो ईदृक्कुत्र नाशोपभोगे च
सर्यः साधनोत्कर्षयोरायासः ततस्त्रासः चिंता च । नाशे भ्रम इति ॥ १७ ॥ किंच अर्थप्राप्त्यर्थं स्तेयादयः । आप्ते ऽर्थे स्मयादयो व्यसनैः सह नव व्यसना पुडनर्भिः

तस्यैवं ध्यायतो दीर्घं नष्टरायस्तपस्विनः ॥ खिद्यतो बाष्पकंठस्य निर्वेदः सुमहानभूत ॥ १३ ॥ स चाहेदमहो कष्टं वृथात्मा मेनुतापितः
न धर्माय न कामाय यस्यार्थायास ईदृशः ॥ १४ ॥ प्रायेणार्थाः कदर्याणां न सुखाय कदाचन ॥ इह चात्मोपतापाय मृतस्य नरकाय च ॥ १५
यशो यशस्विनां शुद्धं श्लाघ्या ये गुणिनां गुणाः ॥ लोभः स्वल्पोपि तान्हंति श्वित्रो रूपमिवेप्सितं ॥ १६ ॥ अर्थस्य साधने सिद्धे उत्कर्षे रक्षणे
व्यये ॥ नाशोपभोग आयासस्त्रासश्चिंता भ्रमो नृणां ॥ स्तेयं हिंसानृतं दंभः कामः क्रोधः स्मयो मदः ॥ भेदो वैरमविश्वासः संस्पर्धा
व्यसनानि च ॥ १८ ॥ एते पंचदशानर्था ह्यर्थमूला मता नृणां ॥ तस्मादनर्थमर्थाख्यं श्रेयोर्थी दूरतस्त्यजेत ॥ १९ ॥ भिद्यंते भ्रातरो दाराः पितरः
सुहृदस्तथा ॥ एकास्निग्धाः काकिणिना सद्यः सर्वेरयः कृताः ॥ २० ॥ अर्थेनाल्पीयसा ह्येते संरब्धा दीप्तमन्यवः ॥ त्यजंत्याशु स्पृधो घ्नंति स
हसोत्सृज्य सौहृदं ॥ २१ ॥ ॥

तमहाविषयाणि चत्वारि ॥ १८ ॥ १९ ॥ भिदद्वैरस्पर्धाः प्रपंचयति द्वाभ्यां । भिद्यंते स्नेहं त्यजंति । कथंभूताः एकास्निग्धाः एके एकप्राणाः ते च ते आस्नि
ग्धाश्च ते सर्वे कृतः काकिणिना पुत्तमाषविंशतिवराटिका काकिणी तया ॥ २० ॥ संरब्धाः क्षुभिताः स्पर्धमानाः ॥ २१ ॥ ॥ ॥ १९१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽ[illegible]वदुर्ग्यनिष्ठानामृतेऽर्थाःपरलो[illegible]केऽप्यनर्थएवतेषामिमाहलब्ध्वेतित्रिभिर्विशिः मानुष्यंजन्मतत[illegible]त्वापिद्विजाग्र्यतांब्राह्मण्यंस्वार्थंघ्नंतिघ्नात्म
[illegible]नंतियेतेयान्ति २१ अमरप्रार्थ्यतांदर्शयन्नाहस्वर्गेति लोकंदेहान्स्तुषज्जेतप्रासक्तिंकुर्यात २३ ऋषयोमनुष्ययज्ञब्रह्मयज्ञयोदेव
[illegible]पित्रनृता नीतरेषुज्ञातयःसगोत्राः बांधवाविवाहादिनासंबंधाः तान्अन्यांश्चभागिनःभोगहिनि आत्मानंचअसंविभज्यअ

लब्ध्वाजन्मामरप्रार्थ्यंमानुष्यंतत्द्विजाग्र्यतां तदनादृत्ययेस्वार्थंघ्नंतियांत्यशुभांगतिं २२ स्वर्गापवर्गयोर्द्वारंप्राप्यलोकमिमंपुमा
न् द्रविणेकोनुसज्जेतमर्त्योऽनर्थस्यधामनि २३ देवर्षिपित्रभूतानिज्ञातीन्बंधूंश्चभागिनः असंविभज्यचात्मानंयक्षवित्तःपत
त्यधः २४ व्यर्थयाऽर्थेहयावित्तंप्रमत्तस्यवयोबलं कुशलायेनसिध्यंतिजरठःकिंनुसाधये २५ कस्मात्संक्लिश्यतेविद्वान्व्य
र्थयार्थेहयाऽसकृत् कस्यचिन्माययानूनंलोकोऽयंसुविमोहितः २६ किंधनैर्धनदैर्वाकिंकामैर्वाकामदैरुत मृत्युनाग्रस्य
मानस्यकर्मभिर्वोतिजन्मदैः २७॥ ॥

॥२४॥
ज्ञातिदिनिरसंतर्प्य एवंविमर्शनुतप्यमानस्याह व्यर्थयार्थेहयाप्रमत्तस्यममवित्तादिगतमितिशेषः येनवित्तादिनाकुशलाःविवेकिनःसिध्यं
तिमुक्तावजरठोवृद्धः २५ अन्यमपिस्वसदृशंशोचति कस्माद्विद्वानर्थविद्वानपिसंक्लिश्यति कारणंसंभावयतिकस्यचिदिति २६ ननुनायंमो
हितःक्लिश्यतिकिंतुधनादिभिर्भोगादिविधित्सयाअतआहकिंधनैरितितत्पुनरपि २७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
११२

इदानीं संपन्नविवेकः सन्नुष्यन्नाहस्तनमिति त्रिभिः येन प्रीतेनात्मनः प्रवरूपो निर्वेदस्य नवति समहरिर्मे नूनं प्रीत इति ॥ २७ ॥ अंगं शोषयिष्ये तपसा ॥ यद्वा
विद्यापालयंनेष्यामि यदि शेषात्कालावशेषस्य ध्यात्मन्येव सिद्धस्करुष्टः सन् ॥ अखिलस्वार्थे धर्मादिसाधने अप्रमत्तः सन् ॥ २८ ॥ अनुमोदेरन् अनुग्रह्णीयुः ॥ न
नु देवैरनुमोदितोऽपि जरठः स्वल्पेन कालेन किं साधयिष्यसि तत्राह मुहूर्तेनेति ॥ ३० ॥ अभिप्रेत्य निश्चित्य ॥ आवंत्यः अवंतिदेशानवः हृदयग्रंथीन्

नूनं मे भगवांस्तुष्टः सर्वदेवमयो हरिः ॥ येन नीतो दशामेतां निर्वेदश्चात्मनः प्लवः ॥ २८ ॥ सोऽहं कालावशेषेण शोषयिष्येऽङ्गमात्म
नः ॥ अप्रमत्तोऽखिलस्वार्थे यदि स्यात्सिद्ध आत्मनि ॥ २९ ॥ तत्र मामनुमोदेरन् देवास्त्रिभुवनेश्वराः ॥ मुहूर्तेन ब्रह्मलोकं खट्वांगः समसा
धयत् ॥ ३० ॥ श्रीभगवानुवाच ॥ ॥ इत्थमभिप्रेत्य मनसा ह्यावंत्यो द्विजसत्तमः ॥ उन्मुच्य हृदयग्रंथीं शांतो भिक्षुरभून्मुनिः ॥ ३१ ॥ स चचा
र महीमेतां संयतात्मेंद्रियानिलः ॥ भिक्षार्थं नगरग्रामानसंगोऽलक्षितोऽविशत् ॥ ३२ ॥ तं वै प्रवयसं भिक्षुमवधूतमसज्जनाः ॥ दृष्ट्वा प
र्यभवन् भद्र बह्वीभिः परिभूतिभिः ॥ ३३ ॥ केचित्त्रिवेणुं ज[illegible]गृहुरेके पात्रं कमंडलुं ॥ पीठं चैकेऽक्षसूत्रं च कंथां चीराणि केचन ॥ प्रदा
य च पुनस्तानि दर्शितान्याददुर्मुनेः ॥ ३४ ॥ ॥

स्व[illegible]म्मृकारान् ॥ ३१ ॥ असंगः असक्तिमान् ॥ अलक्षितः श्रेष्ठमप्रीतयन् ॥ ३२ ॥ प्रवयसं वृद्धं ॥ अवधूतं मलिनं ॥ पर्यभवन् ॥ अवमेनिरे हे भद्र
प[illegible]तिरस्कारैः ॥ ३३ ॥ परिभवान्येव दर्शयति केचिदिति सप्तभिः ॥ तो भगवन् गृहाण एतदित्थं दर्शितानि मंतिप्रदाय पुनरादद् ॥ ३४ ॥ ११२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अमेमूत्रयंतिमूर्खन्निचष्टीवंतिपुष्करेएस्लेष्माएंप्रक्षिपंति ३५ ध्क्षिपंतिनिंदंति निंदामेवाह एषधर्मध्वजः त्रिदंडलिंगोपजीवी त्यागेलोकवं [illegible]नदिवाकुम्भीए क्लिश्यतिमहासारः ज्ञानीबली ३७ कुर्वंतिरैतितदुपर्यधोवायुंमुंचंति नवं धुः स्टंखलैः निरुरुधुः कारागृहातिषु क्जिंचु [illegible]गोरकादिंयया ३९ नोतिकंदुर्जनादिहि ति देहिकंज्वरादिनिमित्तं दैविकंच तोभ्यादिजनवं दिष्टंदैवप्राप्तं ४० धर्मान्नातयद्भिः परिखूतो

अन्नंचनैवसंपन्नंभुंजानस्यसरित्तटे मूत्रयंतिच पापिष्ठाः ष्टीवंत्यस्यचमूर्ध्नि ३५ यतवाचंवाचयंतिताडयंति नवकिंचेत तजं[illegible]यंस्यपरेबाग्निः स्तेनोयमितिवादिनः ३६ बध्नंतिरज्ज्वातकेचिक्षिप्तंवध्यतोमिति क्षिप्पंतेकेव[illegible]ज्ञानंतएषधर्मध्वज :वाच: ३७ क्लीएविन्न दुमांहन्तिमयुहीतूस्वजनोजितः अहोएषमहासारोधृतिमान्गिरिराडिव ३८ मोनेनसाध्ययत्यधैर्यंविक वत्दृढनिश्चयः इत्येकेविहसंत्येनमेकेदुवतियंतिच तंबबंधुर्निरुरुधुर्यथाक्रीडनकंद्विजं ३९ एवंसन्नोतिकंदुःखंदैहि कंदैविकंचयत् नोकव्यमात्मनोदिष्टंप्राप्तंप्राप्तमबुध्यत ४० परिवृतइमांगाथामगायत्यनराधमैः पातयद्भिःस्वधर्मस्थो धृतिमास्थायसात्विकी ४१

भिसात्विकींधृतिमास्थायस्वधर्मएवस्थितइमांवक्ष्यमाएांगाथामगायतसात्विकीधृतिश्च धृत्यायायाधारयतेमनःप्राणेंद्रियक्रियाःयोगेना व्यभिचारिण्याधृतिःसापार्थसात्विकीतिस्मृतेः ४१ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०

तामेवाष्टश्लोकीं गाथामाह नायमिति न चात्मा नापि ग्रहादयः मनः परं केवलं सुखदुःखयोः कारणं वदंति मनसा ह्येव प्रपतिमनसा श्र

णोतीत्यादिश्रुतयः ४२ परिवर्तनप्रकारमेवाह मन इत्यादि गुणान् गुणवृत्तीः सृजति ततस्ततो गुणेभ्यः शुक्ला सात्विकी निकृष्टा

तामसानि लोहितानि राजसानि सवर्णाः सृतयः देवतिर्यङ्नरादिगतयः ४३ तस्मिन्मनस्येव संसारः स्यान्नात्मनस्तस्य त्वसंगत्वात्

अनीह इति अयमर्थः अविद्यया मनोध्यासेनेयममात्मनः संसृतिर्न तु स्वतः यतस्तद्रहिते मत्सखस्य संसारोनास्ति किंतु तद्युक्तो जीवस्यैवेति

द्विज उवाच नायं जनो मे सुखदुःखहेतुर्न देवतात्मा ग्रहकर्मकालाः मनः परं कारणमामनंति संसारचक्रं परिवर्तयेत्यत् ४२

मनो गुणान्वै सृजते बलीयस्ततश्च कर्माणि विलक्षणानि शुक्लानि कृष्णान्यथ लोहितानि तेभ्यः सवर्णाः सृतयो भवंति ४३ अ

नीह आत्मा मनसा समीहता हिरण्मयो मत्सख उद्विचष्टे मनः स्वलिंगं परिगृह्य कामान्जुषन्निबद्धो गुणसंगतोऽसौ ४४

नन्वेत[illegible]दाह मनसा समीहमानेन सह नियंतृत्वेन वर्तमानोपि परमात्मा अनीहः तत्क्रियासंगरहितः यतो हिरण्मयः विद्याशक्तिप्रधानः क

[illegible]स्वकः मम जीवस्य सखा नियंता अतः उदुच्चैर्विचष्टे तिरोहितज्ञानेन केवलं प्रपश्यतीत्यर्थः असौ पुनरहं जीवः स्वलिंगं स्वस्मिन्नात्म

[illegible]निष्ठोत यतिसंसारमिति तथात्मनः परिग्रह्य आत्मत्वेन स्वीकृत्य तस्य मजसा गुणैः कर्मभिः संगतः संबंधः गुणसंगात् शोकाद्य ११३

[illegible]न्निबद्ध इति ४४

अ२

[illegible]नियमे हेतुः कृते सर्वं कृतं स्यात्तं विना तु सर्वं व्यर्थमित्याह दानमिति द्वाभ्यां। स्वधर्मो नित्य नैमित्तिकः सद्व्रतान्येकादश्युपवासादीनित्यु
न[illegible]भिः कर्माणि एते सर्वे उपाया मनोनिग्रहलक्षणाः अन्तो निष्ठा फलं येषां तेन तया। ननु ज्ञानांगत्वं तेषां प्रसिद्धं तत्राह मनसः समाधिर्नि
अह[illegible]रायमनः ज्ञानं ४५ अतो यस्य मनः समाहितं भवति तस्य किं कृत्यमवशिष्यते इति परं प्रत्युपदिशन्निव स्वयमेवाह असंयतं विक्षिप्तं चेत्
यथा विनश्यत् आलस्यादिना लीयमानं चेत् तत्र वे तत् हि एभिर्दानादिभिः किमपरं प्रयोजनं स्यात् न किंचिदित्यर्थः ४६ नन्वितरेन्द्रियजयः प्र
प्रयोजनं स्यान्नेत्याह मनोवश इति देवा इन्द्रियाणि तदधिष्ठातारो वा भीष्मः योगिनामपि भयंकरो मनोलक्षणो देवः कुतः सहसः बलाद

दानं स्वधर्मो नियमो यमश्च श्रुतं च कर्माणि च सद्व्रतानि। सर्वे मनोनिग्रहलक्षणान्ताः परो हि योगो मनसः समाधिः ४५ समाहितं
यस्य मनः प्रशान्तं दानादिभिः किं वद तस्य कृत्यं। असंयतं यस्य मनो विनश्यद्दानादिभिश्चेदपरं किमेभिः ४६ मनोवशोऽन्ये
हि ह्यभवन्स्म देवा मनश्च नान्यस्य वशं समेति। भीष्मो हि देवः सहसः सहीयान्युंज्याद्वशे तं स हि देवदेवः ४७ तं दुर्जयं शत्रुमसह्यवे
गमरुंतुदं तं न विजित्य केचित्। कुर्वन्त्यसद्विग्रहमत्र मर्त्यैर्मित्राण्युदासीनरिपून्विमूढाः ४८ ॥

पि बलिनोऽपि बलात्सहीयान् बलीयान्। अतस्तं यो वशवर्तिनं कुर्यात् स एव देवदेवः सर्वेन्द्रियजेता भवति नान्यः। तथा च श्रुतिः। मनोसो वशी स
र्वमिदं बभूव नान्यस्य मनो वशमन्वियाय भीष्मो हि देवः सहसः सहीयानिति ४७ असह्यो रागादयो वेगाः यस्य तं। अत एव अरुंतुदं म
र्मन्तुदं व्यथयतीत्यरुंतुदं तं ननु तं नेति च्छेदः तं न विजित्य अजितत्वात् ततः ये केचिन्मर्त्यैः कैश्चित् असद्विग्रहं कुर्वन्ति तत्र चानु
कूल प्रतिकूलादीन् स्वचक्षपात्मीयादीन् कुर्वन्तीति मूढा इत्यर्थः ४८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततश्चानेन प्रकारेण संसारेस्त्वमंतीत्याह देहमिति। मनोमात्रपरिकल्पितमिमं स्वदेहमहमिति पुत्रादिदेहं च ममेति स्वीकृत्य तमसि संसारे ॥४९॥ ननु एवं मनस एव सुखदुःखकारणत्वमुपपाद्येदानीं जनार्दनो ऽप्यमकारणं वेद पंचयतिज नमित्यादि ४८ इत्यत्र च प्रमित्रपिपदे श्रात्मनः किंन किंचित् सुखदुःखकर्तृत्वं चेत्यर्थः। कुतस्तत्राह हि शतिनिमित्तं नोमयोर्निकारयोर्देहयोस्तत् नत्वात्मनः। अमूर्तस्याक्रियस्य च हननादिसुक

न कृतत्वं

देहं मनोमात्रमिमं गृहीत्वा ममाऽहमित्यंधधियो मनुष्याः। एषोऽहमन्योऽयमिति भ्रमेण दुरंतपारे तमसि भ्रमंति ॥४९॥ जनस्तु हे तुः सुखदुःखयोश्चेत्किमात्मनश्चात्र हि भौमयोस्तत्। जिह्वां क्वचित्संदशति स्वदद्भिस्तद्वेदनायां कतमाय कुप्येत् ॥५०॥ दुःखस्य हेतुर्यदि देवतास्तु किमात्मनस्तत्र विकारयोस्तत्। यदंगमंगेन निहन्यते क्वचित्क्रुध्येत कस्मै पुरुषः स्वदेहे ॥५१॥

मत्त्विकर्तृत्वानुपपत्तेः तथापि दुःखमात्मपर्यवसाय्येवेत्युक्तिं एवमपि परमात्मनः अन्यत्राप्येकत्वान्न कोपविषयोऽस्तीति दृष्टांतेन दर्शयति जिह्वामिति ५०॥ यदि देवतास्त्वसुनामपि तत्रापि पिपदे श्रात्मनः किं यतो विकारयोर्विक्रियमाणयोर्देवतयोस्तत्। हस्तेन स्वस्य निहते तेन हवास्त्विदृष्टेतद ... देवतोर्वक्रीडयोरेव तत्। न त्वविक्रियस्यानहंकारस्य चात्मनः। देवतानां च सर्वदेहेष्वेकत्वान्न कोपविषयोऽस्तीति। स्वदेहदृष्टांतमाह यदंगमित्यंगं ... अधिष्ठानं हस्तमुखादि अत एव पूर्वं च देवतानां अधिष्ठानरूपत्वं विकारदंतोदाहरणं ॥५१॥ १२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मनः सुखदुःखाद्याकारः परिणामः अतः स एव हेतुर्यदि स्यात्तत्र तस्मिन्पक्षे अन्यतः किं केन किंचिदन्यतो न भवति यस्मै कुप्येदित्यर्थः यतो निजए
व स्वभावः ॥ ननु आत्मनस्तथा परिणामोऽन्यनिमित्तको भवति अतो लिकोपविषय इति चेत्तत्राह नहीति आत्मव्यतिरिक्तं नास्त्येव यदि स्यात् ।अ
...प्रतीयेत न हि तत्तन्मृषैव अतः कस्मात्केन कुप्येत यतो नास्ति निमित्तं न च सुखदुःखं चेत्यर्थः ॥५२॥ ग्रह पक्षे एवं जन्मात्मनः किं यतः जन्मत

आत्मा यदि स्यात्सुखदुःखहेतुः किमन्यतस्तत्र निजः स्वभावः ॥ न ह्यात्मनोऽन्यद्यदि तन्मृषा स्यात् कुप्येत कस्मान्न सुखं न दुः
खं ॥ ५३ ॥ ग्रहा निमित्तं सुखदुःखयोश्चेत्किमात्मनोऽजस्य जनस्य ते वै ॥ ग्रहैर्ग्रहस्यैव वदन्ति पीडां कुप्येत कस्मै पुरुषस्ततोऽन्यः
॥५३॥

तिजन्मेदेहस्तस्यैव जन्मलग्नापेक्षया घाद्यष्टमादिराशिस्थास्ते सुखदुःखयोर्निमित्तं भवन्ति किंच ॥ अन्तरिक्षस्थैर्ग्रहैस्तत्रस्थस्य ग्रहस्यैव पा
दाद्यादिर्देहस्याभिनिवेदः पीडां वदन्ति दैवज्ञाः ननु ग्रहकोणादिषु स्थितस्य तद्देहस्य ॥ गोचरस्य पुरुषस्य ग्रहगतैव तु पीडा तत्तत्राह ओत्पन्ने देहे तस्याभि
मानाद्भवति अतः पुरुषः ततो ग्रहाद्देहाच्चान्यः कस्मै कुप्येत ॥५३॥

कर्म्मेति तु भोक्त्रात्मसंश्लिष्टरूपमपगमः कर्म्मैव नास्तिकं तत्तस्य हेतुत्वमिति तदाह हि यस्मात्तत्कर्म एकस्यैव जडाजडत्वे समस्ति स्यात्तत्र जडत्वादि
भावितापपत्तेः अजडत्वाद्धि हिताहितानुसंधानतः प्रवृत्तिसंभवात् अस्मिंस्तु जडे देहस्य तत्र स्वस्य प्रवृत्तिनिवृत्तिसंभवात् पुरुषस्तु सुपर्णः शुद्ध
ज्ञानस्वरूपः अतः कर्म्मैकं कुर्य्यात् यतः सुखदुःखयोर्मूलं तत्कर्म्मैव नास्तीति ॥५४॥ तत्र कालपक्षोपि आत्मनः किंचतोऽसौ

कर्म्मस्य किं हेतुः सुखदुःखयोश्चेत् किमात्मनस्तद्धि जडाजडत्वे देहस्य अविस्तु रूपोऽयं सुपर्णः कुर्य्यात् कस्मै न हि कर्म्म
मूलं ॥५४ कालस्य किं हेतुः सुखदुःखयोः श्चेत् किमात्मनस्तत्र तदात्मकोऽसौ नाग्निर्हि तापो न हिमस्य तस्मात् कुर्य्यात् कस्मै
न परस्य वदं ॥५५॥ ॥

…त्मकोऽम्बु संश्रयत्वात् संश्रयस्य स्वतः पीडा न स्यात् तत्र दृष्टांतः नाग्नेर्हि तीक्ष्णसंश्रयस्य कालादेस्तापो दाहकतोनाश्चित्तत्तोपाधि
भेदत्रयात्मनो नाश्रयः स्यादिति दृष्टांतं तरमाह क हिमस्य तत्र शैत्यं नदत्वाश्रयस्य तु यस्मात् कारणस्य नाशकं नस्यादिश्रय किंच आत्मा
कस्मै कृतपरस्य आयन्तपरस्य वदं सुखदुःखादिकमस्तीति ॥५५॥ ॥ ११५

न[illegible]तेदेतत्पूसिता निरस्ताः यदि कश्चित्केवलं तत्सुखमावहेत्तदपि वस्तु महिमा वेदयायां न संभवतीत्याह न केनचिदिति ॥ नन्वपरोक्षः क
[illegible]यनेनत्याह यथोनिसंसृतिमविद्यमानामेव रूपयति भ्रकारणं[illegible]तितथानस्यवृहमः अहंकारस्य यथा स्यात्तन तथा परतः भ
ह[illegible]रिस्यान्मनो बंधः संबंधः अहंकारनिमित्तो सो न वास्तव इस्यर्थः एवं प्रबुद्धोयुः सन्भूतैः कृतान्न बिभेति ॥ ५६ ॥ अतोहमेपक्तयैव परमा
त्मनिष्टया तरिष्यामीत्याह एतामिति सोऽहमिसन्वयः ॥ नन्वियं निष्ठेव कथं भवेत्तदाह मुकुंदेति ॥ ५७ ॥ प्रसंगात्स्वहगाथार्थं संक्षे

न केनचित्क्वापि कथंचनास्य द्वंद्वोपरागः परतः परस्य ॥ यथाऽहमः संसृतिरूपिणः स्यादेवं प्रबुद्धो न बिभेति भूतैः ॥ ५६ ॥ ए
तां समास्थाय परात्मनिष्ठामध्यासितां पूर्वतमैर्महर्षिभिः ॥ अहं तरिष्यामि दुरंतपारं तमो मुकुंदांघ्रिनिषेवयैव ॥ ५७ ॥ श्रीभ
गवानुवाच ॥ ॥ निर्विद्य नष्टद्रविणे गतक्लमः प्रव्रज्य गां पर्यटमान इत्थं ॥ निराकृतोऽसद्भिरपि स्वधर्मादकंपितोऽमूं मुनि
राह गाथां ॥ ५८ ॥ सुखदुःखप्रदो नान्यः पुरुषस्यात्मविभ्रमः ॥ मित्रोदासीनरिपवः संसारस्तमसः कृतः ॥ ५९ ॥ तस्मात्सर्वा
त्मना तात निगृहाण मनो धिया ॥ मय्यावेशितया युक्त एतावान्योगसंग्रहः ॥ ६० ॥ य एतां भिक्षुणा गीतां ब्रह्मनिष्ठां समाहितः ॥ धा
रयंश्रावयंशृण्वन्द्वंद्वैर्नैवाभिभूयते ॥ ६१ ॥ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे भिक्षुगीतं त्रयोविंशोध्यायः ॥ ॥

सी संक्षेपतः [illegible] दर्शयति द्वाभ्यां इत्थं नष्टद्रविणे निर्विद्य गतक्लमः ॥ प्रव्रज्य गां पर्यटन्नसद्भिर्निराकृतोऽपि कृतोऽपि स्वधर्मादकंपितः सन्मुनि
रमूं गाथामगायत सन्वयः ॥ ५८ ॥ मित्रोदासीनरिपवः सर्वोऽपि च संसारः तमसः अज्ञानतः आत्मनो मनसो विभ्रममात्रः कृतः न त्वात्मिकः इ
त्यर्थः ॥ ५९ ॥ तत्केवलं सहनोपायमुपसंहरति तस्मादिति ॥ ६० ॥ मनोनिग्रहात्मकमेतत् श्रवणादिनिष्ठस्तत्फलं प्राप्नोतीत्याह य इति ॥ द्वंद्वैः सु
खदुःखादिभिः ॥ भिक्षुगीतमिषं कृत्वा नः कृपया भगवान्हरिः ॥ मोहं निघ्नन्निहानाति परमानंदरूपतः ॥ १ ॥ इत्येकादशे त्रयोविंशोऽध्यायः ॥ ॥ नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्विंशे तु सांख्येन मनोमोहो निवार्यते। आत्मनः सर्गनाशाभ्यामागमापायचिंतया। स्वप्नदृष्टवदुक्तानामवकल्पाय संयमं चित्तस्योक्ता पुनः कृ
तः सांख्यमत्राहतं कृते। अद्वितीयात्परमात्मनो मायया [illegible] प्रकृतिपुरुषप्रकारः सर्वं द्वैतमुदेति पुनस्तत्रैव लीयत इत्यनुसंदधानस्य द्वैतभ्र
मो निवर्तत इति वक्तुं सांख्यमुपक्षिपति। पूर्वैः कपिलादिभिर्विनिश्चितं वैकल्पिकं भेदनिमित्तं भ्रममसुखदुःखादिरूपं १ अथोद्ग्राह्यः का
लं तावद्दृष्टान्तेन हेयः कृत्स्नो ऽप्यर्थो विकल्पशून्यमेकमेव ब्रह्मणि विलीनमासीदित्यर्थः। कदेत्यपेक्षायामाह। युगे युगेऽस्य पूर्वं प्रलय

श्रीभगवानुवाच॥ अथ ते संप्रवक्ष्यामि सांख्यं पूर्वैर्विनिश्चितं॥ यद्विज्ञाय पुमान्सद्यो जह्याद्वैकल्पिकं भ्रमं॥१॥ आसीत्
ज्ञानमथो अर्थ एकमेवाविकल्पितं॥ यदा विवेकनिपुणा आदौ कृतयुगे युगे॥२॥ तन्मायाफलरूपेण केवलं निर्विकि
ल्पितं॥ वाङ्मनोगोचरं सत्यं द्विधा समभवद्बृहत्॥३॥ तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका॥ ज्ञानं त्वन्यतमो भावः
पुरुषः सोऽभिधीयते॥४॥ तमो रजः सत्त्वमिति प्रकृतेरभवन्गुणाः॥ मयाप्रक्षोभ्यमाणायाः पुरुषानुमतेन च॥५॥ ॥

भिश्च [illegible] इत्यर्थः। तथा आदौ यत्कृतयुगं तस्मिंश्च अन्यदापि यदा विवेकनिपुणा जना भवन्ति तदापि तेषां भेदास्फूर्तेः॥२॥ तद्ब्रह्म वाङ्म
[illegible]लं यथा भवति तथा मायाया दृश्यफलं तत्प्रकाशः तद्रूपेण मायाविलासरूपेण वा द्विधाऽभूत्॥३॥ तयोर्द्विधाभूतयोरंशयोर्मध्ये अन
[illegible] कार्यकारणरूपिणी॥४॥ सत्त्वं रजस्तमश्चेति त्रयो गुणाः मायापरमेश्वरेण जीवादृष्टप्रयुक्तत्वात्स्रष्टुः पुरुषानुमतत्वं यदा स्वस्यैव प्रकृ ११६
[illegible]लक्षपायात्पुरुषात्मा तदनुमतेन तत्कारणेत्यर्थः॥५॥ ॥

[illegible]क्तिमान् प्रथमो विकारः ततो महान् ज्ञानशक्तिमन्वयं महानेव प्रथमो विकारः प्रसिद्धः तत्राह सत्त्वज्ञानक्रियागर्भत्वात् सूत्रेण सं[illegible]रूपक[illegible]मेतत्तत्त्वं क्रियाज्ञानशक्तिसांख्ययोर्मत इत्यर्थः विमोहनः जीवस्य स्वरूपसमहेतुः स जातः ह्यः यतस्तन्मात्रादीनां कारणं मन [illegible]देवानामप्युपलक्षणं चिद्विन्मयः चिदात्मसम्यक्त्वाऽपि तन्मयं यथारूपश्रुतिजीवोपाधितं दृशिति। यद्यप्येतस्माद्वा एतस्मादोदार तन्नस्मादाकाशः संभूत इत्यादिश्रुत्यंतरे तन्मयं हि सोम्य मन इत्यादिश्रुतेश्च प्रथमं भूतानि जायंते तेभ्यश्च पंचीकृतेभ्यः प्राणादिक्रमेण

तेभ्यः समभवत्सूत्रं महान्सूत्रेण संयुतः। ततो विकुर्वतो जातो योऽहंकारो विमोहनः॥ वैकारिकस्तैजसश्च तामस
श्च धऽहंत्रिवृत्। तन्मात्रेंद्रियमनसां कारणं चिदचिन्मयः॥७॥ ॥

समष्ट्यात्मकं लिंगशरीरं पंचीकृते सर्वब्रह्मांडं तस्मिन्नैराजस्तत्रं तत्र यर्मिलीलाविग्रहः क्षीराब्धिशायी श्रीनारायणः तन्नाभिनिपद्मे च वैराजस्य ततो गार्ग्यविग्रहस्य चतुराननः ततो यथावसरमन्येषां जीवानामाविर्भाव इति प्रक्रिया अथ यथाऽपि विनाप्यभिव्यक्तिपूर्वकोऽहंकारस्ततो भूतेंद्रियादिव्यवहार इत्येतावता महदादिक्रमेण सृष्टिरुच्यते तथा चोक्तं मृल्लोहविस्फुलिंगाद्यैः सृष्टेर्यच्चोदिताऽन्यथा। उपायः सोऽवतारायनास्ति भेदः कथंचनेति॥७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०

तमा[illegible]त्रिविधात्रिविधप्रपंचोत्पत्तिं दर्शयन्निश्चार्थं इति। तन्मात्रिकात् शब्दादितन्मात्रकारणात् तामसात् तद्गुणार्थो महान् तद्रूपोऽजस्रो बन्नूव
न[illegible]गमावरणस्वभावत्वात्। इंद्रियाणि दश तैजसात् राजसात् तेषां प्रवृत्तिस्वभावत्वात्। वैकृतात् सात्विकात् देवताः दिग्वातार्कप्रचेतो
श्विवह्नींद्रोपेंद्रमित्रकाः चंद्रश्चेत्येकादश तेषां प्रकाशस्वभावत्वात्। ॥ ॥ एवमेव राजांतर्यामिणः ॥ ॥ सलिलसंस्थितिर्यस
तत्सलिलसंस्थितितस्मिन्सलिलसंस्थितांडे श्रीनारायणरूपो लीलाविग्रहेण सम्यगवस्थित इत्यर्थः ॥ विश्वारंभलोककारणं नतं ॥ त

तू झे

अर्थस्तन्मात्रिकाज्जज्ञे तामसादिंद्रियाणि च ॥ तैजसाद्देवताश्चासन्नेकादश वैकृतात् ॥ ८ ॥ मया संचोदिता भावाः सर्वे
संहत्यकारिणः ॥ अंडमुत्पादयामासुर्ममायतनमुत्तमं ॥ ९ ॥ तस्मिन्नहं समभवमंडे सलिलसंस्थितौ ॥ मम नाभ्यामभू
त्पद्मं विश्वाख्यं तत्र चात्मभूः ॥ १० ॥ सोऽसृजत्तपसा युक्तो रजसा मदनुग्रहात् ॥ लोकान्सपालान्विश्वात्मा भूर्भुवः स्वरि
ति त्रिधा ॥ ११ ॥ देवानामोक आसीत्स्वर्भूतानां च भुवः पदं ॥ मर्त्यादीनां च भूर्लोकः सिद्धानां त्रितयात्परं ॥ अधोऽसुराणां ना
गानां भूमेरोकोऽसृजत्प्रभुः ॥ १२ ॥ ॥

भोग

चात्मभूः चतुराननरूपं विग्रहेण पुनर्वैराज एव तस्मिन्नाविर्भूत इत्यर्थः ॥ १० ॥ रजसा युक्तो मदनुग्र
हा[illegible]भूः अतलादिसहिता भुवः ॥ अंतरिक्षलोकः स्वः स्वर्गं महर्लोकादेरप्युपलक्षणं ॥ ११ ॥ लोकसृष्टिप्रयोजनमाह देवाना
[illegible]त्रिलोकीनिवासः पदं स्थानं त्रितयात्परं महर्लोकादि भूमेरधः अतलादि ॥ १२ ॥ ॥ ११७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व एवंव्यवस्थायां कारणमाह सार्द्धेन। त्रैलोक्यां पातालादिसहितायां। योगादितारतम्येन यथोत्तरं महर्लोकादयः मद्गतिः वैकुंठलोकः ॥३॥ त
[illegible] तैरागतः यश्च चलादित्याह वैराग्यार्थं मयाकालरूपिणा धात्रा परमेश्वरेण कर्मफलप्रदेन हेतुभूतेन गुणप्रवाहे म
[illegible] कस्मिन्नस्तन्लोकमुन्नमागतीः प्राप्नोति पुनर्निमज्जति अत्र वर्णनीचाः गतीः प्राप्नोति ॥४॥ सृष्टिनिरूपणस्यावधिती यात्म

त्रैलोक्यां गतयः सर्वाः कर्मणां त्रिगुणात्मनां ॥ योगस्य तपसश्चैव न्यासस्य गतयोऽमलाः ॥ महर्जनस्तपः सत्यं भक्तियो
गस्य मद्गतिः ॥३॥ मयाकालात्मना धात्रा कर्मयुक्तमिदं जगत् ॥ गुणप्रवाह एतस्मिन्नुन्मज्जति निमज्जति ॥४॥ अ
णुर्बृहत्कृशः स्थूलो यो यो भावः प्रसिध्यति सर्वोप्युभयसंयुक्तः प्रकृत्या पुरुषेण च ॥५॥ यस्तु यस्यादिरन्तश्च स वै
मध्यं च तस्य सन् ॥ विकारो व्यवहारार्थो यथा तैजसपार्थिवाः ॥६॥ ॥

यो
प्रतिपत्त्यर्थत्वात्तत्प्रतिपादनाय कारणेन कार्यस्य व्याप्तिमाह अण्वणुरिति ॥ उभयेन संयुक्तो व्याप्तः ॥ तदेवाह प्रकृत्येति ॥५॥ इदानीं का
र्यस्य कारणात्मतां दर्शयति ॥ यस्य कार्यस्य आदिः ॥ कारणं अन्ततः लयस्थानं च य एव तस्य मध्ये मध्यावस्थायामपि स एव वै प्रसिद्धं मृत्सुवर्ण
[illegible]स्त एवाम्न[illegible]ारिका स एव सन् नेतरः अलं तर्हि मिथ्यानृतकार्यं सत्त्वात्त्वाह विकार इति ॥ तैजसा कटककुण्डलादयः पा
र्थिवा घटशरावादयश्च यथेति ॥६॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेवं तर्हि त्रिकार्यं प्रति महदादीनामप्याधेयतरूपत्वात्सत्वं स्यात्तत्राह इत्यादिति। यद्रूपमुपादाय यदुपादानकारणेन यथा स्वीकृत्य पूर्व
ःकारणरूपो महदादिर्नाविः परमहंकारादिकं नाम विकुरुते सृजति। यथा पिंडो मृदमुपादाय स्वयं निमित्तभूतो घटं सृजति तद्वत्कारण
वसन्निति पूर्वस्यानुषंगः कथं तर्हि नित्यत्वे सिद्धे व सत्यमित्यादिश्रुतिः तत्राह आदिरिति। यत् यदा यस्मादिरंतश्च विवृह्णते तदा तत्कृत
मित्यभिधीयते श्रुत्या परमकारणस्यात्मनः सत्यत्वविवक्षायेत्यर्थः ॥७॥ ननु तथापि प्रकृतिपुरुषकालानामकार्यभूतानां भिन्नत्वा
त्कथमद्वितीयता तत्राह प्रकृतिरिति। अस्य समस्तः कार्यस्योपादानयाप्रकृतिः प्रसिद्धा यश्च तस्या आधारः अधिष्ठाता परः पुरुषः

यदुपादाय पूर्वस्तु भावो विकुरुते परं। आदिरंतो यदा यस्य तत्सत्यमभिधीयते ॥७॥ प्रकृतिर्यस्योपादानमाधारः पुरुषः
परः। सतोऽभिव्यंजकः कालो ब्रह्मतत्त्रितयं त्वहं ॥८॥ सर्गः प्रवर्तते नावमौर्वापर्येण नित्यशः। महान्पुणविसर्गाधिः स्थितस्तो र
व यावदीक्षणं ॥९॥

यश्च गुणक्षोभेणाभिव्यंजकः कालस्तत्त्रितयं ब्रह्मरूपोऽहमेव न तु पृथक् प्रकृतेः शक्तित्वात् पुरुषकालयोरंश
रूपत्वात् ॥८॥ एवं तावत्कालत्रयेण व्यभिचारित्वात् ब्रह्मैव सत्यमिति वक्तुं तस्य सृष्टिकारणत्वेनादौ सत्वमुक्तं मध्येऽपि तस्यैव सत्त्वमुप
पादयति ऽप्यवधितेन सत्यस्यार्थायिष्य सर्गप्रवाहरूपायाः स्थितेरवधिमाह सर्गइति महानुबकृतः पौर्वापर्येणेत्यनेन आदिरूपेण नित्यशश्च ११०
जा किमर्थं प्रवर्तते सह गुणेषु देहेषु विविधतया सृज्यते इति गुणविसर्गो जीवः तदर्थः तद्भोगप्रयोजनः किंपर्यंतं प्रवर्तते यावत्स्थिते
रन्तः सोऽपि किमवधिः तदाह यावदीक्षणं परमेश्वरस्य तावत् ॥९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स:    आ    अमेः

...ंनिरूपयति विराट्ब्रह्मांडमया कालात्मनोसाद्यमानः व्याप्यमानः लोकानामहरहः कालाः सृष्टिप्रलया विविधाः कल्प्यंते यस्मिन् ता
...स्मिन्निकल्पयतीति तथान्तो पि पंचत्वरूपाय विशेषाय विनाशाय कल्पते योगपेन वृत्ति पंचानां भूतानामैक्यरूपस्तेषां पृथग्भावापत्ता
...तो सर्गः ॥२०॥ तत्र स्माह्वाण एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुः वायोरग्निरग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्यो
देवैः अन्नमन्नात्पुरुष इति श्रुत्युक्तसृष्टिक्रमप्राप्तिलोम्येन प्रलयमाह अन्न इति मर्त्यं शरीरं येनोपचितं तस्मिन्नन्ने शतवर्षायामनावृष्टौ
तैसः

विरामयासाद्यमानो लोककल्पविकल्पकः। पंचत्वाय विशेषाय कल्पते भुवनैः सह ॥२०॥ अन्ने प्रलीयते मर्त्यमन्नं
धानासु लीयते। धाना भूमौ प्रलीयंते भूमिर्गंधे प्रलीयते ॥२१॥ अप्सु प्रलीयते गंध आपश्च स्वगुणे रसे। लीयते ज्योतिषि
रसो ज्योती रूपे प्रलीयते। रूपं वायौ स च स्पर्शे लीयते सो पि चाम्बरे ॥२२॥ ॥

स

क्षीणे सति तन्नैव लीयते इत्यर्थः। धानासु बीजमात्रावशेषं भवतीत्यर्थः। धाना भूमौ तस्मान्न प्ररोहंतीत्यर्थः। भूमिर्गंधे संवर्तकादित्यशोषि
ता संकर्षणमुखाग्निना दग्धा वसती भूतसूक्ष्मरूपगंधमात्रावशेषा भवति ॥२१॥ अप्सु गंधः शतवर्षयावद्वृष्ट्याप्लाव्यमानो प्रलीयते एवमे
वापः अपि ज्योतिषा शोष्यमाणा रसमात्रावशेषा भवंति ततो रसो ऽपि तस्मिंल्लीयते। ज्योतिश्च वायुना ऽभिभूयमानं रूपमात्रं सत्तस्मि
ल्लीयते वायुश्च कालप्रेरितेनाम्बरेण ग्रस्तः स्पर्शमात्रः सन् तस्मिन् ॥२२॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰

अंबरं भूतादिनाऽहंकारेण ग्रस्यमानं शब्दतन्मात्रं । तदेवं तामसाहंकारकार्यस्य शब्दपर्यंतं लयमुक्त्वा राजसाहंकारकार्यस्याप्याह । इंद्रिया
णि स्वयोनिषु इति स्वप्रकृतिके दैवतासु तेषां प्रवृत्तिस्वभावत्वात् तत्रेश्वरदेवताधीनत्वात्तासु लयः इति वाचोयुक्तिः वस्तुतस्तु स्वकारणे राज
साहंकारे लयो निश्चितः योनिरिति उद्देशागतत्वादेकत्वमविवक्षितं योनयो देवतास्स्वं मनस्विकृतः ईश्वरे नियंतरि मनोवृत्तिप्रधनवनु
स्य देवाः स्वकृतत्वात् इंद्रियलयोक्त एवात्राप्यभिप्रायः मनस्य देवतानिः सहवैकारिकेऽहंकारे इत्यर्थः २३ तामसाहंकारकार्या

अंबरं शब्दतन्मात्रं इंद्रियाणि स्वयोनिषु । योनिर्वैकारिके सौम्य लीयते मनसीश्वरे ॥२३॥ शब्दो भूतादिमप्येति भूतादि
महति प्रभुः । स लीयते महान् स्वेषु गुणेषु गुणवत्तमः । तेऽव्यक्ते संप्रलीयंते तत्काले लीयतेऽव्यये ॥२५॥ ॥

अवशेषितस्य शब्दस्य लयमाह शब्दो भूतादिं तामसाहंकारं अप्येति तस्मिन् लीयत इत्यर्थः । भूतादिरिति उपलक्षणं त्रिविधोऽप्यहंकारो
महति जडांशं विहाय ज्ञानक्रियाशक्तिमात्ररूपो भवति । कथंभूतः प्रभुः समर्थः सर्वजगन्मोहकत्वात् । स च महान् स्वकारणेषु गुणे
षु ज्ञानक्रियाशक्तिमत्त्वाद्गुणवत्तमः स्वात्मांशं विहाय गुणमात्ररूपो भवति । ते चाव्यक्ते प्रकृतौ साम्यावस्थां गच्छंतीत्यर्थः । त ११९
दव्यक्तं काले कालाधीनत्वात् नैकीभूयावतिष्ठते । अव्यये तु परतत्त्वे ॥२४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म[illegible]पृये मायाप्रवर्तके ज्ञानमये वा अत एव जीवयतीति जीवः तस्मिन्महापुरुषे । अयं भावः । विश्वसृष्टेर्महापुरुषस्योपकरणरूपः का
ल[illegible]नस्तस्मिन्नव्यक्तस्वरूपेणावतिष्ठत इति । तदुक्तं सप्तमे । कालं चरंतं सृजतीश आश्रयं प्रधानपुंभ्यां नरदेव सत्यकृदिति । दशमे
च । योयं कालस्तस्य तेऽव्यक्तबंधो चेष्टामाहुश्चेष्टते येन विश्वं । निमिषादिर्वत्सरांतो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्य इति । जीवश्च आ
त्मनि प्रकृतेर्लीनत्वेन प्रतीयोगपनावत्परिपूर्णेन स्वरूपेणावतिष्ठते । आत्मा त्वात्मस्थ एव नान्यत्र लीयते । यतः केवलो निरुपाधिः ॥

कालो मायामये जीवे जीव आत्मनि मय्यजे । आत्मा केवल आत्मस्थो विकल्पापायलक्षणः ॥ २५ ॥ एवमन्वी
क्षमाणस्य कथं वैकल्पिको भ्रमः । मनसो हृदि तिष्ठेत व्योम्नीवार्कोदये तमः ॥ २६ ॥ एष सांख्यविधिः प्रोक्तः सं
शयग्रंथिभेदनः । प्रतिलोमानुलोमाभ्यां परावरदृशा मया ॥ २७ ॥ ॥ इति श्रीभागवते महापुराणे एका
दशस्कंधे भगवदुद्धवसंवादे चतुर्विंशतितमोऽध्यायः ॥ ॥ २४ ॥

[illegible]न्देहः । विकल्पापायाख्यं विश्वोत्पत्तिलयाभ्यां लक्ष्यते । अधिष्ठानत्वेनावधित्वेन च चेतितत्वात्सः ॥ २५ ॥ अस्य कथनस्य प्रस्तुतोपयो
[illegible]माह एवमिति । मनसः कृतं तेन निमित्तो भ्रमः स्यात् । जातो वा कथं हृदि तिष्ठेदिति ॥ २६ ॥ उपसंहरति एष इति प्रत्यक्षमिवेयेने
दर्शि[illegible]न लक्ष्यात्मनः सांख्यप्रख्यानतस्तस्मै हरये गुरवे नमः ॥ २७ ॥ ॥ इति टीकायां एकादशे चतुर्विंशः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचविंशे स्वनैर्गुण्यप्रतिपत्त्यै निरूप्यते । चित्रं सत्त्वादिगुणवृत्तिरनेकधा ॥ १ ॥ प्रकृतिपुरुषविवेकज्ञानवतोऽपि यावत्स्वयत्नावि
शेषेण गुणत्रयवृत्तिजयो न स्यात् न तावद्बंधोपरमः अतस्तज्जयोपायकथनाय गुणवृत्तीर्निरूपयन्नर्थमाह गुणानामिति ॥ स
[illegible]मिश्राणां पूर्ववर्गभिन्नानां समिश्रानेसमिश्राश्च समिश्रास्तेषां विभक्तानां गुणानां मध्ये येन गुणेन यथा यादृशो भवेत्तदिदं या
कथ्यमानं मत्तो निबोधेत्यर्थः । तत्र सत्त्ववृत्तीराह शम इति इंद्रियविवेकः तपः स्वधर्मवृत्तिः ॥ स्मृतिः पूर्वापरानुसंधानं तुष्टिय

श्रीभगवानुवाच ॥ गुणानामसमिश्राणां पुमान्येन यथा भवेत् ॥ तन्मे पुरुषवर्येदमुपधारय शंसतः ॥ १ ॥ शमो द
मस्तितिक्षेक्षा तपः सत्यं दया स्मृतिः ॥ तुष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दयादिः स्वनिर्वृतिः ॥ २ ॥ काम ईहा मदस्तृष्णा स्तंभ आशी
र्भिदा सुखं ॥ मदोत्साहो यशःप्रीतिर्हास्यं वीर्यं बलोद्यमः ॥ ३ ॥ ॥

र्यावल्लाभसंतोषः त्यागो व्ययशीलत्वं ॥ अस्पृहा वैराग्यं ॥ श्रद्धा आस्तिक्यं ह्रीः अनुचिते कर्मणि लज्जा ॥ दयासनं दयासनगतिस्व
[illegible]तिस्मरणादौ आदिशब्देनार्जवविनयादि ॥ स्वनिर्वृतिः आत्मरतिः ॥ २ ॥ रजोवृत्तीराह ॥ कामोऽभिलाषः ईहा व्यापारः ॥ मदो दर्प
[illegible]असंतोषः स्तंभो गर्वः आशीः धनाद्यभिलाषेण देवतादिप्रार्थनं ॥ भिदा स्वपरभेदबुद्धिः सुखं विषयभोग १२०
[illegible]रेन्मुख्यानि निर्विचाराः मदाः प्रीतिः स्तुतिप्रियता ॥ हास्यमुपहासः वीर्यं प्रभावाविष्कारः ॥ बलेनोद्यमः न्यायेनोद्यमः
सात्त्विक एव ॥ ३ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रोधः असहिष्णुत्वं

[illegible] क्रोधस्तेर्लोभो ममपराङ्मुखता अनृतमयथार्थप्रभाषणं हिंसा द्रोहः पंचाधार्यनाद्दम्भं धर्मध्वजित्वं कमः श्रमः कलिः कलहः
[illegible] नेवं च तमश्च विषादश्च दुःखं देन्यं च निद्रानतन्द्राशान्द्रमे न विष्मती स्त्री ह्यानीर्तयं अनुद्यमो जाड्यं ॥ ४ ॥ अनुपूर्व्याः क्रमे
[illegible] शोकत्रयाकः वर्णिति ध्रायाः अन्याश्चयुद्यास्त इति भावः ॥ ५ ॥ विनेकानां गुणानां त्रयो वर्णिताः मिश्राणामाह सन्निपात इति विविधस्य
हमने चित्रमस्तुक सर्वर्हात्मिममानाधिकरणपदर्शनात् सन्निपातन्नत्त्वेतः कामी क्रोधीत्यादि तयाम मशांतिराक्तिकामः क्रोध इत्यादि
अहं

क्रोधो लोभोनृतं हिंसा याञ्चा दंभः क्रमः कलिः ॥ शोकमोहौ विषादार्त्ती निद्राशानीरनुद्यमः ॥ ४ ॥ सत्वस्य रजसश्चैता
स्तमसश्चानुपूर्वशः ॥ वृत्तयो वर्णितप्रायाः सन्निपातमथो शृणु ॥ ५ ॥ सन्निपातस्त्वहमिति ममेत्युद्धव या मतिः ॥ व्य
वहारः सन्निपातो मनोमात्रेन्द्रियासुभिः ॥ ६ ॥ धर्मे चार्थे च कामे च यदासौ परिनिष्ठितः ॥ गुणानां सन्निकर्षोयं श्र
द्धारतिधनावहः ॥ ७ ॥ ॥

इष्टव्यं तत्पूर्वकः सर्वोपि व्यवहारश्च सन्निपातकार्यमित्याह व्यवहार इति ॥ अत्र हेतुः मनश्च मात्राणि च इन्द्रियाणि च असवश्च तैः मनआदीनां सात्विकत्वामस
राजसत्वात्तेर्व्यवहारः सन्निपातज इति भावः ॥ ६ ॥ यदासौ पुरुषो यदा धर्मादिषु परिनिष्ठितो भवति तदा ॥ यस्त्रयं त्रिषु निष्ठारूपः सन्निकर्षः सन्निपात स
कार्यं धर्मादीनां सत्वतमोरजः कार्यत्वात् विषयतः सान्निपातजत्वमुक्तं फलतश्चतयात्वमाह श्रद्धारतिधनानि सत्वरजतमोमयान्यावहती
नि तथा ॥ ७ ॥ ॥ अः

भा०ए०

धर्मनिष्ठायामेव संन्निपातं दर्शयति । प्रवृत्तिलक्षणे काम्ये धर्मे यदा पुंसो निष्ठा भवति । तदा पुमान् यदा गृहाश्रम एवासक्तस्तिष्ठेत् तु पश्चा
त्स्वधर्मं च नित्यनैमित्तिके तिष्ठेत् साऽपि समितिः सन्निपातः हि यस्मात्काम्यधर्मगृहाश्राः किं स्वधर्माः । रजस्तमः सत्त्वमया इत्यर्थः ॥ ८ ॥
तदेवं मिश्रामिश्रगुणवृत्तीः प्रदर्श्य दीनं पुमान् येन यथा भवेदिति यदुक्तं तद्दर्शयति पुरुषं इति त्रिभिः ॥ ९ ॥ १० ॥ हिंसां त्वाशु मारणादि
क[..]शास्पयोनजेत्तं नामसं विद्यात् एतैर्गुणैरेवं भूतान् भवतीति तात्पर्यार्थः ॥ ११ ॥ ननु तथापि गुणवशेन कर्तृत्वाविशेषात् केन वि

प्रवृत्तिलक्षणे निष्ठा पुमान् यर्हि गृहाश्रमे । स्वधर्मे चानुतिष्ठेत गुणानां समितिर्हि सा ॥ ८ ॥ पुरुषं सत्त्वसंयुक्तमनु
मीयाच्छमादिभिः । कामादिभी रजोयुक्तं क्रोधाद्यैस्तमसा युतं ॥ ९ ॥ यदा भजति मां भक्त्या निरपेक्षः स्वकर्मभिः । तं
सत्त्वप्रकृतिं विद्यात्पुरुषं स्त्रियमेव वा ॥ १० ॥ यदा आशिष आशास्य मां भजेत स्वकर्मभिः । तं रजःप्रकृतिं विद्याद्धिंसा
म[..]स्य तामसीं ॥ ११ ॥ सत्त्वं रजस्तम इति गुणा जीवस्य नैव मे । चित्तजा यैस्तु भूतानां सज्जमानो निबध्यते ॥ १२ ॥

[..]षेण तं समेयो [..] पूर्वमेव कुर्यादिति नियमः यतो मां भजेतेति वारंवारमुक्तमेतत् तत्राह सत्त्वमिति । जीवस्यैव न मे । कुतः यतश्चित्तजाः जनि
प[..]कोपि[..] निबध्यते । अतो यः स एव न बध्यते । कीदृशाः भूतानां देहरूपाणां । अन्येषां च मध्ये सज्जमानः । अहं त्वसज्जमानो गुण
नि[..]त्वेन [..]दिकर्ताऽपि निस्पृक्कः । अतो महान् विशेष इति भावः । यद्वा भूतानामपंचीकृतानां यत्कार्यं भूतं चित्तं । अन्नमयं हि
[..]म्य मन इति श्रुतेः । तस्य न वा । अतो भूतोपहितस्य जीवस्यैवेति अन्यसमानं ॥ १२ ॥ ॥ १२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्तं मिश्रमपि ... णकार्याणि यदत्रेदानीमेकैकगुणोद्रेककार्याणि दर्शयति सप्तदशभिः यदेतरौ गुणौ जयेत् अभिभवेत् भास्वरं प्रकाशकं विशदं स्वच्छं
... वर्तमानं ... शिवं शान्तत्वं भास्वरत्वात् यथार्थं सुखधर्मज्ञानहेतुत्वान्न स तैर्युज्येत आदिशब्दाच्छमदमादिभिश्च १३ तमः सत्त्वं च कर्म रज एतत् रजः कर्तृ संगं संगहेतुः
भिदां भेदहेतुः बलं ... स्वभावं अतः संगहेतुत्वाद्यशसा श्रिया च युज्येत तत्कामः पुमानन्तवीत्यर्थः भिदाहेतुत्वात् दुःखेन युज्येत द्वितीयश्चैतत्त्वं तृणवती
तिश्रुतेः बलहेतु ... कर्मणा च युज्येत १४ यदा रजः सत्त्वं च कर्म इतं तमः कर्तृ जयेत् मूढं विवेकध्वंसकं लयं आवरणात्मकं जडं ... मातृकं अतो मूढत्वा

यदेतरौ जयेत्सत्त्वं भास्वरं विशदं शिवं तदा सुखेन युज्येत धर्मज्ञानादिभिः पुमान् १३ यदा जयेत्तमः सत्त्वं रजः संगं भिदा बलं तदा दुःखेन
युज्येत कर्मणा यशसा श्रिया १४ यदा जयेद्रजः सत्त्वं तमो मूढं लयं जडं युज्येत शोकमोहाभ्यां निद्रया हिंसयाशया १५ यदा चित्तं प्रसीदेत
इन्द्रियाणां च निर्वृतिः देहेऽभयं मनोऽसंगं तत्सत्त्वं विद्धि मत्पदं १६ विकुर्वन् क्रियया चाधीरनिवृत्तिश्च चेतसां गात्रास्वास्थ्यं मनो भ्रान्तं रज
एतैर्निशामय १७ सीदच्चित्तं विलीयेत चेतसो ग्रहणेऽक्षमं मनो नष्टं तमो ग्लानिस्तमस्तदुपधारय १८

शोकमोहहिंसाभिर्लयत्वान्निद्रया जडत्वाद् ... भावेन केवलमाशया युज्येतेति द्रष्टव्यं जनइतिपाठे लयात्मकत्वमेव निद्राशयोर्हेतुः १५ किंच यदा चित्तं प्रसी
देत स्वच्छं भवेत निर्वृतिरुपरतिः तत्सत्त्वं मत्पदं मदुपलब्धिस्थानं सत्त्वबुद्धिकं विद्धि १६ यदा तु मनः क्रियया विकुर्वन् विकारं प्राप्नुवन् अधीर्न वती अ
समंता धिधिप्रोधीर्यस्य सः चेतसां बुद्धीन्द्रियाणां च निर्वृत्तिः गात्राणि कर्मेन्द्रियाणि तेषामस्वास्थ्यं विकाराधिक्यं मनोभ्रान्तं च चलं रज उत्कटं निशामय जानी
हि १७ यदा सीदति चित्तं ... चेतसो ग्रहणे चिदाकारपरिणामे अक्षमं सत् चित्तं विलीयेत मनोऽपि संकल्पात्मकं नष्टं लीनं तमो ज्ञानं ग्लानिर्विषादश्च भवति तत्र
तातमउत्कटं उपधारय विद्धि १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
१२२

किंच। एधमान इति। इंद्रियाणामेव निवृत्तिप्रवृत्तिमोहस्वभावान् देवासुररक्षांसि। यद्वा प्रसंगादाधिदैविकानां गुणानामुत्कर्षकार्याण्युक्तानि इति ज्ञेयं॥१९॥ गुणोत्क
र्षतोऽवस्थाभेदं दर्शयति। सत्वादिति। प्रसंगात्त्रिगुणावस्थामाह। तुरीयं चतुर्थमिव स्थानांतरं नाम त्रिषु जागरणादिषु संततमेकरूपमात्मतत्वमेवेत्यर्थः॥२०॥
गुणोत्कर्षतारेण तत्तत्कर्मफलनिष्ठां दर्शयति। उपर्युपरीति। ब्राह्मणा वेदाध्ययनानुष्ठानाभियुक्ताः। आब्रह्मण इति पाठे ब्रह्मलोकमभिव्याप्येत्यर्थः। आमुख्या
त्स्थावरानभिव्याप्य। अंतरचारिणः मनुष्या एव भवंति॥२१॥ देहादुत्क्रांतिकालीनगुणोत्कर्षफलमाह। सत्वेइति। प्रलीना मृताः। रजोलया रजसि प्रवृद्धे स
ति लयो येषां ते। एवं तमोलया इत्यपि। निर्गुणा इत्यत्र लयशब्दानुपादानात् जीवतोऽपि निर्गुणाश्चेन्मामेव यांतीत्यर्थः॥२२॥ इदानीं गुणोत्कर्षकृतमेव तत्तत्क

एधमाने गुणे सत्वे देवानां बलमेधते। असुराणां च रजसि तमस्युद्धव रक्षसां॥१९॥ सत्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत्। प्रस्वापं
तमसा जंतोस्तुरीयं त्रिषु संततं॥२०॥ उपर्युपरि गच्छंति सत्वेन ब्राह्मणा जनाः। तमसाधोऽध आमुख्याद्रजसांतरचारिणः॥२१॥ सत्वे प्रलीना
ः स्वर्यांति नरलोकं रजोलयाः। तमोलयास्तु निरयं यांति मामेव निर्गुणाः॥२२॥ मदर्पणं निष्फलं वा सात्विकं निजकर्म तत्। राजसं फलसं
कल्पं हिंसाप्रायादि तामसं॥२३॥ कैवल्यं सात्विकं ज्ञानं रजो वैकल्पिकं च यत्। प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतं॥२४॥ वनं तु सात्वि
को वासो ग्रामो राजस उच्यते। तामसं द्यूतसदनं मन्निकेतं तु निर्गुणं॥२५॥ ॥

त्साधनकर्मत्रैविध्यमाह। मदर्पणं मत्प्रीत्युपदेशेन कृतं निःफलं केवलं दासभावेनैव कृतं निजं कर्म नित्यादि तत्सात्विकं। फलं संकल्प्यते यस्मिन् तत्। हिंसा
प्रायं हिंसोद्देशेन कृतं हिंसाबहुलं वा। आदिशब्दाद्दंभमात्सर्यादिकृतं॥२३॥ इदानीं सगुणनिर्गुणभेदेन ज्ञानादीनां चातुर्विध्यमाह। कैवल्यं देहादिव्यतिरिक्ता
त्मविषयं तत्सात्विकं देहादिविषयं यत्तद्रजः राजसं। प्राकृतं बालमूकादिज्ञानतुल्यं। मन्निष्ठं परमेश्वरविषयं॥२४॥ वनं विविक्तत्वात्सात्विको वासः। मन्नि
[illegible] मंदिरं वा निर्गुणं स्थानं॥२५॥ ॥

राम
१२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्नंअनाप

...र्थी च संगी अन्नात्मकः। रागांधः। अनुतिनिवेशवान्। स्मृतिविभ्रष्टः अनुसंधानशून्यः। मदपाश्रयः मदेकशरणः। सहि निरहंकारत्वान्निर्गुणः। २६ अधर्मे धर्म
[illegible]र्थ्यं हितं। पूतं शुद्धं। अनायासेन आप्तं। आहार्यं भक्ष्यं भोज्यादि। इंद्रियाणां प्रेष्ठं कटुक्षारलवणादि। अशांतिदं अशुचि दैन्यकरमशुच्यं च। चशब्दान्मन्नि
वेदितं निर्गुणं। इति प्रसिद्धं तं २८ आत्मोत्थं मदपाश्रयमित्यपि त्वंतत्पदार्थविषयत्वेन ज्ञानवदेव द्रष्टव्यं। २९। उक्तं संसारहेतुभूतं त्रैगुण्यमुपसंहरति द्रव्यमां। द
व्यं पथ्यपूतादि देशो वनग्रामादि। फलं सात्विकं सुखमित्यादि। कालः यदा जेत मांन कषायदेतरौ जयेदित्यादिना योर्थो उक्तः। ज्ञानं कैवल्यं सात्विकं ज्ञानमित्यादि
ना। कर्म मदर्पणं इत्यादि। कारकः सात्विकः। कारकोसंगीत्यादि। श्रद्धा सात्विका आध्यात्मिकीत्यादि। अवस्था सत्वाज्जागरणमित्यादि। आकृतिः। उपसृष्टं परिगछंती

सात्विकः कारकोसंगी रागांधो राजसः स्मृतः। तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः २६ सात्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी। तामस्यध
र्मे या श्रद्धा मत्सेवायां तु निर्गुणा। २७ पथ्यं पूतमनायस्तमाहार्यं सात्विकं स्मृतं। राजसं चेंद्रियप्रेष्ठं तामसं चार्तिदाशुचि। २८ सात्विकं सुखमा
त्मोत्थं विषयोत्थं तु राजसं। तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयं। २९ द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः। श्रद्धावस्थाकृतिर्निष्ठा
त्रैगुण्यः सर्व एव हि। ३० सर्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः। दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ। ३१ एताः संसृतयः पुंसो गु
णकर्मनिबंधनाः। येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः। ३२ भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते। तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञा
नसंभवं। ३३ ॥ ॥

स्यादिनोक्ता देवतादिरूपा निष्ठा। सत्वे प्रलीनाः स्वर्यांतीत्यादिनोक्तः स्वर्गादिः। एवं सर्वोप्ययं नानात्वं त्रिगुणात्मकः। ३० न केवलमेष एव। किंतु या
वंतः पुरुषाव्यक्ताधिष्ठितास्ते सर्वे भावा गुणमया एव तत्प्रपंचः दृष्टमिति ३१ इदानीमुक्तं त्रैगुण्यस्य संसारहेतुत्वमनुवदंस्तद्विजयान्मोक्षमाह। एता इति सा
र्धेन। येन निर्जिताः स पश्चाद्विविक्तेन भक्तियोगेन मन्निष्ठः सन्मद्भावाय मोक्षाय प्रपद्यते योग्यो भवति। ३२। तस्माद्विवेकिना इदमेव युक्तमित्याह। त
स्मादिति। ज्ञानविज्ञानयोः संभवो यस्मिन् तमिमं नरदेहं ३३ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाग०
१२३

य

मज्ञानत्वकारमात्र। निःसंगस्तदेति सार्धेन। सत्त्वसंसेवया सात्त्विकास्सेव सेवेत पुमान् सत्त्वविद्वया इति आगुक्त यानैरपेक्षेण उपसमात्मकेन सत्त्वे नैव। ३४। ३५
एवं च सति मां आप्नोतीत्याह। संपद्यत इति। जीवं जीवत्वकारणं लिंगशरीरं। मां ब्रह्म सन् न पुनः संसार इत्याह। जीव इति। न बहिः विषय भोगेन नांतरस्तस्मर
णेन। गुणकृता सुरूसंसरणेष्वधामजित गुणपर्कं कथमना दिभिः। धुनुतत्तत्क्रिरसेन विवेकिनो न हि पुनः सुज्जं न बद्धुरीहचां। ३६। ॥ इति एकादशे टीकायां पंच
विंशोऽध्यायः। २५॥ ॥ षड्विंशे योगनिष्ठाया विघातो दुष्टसंगतः। साधुसंगेन तन्निष्ठा परा काष्टेति वर्ण्यते। १। योगिनो योगविघ्नः संगतः स न वेदिति। सर्वथा तन्नि
इस्यर्थमैलगीतं वितन्यते। २। निःसंगो मां नजेद्विद्वानप्रमत्तो जितेंद्रियः इत्युक्तं तत्र विपक्षेन थं कथयिष्यन् जीवन्मुक्तस्यापि तद्धि संगो दुर्वार इत्यनर्थः स्या मूः संगविमुक्त

गुणसंगं विनिर्धूय मां भजंतु विचक्षणाः। निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रियः। ३४। रजस्तमश्चाभिजयेत्सत्त्वसंसेवया मुनिः। सत्त्वं चा
भिजयेद्युक्तो नैरपेक्ष्येण शांतधीः। ३५। संपद्यते गुणैर्मुक्तो जीवो जीवं विहाय मां। जीवो जीवेन निर्मुक्तो गुणैश्चाशयसंभवैः। मयैव ब्रह्म
णा पूर्णो न बहिर्नांतरश्चरेत्। ३६। ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे पंचविंशोऽध्यायः। ॥ ॥ श्रीभगवानुवाच। मल्लक्षणमिमं ए
कायं लब्ध्वा मद्धर्म आस्थितः। आनंदं परमात्मानमात्मस्थं समुपैति मां। १ गुणमय्या जीवयोन्या विमुक्तो ज्ञाननिष्ठया। गुणेषु मायामात्रेषु दृश्यमा
नेष्ववस्तुतः। वर्तमानोऽपि न पुमान्युज्यतेऽवस्तुभिर्गुणैः। संगं न कुर्यादसतां शिश्नोदरतृपां क्वचित्। तस्यानुगस्तमस्यंधे पतत्यंधानुगांध
वत्। ३॥
दित्याशंकयोक्तानुवादपूर्वकं परिहरति सार्धैस्त्रिभिः। मल्लक्षणं मद्भक्तस्वरूपं तस्य तेन तमिमं देहं लब्ध्वा मद्धर्मे निष्किंचनत्वादौ आस्थितः सन् आत्मस्थमात्मन्येव
स्थितं परमानंदरूपमात्मानं मां समुपैति सम्यक् प्राप्नोति। १। ननु एवं भूतस्य विषयसंगो नास्तीत्याह। गुणमय्येति गुणमय्या या जीवयोनिः जीवोपाधि
स्तया विमुक्तः गुणेषु वर्तमानोऽपि तैर्न युज्यते संगं न प्राप्नोति। अत्र हेतुः अवस्तुभिः नन्ववस्तु रे निष्पन्ने पि दृश्यमानाद् दृश्यं पतेत तत्राह। अवस्तुत्वेन दृश्यमानेषु २
... संगं वर्जयेदित्याह संगमिति। असत्त्वलक्षणमाह। शिश्नोदरतृप्यंतीति शिश्नोदरतृपस्तेषां क्वचित्कदाचिदपि आस्तां तावद्बहूनां संगः किं तु तस्यैकस्या
... यस्य अनुगस्तु अंधमनुगच्छतीति यो अंधस्तद्वत्। ३॥ ॥ राम
१२३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible] समाह। ऐलः पुरूरवाः सम्राट् चक्रवर्ती बृहच्छ्रवाः कीर्तिर्यस्य सः। उर्वशीविरहात्तद्यमं सुह्यन्यस्मात्तत्कुरुक्षेत्रे तां समागम्य। गंधर्वदत्तेन अग्निना
[illegible] पुनरुर्वशीलोकं प्राप्य सशोकसंयमे मे शोकापगमे सति। ततो निर्विण्णः सन्निमां गाथामगायत तेन वृषस्कंधानुसारेण द्रष्टव्यं॥४॥ प्राक्तनीमो
[illegible] स्वर्गमाह। त्यक्त्वेति। आत्मानं राजानं त्यक्त्वा। अथ वा शय्यायां आत्मानं त्यक्त्वा व्रजंतीमन्वगात्। घोरे तिष्ठेति। अये जाये मनसा तिष्ठ का। घोरे वचांसि
आयंतीः मिश्रा कृणवावहै नु न नो मंत्राः अनुदिता स एते मयस्करन्नु परतरे च नाहन्नित्येवं मंत्रैर्विलपन्॥५॥ वैक्लव्ये कारणमाह। कामानिति। वर्षाणां यामिनी रात्री
ची: यंती: अपयांती: आगामिनी:। आकृष्टाचेतना यस्य सः॥६॥ तस्य गंधर्वलोकं प्राप्तस्य बहुकालमुर्वशीसंभोगानंतरं निर्विण्णस्य गाथामाह। अष्टे

ऐलः सम्राडिमां गाथामगायत बृहच्छ्रवाः॥ उर्वशीविरहान्मुह्यन्निर्विण्णः सशोकसंयमे॥४॥ त्यक्त्वात्मानं व्रजंतीं तां नग्नमुन्मत्तवद्वु
न्नः॥ विलपन्नन्वगाज्जाये घोरे तिष्ठेति विक्लवः॥५॥ कामानतृप्तोनुजुषन्क्षुल्लकान्वर्षयामिनीः। न वेद यंतीर्नायंतीरुर्वश्याकृष्टचे
तनः॥६॥ ऐल उ०॥ अहो मे मोहविस्तारः कामकश्मलचेतसः। दिव्यागृहीतकंठस्य नायुःखंडा इमे स्मृताः॥७॥ नाहं वेदाभिनिर्मुक्तः सूर्यो
वाभ्युदितो मुया। मुषितो वर्षपूगानां बताहानि गतान्युत॥८॥ अहो मे आत्मसंमोहो येनात्मा योषितां कृतः। क्रीडामृगश्चक्रवर्ती नरदेव
शिखामणिः॥९॥ सपरिच्छदमात्मानं हित्वा तृणमिवेश्वरं। यांतीं स्त्रियं चान्वगमं नग्न उन्मत्तवद्रुदन्॥१०॥ कुतस्तस्यानुभावः स्यात्तेज ई
शत्वमेव वा। योन्वगच्छं स्त्रियं यांतीं खरवत्पादताडितः॥११॥

ईदृशानि स्वचाष्टनिरनुतापः प्रपंच्यते। अहो इति। यतो मया इमे अहोरात्ररूपा आयु
खंडा न स्मृताः॥७॥ तदेवाह। नाहमिति। अभिनिर्मुक्तः मयि रममाणे अस्तंगतः। अभ्युदितो वा सूर्य इति। अमुया उर्वश्या वंचितः। बत खेदे। उत अपि वर्षपूगा
नामपि गतान्यहानि न वेदेति॥८॥ येन संमोहेन आत्मा देहः। क्रीडामृगः। अधीनः॥९॥ न तु प्रणयकुपितायास्त्वनुनयार्थमधीनता युक्तैव मत्प्रमत्तत्वं तदस्ती
त्याह। सपरिच्छदं राज्यादिसहितं ईश्वरं चक्रवर्तिनं तृणमिव त्यक्त्वा यांतीमपि स्त्रियमन्वगमं अनुगतोऽस्मि॥१०॥ किंच मम प्रभावाद्यभिमानोऽपि वृथैवेत्याह। कुतस्तस्य
स्य मे तेजो बलं खरो यथा पादताडितोपि खरीमनुगच्छति तद्वत्॥११॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंभूतस्य सर्वं साधनं व्यर्थमित्याह। किमिति त्यागेन संन्यासेन विविक्तेन एकांतसेवया मौनेन वा ह्रियमेन ॥ २२ ॥ अत्रुत तस्य स चात्मानं निंदति शास्यां ॥ स्वा
यर्थ्यमिति। अकोविदमज्ञातारं। गोखरवत्। गौरिव खर इवेति ॥ २३ ॥ अधरासवं सेवमानस्य। आत्मभूः मनोसिजः पुनः पुनरुज्जवन् ॥ २४ ॥ एवमर्थ्यमिति निर्विद्दो निरू
पित। इदानीं तस्य विवेकमाह द्वाभ्यां। पुंश्चलेति। अयनावः। कर्मनिर्द्वानिष्ठा दुःखमेव प्राप्तोस्मि। अतः परमेश्वरमेवानुनेयमिति ॥ २५ ॥ परमेश्वरप्र
सादं विना देवैरुपदिष्टादपि वेदवाक्यान्मोहो न निवर्त्तत इत्याह। बोधितस्यापीति। देवाउर्वशी पास्तकवाक्येन यथार्थवचनेन पुरूरवोमम मृषा माध्वतमो

किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा। किं विविक्तेन मौनेन स्त्रीभिर्यस्य मनो हृतं ॥ २२ ॥ स्वार्थस्याकोविदं धिङ्मां मूर्खं पंडितमानिनं यो हमीश्व
रतां प्राप्य स्त्रीभिर्गोखरवज्जितः ॥ २३ ॥ सेवतो वर्षपूगान्मे उर्वश्या अधरासवं। न तृप्यत्यात्मभूः कामो वह्निराहुतिभिर्यथा ॥ २४ ॥ पुंश्चल्या
पहृतं चित्तं को न्वन्यो मोचितुं प्रभुः। आत्मारामेश्वरमृते भगवंतमधोक्षजं ॥ २५ ॥ बोधितस्यापि देव्या मे सूक्तवाक्येन दुर्मतेः। मनोगतो महा
मोहो नापयात्यजितात्मनः ॥ २६ ॥ किमेतया नोपकृतं रज्ज्वा वा सर्पचेतसः। रज्जुस्वरूपाविदुषो योहं यदजितेंद्रियः ॥ २७ ॥ क्वायं मलीमसः का
यो दौर्गंध्याद्यात्मकोशुचिः। क्व गुणाः सौमनस्याद्या ह्यध्यासोविद्यया कृतः ॥ २८ ॥ (१७)।

मान्माह। कासो अशिवा उक्तानुनवैस्त्रैणानि सख्यानि संति शालावृ
काणां हृदयानि एता इत्यनेन। दुर्वपुंश्चल्यापहृतं चित्तमित्यादिना तस्याश्चापकारो अनुस्मृतः ॥ २६ ॥ इदानीं ममैवापराध इत्याह। किमेतयेति। न अस्माकं कामिनां
रत्नया किमपकृतं न किंचिदपि। यथा रज्जुस्वरूपाविदुषो रज्जुदृष्टुः पुंसः तस्यां सर्पकल्पनया विद्यतोपि रज्ज्वा किमपि नापकृतं तद्वत्। यद्यस्मात् यो हमेवं
तःस्म। अजितेंद्रियत्वादपराधी इत्यर्थः ॥ २७ ॥ ननु तथापि सैव सौगंध्यप्रेमादिगुणैः संमोहमूलमित्यासै तत्रांवयुतेपि मम मतिपरिकल्पिता एवेत्याह स्वचतुर्भिः।
क्वायमिति। मलीमसः अतिमलीनः सुमनसो कुसुमानामिव गंधः सौकुमार्यादि सौमनस्यं तद्योगेन मनोज्ञा वा ॥ २८ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मन्त्वमपि तस्मिन्नपरिकल्पितमेवेत्याह । पित्रोः किंस्वं कामयः जनकत्वात् । तु वित्तके नायथियावाग्गोगप्रदत्वात् । अत्रानुपयुक्तमप्येतन्न्यायतुल्यत्वात्तदुक्तं
स्वामीनावाश्रधिनत्वात् । अग्नेर्वाश्रिते दाहकृत्वात् । श्वगृध्रयोर्वन्तिमत्वात् । किंच । आत्मनस्तत्कृतशुभाशुभभागित्वात् सुहृदां वा उपकारित्वात् । एवं यो
न निश्चीयते १९ तुच्छाहं कृमिविड्भस्म लक्षणा निष्ठांतो यस्य तस्मिन् काये कलेवरे प्रियत्वेन गृहीते विषंगमेवाह अहो इति सुनसं शोभननासिकं २० ॥
अतरुगुणरोपेण रमामाणः माहशाः कृमिसमा इत्याह । त्वग्मांसेति संहतौ नर संघाते देहे विण्मूत्रादिसंहतौ रमतां कृमीणां वा २१ यद्यप्येवं बीजं स्त्रिता एव स्त्रियः

पित्रोः किंस्वं नु भार्यायाः स्वामिनोग्नेः श्वगृध्रयोः । किमात्मनः किंसुहृदामिति यो नावसीयते ॥ १९ ॥ तस्मिन्कलेवरेमेध्ये तुच्छनिष्ठे विषज्जते । अ
हो सुभद्रं सुनसं स्मितं च मुखं स्त्रियः ॥ २० ॥ त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ ॥ विण्मूत्रपूये रमतां कृमीणां कियदंतरं ॥ २१ ॥ अथापि नोप
सज्जेत स्त्रीषु स्त्रैणेषु चार्थवित् । विषयेंद्रियसंयोगान्मनः क्षुभ्यति नान्यदा ॥ २२ ॥ अदृष्टादश्रुताद्भावान्न भाव उपजायते । असंप्रयुं
जतः प्राणान् शाम्यति स्तिमितं मनः ॥ २३ ॥ तस्मात्संगो न कर्त्तव्यः स्त्रीषु स्त्रैणेषु चेंद्रियैः । विदुषां चाप्यविश्रब्धः षड्वर्गः किमु माहशां ॥ २४ ॥ श्री
भगवानुवाच ॥ ॥ एवं प्रगायन्नृपदेवदेवः स उर्वशीलोकमथो विहाय । आत्मानमात्मन्यवगम्य मां वै उपारमज्ज्ञानविधूतमोहः ॥ २५
ततो दुःसंगमुत्सृज्य सत्सु सज्जेत बुद्धिमान् ॥ संत एतस्य छिंदंति मनोव्यासंगमुक्तिभिः ॥ २६ ॥ ॥

सुस्मितं

अथापि नोपसज्जेत । अवलोकनादिनापि संगं न कुर्यात् ॥ अर्थवित् विवेकी ॥ अत्र हेतुः विषयेति २२ ॥ ननु कथंचिन्निमीलितनयनादेरपि मनः क्षोभो दृश्यते । सत्यं
सोपि पूर्वदर्शनादिकं विना न भवतीत्याह । अदृष्टादिति । भावात्पदार्थात् भावो मनःक्षोभः अतः प्राणान् इंद्रियाणि असंप्रयुंजतः नियच्छतः स्तिमितं निश्चलं
सत् २३ इंद्रियैः कृत्वा अविश्रब्धः । अविश्वसनीयः माहशां अविवेकिनां ॥ २४ ॥ फलितमाह द्वाभ्यां । एवमिति । नृपेषु देवेषु च दीव्यतीति तथा ॥ उक्तिभिः हितो
पदेशैरिति नीयर्देवादिसंगादपि सत्संगः श्रेयानिति दर्शयति २६ ॥ ॥

॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
२२५

॥३०॥

मत्कालव्रताणामाद्यं संत इति विशेषणाष्टकस्य यथेष्टं हेतुहेतुमद्भावः २७ ननु तेषूपदेशापेक्षाप्रवृत्तिके वलं तत्कथं निधिरेव मारयती स्माहते श्रितिश्रवणादिभिः २८
श्रवणादिभिर्मत्पराः श्रद्दधानाश्च संतो भक्तिं विंदंतिः २९ विनावसुमग्निं सेवमानस्य अप्येति निवर्तते तथा कर्मादिजाड्यं ॥ आगामिसंसारभयं तन्मूल
मज्ञानं च न प्रतीत्यर्थः ३१ निमज्योन्मज्जतां उच्चावचा योनिर्गच्छतां परमायनं परमाश्रयः ३२ किंच ॥ यथान्नमेव प्राणिनां जीवनं अहमेव यथार्तानां शर
णं धर्म एव यथा प्रेत्य परलोके वित्तं ॥ तथा संत एवार्वाक् संसारपातात् बिभ्यतः पुंसः अरणं शरणं ३३ किंच ॥ संतश्चक्षूंषि सगुणनिर्गुणज्ञानानि अर्कः पु

संतोनपेक्षामच्चित्ताः प्रशांताः समदर्शिनः ॥ निर्ममानिरहंकारा निर्द्वंद्वा निःपरिग्रहाः २७ तेषुनित्यंमहाभागमहाभागेषुमत्कथाः ॥
संभवंतिहितानृणांजुषतांप्रपुनंत्यघं २८ तायेशृण्वंतिगायंतिह्यनुमोदंतिचादृताः मत्पराःश्रद्दधानाश्चभक्तिंविंदंतितेमयि २९
भक्तिंलब्धवतःसाधोःकिमन्यदवशिष्यते मय्यनंतगुणेब्रह्मण्यानंदानुभवात्मनि ३० यथोपश्रयमाणस्यभगवंतंविभावसुं शीतं
भयंतमोप्येतिसाधून्संसेवतस्तथा ३१ निमज्योन्मज्जतांघोरेभवाब्धौपरमायनं संतोब्रह्मविदःशांतानौर्दृढेवाप्सुमज्जतां ३२
३३ अन्नंहिप्राणिनांप्राणआर्तानांशरणंत्वहं धर्मोवित्तंनृणांप्रेत्यसंतोर्वाग्बिभ्यतोरणं ३३ संतोदिशंतिचक्षूंषिबहिरर्कःसमु
त्थितः देवताबांधवाःसंतःसंतआत्माहमेवच ३४ वैतसेनस्ततोप्येवमुर्वश्यालोकनिस्पृहः मुक्तसंगोमहीमेतामात्मारामश्च
चाहर ३५ ॥ इतिश्रीभागवतेमहापुराणएकादशस्कंधेषड्विंशतितमोध्यायः २६ ॥

नः मत्प्रयुक्तिविशेष हि स्वदृष्ट्यैकमेव चक्षुरित्यर्थः ॥१४॥

अध्यायार्थमुपसंहरति वैतसेन इति सुद्युम्ननाम्ना वनं प्रविष्टस्य स्त्रीनाम्ना इलानाम्नी तस्यां स्त्रीभावं प्राप्तस्य पुत्रो वैतसेनः इला पुरूरवाः ॥ राम
एवं मुक्त प्रकारेण उर्वशीलोकात् आनंदलोकनाद्धा निस्पृहः स्तोपि मुक्तसंगात् पिहितो मुक्तसंगः सन्नात्मारामः सन् आत्मायथेष्टं चचारेति ३५ ॥ इति एकादशे टी
का ॥ षड्विंशतितमोध्यायः २६ ॥ १२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वि॰श्रे

सर्वे क्रियायोगः सद्यश्चित्तप्रसादकः। सर्वकामप्रतिदेश्च सांगः प्रोक्तः समासतः॥ १ रागाद्याकुलचित्तानां कुतोऽसंगादि संभवः। इति स्मृत्वार्चनं भक्तमनु
...नुष्ठ... २ क्रियायोगमिति भवदाराधनरूपं यस्मादिति करणाधिष्ठानादिप्रश्नः सर्वकारकाणां निमित्तत्वस्याविशिष्टत्वात् यथेति किं भिन्नाधि
ष्ठानादौ केन प्रकारेणेति प्रश्नः येऽधिकारिणः सात्वतमतकाः १ अस्य पुनर्विशेषतः प्रश्नकारणमाह चतुर्भिः एतद्वदन्ति निःश्रेयसकरं वदंति अं

॥उद्धव उवाच॥ क्रियायोगं समाचक्ष्व भवदाराधनं प्रभो॥ यस्मात्त्वां ये यथार्चंति सात्वताः सात्वतर्षभ॥ १ एतद्वदंति मुनयो मुहुर्निः
श्रेयसं नृणां नारदो भगवान् व्यास आचार्योंऽगिरसः सुतः॥ २ निःसृतं ते मुखांभोजात् यदाह भगवानजः॥ पुत्रेभ्यो भृगुमुख्ये
भ्यो देव्यै च भगवान् भवः॥ ३ एतद्वै सर्ववर्णानामाश्रमाणां च संमतं श्रेयसामुत्तमं मन्ये स्त्रीशूद्राणां च मानद॥ ४ एतत्कमलपत्रा
क्ष कर्मबंधविमोचनं॥ भक्ताय चानुरक्ताय ब्रूहि विश्वेश्वरेश्वर॥ ५ श्रीभगवानुवाच॥ नह्यंतोऽनंतपारस्य कर्मकांडस्य चोद्धव॥
संक्षिप्तं वर्णयिष्यामि यथावदनुपूर्वशः॥ ६ वैदिकस्तांत्रिको मिश्र इति मे त्रिविधो मखः॥ त्रयाणामीप्सितेनैव विधिना मां समर्च
येत्॥ ७ यदा स्वनिगमेनोक्तं द्विजत्वं प्राप्य पूरुषः॥ यथा यजेत मां भक्त्या श्रद्धया तन्निबोध मे॥ ८ अर्चायां स्थंडिलेऽग्नौ वा सूर्ये वाप्सु
हृदि द्विजे॥ द्रव्येण भक्तियुक्तोऽर्चेत्स्वगुरुं माममायया॥ ९ पूर्वं स्नानं प्रकुर्वीत धौतदंतोऽगशुद्धये॥ उभयैरपि च स्नानं मंत्रैर्मृद्ग्रहणा
दिना॥ १०॥

गिरसः सुतो बृहस्पतिः २ निःसृतं त्वयोपदिष्टमित्यर्थः देव्यै पार्वत्यै ३ सर्ववर्णानां त्रैवर्णिकानां ४ विश्वेश्वराये ते षामीश्वर ५ कर्मकांडस्य पूजा
विधानस्य नास्त्यंतो यद्यप्यतः पारस्यानुष्ठानतो यस्य ६ वैदिक एव मंत्रो वैदिकान्येवांगानि च यस्मिन्पुरुषसत्कारे स वैदिकः एवं तांत्रिकोऽपि मिश्रो द्वाभ्यां राद्धिःम
खः पूजा ७ यदा त्रैवर्णिको यजेत तदा विशेषमाह यदा गर्भाष्टमे काद्यन्त्या शरदृत्वादिकाले स्वनिगमेन स्वाधिकारप्रवृत्तेन वेदेनोक्तं द्विजत्वं उपनयनं ८
अर्चायां प्रतिमादौ ९ स्नाने विशेषमाह उभयैर्वैदिकैस्तांत्रिकैश्च मंत्रैः १०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचसंध्योपासनादीनिकर्माणिआचोदितानिमाकल्पेनविहितानियस्यान्तितैःसहमेपूजांकल्पयेत्तुनापरित्यजेदित्यर्थः सम्यकूपरमेश्वरविषयएवसं
कल्पोयस्यतथाभूतःसन्कर्मपावनींकर्मनिर्हारिणीं ११ अर्चाभेदानाह शैलीशिलामयी लौहीसुवर्णादिधातुमयी लेप्यामृच्चंदनादिमयी हृदिपूज्या
यांमनोमयी १२ प्रकर्षेणतिष्ठत्यस्यामितिप्रतिष्ठाप्रतिमैवतस्याभगवतोमंदिरं यद्वाप्रतिष्ठ्याकलामात्रेणभगवन्मंदिरंभवतीति प्रतिमाभेदेनवि
शेषमाहभाषेन उद्वासोविसर्जनंअस्थिरायामर्चनेविकल्पः क्वाचिदावाहनंकुर्वंति सैकत्यांकुर्वंति अन्यत्रकुर्यान्नवेति अविलेप्यायांमृन्मय

संध्योपास्त्यादिकर्माणिवेदेनाचोदितानिमे पूजांतैःकल्पयेत्सम्यकसंकल्पःकर्मपावनीं ११ शैलीदारुमयीलौहीलेप्यालेख्याच
सैकती मनोमयीमणिमयीप्रतिमाष्टविधास्मृता १२ चलाचलेतिद्विविधाप्रतिष्ठाजीवमंदिरं उद्वासावाहनेनस्तःस्थिरायामुद्धवार्च
ने १३ अस्थिरायांविकल्पःस्यात्स्थंडिलेतुभवेद्द्वयं स्नपनंत्वविलेप्यायामन्यत्रपरिमार्जनं १४ द्रव्यैःप्रसिद्धैर्मद्यागःप्रतिमादिष्व
मायिनः भक्तस्यचयथालब्धैर्हृदिभावेनचैवहि १५ स्नानालंकरणंप्रेष्ठमर्चायामेवतूद्धव स्थंडिलेतत्त्वविन्यासोवह्नावाज्यप्लु
तंहविः १६ सूर्येचाभ्यर्हणंप्रेष्ठंसलिलेसलिलादिभिः श्रद्धयोपहृतंप्रेष्ठंभक्तेनममवार्यपि १७ भूर्यप्यभक्तोपहृतंनमेतो
षायकल्पते गंधोधूपःसुमनसोदीपोन्नाद्यंचकिंपुनः १८ ॥

लेख्यव्यतिरिक्तायां अन्यत्रविलेप्यायांलेख्यायांचपरिमार्जनमेवच १३ १४
इदानींसकामनिष्कामभेदेनविशेषमाह द्रव्यैरिति प्रकर्षेणसिद्धैःसुशोभनैः अमायिनोनिष्कामस्यतुभक्तस्ययथालब्धैर्यच्चंदनादिसर्वध्यानलभ्य
ते हृदिभावेनभावनया यद्वाहृदिलब्ध्योगस्यदानाभावेनमनोमयैर्द्रव्यैरित्यर्थः १५ अधिष्ठानभेदेनप्रधानोपचारमाह स्नानेति स्नानेति तत्त्वविन्या
सः यथा तत्त्वमंत्रप्रधानदेवतानांतन्मंत्रैःस्थापनं १६ अभ्यर्हणमुपस्थानादि सलिलादिभिस्तर्पणादिनायजनं सर्वत्रसाधारणमाह श्रद्धयेति १७ १८॥





CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतस्मिधि[illegible]रादिषु वक्ष्यमाण इदानीं पूजाप्रकारमाह शुचिरिति संस्कृताः संभाराः पूजासाधनानि येन सः प्रागग्रैर्दर्भैः यद्वा प्रागेव संस्कृतसंभारः सन्नासीन
[illegible]सीनः सन् पश्चात् तत्संभारार्थं वारं वारमुत्तिष्ठेदित्यर्थः प्राङ्मुखः उदङ्मुखो वा आसीनः स्वस्वयोः उभयोरपि समुखः अन्यानि मुखमुपविष्टः स
नु १९ अनंतरं गुर्वादिनमस्कारपूर्वकं यथोपदेशं स्वस्मिन् कृतन्यासः कृतो मूलमंत्रन्यासो येन तां ममाद्यां आत्मशुद्धिमाप्याद्यपकर्षणादिना
शोधयेत् ॥ कलशं पूर्णकेन प्रोक्षणीयं प्रोक्षणार्थोदकपात्रं उपशोधयेत् चंदनपुष्पादिभिः संस्कुर्यात् २० तदद्भिः प्रोक्षणीयाद्भिर्देवयजनं देवपूजा
स्थानं पाद्यार्घ्याचमनीयार्थं त्रीणि पात्राणि कलशोदकैः पूरितानि तैर्द्रव्यैः साधयेत् तत्र पाद्यादिद्रव्याणि पाद्ये श्यामाकदूर्वादिरितं ~~जातीलवंगककोलैर्नमाचक~~
ज्ञविष्णुक्रांतादिरिष्यते गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः दूर्वाचेतिक्रमादर्घद्रव्याष्टकमुदीरितं जातीलवंगककोलैर्मनिमाचमनीयकमिति ॥

शुचिः संस्कृतसंभारः प्राग्दर्भैः कल्पितासनः आसीनः प्रागुदग्वार्चेदर्चायां त्वथ संमुखः १९ कृतन्यासः कृतन्यासां मद्र्चां पाणिना
मृजेत् कलशं प्रोक्षणीयं च यथावदुपसाधयेत् २० तदद्भिर्देवयजनं द्रव्याण्यात्मानमेव च प्रोक्ष्य पात्राणि त्रीण्यद्भिस्तैस्तैर्द्रव्यैश्च सा
धयेत् २१ पाद्यार्घ्याचमनीयार्थं त्रीणि पात्राणि देशिकः हृदा शीर्ष्णाथ शिखया गायत्र्या चाभिमंत्रयेत् २२ पिंडे वाय्वग्निसंशुद्धे हृत्प
द्मस्थां परां मम अण्वीं जीवकलां ध्यायेन्नादांते सिद्धभाविताम् २३ तयात्मभूतया पिंडे व्याप्ते संपूज्य तन्मयः आवाह्यार्चादिषु स्थाप्य
न्यस्तांगं मां प्रपूजयेत् २४

तानि च त्रीणि पात्राणि यथाक्रमं हृदादिमंत्रैर्गायत्र्या च सर्वाण्यभिमंत्रयेत् देशिकः पूजकः २१ २२ तदनंतरं पिं
डे देहे वाय्वग्निसंशुद्धे इति कोष्ठगतेन वायुना शोषिते आधारगतेनाग्निना दग्धे पुनर्ललाटस्थचंद्रमंडलामृतप्लावनेनामृतमये जाते तस्मिन् हृत्पद्मस्थां
परां श्रेष्ठां जीवकलां श्रीनारायणमूर्तिं ध्यायेत् कथंभूतां नादांते सिद्धभावितां प्रणवस्याकारोकारमकारबिंदुनादाः पंचांशाः तत्र नादांते सिद्धैर्ध्यातां
तथा च श्रुतिः यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः तस्य प्रकृतिलीनस्य यः परः स महेश्वर इति २३ तयात्मभूतया स्वेनैव भावेन चिंतितया व्याप्त
मये पिंडे दीपेन प्रभया गृहमिव व्याप्ते सति तस्मिन्नेव तदौपम्यान्मनसैवोपचारैः संपूज्य तन्मयः सन्नर्चादिषु आवाह्य स्थापनमुद्रया स्थापयित्वा २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०प० १

कथं पूजयेत्तदाह । पाद्येति वाभ्यां । धर्मादिभिर्मम आसनं । २५ । तत्र पद्मं च कल्पयित्वा आत्मानं वेदतन्त्राभ्यामुभयसिद्धये मह्यं पाद्यादीनुपचारान्प्रकल्पयेदि
त्यन्वयः । उपस्पर्शः आचमनं । अर्हणमर्घ्यं । उभयसिद्धये वेदतन्त्रोक्तभुक्तिमुक्तिप्राप्तये । अयमर्थः । धर्मज्ञानवैराग्यैश्वर्याण्यासनपर्यंकस्याग्नेयादिचतु
ष्कोणेषु पादाः । अधर्मादीनि पूर्वादिदिक्षु गात्राणि च मो गुणाः पटिकास्तत्र पूर्वादिक्रमेण मध्ये च विमलोत्कर्षिणीज्ञानाक्रियायोगाप्रह्वीसत्येशानानु
ग्रहेति नव शक्तयः । एवं यथोपदेशं धर्मादिभिर्नवभिश्शक्तिभिरासनं कल्पयित्वेति कर्णिकायाः केसरे तत्र सूर्यादिमंडलैश्चोज्ज्वलमित्यर्थः । २६
आयुधादिपूजामाह । सुदर्शनमिति त्रिभिः । तत्र [illegible] पश्चाङ्गमित्यंगावरणपूजा सूचिता । आसनेनैव शक्त्यावरणमप्युक्तं । ततः सुदर्शनादिमू[illegible]ता

पाद्योपस्पर्शार्हणादीनुपचारान्प्रकल्पयेत् । धर्मादिभिश्च नवभिः कल्पयित्वासनं मम । २५ । पद्ममष्टदलं तत्र कर्णिकाकेसरोज्ज्वलं । उभाभ्यां
वेदतन्त्राभ्यां मह्यं तूभयसिद्धये । २६ । सुदर्शनं पाञ्चजन्यं गदासीषुधनुर्हलान् । मुसलं कौस्तुभं मालां श्रीवत्सं चानुपूजयेत् । २७ । नंदं सुनंदं
गरुडं प्रचंडं चंडमेव च । महाबलं बलं चैव कुमुदं कुमुदेक्षणं । २८ । दुर्गां विनायकं व्यासं विष्वक्सेनं गुरून् सुरान् । स्वे स्वे स्थाने त्वभिमुखा
न्पूजयेत्प्रोक्षणादिभिः । २९ । चंदनोशीरकर्पूरकुंकुमागुरुवासितैः । सलिलैः स्नापयेन्मंत्रैर्नित्यदा विभवे सति । ३० । स्वर्णघर्मानुवाके
न महापुरुषविद्यया । पौरुषेणापि सूक्तेन सामभी राजनादिभिः । ३१ ।

सायुधान्पृष्ठदिक्षु कौस्तुभवनमालाश्रीवत्सानुरसि । २७ । नंदादीन्पार्षदानष्टदिक्षु
गरुडं पुरतः दुर्गादीन् कोणेषु । गुरून्वामतः । सुरानिंद्रादिलोकपालान्पूर्वादिदिक्षु एवमेतान्देवस्याभिमुखान्प्रोक्षणादिभिः । अर्घ्यादिभिः । पूजयेदि
त्यर्थः । २८ । २९ । पाद्यादीनुपचारान्प्रकल्पयेदित्युक्तं तानेव गुणविधिभिः प्रपंचयति । चंदनेति षड्भिः । ३० । मंत्रानाह । स्वर्णेति । स्वर्णघर्मानुवाकः । सुव
[illegible] परि वेद वेनमित्यादिर्महापुरुषविद्या । जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन । सुब्रह्मण्य नमस्तेस्तु महापुरुष पूर्वजेति । पौरुषं सूक्तं सहस्रशी
र्षेत्यादि [illegible] राजनादीनि सामानि इंद्रं नरो नेमधिता हवंत इत्यस्यामुत्पन्नानि गीतानि । आदिशब्देन रौहिणादीनि । ३१ ।

नि १२७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्नाद्युपचारेष्वलंकारलक्षणं गुणं विधत्ते वस्त्रेति पत्राणि कपोलवक्षःस्खलादिषु लिखिताः पत्रभंगाः मज्जकः स्वेदप्रेम यथा नवृतितथोयथोचितम्
[illegible]कुर्वीत [illegible]कार्यं सिद्धसाधारणं। ३२। अथ लक्षणं गुणं विधत्ते। पाद्यमिति। ३३। नैवेद्यं नवलक्षणं गुणं विधत्ते। गुडपायसेति। शाकुल्यः तैलपक्व
विशेषाः आपूपाः अपूपानां मंडकादीनां समूहाः सूपाव्यंजनानि सन्ति विभवश्चेति विशेषः। ३४। कालभेदेन गुणं विधत्ते। अभ्यंगेति। अभिषेचनं प
ञ्चामृतादिस्नपनं अन्नाद्येति अन्नं भोज्यं। आद्यं भक्ष्यं। पर्वाणि एकादश्यादीन्यन्वहं वा विभवे सतीति॥ ३५। फलं नृपस्याधिनो ग्रावापि पूजा भक्ता

वस्त्रोपवीताभरणपत्रस्रग्गंधलेपनैः। अलंकुर्वीत सप्रेममज्जको मां यथोचितं॥ ३२। पाद्यमाचमनीयं च गंधं सुमनसोक्षतान्॥ धूपदी
पोपहार्याणि दद्यान्मे श्रद्धयो विकिः॥ ३३। गुडपायससर्पींषि शष्कुल्यापूपमोदकान्॥ संयावदधिसूपांश्च नैवेद्यं सति कल्पयेत्॥ ३४॥
अभ्यंगोन्मर्दनादर्शदंतधावाभिषेचनं। अन्नाद्यगीतनृत्यानि पर्वाणि स्युरुतान्वहं। ३५। विधिना विहिते कुंडे मेखलागर्तवेदिभिः
अग्निमाधाय परितः समूहेत्पाणिनोदितं॥ ३६॥ परिस्तीर्याथ पर्युक्ष्य दत्वाधाय यथाविधि॥ प्रोक्षण्यासाद्य द्रव्याणि प्रोक्ष्याग्नौ भाव
येत मां॥ ३७॥ तप्तजांबूनदप्रख्यं शंखचक्रगदांबुजैः॥ लसच्चतुर्भुजं शांतं पद्मकिंजल्कवाससं॥ ३८॥ स्फुरत्किरीटकटककटिसूत्र
वरांगदं। श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं॥ ३९॥ ॥

रमादि॥ विधिना स्वगृह्योक्तप्रकारेण मेखलादिभिरुपलक्षिते विहिते निर्मिते॥ तदुक्तं। विस्तारेणायतस्त्रिकोणो मेखलाश्चतुरंगुलाः॥ हस्तमात्रो भवेत्कुण्डः स
योनिर्वेदिका तथा कृत्यादि॥ उदितं प्रज्वलितमग्निं परितः समूहेत् एकत्र मेलयेत्॥ ३६॥ दर्भैः परिस्तीर्य परितः प्रोक्षयेत् अन्वाधाय अन्वाधानसंज्ञकं
व्याहृतिभिः समिद्धोमपादिरूपं कर्म कृत्वा अग्नेरुत्तरतो द्रव्याणि होमोपयोगीन्यासाद्य निधाय प्रोक्षणैः प्रोक्षणीपात्रोदकेन प्रोक्ष्याग्नौ मां ध्यायेत्
३७। शंखादिभिर्लसद्भिः शोभमानाश्चत्वारो भुजा यस्य तं। ३८। स्फुरंति किरीटादीनि यस्य तं। ३९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०ए०
१२८

दविषाघृतेनाग्निघृतानिसंसिक्तानिदारुणिश्रुक्समिधः। आस्यप्रक्षिप्य आघारौतत्कंत्तकौ याग्गी एवमाज्यभागौ चदत्वातदर्थाह्याहुती कुर्वीत्यथर्ति
र्थीः तत्राघारौप्रजापतयेस्वाहा। इंद्राय स्वाहेतिचोत्तरदक्षिणपरिधिसंधिमारभ्याग्निमध्यादापरिध्यंतंघृतधाराणरूपौ आज्यभागौ अग्नयेस्वाहासो
मायस्वाहेत्येवंहोमरूपौ ४० मूलमंत्रेणाष्टशतरेणतथापोडशाकृत्वायस्मिंस्तेन पुरुषसूक्तेनचकृप्रवदानतः प्रत्यर्चमाहुतिग्रहणेनत्पृथक्॥
पुरुषसूक्तेनाराधनपक्षेस एव मूलंमंत्रस्तेनैवप्र । तस्यचमवदानतोहोमइतिमंत्रैः स्वाहांतैनाममंत्रैर्धान्याचैपूजाकर्मणैव अग्नयेस्विष्टकृ
तेस्वाहेत्येवंस्विष्टकृतं कृत्वा ४१ ततो वह्निस्थंभगवंतमभ्यर्च्याथिनमस्कृत्यपार्षदेभ्योनंदादिभ्योष्टसुदिक्षुबलिंहरेत्ततः पूजास्थानमागम्यदेवस्याग्रे

ध्यायन्नभ्यर्च्यदारुणिश्रुविषानिघृतानिच। आस्याज्यभागावाघारौदत्वाज्यकृतंहविः ४० जुहुयान्मूलमंत्रेणषोडशान्वविदानतः
धर्मादिभ्योयथान्यायंमंत्रैः स्विष्टकृतंबुधः ४१ अभ्यर्च्याथिनमस्कृत्यपार्षदेभ्योबलिंहरेत् मूलमंत्रंजपेद्ब्रह्मस्मरन्नारायणात्मकं ४२
दत्वाचमनमुच्छेषंविष्वक्सेनायकल्पयेत् मुखवासंसुरभिमत्तांबूलादिमथार्हयेत् ४३ उपगायन्गृणन्नृत्यन्कर्माण्यभिनय ण
न्मम। मत्कथाः श्रावयन्शृण्वन्मुहूर्तंक्षणिकोभवेत् ४४ स्तवैरुच्चावचैःस्तोत्रैः पौराणैःप्राकृतैरपि। स्तुत्वाप्रसीदभगवन्निति
वंदेतदंडवत् ४५ शिरोमत्पादयोः कृत्वाबाहुभ्यांचपरस्परं प्रपन्नंपाहिमामीशभीतंमृत्युग्रहार्णवात् ४६ ॥ । ।

सनुपवित्रमयथात्राक्तिमूलमंत्रंजपेत् ४२ ततस्तमग्नेभगवतोभोजनसमासिध्यात्वा आचमनंदत्वातउच्छेषंविष्वक्सेनायकल्पयित्वातदनुज्ञयाप
आत्मंयंभुंजीत ततः सुरभिमत्सुगंधवत्तांबूलाद्यं मुखवासंदत्वाथपुनरर्हयेत् पुष्पांजलिनापूजयेत् ४३ उपगायनित्यस्त्रस्मिन्नाविः कुर्वन् रू
णिकः तैस्तुमंपरित्यज्यलक्ष्यावसरोभवेत ४४ स्तवस्तोत्राणांभेदंदर्शयति पौराणैः प्राकृतैरिति ४५ कथंप्रणमेदित्यपेक्षायामाह शिरइति बाहु १२८
भ्यांदक्षिणोत्तराभ्यांपरस्परंममदक्षिणोत्तरपादौगृहीत्वा यथा एष्टतः परस्परंनिबद्धाभ्यांकृतापराधइवप्रपन्नमित्यादिविज्ञप्यानप्रणमेत ४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तः शेषामुद्भाव्य पूर्वं किं वैकल्पिको विसर्जनप्रकारमाह इतीति ॥ अनयैव प्रार्थनया शेषां निर्माल्यं मया दत्तां ध्यात्वा शिरस्याधाय यद्यावाहनं तर्ह्युद्वासयेत्तर्हि प्र
तिमायां त्वन्तःस्थं ज्योतिस्तत्पुनरपि तत्त्यमस्तु ज्योतिष्येवोद्वासनीयं ॥ ४७ ॥ एतेष्वधिष्ठानेषु किं मुख्यमित्यपेक्षायामाह ॥ अर्चादिष्विति ॥ यदा यत्र श्रद्धा तत
त्र च न त्वधिष्ठाने मुख्यामुख्यत्वं ॥ कुतः यतः सर्वभूतेष्विति ॥ ४८ ॥ उभयतः इहामुत्र च ॥ ४९ ॥ सम्यक्प्रसादं मदर्चामिति त्रिभिः ॥ पुष्पोद्यानानि च कारयेत्

इति शेषां मया दत्तां शिरस्याधाय सादरं ॥ उद्वासयेच्चेदुद्वास्यं ज्योतिर्ज्योतिषि तत्पुनः ॥ ४७ ॥ अर्चादिषु यदा यत्र श्रद्धा मां तत्र चार्च
येत् ॥ सर्वभूतेष्वात्मनि च सर्वात्माहमवस्थितः ॥ ४८ ॥ एवं क्रियायोगपथैः पुमान्वैदिकतांत्रिकैः ॥ अर्च[illegible]न्नुभयतः सिद्धिं मत्तो विंद[illegible]त्य
भीप्सितां ॥ ४९ ॥ मदर्चां संप्रतिष्ठाप्य मंदिरं कारयेद्दृढं ॥ पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाश्रितान् ॥ ५० ॥ पूजादीनां प्रवाहार्थं महा
पर्वस्वथान्वहं ॥ क्षेत्रापणपुरग्रामान्दत्वा मत्सार्ष्टितामियात् ॥ ५१ ॥ प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयं ॥ पूजादिना ब्रह्मलोकं त्रि
भिर्मत्साम्यतामियात् ॥ ५२ ॥ मामेव नैरपेक्ष्येण भक्तियोगेन विंदति ॥ भक्तियोगं स लभत एवं यः पूजयेत मां ॥ ५३ ॥ यः स्वदत्तां परैर्दत्तां हरेत सु
रविप्रयोः ॥ वृत्तिं स जायते विड्भुग्वर्षाणामयुतायुतं ॥ ५४ ॥ ॥ ॥

पूजायात्रोत्सवाश्रितान् पूजा प्रत्यहं यात्रा विशिष्टपर्वणि बहुजनसमागमः ॥ उत्सवः वसंतादि ॥ महोत्सवस्तदाश्रितान् क्षेत्रादीन्दत्वा ॥ ५० ॥ पूजाया
त्रोत्सवाश्रितानित्यस्य विवरणं ॥ पूजादीनामिति ॥ प्रवाहार्थं संततानुवृत्त्यर्थं ॥ मत्सार्ष्टितां मत्समानैश्वर्यं ॥ ५१ ॥ प्रतिष्ठादीनां व्यस्तसमस्तानां फलमाह
प्रतिष्ठयेति ॥ मत्साम्यतां मया साम्यमित्यर्थः ॥ ५२ ॥ सकाममुक्तं ॥ अहैतुकं त्वकं प्रत्याह ॥ मामेवेति ॥ अहैतुकभक्तियोगः कथं भवतीत्याह
भक्तियोगमिति ॥ ५३ ॥ दातुः फलमुक्त्वा अपहर्तारं निंदति य इति ॥ विड्भुक् विष्ठाभोजी क्रिमिः ॥ ५४ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतः

कर्तुर्यत्फलं तदेवान्येषामप्याह । कर्तुरिति । सारथेः सहकारिणः हेतोः प्रयोजकस्य । अनुमोदितुश्च प्रेत्य तत्फलमित्यन्वयः । कृतैः कर्मणामिति नामिचः
नाभ्यर्हितः तत्रापि विशेषमाह । नृयस्मिन् कर्मणि सारथ्यादौ चिन्नृयः अधिकं फलमिति । पयःपत्रादिमात्रेण पूजितोयः परं प्रदं । प्रागेवस्थिता निर्जिता सहसा
शरणं मम ॥ ५५ ॥ इत्येकादशे टी० समसविंशोध्यायः ॥ अष्टाविंशेत्वयः पूर्वं विस्तरेणोपवर्णितः । ज्ञानयोगः पुनश्चासौ समासात्संनिरूप्यते ॥ इदा
नीमतिविस्तरेणोक्तं ज्ञानयोगं संक्षेपेण वक्तुमाह । परेषामिति । स्वभावान् शान्तघोरादीन् कर्माणि च । तत्र हेतुः विश्वमिति ॥ १ ॥ विपक्षे दोषमाह । परेति ॥
स्वार्थात् ज्ञाननिष्ठालक्षणात् स्वसतिमिथ्याभूते द्वैते निर्निवेशात् ॥ २ ॥ तदेव दृष्टान्तेनोपपादयति तैजसे राजसाहंकारकार्ये इंद्रियगणे निद्रयाप
न्ने निवृत्ते सति पिंडस्थो जीवः केवलं मनोमात्रेण मायां स्वप्नरूपां प्राप्नोति । ततो मनसि लीने सति नष्टचेतनः सन्मृत्युं वा मृत्युतुल्यां सुषुप्तिं वा प्रा

कर्तुश्च सारथेर्हेतोरनुमोदितुरेव च । कर्मणां नागिनः प्रेत्य भूयो भूयसि तत्फलं ॥ ५५ ॥ इति श्रीभागवते महापुराण एकादशस्कंधे
सप्तविंशोऽध्यायः ॥ ॥ श्रीभगवानुवाच । परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत । विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च ॥ १ ॥
परस्वभावकर्माणि यः प्रशंसति निंदति । स आशु भ्रश्यते स्वार्थादसत्य भिनिवेशतः ॥ २ ॥ तैजसे निद्रयापन्ने पिंडस्थो नष्टचेतनः । मायां
प्राप्नोति मृत्युं वा तद्वन्नानार्थदृक् पुमान् ॥ ३ ॥ किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत् । वाचोदितं तदनृतं मनसा ध्यातमेव च ॥ ४ ॥
छायाप्रत्याह्वयाभासा ह्यसंतोप्यर्थकारिणः । एवं देहादयो भावा यच्छंत्यामृत्युतो भयं ॥ ५ ॥

प्नोति । यथा । तद्वदेव नानार्थदृक् द्वैताभिनिवेशी
मोहविक्षेपलयं च प्राप्नोति । यथा प्राज्ञसंपत्तिर्विश्वस्य भोगलक्षणः । तंद्राण एवमनात्मसंपर्कादस्य मनोपि स्वरूपत्वं शाश्वतभावः ॥ ३ ॥ द्वैतासत्यत
याकृतिर्निर्वयो निर्विषयत्वं प्रपंचयति सार्धैः षड्भिः । किं भद्रमिति । अवस्तुनो द्वैतस्य मध्ये किं नु भद्रं किं वाभद्रं कियत् । ज्ञानभ्रमित्यर्थः । अवस्तुत्वमेवाह ॥
वाचेति । ... इंद्रियो पलक्षण वाचा उदितं उक्तं चक्षुरादिनिश्चयत ह्यपं तदनृतमिति ॥ ४ ॥ नन्वेवमसति देहादिभावानामप्यसत्वात्कथं भयहेतुत्वं तत्र
सदृष्टान्तमाह छाया प्रतिबिंबं प्रत्याह्वयः प्रतिध्वनिः । आभासः शुक्तिरजतादिः । एते यथा संतोप्यर्थकारिणो भवंति भयमृत्युतः मृत्युमभिव्याप्य यच्छंत्यामृत्यु
यः यावद्देहो न विलीयते तावद्भयं यच्छंतीत्यर्थः ॥ ५ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५

श्री

ननु मु...दिश्क तिमिरैव द्वैतं निरूपितं क्रमससंसारात्तत्राह ॥ आत्मैवेति विश्वात्मा त्रायते पाल्यते त्राति पालयति ॥ ६ ॥ अस्मस्मात्स्मृत्याद्विम्निरिक्ता त्रिवि
...ध्यात्माग्निरूपानातिष्ठतीति ॥ ७ ॥ ननु कथं निर्मूलं प्रतीयते तत्राह ॥ इदमिति ॥ ज्ञानविज्ञाननैपुण्यं निष्ठं स्मृत्वाक्तमोन्तृता ॥ ८ ॥ एतन्निष्ठस्यासुपायमा
ह ॥ प्रत्यक्षेणेति ॥ यदाद्यंतवत्तद्वैतंतदसत्प्रतिज्ञात्वा निःसंगो विचरेत् ॥ आद्यंतवत्त्वे प्रमाणा एणा निप्रत्यक्षेण घटादिस्त्वनुमानेन सावयवत्वेन हेतुत्वं पंचम्येस्मादि
निगमेन आद्यन्त्यामाकाशादि ॥ आत्मसंविदा सानुभवेन सर्वं द्रष्टृप्रमाद्यंतवदसदेवेति ज्ञात्वेति ॥ ९ ॥ ननु यदि आत्मसंविदा सर्वं द्रष्टप्रमस्य हि तु च्यते तेन त्वात्मा
स्वप्रकाशो देहादि द्वैतं च जडमिति मुक्तं स्यात् ॥ तथा च संसारप्रतिनाशो न घटेतेति चोदयति ॥ नैवेति ॥ अनात्मस्वदृशोर्जडाजडयोः अत्र हेतुः ॥ द्रष्टृद्रष्टृस

आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः ॥ त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः ॥ ६ ॥ तस्मान्न ह्यात्मनोन्यस्मादन्यो भावो निरूपित
ः निरूपितेयं त्रिविधा निर्मूला भातिरात्मनि ॥ इदं गुणमयं विद्धि त्रिविधं मायया कृतं ॥ ७ ॥ एतद्विद्वान्मदुदितं ज्ञानविज्ञाननैपुणं ॥ न
निंदति न च स्तौति लोके चरति सूर्यवत् ॥ प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा ॥ आद्यंतवदसज्ज्ञात्वा निःसंगो विचरेदिह ॥ ९ ॥
उद्धव उवाच ॥ नैवात्मनो न देहस्य संसृतिर्द्रष्टृदृश्ययोः ॥ अनात्मस्वदृशोरीश कस्य स्यादुपलभ्यते ॥ १० ॥ आत्माव्ययोऽगुणः शुद्धः स
यंज्योतिरनावृतः ॥ अग्निवद्दारुवदचिद्देहः कस्येह संसृतिः ॥ ११ ॥ श्रीभगवानुवाच ॥ यावद्देहेंद्रियप्राणैरात्मनः सन्निकर्षणं ॥ संसा
रः फलवांस्तावदपार्थोप्यविवेकिनः ॥ १२ ॥

योर्मानृतत्वयोरपि तत्राह ॥ उपलभ्यत इति ॥ १० ॥ एतत्स्वपंचयति ॥ आत्मेति अव्ययत्वादिषंच विशेषणैर्नत्वादि
रागादिगुणपाठगुणाज्ञानपरिछेदानामसंतत्वं दर्शयति ॥ देहस्तु हेतुमत्त्वं तु यथेष्टं ॥ अचित्जडः अयं भावः ॥ यथैवाग्निर्दारुणो नेदिनात्तुपलंतेपि दारुवत्प्रकाशरूपमेवा
ग्निः स्वप्रकाशकस्तथा देहात्मनोरपीति न संसृतिस्तयोरन्यतरस्यापि घटत इति ॥ ११ ॥ सत्यं तथापि तु मयोरेवमविवेक एव संसारालंबनमित्याह पंचभिः ॥ याव
दिति ॥ सन्निकर्षणं संबंधः ॥ ननु असंगस्य कुतः संबंधः तत्राह ॥ अविवेकिनः ॥ अज्ञानकृत इत्यर्थः ॥ ननु स्वप्रकाशस्य कथमज्ञानतः संसारस्तत्राह ॥
अपार्थोपि केवलं फलवान् फलं संस्फूर्तिः ॥ न तु तत्त्वतोस्तीत्यर्थः ॥ १२ ॥

भा०ए०टी० १३०

न्नत्वसतो देहादेः कुतः संसारस्फूर्त्तिर्दुःखमपि तत्राह । अर्थे हीति । अस्यात्मनः ॥५३॥ ननु कथं विज्ञानतो विषयस्फूर्त्तिर्विना मुक्तस्यापि दुःखरित्यत्र निर्मोहित्वं प्र
संगः स्यात्तत्राह । यथाहीति । प्रस्वापः स्वप्नः । बहूननर्थान्बिभर्त्ति पुष्णातीति तथा ॥५४॥ अहंकारो लक्षणो देहादिसंनिकर्ष एव संसारालंबनमित्यन्वयव्य
तिरेकाभ्यां दर्शयति । शोकेति । सुषुप्त्यादौ तेषामदर्शनात् अहं सुखीतिवत्स्वैतन्यं सुखीति प्रतीत्यभावाच्च दृश्यत्वाच्च सुखादीनामन्यत्वात् दिवदृष्टधर्मत्वानुप
पत्तेरितिभावः ॥५५॥ ननु यद्यहंकारस्य संसारस्तर्हि किं तत्किरोपितस्यैव विमुक्तावहंकारावशेषः प्रसज्जेत तत्राह । देहेति । देहादिष्वपि निर्मोनोऽयं स्पष्ट । आत्मै
व तेषामंतर्हितो जीवः । अत एव गुणकर्ममयी मूर्त्तिर्यस्य सः । एवंच सूक्ष्मोपाधिनिर्बद्ध एव सूत्रादिशब्दैर्गीतः संसारे परमेश्वराधीनः सन्ततः आधावति
अतो नायं दोष इति भावः ॥५६॥ तदेवमहंकारकृतं बंधमुपपाद्येदानीं ज्ञानेन तन्निवृत्तौ मुक्तिरित्याह । अमूलमिति वस्तुतो मूलशून्यं अज्ञानतस्त्वेकं बहुरूपी

अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्त्तते । ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥५३॥ यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत् । स
एव प्रतिबुद्धस्य न वै मोहाय कल्पते ॥५४॥ शोकहर्षभयक्रोधलोभमोहस्पृहादयः । अहंकारस्य दृश्यंते जन्म मृत्युश्च नात्मनः ॥५५॥
देहेंद्रियप्राणमनोऽभिमानो जीवोंऽतरात्मा गुणकर्ममूर्त्तिः । सूत्रं महानित्युरुधेव गीतः संसार आधावति कालतंत्रः ॥५६॥ अमूलमेत
द्बहुरूपरूपं मनोवचःप्राणशरीरकर्म । ज्ञानासिनोपासनया शितेन छित्वा मुनिर्गां विचरत्यतृष्णः ॥५७॥ ज्ञानं विवेको निगमस्तप
श्च प्रत्यक्षमैतिह्यमथानुमानं । आद्यंतयोरस्य यदेव केवलं कालश्च हेतुश्च तदेव मध्ये ॥५८॥ ॥

[illegible]पेः रूपितं प्रकाशि[illegible]तं ऐंद्रजालिकवत्स्पष्टमिति वा । किं तत्तदाह । मनआदीनां वंधः । यद्वा मनआदिषु क्रियत इति कर्म अहंकरणं गुरूपासनया निशिते
न ज्ञानखड्गेन छित्वा ॥५७॥ तदेव ज्ञानं स्वरूपसाधनफलैर्निरूपयति । ज्ञानमिति । विवेकोऽज्ञानं । साधनान्याह । निगमो वेदः । तपः स्वधर्मः । प्रत्यक्षं स्वानुभ
[illegible]रिति[illegible]पदेशः । अनुमानं तर्कः । फलमाह । आद्यंतयोर्यदस्य जगतः मध्येऽपि तदेव केवलं न तु जगदिति । किं तत्कालः कलयति प्रकाशयतीति यस्तथा
हेतुः कारणं [illegible] एतदुक्तं भवति । यदस्य विश्वस्य कारणं प्रकाशकं च ब्रह्म तदात्मकमेवैतत् । न ततः पृथगस्त्येवं निश्चयफलो निगमादिसा
धनैर्यदि[illegible]विवेकरूप[illegible] ज्ञानं स्यात् ॥५८॥ ॥

राम १३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[...]नानात्वेन व्यवहारालंबनस्यापि विश्वस्य कारणमात्रात्मकत्वं सदृष्टांतमाह यथेति सुकृतं सुष्ठु कुंडलादिरूपेण विरचितं यद्धिरण्यं कटकांगदादि
[...]रण्मयस्य कुंडलादेः उत्पत्तेः पुरस्तात् नाशाच्च पश्चाद्यदस्ति कटककुंडलमित्यादिना नामव्यपदेशैर्व्यवहारं प्राप्यमाणमपि तदेव यथा तद्वदस्य विश्व-
स्य कारणं [...]तोऽहमेव नानाव्यवहारालंबनं न वस्तुतः पृथग्विश्वमिति ॥ १९ ॥ एतदेवं कार्यस्य कारणमात्रात्मकतामुक्त्वा प्रपंचस्य प्रकाशकात्मता-
माह विज्ञानमिति त्रियवस्थं त्र्यवस्थं पृथक्कथावः छंदोनुरोधेन जाग्रदादित्र्यवस्थं यद्विज्ञानं मनः तद्वस्तु कारणभूतं च यद्गुणत्रयं यच्च कारण
कार्यकर्तृ कारणमध्यात्मं कार्यमधिभूतं कर्तृ अधिदैवं एवं गुणत्रयकार्यभूतं त्रिविधं जगदेतत् येन तुर्येण सामान्यज्ञानमात्रेण समन्वयेनानुगतं

यथा हिरण्यं स्वकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य ॥ तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत् ॥ १९ ॥ विज्ञानमेतत्त्रि-
यवस्थमंग गुणत्रयं कारणकार्यकर्तृ ॥ समन्वयेन व्यतिरेकतश्च येनैव तुर्येण तदेव सत्यं ॥ २० ॥ न यत्पुरस्तादुत यन्न पश्चान्मध्ये
च तन्न व्यपदेशमात्रं ॥ भूतं प्रसिद्धं च परेण यद्यत्तदेव तत्स्यादिति मे मनीषा ॥ २१ ॥

१अ॥१४॥

प्रकाश[...]त इत्यर्थः । तमेव भांतमनुभाति सर्वं तस्य भासा सर्व-
मिदं विभातीति तथा चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुरित्यादिश्रुतेः ॥ ननु विशेषविज्ञानव्यतिरेकेण न तुर्यं नामोपलभामहे तत्राह ॥ व्यतिरेकत-
श्च समाध्यादौ यदस्ति तदेव सत्यमिति ॥ २० ॥ एवं कालत्रयेप्यव्यभिचारिणः सत्यत्वमुक्तं ॥ व्यभिचारिणस्त्वसत्यतामाह ॥ न यदिति ॥ मध्ये च तत् तथैव भाति
किं तु व्यपदेशमात्रं ॥ कुतः यद्यत्परेण अन्येन भूतं जातं प्रसिद्धं प्रकाशितं च तत्तदेव कारणप्रकाशात्मकवस्तुमात्रं स्यान्न पृथगिति मे मनीषा बुद्धिः ॥ वाचारंभणं
विकारो नामधेयं मृत्तिकेत्येव सत्यं सर्वं खल्विदं ब्रह्मेत्यादिश्रुतेः कारणप्रकाशकव्यतिरेकेण च कार्यस्य प्रपंचस्य चानुपलंभनादिति भावः ॥ २१ ॥
एवं सामान्यतः कार्यप्रपंचयोः कारणप्रकाशकाभ्यामनन्यत्वमुक्त्वा प्रस्तुते तत्त्वत्रयविवेकपूर्वकं प्रपंचस्य ब्रह्मात्मतामाह ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit Univeisity Ramtek Collection

भा०ए०

अविद्यमानइति। योयंवैकारिकः विकारसमूहः सएषप्रागविद्यमानोराजसस्सर्गः रजोद्वारेणब्रह्मकार्यभूतइत्यर्थः। अवभासतेपिब्रह्मप्रकाशस्येत्यर्थः।
अतः तद्ब्रह्मस्वयंत्वतः सिद्धंनतुकार्यमित्यर्थः ज्योतिश्चप्रकाशकमित्यर्थः। अतःकारणादिंद्रियाणिचार्थाश्चतन्मात्राणिचात्मामनश्चदेवानामेषूपलक्षणं। विका
रः पंचभूतानिएवंविचित्रंब्रह्मैवनाति २२ उपसंहरति एवमितिगमतपःब्रह्मैवेतिहासानुमानैः स्फुटंयथाभवतितथाब्रह्मविवेकहेतुभिः तथापरस्यदेहादेर
पवादेनात्मत्वनिरासेनच। कीदृशेनविशारदेननिपुणेनगुरुणानिमितभूतेनेतिवाध्यात्मविषयंसंदेहंछित्वास्वानंदतुष्टः सन्नखिलेभ्यः कामुकेभ्यः
इंद्रियादिभ्यउपारमेतनिःसंगोभवेत २३ परापवादंप्रपंचयति वपुरात्मानभवतिपार्थिवत्वातघटवत्तथाइंद्रियाणितदधिष्ठातारोदेवाः असुः
प्राणः धिषणाबुद्धिः सत्वंचित्तंअहंकृतिरित्येते। आत्मानभवंति कुतः अन्नमानंअन्नोपष्टंभत्वातशरीरवत्। वायुजलंचहुताशस्तेजः खंक्षितिर

अविद्यमानोप्यवभासतेयोवैकारिकोराजससर्गएषः। ब्रह्मस्वयंज्योतिरतोविभातिब्रह्मेंद्रियार्थात्मविकारचित्रं २२ एवंस्फुटंब्रह्म
विवेकहेतुभिः परापवादेनविशारदेन छित्वात्मसंदेहमुपारमेतस्वानंदतुष्टोखिलकामुकेभ्यः २३ नात्मावपुःपार्थिवमिंद्रियाणिदेवा
ह्यसुर्वायुर्जलंहुताशः मनोन्नमात्रंधिषणाचसत्वमहंकृतिःखंक्षितिरर्थसाम्यं २४ समाहितैःकःकरणैर्गुणात्मभिर्गुणोभवेन्मत्सुविवि
क्तधाम्नः। विक्षिप्यमाणैरुतकिंनुदूषणंघनैरुपेतैर्विगतैरवेःकिं २५ यथानभोवाय्वनलांबुभूगुणैर्गतागतैर्वर्तुगुणैर्नसज्जते। त
थाहरंसत्वरजस्तमोमलैरहंमतेःसंसृतिहेतुभिःपरः २६

तिपंचभूतानिअर्थाःशब्दादयःसाम्यंप्रकृतिश्च। नात्माजडत्वातघटवदिति यद्वाहिराद्ये
[illegible]नांतराणिसूचितानितद्यथाइंद्रियाण्यात्मानभवंति करणत्वात्मनोवत् प्राणश्चवायुत्वाद्बाह्यवायुवदित्यादि २४। एवंविवेकज्ञानेवृत्तेमुक्तस्यनेंद्रियादि
[illegible]गुणदोषसंबंधइत्याह समाहितैरिति। मत्सुविविक्तधाम्नः ममसुष्ठुविविक्तंधामस्वरूपंयेनतस्य २५ प्रकाशकस्यप्रकाश्यगुणदोषानभवंतीतितत्रखि
दृष्टांतेनो[illegible]असंगत्वमात्मनोवस्थितस्यनकेपिगुणदोषाइत्याकाशादिदृष्टांतेनाह यथेति। वाय्वादीनांशोषणदहनक्लेदनरजोधूसरत्वादिनिर्गतागतैराग
मापायिभिःऋतुगुणैःशीतोष्णादिभिर्वा अहंमतेः हेत्वहंकारात्परस्तद्वत्संसृतिहेतुभिर्नदुष्यते। यद्वाअहंकारस्यसंसृतिहेतुभिर्गुणैरिति २६ ॥ ॥

राम
१३१

स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुमु..द्स्य कृतानी ग्रथे ष्टं प्राचरेदित्याह द्वाभ्यां। तथापीति गुणेषु विषयेषु रजः रागः मनसः कषायः इति तन्निरासं तमाह २७ एतदेव दृष्टांतेनोप
पा..दिय..ति। नृणामामयो रोगः असम्यक् कृयथा न वर्तितथास्व पक्क कषाय कर्म अपक्वदग्धाः कषाया रागादयः तन्मूलानि च कर्माणि यस्मिन्तत
त..वसर्वसंगं सर्वेष्वपुत्रादिषु सज्जमानं मनः कुयोगिनमसम्यक् ज्ञानिनं विध्यति विध्यति ताडयति २८ ननु कथं तर्हि क्षिप्रियं संगे यदि योगतंत्रः सा
हलं तर्हि सा पायेन योगमार्गेण तत्राह कुयोगिन इति मनुष्यभूतैर्बंधुशिष्यादिरूपैः रूपसृष्टैः प्रेरितैः तथा च श्रुतिः यस्मादेषां न प्रियं यदे स्त्रिदशै
तन्मनुष्या विद्युरिति द्वयोजन्मांतरेन तु कर्मतंत्रं कर्मविस्तारं २९ ननु विदुषामपि सर्वथा कर्मणः परिहर्तुमिति पुनः संसारः स्यात् अत आह

तथापि संगः परिवर्जनीयो गुणेषु मायारचितेषु तावत्। मद्भक्तियोगेन दृढेन यावद्रजो निरस्येत मनःकषायः २७ यथामयोऽसाधुचि
कित्सितो नृणां पुनः पुनः संतुदति प्ररोहन्। एवं मनोऽपक्ककषायकर्म कुयोगिनं विध्यति सर्वसंगं २८ कुयोगिनो ये विहिता
न्तरायैर्मनुष्यभूतैस्त्रिदशोपसृष्टैः। ते प्राक्तनाभ्यासबलेन भूयो युंजंति योगं न तु कर्मतंत्रं २९ करोति कर्म क्रियते च जंतुः केना
प्यसौ चोदित आनिपातात्। न तत्र विद्वान्प्रकृतौ स्थितोऽपि निवृत्ततृष्णः स्वसुखानुभूत्या ३० तिष्ठंतमासीनमुत व्रजंतं शयानमु
क्षंतमदंतमन्नं। स्वभावमन्यत्किमपीहमानमात्मानमात्मस्थमतिर्न वेद ३१ ॥ ॥

करोतीति। विद्वानसौ जंतुर्देह एव भोजनादि कर्म करोति विक्रियते च तेन कर्मणा तुष्टात्यपि प्राप्नोतीत्यर्थः केनापि संस्कारादिना चोदितः सन् आनिपा
तान्मरणपर्यंतं करोति विद्वांस्तु प्रकृतौ देहे स्थितोऽपि तत्र कर्मणा न विक्रियते निरहंकारित्वात् हर्षविषादादिभिः संसारं न प्राप्नोति ३० किंच आत्मानं तावद्दे
हिक..मनिर्विकारं शंकायतोऽपि देहमप्यसौ न पश्यतीत्याह। तिष्ठंतमिति। उक्षंतं मूत्रयंतं स्वभावमेवाभासमन्यदपि दर्शनस्पर्शनादि ईहमानं कुर्वंतं आत्मा
नं देहं ३१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
३२

नन्विंद्रियवतःसर्वथाकथमद्वर्तिनंसंभवतितत्राह।यदिस्मेति।यद्यपिस्वसत्तांबहिर्मुखतयामिंद्रियाणामर्थंप्रपश्यतितथापिनानात्वान्मिथ्यास्वप्नवदित्यनु
मानेनविरुद्धंबाधितंसदन्यदात्मनोऽतिरिक्तंमनीषीवस्तुतयानमन्यतेस्वाप्नमुत्थायपुरुषःसंस्कारमात्रेणस्वाप्नविषयंस्फुरंतं।अतएवस्वयमेवतिरोभवंतं
यथातद्वत्।३२।तदेवमात्मानविक्रियतइत्युक्तंतन्वेतदनुपपन्नंबद्धावस्थायामस्पष्टमात्मनोमुक्तावस्थयाचगृह्यमाणत्वात्नहिव्रीहयोऽवघातेनव्रीहिभाव
त्यागःतस्तंडुलीभावेनगृह्यमाणानविक्रियंतेतत्राह।पूर्वमिति।बुधावस्थायांगुणैःकर्मभिश्चचित्रमज्ञानकार्यंदेहेंद्रियादिलक्षणं।आत्मन्यध्यासेनाविवि
क्तंगृहीतमासीत्तदेवपुनरीक्षणेनविनिवर्तते।आत्मातुनकेनापिरूपेणगृह्यतेनापिसृज्यते।अयंभावः।मुक्तेःक्रियाफलत्वेतावदात्मनोविकारस्तस्यास्त्वा
रोपितज्ञानमात्रनिवृत्तिरूपत्वान्नात्मसंस्पर्शित्वंबंधमोक्षयोःअतोनाविकारइति।३३।तदेवदृष्टांतेनस्पष्टयति।यथेति।नतुपूर्वमिवसतद्घटादिषु

यदिस्मपश्यत्यसदिंद्रियार्थंनानानुमानेनविरुद्धमन्यत्॥नमन्यतेवस्तुतयामनीषीस्वाप्नंयथोत्थायतिरोदधानं॥३२॥पूर्वंगृहीतंगुण
कर्मचित्रमज्ञानमात्मन्यविविक्तमंग॥निवर्ततेतत्पुनरीक्षयैवनगृह्यतेनापिविसृज्यआत्मा॥३३॥यथाहिभानोरुदयोनृचक्षुषांतमो
निहन्यान्नतुसद्विधत्ते॥एवंसमीक्षानिपुणासतीमेहन्यात्तमिस्रंपुरुषस्यबुद्धेः॥३४॥एषस्वयंज्योतिरजोऽप्रमेयोमहानुभूतिःसकलानु
भूतिः॥एकोऽद्वितीयोवचसांविरामेयेनेषितावागसवश्चरंति॥३५॥

नविधत्तेकरोतितमिस्रंसमीक्षाआत्मविद्या।३४।आत्मनोनिर्विकारत्वंप्रपंचयति।ए
षइत्यनेनापरोक्षतयानित्यप्राप्तस्यात्मनःप्राप्तिंवारयति।स्वयंज्योतिरित्यनेनाज्ञानमलापाकरणलक्षणांविकृतिंवारयति।अजइत्युत्पत्तिंवारयति।अप्रमेय
इतिज्ञानलक्षणांक्रियाधानेनसंस्कारं।महानुभूतिरितिदेशकालपरिच्छेदाभावेनाखिलदृष्टिपरिणामापत्त्ययनाशान्।स्वयंज्योतिरित्यादौहेतुःसकलानु
भूतिरित्येकोऽद्वितीयइतिविकारस्यहेतोरन्यस्याभावान्नकोऽपिविकारइतिदर्शयति।ननुश्रुतिविषयस्यकथंस्वयंज्योतिष्ट्वादिकंतत्राह।वचसांविरामेऽगोच
रत्वेननिःशेषोऽशेषमतां।तथाचश्रुतिः।यतोवाचोनिवर्तंतेअप्राप्यमनसासहेति।तत्रहेतुः।येनेषिताःप्रेषिताः।तथाचश्रुतिः।केनेषितंपततिप्रेषितंमनःके १३२
नप्राणःप्रथमःप्रैतियुक्तःकेनेषितांवाचमिमांवदंतिचक्षुःश्रोत्रंकउदेवोयुनक्तिश्रोत्रस्यश्रोत्रंमनसोमनोयद्वाचोहवाचंसउप्राणस्यप्राणश्चक्षुषश्चक्षुरिति।३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वितीयत्वमुपपादयितुं भेदस्यावास्तवत्वमाह। एतावानिति। केवलेऽत्मनि भेदात्मन्य आत्मनि विकल्प इति यदेतावानेव सर्वोऽप्यात्मनो मनसः मोहः भ्रमः यतः
स्व[illegible]मात्मानमृते विनाऽयस्य विकल्पस्यावलंबः आश्रयो नास्ति रज्जुत्वमस्येव शुक्तिं विना। न देहनानास्ति किंचन इंद्रो मायाभिः पुरुरूप ईयते इत्युक्ताहास्य
[illegible]यः श्रुत्यादेशाद्यादिश्रुतेरित्यर्थः। ३५। केचित्तु पुनः प्रपञ्चादिसत्यत्वेन प्रपञ्चस्याबाधायोगात्। वेदार्थानिश्चयकत्वं यत्किंच प्रतिपादनपरत्वेनार्थवादत्वा
[illegible]तं सत्यमिति मन्यंते तन्मतमनूद्य दूषयति। यदिति। नामाकृतिभिः नामरूपोपलक्षितं पंचवर्णात्मकं द्वयं द्वैतं यदेतदबाधितमिति पंडितमानि
नां भ्रमश्च वयमेव पंडिता इत्यभिमानवतां वेदांतेषु यं अर्थवाद इति प्रतीतिः। नतत्वविदां। यतः व्यर्थेनापि विनाप्यर्थेन सा प्रतीतिः। तथाहि। न तावद्विवेक

स्प

एतावानात्मसंमोहो यद्विकल्पस्तु केवले। आत्मन्नृते स्वमात्मानमवलंबो न यस्य हि ॥३६॥ यन्नामाकृतिभिर्ग्राह्यं पंचवर्णमबाधि
तं। व्यर्थेनाप्यर्थवादोऽयं द्वयं पंडितमानिनां ॥३७॥ योगिनोऽपक्वयोगस्य युंजतः काय उत्थितैः॥ उपसर्गैर्विहन्येत तत्रायं विहितो
विधिः ॥३८॥ योगधारणया कांश्चिदासनैर्धारणान्वितैः। तपोमंत्रौषधैः कांश्चिदुपसर्गान्विनिर्दहेत् ॥३९॥ कांश्चिन्ममानुध्याने
न नामसंकीर्तनादिभिः। योगेश्वरानुवृत्त्या वा हन्यादशुभदाञ्छनैः ॥४०॥ ॥

वाक्यत्वं तेषामस्तीत्यतोऽर्थवादत्वं स्यान्न चाकर्त्तृनोक्तपरमानंदात्मप्रति
पादनं कर्मविधिशेषतां भजते वा चान्यथाबाधितत्वं द्वैतस्य नामरूपात्मकत्वात् ग्राह्यत्वात् पंचवृत्त्यात्मकत्वादिसाधनानुमानैर्वाचारंभणमित्यादिश्रुतिभिश्च त्सप्रव
बाधितत्वादिति ॥३७॥ तदेवं ज्ञानयोगं सपरिकरं निरूप्य इदानीं तन्निष्ठस्य विघ्नप्रतीकारमाह। योगिन इति त्रिभिः॥ योगं युंजतः कायो यद्युत्थितैरुत्पन्नैरुप
सर्गैः। रोगाद्युपद्रवैः प्रतिहन्येत विधिः प्रतीकारः ॥३८॥ योगधारणया सोमसूर्यादिधारणया संतापशीतादीन् आसनैर्वायुधारणान्वितैः वातादिरो
गान्। तपोमंत्रौषधैः पापग्रहसर्पादिकृतान् ॥३९॥ ममानुध्यानादिभिः कामादीन् योगेश्वरानुवृत्त्या दंभमानादीन् हन्यात् ॥४०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
१३३

अन्ये तु देहसिध्यर्थमित्येतन्न वक्तव्यमिति तद् दूषयति केचित्तु नरैस्तैरन्यैरुपायैर्देहमेव सुकल्पं जरारोगादिरहितं वयसि नास्थिरं स्थिरं च कृत्वा परकायप्रवेश
शादिसिद्धये कारणरूपं योगं युंजंति न तु ज्ञाननिष्ठारूपं ४१ कुशलैः प्राज्ञैरादरणीयं न न वृत्ति वनस्पतिवदात्मैव स्थायी शरीरं तु फलवन्नश्वरमित्यर्थः ४२
न तु कथंचिन्माध्यगत्वेनापि प्राणायामादियोगक्रियमाणा जरारोगाद्यनापोहस्य पते सत्यं तथापि समाधि सुकल्प्य न तत्र सज्जेतेत्याह योगमिति तद्वत् तां दे
हसिद्धिं श्रद्दधानत्वेन विश्वसेत् तदैवं विघ्नप्रतिकारैर्योगं कुर्यादित्युक्तं ४४ मत्स्मरणस्य न विघ्नशंकापीत्याह योगचर्यामिति विचरन्नप्यसुखेच्छुरनुद्यतः सु
तु तिर्यक्स्वस्स्पृहामूला हि विघ्नाः सा च मदपाश्रयस्य निवर्तते अतोंतरायैरविहतः स्वानंदं पुरुषो निवर्तते इति ४३ समाहृत्य स्वयोगं तु समस्तोपनिष

केचिद्देहमिमं धीराः सुकल्पं वयसि स्थिरं । विधाय विविधोपायैरथ युंजंति सिद्धये । न हि तत्कुशलादृत्यं तदायासो ह्यपार्थकः । अंतव
त्वाच्छरीरस्य फलस्येव वनस्पतेः ॥ ४२ ॥ योगं निषेवतो नित्यं कायश्चेत्कल्पतामियात् । तच्छ्रद्दध्यान्न मतिमान् योगमुत्सृज्य मत्परः ॥ ४३ ॥
योगचर्यामिमां योगी विचरन्मदपाश्रयः । नांतरायैर्विहन्येत निःस्पृहः स्वसुखानुभूः ॥ ४४ ॥ इति श्रीभागवते महापुराणे एकादशस्कं
धेऽष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ उद्धव उवाच ॥ सुदुष्करामिमां मन्ये योगचर्यामनात्मनः । यथांजसा पुमान् सिध्येत्तन्मे ब्रूह्यंजसाऽच्युत
प्रायशः पुंडरीकाक्ष युंजंतो योगिनो मनः । विषीदंत्यसमाधानान्मनोनिग्रहकर्शिताः ॥ २ ॥ ॥

द्रसं ॥ सत्संगे सुखमत मां च किंमु को पुनस्त्यादिशात्
इत्येकादशे टीकायामष्टाविंशतितमोऽध्यायः ॥ २८ ॥ ॥ ऊनत्रिंशे तु यः पूर्वं विस्तरेण निरूपितः । भक्तियोगस्तमेवाह स्वल्पकाय समासतः ॥ अतिक्लेशामि
नाऽलक्ष्य योगः संगैकसंपत्ति सुखोपायं पुनः कल्पमुद्धवः परिपृच्छति २ अनात्मनः अवशीकृतमनसः अंजसा प्रयासतो यथा सिध्येत्तथा अंजसा सुगमो बो
ध्य यथा तथा ब्रूहि ॥ १ ॥ दुष्करतां प्रपंचयति मनो युंजंतो निगृह्णंतः विषीदंति क्लिश्यंति कुतः असमाधानादनिग्रहात्कथंचिन्मनसो निग्रहेऽपि
कर्शिताः श्रांताः संतः ॥ २ ॥ ॥ १३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मादेवं केचन विषीदंति । अथातस्मृत एवं हंसाः सारासारविवेकचतुरास्तेप्यानंदपरिपूरकं तव पदांबुजमेव सुखं यया न वर्तितयानुनिश्रितं अश्रयेरन्नुसे
वंते । अमीत्वन्मायया विहताः । के योग (योग) कर्मनिर्मानिनः संतो नाश्रयंते ये चान्ये मीत्वद्भक्ताः । त्वन्मायया न विहताः । अत एव योगकर्मनिःकृत्वामानिनो
न नवंते । अन्ये तु त्वन्मायया मोहिताः संतो वयं योगज्ञा वयं कर्मकुशला इति केवलं गर्विता न नवंति न च मुच्यंत इत्यर्थः ३ त्वद्भक्तास्तु त्वत्प्रसादेन कृतार्था निवंती
तिष्ठतीति चित्रमित्याह । किमिति । अनन्यशरणेषु दासेषु तत्वात्मसात्त्वं तदधीनत्वं । यद्यपानंदगोपीबलिप्रभृतिषु एतत्किं चित्रं नाश्चर्यमित्यर्थः । यतो यो नवा
वधीरणमकुटे [illegible] वानरैः सहसा कंसादिदैत्यसमरमंडलिनी यावत् अरोचयत् अभ्याहृतवान् कथंभूतः ईश्वराणां ब्रह्मादीनां या निश्रीमंति किरीटानि तेषां
तटामणयस्तैः पीडितं विलुलितं पादपीठं यस्य स त्वयं तया भूतोपि सन् ४ अतस्त्वां परित्यज्य को नामान्यं संश्रयेदित्याह । तं त्वेति ॥ तमेवंभूतं त्वां को नु विसृ

अथातस्त्वानंददुघं पदांबुजं हंसाः श्रयेरन्नरविंदलोचन । सुखं नु विश्वेश्वर योगकर्मभिस्त्वन्माययामी विहता न मानिनः ३ किं चित्रमच्यु
तत्तवैतदशेषबंधो दासेष्वनन्यशरणेषु यदात्मसात्त्वं । योऽरोचयत्सह मृगैः स्वयमीश्वराणां श्रीमत्किरीटतटपीडितपादपीठः ४ तं त्वाखिल
लात्मदयितेश्वरमाश्रितानां सर्वार्थदं स्वकृतविद्विसृजेत को नु । को वा भजेत्किमपि विस्मृतयेनु भूत्यै किं वा भवेन्न तव पादरजोजुषां नः ५

जेत्तन भजेत । कथंभूतः स्वकृतवित् बलिप्रह्लादादिषु त्वया कृतं अस्त्रयहं जानन् । यद्वा स्वस्मिन्नेवांतर्यामितया कृतमुपकारं विज्ञांस्तदेवाह अखिलात्मदयिते
श्वरमखिलस्य जगतः आत्मानं चेतयितारं आत्मत्वादेव दयितं प्रेष्ठं सुसेव्यं ईश्वरत्वाद्वरपन्नजनीयं किंतु आश्रितानां सर्वार्थदं । तर्हि किं फलोद्देशेनाहं सेव
ः । न हि नहि किमपि अनिरुक्तं व्यतिरिक्तं स्वर्गादि त्वया दत्तमपि को वा न भजे सेवेत कथंभूतं तत् यत्केवलं भूत्यै इंद्रियभोगाय । अनु त्वनंतरमेव भुवि विस्मृ
तये न वति । यद्वा व्यतिरिक्तं स्वर्गादि त्वया दत्तमपि को वा न भजे सेवेत किमपि देवतांतरं धर्मज्ञानादि साधनं वा भूत्यै ऐश्वर्याय संसारस्य विस्मृतये मोक्षाय
वा को न भजेत् कोपि । ननु तत्साधनं विना भोगमोक्षादिफलं कथं स्यात्तत्राह । किं वेति । यदुक्तं । यावै साधनसंपत्तिः पुरुषार्थचतुष्टये । तया विना तदाप्नोति न
रो नारायणमाश्रय इति ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भागा०

आस्तामन्यज्जनवान्ताविष्कृतोपकारस्तत्त्वयात्मनिवेदनेनैव निष्कृतिर्भविष्यत्याह। नैवेति। अपचितिं प्रत्युपकारं आनृण्यमिति यावत्। कवयो ब्रह्मविदो
पि नैव प्राप्नुवंति। यतस्त्वत्कृतमुपकारं स्मरंतः ऋद्धमुदः उपचितपरमानंदाः। उपकारमेवाह। यो भवानन्तर्बहिराचार्यवपुषा गुरुरूपेण अंतश्चैत्यव
पुषा अंतर्यामिरूपेण अशुभं विषयवासनां विधुन्वन्निरस्यन् स्वगतिं निजं रूपं प्रकटयति तिम तव। ६। ईश्वरस्ते हेतुः। जगत्क्रीडनकं क्रीडोपक
रणं यस्य सः ननु जगत्सृष्ट्यादिना ब्रह्मैव मद्यः क्रीडतीत्याह। ब्रह्मादिभिः सत्वादिभिः गृहीतं स्वीकृतं येन सः सप्रेममप्रेमस्मितं मनोहरं स्मितं
यस्य सः सप्रेमया तथा जगादेति वा। ७। हंतेति। मे हर्षमं। बोधनं सुमंगलान् सुखरूपान् मृत्युं संसारं दुर्जयं स्वनैरुपायैः। ८। धर्मानेवाह॥

नैवोपयंत्यपचितिं कवयस्तवेश ब्रह्मायुषापि कृतमृद्धमुदः स्मरंतः। योंतर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं
व्यनक्ति ॥६॥ श्रीशुक उवाच। इत्युद्धवेनात्यनुरक्तचेतसा पृष्टो जगत्क्रीडनकः स्वशक्तिभिः। गृहीतमूर्तित्रय ईश्वरेश्वरो जगाद सप्रेममनो
हरस्मितः ॥७॥ श्रीभगवानुवाच। हंत ते वर्णयिष्यामि मम धर्मान् सुमंगलान्। यान्श्रद्धयाचरन्मर्त्यो मृत्युं जयति दुर्जयं ॥८॥ कुर्यात्सर्वाणि
कर्माणि मदर्थं शनकैः स्मरन्। मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरतिः ॥९॥ देशान्पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान्। देवासुर
मनुष्येषु मद्भक्ताचरितानि च ॥१०॥ पृथक्सत्रेण वा मह्यं पर्वयात्रामहोत्सवान्। कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः ॥११॥ मामेव सर्व
भूतेषु बहिरंतरपावृतं। ईक्षेतात्मनि चात्मानं यथा खममलाशयः ॥१२॥ इति सर्वाणि भूतानि मद्भावेन महाद्युते। सभाजयन्मन्यमानो ज्ञा
नं केवलमाश्रितः ॥१३॥

कुर्यादिति त्रयोदशभिः। मां स्मरन् ध्यानैः असंरंभतः। कथयितुमाह। मयीति। अर्पिते मनश्चित्ते संकल्पविकल्पानुसंधानात्मके
येन सः तथा। मद्धर्मेष्वेवात्मनो मनसो रतिर्यस्य सः। ९। पुण्यदेशानेवाह। मद्भक्तैरिति। देवादिषु ये मद्भक्तास्तेषां चरितानि कर्माणि चाश्रयेत। १०। सत्रेण संभूय
वा। ११। अंतरंगानं किमाह। मामिति त्रिभिः। सर्वभूतेषु आत्मनि चात्मानमीश्वरं स्थितं मामेवेक्षेत ननु कथमेकस्य सर्वेषु वृत्तिरित्यत आह। बहिरंतः पूर्णमि
त्यर्थः। तत्कुतः अपावृतमनावरणं तदपि कुतः। यथा खं असंगत्वादित्यर्थः। १२। हे महाद्युते अतिप्राज्ञ इत्थमनेन प्रकारेण केवलं ज्ञानरूपां दृष्टिमाश्रितः
सन् सर्वाणि भूतानि मद्भावेन मन्यमानः सभाजयन् पूजयेत् इतो मतः उत्तरेणान्वयः। १३॥

राम
१३४

ननूत्तमाधममध्यमेष्वेकरूपेण सन्माननमपांडित्यमेव स्यात् पूज्यपूजाव्यतिक्रमादित्याशंक्य तामेव ज्ञानदृष्टिं प्रपंचयति । ब्राह्मण इति । विषमेष्वपि समदृ
क् समं ब्रह्मैव पश्यन् वैषम्यमेव चतुर्धा दर्शयति । ब्राह्मणपुक्कसयोर्जातितो वैषम्यं । पुक्कसोऽन्त्यजजातिविशेषः । स्तेने ब्रह्मस्वहारिणि । ब्रह्मण्ये ब्राह्मणे
स्योगतरीति कर्मतः । अर्के विस्फुलिंगे इति गुणतः । अक्रूरे शांते क्रूरे चेति स्वभावतः ।१४। नरेष्वीश्वरदृष्टिं कुर्वतः सद्यःफलविशेषमाह । नरेष्विति समोत्तममही
नेषु [illegible]दयः स्पर्धा[illegible]न्नहंकार[illegible]सहिता हि निश्चितं विशीर्यंते नश्यंति ।१५। अतोऽभ्यंतर्यामीश्वरदृष्ट्या सर्वान् भूतादीन् प्रणमेदित्याह । विसृज्येति । स्मयमानान्
हसतः स्वान् सखींस्तथा दैहिकीं दृशं अहमुत्तमः स त्वनीच इति दृष्टिं तयाह[illegible]स्यां व्रीडा लज्जा तां च विसृज्य आश्वचांडालादीनभिमाप्य दंडवत्प्रणमे
यो

ब्राह्मणे पुक्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिंगके । अक्रूरे क्रूरके चैव समदृक् पंडितो मतः ।१४। नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतो
ऽचिरात् । स्पर्धासूयातिरस्काराः साहंकारा वियंति हि ।१५। विसृज्य स्मयमानान् स्वान् दृशं व्रीडां च दैहिकीं । प्रणमेद्दंडवद्भूमावाश्व
चांडालगोखरं ।१६। यावत्सर्वेषु भूतेषु मद्भावो नोपजायते । तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः ।१७। सर्वं ब्रह्मात्मकं तस्य
विद्ययात्ममनीषया । परिपश्यन्नुपरमेत्सर्वतो मुक्तसंशयः ।१८। अयं हि सर्वकल्पानां सध्रीचीनो मतो मम । मद्भावः सर्वभूतेषु
मनोवाक्कायवृत्तिभिः ।१९। न ह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि । मया व्यवसितः सम्यक् निर्गुणत्वादनाशिषः ।२०। ॥

मित्त प्रणामं कुर्यात् ।१६। एवं पंचभिः श्लोकैरुक्तायाः समदृष्टेरवधिमाह[illegible]कामां यावदिति ।१७। तस्यैवं कुर्वतः पुंसः सर्वं ब्रह्मात्मकमेव भवति । कुतः । आ
त्ममनीषया सर्वत्रेश्वरदृष्ट्या या विद्या तया । अतः परितो ब्रह्मैव पश्यन् सर्वतः क्रियाभ्यश्चोपरमेत् ।१८। किमयमेवोपायश्रेष्ठः अन्योपी[illegible]पेक्षायां संति स
बहवः समीचीनस्त्वयमेवेत्याह । अयं हीति ।१९। भगवद्धर्मस्य ज्ञानोपायस्य समीचीनत्वमेवोपपादयति किंचास्मा नहीति । अंग हे उद्धव । अनाशिषो
निष्कामस्य मम धर्मस्य उपक्रमे सति एवं ईषदपि वैगुण्यादिनिमित्तो नाशो नास्त्येव यतो मयैव निर्गुणत्वादयं धर्मः सम्यग्व्यवसितो निश्चितः न तु मन्वा
दिमुखेन कथंचित् ।२०। ॥ अ

किंच । योयइति । अयमर्थः । किंबहुकर्मकर्मस्यनध्वंसइतियतोलौकिकोपियोयोनिरर्थः । व्यर्थप्रायासः सोपिमयिपरे
निःफलायचेत्कल्प्यतेनिःकामतयार्पितश्चेत्तर्हिधर्मएवस्यात् । निरर्थयासेदृष्टांतः यथानयशोकादेहेतोःपलायनाक्रंद
ना दिकंनस्वधर्मः २१ अंतेतमेवभजनमेवबुद्धेर्विवेकस्यमनीषायाश्चातुर्यस्यचफलमित्याह । एषेति । तामेवदर्शयति । सत्यमृतंचमामांअनृतेनअसत्येनमर्त्येन
विनाशिनामनुष्यदेहेनइहअस्मिन्नेवजन्मनिप्राप्नोतीतियत्सैवबुद्धिर्मनीषाचेति । बुद्धिर्विवेकः । मनीषाचातुर्यं २२ महाप्रकरणार्थमुपसंहर

योयोमयिपरेधर्मः कल्प्यतेनिःफलायचेत् । तदायासोनिरर्थःस्याद्भयादेरिवसत्तम २१ एषाबुद्धिमतांबुद्धिर्मनीषाचमनीषिणां । य
त्सत्यमनृतेनेहमर्त्येनाप्नोतिमामृतं २२ एषतेभिहितःकृत्स्नोब्रह्मवादस्यसंग्रहः । समासव्यासविधिनादेवानामपिदुर्गमः २३ अभी
क्ष्णशस्तेगदितंज्ञानंविस्पष्टयुक्तिमत् । एतद्विज्ञायमुच्येतपुरुषोनष्टसंशयः २४ सुविविक्तंतवप्रश्नंमयैतदपिधारयेत्
सनातनंब्रह्मगुह्यंपरंब्रह्माधिगच्छति २५ यएतन्ममभक्तेषुसंप्रदद्यात्सुपुष्कलं । तस्याहंब्रह्मदायस्यददाम्यात्मानमात्मना ॥
वि २६ यएतत्समधीयीतपवित्रंपरमंशुचिः । सपूयेताहरहर्मांज्ञानदीपेनदर्शयन् २७ यएतच्छ्रद्धयानित्यमव्यग्रःशृणुयान्नरः । मयिभ
क्तिंपरांकुर्वन्कर्मभिर्नसबध्यते २८ अप्युद्धवत्वयाब्रह्मसखेसमवधारितं । अपितेविगतोमोहःशोकश्चासौमनोभवः २९ नैत
त्त्वयादांभिकायनास्तिकायशठायच । अशुश्रूषोरभक्तायदुर्विनीतायदीयतां ३०

ति । एषतइतिद्वाभ्यां । समासव्यासविधिनासंक्षेपविस्तर
प्रकारेण । २३ २४ किंच । अस्मांनवतज्ज्ञानं एतदनुसंधानुकथनपठनश्रवणपरायणस्यैतदेवफलनवत्किसाध्यंचत्वर्निः सुविविक्तमिति मयास्तु विवि
क्तं[illegible]तदास्मानमपियोधारयेदनुसंदध्यात्सब्रह्मगुह्यंवेदंपरिश्रमं । २५ सुपुष्कलंयथानवतितथा । ब्रह्मदायस्यब्रह्मददातीतितथातस्यसम्यगुपदेष्टुः । २६
समधीयीतजपेत् । पूयेतपरंसंशुद्धिं । अन्यमपिशोधकंपूयेतशुध्येति । २७ सम्यक्ज्ञानानुत्पत्तौपुनरुपदेष्टामीत्याशयेनपृच्छति अपीति । उपधारित
माकव्यमाह नैतदिति चावायवंचकाय । २९ । ३० ॥ ॥

१३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शूद्राणां योषितां च यदि तत्किं स्यात्तदाह नहि ब्रूयात् ॥ २१ ॥ एतज्ज्ञानेन च पुमान् कृतार्थो भवतीत्याह ॥ नैतदिति ॥ अत्र दृष्टान्तमाह ॥ पीत्वेति ॥ पीयूषं स्वादु ॥ २२ ॥ ननु सं
ति ब्रह्म… शोधनानि तत्र फलसाधनानि संस्पसंस्पन्नेकानां नः कस्य तत्सर्वं मह्यं मे वार्तो मदेकशरणेन वेत्याह ॥ ज्ञानेति ॥ ज्ञाने दोषा वा न्यथा… धर्मादिलक्षणे चतुर्विधो
पुरुषार्थः … इह मेदं तत्र ज्ञाने मोक्षः कर्मणि विहिते धर्मः स्वनाविकेतु कामः ॥ योगे त्वणिमादिसिद्धयः वार्तायां कृष्यादावर्थः दंडनीता वैश्वर्यमिति
सिद्धेश्वर्ययोरपि कामांतर्गतत्वाच्चातुर्विध्यं ॥ २३ ॥ कृतश्च तत्राह ॥ मर्त्य इति ॥ यदा त्यक्तसमस्तकर्मा सन्मे निवेदितात्मा भवति तदा सौ मे विचिकीर्षितः विशि

एते दोषैर्विहीनाय ब्रह्मण्याय प्रियाय च ॥ साधवे शुश्रुषवे ब्रूयान्न किंचिद्… स्यात् शूद्रयोषितां ॥ २१ ॥ नैतद्विज्ञाय जिज्ञासोर्ज्ञातव्यमवशिष्यते
पीत्वा पीयूषममृतं पातव्यं नावशिष्यते ॥ २२ ॥ ज्ञाने कर्मणि योगे च वार्तायां दंडधारणे ॥ यावानर्थो नृणां तात तावांस्तेहं चतुर्विधः ॥ २३ ॥ मर्त्यो
यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे ॥ तदामृतत्वं प्रतिपद्यमानो मयात्मभूयाय च कल्पते वै ॥ २४ ॥ श्रीशुक उवाच ॥
स एवमादर्शितयोगमार्गस्तदोत्तमश्लोकवचो निशम्य ॥ बद्धांजलिः प्रीत्युपरुद्धकंठो न किंचिदूचेश्रुपरिप्लुताक्षः ॥ २५ ॥ विष्टभ्य चि
त्तं प्रणयावघूर्णं धैर्येण राजन् बहुमन्यमानः ॥ कृतांजलिः प्राह यदुप्रवीरं शीर्ष्णा स्पृशंस्तच्चरणारविंदं ॥ २६ ॥ उद्धव उवाच ॥
विद्रावितो मोहमहांधकारो य आश्रितो मे तव सन्निधानात् ॥ विभावसोः किं नु समीपगस्य शीतं तमो भीः प्रभवंत्यजाद्य ॥ २७ ॥

ष्टः कर्तुमिष्टो भवति तत्तदा अमृतत्वं मोक्षं प्रतिपद्यमानो मयात्मभूयाय मदैक्याय मत्समानैश्वर्यायेति यावत् कल्पते योग्यो भवति वैशब्दः ॥ २४ ॥ आ
दर्शित इति योगमार्गो यस्य सः ॥ २५ ॥ प्रणयेनावघूर्णं संक्षुभितं चित्तं धैर्येण विष्टभ्य बहुमन्यमानः आत्मानं कृतार्थं मन्यमानः ॥ २६ ॥ मयायः आश्रित आसीत्स तव
संनिधानेनैव विद्रावितः प्रनष्टेति किं नु बाधाय समर्थाः … भवंति ॥ अजाद्य ब्रह्मणोपि जनक ॥ २७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच यद्यपि तवसंनिधानाद्देवैस्तथाप्यनुकंपिना त्वया विज्ञानमयः प्रदीपस्तु प्रत्यर्पितः। स्वमायया पहृत्य पुनः समर्पितः॥ अतस्तव कृतज्ञः यस्त्वया कृतमनुग्रहं जानाति सः को नाम त्वदीयं पादमूलं हित्वान्यच्छरणं समीयादाश्रयेत॥ ३८॥ किंच दाशार्हादिषु त्वया यः स्वमायया स्नेहपाशः प्रसारितः सृष्टये वात्मतत्त्वज्ञानेन शास्त्रेण वृक्णश्छिन्नः॥ ३९॥ एवं यद्यपि त्वया वृक्णः कृतं तथाप्येतावत्प्रार्थये इत्याह॥ नमोस्त्विति॥ अनुशाधि अनुशिक्षय॥ अनुशासनी

प्रत्यर्पितो मे भवतानुकंपिना भृत्याय विज्ञानमयः प्रदीपः। हित्वा कृतज्ञस्तव पादमूलं कोन्यं समीयाच्छरणं त्वदीयं॥ ३८॥ वृक्णश्च मे सुदृढः स्नेहपाशो दाशार्हवृष्ण्यंधकसात्वतेषु॥ प्रसारितः सृष्टिविवृद्धये त्वया स्वमायया ह्यात्मसुबोधहेतिना॥ ३९॥ नमोस्तु ते महायोगिन्प्रपन्नमनुशाधि मां। यथा त्वच्चरणांभोजे रतिः स्यादनपायिनी॥ ४०॥ श्रीभगवानुवाच॥ ॥ गच्छोद्धव मयादिष्टो बदर्याख्यं ममाश्रमं। तत्र मत्पादतीर्थोदे स्नानोपस्पर्शनैः शुचिः॥ ४१॥ ईक्षयालकनंदाया विधूताशेषकल्मषः। वसानो वल्कलान्यंग वन्यभुक्सुखनिःस्पृहः॥ ४२॥ तितिक्षुर्द्वंद्वमात्राणां सुशीलः संयतेंद्रियः। शांतः समाहितधिया ज्ञानविज्ञानसंयुतः॥ ४३॥ मत्तोनुशिक्षितं यत्ते विविक्तमनुभावयन्। मय्यावेशितवाक्चित्तो मद्धर्मनिरतो भव॥ अतिव्रज्य गतीस्तिस्रो मामेष्यसि ततः परं॥ ४४॥ श्रीशुक उवाच॥ ॥ स एवमुक्तो हरिमेधसोद्धवः प्रदक्षिणं तं परिसृत्य पादयोः। शिरो निधायाश्रुकलाभिरार्द्रधीर्न्यषिंचदद्वंद्वपरोप्युपक्रमे॥ ४५॥ ॥ ॥ ॥

[illegible]। यथेति। मुक्तावप्यनपायिनी॥ ४०॥ तर्हि कर्मो मिस्संगीकृत्य त्वयापि मयादिष्टो लोकसंग्रहार्थमेवातावत्कुर्वित्याह॥ गच्छेति॥ आदिष्टो नियुक्तः॥ ४१॥ [illegible] पूर्वमेव मत्पादतीर्थोदकभूताया अलकनंदायाः गंगायाः ईक्षया। वसानः परिदधानः॥ ४२॥ द्वंद्वमात्राणां शीतोष्णादिविषयाणां॥ सुशीलः आर्जववादि[illegible]॥ ४३॥ तत्त्वया विविक्तं सुविचारितं तिस्रस्त्रिगुणात्मिका गतीरतिक्रम्य॥ ४४॥ हरिमेधसा संसारं हरति मेधा यस्य तेन अश्रुकलेन अद्वंद्वपरोपि सुखदुःखद्विनिर्मुक्तोपि। उपक्रमे निर्गमसमये॥ ४५॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच। सुदुस्त्यजः स्नेहो यस्मिंस्तेन वियोगात्कातरो भीतः अत एव तं परिहातुमशक्नुवन्नातुरो विक्लवः सन् कृच्छ्रं कष्टं यथा तथा ययौ प्राप। ततश्च भर्तृपादुके तेनैव कृष्णेन दत्ते मूर्ध्नि बिभ्रद्दधन्निर्बंधरूपयात्रया ययौ तं पुनःपुनः नमस्कृत्य ययौ अयं च प्रसंगो हृष्टः इतोन्यगमनं नतु पादविश्लेषणाद्भ्रमस्त्वादि वृत्तिस्कंधोपक्रमोक्तानुसारेण भागवतोपदिष्टं तत्समो कल्प्यत तदा ज्ञातोययाविति हृष्टं ॥४६॥ विशालां बदरिकाश्रमं गतः सन् हरेर्गतिमगात। कथंभूतां तेनैव जगदेकबंधुनायथोपदिष्टां तदाभूतत्वप्रतिपद्यमानो मयात्मभूयाय च कल्पते यथा प्रतिवृजगती तिस्त्रो मामेष्यसि ततः परमित्येव हैमुक्तप्रकारो॥४७॥ आनंदसमुद्रो भगवद्भ

सुदुस्त्यजस्नेहवियोगकातरो न शक्नुवंस्तं परिहातुमातुरः॥ कृच्छ्रं ययौ मूर्ध्नि भर्तृपादुके बिभ्रन्नमस्कृत्य ययौ पुनः पुनः॥४६॥ ततस्तमंतर्हृदि संनिवेश्य गतो महाभागवतो विशालां॥ यथोपदिष्टां जगदेकबंधुना तपः समास्थाय हरेरगात् गतिं ॥४७॥ य एतदानंदसमुद्रसंभृतं ज्ञानामृतं भागवताय भाषितं॥ कृष्णेन योगेश्वरसेविताङ्घ्रिणा सच्छ्रद्धयासेव्य जगद्विमुच्यते ॥४८॥ भवभयमपहंतुं ज्ञानविज्ञानसारं निगमकृदुपजह्रे भृंगवद्वेदसारं॥ अमृतमुदधितश्चापाययद्भृत्यवर्गान्पुरुषमृषभमाद्यं कृष्णसंज्ञं नतोस्मि ॥४९॥ ॥
इति श्रीभागवते महापुराणे एकादशस्कंधे एकोनत्रिंशोऽध्यायः॥२९॥ ॥

किं मार्गस्तस्मिन् संनतमेकीकृतं। एतत्प्रयः सच्छ्रद्धयासेव्य प्रदीपिसेवितावर्त्तते स विमुच्यत इति किं वक्तव्यं तत्संगाज्जगदपि विमुच्यत इत्यर्थः॥४८॥ एवं कृतोपदेशो जगद्गुरुं प्रणमति। भवभयमिति। भवः संसारः स एव भयं जरारोगादिरूपं तं तदुत्पन्नं निहंतुं नानाशास्त्राणां भृत्यवर्गाणां यथायोग्यमपहर्तुं योमृतवयमुपजह्रे उद्धृतवान् तदेवाह। वेदसारमेकं किंतत् ज्ञानविज्ञानरूपं च तत्सारं श्रेष्ठं च। भृंगवद्भृंगो यथा पुष्पमकोपयन्नेवामृतमुपहरति तथा। स्वकृतवेदानुसारेणैव उदधितश्चेक नवीन पयथा पाययत् नृः। सर्वगनिपाययत तन्नतोस्मीति। येनानुकंपितेन विघ्नसंभवप्रश्ननिर्णयैः तं वंदे परमानंदनंदनंदनरूपिणं॥४९॥ इत्येकादशटीकायामेकोनत्रिंशोऽध्यायः॥२९॥

तल्लिखितं च भयं भवोन्मतन्निमितं च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०ए०
१३७

विरोत्र भागु पविसमेत्रालब्धयतो हरि स्वधामगंतुमन्विच्छन् संजहार निजं कुलं ॥ १ ॥ विरागाय पुराघोरमुपविसंदिमौत्रालं कथावसानेत तैव विशेषं परिशिष्ट
ति ॥ २ ॥ ततइति विनिः ब्रह्मशापोपसृष्टे कुले सति ययाचावः नगवतिनहि त्रापः प्रनवति यादवतानुकरणाच्च सोपिकयं विनाम्पः अतः किमकुरोदिति तदेत
दुक्तं कथमसृजदिति सर्वेनेत्राणामिति सर्वेंद्रियोपलक्षणं ॥ ३ ॥ तत्रुपंचयति प्रसह्य तुष्टमिति यस्मिन्नूरूपेलग्नंनयनंपराकर्षयितुमबलानचोक्तः यच्च कर्म
रंध्रएण प्रविष्टसत्तामात्मनिलग्नं लिखितमिवतिष्ठति तत्तेन नसरति ॥ ननिर्गच्छति यस्य श्रीः शोभासंकीर्त्यमाना कवीनां वाचां रातिसुष्ठाससविशेषं जनयति तेषां

राजोवाच ॥ ततोमहाभागवत उद्धवे निर्गते वनं ॥ शरखत्यां किमकरोद्भगवान् भूतभावनः ॥ १ ॥ ब्रह्मशापोपसंसृष्टे स्वकुले यादवर्षभः ॥ प्रेयसीं
दिर्ईमानाज्ञा सर्वनेत्राणां तनुं सकथमत्यजत् ॥ २ ॥ प्रत्याक्रष्टुं नयनमबला यत्र लग्नं नशेकुः कर्णाविष्टं न सरति ततो यत्सतामात्मलग्नं ॥ यच्छ्रीर्वाचां जन
यति रतिं किंनुमानं कवीनां दृष्ट्वा जिष्णोर्युधिरथगतं यच्च तत्साम्यमीयुः ॥ ३ ॥ ऋषिरुवाच ॥ दिविभुव्यंतरिक्षे च महोत्पातान् समुत्थितान् ॥ ह
ष्ट्वासीनान् सुधर्मायां कृष्णः प्राह यदूनिदं ॥ ४ ॥ एते घोरा महोत्पाता द्वार्वत्यां यमकेतवः ॥ मुहूर्तमपि नस्थेयमत्रनोयदुपुंगवाः ॥ ५ ॥ स्त्रियोबाला
श्ववृद्धाश्च शंखोद्धारं व्रजंत्वितः ॥ वयंप्रभासं यास्यामो यत्रप्रत्यक्सरस्वती ॥ ६ ॥ तत्राभिषिच्य शुचय उपोष्य सुसमाहिताः ॥ देवताः पूजयिष्याम
स्नपनालेपनार्हणैः ॥ ७ ॥ ब्राह्मणांश्च महाभागान् कृतस्वस्त्ययना वयं ॥ गोभूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः ॥ ८ ॥ ॥

सा कं लग्नमात्मस्थितां जनयतीति किं तुनर्वक्तव्यं यच्च विष्णोरूपं जिष्णोरर्जुनस्य रथे स्थितं दृष्ट्वा युधि मृतास्तत्साम्यं सारूप्यं ईयुः प्रापुः तत्केन रूपेण त्यजदित्य
न्वयः ॥ ३ ॥ दिविस्वर्गपरिवेषणं नुविनिर्कंपादीन् अंतरिक्षे दिग्दाहादीन् महोत्पातान् स्वयमेवोत्पादितवान् दुर्निमित्तादिभिः दुःप्रतीकारत्वं यमस्यकेतवो ध्वजाश्चत्रुतस्त्वका
हत्यर्थः नः अस्माभिः ॥ ४ ॥ ५ ॥ प्रत्यक्पश्चिमवाहिनी ॥ ६ ॥ अभिषिच्यस्नात्वा ॥ ७ ॥ ब्राह्मणांश्च तिः कृतशांतिकाः संतोगवादिभिः पूजयिष्यामः ॥ ८ ॥ ॥ ४॥

१३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधिः प्रकारः मंगलायनं च। किंचिद्देवद्विजगवां पूजा भवत्यूर्ध्ववद्देहेन्दुदेवलोके परमस्तद्भावो भविष्यतीति भावः। ९। मधुद्विषो वाक्यमाकर्ण्य तथेत्यभिनंद्य अत्री
र्य समुद्रं। १०। सर्वश्रेयोपबृंहितमित्य च संधिरार्षं। भगवतानुरक्तैरपि सर्वैः श्रेयोभिः साहितं चक्रुः। ११। पीयत इति पानं मैरेयकं मदिराविशेषं मधु सुरसं दिष्टेन
दैवेन विनाशितधियः न ह्यन्यथा तस्मिन्स्थाने तदुचितमिति भावः। यस्माद्वैः रसैः। १२। कृष्णमायाविमूढानामिति मुख्यो हेतुः। संघर्षः कलहः। १३। ततो यु

विधिरेष ह्यरिष्टघ्नो मंगलायनमुत्तमं। देवद्विजगवां पूजा भूतेषु परमो भवः। ९। इति सर्वे समाकर्ण्य यदुवृद्धा मधुद्विषः। तथेति नौभि
रुत्तीर्य प्रभासं प्रययू रथैः॥ १०॥ तस्मिन् भगवतादिष्टं यदुदेवेन यादवाः। चक्रुः परमया भक्त्या सर्वश्रेयोपबृंहितं॥ ११॥ ततस्तस्मिन्
महापानं पपुर्मैरेयकं मधु॥ दिष्टविभ्रंशितधियो यद्द्रवैर्भ्रश्यते मतिः॥ १२॥ महापानाभिमत्तानां वीराणां दृप्तचेतसां। कृष्णमाया
विमूढानां संघर्षः सुमहानभूत्॥ १३॥ युयुधुः क्रोधसंरब्धा वेलायामाततायिनः। धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः॥ १४॥ पत
त्पताकै रथकुंजरादिभिः खरोष्ट्रगोभिर्महिषैर्नरैरपि॥ मिथः समेत्याश्वतरैः सुदुर्मदा न्यहं छरैर्दद्भिरिव द्विपा वने॥ १५॥ प्रद्यु
म्नसांबौ युधि रूढमत्सरावक्रूरभोजावनिरुद्धसात्यकी॥ सुभद्रसंग्रामजितौ सुदारुणौ गदौ सुमित्रासुरथौ समीयतुः॥ १६॥ अन्ये
च ये वै निशठोल्मुकादयः सहस्रजिच्छतजिद्भानुमुख्याः॥ अन्योन्यमासाद्य मदांधकारिता जघ्नुर्मुकुंदेन विमोहिता भृशं॥ १७॥ दा
शार्हवृष्ण्यंधकभोजसात्वता मध्वर्बुदा माथुरशूरसेनाः॥ विसर्जनाः कुकुराः कुंतयश्च मिथस्ततस्तेथ विसृज्य सौहृदं॥ १८॥ ॥ ॥

कपा २ युयुधुश्च। १४। पतंत उत्पतंतश्च लंसः पताका येषु तैः रथादिभिः मिथः समेत्य न्यहनन्नस्त्रनिसर्गैः। दद्भिः दंतैरिव। १५। मिथः समेत्येति श्लिष्टप्रपंचः। प्रद्युम्नेत्यादि द्विवचु
भिः। गदौ कृष्णस्य भ्राता एकः पुत्रश्चापरः तौ सुमित्रसुरथाविति दैर्घ्यमार्षं। श्रसुरथनामा वा कश्चित्। १६। मदांधेन मदतमसा बलात्कारिताः। १७। दाशार्हादियोन
वन्त्रकरपाः। अर्बुदा माथुराः शूरसेनाश्च तत्तद्देशीयाः॥ १८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा०ए०

न्वाहमिश्वेति। न्वान्नादिशश्वानांसभ्रुतियो गिवाचिताश्चातरो मातुलाइत्यादिज्ञेयं। मित्रैस्सुमित्राणिश्वहनूहतवंतः॥१९॥ धन्वसुधनुःखुजक्रुः॥जरुकुः॥२०॥
परिघालोहहंडाच्छृताः। तच्चश्रीकृष्णमपिप्रत्यनीकंप्रतिपन्नं॥२१॥२२॥ एरकामुष्टिरूपोपरिघावुद्यम्य॥२३॥ स्पर्धानिमित्तः क्रोधः कुलमन्वयंनिःस्ते॥२४॥२५॥ पो
रुषंयोगंपरमपुरुषध्यानलक्षणं॥ तमेवाह। संयोज्यति। मानुषंलोकंम्वर्लोकं॥ मनुष्यरूपतावा॥२६॥ धरोपस्थेभूतले॥२७॥ न्वाजिष्णुरूपं॥२८॥ तदेवानु

पुत्राश्वयुध्यन्पितृन्भ्रातॄन्भागिनेयस्वस्रीयदौहित्रपितृव्यमातुलैः॥ मित्राणिमित्रैः सुहृदःसुहृद्भिर्ज्ञातीस्त्वहनन्ज्ञातयएवमूढाः॥१९॥
शरेषुहीयमाणेषुभज्यमानेषुधन्वसु॥ शस्त्रेषुहीयमाणेषुमुष्टिभिर्जह्रुरेरकाः॥२०॥ तावज्जकुलाद्यजनवज्रपरिघामुष्टिनान्रताः॥ ज
घ्नुर्द्विषस्तैःकृष्णेनवार्यमाणास्तुतंचते॥२१॥ प्रत्यनीकंमन्यमानाबलभद्रंचमोहिताः॥ हंतुंकृतधियोराजन्नापन्नाआततायि
नः॥२२॥ अथतावपिसंक्रुद्धावुद्यम्यकुरुनंदन॥ एरकामुष्टिपरिघौचरंतौजघ्नतुर्युधि॥२३॥ ब्रह्मशापोपसृष्टानांकृष्णमायावृ
तात्मनां॥ स्पर्धाक्रोधःक्षयंनिन्येवैणवोग्निर्यथावनं॥२४॥ एवंनष्टेषुसर्वेषुकुलेषुस्वेषुकेशवः॥ अवतारितोभुवोभारइतिमेनेवशे
षितः॥२५॥ रामःसमुद्रवेलायांयोगमास्थायपौरुषं॥ तस्याजलोकंमानुष्यंसंयोज्यात्मानमात्मनि॥२६॥ रामनिर्याणमालोक्य
भगवान्देवकीसुतः॥ निषसादधरोपस्थेतूष्णीमासाद्यपिप्पलं॥२७॥ बिभ्रच्चतुर्भुजंरूपंभ्राजिष्णुप्रभयास्वया॥ दिशोवितिमिराःकु
र्वन्विधूमइवपावकः॥२८॥ श्रीवत्सांकंघनश्यामंतप्तहाटकवर्चसं॥ कौशेयांबरयुग्मेनपरिवीतंसुमंगलं॥२९॥ सुंदरस्मितवक्त्राब्जं
नीलकुंतलमंडितं॥ पुंडरीकाभिरामाक्षंस्फुरन्मकरकुंडलं॥३०॥ कटिसूत्रब्रह्मसूत्रकिरीटकटकांगदैः॥ हारनूपुरमुद्राभिःकौ
स्तुभेनविराजितं॥३१॥ वनमालापरीतांगंमूर्तिमद्भिर्निजायुधैः॥ कृत्वोरौदक्षिणेपादमासीनंपंकजारुणं॥३२॥ ॥ राम

वर्णयति श्रीवत्सांकमितिचतुर्भिः॥ १३८
२९॥ सुंदरस्मितंवक्त्राब्जंयस्मिन्तत्॥ पुंडरीकवदभिरामेसुंदरेअक्षिणीयस्मिन्तत्॥३०॥३१॥ वनमालयापरीतानिअंगानियस्मिंस्तत्॥ निजायुधैश्चपरीतांगंपंकजारु
णंवामपादंदक्षिणेऊरौकृत्वा॥ आसीनंध्यानंदरूपंबिभ्रत्॥३२॥ ॥ ॥ ॥ ॥छ॥ ॥श्री॥ ॥श्रीकृष्णा॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जरानामकश्चिल्लुब्धको मृगबुद्ध्या मृगस्यास्यमिवाकारो यस्य तं चरणं ॥३३॥३४॥ बुद्ध्वा पापकृतमेतन्नतवापराध इति निवेदितआह ॥ यस्य तवात्मयोगरचितं स्वाधीनमा
यारचितं ॥ विरिंचः अस्य तनयारुद्रादयश्च ये चान्ये गिरांपतयो वेदद्रष्टारस्तेपि न विदुस्तस्य तेचिंत्यमायस्य एतद्बुद्ध्वागपादिश्चभुजसाश्वसंतगतयः पापयो
नयो वयं किं गृणीमः कथं वर्णयामः ॥ अतस्त्वंमांआशुमांजहीति भावः ॥३९॥४०॥ इच्छाशरीरिणोस्यस्यायंभावः ॥ शुद्धसत्त्वमयी निजा श्रीमूर्त्तिर्निरुपयि

मुसलावशेषायःखंडकृतेषुर्लुब्धकोजरा ॥ मृगास्याकारंचरणंविव्याधमृगशंकया ॥३३॥ चतुर्भुजंतंपुरुषंदृष्ट्वासकृतकिल्बिषः
भीतःपपातशिरसापादयोरसुरद्विषः ॥३४॥ अजानताकृतमिदंपापेनमधुसूदन ॥ क्षंतुमर्हसिपापस्यउत्तमश्लोकमेनघ ॥३५॥
यस्यानुस्मरणंनृणामज्ञानध्वांतनाशनं ॥ वदंतितस्यतेविष्णोमयासाधुकृतंप्रभो ॥३६॥ तन्माशुजहिवैकुंठपाप्मानंमृगलुब्धकं ॥
यथापुनरहंत्वेवंनकुर्यांसदतिक्रमं ॥३७॥ यस्यात्मयोगरचितंनविदुर्विरिंचोरुद्रादयोस्यतनयाःपतयोगिरांये ॥ त्वन्माययापि
हितदृष्टयएतदंजःकिंतस्यतेवयमसद्गतयोगृणीमः ॥३८॥ श्रीभगवानुवाच ॥ ॥ मामैर्जरेत्त्वमुत्तिष्ठकामएषकृतोहिमे ॥ याहित्वं
मदनुज्ञातःस्वर्गंसुकृतिनांपदं ॥३९॥ इत्यादिष्टोभगवताकृष्णेनेच्छाशरीरिणा ॥ त्रिःपरिक्रम्यतंनत्वाविमानेनदिवंययौ ॥४०॥ दा
रुकःकृष्णपदवीमन्विच्छन्नधिगम्यतां ॥ वायुंतुलसिकामोदमाघ्रायाभिमुखंययौ ॥४१॥ तंतत्रतिग्मद्युभिरायुधैर्वृतंह्यश्वत्थ
मूलेकृतकेतनंपतिं ॥ स्नेहप्लुतात्मानिपपातपादयोरथादवप्लुत्यसबाष्पलोचनः ॥४२॥ अपश्यतस्तेचरणांबुजंप्रभोदृष्टिःप्र
नष्टातमसिप्रविष्टा ॥ दिशोनजानेनलभेचशांतिंयथानिशायामुडुपेप्रनष्टे ॥४३॥ इतिब्रुवतिसूतेवैरथोगरुडलांछनः ॥ खमुत्पपा
तराजेंद्रसाश्वध्वजउदीक्षतः ॥४४॥

तत्प्रतिकृत्यैवंविडंबनमात्रमिति ॥ एतदेवस्फुटीकरिष्यतिद्विवादयोब्रह्ममुख्याइत्यादिना ॥४०॥४१॥ तंपतिंतत्रदृष्ट्वात
तस्यपादयोर्निपपात ॥४२॥४३॥ उदीक्षमाणस्यसूतस्यसतः ॥४४॥ ॥

दा०स्कं०उ०बा०च०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ए०टी०

४५ निर्याणं योगमार्गेण महद्गामिज्ञातारीरानिशायेण ॥४६॥४७॥ अविताः रक्ष्यमाणाः इंद्रप्रस्थं गमिष्यथेति ब्रूहि इति पूर्वेणान्वयः ॥४८॥ मन्मायारचना
मेतां विज्ञायेति निजश्रीमूर्तेरंतर्हितत्वाद्वृथा शोकमात्रकृविस्मिथः ॥४९॥ कुलस्य विनष्टत्वात्तद्दुर्मनाः ॥५०॥ ॥ इति श्रीटी० एकादशे मौशलवर्णनं नाम त्रिंशोध्या
यः ॥३०॥ ॥ एकत्रिंशे स्वकं धाम जगाम भगवानितः । तमेवानुययुः श्रीमद्वसुदेवादयस्ततः ॥१॥ देवानुपद्रुत विधायादौ न्यूयोदेवान् विधाय च ॥ श्रीकृ

तमन्वगच्छं दिव्यानि विष्णुप्रहरणानि च । तेनातिविस्मितात्मानं सूतमाह जनार्दनः ॥५॥ गच्छ द्वारवतीं सूत ज्ञातीनां निधनं मिथः । संकर्षण
स्य निर्याणं बंधुभ्यो ब्रूहि मद्दशां ॥४६॥ द्वारकायां च न स्थेयं न वद्भिश्च सबंधुभिः ॥ मया त्यक्तां यदुपुरीं समुद्रः प्लावयिष्यति ॥४७॥ स्वं स्वं परि
ग्रहं सर्वे आदाय पितरौ च नः । अर्जुनेनाविताः सर्वे इंद्रप्रस्थं गमिष्यथ ॥४८॥ त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः ॥ मन्मायारच
नामेतां विज्ञायोपशमं व्रज ॥४९॥ इत्युक्तस्तं परिक्रम्य नमस्कृत्य पुनः पुनः ॥ तत्पादौ शीर्ष्ण्युपाधाय दुर्मनाः प्रययौ पुरीं ॥५०॥ ॥
इति श्रीभागवते महापुराणे एकादशस्कंधे मौशले कुलक्षयस्त्रिंशोऽध्यायः ॥३०॥ ॥ श्रीशुक उवाच ॥ अथ तत्रागमद्ब्रह्मा भवा
न्यां च समं भवः ॥ महेंद्रप्रमुखा देवा मुनयः सप्रजेश्वराः ॥१॥ पितरः सिद्धगंधर्वा विद्याधरमहोरगाः ॥ चारणा यक्षरक्षांसि किंनराप्सर
सो द्विजाः ॥२॥ द्रष्टुकामा भगवतो निर्याणं परमोत्सुकाः ॥ गायंतश्च गृणंतश्च शौरेः कर्माणि जन्म च ॥३॥ ववृषुः पुष्पवर्षाणि विमाना
वलिभिर्नभः ॥ कुर्वंतः संकुलं राजन्भक्त्या परमया युताः ॥४॥ भगवान्पितामहं वीक्ष्य विभूतीरात्मनो विभुः । संयोज्यात्मनि चात्मानं
पद्मनेत्रे न्यमीलयत ॥५॥ राम

स्वःश्रेष्ठसाधाम स्वतन्वैव समाविशत् । मुनयः सनकादयः प्रजेश्वरा मरीच्यादयः ॥१॥ द्विजा गरुडलोकवासिनः पक्षिणः मैत्रेयादयो १३९
वा ॥ भगवतो निर्याणं द्रष्टुकामाः संतः परमोत्सुकाः तच्चागमनं तेषामौत्सुक्यं कृतमहोत्सवमाह ॥ सार्धेन गायंतश्चेति ॥२॥३॥४॥ विभूतीर्ब्रह्मादींश्च ॥५॥ पद्मनेत्रे न्यमी
लयत् स्वच्छाहैयं भावः ॥ पूर्वं ब्रह्मादिभिः सर्वलोकाल्लोकपालान्नेः पाहि वैकुंठकिंकरानिति ज्ञापितत्वादिदानीं च स्वं स्वं लोकं प्रति नेतुमागतत्वाद्ब्रह्मादिकेषु गतेषु दृशि
णां तान् वंचयितुं समाधिमिव कुर्वन्नेत्रे न्यमीलयदिति ॥ ॥

स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगिनामिव स्वछंदमृत्युस्तन्नु संवारयति। लोकाभिरामामिति। अयमर्थः। योगिनो हि स्वछंदमृत्यवः स्वतनुमाग्नेय्यां योगधारणया दग्ध्वा लोकांतरं प्रविशंति। न
यथा कृष्णस्तथा किंतु अदग्ध्वैव स्वतनुसहित एव स्वकं वैकुंठाख्यं धाम विवेश। तत्र हेतुः लोकानामभिरामः अभितो रमणं स्थितिर्यस्यां तां जगदाश्रयत्वेन
जगतो पि दाहप्रसंगादित्यर्थः। किंच। धारणाध्यानस्य च मंगलं शरणं विषयं तत्तदध्यानयोर्निर्विषयत्वं स्यात्। तदुपते चाद्याप्युपासकानां तथैव तद्रूपसाक्षा
त्कारः फलप्राप्तिश्चेति भावः। इत्याशरीरात्मिप्रायेणैवाय यथाश्रुतमेवास्तु तथापि तु लोकाभिरामामित्यादिविशेषणानामानर्थक्यप्रसंगात्तदप्यदग्ध्वा

लोकाभिरामां स्वतनुं धारणाध्यानमंगलं। योगधारणयाग्नेय्यादग्ध्वा धामाविशत्स्वकं। ६। दिवि दुंदुभयो नेदुः पेतुः सुमनसश्च खात्
सत्यं धर्मो धृतिर्भूमेः कीर्तिः श्रीश्चानु तं ययुः। ७। देवादयो ब्रह्ममुख्या न विशंतं स्वधामनि। अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मि
ताः। ८। सौदामन्या यथाकाशे यांत्या हित्वाभ्रमंडलं। गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः। ९। ब्रह्मरुद्रादयस्ते तु दृष्ट्वा योग
गतिं हरेः। विस्मितास्तां प्रशंसंतः स्वं स्वं लोकं ययुस्तदा। १०। ॥

तिरोधाय निर्गतस्येव संप्रवृत्तं। ६। तदा तु स्वं स्वमेव लोकमागमिष्यतीति संभ्रमेण देवाः ततः सर्वतो दुंदुभिनादपुष्पवृष्ट्यादिमहोत्सवोनवद्वृत्तमाह। दिवीति। भू
मेः सकाशात् श्रीकृष्णमनुययुः। ७। तदा श्रीकृष्णस्तर्हि तिसन्निकृतो गत इति वितर्कयंतो पि ब्रह्ममुख्या देवादयः स्वधामनि विशंतं श्रीकृष्णं न ददृशुः। तत्र हे
तुः अविज्ञातगतिमिति। क्वचिकृच्चिह्नमशततो तिविस्मिता बभूवुरित्यर्थः। ८। अविज्ञातगतित्वं दृष्टांतेन संस्पष्टयति। सौदामन्या गतिर्यथा मर्त्यैर्न लक्ष्य
ते देवैः कलक्ष्यते तथा मेघमंडलं हित्वा गच्छतः श्रीकृष्णस्य देवैरपि न लक्ष्यते। किं तत्पार्षदैरेवेत्यर्थः। ९।१०। ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०टी०
१५०

अनिप्रायापरिज्ञानतः प्रथमं क्लिष्टं दृष्ट्वांतेन समाष्टमुक्ता ततश्च रुष्टं दृष्ट्वा पुनस्तमेवार्थं प्रपंचयति राजन्निति त्रिभिः परस्य सर्वकारणस्य तनुभृतस्तु याद्वा
दिषु जननाप्ययेहाः आविर्भावतिरोभावचेष्टाः मायया अनुकरणमात्रमवेहि नटो यथा विकृत एव नानारूपैर्जन्मादीन् विडंबयति तद्वत् आस्तां
तावद्यादवादिषु जन्मादिशंका यावद्विश्वसर्गनिरोधानादिष्वप्यसावविकृत एवास्ते इत्याह सृष्ट्वेति आत्मना स्वयमेवेदं जगत्सृष्ट्वा अंतर्यामित्वेनानुवि
श्य स्वात्ममहिम्ना स्वयमहिम्ना आस्ते ११ न च पुनरन्यथा मंतव्यं यतोस्मिन्नेवावतारे तस्य भावो निरतिशयो दृष्ट इत्याह मर्त्येनेति यमेन स्वलोकं प्रतिनी
तं गुरुसुतं मर्त्येनैव तेनैव शरीरेण य आनयत् आनीतवान् शरणदः शरणागतरक्षकः त्वां च ब्रह्मास्त्रदग्धं यो रक्षितवान् यश्चांतकानामंतकम
पि ईशं श्रीरुद्रं बाणसंग्रामे जितवान् मृगयुं लुब्धकं स्वः स्वर्गं च अनयत् निन्ये असौ स्वावने स्वरक्षणे अनीशः असमर्थः किं १२ ननु यदि समर्थः

राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडंबनमवेहि यथा नटस्य । सृष्ट्वात्मनेदमनुविश्य विहृत्य चांते संहृत्य चात्ममहिनोपर
तः स आस्ते ११ मर्त्येन यो गुरुसुतं यमलोकनीतं त्वां चानयच्छरणदः परमास्त्रदग्धं । जिग्येंतकांतकमपीशमसावनीशः किं स्वाव
नेस्वरनयन्मृगयुं सदेहं १२ तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् । नैच्छत्प्रणेतुं वपुरत्र शेषितं मर्त्ये
न किं स्वस्थगतिं प्रदर्शयन् १३ य एतां प्रातरुत्थाय कृष्णस्य पदवीं परां । प्रयतः कीर्तयेद्भक्त्या तामेवाप्नोत्यनुत्तमां १४ दारुको द्वार
कामेत्य वसुदेवोग्रसेनयोः । पतित्वा चरणावस्रैर्न्यषिंचत्कृष्णविच्युतः १५

नर्हि किंचित्कालमत्रैव तेन वपुषा किं नातिष्ठत्तत्राह तथापी
ति यद्यप्युक्तप्रकारेणाशेषस्य जगतः स्थित्यादिषु अनन्यहेतुर्निरपेक्ष एव कारणं स्वयं यद्यस्मादशेषशक्तिधृक् तथापि याद[illegible]वान संहृत्य नि
जं वपुः अत्र शेषितं अवशेषितं प्रणेतुं कर्तुं नैच्छत् किंतु स्वमेव लोकमनयत् तत्र हेतुः मर्त्येन देहेन किं न किंचित्कार्यमिति स्वस्थानामात्मनिष्ठानां
दिमां गतिमेव प्रकृष्टां दर्शयन् अमुयाते पि इमां गतिमनाहत्य योगबलेन देहसिद्धिं विधाय नैव रक्षयंतेरन् तस्मान्न देहे तदर्थमिति वा
वः १३ एतामुक्तप्रकारां पदवीं गतिं १४ तदेवं भगवता स्वलोकं गच्छता वसुदेवादीनामपि तत्रानयने उपायः सूचित इति तत्राचीनमाह दारुक
इत्यादिना १५

राम
१५०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०

१६ ॥ १७ ॥ कृष्णरामौ सुतावपश्यंतः ॥ १८ ॥ १९ ॥ २० ॥ सदुक्तिभिः सन्तोषं वितथा उक्तयो ये पुते ॥ नाहं प्रकाशः सर्वस्य योगमायासमावृतः ॥ मूढोयं नाभिजा
नाति लोको मामजमव्ययमित्यादिभिः नष्टगोत्राणां नष्टसंततीनां सांपरायिकं पिंडोदकादि २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ आदितआरभ्य श्रीकृष्णचरितकी

कथयामास निधनं वृष्णीनां कृत्स्नशो नृप ॥ तच्छ्रुत्वोद्विग्नहृदया जनाः शोकविमूर्छिताः ॥ १६ ॥ तत्र स्म त्वरिता जग्मुः कृष्णविश्लेषविह्वलाः ॥
व्यसवः शेरते यत्र ज्ञातयो घ्नंत आत्मनः ॥ १७ ॥ देवकी रोहिणी चैव वसुदेवस्तथा सुतौ ॥ कृष्णरामावपश्यंतः शोकार्ता विजहुः स्मृतिं ॥ १८ ॥
प्राणांश्च विजहुस्तत्र भगवद्विरहातुराः ॥ उपगुह्य पतींस्तात चितामारुरुहुः स्त्रियः ॥ १९ ॥ रामपत्न्यश्च तद्देहमुपगुह्याग्निमाविशन् ॥ व
सुदेवपत्न्यस्तद्गात्रं प्रद्युम्नादीन्हरेः स्नुषाः ॥ २० ॥ कृष्णपत्न्योविशन्नग्निं रुक्मिण्याद्यास्तदात्मिकाः ॥ अर्जुनः प्रेयसः सख्युः कृष्णस्य विरहा
स
तुरः ॥ २१ ॥ आत्मानं सांत्वयामास कृष्णगीतैः सदुक्तिभिः ॥ बंधूनां नष्टगोत्राणामर्जुनः सांपरायिकं ॥ हतानां कारयामास यथावदनुपूर्वशः ॥ २२ ॥
द्वारकां हरिणा त्यक्तां समुद्रोप्लावयत्क्षणात ॥ वर्जयित्वा महाराज श्रीमद्भगवदालयं ॥ २३ ॥ नित्यं सन्निहितस्तत्र भगवान्मधुसूदनः ॥ स्मृ
त्याशेषाशुभहरं सर्वमंगलमंगलं ॥ २४ ॥ स्त्रीबालवृद्धानादाय हतशेषान्धनंजयः ॥ इंद्रप्रस्थं समावेश्य वज्रं तत्राभ्यषेचयत ॥ २५ ॥
श्रुत्वा सुहृद्वधं राजन्नर्जुनात्ते पितामहाः ॥ त्वां तु वंशधरं कृत्वा जग्मुः सर्वे महापथं ॥ २६ ॥ य एतद्देवदेवस्य विष्णोः कर्माणि जन्म च ॥ कीर्त
येच्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते ॥ २७ ॥ इत्थं हरेर्भगवतो रुचिरावतारवीर्याणि बालचरितानि च शंतमानि ॥ अन्यत्र चेह च श्रुतानि गृणन्मनुष्यो भक्तिं परां परमहंसगतौ लभेत ॥ २८ ॥ ॥ इति श्रीभागवते महापुराणेष्टादशसाहस्र्यां संहितायां वैयासिक्यां
एकादशस्कंधे श्रीमद्भगवत्स्वधामगमनं नाम एकत्रिंशोध्यायः ॥ ३१ ॥ ॥

र्तनस्य फलमाह ॥ य एतदिति द्वाभ्यां ॥ २७ ॥ शंतमानि परममंगलानि ॥ परमहंसगतौ श्रीकृष्णे ॥ एवमेकादशस्कंधभावार्थस्य प्रदीपिका स्वाज्ञानध्वांतनीतेन ॥ राम ॥
श्रीधरेण प्रकाशिता ॥ २८ ॥ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे श्रीधरस्वामिविरचितायां टीकायामेकत्रिंशोध्यायः ॥ ३१ ॥ ॥ ॥ ॥ १४१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीमत्‌भागवत अष्टम स्कंध॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०अ०
१

श्रीमहागणपतये नमः ॥ ॥ ॐ नमः श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदाय नतजनमानसनिवासाय श्रीरामाय ॥ अथाष्टमे
चतुर्विंशत्यध्यायैर्मनुवर्णनं ॥ तत्सुतैर्ऋषिदेवेंद्रैर्मूर्त्तिभिश्च हरेः सह ॥२॥ प्रतिमन्वंतरं चैव मन्वाद्याः पृथक्पृथक् । प्रवर्त्तयंति स
द्धर्मान्पालयंत्याचरंति च ॥३॥ अतो मन्वंतरस्योक्तं सद्धर्म इति लक्षणं । तत्र तु प्रथमे स्वायंभुवः स्वारोचिषस्तथा उत्तमस्तामसश्चेति च
येनैव क्रियमाणेन नरो न निरयं व्रजेत् ॥

ॐ नमो भगवते वासुदेवाय ॥ ॥ राजोवाच ॥ स्वायंभुवस्येह गुरो वंशोयं विस्तराच्छ्रुतः ॥ यत्र विश्वसृजां सर्गो मनूनन्यान्
वदस्व नः ॥१॥ यत्र यत्र हरेर्जन्म कर्माणि च महीयसः ॥ गृणंति कवयो ब्रह्मंस्तानि नो वद शृण्वतां ॥२॥ यद्यस्मिन्नंतरे ब्र
ह्मन्भगवान्विश्वभावनः ॥ कृतवान्कुरुते कर्त्ता ह्यतीतेनागतेद्य वा ॥३॥ ऋषिरुवाच ॥ ॥ मनवोस्मिन्व्यतीताः षट् क
ल्पे स्वायंभुवादयः ॥ आद्यस्ते कथितो यत्र देवादीनां च संभवः ॥४॥ ॥

तुर्मनुनिरूपणं स्वायंभुवेंतरेनंतदुरंतगुणवर्णनात् ॥ मुदितः परिपृच्छत्सर्वमन्वंतरस्थितिं । स्वायंभुवस्येति त्रिभिः ॥ ॥ यत्र विश्व
सृजां मरीच्यादीनां मनुकन्यासु पुत्रपौत्रादिसर्गः ॥१॥ महीयसो हरेः ॥ अत्र कचित्कल्पांतरमस्ति तदुपेक्षितमस्माभिः ॥२॥ यस्मिन्न
तीतेय कृतवान् । यस्मिन्ननागते यत्कर्त्ता करिष्यति अद्य वा वर्त्तमाने यत्कुरुते तद्वदेत्यन्वयः ॥३॥ अस्मिन्कल्पे षण्मनवो व्यती
ताः ॥४॥ ॥ राम
१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य मनोर्दुहित्रोः कपिलयज्ञमूर्त्तिभ्यां पुत्रतां गत आसः।५।७। घोरं दुश्चरं तपस्तप्यमानः।।८। समाधावनुभूतमिदं वक्ष्यमाणं निर्जितेहि ... तत्र
द्विर्मितश्च तपादिरा निर्वश्य अनुवदन्निव च षट्भिः श्लोकैरन्वाह। येन चिदात्मना विश्वं चेतयते चेतनी भवति विश्वं तु यं न चेतयते न चेतनी
करोति स्वत एव चिद्रूपत्वात्। तत्र हेतुः। अस्मिन्सुप्ता याने स्वपतिर्यो जागर्ति साक्षितया वर्त्तते। अहो चित्रं नायं जनस्तं वेद स तु इमं वेद।९। तत

आकूत्यां देवहूत्यां च दुहित्रोस्तस्य वै मनोः। धर्म्मज्ञानोपदेशार्थं भगवान्पुत्रतां गतः।५। कृतं पुरा भगवतः कपिलस्यानुवर्णि
तं। आख्यास्ये भगवान्यज्ञो यच्चकार कुरूद्वह।६। विरक्तः कामभोगेषु शतरूपापतिः प्रभुः। विसृज्य राज्यं तपसे सभार्यो वन
माविशत्।७। सुनंदायां वर्षशतं पदैकेन भुवं स्पृशन्। तप्यमानस्तपो घोरमिदमन्वाह भारत।८। ॥मनुरुवाच॥ येन चे
तयते विश्वं विश्वं चेतयते न यं। यो जागर्ति शयानेस्मिन्नायं तं वेद वेद सः।९। आत्मावास्यमिदं विश्वं यत्किंचिज्जगत्यां ज
गत्। तेन त्यक्तेन भुंजीथा मा गृधः कस्य स्विद्धनं।१०॥ ॥

स्येश्वरत्वं दर्शयन्लोकस्य हितमुपदिशति॥ आत्मना ईश्वरेण आवास्यं स्वसत्त्वया चैतन्यास्यां व्याप्यं विश्वं सर्वं जगत्यां लोके यत्किंचिज्जगद्भूत
जातं च। तस्मिन्नेवेश्वरेण यत्किंचित्स्वकं दत्तं धनं तेनैव भुंजीथाः भोगान्भुंक्ष्व। यद्वा। तेन हेतुना त्यक्तेन ईश्वरार्पणेनैव भुंजीथाः। तस्यार्थं क
स्यचित्कस्यचिदपि धनं मा गृधः। माभिकांक्षीः। यद्वा। कस्य स्विदिति कस्यास्मस्य धनमस्ति यतो धनकांक्षा क्रियेतेत्यर्थः। तथा च श्रुतिः। ईशावा
स्यमिति यथाश्लोकमेव।१०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु यदि सर्वव्यापी तर्हि चक्षुरादिभिः किं न प्रतीयते। अत आह। यं पश्यन्तं जनः चक्षुर्न पश्यति। चक्षुरग्राह्यविषयत्वात् न हि प्रमातारं प्र
माणं विषयीकरोतीति भावः। तथा च श्रुतिः। चक्षुषः चक्षुरुत श्रोत्रस्य श्रोत्रमित्यादि ननु तर्हि घटनाशे देवदत्तस्य तद्विषयं चाक्षुषं ज्ञानमिवे
श्वरस्यापि स्वरूपभूतं तद्विषयं ज्ञानं नश्येदत आह। यस्य तु पश्यतः चक्षु[र्न]निनंरिष्यति। न नश्यति तत्तदाकारेणोत्पन्नाया वृत्तेर्विनाशेन स्वतः
सिद्धज्ञानस्य न हि सवितृप्रकाश्यप्रकाशनाशेन तत्प्रतीतिभावः। भूतानि निलयो यस्य तं सर्वान्तर्यामिणं तथा पि सुपर्णं शोभनपतनं श्रसंगं
उपधावत भजध्वं ११ तस्य स्वरूपस्य निरस्तत्वमेवोपपादयन्नाह। नयस्येति। अमूर्तिर्न्याद्यन्तादीनि विश्वस्य यस्माद्भवन्ति विश्वं च यत

यं न पश्यति पश्यन्तं चक्षुर्यस्य न रिष्यति। तं भूतनिलयं देवं सुपर्णमुपधावत ॥११॥ न यस्माद्यन्तौ मध्यं च सतः परो नान्तरं बहिः
विश्वस्यामूर्तिर्यद्यस्माद्विश्वं च तदृतं महत् ॥१२॥ स विश्वकायः पुरुहूत ईशः सत्यः स्वयंज्योतिरजः पुराणः। धत्तेऽस्य जन्माद्य
जयात्मशक्त्या तां विद्ययोदस्य निरीह आस्ते ॥१३॥ अथाग्रे ऋषयः कर्माणीहंतेऽकर्महेतवे। ईहमानो हि पुरुषः प्रायोऽनी
हां प्रपद्यते ॥१४॥

यद्रूपं अत एवाव्यभिचारित्वात् ऋतं सत्यं महत् परिपूर्णं ब्रह्म ॥१२॥ ननु विश्वं चेत्तद्रूपं तर्हि तस्य कुतो जन्माद्यभावः
स्वप्रकाशत्वं वा कथं वा जगज्जन्मादिकर्तृत्वेन विकारित्वेन सत्यत्वं पूर्णत्वं वा तत्राह। स ईश्वरः। अजः सत्यः स्वप्रकाशश्च पुराणश्च निर्विकार
विश्वं कायो यस्य पुरु बहुलं तिनामानि यस्य तथाविधोऽपि। यतः अस्य विश्वस्य जन्मादि स्वशक्त्या मायया धत्ते। तां च नित्यसिद्धया विद्यया तु द
स्य हित्वा निःक्रिय एवास्ते [...] यस्मादेवमीश्वरः कर्म कृत्वा संन्यस्यैनैः कर्मणा [...]। अ[...] थ अस्माद्धेतोः ऋषयो यः प्रेश्वरादौ कर्माणि कु
र्वंति किमर्थं अकर्महेतवे मोक्षार्थं। पाठान्तरे कर्मनाशाय हि यस्मात् ॥१४॥ ॥ 

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का

वर्त्तमानः कर्म्मनिरवगुंठितः कोशकारइवबध्येतैवतत्राह ईहतइति। अतस्तमनुवर्त्तमानायेतेनावसीदंतिनविषज्जंते। १५। तदेवंलोकानुग्र
हायविश्वस्यधारणादियः करोति। श्रीरामकृष्णाद्यवतारैश्चवेदोक्तमथाचरतितंशरणंव्रजामीत्याह। तमितिनिजंवर्त्मनिराकारानुरूपोमा
र्गः तत्रसम्यक्स्थितं अतःईहमानंकर्माचरंतं। तथापिजीववैलक्षण्यमाह। निरहंकृतंनिराशिषंअनन्यचोदितमितिनिरहंकारेहेतुःबु च
१ धंनिराशिहेतुःपूर्णं। अनन्यनियुक्तत्वेहेतुःप्रभुं। तथापिकर्मानुष्ठानेहेतुः। नॄन्स्वाचारेणशिक्षयंतंतत्किमर्थमित्यतआह। अखिलानुधर्मा
५ न्भावयतिप्रवर्त्तयतितथाभूतं। १६। समाहितमपिमंत्रंमंत्रोपनिषदंव्याहरंतं। दृष्ट्वासुरोपि [illegible] तवदिवसमिवमत्वाजग्धुमसुरयातुधानाश्च

ईहतेभगवानीशोनहितत्रविषज्जते। आत्मलाभेनपूर्णार्थोनावसीदंतियेनुतं। १५। तमीहमानंनिरहंकृतंबुधंनिराशिषं
न पूर्णमनन्यचोदितं। नॄन्शिक्षयंतंनिजवर्त्मसंस्थितंप्रभुंप्रपद्येखिलधर्मभावनं। १६। श्रीशुकउवाच। इतिमंत्रोपनिषदं
व्याहरंतंसमाहितं। दृष्ट्वासुरायातुधानाजग्धुमभ्यद्रवन्क्षुधा। १७। तांस्तथावसितान्वीक्ष्ययज्ञःसर्वगतोहरिः। यामैःपरि
वृतोदेवैर्हत्वाशासत्त्रिविष्टपं। १८। स्वारोचिषोद्वितीयस्तुमनुरग्नेःसुतोभवत्। द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्यचात्मजाः
नु २घु ॥१९॥

क्षुधानिमित्तेनजग्धुंभक्षितुमभ्यद्रवन्अभिदुद्रुवुः। १७। यामैःस्वपुत्रैः। त्रिविष्टपंस्वर्गमपालयन्। स्वयमेवेंद्रोबभूवेत्यर्थः। तत्रप्रतिमन्वं
तरंमन्वादयःषडन्येभवंति। तथाहिस्मृतौद्वादशेवक्ष्यति। मन्वंतरंमनुर्देवामनुपुत्राः सुरेश्वरः ऋषयोंशावतारश्चहरेः षड्विधमुच्यतइति
तत्राद्यस्वायंभुवोमनुः। प्रियव्रतोत्तानपादौमनुपुत्रौ। यामादयोदेवाः। मरीचिप्रमुखाः सप्तऋषयः। यज्ञोहरेरवतारः। इंद्रश्चसएवेति
तन्मन्वंतरंपंचविधमेवतच्चतुर्थस्कंधोपक्रमेनिरूपितं। १८। द्वितीयादिषुत्रिषुमन्वंतरेषुमन्वादिषट्कमाह। स्वारोचिषोद्वितीयइत्यावद्गजेंद्र
मोक्षपर्यं॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्कं० ३ २०।२१। विभोरसाधारणंचरितमाह। अष्टाशीतिसहस्राणीति २२॥२५॥ सत्यजितः इंद्रस्य सखा सन् २६॥ उत्तमस्य तृतीयो मनुः॥ तस्य भ्राता तामस

तत्रेंद्रो रोचनस्त्वासी द्देवाश्च तुषितादयः॥ ऊर्जस्तंभादयः सप्तऋषयो ब्रह्मवादिनः॥२०॥ ऋषेस्तु वेदशिरसस्तुषिता नाम पत्न्यभूत्
तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः॥२१॥ अष्टाशीतिसहस्राणि मुनयो ये धृतव्रताः॥ अन्वशिक्षन् व्रतं तस्य कौमारब्रह्मचा
रिणः॥२२॥ तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः॥ पवनः सृंजयो यज्ञहोत्राद्यास्तत्सुता नृप॥२३॥ वसिष्ठतनयाः सप्तऋ
षयः प्रमदादयः॥ सत्यावेदश्रुता भद्रा देवा इंद्रस्तु सत्यजित्॥२४॥ धर्मस्य सूनृतायां तु भगवान् पुरुषोत्तमः॥ सत्यसेन इति ख्यातो
जातः सत्यव्रतैः सह॥२५॥ सोऽनृतव्रतदुःशीलानसतो यक्षराक्षसान्॥ भूत द्रुहो भूतगणांश्चावधीत्सत्यजित्सखः॥२६॥ च
तुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः॥ पृथुः ख्यातिर्नरः केतुरित्याद्या दश तत्सुताः॥२७॥ सत्यका हरयो वीरा देवास्त्रिशिख ई
श्वरः॥ ज्योतिर्धामादयः सप्तऋषयस्तामसेंतरे॥२८॥ देवा वैधृतयो नाम विधृतेस्तनया नृप॥ नष्टाः कालेन यैर्वेदा विधृताः स्वेन तेजसा॥ यो
२९॥ तत्रापि जज्ञे भगवान् हरिण्यां हरिमेधसः॥ हरिरित्याहृतो येन गजेंद्रो मोचितो ग्रहात्॥३०॥ राजोवाच॥ बादराय
ण एतत्ते श्रोतुमिच्छामहे वयं॥ हरिर्यथा गजपतिं ग्राहग्रस्तममूमुचत्॥३१॥ तत्कथासु महत्पुण्यं धन्यं स्वस्त्ययनं शुभं॥ य
त्र यत्रोत्तमश्लोको भगवान् गीयते हरिः॥३२॥ ॥

अनुवर्षमितुरिति॥२७॥ त्रिशिख ईश्वरः इंद्रः॥२८॥ अन्यानपि विशिष्टपराक्रमान्देवानाह देवा वैधृतय इति॥२९॥ हरिरित्याहृतः आहृतः यस्मा राम
त् ग्राहात्॥३०॥ अमूमुचत् मोचयामास॥३१॥ श्रवणेच्छायां हेतुः तत्कथासु तासु कथासु॥ सा कथैव वा सुमहत्पुण्यं पुण्यस्य विशेषणं धन्यमित्यादि॥३२॥ ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University-Ramtek Collection

त्वष्टमे प्रथमः ॥ ॥ तुर्ये मन्वंतरे प्रोक्तं गजेंद्रस्य विमोक्षणं ॥ द्वितीयादित्रिभिस्तत्तु विस्तरेणोपवर्ण्यते ॥१॥ द्वितीये तु गजेंद्रस्य गजीभिः क्रीडतो
जले देवाद्ग्राहगृहीतस्य हरिस्मृतिरुदीर्यते ॥२ आसीदित्यादि त्रिभिस्तावता योजनायुतेन पर्यक् परितः ॥ त्रिकूटसमाख्यां बीजमाह ॥ त्रिभिः शृं
गैः मुख्यैः अन्यैश्च शृंगैरेव निर्झराणां अंभसां निर्घोषैश्च ककुभः सर्वा रोचयन्नास्त इति पूर्वेणैवान्वयः ॥ कथंभूतैः शृंगैः रत्नैर्धातुभिश्च विचित्रितैः

सूत उवाच ॥ परीक्षितैवं स तु बादरायणिः प्रायोपविष्टेन कथासु चोदितः ॥ उवाच विप्राः प्रतिनंद्य पार्थिवं मुदा मुनीनां स
दसि स्म शृण्वतां ॥ ३३ ॥ इति श्रीभागवते महापुराणेऽष्टमस्कंधे मन्वंतरानुवर्णने प्रथमोऽध्यायः ॥ १ ॥ ॥ श्रीशुक उवाच ॥ ॥
आसीद्गिरिवरो राजंस्त्रिकूट इति विश्रुतः ॥ क्षीरोदेनावृतः श्रीमान् योजनायुतमुच्छ्रितः ॥ १ ॥ तावता विस्तृतः पर्यक् त्रिभिः शृंगैः
पयोनिधिं ॥ दिशः खं रोचयन्नास्ते रौप्यायसहिरण्मयैः ॥ २ ॥ अन्यैश्च ककुभः सर्वा रत्नधातुविचित्रितैः ॥ नानाद्रुमलतागुल्मै
र्निर्घोषैर्निर्झरांभसां ॥ ३ ॥ स चावनिज्यमानांघ्रिः समंतात्पयऊर्मिभिः ॥ करोति श्यामलां भूमिं हरिन्मरकताश्मभिः ॥ ४ ॥ सिद्धचा
रणगंधर्वविद्याधरमहोरगैः ॥ किन्नरैरप्सरोभिश्च क्रीडद्भिर्जुष्टकंदरः ॥ ५ ॥ यत्र संगीतसन्नादैर्नदद्गुहममर्षया ॥ अभिगर्जंति
हरयः ॥ श्लाघिनः परशंकया ॥ ६ ॥ नानारण्यपशुव्रातसंकुलद्रोण्यलंकृतः ॥ चित्रद्रुमसुरोद्यानकलकंठविहंगमः ॥ ७ ॥ ॥

नानाविधा द्रुमलतानां गुल्मा येषु तैः ॥ ३ ॥ पयसः ऊर्मिभिः समंतादवनिज्यमाना अंघ्रयो मूलप्रांता यस्य हरिद्भिः पाषाणावयवैः ॥ ४ ॥ ५ ॥ किंनरा
दीनां संगीतसन्नादैर्नदंत्यो गुहा यस्मिन् प्रदेशे तं ॥ अभिगर्जंति हरयः ॥ सिंहाः ॥ अमर्षया असहनेन ॥ ६ ॥ नानारण्याः पशवः तेषां व्रा
तैः संकुलाभिः द्रोणीभिः अलंकृतः आस्ते ॥ किंच ॥ चित्रा द्रुमा येषु सुरोद्यानेषु कलकंठा मधुरस्वना विहंगमा यस्मिन् ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यां-स्त्र ४

किंच। स्वच्छोदकैः सरितः सरोभिर्युतः। मणयश्च वालुकायेषु तैः पुलिनैश्च युतः। देवस्त्रीणां मकरन्देन यः आमोदः तेन सौरभ्ययुक्तानि अंबूनि
नितान्तं श्वेतैश्च युतः आस्ते। ७। तस्य वरुणस्योद्यानमस्ति। ८। गिरिवनादिसंबंधमेयमितिवक्ष्यति। अतो गिरिमुपवर्ण्य वनं वर्णयिति सर्व
तोलंकृतमिति। पुनर्गिरिं वर्णयति। मंदारैरित्यादिचतुर्भिः। मंदरादिभिर्वृत इत्यन्वयः। १०। १३। तस्मिन् गिरौ सरश्चास्ति तद्वर्णयिति सुविपुलं इत्य

पद्मसर४ ... कुवनाराच्छक्ष४ ... मोह३

सरस्सरो निरच्छोदैः पुलिनैर्मणिवालुकैः। देवस्त्रीमकरन्दामोदसौरभाम्बुनिलैर्युतः। ७। तस्य द्रोण्यां नगेन्द्रस्य वरुणस्य महात्मनः। उ
द्यानमृतुमन्नाम आक्रीडं सुरयोषिताम्। ८। सर्वतोलंकृतं दिव्यैर्नित्यपुष्पफलद्रुमैः। मंदारैः पारिजातैश्च पाटलाशोकचंपकैः। १०
चूतैः प्रियालैः पनसैराम्रैराम्रातकैरपि क्रमुकैर्नालिकेरैश्च खर्जूरैर्बीजपूरकैः। मधुकैः खर्जूरैस्तालैश्च तमालैरसनार्जुनैः। अरि
ष्टोदुंबरप्लक्षैर्वटैः किंशुकचंदनैः। १२। पिचुमंदैः कोविदारैः सरलैः सुरदारुभिः। द्राक्षेक्षुरंभाजंबूभिर्बदर्यक्षाभयामलैः। १३। बि
ल्वैः कपित्थैर्जंबीरैर्वृतो भल्लातकादिभिः। तस्मिन् सरः सुविपुलं लसत्कांचनपंकजम्। १४। कुमुदोत्पलकह्लारशतपत्रश्रियो
र्जितम्। मत्तषट्पदनिर्घुष्टं शकुंतैश्च कलस्वनैः। १५। हंसकारंडवाकीर्णं चक्राह्वैः सारसैरपि। जलकुक्कुटकोयष्टिदात्यूहकुल
कूजितम्। १६। मत्स्यकच्छपसंचारचल... त्पद्मरजःपयः। कदंबवेतसनलनीपवंजुलकैर्वृतम्। १७। कुंदैः कुरुबकाशोकैः शिरीषैः कुटजें
गुदैः। कुब्जकैः स्वर्णयूथीभिर्नागपुंनागजातिभिः। १८। मल्लिकाशतपत्रैश्च माधवीजालकादिभिः। शोभितं तीरजैश्चान्यैर्नित्यर्तुभिरलं द्रु
मैः। १९।

ऋद्धि ... भिः। ... लभ्य ... शरण ... किंशुकं ... मरुतो ... भिः

१ चारोळि ... २ बृहत्पर्णपिंपरी निंबोणी ३ ... सालानिंब२ रिठाच्छक३

दिव्यादिः पंचभिः। लसंति कांचनपंकजानि यस्मिन्। १४। कुमुदा...दीनां श्रिया ऊर्जितं कलः स्वनो येषां तैः शकुंतैश्च निर्घुष्टम्। १५॥
चक्राह्वैः सारसैः आकीर्णं जलकुक्कुटादीनां कुलैः कूजितम्। १६। मत्स्यानां कच्छपानां च संचारेण चलतां पद्मानां रजसा युक्तं पयो यस्मिन् तत्। १७।
१८। नित्यर्तवः फलपुष्पाणि संपादितवन्तो येषां तैः अलंकृतम्। १९॥ ॥ राम ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रैवं सति एकदा तत् गिरिकाननाश्रयो वारणो यूथपः। करेणुभिश्चरन्तृषार्दितेन यूथेन वृतः सरोवरस्याभ्यासं समीपमगात् सदिति पंचमेना

न्वयः किंकुर्वन् कीचकवेणुवेत्रवंतं वि शालंगुल्मं लतादिसंदर्नं वनस्पतींश्च प्ररुजन् प्रभंजन्।२०। कथंभूतः यस्य गंधमात्राद्धरयः। सिंहा

तत्रैकदा तद्गिरिकाननाश्रयः करेणुभिर्वारणयूथपश्चरन्। सकंटकान्कीचकवेणुवेत्रवत् विशालगुल्मं प्ररुजन्वनस्पती
न्।२०। यद्गंधमात्राद्धरयो गजेंद्रा व्याघ्रादयो व्यालमृगाः सखड्गाः। महोरगाश्चापि भयाद्द्रवंति सगौरकृष्णाः सरभाश्चमर्यः।२१।वृ
कावराहा महिषर्क्षशल्या गोपुच्छशालावृकमर्कटाश्च। अन्यत्र क्षुद्रा हरिणाः शशादयश्चरंत्यभीता यदनुग्रहेण।२२। स घर्मतप्तः
करिभिः करेणुभिर्वृतो मदच्युत्कलभैरनुद्रुतः। गिरिं गरिम्णा परितः प्रकंपयन् निषेव्यमाणोऽलिकुलैर्मदाशनैः।२३। सरो
निलं पंकजरेणुरूषितं जिघ्रन्विदूरान्मदविह्वलेक्षणः। वृतः स्वयूथेन तृषार्दितेन तत्सरोवराभ्याशमथागमद्द्रुतं।२४। वि
गाह्य तस्मिन्नमृतांबु निर्मलं हेमारविंदोत्पलरेणुवासितं। पपौ निकामं निजपुष्करोद्धृतमात्मानमद्भिः स्नपयन् गतक्लमः।
२५। स्वपुष्करेणोद्धृतसीकरांबुभिर्निपाययन्संस्नपयन्यथा गृही। घृणी करेणूः कलभांश्च दुर्मदो नाचष्ट कृच्छ्रं कृपणोऽजमाय
या।२६। तं तत्र कश्चिन्नृप दैवचोदितो ग्राहो बलीयांश्चरणे रुषाग्रहीत्। यदृच्छयैवं व्यसनं गतौ यथाबलं सोऽतिबलो विचक्रमे।२७। गजो
तथातुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा। विचुक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्रहास्तारयितुं न चाशकन्
।२८।

गजेंद्रादयश्च भयात् द्रवंति पलायंते।२१। वृकादयस्तु क्षुद्राः अल्पप्राणिनः अन्यत्र तत् दृष्टिपर्यंत स्थाच्चरंति।२२। पुनः कीदृशः घर्मतप्तः
मदच्युत् सदस्राबी मदमश्नंति ते तथा तैः।२३।२४। निजेन पुष्करेण कराग्रेणोद्धृतं गतक्लमः सन्। निकामं पपौ।२५।२६। दीनधियः करेणवः। तं केव
लं विचुक्रुशुः।८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनतस्माद्ग्राहशक्तिः बलंशारीरं उजः ऐंद्रियंतेषांसकलंबलादिविपर्ययोविपरीतंअधिकंजलौकसोग्राहस्य ३० सइत्थंयदाप्राणस्यसंकटमा
पर्यंतोदेही ३१ बुद्धिमिवाह नमामितिअहंनचप्रभवामियतःग्राहरूपेणकेवलंविधातुःपाशेनाहतः तथापितंपरंपरमेश्वरंपरेषांब्रह्मादी
नांआश्रयनमाश्रयन्नूतंशरणंयामि ३२ कोसौयंशरणंयामि तत्राह यःकश्चनेति अंतकःएवोरगः तस्मात्तंशरणमीमहि व्रजे मयजं

नियुध्यतोरेवमिभेंद्रनक्रयोर्विकर्षतोरंतरतोबहिर्मिथः समाः सहस्रंव्यगमन्महीपते सप्राणयोश्चित्रममंसतामराः ३०
ततोगजेंद्रस्यमनोबलौजसांकालेनदीर्घेणमहानभूत्व्ययः विकृष्यमाणस्यजलेवसीदतोविपर्ययोभूत्सकलंजलौकसः
३१ यंगजेंद्रःसयदाप्रसंकटंप्राणस्यदेहीविवशोयदृच्छया अपारयन्नात्मविमोक्षणेचिरंदध्याविमांबुद्धिमथाभ्यप
द्यत ३२ नमामिमेज्ञातयआतुरंगजाःकुतःकरिण्यःप्रभवंतिमोचितुं ग्राहेणपाशेनविधातुरावृतोप्यहंचतंयामि
परंपरायणं ३३ यःकश्चनेशोबलिनोंतकोरगात्प्रचंडवेगादभिधावतोभृशं भीतंप्रपन्नंपरिपातियद्भयात्मृत्युः
प्रधावत्यरणंतमीमहि ३४ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेमन्वंतरानुवर्णनेगजेंद्रोपाख्यानेद्वितीयोध्यायः
श्रीशुकउवाच एवंव्यवसितोबुध्यासमाधायमनो हृदि जजापपरमंजाप्यंप्राग्जन्मन्यनुशिक्षितं १

याहिस्मत्रश्रुतिः भीषास्माद्वातःपवतेभीषोदेतिसूर्यः भीषास्मादग्निश्चेंद्रश्चमृत्युर्धावतिपंचमइति ३४ इतिअष्टमेद्वितीयः तृतीये
तुगजेंद्रेणस्तुतोहरिःरिपुपेत्सतं समुद्दधारतंग्राहाद्ग्राहंदेवलशापतः प्राप्यंजपंस्तोत्रंप्राग्जन्मनिइंद्रद्युम्नसंज्ञे १ राम
५

तस्मैनमोनमनं अभिधीमहि अभिध्यायेम केवलं आड्गृहीतत्वेन कायप्रणतेरशक्यत्वात् स्वस्यतत्ज्ञानं संभावयितुं विशिनष्टि यतइति चिद्रूपा
त् एतद्देहादि चिदात्मकं चेतनं भवति तदुक्तं येन चेतयते विश्वमिति॥ तत्र हेतुः। पुरुषाय पूर्णुकारणत्वेन प्रविष्टाय। ननु प्रकृतिपुरुषौ
कारणमिति प्रसिद्धं। तत्राह। आदिः प्रकृतिः बीजं पुरुषः। तद्रूपाय प्रविष्टत्वेपि जीववत्संसारं तं संवारयति परेशायेति। २ परमैश्वर्यं विष्ट
एवमाह। यावत्समाप्ति। यस्मिन्नधिष्ठाने यत उपादानात्। येन कर्त्रा यश्च स्वयमेवेदं विश्वं भवति। अस्मात्कार्यात् परस्मात्कारणाच्च यः

गजेंद्र उवाच॥ ॐ नमो भगवते तस्मै यत एतच्चिदात्मकं। पुरुषायादिबीजाय परेशायाभिधीमहि। २। यस्मिन्निदं यतश्चेदं
येनेदं य इदं स्वयं॥ योस्मात्परस्माच्च परस्तं प्रपद्ये स्वयंभुवं।३। यः स्वात्मनीदं निजमाययार्पितं क्वचिद्विभातं क्व च तत्तिरोहितं
अविद्धदृक्साक्ष्युभयं तदीक्षते स आत्ममूलोवतु मां परात्परः॥ कालेन पंचत्वमितेषु कृत्स्नशो लोकेषु पालेषु च सर्वहेतुषु
तमस्तदासीद्गहनं गभीरं यस्तस्य पारेभिविराजते विभुः।५॥ ॥

परस्तं स्वयंभुवं स्वतःसिद्धं प्रपद्ये शरणं व्रजामि।३। विश्वहेतुत्वं स्वतः।सिद्धत्वं चोक्तं इदानीं विश्वप्रकाशकत्वं स्वप्रकाशकत्वं च वर्णयन्नाश्रयि
ते। यतः स्वात्मनीति विभातं अभिव्यक्तं सत् क्वचित्प्रलये तिरोहितं लीनं सत्। तदुभयं कार्यकारणं च साक्षी सन्नीक्षते हेतुः। अविद्धदृक्
लुप्तदृष्टिः। आत्ममूलः स्वप्रकाशः कुतः परात्प्रकाशकाच्चक्षुरादेरपि परः। तस्यापि प्रकाशक इत्यर्थः। चक्षुषश्चक्षुरित्यादिश्रुतेः।४। तिरो
हितमीश्वलस्येन तत्पंचपूर्वकं दुर्ज्ञेयत्वं वदन्प्रार्थयते। कालेनेति लोकानां। पंचत्वमितेषु नाशं प्राप्तेषु गहनं दुरवगाहं। गंभीरमनंतं। त
मस्तमसः। आदित्यवर्णं तमसः परस्तादिति श्रुतेः।५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा०म
६

अतएवदेवादयोस्यस्वरूपंनविदुःजंतुरर्वाचीनःकोपिगंतुंज्ञातुंईरितुंव०६दुरत्ययंदुर्गममनुक्रमणंचरितंकथनंवायस्यसः।मामां
स्वकथंतर्हितमेवविदित्वातिमृत्युमेतीत्यादिश्रुतिरित्याशंक्यतत्ज्ञानोपायंकथयन्नाह।दिदृक्षवइति।अलोकव्रतंब्रह्मचर्यादि।अव्रणंअछिद्रं
भूतानामात्मभूताः।भूतेष्वात्मदृष्टयःसंतःसमेगतिरस्तु।७।दुरत्ययानुक्रमणत्वंप्रपंचयन्नणमति।नविद्यतइत्यादिना।लोकानामप्ययः
प्रलयःसंभवोजन्मतयोर्देवैकंतदर्थंयस्तानिजन्मादीनिस्वीकरोतितस्मैनमइत्युत्तरेणान्वयः।८।ब्रह्मणेब्रह्मरूपाय।अनंतशक्तये

नयस्यदेवाऋषयःपदंविदुर्जंतुःपुनःकोर्हतिगंतुमीरितुं।यथानटस्याकृतिभिर्विचेष्टतोदुरत्ययानुक्रमणःसमावतु।६।
दिदृक्षवोयस्यपदंसुमंगलंविमुक्तसंगामुनयःसुसाधवः।चरंत्यलोकव्रतमव्रणंवनेभूतात्मभूताःसुहृदःसमेगतिः।७।नवि
द्यतेयस्यचजन्मकर्मवानन्नामरूपेगुणदोषएववा।तथापिलोकाप्ययसंभवाययःस्वमाययातान्यनुकालमृच्छति।८।तस्मै
नमःपरेशायब्रह्मणेनंतशक्तये।अरूपायोरुरूपायनमआश्चर्यकर्मणे।९।नमआत्मप्रदीपायसाक्षिणेपरमात्मने
नमोगिरांविदूरायमनसश्चेतसामपि।१०।सत्वेनप्रतिलभ्यायनैःकर्म्येणविपश्चिता।नमःकैवल्यनाथायनिर्वाणसुखसंवि
दे।११।
चरूपाय
उरुरूपायबहुरूपायअत्राश्चर्याणिकर्माणियस्यतस्मैपरेशायनमः।९।आत्मप्रदीपायप्रकाशांतरस्याविषयाय।कुतःसाक्षिणेप्रका
शाय।परमात्मनेजीवनियंत्रे।अतएवगिरांविदूरायअवाप्याप्यचेतसांचित्तवृत्तीनां।तथाचश्रुतिः।यतोवाचोनिवर्तंतेअप्राप्यमनसासहे
ति।१०।एवमपिविपश्चितानिपुणेननैःकर्म्येणसंन्यासेन।सत्वेनशुद्धेनसंन्यासयोगाद्यतयःशुद्धसत्वाइतिश्रुतेः।प्रतिलभ्यायप्रत्यक्त्वेन राम
प्राप्याय।निर्वाणसुखसंविदेमोक्षानंदानुभूतये।११। ॥ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणधर्म्मिणे। सत्वादिधर्म्मानुकारिणे। ज्ञानघनाय चेति निर्विशेषत्वेपि प्रधानवैलक्षण्यमुक्तं। १२। साक्षिण इति सर्व्वाध्यक्षत्वेपि निर्विकारत्वमुक्तं
आत्मनां हेतुज्ञानां मूलाय। मूलस्य प्रधानस्यापि प्रकृतये उद्भवहेतवे। तत्र हेतुः पुरुषाय पूर्व्वमेव सते। तथा च श्रुतिः। पूर्व्वमेवाहमिहा
समिति तत्पुरुषस्य पुरुषत्वमिति पूर्णायेति वा। १३। सर्व्वेन्द्रियाणां ये गुणाः। विषयास्तेषां द्रष्ट्रे सर्व्वे प्रत्यया इंद्रियवृत्तयो हेतवो ज्ञापका
य(स्य) तस्मै। तदेवाह असताहंकारादिप्रपंचेन छायया। सद्रूपया उक्ताय प्रतिबिंबेन बिंबमिव सूचिताय। तत्र हेतुः सद्रूपो विषये

नमः शांताय घोराय मूढाय गुणधर्म्मिणे। निर्व्विशेषाय साम्याय नमो ज्ञानघनाय च। १२। क्षेत्रज्ञाय नमस्तुभ्यं सर्व्वाध्यक्षा
यसाक्षिणे। पुरुषायात्ममूलाय मूलप्रकृतये नमः। १३। सर्व्वेंद्रियगुणद्रष्ट्रे सर्व्वप्रत्ययहेतवे॥ असताच्छाययोक्ताय सदा
भासाय ते नमः॥ १४॥ नमो नमस्तेऽखिलकारणाय निष्कारणायाद्भुतकारणाय॥ सर्व्वागमाम्नायमहार्णवाय नमोऽपवर्गाय
परायणाय॥ १५॥ ॥

ष्वाभासो यस्य तस्मै॥ तदुक्तं तृतीये यथा जलस्थ आभास इत्यादिना॥ पाठांतरे असतस्सच्छायया अध्यासेन अ(सा)क्ताय युक्ताय तदधिष्ठाना
येत्यर्थः। १४। अखिलकारणाय सर्व्वकारणरूपाय। अत एव स्वयं निष्कारणाय। कारणत्वेपि मृदादिविकारं वारयति। अद्भुतकारणा
येति एवंभूतत्वे प्रमाणमाह। सर्व्वे आगमाः पंचरात्रादयः। आम्नायाश्च वेदाः। तेषां महार्णवाय स्रोतसामिव पर्यवसानाय। अपवर्गा
यमोक्षरूपाय अतः परायणाय उत्तमानामाश्रयाय। १५॥ ॥
स्थाना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.स.
७

गुणाएवारणिस्तयाछन्नश्चिदूष्माबोधोज्ञानाग्निःतस्मैतेषांगुणानांक्षोभेकार्येविस्फूर्जितंबहिर्वृत्तिकंमानसंयस्यसोकामयतबहुस्यामि
तिश्रुतिः नैष्कर्म्यमात्मतत्वंतस्यभावेनभावनयाविवर्जिताआगमाविधिनिषेधलक्षणायैः तेषुस्वयमेवप्रकाशोयस्यतस्मै।१६ मादृक्मद्वि
धश्चासौप्रपन्नःपशुःतस्यपाशोविद्यातस्याविशेषेणमोक्षणंयेनतत्रयोग्यतामाह मुक्तायमोचनेहेतुःभूरिःकरुणायस्यअतस्तत्रार्थेत्र
लयायचअनलसायस्वांशेनअंतर्यामिरूपेणसर्वेषांतनुभृतांमनसिप्रतीतायप्रख्यातायप्रत्यक्दृक्तस्मैतथाचश्रुतिः यआत्म

गुणारणिछन्नचिदूष्मपायतत्क्षोभविस्फुर्जितमानसाय। नैष्कर्म्यभावेनविवर्जितागमस्वयंप्रकाशायनमस्करोमि १६
मादृक्प्रपन्नपशुपाशविमोक्षणायमुक्तायभूरिकरुणायनमोलयाय॥ स्वांशेनसर्वतनुभृन्मनसिप्रतीतप्रत्यग्दृशेभग
वतेबृहतेनमस्ते॥१७॥ आत्मात्मजाप्तगृहवित्तजनेषुसक्तैर्दुःप्रापणायगुणसंगविवर्जिताय॥ मुक्तात्मभिःस्वहृद
येपरिभावितायज्ञानात्मनेभगवतेनमईश्वराय॥१८॥ यंधर्मकामार्थविमुक्तिकामाभजंतइष्टांगतिमाप्नुवंति॥ किंत्वाशि
षोरात्यपिदेहमव्ययंकरोतुमेदभ्रदयोविमोक्षणं॥१९॥

नितिष्ठन् आत्मानमंतरोयमयतीति। भगवतेसर्वेषांतनुभृतांनि
सि यमनेसमर्थायतेषांमनसिस्थितत्वेपिबृहतेअपरिछिन्नाय॥१७॥ अंतस्थत्वेपिदेहादिषुआसक्तैर्दुःप्रापणायप्राप्तुमशक्याय। तत्रहेतुः। गुण
संगेनविवर्जिताय। अतएवमुक्तात्मभिः। देहादिषुनासक्तैश्चिंतितायतैः॥ परिभावितंरूपमाह। ज्ञानात्मनइत्यादि॥१८॥ इष्टांगतिंकामितं
धर्मादिफलंप्राप्नुवंत्येव॥ नतुतावदेवकिंतुयास्तैरकामिताअन्याअप्याशिषोरातिदेहमव्ययंराति। एवंयःअदभ्रदयःसमेविमोक्ष राम ७
णमेवकेवलंकरोतुनाधिकंप्रार्थये॥१९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतावद् हं न किंसुखानभिज्ञत्वेन वांछामि। यस्य एकांतिनः कंचिदर्थं वांछंति। तं परमीश्वरमीडे इति उत्तरेणान्वयः। तेषां निष्काम
वै त्वे हेतुः ये भगवतः सर्वज्ञान् मुक्तान् प्रपन्नाः सेवितवंतः २० अत्यद्भुतं सुमंगलत्वं प्रदर्शनार्थमक्षरत्वादिविशेषणानि। २१ परिपूर्णत्वं प्र
दर्शयन्नाह। त्रिभिः यस्येति फल्ग्व्या च स्वल्पयैव कलया। अंशेन कृताः संजाता इति तृतीयेनान्वयः २२ कथं कृता इत्यपेक्षायां दृष्टांतो

एकांतिनो यस्य न कंचनार्थं वांछंति ये वै भगवत्प्रपन्नाः। अत्यद्भुतं तच्चरितं सुमंगलं गायंत आनंदसमुद्रमग्नाः॥२०॥
तमक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यं। अतींद्रियं सूक्ष्ममिवातिदूरमनंतमाद्यं परिपूर्णमीडे॥२१॥ यस्य
ब्रह्मादयो देवा वेदा लोकाश्चराचराः। नामरूपविभेदेन फल्ग्व्या च कलया कृताः॥२२॥ यथार्चिषोऽग्नेः सवितुर्गभस्त
यो निर्यांति संयांत्यसकृत् स्वरोचिषः। तथा यतोऽयं गुणसंप्रवाहो बुद्धिर्मनः खानि शरीरसर्गाः॥२३॥ स वै न देवासुरम
र्त्यतिर्यङ् न स्त्री न षंढो न पुमान्न जंतुः। नायं गुणः कर्म न सन्न चासन् निषेधशेषो जयतादशेषः॥२४॥ ॥

यथार्चिषोऽग्नेरिति
प्रवाहे दृष्टांतः। सवितुर्गभस्तयश्च स्वानं स्वेन निर्यांति उद्गच्छंति संयांति लीयंते। गुणसंप्रवाहमेवाह। बुद्धिर्मनः खानीति करणानि शरीरसर्गाः
कार्यदेहप्रवाहाश्च यतो भवंति सः। २३ अत एव देवादीनां मध्ये कोपि न भवति। न जंतुः जिगत्वर्यश्च प्राणिमात्रमपि किंतु सर्वस्य निषेधे। स्व
वधित्वेन अवशिष्यत इति निषेधशेषः। मायया अशेषात्मकः जयतात् मद्विमोक्षणाय आविर्भवतु। २४॥ ॥श्रीराम॥ ॥श्री॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ग्र
८

नचयाहाच्छरीरस्य मोक्षणेनाहं जीवितुमिच्छामि। तत्र हेतुः अमुया अंतर्बहिश्चाविवेकव्याप्तया गजजात्या किं प्रयोजनं आत्मलोकस्य आत्म
प्रकाशस्य यः संवरणं अज्ञानं तस्यैव तु मोक्षमिच्छामि। यस्य मोक्षस्य कालेन नाशो नास्ति। यद्वा देहस्य संबंधी देहनाशेन नश्येदेव किं तन्मोक्ष
प्रार्थनेन आत्मलोकावरणस्य तु कालेन विप्लवो नास्ति ज्ञानैकनिवर्त्यत्वात्। अतस्तस्यैव मोक्षमिच्छामीत्यर्थः। २५ सोऽहं मुमुक्षुः विश्वं विश्वरू
पं अविश्वं विश्वव्यतिरिक्तं च विश्वं वेदो धनं च प्रकरणं यस्य तं विश्वस्यात्मानं च केवलं प्रणतोऽस्मि। न तु तं जानामि। २६ योगं विना दुर्ज्ञेय

जिजीविषे नाहमिहामुया किमंतर्बहिश्चावृतयेभयोन्या। इच्छामि कालेन न यस्य वि[illegible]वस्तस्यात्मलोकावरणस्य मोक्षं। २५। ग्र
सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदसं। विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदं। २६ योगरंधितकर्म्माणो हृदि योगविभावि
ते। योगिनो यं प्रपश्यंति योगेशं तं नतोऽस्म्यहं। २७ नमो नमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय। प्रपन्नपालाय
दुरंतशक्तये कदिंद्रियाणामनवाप्यवर्त्मने। २८। नायं वेद स्वमात्मानं यच्छक्त्याहंधिया हतं। तं दुरत्ययमाहात्म्यं भगवंतमितो
स्म्यहं। २९।।

त्वाहित्याह। योगेन भगवद्धर्मेण रंधितानि दग्धानि कर्माणि येषां ते यं प्रपश्यंति। २७ तर्हि सर्वेपि योगमेव किं नाश्रिताः।।
तत्राह। नम इति द्वाभ्यां असह्यो वेगो रागादिलक्षणो यस्य तथाभूतशक्तित्रयं यस्य तस्मै। बहिश्च अखिलधियां सर्वेंद्रियाणां गुणाय तत्र शब्दा
दिरूपेण प्रतीयमानाय। अतः कदिंद्रियाणां कुत्सितानां इंद्रियाणां येषां तेषामनवाप्यं वर्त्म यस्य। २८ यच्छक्त्या यस्य मायया अहंधीः तया राम
हतं आवृतं अयं जनो न वेद दुरत्ययं माहात्म्यं यस्य तं इतः आश्रितोऽस्मि। २९।। ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपवर्णितं निर्विशेषं मूर्त्तिभिदं विना परं तत्त्वं येन तं विविधा चासौ लिंगभिदा मूर्त्तिभेदः । तस्या मत्तिमानो येषां ते अत एते यदा नोपजग्मुस्तत्र तदा आखि
लामरमयः सर्वदेवमयमूर्त्तिः ॥३०॥ दिविजैर्देवैः सहच्छंदोमयेन तित्रौ आयोक्तं ॥३१॥ खे दृष्ट्वा उपात्तं उद्यतं चक्रं येन ॥३१॥ गरुडोपि मंदगतिरिति तत
ः सहसावतीर्य अरिणा चक्रेण विपाटितं मुखं यस्य उच्छ्रियाणां देवानां ॥३३॥ इति श्रीअष्टमे तृतीयः ॥ ॥ चतुर्थे तु तयोर्ग्राहः आप गंधर्वतां पुनः ग

श्रीशुक उवाच ॥ एवं गजेंद्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिंगभिदाभिमानाः । नैते यदोपससृपुर्निखिलात्मकत्वात्तत्राखिला
मरमयो हरिराविरासीत् ॥३०॥ तं तद्वदार्त्तमुपलभ्य जगन्निवासः स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः । छंदोमयेन गरुडेन समु
ह्यमानश्चक्रायुधोभ्यगमदा[शु] यतो गजेंद्रः ॥३१॥ सोंतःसरस्युरुबलेन गृहीत आर्त्तो दृष्ट्वा गरु[त्म]ति हरिं ख उपात्तचक्रं । उ
त्क्षिप्य सांबुजकरं गिरमाह कृच्छ्रान्नारायणाखिलगुरो भगवन्नमस्ते ॥३२॥ तं वीक्ष्य पीडितमजः सहसावतीर्य सग्राहमाशु सरसः
कृपयोज्जहार । ग्राहाद्विपाटितमुखा[द]रिणा गजेंद्रं संपश्यतां हरिरमूमुचदुस्त्रियाणां ॥३३॥ ॥ इति श्रीभागवते महापुराणे
अष्टमस्कंधे गजेंद्रमोक्षणं नाम तृतीयोऽध्यायः ॥ ॥ श्रीशुक उवाच ॥ तदा देवर्षिगंधर्वा ब्रह्मेशानपुरोगमाः । मुमुचुः कुसुमासा
रं शंसंतः क[र्]म तद्धरेः ॥१॥ नेदुर्दुंदुभयो दिव्या गंधर्वा ननृतुर्जगुः । ऋषयश्चारणाः सिद्धास्तुष्टुवुः पुरुषोत्तमं ॥२॥ योसौ ग्राहः स वै
सद्यः परमाश्चर्यरूपधृक् । मुक्तो देवलशापेन हूहू गंधर्वसत्तमः ॥३॥

गजं स्वपार्षदं कृत्वा हरिर्निन्ये निजं पदं ॥१॥ हूहूसंज्ञो गंधर्वसत्तमः सौ देवलस्य शापेन ग्राहो जातः स एवैतत्र सद्यो मुक्तः सन् तत्र मोक्षोक्रमणा
यतेत्यन्वयः । एवं हि इतिहासो मेकथा सरसि स्त्रीभिः क्रीडन् सौ स्नातुं प्रविष्टं देवलं पादे प्रगृह्य आचकर्ष स च प्रकुपितो ग्राहो भवेति शशा
पतेन च प्रसादितः सन्नुवाच । एवमेव गजेंद्रं गृह्णीषत्त तश्च गजेंद्रमुद्धरन् हरिस्त्वामपि मोचयिष्यतीति ॥३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्कं० ८

कथंभूतं यत्र सो धर्मस्त आश्रयं यत इतः कीर्तन्याः कीर्तनीयाः गुणाः सती कथा च यस्य तं ॥४॥ स्वं लोकं गंधर्वलोकं ॥५॥ ७ ॥ कुलाचले मलयाख्यावा
श्रमो यस्य ॥८॥ तूष्णीं रहसि उपासीनं वीक्ष्य ॥९॥ शापमेवाह । असाधुरित्यादि । अकृतात्मा अशिक्षिता बुद्धिर्यस्य । गजो यथा स्तब्धमतिस्तथैवायं ॥

प्रणम्य शिरसाधीशमुत्तमश्लोकमव्ययं । अगायत यशोधाम कीर्तन्यगुणसत्कथं ॥४॥ सोऽनुकंपित ईशेन परिक्रम्य प्रणम्य
तं । लोकस्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः ॥५॥ गजेंद्रो भगवत्स्पर्शाद्विमुक्तोऽज्ञानबंधनात् । प्राप्तो भगवतो रूपं पीत
वासाश्चतुर्भुजः ॥६॥ स वै पूर्वमभूद्राजा पांड्यो द्रविडसत्तमः । इंद्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः ॥७॥ स एकदाराधनकाल
आत्मवान्गृहीतमौनव्रत ईश्वरं हरिं । जटाधरस्तापस आप्लुतोऽच्युतं समर्चयामास कुलाचलाश्रमः ॥८॥ यदृच्छया तत्र महा
यशा मुनिः समागमच्छिष्यगणैः परिश्रितः । तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषिश्चुकोप ह ॥९॥ तस्मा इमं शा
पमदादसाधुरयं दुरात्माकृतबुद्धिरद्य । विप्रावमंता विशतां तमोऽधं यथा गजः स्तब्धमतिः स एव ॥१०॥ श्रीशुक उवाच । एवं
शप्त्वा गतोऽगस्त्यो भगवान्नृप सानुगः । इंद्रद्युम्नोऽपि राजर्षिर्दिष्टं तदुपधारयन् ॥११॥ आपन्नः कौंजरीं योनिमात्मस्मृतिविनाशिनीं
हर्यर्चनानुभावेन यद्गजत्वेऽप्यनुस्मृतिः ॥१२॥ एवं विमोक्ष्य गजयूथपमब्जनाभस्तेनापि पार्षदगतिं गमितेन युक्तः । गंधर्वसिद्धवि
बुधैरुपगीयमानकर्माद्भुतं स्वभवनं गरुडासनोऽगात् ॥१३॥ एतन्महाराज तवेरितो मया कृष्णानुभावो गजराजमोक्षणं ।
स्वर्ग्यं यशस्यं कलिकल्मषापहं दुःस्वप्ननाशं कुरुवर्य शृण्वतां ॥१४॥

अतः स एव गज एव भवतु इति विशेषः ॥१०॥ दिष्टं दैवप्रापितं तदु
पधारयन्नालोचयन् ॥११॥ कौंजरीं योनिमापन्नः तर्हि पश्चात्कथं स्मृतिर्जाता तत्राह । हरेरर्चनस्यानुभावेनेति ॥ अद्भुतं स्वभवनमगात् ॥
१३॥ एतन्गजराजमोक्षणं नाम कृष्णानुभावस्तवेरितः ॥ कथंभूतं तत्राह स्वर्ग्यमित्यादि दुःस्वप्नं नाशयतीति तथा ॥१४॥

राम ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतः श्रेयस्कामा एतद्यथावदनुकीर्त्तयंति ।१४। अनेन श्रेयो भवतीति कुतो ज्ञानं साक्षाद्भगवद्वचनादित्याह । इदमाहेत्यादि यावत्सम्मा
सि ।१५। उपसंगादन्यापि स्मरणे फलमुच्यते सर्वेषां द्वितीयांतानां स्मरंतीत्यष्टमेनान्वयः ।१७।२१। अव्यक्तं मायां अस्मयं धर्म्मं नकिलनज्ञ्याणां सो

यथानुकीर्त्तयंत्येतच्छ्रेयस्कामा द्विजातयः । शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशांतये ।१५। इदमाह हरिः प्रीतो गजेंद्रं कुरुसत्तम । शृण्व
तां सर्वभूतानां सर्वभूतमयो विभुः ।१६। श्रीभगवानुवाच । ये मां त्वां च सरश्चेदं गिरिकंदरकाननं । वेत्रकीचकवेणूनां गुल्मानि सुरपा
दपान् ।१७। शृंगाणीमानि धिष्ण्यानि ब्रह्मणो मे शिवस्य च । क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरं ।१८। श्रीवत्सं कौस्तुभं मालां गदां
[illegible] कौमोदकीं मम । सुदर्शनं पांचजन्यं सुपर्णं पतगेश्वरं ।।१९। शेषं च मत्कलां सूक्ष्मां श्रियं देवीं मदाश्रयां । ब्रह्माणं नारद
मृषिं भवं प्रह्लादमेव च ।२०। मत्स्यकूर्मवराहाद्यैरवतारैः कृतानि मे । कर्माण्यनंतपुण्यानि सूर्यं सोमं हुताशनं ।२१। प्रणवं सत्य
मव्यक्तं गोविप्रान् धर्म्ममव्ययं । दाक्षायणीर्धर्म्मपत्नीः सोमकश्यपयोरपि ।२२। गंगां सरस्वतीं नंदां कालिंदीं सितवारणं । ध्रुवं सप्त
ऋषीन्सप्त पुण्यश्लोकांश्च मानवान् ।२३। उत्थायापररात्रांते प्रयताः सुसमाहिताः । स्मरंति मम रूपाणि मुच्यंते ह्येनसोखिलात् ।
२४। ये मां स्तुवंत्यनेनांग प्रतिबुध्य निशात्यये । तेषां प्राणात्यये चाहं ददामि विमलां मतिं ।२५। श्रीशुक उवाच । इत्यादिश्य हृषीके
शः प्रध्माय जलजोत्तमं । हर्षयन् विबुधानीकमारुरोह खगाधिपं ।२६। ।।इति श्रीभागवते महापुराणे अष्टमस्कंधे चतुर्थोऽध्यायः

मकश्यपयोरपि पत्नीर्हि दाक्षायणीः ।२२। सितवारणमैरावतं ।२३। सुसमाहिताः एकाग्रचित्ताः मम रूपाणि मद्विभूतीः ।२४।२५। जलजोत्तमं शंख
रवरं प्रध्माय वादयित्वा ।२६। ।।इति अष्टमे चतुर्थोध्यायः।। ।।४।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ अ॰ १०
अमृताख्यानमष्टाभिरध्यायैरनुवर्ण्यते। स्वभक्तपक्षपातेन यत्र योषायितं प्रभोः॥१॥ पंचमे पंचमं चाथ षष्ठं वा कथयन्मनुं। विभुरत्रापाच्च तिः श्रीकैः
कृतां देवैर्हरिस्तुतिं॥२॥ तामसस्यानुजो मनुः तस्य सोदरः भ्राता॥५॥ तस्य वैकुंठसंज्ञस्य हरेरनुभावः। सनकादिशापेन दैत्यतां प्राप्ताभ्यां स्वपार्षदाभ्यां वाराहा पा

॥श्रीशुक उवाच॥ राजन्नुदितमेतत्ते हरेः कर्माघनाशनं। गजेंद्रमोक्षणं पुण्यं रैवतं त्वंतरं शृणु॥१॥ पंचमो रैवतो नाम मनुस्तामसस
ोदरः। बलिविंध्यादयस्तस्य सुताश्चार्जुनपूर्वकाः॥२॥ विभुरिंद्रः सुरगणा राजन् भूतरयादयः। हिरण्यरोमा वेदशिरा ऊर्ध्वबाह्वा
दयो द्विजाः॥३॥ पत्नी विकुंठा शुभ्रस्य वैकुंठैः सुरसत्तमैः। तयोः स्वकलया जज्ञे वैकुंठो भगवान् स्वयं॥४॥ वैकुंठः कल्पितो येन लोको लो
कनमस्कृतः। रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया॥५॥ तस्यानुभावः कथितो गुणाश्च परमोदयाः। भौमान् रेणून् स विममे यो
विष्णोर्वर्णयेद्गुणान्। षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः। पूरुः पूरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः॥७॥ इंद्रो मंत्रद्रुमस्तत्र
देवा आप्यादयो गणाः। मुनयस्तत्र वै राजन् हविष्मद्वीरकादयः॥८॥ तत्रापि देवः संभूत्यां वैराजस्याभवत्सुतः। अजितो नाम भ
गवानंशेन जगतः पतिः॥९॥ पयोधिं येन निर्मथ्य सुराणां साधिता सुधा॥ भ्रममाणोंऽभसि धृतः कूर्मरूपेण मंदरः॥१०॥
राजोवाच॥ यथा भगवता ब्रह्मन् मथितः क्षीरसागरः। यदर्थं वा यतश्चाद्रिं दधारांबुचरात्मना॥११॥ यथामृतं सुरैः प्राप्तं किं
चान्यदभवत्ततः॥ एतद्भगवतः कर्म वदस्व परमाद्भुतं। त्वया संकथ्यमानेन महिम्ना सात्वतां पते। नातितृप्यति मे चि
त्तं सुचिरं तापतापितं॥१३॥

हादिरूपेण युद्धादिलक्षणः गुणाश्च ब्रह्मण्यतादयः परमोदयाश्च महदैश्वर्यः कथिताः तृतीयस्कंधादिषु॥६॥१० राम
यतो हेतोः। अंबुचरात्मना कूर्मरूपेण॥११॥ सुराणां साधिता सुधेत्युक्ता यु[illegible] च्चयपि सूचितं। अतः पृच्छति किंचान्यदिति॥१२॥१३॥ १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोतिष्ठेरन्ननुपुनर्जीवंतिस्मेत्यर्थः॥१५॥दुर्वाससा हि कदाचिन्मार्गे गच्छंतमिंद्रं दृष्ट्वा स्वकंठस्थां मालां तस्मै दत्तां तेन च श्रीमदेनानादृत्यैरावतस्य
कुंभे न्यधात्तयोश्चि क्षिप्तास्वगजो मत्तः पद्भ्यां तां मालां चूर्णीचकार ततः कुपितो दुर्वासास्तं शशाप त्रिनि लोकैः सह निःश्रीको भवेति तदेतदाह य
दा दुर्वाससः शापेनेति इत्यादयः या गाथाः॥१६॥असुरान्यथा दैववैलक्षण्येन बलपुष्ट्यादियुक्तान् विलोक्येत्यर्थः॥हरिं शरणं गताः संतो

सूत उवाच॥संतुष्टो भगवानेवं द्वैपायनसुतो द्विजाः॥अभिनंद्य हरेर्वीर्यमभ्याचष्टुं प्रचक्रमे॥१४॥श्रीशुक उवाच॥यदा युद्धेसु
रैर्देवा बाध्यमानाः शितायुधैः॥गतासवो निपतिता नोत्तिष्ठेरन्स्म भूयसा॥१५॥यदा दुर्वासः शापेन सेंद्रा लोकास्त्रयो नृप॥निः
श्रीकाश्चाभवंस्तत्र नेशुरिज्यादयः क्रियाः॥१६॥निशाम्यैतत्सुरगणा महेंद्रवरुणादयः॥नाध्यगच्छन्स्वयं मंत्रैर्मंत्रयंतो विनिश्चयं
१७ततो ब्रह्मसभां जग्मुर्मेरोर्मूर्धनि सर्वशः॥सर्वं विज्ञापयांचक्रुः प्रणताः परमेष्ठिने॥१८॥स विलोक्येंद्र वाय्वादीन्निःसत्वा
न्विगतप्रभान्॥लोकानमंगलप्रायानसुरानयथा विभुः॥१९॥समाहितेन मनसा संस्मरन्पुरुषं परं॥उवाचोत्फुल्लवद
भ नो देवान्स भगवान्परः॥२०॥अहं भवो यूयमथो सुरादयो मनुष्यतिर्यक्द्रुमघर्मजातयः॥यस्यावतारांशकलाविसर्जि
हरणीय ता व्रजाम सर्वे शरणं तमव्ययं॥२१॥न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयादरणीयपक्षः॥अथापि सर्गस्थितिसंयमार्थं धत्ते रजः
सत्वतमांसि काले॥२२॥अयं च तस्य स्थितिपालनक्षणः सत्वं जुषाणस्य भवाय देहिनां॥तस्माद्व्रजामः शरणं जगद्गुरुं स्वानां
स नो विधास्यति शं सुरप्रियः॥२३॥यथा पूर्वं सर्वं वाच्यमाश्चर्यं निहर्षेणोत्फुल्लं विकसितं वदनं यस्य॥२०॥मनुष्ये योजरायुजांडजोद्भिज्जस्वेदजाः॥यस्यावतार
पुरुषः तत्स्यांशो ब्रह्मा तस्य कलाः मरीच्यादयः तार्भिर्विसर्जिताः पुत्रपौत्रादिरूपाः राजनिता॥२१॥ननु तर्हि सर्वेषु समः स्यात् किं तच्छरणाश्र
येण सत्यं स एवं तथाप्यस्य सद्यः पाती न विष्मतीत्याशयेनाह न यस्येति द्वाभ्यां स्थितिपालनस्य क्षणः कालः अतः सुरप्रियः सन्स्वीयानां नः शं सुखं

यत्रक्षीराब्धौहरिर्वसत्तदेवतमसःपरंस्थानं।।यद्वा।।लोकालोकात्परतो यत्तमस्तत्परंस्थानंजगाम२४ दैवीभिः।लोकेऽप्रसिद्धाभिःवैदिकीभिर्गीर्
भिःस्तुतिमकरोत्।२५।देववरंत्वांनमाम हेदेववरंत्वांनमामेतिवावरेण्यहितुःसत्यंकुतः।अविक्रियंतत्कुतःअनंतंआद्यंतत्अनादिःआद्यंतत्को
हिहृद्याहिविक्रियानभवंति।किंचगुहाशयंसर्वांतरंकुतः।निष्कलंनिरुपाधितःकुतोऽप्रतर्क्यंतत्कुतः मनोग्रयानंमनसोपिजविष्ठंमनःप्रा
प्येस्थानेततःप्रागेवविद्यमानत्वात् तथाचश्रुतिः।अनेजदेकंमनसोजवीयोनैनद्देवाआप्नुवन्पूर्वमर्शत् तथावतोन्यानत्येतितिष्ठदि
तिवचसाचानिरुक्तं।अविषयत्वात् यद्वाचानभ्युदितंयेनवागभ्युद्यत इतिश्रुतेः।मनोवचसोरागोचरत्वादप्रतर्क्यंयियेष्टंवासर्वेषांहितहेतुमज्ञा

श्रीशुकउवाच।।इत्यादिष्यसुरान्वेधाःसहदेवैररिंदम।अजितस्यपदंसाक्षाज्जगामतमसःपरं।२४।तत्रादृष्टस्वरूपायश्रु
तपूर्वायवैविभोःस्तुतिमब्रूतदैवीभिर्गीर्भिस्त्ववहितेंद्रियः।२५।ब्रह्मोवाच।। ।अविक्रियंसत्यमनंतमाद्यंगुहाशयं
निष्कलमप्रतर्क्यं।मनोग्रयानंवचसानिरुक्तंनमा म्यहंदेववरंवरेण्यं।२६।विपश्चितंप्राणमनोधियात्मनामर्थेंद्रियाभा
समनिद्रमव्रणं।छायातपौयत्रनगृध्रपक्षौतमक्षरंखंत्रियुगंव्रजामहे।२७। ।।

वरं२६।किंचप्राणादीनांविपश्चितंज्ञातारं आत्माअहंकारोदेहोवानतुततमतिरिक्तंज्ञेयमस्तीत्याह।अर्थोविषयः।इंद्रियाणितद्ग्राहकाणित
द्रूपेणाभासतइतितथा।तंतथाप्यनिद्रंस्वप्नदृष्टवदज्ञानरहितंकुतः।अव्रणंअदेहंअतएवअक्षरंखमिवव्यापिनंच।सर्वचहेतुःय
त्रयस्मिन्गृध्रपक्षौजीवपक्षपातिनौछायातपौअविद्याचतन्निवर्तिकाविद्याचनाश्रितेत्रियुगेप्राविर्भवंतंशरणंव्रजामः।२७। ।। राम
११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवमविक्रियत्वादिभिः सर्वज्ञत्वादिभिश्च सत्यत्वं वरेण्यत्वं चोक्तं संसारचक्राधारत्वेनार्पितदेवदर्शयन्नाह। अजस्य जीवस्य चक्रं चक्रवदावर्त्तमानं देहादि अजया मायया प्रेर्यमाणं यतत्यः अधीयस्य यदधिष्ठानमाक्रम्य तस्मृते सत्यं प्रपद्ये कथंभूतं चक्रं मनोमयं मनःप्रधानं दशेंद्रियाणि पंच प्राणाश्चेत्येवं पंचदश अरा यस्य। आशु शीघ्रगं त्रयो गुणा नाभिरिव मध्ये यस्य विद्युदिव चलं अष्टौ प्रकृतयो नेमय इवावरणानि यस्य। रण्मस र्वजीवनियंतृत्वादिना च वरिष्टत्वमाह। यइति। यत् उपसुपर्णं जीवसमीपे तन्नियंतृत्वेन आसांचकार आस्तेस्म। द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजात इति श्रुतेः। यथा नक्ररक्षार्थं गरुडोऽस्योपरि उपविष्ट इत्यर्थः। तर्हि देहस्थत्वात् नक्ररक्षणादिक्रियावेशात् जीवसाम्यं स्या

अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पंचदशारमाशु। त्रिणानि विद्युच्चलमष्टनेमि यदक्षमाहुस्तमृतं प्रपद्ये॥२८॥ य एकवर्णं तमसः परं तदलोकमव्यक्तमनंतपारं। आसांचकारोपसुपर्णमेनमुपासते योगरथेन धीराः॥२९॥ न यस्य कश्चातितितर्ति मायां यया जनो मुह्यति वेद नार्थं। तं निर्जितात्मात्मगुणं परेशं नमाम भूतेषु समं चरंतं॥३०॥

त्तत्राह। एकवर्णं ज्ञानैकस्वरूपं तमसः प्रकृतेः परं। अलोकं च अदृश्यं अव्यक्तं निर्विकल्पं अनंतपारं कालतो देशतश्चापरिच्छिन्नं तत् ब्रह्मैव यः प्रच्युतस्वरूपत्वात् न जीवसाम्यं तयोरन्यः। पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति विशेषश्रवणादित्यर्थः। अत एव यं धीराः योगेन रथेन प्राप्तिसाधनेनोपासते तं जीवेतं नमामेत्युत्तरेणान्वयः॥२९॥ माया नियंतृत्वेनापि जीवसाम्यं परिहरन् वरिष्टत्वमाह। यस्य मायां कश्चन ... अपि नातिति तर्न्नि नातिक्रामति। कथंभूतां जनो यया मुह्यति स्वं यमात्मस्वरूपं न तु वेद निर्जित आत्मा आत्मशक्तिर्माया च तद्गुणाश्च येन तं॥३०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अर्थनिवेदेतियदुक्तंतत्प्रपंचयन्नाह।इमेवयंदेवाऋषयश्चयस्यप्रियया तन्वा मत्वेनैवसृष्टाअपिबहिरंतश्चसत्ता पृकाशाम्यामाविः प्रकटमपि
सूक्ष्मांगतिंनिरूपाधिस्वरूपंनविद्मः इतरप्रधानाः २अस्त्रमोमयाः कुतोविदुः।तंनमामेतिपूर्वेणान्वयः।३१।इदानींवैराजरूपेणस्तुवन्प्रार्थयति॥
पादौमहीतिषड्भिः।यच्चमर्त्यांजरायुजादिकृतसर्गःसामहीयस्यपादौसनःप्रसीदतु।आत्मतंत्रःपादादिमत्त्वेपिनतत्परतंत्रः कुतःभूतत्र
प्रच्युतरूपः।तत्कृतःमहतीविभूतिरैश्वर्यंयस्यसः।३२।उदारंवीर्यंशक्तिर्यस्यतदंनोयस्यरेतःसनःप्रसीदतु उदारवीर्यतामाहौंसंनासोलोका य॰

इमेवयंयत्प्रिययैवतन्वासत्वेनसृष्टाबहिरंतराविः।गतिनसूक्ष्मामृषयश्चविद्महेकुतोऽसुराद्याइतरप्रधानाः।३१।पादौमहीयं
स्वकृतैवयस्यचतुर्विधोयत्रहिभूतसर्गः।सवैमहापुरुषआत्मतंत्रःप्रसीदतांब्रह्ममहाविभूतिः।३२।अंभस्तुयद्रेतउदार
वीर्यंसिध्यंतिजीवंत्युतवर्द्धमानाः।लोकास्त्रयोथाखिललोकपालाःप्रसीदतांब्रह्ममहाविभूतिः।३३।सोमंमनोयस्यस
मामनंतिदिवौकसांवैबलमंधआयुः।ईशोनगानांप्रजनःप्रजानांप्रसीदतांनःसमहाविभूतिः।३४।अग्निर्मुखंयस्यतु
जातवेदाजातःक्रियाकांडनिमित्तजन्मा।अंतःसमुद्रेनुपचन्स्वधातून्प्रसीदतांनःसमहाविभूतिः।३५।

दयःसिध्यंतिजायंते।३३।यःसोमोदेवानामंधः।अन्नंअतएवबलमायुश्चनगानांवृक्षाणांप्रकर्षेणजनयतिवर्द्धयतीतिप्रजनःतंयस्यमनःसमाम
नंतिसनःप्रसीदतु।३४।अग्निर्यस्यतुमुखंजातःकथंभूतः।जातंवेदोधनंयस्मात्क्रियाकांडंतस्यतिपाद्यंकर्मतन्निमित्तंजन्मयस्यअंतःसमुद्रे राम
उदरमध्येस्व धातून्पाकाद्यनिवान्नादीनअनुपचन् ३सिंधुसमुद्रेपिवाडवरूपेणउदकान्येवानुपचन्नग्निः।३५। १२
घा

म्ह

एषतरणिर्यस्यचक्षुरासीत् कथंभूतः देवयानं अर्चिरादिमार्गदैवतात्रयीमयः सैषात्रय्येवविद्यातपतीतिश्रुतेः ब्रह्मणोधिष्ण्यंउपासनास्थानं
यएषोंतरादित्येहिरण्मयःपुरुषइतिश्रुतेः मुक्तेर्द्वारंदेवयानत्वात् अमृतंचपुण्यलोकत्वात् मृत्युश्चकालात्मकत्वात् एवंभूतस्तरणिर्यस्यच
क्षुःसःप्रसीदतु ३६ एवंभूतोवायुःचराचराणांसहओजआदिधर्मवान्प्राणः यंप्राणंवयंबुध्यामधिष्ठातारोदेवाःसंम्राजं नृपमिवअनुगाःअनु

यच्चक्षुरासीत्तरणिर्देवयानंत्रयीमयोब्रह्मणएषधिष्ण्यं द्वारंचमुक्तेरमृतंचमृत्युःप्रसीदतांनःसमहाविभूतिः ३६ प्रा
णादभूद्यस्यचराचराणांप्राणःसहोबलमोजश्चवायुः अन्वास्मसंम्राजमिवानुगावयंप्रसीदतांनःसमहाविभूतिः ३७
श्रोत्राद्दिशोयस्यहृदश्चखानिप्रजज्ञिरेखंपुरुषस्यनाभ्याः प्राणेंद्रियात्मासुशरीरकेतंप्रसीदतांनःसमहाविभूतिः ३८
बलान्महेंद्रस्त्रिदशाःप्रसादात्मन्योर्गिरीशोधिषणाद्विरिंचिः खेभ्यश्चछंदांस्यृषयोमेढ्र तःकःप्रसीदतांनःसम
हाविभूतिः ३९ श्रीर्वक्षसःपितरश्छाययासन्धर्मःस्तनादितरःपृष्ठतोभूत् द्यौर्यस्यशीर्ष्णोप्सरसोविहारात्प्रसीद
तांनःसमहाविभूतिः ४० विप्रोमुखंब्रह्मचयस्यगुह्यंराजन्यआसीद्भुजयोर्बलंच ऊर्वोर्विडोजोंघ्रिरवेदशूद्रौप्रसीद
तांनःसमहाविभूतिः ४१ विरोघ्रेरभवंश्रोत्रेशः म

उपसंस्थिताः एवंभूतोविभुर्यस्यप्राणादभूत्सः ३७ खानिदेहगतानिछिद्राणिप्राणाःपंचवृत्तिः इंद्रियाणिचआत्माम
नश्चअसवोनागकूर्मादयः शरीरंचतेषांकेतंआश्रयभूतंखंयस्यपुरुषस्यनाभ्याः प्रजज्ञिरेसः ३८ यस्यबलान्महेंद्रोजज्ञेछंदांसिऋषयश्चखेभ्यःकः
प्रजापतिः ३९ प्सरसः तरः अधर्मः ४० विट्वैश्यः ऊर्जःनैपुण्यंतस्यवृत्तिः अंघ्रिः अंघ्रिजौइत्यर्थः अवेदश्शूद्रोअविरोवदत्य तिकोशुश्रूषानवृत्तिमान्स्यु
रि

कृष्णपार्थसारथिस्तवं ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना.स.
१२

स२

उपरि विभ्नरो षात् नस्त्रः नासिकातः द्युतिः कांतिः पशव्यः पशूनां हितः कामः स्पर्शेनान्तः ॥ ४२ ॥ द्रव्यं भूतानि वयुः कालं विशेषं लौकिकप्रपंचं य
यस्मात् विनियंकृतः प्रबुधाप्य बोधं विवद्भिरपेक्ष्यमानं पापांतरे प्रबुधानां मायेत्यवबोधो यस्मिन्निति त्रयी ॥ ४३ ॥ तदेवं ष पंचमस्तु पवर्गे विप्रपंच मनु वर्णयि
त्वा एणमेतेन नमोस्त्विति द्वाभ्यां निर्दिशति नादिति ॥ ४४ ॥ ननस्वानूवायुः तस्यैव कृतिः लीलायस्मै तस्मै ॥ ४४ ॥ तिसस्मितं मुखांबुजं दिदृक्षूणां नोस्मच्चक्षुरादिकरण

पं२

लोनोधरात्मीतिरुपर्यनूत द्युतिर्नस्तं पशव्यः स्पर्शेन कामः । स्तुवोर्यमः पक्ष्म नवस्तु कालः प्रसीदतां नः ॥ समहाविभूतिः ॥ ४२ ॥
द्रव्यं वयः कर्म गुणान् विशेषं यद्योगमायाविहितान्वदंति । यद्दुर्विभाव्यं प्रबुधापबाधं प्रसीदतां नः समहाविभूतिः ॥ ४३ ॥ नमो
स्तु तस्मा उपशांतशक्तये स्वाराज्यलाभप्रतिपूरितात्मने । गुणेषु मायारचितेषु वृत्तिभिर्न सज्जमानाय नभस्वदूतये ॥ ४४ ॥
सत्वं नो दर्शयात्मानमस्मत्करणगोचरं । प्रपन्नानां दिदृक्षूणां सस्मितं ते मुखांबुजं ॥ ४५ ॥ तैस्तैः स्वेच्छाधृतै रूपैः काले काले स्व
यं विभो । कर्म ह दुर्विषहं यन्नो भगवांस्तत्करोति हि ॥ ४६ ॥ क्लेशभूर्यल्पसाराणि कर्माणि विफलानि च । देहिनां विषयार्त्ता
नां न तथैवार्पितं त्वयि ॥ ४७ ॥

गोचरं यथा भवत्येवं चात्मानं दर्शय ॥ ४५ ॥ नन्वेच्छानुवर्त्तित्वं च तव बकुशो हम् एवेत्याह तैस्तैरिति यन्नो दुर्विषहमस्माकं कर्म तद्भगवान् स्वयमेव करो
तिहि ॥ ४६ ॥ न च बहिर्मुखानामिव त्वद्भक्तानामस्माकं त्वय्यर्पितानि पूर्वपुण्यानि विपरीतफलानि भवितुमर्हंतीत्याह क्लेशभूरिर्यल्पसारं फ
लं येषु । यथा । विफलान्येवमस्मकामानां कर्माणि त्वय्यर्पितं नैव तथा ॥ ४७ ॥ राम १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रावैफल्यमुपपादयति अथमः अल्पोपिकर्म्मकल्पः कर्म्मनासोपि ईश्वरार्पितश्चेदिफलाय अन्यथा साधनकल्पते इति यस्मात्त्वमेष ईश्वरः पुरुषस्या
त्मा अतएव दयितो हितश्च नः आत्मनिदयिते हिते चार्पितं निःफलं स्यात् ॥४९॥ अनैष्फल्यमाह । यथाहि मूलावसेचनं स्कंधानां शाखानां च न
वति ॥५०॥ एवं सत्यपि त्वदर्पितकर्म्मणां त्वद्भक्तानामस्माकं यन्निमित्तमिदं दुःखमिति । तमेव वक्तुमीत्या नायेनाह । नमइति दुर्वितर्क्याणि आत्मक

नाथमः कर्म्मकल्पोपि विफलायेश्वरार्पितः । कल्पते पुरुषस्यैष सह्यात्मा दयितो हितः ॥४९॥ यथाहि स्कंधशाखानां तरोर्मूलाव
सेचनं । एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि ॥५०॥ नमस्तुभ्यमनंताय दुर्वितर्क्यात्मकर्म्मणे । निर्गुणाय गुणेशाय सत्वस्था
यच सांप्रतं ॥५१॥ इति श्री भागवते महापुराणे अष्टमस्कंधे अमृतमथने पंचमोध्यायः ॥५॥ ॥ श्रीशुक उवाच ॥ एवं स्तुतः
७विर सुरगणैर्भगवान्हरिरीश्वरः । तेषामाविरभूद्राजन्सहस्रार्कोदयद्युतिः ॥१॥ तेनैव सहसा सर्वे देवाः प्रतिहतेक्षणाः । नापश्यन्
खं दिशः क्षोणीमात्मानं च कुतो विभुं ॥२॥ विरिंचो भगवान्दृष्ट्वा सह शर्वेण तां तनुं । स्वच्छां मरकतश्यामां कंजगर्भारुणे
क्षणां ॥३॥ तप्तहेमावदातेन लसत्कौशेयवाससा । प्रसन्नचारुसर्वांगीं सुमुखीं सुंदरभ्रुवं ॥४॥

र्म्माणि स्वमायाचेष्टितानि यस्य तस्मै ॥५०॥ इति अष्टमे पंचमः ॥ षष्ठे पुनस्तुतिर्विष्णोराविर्भूतिः सुरैः । तांतन्मंत्रेणासुरैः साकममृतार्थे महो
द्यमः ॥ सहस्रार्काणामुदये द्युतिरिव द्युतिर्यस्य ॥१॥ सहसा तेजसा प्रतिहतानीक्षणानि चक्षूंषि येषां ॥२॥ तामाविर्भूतां तनुं विरिंचो दृष्ट्वा तुष्टावे
ति पंचमेनान्वयः कंजगर्भवदरुणे ईक्षणे यस्याः ॥३॥ तप्तहेमवदवदातेन लसता कौशेयवाससा युक्तां प्रसन्नानि चारूणि सर्वाण्यंगानि
यस्याः शोभनं मुखं यस्याः सुंदरे भ्रुवौ यस्याः ॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना.स्त्र.
१५

महांतोमणयोयस्मिन्तेन किरीटेन कर्णाभरणेकुंडलेताभ्यांनिर्गतोयोकपोलौताभ्यां श्रीर्मुखांबुजेयस्याः ५ कौस्तुभआभरणंकंठेयस्याः।
लक्ष्मीलक्ष्मविभ्रतीं ६ देवप्रवरोब्रह्मासर्वैर्गीर्वाणगतैः साष्टांगप्रणतैः अनाविराविरासेयंनाभूताभूदितिब्रुवन् ब्रह्मा निश्चेतिनिस्तवं वि
नुत्वेनगवन्तनीः ७ श्रीमूर्तेरियमाविर्भावएव नत्वस्मदादिवत्जन्मादिनवास्तीत्याह नजाताजन्मादयोयस्यकृतः अगुणाय कृतोनिर्वाण
सुखस्यार्णवाय अपारमोक्षसुखरूपायेत्यर्थः तथापित्रिगुणेर प्पाणिमित्र्यतिसूक्ष्मायदुज्ञानिस्वातुवस्तुतस्तु अपरिगणेपर्ययज्ञानीतंधाम

महामणिकिरीटेनकेयूराभ्यांचभूषितां कर्णाभरणनिर्भातकपोलश्रीमुखांबुजां ५ कांचीकलापवलयहारनूपुरशोभितां।
कौस्तुभाभरणांलक्ष्मीं बिभ्रतींवनमालिनीं ६ सुदर्शनादिभिःस्वास्त्रैर्मूर्तिमद्भिरुपासितां तुष्टावदेवप्रवरः सशर्वः पुरुषंप
रं ७ सर्वामरगणैः साकंसर्वाङ्गैरवनिंगतैः ७ ब्रह्मोवाच ॥ अजातजन्मस्थितिसंयमायागुणायनिर्वाणसुखार्णवा
य अणोरणिम्नेऽपरिगण्यधाम्नेमहानुभावायनमोनमस्ते ९ रूपंतवैतत्पुरुषर्षभेज्यंश्रेयोर्थिभिर्वैदिकतांत्रिक
केण योगेनधातः सहनस्त्रिलोकान्पश्याम्यमुष्मिन्नुहविश्वमूर्तौ १०॥

मूर्तिर्यस्यतस्मै नचैतदसंभावितं यतः महानचिंत्यो
नुभावोयस्यतन्मूर्तेः सनातनत्वमपरिमेयत्वंचोपपादयति रूपमिति हेपुरुषर्षभ हेधातः एतत्तवरूपंवैदिकेनतांत्रिकेणचयोगेनो
पायेनश्रेयोर्थिभिः सदाइज्यंपूज्यं अतोनेदमिदानीमपूर्वंजातमितिभावः ननुयूयंदेवाःपूज्यत्वेनप्रसिद्धाः सत्यंसर्वेप्येवंतन्मूर्तावित्याह॥ राम
उपहेमंकुरं अमुष्मिंस्तवयिनोस्मांस्त्रीन्लोकांश्चसहपश्यामि तवहेतुः विश्वंमूर्तयस्याः अतस्तवैतद्रूपंपरिच्छिन्नमपिनभवतीत्यर्थः॥१०॥ १५
ह यो।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वमूर्त्तित्वमेवाह। त्वयीति॥ घटस्य मृत्तिका यथा आदिरंतश्च मध्यं च तथा त्वमस्य जगतः। तत्र हेतुः परस्मात् प्रधानादपि परः॥१०॥ मृत्तिकादृष्टांतेन परिणामं
आसंवारयति त्वमिति स्वयात्माधीनया अत एव गुणानां व्यवाये परिणामेप्यगुणमेव त्वां युक्ताः पश्यंति मनीषिणो विवेकिन विपश्चितः शास्त्रज्ञाः॥११॥ ए
तदेव सदृष्टांतमाह। यथाग्निं काष्ठे मथनेन अमृतमाज्यं गोषु दोहनादिना भुवि अन्नं बीज्यादिकर्षणादिना अंबु खननेन उद्यमने पुरुषाकारे वाणिज्या
दिना वृत्तिं जीविकां यथा अंबु उद्यमने घटीयंत्रादिनोद्धरणे योगैरुपायैर्मनुष्या अधियंति प्राप्नुवंति तथा कवयस्त्वां बुध्या गुणेषु अधियंति त्वदं तत्व
१२ हे नाथ सरोजनाभ अतिचिरादीप्सितमर्थं योगे कथाप्यं त्वां समम्युज्जिहानमाविर्भवंतं अस्माभिर्दृष्ट्वा वयं निर्वृतिं गताः दवार्त्ताः दावाग्निपीडिताः॥१३
ति

त्वय्यग्र आसीत्त्वयि मध्य आसीत्त्वय्यंत आसीदिदमात्मतंत्रे त्वमादिरंतो जगतोस्य मध्यं घटस्य मृत्स्नेव परः परस्मात्॥१०॥ त्वं मायया आत्मा
श्रययास्वयेदं निर्माय विश्वं तदनुप्रविष्टः पश्यंति युक्ता मनसा मनीषिणो गुणव्यवायेप्यगुणं विपश्चितः॥११॥ यथाग्निमेधस्यमृतं च
गोषु भुव्यन्नमंबूद्यमने च वृत्तिं योगैर्मनुष्या अधियंति हि त्वां गुणेषु बुध्या कवयो वदंति॥१२॥ तं त्वां वयं नाथ समुज्जिहानं सरोजनाभा
तिचिरेप्सितार्थं दृष्ट्वा गता निर्वृतिमद्य सर्वे गजा दवार्त्ता इव गांगमंभः॥१३॥ स त्वं विधत्स्वाखिललोकपाला वयं यदर्थास्तव पादमूलं स
मागतास्ते बहिरंतरात्मन् किं चान्यविज्ञाप्यमशेषसाक्षिणः॥१४॥ अहं गिरित्रश्च सुरादयो ये दक्षादयो ग्नेरिव केतवस्ते। किं वा वि
दामेश पृथग्विभाता विधत्स्व शन्नो द्विजदेवमंत्रं॥१५॥ श्रीशुक उवाच॥ एवं विरिंच्यादिभिरीडितस्तद्विज्ञाय तेषां हृदयं यथैव
जगाद जीमूतगभीरया गिरा बद्धांजलीन्संवृतसर्वकारकान्॥१६॥ एक एवेश्वरस्तस्मिन् सुरकार्ये सुरेश्वरः। विहर्तुकामस्तानाह समुद्रो
न्मथनादिभिः॥१७॥

यद्विधेयं तत्कथयते ति चेत् त आह हे अंतरात्मन् अशेषस्य साक्षिणस्ते बहिः किं चान्यैर्विज्ञाप्यमस्ति॥१४॥ यूयमेव किंचित्कुरुते ति
चेन्नाह। अहमिति अग्नेः केतवो विस्फुलिंगा इव तेत्तो वयं पृथग्विभाताः संतः आत्मनः श्रेयः किं वा विद्मः। अतस्त्वमेव द्विजानां देवानां च मंत्रं विध
त्स्व इदं कुरुते त्युपायमुपदिशेत्यर्थः॥१५॥ हृदयं मंत्रः उपदेष्टव्य इत्य निश्चितं यथैव तथैव विज्ञाय जगाद संवृतानि नियमितानि सर्वाणि कारणानींद्रियाणि यैः
स्तान् ईश्वरस्यापि तथैवानिवेत मित्याह। एक एवेश्वरः समर्थोपि॥१७॥ ॥ ब

का

हेसुराःहेदेवाश्चयूयमपिचगंधर्वादियःवैःआत्मनःस्वतीयावद्भवोहद्धिर्नवति॥१९॥अर्थस्यप्रयोजनस्यपदवींसिद्धिंप्राप्तैःपश्चादहिमूषकवत्तद्वध
घातकभावेनवर्त्तितव्यमितिशेषः।यथापेटिकायांनिरुद्धोहिर्यथानिर्गमद्वारविधानार्थंप्रथमंमूषकेनसंधिंविधत्तेपश्चात्तमेवकदाचिद्भक्षयतितद

श्रीभगवानुवाच॥ हंतब्रह्मन्नहोशंभोहेदेवाममभाषितं॥ शृणुतावहिताःसर्वेश्रेयोवःस्याद्यथासुराः॥१८॥ यातदानवदैते
यैस्तावत्संधिर्विधीयतां॥ कालेनानुगृहीतैस्तैर्यावद्वोभवआत्मनः॥२०॥ अरयोपिहिसंधेयाःसतिकार्यार्थगौरवे॥ अहि
मूषकवद्देवाह्यर्थस्यपदवींगतैः॥२१॥ अमृतोत्पादनेयत्नःक्रियतामविलंबितं॥ यस्यपीतस्यवैजंतुर्मृत्युग्रस्तोमरोभवेत्
२२॥ क्षिप्त्वाक्षीरोदधौसर्वावीरुत्तृणलतौषधीः॥ मंथानंमंदरंकृत्वानेत्रंकृत्वातुवासुकिं॥ सहायेनमयादेवानिर्मंथध्वम
तंद्रिताः॥२३॥ ॥

यात्वर्थमार्गप्रवृत्तैःप्रथमंसंधेयाइत्यर्थः॥२०॥ततस्तैःसहयत्कार्यंतदाह।अमृतोत्पादनइति।यस्यामृतस्यपीतस्यसतः॥२२॥नेत्रंरज्जुं॥२३॥



CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु तर्हि तेप्यमृतपानेनामृताः स्युस्तत्राह । क्लेशभाज इति ॥२४॥ बलिभिः सहकारिभिः साध्याश्च यद्यस्ति तदनुसरणं विना न सिध्यंतीति कृत्वा सामादिकमुप
दिशति ॥ यूयमिति द्वाभ्यां हे सुराः संरंभेण संक्रमेण सांत्वया ... साममार्गेण यथा सिध्यंति वस्तुषु अमृतमथनादु ...त्पन्नेषु ॥२५॥ सुरास्तु बलिमुपेयुः उपज

क्लेशभाजो भविष्यंति दैत्या यूयं फलग्रहाः । यूयं तदनुमोदध्वं यदिच्छंत्यसुराः सुराः । २४ न संरंभेण सिध्यंति सर्वेर्थाः सांत्वया यथा
न भेतव्यं कालकूटात् विषाज्जलधिसंभवात् ॥२५॥ लोभः कार्यो न वो जातु रोषः कामस्तु वस्तुषु ॥ श्रीशुक उवाच ॥ इति देवान्समा
दिश्य भगवान्पुरुषोत्तमः । तेषामंतर्दधे राजन् स्वच्छंदगतिरीश्वरः ॥२६॥ अथ तस्मै भगवते नमस्कृत्य पितामहः । भवश्च जग्मतुः
स्वं स्वं धामोपेयुर्बलिं सुराः ॥२७॥ दृष्ट्वारीनप्यसंयत्तान् जातक्षोभान्स्वनायकान् । न्यषेधद्दैत्यराट् श्लोक्यः संधिविग्रहकालवित्
२८ ते वैरोचनिमासीनं गुप्तं चासुरयूथपैः । श्रिया परमया जुष्टं जिताशेषमुपागमन् ॥२९॥ महेंद्रः श्लक्ष्णया वाचा सांत्वयित्वा
महामतिः । अभ्यभाषत तत्सर्वं शिक्षितं पुरुषोत्तमात् ॥३०॥ तदरोचत दैत्यस्य तत्रान्ये ये सुराधिपाः । शंबरोरिष्टनेमिश्च ये च त्रि
पुरवासिनः ॥३१॥ ततो देवासुराः कृत्वा संविदं कृतसौहृदाः । उद्यमं परमं चक्रुरमृतार्थे परंतप ॥३२॥ ततस्ते मंदरगिरिमोज
सोत्पाट्य दुर्मदाः । नदंत उदधिं निन्युः शक्ताः परिघबाहवः ॥३३॥ दूरभारोद्वह श्रांताः शक्रवैरोचनादयः । अपारयंतस्तं वोढुं
विवशा विजहुः पथि ॥३४॥ निपतन्स गिरिस्तत्र बहूनमरदानवान् । चूर्णयामास महता भारेण कनकाचलः ॥३५॥ ॥

ग्मुः ॥२७॥ असंयत्तान पि दृष्ट्वा श्लोक्यः कीर्त्यर्हः ॥२८॥ वैरोचनिं बलिं जितमशेषं त्रैलोक्यं येन तं ॥२९॥ तत्सर्वं शिक्षितं अमृतोन्मथनादि ॥३०॥ तत्र ये अन्ये असुरयूथपा अधि
पाः पौलोमकालेयादयः शंबरादयश्च तेभ्यश्चारोचत ॥३१॥ संविदं समयं ॥३२॥ परिघा इव बाहवो येषां ॥३३॥३५॥
सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०अ
१६

विसर्जितः प्रस्थापितः सुपर्णेन तत्र स्थिते वासुकेरागमनायोगादिति नाकः ॥३८॥ इति श्रीअष्टमे षष्ठः ॥६॥ सप्तमे मथनोद्भूतविषं नीत्वा खिले कृते । स्तुतः सन्
रूपया रुद्रः पपौ विषमितीर्यते ॥१॥ फलनागेन तत्वाप्य मृतेनागोम विष्पती तिआमं . अससमंत्र वासुकिंने त्रं गिरो परिवीय संवेष्ट्य अब्धिं मथितुमा

तांस्तथा भग्नमनसो भग्नबाहूरुकंधरान् ॥ विज्ञाय भगवांस्तत्र बभूव गरुडध्वजः ॥३६॥ गिरिपातविनिष्पिष्टान् विलोक्यामरदान
वान् ईक्षया जीवयामास निर्जरान् निर्व्रणान् यथा ॥३७॥ गिरिं चारोप्य गरुडे हस्तेनैकेन लीलया । आरुह्य प्रययावब्धिं सुरासु
रगणैर्वृतः ॥३८॥ अवरोप्य गिरिं स्कंधात् सुपर्णः पततां वरः । ययौ जलांत उत्सृज्य हरिणा स विसर्जितः ॥३९॥ ॥इति श्री
भागवते महापुराणे अष्टमस्कंधे अमृतमथने मंदराचलानयने षष्ठोऽध्यायः ॥ ॥श्रीशुक उवाच ॥ ते नागराजमामंत्र्य फल
भागेन वासुकिं । परिवीय गिरौ तस्मिन्नेत्रमब्धिं मुदान्विताः ॥१॥ आरेभिरे सुरा यत्ता अमृतार्थं कुरूद्वह । हरिः पुरस्ताज्जगृहे पूर्वं
देवास्ततोऽभवन् ॥२॥ तन्नैच्छन् दैत्यपतयो महापुरुषचेष्टितं । न गृह्णीमो वयं पुच्छमहेरंगममंगलं ॥३॥ स्वाध्यायश्रुतसंपन्नाः
प्रख्याता जन्मकर्मभिः । इति तूष्णीं स्थितान् दैत्यान् विलोक्य पुरुषोत्तमः ॥४॥ स्मयमानो विसृज्याग्रं पुच्छं जग्राह सामरः । कृतस्था
नविभागास्त एवं कश्यपनंदनाः ॥५॥ ममंथुः परमायत्ता अमृतार्थं पयोनिधिं ॥ मथ्यमानेऽर्णवे सोऽद्रिरनाधारो ह्यपोऽविशत् ॥
ध्रियमाणोऽपि बलिभिर्गौरवात् पांडुनंदन । ते सुनिर्विण्णमनसः परिम्लानमुखश्रियः । आसन् स्वपौरुषे नष्टे दैवेनातिबली
यसा ॥७॥

ते निर्वारे मुके मुखं तीवं दैत्यान् .. याह यित्तुमेव पूर्वं हरिः पुरस्तात् सुरे जगृहे ततोऽभवन् । मुखं जगृहुः ॥२ ४॥ कृतोधारणे स्था
नविभागो ये ॥५॥ दैवेन हेतुना स्वपौरुषे नष्टे सति ॥७॥ ॥ राम
१६

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

विघ्नेशस्य विधिं तेन रचितं विघ्नं वृथा वितथं संस्तोनि संधिः संकल्पो यस्य । ० लक्षयोजनः विस्तारो यस्य स इति तथा तेन दृष्टेन । ९ । तस्य गिरेः वर्त्मनि नमनं कं
गकंडूयनं मेने । १० । आसुरेण असुराकारेण दैवेन देवाकारेण रूपेण विशत । ११ । अथात्मनि देवं दैत्यमध्ये गोत्रे दीर्घरूपेण नेत्रे अमेयाविबोधरू
पेण परेण हरिणा ज्ञातिनितं नक्राणां च कं समूहो यस्मिन् । १२ । हताश्च ते सुरास्तानि श्वासाश्च अहीन्द्रस्य सा हस्र अपरिमिताः कणो यस्य हगादयः तेषां

विलोक्य विघ्नेशविधिं तदीश्वरो दुरन्तवीर्यो वितथाभिसंधिः । कृत्वा वपुः काच्छपमद्भुतं महत् विवेश तोयं गिरिमुद्धाराणात् मुष्णि
तं वीक्ष्य कुलाचलं पुनः समुत्थिता निर्मथितुं सुरासुराः । दधार दृष्टेन स लक्षयोजनप्रस्तारिणा द्वीप इवापरो महान् । ९ । सुरा
सुरेन्द्रैर्भुजवीर्यविक्षिप्तं परिभ्रमन्तं गिरिमङ्गपृष्ठतः । बिभ्रत्तदावर्तनमादिकच्छपो मेने नगं कण्डूयनमप्रमेयः । १० । तं तु सुरा [illegible]नी यथा
नाविशदासुरेण रूपेण तेषां बलवीर्यमीरयन् । उद्दीपयन् देवगणांश्च विष्णुर्दैवेन नागेन्द्रमबोधरूपः । ११ । उपर्यगेन्द्रं
गिरिराडिवान्यः आक्रम्य हस्तेन सहस्रबाहुः । तस्थौ दिवि ब्रह्मभवेन्द्रमुख्यैः स्तुवद्भिः सुमनोभिरिद्धः । १२ । उपर्यधश्चात्म
निगोचनेत्रयोः परेण तेषां विशता समेधिताः । ममंथुरब्धिं तरसा महौजसः [illegible] टामहाद्रिणाह्नो मितनक्रचक्रं । १३ । अहीन्द्रमा क
हस्रकणोरुद्रमुखश्वासाग्निधूमाहतवर्चसो सुराः । पौलोमकालेयबलील्वलादयो दवाग्निदग्धाः सरला इवाभवन् । १४ ।
देवांश्च तच्छ्वासशिखाहतप्रभानाधूम्राम्बरस्रग्वरकञ्चुकाननान् । समभ्यवर्षद्भगवद्वशा घना ववुः समुद्रोर्मिपृषद्भृतो
यवः । १५ ।

निर्गताभ्यामग्निधूमाभ्यामाहतं वर्चो येषां ते सरला द्रुमविशेषाः । १४ । देवांस्तु भगवद्वशा घनाः समभ्यवर्षन् समुद्रोर्मिभिः उपगू
ढा वायवः शीतला ववुः वान्ति स्म । कथंभूतान् तस्याहीन्द्रस्य श्वासशिखाग्निनिर्हता प्रभा येषां धूम्राणि अम्बरादीनि येषां । १५ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ स्त॰ १७

रध्युद्धृतोद्रिर्येनसमुद्धृताद्रिः भगवान्परमपुरुषोनंतरमश्रीनंतेत्यन्वयः कथंभूतः कनकपरिधिः पीतवासाः कर्णयोर्विद्योतमाना विद्युन्नूर्कुंड
लल्लक्षणायस्यसतथा मूर्द्धि भ्राजंतो विलुलिताः कचायस्य सतथा। जैत्रैर्जिष्णुभिर्हृद्दृश्यकंसप्रभ्र... तिगिरिः इति द्वीपर्वतः। १७ हालाहल

मथ्यमाने तयाब्धौ दिवासुरवरूथपैः॥ यदा सुधा न जायेत निर्मर्मंथाजितः स्वयं॥१६॥ मेघश्यामः कनकपरिधिः कर्ण
विद्योत विद्युन्मूर्द्ध्नि भ्राजद्विलुलितकचः स्रग्धरो रक्तनेत्रः॥ जैत्रैर्दोर्भिर्जगदभयदैर्दंदशूकं गृहीत्वा मथ्नन् मथ्ना प्रति
गिरिरिवाशोभत धोद्धृताद्रिः॥१७॥ निर्मथ्यमानादुदधेरभूद्विषं महोल्वणं हालहलाह्वमग्रतः॥ संभ्रांतमीनोन्मकरादि
कच्छपात्तिमिद्विपग्राहतिमिंगिलाकुलात्॥१८॥ तदुग्रवेगं दिशि ... दिश्युपर्यधोः विसर्पदुत्सर्पदसह्यवीर्यं॥ भीताः
प्रजा दुद्रुवुरंग सेश्वरा अरक्ष्यमाणाः शरणं सदाशिवं॥१९॥ विलोक्य तं देववरं त्रिलोक्या भवाय देव्याभिमतं मुनीनां॥ आ
सीनमद्रावपवर्गहेतोस्तपो जुषाणं स्तुतिभिः प्रणेमुः॥२०॥

भिया क्रान्ता मृत्युस्य संभ्रान्ता मीनादयो जंतामकरादयस्तेयस्मिन् तस्मात्। तिम्यादिभिराकुलाच्चेति तद्विषमप्रतिमं। प्रतिक्रियाशून्यमिति वा॥१८
क्रतः उग्रो वेगो यस्य तद्देवा हे... शिरिस्त्रीति यथा। उग्रावेगा रोमांचस्वेदादयो यस्मात्। अत एवासह्यं विलोक्य नीताः अमेन केनो... रक्ष्यमाणाः सं
दाशिवं शरणं दुद्रुवुः जग्मुः।१९। त्रिलोक्या भवाय देव्या सह अद्रौ कैलासे आसीनं तथापि मुनीनामभिमतं तेषामेवापवर्गाय तपो जुषाणं। २०

प॰ राम १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्गुणं सगुणं चैव त्रिविधं हरिपराक्रमैः। स्तुवंतस्तु प्रजेशानां नाममन्यं तांतरं तयोः।२२। ननु त्वेवंभूतो विष्णुरिति प्रसिद्धं तत्राहुः। गुणमय्येति। अस्य जगतो यदा सर्गादीन् धत्से तदा हे भूमन् स्वदृक् स्वतः सिद्धज्ञानः त्वं ब्रह्मादिसंज्ञां धत्से।२३। तत्र हेतुः। त्वं ब्रह्मेति सदासतो भावान् देवतिर्यगादि रूपान् भावयतीति तथा सत्यं तु तत्त्वमतिरिक्तं नास्तीत्याहुः। त्वं शब्दस्य वेदस्य योनिः। आत्मैव त्वं नानाशक्तिभिर्जगद्रूपेणाभासि। अतः यस्मादीश्वरः।२४। स्वतः सिद्धज्ञानत्वमुपपादयंतः। जगदात्मना आभासनप्रकारमाहुः। त्वं शब्दस्य वेदस्य योनिः अतः स्वतः सिद्धज्ञानः। त्वं जगदादिरस्मिन् हि तत्त्वं आत्मा र

प्रजापतय ऊचुः। देवदेव महादेव भूतात्मन् भूतभावन। त्राहि नः शरणापन्नान् त्रैलोक्यदहनाद्विषात्।२१। त्वमेकः सर्वज
गत ईश्वरो बंधमोक्षयोः। तं त्वामर्चंति कुशलाः प्रपन्नार्तिहरं गुरुं।२२। गुणमय्या स्वशक्त्यास्य सर्गस्थित्यप्ययान्विभो। धत्से
यदा स्वदृक्भूमन् ब्रह्मविष्णुशिवाभिधां।२३। त्वं ब्रह्म परमं गुह्यं सदसद्भावभावनः। नानाशक्तिभिराभातः त्वमात्मा
जगदीश्वरः।२४। त्वं शब्दयोनिर्जगदादिरात्मा प्राणेंद्रियद्रव्यगुणः स्वभावः। कालः क्रतुः सत्यमृतं च धर्मस्त्वय्यक्ष
रं यत्त्रिवृदामनंति।२५। अग्निर्मुखं तेखिलदेवतात्मा क्षितिं विदुर्लोकभवांघ्रिपंकजं। कालं गतिं तेखिलदेवतात्मनो दि
शश्च कर्णौ रसनं जलेशं।२६।

...वस्त्वहंकारः कथंभूतः प्राणेंद्रियद्रव्याणां कारणभूता गुणा यस्य राजसादित्रिविधस्त्वयि। स्वभावादयश्च त्वमेव क्रतुः संकल्पः सत्यमृतं च विष्यो धर्मस्त्वं महदादिस्वरूपत्वे हेतुः। त्रिवृत् त्रिगुणात्मकं यदक्षरं प्रधानं त्वयि तदाश्रयं तदामनंति। यद्वा एवंभूते त्वयि त्रिवृदक्षरं प्रणवं प्रकाशकमाहुरित्यर्थः।२५। अखिलदेवतात्मा अग्निः सर्वदेवता इति श्रुतेः सोग्निस्तव मुखं हे लोकभव द्वितीयांते पुंविदुरित्यस्य संबंधः।२६।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ श्र
१०

परेश्वरश्चेयेऽस्यात्मा नोजीवात्मेषामाश्रयस्तवात्माहंकारः॥२७॥ त्रयीमयात्मन् वेदत्रयमूर्ते॥२८॥ पंचोपनिषदः॥ तत्पुरुषाघोरसद्योजात
वामदेवेशानरूपा मंत्रा येमुखे॥ रघोत्तरत्रिंशन्मंत्राणां वर्गः॥ तेषामेव मंत्राणां पदच्छेदेना घोत्तरत्रिंशत्कालात्मका मंत्रा इत्यर्थः॥ अवस्थितित
परतावस्था॥२९॥ अधर्मस्योर्मिषु दंभलोभादिषु येरूर्मिनिर्विसर्गः संहारः॥ यद्वा॥ यैः सत्वादिभिर्विविधः सर्गः॥ तानिनेत्रत्रयं हे देव छंदोमय॥

नाभिर्नभस्ते श्वसनं नभस्वान् सूर्यश्चंद्रः पिंगलं स्मरेतः॥ परावरात्माश्रयणं तवात्मा सोमो मनो द्यौर्नगवन् शिरस्ते॥२७॥
कुक्षिः समुद्रा गिरयोस्थिसंघा रोमाणि सर्वौषधिवीरुधस्ते॥ छंदांसि साक्षात्तव सप्त धातवः त्रयीमयात्मन् हृदयं सर्वधर्मः॥
२८॥ मुखानि पंचोपनिषदस्तवेश यैस्त्रिंशदष्टोत्तरमंत्रवर्गः॥ यत्तच्छिवाख्यं परमार्थतत्वं देव स्वयंज्योतिरवस्थितिस्ते॥२९॥ छायात्व
धर्मोर्मिषु यैर्विसर्गो नेत्रत्रयं सत्वरजस्तमांसि॥ सांख्यात्मनः शास्त्रकृतस्तवेक्षा छंदोमयो देव ऋषिः पुराणः॥३०॥ न ते
गिरित्राखिललोकपालविरिंचिवैकुंठसुरेंद्रगम्यं॥ ज्योतिः परं यत्र रजस्तमश्च सत्वं न यद्ब्रह्म निरस्तभेदं॥३१॥ कामा
ध्वरत्रिपुरकालगराद्यनेकभूतद्रुहः क्षपयतः स्तुतये न तत्ते॥ यस्त्वंतकाल इदमात्मकृतं स्वनेत्रवह्निस्फुलिंगशिखया भसितं
न वेद॥३२॥

ऋषिर्वेदः मंत्रद्रष्टा ईक्षणं साक्षान्मनुरिति पाठे मनुर्वेदः॥ तथैवाह॥ छंदोमय इति॥ हे गिरित्र ते परं ज्योतिः अखिलानां लोकपालादी
नामगम्यं न भवति॥ कुतः यत्र रजआदिनास्ति॥ किं तज्ज्योतिः॥ यन्निरस्तभेदं ब्रह्म॥३१॥ कामश्च अध्वरश्च दक्षयज्ञः त्रिपुरादयश्च ये अनेकभूतद्रुहस्ता
न् क्षपयतः संहरतस्ते तत्कर्म स्तुतये न भवति॥ अत्यल्पमेतदित्यर्थः॥ गरमहाविषं साधवश्चंपना वितेन सिद्धवन्निर्दिष्टं॥ स्तुतये अलं न भवतीत्यत्र हे
तुः॥ यस्तु भवान् स्वनेत्रवह्निविस्फुलिंगस्य शिखया इदं जगत् भसितं भस्मसात् कृतं न वेद नालोचयत्यपि॥३२॥

राम
९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection .

तदेवं नित्यं परानुग्रहव्यग्रं त्वां ये निंदंति ते तिमूर्खा इत्याह ॥ ये त्वन्मयाम्सहचरंतं तस्यां नितरां रतं कामिनं कस्यं ते प्रलयं ति तस्यात्म्यत्वाने चरंतं उग्रं क्रूरं परुषं च हिंसकं च त्वं ते कथं नूनं आत्मारामास्त्वते गुरवो विश्वहितो परिष्टार स्ते र्दिविचितिततमं च्छिद्वंद्वयस्तथा नूतमपितपसानितसमपितेनूनं ब्रवीति म विरक्तितिकाकुः त्वल्लीलां नैव विदुरित्यर्थः अतो हात लज्जाः त्यक्तत्रपाः कथमात्मारामैः सेवितं चरणयुगलस्य ति कामिनं संभवति कथं वातपसानितस्य शांत स्योग्रत्वं परुषत्वं वा संभवतीत्यविचार्यैव प्रलपं[illegible]दित्यर्थः ॥ ३३ ॥ आत्मलीलां नावनिंदकानां वाचमिहाहो पितवतत्वं न जानं

येत्वात्मरामगुरुभिर्हृदि चिंतितांघ्रि द्वंद्वं चरंतमुमया तपसाभितप्तं । कत्थंत उग्रपरुषं निरतं श्मशाने ते नूनमूतिमविदंस्तव हातलज्जाः ॥ ३३ ॥ तत्त्वस्य ते सदसतोः परतः परस्य नांजः स्वरूपगमने प्रभवंति भूम्नः ॥ ब्रह्मादयः किमुत संस्तवने वयं तु तत्सर्ग सर्गविषया अपि शक्तिमात्रं ॥ ३४ ॥ एतत्परं प्रपश्यामो न परं ते महेश्वर । मृडनाय हि लोकस्य व्यक्तिस्तेव्यक्तकर्मणः ॥ ३५ ॥ श्रीशुक उवाच ॥ तद्वीक्ष्य व्यसनं तासां कृपया भृशपीडितः । सर्वभूतसुहृद्देव इदमाह सतीं प्रियां ॥ ३६ ॥ ॥ शिव उवाच ॥ अहो बत भवान्येतत्प्रजानां पश्य वैशसं । क्षीरोदमथनोद्भूतात्कालकूटादुपस्थितं ॥ ३७ ॥ आसां प्राणपरीप्सूनां विधेयमभयं हि मे । एतावान्हि प्रभोरर्थो यद्दीनपरिपालनं ॥ ३८ ॥ प्राणैः स्वैः प्राणिनः पांति साधवः क्षणभंगुरैः । बद्धवैरेषु भूतेषु मोहितेष्वात्ममायया ॥ ३९ ॥

तीत्याह ॥ तत्त्वस्यात्त्वस्वरूपस्य गमने ज्ञाने ब्रह्मादयोपि न समर्थाः संस्तवने तु गच्छतः शक्ताः स्युः तत्र वयं कथं प्रभवामः ॥ यतस्तेषां सर्गे अस्तं तावद्विनाः तथापि यदेतत्स्तवनं एतदात्मशक्ति परिमितमात्रमित्यर्थः ॥ ३४ ॥ तदेवाह ॥ एतत्परमितिनपरं रूपं तथापि त्वदर्शनादे वलंताषविययमित्याह ॥ म[illegible]डनाय हीति ॥ ३५ ॥ ३६ ॥ मत्स्यनावम विचार्य विषपाने प्रवृत्तं मांक पंचि दियं प्रियावारयेदितिश्चां कृपया तामनुज्ञापयन्नाह अहो बतेति सार्द्धैश्चतुर्भिः ॥ वैशसं दुःखं ॥ ३७ ॥ प्राणपरीप्सूनां प्राणरक्षणेप्सूनां मे मया प्रभोः समर्थस्य अर्थः[illegible]ः कार्यं ॥ ८ ॥ किंच बद्धवैरे

[illegible] स्कं० ४ ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰ १९ रूपयतः रूपं कुर्वतः पुंसः ॥ ४० ॥ मे मम प्राणाः स्वस्तिः शोभनं नाम चामुखेन जीवितमखिलमर्थः । जग्धुं भक्षितुं ॥ ४१ ॥ करतलीकृत्य करतलपरिमितमात्रं कृत्वा ॥
४२ जलकल्मषः जलदोषो विषं यस्मात्तं गलेनीलं चकार साधोः रूपालोः ॥ ४३ ॥ ४४ ॥ ४५ ॥ प्रस्कन्नं गलितं अपरे ये सविषाः ते पि जगृहुः अनेन विष
स्पतीकृतोक्ता ॥ ४६ ॥ इति अष्टमे टीकायां सप्तमः ॥ ७ ॥ अष्टमे मथ्यमाने शैलक्ष्म्या विलोलहृतः सुरैः । धन्वंतरेर्हरेः ते सोमे मोहिन्युत्सवर्ण्यते । हविर्धुनी

पुंसः रूपयत्यनेन तेन सर्वात्मा प्रीयते हरिः । प्रीते हरौ भगवति प्रीयेऽहं सचराचरः ॥ ४० ॥ तस्मादिदं गरं भुंजे प्रजानां स्वस्तिरस्तु मे । एवमामंत्र्य रम्न
भगवान् भवानीं विश्वभावनः ॥ ४१ ॥ तद्विषं जग्धुमारेभे प्रभावज्ञान्वमोदत । ततः करतलीकृत्य व्यापि हालाहलं विषं ॥ ४२ ॥ अभक्षयन्महा
देवः कृपया भूतभावनः । तस्यापि दर्शयामास स्ववीर्यं जलकल्मषः ॥ ४३ ॥ यच्चकार गले नीलं तच्च साधोर्विभूषणं । तप्यंते लोकतापेन
साधवः प्रायशो जनाः ॥ ४४ ॥ परमाराधनं तद्धि पुरुषस्याखिलात्मनः । निशम्य कर्म तच्छंभोर्देवदेवस्य मीढुषः ॥ ४५ ॥ प्रजा दाक्षायणी ब्र
ह्मा वैकुंठश्च शशंसिरे । प्रस्कन्नं पिबतः पाणेर्यत्किंचिज्जगृहुः स्म तत् ॥ ४६ ॥ वृश्चिकाहिविषौषध्यो दंदशूकाश्च येऽपरे ॥ ४७ ॥ ॥
इति श्रीभागवते महापुराणे अष्टमस्कंधे अमृतमथने सप्तमोऽध्यायः ॥ ७ ॥ श्रीशुक उवाच ॥ पीते गरे वृषांकेण प्रीतास्तेऽमरदा
नवाः । ममंथुस्तरसा सिंधुं हविर्धानी ततोऽभवत् ॥ १ ॥ तामग्निहोत्रीमृषयो जगृहुर्ब्रह्मवादिनः । यज्ञस्य देवयानस्य मेध्याय हवि
षे नृप ॥ २ ॥ तत उच्चैःश्रवा नाम हयोऽभूच्चंद्रपांडुरः । तस्मिन् बलिः स्पृहां चक्रे नेंद्र ईश्वरशिक्षया ॥ ३ ॥ तत ऐरावतो नाम वारणेंद्रो वि
निर्गतः । दंतैश्चतुर्भिः श्वेताद्रेर्हरन् भगवतो महिं ॥ ४ ॥ ऐरावणादयस्त्वष्टौ दिग्गजा अभवंस्ततः । अभ्रमुप्रभृतयोऽष्टौ च करिण्यस्त्व
भवन्नृप ॥ ५ ॥ कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधेः । तस्मिन् हरिः स्पृहां चक्रे वक्षोलंकरणे मणौ ॥ ६ ॥ ततोऽभवत्पारिजातः सुर
लोकविभूषणं । पूरयत्यर्थिनो योऽर्थैः शश्वद्भुवि यथा भवान् ॥ ७ ॥
सुरभिः देवयानस्य ब्रह्मलोकमार्गप्रापकस्य यज्ञस्य संबंधिनो हविषे ॥ २ ॥ राम
ईश्वरशिक्षया प्रागेव लब्धत्वात् ॥ ३ ॥ भगवतो यः श्वेताद्रिः कैलासः तस्य महिमं हिमानं दंतैः शिखरकल्पैर्हरन् चंद्रवत्पांडुरः तस्मात्तुंगः ॥ ४ ॥ ७ ॥ ॥ ॥ १९

वल्गु निर्गत्य दिवि॥ स्वर्गिणां रतिकर्त्री॥ ७ सुदामा पर्वतः। तत्रैकस्यां दिशि जाता सौदामिनी स्फटिकादिमय गिरिशृंगे ष्वधिकं स्फुरंती विद्युदिव कांत्या दिशोरं जयंती श्रीः संपन्ना साक्षान्मूर्त्तिधारिणी सती सेव भगवत्सर्वेरमात्मा विरन्तूद्दिश्य॥ ८ तस्मात् रूपादिमहिमात्मा द्वितीयं चेतो येषां॥ भगवद्वक्षसि स्थितयां विलोकितानां सुराणां यथा पूर्वं सर्वसंपन्नानि भसुराणां च तद्विपर्ययं वक्तुं अभिषेकादि महोत्सव पूर्वकं ब्रह्मादिपरि
श्रिया

ततश्चाप्सरसो जाता निष्कंठ्यः सुवाससः। रमणाः स्वर्गिणां वल्गुगतिलीलावलोकनैः॥ ७ ततश्चाविरभूत्साक्षाच्छ्रीरमा भगवत्परा। रंजयंती दिशः कांत्या विद्युत्सौदामिनी यथा॥ ८ तस्यां चक्रुः स्पृहां सर्वे ससुरासुरमानवाः। रूपौदार्यवयोवर्णमहि माक्षिप्तचेतसः॥ १० तस्याश्चासनमानिन्ये महेंद्रो महदद्भुतं। मूर्तिमत्यः सरिच्छ्रेष्ठा हेमकुंभैर्जलं शुचि॥ ११ आभिषेचनिका भू मिराहरत्सकलौषधीः। गावः पंच पवित्राणि वसंतो मधुमाधवौ॥ १२ ऋषयः कल्पयांचक्रुरभिषेकं यथाविधि। जगुर्भद्रा णि गंधर्वा नट्यश्च ननृतुर्जगुः॥ १३ मेघा मृदंगपटवमुरजानकगोमुखान्। व्यनादयन् शंखवेणुवीणास्तुमुलनिःस्वनान्॥ ततोऽभिषिषिचुर्देवीं श्रियं पद्मकरां सतीं। दिगिभाः पूर्णकलशैः सूक्तवाक्यैर्द्विजेरितैः॥ १५ समुद्रः पीतकौशेयवाससी स मुपाहरत्। वरुणः स्रजं वैजयंतीं मधुना मत्तषट्पदां॥ १६॥ ॥

हरिणा भगवत्यापि प्रकारमाह तस्याश्चासनमित्यादिना। अथामीषां रुणीत्यतः प्राक्तनेन ग्रंथेन॥ ९ ॥ १५ आभिषेचनिकाः अभिषेकोचिताः पंचपवित्राणि पंचगव्यानि मधुमाधवौ चैव चैत्रवैशाखमनवंफलपुष्पादि पाठांतरे पिर्ध्दवै केयसमवार्थः मधुमासे नवं मध्विति वा॥ १२ अभिषे कं आभिषेकोचितं विधिं नट्यः नर्तनां स्त्रियः॥ १३ शंखवेणुवीणाश्च व्यनादयन् तुमुलो निःस्वनो येषां तान् मृदंगादीन्॥ १४ ॥ १५ ॥ १६॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पदं श्रयं॥ क्रुवं निम्नं॥ अव्यभिचारिणो नित्याः॥ संतो गुणा यस्मिन् तं नान्वविंदत क्वचित्कस्यचिद्दोषस्य सद्भावात्। एतदेवाह। नूनमिति
त्रिभिः मन्युनिर्जयो नास्ति। दुर्वासःप्रभृतिषु गुरुशुक्रादिषु संगवर्जितं ज्ञानं नास्ति। महत्त्वेपि ब्रह्मसोमादीन कामनिर्जयः परतो व्यपाश्रयः परापेक्षा इं
द्रादिः स किमीश्वरः॥२१॥ न भूतसौहृदं परशुरामादिषु न मुक्तिकारणं त्यागः शिबिप्रभृतिषु पुंसः कार्तवीर्यादेर्वीर्यमस्ति अजवेगनिष्कृतं काल
वेगेन परिहृतं तु न भवति गुणसंगवर्जितः सनकादिः द्वितीयः समवशेन हि समाधिनिष्ठत्वात्। २२। चिरायुष्यपि मार्कंडेयादौ शीलमंगलं

नृपणानि विविचिन्वाणि विश्वकर्मा प्रजापतिः। हारं सरस्वती पद्ममजो नागाश्च कुंडले। ततः कृतस्वस्त्ययनो त्पलस्रजं नदद्द्विरेफां प
रिगृह्य पाणिना। चचाल वक्त्रं सुकपोलकुंडलं सव्रीडहासं दधती सुशोभनं। १८। स्तनद्वयं चातिकृशोदरी समं निरंतरं चंदन
कुंकुमोक्षितं। ततस्ततो नूपुरवल्गु शिंजितैर्विसर्पती हेमलतेव सा बभौ। १९। विलोकयंती निरवद्यमात्मनः पदं ध्रुवं चाव्य
भिचारि सद्गुणं। गंधर्वयक्षासुरसिद्धचारणत्रैविष्टपेयादिषु नान्वविंदत। २०। नूनं तपो यस्य न मन्युनिर्जयो ज्ञानं क्वचित्तच्च
न संगवर्जितं। कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतो व्यपाश्रयः। २१। धर्मः क्वचित्तत्र न भूतसौहृदं त्यागः
क्वचित्तत्र न मुक्तिकारणं। वीर्यं न पुंसोस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसंगवर्जितः। २२। क्वचिच्चिरायुर्न हि शीलमंगलं
क्वचित्तदप्यस्ति न वेद्यमायुषः। यत्रोभयं कुत्र च सोप्यमंगलः सुमंगलः कश्च न कांक्षते हि मां। २३॥

मास्ति इंद्रियदमनशीलत्वात्। क
चिन्तदप्यस्ति हिरण्यकशिपुप्रभृतौ अायुषः स्थैर्यं न वेद्यं दुर्ज्ञानं भगवत्द्वेषेण कस्मादिव मृत्युसंभवात्। यत्र कुत्र च श्रीरुद्रे मार्कंडेयादिवत् इंद्रियदमना राम
द्यनावाच्छीलं मंगलं चायुर्निश्चयश्च तु नयमस्ति न चान्यः पूर्वोक्तः कश्चिद्दोषः। तथापि सोप्यमंगलः श्मशानवासाद्यमंगलचेष्टितः श्रीमुकुंदलक्ष्मीलत्या २०
होकश्चेतिक श्चित्तु मंगलः। निरवद्यश्च सतु मां न हि कांक्षते आत्माराममत्वात्।२३॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंविमृश्यपरमानिरपेक्षमपिमुकुंदमेववरंवव्रे।तत्किंअव्यभिचारिभिःसद्भिःधर्मज्ञानादिभिर्गुणैर्निजैकाश्रयतयाचनैरपेक्ष्येणवरंसर्वोत्तमंत
त्त्वहेतुःअगुणाश्रयंप्रकृतिगुणातीतंपाठांतरेप्ययमेवार्थः।अतएवस्वस्यईप्सितंकिंचसर्वैर्गुणैःरमणीयादिभिरपेक्षितंवृतं।अयंभावः।यद्य
पिस्वयमात्मारामत्वेनात्यनिरपेक्षःतथाप्याश्रिताश्चअणिमादिसिद्धीर्यथानोपेक्षतेतद्वन्मामपिनोपेक्षतइत्यवर्ततएवतस्यैवयाकृतायथास्पर्शांकिमन्यैः
प्राकृतैरितित[illegible]मेववृतवतीति॥२३॥तदेवाह।तस्यांसदेशेकमनीयांनवकंजमालांनिधायतदनुग्रहंप्रतीक्षमाणा।तूष्णीं।तस्यनिकटेत
याऽगुणाश्रयं
एवंविमृश्याव्यभिचारिसद्गुणैर्वरंनिजैकाश्रयतयागुणाश्रयं।वव्रेवरंसर्वगुणैरपेक्षितंरमामुकुंदंनिरपेक्षमीप्सितं॥२४॥
तस्यांसदेशउशतींनवकंजमालांमाद्यन्मधुव्रतवरूथगिरोपघुष्टां।तस्थौनिधायनिकटेतदुरःस्वधामसव्रीडहासविकस
जगतो ३ न्नयनेनयाता॥२५॥तस्याःश्रियस्त्रिंजनकोजनन्यावक्षोनिवासमकरोत्परमंविभूतेः॥श्रीःस्वाःप्रजाः[illegible]सकरुणेननिरीक्ष
प णेनयत्रस्थितैधयतसाधिपतींस्त्रिलोकान्॥२६॥शंखतूर्यमृदंगानांवीणावेणुध्वयकस्वनः।देवानुगानांसस्त्रीणांनृत्यतां
गायतामभूत्॥२७॥ब्रह्मरुद्रांगिरोमुख्याःसर्वेविश्वसृजोविभुं।ईडिरेवितथैर्मंत्रैस्तल्लिंगैःपुष्पवर्षिणः॥२८॥ ॥ ॥

स्थौ।कथंभूतांमालांमाद्यंतोयेमधुव्रताःतेषांवरूथस्यगिरासमुपघुष्टांनादितांकथंभूता[illegible]श्रीःसव्रीडहासेनविकसन्नयनंतेनतत्स्वधामउरःस्व
धामयातासती।वक्षःप्रतीक्षमाणातस्थाविति सर्वार्थः॥२५॥भगवानपित्रैलोक्यमातृत्वेस्वकृतस्त्वाःस्थानंददाविति।आहतस्याइति।विशिष्टावृ
त्तयोविद्यादायस्याःतथात्रिजगतोजन[illegible]न्याःश्रियःपरमंसुस्थिरंऐधयतअवर्द्धयत॥२६॥२७॥तल्लिंगैर्विष्णुप्रतिपादकैःअवितथैर्य
थार्थैः॥२८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वारुणीवरुणंदैवत्यंयदन्नंतन्मयीसुरा ३० ३१ दीर्घोपीवरोह्रीहंडौयस्यकंबुग्रीव ॥ शंखवातिरिवनिरिखासुहत्नाग्रीवायस्य ३३ स्निग्धःकुंचि
तःकेशानामंतोयस्य ३४॥५॥ हज्यनाकयज्ञमोगमोक्ता ॥ अमृतेनआमृतंपरिपूर्णः ३६ ३७ मिथःदैत्यानांपरस्परंकलहोत्पादनेनयोगमायया
धो

श्रियाविलोकितादेवाःसप्रजापतयःप्रजाः शीलादिगुणसंपन्नालेनिरेनिर्हतिपरां ॥ निःसत्वालोलु पाराजन्निरु गाग
न त्रपाः ॥ यदाचोपेक्षितालक्ष्म्यावभूवुर्दैत्यदानवाः ॥ अथासीद्वारुणीदेवीकन्याकमललोचना ॥ असुराजगृहुस्तांवैहरेरनुर
मतेनते ३१ ॥ अथोदधेर्मथ्यमानात्काश्यपैरमृतार्थिभिः ॥ उदतिष्ठन्महाराजपुरुषःपरमाद्भुतः ३२ दीर्घपीवर दोर्दंडः
कंबुग्रीवोरुणेक्षणः ॥ श्यामलस्तरुणःस्रग्वीसर्वाभरणभूषितः ॥ ३३ पीतवासामहोरस्कःसुमृष्टमणिकुंडलः ॥ स्निग्ध
कुंचितकेशांतःसुभगःसिंहविक्रमः ३४ अमृतापूर्णकलशंबिभ्रद्वलयभूषितः ॥ सवैभगवतःसाक्षाद्विष्णोरंशांशसंभ
वः ३५ ॥ धन्वंतरिरितिख्यातआयुर्वेदहृगिज्यभाक् ॥ तमालोक्यासुराःसर्वेकलशंचामृताभृतं ३६ ॥ लिप्संतःसर्ववस्तूनिक
लशंतरसाहरन् ॥ नीयमानेसुरैस्तस्मिन्कलशेमृतभाजने ३७ विषण्णमनसोदेवाहरिंशरणमाययुः ॥ इतितद्दैन्यमालो
क्यभगवान्भृत्यकामकृत् ३८ ॥ माखिद्यतमिथोर्थंवःसाधयिष्येस्वमायया ३८ ॥ मि यःकलिरभूत्तेषांतदर्थेतिषर्षिणे
तमां ॥ अहंपूर्वमहंपूर्वंनत्वंनत्वमितिप्रभो ३९ ॥ ॥

चमोहिमावोर्थंसाधयिष्यामिअनोमाखिद्यतेत्याहेतिशेषः ३८ नदेवाहमिथइतितर्षःकामःतद्युक्तानिचेतांसियेषांइत्येवंममबालानांकलिरभूत्
३९



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुर्बलानां स्वाक्रोशप्रकारमाह देवा इति द्वाभ्यां ये देवाः तुल्येनायासेन हेतवः साधकाः तुल्यायासो हि तुल्यधनादिनिर्येषामिति वा सत्रयोगे यथा स
र्वेषां समं फलं तद्वत् तथा च श्रुतिः ऋद्धिकामाः सत्रमासीरन्निति ये यजमानास्त ऋत्विज इति च ४० ४१ तद्रूपं वर्णयति पंचभिः प्रेक्षणीय
मुत्पलमिव श्यामं सर्वेष्ववयवेषु सुंदरं समानयोः कर्णयोराभरणे यस्मिन्सुकपोलं च तदुत्कृष्टनासिकं च आननं यस्मिन् ४२ ४३ सुष्टु ग्रीवायां

देवाः स्वं भागमर्हंति ये तुल्यायासहेतवः सत्रयाग इवैतस्मिन्नेष धर्मः सनातनः ४० इति स्वान्प्रत्यषेधन्वै दैतेया जातम
त्सराः दुर्बलाः प्रबलान्राजन्गृहीतकलशान्मुहुः ४१ एतस्मिन्नंतरे विष्णुः सर्वोपायविदीश्वरः योषिद्रूपमनिर्देश्यं द
धार परमाद्भुतं ४२ प्रेक्षणीयोत्पलश्यामं सर्वावयवसुंदरं समानकर्णाभरणं सुकपोलोन्नसाननं ४३ नवयौवननिर्वृ
त्तस्तनभारकृशोदरं मुखामोदानुरक्तालिझंकारोद्विग्नलोचनं ४४ बिभ्रत्सुकेशभारेण मालामुत्फुल्लमल्लिकां सु
ग्रीवकंठाभरणं सुभुजांगदभूषितं ४५ विरजांबरसंवीतनितंबद्वीपशोभया कांच्या प्रविलसद्वल्गुचलच्चरणनू
पुरं ४६ सव्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः दैत्ययूथपचेतस्सु काममुद्दीपयन्मुहुः ४७ इति श्रीभागवते
महापुराणे अष्टमस्कंधे अष्टमोऽध्यायः ८

नूपुरं कंठस्थाभरणं यस्मिन् तच्च तत्र शोभना ग्रीवा येन तत्कंठाभरणं यस्मिन्निति वा सुभुजयोरंगदाभ्यां भूषितं ४४ विरजांबरेण संवीतो नि
तंब एव द्वीपः विशालत्वात् तत्र शोभा यस्याः तया कांच्या प्रकर्षेण विलसत् वल्गु यथा भवत्येवं चलतोश्चरणयोर्नूपुरे यस्मिन् ४५ सव्रीडेन राम
स्मितेन सह विक्षिप्ता कंपिता या भ्रूः तस्या विलासेन सह यान्यवलोकितानि तैः दैत्ययूथपानां चेतस्सु मुहुः कामं उद्दीपयन् ४७ इत्यष्टमे
अष्टमः ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰स॰
२२

नवमेमोहितोईस्पैरर्पितमृतनाजने तद्वंचनेनदेवेभ्योमृतंदत्तं तपेयर्ति। अहोरूपंसौंदर्यंधामद्युतिः। इतिवदंतः। कात्वमित्यादिवपडु॥ २ मथ्नंतीक्षो
मयंतीव॥ ३ कस्मासीत्सुमुकमुकमस्माभिः यतस्त्वं केनचितमुक्तपूर्वेत्याकुः। नेति। तात्वांअमरादिभिरस्पृष्टपूर्वांनिजानीम इतिन अपितुजानीमए
व॥ ४ आत्मापिदंत्वद्दत्तंनिंत्वीश्वरेणैवसंपादितमित्याकुः। नूनमिति। सर्वेंद्रियाणांचमनसश्चप्रीतिविधातुंसघृणेनैत्सृष्टा आश्वस्त॥ मुनसोसुरः

श्रीशुकउवाच। तेमोन्मतोऽसुराः पात्रंहरंतस्स्पकसौहृदाः। क्षिपंतोदस्युधर्माण आयांतींददृशुः स्त्रियं॥ १ अहोरूपमहोधा
मश्चअहोअस्यानवंवयः इतितेतामभिद्रुत्यपप्रछुजातिहृछयाः॥ २ कात्वंकंजपलाशाक्षि कुतोवा किंचिकीर्षसि कस्यासिवद
वामोरुमथ्नंतीवमनांसिनः॥ ३ नवयंत्वामरैर्दैत्यैः सिद्धगंधर्वचारणैः। नास्पृष्टपूर्वांजानीमोलोकेशैश्वकुतोनृभिः॥ ४ नूनं
त्वंविधिनासुभ्रु प्रेषितासिशरीरिणां सर्वेंद्रियमनःप्रीतिविधातुंसघृणेनकिं॥ ५ सात्वंनःस्पर्धमानानामेकवस्तुनिमा
निनि। ज्ञातीनांबद्धवैराणांशंविधत्स्वसुमध्यमे॥ ६ वयंकश्यपदायादाभ्रातरः कृतपौरुषाः। विभजस्वयथान्यायंनैवभेदो
यथाभवेत्॥ ७ इत्युपामंत्रितोदैत्यैर्मायायोषिद्वपुर्हरिः। प्रहस्यरुचिरापांगैर्निरीक्षन्निदमब्रवीत्॥ ८ श्रीभगवानुवाच
कथंकश्यपदायादाः पुंश्चल्यांमयिसंगताः। विश्वासंपंडितोजातुकामिनीषुनयातिहि॥ ९ शालावृकाणांस्त्रीणांचस्वैरिणी
नांसुरद्विषः। सख्यान्याहुरनित्यानिनूत्नंनूत्नंविचिन्वतां॥ १० श्रीशुकउ॰ इतितेक्ष्वेलितैस्तस्या आश्वस्तमनसोसुराः जहसु र्भा

नप्रेषितासिकिंवायदृच्छयैवागतासिनैवंनूनंप्रेषितैवेत्यर्थः। ५। ६ नेदोविग्रहोयथानभवेत्तथा। ७। ८ संगताः अनुसृताः हेसुरद्विषः। पञ्च
वेनकेनाप्यभिप्रायेणगौरंसयानवत्येवंजहसुः॥ १०॥ ११॥
मी।

वर्गोरुदशमस्कभागवतं ८

राम
२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईषत्स्मितेनत्रीणायस्याः तया मयाकृतंसाधुवा असाधुयद्यभ्युपेतत्वंगीकुरुततर्हिविनजे॥१॥ असुरपुंगवाः दैत्यश्रेष्ठाः प्रमाणमियत्तामजानंतः
॥३॥४॥ यथोपजोषंयथाप्रीतिअहतस्यलक्षणं॥ अहतंयंत्रनिर्मुक्तमुक्तंवासः स्वयंतुवा॥ शस्तंतन्मांगलिकेषुतावन्मात्रेणसर्वदा॥ प्रागग्रेषु कुशे
षुविविशुः॥५॥ धूपैरामोदितायांसुरनीदस्कृतायांशालायां॥६॥ अथतस्यांशालायांहेनरेंद्र सांकलशपाणिराविवेश॥ कथंभूतामणिबंधादाकति

ततोगृहीत्वामृतभाजनंहरिर्बभाषईषत्स्मितशोभनयागिरा॥ यद्यभ्युपेतक्वचसाध्वसाधुवाकृतंमयावोविभजेसुधामिमां
॥२॥ इत्यभिव्याहृतंतस्याआकर्ण्यासुरपुंगवाः॥ अप्रमाणविदस्तस्याः तत्तथेत्यन्वमंसत॥३॥ अथोपोष्यकृतस्नानाहुत्वा
चहविषानलंदत्वागोविप्रभूतेभ्यःकृतस्वस्त्ययनाद्विजैः॥४॥ यथोपजोषंवासांसिपरिधायाहतानिते॥ कुशेषुप्राविश
न्सर्वेप्रागग्रेष्वभिभूषिताः॥५॥ प्राङ्मुखेषूपविष्टेषुसुरेषुदितिजेषुच॥ धूपामोदितशालायांजुष्टायांमाल्यदीपकैः॥६॥
तस्यांनरेंद्रकरभोरुलसद्दुकूलश्रोणीतटालसगतिर्मदविह्वलाक्षी॥ साकूजतीकनकनूपुरशिंजितेनकुंभस्तनीक
लशपाणिरथाविवेश॥७॥ तांश्रीसखींकनककुंडलचारुकर्णनासाकपोलवदनांपरदेवताख्यां॥ संवीक्ष्यसंमुमुहुरु
त्स्मितवीक्षणेनदेवासुराविगलितस्तनपट्टिकांताम्॥८॥

हेकरभकरवन्नोवहिः करनसदृशौसुवृत्तावूरूयस्याः सा। त[illegible]शालकमनीयंदुकूलंयस्मिन्तेनश्रोणीतटेनविशालायाश्रोणपालसामंदागतिर्यस्या
ःपाणंतरेकरनसदृशयोरुर्वोर्लसतदुकूलंयस्याः साचासौश्रोणीतटेन अलसगतिश्चमदेनविह्वलेअक्षिणीयस्याः॥७॥ तांश्रियः सखींसंवीक्ष
देवासुराः संमुमुहुः॥ कथंभूतांकनकमयेकुंडलेयस्याः साचासौचारवः कर्णादियोयस्याः सचविगलितोविश्रस्तः स्तनपट्टिकायास्तंतोयस्याः
॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं तावन्मोहयित्वा यत्कृतवान् तदाह त्रिभिः। असुराणां सुधादानं सर्पाणां क्षीरदानमिव दुर्नयं। अन्याय्यं मत्वा तां सुधां तेभ्यो न व्यभजत् अयं नाव॰
दैत्यैर्मदीयं साध्वसाधु वा सर्वमनुमतमेवातो मत्कृतानुदेवानेव पाययिष्यामि। किंच तैर्यथान्याय्यं विभज स्वयमुक्तं न चैतेभ्यो जातैव क्रूरेभ्यो दानन्याय्यं
अतस्त्वेभ्यः सुधां न दास्यामिति १९। पंक्तीः पृथक् विविक्ताः कल्पयित्वा विधायतासु पंक्तिषु स्वेस्वेषु तत्तत्सजातीयेषु तांश्च असुरानपि स्त्रातारणार्थमि
वोपवेशयामास २०। उपसंचरैः बहुमानप्रियवाक्यादिना तानतिक्रम्यातिक्रम्य गमनैर्दूरस्थानपि देवान् २१। तया हृतः स्नेहो येषु स्त्रिया

असुराणां सुधादानं सर्पाणामिव दुर्नयं। मत्वा जातिनृशंसानां न तां व्यभजदच्युतः १९। कल्पयित्वा पृथक्पंक्तीरुभयेषां ज
गत्पतिः। तांश्चोपवेशयामास स्वेषु स्वेषु च पंक्तिषु २०। दैत्यान् गृहीतकलशो वंचयन्नुपसंचरैः। दूरस्थान् पाययामा
स जरामृत्युहरां सुधां २१। ते पालयंतः समयमसुराः स्वकृतं नृप। तूष्णीमासन् कृतस्नेहाः स्त्रीविवादजुगुप्सया २२। तस्यां
कृतातिप्रणयाः प्रणयापायकातराः। बहुमानेन चाबद्धा नोचुः किंचन विप्रियं २३। देवलिंगप्रतिच्छन्नः स्वर्भानुर्देवसं
सदि प्रविष्टः सोमं अपिबच्चंद्रार्काभ्यां च सूचितः २४। चक्रेण क्षुरधारेण जहार पिबतः शिरः। हरिस्तस्य कबंधस्तु
सुधयाऽप्लावितोऽपतत् २५। शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत्। यस्तु पर्वणि चंद्रार्कावभिधावति वैरधीः २६। पीत
प्रायेऽमृते देवैर्भगवान् लोकभावनः। पश्यतामसुरेंद्राणां स्वरूपं जगृहे हरिः २७॥

स्त्रीविवादस्य जुगुप्सया २२। कृतः अतिप्रणयः स्ने
हो यैः प्रणयापायेन कातराः भीताः। एते तावत्प्रणयपूर्वं किंचिल्लिखंतु। यूयं तु धीराः स्त्रीणां प्रतीक्षध्वमित्यादि बहुमानेन आबद्धाः नियंत्रिताः समयपालनादि सिंध
त्रिभिः कारणैः प्रियं किंचिदपि नोचुः। किंतु तूष्णीमासन् २३। देवपंक्तौ चंद्रार्कयोर्मध्ये प्रविष्टः सोममृतमपिबत् २४। हरिस्तस्य शिरो जहार अप्लावितः असंस्पृ
ष्टः यो ग्रहः सूर्यादिवत् ग्रहत्वाधिकारिणी २६। २७॥ राम २३

हरिभक्तानामेवोद्यमः फलति नान्येषामित्येवमाख्यानतात्पर्यमाह। एवमिति। समादेशकालादयो येषां हेतुर्मंदराद्रिः। अर्थः समुद्रे क्षिप्तं वीरुधादिविविधः
कल्पः फलं केषांचिन्नातं केषांचिन्नेति वैचित्र्यं येषां ते फलवैषम्यवंतो बभूवुरित्यर्थः। नदेवाह। तत्र तेषु यस्य पादपंकजरजः श्रयणात् दैवाः अमृतं फ
लमापुः। स एव सेव्य इत्यर्थः। यत्र सोक्तिरिति संबंधात्। एतद्देवोपपादयति। यदिति। असुः प्राणः वसु धनं। प्राणादिभिर्देहात्मजादिषु नृभिर्यत् युज्यते प्रयु
ज्यते। देहाद्यर्थं यत् क्रियते तदसत् व्यर्थं न भवति कुतः। पृथक्त्वात् भेदाश्रयत्वात् शाखानिषेचनवत्। तैरेव प्राणादिभिरीश्वरोद्देशेन यत् क्रिय

एवं सुरासुरगणाः समदेशकालहेत्वर्थकर्ममतयोऽपि फले विकल्पाः। तत्रामृतं सुरगणाः फलमंजसापुर्यत्पादपंकजरजः
श्रयणान्न दैत्याः॥२८॥ यद्युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिषु नृभिस्तदसत्पृथक्त्वात्। तैरेव सद्भवति यत्क्रियतेऽ
पृथक्त्वात् सर्वस्य तद्भवति मूलनिषेचनं यत्॥२९॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे अमृतमथने नवमोऽध्या
यः॥९॥ श्रीशुक उवाच। इति दानवदैतेया नाविंदन्नमृतं नृप। युक्ताः कर्मणि यत्ताश्च वासुदेवपराङ्मुखाः॥१॥ साधयि
त्वामृतं राजन् पाययित्वा स्वकान् सुरान्। पश्यतां सर्वभूतानां ययौ गरुडवाहनः॥२॥

ते तत्तु सत् महाफलं भवति। अपृथक्त्वात् ईश्वरस्य सर्वत्रानुगतत्वात्। तत्र दृष्टांतः। यत्तरोर्मूलनिषेचनं तद्यथा सर्वस्य स्कंधशाखादेरपि भवतीति यद्वा
ल्लोपे पंचम्यौ पृथक्त्वं पर्यालोच्य भेददृष्ट्या [illegible] देहाद्युद्देशेन यत् क्रियते तदसत्। अपृथक्त्वं पर्यालोच्य ईश्वरदृष्ट्या तैरेव तेष्वेव य[illegible] क्रियते तत्सत् भव
तीति विशेषः समाने॥२९॥ इति अष्टमे टीकायां नवमः॥ दशमे समरादैत्यैरारब्धे तु मृधे सुरैः। देवमाययाविषण्णेषु देवेष्वाविर्बभूव हरिः। तदेवममृता
वाप्तिर्नाभक्तानामिति रीतिं भक्तमत्सरतः प्राणहानिः पुनरुदीर्यते॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रणः संग्रामः उदन्वतः समुद्रस्य रोधसि तीरे बभूव ॥ ३४ ॥ अन्योन्यं समासाद्य निजघ्नुः ॥ ६ ॥ १२ ॥ चित्रध्वजपताकादिभिश्च वीराणां मालाभिश्च राजिभिर्द्विषदा

सपत्नानां पराक्रमैर्दिदृक्षाते दितिनंदनाः ॥ अमृष्यमाणास्ते तु देवान् प्रत्युद्यतायुधाः ॥ ३ ॥ ततः सुरगणाः सर्वे सुधया पीतयैधि
ताः प्रतिसंयुयुधुः शस्त्रैर्नारायणपदाश्रयाः ॥ ४ ॥ तत्र देवासुरो नाम रणः परमदारुणः ॥ रोधस्युदन्वतो राजन् तुमुलो रोमह
र्षणः ॥ ५ ॥ तत्रान्योन्यं सपत्नास्ते संरब्धमनसो रणे ॥ समासाद्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ॥ ६ ॥ शंखतूर्यमृदंगानां
भेरीडमरुणां महान् ॥ हस्त्यश्वरथपत्तीनां नदतां निस्वनोऽभवत् ॥ ७ ॥ रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः ॥ हया हयैरि
भाश्चेभैः समसज्जंत संयुगे ॥ ८ ॥ उष्ट्रैः केचिदिभैः केचिदपरे युयुधुः खरैः ॥ केचिद्गौरमृगैः ॥ ऋक्षैर्द्वीपिभिर्हरिभिर्भटाः ॥ ९ ॥
गृध्रैः कंकैर्बकैरन्ये श्येनभासैस्तिमिंगिलैः ॥ शरभैर्महिषैः खड्गैर्गोवृषैर्गवयारुणैः ॥ १० ॥ शिवाभिराखुभिः केचित्कृकला
सैः शशैर्नरैः ॥ बस्तैरेके कृष्णसारैर्हंसैरन्ये च सूकरैः ॥ ११ ॥ अन्ये जलस्थलखगैः सत्वैर्विकृतविग्रहैः ॥ सेनयोरुभयो
राजन् विविशुस्तेऽग्रतोऽग्रतः ॥ चित्रध्वजपटै राजन्नातपत्रैः सितामलैः ॥ महाधनैर्वज्रदंडैर्व्यजनैर्बर्हचामरैः ॥ १३ ॥ वातो
द्धूतोत्तरोष्णीषैरर्चिर्भिर्वर्मभूषणैः ॥ स्फुरद्भिर्विशदैः शस्त्रैः सुतरां सूर्यरश्मिभिः ॥ १४ ॥ देवदानववीराणां ध्वजिन्यौ पांडुनंद
नंदन ॥ रेजतुर्वीरमालाभिर्यादसामिव सागरौ ॥ १५ ॥

नववीराणां ध्वजिन्यौ यादसां मालाभिः सागराविव रेजतुरिति त्रयाणामन्वयः ॥ यादोभि
रिति वा सितैरमलैरातपत्रैश्च बर्हैश्च चामरैश्च व्यजनैः ॥ वातेनोद्धूतैरुत्तरीयैरुष्णीषैश्च सूर्यरश्मिभिः सुतरां स्फुरद्भिः ॥ १५ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व
असुराणां याचमूः तस्याः पतिः स बलिर्यानमास्थितः ।१६।१७। उदये उदयगिरिशिखरे स्थितः चंद्र इव विरेजे इति त्रयाणामन्वयः ।१८।१९। २२ अ वंतिभुस्त

वैरोचनो बलिः संख्ये सोसुराणां चमूपतिः । यानं वैहायसं नाम कामगं मयनिर्मितं ।१६। सर्वसांग्रामिकोपेतं सर्वाश्चर्यमयं
प्रभो । अप्रतर्क्यमनिर्देश्यं दृश्यमानमदर्शनं ।१७। आस्थितस्तद्विमानाग्र्यं सर्वानीकाधिपैर्वृतः । वालव्यजनछत्राग्र्यै रेजे चं
द्र इवोदये ।१८। तस्यासन्सर्वतो यानैर्यूथानां पतयोसुराः । नमुचिः शंबरो बाणो विप्रचित्तिरयोमुखः ।१९। द्विमूर्धा काल
नाभोथ प्रहेतिर्हेतिरिल्वलः । शकुनिर्भूतसंतापो वज्रदंष्ट्रो विरोचनः ।२०। हयग्रीवः शंकुशिराः कपिलो मेघदुंदुभिः ।
तारकश्चक्रदृक्शुंभो निशुंभो जंभ उत्कलः ।२१। अरिष्टोरिष्टनेमिश्च मयश्च त्रिपुराधिपः । अन्ये पौलोमकालेया नि
वातकवचादयः ।२२। अलब्धभागाः सोमस्य केवलं क्लेशभागिनः । सर्व एते रणमुखे बहुशो निर्जितामराः ।२३। सिं
हनादं विमुंचंतः शंखान्दध्मुः महारवान् । दृष्ट्वा सपत्नानुत्सिक्तान्बलभि तत्कुपितो भृशं ।२४। ऐरावतं दिक्क
रिणमारूढः शुशुभे स्वराट् । यथा स्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः ।२५। तस्यासन्सर्वतो देवा नानावाहध्वजा
युधाः । लोकपालाः सह गणैर्वाय्वग्निवरुणादयः ।२६। तेन्योन्यमभिसंसृत्य क्षिपंतो मर्मभिर्मिथः । आह्वयंतो विशं
तोग्रे युयुधुर्द्वंद्वयोधिनः ।२७। युयोध बलिरिंद्रेण तारकेण गुहोस्यत । वरुणो हेतिनायुध्यन्मित्रो राजन्प्रहे
तिना ।२८। यमस्तु कालनाभेन विश्वकर्मा मयेन वै । शंबरो युयुधे त्वष्ट्रा सवित्रा तु विरोचनः ।२९। ॥

वणानि यस्मिन्नित्रितिमदधारासाहस्यं ।२५। नानावाहनादीनि येषां ते देवा असुराश्च मिथो युयुधुः ।२७। इंद्रेणेबाह युयोधेति सर्वत्र तिः असत आस्पत अयु
ध्यतेत्यर्थः ।२९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूर्यो दिव एक एव शतेन बलिसुतैः। बाणो ज्येष्ठो येषां तैः॥ ३० निशुंभशुंभाभ्यां देवी॥ ३१॥ घा स्फारो हंती त्यारोहाः। तैः सहिताः अस्वेच वाहाः पूर्वं तु केवलं गजा
दय उक्ताः। कथंभूता निरुंलाघा कादयो येषां ॥ ३७॥ छिन्ना विध्वजादीनि येषां ते पादेवादीनां पदाघातैः रथांगेश्व चूर्णितादायो धनाद् एणभूमेः। तछितो

अपराजितेन नमुचिरश्विनौ वृषपर्वणा। सूर्यो बलिसुतैर्देवो बाणज्येष्ठैः शतेन च॥ ३०॥ राकुणञ्च तथा सोमः पुत्रो मायुयुधे
निलः। निशुंभशुंभयोर्देवी नक्तकालीतरस्विनी॥ ३१॥ वृषाकपिस्तु जंभेन महिषेणाविनावसुः। इल्वलः सह वातापी ब्रह्म
पुत्रैररिंदम॥ ३२॥ कामदेवेन दुर्मर्षस्त्क्लोमाहानिः सह। बृहस्पतिश्चोशनसा नरकेण शतेश्वरः। मरुतो निवातकव
चैः कालेयैर्वसवोऽमराः। विश्वेदेवास्तु पौलोमै रुद्राः क्रोधवशैः सह॥ ३४॥ त एवमाजावसुराः सुरेन्द्रा द्वंद्वेन संहत्य च युध्य
मानाः। अन्योन्यमासाद्य निजघ्नुरोजसा जिगीषवस्तीक्ष्णशराशितोमरैः। भुशुंडिभिश्चक्रगदर्ष्टिपट्टिशैः शक्त्युल्मुकैः
प्रासपरश्वधैरपि॥ निस्त्रिंशभल्लैः परिघैः समुद्गरैः सभिंडिपालैश्च शिरांसि चिच्छिदुः॥ ३६॥ गजास्तुरंगाः सरथाः प
दातयः सारोहवाहा विविधा विखंडिताः। निकृत्तबाहूरुशिरोधरांघ्रयश्छिन्नध्वजेष्वासतनुत्रभूषणाः॥ ३७॥ तेषां पदा
घातरथांगचूर्णितादायोधनादुल्बण उत्थितस्तदा। रेणुर्दिशः खं द्युमणिं च छादयन्न्यवर्तता सृक्स्रुतिभिः परिप्लु
तात्॥ ३८॥

तोरेणुर्दिशः खं द्युमणिम्च सूर्यं च छादयंस्तदेव स्वादे न्यवर्तत कथंभूतात् असृक् स्रुतिभिः रक्तक्षरणैः परिप्लुतात् सिक्तात् यद्वा प
रिप्लवनाद्धेतोर्न्यवर्तत। नावे रक्ता रक्तधाराणां तत्पर्यंतमुच्छूलनादित्यर्थः। प्रथमांत पाठे रेणोर्विशेषणं॥ ३८॥ 

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिरोभिर्महाभुजैश्चकरभसहस्रैरूरुभिश्च साररणभूः प्रकर्षेण आस्तृता सती वभौ कथंभूतैः शिरोभिः उद्भूतानि उत्पतितानि किरीटानि कुंडलानि
च येभ्यः तैः संरंभयुक्ताः दष्टोष्ठयेषु तैः परिदष्टा दच्छदाः ओष्ठा येषु तैः ३९ पतितानि यानि स्वशिरांसि तत्र सैरहिभिः तैः पश्यंतः स्वयं उद्यतान्यायुधा

शिरोभिरुद्भूतकिरीटकुंडलैः संरंभदष्टैः परिदष्टदच्छदैः । महाभुजैः सांगदैः सहायुधैः साप्रावृताभूः करभोरुभिर्वभौ
३९ एकबंधास्तत्र चोत्पेतुः पतितस्वशिरोक्षिभिः । उद्यतायुधदोर्दंडैराधावंतो नरान्मृधे ४० बलिर्महेंद्रदंष्ट्राभिर्हिभिरैरा
वतं शरैः । चतुर्भिश्चतुरो वाहानेकेनारोहमाच्छिनत् । सतानापततः शाकस्त्वावद्भिः शीघ्रविक्रमः । चिच्छेद निशितैर्भल्लैरसं
प्राप्तान्हसन्निव ४२ तस्य कर्मोत्तमं वीक्ष्य दुर्मर्षः शक्तिमाददे । तां ज्वलंतीं महोल्काभां हस्तस्थामच्छिनद्धरिः ४३ ततः
मूलं ततः प्रासं ततस्तोमरमृष्टयः । यद्यच्छस्त्रं समादद्यात्सर्वं तदच्छिनद्विभुः ४४ ससर्जाथासुरीं मायामंतर्धानगतोसु
रः ततः प्रादुरभूच्छैलः सुरानीकोपरि प्रभो ४५ ततो निपेतुस्तरवो दह्यमाना दवाग्निना । शिलाः सटंकशिखराश्चूर्णयं
त्यो द्विषद्बलं महोरगाः समुत्पेतुर्दंदशूकाः सवृश्चिकाः । सिंहव्याघ्रवराहाश्च मर्दयंतो महागजान् ४७ यातुधान्यश्च शत
शः शूलहस्ता विवाससः । छिंधि भिंधीति वादिन्यस्तथा रक्षोगणाः प्र... मो ४८ ततो महाघना व्योम्नि गंभीरपरुषस्वनाः
अंगारान्मुमुचुर्वातैराहताः स्तनयित्नवः ४९ सृष्टो दैत्येन सुमहान्वह्निः श्वसनसारथिः । सांवर्तक इवात्युग्रो विबुध
ध्वजिनीमधाक् ५०

तिये तैर्दोर्दंडैर्युक्ताः ४० वाहान् ऐरावतपादरक्षकान् आरोहं गजयंतारं आर्दयत विव्याध ४१ दुर्मर्षः असह्नो बलिः ४३ टंकवत्तीक्ष्णाग्रैः शि
खरैः सहिताः ४६ स्तनयित्नवश्च अंगारान्मुमुचुरित्यनुषंगः ४९ अधाक् आर्षः अधाक्षीदित्यर्थः ५० ॥ ॥ क्ष्णा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्कं०
२६

उद्भूतैस्तरंगैरावर्त्तैश्चभीषणाः।५१। एवमन्यैश्च दैत्यैः सृज्यमाना।५२। यत्र यदा तत्र तदा तैर्ध्यातः सन्।५३। अष्टौ आयुधयुक्ता बाहवो यस्य श्रीश्च कौस्तुभ
अनर्घ्यं किरीटं च कुंडले च उल्लसंति श्रीकौस्तुभादीनि यस्मिन्।५४। असूराणां कूटकर्म मंत्रादिप्रयोगः तस्माज्जाताः महिना महिम्ना हरेः स्मृति

ततः समुद्र उद्वेलः सर्वतः प्रत्यदृश्यत। प्रचंडवातैरुद्धूततरंगावर्त्तभीषणः।५१। एवं दैत्यै र्महामायैरलक्ष्यगतिभी भीषणैः
रणे सृज्यमानासु मायासु विषेदुः सुरसैनिकाः।५२। न तत्प्रतिविधिं यत्र विदुरिंद्रादयो नृप। ध्यातः प्रादुरभूत्तत्र भग
वान् विश्वभावनः।५३। तस्मिन्प्रविष्टे सुरकूटकर्मजा माया विनेशुर्म्महिना महीयसः ततः सुपर्णांसकृतांघ्रिपल्लवः
पिशंगवासा नवकंजलोचनः। अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभानर्घ्यकिरीटकुंडलः।५४। तस्मिन्प्रविष्टे सुरकू
टकर्मजा माया विनेशुर्म्महिना महीयसः। स्वप्नो यथा हि प्रतिबोध आगते हरिस्मृतिः सर्वविपद्विमोक्षणं। दृष्ट्वा मृधे ग
रुडवाहमिभारिवाह आविध्य शूलमहिनोदथ कालनेमिः। तल्लीलया गरुडमूर्ध्नि पतद्गृहीत्वा तेनाहनन्नृप सवाहम
रिं त्र्यधीशः।५६। माली सुमाल्यतिबलौ युधि पेततुर्यच्चक्रेण कृत्तशिरसावथ माल्यवांस्तं। आहत्य तिग्मगदयाहनदंडजेंद्रं
तावच्छिरोऽच्छिनदरेर्नदतोऽरिणाद्यः।५७।। इति श्रीभागवते महापुराणे अष्टमस्कंधे दशमोऽध्यायः।१०।।

रेव सर्वासां विपदां विमोक्षणं रूपा किमुत हरेः प्रवेश इत्यर्थः।५५। इभारिवाहः सिंहवाहः। अहिनोत् विक्षेपलीलयैव तद्गृहीत्वा अहनत्। अह राम
नहे नृप।५६। यस्य चक्रेण कृत्तशिरसौ पेततुः तं तथाभूतमपि आहत्य संघयत् अंडजेंद्रं गरुडमहनत् तं हंतुं गदामुद्यम्य इत्यर्थः। आद्यो हरिः।५७।। २६
इति अष्टमे दशमः।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकादशे तु देवेषु दैत्यघाति तु नारदः दैत्यान्वारयत् बुक्को मृतान् दैत्यान् जीवयत् १ उदयच्छत् उन्निन्ये २।३ निबद्धान्यक्षाणि येषां तान् बालान् जित्वा नटः कपटद्रव्यं यथा तेषां धनं हरति तथा हे मूढ मायेशान् अस्मान् जेतुमिच्छसि ४ सम्बन्धावं श्रुति खिन्नाह आरुरुक्षंति स्वारोढुमिच्छंति च ये च उत्सिसृ

श्रीशुक उवाच ॥ ॥ अथो सुराः प्रत्युपलब्धचेतसः परस्य पुंसः परयानुकंपया जघ्नुर्भृशं शक्रसमीरणादयस्तांस्तान्रणे यै
रभिसंहताः पुरा १ वैरोचनाय संरब्धो भगवान् पाकशासनः उदयच्छ द्यदा वज्रं प्रजा हा हेति चुक्रुशुः २ वज्रपाणि
स्तमाहेदं तिरस्कृत्य पुरःस्थितं मनस्विनं सुसंपन्नं विचरंतं महामृधे ३ नटवन्मूढ मा याभिर्मायेशान्नो जिगीष
सि जित्वा बालान्निबद्धाक्षान् नटो हरति तद्धनं ४ आरुरुक्षंति मायाभिरुत्सिसृप्संति ये दिवं तान्दस्यून्विधुनोम्य
ज्ञान्पूर्वस्माच्च पदादधः ५ सोहं दुर्मायिनस्तेद्य वज्रेण शतपर्वणा शिरो हरिष्ये मंदात्मन् घटः स्व ज्ञातिभिः सह
६ बलिरुवाच ॥ ॥ संग्रामे वर्त्तमानानां कालचोदितकर्म्मणां कीर्त्तिर्ज्जयोजयो मृत्युः सर्वेषां स्युरनुक्रमात् ७ तमि
मं कालरशनं जनाः पश्यंति सूरयः नहृष्यंति न शोचंति तत्र यूयमपंडिताः ८ न वयं मन्यमानानामात्मानं तत्र साध
नं गिरो वः साधुशोच्यानां गृह्णीमो मर्म्मताडनाः ॥९॥

सृप्संति उल्लंघयितुमिच्छंति मोक्षमिच्छंतीत्यर्थः अधो विधुनोमि पातयामि ५ ६ ७ कालरशनं कालवशं वर्तितं अतो न हृष्यंति तत्र एवं विवेके यूयमपंडि
ताः अनिपुणाः ८ तत्र कीर्तिक्रियादौ आत्मानं साधनं मन्यमानानां वो गिरो न गृह्णीमः मर्मसु ताडनं यासि ता ॥९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विभुं इंद्रं वीरो बलिः । तोत्त्रं अंकुशः । तेन हतइव ॥११ सयानः विमानसहितः ॥१२॥१७ नमुचिर्बलः पाकश्चेति त्रयः आजग्मुः ॥१९ त्रयाणां पृथक्चिक २

॥श्रीशुक उवाच॥ इत्याक्षिप्य विभुं वीरो नाराचैर्वीरमर्दनः । आकर्णपूर्णैरहनदाक्षेपैराहतं पुनः ॥ एवं निराकृतो देवो वैरी २
णा तथ्यवादिना । नामृष्यत्तदधिक्षेपं तोत्राहत इव द्विपः ॥ प्राहरत्कुलिशं तस्मा अमोघं परमर्दनः । सयानो न्यपतद्भूमौ छि
न्नपक्ष इवाचलः ॥१२॥ सखायं पतितं दृष्ट्वा जंभो बलिसखः सुहृत् । अभ्ययात्सौहृदं सख्युर्हतस्यापि समाचरन् ॥१३॥ स सिंहवाह
आसाद्य गदामुद्यम्य रंहसा । जत्रावताडयच्छक्रं गजं च सुमहाबलः ॥१४॥ गदाप्रहारव्यथितो भृशं विह्वलितो गजः । जानुभ्यां धर
णीं स्पृष्ट्वा कश्मलं परमं ययौ ॥१५॥ ततो रथो मातलिना हरिभिर्दशशतैर्वृतः । आनीतो द्विपमुत्सृज्य रथमारुरुहे विभुः ॥१६॥ तस्य तत्पू
जयन् कर्म यंतुर्दानवसत्तमः । शूलेन ज्वलता तं तु स्मयमानोहनन्मृधे ॥१७॥ सेहे रुजं सुदुर्मर्षां सत्त्वमालंब्य मातलिः । इंद्रो जंभ
स्य संक्रुद्धो वज्रेणापाहरच्छिरः ॥१८॥ जंभं श्रुत्वा हतं तस्य ज्ञातयो नारदादृषेः । नमुचिश्च बलः पाकस्तत्रापेतुस्त्वरान्विताः ॥१९॥ ५
वचोभिः परुषैरिंद्रमर्दयंतोस्य मर्मसु । शरैरवाकिरन्मेघा धाराभिरिव पर्वतं ॥२०॥ हरीन्दशशतान्याजौ हर्यश्वस्य बलः शरैः ॥
तावद्भिरर्दयामास युगपल्लघुहस्तवान् ॥२१॥ शताभ्यां मातलिं पाको रथं सावयवं पृथक् । सकृत्संधानमोक्षेण तदद्भुतमभू
द्रणे ॥२२॥ नमुचिः पंचदशभिः स्वर्णपुंखैर्महेषुभिः ॥ आहत्य व्यनदत्संख्ये सतोय इव तोयदः ॥२३॥ सर्वतः शरकूटेन
शक्रं सरथसारथिं । छादयामासुरसुराः प्रावृट्सूर्यमिवांबुदाः ॥२४॥

मान्नाहहरीनिति त्रिभिः । हर्यश्वस्य इंद्रस्य तावद्भिः दशशतैः शरैः ॥२०॥२२॥ आहत्य इंद्रं विद्ध्वा ॥२१॥ प्रावृट्कालीनं सूर्यं ॥२३॥२४॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वणिक्यथा वणिजः भिन्नानौ येषांते भिन्ननाव इत्यर्थः २५ तुराषाडिंद्रः स्वाश्वादिसहितो विनिर्गतः स्वग्रणीः सारथिः २६ २७ शोकामर्षाभ्यां युक्तया रुषा क्रो
धेनान्वितः इंद्रं हंतुं परमो घोरो यत्नं चकार २८ घंटाभिर्युक्तं २९ ३१ अतिवीर्यहेतुत्वमभिनदिति ३२ ३३ तत्र पतत्त्रैः पत्रैः ३४ सारमयं वीर्याधिकं २

अजस्रयं तस्त्रमतीव विक्लवा विचुक्रुशुर्देवगणाः सहानुगाः । अनायकाः शत्रुबलेन निर्जिता वणिक्यथा भिन्ननवो यथार्णवे ॥
२५ ततस्तुराषाडिषुबद्धपंजरात् विनिर्गतः साश्वरथध्वजाग्रणीः । बभौ दिशः खं पृथिवीं चरंश्च यन् स्वतेजसा सूर्य इवाभ्रपाशये ॥
२५ निरीक्ष्य सृष्टतनां दिवः परैरसंहितां रणे । उदयच्छद्रिपुं हंतुं वज्रं वज्रधरो रुषा २६ मतेनैवाष्टधारेण शिरसी बलपाकयोः अत्रा
तीनां पक्षपतां राजन् जहार जनयन्नुत्नयं २७ नमुचिस्तद्वधं दृष्ट्वा शोकामर्षरुषान्वितः जिघांसुरिंद्रं नृपते चकार परमोद्यमं
२८ अश्ममसारमयं शूलं घंटाबद्धमभूषणं प्रगृह्याभ्यद्रवत्क्रुद्धो हतोसीति विसर्जयन् २९ अहिणोद्देवराजाय निनदन्मृगरा
डिव ॥३०॥ तदापतद्गगनतले महाजवं विचिछेद हरिरिषुभिः सहस्रधा तमाहनन्नृपकुलितोन कंधरे रुषान्वितस्त्रिदश
पतिः शिरोहरन् ३१ ततस्पाडितत्वचमपि वज्रं अकुंठितो विनिर्दयः सुरपतिनौजसेरितः तदद्भुतं परमतिवीर्यवृत्रहा तिरस्कृ
तोनमुचिशिरोधरत्वचा ३२ तस्मादिंद्रो बिभेदचोर्वज्रः प्रतिहतो यतः किमिदं दैवयोगेन नूनं लोकविमोहनं ३३ येन
मे पूर्वमक्षीणां पक्षच्छेदः प्रजात्यये कृतो निविष्टानां भारैः पतत्त्रैः पततां भुवि ३४ तपःसा रमयं त्वाष्ट्रं वृत्रो येन विपाटितः
अन्येचापि बलोपेताः सर्वास्त्रैरक्षतत्वचः सोयं प्रतिहतो वज्रो मया मुक्तो सुरेल्पके नाहं तदा द्धे ब्रह्मतेजोयकारणं ३६ द

त्वाष्ट्रं तपएव वृत्रः स येन वज्रेण मया विपाटितः ३५ दृढं लकुटतुल्यं बलतेजः दधीचेः सामर्थ्यं ३६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आर्द्रशुष्काभ्यां मृत्युर्नैवेति ॥३७॥३८॥ उभयात्मकत्वमेवाह नशुष्केणेन चार्द्रेणेति फेनेन । तथा च श्रुतिः अपां फेनेन नमुचेः शिर इंद्रोदवर्तयत इति ॥४०॥४४॥

॥ इति त्रिककुभं विषीदंतं मघवागशरीरिणी । नायं शुष्कैरथो नार्द्रैर्वधमर्हति दानवः ॥३७॥ मयास्मै यद्वरो दत्तो मृत्युर्नैवार्द्रशुष्कयोः । अतो
ऽन्यश्चिंतनीयस्ते उपायो मघवन् रिपोः ॥३८॥ तां दैवीं गिरमाकर्ण्य मघवान् सुसमाहितः । ध्यायन् फेनमथापश्यदुपायमुभयात्म
कं ॥३९॥ न शुष्केण न चार्द्रेण जहार नमुचेः शिरः । तं तुष्टुवुर्मुनिगणा माल्यैश्चावाकिरन् विभुं ॥४०॥ गंधर्वमुख्यौ जगतुर्विश्वावसु
परावसू । देवदुंदुभयो नेदुर्नर्तक्यो ननृतुर्मुदा ॥४१॥ अन्येप्येवं प्रतिद्वंद्वान् वाय्वग्निवरुणादयः । सूदयामासुरस्त्रौघैर्मृगान् केस
रिणो यथा ॥४२॥ ब्रह्मणा प्रेषितो देवान् देवर्षिर्नारदो नृप । वारयामास विबुधान् दृष्ट्वा दानवसंक्षयं ॥४३॥ नारद उवाच ॥ भ
वद्भिरमृतं प्राप्तं नारायणभुजाश्रयैः । श्रिया समेधिताः सर्व उपारमत विग्रहात् ॥४४॥ श्रीशुक उवाच ॥ संयम्य मन्युसंरंभ मा भं
नयंतो मुनेर्वचः । गीयमाना अनुचरैर्ययुः सर्वे त्रिविष्टपं ॥४५॥ येवशिष्टा रणे तस्मिन् नारदानुमतेन ते । बलिं विपन्नमादाय
अस्तं गिरिमुपागमन् ॥४६॥ तत्राविनष्टावयवान् विद्यमानशिरोधरान् । उशना जीवयामास संजीविन्या स्वविद्यया ॥
बलिश्चोशनसा स्पृष्टः प्रत्यापन्नेंद्रियस्मृतिः । पराजितोपि नाखिद्यत् लोकतत्त्वविचक्षणः ॥४८॥ ॥ इति श्रीभागवते महापुरा
णे अष्टमस्कंधे देवासुरसंग्रामे एकादशोध्यायः ॥११॥

अनुचरैः अनुगीयमाना इत्यर्थः उपगीयमानैरनुचरैः सहेति वा ॥४५॥४६॥ अविन
ष्टावयवा येषां विद्यमानाः शिरोधरा येषां तान् ॥४७॥ प्रत्यापन्ना पुनः प्राप्ता इंद्रियाणि स्मृतिश्च येन सः ॥४८॥ ॥ इति अष्टमे टीकायां एकादशः ॥ ॥११॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८

वादरीमोहिनीरूपविश्वमालोकनोत्सुकं नवंसंमोहयामासहरिःपुनरसांत्वयन्। अमुह्यन्नसुराविष्णुमाययानतदद्भुतं। इतिवकुंमहादेवमोहो
यमुपवर्णयति २ हरिःसोमममपाययदितीदंनिशम्यसयत्रास्तेतत्रतद्रूपंद्रष्टुंययाविष्णुर्नरेणान्वयः। सोमयात्रमयासह। २ त्वयिकिंचिन्नचा
श्चर्यंवियंत्वाश्चर्यमानसाः इतिवदन्महादेवस्तुष्टावहरिमष्टभिः। त्वयिमहामायाविनिपरमेश्वरेनहिकिलकिंचिदघटितमिववयंतुपरमकौ
तूहलेनद्रष्टुमागताः इतिबऊधासंबोधयन्स्तौति। हेदेवदेव। ऊनोहंदेवामंदेवइत्यतआह। हेजगद्व्यापिन्तत्कुतः। हेजगन्मय। तर्हिकिं

५

श्रीबादरायणिरुवाच॥ वृषध्वजोनिशम्येदंयोषिद्रूपेणदानवान्। मोहयित्वासुरगणान्हरिःसोममपाययत्॥१॥
वृषमारुह्यगिरिशःसर्वभूतगणैर्वृतः। सोमयाचययौद्रष्टुंयत्रास्तेमधुसूदनः॥२॥ सभाजितोभगवतासादरंसोमयाभ
वस्थौपविष्टउवाचेदंप्रतिपूज्यस्मयन्हरिं॥३॥ श्रीमहादेवउवाच॥ देवदेवजगद्व्यापिन्जगदीशजगन्मय। स
र्वेषामपिभावानांत्वमात्माहेतुरीश्वरः॥४॥ आद्यंतावस्ययन्मध्यमिदमन्यदहंबहिः। यतोव्ययस्यनैतानितत्स
त्यंब्रह्मचिद्भवान्॥५॥

प्रधानंन। हेजगदीश। तत्कृतत्वमत्राह। सर्वेषामपिभावानांहेतुः अतईश्वरः आत्मत्वाच्चनजडंप्रधानंत्वमित्यर्थः ३। ननुजगन्मयत्वोक्त्याजगतउत्पत्त्यादि
नाऽसत्यत्वेनत्राद्वैतंममापिकिंतथात्वंब्रूषेनहिनडीत्याह। आद्यंतौमध्यंचअस्यजगतोयतोब्रह्मणोनभवंति। अस्यचअव्ययस्यएतानिआद्यंतम
ध्यानिनसंति। यच्च [illegible] दंकारास्पदंहश्यंअहंकारास्पदंद्रष्टृचबहिर्भोग्यंअन्यच्चभोक्तृचतत्सत्यं। चिद्रूपंचब्रह्मैवभवान्। अतोनतवविकारादिकं
न ६ केत्यर्थः॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तवैवं तत्वे मुमुक्षूणामाचारः प्रमाणं स्यादित्याह। तवैवेति। उ। यतः इहामुत्र च संगं त्यक्त्वा ६ नत्वड्डतैव चेदद्वैतं तर्हि संगे दासीनस्य मम त्वच्चरणं नोपा सनया किं तेषां तत्राह। त्वमिति। ब्रह्म त्वेऽपि तेनासंतमुदासीनः किंतु विश्वस्य प्रपंचस्योदयादी मां नो हेतुः। तदुपाधीनामात्मनां जीवानामीश्वरः से श्वत्वतत्फलदातात र्हि किं राजादिवत्क याप्यपेक्षया सेवकेभ्यः फलं ददामि नहि नहि अनपेक्ष एव त्वं तर्हि किमीश्वरत्वेन तत्राह। तेरा त्मनि। तत्फलदाना यमिपेक्षत इति तदपेक्षः तस्मात्वत्स्वदपेक्षता तयात्वनपेक्षत्वमेव दर्शयितुं तदीयं ब्रह्मत्वं विशिनष्टि पूर्णं अमृतं च सुखरूपं विषयसुखवैलक्षण्यं यमाह अविविकारं निस्पंदमानंदं स्वामंच। कुतः विश्वोकं तकुतः विगुणं किंच अन्यत्व नविद्यते अनघस्मा

तवैवचरणं नोजं श्रेयस्कामा निराशिषः। विसृज्यान्यतः संगं मुनयः समुपासते। ६। त्वं ब्रह्म पूर्णममृतं विगुणं विशोकमानंद मात्रमविकारमनन्यदन्यत्। विश्वस्य हेतुरुदयस्थितिसंयमानामात्मेश्वरश्च तदपेक्षतयानपेक्षः। ७। एकस्त्वमेव सदसद्द्वयमद्वयं च स्वर्णं कृताकृतमिवेह न वस्तुभेदः। अज्ञानतस्त्वयि जनैर्विहितो विकल्पो यस्माद्गुणव्यतिकरो निरुपाधिकस्य। ८। ॥

तद्ब्रह्मवति
रिक्तान्यत्वादपि निरपेक्षत्वमित्यर्थः। तर्हि सर्वात्मकत्वे तत्तद्विकारप्रसंगो दुर्वारः तत्राह। अन्यत्सर्वतो अतिरिक्तं च कारणत्वात्। नचैवं नूनमुखात्मकब्रह्मस्वरूपस्य तत्वान्यापेक्षास्ति। अतः केवलं भक्तानुग्रहार्थमेव तवैश्वर्यं न स्वार्थमित्यर्थः। ७। अन्यत्वमनन्यत्वं चैकस्य कुत इत्याशंक्य दृष्टांतेनोपपादयति। सदसत्कार्यकारणरूपं द्वयं अद्वयं च परमकारणं त्वमेवैकः कृतं कुंडलादिरूपं द्वयं अकृतं च केवलमद्वयं स्वर्णं यथैकमेव तद्वदेवेह तत्त्व मिव वस्तुतो भेदो नास्ति कथं तर्हि भेदप्रतीतिस्तत्राह। अज्ञानत इति। कुतः यस्मान्निरुपाधिकस्यैव तवायं गुणव्यतिकरो भेदो न स्वतः। ८। ॥ राम
२९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन एव त्वां बहुधा वर्णयंति तत्त्वतस्तु केपि न जानंतीत्याह । यामांत्वां ब्रह्म वेदांतिनो वदंति मन्यंते । त्वामेव धर्म्मं मीमांसकाः मन्यंते प्रकृति पुरु
षयोः परं पुमांसं सांख्याः । विमलोत्कर्षणी ज्ञाना क्रिया योगा प्रह्वी सत्या ईशाना अनुग्रहा च । इत्येवं नवशक्तियुतं परं पांचरात्राः । महापुरुषं पा
तंजलाः ९ परायुः ब्रह्मा सत्त्वसर्गाः सत्त्वगुणेन सृष्टा अपि येन त्वया विरचितं विश्वमपि खलु तत्त्वतो न जानंति किं पुनस्त्वां हे ईश । अनइंराम

त्वां ब्रह्म केचिदवयंत्युत धर्म्ममेक एके परं सदसतोः पुरुषं परेशं । अन्ये नवंति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव्ययमा
त्मतत्त्वं ॥ ९ ॥ नाहं परायुरृषयो न मरीचिमुख्या जानंति यद्विरचितं खलु सत्त्वसर्गाः । यन्मायया मुषितचेतस ईश दैत्यमर्त्या
दयः किमुत शश्वदभद्रवृत्ताः ॥ १० ॥ स त्वं समीहितमदः स्थितिजन्मनाशं भूतेहितं च जगतो भवबंधमोक्षौ । वायु र्यथा वि
शति खं च चराचराख्यं सर्वं तदात्मकतयावगमोवरुंत्से ॥ ११ ॥ अवतारा मया दृष्टा रममाणस्य ते गुणैः । सोहं तद्द्रष्टुमिच्छामि यत्ते
योषि द्वपुर्धृतं ॥ १२ ॥ येन संमोहिता दैत्याः पायिताश्चामृतं सुराः । तद्दिदृक्षव आयाताः परं कौतूहलं हि नः ॥ १३ ॥

चरा २

संतामसं च ब्रह्मतम
तिस्थ्ये येषां ते न जानंतीति किमु वक्तव्यं ॥ १० ॥ ११ ॥ किंतु त्वं सर्वं जानासीत्याह । स त्वं सर्वं अवरुंत्से आप्नोषि जानासि । किं तत्त्वं समीहितं स्वकृतं अदः स्थितिज
न्मनाशं अमुष्य जगतो जन्मादि भूतानामीहितं च जगतो भवबंध मोक्षौ च व्याप्तौ दृष्टांतः । चराचराख्यं देहजातं खं च यथा वायुः प्रविशति । ११ तथाकृ
पमवरुंत्से तदात्मकतया तस्य सर्वस्यात्मतयेत्यर्थः । आत्मत्वे हेतुः अवगमः ज्ञानरूप इति । १२ एवं स्तुत्वा प्रस्तुतं विज्ञापयति अवतारा इति द्वाभ्यां ॥ १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्कं०
३०

१४॥ सुरकार्याणि योषिद्वेषेण नविष्यंतीति प्रपन्नपता श्वयं नावः । अवरूपं तावद्युन्मनात्र देत्यानां च मोहितादेवेभ्यो मृतं देयं । न चैवं वेषस्य रूपांतरेण क
र्तुमुचितं अतो वंचनमोहनादिसारं कामिनीरूपं मया धृतमिति ॥ १५ ॥ तद्रूपं दर्शयिष्यामि संकल्पप्रभवः कामतस्योदयो यस्मात् ॥ १६ ॥ १७ ॥ विचित्रार
णि पुष्पाणि अरुणाः पल्लवाश्च येषां ते द्रुमा यस्मिन् लसत् दुकूलेन पर्यस्ते परिवृते नितंबे मेखला यस्याः तां ॥ १८ ॥ उत्पतत् पतत् कंदुकलीलावशे

श्रीशुक उवाच ॥ एवमभ्यर्थितो विष्णुर्भगवान् शूलपाणिना । प्रहस्य भावगंभीरं गिरिशं प्रत्यभाषत ॥ १४ ॥ श्रीभगवानुवाच ॥
कौतूहलाय दैत्यानां योषिद्वेषो मया धृतः । पश्यता सुरकार्याणि गते पीयूषभाजने ॥ १५ ॥ तत्तेहं दर्शयिष्यामि दिदृक्षोः सुर
सत्तम । कामिनां बहु मंतव्यं संकल्पप्रभवोदयं ॥ १६ ॥ श्रीशुक उवाच ॥ इति ब्रुवाणो भगवांस्तत्रैवांतरधीयत । सर्वतश्चार
यंश्चक्षुर्भव आस्ते सहोमया ॥ १७ ॥ ततो ददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे । विक्रीडतीं कंदुकलीलया लस
द्दुकूलपर्यस्तनितंबमेखलां ॥ १८ ॥ आवर्तनोद्वर्तनकंपितस्तनप्रकृष्टहारोरुभरैः पदे पदे । प्रभज्यमानामिव मध्यतश्चलत्पदप्रवा
लं नयतीं ततस्ततः ॥ १९ ॥ दिक्षु भ्रमत्कंदुकचापलैर्भृशं प्रोद्विग्नतारायतलोललोचनां । स्वकर्णविभ्राजितकुंडलोल्लसत्कपोल
नीलालकमंडिताननां ॥ २० ॥

नवेत्यावर्तनोद्वर्तनेन मनोज्ञमतेतास्यां कंपितयोः स्तनयोः प्रकृष्टहाराणां चोरुभारैः प्रतिपदं मध्ये प्रभज्यमाना
मिव । चलत्पदमेव प्रवालवत्कोमलं ततस्ततो नयंतीं ॥ १९ ॥ दिक्षु भ्रमतः कंदुकस्य चापलैश्चांचल्यैः । भृशं प्रोद्विग्नतारे आयते लोले चंचले लोचने यस् राम
याः । स्वकर्णयोर्विभ्राजिते ये कुंडले तयोर्मुल्लसंतौ कपोलौ तेन सां च नीलालकैश्च मंडितमाननं यस्याः ॥ २० ॥ ॥ ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संन ह्यंतीवधुंती। जगद्विमोहयंती २१ तांवीक्ष्यदेवः श्रीरुद्रः आत्मानमंतिके स्थितामुमांस्वगणांश्च नवेद कथंभूतः इतिएवंभूतयाकंदुकली
लयायाईषद्व्रीडितयाअस्फुटंस्मितंतेन सह विसृष्टो यः कटाक्षः तेनमुष्टोवंचितः अतएवस्वयंयत् स्त्रियाः प्रेक्षणंतयाच प्रतिसमीक्षणंता

सयदुकूलंकव रीचविस्रुतांसंनह्यंतीवामकरेणवल्गुना विनिघ्नतीमन्यकरेणकंदुकंविमोहयंतीजगदात्ममायया २१
तांवीक्ष्यदेवइतिकंदुकलीलयेषद्व्रीडास्फुटस्मितविसृष्टकटाक्षमुष्टः स्त्रीप्रेक्षणप्रतिसमीक्षणविह्वलात्मानात्मानमंतिक
उमांस्वगणांश्चवेद २२ तस्याः कराग्रात्सतुकंदुकोयदागतोविदूरंतमनुव्रजत्स्त्रियाः वासः ससूत्रंलघुमारुतोहरत्भवस्य
हेवस्यकिलानुपश्यतः २३ एवंतांरुचिरापांगींदर्शनीयांमनोरमां दृष्ट्वातस्यांमनश्चक्रे विषज्जंत्यांभवः किल २४ तयोपहृ
तविज्ञानस्त कृतस्मरविह्वलः भवान्याअपिपश्यंत्यागतह्रीस्तत्पदंययौ २५ सातमायांतमालोक्यविवस्त्राव्रीडिता
भृशं निलीयमानावृक्षेषुहसंतीनान्वतिष्ठत २६ तामन्वगच्छन्भगवान्भवः प्रमुषितेंद्रियः कामस्यचवशंनीतः करेणुमि
वयूथपः २७ सोनुव्रज्यातिवेगेनगृहीत्वानिच्छतींस्त्रियं केशबंधेउपानीयबाहुभ्यांपरिषस्वजे २८ सोपगूढ भगवताकरि
णाकरिणीयथा इतस्ततः प्रसर्पंतीविप्रकीर्णशिरोरुहा २९ आत्मानंमोचयित्वांगसुरर्षभभुजांतरात् प्राद्रवत्सा
पृथुश्रोणीमायादेवविनिर्मिता ३०

सांविह्वलआत्मामनोयस्यातं २२ कंदुकमनुव्रजंत्याः स्त्रियालघुसूक्ष्मंवासः ससूत्रंकांचीस
हितं २३ विषज्जंत्यांकंचितकटाक्षेरात्मानंनी रीक्ष्यमाणायां २५ तत्पदंतस्याः समीपंययौ अंगहेराजन् ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना.स्कं. ३१ एवंतामनुधावन्हरःसरित्सरःसुशैलादिषु च सन्निहितोबभूव ।३४। तदुहमायया जडीकरणं ।३५। स्वांनिष्टांप्रतीति ।३६। कालेनरूपाद्यादिनि
सेयंगुण्ये

तस्यासौपदवींरुद्रोविष्णोरद्भुतकर्मणः। प्रत्यपद्यतकामेनवैरिणेवविनिर्जितः ।३१। तस्यानुधावतोरेतश्चस्कंदाऽमोघरेतसः। शुष्मिणो
यूथपस्येववासितामनुधावतः ।३२। यत्रयत्रापतन्मह्यांरेतस्तस्यमहात्मनः। तानिरूप्यस्यहेम्नश्चक्षेत्राण्यासन्महीपते ।३३। सरित्स
रःसुशैलेषुवनेषूपवनेषुच। यत्रक्वचासन्नृषयस्तत्रसं[न्नि]हितोहरः ।३४। स्कन्नेरेतसिसोपश्यदात्मानंदेवमायया। जडीकृतंनृप
श्रेष्ठसंन्यवर्ततकश्मलात् ।३५। अथावगतमाहात्म्यआत्मनोजगदात्मनः। अपरिज्ञेयवीर्यस्यनमेनेतदुहाद्भुतं ।३६। तमविक्लवम
व्रीडमालक्ष्यमधुसूदनः। उवाचपरमप्रीतोबिभ्रत्स्वांपौरुषींतनुं ।३६। श्रीभगवानुवाच ॥ दिष्ट्यात्वंविबुधश्रेष्ठस्वांनिष्ठामात्मनास्थि
तः। यन्मेस्त्रीरूपयास्वैरंमोहितोप्यंगमायया ।३७। कोनुमेतितरेन्मायांविषक्तस्त्वदृतेपुमान्। तांस्तान्विसृजतींभावान्दुस्तराम
ह कृतात्मभिः। सेयंगुणमयीमायानत्वामभिभविष्यति। मयासमेताकालेनकालरूपेणभागशः ।३९। श्रीशुकउवाच। एवंभ
गवताराजन्श्रीवत्सांकेनसत्कृतः। आमंत्र्यतंपरिक्रम्यसगणःस्वालयंययौ ।४०। आत्मांशभूतां तांमायांभवानींभगवान्भ
वः। शंसतामृषिमुख्यानांप्रीत्याचष्टाथभारत ।४१। अयिव्यपश्यस्त्वमजस्यमायांपरस्यपुंसःपरदेवतायाः। अहंकलानामृषभो[पि मु]ह्ये
यययावशोऽन्येकिमुतास्वतंत्राः ।४२। यंमामपृच्छस्त्वमुपेत्ययोगात्समासहस्रांतउपारतंवै। सएषसाक्षात्पुरुषःपुराणोनय
त्रकालोविशतेनवेदः ।४३॥ ॥ ॥

र्मितिनामयाकाल रूपेणभाग शोरजआद्यंशेनसमेतामदधीनासती ।३९।४३॥ ॥ राम ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टाध्यायार्थनिगमनं इतीति ४५ एतत्कीर्तनादौ फलमाह एतदिति ४६ भगवत्पादाब्जं मक पत्र पातं सत्क नमस्करोति असतामविषयं भावेन नंते
नगम्यमं घ्रिप्रपन्नान् सिंधुमथ्यं सिंधोर्मथने व जातममृतं यः आपाययत् अनीनयत् ४७ इति अष्टमे द्वादशः त्रयोदशेतु वर्ण्यंते सप्तमादीन्य

श्रीशुक उवाच इति ते निहितं तात विक्रमः शार्ङ्गधन्वनः सिंधोर्निर्मथने येन धृतः पृष्ठे महाचलः ४४ एतन्मुहुः कीर्त्तयितो
शृण्व एव तो न रिष्यते जातु समुद्यमः क्वचित् यदुत्तमश्लोक गुणानुवर्णनं समस्त संसार परिश्रमापहं ४५ असदविषयमं
घ्रिं भावगम्यं प्रपन्नानमृतममरवर्यानाशयन् सिंधुमथ्यं कपटयुवतिवेषो मोहयन्यः सुरारीन् तमहमुपसृतानां कामपूरं न
तोस्मि ४६ इति श्री भागवते महापुराणे अष्टमस्कंधे शंकरमायामोहनं नाम द्वादशोऽध्यायः १२ श्रीशुक उवाच
मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः सप्तमो वर्त्तमानो यस्तदपत्यानि मे शृणु १ इक्ष्वाकुर्नभगश्चैव धृष्टः शार्यातिरेव च न
रिष्यंतोथ नाभागः सप्तमो दिष्ट उच्यते २ करूषश्च पृषध्रश्च दशमो वसुमान् स्मृतः मनोर्वैवस्वतस्यैते दश पुत्राः परंतप ३
आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः अश्विनावृभवो राजन् इंद्रस्तेषां पुरंदरः ४ कश्यपोत्रिर्वसिष्ठश्च विश्वामित्रोथ
गौतमः जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः ५ अत्रापि भगवज्जन्म कश्यपाददितेरभूत् आदित्यानामवरजो विष्णुर्वामन
रूपधृक् ६ संक्षेपतो मयोक्तानि सप्तमन्वंतराणि ते भविष्याण्यथ वक्ष्यामि विष्णोः शक्त्यान्वितानि च ७

तु क्रमात् मन्वंतराणि सर्वाणि षड्विधानि पृथक्पृथक् १ सप्तमादि मन्वंतराणां मनुरित्यादिना यावदध्यायसमाप्ति १ । ३ आदित्या इत्यादेर्देवा इन्द्र
त्वयः भगवतो जन्म अवतारः तमेवाह आदित्यानां विवस्वानर्यमा पूषेत्यादीनां मध्ये अवरं जन्म यस्य सः शक्त्या अवतारेणान्वितानि ७

अष्टमं मनुं वक्तुं कथामाह विवस्वत इति त्रिभिः ॥७॥ एके वडवां तृतीयामाहुः ॥ मम तु संज्ञैव वडवेति मतं । तदुक्तं षष्ठे सैव भूत्वाथ वडवा नासत्यौ सु
षुवे भुवी तियमश्च यमी चैव मनुना श्राद्धदेवश्चेति त्रयः सुताः ॥९॥१०॥ सावर्णिः पुत्रः ॥११॥ पत्रयं याचमानाय इमां सर्वां महीं सप्तमे मन्वंतरे दत्वाष्टमे
६

विवस्वतश्च द्वे जाये विश्वकर्मसुते उभे । संज्ञा छाया च राजेंद्र ये प्रागभिहिते तव ॥८॥ तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः । य तासां
मो यमी श्राद्धदेवः छायायाश्च सुतान् शृणु ॥९॥ सावर्णिस्तपती कन्या भार्या संवरणस्य या । शनैश्चरस्तृतीयोऽभूदश्विनौ वडवात्म
जौ ॥१०॥ अष्टमेंतर आयाते सावर्णिर्भविता मनुः । निर्मोकविरजस्काद्याः सावर्णितनया नृप ॥११॥ तत्र देवाः सुतपसो विरजा अ
मृतप्रभाः । तेषां विरोचनसुतो बलिरिंद्रो भविष्यति ॥१२॥ दत्वेमां याचमानाय विष्णवे यः पदत्रयं । राद्धमिंद्रपदं हित्वा ततः सिद्धि
मवाप्स्यति ॥१३॥ योसौ भगवता बद्धः प्रीतेन सुतले पुनः । निवेशितोधिके स्वर्गादधुनास्ते स्वराडिव ॥१४॥ गालवो दीप्तिमान् रामो द्रो
णपुत्रः कृपस्तथा । ऋष्यशृंगः पितास्माकं भगवान् बादरायणः ॥१५॥ इमे सप्तर्षयस्तत्र भविष्यंति स्वयोगतः । इदानीमासते रान् ज
स्वे स्व आश्रममंडले ॥१६॥ देवगुह्यात् सरस्वत्यां सार्वभौम इति प्रभुः । स्थानं पुरंदराद्धृत्वा बलये दास्यतीश्वरः ॥१७॥ नवमो दक्षसा
वर्णिर्मनुर्वरुणसंभवः । भूतकेतुर्दीप्तिकेत्वित्याद्यास्तत्सुता नृप ॥१८॥ पारा मरीचिगर्भाद्या देवा इंद्रोऽद्भुतः स्मृतः ॥ द्युति
मत्प्रमुखास्तत्र भविष्यंत्यृषयस्ततः ॥१९॥

मन्वंतरे विष्णोः प्रसादेन त्वराद्ध्वं लब्धमिंद्रपदं हित्वेत्यर्थः ॥१३॥१४॥ रामः परशुरामः द्रोणपुत्रोश्वत्थामा ॥१५॥ इदानीं तु स्वयोगतस्तत्रासते ॥१६॥१७॥ अद्भुतः इंद्रः ॥१९॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२२ हविष्मत्प्रमुखास्सुक्तानामेवकेषांचित्रामान्याह। ...विष्मानिति २३ विषूच्यांजातःसन् २४ एकादशमइत्यादिराणिः २५ २६ तस्मनो

आयुष्मतोंबुधारायामृषभोभगवत्कला। भवितायेनसंराद्धांत्रिलोकींभोक्ष्यतेद्भुतः २० दशमोब्रह्मसावर्णिरुपश्लोकसुतो
महान्। तत्सुताभूरिषेणाद्याहविष्मत्प्रमुखाद्विजाः २१ हविष्मान्सुकृतःसत्योजयोमूर्तिस्तदाद्विजाः सुवासनविरुद्धाद्यादे
वाःशंभुःसुरेश्वरः २२ विष्वक्सेनोविषूच्यांतुशंभोःसख्यंकरिष्यति। जातःस्वांशेनभगवान्गृहेविश्वसृजोविभुः २३ मनुर्
वैधर्मसावर्णिरेकादशमआत्मवान्। अनागतास्तत्सुताश्चसत्यधर्मादयोदश २४ विहंगमाःकामगमानिर्वाणरुचयःसु ण
राः इंद्रश्चवैधृतस्तेषामृषयश्चारुणादयः २५ आर्यकस्यसुतस्तत्रधर्मसेतुरितिस्मृतः। वैधृतायांहरेरंशस्त्रिलोकीं
धारयिष्यति २६ भवितारुद्रसावर्णीराजन्द्वादशमोमनुः [illegible] देववानुपदेवश्चदेवश्रेष्ठादयःसुताः २७ ऋतधामा
चतत्रेंद्रोदेवाश्चहरितादयः ऋषयश्चतपोमूर्तिस्तपस्व्याग्नी[illegible]ध्रकादयः २८ स्वधामाख्योहरेरंशःसाधयिष्यतितन्म
नोः अंतरंसत्यसहसःसूनृतायाःसुतोविभुः २९ मनुस्त्रयोदशोभाव्योदेवसावर्णिरात्मवान् ३० चित्रसेनविचि
त्राद्यादेवसावर्णिदेहजाः ३० देवाःसुकर्मसुत्रामसंज्ञाइंद्रोदिवस्पतिः ३१ निर्मोकतत्वदर्शाद्याभविष्यंत्यृषयस्त
दा ३१ देवहोत्रस्यतनयउपहर्तादिवस्पतेः योगेश्वरोहरेरंशोबृहत्यांसंभविष्यति ३२ मनुर्वाइंद्रसावर्णिश्चतु
र्दशमएष्यति। उरुगंभीरबुधाद्याइंद्रसावर्णिवीर्यजाः ३३ ॥ ॥

रंतरंसाधयिष्यति सत्यसहसःसूनृतायाश्चसुतःसन् ३० दिवस्पतेःइंद्रस्योपहर्तासंपादकःसंभविष्यति ॥ ३३ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰
३३

क्रियातंतून् कर्मसंततीः वितायिता विस्तारयिष्यति ३६ युगसाहस्रेण पर्ययः परिवर्त्तो यस्य युगसहस्रप्रमाण इत्यर्थः ३७ इति श्रीअष्टमेत्रयोदशः चतुर्दशे तु सर्वेषां मन्वादीनां यथा यथं पृथक् कर्माणि वर्ण्यंते भगवद्वशवर्त्तिनां १ पुरुषेणेश्वरेण यज्ञाद्यवतारैः त्रास्यंते नियुंजंते तः

पवित्राश्चाक्षुषा देवाः शुचिरिंद्रो भविष्यति अग्निर्बाहुः शुचिः शुद्धो मागधाद्यास्तपस्विनः ३४ सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः वितानायां महाराज क्रियातंतून्वितायिता ३५ राजंश्चतुर्दशैतानि त्रिकालानुगतानि ते प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्ययः ३६ ॥ इति श्रीभागवते महापुराणेऽष्टमस्कंधे मन्वंतरानुवर्णनं नाम त्रयोदशोऽध्यायः १३ ॥ राजोवाच ॥ मन्वंतरेषु भगवन् यथा मन्वादयस्त्विमे ॥ यस्मिन् कर्मणि ये येन नियुक्तास्तद्वदस्व मे १ ऋषिरुवाच ॥ मनवो मनुपुत्राश्च मुनयश्च महीपते ॥ इंद्राः सुरगणाश्चैव सर्वे पुरुषशासनाः ॥ २ यज्ञादयो याः कथिताः पौरुष्यस्तनवो नृप ॥ मन्वादयो जगद्यात्रां नयंत्याभिः प्रचोदिताः ३ चतुर्युगांते कालेन ग्रस्तान् श्रुतिगणान् यथा ॥ तपसा ऋषयोऽपश्यन् यतो धर्मः सनातनः ४ ततो धर्मं चतुष्पादं मनवो हरिणोदिताः ॥ युक्ताः संचारयंत्यद्धा स्वे स्वे काले महीं नृपाः ५ पालयंति प्रजापाला यावदंतं विभागशः ॥ यज्ञभागभुजो देवा ये च तत्रानुकीर्त्तिताः ॥ ६ इंद्रो भगवता दत्तां त्रैलोक्यश्रियमूर्जितां ॥ भुंजानः पाति लोकान् कामं लोके प्रवर्षति ॥ ७ ॥

त्रीन् १ सतः ततश्चातद्वदाह ॥ यज्ञादय इति ऋष्यादीनां कर्माण्याह चतुर्युगांत इति चतुर्भिः यतः येभ्यः श्रुतिगणेभ्यः उदिताः उक्ताः युक्ताः संयतानो महीं धर्मं संचारयंति महीं धर्मं प्रवर्त्तयंतीत्यर्थः ५ प्रजाः पाला मनुपुत्राः ते धर्मं पालयंति यावदंतं यावन्मन्वंतरावसानं विभागशः पुत्रपौत्रादिक्रमेण ये चान्ये यावाष्टयियादयो यत्र कर्मणि नोक्तत्वेनान्विताः तैश्च सह ॥ ६ ॥ ७ ॥ ॥ राम ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसंगाद्रूपांतरैरपि जगद्यात्राप्रवर्त्तनमाह। ज्ञानमिति द्वाभ्यां। सिद्धाः सनकादयः ऋषयो याज्ञवल्क्यादयः। योगेशा दत्तात्रेयादयः। तत्तद्रूपः सन् ज्ञा
नं कर्म च योगं च ब्रूते। प्रजेशा मरीच्यादयस्तेन रूपेण सर्गं करोतीति शेषः। स्वराड्वपुः राजमूर्त्तिः। सर्वेषामनावायत्तवति। पृथग्विधाः गुणाः शी
तोष्णादयस्तन्नामरूपात्मिकया मायया मोहितात्मभिर्निजजनैः। नानादर्शनैः शास्त्रैः स्तूयमानो निरूप्यमाणोऽपि नैव दृश्यत इत्यर्थः। ९

ज्ञानं चानुयुगं ब्रूते हरिः सिद्धस्वरूपधृक्। ऋषिरूपधरः कर्म योगं योगेशरूपधृक्॥ ८॥ सर्गं प्रजेशरूपेण दस्यून्हन्यात्स्व
राड्वपुः। कालरूपेण सर्वेषामनावाय पृथग्गुणः॥ ९॥ स्तूयमानो जनैरेभिर्मायया नामरूपया। विमोहितात्मभिर्नानाद
र्शनैर्न च दृश्यते॥ १०॥ एतत्कल्पविकल्पस्य प्रमाणं परिकीर्त्तितं। यत्र मन्वंतराण्याहुश्चतुर्दश पुराविदः॥ ११॥ ॥ इति श्रीभाग
वते महापुराणेऽष्टमस्कंधे चतुर्दशोऽध्यायः॥ १४॥ ॥ राजोवाच॥ बलेः पदत्रयं भूमेः कस्माद्धरिरयाचत। भूतेश्वरः कृ
पणवल्लब्धार्थोऽपि बबंध तं॥ १॥ एतद्वेदितुमिच्छामो महत्कौतूहलं हि नः। यज्ञेश्वरस्य पूर्णस्य बंधनं चाप्यनागसः॥ २॥ ॥

प्रासंगिकं निरूप्य प्रस्तुतमेवोपसंहरति। एतत्कल्पविकल्पस्य। अवांतरकल्पस्य॥ ११॥ इति अष्टमे चतुर्दशः॥ ॥ बलिं पंचदशे विश्वजिता चार्य्य
अप्याजयन् ततो सौ स्वर्गमजयद्भयाद्देवा विलिल्यिरे। एत्त्रेयर्तेन वाध्यायाभ्यां वामनचेष्टितं। निग्रहश्च बलेस्तो यत्र बलेर्भूयाननुग्रहः॥
१ ईश्वरः स्वयं कृपणवत् कस्माद्बलिमयाचत लब्धार्थोऽपि तं कस्माद्बबंध॥ २॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰स्क॰ ३४ तत्रतावद्बलेः त्रिलोकीमपहर्तुं यात्रा दिग्विजयं कृतवानिति वक्तुं ब्राह्मणाराधनेन वज्जेरकांड एव स्वर्गविजयक्रममाह पराजितश्रीरित्या
दिना ॥ यावदध्यायसमाप्ति ॥ मुख्ये पराजिता श्रीर्येन सः ॥ इंद्रेण असुभिश्च हापितः सन् भृगून् स्वगोत्रे यां शुक्रादीन् महात्मा तदा रचितः अर्था
नां निवेदनेनार्पणेन ॥३॥ त्रिनाकं स्वर्गं जेतुमिच्छंतं ॥ विश्वजिता यागेन अयाजयन् महाभिषेकेण ॥ ऐंद्रेण बह्वृचब्राह्मणप्रसिद्धेन ॥४॥ हयश्च

श्रीशुक उवाच ॥ पराजितश्रीरसुभिश्च हापितो हींद्रेण राजन् भृगुभिः स जीवितः ॥ सर्वात्मना तानभजद्भृगून् बलिः शिष्यो
महात्मार्थनिवेदनेन ॥३॥ तं ब्राह्मणा भृगवः प्रीयमाणाः अयाजयन् विश्वजिता त्रिनाकं ॥ जिगीषमाणं विधिनाभिषिच्य म
हाभिषेकेन महानुभावाः ॥४॥ ततो रथः कांचनपट्टनद्धो हयाश्च हर्यश्वतुरंगवर्णाः ॥ ध्वजश्च सिंहेन विराजमानो हुताशनादा
स हविर्भिरिष्टात् ॥५॥ धनुश्च दिव्यं पुरटोपनद्धं तूणावरिक्तौ कवचं च दिव्यं ॥ पितामहस्तस्य ददौ च मालामम्लानपुष्पां जलजं च शु
क्रः ॥६॥ एवं स विप्रार्जितयोधनार्थस्तैः कल्पितस्वस्त्ययनोऽथ विप्रान् ॥ प्रदक्षिणीकृत्य कृतप्रणामः प्रह्लादमामंत्र्य नमश्च
कार ॥७॥ अथारुह्य रथं दिव्यं भृगुदत्तं महारथः ॥ सुस्रग्धरोऽथ संनह्य धन्वी खड्गी धृतेषुधिः ॥८॥ हेमांगदलसद्बाहुः स्फुरन्म
करकुंडलः ॥ रराज रथमारूढो धिष्ण्यस्थ इव हव्यवाट् ॥९॥

सेंद्रस्य ये तुरंगास्तेषामिव वर्णो हरितो येषां ॥५॥ पुरटं सुवर्णं तूणौ इषुधी
अरिक्तौ अक्षयशरौ ॥ पितामहः प्रह्लादः ॥ जलजं शंखं ॥६॥ विप्रैरर्जितः संपादितो योधनार्थो युद्धपरिकरो यस्य तैरेव कल्पितं स्वस्त्ययनं मंगलवाचनादि य राम
स्य आमंत्र्य पृष्ट्वा ॥७॥ अथारुह्य रराजेति द्वयोरन्वयः ॥ सुस्रक् धरः शोभनमालाधरः ॥८॥ हेमांगदाभ्यां लसंतौ बाहू यस्य ॥ धिष्ण्यस्थः वन प्रज्वलितः कुंडस्थ आ ३४
हवनीय इवेति वा ॥९॥

तुल्यमैश्वर्यं बलं च श्रीश्च येषां तैर्हस्तियूथपैर्वृतै यया वितिव योरन्वयः परिधीन दिग्गः ॥१०॥ स्पष्टां अतिसमृद्धां ॥११॥ तथाविधां पुरीं अकस्मादेव प
रित्यज्य पंजादयः पलायिताः इति वैराग्यार्थमिद्ध पुरं म नुवर्णयति रम्या मिति मार्द्वैरेकादशभिः उपवनानि फलप्रधानानि निकटानि वा उ
ति द्यानानि पुष्पप्रधानानि दूरस्थानि वा तैः रम्यां कूजंति विहंगमिथुनानि येषु गायंती मत्तानां मधुव्रतानां येषु प्रवालादीनां मुरुर्नरोन्य सुगाः श्वा
खायिषां ते च अमरद्रु मायेषु तैः यत्र यासु सुरसेविताः प्रमदाः क्रीडंति तानाः हंसादिकुलैराकुलाव्या मानलिन्यः सरांसि यत्र येषु संवितैरु

तुल्यैश्वर्यबलश्रीभिः स्वयूथ्यैर्हस्तियूथपैः पिबद्भिरिव खं दृग्भिर्दृहद्भिः परिधीनिव ॥१०॥ हृतो विकर्षन् महती मासुरीं ध्वजिनीं
विभुः यया विद्रुपुरीं स्पष्टां कंपय न्निव रोदसी ॥११॥ रम्यामुपवनोद्यानैः श्रीमद्भिर्नंदनादिभिः कूजद्भि र्विहंगमिथुनैर्गायन्म
त्तमधुव्रतैः ॥१२॥ प्रवालफलपुष्पोरुभारशाखामरद्रुमैः हंससारसचक्राह्वकारंडवकुलाकुलाः ॥१३॥ नलिन्यो यत्र क्रीडं
ति प्रमदाः सुरसेविताः आकाशगंगया देव्या वृतां परिखभूतया ॥१४॥ प्राकारेणाग्निवर्णेन साट्टालेनोन्नतेन च रुक्मप
ट्टकपाटैश्च द्वारैः स्फटिकगोपुरैः ॥१५॥ जुष्टां विभक्तप्रपथां विश्वकर्मविनिर्मितां सभाचत्वररथ्याढ्यां विमानैर्न्यर्बुदैर्यु
तां ॥१६॥ शृंगाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः ॥१७॥
पवनोद्यानैरम्यामिति पूर्वेणैवान्वय। किंच परिखाभूतया आकाशगंगया वृतं
प्राकारेण सौवर्णेन चावृतां अट्टालाः प्राकारोपरि रथिनामुन्नतानि युद्धस्थानानि तत्सहितेन ॥१४॥ रुक्मपट्टानि कपाटानि येषु तैर्द्वारैरवांतरैः स्फ
टिकमयैर्गोपुरैश्च पुरद्वारैर्जुष्टां विभक्ताः प्रपथा राजमार्गा यस्यां ॥१५॥ सभा तत्प्रवेशस्थानानि चत्वराणि अंगणानि रथ्या उपमार्गाः तैराढ्यां
संपन्नां अर्बुदं दशकोटयः तैर्गणनीयैरनंतैर्विमानैर्युतां वज्रविद्रुमम[illegible] यो वेदयो येषु तैः शृंगाटकैश्चतुष्पथैर्युतां ॥१७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ख॰ ३५

नित्यं वयस्था रुण्यं रूपं च सौकुमार्यं यासां ताः रूपवत्त्वार्यः स्वलंकृताः स्त्रियः । यत्र यस्यां भ्राजंते ॥१७॥ सुरस्त्रीणां केशेभ्यो विस्रस्तानां नवसौगंधि
कस्रजामामोदं हिमगवाक्षेभ्यो निर्गछता धूमेन । सुरप्रियाश्च भ्रमरसः २ ॥ मुक्तामयै र्वितानैर्मणिहेममयैः केतुभिस्त्वध्वजैः । नानापताकापुर

यत्र नित्यवयोरूपाः श्यामा विरजवाससः । भ्राजंते रूपवन्नार्यश्चार्चिर्भिरिव वह्नयः ॥१७॥ सुरस्त्रीकेशविभ्रष्टनवसौगंधिकस्रजां
यत्रामोदमुपादाय मार्ग आवाति मारुतः ॥१८॥ हेमजालाक्ष निर्गछद्धूमेनागरुगंधिना । पांडुरेण प्रतिछन्नमार्गे यांति सुरप्रियाः ॥१
९॥ मुक्तावितानैर्मणि हेमकेतुभिर्नानापताकावलभीनिराहतां । शिखंडिपारावतभृंगनादितां वैमानिकस्त्रीकलगीतमंगलां २१
मृदंगशंखानकदुंदुभिस्वनैः सतालवीणामुरजाष्टिवेणुभिः । नृत्यैः सवाद्यैः रुपदेवगीतकैर्मनोरमां स्वप्रभयाजितप्रभां ॥२२
यां न व्रजंत्यधर्मिष्ठाः खलाभूतद्रुहः शठाः । मानिनः कामिनो लुब्धा एभिर्हीना व्रजंति यत् ॥२३॥ तां देवधानीं स वरूथिनीपति
र्बहिः समंतात् रुरुधे पृतन्यया । आचार्यदत्तं जलजं महास्वनं दध्मौ प्रयुंजन् भयमिंद्रियोषितां ॥२४॥ मघवांस्तदभिप्रेत्य बलेः
परममुद्यमं । सर्वदेवगणोपेतो गुरुमेतदुवाच ह ॥२५॥ ॥

युक्तानि वलिनीनिश्या वैमानानां पुरीं नागेः श्रन्हतां यासां वैमानिकस्त्रीणां कलगीतैर्मंगलां २०॥२१॥ उपदेवानां गंधर्वादीनां गीतकैः श्व मनोरमां नि
ताप्रभा साक्षात् दीप्यधिष्ठात्री देवता यस्यां ॥ अन्यैरपि जित प्रभाति निवापा अंतरे जिता ग्राह्याः मृद्यैदियो यया ॥२३॥ यत् यां पृतन्यया सेनया ॥२४ राम ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केनहेतुना। एवंतेनसाऊर्जितश्चासीत् ॥२॥ प्रतियोद्धुंअपाकर्तुं २६ यतः कारणादेतस्यऊर्जआदि यतस्तेनअद्रिः एतस्यसमुद्यमः २७
उपभृतंसंचितं २९ तथोचितंमंत्रमाह तस्माद्यूयं त्रिविष्टपमुत्सृज्यनिलयमदर्शनंयात यतः कालात् ३० केनास्यविपर्ययः स्यादित्य

भगवन्नुद्यमोभूयान्बलेर्नः पूर्ववैरिणः। अविषह्यमिमंमन्येकेनासीत्तेजसोर्जितः ॥२६॥ नैनंकश्चित्कुतोवापिप्रतियोद्धुमधी
श्वरः। पिबन्निवमुखेनेदंलिहन्निवदिशोदश ॥२७॥ दहन्निवदिशोदृग्भिः संवर्ताग्निरिवोत्थितः। ब्रूहिकारणमेतस्यदुर्धर्षत्व
स्यमद्रिपो ॥२८॥ ओजः सहोबलंतेजोयतएतत्समुद्यमः ॥२९॥ गुरुरुवाच ॥ जानामिमघवञ्छत्रोरुन्नतेरस्यकारणं। शिष्या
योपभृतंतेजोभृगुभिर्ब्रह्मवादिभिः ॥३०॥ भवद्विधोभवान्वापिवर्जयित्वेश्वरंहरिं। नास्यशक्तः पुरः स्थातुंकृतांतस्ययथाजनाः।
तस्मान्निलयमुत्सृज्ययूयंसर्वेत्रिविष्टपं। यातकालंप्रतीक्षंतोयतःशत्रोर्विपर्ययः ॥३२॥ एषविप्रबलोदर्कः संप्रत्यूर्जितविक्रमः।
एषामेवापमानेनसानुबंधोविनंक्ष्यति ॥३३॥ एवंसुमंत्रितार्थास्तेगुरुणार्थानुदर्शिना। हित्वात्रिविष्टपंजग्मुर्गीर्वाणाः कामरूपि
णः ॥३४॥ देवेष्वथनिलीनेषुबलिर्वैरोचनः पुरीम्। देवधानीमधिष्ठायवशंनिन्येजगत्त्रयं ॥३५॥ तंविश्वजयिनंशिष्यंभृगवः शि
ष्यवत्सलाः। शतेनहयमेधानामनुव्रतमयाजयन् ॥३६॥ ततस्तदनुभावेनभुवनत्रयविश्रुतां। कीर्तिंदिक्षुवितन्वानः सरेजे
उडुराडिव ॥३७॥ बुभुजेचश्रियंस्वृद्धांद्विजदेवोपलंभितां। कृतकृत्यमिवात्मानंमन्यमानोमहामनाः ॥३८॥ ॥इतिश्रीभागवतेमहा
पुराणेअष्टमस्कंधेपंचदशोध्यायः ॥१५॥

तत्राह। एषइति। विप्राणांबलेनउदर्कउत्तरोत्तरमधिकंफलंयस्यसः ॥३१॥ सुमंत्रितः अर्थः
कार्ययेषांते निलयंजग्मुः ३४॥ एवंप्रापसिद्धपदं। स्थिरीकर्तुमयाजयन् अनुव्रतंअनुवर्तिनं ३५ द्विजदेवैर्ब्राह्मणैरुपलंभितांप्रापि
तां ३७ ३८ ॥ इतिअष्टमेपंचदशोऽध्यायः ॥१५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षोडशे पुत्रनाशेन शोचंत्या अदितेः पतिः प्रार्थितः कश्यपः प्राह पयोव्रतमितीयति १ इदानीं श्रीवामनावतारप्रसंगमाह । एवमित्यादि याव
त्समाप्ति । नष्टेषु अदृष्टेषु सत्सु १ २ स कश्यपः पत्नीमिदमाह ३ हीनवदनत्वादिकमालक्ष्य बहुधा विकल्पयन् पृच्छति । अप्यभद्रमितिस
प्तभिः । हे भद्रे मृत्योः छंदमिच्छामनुवर्त्तत इति तथा । मृत्युवशावर्त्तिनो जनस्येत्यर्थः । हे गृहमेधिनि अपि वा किं वा गृहेषु धर्मादिः किंचिदकुश

श्रीशुक उवाच । एवं पुत्रेषु नष्टेषु देवमातादितिस्तदा । हृते त्रिविष्टपे दैत्यैः पर्यतप्यदनाथवत् १ एकदा कश्यपस्तस्या आश्रमं
भगवानगात् । निरुत्सवं निरानंदं समाधेर्विरतश्चिरात् २ स पत्नीं दीनवदनां कृतासनपरिग्रहः । सभाजितो यथान्यायमिद
माह कुरूद्वह ३ अप्यभद्रं न विप्राणां भद्रे लोकेऽधुनागतं । न धर्मस्य न लोकस्य मृत्योश्छंदानुवर्त्तिनः ४ अपि वाकुशलं किं
चिद्गृहेषु गृहमेधिनि । धर्मस्यार्थस्य कामस्य यत्र योगो ह्ययोगिनां ५ अपि वातिथयोऽभ्येत्य कुटुंबासक्तया त्वया । गृहादपूजिता
याताः प्रत्युत्थानेन वा क्वचित् । गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि । यदि निर्यांति ते नूनं फेरुराजगृहोपमाः ७ अ
प्यग्नयस्तु वेलायां न हुता हविषा सति । त्वयो द्विग्नधिया भद्रे प्रोषिते मयि कर्हिचित् ८ यत्पूजया कामदुघान् याति लोका
न्गृहान्वितः । ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मुखं ९ अपि सर्वे कुशलिनः तव पुत्रा मनस्विनि । लक्षयेऽस्वस्थमा
त्मानं भवत्या लक्षणैरहं १०

लमिति वा शंकाप्रश्नः । यत्र येषु गृहेषु अयोगिनामपि योगः स्वधर्मादिना योगफलं भवति ५ किं
वा त्वया अपूजिता एवास्मत्सगृहाद्याताः । ह्य नार्चिताः अनर्चिताः । संतो यदि निर्गच्छंति ते गृहाः फेरुराजः शृगालराजः तद्विवरतुल्याः ७ वेलायां राम
होमकाले कर्हिचित्कृताः किं न ८ नवमः आत्मानं मनः अस्वस्थमप्रकृतिस्थं लक्षणैः मुखम्लानादिभिः लक्षयामि १० ॥ ॥ ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्वास्थ्यकारणमस्मदस्तीति वक्तुं लक्ष्मस्य मनआदिकं नास्तीत्याह। भद्रमिति द्वाभ्यां। इमे गृहाः। त्रिवर्गस्य परं क्षेत्रं मुख्यं स्थानं त्रिवर्गोऽपि यथा
व[र्]र्तत इत्यर्थः। भगवतस्तवानुध्यानं यत्त्वया क्रियते तस्मात्। अग्नयो ऽतिथय इत्यादिषु सर्वं न रिष्यति न हीयते। २ अस्तुतं विज्ञापयितुमाह।
को न्विति। ३ संपाद्यं काममाह। तवैवेति चतुर्भिः। ४। सपत्नैर्दैत्यैर्हृता श्रीर्येषां हृतं स्थानं येषामिति पुत्रा दितिजा ये एबकुवचनं। ५।

अदितिरुवाच। भद्रंद्विजगवांब्रह्मन्धर्मस्यास्यजनस्यच त्रिवर्गस्यपरंक्षेत्रंगृहमेधिन्गृहाइमे अग्नयोतिथयोभृत्या
भिक्षवोयेचलिप्सवः सर्वंभगवतोब्रह्मन्ननुध्यानान्नरिष्यति २ कोनुमेभगवन्कामोनसंपद्येतमानसः यस्यास्भवा
न्प्रजाध्यक्षएवंधर्मान्प्रभाषते ३ तवैवमारीचमनःशरीरजाःप्रजाइमाःसत्वरजस्तमोजुषः समोभवांस्तास्वसुरादिषु
प्रभोतथापिभक्तंभजतेमहेश्वरः ४ तस्मादीशभजंत्यामेश्रेयश्चिंतयसुव्रत हृतश्रियोहृतस्थानान्सपत्नैःपाहिनःप्र
भो ५ परैर्विवासितासाहंमग्नाव्यसनसागरे ऐश्वर्यंश्रीर्यशःस्थानंहृतानिप्रबलैर्मम ६ यथातानिपुनःसाधोप्रप
द्येरन्ममात्मजाः तथाविधेहिकल्याणंधियाकल्याणकृत्तम ७ श्रीशुकउवाच एवमभ्यर्थितोदित्याकस्तामाहस्मय
न्निव अहोमाहेयावलंविष्णोःस्नेहबद्धमिदंजगत् ८ क्वदेहोभौतिकोऽनात्माक्वचात्माप्रकृतेःपरः कस्यकेपतिपु
त्राद्यामोहएवहिकारणं ९ उपतिष्ठस्वपुरुषंभगवंतंजनार्दनं सर्वभूतगुहावासंवासुदेवंजगद्गुरुं १० सविधा
स्यतिकामान्हरिर्दीनानुकंपनः अमोघाभगवद्भक्तिर्नेतरेतिमतिर्मम ११

७॥ कश्यप एव यमं नाव तु तत्स्नेहं त्वाजयितुं विस्म
याजे नैव तत्त्वमुपदिशति। अहो इति सार्धेन। १०। स्वचापरितुष्यंती अत्राह। उपतिष्ठस्वेति द्वाभ्यां॥ ननु एवंभूतकामप्राप्तिहेतुर्देवांतरसेवा प्रसिद्धा तत्रा
ह॥ अमोघेति। ११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा च मे मनोरथं विदध्यात् २२ यथा च मे आशु तुष्यति तथा तस्या वा प्रकारमादिश २३ मेमया दृष्टः पयजो मेय व्रतमाह । एतन्मे प्रवक्ष्यामी
त्यन्वयः । अमले शुक्के तु आदौ पूर्वेषु द्वादशसु द्युःखमाह । सिनीवाल्यामित्यादिना । बाल्यचार्ययतद्वात्रा मित्यंतेन ग्रंथेन । यदिलभ्यते तर्हि क्रोड

अदितिरुवाच ॥ केनाहं विधिना ब्रह्मन् उपस्थास्ये जगत्पतिं । यथा मे सत्यसंकल्पो विदध्यात् स मनोरथं २२ आदिश त्वं द्विज
श्रेष्ठ विधिं तदुपधावनं । आशु तुष्यति मे देवः सीदंत्याः सह पुत्रकैः २३ कश्यप उवाच ॥ एतन्मे भगवान्पृष्टः प्रजाकामस्य
पद्मजः । यदाह ते प्रवक्ष्यामि व्रतं केशवतोषणं २४ फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतं । अर्चयेदरविंदाक्षं भक्त्या प
रमयान्वितः २५ सिनीवाल्यां मृदालिप्य स्नायात्क्रोडविदीर्णया । यदि लभ्येत वै स्रोतस्येतं मंत्रमुदीरयेत् २६ त्वं देव्यादिव
राहेण रसायाः स्थानमिच्छता । उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय २७ निर्वर्तितात्मनियमो देवमर्चेत्समाहितः । अर्चा
२८ नमस्तुभ्यं भगवते पुरुषाय महीयसे । सर्वभूतनिवासाय वासुदेवाय साक्षिणे
२९ नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च । चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे ३० ॥ ॥

दीर्णया वराहेणोत्खातया आलिप्य २६ त्वमंत्रः । त्वं देवीति हे देवि त्वं रसायाः उद्धृतासि २७ निर्वर्तित आत्मनियमो नित्यनैमित्तिको येन
२८ मंत्रावाहनादौ नवमंत्रानाह नमस्तुभ्यमिति । साक्षादौ विशेषतस्तु स्वादश्यादिरूपं वक्ष्यति २९ चतुर्विंशतिगुणास्तत्वानि जानातीति
ति तथा । तस्मै गुणसंख्यानस्य हेतवे सांख्यप्रवर्तकाय ३० ॥ ॥ राम
३७

एवं सामान्यतो नवत्वाद्गुणावतारान् प्रणमति विविनिः । तत्रादौ मंत्रोक्तयज्ञरूपेण विष्णोः प्रणामो नम इति द्विशीर्षे यस्य त्रयः पादा यस्य तं तंतवे फलविस्तारका
यत्रय्यां विद्यायामात्मा यस्येति त्रिधाबद्ध इत्यस्यार्थ उक्तः । तथा च मंत्रः । चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य त्रिधा बद्धो वृषभो रोरवी
ति महो देवो मर्त्यां आविवेशेति । मा गन्तुरिव ददातु नः । सोयं प्राज्ञैर्यथायथं विष्णुस्तु यज्ञरूपेण स्तूयतेनेन तत्त्वतः । तथा च यास्कः । चत्वारि शृंगे
ति वेदा एवोक्ताः त्रयो अस्य पादा इति सवनानि त्रीणि द्वे शीर्षे प्रायणीयोदयनीये । सप्त हस्तासः सप्त छंदांसि । त्रिधा बद्धस्त्रेधा बद्धो मंत्र ब्राह्म

नमो द्विशीर्ष्णे त्रिपदे चतुःशृंगाय तंतवे । सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ॥ ३१ ॥ नमः शिवाय रुद्राय नमः शक्तिधराय च । सर्व
विद्याधिपतये भूतानां पतये नमः । नमो हिरण्यगर्भाय प्राणाय जगदात्मने । योगैश्वर्यशरीराय नमस्ते योगहेतवे ॥ ३३ ॥ नमस्त आ
दिदेवाय साक्षिभूताय ते नमः । नारायणाय ऋषये नराय हरये नमः ॥ ३४ ॥ नमो मरकतश्यामवपुषेऽधिगतश्रिये । केशवाय नमः
स्तुभ्यं नमस्ते पीतवाससे ॥ ३५ ॥ त्वं सर्ववरदः पुंसां वरेण्य वरदर्षभ । अतस्ते श्रेयसे धीराः पादरेणुमुपासते ॥ ३६ ॥ अन्ववर्तंत यं देवाः
श्रीश्च तत्पादपद्मयोः । स्पृहयंत इवामोदं भगवान् मे प्रसीदतां ॥ ३७ ॥ एतैर्मंत्रैर्हृषीकेशमावाहनपुरस्कृतं । अर्चयेच्छ्रद्धया युक्तः
पाद्योपस्पर्शनादिभिः ॥ ३८ ॥ अर्चित्वा गंधमाल्याद्यैः पयसा स्नापयेद्विभुं । वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः । गंधधूपादि
भिश्चार्चेद्द्वादशाक्षरविद्यया ॥ ३९ ॥

एकस्मै हि वृषभो रोरवीति रोरवणं शब्दनं क्रमेण ऋग्भिर्यजुर्भिः सामभिर्यदेनमृग्भिः शंसंति यजुर्भिर्यज
ति सामभिः स्तुवंतीति ॥ ३१ ॥ ३२ प्राणाय सूत्रात्मने योगैश्वर्यं शरीरं यस्य ॥ ३३ ॥ ३४ ॥ अधिगता प्राप्ता श्रीर्यस्मै ॥ ३५ ॥ तत्पादपद्मयोरामोदं
स्पृहयंत इव देवाः श्रीश्च यमन्ववर्तंत स मे प्रसीदतु ॥ ३७ ॥ आवाहनेन पुरस्कृतं सम्मानितं ॥ ३८ ॥ ३९ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ॰मा॰
३०

पयसिश्रृतं पक्वं पायसं मूलविद्यया ददयाद्धरेऽग्नौ च ॥४०॥४१॥ इष्टवैकादिरमामिश्च स्तुतिभिः ॥४२॥ तस्य शेषं निर्माल्यं वैश्वदेवायेषांतान् अनसंन

श्रृतं पयसि नैवेद्यं शाल्यन्नं विनिवेदयेत् ससर्पिः सगुडं दत्वा जुहुयान्मूलविद्यया ॥४०॥ निवेदितं तद्भक्ताय दद्याद्भुंजीत वा
स्वयं दत्वाचमनमर्चित्वा तांबूलं च निवेदयेत् ॥४१॥ जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुं कृत्वा प्रदक्षिणं नमो ब्रह्मणे मे दंडवद्भुवि
॥४२॥ कृत्वा शिरसि तच्छेषं देवमुद्वासयेत्ततः ॥ द्व्यवरान्भोजयेद्विप्रान्पायसेन यथोचितं ॥४३॥ भुंजीत तैरनुज्ञातः शेषं सेष्टः स
माहितः ब्रह्मचार्यथ तद्रात्र्यां स्वप्ने नूतिप्रथमेऽहनि ॥४४॥ स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः ॥ पयसा स्नापयित्वार्चेद्यावद्व्र
तसमापनं ॥४५॥ पयोभक्षो व्रतमिदं चरेद्विष्णवर्चनादृतः पूर्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ॥४६॥ एवं त्वहरहः कु
र्यात् द्वादशाहं पयोव्रतः हरेराराधनं होमं अर्हणं द्विजतर्पणं ॥४७॥ प्रतिपद्दिनमारभ्य यावच्छुक्लत्रयोदशी ॥ ब्रह्मचर्यमधः स्व
प्नं स्नानं त्रिषवणं चरेत् ॥४८॥ वर्जयेदसदालापं भोगानुच्चावचांस्तथा ॥ अहिंस्रः सर्वभूतानां वासुदेवपरायणः ॥४९॥
त्रयोदश्यां अथो विष्णोः स्नपनं पंचकैर्विभोः ॥ कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः ॥५०॥ पूजां च महतीं कुर्याद्वित्त
शाठ्यविवर्जितः ॥ चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे ॥५१॥ सूक्तेन तेन पुरुषं यजेत सुसमाहितः ॥ नैवेद्यं चातिगुणवद्दद्या
त्पुरुषतुष्टिदं ॥५२॥ आचार्यं ज्ञानसंपन्नं वस्त्राभरणधेनुभिः ॥ तोषयेदृत्विजश्चैव तद्विद्ध्याराधनं हरेः ॥५३॥ भोजयेत्तान्गुण
वतान्सदन्नेन शुचिस्मिते ॥ अन्यांश्च ब्राह्मणान्शक्त्या ये च तत्र समागताः ॥५४॥

वैष्णवांश्चापि भोजयेत् द्वित्रिप्रभृतीन् ॥४३॥ समाजितैस्तैरनुज्ञातः सन् शेषं
वंधुभिः सहितः ॥ तस्यां रात्र्यां ब्रह्मचारी स्वप्यान्नूर्ते प्रभाते सति ॥४४॥५॥ पय एव नक्तं आहारो यस्य ॥४६॥४७॥ अधः स्वप्नं शयनं ॥४८॥ पंचकैः पंचामृतैः
॥४९॥

राम
३०

प्रसक्तो

५७ मयाचैतेसमुद्याहृतं ५८ सर्वयज्ञात्मकोयं यज्ञात्सर्वव्रतमित्यभिहितमेतद्व्रतं ॥६२॥ इतिषष्ठमेषोडशः ॥ ॥ततः सप्तदशेदित्याकृतेतस्मिन्व्र
तेहरिः तत्कामपूरणायादितेसुतोनृदितीर्यते ॥ प्रीतिविक्लवयादेवमाबद्धांजलिः सतीस्थिताकेवलंईडितुंपुनर्नोत्सेहेनत्राशाक अपितुंलीय

दक्षिणांगुरवेदद्यादृत्विग्भ्यश्चयथार्हतः । अन्नाद्येनाश्वपाकांश्चप्रीणयेत्समुपागतान् ॥५५ भुक्तवत्सुचसर्वेषुदीनांधकृपणेषुच
विष्णोस्तत्प्रीणनंविद्वान्भुंजीतसहबंधुभिः ॥५६ नृत्यवादित्रगीतैश्चस्तुतिभिः स्वस्तिवाचकैः । कारयेत्तत्कथाभिश्चपूजांभग
वतोन्वहं ॥५७ एतत्पयोव्रतंनामपुरुषाराधनंपरं । पितामहेनाभिहितंमयातेसमुदाहृतं ॥५८ त्वंचानेनमहाभागेसम्यक्चीर्णे
नकेशवं । आत्मनाशुद्धभावेननियतात्माभजाव्ययं ॥५९ अयंवैसर्वयज्ञाख्यः सर्वव्रतमितिस्मृतं ॥ तपःसारमिदंभद्रे दानं
चेश्वरतर्प्पणं ॥ तएवनियमाः साक्षात्तएवचयमोत्तमाः । तपोदानंव्रतंयज्ञो येनतुष्यत्यधोक्षजः ॥६१ तस्मादेतद्व्रतंभद्रे प्रयता
श्रद्धयाचर । भगवान्परितुष्टस्तेवरानाशुविधास्यति ॥६२॥ इतिश्रीभागवतेमहापुराणेऽष्टमस्कंधेऽदितिपयोव्रतंनाम
षोडशोऽध्यायः ॥१६॥ श्रीशुकउवाच ॥ इत्युक्तासादितीराजन्स्वभर्त्राकश्यपेनवै । अन्वतिष्ठद्व्रतमिदंद्वादशाहमतंद्रिता ॥१
६ चिंतयंत्येकयाबुध्यामहापुरुषमीश्वरं । प्रगृह्येंद्रियदुष्टाश्वान्मनसाबुद्धिसारथिः ॥२ मनश्चैकाग्रयाबुध्याभगवत्यखिलात्मनि
वासुदेवेसमाधायचचारहपयोव्रतं ॥३ तस्याःप्रादुरभूत्तातभगवानादिपूरुषः । पीतवासाश्चतुर्बाहुः शंखचक्रगदाधरः ॥ तं
नेत्रगोचरंवीक्ष्यसहसोत्थायसादरं । ननामभुविकायेनदंडवत्प्रीतिविक्लवा ॥५ सोत्थायबद्धांजलिरीडितुंस्थितानोत्सेहआ
नंदजलाकुलेक्षणा । बभूवतूष्णींपुलकाकुलाकृतिस्तद्दर्शनात्युत्सवगात्रवेपथुः ॥६॥

न्वा कथंभूता आनंदजलैराकुले ईक्षणेयस्याः पुलकैराकुला आकृतिर्देहोयस्याः तस्यदर्शनेनयो उत्सवः तेनगात्रेवेपथुः कंपोयस्याः ॥६॥

ना॰ स्क॰

तुष्टश्च । पिबतीवोक्षमाणा तिचक्रियानेदात् । सेत्यस्पष्टस्याधिरुक्तिरदोषः ॥ अथ त्वनो विवि निर्जितिपदैलानस्फूर्जितानापि । नक्तानू रक्षितुमी
श्वास्त्वमित्यसे । इदितिस्त्विति ॥ ७ ॥ यज्ञेशेत्यादि स्त्रिभिः । संबोधनैस्तत्वाचकं किमपिनास्तीतिवदती आर्षयति । शंनः कृधि कुरु । यतो दीनानांना
थोसि । तं तीर्थश्रवः कीर्तिर्यस्य श्रवणमेव मंगलं यस्य तन्नामधेयं यस्य आपन्नानां शरणं गतानां लोकानां वृजिनोपशमायतदुदयोयस्मात्
भूम्निमहते नमः महते हे तव । विश्वाय विश्वस्य भवनस्थितिसंयमार्थं स्वैरं गृहीताः पुरुशक्तेर्मायायाः गुणा येन तस्मै । तथा स्वस्थाय

स्वीत्मज्ञानेर्गजदयागिराहरिं तुष्टाव सादेत्यदितिः कुरु वदन् । वीक्षती सा पिबतीव चक्षुषा रमापतिं यज्ञपतिं जगत्पतिं ॥ ७
अदितिरुवाच । यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद तीर्थश्रवः श्रवणमंगलनामधेय । आपन्नलोकवृजिनोपशमोदयाद्य शं
नः कृधीश भगवन्नसि दीननाथः ॥ ८ ॥ विश्वाय विश्वभवनस्थितिसंयमाय स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने । स्वस्थाय श
श्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसे हरये नमस्ते ॥ ९ ॥ आयुः परं वपुरभीष्टमतुल्यलक्ष्मीर्द्योभूरसाः सकलयोगगु
णास्त्रिवर्गः । ज्ञानं च केवलमनंत भवंति तुष्टात्त्वत्तो नृणां किमु सपत्नजयादिराशीः ॥ १० ॥ श्रीशुक उवाच । अदित्यैवं स्तुतो
राजन् भगवान्पुष्करेक्षणः । क्षेत्रज्ञः सर्वभूतानामिति होवाच भारत ॥ ११ ॥

अप्रच्युतस्वरूपाय । कुतः शश्वदुपबृंहितः नित्योर्जितो यः
पूर्णो बोधस्तेन व्यापादितं निरस्तं आत्मनि तमो मायालक्षणं येन तस्मै ॥ ९ ॥ अस्मदीयमनोरथपूरणमीषत्करमेव तवेति कैमुत्यन्यायेना
न्यच्च । आयुः परं ब्रह्मायुः । पुनरपि च द्यौश्च भूश्च रसातलं च द्योभूरसाः । स्वोरतिष्टयका । भूश्च स्वर्गश्च बिलस्वर्गा इति विग्रहः । रसेति
पाठे त्रीणि पदानि । सकला योगगुणा अणिमादयः ॥ १० ॥ क्षेत्रज्ञः अंतर्यामी ॥ १२ ॥ ॥ रामः

३९

१२

सपत्नैर्हृताश्रीर्येषां स्वधामतः च्यावितानां च पुत्राणां संबंधि यत् तद्भवत्याश्चिरमाकांक्षितं मया विज्ञातं कांक्षितमेवाह तानिति त्रिभिः प्रतिलब्धो
जयश्रीश्च यैस्तैः पुत्रैः सह उपासितुं एकत्र स्थातुमिच्छसि ॥ १३ ॥ १४ ॥ प्रत्याहृते यशःश्रियौ यैः तान् ॥ १५ ॥ अपारणीयाः अनतिक्रमणीयाः यत्
यस्मात् अनुकूल ईश्वरः कालो येषां तैर्विप्रैः गुप्ता रक्षिताः अनुकूलैरीश्वरैः समर्थैर्विप्रैः गुप्ता इति वा ॥ १६ ॥ मम मया चिंत्य एव तत्र हेतुः संतो

श्रीभगवानुवाच ॥ देवमातर्भवत्या मे विज्ञातं चिरकांक्षितं । यत्सपत्नैर्हृतश्रीणां च्यावितानां स्वधामतः ॥ १२ ॥ तान् विनिर्जित्य समरे दुर्मदानसुरर्षभान् ॥ प्रतिलब्धजयश्रीभिः पुत्रैरिच्छस्युपासितुं ॥ १३ ॥ इंद्रज्येष्ठैः स्वतनयैर्हतानां युधि विद्विषां ॥ स्त्रियो रुदंतीरासाद्य द्रष्टुमिच्छसि दुःखिताः ॥ १४ ॥ आत्मजान् सुसमृद्धांस्त्वं प्रत्याहृतयशःश्रियः ॥ नाकपृष्ठमधिष्ठाय क्रीडतो द्रष्टुमिच्छसि ॥ १५ ॥ प्रायोधुना तेसुरयूथनाथा अपारणीया इति देवि मे मतिः ॥ यत्तेनुकूलेश्वरविप्रगुप्ता न विक्रमस्तत्र सुखं ददाति ॥ १६ ॥ अथाप्युपायो मम देवि चिंत्यः संतोषितस्य व्रतचर्यया ते ॥ ममार्चनं नार्हति गंतुमन्यथा श्रद्धानुरूपं फलहेतुकत्वात् ॥ १७ ॥ त्वयार्चितश्चाहमपत्यगुप्तये पयोव्रतेनानुगुणं समीडितः ॥ स्वांशेन पुत्रत्वमुपेत्य ते सुतान् गोप्तास्मि मारीचतपस्यधिष्ठितः ॥ १८ ॥ उपधाव पतिं भद्रे प्रजापतिमकल्मषं ॥ मां च भावयती पत्यावेवंरूपमवस्थितं ॥ १९ ॥ नैतत्परस्मा आख्येयं पृष्टयापि कथंचन ॥ सर्वं संपद्यते देवि देवगुह्यं सुसंवृतं ॥ २० ॥ ॥

षितस्येत्यादि श्रद्धानुरूपं इच्छानुसारेण फलहेतुत्वात् ॥ १७ ॥ मारीचस्य तपसि अधिष्ठाय स्थितः सन् गोप्ता अस्मि पालयिष्यामि ॥ १८ ॥ अतः पतिमुपधाव भजस्व ॥ १९ ॥ देवानां गुह्यं रहस्यं सर्वं सुसंवृतं सुसंगुप्तं सत् संपद्यते सिध्यति ॥ २० ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रभो हरेरात्मनि जन्म लक्षयेत्॥२१॥ अवितथमीक्षणं दृष्टिर्यस्य सः॥२२॥ अनिलो यथा सर्वत्र समोपि दारुणि संघर्षेण वनदाहकमग्निमाधत्ते एवं स्वयं प्रभु
र्विष्णुः समोपि दैत्यक्षपणं वीर्यमाधत्तेत्यर्थः॥२३॥ धिष्ठितं अधिष्ठाय स्थितं समीडे तुष्टावेत्यर्थः॥२४॥ अदितेरेव पूर्वस्मिन् जन्मनि पृश्निरिति नाम तस्या
गर्भाय अनेकाय वेदा गर्भे यस्य यद्वा वेदानां गर्भाय वेदेषु प्रकाशमानायेत्यर्थः॥ त्रयो लोका नाभौ यस्य सः त्रिनाभः तस्मै त्राणं लोकानां पृष्ठे उ
परि स्थिताय शिपिविष्टाय शिपिशब्देन पशवो जीवास्तेष्वंतर्यामितया प्रविष्टाय यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठतीति श्रुतेः यद्वा शि

श्रीशुक उवाच॥ एतावदुक्त्वा भगवांस्तत्रैवांतरधीयत॥ अदितिर्दुर्लभं लब्ध्वा हरेर्जन्मात्मनि प्रभोः॥२१॥ उपाधावत्पतिं भक्त्या
परया कृतकृत्यवत्॥ स वै समाधियोगेन कश्यपस्तदबुध्यत॥२२॥ प्रविष्टमात्मनि हरेरंशं ह्यवितथेक्षणः॥ सोदित्यां वीर्य
माधत्त तपसा चिरसंभृतं॥२३॥ समाहितमना राजन् दारुण्यग्निं यथानिलः॥ अदितेर्धिष्ठितं गर्भं भगवंतं सनातनं॥२४॥
हिरण्यगर्भो विज्ञाय समीडे गुह्यनामभिः॥२५॥ ब्रह्मोवाच॥ जयोरुगाय भगवन्नुरुक्रम नमोस्तु ते॥ नमो ब्रह्मण्यदेवा
य त्रिगुणाय नमो नमः॥२६॥ नमस्ते पृश्निगर्भाय वेदगर्भाय वेधसे॥ त्रिनाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे॥२७॥ त्वमा
दिरंतो भुवनस्य मध्यमनंतशक्तिं पुरुषं यमाहुः॥ कालो भवानाक्षिपतीश विश्वं स्रोतो यथांतःपतितं गभीरं॥२८॥ त्वं वै प्र
जानां स्थिरजंगमानां प्रजापतीनामसि संभविष्णुः॥ दिवौकसां देव दिवश्च्युतानां परायणं नौरिव मज्जतोऽप्सु॥२९॥ ॥इति
श्रीभागवते महापुराणे अष्टमस्कंधे सप्तदशोऽध्यायः॥ ॥१७॥

पयोरत्नमयस्तैर्वेष्टितायेत्यर्थः॥ तथापि विष्णवे व्यापिने॥२७॥ अंतःपतितं
तृणादि यथा गभीरं स्रोतः आक्षिपति आकर्षति तथा कालात्मा भवान् विश्वमाक्षिपति प्रजापतीनां च त्वमेव संभविष्णुः उत्पादनशीलोऽसि अत्र यन्नावः
नद्येवं नूतस्य तव जन्मादिः संभवः किंतु देवानां प्रजापतीनां प्रजानां परमाश्रयत्वेन तत्कार्यसाधनयावतारो यं अतस्तान् स्वर्गच्युतान् पुनः सर्गे स्था
पयेति॥२९॥ ॥इत्यष्टमे सप्तदशः॥१७॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततस्त्वष्टादशे नूत्वा वामनः सत्कृतो खिलैः । यज्ञं गतस्ततस्तेन सत्कृत्योक्तो वरान्वृणु ॥ इत्थं विरिंच्येन स्तुतं कर्म्म च देवकार्य लक्षणं वीर्यं च प्रभावो य
स्य स हरिरदित्यां प्रादुर्बभूवेति त्रयाणामन्वयः ॥ अमृतभूः मृत्युजन्मशून्यः । शंखगदाब्जचक्राणि संतीति तथा । अवदातश्यामादित्वेन मत्वर्थीयेन्वष
स्य । अविसर्गपाठि स चासौ पिशंगवासाश्च ॥ झषराजो मकरः । तदाकारयोः कुंडलयोस्त्विषा उल्लसंती श्रीर्वदनांबुजे यस्य श्रीवत्सो वक्षसि य
स्य वलयैरंगदैश्च सहोल्लसंति किरीटादीनि यस्य । श्रीमत्या वन माल या विराजितः वेश्म गतं तमः ॥ अग्निजिह्वा देवाः । नगाः पर्वताः त

श्रीशुक उवाच ॥ इत्थं विरिंच्यस्तुतकर्म्मवीर्यः प्रादुर्बभूवामृतभूरदित्याः चतुर्भुजः शंखगदाब्जचक्रः पिशंगवासा नलिनायते
क्षणः ॥१॥ श्यामावदातो झषराजकुंडलत्विषोल्लसच्छ्रीवदनांबुजः पुमान् । श्रीवत्सवक्षा वलयांगदोल्लसत्किरीटकांचीगुण
चारुनूपुरः ॥२॥ मधुव्रतव्रातविघुष्टया स्वया विराजितः श्रीवनमालया हरिः । प्रजापतेर्वेश्मतमः स्वरोचिषा विनाशयन्कं
ठनिविष्टकौस्तुभः ॥३॥ दिशः प्रसेदुः सलिलाशयास्तदा प्रजाः प्रहृष्टा ऋतवो गुणान्विताः । द्यौरंतरिक्षं क्षितिरग्निजिह्वा गावो
द्विजाः संजहृषुर्नगाश्च ॥४॥ श्रोणायां श्रवणद्वादश्यां मुहूर्तेभिजिति प्रभुः । सर्वे नक्षत्रताराद्याश्चक्रुस्तज्जन्म दक्षिणं ॥५॥ ॥

स्य प्रादुर्भावसमयमाह श्रोणायामिति । भाद्रपदशुक्लद्वादशी श्रवणद्वादशीति प्रसिद्धा तस्यां तथापि श्रोणायां श्रवणस्थे चंद्र इत्यर्थः । तत्रापि श्र
वणस्य प्रथमांशे भिजितनक्षत्रे तच्च शुभसाद्वृति । अभिजिन्नाम नक्षत्रं उपरिष्टादाषाढायाः अधस्याः श्रोणाया इति एवं विशिष्टे मुहूर्ते प्रभुः प्रा
दुर्बभूवेत्यर्थः । किंच नक्षत्राणि अश्विन्यादीनि ताराः शश्वेन ग्रहाः गुरुशुक्रादयः ते तत्र आद्या येषां ते सूर्यादयोपि सर्वे तस्य जन्म दक्षिणं उदारं
चक्रुः जन्मसु कृते गुणा बहवो बभूवुरित्यर्थः ॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना.स्क. ४९ विशेषांतरमाह यस्यां द्वादश्यां हरेर्जन्म तत्र सा माहात्म्येनैव विदुः तदा च मध्यंदिनगतः सविता ऽतिष्ठत् सा च द्वादशी विजया नाम प्रोक्तेत्यन्वयः ।६ शंखदु
दुभ्यादयो नेदुः एतेषामन्येषां च विचित्रतूर्याणां निर्घोषोऽभवत् ।७ दिवा मनव इत्यादीनां कुसुमैः समवाकिरन्निति तृतीयेनान्वयः ।८ विशेषांतरमाह यत्रादि

द्वादश्यां सविता तिष्ठन्मध्यंदिनगतो नृप । विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः ॥६ शंखदुंदुभयो नेदुर्मृदंगपणवानकाः ॥
चित्रवादित्रतूर्याणां निर्घोषस्तुमुलोऽभवत् ॥७ प्रीताश्चाप्सरसोऽनृत्यन्गंधर्वप्रवरा जगुः । तुष्टुवुर्मुनयो देवा मनवः पितरोऽग्नयः
सिद्धविद्याधरगणाः सकिंपुरुषकिन्नराः । चारणा यक्षरक्षांसि सुपर्णा भुजगोत्तमाः ॥९ गायंतोऽतिप्रशंसंतो नृत्यंतो विबुधानु
गाः । अदित्या आश्रमपदं कुसुमैः समवाकिरन् ॥१० दृष्ट्वादितिस्तं निजगर्भसंभवं परं पुमांसं मुदमाप विस्मिता । गृहीतदेहं नि
जयोगमायया प्रजापतिश्चाह जयेति विस्मितः ॥११ यत्तद्वपुर्भाति विभूषणायुधैरव्यक्तचिद्व्यक्तमधारयद्धरिः । बभूव तेनैव
स वामनो बटुः संपश्यतोर्दिव्यगतिर्यथा नटः ॥१२ तं बटुं वामनं दृष्ट्वा मोदमाना महर्षयः । कर्माणि कारयामासुः पुरस्कृत्य प्रजाप
तिं ॥१३ तस्योपनीयमानस्य सावित्रीं सविताब्रवीत् । बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपोऽददात् । ददौ कृष्णाजिनं भूमिर्दंडं सोमो व
नस्पतिः । कौपीनाच्छादनं माता द्यौश्छत्रं जगतः पतेः ॥१५ कमंडलुं वेदगर्भः कुशान्सप्तर्षयो ददुः । अक्षमालां महाराज सरस्वत्य
यात्मनः ॥१६ तस्मा इत्युपनीताय यक्षराट् पात्रिकामदात् । भिक्षां भगवती सा साक्षादुमादादंबिका सती ॥१७॥

ति यत्तद्वपुर्हरिरधारयत्त्व
कदितवान् तेनैव वपुषा मातापित्रोः संपश्यतोर्वामनो बटुर्बभूव । दिव्यगतिः अद्भुतचेष्टितः स्वयं कथंभूतः । अव्यक्तचिद्रूपः कथमधारयत् राम ४९
भाति हीति विभूषणानि च आयुधानि च तैर्व्यक्तं यथा भवति तथा ॥१२ कर्माणि जातकर्मादीनि ॥१४ वनस्पतिः वनानां पतिः । सोमः ॥१६ पात्रिकां भिक्षापा
त्रीं ॥१७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चंद्रमौलिश्चेत्यन्वयः ॥ अप्यर्थे चकारः चंद्रमौलिरपि गंगारूपं यन्मूर्ध्नि दधारेत्यर्थः ॥ २८ ॥ हे आर्य त्वा त्वां साक्षात्तत्त्वं ब्रह्मर्षीणां तप एव मन्ये कथंभूतं तपः वपुर्धरं मूर्तिधारि ॥ २९ ॥ ३० ॥ त्वच्चरणावनेजनैर्वारिभिर्हतमंहो यस्य तस्य मे पुनीता पवित्रीकृता ॥ ३१ ॥ मिमत्रः प्रतीच्छ गृहाण हे अर्हत्तम पूज्यतम

तत्पादशौचं जनकल्मषापहं स धर्मवित्मूर्ध्न्यदधात्सुमंगलं । यद्देवदेवो गिरिशश्चंद्रमौलिर्दधार मूर्ध्ना परया च भक्त्या ॥ २८ ॥ बलिरुवाच ॥ स्वागतं ते नमस्तुभ्यं ब्रह्मन् किं करवाम ते ॥ ब्रह्मर्षीणां तपः साक्षान्मन्ये त्वार्य वपुर्धरं ॥ ३० ॥ अद्य नः पितरस्तृप्ता अद्य नः पावितं कुलं ॥ अद्य स्विष्टः क्रतुरयं यद्भवानागतो गृहान् ॥ ३१ ॥ अद्याग्नयो मे सुहुता यथाविधि द्विजात्मज त्वच्चरणावनेजनैः ॥ हतांहसो वार्भिरियं च भूरहो तथा पुनीता तनुभिः पदैस्तव ॥ ३२ ॥ यद्य बटो वांछसि तत्प्रतीच्छ मे त्वामर्थिनं विप्रसुतानुतर्कये ॥ गां कांचनं गुणवद्धाम मृष्टं तथान्नपेयमुत वा विप्रकन्यां ॥ ग्रामान् समृद्धांस्तुरगान् गजान्वा रथांस्तथार्हत्तम संप्रतीच्छ ॥ ३४ ॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे बलिवामनसंवादे अष्टादशोऽध्यायः ॥ १८ ॥ ॥ श्रीशुक उवाच ॥ इति वैरोचनेर्वाक्यं धर्मयुक्तं स सूनृतं ॥ निशम्य भगवान् प्रीतः प्रतिनंद्येदमब्रवीत् ॥ १ ॥ श्रीभगवानुवाच ॥ वचस्तवैतज्जनदेव सूनृतं कुलोचितं धर्मयुतं यशस्करं ॥ यस्य प्रमाणं भृगवः सांपराये पितामहः कुलवृद्धः प्रशांतः ॥ २ ॥ ॥

३२ ॥ इति श्रीमदष्टमे अष्टादशः ॥ ॥ कृतं वित्तोद्गुहरिणा याचितेन पदत्रयं । प्रतिश्रुत्य च बलिना जानन्नप्यवारयत् ॥ १ ॥ दातुः स्तुतिः स्वयं तुष्टिरित्यादि प्रह्लादोचितं वक्तव्यमिति निर्व्यूढुं त्रिभिः श्लोकैराह वामनः ॥ वचस्तवैतदिति षोडशभिः हे जनदेव सांपराये पारलौकिके धर्मे पितामहस्तव प्रह्लादः प्रमाणं ॥ २ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निःसत्त्वमलक्षणं यो द्विजायैते याचकाय प्रत्याख्याता न ददामीति वक्ता ॥ कृपणमलक्षणं प्रथमं प्रतिश्रुत्य यो वा न ददाते ति ॥४॥ तीर्थे दानावसरे पत
यस्मिन्युष्मत्कुले धायतः यस्मिन् जातः ॥५॥ सोऽधारेन्द्रस्माऽध्वरणे ॥६॥७॥ ण॥ पराङ्मुखाः बहिर्दृष्टेः ॥८॥ अतो हृदये स्थितं मां नजानन्ति ते एवं

नह्येतस्मिन्कुले कश्चित् निःसत्त्वः कृपणः पुमान् । प्रत्याख्याता प्रतिश्रुत्य यो वा दाता द्विजातये ॥३॥ न संतितीर्थे युधि चा-
र्थिनार्थिताः पराङ्मुखा ये त्वमनस्विनो नृपाः । युष्मत्कुले यद्यशसामलेन प्रज्ञादृतज्ञातियथोडुपः खे ॥४॥ यतो जातो हिर-
ण्याक्षश्चरन्नेक इमां महीम् । प्रतिवीरं दिग्विजये नाविदत गदायुधः ॥५॥ यं विनिर्जित्य कृच्छ्रेण विष्णुः क्ष्मोद्धार आगतं
आत्मानं जयिनं मेने तद्वीर्यं भूर्यनुस्मरन् ॥६॥ निशम्य तद्वधं भ्राता हिरण्यकशिपुः पुरा । हन्तुं भ्रातृहणं क्रुद्धो जगाम निल-
यं हरेः ॥७॥ तमायान्तं समालोक्य शूलपाणिं कृतान्तवत् । चिन्तयामास कालज्ञो विष्णुर्मायाविनां वरः ॥८॥ यतो यतोऽहं तत्रा-
सौ मृत्युः प्राणभृतामिव । अतोऽहमस्य हृदयं प्रवेक्ष्यामि पराग्दृशः ॥९॥ एवं स निश्चित्य रिपोः शरीरमाधावतो निर्विविशे
सुरेन्द्र [illegible] श्वासानिलान्तर्हितसूक्ष्मदेहस्तत्प्राणरन्ध्रेण विविग्नचेताः ॥१०॥ स तन्निकेतं परिमृश्य शून्यमपश्यमानः कु-
पितो ननाद ॥ क्ष्मां द्यां दिशः खं विवरान्समुद्रान् विष्णुं विचिन्वन् न ददर्श वीरः ॥११॥ अपश्यन्निति होवाच मयान्विष्टमिदं ज-
गत् । भ्रातृहा मे गतो नूनं यतो नावर्तते पुमान् ॥१२॥ ॥

निश्चित्य श्वासानिलेऽन्तर्हितः सूक्ष्मो देहो यस्य विविग्नमतिकंपितं चेतो यस्य अनुकंपित चित्त इति वा स्वबोध्यं ॥१०॥ न ददर्श स्वांतःप्र-
विष्टः त्वात् ॥११॥ पुमान् यतः सकाशात् नावर्तते तद्ब्रह्मैव नूनं गतः । नित्यमुक्तत्वादिति वास्तवोऽर्थः ॥१२॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स एवं संभावितो मारिषः श्रेष्ठो बटुर्ब्रह्मवर्चसेन ब्रह्मर्षिगणैः संजुष्टां तां समानमतिक्रम्यारोचत ॥१९॥ यदर्थं बटुर्बटुव्रतदा हा श्रुत्वेत्यादि यावज्जमा
नियजमानं यजन्तं भृगूणां भृगुभिः उपकल्पितैः प्रवर्त्तितैः ॥ अखिलेन सारेण बलेन संभृतः संपूर्णः ॥२०॥ नर्मदाया उत्तरे तटे भृगुकच्छसंज्ञ
के क्षेत्रे क्रतूत्तमं प्रवर्त्तयंतो ये बलेः ऋत्विजो भगवः ते तं व्यचक्षत अपश्यन् आरात् समीप एवोदितं रविमिव ऋत्विगादयः सूर्यः किंस्विदेव

स ब्रह्मवर्चसेनैवं समां संभावितो बटुः । ब्रह्मर्षिगणसंजुष्टामत्यरोचत मारिषः ॥१९॥ समिद्धमाहितं वह्निं कृत्वा परिसमूहनं । प
रिस्तीर्य समभ्यर्च्य समिद्भिरजुहोत् द्विजः ॥२०॥ श्रुत्वाश्वमेधैर्यजमानमूर्जितं बलिं भृगूणामुपकल्पितैस्ततः । जगाम तत्राखिलसा
रसंभृतो भारेण गां सन्नमयन् पदे पदे ॥२१॥ तं नर्मदायास्तट उत्तरे बलेर्य ऋत्विजस्ते भृगुकच्छसंज्ञके । प्रवर्त्तयंतो भगवः क्रतूत्तमं
व्यचक्षतारादुदितं यथा रविं ॥२२॥ त ऋत्विजो यजमानः सदस्या हतत्विषो वामनतेजसा नृप । सूर्यः किलायात्युत वा विभावसुः सनत्कु
मारोऽथ दिदृक्षया क्रतोः ॥२३॥ इत्थं सशिष्येषु भृगुष्वनेकधा वितर्क्यमाणो भगवान् स वामनः । सदंडं छत्रं सजलं कमंडलुं विवेश बिभ्रद्ध
यमेधवाटं ॥२४॥ मौंज्या मेखलया वीतमुपवीताजिनोत्तरं । जटिलं वामनं विप्रं मायामाणवकं हरिं ॥२५॥ प्रविष्टं वीक्ष्य भगवः सशि
ष्यास्ते सहाग्निभिः । प्रत्यगृह्णन् समुत्थाय संक्षिप्तास्तस्य तेजसा ॥२६॥ यजमानः प्रमुदितो दर्शनीयं मनोरमं । रूपानुरूपावयवं त
स्मा आसनमाहरत् ॥२७॥ स्वागतेनाभिनंद्याथ पादौ भगवतो बलिः । अवनिज्यार्चयामास मुक्तसंगमनोरमं ॥२८॥

मा दिव्यत तर्कयन्निति शेषः ॥२१॥२२॥ हयमेधवाटं अश्वमेधमंडपं विवेश ॥२३॥ उपवीताजिनं उपवीतवद्धृतमजिनमेव उत्तरमुत्तरीयं यस्य तं
॥२५॥ संक्षिप्ता अभिभूताः संतः ॥२६॥ रूपस्यानुरूपा अवयवा यस्य तं दृष्ट्वेति शेषः ॥२७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथं नामासौ शूरशिरोमणिः। जीवन्नेव कातरवद्वैरमुपेक्षितवानित्याशंक्याह। वैरानुबंध एतावानामृत्योर्निवर्तिदेहिनां। देहेति गूढाभिमानवतां शूराणां तथाप्यहं मानेनोपबृंहितोऽस्मि युष्मन्नवत्सेवा यतोः ज्ञानप्रभवः अज्ञाननिवृत्तेः प्राक्पौरुषत्यागो मोघ एवेत्यर्थः। ३। तदेवं पूर्वजान्स्तुत्वा तस्मै तरं स्तौति पितेति द्विजवेषधारिणो मद्वैरिणो देवा एतेन तु द्विजा इति तद्विद्वानपि स्वयाचितः स्वनस्त्वीयमायुर्देवेभ्योऽदात्। ४। ममप दासंमितानीति त्रिविक्रमपदानिप्रायेण। न चानृतवादः। तत्रापि स्वपदत्वानपगमात्। ५। यावदर्थमेव परिग्रहो यस्य सः॥

वैरानुबंध एतावानामृत्योरिह देहिनां। अज्ञानप्रभवो मन्युरहंमानोपबृंहितः। ३। पिता प्रह्लादपुत्रस्ते तद्विद्वान्द्विजवत्सलः। स्वमायुर्द्विजलिंगेभ्यो देवेभ्योऽदात्स याचितः। ४। न त्वमाचरितान्धर्मानास्थितो गृहमेधिभिः। ब्राह्मणैः पूर्वजैः शूरैरन्यैश्चोद्दामकीर्तिभिः। ५। तस्मात्त्वत्तो महीमीषद्वृणेऽहं वरदर्षभात्। पदानि त्रीणि दैत्येन्द्र संमितानि पदा मम। ६। नान्यत्ते कामये राजन्वदान्याज्जगदीश्वरात्। नैनः प्राप्नोति वै विद्वान् यावदर्थपरिग्रहः। ७। बलिरुवाच। अहो ब्राह्मणदायाद वाचस्ते वृद्धसंमताः। त्वं बालो बालिशमतिः स्वार्थं प्रत्यबुधो यथा। ८। मां वचोभिः समाराध्य लोकानामेकमीश्वरं। पदत्रयं वृणीते योऽबुद्धिमान्द्वीपदाशुषं। ९। न पुमान्मामुपव्रज्य भूयो याचितुमर्हति। तस्माद्वृत्तिकरीं भूमिं वटो कामं प्रतीच्छ मे। २०।

१९। ७। ईश्वरस्यापि याञ्चाकारणं याञ्चाप्रकारं चोक्त्वा बलेर्बंधनप्रश्नोत्तरत्वेन तस्य गर्वातिरेकेण धिक्रियेव प्रकारमाहाऽहो इति त्रिभिः। ते वाचो वृद्धानां संमताः। त्वं तु बालो बालिशमतिश्च बालिशो नाम ज्ञानाभिमतिर्यस्य च एव स्वार्थं प्रति यथावदबुधः वस्तुतस्तु बाल इव स्वबालिशमतिरिव च हि दुः स्वार्थप्रत्यबुध इति च नकान्तामेवार्थं बुध्यसे न त्वार्थं बुध्यसे। परिपूर्णस्य तव तद्व्यतिरेकेण स्वार्थो नावादिस्यर्थः। ९। अबुधत्वमेवाह। मामिति द्वीपस्य दाशुषं दातारं। अबुद्धिमान् वा लुत अस्तु बुद्धिमानित्येव छेदः। कामं यथेष्टं सम्यक् पादप्रसारणेनेत्यर्थः। अत एव तथा करिष्यति। २०।



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनरपि त्रिभिः स्पृहत्वमेवाविः कुर्वन्नाह। यावंत इति सप्तभिः। नववर्षसमेतेन द्वीपेनापि सप्तानां द्वीपवराणां इछया ॥ २२ ॥ तृष्णाया अंतं न गताः। इ
त्यस्माभिः श्रुतं ॥ २३ ॥ असंतुष्टस्तु प्राप्तैस्त्रिभिर्लोकैरपि न सुखं वर्त्तते ॥ २४ ॥ २५ ॥ आशुशुक्षणिरग्निः। सिद्धोहं तत्रार्थः ॥ २७ ॥ एतावतैव सर्वस्वापहार

श्रीभा०भा०तु

श्रीशुक उवाच ॥ यावंतो विषयाः प्रेष्ठास्त्रिलोक्यामजितेंद्रियं। न शक्नुवंति ते सर्वे प्रतिपूरयितुं नृप ॥ २१ ॥ त्रिभिः क्रमैरसंतुष्टो
द्वीपेनापि न पूर्यते। नववर्षसमेतेन सप्तद्वीपवरेछया ॥ २२ ॥ सप्तद्वीपाधिपतयो नृपा वैण्यगयादयः। अर्थैः कामैर्गता नांतं तृष्णाया
इति नः श्रुतं ॥ २३ ॥ यदृछयोपपन्नेन संतुष्टो वर्त्तते सुखं। नासंतुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः ॥ २४ ॥ पुंसोयं संसृतेर्हेतुर
संतोषोर्थकामयोः। यदृछयोपपन्नेन संतोषो मुक्तये स्मृतः ॥ २५ ॥ यदृछालाभतुष्टस्य तेजो विप्रस्य वर्द्धते तत्प्रशाम्यत्यसंतोषा
दंभसेवाशुशुक्षणिः ॥ २६ ॥ तस्मात्त्रीणि पदान्येव वृणे त्वद्वरदर्षभात्। एतावतैव सिद्धोहं वित्तं यावत्प्रयोजनं ॥ २७ ॥ श्रीशुक
उवाच। इत्युक्तः स हसन्नाह वांछितं प्रतिगृह्यतां। वामनाय महीं दातुं जग्राह जलभाजनं ॥ २८ ॥ विष्णवे क्ष्मां प्रदास्यंतमुशना अ
सुरेश्वरं। जानंश्चिकीर्षितं विष्णोः शिष्यं प्राह विदांवरः ॥ २९ ॥ शुक्र उवाच ॥ एष वैरोचने साक्षाद्भगवान्विष्णुरव्ययः
कश्यपाददितेर्जातो देवानां कार्यसाधकः ॥ ३० ॥ प्रतिश्रुतं त्वयैतस्मै यदनर्थमजानता। न साधु मन्ये दैत्यानां महानुपगतोन
यः ॥ एष ते स्थानमैश्वर्यं श्रियं तेजो यशः श्रुतं। दास्यत्याछिद्य शक्राय मायामाणवको हरिः ॥ ३१ ॥ त्रिभिः क्रमैरिमान्लोकान्विश्व
कायः क्रमिष्यति। सर्वस्वं विष्णवे दत्वा मूढ वर्त्तिष्यसे कथं ॥ ३२ ॥

सिद्धेरिति गूढोभिप्रायः तदेवाह। वित्तं हि यावत्प्रयोजनमेव। अधिकस्य चेके
शावहत्वादिसर्थः ॥ २७ ॥ ३१ ॥ अनयः। अन्यायः अन्यायमेवाह। एष इति ॥ ३२ ॥ ननु मया पदत्रयमेव प्रतिश्रुतं नाधिकं तत्राह। त्रिभिरिति। क्रमतामिति चेत्
तत्राह सर्वमिति ॥ ३२ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्व२

स्क॰ना॰ ४४ तथापि प्रतिश्रुतं संपादनियमेवेत्यिचेतत्राह। क्रमत इति द्वाभ्यां। एकेन पदा पादन्यासेन भूमिं क्रममाणस्येत्यर्थः। तार्तीयस्य तृतीयपदन्यासस्य। ३३।
३४ तथापि सर्वदानात्कीर्तिस्तावत्स्यादिष्टमेवेत्यिचेतत्राह। न तद्दानमिति। तपः वित्तैकाध्यं कर्मपूर्तं। ३५। ननु तर्हि प्रतिश्रुतमनेतिकथमनृतं वाच्यं
तत्राह सार्द्धैः षड्भिः। ३६। अत्रापि सत्यानृतव्यवस्थायां बह्वृचश्रुत्यादि प्रथमं ओमिति सत्यं नेत्यनृतमित्यादिना सत्यानृतयोर्लक्षणेन पूर्वकं स्तुति
स्यं१ निंदाभ्यां संविहितं अनृतं च विधिं ब्रूते। अनंतरं च पराक् वा एतद्रिक्तमक्षरमित्यादिना सत्ये दोषानृते च गुणानुक्त्वा तस्मात्काल एव दद्यात्का
ले न दद्यात्सत्यानृते मिथुनं करोतीत्युपसंहारेण हि तिसंकटादि प्वनृतमप्यनुज्ञातं तमिमं श्रुत्यर्थं दर्शयन्नाह। ओमित्यंगीकारेण यत्प्रो

क्रमतो गां पदैकेन द्वितीयेन दिवं विभोः। खं च कायेन महता तार्तीयस्य कुतो गतिः। ३३। निष्ठां ते नरके मन्ये ह्यप्रदातुः प्रतिश्रु
तं। प्रतिश्रुतस्य योऽनीशः प्रतिपादयितुं भवान्। ३४। न तद्दानं प्रशंसंति येन वृत्तिर्विपद्यते। दानं यज्ञस्तपः कर्म लोके वृत्तिमतो
यतः। ३५। धर्माय यशसेऽर्थाय कामाय स्वजनाय च। पंचधा विभजन् वित्तमिहामुत्र च मोदते। ३६। अत्रापि बह्वृचैर्गीतं शृ
णु मेऽसुरसत्तम। सत्यमोमिति यत्प्रोक्तं यन्नेत्याहानृतं हि तत्। ३७। सत्यं पुष्पफलं विद्यादात्मवृक्षस्य जीवतः। वृक्षेऽजीवति
तन्न स्यादनृतं मूलमात्मनः। ३८।

वृक्षस्य कुतः क्तं तत्सत्यं नेति यदाह तदेवानृतं तेनृतं तु मत्समीपदनृतं विना न सिद्ध्यतीत्याशयेनाह। सत्यं पुष्पफलं विद्यात्जानी
यात्। आत्मवृक्षस्य देहरूपस्य गीयते श्रुत्येत्यध्याहारः। गीयत इत्यर्थः। पाठांतरं तु सुगमं। यद्यपि श्रुत्या वाचः सत्यं पुष्पं फलं चेत्युक्तं तथापि वाचो देहनि
र्वाहाधीनत्वादात्मवृक्षस्येति प्रस्तुतानुसारेणोक्तं। ननु तु पुष्पफलं स्थानीयं सत्यं ततः किमत आह। वृक्षे देहे जीवति तत्तु [illegible]प्पफलं न स्यात् राम ४४
सानस्मादिति पाठे श्रुत्युक्ताभावात्तः परामर्शः। देहश्चानृतेन रक्षणीय इत्याह। अनृतं आत्मनो देहस्य मूलं। ३८। ॥

एतदेव दृष्टांतेन स्पष्टयति। तद्यथा वृक्ष उत्पाटितमूलः शुष्यति। अचिरादेवोद्वर्त्तते पतति च। एवं नष्टमनृतं यस्य स आत्मा देहः शुष्येत् यद्यपि चिरशु
ष्या एवमेवानृतं वदन्नात्मानमाविर्मूलं करोतीत्येवं निर्द्धार्यानृतं निषिद्धं तथापुष्पसंहारानुसारेण उत्केवलानृतविषयमित्यपि प्रेत्येवं मा रत्सा
त तं दर्पितत्वेनेने त्विति येयेवोक्तेः तथा च श्रुतिः। ॐमिति सत्यं नेत्यनृतं तदेतत्पुष्पं फलं वाचो यत्सत्यं सहेश्वरो यशस्वी कल्याणकीर्त्तिर्भविता। पुष्पं
हि फलं वाचः। सत्यं वदत्यथैतन्मूलं वाचो यदनृतं। तद्यथा वृक्ष आविर्मूलः शुष्यति स उद्वर्त्तत एवमेवानृतं वदन्नाविर्मूलमात्मानं करोति स शुष्य
६५ ति स उद्वर्त्तते तस्मादनृतं न वदेद्दयेत त्वेनेन एतेन अन्नेनेत्यनृतेन दयेत संकटे वात्मानं रक्षेदिति श्रुत्यर्थः। ४० सर्वथा सत्यवचने देहे देहे
न निर्वहेदिति स्फुटीकर्तुं सत्यस्य शेषान् अनृतस्य गुणमाह। पराणीति वाक्यार्थः। यदोमित्यक्षरं तत्। पराङ्दूरे अर्थं गृहीत्वा अंचतीति परा कृ रिक्तमि

तद्यथा वृक्ष उन्मूलः शुष्यत्युद्वर्त्तते चिरात्। एवं नष्टानृतः सद्य आत्मा शुष्येन्न संशयः। ३८। पराग्रिक्तमपूर्णं वा अक्षरं यत्तदोमि
ति। यत्किंचिदोमिति ब्रूयात्तेन रिच्येत वै पुमान्। ४०। निह्नवे सर्वमोंकुर्वन्नालं कामेन चात्मने। अथैतन्मूलमिमात्मं यज्ञेनेत्यनृतं
वचः। ४१

मितिरिक्तमिति। यदस्य व्याख्यानमपूर्णं वेश्ट्ति। तस्मात् प्रार्थिने यदोमिति दास्यामीति ब्रूयात्। तेन रिच्येत न्यूनो भवेत्। ४०। किंच
निह्नवे सर्वमोंकुर्वन्। दास्यामीत्यंगीकुर्वन्नुक्ष्मानैः कामैर्नैर्नं खं पर्याप्तो न भवति। तस्य भोगो न सिध्यतीत्यर्थः। तथा च श्रुतिः। पराग्वा एतद्रिक्त
मक्षरं यदेतदोमिति तद्यत्किंचोमित्याहात्रैवास्मै तद्रिच्यते स यत्सर्वमोंकुर्याद्रिच्यादात्मानं स कामेभ्यो नालं स्यादिति। ४१ नेति यदनृतं वचः। ए
तत्पूर्णं अर्थस्यायानावात्। अस्मात्संचेति च कारान्वयः। आत्मनोभिमुखमन्यस्यार्थमाकर्षतीत्यस्मात्। यो हि नित्यं मम किंचिदपि नास्ति सी
दामीति ब्रूते स हि तेनानृतेन परेषामर्थनाकर्षतीति प्रसिद्धं। ४२॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०स्क० ४५ ननु तर्हि इदमनृतमेव सर्वदा स्यात् नेत्याह । सर्वमिति तथा च श्रुतिः । अथैतत्पूर्णमभ्यात्मं यन्नेति सत्यं वै ओमिति ब्रूयात् पापिकास्य कीर्तिर्जायेत से
नं तत्रैव हन्यादिति अत्रोक्तो हेतुः संकटादिष्वनृतं न दोषायेत्युपसंहरति स्त्रीष्विति स्त्रीषु हासे नर्मणि परिहासे विवाहे च वरादिस्तुतौ गवां ब्राह्म
णानां च हितार्थं हिंसायां च कस्यचित्प्राप्तायां तथा च याज्ञवल्क्यः वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेदिति । तथा च श्रुतिः । तस्मात्काल एव दद्या

सर्वं नेत्यनृतं ब्रूयात्स दुःकीर्तिः श्वसन्मृतः । स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसंकटे ॥४२॥ गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितं
॥४३॥ ॥ इति श्रीभागवते महापुराणेऽष्टमस्कंधे वामनप्रादुर्भावे एकोनविंशोऽध्यायः ॥१९॥ ॥ श्रीशुक उवाच ॥ बलिरेवं गृहपतिः
कुलाचार्येण भाषितः ॥ तूष्णीं भूत्वा क्षणं राजन्नुवाचावहितो गुरुं ॥१॥ बलिरुवाच ॥ सत्यं भगवता प्रोक्तं धर्मोऽयं गृहमेधिनां । अर्थं
कामं यशो वृत्तिं यो न बाधेत कर्हिचित् ॥२॥ स चाहं वित्तलोभेन प्रत्याचक्षे कथं द्विजं । प्रतिश्रुत्य ददामीति प्राह्लादिः कितवो यथा ॥३॥
न ह्यसत्यात्परो धर्म इति होवाच भूरियं । सर्वं सोढुमलं मन्ये ऋतेऽलीकपरं नरं ॥४॥ नाहं बिभेमि निरयान्नाधन्यादसुखार्णवात् ॥ न
स्थानच्यवनान्मृत्योर्यथा विप्रप्रलंभनात् ॥५॥ ॥

कालेन दद्यात् न तत्स्यादनृते मिथुनीकरोतीति ॥४३॥ ॥ इति श्रीमद्भागवते अष्टमे टीकायामेकोनविंशः ॥१९॥ विंशे त्वनृतभीतोऽसौ ज्ञात्वापि कपटं हरेः ॥ ददाविवृत
ते विष्णुः सह सावर्द्धताद्भुतं ॥१॥ भगवता त्वया प्रोक्तं सत्यं कितवता चार्थकामादिकं न बाधेत स हि गृहमेधिनां धर्म इति कथं प्रत्याचक्षे निराकरोमि राम ४५
॥२।३॥ नन्वप्रतारणे निर्दोषा उक्ताः ॥ तत्राह नाहमिति ॥ अधन्यात् दारिद्र्यात् स्पष्टोऽर्थः ॥४।५॥ ॥

यद्यत्धनादिकंतत्सर्वंसंपरेतंपुरुषंहास्यति।त्यक्ष्यत्येव॥ तत्किमितिजीवन्नेवस्वयंनदेयमितिभावः।तथापितावद्वृत्तिसंकटपरिहारार्थंरक्षणीयं
यतामितिचेत्।तत्राहतस्येति।विप्रश्चेत्तेनार्थेनदत्तेनापिनतुष्येत्तर्हितत्रस्वार्थ[illegible]स्य त्यागेदानेकिंनिमित्तंनकिंचित्।यावताद्रव्येणदानेवि
प्रस्यासंतोषेणात्मनःश्रेयएवस्यात्।अतस्तद्धनावितंसर्वंदेयंनकिंचिदितिभावः।६।तर्हिनदेयमेवेतिचेत्तत्राह।श्रेयइति।दुस्त्यजैरसुभिरपिको
त्सं विकल्पोविचारोयैर्दैत्येंद्रैर्युद्धेष्वनिवर्त्तिभिरियंभूर्बुभुजेतेषामपिकालस्तेषामिहलोकान्परलोकांश्चभोगानितिवाकालोग्रसीत्।संहृतवान्।ननु
चा

यद्यद्धास्यतिलोकेस्मिन्संपरेतंधनादिकं।तस्यत्यागेनिमित्तंकिंविप्रस्तुष्येन्नतेनचेत्॥६॥श्रेयःकुर्वंतिभूतानांसाधवोदुस्त्यजासु
भिः।दध्यङ्शिबिप्रभृतयःकोविकल्पोधनादिषु॥७॥यैरियंबुभुजेब्रह्मन्दैत्येंद्रैरनिवर्तिभिः॥तेषांकालोऽग्रसील्लोकानय
शोधिगतंभुवि॥सुलभायुधिविप्रर्षेह्यनिवृत्तास्तनुत्यजः।नतथातीर्थआयातेश्रद्धयायेधनत्यजः॥९॥मनस्विनःकारुणिक
स्यशोभनंयदर्थिकामोपनयेनदुर्गतिः॥कुतःपुनर्ब्रह्मविदांभवादृशांततोवटोरस्यददामिवांछितं॥१०॥ ॥

भुवितैरपिप्राप्तंयशोऽग्रसीत्।अतःकीर्तिरेवसाध्यानान्यदितिभावः॥८॥देहत्यागादपिधनत्यागेकीर्तिर्नवेतीत्याह।सुलभाइतितनुंत्यजंतीतितनु
र्थपात्रेश्रद्धयेतिदुःकरोधनत्यागएवमयाकार्यइतिभावः॥९॥तर्हिनिर्धनत्वेनदैन्यंस्यादितिचेत्तत्राह॥मनस्विनइति।यादृशात्तादृशाना
मप्यर्थिनांकामोपनयेनकामपूरणेनदुर्गतिर्दैन्यमितियत्।तच्छोभनंचकिमेवभवादृशानांतुकामोपनयेनदुर्गतिःशोभनमितिकिंपु
नर्वक्तव्यमित्यर्थः॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वा॰च॰

न तु नायं बटुः किंतु विष्णुस्त्वयं शत्रुरित्युक्तं तर्हि सुतरामेव दास्यामि स्याह । यजंतीति पर ॥ चतुर्भिः ॥११॥ यद्यपि यशो न जिह्मसति । तर्हि युद्धे यं मां हर
त्वा एनां भूमिं हरेत् त्वायीनवासम्यक् तातः सन्मम विजेशयीत । वालवीर्यः ॥१२॥ अश्रद्धितं अजातश्रद्धं ॥१३॥१४॥ नालकं मुक्तामरणविशेषः तन्मा

यजंति यज्ञक्रतुभिर्यमादृता भवंत आम्नायविधानकोविदाः । स एष विष्णुर्वरदोस्तु वा परो दास्याम्यमुष्मै क्षितिमीप्सितां मुने ॥११॥ य
द्यप्यसावधर्मेण मां बध्नीयादनागसं । तथाप्येनं न हिंसिष्ये भीतं ब्रह्मतनुं रिपुं ॥१२॥ एष वा उत्तमश्लोको न जिहासति यद्यशः । हत्वा मैनां
हरेद्युद्धे शयीत निहतो मया ॥१३॥ शुक उवाच ॥ एवमश्रद्धितं शिष्यमनादेशकरं गुरुः । शशाप दैवप्रहितः सत्यसंधं मनस्विनं ॥१४॥ दृ
ढं पंडितमान्यज्ञः स्तब्धोस्यस्मदुपेक्षया । मच्छासनातिगो यस्त्वमचिराद्भ्रश्यसे श्रियः ॥१५॥ एवं शप्तः स्वगुरुणा सत्यान्न चलितो महान् ।
वामनाय ददावेनामर्चित्वोदकपूर्वकं ॥१६॥ विंध्यावलिस्तदागत्य पत्नी जालकमालिनी । आनिन्ये कलशं हैममवनेजन्यपां भृतं ॥१७॥
यजमानः स्वयं तस्य श्रीमत्पादयुगं मुदा । अवनिज्यावहन्मूर्ध्नि तदपो विश्वपावनीः ॥१८॥ तदासुरेंद्रं दिवि देवतागणा गंधर्वविद्या
धरसिद्धचारणाः । तत्कर्म सर्वेपि गृणंत आर्जवं प्रसूनवर्षैर्ववृषुर्मुदान्विताः ॥१९॥ नेदुर्मुहुर्दुंदुभयः सहस्रशो गंधर्वकिंपूरुषकिं
नराजगुः । मनस्विनानेन कृतं सुदुःकरं विद्वानदाद्यद्रिपवे जगत्त्रयं ॥२०॥ तद्वामनं रूपमवर्धताद्भुतं हरेरनंतस्य गुणत्रयात्मकं ।
भूः खं दिशो द्यौर्विवराः पयोधयस्तिर्यङ्नृदेवा ऋषयो यदासत ॥२१॥ ॥

ध्यावनेजनीः अवनेजनीयमपां कलशं भृतं पूर्णं ॥१५॥१८॥ अवर्द्धत वांछातः प्रतिगृह्यता मित्रिविजिना पूर्वमुक्तत्वात् गुणत्रयमात्मनियम्यतत्त्र
त एव भूः खमित्यादयो यस्मिन्नासत स्थितवंतः ॥२०॥२१॥ ॥

राम
४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋत्विगादिभिः इतो बलिस्तस्य हरेः कायेन तद्वि[श्वं] ददर्श ॥२२॥ तदेव प्रपंचयति रसामिति पादोनैः सप्तभिः। मारुतं गणं वायुसंघं इंद्रस्य सेनेव सेना
यस्य सः। इंद्रपदे स्थितत्वात् अचष्ट ऐक्षत ॥२३॥ आत्मा स्वयं बलिर्मुरद्वेषिणो यस्य तां ऋक्षमालां नक्षत्रपंक्तिं ॥२४॥ अंगहे राजन्। समस्तान् रेफान् वक्ष्य

ये

काये बलिस्तस्य महाविभूतेः सहर्त्विगाचार्यसदस्य एतत्। ददर्श विश्वं त्रिगुणं गुणात्मके भूतेंद्रियार्थाशयजीवयुक्तं ॥२२॥ रसामचष्टां
घ्रितलेथ पादयोर्महीं महीध्रान् पुरुषस्य जंघयोः। पतत्रिणो जानुनि विश्वमूर्तेरूर्वोर्गणं मारुतमिंद्रसेनः ॥२३॥ संध्यां विभोर्वाससि गु
ह्य ऐक्षत् प्रजापतीन् जघने आत्ममुख्यान्। नाभ्यां नभः कुक्षिषु सप्तसिंधूनुरुक्रमस्योरसि चर्क्षमालां ॥२४॥ हृद्यंग धर्मं स्तनयोर्मुरारे
ऋतं च सत्यं च मनस्यथेंदुं। श्रियं च वक्षस्यरविंदहस्तां कंठे च सामानि समस्तरेफान् ॥ इंद्र प्रधानानमरान् भुजेषु तत्कर्णयोः क
कुभो द्यौश्च मूर्ध्नि। केशेषु मेघान् श्वसनं नासिकायामक्ष्णोश्च सूर्यं वदने च वह्निं ॥२६॥ वाण्यां च छंदांसि रसे जलेशं भ्रुवोर्निषेधं च वि
धिं च पक्ष्मसु। अहश्च रात्रिं च पर[स्य] पुंसो मन्युं ललाटेधर एव लोभं ॥२७॥ स्पर्शे च कामं नृप रेतसांभः पृष्ठे त्वधर्मं क्रमणेषु यज्ञं।
छायासु मृत्युं हसिते च मायां तनूरुहेष्वोषधिजात[य]श्च ॥२८॥ नदीश्च नाडीषु शिला नखेषु बुद्धावजं देवगणानृषींश्च। प्राणेषु गा
त्रे स्थिरजंगमानि सर्वाणि भूतानि ददर्श वीरः ॥२९॥ सर्वात्मनीदं भुवनं निरीक्ष्य सर्वेसुराः कश्मलमापुरंग। सुदर्शनं चक्रमस
ह्यतेजः धनुश्च शार्ङ्गं स्तनयित्नुघोषं ॥३०॥ ॥

न ॥२५॥ द्यौश्च द्यां[२६] रसे रसने ॥२७॥ रेतसो रेतसि। क्रमणेषु पादन्यासेषु। ओषधिजातीश्च[२८] प्राणेषु इंद्रि[य]ेषु ॥२९॥ सर्वात्मनीत्यादि वाक्यांतरं सुदर्शनमित्या
दीनामीरणमुपतस्थुरित्युत्तरेणान्वयः। पर्जन्यघोषं जलदं पांचजन्यं ॥३०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्क० विद्याधरसंज्ञो ऽसिः ॥ ३१ ॥ मीनकुंडले मकरकुंडले स्फुरंती किरीटादीनि यस्य सः ॥ ३२ ॥ मधुव्रतानां स्रजो यस्मात् तया वनमालया श्रीवत्सादिभिश्चावृतो व्याप्तः
४७ उरुक्रमत्वमेवाह क्षितिमिति ॥ ३३ ॥ द्वितीयं पदं क्रमतो विक्षिपतस्त्रिविष्टपं तदियं किंचित् मात्रं जातं तृतीयाय तु न किंचिदपि न त्वहेतुः उरुक्रमस्यां
घ्रिः त्रिविष्टपाद् उपर्युपरि गच्छन् महर्जनाभ्यां तपसश्च परंगतः सत्यलोकं गत इति ॥ ३४ ॥ इति श्रीअष्टमे टीकायां विंशः ॥ ॥ एकविंशे पदाप्तिर्निमिषि

पर्जन्यघोषो जलजः पांचजन्यः

कौमोदकी विष्णुगदा तरस्विनी विद्याधरो ऽसिः शतचंद्रयुक्तः ॥ तूणोत्तमावक्षयसायकौ च सुनंदमुख्या उपतस्थुरीशं ॥ ३१ ॥ स्फुरत्कि
रीटांगदमीनकुंडलः श्रीवत्सरत्नोत्तममेखलांबरैः ॥ मधुव्रतस्रग्वनमालयावृतो रराज राजन् भगवानुरुक्रमः ॥ ३२ ॥ क्षितिं पदैके
न बलेर्विचक्रमे नभः शरीरेण दिशश्च बाहुभिः ॥ पदं द्वितीयं क्रमतस्त्रिविष्टपं न वै तृतीयाय तदीयमण्वपि ॥ ३३ ॥ उरुक्रमस्यां
घ्रिरुपर्युपर्यथो महर्जनाभ्यां तपसः परं गतः ॥ ३४ ॥ ॥ इति श्रीभागवते महापुराणे ऽष्टमस्कंधे विश्वरूपदर्शनं नाम विंशति
मो ऽध्यायः ॥ २० ॥ ॥ श्रीशुक उवाच ॥ सत्यं समीक्ष्या ऽब्जभवो नखेंदुभिर्हतस्वधामद्युतिरावृतो ऽभ्यगात् ॥ मरीचिमिश्रा ऋषय
ो बृहद्व्रताः ॥ सनंदनाद्या नरदेवयोगिनः ॥ १ ॥ ॥

एवं बलिबंधनं विष्णुना कृतमुत्कर्षं तस्य प्रदर्शयितुं जने ॥ १ ॥ उरुक्रमस्यांघ्रिस्तपसः परं गत इत्युक्तं ततः किं वृत्तं तदाह सत्यं सत्यलोकं प्राप्तं तमं राम
घ्रिं समीक्ष्य अब्जभवो ऽभ्यगात् हरेरंघ्रेर्नखा एवेंदवः तैर्हतास्वधाम्नो द्युतिर्यस्य सः स्वयं च तैरावृतः छत्रादिना नरदेवबृहद्व्रता योगिनश्च ॥ ॥ ॥ ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तंयानि शिक्षादीनि पुराणानि तत्संहिताश्च योग एव समीरस्तेन दीपितं ज्ञानमेवाग्निस्तेन रंधितं दग्धं कर्म[illegible]मलं येषां ते च सर्वेऽपि तमंघ्रिं ववंदिरे । यस्यां
त: घ्रेः स्मरणानुभावात् । अकर्मकं कर्मनिरघाप्यं । २ । विष्णोरंघ्रये स्वयं यस्य नाभिपंकेरुहसंभवः । तस्य विष्णोरंघ्रिं समभ्यर्च्य । ३ । लोकत्रयं निमार्ष्टि पवित्र

यमा
वेदोपवेदा नियमान्वितास्तर्केतिहासांगपुराणसंहिताः । येचापरे योगसमीरदीपितज्ञानाग्निना रंधितकर्मकल्मषाः । ववंदिरे
यत्स्मरणानुभावतः स्वायंभुवं धाम गता अकर्मकं । २ । अथांघ्रये प्रोन्नमिताय विष्णोरुपाहरत्पद्मभवोर्हणोदकम् । ३ । समर्च्य
भक्त्याभ्यगृणाच्छुचिश्रवा यन्नाभिपंकेरुहसंभवः स्वयं ॥ धातुः कमंडलुजलं तदुरुक्रमस्य पादावनेजनपवित्रतया नरेंद्र
४ । स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्तिः । ४ । ब्रह्मादयो लोकनाथाः स्वनाथाय समादृताः ॥
सानुगा बलिमाजह्रुः संक्षिप्तात्मविभूतये । ६ । तोयैः समर्हणैः स्रग्भिर्दिव्यगंधानुलेपनैः ॥ धूपैर्दीपैः सुरभिभिर्लाजाक्षतफ
लांकुरैः । ७ । स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमांकितैः । नृत्यवादित्रगीतैश्च शंखदुंदुभिनिःस्वनैः । ८ । जांबवानृक्षराजस्तु भे
रीशब्दैर्मनोजवैः । विजयं दिक्षु सर्वासु महोत्सवमघोषयत् । ९ । महीं सर्वां हृतां दृष्ट्वा त्रिपदव्याजयाच्ञया ॥ ऊचुः स्वभर्तुरसु
रा दीक्षितस्यात्यमर्षिताः ॥१०॥

पतिता ॥४॥५॥ सं॰ क्षिप्ताः उपसंहृता आत्मविभूतीः स्वविस्तारा येन तस्मै यथा पूर्वं वामनरूपेण स्थिता येत्यर्थः ॥६॥७॥८॥ त्रिपदस्य विषया या व्याजयाच्ञा
कपटयाच्ञा तया स्वभर्तुर्बलेर्महीं हृतां दृष्ट्वा ऊचुः ॥९॥१०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किम्बुः तदाह नवैश्वतिसार्धैर्भिनिः ।।११।। ३। अनुचराश्चतेऽसुराश्च ।।१४।। अर्थकृत् अनुकूलः ।।१९।। पौरुषैस्तंकालमतिवर्त्तितुं पुमानीश्वरः समर्थो नम

नवाऽयंब्रह्म बंधुर्विष्णोर्मायाविनांवरः द्विजरूपप्रतिच्छन्नोदेवकार्यंचिकीर्षति ।११। अनेनयाचमानेनशत्रुणा वटुरूपिणा ।।
सर्वस्वंनोहृतंभर्त्तुर्न्यस्तदंडस्यबर्हिषि ।१२। सत्यव्रतस्यसततंदीक्षितस्यविशेषतः । नानृतंभाषितुंवाक्यंब्रह्मण्यस्यदयावतः । तस्मा
दस्यवधोधर्म्मोभर्त्तुः शुश्रूषणंचनः । इत्यायुधानिजगृहुर्बलेरनुचरा सुराः ।१४। तेसर्वेवामनंहंतुंशूलप[ट्टि]शपाणयः । अनि
च्छतोबलेराजन्प्राद्रवन्जातमन्यवः ।१५। तानभिद्रवतोदृष्ट्वादितिजानीकपान्नृप । प्रहस्यानुचराविष्णोः प्रत्यषेधन्नुदायुधाः
।१६। नंदः सुनंदोथजयोविजयः प्रबलोबलः । कुमुदः कुमुदाक्षश्चविष्वक्सेनः पतत्रिराट् ।१७। जयंतः श्रुतदेवश्चपुष्पदंतोथसात्वतः
सर्वेनागायुतप्राणाश्चमूंतेजघ्नुरासुरीं । हन्यमानान्स्वकान्दृष्ट्वापुरुषानुचरैर्बलिः । वारयामाससंरब्धान्काव्यशापमनुस्मरन्
।१९। हेविप्रचित्तेहेराहोहेनेमेश्रूयतांवचः । मायुध्यतनिवर्त्तध्वंननःकालोयमर्थकृत ।२०। यःप्रभुःसर्वभूतानांसुखदुःखोपपत्तये ।
तंनातिवर्त्तितुंदैत्याः पौरुषैरीश्वरः पुमान् ।२१। योनोभवायप्रागासीदभवायदिवौकसां । सएवभगवानद्यवर्त्ततेतद्विपर्ययं ।२२। ब
लेनसचिवैर्बुध्यादुर्गैर्मंत्रौषधादिभिः । सामादिभिरुपायैश्चकालंनात्येतिवैजनः ।२३। भवद्भिर्निर्जिताह्येतेबहुशोनुचराहरेः । दैवेन
र्द्धैस्तएवाद्ययुधिजित्वानदंतिनः ।२४। एतान्वयंविजेष्यामोयदिदैवंप्रसीदति । तस्मात्कालंप्रतीक्षध्वंयोनोर्थत्वायकल्पते ।२५। श्री
शुकउवाच ।। पत्युर्निगदितंश्रुत्वादैत्यदानवयूथपाः । रसांनिर्विविशूराजन्विष्णुपार्षदताडिताः ।२६। ।।

वतिहरेरनुचरादेवाः दैवेनऋद्धैः समृद्धैः नंवद्भिः ।।२३।। अर्थत्वाय आनुकूल्याय ।।२४।।२५।।२६।। ।।

न

राम
४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विष्णुपक्षिषु राजन् इति विराट् प्रभोः श्चिकीर्षितं ज्ञात्वा अयमर्थः अस्मत्स्वामिना प्रहारेण ममैतन्निमानं संमतं स्यात् देहस्वीकारेण अहंकारमपि त्याजयित्वा
परमानुग्रहं कर्तुं स्थितो न च तेन तुष्टोऽस्य। कोऽपि अस्य संबंधो धीरो वा स्तीति तद्यशः प्रस्मापनार्थं किंचित् ख्यापयितुमपीच्छतीति ब्रुवन्नेव पाशयंत्रात्वा तं
बबंधेति सौत्येऽहनि सोमाभिषवदिने। २७ रोदस्योः द्यावापृथिव्योः। २८ २९ असौ सूर्यः। ३० मया आत्मनेत्यन्वयः। त्या पश्येत्यर्थः स्वं अर्थ दिशस्तनोः

अथ तार्क्ष्यसुतो ज्ञात्वा विराट् प्रभुचिकीर्षितं। बबंध वारुणैः पाशैर्बलिं सौत्येऽहनि क्रतौ। २७। हाहाकारो महानासीद्रोदस्योः स
र्वतो दिशं। निगृह्यमाणेऽसुरपतौ विष्णुना प्रभविष्णुना। २८ तं बद्धं वारुणैः पाशैर्भगवानाह वामनः। नष्टश्रियं स्थिरप्रज्ञमुदारयशसं
नृप। २९ पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वयासुर। द्वाभ्यां क्रांता मही सर्वा तृतीयमुपकल्पय। ३०। यावत्तपत्यसौ गोभिर्यावदि
दुः सहोडुभिः। यावद्वर्षति पर्जन्यस्तावती भूरियं तव। ३१। पदैकेन मयाक्रांतो भूर्लोकः खं दिशस्तनोः। स्वर्लोकस्ते द्वितीयेन
पश्यतस्ते स्वमात्मना। ३२। प्रतिश्रुतमदातुस्ते निरये वास इष्यते। विश त्वं निरयं तस्माद्गुरुणा चानुमोदितः। ३३। वृथा मनोरथस्त
स्य दूरः स्वर्गः पतत्यधः। प्रतिश्रुतस्यादानेन योऽर्थिनं विप्रलंभते। विप्रलब्धो ददामीति त्वयाहं चाढ्यमानिना। ३४। तद्व्यलीकफलं भुंक्ष्व
निरयं कतिचित्समाः। ३५। इति श्रीभागवते महापुराणेऽष्टमस्कंधे बलिनिग्रहो नाम एकविंशोऽध्यायः। २१।

तस्मात्ते स्वं यदीयं सर्वस्वं
३१ गुरुणा शुक्रेणानुमोदितः सन्। एवमुक्ते निरयपरिहारार्थं स्वर्गाकांक्षापरिहारार्थं च तं मनोरथं कुर्वंतं पश्यादृ। वृथेति। यः प्रतिश्रुतस्य अप्रदाने
न याचकं विप्रलंभते तस्य मनोरथो वृथैव स्वर्गश्च तस्य दूर एव स्वयं चाधः पतत्येव। त्वया चाहं विप्रलब्धः। तस्माद्व्यलीकफलं निरयं भुंक्ष्वेत्यर्थः। ३। अष्टमे
एकविंशः। २१।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰स्क॰ यावित्येतु प्रसन्नः सन् प्रस्थाप्य सुतलं बलिं दत्वा वरान् हरिस्तूर्णं निमृतात तत्रापरीत्यवत् १ समर्पितं तनू वित्तो निर्मला चलन कृतः । अजितो बलिना
४९ चित्रं त्वमेवार्प्पयत्स्युतः २ विप्रकृतः अपकृतः निग्रमानः सत्वाच्चाल्यमानः ॥ हे उत्तमश्लोकेति कटाक्षः मम स्वर्वरितं प्रतिश्रुतं न तावद्व्यलीकं त्वया
कपटेन वामनतया निह्निता रूपांतरस्याविष्कृतत्वात् एवमपि यदि भवान् व्यलीकं मन्यते तथापि कृतमेवाहं करोमि मन्दु कं विपुलं न नं नम
वतुर्मेशीर्ष्णि निजं तृतीयं पदं कुरु नैव वाच्यं विश्वं क्रांतवत्तेवं मे शिरः पदपर्याप्तं न भवतीति मन्येथाः विश्वं चेत्पदद्वयं जातं तर्हि दैंमधिकमे
तु त ६

श्रीशुक उवाच ॥ एवं विप्रकृतो राजन् बलिर्भगवतासुरः । निद्यमानोप्यभिन्नात्मा प्रत्याहाविक्लवं वचः १ बलिरुवाच ॥ ॥
यद्युत्तमश्लोक भवान्ममेरितं वचो व्यलीकं सुरवर्य मन्यते । करोम्यृतं तन्न भवेत्प्रलंभनं पदं तृतीयं कुरु शीर्ष्णि मे निजं २ बिभे
मि नाहं निरयात्पदच्युतो न पाशबंधाद्व्यसनात् दुरत्ययात् । नैवार्थकृच्छ्राद्भवतो विनिग्रहादसाधुवादाद्भृशमुद्विजे यथा
३ पुंसां श्लाघ्यतमं मन्ये दंडमर्हत्तमार्पितं । यं न माता पिता भ्राता सुहृदश्चादिशंति हि ॥ ४ ॥

तस्मात् वित्तादपि चित्तवृत्तो धिकत्वादिति भावः २
ननु च ॥ आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि ॥ आत्मानं सततं रक्षेद्दारैरपि धनैरपीत्यादिवचनादात्मत्रयपरिहाराय सर्वस्वं त्यज्यते त्वं तु क... तेनीतः स
आत्मानमर्प्पयसि अत आह बिभेमीति ॥ असाधुवादात् अपकीर्तिः यथाहं भृशमुद्विजे निरयादिभ्यो न तथा बिभेमि ३ ननु मया निग्रहात्त्वापकीर्ति राम
जाते वने वेसा हा पुंसामिति ॥ अर्हत्तमैरर्पितो यं दंडं माता वा दो पि न हि ॥ आदिशंति नैवार्प्पयंति हि ते बिएगत्वया निगृहीतो हं श्लाघ्य एवास्मीति भावः ५९
ति

नन्वहं देवानां हितैषी नासुराणां तत्राह। त्वं नूनमिति। परोक्ष्यः शत्रुछद्मेन वर्त्तमानः ।५। शत्रुत्वं पुनर्नः कृपानिवास्मानत्नुग्रहीतुमेवेत्याह। यस्मिन्निति।।
उग्रहेहं प्रसिद्धं ६ च्युतो नात्र ममसत्कज्ञाना पिदुःखमित्याह। तेन गुरुणा भवता।७। किंच। यो यं दंदउरूपो मम अनुग्रहः। त्वया कृतः सत्व ज्रक
न३ पौत्रत्वेनं त्वहमनुग्रहस्य पात्रमित्याशयेनाह पितामहाइति। त्ववदीयानां संमतः आविःकृतः साधुवादो यस्य। त्वमेव परमः आश्रयो यस्य

त्वमेव मसुराणां नः पारोक्ष्यः परमो गुरुः। यो नोनेकमदांधानां विभ्रंशं चक्षुरादिशत्। ५। यस्मिन्वैरानुबंधेन रूढेन विबुधेतराः।।
बहवो लेभिरे सिद्धिं यामु हैकांतयोगिनः। ६ तेन्याहं निगृहीतोस्मिन्भवता भूरिकर्मणा। बद्धश्च वारुणैः पाशैर्न्ना तिव्रीडेन च
मयि। ७। पितामहो मे भवदीय संमतः प्रह्लाद आविःकृतसाधुवादः। भवद्विपक्षेण विचित्रवैशसं संप्रापितस्त्वं परमः स्वपित्रा। ८
किमात्मनानेन जहाति योंततः किं रिक्थहारैः स्वजनाख्यदस्युभिः। किं जायया संसृतिहेतुभूतया मर्त्यस्य गेहैः किमिहायुषो
व्ययः। ९ इत्थं स निश्चित्य पितामहो महानगाधबोधो भवतः पादपद्मं। ध्रुवं प्रपेदे ह्यकुतोभयं जनात् भीतः स्वपक्षक्षपणस्य सत्
तमः।।१०।।

सः स्वतः भक्तो विपक्षेण विद्विषा हिरण्यकशिपुना विचित्रं वैशसं हिंसां संप्रापितोपि। ९। देहादीनामसारतां निश्चित्याकुतोभयं ध्रुवं च भवतः २
पादपद्ममेव प्रपेदे। अप तस्मादहमपि दैवेन तस्यैव मार्गेण तवांतिकं नीत इत्यन्वितचतुर्णामन्वयः। अंततः आयुषांते रिक्थहारैः पुत्रैः सर्वस्वा
पहारिभिः इह गेहेषु केवलमायुषो व्यय एव न तु सुखं किंचित्। ९। सः प्रसिद्धो महान् स्वपक्षं दैत्यकुलं क्षपयतीति तत्र घातस्यापि।१०।।

वा०स्क०
५०

प्रसन्नं बलात्स्त्वा जिताश्रीर्यस्यायया श्रियास्तस्य मतिः सस्तुमानि दंश्री वितमकवं न बुध्यते कथं न्वतं ह्रतां तत्स्यांतिकवर्त्त्रिमृत्यो: सं निहितं ॥१॥ राकापतिः पूर्णेंदुः ॥२॥ चांजन विषं श्यामं ॥३॥ स्वकृताहंकारादिरूपापराध स्मरणेन सव्रीडं निचीनमधोमुखं यस्य सः ॥४॥ शिरसा नमन्नेव उपेत्य सञ्जनि नामबलेस्तत्कृतमनुग्रहं दृष्ट्वा पुलकैरश्रुभिश्च विकलः ॥५॥ त्वयैवेति नत्यै इंद्रपरमेतदीयं त्वया प्रदत्तं किंतु स्वीयमेव पुनः स्वीकृतं त

अथाहमप्या त्म रिपोस्तवांतिकं दैवेन नीतः प्रसभं त्याजितश्रीः इदं च तांतातिकवर्त्त्रिजीवितं यया धुवं स्तब्धमतिर्न्न बुध्यते ॥१॥ श्रीशुक उवाच ॥ नमेच्छं नाषमाणस्य प्रह्लादोभगवत्प्रियः आजगाम कुरुश्रेष्ठ राकापतिरिवोत्थितः ॥२॥ तमिंद्रसेनः स्वपितामहं श्रिया विराजमानं नलिनायतेक्षणं ॥ प्रांशुं पिशंगांबरमंजनत्विषं प्रलंबबाहुं सुभगं समैक्षत ॥३॥ तस्मै बलिर्वारुणपाशयंत्रितः समर्हणं नोपजहार पूर्ववत् ॥ ननाम मूर्ध्नाश्रुविलोललोचनः सव्रीडनीचीनमुखो बभूव ह ॥४॥ सतत्र हासीनमुदीक्ष्य सत्पतिं सुनंदनंदाद्यनुगैरुपासितं उपेत्य भूमौ शिरसा महामना ननाम मूर्ध्ना पुलकाश्रुविक्लवः ॥५॥ प्रह्लाद उवाच ॥ त्वयैव दत्तं पदमैंद्रमूर्जितं हृतं तदेवाद्य तथैव शोभनं ॥ मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्ममोहनात् ॥६॥ यया हि विद्वानपि मुह्यते यतस्तत्को विचष्टे गतिमात्मनो यथा ॥ तस्मै नमस्ते जगदीश्वराय नारायणायाखिललोकसाक्षिणे ॥७॥

स्वशो नन मे कृतं न त्वहेतुः मन्यइति यद्यस्मात् श्रीय एव यद्वात्ममोहनं तस्माद्विभ्रंशितः ॥६॥ मोहनत्वमेवाह यया श्रिया विद्वानपि यतः संयतो पि मुह्यति तत्तस्मात् तत्कोन्यः पुमानात्मनो गतिं तत्त्वं यथावद्विचष्टे प्रपश्यति तस्मै महाकारुणिकाय ॥७॥ राम
५०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य प्रह्लादस्यानुसृष्ट एव तः। उवाचेति किंचिद्वक्तुं प्रवृत्त इत्यर्थः।१८। तदैव विंध्यावलिरपि वक्तुं प्रवृत्ता। तां च समानयन् हिरण्यगर्भः ब्रह्मा एणं तूष्णीं स्थि
तः। अतस्तस्मा एव वाक्यं प्रथमम् अवतारयति बद्धं वीक्ष्येति।१९। त्रिजगतः कर्तुः प्रभोः पालकस्य संहर्तुश्च ईश्वरस्य तव अन्ये किमावहंतीति किं
समर्पयंति। त्वया च आरोपितः कर्तृवादः कर्तारः स्मः तं च आवयमिति। वाङ्मात्रमपि येषां ते। स्वयं तावत् लोकत्रयं मया अर्पितं तृतीयपादार्थे देहं समर्प
यति श्रुतमेतत् करोमीति। देहादिषु स्वात्माभिमानकारेण ब्रुवन्नयं। कुबुद्धिर्निग्रहार्ह एव। यतस्त्वमेव सर्वस्यापि स्वामी अतो मंदबुद्धिमेनं केवलं छ

श्रीशुक उवाच। तस्यानुशृण्वतो राजन् प्रह्लादस्य कृतांजलेः। हिरण्यगर्भो भगवानुवाच मधुसूदनं।१८। बद्धं वीक्ष्य पतिं साध्वी तत्पत्नी
भयविह्वला। प्रांजलिः प्रणतोपेंद्रं बभाषे वाङ्मुखी नृप।१९। विंध्यावलिरुवाच॥ क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र
कुधियोपर ईश कुर्युः। कर्तुः प्रभोस्तव किमस्यत आवहंति त्यक्तह्रियस्त्वदवरोपितकर्तृवादाः।२०॥ ब्रह्मोवाच॥ भूतभावन भूतेश
देवदेव जगन्मय। मुंचैनं हृतसर्वस्वं नायमर्हति निग्रहं।२१। कृत्स्ना तेनेन दत्ता भूर्लोकाः कर्मार्जिताश्च ये। निवेदितं च सर्वस्वमात्मा
विक्लवया धिया।२२। यत्पादयोरशठधीः सलिलं प्रदाय दूर्वांकुरैरपि विधाय सतीं सपर्यां। अप्युत्तमां गतिमसौ भजते त्रिलोकीं दाश्वा
नविक्लवमनाः कथमार्तिमृछेत्।२३॥

पश्चाद्विमुच्य पालयेति।२०। तदेवं प्रह्लादस्य विंध्यावलेश्च परमार्थोक्तिया प्रसन्नो हरिः। ब्रह्मा तु लोकदृष्ट्यैव विज्ञापयति भूतभावनेति त्रिभिः।२१। नि
ग्रहान् अर्हति हेतुः कृत्स्नेति। सर्वस्वमेवाह। आत्मेति।२२। तदेवं केमुत्यन्यायेनाह। यस्तव पादयोः सलिलमात्रमपि प्रदाय स पर्योपि भजतः उत्तमां ग
तिं प्राप्नोति। तस्मै तु त्वं समसौ बलिः त्रिलोकीं दाश्वान् दत्तवान् आर्तिं कथं प्राप्नुयात्।२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ता॰च॰
५१

तस्य विज्ञाः अथ निनवर्षापिहारः कोयमनुग्रहः तत्राह ॥ यन्मदः यैरर्थैर्मर्दितो यस्य सः अत एव स्तब्धः ॥ अनम्रः सन् मदस्तं न हेतून् नामर्थानामप
हार एवानुग्रह इत्यर्थः ॥२४॥ दुर्लभं पुरुषजन्म कथंचित् लब्धवतो जीवस्य जन्मादिनिमित्तो गर्वो महान् नाशकरः तस्य च नाशो मदनुग्रहात् एवेत्याह
यदेति द्वाभ्यां अनीशः परतंत्रः सन् निजैः कर्मभिः नानायोनिषु कृमिकीटादिषु संसरन् ॥२५॥ तत्र पौरुष्यां गतौ जन्मादिभिरपि यस्य यदि स्तंभो
न भवेत् तर्हि मदनुग्रह एव तर्हि किं बलादिमोषणं संपदो ददासीति चेत् तत्राह मानस्तंभः अन एव गतस्य निमित्तभूतानां समंततः सर्वशः सर्व

२८ वृथ

श्रीभगवानुवाच ॥ ब्रह्मन् यमनुगृह्णामि तद्विशो विधुनोम्यहं ॥ यन्मदः पुरुषः स्तब्धो लोकं मां चावमन्यते ॥२४॥ यदा कदाचिज्जीवात्मा संस
रन्निजकर्मभिः ॥ नानायोनिष्वनीशोयं पौरुषीं गतिमाव्रजेत् ॥२५॥ जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः ॥ यद्यस्य न भवेत्स्तंभस्तत्रायं
मदनुग्रहः ॥२६॥ मानस्तंभनिमित्तानां जन्मादीनां समंततः ॥ सर्वश्रेयःप्रतीपानां हंत मुह्येन्न मत्परः ॥२७॥ एष दानवदैत्यानामग्रणीः की
र्तिवर्द्धनः ॥ अजैषीदजयां मायां सीदन्नपि न मुह्यति ॥२८॥ क्षीणरिक्थश्च्युतः स्थानात् क्षिप्तो बद्धश्च शत्रुभिः ॥ ज्ञातिभिश्च परित्यक्तो यात
नामनुयापितः ॥२९॥ गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः ॥ छलैरुक्तो मया धर्मो नायं त्यजति सत्यवान् ॥३०॥ एष मे प्रापितः स्था
नं दुःप्रापममरैरपि ॥ सावर्णेरंतरस्यायं भवितेंद्रो मदाश्रयः ॥३१॥

श्रेयः प्रतिकूलानां जन्मादीनां सत्वेपि जन्मादिभिरिति वा ॥ हंत हे ब्रह्मन् मत्पर
योन मुह्येत् ॥ अतो नक्क स्पेहयासं पदोपि ददामि ॥ अनकक्त मुह्येदिति ॥ तदपहाररूपमेव तस्यानुग्रहं करोमीति भावः ॥२६॥ अस्य चेदानीम
खर्व्वत्वादंमेदुः प्रापम पिदास्यामीति वक्तुं तस्य मोहाभावमाह ॥ एष इति त्रिभिः ॥ नह्येतस्मिन् कुजेकश्चित्रिः सत्वः रूपणः पुमान् इत्यादिना
छलैरेवं मया धर्म उक्तः तथापि तं धर्मं न यं न त्यजति अतः सत्यवाक् ॥३०॥ मे मया अहमेवाश्रयः पालको यस्य सः ॥३१॥ ॥ राम
५१

स्थानं स्थापित इति यदुक्तं तदेव स्थानमाह। तावत्सावर्णिमन्वंतर पर्यंतं सुतलमध्यास्तां अधिवसन्नित्यर्थः। यद्यस्मिन्वसतां। आध्यादयो ममेक्ष
यानसंभवंति। ३३। एवं बलात्राणं प्रत्युक्त्वा करुणपरवशः सान्त्वा बलिमप्याह। इंद्रसेनेत्यष्टभिः। तच्छासनं अतिगच्छंति अतिवर्त्तंते इति तथा ता

तावत्सुतलमध्यास्तां विश्वकर्म्मविनिर्म्मितं। यत्रा धयो व्याधयः श्रक्लम स्तंद्रा पराभवः। ३२। नोपसर्गा निवसतां संभवंति ममेक्ष
या। इंद्रसेन महाराज याहि भो भद्रमस्तुते। ३३। सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः। ३। न त्वामभिभविष्यंति लोकेशाः २
किमुतापरे। त्वच्छासनातिगान् दैत्यान्चक्रं मे सूदयिष्यति। ३४। रक्षिष्ये सर्वतोहं त्वां सानुगं सपरिच्छदं। सदा संनिहितं वीर
तत्र मां द्रक्ष्यते भवान्। तत्र दानव दैत्यानां संगात्ते भाव आसुरः। दृष्ट्वा मदनुभावं वै सद्यः कुंठो विनंक्ष्यति। ३६। ॥ इति श्रीभा
गवते महापुराणे अष्टमस्कंधे बलिवामन संवादो नाम द्वाविंशोऽध्यायः। २२॥ श्रीशुक उवाच॥ ॥इत्युक्तवंतं पुरुषं पुराण
तं महानुभावोऽखिलसाधुसंमतः॥ बद्धांजलिर्बाष्पकलाकुलेक्षणो भक्त्युत्कलो गद्गदया गिराब्रवीत्॥ १॥

त्। ३४। तथापि जनयत्रपिया यत्रार्दनिछंत प्रत्याह सदेति। ३५। संगात् आसुरो भावः स विनंक्ष्यति। ३६। इति अष्टमे द्वाविंशः। २२। त्रयोविंशे बलौ या
ते सुतलं स पितामहे उपेंद्रेण दिवं गत्वा पूर्ववन्मोदते हरिः। बाष्पस्य कला बिंदुभिराकुले ईक्षणे यस्य। भक्त्या उत्कलः उत्कंठः। १।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो त्वत्प्रणामस्य महिमा यदर्थं कृतः समुद्यम एव प्रपन्नानां भक्तानां योर्थः। तस्य विधौ अनपेक्षितस्य संपादने समाहितः अप्रमत्तः स्थितः कृतः।
यत एनो मयेन लोकपालैरमरैः। सत्त्वप्रधानैरपि अलब्धपूर्वस्त्वदनुग्रहः। अपसदे नीचे राजसे मयि अर्पितः। अयं भावः परमेश्वराय तुभ्यमहं
वराकस्त्रिलोकीं दत्त्वा निश्चितदासः प्रणामोपि न सम्यक्कृतः। किंतु तदर्थमुद्यममात्रं कृतं तेन च कर्मतपोदानादिकोटिभिरप्यलभ्यस्त्वदनुग्रह
स्त।

बलिरुवाच॥ अहो प्रणामाय कृतः समुद्यमः प्रपन्नभक्तार्थविधौ समाहितः। यल्लोकपालैस्त्वदनुग्रहोऽमरैरलब्धपूर्वोऽपसदेऽसु
रेऽर्पितः॥२॥ श्रीशुक उवाच॥ इत्युक्त्वा हरिमानम्य ब्रह्माणं सभवं ततः। विवेश सुतलं प्रीतो बलिर्मुक्तः सहासुरैः॥३॥ एवमिन्द्राय
भगवान्प्रत्यानीय त्रिविष्टपं। पूरयित्वादितेः काममशासत्सकलं जगत्॥४॥ लब्धप्रसादं निर्मुक्तं पौत्रं वंशधरं बलिं॥ निशाम्य
भक्तिप्रवणः प्रह्राद इदमब्रवीत्॥५॥ प्रह्राद उवाच॥ नेमं विरिंचो लभते प्रसादं न श्रीर्न शर्वः किमुतापरे ते॥ यन्नोऽसुराणामसि
दुर्गपालो विश्वाभिवंद्यैरपि वंदितांघ्रिः॥६॥ यत्पादपद्ममकरंदनिषेवणेन ब्रह्मादयः शरणदाश्नुवते विभूतीः॥ कस्माद्वयं कु
सृतयः खलयोनयस्ते दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः॥७॥ ॥

संपादितः। अहो त्वत्प्रणामप्रभावाश्चर्यमिति॥२॥ अथासत त्वत्पिंडः समालयामास॥३॥४॥ दुर्गपालोसि रक्षितासि सर्वतो हमित्युक्तं भाति॥५॥
हे शरणद आश्रयप्रद ये कुसृतयः दुर्वृत्ताः खलयोनयः उग्रजातयश्च ते वयं तस्य भवतो दाक्षिण्यदृष्टेः पदवीं कस्माद्धेतोः प्रणीताः बहु
मानेन चित्तानुवर्तनं दाक्षिण्यं तेन या दृष्टिस्तद्विषयतां प्रापिताः॥६॥७॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तप्रियत्वादितिचेन्नहिएवंतवेहितं। अहोचित्रंकिंतत्। सर्वात्मनःसमदृशश्चस्वभावोविषमइत्ययत् सर्वात्मत्वेचित्रचरितत्वेहेतुःअमिताऽ
चिन्त्यायायोगमायातयालीलास्तयाविसृष्टानिविरचितानिभुवनानियेनतस्यअहोइत्यस्यचसंधिरार्षःसमदृक्त्वेहेतुःविशारदस्यसर्वज्ञस्य। अयुक्त
भक्तप्रियत्वेपितववैषम्यंनास्त्येवयतःकल्पतरुस्वभावःसन्भक्तप्रियोसि। नहिकल्पतरुराश्रितानामेवकामान्पूरयन्नपिविषमोभवतीत्यर्थः। मं

चित्रंतवेहितमहोमितयोगमायालीलाविसृष्टभुवनस्यविशारदस्य। सर्वात्मनःसमदृशोविषमःस्वभावोभक्तप्रियोयदसिकल्प
तरुस्वभावः॥८॥ श्रीभगवानुवाच॥ वत्सप्रह्लादभद्रंतेप्रयाहिसुतलालयं। मोदमानःस्वपौत्रेणज्ञातीनांसुखमावह
नित्यंद्रष्टासिमांतत्रगदापाणिमवस्थितं। मद्दर्शनमहाह्लादध्वस्तकर्मनिबंधनः॥१०॥ श्रीशुकउवाच॥ आज्ञांभगवतोराज
न्प्रह्लादोबलिनासह। बाढमित्यमलप्रज्ञोमूर्ध्न्याधायकृतांजलिः॥११॥ परिक्रम्यादिपुरुषंसर्वासुरचमूपतिः। प्रणतस्तदनु
ज्ञातःप्रविवेशमहाबिलं॥ अथाहोशनसंराजन्हरिर्नारायणोंतिके। आसीनमृत्विजांमध्येसदसिब्रह्मवादिनां॥ ब्रह्मन्सं
तनुशिष्यस्यकर्मच्छिद्रंवितन्वतः। यत्तत्कर्मसुवैषम्यंब्रह्मदृष्टंसमंभवेत्॥१४॥

दर्शनेनयोमहाह्लादःतेनध्वस्तंकर्मबंधनमज्ञानंयस्यसः॥१०॥ १३। कर्मवितन्वतःशिष्यस्ययत्छिद्रमंतरेणन्यूनंजातंतत्कर्मतनुविस्तारयसंधत्स्व। य
जमानंविनाकथंसंधातव्यमितिनवाच्यमित्याह यत्तदिति। ब्रह्मदृष्टंब्राह्मणैर्दृष्टमेवसमंभवेत्किंपुनरनुष्ठितमित्यर्थः॥१४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्कं० १५३

चवान्मस्य सर्वेषां। पित्रा वेन वस्तुमात्रेण पूजितः॥ तस्य कर्मसु कुतो वैषम्यं कथंभूतः कर्मणामीश्वरः प्रवर्तकः यज्ञेशः यज्ञफलदः। यज्ञमयश्च पुरुषः।१५
श्रास्तां तावत्पूजायास्मात् मंत्रतः। स्वरादिभ्रंशेन तंत्रतः क्रमादिना देशतः कालतश्च अर्हतः पात्रतः वस्तुतश्च दक्षिणादिना यत्छिद्रं नूनं तस्य
इति शानुकीर्त्तनमात्रमेव निःछिद्रं करोति शति।१६।१७। हरेराज्ञां प्रतिनंद्य बलेर्यज्ञछिद्रं समाधत्त संदधे। प्रागंतरे समाधाय। नदाज्ञां संपादितवा

श्रीशुक उवाच॥ कुतस्तत्कर्मवैषम्यं यस्य कर्मेश्वरो भवान्। यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः।१५। मंत्रतस्तंत्रतः छिद्रं
देशकालार्हवस्तुतः। सर्वं करोति निःछिद्रमनुसंकीर्त्तनं तव।१६। तथापि वदतो भूमन् करिष्याम्यनुशासनं। एतच्छ्रेयः परं पुंसां
यत्तवाज्ञानुपालनं।१७। श्रीशुक उवाच॥ अभिनंद्य हरेराज्ञामुशना भगवानिति। यज्ञछिद्रं समाधत्त बलेर्विप्रर्षिभिः सह।१८।
एवं बलेर्महीं राजन्भिक्षित्वा वामनो हरिः। ददौ भ्रात्रे महेंद्राय त्रिदिवं यत्परैर्हृतं।१९। प्रजापतिपतिर्ब्रह्मा देवर्षिपितृभूमिपैः
दक्षभृग्वंगिरोमुख्यैः कुमारेण भवेन च।२०। कश्यपस्यादितेः प्रीत्यै सर्वभूतभवाय च। लोकानां लोकपालानामकरोद्वामनं पतिं।२१
वेदानां सर्वदेवानां धर्मस्य यशसः श्रियः। मंगलानां व्रतानां च कल्पं स्वर्गापवर्गयोः।२२। उपेंद्रं कल्पयांचक्रे पतिं सर्वविभूतये। तदा स
र्वाणि भूतानि भृशं मुमुदिरे नृप। ततस्त्विंद्रः पुरस्कृत्य देवयानेन वामनं। लोकपालैर्दिवं निन्ये ब्रह्मणा चानुमोदितः।२४। प्राप्य त्रि
भुवनं चेंद्र उपेंद्रभुजपालितः। श्रिया परमया जुष्टो मुमुदे गतसाध्वसः।२५। ब्रह्मा शर्वः कुमारश्च भृग्वाद्या मुनयो नृप। पितरः सर्वभू
तानि सिद्धा वैमानिकाश्च ये।२६।

१८।१९

निविशेषैः देवाश्च कश्यपश्च भूमिपाश्च मनवः तैः सहितः।२०। नतु वो कादीनां पतिरिंद्रोस्त्येव सत्यं तथापि वेदा
दीनां कल्पं पाजवेदक्षं।२२। वामनमुपेंद्रं कल्पयांचक्रे।२३। देवयानेन मार्गेणादिविमानेनेति वा।२४।

राम ५३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२७ एतच्चरित्रं सर्वमास्मात मिति विशेषोक्त्या अन्यान्यपि संतीत्युक्तं । २८ तानि तद्दिनिःशेषाणि वर्णनीयानि इत्यपेक्षायामाह । पारमिति । उरु
क्रमविक्रमतो विष्णोर्महिम्नः पारं योगुणनो भवति स मर्त्यः पार्थिवानि रजांस्यपि विममे गणितवान् यथा पार्थिवपरमाणुगणनमशक्यं त
था विष्णोर्गुणगणनमप्यशक्यमित्यर्थः । तथाच मंत्रः । विष्णोर्नुकंवीर्याणीति एतदेव मंत्रांतरार्थं सूचयन्नाह । यस्य पुरुषस्य भूम्नो महिम्नः पारं
मंत्रदृक् । ऋषिर्वसिष्ठ इति एवमाह । कथं किं जायमानो जातो वा उपैति न कोपीति वदन्ननंततेनैवाहेत्यर्थः । तथाच मंत्रः । न ते विष्णो जाय

सुमहत्कर्म तद्विष्णोर्गायितः परमाद्भुतं । धिष्ण्यानि स्वानि ते जग्मुरदितिं च शशंसिरे । २७ सर्वमेतन्मयाख्यातं भवतः कुलनंदन ।
उरुक्रमस्य चरितं श्रोतॄणामघमोचनं । २८ पारं महिम्न उरुविक्रमतो गृणानो यः पार्थिवानि विममे स रजांसि मर्त्यः । किं
जायमान उत जात उपैति मर्त्य इत्याह मंत्रदृगृषिः पुरुषस्य यस्य । २९ । य इदं देवदेवस्य हरेरद्भुतकर्मणः । अवतारानु
चरितं शृण्वन्याति परां गतिं । ३० क्रियमाणे कर्मणीदं दैवे पित्र्येथ मानुषे । यत्र यत्रानुकीर्त्येत तत्तेषां सुकृतं विदुः । ३१ ।
। इति श्रीभागवते महापुराणे अष्टमस्कंधे वामनावतारचरिते त्रयोविंशतितमोऽध्यायः । । २३ । राजोवाच । भगवन् श्रो
तुमिच्छामि हरेरद्भुतकर्मणः । अवतारकथामाद्यां मायामत्स्यविडंबनं । १ ।

मानो न जातो देव महिम्नः परमंतमाप इति । २९ । य इदं शृण्वन्
भवति स परां गतिं याति सुकृतं यथावत्कृतं विदुः । ३१ । २ । इति अष्टमे त्रयोविंशः । चतुर्विंशे प्रसंगेन मत्स्यरूपस्य शार्ङ्गिणः । लीलोच्यते यतः सत्यव्र
तरक्षा महार्णवे क्रीडितं तत्तु विदग्धदृष्टिर्निजेश्वर्यनिदर्शनात् मत्स्यं घटतिष्टध्वीशोर्लक्षयावामनोपमं । मायया मत्स्यविडंबनं मत्स्यरूपानुकरणं यस्मान्नि
रूप्यते । १ ।

रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु कस्मात् कस्मादेवमस्यावतारश्रवणेच्छा श्रीवामनस्यादरूपादिस्याह । यदर्थमिति द्वाभ्यां दुर्मर्षं दुःसहं । २ । बलेरनुग्रहाय जुगुप्सितमपि याचकरूपं धृतवानिति युक्तमुक्तं यदर्थं तु लोकजुगुप्सितं मात्स्यरूपमधारयत् । एतन्नो यथावद्वक्तुमर्हसीत्यर्थः । ३ । ४ । सामान्येनावतारप्रयोजनमाह । गोविप्रेति । अपि जुगुप्सितत्वं परिहरति । धियो गुणैर्या गुणैरुच्चावचानि रूपाणि तेषु नियंतृत्वेन चरन्नपीश्वरो नोच्चावचत्वं भजते निर्गुणत्वात् । कुतः पुनः ॥ प्रकृत

यदर्थमदधाद्रूपं मात्स्यं लोकजुगुप्सितं । तमःप्रकृतिदुर्मर्षं कर्मग्रस्त इवेश्वरः । एतन्नो भगवन्सर्वं यथावद्वक्तुमर्हसि । उत्तमश्लोकचरितं सर्वलोकसुखावहं । २ । सूत उवाच ॥ इत्युक्तो विष्णुरातेन भगवान्बादरायणिः । उवाच चरितं विष्णोर्मत्स्यरूपेण यत्कृतं । ४ श्रीशुक उवाच ॥ गोविप्रसुरसाधूनां छंदसामपि चेश्वरः । रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि । ५ । उच्चावचेषु भूतेषु चरन्वायुरिवेश्वरः । नोच्चावचत्वं भजते निर्गुणत्वाद्धियो गुणैः । ६ । आसीदतीतकल्पांते ब्राह्मो नैमित्तिको लयः । समुद्रोपप्लुतास्तत्र लोका भूरादयो नृप । ७ । कालेनागतनिद्रस्य धातुः शिशयिषोर्बली । मुखतो निःसृतान्वेदान्हयग्रीवोंतिकेहरत् । ८ । ज्ञात्वा तद्दानवेंद्रस्य हयग्रीवस्य चेष्टितं । दधार सफरीरूपं भगवान्हरिरीश्वरः । ९ । तत्र राजऋषिः कश्चिन्नाम्ना सत्यव्रतो महान् । नारायणपरोतप्यत्तपः स सलिलाशनः । योसावस्मिन्महाकल्पे तनयः स विवस्वतः । श्राद्धदेव इति ख्यातो मनुत्वे हरिणार्पितः ॥ ११ ॥

तमः प्रायैर्मत्स्याद्याकारैः उच्चावचत्वं केचिन्नाव । ६ । विशेषतो मत्स्यावतारप्रयोजनमाह । आसीदिति त्रिभिः । ब्रह्मणो दिवावसाने वा ब्राह्मस्तत्र वै निमित्तेन जातो नैमित्तिकः समुद्रेण उपप्लुता निमग्नाः । ७ । अन्तिके निःसृतान् शफरीरूपं मात्स्यं । ९ । प्रयोजनांतरं च लीलाप्रकारं चाह । तत्रेति ऋषिरित्यादि यावत्समाप्तिः । ९ । १० । स एव श्राद्धदेव इति विख्यातः । ११ । ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतमालायां नद्यां ॥१२॥ ७ ॥ यत्राहं सुखं निवसामि तदोकः स्थानं कल्पय ॥ औदंचनोदके मणिकस्येजले ॥१९॥ रक्षायायोगेनोपायेन यथा महाहृद आसे

एकदा कृतमालायां कुर्वतो जलतर्प्पणं । तस्यांजल्युदके काचिच्छफर्येकाप्यपद्यत ॥१२॥ सत्यव्रतोंजलिगतां सहतोयेनन्यारत । उवास स
जनदीतोये शफरीं द्रविडेश्वरः ॥१३॥ तमाह सातिकरुणं महाकारुणिकं नृपं । यादोभ्यो ज्ञातिघातिभ्यो दीनां मां दीनवत्सल ॥१४॥ कथं
विसृजसे राजन् नितामस्मिन् सरिज्जले । तमात्मनोनुग्रहार्थं प्रीत्या मत्स्यवपुर्धरी ॥१५॥ अजानन् रक्षणार्थाय शफर्याः स मनो दधे । तस्या
दीनतरं वाक्यमाश्रुत्य स महीपतिः ॥१६॥ कलशाप्सु निधायैनां दयालुर्निन्य आश्रमं । सानुतत्रैकरात्रेण वर्द्धमाना कमंडलौ ॥१७॥ अ
लब्ध्वात्मावकाशं वा इदमाह महीपतिं । नाहं कमंडलावस्मिन् कृच्छ्रं वस्तुमिहोत्सहे ॥१८॥ कल्पयौकः सुविपुलं यत्राहं निवसे सुखं
स एनां तत आदाय न्यधादौदंचनोदके ॥१९॥ तत्र क्षिप्ता मुहूर्तेन हस्तत्रयमवर्द्धत । न म एतदलं राजन् सुखं वस्तुमुदंचनं ॥२०॥ पृथु
देहि पदं मह्यं यत्त्वाहं शरणं गता । तत आदाय सा राज्ञा क्षिप्ता राजन् सरोवरे ॥२१॥ तदावृत्यात्मना सोयं महामीनोन्ववर्द्धत । नैतन्मे स्वस्त
ये राजन् उदकं सलिलौकसः ॥२२॥ निधेहि रक्षायोगेन ह्रदे मामविदासिनि । इत्युक्तः सोनयन्मत्स्यं तत्र तत्राविदासिनि ॥२३॥ जलाशया
संमितं तं समुद्रे प्राक्षिपज्झषं । क्षिप्यमाणस्तमाहेदमिह मां मकरादयः ॥२४॥ अदंत्यतिबला वीर मां नेहोत्स्रष्टुमर्हसि । एवं विमोहितस्
तेन वदता वल्गु भारतीं ॥२५॥ तमाह को भवानस्मान् मत्स्यरूपेण मोहयन् । नैवं वीर्यो जलचरो दृष्टोस्माभिः श्रुतोपि वा ॥२६॥ यो भवान्
योजनशतमह्नाभिव्यानशे सरः । नूनं त्वं भगवान् साक्षाद्धरिर्नारायणोव्ययः । अनुग्रहाय भूतानां धत्से रूपं जलौकसां ॥२७॥

रवकिन्नलं विनानश्रुष्ष्येयं तेनोपायेन निधेहि ॥ अविदासिनि चानुपदहये ॥२२॥ सम्मितं त्वत्कृते शायपरिमितं२५ अभिव्याप्तवत्योऽभिव्याप्तवान् ॥२७॥

श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मात्स्य
५५ मुख्यः सत्यः आत्मा च गतिश्च आश्रयः २८ हे अरविंदाक्ष पृथगात्मनां देहाद्यभिमानिनां सतामितरेषां पदोपसर्प्पणं यथा मृषा भवेत् तथा सर्वसुहृ
त्प्रियात्मनस्तव पदोपसर्प्पणं मृषा न भवेत् यद्यस्मात् नो भक्तानामद्भुतं वपुरदीदृशः दर्शितवानसि पाठांतरे पृथगात्मनो भेददर्शिनः पुंसः असतां

नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्त्यप्ययेश्वर। भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मगतिर्विभो। २८। सर्वे लीलावतारास्ते भूतानां भूतिहेत
वः ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतं २९ न तेरविंदाक्ष पदोपसर्प्पणं मृषा भवेत्सर्वसुहृत्प्रियात्मनः। यथेतरेषां पृथगा
त्मनां सतामदीदृशो यद्वपुरद्भुतं हि नः ३०। श्रीशुक उवाच। इति ब्रुवाणं नृपतिं जगत्पतिः सत्यव्रतं मत्स्यवपुर्युगक्षये। वि
वे हर्तुकामः प्रलयार्णवे ब्रवीच्चिकीर्षुरेकांतजनप्रियः प्रियं ३१। श्रीभगवानुवाच। सप्तमेद्यतनादूर्ध्वमहन्येतदरिंदम। नि
प्प मंक्ष्यत्यप्ययांभोधौ त्रैलोक्यं भूर्भुवादिकं। ३२ त्रिलोक्यां लीयमानायां संवर्त्तांभसि वै तदा। उपस्थास्यति नौः काचिद्विशाला त्वां म
येरिता। ३३।

परिच्छिन्नानां पदोपसर्पणं यथा मृषैवेत्यर्थः ३० एकांतजनाः भक्ताः प्रिया यस्य ३१ अप्ययांभोधौ प्रलयार्णवे भूर्भुव आदिकमित्यर्थः ३२ संव राम
र्त्तांभसि प्रलयोदके त्वामुपस्थास्यति प्राप्स्यति ३३ ।। ५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्धधीः स्वादायेति शेषः ॥ ३५ ॥ ऋषीणामेवालोकेन विचरिष्यसि । ३६ । मह्महिना वासुकिना । मे ममानुगृहीतं प्रसादीकृतं हृदिस्थं परोक्षं वेत्स्य

त्वं तावदोषधीः सर्वा बीजान्युच्चावचानि च । सप्तर्षिभिः परिवृतः सर्वसत्वोपबृंहितः ॥ ३४ ॥ आरुह्य महतीं नावं विचरिष्यस्यविक्ल
वः । एकार्णवे निरालोके ऋषीणामेव वर्चसा । ३५ । दोधूयमानां तां नावं समीरेण बलीयसा ॥ उपस्थितस्य मे शृंगे निबध्नीहि महा
हिना ॥ ३६ ॥ अहं त्वामृषिभिः साकं सहनावमुदन्वति । विकर्षन्विचरिष्यामि यावद्ब्राह्मी निशा प्रभो ॥ ३७ मदीयं महिमानं च
परं ब्रह्मेति शब्दितं । वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि । ३८ । इत्थमादिश्य राजानं हरिरंतरधीयत ॥ सोऽन्ववैक्षत तं कालं
यं हृषीकेश आदिशत् । ३९ ॥ आस्तीर्य दर्भान्प्राक्कूलान्राजर्षिः प्रागुदङ्मुखः ॥ निषसाद हरेः पादौ चिंतयन्मत्स्यरूपि
णः ॥ ४० ततः समुद्र उद्वेलः सर्वतः प्लावयन्महीं । वर्धमानो महामेघैर्वर्षद्भिः समदृश्यत । ४१ ध्यायंस्तं भगवदादेशं ददृशे
नावमागतां । तामारुरोह विप्रेंद्रैरादायौषधिवीरुधः । ४२ तमूचुर्मुनयः प्रीता राजन्ध्यायस्व केशवं ॥ स वै नः संकटादस्मा
दविता शं विधास्यति । सोऽनुध्यातस्ततो राज्ञा प्रादुरासीन्महार्णवे । ४३ एकशृंगधरो मत्स्यो हैमो नियुतयोजनः । निबध्य नावं त
च्छृंगे यथोक्तो हरिणा पुरा । वरत्रेणाहिना तुष्टस्तुष्टाव मधुसूदनं । ४४ ॥ ॥

सिव्यारूतेः संप्रश्नैः मयाविवृतं प्रकाशितं संतं ॥ ३९ । ४० वरत्रेण दोरकरूपेण ॥ ४४ ॥ श्रीकृष्णायनमः ॥ ॥

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मात्स्य॰ सागरंतारयिष्यंतंतरिष्यन्निवसागरं। सत्यव्रतोगुरुत्वेनतुष्टावहरिमष्टभिः ॥ १ ॥ अत्रेदंचिंत्यं किमयंमहाप्रलयोदैनंदिनोवेति तत्रतावत् ब्राह्मोल
५६ यइतियोभावस्मिन् महाकल्पइतिचोक्तेर्महाप्रलयइतिप्राप्तंनेतिब्रूमः। महाप्रलयेपृथिव्यादीनामवशेषासंभवात्। यावत् ब्राह्मीनिशेत्याद्यु
क्तिविरोधाच्च। अतोदैनंदिनइतियुक्तं। नचैतदपिसंगच्छते सांवर्तकैरनावृष्ट्यादिभिर्विनाशः कस्मादेवसप्तमेहनि त्रैलोक्यंनिमंक्ष्यतीतिमत्स्यो
क्तेरनुपपत्तेः। यच्चोक्तं। प्रथमस्कंधेरूपंसजगृहेमात्स्यंचाक्षुषांतरसंप्लवे। नाव्यारोप्यमहीमय्यामपाद्वैवस्वतंमनुमिति तदपितस्य
दुर्घटंनहिप्रलयद्वयेपिमहीमय्यांनाव्यारोहः संभवति॥ नचाक्षुषमन्वंतरेप्रलयोस्तितथाचसतिसप्तमोमनुर्वैवस्वतइत्यपिदुर्घ

राजोवाच॥ अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः॥
यदृच्छयेहोपसृतायमाप्नुयुर्विमुक्तिदोनःपरमोगुरुर्भवान्॥ ४५॥ ॥

टंस्मात्। त्वंतावदोषधीः। सप्तइत्यादिनिर्देशोपिनसंगच्छते नहितदातृणौषध्यादीनांचावशेषःसंभवति। तस्मादन्यथाव्याख्येयंति नैवा
यंवास्तवःकोपिप्रलयः। किंतुसत्यव्रतस्यज्ञानोपदेशायाविर्भूतोभगवान्वैराग्यार्थमकस्मात्प्रलयमिवदर्शयामास। यथास्मिन्नेववैवस्वतमन्वं
तरेमार्कंडेयायदर्शितवान्। मायापेक्षयातथादर्शनमुक्तमित्येवमादिकं। प्रस्तुतंस्तोत्रंव्याख्यास्यामः। तत्रनानायोनिषुसंसरतःस्वस्यभगव
त्कृपयैवतत्प्राप्तिंदृष्ट्वामुक्तयेतमेवप्रार्थयते अनादीति। अविद्यातयाउपहताआवृताआत्मनःसंविद्येषांतेअतएवाविद्यामूलैःसंसा
रपरिश्रमैरातुराः। इहसंसारेयदृच्छयायदनुग्रहादेवउपसृताः आश्रिताःसंतोयंप्राप्नुयुः। प्राप्नुवंतिसभवानेवसाक्षान्नोगुरुःसन् राम
ग्रंथिंभिंद्यादित्युत्तरेणान्वयः॥ ४५॥ ॥ ५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुपं२ सभिंद्यादित्यन्वयः २

नतुवैराग्यंविनाकुतोमुक्तिः। नहितिस्यतत्त्वस्यैवैकफलत्वात्सेवामादिदोत्साद्यायेनाह। अबुधोयंजनःअसुखंयथानवतितथाकर्म्मसमीहतेनांस्तु
खेद्धांनोहृदयेग्रंथिंयतःसएवनःपरोगुरुः। ४७ नतुयज्ञदानादिभिःसत्वशुद्धिंविनाकथंग्रंथिर्भेदःस्यात्तत्राह। यस्यसेवयैवपुमानात्मनोम
नसोमलंतमोविजह्यात्। एषहीनसत्वः। निजवर्णंचस्वरूपंभजेत्। सईश्वरोनोगुरुःस्यात्यतःसएवगुरोर्गुरुः। सत्वहीनेदृष्टांतः। रुद्ररो
दनंतुद्रस्यरोदनंरजस्तंयदरोदीत्। तद्रुद्रस्यरुद्रत्वंयदश्रुअशीर्यत तद्रजतंहिरण्यमभवदितिश्रुतेः। तद्यथाग्नेःसंपर्कात्मलंजहाति स्वंवर्णंनिज

अनेनाबुधोयंनिजकर्म्मबंधनःसुखेच्छयाकर्म्मसमीहतेऽसुखं। यत्सेवयातांविधुनोत्यसन्मतिंग्रंथिंसभिंद्याद्धृदयंसनोगुरुः। ४६
यत्सेवयाग्नेरिवरुद्ररोदनंपुमान्विजह्यान्मलमात्मनस्तमः। भजेतवर्णंनिजमेषसोव्ययोभूयात्सईशःपरमोगुरोर्गुरुः। ४८ ॥
नयत्प्रसादायुतभागलेशमन्येचदेवागुरवोजनाःस्वयं। कर्तुंसमेताःप्रभवंतिपुंसस्तमीश्वरंत्वांशरणंप्रपद्ये। ४९ अचक्षु
रंधस्ययथाग्रणीःकृतस्तथाजनस्याविदुषोबुधोगुरुः। त्वमर्कदृक्सर्वदृशांसमीक्षणोवृतोगुरुर्नःस्वगतिंबुभुत्सतां। ५० ॥

तेनकुह्मलनादिभिः। नथानयज्ञादिभिर्मलिनागः। किंतुत्वत्सेवयैवतेषांतुसेवांगत्वमेवेतिभावः। ४७ ॥ परमेश्वरस्त्वंपरमगुरुस्त्वंचप्रपंचयन्नाह॥
यत्प्रसादस्याहुतभागः। तस्यलेशमात्रमपिअन्येदेवादयःसर्वेसमेताअपिस्वयंतन्निरपेक्षाःसंतःकर्तुंनप्रभवंति। ४९ तदेवदृष्टांतेनस्पष्टयन्नाह
अचक्षुरिति। अविदुषोजनस्यअबुधोविद्वान्गुरुस्तथैवअर्कप्रकाशवत्स्वतएवदृक्ज्ञानंयस्यसः। अर्कदृक्। अतःसर्वदृशांसर्वेंद्रियाणां
समीक्षणःप्रकाशकःअतएवस्वगतिंबोद्धुमिच्छद्भिःनोस्माभिर्गुरुर्वृतोसि। ५० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्क० ५७ किंच। प्राकृतो गुरुरनर्थहेतुरित्याह जन इति। आदिशते उपदिशति असतीं मतिं अर्थकामादिमतिं तमः संसारं ५२ ननु तर्हि सर्वोपि लोको मामेव किं न
नोपसरति। अज्ञानादित्याह त्वमिति ५३ अहं तु त्वामेव शरणं यामीत्याह तं त्वामिति प्रतिबोधनाय उपदेशाय अर्थदीपैः परमार्थप्रकाशकैः हृद

जनो जनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः। त्वं त्वव्ययं ज्ञानममोघमंजसा प्रपद्यते येन जनो निजं पदं ५० त्वं सर्व
लोकस्य सुहृत्प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिः। तथापि लोको न भवंतमंधधीर्जानाति संतं हृदि बद्धकामः ५१ तं त्वाम
हं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधनाय। छिंध्यर्थदीपैर्भगवन्वचोभिर्ग्रंथीन्हृदय्यान्विवृणु स्वमोकः ५२ श्रीशुक उवाच
इत्युक्तवंतं नृपतिं भगवानादिपूरुषः। मत्स्यरूपी महांभोधौ विहरंस्तत्वमब्रवीत्। पुराणसंहितां दिव्यां सांख्ययोगक्रिया
वतीं। सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ५४ अश्रौषीदृषिभिः साकमात्मतत्वमसंशयं। नाव्यासीनो भगवता प्रोक्तं ब्र
ह्म सनातनं ५५ ॥ ॥

हृदय्यान् (ग्रंथीन्२) अहंकारादीन् स्वमोकः स्वं रूपं विवृणु प्रकाशय ५४ नृपतिं प्रति पुराणसंहितां मत्स्यपुराणं अशेषतः अब्रवीदित्यनुषंगः ५५ ॥ ॥ राम ५७

भाग.अ.टी.
५८ अतीतः पूर्वो यः प्रलयः तस्यापाये अवसाने ॥६१॥ योयं हरेरवतारस्तं यः प्रकीर्तयेत् ॥६२॥ सत्यव्रतानां अस्य व्रतस्य ऋषीणां च त्रिणेगच्छंती

अतीतप्रलयापाय उत्थिताय सवेधसे ॥ हत्वासुरं हयग्रीवं वेदान्प्रत्याहरद्धरिः ॥५६॥ सतुसत्यव्रतोराजाज्ञानविज्ञानसंयु
तः विष्णोःप्रसादात्कल्पेस्मिन्नासीद्वैवस्वतो मनुः ॥५७॥ सत्यव्रतस्यराजर्षेर्मायामत्स्यस्यशार्ङ्गिणः संवादंमहदाख्यानंश्रुत्वामुच्
येतकिल्बिषात् ॥५८॥ अवतारोहरेर्योयंकीर्तयेदन्वहंनरः ॥ संकल्पास्तस्य सिध्यंति सयातिपरमांगतिं ॥५९॥ प्रलयपय
सिधातुःसुप्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्तहत्वा ॥ दिति जमकथयद्योब्रह्मसत्यव्रतानांतमहमखिलहेतुंजि ५३
ह्ममीनंनतोस्मि ॥६०॥ इतिश्रीभागवतेमहापुराणेअष्टादशसाहस्र्यांसंहितायांशुकपरिक्षित्संवादेअष्टमस्कंधेमत्स्या
वतारचरितानुवर्णनंनामचतुर्विंशोध्यायः ॥२४॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥

तिवचिंगसमवायाद्रकुवचनांजिह्ममीनंमायामत्स्यं ॥६०॥ इतिश्रीश्रीधरस्वामिविरचितायांटीकायांअष्टमस्कंधेचतुर्विंशोध्यायः ॥२४॥ राम
५८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीश्रीमत्भागवतनवमस्कंध॥ ९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीकृष्णायनमः॥ ॥गुणात्मयेगुणातीतायस्वेच्छयाणुतेकरुणानिधि। तमहंशरणंयामिपरमानंदमाधवं॥१ त्रियुणाष्टत्रिरध्यायैर्वैवस्वतसुता
न्वयः॥नवमेकृत्स्नसत्कीर्त्तिप्रसंगायवितन्यते।२ एवमुक्तोष्टमस्कंधेमद्धर्म्मःसत्वशोधकः। कर्तृपालकवक्त्रादिमन्वादीनांनिरूपणैः।३
सद्धर्म्मशुद्धसत्वानामंतरंगेशसत्कथा। सूर्य्यसोमा न्वयाख्यानैरधुनासंगतोच्यते।४ तत्रच। त्रयोदशभिरध्यायैःसूर्य्यवंशोनुवर्ण्यं

त१

राजोवाच॥ मन्वंतराणिसर्व्वाणित्वयोक्तानिश्रुतानिमे। वीर्य्याण्यनंतवीर्य्यस्यहरेस्तत्रकृतानिच॥१॥योसौसत्यव्रतोनाम
राजर्षिर्द्रविडेश्वरः॥ज्ञानंयोतीतकल्पांतेलेभेपुरुषसेवया।२ सवैविवस्वतःपुत्रोमनुरासीदितिश्रुतं। तत्तस्तस्यसुताश्चो
क्ताइक्ष्वाकुप्रमुखानृपाः॥३ तेषांवंशंपृथक्ब्रह्मन्वंशानुचरितानिच। कीर्त्तयस्वमहाभागनित्यंशुश्रूषतांहिनः॥
धायेभूतायेनविष्याश्चभवंत्सद्यतनाश्चयेतेषांनःपुण्यकीर्त्तिनांसर्व्वेषांवदविक्रमान्॥५॥ सूतउवाच॥ ॥एवंपरीक्षि
ताराज्ञासदसिब्रह्मवादिनां। पृष्टःप्रोवाचभगवान्शुकःपरमधर्म्मवित्॥६॥ श्रीशुकउवाच॥ ॥श्रूयतांमानवोवंशःप्रा
चुर्य्येणपरंतप। नशक्यतेविस्तरतोवक्तुंवर्षशतैरपि॥७॥

ते। एकादशभिरध्यायैःसोमवंशस्ततःपरैः।५ तत्रतुप्रथमाध्यायेवैवस्वतसुतान्वये। सोमवंशप्रवेशोत्रप्येसुद्युम्नस्त्रीत्वमुच्यते।६ 
कानुउवाचपूर्वकंवैवस्वतमनोर्वंशंपृच्छतिमन्वंतराणीतिपंचभिः॥७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनसरस्य

अनुक्रं वंशं वक्तुं पूर्वं किमेव तावद्वंशप्रवर्तकं श्रीरुद्रनारायणमारस्मानुस्मारयति । परावरेषामिति पंचभिः ॥ ८ ॥१ नानारूपं चेति पाठेपि तत्र एव
नानारूपः ॥१॥ सूर्यपौत्रस्य सुद्युम्नस्य स्त्रीत्वे सति बुधात्पुरुरवः प्रवृत्तिः सोमवंशस्यं संचारं वक्तुं सप्रस्तावमिलोपाख्यानमाह । अप्रजस्य मनोः पूर्वमित्यादि

रे॰ त परावरेषां भूतानामात्मा यः पुरुषः परः । स एवासीदिदं विश्वं कल्पांतेन्यन्न किंचन ८ तस्य नाभेः समभवत्पद्मकोशो हिरण्मयः । त
स्मिञ्जज्ञे महाराज स्वयंभूश्चतुराननः ।९ मरीचिर्मनसस्तस्य जज्ञे तस्यापि कश्यपः । दाक्षायण्यां ततो दित्यां विवस्वानभवत्सुतः ।१०
ततो मनुः श्राद्धदेवः संज्ञायामास भारत । श्रद्धायां जनयामास दश पुत्रान्स आत्मवान् ।११ इक्ष्वाकुनृगशर्यातिदिष्टधृष्टकरू
ति षकान् । नरिष्यंतं पृषध्रं च नभगं च कविं विभुः ।१२ अप्रजस्य मनोः पूर्वं वसिष्ठो भगवान्किल । मित्रावरुणयोरिष्टिं प्रजार्थमकरो
द्विभुः ।१३ तत्र श्रद्धा मनोः पत्नी होतारं समयाचत । दुहित्रर्थमुपागम्य प्रणिपत्य पयोव्रता ।१४ प्रेषितोध्वर्युणा होता यत्तया
सुसमाहितः । हविषि व्यचरत्तेन वषट्कारं गृणन्द्विजः ।१५ होतुस्तद्व्यभिचारेण कन्येला नाम साभवत् । तां विलोक्य मनुः
प्राह नातितुष्टमना गुरुं ।१६ भगवन्किमिदं जातं कर्म वो ब्रह्मवादिनां । विपर्ययमहो कष्टं मैवं स्याद्ब्रह्मविक्रिया ।१७ यू
यं मंत्रविदो युक्तास्तपसा दग्धकिल्बिषाः । कुतः संकल्पवैषम्यमनृतं विबुधेष्विव ॥१८॥ ॥

नाध्यावदध्यायसमाप्तिः ।२। पूर्वमिक्ष्वाकुप्रभृतीनामुत्पत्तेः प्राक् दुहितर्यमिमकमा यमाचवेत् तथा यजेति होतारं सम्यग्याचत । पय
य एव व्रतमाहारो नियतो यस्याः ।१४। अध्वर्युणा होतर्यजेति प्रेषितो होता तेन गृहीते हविषि स तियत्नतया प्रार्थितं ध्यायन् व्यचरत् त्व
यजत् पावं तरेयत । आध्यायत । वाचा वषट्कारं गृणन् वौषडित्युच्चारयन् ।१५। ।१६। ब्रह्मविक्रिया मंत्रान्यथात्वं ॥१७॥१८॥ ॥

.CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्र॰पितामहो वसिष्ठः ॥१८॥ २० विगतं तिमिरं श्रान्तासः प्रकाशाश्चान्त्यभयास्तु तयान्वता दिशः कुर्वंतः ॥१९॥ ३० प्रसंगं रसनिनिवेशं स्त्री

तन्निशाम्य वचस्तस्य भगवान्प्रपितामहः । होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनंदनं ॥१९॥ एतत्संकल्पवैषम्यं होतुस्ते व्यभिचारतः । त
थापि साधयिष्ये ते सुप्रजास्त्वं स्वतेजसा ॥२०॥ एवं व्यवसितो राजन्भगवान्स महायशाः । अस्तौषीदादिपुरुषमिलायाः पुंस्त्वका
म्यया ॥२१॥ तस्मै कामवरं तुष्टो भगवान्हरिरीश्वरः । ददाविलाभवत्तेन सुद्युम्नः पुरुषर्षभः ॥२२॥ स एकदा महाराज विचरन्मृग
यां वने । वृतः कतिपयामात्यैरश्वमारुह्य सैंधवं ॥२३॥ प्रगृह्य रुचिरं चापं शरांश्च परमाद्भुतान् । दंशितोनुमृगं वीरो जगाम दिशि
मुत्तरां ॥२४॥ सकुमारो वनं मेरोरधस्तात्प्रविवेश ह । यत्रास्ते भगवाञ्छर्वो रममाणस्सहोमया ॥२५॥ तस्मिन्प्रविष्ट एवासौ सुद्यु
म्नः परवीरहा । अपश्यत्स्त्रियमात्मानमश्वं च वडवां नृप ॥२६॥ तथा तदनुगाः सर्वे आत्मलिंगविपर्ययं । दृष्ट्वा विमनसोभूवन्वीक्ष
माणाः परस्परं ॥२७॥ राजोवाच ॥ कथमेवं गुणो देशः केन वा भगवन्कृतः । प्रश्नमेनं समाचक्ष्व परं कौतूहलं हि नः ॥२८॥ श्रीशु
क उवाच । एकदा गिरिशं द्रष्टुमृषयस्तत्र सुव्रताः । दिशो वितिमिराभासाः कुर्वंतः समुपागमन् ॥२९॥ तान्विलोक्यांबिकादे
वी विवासा व्रीडिता भृशं । भर्तुरंकात्समुत्थाय नीवीमाश्वथ पर्यधात्
॥३०॥ ऋषयोपि तयोर्वीक्ष्य प्रसंगं रम
माणयोः ॥ निवृत्ताः प्रययुस्तस्मान्नरनारायणाश्रमं ॥३१॥ तदिदं भगवानाह प्रियायाः प्रियकाम्यया । स्थानं यः प्रविशेदेतत्स
वै योषिद्भवेदिति ॥३२॥ तत ऊर्ध्वं वनं तद्वै पुरुषा वर्जयंति हि ॥३३॥

प्रसंगदर्शनकलुषितमनसः संतः तत्संगशून्यं नरनारायणाश्रमं ययुः
॥३२



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रासंगिकमुक्त्वा प्रस्तुतमनुवर्णयति। साचेति स्वानुचरीसंयुक्तेति च वक्ष्ये भूतपूर्वगत्या पुंस्त्वनिर्देशः॥३१॥३२॥ श्रा वायन् इछन्॥ अथ नाम्न
सा चानुचरसंयुक्ता विचचार वनाद्वनं। अथ तामाश्रमाभ्यासे चरंतीं प्रमदोत्तमां॥३३॥ स्त्रीभिः परिवृतां वीक्ष्य चकमे भगवान् बुधः।
सापि तं चकमे सुभ्रूः सोमराजसुतं पतिं। स तस्यां जनयामास पुरूरवसमात्मजं। एवं स्त्रीत्वमनुप्राप्तः सुद्युम्नो मानवो नृपः ३५
सस्मार स्वकुलाचार्यं वसिष्ठमिति शुश्रुम। स तस्य तां दशां दृष्ट्वा कृपया तीव्रया पीडितः। सुद्युम्नस्याशयन् पुंस्त्वमुपाधावत
शंकरं। तुष्टस्तस्मै स भगवान् ऋषये प्रियमावहन्॥३७॥ स्वां च वाचमृतां कुर्वन्निदमाह विशांपते। मासं पुमान् स भविता मासं स्त्री
तव गोत्रजः॥३८॥ इत्थं व्यवस्थया कामं सुद्युम्नोवति मेदिनीं। आचार्यानुग्रहात्कामं लब्ध्वा पुंस्त्वं व्यवस्थया॥३९॥ पालयामास ज-
गतीं नाभ्यनंदन् स्म तं प्रजाः॥ तस्योत्कलो गयो राजन् विमलश्च सुतास्त्रयः॥४०॥ दक्षिणापथराजानो बभूवुर्धर्मवत्सलाः॥ ततः परि-
णते काले प्रतिष्ठानपतिः प्रभुः॥४१॥ पुरूरवस उत्सृज्य गां पुत्राय गतो वनं॥४२॥ ॥इति श्रीभागवते महापुराणे नवमस्कंधे इलो-
पाख्याने प्रथमोऽध्यायः॥१॥ ॥श्रीशुक उवाच॥ एवं गतेथ सुद्युम्ने मनुर्वैवस्वतः सुते। पुत्रकामस्तपस्तेपे यमुनायां शतं समाः
॥१॥ ततोयजन्मनुर्देवमपत्यार्थं हरिं प्रभुं। इक्ष्वाकुपूर्वजान् पुत्रान् लेभे स्वसदृशान् दश॥२॥ ॥

नंदन् स्त्रीत्वलक्षयामासं मासं निलीयावस्थानात्॥४१॥४२॥ ॥इति नवमे टीकायां प्रथमोऽध्यायः॥१॥ द्वितीये मनुपुत्राणां पंचपुत्रोविनिर्गतः क-
रूषकादिपंचानां वंशानामहलघुक्रमात्। वैवस्वतो मनुः श्राद्धदेवः इक्ष्वाकुः पूर्वजो येषां तान्॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र पृषध्रस्य वंशो नास्तीति सहेतुकमाह। पृषध्रस्त्वित्यादिना कविः कनीयानित्यतः प्राक्तनेन ग्रंथेन खड्गपाणेः। स तत्रिवृतो जागरणं।
वीरासनं तदेव व्रतं यस्य ... त्तः स्ववहितः सन् गाः पालयामास॥३॥ शार्दूलो व्याघ्रः॥४॥५॥ प्रलीनाः उडुगणा यस्मिन् तस्मिन् समये बभ्रोः कपिलाया गोः

पृषध्रस्तु मनोः पुत्रो गोपालो गुरुणा कृतः। पालयामास गां यत्तो रात्र्यां वीरासनव्रतः॥३॥ एकदा विशद्गोष्ठं शार्दूलो निशि वर्षति॥ प्रा
शयाना गाव उत्थाय भीतास्ता बभ्रमुर्व्रजे॥४॥ एकां जग्राह बलवान् सा चुक्रोश भयातुरा। तस्यास्तत्क्रंदितं श्रुत्वा पृषध्रोऽभिससार ह
॥५॥ खड्गमादाय तरसा प्रलीनोडुगणे निशि। अजानन्नहनद्बभ्रोः शिरः शार्दूलशंकया॥६॥ व्याघ्रोऽपि वृक्णश्रवणो निस्त्रिंशाग्राहत शो॰
स्ततः। निश्चक्राम भृशं भीतो रक्तं पथि समुत्सृजन्॥७॥ मन्यमानो हतं व्याघ्रं पृषध्रः परवीरहा। अद्राक्षीत्स्वहतां बभ्रुं व्युष्टायां निशि दुः
खितः॥८॥ तं शशाप कुलाचार्यः कृतागसमकामतः। न क्षत्रबंधुः शूद्रस्त्वं कर्मणा भवितामुना॥९॥ एवं शप्तस्तु गुरुणा प्रत्यगृह्णात् कृ
तांजलिः। अधारयद्व्रतं वीर ऊर्ध्वरेता मुनिप्रियं॥१०॥ वासुदेवे भगवति सर्वात्मनि परेऽमले। एकांतित्वं गतो भक्त्या सर्वभूत सु
हृत्समः॥११॥ मुक्तसंगः प्रशांतात्मा संयतात्मा परिग्रहः। यदृच्छयोपपन्नेन कल्पयन् वृत्तिमात्मनः॥१२॥ आत्मन्यात्मानमाधाय ज्ञा
नतृप्तः समाहितः। विचचार महीमेतां जडांधबधिराकृतिः॥१३॥ एवंवृत्तो वनं गत्वा दृष्ट्वा दावाग्निमुत्थितं। तेनोपयुक्तकरणो ब्रह्म
प्राप परं मुनिः॥१४॥ कविः कनीयान् विषयेषु निस्पृहो विसृज्य राज्यं सह बंधुभिर्वनं। निवेश्य चित्ते पुरुषं स्वरोचिषं विवेश कैशोर
वयः परं गतः॥१५॥

॥ हि गां कामतो न जघान निस्त्रापयितुं वृक्णश्रवण इत्याद्युक्तं व्युष्टायां प्रभातायां॥७॥८॥ क्षत्रबंधुरपि त्वं न भविता अपि तु
शूद्रो भवितासि॥९॥१०॥१३॥ उपयुक्तकरणः दग्धदेहः॥१४॥ कवेरपि वंशो नास्तीत्याह कविरिति बंधुभिः सह राज्यं विसृज्य॥१५॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६ ब्रह्मभूयं ब्राह्मणत्वं नृगस्य वंशः पुत्रः सुमतिः ततो भूतज्योतिः ततो वसुः। १७ ओघवतः पिता तत्सुतो ओघवानेवेत्यर्थः। १८ तदेवं त्रिभिः श्लोकैः क
रूषधृष्टनृगाणां वंशा उक्ताः नरिष्यंतस्य वंशमाह। चित्रसेन इति सार्द्धैस्त्रिभिः। तत इत्यादेर्यत्राधिकं स्यात् तत्रानंतर्येत इत्यादि पदं व्याख्येयं॥

करूषान्मानवादासन् कारूषाः क्षत्रजातयः। उत्तरापथगोप्तारो ब्रह्मण्या धर्मवत्सलाः। १६। धृष्टात् धार्ष्टमभूत् क्षत्रं ब्रह्मभूयं गतं क्षि
तौ। नृगस्य वंशः सुमतिर्भूतज्योतिस्ततो वसुः। १७ वसोः प्रतीकः तत्पुत्र ओघवानोघवत्पिता। कन्या चौघवती नाम सुदर्शन उवाह तां
१८ चित्रसेनो नरिष्यंताद्दक्षस्तस्य सुतोऽभवत्। तस्य मीढ्वांस्ततः कूर्च इंद्रसेनस्तु तत्सुतः। १९ वीतिहोत्रस्त्विंद्रसेनात्तस्य सत्यश्रवा अभू तः
त्। उरुश्रवाः सुतस्तस्य देवदत्तः ततोऽभवत्। २० ततोऽग्निवेश्यो भगवानग्निः स्वयमभूत्सुतः। कानीन इति विख्यातो जातूकर्ण्यो महानृ
षिः। २१ ततो ब्रह्मकुलं जातमाग्निवेश्यायनं नृप। नरिष्यंतान्वयः प्रोक्तो दिष्टवंशमतः शृणु। २२ नाभागो दिष्टपुत्रोऽन्यः कर्मणा वैश्य
तां गतः। भलंदनः सुतस्तस्य वत्सप्रीतिर्भलंदनात्। २३ वत्सप्रीतेः सुतः प्रांशुस्तत्सुतं प्रमतिं विदुः। खनित्रः प्रमतेस्तस्माच्चाक्षुषोऽथ
विविंशतिः। २४ विविंशतिसुतो रंभः खनिनेत्रोऽस्य धार्मिकः। करंधमो महाराज तस्यासीदात्मजो नृप। २५ तस्यावीक्षित्सुतो यस्य
मरुत्तश्चक्रवर्त्यभूत्। संवर्त्तोऽयाजयद्यं वै महायोग्यंगिरःसुतः। २६ मरुत्तस्य यथा यज्ञो न तथान्यस्य कश्चन। सर्वं हिरण्मयं त्वा
सीद्यत्किंचिच्चास्य शोभनं। २७॥

यत्तत्तु भूतत्वेन तत्र पूर्वस्य परस्य वानुषंगादिति व्याख्येयं। १९। २० अग्निवेश्य एव कानीन इति जातूकर्ण्य इति च वि
ख्यातः। २१। दिष्टस्य पुत्रो नाभागो वक्ष्यमाणस्तु नाभागादन्य इति अन्यं विदुः तासामर्थमनुवादमात्रं। २५। आंगिरसः सुतो महायोगी संवर्त्तोऽयाजयत् स मरुत्तः। २६
यस्य यज्ञे किंचित्साधनादिकमस्ति तत्तु सर्वं हिरण्मयं शोभनं नमासीत्। २७।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अमाद्यत्सुरुच्छत्र २८ ३० यतः यस्मात्तृणबिंदोः पुत्रा अभवन् ३१ ३२ तानेवाह विशालइति तस्य तृणबिंदोः सुताः ३३ सहदेवजः देवजेन स
हित पाठांतरे नामास्तत्र मात्रेत्र अर्थस्तु स एव ३४ ३५ वैशाला भूपालाः विशालस्यान्वये जाताः ३६ इति नवमे द्वितीयः २ तृतीये मनुपुत्रस्य श

अमाद्यदिंद्रः सोमेन दक्षिणाभिर्द्विजातयः मरुतः परिवेष्टारो विश्वेदेवाः सभासदः २८ मरुत्तस्य दमः पुत्र स्तस्यासीद्राज्यवर्द्धनः
सुधृतिस्तत्सुतो जज्ञे सौधृतेयो नरः सुतः २९ तत्सुतः केवलस्तस्माद्बंधुमान्वेगवांस्ततः बंधुस्तस्याभवद्यस्य तृणबिंदुर्महीपतिः ३०
तं भेजेऽलंबुषा देवी भजनीयगुणालयं वराप्सरा यतः पुत्राः कन्या चेडविडाभवत् ३१ तस्यामुत्पादयामास विश्रवा धनदं सुतं प्रादा
य विद्यां परमामृषिर्योगेश्वरात्पितुः ३२ विशालः शून्यबंधुश्च धूम्रकेतुश्च तत्सुताः विशालो वंशकृद्राजा वैशालीं निर्ममे पुरीं ३३ ॥
हेमचंद्रः सुतस्तस्य धूम्राक्षस्तस्य चात्मजः तत्पुत्रात्संयमादासीत्कृशाश्वः सहदेवजः ३४ कृशाश्वात्सोमदत्तोऽभूत् योऽश्वमेधैरि
डस्पतिं इष्ट्वा पुरुषमापाग्र्यां गतिं योगेश्वराश्रितः ३५ सौमदत्तिस्तु सुमतिस्तत्सुतो जनमेजयः एते वैशालभूपालास्तृणबिंदोर्य
शोधराः ३६ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे द्वितीयोध्यायः २ ॥ श्रीशुक उवाच शर्यातिर्मानवो राजा ब्रह्मिष्ठः स बभू
व ह यो वा अंगिरसां सत्रे द्वितीयमहरूचिवान् १ सुकन्या नाम तस्यासीत्कन्या कमललोचना तया सार्द्धं वनगतो ह्यगम
त्च्यवनाश्रमं २ ॥ ॥

शर्यातिं की इतिव्रयः य वसौ तस्य भाव्यानं रैवतं च महाद्भुतं १ ब्रह्मिष्ठः वेदार्थतत्त्वज्ञः तदेवाह यो वा इति द्वितीयमहः द्वितीये ह्नि क्रियमाणं कर्म
ऊचिवान् उवाच तस्य वंशं ज्ञानबहिरंगत्वं इत्यादिना वक्ष्यति १ आदौ तावत्तत्कन्यावृत्तांतमाह सुकन्या नामेत्यादिना २ ॥ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३ ५ भार्गवस्य च्यवनस्यानड्वानपराधः। ६ ण मुग्धे यं मम कन्यात्वं त्वयेतुच्यमानेकतिवर्षाण्यस्या विवाहः कृतो न वेत्यादिवाक्यैः तदभिप्रायं
ज्ञात्वा तस्मै तां दुहितरमदात्। ९। १० हि ईश्वरौ स्थ वै यौ युवां मह्यं वयस्या रूपं प्रदत्तं संपादयत। ११ असोमपोः सोमपानरहितयोरपि वां युवयोः

सा सखीभिः परिवृता विचिन्वन्त्यंघ्रिपान् वने। वल्मीकरंध्रे ददृशे खद्योते इव ज्योतिषी॥ ३॥ ते दैवचोदिता बाला ज्योतिषी कंटकेन वै। अ
विध्यन्मुग्धभावेन सुस्रावासृक् ततो बहु॥ ४॥ शकृन्मूत्रनिरोधोभूत् सैनिकानां च तत्क्षणात्। राजर्षिस्तमुपालक्ष्य पुरुषान् वि
स्मितोब्रवीत्॥ ५॥ अप्यभद्रं न युष्माभिर्भार्गवस्य विचेष्टितं। व्यक्तं केनापि नस्तस्य कृतमाश्रमदूषणं॥ ६॥ सुकन्या प्राह पितरं भी
ता किंचित्कृतं मया। द्वे ज्योतिषी अजानंत्या निर्भिन्ने कंटकेन वै॥ ७॥ दुहितुस्तद्वचः श्रुत्वा शर्यातिर्जातसाध्वसः। मुनिं प्रसादया
मास वल्मीकान्तर्गतं शनैः॥ ८॥ तदभिप्रायमाज्ञाय प्रादात् दुहितरं मुनेः। कृच्छ्रान्मुक्तस्तमामंत्र्य पुरं प्रायात्समाहितः॥ ९॥ सुक
न्या च्यवनं प्राप्य पतिं परमकोपनं। प्रीणयामास चित्तज्ञा अप्रमत्तानुवृत्तिभिः॥ १०॥ कस्यचित्त्वथ कालस्य नासत्यावाश्रमागतौ
तौ पूजयित्वा प्रोवाच वयो मे दत्तमीश्वरौ॥ ११॥ ग्रहं ग्रहीष्ये सोमस्य यज्ञे वामप्यसोमपोः। क्रियतां मे वयो रूपं प्रमदानां यदीप्सितं॥ प॰ १
१२ बाढमित्यूचतुर्विप्रमभिनंद्य भिषक्तमौ। निमज्जतां भवानस्मिन् ह्रदे सिद्धविनिर्मिते॥ १३॥ इत्युक्तो जरया ग्रस्तदेहो धमनिसंत
तः। ह्रदं प्रवेशितोश्विभ्यां वलीपलितविप्रियः॥ १४॥

सोमस्य ग्रहं सोमपूर्णं पात्रं गृहीष्ये दास्यामीति। युवां सोमेन यक्ष्य इत्यर्थः। १२ ऐन्द्रवायवं गृह्णातीत्यादिषु द्व्यदेवतासंबंधानुपपत्त्या गृह्णातेर्यागि
पर्यवसायित्वात्। बाढमित्यभिनंद्य भवानस्मिन्निमज्जतामित्यूचतुः। १३ ह्रदं प्रवेशितः तावपि तमपि ह्रदं गृहीत्वा प्रविष्टावित्यर्थः॥ १४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰न॰
५

अश्विनौ चारणं मयो । युवां पृथक् स्थित्वा मत्पतिं दर्शयत मिति प्रार्थयामासेत्यर्थः ॥ १६ ॥ १९ ॥ प्रलंभितो वंचितः हे अश्वासतिश्च संमतं अननीष्टं २० हेस
पुरुषा वयं तत्रमस्पुरपोच्यावनिता प्रिया: ॥ प्रत्यसृतः कुंडलिन स्तुल्परूपा: सुवाससः ॥ १५ ॥ ता निरीक्ष्य वरारोहा सरूपान् सूर्यवर्चसः
अजानती पतिं साध्वी अश्विनौ चारणं ययौ ॥ १६ ॥ दर्शयित्वा पतिं तस्यै पातिव्रत्येन तोषितौ ॥ ऋषिमामं त्र्य ययतुर्विमानेन त्रिविष्टपं ॥ १७
यक्ष्यमाणोथ शर्यातिश्च्यवनस्याश्रमं गत: ॥ ददर्श दुहितुः पार्श्वे पुरुषं सूर्यवर्चसं ॥ १८ ॥ राजा दुहितरं प्राह कृतपादाभिवंदनः आ
शिषश्चाप्रयुंजानो नातिप्रीतमना इव ॥ १९ ॥ चिकीर्षितं ते किमिदं पतिस्त्वया प्रलंभितो लोकनमस्कृतो मुनिः ॥ त्वं यज्जराग्रस्तमसं
त्यसंमतं विहाय जारं भजसेमुमध्वगं ॥ २० ॥ एवं ब्रुवाणं पितरं स्मयमानाशुचिस्मिता उवाच तात जामाता तवैष कथं मति स्त्वैः व गता न्य
या सतां कुलप्रसूति कुलदूषणं त्विदं ॥ बिभर्षि जारं यदपत्रपा कुलं पितुश्च भर्तुश्च नयस्यधस्तमः ॥ २१ ॥ एवं ब्रुवाणं पितरं स्मयमार
ना शुचिस्मिता ॥ उवाच तात जामाता तवैष भृगुनंदनः ॥ २२ ॥ शशंस पित्रे तत्सर्वं वयोरूपाभिलंभनं ॥ विस्मितः परमप्रीतस्तनयां परि
षस्वजे ॥ २३ ॥ सोमेन याजयन् वीरं ग्रहं सोमस्य चाग्रहीत् ॥ असोमपोरप्यश्विनोश्च्यवनः स्वेन तेजसा ॥ २४ ॥ हंतुं तमाददे वज्रं सद्यो मन्यु
रमर्षितः ॥ सवज्रं स्तंभयामास भुजमिंद्रस्य भार्गवः ॥ २५ ॥ अन्वजानंस्ततः सर्वे ग्रहं सोमस्य चाश्विनोः ॥ भिषजाविति यत्पूर्वं सोमाहुत्या
बहिः कृतौ ॥ २६ ॥ उत्तानबर्हिरानर्तो भूरिषेण इति त्रयः ॥ शर्यातेरभवन् पुत्रा आनर्ताद्रेवतोऽभवत् ॥ २७ ॥ सोंतःसमुद्रे नगरीं विनिर्माय
कुशस्थलीं ॥ आस्थितोभुंक्त विषयानानर्तादीनरिंदम ॥ २८ ॥
तां कुलप्रसूते तेमतिरन्यथा तद्विपर्यये एव कथमवगता अश्व सत्वाच्च धव
सितेति विभात देवाह कुलदूषणं त्विदमित्यादि ॥ २१ ॥ २४ ॥ सघ्नंतद्वस्ये कमन्युर्यस्य सः इंद्रः ॥ २५ ॥ २७ ॥ विषयान् देशान् आस्थितो भुंक्त अपालयत् ॥ २८

राम
५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ककुद्मी ज्येष्ठो यस्मिन्नृतत् विभुं ब्रह्माणं ।२९। न लघुः क्षणो वसरो येन ।३०। आद्यं ब्रह्माणं ।३१। ते त्वया हृदये ये कृताः । सर्वे कालेन निरुद्धाः संहृताः
३२ त्रिणवसप्तविंशतिचतुर्युगगणितैः । विकल्पितो विनष्टः । यो देवस्यांशो ललितस्तस्मै नररत्नाय देहि ।३३। तदेवाह भुवइति ।३४। पापुण्यजनत्रा
सात् यक्षभयात् पूर्वमेव पुरं तत् भ्रातृभिः त्यक्तं ।३६।३७। ॥ इति नवमे तृतीयः ॥३॥ चतुर्थे मनुपुत्रस्य नभगस्य कथोच्यते तत्सूनोश्चांबरीष

तस्य पुत्रशतं जज्ञे ककुद्मिज्येष्ठमुत्तमं । ककुद्मी रेवतीं कन्यां स्वामादाय विभुं गतः ।२९। कन्यावरं परिप्रष्टुं ब्रह्मलोकमपावृत
तं । आवर्त्तमाने गांधर्वे स्थितो लब्धक्षणः क्षणं ।३०। तदंत आद्यमानम्य स्वाभिप्रायं न्यवेदयत् । तच्छ्रुत्वा भगवान् ब्रह्मा प्रहस्य
तमुवाच ह ।३१। अहो राजन्निरुद्धास्ते कालेन हृदये कृताः । तत्पुत्रपौत्रनप्तृणां गोत्राणि च न शृण्महे ।३२। कालोभियात
स्त्रिणवचतुर्युगविकल्पितः । तद्गच्छ देवदेवांशो बलदेवो महाबलः ।३३। कन्यारत्नमिदं राजन् नररत्नाय देहि भो । भुवो भा
रावताराय भगवान् भूतभावनः ।३४। अवतीर्णो निजांशेन पुण्यश्रवणकीर्त्तनः ॥ इत्यादिष्टोभिवंद्याजं नृपः स्वपुरमा
३ क्ष गतः ।३५। त्यक्तं पुण्यजनत्रासात् भ्रातृभिर्दि[illegible]वस्थितैः । सुतां दत्वानवद्यांगीं बलाय बलशालिने ।३६। बदर्याख्यं गतो
राजा तप्तुं नारायणाश्रमं ।३७। ॥ इति श्रीभागवते महापुराणे नवमस्कंधे तृतीयोऽध्यायः ।३। ॥ श्रीशुक उवाच । नाभागो
नभगापत्यं यं ततं भ्रातरः कविं । यविष्ठं व्यभजन् दायं ब्रह्मचारिणमागतं ।१। स्फुटत्वाप्रतिहतायतः ।१। नभगस्य वंशमाह । नभ
गस्यापत्यं नाभागः । नाभागादंबरीषो महाभागवतो नृप इति वक्ष्यन् तद्धेतुत्वेन वंशप्रवर्त्तकस्य नाभागस्य निःकपटं चरितं तेन तु श्रीरुद्रप्रसादमा
हायंततमित्यादिना ब्रह्मचारिणं बहुकालं गुरुकुले वसंतं तेन नैष्ठिको सावितिमत्वा विनाभागं समये तस्मै नागमप्रकल्प्यैव भ्रातरः सर्वं दायं विभज्य
गृहीत्वा पश्चाद्गुरुकुलादागतं यं नाभागं । कविं विद्वांसं यविष्ठं प्रतिततं तातं पितरं दायं व्यभजन्नित्यर्थः ।१।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदेव प्रश्नोत्तराभ्यां दर्शयति। तत्र नाभानेदिष्ठः पृच्छति हे भ्रातरः मह्यं किमभक्त भजंतं कं भागं मदर्थं यूयं प्रकल्पितवंतः भ्रातरस्त्वाकुः तदानि
म्नृतमस्मानिरिदानीं तु तव पितरं विभज्य मत्वं पितरं गृहाणेत्यर्थः। पूर्वोक्तिं कृतं मत्वाह। तत हे तात त्वाम्यार्थाः श्रेष्ठा ममत्वाम न भ्रंशु धांगं चकुःप्र
दीयो नागच्छ मित्यर्थः। पाठांतरे हे तात किमिदं ममाचांक्षुः नजामपितरं तवेस्तु कवंत आर्याः त्वां मह्यं किमर्थं ददुरित्यर्थः। पिताऽह हे हे पुत्र
कतन्तूनैरुक्तं माहथाः प्रतारणमाबंतैः कृतंतस्मिन्वादरं माकार्षिः न ह्यहं दायस्तवनोग साधनमित्यर्थः। २ तथापि पितैर्नांगते नव ह्योऽहंतत्र

भ्रातरोऽभक्तं किं मह्यं नजामपितरं तव। त्वां मन्ये आर्यास्त्वां मानं ह्यनुमपुत्रकत दाहथाः। २ इमे ह्यांगिरसः सत्रमासते यस्तुमेधसः
षष्ठं षष्ठमुपेत्याहः केवेमुह्यंति कर्मणि। ३ तांस्त्वं शंसय सूक्ते द्वे वैश्वदेवे महात्मनः। ते स्वर्यंतो धनं सत्रपरिशेषितमात्मनः॥
४ दास्यंत्यथ तनोगच्छत थासत्कृतवान्यथा। तस्मै दत्वा ययुः स्वर्गं ते सत्रपरिशेषितं। ५॥

जीवनोपायं उपदेक्ष्यामीत्याह इमे इति सपादाभ्यां श्लोकाभ्यां। ह ह्यनिद्धवः षडहो भवति षष्ठः षडहो भवतीति विहितेषु षडहेषु वर्त्तमानेषु षष्ठं षष्ठम
हः कर्मोपेत्य प्राप्य कर्मणि तदनुष्ठाने सुमेधसोऽपि ते सूक्त विशेषाज्ञानेन मुह्यंति। केवेहे विद्वर्तांतान्महात्मनोऽपि त्वं इदमित्याद्यौ द्वे मिलित्वा ये य
ज्ञेनदक्षिणयेत्यृचिर्त्तं वैश्वदेवे द्वे सूक्ते शंसय पाठय ततः कर्म्मणि समाप्ते सतिते स्वर्यंतः स्वर्गं गच्छंतः स्वसत्रे परिशेषितं वै सर्व शिष्टमात्मनो धनं
ते तुभ्यं दास्यंति। अथतस्मात्त्वां गच्छेति। तथेत्यादि शुकवाक्यं यथावत्कृतवान्। सत्रपरिशेषितं सत्रावशिष्टं धनं। ४॥५॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरुषः श्रीरुद्रः इदमपत्रमिति दर्शनं शरीरं कृष्णं दर्शनं यस्य सः। वास्तुकं यज्ञभूमिगतं वसु धनं ममेत्युवाच। १० तर्हि स्मृतदैवं ममेदमिति मानवो नाभाग उ
वाच। पुनश्च रुद्र उवाच। नौ आवयोरस्मिन् विवादे ते पितरि प्रश्नः स्यादिति। पृष्टवानिति शेषः॥ ११ पृष्टस्य मनोर्वाक्यं यज्ञवास्तुगतमिति त्रि
ष्टं तच्चरितं क्वचिदिति दत्वाध्वरे उच्छेषणभागो वै रुद्र इति श्रुतेश्च किंच स देव ईश्वरः सर्वमप्यर्हति किं पुनर्यज्ञावशिष्टमित्यर्थः॥ १२ श्रीरुद्र आह

तं कश्चित्स्वीकरिष्यंतं पुरुषः कृष्णदर्शनः। उवाचोत्तरतोभ्येत्य ममेदं वास्तुकं वसु। ७ ममेदमृषिभिर्दत्तमिति तर्हि स्म मानवः। स्यान्नौ
ते पितरि प्रश्नः पृष्टवान् पितरं तथा। ८ यज्ञवास्तुगतं सर्वमुच्छिष्टमृषयः क्वचित्। चक्रुर्हि भागं रुद्राय स देवः सर्वमर्हति। ९ नाभाग
स्तं प्रणम्याह तवेश किल वास्तुकं। इत्याह मे पिता ब्रह्मन् शिरसा त्वां प्रसादये। १० यत्ते पितावदद्धर्मं त्वं तु सत्यं प्रभाषसे। ददामि ते मंत्र
दृशो ज्ञानं ब्रह्म सनातनं। ११ गृहाण द्रविणं दत्तं मत्सत्रपरिशेषितं। इत्युक्त्वांतर्हितो रुद्रो भगवान् सत्यवत्सलः। १२ य एतत् संस्मरेत्
प्रातः सायं च सुसमाहितः। कविर्भवति मंत्रज्ञो गतिं चैव तथात्मनः। १३ नाभागादंबरीषोऽभून्महाभागवतः कृती। नास्पृशद्ब्रह्म
शापोपि यं न प्रतिहतः क्वचित्। १४ राजोवाच॥ भगवन् श्रोतुमिच्छामि राजर्षेस्तस्य धीमतः। न प्राभूद्यत्र निर्मुक्तो ब्रह्मदंडो दुरत्य
यः। १५

यत्त इति। १४ इदमाख्यानं श्रुतिप्रसिद्धं। तथा हि बह्वृच ब्राह्मणे नाभानेदिष्ठं शंसति नाभानेदिष्ठं वै मानवं ब्रह्मचर्यं वसंतं भ्रातरो निर
भजन् सोऽब्रवीदित्यादि। अस्याख्यानस्य स्मरणे फलमाह य एतदिति। आत्मनो गतिं च प्राप्नोतीति शेषः। १६ क्वचिदपि न प्रतिहितो हि तो ब्रह्मशापोपि
ब्राह्मणेन दुर्वाससा निर्मितः कृत्यानलोऽपि यं नास्पृशत्। अतो सौ महाभागवतः। अत एव कृती पुण्यवान्। १७ तस्य श्रोतुमिच्छामि चरित
मिति शेषः। ब्रह्मदंडः कृत्यानलः न प्राभूत् न समर्थो बभूव। १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰न॰
७

मे

श्रियंसंपदंविभवंऐश्वर्यंअतुलंनिरूपमं।१५।१६ पुंसामतिदुर्लभमपितत्सर्वंस्वप्नवत्संस्तुतंनिरूपितं। अत्रउपपादयंमेनेतत्रहेतुःविभवस्यनिर्वाणं
नाशंविद्वान्। यतःयेनविभवेनमत्तःअरोनवापुमान्तमोविशतिमोहेनिमज्जति।१६ नन्वेवंज्ञानंतोपिविभवेविषयोपदर्शयंतेतत्राह। वासुदेवइतिनावंन
किंप्राप्तःयेनभावेनइदंविश्वंलोष्टवत्तृणतुल्यंस्मृतं।१८ नन्किमेवसर्वेन्द्रियाणांभगवत्परत्वकथनेनप्रपंचयति सवाइतिविभिः। श्रुतिंश्रोत्रंअ
च्युतसत्सत्कथानामुदयेश्रवणेचकारेत्यस्यसर्वत्रान्वयः।१९ मुकुंदस्यलिंगानामालयानिस्थानानितेषांदर्शनेदृशौनेत्रेश्रीमत्यास्तुलस्याः

श्रीशुकउवाच। अंबरीषोमहाभागःसप्तद्वीपवतींमहीं। अव्ययांचश्रियंलब्ध्वाविभवंचातुलंभुवि।१५ मेनेतिदुर्लभंपुंसांसर्वंतत्स्वप्न
संस्तुतं।विद्वान्विभवनिर्वाणंतमोविशतियत्पुमान्।१६ वासुदेवेभगवतितद्भक्तेषुचसाधुषु। प्राप्तोभावंपरंविश्वंयेनेदंलोष्टवत्स्मृ
तं।१७ सवैमनःकृष्णपदारविंदयोर्वचांसिवैकुंठगुणानुवर्णने। करौहरेर्मंदिरमार्जनादिषुश्रुतिंचकाराच्युतसत्कथोदये।१८
मुकुंदलिंगालयदर्शनेदृशौतद्भृत्यगात्रस्पर्शेंगसंगमं। घ्राणंचतत्पादसरोजसौरभेश्रीमत्तुलस्यारसनांतदर्पिते।१९ पादौहरेः
क्षेत्रपदानुसर्पणेशिरोहृषीकेशपदाभिवंदने। कामंचदास्येनतुकामकाम्ययायथोत्तमश्लोकजनाश्रयारतिः।२० एवंसदाक
र्मकलाप॰मात्मनःपरेधियज्ञेभगवत्यधोक्षजे। सर्वात्मभावंविदधन्महीमिमांतन्निष्ठविप्राभिहितःशशासह।२१॥

न

घ्राणंचतत्पादसरोजेनय

सौरभंतस्मिन्तदर्पितेतस्मिन्निवेदितान्नादौ।२०॥ कामंस्वकुंकुमादिसेवांदास्येनिमित्तेतत्प्रसादस्वीकारात।नतुकामकाम्ययाविषयेच्छयाकथंचकार उत्त
मश्लोकजनाश्रयारतिर्यथाभवेत्तथा। अनेनतद्भक्तेषुचपरंभावंप्राप्तइत्येतत्स्फुटीकृतं।२१ सर्वंचात्मेतिभावोभावनायस्मिन्तमात्मनःस्वस्यकर्मणांक
लापंसमूहंभगवतिविदधत्समर्पयन्तन्निष्ठैर्भगवन्निष्ठैर्विप्रैःअभिहितःशिक्षितःसन्महींशशास। पालयामास अनेनाधिकृतोधर्मोपियथावदनुष्ठितः
२१

ने॰

राम
७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच। यज्ञाधिष्ठातारमीश्वरमश्वमेधैरीजे आराधयामास महाविभूत्या उपचितान्यंगानि दक्षिणाश्च येषु तैः वसिष्ठादिभिर्हेतुभूतैस्ततैर्विस्तृतैर्धन्वनि
धन्वदेशे निरुदकेसरस्वतीमभिस्रोतं तस्याः प्रतिलोममित्यर्थः। २२। किंच। यस्य क्रतुषु सदस्यादयो गीर्वाणैस्सह तुल्यरूपाः स्वदृश्यंत
तत्सदृक्षमिति च तुर्थेनान्वयः नच देवानां निमिषाभावात्वैलक्षण्यं यतः अनिमिषाश्च व्यदृश्यंत न निमिषंतीति तथा आश्चर्यदर्शनोत्सुक्येन
तेषां निमिषोपरमादिति भावः। २३। यस्य यदीयैर्मनुजैरपि स्वर्गो न प्रार्थितः तस्य तु का वार्त्ता। २४। आस्तां स्वर्गः स्वार्थनिःशंका पि यद्यतं मुकुंदं हृदि

ईजेश्वमेधैरधियज्ञमीश्वरं महाविभूत्योपचितांगदक्षिणैः। ततैर्वसिष्ठासितगौतमादिभिर्धन्वन्यभिस्रोतमसौ सरस्वतीं। २२। यस्य
क्रतुषु गीर्वाणैः सदस्या ऋत्विजो जनाः। तुल्यरूपाश्चानिमिषा व्यदृश्यंत सुवाससः। २३। स्वर्गो न प्रार्थितो . यस्य मनुजैरमरप्रियः॥
शृण्वद्भिरुपगायद्भिरुत्तमश्लोकचेष्टितं। २४। संमर्दयंति यान्कामाः स्वाराज्यपरिभाविताः। दुर्लभा नापि सिद्धानां मुकुंदं हृदि पश्य
तः। २५। स इत्थं भक्तियोगेन तपोयुक्तेन पार्थिवः। स्वधर्मेण हरिं प्रीणन् संगान्सर्वान् शनैर्जहौ। २६। गृहेषु दारेषु सुतेषु बंधुषु द्वि
पोत्तमस्यंदनवाजिवस्तुषु। अक्षय्यरत्नाभरणायुधादिष्वनंतकोशेष्वकरोदसन्मतिं। २७।

पश्यतस्तान्जनान् कामा विषयाः न संमर्दयंति न हर्षयंतीति कथंभूताः स्वाराज्येन स्वरूपसुखेन परिभाविताः अतिशायिना अत एव सिद्धानामपि
दुर्लभाः। यानिति पाठे यान्मनुजान् स्वाराज्ये स ... पि द्वितीयांतपाठे मनुजानां विशेषणं। यमिति पाठे यमंबरीषं पश्यतामिति पाठे सिद्धानां विशेषणं
२५। एवं भगवदाराधनपरस्य कामा ह्युपेक्षानैव चित्रमित्युपसंहरति। स इत्थमिति द्वाभ्यां॥

तानू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰न॰ ८ ननैवंभूतोसौ कथं भवति पक्षान्तरयेत्यत्राह। तस्मात्त इति २९। तदेवं तस्य वैराग्यादिकं हरिर्न किंचोत्का ब्रह्मदंडोयत्र न शान्त इति यदुक्तं तदेवाद
र्शीव्रतनिष्ठां कथयन्नाह। आरिराधयिषुरिति वदध्या समाप्ति ३०। अर्चयेत् अवगमानावन्यार्थ ३१।३२। ब्राह्मणांश्च पूजयामास सिद्धार्थान् आप्तका
मान् पूर्णान् पेक्षानपि ३३। रूप्यांघ्रीणां रूप्यखुराणां पयः शीलादिसंपदो यासां तासां ३४। न्यर्बुदानि षट् षष्टिकोटीः ३५। तर्हि तदैव दुर्वासास्त्र

तस्माच्चदाघरि ... श्चकं भ्रत्मनीकनयावहं। एकांतनक्तिनावेनप्रीतोच्युता निरकृणं २७ आरिराधयिषुः कृष्णं महिष्या तुल्यशी
लया। युक्तः सांवत्सरं वीरो दधार द्वादशीव्रतं २८। व्रतांते कार्तिके मासि त्रिरात्रं समुपोषितः। स्नातः कदाचित्कालिंद्यां हरिं मधु
वनेर्चयत् २९। महाभिषेकविधिना सर्वोपस्करसंपदा। अभिषिच्यांबराकल्पैर्गंधमाल्यार्हणादिभिः ३०। तद्गतांतरभावेन पू
जयामास केशवं। ब्राह्मणांश्च महाभागान् सिद्धार्थानपि भक्तितः ३१। गवां रुक्मविषाणीनां रूप्यांघ्रीणां सुवाससां। पयःशीलव
योरूपवत्सोपस्करसंपदां ३२। प्राहिणोत्साधुविप्रेभ्यो गृहेषु न्यर्बुदानि षट्। भोजयित्वा द्विजानग्रे स्वाद्वन्नं गुणवत्तमं ३३। लब्धकामै
रनुज्ञातः पारणायोपचक्रमे। तस्य तर्ह्यतिथिः साक्षाद्दुर्वासा भगवानभूत् ३४। तमानर्चातिथिं भूपः प्रत्युत्थानासनार्हणैः। य
याचेभ्यव हाराय पादमूलमुपागतः ३५। प्रतिनंद्य स तां याच्ञां कर्तुमावश्यकं गतः। निममज्ज बृहद्ध्यायन् कालिंदीसलि
ले शुभे ३६। मुहूर्तार्धावशिष्टायां द्वादश्यां पारणं प्रति। चिंतयामास धर्मज्ञो द्विजैस्तद्धर्मसंकटे ३७। ब्राह्मणातिक्रमे दोषो द्वा
दश्यां यदपारणे। यत्कृत्वा साधु मे भूया दधर्मो वा न मां स्पृशेत् ३८।

७।३८ तिथिः सांतप्रयस्योन्नत ३६। आनर्च अर्चितवान् अभ्यवहाराय नो राम ८
जनाय ३७। आवश्यकं नैमित्तिकं माध्याह्निकं कर्म कर्तुं गतः ३८। तत्तस्मिन् धर्मसंकटे एवाह यत ब्राह्मणातिक्रमे दोषोत्र धर्मः द्वादश्यामपारणे। एतद्विषयः व
न वै गुणं यत्कृत्वायस्मिन्कृते ३९॥ ॥

एवं द्विजैः सह विचार्य नितिश्चिनोति। अन्नमेति व्रतस्य पारणं समाप्तिं ततः अशितमाकूः। अशितं नेति चाकूः श्रुतिश्च। अपोऽश्नाति तन्नैवाशितं नैवा
नशितमिति। ४०। व्रतस्य चेष्टप्रसंगे स्नेहः। ४१। प्रचलत्कंपमानं गात्रं यस्य। वक्रा दृष्टिर्यस्य कुटिलमाननं यस्य। ४२। क्रुद्ध महि पावको दावाग्निरिव। ४६

अंभसा केवलेनाथ करिष्ये व्रतपारणं। प्राहुर ब्राह्मणं विप्रा ह्यशितं नाशितं च तत्॥ ४०॥ इत्यपः प्राश्य राजर्षिः चिंतयन्मनसाच्यु
तं। प्रत्यचष्ट कुरुश्रेष्ठ द्विजागमनमेव सः॥ ४१॥ दुर्वासा यमुनाकूलात्कृतावश्यक आगतः। राज्ञाभिनंदितस्तस्य बुबुधे चेष्टितं धिर
या॥ ४२॥ मन्युना प्रचलद्गात्रो भ्रुकुटीकुटिलाननः। बुभुक्षितश्च सुतरां कृतांजलिमभाषत॥ ४३॥ अहो अस्य नृशंसस्य श्रियोन्म
त्तस्य पश्यत। धर्मव्यतिक्रमं विष्णोरभक्तस्येशमानिनः॥ ४४॥ यो मामतिथिमायातमातिथ्येन निमंत्र्य च। अदत्त्वा भुक्तवांस्तस्य सद्य
२० स्ते दर्शये फलं॥ ४५॥ एवं ब्रुवाण उत्कृत्य जटां रोषविदीपितः। तया स निर्ममे तस्मै कृत्यां कालानलोपमां॥ ४६॥ तामापतंतीं ज्वलती
मसिहस्तां पदा भुवं। वेपयंतीं समुद्वीक्ष्य न चचाल पदान्नृपः॥ ४७॥ प्राग्दिष्टं भृत्यरक्षायां पुरुषेण महात्मना। ददाह कृत्यां तां चक्रं क्रुद्धा
हिमिव पावकः॥ ४८॥ तदभिद्रवदुद्वीक्ष्य स्वप्रयासं च निःफलं। दुर्वासा दुद्रुवे भीतो दिक्षु प्राणपरीप्सया॥ ४९॥ तमन्वधावद्भगव
द्रथांगं दावाग्निरुद्धूतशिखो यथाहिं। तथानुषक्तं मुनिरीक्षमाणो गुहां विविक्षुः प्रससार मेरोः॥ ५०॥ दिशो नभः क्ष्मां विवरान्
समुद्रान् लोकान्सपालांस्त्रिदिवं गतः सः। यतो यतो धावति तत्र तत्र सुदर्शनं दुःप्रसहं ददर्श॥ ५१॥ अलब्धनाथः स यदा कुतश्चि
त्संत्रस्तचित्तोऽरणमेषमाणः। देवं विरिंचं समगाद्विधातस्त्राह्यात्मयोनेऽजिततेजसो मां॥ ५२॥

निष्फलमुद्वीक्ष्य ४९। अनुषक्तं पृष्ठतः संसक्तं मेरोर्गुहां विविक्षुरधावत्। ५०। अरणमेषणमाणः शरणमिच्छन् अजिततेजसो हरेश्चक्रात्
॥५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाग०
९

एतस्य सर्वस्य च भ्रूभंगमात्रेण तिरो नु विष्यति । करात्क्रीडायावसानेतद्‌विकद्विपरार्द्धसंज्ञे काले । ५३ अतो वयं सर्वे यस्य नियमं मा हा प्रपन्नाः प्रा
णासंतो लोकहितं यथा न वयं तं नियमं मूर्ध्नार्पितं वहामः । अतस्त्वत्क्रोडाहिणं त्वां रक्षितुं न समर्था हि मितित्रिषः । यत्तदो नित्यसंबंधात् । ५४ । ५५ श्री

ब्रह्मोवाच ॥ स्थानं मदीयं सह विश्वमेतत् क्रीडावसाने द्विपरार्द्धसंज्ञे भ्रूभंगमात्रेण हि संदिधक्षोः कालात्मनो यस्य तिरो भविष्यति । ५
३ अहं भवो दक्षभृगु प्रधानाः प्रजेशभूतेशसुरेशमुख्याः सर्वे वयं यन्नियमं प्रपन्ना मूर्ध्न्यर्पितं लोकहितं वहामः । ५४ प्रत्याख्यातो
विरिंचेन विष्णुचक्रोपतापितः दुर्वासाः शरणं यातः शर्वं कैलासवासिनं ॥ ५५ ॥ श्रीरुद्र उवाच ॥ वयं न तात प्रभवाम भूम्नि यस्मि
ञ्परेऽन्येऽप्यजजीवकोशाः ॥ भवंति काले न भवंति हीदृशाः सहस्रशो यत्र वयं भ्रमाम ॥ ५६ अहं सनत्कुमार श्च नारदो भगवानजः
कपिलोऽपान्तरतमो देवलो धर्म आसुरिः । ५७ मरीचिप्रमुखा श्चान्ये सिद्धेशाः पारदर्शनाः विदाम न वयं सर्वे यन्मायां माययावृताः
५८ तस्य विश्वेश्वरस्येदं शस्त्रं दुर्विषहं हि नः । तमेव शरणं याहि हरिस्ते शं विधास्यति । ५९ ततो निराशो दुर्वासाः पदं भगवतो ययौ
वैकुंठाख्यं यदध्यास्ते श्रीनिवासः श्रिया सह । ६० संदह्यमानोऽजितशस्त्रवह्निना तत्पादमूले पतितः सवेपथुः आहाच्युतानंत सद
दीप्सित प्रभो कृतागसं मावहि विश्वभावन ६१ ॥

रुद्रोऽपि प्रत्याचष्टे वयमिति चतुर्भिः । भूम्नि महति महत्त्वमेवाह । यस्मिन् परमेश्वरे अजाः
ब्रह्माणः तद्वतीवास्ते षां कोशाः उपाधिभूता ब्रह्मांडविग्रहा इत्यर्थः अस्मदादिप्रमाण ब्रह्मांडप्रमाणा अन्येऽपि भवंति जायंते न भवंति च यत्र येषु
ब्रह्मांडेषु लोकेशाभिमानिनो वयं भ्रमाम । ननु सर्वज्ञस्य तव भ्रमः कुतस्तत्राह । अहमिति । ६० पारदर्शनाः सर्वज्ञा अपि यस्य मायां न वि
द्मः हे सतामीप्सित मामंत्र्य वहि पाहि । ६२ ॥ राम ९
६०

अपराधंनिवेदयन्प्रार्थयते।अजानतेति।अघंदुःखंअपचितिंनिःकृतिमन्नाम्नोहेतोःनिःकृतिंनपृच्छामीतिचेत्तत्राह।यस्यतवनाम्निकीर्तितेना
रकस्योपिमुच्येततस्यतवकिमशक्यमितिभावः॥६२॥नआशासेनस्पृहयामिइमंपरंचलोकंहित्वाप्रतीतंप्राप्तमपि।आत्मनस्त्वेववश्यंभ्रमि

अजानताते परमानुभावंकृतंमयाघंभवतःप्रियाणां।विधेहितस्यापचितिंविधातर्मुच्येतयन्नाम्न्युदितेनारकोपि॥६२॥
श्रीभगवानुवाच॥अहंभक्तपराधीनोह्यस्वतंत्रइवद्विज।साधुभिर्ग्रस्तहृदयोभक्तैर्भक्तजनप्रियः॥६३॥नाहमात्मानमाशा
सेमद्भक्तैःसाधुभिर्विना।श्रियंचात्यंतिकींब्रह्मन्येषांगतिरहंपरा॥६४॥येदारागारपुत्राप्तान्प्राणान्वित्तमिमंपरं।हित्वामां
शरणंजाताःकथंतांस्त्यक्तुमुत्सहे॥६५॥मयिनिर्बद्धहृदयाःसाधवःसमदर्शिनाः।वशेकुर्वंतिमांभक्त्यासत्स्त्रियःसत्पतिंयथा॥६६॥
मत्सेवयाप्रतीतंचसालोक्यादिचतुष्टयं।नेछंतिसेवयापूर्णाःकुतोन्यत्कालविप्लुतं॥६७॥साधवोहृदयंमह्यंसाधूनांहृदयंत्वहं।म
दन्यंतेनजानंतिनाहंतेभ्योमनागपि॥६८॥उपायंकथयिष्यामितवविप्रशृणुष्वतत्।अयंह्यात्माभिचारस्तेयतस्तंयातुवै
भवान्॥६९॥साधुषुप्रहितंतेजःप्रहर्तुःकुरुतेशिवं।तपोविद्याचविप्राणांनिःश्रेयसकरेउभे॥७०॥तेएवदुर्विनीतस्यकल्पेते
कर्तुरन्यथा।ब्रह्मंस्तद्गछभद्रंतेनाभागतनयंनृपं।क्षमापयमहाभागंततःशांतिर्भविष्यति॥७१॥ ॥इतिश्रीभागवतेमहा
पुराणेनवमस्कंधेंबरीषचरितेचतुर्थोध्यायः॥४॥

चारोहिंसायतोऽनर्थमेवयातु॥६९॥अशिवमनर्थं।तपोविद्यासंपन्नस्यममकथ
मनर्थःसमजनीतिमामैवविस्मयंकार्षीरित्याह।तपइति॥७०॥ ॥इतिश्रीभागवतेभावार्थदीपिकायांनवमस्कंधेचतुर्थोध्यायः॥४॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰न॰
१०

पंचमे विष्णुचक्रं तु प्रसाद्य ब्राह्मणसंकटात्। दुर्वासा रक्षितस्तेन तच्चाद्भुतमीर्यते॥ सत उद्यमनमिति छेदः। सुलोपः। सुलोपः पादपूरणार्थः॥ ज्योतिषां
नक्षत्राणां पतिः सोमस्त्वं मात्राणि इंद्रियाणि च। त्वच्छक्त्यैव ग्राह्यादयः स्वं स्वं कार्यं कुर्वंतीत्यर्थः॥ ३ सहस्रं अराः यस्य हे सहस्रार स्वयं विचारणं भूयाः ६
इस्पते पृथ्वीपते॥ ४ ब्राह्मणरक्षणं तव युक्तमेवेत्याह। त्वं धर्म इति। नच तव स्वयं निवृत्तिरित्याह। पौरुषं पुरुषस्येश्वरस्य परं तेजः सामर्थ्यं त्वं च
यं नाव॥ स एते इति स्मादिस्मृतिप्रसिद्धा नगवतः श्रीमन्नंदरूपिणं सुदर्शनं तत एव सर्वं जातं च तत्त्वमेव सम इत्यपीति॥ ५ हे सुनाभ अद्भुत कर्म्म

श्रीशुक उवाच॥ एवं भगवता दिष्टो दुर्वासाश्चकृतापितः। अंबरीषमुपाहत्य तत्पादौ दुःखितो ग्रहीत्॥ १ तस्य सोद्यममन्वीक्ष्य पा
दस्पर्शविलज्जितः। अस्तावीत्तद्धरेरस्त्रं कृपया पीडितो भृशं॥ २ अंबरीष उवाच॥ त्वमग्निर्भगवान् सूर्यस्त्वं सोमो ज्योति
षां पतिः। त्वमापस्त्वं क्षितिर्व्योम वायुर्मात्रेंद्रियाणि च॥ ३ सुदर्शन नमस्तुभ्यं सहस्राराच्युतप्रिय। सर्वास्त्रघातिन् विप्राय स्वस्ति
भूया इडस्पते॥ ४ त्वं धर्मस्त्वमृतं सत्यं त्वं यज्ञोऽखिलयज्ञभुक्। त्वं लोकपालः सर्वात्मा त्वं तेजः पौरुषं परं॥ ५ नमः सुनाभाखि
लधर्म्मसेतवे ह्यधर्म्मशीलासुरधूमकेतवे। त्रैलोक्यगोपाय विशुद्धवर्च्चसे मनोजवायाद्भुतकर्म्मणे गृणे॥ ६ त्वत्तेजसा धर्म्ममयेन सं गृणे
हृतं तमः प्रकाशश्च दृशो महात्मनां। दुरत्ययस्तेऽमहिमा गिरांपते त्वद्रूपमेतत्सदसत्परावरं॥ ७

एतावान् कः स्तोतुं समर्थः। अतस्तुभ्यं केवलं नमो गृणन् इत्यन्वयः। अद्भुतकर्म्मत्वमेवाह। अखिलानां धर्म्माणां सुवत्तेमर्यादारूपाय। अतएवाध राम
र्म्मशीलानामसुराणां धूमकेतवे दाहकाय। त्रैलोक्यं गोपायतीति तथा विशुद्धं च तत्सुज्वलं वर्च्चस्तेजो यस्य तस्मै॥ ६ तदेव प्रपंचयति त्वत्तेजसेति १०
ति द्वाभ्यां सूर्यादीनां प्रकाशश्च त्वयैव रूप्यते प्रकाश्यत इति रूपं॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेऽजितस्त्वं जनेन श्रीहरिणा यदा विसृष्टः त्वं तदा दैत्यदानवानां बलं प्रविष्टः सन् तेषां बाह्वादीन् छिंदन् विराजसे पाठांतरे कृत्तिता दैत्यदानवा य
स्मिन् तद्बलं पूर्वपदेन संधिरार्षः ॥ ८ ॥ किंच त्वया भगवता नियुक्तेन खलानामेव दंडः कार्यः साधवस्तु रक्षणीयाः । अतो विप्रस्य रक्षणेनास्माननुगृहाणेत्या

यदा विसृष्टस्त्वमनंजनेन वै बलं प्रविष्टोऽजित दैत्यदानवं । बाहूदरोर्वंघ्रिशिरोधराणि वृक्णन्नजस्रं प्रधने विराजसे ॥ ८ ॥ स त्वं जग
८ त्त्राण खलप्रहाणये निरूपितः सर्वसहो गदाभृता । विप्रस्य चास्मत्कुलदैव[illegible]हेतवे विधेहि भद्रं तदनुग्रहो हि नः ॥ ९ ॥ यद्य
स्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः । कुलं नो विप्रदैवं चेत् द्विजो भवतु विज्वरः ॥ १० ॥ यदि नो भगवान् प्रीत एकः सर्वगुणाश्रयः
सर्वभूतात्मभावेन द्विजो भवतु विज्वरः ॥ ११ ॥ श्रीशुक उवाच ॥ इति संस्तुवतो राज्ञो विष्णुचक्रं सुदर्शनं । अशाम्यत्सर्वतो विप्रं प्रद
हद्राजयाच्ञया ॥ १२ ॥ स मुक्तोऽस्त्राग्नितापेन दुर्वासाः स्वस्तिमांस्ततः । प्रशशंस तमुर्वीशं युंजानः परमाशिषः ॥ १३ ॥ दुर्वासा उ
वाच ॥ अहो अनंतदासानां महत्त्वं दृष्टमद्य मे । कृतागसोऽपि यद्राजन् मंगलानि समीहसे ॥ १४ ॥ दुष्करः को नु साधूनां दुस्त्यजो वा
महात्मनां । यैः संगृहीतो भगवान् सात्वतामृषभो हरिः ॥ १५ ॥ यन्नामश्रुतिमात्रेण पुमान् भवति निर्मलः । तस्य तीर्थपदः किं वा दा
सानामवशिष्यते ॥ १६ ॥ राजन्ननुगृहीतोऽहं त्वयातिकरुणात्मना । मदघं पृष्ठतः कृत्वा प्राणा यन्मेऽभिरक्षिताः ॥ १७ ॥

हे सत्त्वमिति हे जगत्त्राण स एवंभूतः त्वं खलानामेव प्रहाणाय निरूपितो नियुक्तः । अतोऽस्मत्कुलस्य दैवहेतवे भागधेयाय विप्रस्य च भद्रं विधेहि
वदेव नोऽनुग्रहः ॥ ९ ॥ सर्वस्मिन् कृतार्पणेन विप्रस्तापात् पार्यते । यद्यस्तीति द्वाभ्यां विप्रो दैवं देवता यस्मिन् तत् ॥ १० ॥ राज्ञस्तस्यैव याच्ञया ॥ १२ ॥ १७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०न०टी
११

राजेत्यादि श्लोकद्वयं शुकोक्तिः। प्रीतोस्मीति श्लोकद्वयं पुनश्च विप्रोक्तिः।१८।१९। आत्मनि मेधा येन तेनातिथ्येन।२०। भूरियं तत्रस्थो जनः कीर्तयिष्य
ति।२१।२२। तस्य धैर्यातिशयमाह। गतो मुनिर्यावता ... गतो तावत्संवत्सरोऽतिक्रांतः तदेति।२३। द्विजस्योपयोगेन भोजनेनातिपवित्रं आहा

राजातमकृताहारः प्रत्यागमनकांक्षया। चरणावुपसंगृह्य प्रसाद्य समभोजयत्।१८। सोशित्वादृतमानीतमातिथ्यं सार्वकामि
कं। तृप्तात्मा नृपतिं प्राह भुज्यतामिति सादरं।१९। प्रीतोस्म्यनुगृहीतोस्मि तव भागवतस्य वै।। दर्शनस्पर्शनालापैरातिथ्येनात्ममे
धसा।२०। कर्मावदातमेतत्ते गायंति स्वःस्त्रियो मुहुः। कीर्तिं परमपुण्यां च कीर्त यिष्यति भूरियं।२१। श्रीशुक उवाच। एवं
संकीर्त्य राजानं दुर्वासाः परितोषितः। ययौ विहायसामंत्र्य ब्रह्मलोकमहैतुकं।२२। संवत्सरोत्यगात्तावद्यावता नागतो गतः। मुनि
स्तद्दर्शनाकांक्षो राजाब्भक्षो बभूव ह।२३। गतेथ दुर्वाससि सोंबरीषो द्विजोपयोगातिपवित्रमाहरत्। ऋषेर्विमोक्षं व्यसनं च बुद्ध्वा
भा
मेने स्ववीर्यं च परानुभावं।२४। एवंविधानेकगुणः स राजा परात्मनि ब्रह्मणि वासुदेवे। क्रियाकलापैः समुवाह भक्तिं ययावि
रिंच्यान्निरयांश्चकार।।२५। श्रीशुक उवाच। अथांबरीषस्तनयेषु राज्यं समानशीलेषु विसृज्य धीरः। वनं विवेशात्मनि वासुदे
वे मनो दधद्ध्वस्तगुणप्रवाहः।२६। इत्येतत्पुण्यमाख्यानमंबरीषस्य भूपते। संकीर्तयन्ननुध्यायन्भक्तो भगवतो भवेत्।२७।
इति श्रीभागवते महापुराणे नवमस्कंधेऽम्बरीषचरिते पंचमोऽध्यायः।। ।।

स्त बुभुजे।२४। स्ववीर्यं च धैर्यादि लक्षणं परानुभावं भगवतः प्रभावं मेने। एवंविधा अनेके गुणा यस्य सः। आविरिंच्यान् विरिंच्यपदस राम
हितान् भोगान् निरयप्रायान् पश्यदित्यर्थः।२५।२६।२७। ।।इति नवमे टीकायां पंचमोऽध्यायः।।५।। ।। ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वष्टारं नेवरीषस्य वंशमुक्त्वा ततः परं षष्ठाध्याये इक्ष्वाकोर्वंश उच्यते। १ तत्र षष्ठे शशादादिर्मांधात्रंतो निरूप्यते प्रसंगात्सौभरेश्चा रम्या
मांधात्रंतनयापतेः २ तं तत्र वेसंतानार्थं ये अंगिरसा जनिताः एते रथीतरस्य क्षेत्रे प्रसूतत्वेन रथीतरगोत्राः संतः आंगिरसो वीर्येण प्रसूतत्वादां
गिरसाश्च पुनरपि रथीतराणां मन्येषां जातानां प्रवराः मुख्याः स्मृताः यतः क्षत्रोपेताः ब्राह्मणा इत्यर्थः ३ देवं मनो ईशास्तु पुत्रेषु पुत्रषष्ठश्च क
विश्वविरक्तत्वात् वंशप्रवर्तको ५ करूषादीनां च समानां वंशस्तारतम्यक्रमेणोक्ताः ॥ इदानीमति विततमिक्ष्वाकोर्वंशमाह क्षुवतस्ति

श्रीशुक उवाच ॥ विरूपः केतुमान् शंभुरंबरीषसुतास्त्रयः ॥ विरूपात् पृषदश्वोऽभूत् तत्पुत्रस्तु रथीतरः ॥ १ रथीतरस्याप्रज
स्य भार्यायां तंतवेऽर्थितः ॥ अंगिरा जनयामास ब्रह्मवर्चस्विनः सुतान् ॥ २ एते क्षेत्रप्रसूता वै पुनस्त्वांगिरसाः स्मृताः ॥ रथीत
राणां प्रवराः क्षत्रोपेता द्विजातयः ॥ ३ क्षुवतस्तु मनोर्जज्ञे इक्ष्वाकुर्घ्राणतः सुतः ॥ तस्य पुत्रशतज्येष्ठा विकुक्षिनिमिदंडकाः ४
तेषां पुरस्तादभवन्नार्यावर्ते नृपा नृप ॥ पंचविंशति पश्चा[illegible]च्च त्रयो मध्ये परेन्यतः ॥ ५ स एकदाष्टकाश्राद्ध इक्ष्वाकुः सुतमा
दिशत् ॥ मांसमानीयतां मेध्यं वि[illegible]कुक्षे गच्छ मा चिरं ६ तथेति स वनं गत्वा मृगान् हत्वा क्रियार्हणान् ॥ श्रांतो बुभुक्षितो वी
रः शशं चाऽददपस्मृतिः ॥ ७ ॥ स्वादिना यावत्सोमवंशप्रस्तावः क्षुवतं क[illegible]घ्राणे मनोर्घ्राणतो जज्ञे ॥ स्रग्धायां जनयामास दश पुत्रानिति
पूर्वोक्तिं बाक्कुस्मानि भार्यायेणेति द्रष्टव्यं पुत्राणां शते [illegible]ज्येष्ठाः आर्यावर्तेपु एणनृमिर्मध्यं विंध्यहिमागयोः तस्मिन् पुरस्तात्समुद्रपर्यंतं मंड
मंडलविभागेन पंचविंशतिर्नृपा अभवन् हे नृप तथैव पश्चाच्च पंचविंशतिः मध्ये तु ज्येष्ठास्त्रयः अपरे तु अन्यतः दक्षिणोत्तरादिषु ५ वि
कुक्षिरिवंशशादइति विश्रुतइतिवक्ष्यति ॥ तत्र हेतुमाह स एकदेति अष्टकाभिः क्रियार्हणान् श्राद्धार्हान् अश्रादत् अनश्नायत ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्गुरुर्वसिष्ठः प्रोक्षणाय श्राद्धोचितसंस्काराय । ८ त्यक्तो विधिः सदाचारो येन तं । ९ स तु इक्ष्वाकुः जापकेन वसिष्ठेन राज्यभोगेन विरक्तो योगी सन्नंते
न योगेन कलेवरं त्यक्त्वा स यत्परं तत्त्वं तदवाप । १० राजा सत् पालयन् महीमीजि । ११ दैत्यपुरस्य जयात् पुरंजयः इंद्रो वाहो यस्येति इंद्रवाहः ककुदि स्थितत्वा
त् ककुत्स्थ इति च शशादसुतस्य त्रीणि नामानि तत्तत्कर्मनिमित्तानि । १२ तान्येव व्याचष्टे त्रिभिः आह कृतांत इति सार्धैः । कृतं विश्वमंतयतीति तथा पार्ष्णि

त्रोषं निवेदयामास पित्रे तेन च तद्गुरुः । चोदितः प्रोक्षणायाह दुष्टमेतदकर्मकं । ८ ज्ञात्वा पुत्रस्य तत्कर्म गुरुणा निहितं नृपः । दे
शान्निःसारयामास सुतं त्यक्तविधिं रुषा । ९ स तु विप्रेण संवादं जापकेन समाचरन् । त्यक्त्वा कलेवरं योगी स तेनावाप यत्पर
परं । १० पितर्युपरतेऽभ्येत्य विकुक्षिः पृथिवीमिमां । शासदीजे हरिं यज्ञैः शशाद इति विश्रुतः । ११ पुरंजयस्तस्य सुत इंद्रवाह इतीरि
तः । ककुत्स्थ इति चाप्युक्तः शृणु नामानि कर्मभिः । १२ कृतांत आसीत्समरो देवानां सह दानवैः । पार्ष्णिग्राहो वृतो वीरो देवैर्दैत्यप
राजितैः । १३ वचनाद्देवदेवस्य विष्णोर्विश्वात्मनः प्रभोः । वाहनत्वे वृत [illegible] स्तस्य बभूवेंद्रो महावृषः । १४ स संनद्धो धनुर्दिव्यमादाय वि
शिखान् शितान् । स्तूयमानः समारुह्य युयुत्सुः ककुदि स्थितः । १५ तेजसाप्यायितो विष्णोः पुरुषस्य परात्मनः । प्रतीच्यां दिशि
दैत्यानां न्यरुणत्त्रिदशैः पुरं । १६ तैस्तस्य चाभूत् प्रधनं तुमुलं लोमहर्षणं । यमाय भल्लैरनयद्दैत्यानभिययुर्मृधे । १७ तस्येषुपा
ताभिमुखं युगांताग्निमिवोल्बणं । विसृज्य दुद्रुवुर्दैत्या हन्यमानाः स्वमालयं ॥ १८ ॥ ॥

ग्राहः सहायः । १३ इंद्रो यदि मम वाहनं स्यात् ।
तर्हि दैत्यान् हनिष्यामीति तेन वाहनत्वे वृतः सन् त्रिदशोऽल्लंघ्य यातदंगीकुर्वन् विष्णोर्वचनात्तस्य वाहनत्वाय महावृषो बभूवेत्यर्थः । १४ येनिमुरवंययुः ।
तान्यमं दर्शयितुं सदेहानेव भल्लैरनयदित्यर्थः । १७ तद्दृष्ट्वान्ये दुद्रुवुः स्वमालयं पातालं । १८ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति एतैः कर्मभिः पुरंजयादिनामभिराहूतः व्याहृतः । पाठांतरे आहूत इत्यर्थः ॥१९।२०॥ श्रावस्तिं श्रावस्तस्य पुत्रः कुवलयाश्वक एव धुंधुमार इति ख्यातः ॥२१॥ त
त्वकारणमाह । यइति । सुतानामेकविंशत्या सह स्वैर्हतैः सन् हतवान् धुंधुमार इति चेति चकारस्यान्वयः ॥२२॥ अथ तस्मात् निकुंभात् । कृशाश्वः ॥२५॥ नार्यमाणं शा
तेन सह ऋषयः पुत्रार्थम् इंद्रदेवताम् इष्टिं वर्तयामासुः । स एव तस्या अश्वमेधे ॥२६॥ तदेवाह । राजेति षड्भिः । तृषितः तर्षितः सन् जलार्थं प्रविष्टः मंत्राभिमंत्रितं जलं पत्न्यै

जित्वा पुरं धनं सर्वं सश्रीकं वज्रपाणये । प्रत्ययच्छत् स राजर्षिरिति नामभिराहृतः ॥१९॥ पुरंजयस्य पुत्रोऽभूदनेनास्तत्सुतः पृथुः ॥ वि
श्वरंधिस्ततश्चंद्रो युवनाश्वस्तु तत्सुतः ॥२०॥ शावस्तस्तत्सुतो येन शावस्ती निर्ममे पुरी । बृहदश्वस्तु शावस्तिः ततः कुवलयाश्वकः ॥ यः प्रि
यार्थमुतंकस्य धुंधुनामासुरं बली । सुतानामेकविंशत्या सहस्रैरहनत् वृतः ॥२२॥ धुंधुमार इति ख्यातः तत्सुतास्ते च जज्वलुः । धुंधोर्मुखाग्नि
ना सर्वे त्रय एवावशेषिताः ॥२३॥ दृढाश्वः कपिला श्वश्च भद्राश्व इति भारत । दृढाश्वपुत्रो हर्यश्वो निकुंभः तत्सुतः स्मृतः ॥२४॥ बर्हणाश्वो
निकुंभस्य कृशाश्वोथास्य सेनजित् । युवनाश्वोभवत्तस्य सोनपत्यो वनं गतः ॥२५॥ भार्याशतेन निर्विण्णः ऋषयो स्य कृपालवः । इष्टिं स्म वर्त
यांचक्रुरैंद्रीं ते सुसमाहिताः ॥२६॥ राजा तद्यज्ञसदनं प्रविष्टो निशि तर्षितः । दृष्ट्वा शयानान् विप्रांस्तान् पपौ मंत्रजलं स्वयं ॥२७॥ उत्थिता
स्ते निशाम्याथ व्युदकं कलशं विभो । पप्रच्छुः कस्य कर्मेदं पीतं पुंसवनं जलं ॥ राज्ञा पीतं विदित्वाथ ईश्वर प्रहितेन ते । ईश्वराय नमश्चक्रु
रहो दैवबलं बलं ॥ ततः काल उपावृत्ते कुक्षिं निर्भिद्य दक्षिणं । युवनाश्वस्य तनयश्चक्रवर्ती जजान ह ॥३०॥ कं धास्यति कुमारोयं स्तन्ये
रोरूयते भृशं । मां धाता वत्स मा रोदीरितींद्रो देशिनीमदात् ॥३१॥

देयं स्वयं पपौ । व्युदकं निरुदकं । पुंसवनं पुत्रोत्पत्तिकारणं ॥२८॥ अहो दैवबलमेव मुख्यं बलं पुरुषबलं तु न किंचिदिति वदंतः ईश्वराय नमस्कारं चक्रुः
॥२९॥३०॥ अयं कं धास्यति नीनि पास्यतीति दुःखितैर्विप्रैः उक्ते सति तस्याभिप्रायम् आराधितः इंद्रो मां धाता पाता हे वत्स मा रोदीरिति ब्रुवन् देशिनीं तर्जनीं मदादित्यर्थः ॥३१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य पितायुवनाश्वोऽमिन्नकुक्षिरपि नममार। किंतु कालांतरे तपसा सिद्धिमवगात्॥ ३२॥ मांधातुर्मर्हिमानमाह। त्रसदस्युरिति षड्भिः। स्वर्गेहे राजन्नृपस्मा
न्मांधातुर्ह्रस्वत उद्दिम्भः कं पिता। संतत्स्वसंतिम्रतइंद्रोयस्य त्रसदस्युरितिनाम विदधे॥ समांधाता स्वत्रनी मेकः शशास ॥ तुत्तरेणाय॥ ३३॥ अच्युतस्पतेज
सा अच्युततेजसेति वा ३४॥ आत्मविदपि सः यज्ञैर्विष्णुमयजत्। तमेवविशिनष्टि सर्वदेवमयमितिभाद्वेन॥ ३५॥ ३६॥ यावदिति यावत्स्वर्यं गच्छति॥ ३७॥ त्रण

तमममार पितातस्य विप्रदेवप्रसादतः॥ युवनाश्वोऽथतत्रैवतपसा सिद्धिमन्वगात्॥ ३२॥ त्रस ॥ दस्युरितींद्रोऽगविदधेनामतस्य वै॥ यस्मात्त्रसंति
युद्धिम्याद्दस्यवोरावणादयः॥ ३३॥ यौवनाश्वोऽथमांधाताचक्रवर्त्यवनिंप्रभुः॥ सप्तद्वीपवतीमेकः शशासाच्युततेजसा॥ ३४॥ ई ॥ जेचयज्ञं क्रतु
भिरात्मविद्भूरिदक्षिणैः॥ सर्वदेवमयं देवं सर्वात्मकमतींद्रियं॥ ३५॥ द्रव्यं मंत्रो विधिर्यज्ञो यजमानस्तथात्विंजः॥ धर्मो देशश्चकालश्चस
र्वमेतद्यदात्मकं॥ ३६॥ यावत्सूर्यउदेतिस्म यावच्चप्रतितिष्ठति॥ सर्वंतत्यौवनाश्वस्य मांधातुःक्षेत्रमुच्यते॥ ३७॥ शशबिंदोर्दुहि
तरिबिंदुमत्यामधान्नृपः॥ पुरुकुत्समंबरीषं मुचुकुंदंचयोगिनं॥ ३८॥ तेषांस्वसारः पंचाशत्सौभरींवव्रिरे पतिं॥ यमुनांतर्जलेमग्नः
तप्यमानपरंतपः॥ ३९॥ निर्वृतिमीनराजस्य वीक्ष्यमैथुनधर्मिणः॥ जातस्पृहोनृपंविप्रं कन्यामेकामयाचत॥ ४०॥ सोऽप्याहगृह्य
तांब्रह्मन्कामंकन्यास्वयंवरे॥ सविचिंत्याप्रियंस्त्रीणांजरठोयमसंमतः॥ ४१॥ ॥

प्रसंगात्सौभरेश्चरितमाह तिष्ठ मितियावत्समाप्तिः तेषांस्वसारः मांधातुः कन्याः नतु महातापसस्य कुलोविवाहप्रसंगः॥ कथं वा जराजर्जरीतंरा
जकन्या वव्रिरे तदाह॥ यमुनांतर्जलइतिषड्भिः॥ ३९॥ नृपं मांधातारं सोऽपि मांधाता स्वयंवरे कामं गृह्यतामित्याह सविप्रः स्त्रीणाम॥ प्रियं मां वि
चित्यानेनाहं प्रत्युक्तः तत्रात्मानं तथासाधयिष्यामीति व्यवसितः निश्चितवानिति द्वयोरन्वयः अप्रियत्वे हेतुः जरठो वृद्धः॥ ४॥ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kaljdas Sanskrit University Ramtek Collection

वलिनिर्मुक्तः पलितस्त्व एजत्कः कंपमानशिराः । तापसत्वादिनावा असंमतो हमितिकृत्वा ॥१३॥ तथेत्यस्य प्रपंचः सुरस्त्रीणामपी स्पितं किं पुनर्मनुजेंद्रा
णां या स्त्रियः तासां मिति ॥१२॥ ततः किंचित्तत्रं तदाहुस्तु निरिति द्वाभ्यां त्वत्रान्तर्विहारेण पंचाशता पितृ तकन्याभिः सएकएवैरतः ॥१३॥ तस्य गार्हस्थ्यं
वर्णयति सप्तति चतुर्भिः । ब हृचइतिमंच सामर्थ्यमुक्तं नास्ति । सहरेमइत्युत्तरेणान्वयः । कुरेमे । अपारणीयं दुरंतयत्तपः तस्य श्रिया समृद्धा
अनर्घ्याः परिछदा येषु तेषु गृहेषु तथा नानाविधेषूपवनेषु च । अमलाः सिलाः सिरेयेषां तेषु सरस्सु च कथंभूतेषु सौगंधिकानां कह्लाराणां च कान

वृद्धी पलितएजत्क इत्यहं प्रत्युदाहृतः । साधयिष्ये तथात्मानं सुरस्त्रीणामपीप्सितं ॥४२॥ किं पुनर्मनुजेंद्राणामितिव्यवसितः प्रभुः
मुनिः प्रवेशितः क्षत्त्रा कन्यांतःपुरमृद्धिमत् ॥४३॥ वृतश्च राजकन्याभिरेकः पंचाशता वरः । तासां कलिरभूत्भूयांस्तदर्थेपोह्य सौ
हृदं ॥४४॥ ममानुरूपो नायं व इति तद्गतचेतसां ॥ स बह्वृचस्ताभिरपारणीयतपःश्रियानर्घ्यपरिच्छदेषु । गृहेषु नानोपवनामलां
नःसरस्सु सौगंधिककाननेषु ॥४५॥ महार्हशय्यासनवस्त्रभूषणस्नानानुलेपाभ्यवहारमाल्यकैः । स्वलंकृतस्त्रीपुरुषेषु नित्यदा
रेमेनुगायत्द्विजभृंगवंदिषु ॥४६॥ यत्गार्हस्थ्यं तु संवीक्ष्य सप्तद्वीपवती पतिः । विस्मितः स्तंभमजहात्सार्वभौमश्रियान्वितं ॥
४७॥ एवं गृहेष्वभिरतो विषयान्विविधैः सुखैः । सेवमानो न चातुष्यदाज्यस्तोकैरिवानलः ॥४८॥ स कदाचिदुपासीन आत्मापह्नवमा
त्मनः । ददर्श बह्वृचाचार्यो मीनसंगसमुत्थितं ॥४९॥

नाति स्तोमायेषु ॥४५॥ कथंभूतेषु गृहादिषु स्वलंकृताः स्त्रियः पुरुषाश्च येषु अनुगायंतो द्विजाश्च
पक्षिणः भृंगाश्च वंदिनश्च येषु कथंभूतः महार्हशय्यादिभिरुपलक्षितः सन् ॥४६॥ स्तंभं गर्वं ॥४७॥ आज्यस्तोकैर्घृतबिंदुभिः ॥४८॥ इदानीं तस्यानुतापप्र
वृत्तिं वान्यस्याश्रममाह ॥ स कदाचिदिति सप्तभिः । आत्मनः मनसैः हेतोः आत्मनोऽपह्नवं तपोहानिं ददर्श ॥४९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संश्वासोचरितव्रतश्च योहंतस्य ब्रह्मतपः ॥५०॥ मिथुनव्रतिनां दांपत्यधर्मवतां चेत् यदि प्रसंगः तर्हि तद्वतिषु ईश्वरार्थधर्मपरेष्वेव कार्य इति शेषः ॥५१॥
संगाज्जातं दोषं प्रपंचयति एक इति पंचाशता मायाभिः संबंधात् पंचाशत् आसमन्त्र बमित्यर्थः ततश्च सुतैः पंचसहस्रस ग आसंप्रमे कंता
सुपुत्रशतरूपिणीत्यत्र उभयकृत्यानि ऐहिकपारत्रिकाणि कर्माणि तद्विषयानां मनोरथानां अर्थनाबः पुरुषार्थबुद्धिमान् ॥५२॥ न्यासोत्रसं

अहोइमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य ॥ अंतर्जले वारिचरप्रसंगात् प्रच्यावितं ब्रह्म चिरं धृतं यत् ॥५०॥ संगं त्यजेत
मिथुनव्रतिनां मुमुक्षुः सर्वात्मना न विसृजेद्बहिरिंद्रियाणि एकश्चरन् रहसि चित्तमनंत ईशे युंजीत तद्व्रतिषु साधुषु चेत्प्रसंगः
॥५१॥ एकस्तपस्व्यहमथांभसि मत्स्यसंगात् पंचाशदास मुत पंचसहस्रसर्गः ॥ नांतं व्रजाम्युभयकृत्यमनोरथानां मायागुणैर्हृ
तमतिर्विषयेऽर्थभावः ॥५२॥ एवं वसन्गृहे कालं विरक्तो न्यासमास्थितः ॥ वनं जगामानुययुस्तत्पत्न्यः पतिदेवताः ॥५३॥ तत्र तप्त्वा
तपस्तीक्ष्णमात्मकर्षणमात्मवान् ॥ सहैवाग्निभिरात्मानं युयुजे परमात्मनि ॥५४॥ ताः स्वपत्युर्महाराज निरीक्ष्याध्यात्मिकीं ग
तिं ॥ अन्वयुस्तत्प्रभावेन अग्निं शांतमिवार्चिषः ॥५५॥ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे षष्ठोऽध्यायः ॥६॥ ॥ श्रीशुक
उवाच ॥ मांधातुः पुत्रप्रवरो योंबरीषः प्रकीर्तितः ॥ पितामहेन प्रवृतो यौवनाश्वश्च तत्सुतः ॥१॥

संगस्याग एव वानप्रस्थधर्म इत्यर्थः ॥५
३॥५३॥५४॥ आध्यात्मिकीं गतिं ब्रह्मणि लयं ॥५५॥ ॥ इति नवमटीकायां षष्ठोध्यायः ॥ ॥ मांधातुस्त्रयः प्रोक्ताः सप्तमेयत्र गीयते ॥ पुरुकुत्सस्य चारब्धा
नं हरिश्चंद्रस्य चोत्तमं ॥ प्रपुत्रप्रवरः पुत्रश्रेष्ठः स पितामहेन युवनाश्वेन प्रवृतः पुत्रत्वेन स्वीकृतः अत एव तस्य मांधातृप्रवर त्वं तत्सुतः अंबरीषस्य सुतः



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इमेयुवनाश्वांबरीषहारीतामांधातृगोत्रस्यप्रवराः अवांतरविशेषप्रवर्त्तकाः यद्वायौवनाश्वविशेषणंपितामहेनमांधात्रासह अंबरीषयुवनाश्वप्र
वृत्तः मांधात्रप्रवरोयेषांतेइमेअंबरीषयौवनाश्वहारीताः यथाहाश्वलायनः हरितकुत्सपिंगदर्भनैमगवानामंगिरसांबरीषयौवनाश्वेति मां ४८२
धातारंत्वेकेब्रुवतेअतिस्मांगिरसंमांधात्रंबरीषयौवनाश्वेतीति पुरुकुत्सस्यवंशंकथयिष्यन्नादौतावत्तस्यविवाहंप्रभावंचाह उरगैर्भ्रातृभिर्या॥ भि
दत्तानर्मदातया २ वध्यान्वधार्हान् सच पुरुकुत्सोनागाल्लब्धवरोभूत्वरमाह इदंनर्मदयारसातलानयनादिकंस्मरतांसर्पादभयमिति ३॥

हारीतस्तस्यपुत्रोभूत्मांधातृप्रवराइमे नर्मदाभ्रातृभिर्दत्तापुरुकुत्साययोरगैः २ तयारसातलंनीतोभुजगेंद्रप्रयुक्तयागंधर्वा
नवधीत्तत्रवध्यान्वैविष्णुशक्तिधृक् ३ नागाल्लब्धवरःसर्पादभयंस्मरतामिदं त्रसदस्युःपौरुकुत्सोयोनरण्यस्यदेहकृत् ४ ह
र्यश्वस्तत्सुतस्तस्मादरुणोथनिबंधनः तस्यसत्यव्रतःपुत्रःत्रिशंकुरितिविश्रुतः ५ प्राप्तश्चांडालतांशापात्गुरोःकौशिकतेज
सा सशरीरोगतःस्वर्गमद्यापिदिविदृश्यते ६ पातितोवाक्शिरादेवैस्तेनैवस्तंभितोबलात् त्रैशंकवोहरिश्चंद्रोविश्वामित्र
वसिष्ठयोः यन्निमित्तमभूद्युद्धंपक्षिणोर्बहुवार्षिकं ७ ॥

देहकृत्पिता त्रसदस्योःसुतोनरण्यइत्यर्थः ४ त्रयःशंकवःस्वदुःखहेतवोदोषायस्यासौत्रिशंकुः तदुक्तंहरिवंशेपितुश्चापरितोषेणगुरो
र्दोग्ध्रीवधेनच अप्रोक्षितोपयोगाच्चत्रिविधस्तेव्यतिक्रमइति परणीयमानविप्रकन्यापहरणात् क्रुद्धस्यगुरोःपितुःशापात्कौशिकस्यवि
श्वामित्रस्यतेजसाप्रभावेन ५ तेनैवकौशिकेन ६ पक्षिणोःआडीबकयोः विश्वामित्रराजसूयदक्षिणाछलेनहरिश्चंद्रंसर्वस्वमपहृत्
यातयामास तद्दृष्ट्वाकुपितोवसिष्ठोपिविश्वामित्रंत्वमाडीभवेतिशशाप सोपित्वंबकोभवेतिवसिष्ठंशशापतयोश्चयुद्धमभूदितिप्रसिद्धं ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०न०
१५

हरिश्चंद्रोह वैधस ऐक्ष्वाको राजा पुत्र आस इत्यादिश्रुतिप्रसिद्धं हरिश्चंद्रस्य चरितमाह। सोनपत्य इत्यादि यावत्समाप्ति। कथं शरणं यातः पुत्रो
मे जायतां णय दिवीरः पुत्रो मे जायेत तर्हि तेनैव पुरुषपशुना त्वां यजेय जामी तिन्नाषया। तथेत्युक्तवता वरुणेन निमित्तेनास्य रोहितो नाम पुत्रो जातः
ण जाते पुत्रे स वरुणो जातः सुतो मामनेन यजस्वेत्यब्रवीत्। यदा पशुर्निर्दशः। निर्गतदशादिवसः स्यादित्यत्र स राजाब्रवीदित्यनुषंगः। १० राजन्नहिव

सोनपत्यो विषण्णात्मा नारदस्योपदेशतः। वरुणं शरणं यातः पुत्रो मे जायतां प्रभो। ण यदि वीरो महाराज तेनैव त्वां यजेऽहमिति। त
थेति वरुणेनास्य पुत्रो जातस्तु रोहितः॥ ९ जातः पुत्रो ह्यनेनां गमां यजस्वेति सोऽब्रवीत्। यदा पशुर्निर्दशः स्यादथ मेध्यो भवे
दिति॥ १० निर्दशे च समागत्य यजस्वेत्याह सोऽब्रवीत्। दंताः पशोर्यज्ञियेरन्नथ मेध्यो भवेदिति॥ ११ जाता दंता यजस्वेति स प्र
त्याहाथ सोऽब्रवीत्। यदा पतंत्यस्य दंता अथ मेध्यो भवेदिति॥ १२ पशोर्निपतिता दंता यजस्वेत्याह सोऽब्रवीत्। यदा पशोः पुनर्दंता
जायंतेथ पशुः शुचिः॥ १३ पुनर्जाता यजस्वेति स प्रत्याहाथ सोऽब्रवीत्। सांनाहिको यदा राजन् राजन्योथ पशुः शुचिः॥ १४॥ इ
ति पुत्रानुरागेण स्नेहयंत्रितचेतसा॥ कालं वंचयता तं तमुक्तो देवस्तमैच्छत॥ १५ रोहितस्तदभिज्ञाय पितुः कर्म चिकीर्षि
तं। प्राणप्रेप्सुर्धनुःपाणिररण्यं प्रत्यपद्यत॥ १६ पितरं वरुणग्रस्तं श्रुत्वा जातमहोदरं। रोहितो ग्राममेयाय यत्तमिंद्रः प्रत्य
षेधत॥ १७॥

रुणराजन्यः पशुर्यदा सांनाहिकः कवचसंवधार्यैर्हिः संग्रामसमर्थः। अथ तदा शुचिरित्येवं तं तं कालं वंचयता राज्ञा उक्तः। १४
आर्षितो देव वरुणः तं तं कालं प्रत्यैच्छत इत्यर्थः। १५ चिकीर्षितं आत्मना पशुना वरुणयजनं। १६ ततः श्वक्रुपितेन वरुणेन ग्रस्तं। अत एव जा
तं महदुदरं यस्य तं पितरं श्रुत्वा॥ १७॥

राम
१५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समं वर्षं द्वितीयेत्ववर्षे हत्त्वहाश्रमेसामेमत्पैवर्तं प्रतिषेधव्ह् किंचित् किंचिदाह ।१९। २० वरुणेन मुक्तमुदरं यस्य महत्सुकथायस्समः ।२३। आत्मवा
न्जमदग्निरध्वर्युरभूत् । आयास्योमुनिः सामगऽऊताम्ब्रह्मदित्यर्थः ।२४। उपरिष्टात् विश्वामित्रसुतारव्यानप्रसंगेन ।२४। अविहतांगतिंज्ञानं
तामेवगतिमाह । सार्धमिमांमनःपृथिव्यांधारयन् ज्ञानकलांध्यात्वातयाअज्ञानंविनिर्दहन् । तांचहित्वा [illegible] मुक्तबंधनः [illegible] अतो

भूमेःपर्यटनंपुण्यंतीर्थहेत्रनिषवणैः रोहितायादिशच्छक्रः सोध्यरण्येवसत्समां ।१८। एवंद्वितीयेतृतीयेचचतुर्थेपंचमेतथा । अरण्येस्थाने
सस्थविरोविप्रोभूत्वाथवृत्रहा ।१९। षष्ठसंवत्सरंतत्रचरित्वारोहितःपुरीं उपव्रजन्नजीगर्तादक्रीणान्मध्यमंसुतं ।२०। शुनःशेपंपशुं
पित्रे प्रदायसमवंदत । ततःपुरुषमेधेनहरिश्चंद्रोमहायशाः ।२१। मुक्तोदरोयजद्देवान्वरुणादीन्महत्कथः । विश्वामित्रोभवत्तस्मि
न्होताचाध्वर्युरात्मवान् ।२२। जमदग्निरभूद्ब्रह्मावसिष्ठोयास्यसामगः । तस्मैतुष्टोददाविंद्रःशातकौंभमयंरथं ।२३। शुनःशेपस्य
माहात्म्यमुपरिष्टात्प्रवक्ष्यते । सत्यसारांधृतिंदृष्ट्वासभार्यस्यचभूपतेः ।२४। विश्वामित्रोभृशंप्रीतोददावविहतांगतिं । मनःपृथिव्यां
तामद्भिःतेजसापोनिलेनतत् ।२५। खेवायुंधारयंस्तच्चभूतादौतंमहात्मनि । तस्मिन्ज्ञानकलांध्यात्वातयाज्ञानंविनिर्दहन् ।२६। हि
त्वातांस्वेननावेन निर्वाणसुखसंविदा । अनिर्देश्याप्रतर्क्येणतस्थौविध्वस्तबंधनः ।२७। ।। इतिश्रीभागवतेमहापुराणेनवमस्कंधे
धेहरिश्चंद्रोपाख्यानोनामसप्तमोऽध्यायः ।।७।। ।।

मनइतिश्रुतेः।अतःभ

तस्याविस्मन्वयः । मनोमूलोहिसंसारःमनश्चान्नमयंचान्नमयंहिसोम्यमनःशाश्वत्यायांपृथि व्यांमनोधारयन् । एकीकुर्वन्नितांपृथिवीमद्भिरेकी
कुर्वन्नपस्तेजसा तत्तेजोनिले ।२५। तंचखेआकाशेतच्चभूतादावहंकारंमहात्मनिमहत्तत्वे । तस्मिन्विषयाकारंव्यावर्त्यज्ञानकलांज्ञानांशमा
त्मत्वेनध्यात्वा तयाध्यानवृत्तिरूपयाआत्मावरकमज्ञानंविनिर्दहन् ।२६। निर्वाणसुखसंविदातांचहित्वामुक्तबंधनःसन्अनिर्देश्येनाप्रतर्क्येणस्वेनभा
वेनस्वस्वरूपेणतस्थौ ।२७। इतिनवमेसप्तमः ।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टमेरोहितस्यैकोवंशोयत्रानवन्नृपः सगरः कपिलात्तेपातन्निर्दग्धायस्सस्सूनवः। चंपस्तस्मादभूतद्येनचांपापुरीविनिर्मिता। अतः चंपात्सुदेवः॥१
हतान्भूर्यस्याः श्रीवैर्णरूषिणाआत्मानंदेहंप्रजावंतंसगर्भं ३ गरेविषं तेनगरेणसहैवजातः॥४॥५ गुरुवाक्येनश्रीवर्वकचनेनकांश्चिद्दहत्तैवविकृतवे

शुकउवाच॥ हरितोरोहितसुतश्चंपस्तस्माद्विनिर्मिता चंपापुरीसुदेवोतोविजयोयस्यचात्मजः ॥१॥ भरुकस्तत्सुतस्तस्माद्वृकस्तस्यापि
बाहुकः। सोरिभिर्हृतभूराजासभार्योवनमाविशत्॥२॥ वृद्धंतंपंचतांप्राप्तंमहिष्यनुमरिष्यती। और्वेणजानतात्मानंप्रजावंतंनिवारि
ता॥३॥ आज्ञायास्यैसपत्नीभिर्गरोदत्तोंधसासह। सहतेनैवसंजातः सगराख्योमहायशाः॥४॥ सगरश्चक्रवर्त्यासीत्सागरोयत्सु
तैःकृतः। यस्तालजंघान्यवनान्शकान्हैहयबर्बरान्॥५॥ अवधीत्गुरुवाक्येनचक्रेविकृतवेषिणः। मुंडान्श्मश्रुधरान्कांश्चि
न्मुक्तकेशार्धमुंडितान्॥६॥ अनंतर्वाससःकांश्चिदबहिर्वाससोपरान्। सोश्वमेधैरयजतसर्ववेदसुरात्मकं॥७॥ और्वोपदिष्टयो
गेनहरिमात्मानमीश्वरं। तस्योत्सृष्टंपशुंयज्ञेजहाराश्वंपुरंदरः॥८॥ सुमत्यास्तनयादृप्ताः पितुरादेशकारिणः॥ हयमन्वेषमाणास्ते
समंतात्न्यखनन्महीं॥९॥ प्रागुदीच्यांदिशिहयंददृशुःकपिलांतिके। एषवाजीहरश्चौरआस्तेमीलितलोचनः॥१०॥ हन्यतांहन्यतांपाप
इतिषष्टिसहस्रिणः। उदायुधाअभिययुरुन्मिमेषतदामुनिः॥११॥ स्वशरीराग्निनातावन्महेंद्रहृतचेतसः। महद्व्यतिक्रमहतान्
भस्मसादभवन्क्षणात्॥१२॥ ॥

षिणश्चक्रेतदेवाहमुंडानितिमुक्तकेशानर्धमुंडितांश्च॥६॥७॥ और्वेणोपदिष्टेनयोगेनउपायस्तेन॥८॥ तस्यद्वेभार्येसुमतिः केशिनीचतत्रसुमत्याः पुत्राणां
प्रभावंस्मृत्वाचाह सुमत्याइतिषष्टिसिण एषवाजिहरइतिब्रुवंतोऽनियुयुः षष्टिसहस्राणिपरिच्छेदकतयामंतियेषांतन्निमेषलोचनोन्मीलनंचकार॥१०॥११॥१२॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केचित्तु कपिलस्य कोपाग्निना दग्धा इति वर्णयंति । तन्निराकरोति नेति । कुत इत्यत आह सत्त्वधामनि शुद्धसत्त्वमूर्तौ जगतः पवित्रे शुद्धिकरे आत्मा य
स्य तस्मिन् कथं विभाव्यते संभाव्यते असंभावनायां दृष्टांतः । भुवो रजः खे कथं संभाव्यते इति ।१३। किंच यस्य येन ईरिता प्रवर्त्तिता तस्य विपश्चित
सर्वज्ञस्य कथं पृथग्मतिः अरिमित्रादि भेददृष्टिः ।१४। तदेवं सुमत्याः पुत्रेषु मृतेषु केशिन्याः पौत्रेणाश्वः समानीतः पितृव्योद्धरणप्रयत्नं कृत
इति दर्शयितुमाह । योऽसमंजस इति त्रिकः केवलमसौ वस्तुतस्तु समंजस एव स तु केशिन्याः सुतः स्वैरजत्वमिव प्रतीतं वारयति तत्स्यैव नृपस्या

न साधुवादो मुनिकोपभर्जिता नृपेंद्रपुत्रा इति सत्त्वधामनि । कथं तमो रोषमयं विभाव्यते जगत्पवित्रात्मनि खे रजो भुवः ।१३। यस्ये
रिता सांख्यमयी दृढेह नौर्यया मुमुक्षुस्तरते दुरत्ययं । भवार्णवं मृत्युपथं विपश्चितः परात्मभूतस्य कथं पृथग्मतिः ।१४। योऽसमंज
स इत्युक्तः स केशिन्या नृपात्मजः । तस्य पुत्रोंऽशुमान्नाम पितामहहिते रतः ।१५। असमंजस आत्मानं दर्शयन्नसमंजसं । जातिस्म
रः पुरा संगाद्योगी योगाद्विचालितः ।१६। आचरन् गर्हितं लोके ज्ञातीनां कर्म विप्रियं । सरय्वां क्रीडतो बालान् प्रास्यदुद्वेजय
न्जनं ।१७। एवंवृत्तः परित्यक्तः पित्रा स्नेहमपोह्य वै । योगैश्वर्येण बालांस्तान् दर्शयित्वा ततो ययौ ।१८। अयोध्यावासिनः सर्वे
बालकान् पुनरागतान् । दृष्ट्वा विसिस्मिरे राजन् राजा चाप्यन्वतप्यत ।१९। अंशुमांश्चोदितो राज्ञा तुरगान्वेषणे ययौ । पितृव्य
खातानुपथं भस्मांति ददृशे हयं ।२०। ॥

स्मनो दहनु जातः ।१५। तस्य कथामाह चतुर्भिः । असमंजसः पुरा पूर्वजन्मनि योगी सन् संगाद्धेतोर्योगाद्विचालितः ।१६। अतः इदानीं जातिस्मरः सन् पुनः संग
परिहाराय जनमुद्वेजयन् लोके गर्हितं ज्ञातीनां च विप्रियं कर्माचरन् क्रीडतो बालान् सरय्वां प्रास्यत् प्राक्षिपदिति द्वयोरन्वयः ।१७। एवंविधं वृत्तं कर्म य
स्य सः ।१८।१९। पितृव्यखातमनु यः पंथाः तं यस्य भस्मांतिके समीपे ।२०। ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰न॰
१७

अजानंतोवजानंतोपितुकथयंतीति।तुष्टावषड्भिरीशानमंशुमानेवमादराय:२१ अजन:अज:ब्रह्मापितामहोपिनपश्यतिनचबुध्यते।कथंनूतंत्वा
त्मन:स्वस्मात्परंपरमेश्वरंकेहेतुभि:समाधियुक्तिभि:समाधिनाप्यपरोक्षंनपश्यतियुक्तिभि:परोक्षमपिम ष्यमबुध्यतइत्यर्थ:।अपरेअर्वाचीनास्तु
कुतस्त्वांपश्येयु:।अर्वाचिनत्वेहेतु:।तस्यब्रह्मण:मनश्शरीरंचधीश्चसत्वतमोरज:कार्याणितान्येविविधादेवतिर्यङ्नराणांसर्गा:तैसृष्टा:।तत्रा
पिवयंअप्रकाशा:अज्ञा:कुत:पश्यामेत्यर्थ:२२ अपरेतर्हिकिंपश्यंतितत्राह येदेहभाजस्तेस्वस्मिन्सम्यक्स्थितमपित्वांनविदु:किंतुगुणानेव

तत्रासीनंमुनिंवीक्ष्यकपिलाख्यमधीक्षजं।अस्तौत्समाहितमना:प्रांजलि:प्रणतोमहान्।२।अंशुमानुवाच।।।नपश्यतित्वांप
रमात्मनोजनोनबुध्यतेद्यापिसमाधियुक्तिभि:।कुतो परेतस्यमन:शरीरधीविसर्गसृष्टावयमप्रकाशा:।।२२।येदेहभा
ज:त्रिगुणप्रधानागुणान्विपश्यंत्युतवातमश्च।यन्मायायामोहितचेतसस्त्वांविदु:स्वसंस्थंनब हि:प्रकाशा:।२३।तंत्वा
महंज्ञानघनंस्वभावप्रध्वस्तमायागुणभेदमोहै:।सनंद नाद्यैर्मुनिभिर्विभाव्यंकथंहिमूढ:परिभावयामि।२४।। ।।

विपश्यंति।अथवागुणानपितुतमएवपश्यंति।यतस्त्रिगुणबुद्धिरेवप्रधानंयेषांअतोबहिरेवप्रकाशोज्ञानंयेषांबुद्धिपरतंत्रतया
जाग्रत्स्वप्नयोविषयान्पश्यंतिसुषुप्तौतमएवकेवलंनतुनिर्गुणंत्वांसर्वत्रस्थितं।यतश्चयत:यस्यतवमाययैवविमोहितंचेतोयेषांते।२३।तथा
प्यहंविचारेणज्ञास्यामीतिचेत्तत्राह।तंत्वामहंविमूढ:कथंपरिभावयामिविचारयामि।कथंभूतंज्ञानघनंशुद्धज्ञानमूर्तिंस्वतएवप्रध्वस्ता
मायागुणनिमित्तोभेदमोहोयेषांतैर्विभाव्यंविचिंत्यं।अयंभाव:ज्ञानघनत्वात्त्वंतावत्ज्ञानविषयस्त्वंविचारविषयत्वेपिमायागुणैरभि एम
भूतोहंनविचारेसमर्थइति।२४।। ।। १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात् हे प्रशांत त्वां पुराणं पुरुषं केवलं नमामि सम्न्वयः पुराणं पुरुषत्वे हेतुः मायां गुणाः कर्माणि च विश्वसृष्ट्यादीनि लिंगानि च ब्रह्मादिरूपाणि यस्य
तं प्रशांतत्वे हेतुः सदसद्भ्यां कार्यकारणाभ्यां पुण्यपापाभ्यां वा विमुक्तं अतः अनामरूपं तत्कृतनामरूपशून्यं किंतु ज्ञानोपदेशाय गृहीतः प्रकटितो
देहः शुद्धसत्वमूर्तिर्येन तं यद्वा हे प्रशांतमायेति हे अगुणेति च संबोधनं कर्मभिः सृष्ट्यादिकार्यैर्लिंगानि यस्येति योज्यं यद्वा प्रशांतामायागुणा

प्रशांतमायागुणकर्मलिंगमनामरूपं सदसद्विमुक्तं ज्ञानोपदेशाय गृहीतदेहं नमामहे त्वां पुरुषं पुराणं ॥२५॥ त्वन्मायारचिते
लोके वस्तुबुद्ध्या गृहादिषु भ्रमंति कामलोभेर्ष्यामोहविभ्रांतचेतसः ॥२६॥ अद्य नः सर्वभूतात्मन् कामकर्मेंद्रियाशयः मोहपा
शो दृढश्छिन्नो भगवंस्तव दर्शनात् ॥२७॥ श्रीशुक उवाच ॥ इत्थं गीतानुभावस्तं भगवान्कपिलो मुनिः अंशुमंतमुवाचेदमनुगृ
ह्य धिया नृप ॥२८॥ श्रीभगवानुवाच ॥ अश्वोयं नीयतां वत्स पितामहपशुस्तव इमे च पितरो दग्धा गंगांभोर्हंति नेतरत् ॥२९॥
तं परिक्रम्य शिरसा प्रसाद्य हयमानयत् सगरस्तेन पशुना क्रतुशेषं समापयत् ॥३०॥ राज्यमंशुमति न्यस्य निःस्पृहो मुक्त हो
बंधनः ॥ और्वोपदिष्टमार्गेण लेभे गतिमनुत्तमां ॥३१॥ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे सगरोपाख्यानेऽष्टमो
ऽध्यायः ॥८॥ ॥

द्वयोर्यस्मिन् इत्येकमेव पदं वा ॥२५॥ नागं पश्याघते त्वन्मायेति यथा मां कामादिभिर्विभ्रांतानि चेतांसि येषां त इमे सर्वे गृहादिषु भ्रमंति ॥२६॥ हे सर्वभूतात्म
नः अस्माकं त्वत्कृपयैव घटितात् त्वद्दर्शनात् दृढोपि मोहमयः पाशश्छिन्नः कथंभूतः कामादीनामाश्रयः आश्चर्यं त्वत्प्रसादेन कृतार्था
स्मीत्यर्थः ॥२७॥२८॥ अश्वं लब्ध्वापि साकांक्ष प्रत्याह इमे चेति ॥२९॥ तं परिक्रम्येति श्लोकौ ॥३०॥३१॥ इति नवमेऽष्टमः ॥ ॥

नमेवेंशुमतोवंशःखट्वांगावधिवृण्एतिगंगांभूतलमानिन्येयस्यपौत्रोभगीरथः। यथासगरःपौत्रायराज्यंदत्वातपस्तेपे तथाचांशुमांश्चस्वपुत्रायरा
ज्यंदत्वामहांतंकालंतपस्तेपेइतिचकारस्यार्थःनाशक्नोतगंगामानेतुमितिशेषःसंस्थितःमृतःकालंमृत्युंएयिवान्प्राप्तःतंप्रत्यात्मानंदर्शयामास॥
तेवरदास्मीतिगंगयोक्तःसन्स्वमभिप्रायंपूर्वजोद्धरणंशशंसकथयामास ३ आहगंगा कोपिगगनात्पतंत्यामेवेगंधारयिताधारयिष्यति॥

पतं० शुकउवाच॥ अंशुमांश्चतपस्तेपेगंगानयनकाम्यया। कालंमहांतंनाशक्नोत्ततःकालेनसंस्थितः॥१ दिलीपस्तत्सुतस्तद्वदश
क्तःकालमेयिवान्। भगीरथस्तस्यपुत्रस्तेपेससुमहत्तपः॥२ दर्शयामासतंदेवीप्रसन्नावरदास्मिते। इत्युक्तःस्वमभिप्रायं
शशंसावनतोनृपः॥३ कोपिधारयितावेगंपतन्त्यामेमहीतले। अन्यथाभूतलंभित्वानृपयास्येरसातलं॥४ किंचाहंननृवंयास्ये
नरामय्यामृजंत्यघंमृजामितदघंकुत्रराजंस्तत्रविचिंत्यतां॥५॥ ॥भगीरथउवाच॥ साधवोन्यासिनःशांताब्रह्मिष्ठालोकपा
वनाः। हरंत्यघंतेंगसंगात्तेषास्तेह्यघभिद्धरिः॥६ धारयिष्यतितेवेगंरुद्रस्त्वात्माशरीरिणां। यस्मिन्नोतमिदंप्रोतंविश्वं
शाटीवतंतुषु॥७॥ इत्युक्त्वासनृपोदेवंतपसातोषयच्छिवं। कालेनाल्पीयसाराजंस्तस्येशःसम(?)तुष्यत॥८ तथेतिराज्ञाभि
हितंसर्वलोकहितःशिवः। दधारावहितोगंगांपादपूतजलांहरेः॥९॥ ॥ ॥

किंच आमृजंतिआलयिष्यंतितवोपापोविचिंत्यतां।५। हरंतिहरिष्यंति।६ अघंभिनत्तीत्यघभित्।६। आत्माकथंभूतःयस्मिन्निदंविश्वमोतंग्रथि राम
तंऊर्ध्वतंतुषुशाटीवपटइव। प्रोतंचतिर्यक्तंतुषुपटइव। असौसर्वाधारत्वाद्वेगंधारयिष्यतीत्यर्थः।७। इतिएवंगंगयाउक्तातद्भुत्वेतिपाठे १०
श्रावयित्वेत्यर्थः।८ राज्ञाभिहितंतथेत्यंगीकृत्यहरेःपादेनपूतंजलंयस्याः।९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०।११ ब्रसंमाजं गामाहात्म्यमाह। चतुर्भिः यस्याः जलस्पर्शमात्रेण तच्च केवलं देहभस्म निरेव न साक्षात् ब्रह्मणि स्वकृतेन दंडेन हता अपि। १२ तां श्र
द्धया सेवते शेषः तत्र पंचयति। भस्मीभूतेनांगेन यः संगः तेन। १३।१४ अनंतस्य विशेषणं संनिवेश्यपेति। त्रैगुण्यं देहसंबंधः।१५।१६ नलस्य सखा॥

भगीरथः स राजर्षिर्निन्ये भुवनपावनीं। यत्र स्वपितॄणां देहा भस्मीभूताः स्म शेरते १० रथेन वायुवेगेन प्रयांतमनुधावती दे
शान्पुनंती निर्दग्धानासिंचत् सगरात्मजान् ११ यज्जलस्पर्शमात्रेण ब्रह्मदंड हता अपि सगरात्मजा दिवं जग्मुः केवलं देहभ
स्मभिः १२ भस्मीभूतांगसंगेन स्वर्याताः सगरात्मजाः किंपुनः श्रद्धया देवीं ये सेवंते धृतव्रताः १३ नह्येतत्परमाश्चर्यं स्वर्धुन्या यदिहो
दितं अनंतचरणांभोजप्रसूताया भवच्छिदः १४ संनिवेश्य मनो यस्मिन् श्रद्धया मुनयो मलाः त्रैगु ण्यं दुस्त्यजं हित्वा सद्यो जाता
स्तदात्मतां १५ श्रुतो भगीरथाज्जज्ञे तस्य नाभोपरोभवत् सिंधुद्वीपः ततस्तस्मादयुतायुस्ततोभवत् १६ ऋतुपर्णो नलसखो
योश्वविद्यामयान्नलात् दत्वाक्षहृदयं चास्मै सर्वकामस्तु तत्सुतः १७ ततः सुदासस्तत्पुत्रो मदयंतीपतिर्नृपः आहुर्मित्रसहं यं वै
कल्माषांघ्रिमुत क्वचित् वसिष्ठशापाद्रक्षोभूत् अनपत्यः स्वकर्मणा १८ राजोवाच। किंनिमित्तो गुरोः शापः सौदासस्य महात्मनः ए
तद्वेदितुमिछामः कथ्यतां न रहो यदि २० शुक उवाच॥ सौदासो मृगयां किंचिच्चरन् रक्षो जघान ह मुमोच भ्रातरं सोथ गतः प्र
तिचिकीर्षया २१ स चिंतयन्नघं राज्ञः सूदरूपधरो गृहे गुरवे भोक्तुकामाय पक्त्वा निन्ये नरामिषं २२॥ ॥

नरहः ह
अयात् श्रावः तत्सुतः। ऋतुपर्णस्य सुतः।१७। तत्पुत्रः सौदासः।१८।१९।नरस्य. २०। मृगयां चरन् कंचिद्राक्षसं जघान तस्य भ्रातरं मुमोच।२१। स भ्राता
पलाय्य गतः अघं अनिष्टं सूदः पाचकस्तद्रूपधरः सन् राज्ञो गृहे वर्तमानः।२२॥ ॥

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनस्यमंजसा विलोक्य एवं नरमांसभक्षवहारेण २३ वसिष्ठ एवं तं शापं शदत्त्वा वार्षिकं चक्रे २४ रुशती तीव्रेण अपः स्वपादयोर्जहौ नान्यत्र तत्र हे
तुः दिशः इति एवं अनेन मित्रसहत्वमपि दर्शितं मित्रस्य कलत्रस्य वाचः सहत्वात् २५ तदेव राक्षसत्वे कल्माषौ अंघ्री चकार एणमुक्ताम्बुकर्मणः नपत्य
मतिय दुःक्तं तस्य पंचयति व्यवायकालस्त्यादिना कर्मणा अप्रजस्त्वं तेन वनमोकोनिवासो ययोः तौ वनौकसौ चैतौ दंपती च घथक्पदत्वेमकारलो

परिक्षिप्यमाणं भगवान् विलोक्यानघ्नमंजसा । राजानमशपत्क्रुद्धो रक्षो ह्येवं न विष्यसि २३ रक्षः स्तं तद्धि दित्वा चक्रे द्वादशवार्षि
कं सोथ पोंजलिना दाय गुरुं शप्तुं समुद्यतः २४ वारितो मदयंत्यापि रुशतीः पादयोर्जहौ । दिशः खमवनिं सर्वं पश्यन्जीवमयं नृ
पः २५ राक्षसं भावमापन्नः पादे कल्मषतां गतः । व्यवायकाले ददृशे वनौकोदंपती द्विजौ २६ क्षुधार्तो जगृहे विप्रं तत्पत्न्याहाकृतार्थ
वत् । न भवान् राक्षसः साक्षादिक्ष्वाकूणां महारथः २७ मदयंत्याः पतिर्वीर नाधर्मं कर्तुमर्हसि । देहि मे पत्यकामाया अकृतार्थं प
तिं द्विजं २८ देहोयं मानुषो राजन् पुरुषस्याखिलार्थदः । तस्मादस्य वधो वीर सर्वार्थवधमुच्यते २९ एष हि ब्राह्मणो विद्वान्त
पःशीलगुणान्वितः । आरराधयिषुर्ब्रह्म महापुरुषसंज्ञितं ३० सर्वभूतात्मभावेन भूतेष्वंतर्हितं गुणैः । सोयं ब्रह्मर्षिवर्य
स्ते राजर्षिप्रवरा विभो ३१ कथमर्हति धर्मज्ञ वधं पितुरिवात्मजः । तस्य साधोरपापस्य भ्रूणस्य ब्रह्मवादिनः ३२ कथं वधं यथा बभ्
रोर्मन्यते सम्मतो भवान् ३३

पश्चार्षः २६ अकृतार्थवत् दीनवत् २७ अकृतार्थं असमाप्तरति २८ ३० सर्वभूतानामात्मेति भावनया आरा
धयितुमिच्छुः यद्वा सर्वभूतानामात्मभावेन भूतेषु स्थितमपि गुणैरंतर्हितं ब्रह्मेति संबंधः पाठांतरे अंतर्हितः सोयमित्युत्तरेणान्वयः ३१ भ्रूणस्य श्रोत्रि
यस्य गर्भस्य वा श्रुतस्य इति वा बभ्रोर्गोः सतां मतो भवान् वधं कथं साधु मन्यत इत्यर्थः ३३ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३एणमपियेन विनान्नजीविष्यामि सोयं यदि भक्ष्यः क्रियते तर्हि मृतकं यथा मृत भार्यां मां पूर्वं भक्षय ॥ ३३ ॥ ३४ दिधिषुं गर्भाधानकर्त्तारं ३५ आधानात्
मैथुनात् ॥ हे अकृत प्रज्ञ मृत्युर्भवादर्शितः ३६ ॥ ३७ णतदेवं कर्मणा अप्रजः ॥ ३८ ॥ अविघ्नतद्धारेत्यर्थः ॥ नत्वप्रजायत न जातस्तत्पुत्रो वसिष्ठ एव तस्या

यद्ययं क्रियते भक्ष्यस्तर्हि मां खाद पूर्वतः ॥ न जीविष्ये विनानेन भक्षणं च मृतकं यथा ३३ एवं करुणया वाण्या विलपन्त्या अनाथ
वत् ॥ व्याघ्रः पशुमिवाखादत्सौदासः शापमोहितः ३४ ब्राह्मणी वीक्ष्य दिधिषुं पुरुषादेन भक्षितं ॥ शोचन्त्यात्मान मुर्वीश्याम
शापकुपिता सती ३५ यस्मान्मे भक्षितः पापकामार्त्तायाः पतिस्त्वया ॥ तवापि मृत्युराधानादकृतप्रज्ञ दर्शितः ३६ एवं मित्रस
हं राज्ञा पतिलोकपरायणा ॥ तदस्थीनि समिद्धेऽग्नौ प्रास्य भर्त्तुर्गतिं गता ३७ विपापो द्वादशाब्दांते मैथुनाय समुद्यतः ॥ विज्ञाय
ब्राह्मणीशापं महिष्या स निवारितः ३८ तत ऊर्ध्वं स तत्याज स्त्रीसुखं कर्मणाऽप्रजः ॥ वसिष्ठस्तदनुज्ञातो मदयन्त्यां प्रजामधात्
३९ सा वै सप्त समा गर्भमबिभ्रन्न व्यजायत ॥ जघ्नेऽश्मनोदरं तस्याः सोऽश्मकस्तेन कथ्यते ४० अश्मकान्मूलको जज्ञे यः स्त्रीभिः
परिरक्षितः ॥ नारीकवच इत्युक्तो निःक्षत्रे मूलकोऽभवत् ४१ ततो दशरथस्तस्मात्पुत्र ऐडविडस्ततः ॥ राजा विश्वसहो यस्य खट्वांग
श्चक्रवर्त्यभूत् ४२ यो देवैरर्थितो दैत्यानवधीद्युधि दुर्जयः ॥ मुहूर्त्तमायुर्ज्ञात्वैत्य स्वपुरं संदधे मनः ४३ ॥ ॥

उदरमश्मनाऽभ्यघान समुत्पन्नः सुतोऽश्मकः ४० स्त्रीभिः संवेष्ट्य परशुरामात्परिरक्षितः ॥ अतो नारीकवच इत्युक्तः निःक्षत्रे सति क्षत्रवंशस्य मूलमभवत्
अतो मूलक इति चोक्तः ॥ ४१ ॥ ४२ ॥ राक्षसैर्दैवैर्वरं वृणीष्वेत्युक्ते खट्वांगेनोक्तं प्रथमं तावन्ममायुः कथ्यतामिति दैवैश्चोक्तं मुहूर्त्तमात्रमिति ततो ज्ञात्वा
दैवैर्दत्तेन विमानेन शीघ्रं स्वपुरमेत्य मनो परमेश्वरे संदधे ४३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९ तदेवस्वसाधुत्वानुस्मरणपूर्वकंतत्कृतेननिश्चयेनदर्शयति। नेतिसप्तभिः। कुलदैवात्ब्रह्मकुलात्सकाशात्मेप्राणादयोनातिवल्लभानाति। प्रि
याः॥४४॥४५॥ त्वय्यंममत्रतभावनोहरिस्तस्मिन्निवभावनायस्यसोहंतकामंनवृणे।४६। तत्रहेतुः। यद्इतिविक्षिप्तानीन्द्रियाणिधीश्चयेषांतेदेवाअपि।४७।
अथतस्मात्त्वरूतास्वभावेनात्मनिरूढंगुणेषुसंगंविश्वकर्तुर्भावेनहित्वातमेवाहंप्रपद्यते।४८। अन्यभावंदेहाद्यपिनिमानरूपमज्ञानंहित्वा।४९।

नमेब्रह्मकुलात्प्राणाः कुलदैवान्नचात्मजाः॥ नश्रियोनमहीराज्यंनदाराश्चातिवल्लभाः॥४४ नबाल्येऽपिमतिर्मह्यमधर्मेरमते
कचित्। नापश्यमुत्तमश्लोकादन्यत्किंचनवस्त्वहं।४५। देवैःकामवरोदत्तोमह्यंत्रिभुवनेश्वरैः॥ नवृणेतमहंकामंभूतभावभाव
ते ~~विषुसंगंगुणेषुगंधर्वपुरोपमेषु। रूढंप्रकृत्यात्मनिविश्वकर्तुर्भावेनहित्वातमहंप्रपद्ये ४७ अथेश~~
भावनभावनः॥४६॥ येविक्षिप्तेन्द्रियधियोदेवास्तेस्वहृदिस्थितं। नविंदंतिप्रियंशाश्वदात्मानंकिमुतापरे॥४७॥ अथेशमा
यारचितेषुसंगंगुणेषुगंधर्वपुरोपमेषु। रूढंप्रकृत्यात्मनिविश्वकर्तुर्भावेनहित्वातमहंप्रपद्ये॥४८॥ इतिव्यवसितोबुध्या
नारायणगृहीतया। हित्वान्यभावमज्ञानंततःस्वंभावमाश्रितः॥४९॥ यत्तद्ब्रह्मपरंसूक्ष्ममशून्यंशून्यकल्पितं। भगवान्वासु
देवेतियंगृणंतिहिसात्वताः॥५०॥ ॥इतिश्रीभागवतेमहापुराणेनवमस्कंधेश्रीसूर्यवंशानुवर्णनेनवमोऽध्यायः॥ ॥श्रीशुकउवाच
खट्वांगाद्दीर्घबाहुश्चरघुस्तस्मात्पृथुश्रवाः॥ अजस्ततोमहाराजस्तस्माद्दशरथोऽभवत्॥१॥ ॥

स्वंभावमेवाह। यत्तदिति। शून्यवत्कल्पितं। वाचामविषयत्वात्। वासुदेवइतियंगृणंति। ब्रह्मण एवंनक्ताद्वयद्यर्थमाविःकृततनोवसुदेव राम
त्वात्॥५०॥ इतिनवमेनवमः॥९॥ दशमेप्राहखट्वांगवंशेश्रीरामसंभवात्तच्चरित्रंचलंकेशंहत्वाऽयोध्यागमावधि। खट्वांगाद्दीर्घबाहुः॥१॥ २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषिभिर्वाल्मीकिमुख्यैर्भूरि वर्णितं त्वयाप्युक्तः श्रुतं तथापि संक्षेपतः कथ्यमानं शृणुष्व ग्रंथकोटिभिराकीर्णमद्भुतं रामविक्रमं अध्यायद्वयतो
वक्ष्येऽनेकश्लोकेसमस्यपि। स कोशलेंद्रः श्रीरामः नोऽस्मान् अवतात् पातु कथंभूतः यो गुर्वर्थी पितुः। सत्यस्य पालनार्थं त्यक्तराज्यः सन् पद्मवदति
मृदुकमारम्यां पद्भ्यां तदेवाह। प्रियायाः पाणिनापि स्पर्शेनाक्षिक्षमाभ्यां ययोः ताभ्यां प्रतिवनं व्यचरत्। हरीशो हनुमान् सुग्रीवोऽनुजो लक्ष्मणस्ता
भ्यां मृजिता अपनीता पथरुजा मार्गश्रमो यस्य सः शूर्पणख्या वैरूप्यात्कर्णनासिकाछेदात् हेतोः। तया प्रबोधितेन रावणेनापहारात्। प्रियेण

तस्यापि भगवानेष साक्षाद्ब्रह्ममयो हरिः। अंशांशेन चतुर्धागात्पुत्रत्वं प्रार्थितः सुरैः॥२॥ रामलक्ष्मणभरतशत्रुघ्ना इति
संज्ञया। तस्यानुचरितं राजन्नृषिभिस्तत्त्वदर्शिभिः॥३॥ श्रुतं हि वर्णितं भूरि त्वया सीतापतेर्मुहुः॥३॥ गुर्वर्थे त्यक्तराज्यो व्यचर
दनुवनं पद्मपद्भ्यां प्रियायाः पाणिस्पर्शाक्षमाभ्यां मृजितपथरुजो यो हरीन्द्रानुजाभ्यां। वैरूप्याच्छूर्पणख्याः प्रियविरहरुषा
रोपितभ्रूविजृंभत्रस्ताब्धिर्बद्धसेतुः खलदवदहनः कोशलेंद्रोऽवतान्नः॥४॥ विश्वामित्राध्वरे येन मारीचाद्या निशाचराः। पश्य
तो लक्ष्मणस्यैव हता नैरृत पुंगवाः॥५॥

कलत्रेण विरहः तेन रुट् तया आरोपितयोर्भ्रुवोर्विजृंभेणैव त्रस्तोऽब्धिर्यस्मात् ततस्तद्विज्ञापनेन बद्धः सेतुर्येन ततः खला रावणादय एव द
वो वनं तस्य दहनः॥४॥ संक्षेपतो वर्णितं रामचरितं अथादित आरभ्य विस्तरेणाह। विश्वामित्राध्वर इत्यादिना यावदुत्तराध्यायसमाप्ति पश्यत
एव लक्ष्मणस्य तमप्यनपेक्ष्यैव हता इत्यर्थः। यच्छब्दानां कोशलेंद्रोऽवतादित्यनेनैवान्वयः॥५॥ ॥

ना०न०
२१

योकेयेवीरास्तेषां समितौ समाने ऐक्ष्वं चैयंबकं धनुरिक्षुयष्टिमिव लीलयैवादाय सज्जीकृतमारोपितं विलक्षमध्ये बभंज हे नृप तत्र्यंबकं कठिनं गरिष्ठं
तदुद्वाहकानां त्रिनिशतैरुपनीतं बालगजस्य लीलेक्षुवल्लीलाय समस्त ॥ ६ ॥ अत्र तुरूपाणि स्वयोग्यानि गुणशीलादीनि यस्याः तां सीतासंज्ञां पूर्वं
उरसि स्थितिलक्ष्मीमानो यथा तां श्रियं जित्वा धनुर्भंगमहानादश्रवणात्कुपितस्य भृगुपतेर्दर्पं अपनयत् । अपनीतवान् कथंभूतस्य त्रिःसप्तकृत्वः
राजबीजस्य भूमौ महीयोकरोत् तस्य ॥ ७ ॥ इदानीं गुर्वर्थ इति श्लोकं विवरण्याह । कदाचित्कैकेय्याः तुष्टेन राज्ञा त्वदपेक्षितं दास्यामीति प्रतिश्रुतं

यो लोकवीरसमितौ धनुरैशमुग्रं सीतास्वयंवरगृहे त्रिशतोपनीतं । आदाय बालगजलीलइवेक्षुयष्टिं सज्जीकृतं नृप विलक्ष्य ब
भंज मध्ये ॥ ६ ॥ जित्वानुरूपगुणशीलवयोंगरूपां सीताभिधां श्रियमुरस्थलस्थमानां । मार्गे व्रजन् भृगुपतेर्मनयत्प्ररूढं दर्पं मही
मकृतयः त्रिरराजबीजां ॥ ७ ॥ यः सत्यपाशपरिवीतपितुर्निदेशं खेण स्वचापि शिरसा जगृहे समार्यः । राज्यं श्रियं प्रणयिनः सु
हृदो निवासं त्यक्त्वा ययौ वनमसङ्ग इव मुक्तसंगः ॥ ८ ॥ रक्षःस्वसुर्व्यकृत रूपमशुद्धबुद्धेस्तस्याः खरत्रिशिर दूषणमुख्यबंधून्
चाजघ्निवान्चतुर्दशसहस्रमपारणीयकोदंडपाणि[illegible]रटमानवामसह्ववुम् ॥ ९ ॥ ॥

ततः श्रीरामस्य युवराज्याभिषेकसमये तथा भरतस्य राज्यं रामस्य च वने वासः प्रार्थितः । तदा सत्यपाशेन परिवीतस्य पितुर्निदेशमाज्ञां शिरसा
जगृहे ततो राज्यादिकं त्यक्त्वा सभार्यो वनं ययौ । दुस्त्यजस्यापि सहर्षत्यागे दृष्टांतः । मुक्तसंगो योगी अस्तूत् प्राणान् विवेति ॥ ८ ॥ रक्षोरावणस्य स्व
सुः शूर्पणखाया अशुद्धबुद्धेः सीताजिघृक्षोः कामातुरायाः । इति वा रूपं व्यकृत विकारमनयत् तस्याः । खरत्रिशिरोदूषणमुख्यान् बंधून् वीरान् युधि तां
चतुर्दशसहस्रं जघान अपारणीयं अलंघ्यं असह्यं कोदंडं पाणौ यस्य सः ॥ ९ ॥ राम
२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सीतायाः कथाश्रवणेन दीपितो रुष्टयो यस्य तेन सीतां हरिष्यता स्वस्मान्नीतेन स्वस्मादाश्रमादपकर्षणार्थं सृष्टं निसृष्टं मारीचं विलोक्य जघान कथंभूतं
अद्भुतेन वपुषा स्वर्णहरिणदेहेनोपलक्षितं अत एव प्रलोभनेनाश्रमतस्तेनापकृष्टः सन् कं दृष्ट्वा यथा उग्रः श्रीरुद्रः॥१०॥ ततः स्वरक्षोधमेन रावणेन
नाश्रमसमं तमपनीतायां प्रियया वियुक्तो नाना सह लक्ष्मणेन कृपणं वने नेवचार। किमभिप्रायः सन् दक्षिणेनेन प्रकारेण स्त्रीसंगिनां दुःखोदर्कां
गतिं प्रख्यापयन्॥११॥ आत्मार्थेन निकृत्तेन कर्मणा रावणेन सह युद्धेन हतं कं संस्कार्यदहनादिकं यस्य तं जटायुषं पुत्र इव दधाक बंधं स्वयं ह

सीताकथाश्रवणदीपितरुष्टयेन सृष्टं विलोक्य नृपते दशकंधरेण। जघ्ने द्रुतेन वपुषाश्रमतोपकृष्टो मारीचमाशु विशिखेन य
थाक सुग्रः॥१०॥ रक्षोधमेन हृकवाद्विपिने समक्षं वैदेहराजदुहितर्यपयापितायां। नानावने कृपणवत् प्रियया वियुक्तः स्त्रीसं
गिनां गतिमिति प्रथयंश्चचार॥११॥ दग्ध्वात्मकृत्यहतकृत्यमहत्कबंधं सख्यं विधाय कपिभिर्दयिता गतिं तैः॥ बुध्वाथ वालिनिह
तेप्लवगेन्द्रसैन्यैर्वेलामगात्समनुजोजनवाग्निताद्धिः॥१२॥ यद्दोषविभ्रमविवृत्तकटाक्षपातसंभ्रांतनक्रमकरो नयगीर्ण
घोषः॥ सिंधुः शिरस्पर्शणं परिगृह्य रूपी पादारविंदमुपगम्य वभाष एतत्॥१३॥

णायप्रसारितबाकुं रघुसमहन् अथवा लिनिहतैः कपिभिर्दयितायाया गतिं बुध्वा अञ्जनवाग्भ्यामर्च्चितत्वं द्वी यस्य समनुजो वेलां समुद्रतीरमगात्॥१२॥
तत्र त्रिरात्रमुपवासेन प्रार्थितोपि सिंधुर्यदानोपस्थितः। तदा यस्य रोषविक्रमेण क्रोधवीलया विवृत्तोयः कटाक्षः तस्य पातेन संभ्रांता न
क्रा मकराश्च यस्मिन् नयेन गीर्णः संनितो घोषो येन सः सिंधुः एतद्वक्ष्यमाणं वभाषे अर्हणमर्घादिकं रूपी मूर्तिमान्॥१३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वा०न०
२२

न्मषणमेवाह नवामितिवाम्या एतावत्पर्यंतंमनुनिश्चितं नविदाम विदामनजानीमइत्यर्थः इदानींमनुज्ञातोसीत्याह यदितिष्टथकूपदंयस्मस्य
र्थः यद्वशेम्पः सत्वादिभ्यः सुरगणाद्योनवंत्मिवानिति ।४। कामंयथेष्ठंजलसाक्रम्यापिप्रयाहि अवमेहंपुरीषप्रार्यंत्रैलोक्यरावणयनिश्चाकंदयति
तथातंजहि हिवीरयद्यपितवजलंप्रतिबंधकंनभवतितथापीहसेतुंबध्नीहितद्धिकिमर्थंतियशसोविस्तारायतदेवाह यंसेतुमुपेत्यदुःकरंक
मविदस्तवद्य शेगास्संतिनूपास्ते ।५। तद्वाक्यमभिनंद्ययत्कृतंतदाह बध्वेति विविधैरद्रीणांकूटैः शृंगैः सेतुंबध्वात्रमेसीतान्वेषणेहनुमतेवद

नत्वांत्वयंजडधियोनुविदाम मन्मनकूटस्थमादिपुरुषंजगतामधीशं यस्मत्वतःसुरगणारजसःप्रजेशाम्मन्योश्चभूतपतयः
सनवाननुगुणेशाः ।४। कामंप्रयाहिजहिविश्रवसोवमेहं त्रैलोक्यरावणमवाप्नुहिवीरपत्नीं बध्नीहिसेतुमिहतेयशसोवित
त्यैगायंतिदिग्विजयिनोयमुपेत्यभूपाः ।५। बध्वोदधौरघुपतिर्विविधाद्रिकूटैःसेतुंकपीन्द्रकरकंपितभूरुहांगैः सुग्रीव
नीलहनुमत्प्रमुखैःरनीकैर्लंकांविभीषणदृशाविशदग्धां ।६। सावानरेंद्रबलरुद्धविहारकोष्टश्रीद्वारगोपुरसदोव
लभीविटंका निर्भज्यमानधिषणध्वजहेमकुंभशृंगाटकागजकुलैर्ह्रदिनीवघूर्णा ।७।

ग्ध्वांलंकामाक्रिता कथंभूतैःशृंगैः कपीन्द्राणांकरैःकंपिताविभूरुहाणामंगानिशाखादीनियेषुतैः विभिषणस्यदृशाबुध्याकैःसहाविशत् सु
ग्रीवादयःप्रमुखायेषांतैरनीकैः तैंतश्चसालंकाघूर्णाविचलिताबभूव ।६। कथंभूतावानरेंद्राणांबलैरुद्धाविहारादयोयस्यां निर्भज्यमाणा धि ष णा
दयोयस्यांसातत्रविहारःक्रीडास्थानंकोष्ठंधान्यागारादिश्रीःकोशाद्धारंगृहादीनांगोपुरंपुरद्धारंसदःसभाः वलभीप्रासादाद्विपुरोभागछादिनी
विटंकःकपोतपालिकाधिषणंवेदिकादि शृंगाटकंचतुःपथं ।७।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रक्षस्पतिः रावणः पुत्रमिंद्रजितं प्रहस्तादींश्च सममहिनोत् अभ्ययुंक्त । ण अस्तिशूलादिभिर्दुर्गमां तां यातुधानघटनां सुग्रीवादिभिरन्वितः । श्रीरामोऽभ्यगात् । मरुत्सुतो हनुमान् ऋक्षो जांबुवान् । तैः रघुपतेरनीकपाः अंगदाद्याः ।१९। ते सर्वे रावणस्य हस्त्यादिभिर्यद्वदस्थं सैन्यं तत्र द्वंद्वं यथा स्यात्तथाभिपत्य संगम्य द्रुमादिभिर्जघ्नुः । कान् सीताया आत्मविमर्शेन निहतं मंगलं यस्य स रावणः । इतीर्यते षां तान् ।२०। स्वबलस्य नष्टिं नाशम वेक्ष्य रुष्टः क्रुद्धः

रक्षस्पतिस्त्वद्बलौघनिकुंभकुंभकर्णधूम्राक्षदुर्मुखसुरांतनरांतकादीन् । पुत्रं प्रहस्तमतिकायविकंपनादीन् सर्वान्नियानभमहिनोद
यकुंभकर्णौ । तां यातुधानघटनामसिशूलचापप्रासार्ष्टिशक्तिशरतोमरखड्गदुर्गां सुग्रीवलक्ष्मणमरुत्सुतगंधमादनीलांगद
द्विपिनसादिभिरन्वितोगात् ।१९। ते नीकपा रघुपतेरभिपत्य सर्वे द्वंद्वं वरूथमिनपत्तिरथाश्वयोधैः । जघ्नुर्द्रुमैर्गिरिशिलादिभिरंगदा
द्याः सीताभिमर्शहतमंगलरावणेशान् ।२०। रक्षस्पतिः स्वबलनष्टिमवेक्ष्य रुष्टस्त्वारुह्य यानकमथाभिससार रामं । सः स्यंदने द्युम
तिमातलिनोपनीते विभ्राजमानमहनन्निशितैः क्षुरप्रैः ।२१। रामस्तमाह पुरुषादपुरीषयन्त्रः कांतस्य मद्गमसतापहृता क्षयवर्तेऽस्य
कत्रपस्य फलमद्य जुगुप्सितस्य यच्छामि काल इव कर्तुरलंघ्यवीर्यः ।२२ एवं ... क्षिपन् धनुषि संधितमुग्रसर्पबाणं स वज्रमि
व तद्हृदयं बिभेद । सोऽस्त्रग्वमन् स्वासुरैरम्रपतद्विमानात् तद्गाहे तिजस्यतिजने सुकृतीव रिक्तः ॥२३॥

पु

सन् यानकं पुष्पकं विमानं रथं वाऽऽरुह्य श्रीराममभिससार । अथ पतंगः सः स्यंदने स्वर्गस्थे इंद्रस्य रथे मातलिना इंद्रसारथिनोपनीते द्युमति दीप्तियुक्ते विभ्राजमानमहनत् । अहन्
रथं हि पुरुषादपुरीषयन्त्रः सैः पुरीषभायययद्य स्मादपहृताश्च वत्स्थाय यथाऽस्य समद्गं गृहे प्रविश्य किमपि हरतितत्त्वत् । तस्मात् जुगुप्सितस्य कर्मणः
कर्तुर्लिः ... यकालइवालंघ्यवीर्योहिं फलं यच्छामि । अधर्मकर्तुः पुंसः कालो यथा यच्छतीति वा । रिक्तः क्षीणपुण्यः सुकृती विमानाद्दिव्यविमानात् पुष्पका
२२
त्पपत दिवि वा ॥२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राक्षसस्त्रीणां विलापमाह॥ तत इति पंचभिः॥ मंदं स्खलत् मुदरं यस्याः तया रावणेनार्ष्यया सह॥ २४॥ २५॥ परैरहिता गृध्राणां श्वा नं जस्य ःनरक हेतवे नके रे

या

ततो निःक्रम्य लंकायां यातुधान्यः सहस्रशः॥ मंदोदर्या समं तस्मिन् प्ररुदंत्य उपाद्रवन्॥ २४॥ स्वान् स्वान् बंधून् परिष्वज्य लक्ष्मणेषुभिरर्दितान्॥ रुरुदुः सुस्वरं दीना घ्नंत्य आत्मानमात्मना॥ २५॥ हा हताः स्म वयं नाथ लोकरावण रावण॥ कं यायाच्छरणं लंकात्वद्विहीना परार्दिता॥ २६॥ नैव वेद महाभाग भवान् कामवशं गतः॥ तेजोनुभावं सीताया येन नीतो दशामिमां॥ २७॥ कृतैषा विधवा लंका वयं च कुलनंदन॥ देहः कृतोन्नं गृध्राणामात्मा नरकहेतवे॥ २८॥ श्रीशुक उवाच॥ स्वानां विभीषणश्चक्रे कोसलेंद्रानुमोदितः॥ पितृमेधविधानेन यदुक्तं सांपरायिकं॥ २९॥ ततो ददर्श भगवानशोकवनिकाश्रमे॥ क्षामां स्वविरहव्याधिं शिंशपामूलमास्थितां॥ ३०॥ रामः प्रियतमां भार्यां दीनां वीक्ष्यान्वकंपत॥ आत्मसंदर्शनाह्लादविकसन्मुखपंकजां॥ ३१॥ आरोप्यारुरुहे यानं भ्रातृभ्यां हनुमद्युतः॥ विभीषणाय भगवान् दत्वा रक्षोगणेशतां॥ ३२॥ लंकामायुश्च कल्पांतं ययौ चीर्णव्रतः पुरीं॥ अवकीर्यमाणः कुसुमैर्लोकपालार्पितैः पथि॥ ३३॥ उपगीयमानचरितः शतधृत्यादिभिर्मुदा॥ गोमूत्रयावकं श्रुत्वा भ्रातरं वल्कलांबरं॥ ३४॥ महाकारुणिकोतप्यत् जटिलं स्थंडिलेशयं॥ भरतः प्राप्तमाकर्ण्य पौरामात्यपुरोहितैः॥ पादुके शिरसि न्यस्य रामं प्रत्युद्यतोग्रजम्॥ ३६॥

मोगाय॥ २८॥ सांपरायिकं और्ध्वदैहिकं॥ २९॥ ३०॥ आत्मनः स्वस्य संदर्शनेन आह्लादस्तेन विकसन्मुखपंकजं यस्याः॥ ३१॥ तां यानं पुष्पकं भ्रातृभ्यां लक्ष्मणसुग्रीवाभ्यां॥ ३२॥ आयुश्च दत्वा तेनापि सहैव ययौ॥ ३३॥ गोमूत्रे पक्व यवान्न तो जिनं भ्रातरं॥ ३४॥ ३६॥

यावकं गोमूत्र



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वशिबिरात् रामं विना यो ध्यामप्रविशन् तस्य वासं यत्र निर्मितवान् तस्मात् साकान्तात् गीतादिभिर्युक्तो रामं प्रत्युद्यतो निमुखं ययौ। ब्रह्मघोषेण महता
घोषेण पठद्भिः ॥ ३७ स्वर्णरसाक्ता ः कक्षाः प्रांता यासां ताभिः पताकाभिः हैमैरितिच । ता रिरथविशेषणानि ॥ ७० पारमेष्ठ्यानि राजार्हाणि छत्रचा

नंदिग्रामात् स्वशिबिरात् गीतवादित्रनिस्वनैः। ब्रह्मघोषेण च मुक्तः पठद्भिर्ब्रह्मवादिभिः ॥ ३७ स्वर्णकक्ष पताकाभिर्हैमैः चि
त्रध्वजै रथैः। सदश्वैः रुक्मसन्नाहैर्नटैः पुरटवर्म्मभिः ३८। श्रेणीभिर्वारमुख्याभिर्नृत्यैश्चैव पदानुगैः। पारमेष्ठ्यमुपादाय पण्या
मुच्चावचानि वा ३९ पादयोर्न्यपतत् प्रेम्णा प्रक्लिन्न हृदयेक्षणः। पादुके न्यस्य पुरतः प्रांजलिर्बाष्पलोचनः ४० तमाश्लि
ष्य चिरं दोर्भ्यां स्नापयन्नेत्रजैर्जलैः। रामो लक्ष्मणसीताभ्यां विप्रेभ्यो येर्ह सत्तमाः ४१। तेभ्यः स्वयं नमश्चक्रे प्रजाभिश्च नम
स्कृतः। धुन्वंत उत्तरासंगान् पतिं वीक्ष्य चिरा[illegible]ते। ४२ उत्तराः कोशलामात्स्यैः किरंतो ननृतुर्मुदा। पादुके भरतो गृह्णात् चाम
र व्यजनोत्तमे ४३। विभीषणः ससुग्रीवः श्वेतं छत्रं मरुत्सुतः। धनुर्निषंगान् शत्रुघ्नः सीता तीर्थ कमंडलुं ४४ अबिभ्रदंग
दः खड्गं हैमं चर्म ऋक्षराट् नृप। पुष्पकस्थो न्वितः स्त्रीभिः स्तूयमानश्च वंदिभिः ४५ विरेजे भगवान् राजन् ग्रहैश्चंद्र इवोदितः
भ्रातृभिर्नंदितः सोपि सोत्सवां प्राविशत् पुरीं ४६ प्रविश्य राजभवनं गुरुपत्नीः स्वमातरं गुरून् वयस्यावरजान् पूजितः प्र
त्यपूजयत् ४७ वैदेही लक्ष्मणश्चैव यथावत् समुपेयतुः पुत्रान् स्वमातरः स्वास्तु प्राणांस्तन्व इवोत्थिताः आरोप्यांकेभिषिंचंत्यो
बाष्पौघैर्विजहुः शुचः ४८ मरादीनि ३९ प्रेम्णा प्रक्लिन्ने हृदयमीक्षणे च नेत्रे यस्य ४० नेत्रजैर्जलैः स्नापयन् आकिमर्ह सत्तमाः कु
लवृद्धाः ४१ तैर्मोपि नमनं चक्रे ४२ अयोध्या प्रवेशप्रकारमाह। पादुके शतसार्धे विभिः ४३ धनुश्च निषंगौ च तान् गुरुपत्नीः कैकेय्याद्या ये
वयस्यान् अवरजांश्च ४७। बाष्पौघैरभिषिंचंत्यः शुचः शोकान् विजहुः शोकं स्पर्श ४८।

४९।५६। इति नवमे टीकायां दशमोऽध्यायः॥१०॥ ॥ततश्चैकादशे योध्यामावसन्नतुजैः सह॥ यज्ञादियज्ञकारित्वेन रामस्तदनुवर्ण्यते॥ ॥तदंत
जटा निर्मुच्य विधिवत् कुलवृद्धैः समं गुरुः॥ अभ्यषिंचद्यथैवेंद्रं चतुःसिंधुजलादिभिः॥४९॥ एवं कृतशिरःस्नानः सुवासाः स्र
ग्व्यलंकृतः॥ स्वलंकृतैः सुवासोभिर्भ्रातृभिर्निर्ययावनौ॥५०॥ अग्रहीदासनं भ्रात्रा प्रणिपत्य प्रसादितः॥ प्रजाः स्वधर्मनिरता व
र्णाश्रमगुणान्विताः॥५१॥ जुगोप पितृवद्रामो मेनिरे पितरं च तं॥ त्रेतायां वर्त्तमानायां कालः कृतसमोऽभवत्॥५२॥ रामे राजनि ध
र्मज्ञे सर्वभूतसुखावहे॥ वनानि नद्यो गिरयो वर्षाणि द्वीपसिंधवः॥५३॥ सर्वे कामदुघा आसन् प्रजानां भरतर्षभ॥ नाधिव्याधिजरा
ग्लानिदुःखशोकभयक्लमाः॥५४॥ मृत्युश्चानिच्छतां नासीत् रामे राजन्यधोक्षजे॥ एकपत्नीव्रतधरो राजर्षिचरितः शुचिः॥५५॥
स्वधर्मं गृहमेधीयं शिक्षयन् स्वयमाचरन्॥ प्रेम्णानुवृत्त्या शीलेन प्रश्रयावनता सती॥५६॥ धिया ह्रिया च भावज्ञा भर्तुः सीता ह
रन्मनः॥ ॥इति श्रीभागवते महापुराणे नवमस्कंधे श्रीरामानुचरिते दशमोऽध्यायः॥१०॥ ॥श्रीशुक उवाच॥ भगवानात्म
नात्मानं राम उत्तमकल्पकैः॥ सर्वदेवमयं देवं ईजे आचार्यवान्मखैः॥१॥ होत्रेऽददाद्दिशं प्राचीं ब्रह्मणे दक्षिणां प्रभुः॥ अध्वर्यवे प्रती
चीं उदीचीं सामगाय सः॥२॥ आचार्याय ददौ शेषां यावती भूस्तदंतरा॥ मन्यमान इदं कृत्स्नं ब्राह्मणोऽर्हति निस्पृहः॥३॥ इत्ययं त
दलंकारवासोभ्यामवशेषितः॥ तथा राज्ञ्यपि वैदेही सौमंगल्यावशेषिता॥४॥ ते तु ब्रह्मण्यदेवस्य वात्सल्यं वीक्ष्य संस्तुतं॥ प्रीताः क्लि
न्नधियस्तस्मै प्रत्यर्प्येदं बभाषिरे॥५॥

रात्रासां दिशां मध्ये यावती भूः तां ब्राह्मण एवार्हतीति मन्यमानः॥३॥ अयं श्रीरामः॥ तत्तदा सौमंगल्यमात्र रणादिकं तावन्मात्रमवशेषितं
यस्मात्तद्व्यतिरिक्तं हिरण्यादि सर्वं ददाविति अर्थः॥४॥५॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभूदत्तं किमदत्तं सर्वं दत्तमित्यर्थः॥ विरूपश्च विरूप॥ ह्यन्यस्तदंडैः मुनिभिरर्पितौ चित्तन्यस्तावंघ्री यस्य तस्मै ते बर्पितावंघ्रीये नेतिवा॥ ७॥ ए
असंविदः अज्ञातु प्राचेतसो वाल्मीकिः॥ तस्याश्रमं प्राप्ता॥ १०॥ अंतर्वत्नी गर्भिणी क्रियाजातकर्माद्याः॥ ११॥ १५॥ ईश्वरोपि स्तुत्यो रोद्धुं नात्राक्रोत् १८

अप्रपन्नः त्वया किन्नु भगवन्नु भुवनेश्वर॥ यत्त्वोंतर्हृदयं विरूपतमोऽहमिस्वरो विषा॥ ह्न नमो ब्रह्मण्यदेवाय रामायकुंठमे
धसे॥ उत्तमश्लोकधुर्याय न्यस्तदंडार्पितांघ्रये॥ ७॥ कदाचिल्लोकजिज्ञासुर्गूढो रात्र्यामलक्षितः॥ चरन्वाचोऽशृणोद्रामो भार्या
मुद्दिश्य कस्यचित्॥ ८॥ नाहं बिभर्मि त्वां दुष्टामसतीं परवेश्मगां॥ स्त्रैणो हि बिभृयात्सीतां रामो नाहं भजे पुनः॥ ९॥ इति लो
२ कॉद्बहुमुखाद्दुराराध्याद संविदः॥ पत्या नीतेन मात्यक्ता प्राप्ता प्राचेतसाश्रमं॥ अंतर्वत्न्यागते काले यमौ सा सुषुवे सुतौ
कुशो लव इति ख्यातौ तयोश्चक्रे क्रिया मुनिः॥ ११॥ अंगदश्चित्रकेतुश्च लक्ष्मणस्यात्मजौ स्मृतौ॥ तक्षः पुष्कल इत्यास्तां भरतस्य म
हीपते॥ १२॥ सुबाहुः श्रुतसेनश्च शत्रुघ्नस्य बभूवतुः॥ गंधर्वान्कोटिशो जघ्ने भरतो विजये दिशां॥ १३॥ तदीयं धनमानीय
सर्वं राज्ञे न्यवेदयत्॥ शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसं॥ १४॥ हत्वा मधुवने चक्रे मथुरां नाम वै पुरीं॥ मुनौ निःक्षिप्य तनयौ
सीता भर्त्रा विवासिता॥ १५॥ ध्यायंती रामचरणौ विवरं प्रविवेश ह॥ तच्छ्रुत्वा भगवान्रामो रुंधन्नपि धिया शुचः॥ स्मरंस्तस्या गु
णांस्तांस्तान्नाशक्नोद्रोद्धुमीश्वरः॥ स्त्रीपुंप्रसंग एतादृक् सर्वत्र त्रासमावहः॥ १७॥ अपीश्वराणां किमुत ग्राम्यस्य गृहचेतसः॥ त
त ऊर्ध्वं ब्रह्मचर्यं धारयन्नजुहोत्प्रभुः॥ त्रयोदशाब्दसाहस्रमग्निहोत्रमखंडितं॥ १८॥ न्यातिचित्रमेतत् स्त्रीपुंसोः प्रसंगः आसक्तिः त्रा
समावहतीति तत्॥ विनक्के रत्नुगार्षः॥ पादांतरं सुगमं॥ १३॥ किमुते ते प्रासंगिकोक्तिः॥ अग्निहोत्रमजुहोत्॥ १०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वा॰ न॰ २५ आत्मज्योतिर्निजं धाम॥ जलधिबंधनं अस्मैव युगे अस्य रघुसां वध इति दं कविति राश्च । अमिव वर्णितम पि यन्ना स्तुतिर्न न वति॥ तत्र हेतुः अधिक र
साम्यान्यां विमुक्तं धाम यत्रनावो यस्य तस्य किं कपयः सहायाः अतः सुग्रीवाद्याश्रयणं यथा लीलामात्रं तथैवेदमपि युक्तं चैतदित्याह सुराणां॥
यास्त्र याश्चात्रा स्वीकृता लीलार्थं तनुर्येन तस्य॥१७॥ एवंविधं लीलाप्रयोजनं दर्शयन् प्रणमति यस्य यशः नृपाणां युधिष्ठिरादीनां सदस्सु ऋ
षयो मार्कंडेयादयो गायंति दिग्गिनेंद्राणां पट्टवदाभरणरूपं तस्य यं तं आत्ममित्यर्थः॥ नाकपालादेवाः वसुपालाश्च तेषां किरीटैर्जुष्टं पादां

स्मरतां हृदि विन्यस्य विद्धं दंडककंटकैः स्वपादपल्लवं राम आत्मज्योतिरगात्ततः॥१८॥ नेदं यशो रघुपतेः सुरयाच्ञया
त्तलीलातनोरधिकसाम्यविमुक्तधाम्नः रक्षोवधो जलधिबंधनमस्त्रपुगैः किं तस्य शत्रुहनने कपयः सहायाः॥१९॥ यस्या
मलं नृपसदस्सु यशोधुनापि गायंत्यघघ्नमृषयो दिगिभेंद्रपट्टं तं नाकपालवसुपालकिरीटजुष्टपादांबुजं रघुप
तेः शरणं प्रपद्ये॥२०॥ यैः संस्पृष्टो विदृष्टो वा संविष्टोनुगतोपि वा कोसलास्ते ययुः स्थानं यत्र गच्छंति योगिनः पु
रुषो रामचरितं श्रवणैरुपधारयन् आनृशंस्यपरो राजन् कर्मबंधैर्विमुच्यते॥२१॥ राजोवाच॥ कथं स भगवान् स्व
मात्मनः कृत्वान्वा स्वयमात्मनः॥ तस्मिन्वा तेन्ववर्तंत प्रजाः पौराश्च ईश्वरे॥२३॥

बुजं यस्य तं रघुपतिं प्रपद्ये इति शेषः॥ तस्य रघुपतेर्जुष्टं पादांबुजं प्रपद्य इत्यर्थः॥२०॥ स रामः संविष्टः उपवेशितः॥ अनुगतो वा यैस्ते कोशलास्त
देशवासिनः सर्वेपि यत्र योगिनो गच्छंति तत्स्थानं ययुः॥२१॥ आनृशंस्यपरः उपशमविष्टः मनः विमुच्यते॥२२॥ स रामः स्वयं कथम राम
वर्तत्वाकृतः इति वा कथमवर्तत कथंभूतान् आत्मनः आत्मांशभूतान् तस्मिन्वा ईश्वरे तेन्वा आदयः॥ अनु अनंतरं कथमवर्तंतेति प्रश्नत्रयं २५
॥२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र श्रीरामस्यान्वाचादिषु प्रवृत्तिप्रकारमाह अथेति ॥ अनेनैकत्वाहृणमपितदाज्ञानुमारितयाप्रवृत्तिरुक्ता ॥ २४ ॥ अथ सिंहासनस्वीकारानं
तरं पुरीं वर्णयति त्रिभिः । गंधोदकैर्मदविंदुभिश्च आसिक्ता मार्गा यस्यां सा सुतरां मत्तामिव सम्यक्दृश्यां वेति वितर्कः पाठांतरे वासितरां कामोन्मत्तां
गामिवेत्यर्थः ॥ २५ ॥ ३ ॥ पौराणां तस्मिन्वृत्तिमाह तमुपेयुरिति वराहरूपेण त्वया धृतां इमां पृथ्वीं पाहीति ॥ २८ ॥ प्रजानां तस्मिन्वृत्तिमाह ॥ तत

श्रीबादरायणिरुवाच ॥ ॥ अथादिशद्दिग्विजये भ्रातॄंस्त्रिभुवनेश्वरः ॥ आत्मानं दर्शयन्स्वानां पुरीमैक्षत सानुगः ॥ २४ ॥ आ
सिक्तमार्गां गंधोदैः करिणां मदशीकरैः ॥ स्वामिनं प्राप्तमालोक्य मत्तां वा सुतरामिव ॥ २५ ॥ प्रासादगोपुरसभाचैत्यदेवगृहादि
षु विन्यस्तहेमकलशैः पताकाभिश्च मंडितां ॥ २६ ॥ पूगैः सवृंतै रंभाभिः पट्टिकाभिः सुवाससां ॥ आदर्शैरंशुकैः स्रग्भिः कृतकौ
तुकतोरणां ॥ २७ ॥ तमुपेयुस्तत्र तत्र पौरा अर्हणपाणयः ॥ आशिषो युयुजुर्देव पाहीमां प्राक्त्वयोद्धृतां ॥ २८ ॥ ततः प्रजा वि
क्ष्य पतिं चिरागतं दिदृक्षयोत्सृष्टगृहाः स्त्रियो नराः ॥ आरुह्य हर्म्याण्यरविंदलोचनमतृप्तनेत्राः कुसुमैरवाकिरन्
॥ २९ ॥ अथ प्रविष्टः स्वगृहं जुष्टं स्वैः पूर्वराजभिः ॥ अनंताखिलकोशाढ्यमनर्घ्योरुपरिच्छदं ॥ ३० ॥

प्रजा इति ॥ २९ ॥ स्वयं कथमवर्त्तत तस्योत्तरमाह ॥ अथेति यावत्समाप्ति स्वगृहं प्रविष्टः सन् तस्मिन्रेमे इति पंचमेनान्वयः ॥ गृहं वर्णयति सा
र्द्धैस्त्रिभिः ॥ अनंता ये खिलानां रत्नादीनां कोशाः तैराढ्यं ॥ अनर्घ्या उरवः परिच्छदा यस्मिन् ॥ ३० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.टी.
२६

विद्रुममया उडुंबरा देहल्यो येषु तैर्द्वारैः स्वच्छैः स्थलैः तृतीयांतानां मंडितमिति तृतीयेनान्वयः ॥ ३१ ॥ वाससां मणिगणानां च अंशुकैर्दीप्तिभिः उ
चितैर्वितानैतं डल्लासैः उज्वलैः यद्वा चिदिति क्वचित् वैडूर्यस्तंभादिषु यथा शोभमुज्वलैर्मुक्ताफलैर्मंडितमित्यर्थः ॥ कांताः कमनीयाः कामोपप
त्तयो भोगसाधनानि तानि ॥ ३२ ॥ भूषणानां भूषणं तैः ॥ ३३ ॥ ३४ ॥ नृणां मध्ये यद्यपि नृणां च निरतिध्यातमंघ्रिपल्लवं यस्येति ॥ ३५ ॥

विद्रुमोडुंबरद्वारैर्वैडूर्यस्तंभपंक्तिभिः ॥ स्थलैर्मारकतैः स्वच्छैर्भ्राजत्स्फटिकभित्तिभिः ॥ ३१ ॥ चित्रस्रग्भिः पट्टिकाभिर्वासोमणि
गणांशुकैः ॥ मुक्ताफलैश्चिदुल्लासैः कांतकामोपपत्तिभिः ॥ ३२ ॥ धूपदीपैः सुरभिभिर्मंडितं पुष्पमंडितैः ॥ स्त्रीपुंभिः सुरसंका
शैर्जुष्टं भूषणभूषणैः ॥ ३३ ॥ तस्मिन्स भगवान् रामः स्निग्धया प्रिययेष्टया ॥ रेमे स्वारामधीराणामृषभः सीतया किल ॥
३४ ॥ बुभुजे च यथाकालं कामान् धर्ममपीडयन् ॥ वर्षपूगान्बहून्नृणामभिध्यातांघ्रिपल्लवः ॥ ३५ ॥ इति श्रीभागवते
महापुराणे नवमस्कंधे श्रीरामोपाख्याने एकादशोऽध्यायः ॥ ॥ श्रीशुक उवाच ॥ कुशस्य चातिथिस्तस्मान्निषधस्तत्सुतो नभः ॥
पुंडरीकोऽथ तत्पुत्रः क्षेमधन्वाभवत्ततः ॥ १ ॥ देवानीकस्ततोऽनीहः पारियात्रोऽथ तत्सुतः ॥ ततो बलः स्थलस्तस्माद्वज्र
नाभोऽर्कसंभवः ॥ २ ॥ खगणस्तत्सुतस्तस्माद्विधृतिश्चाभवत्सुतः ॥ ततो हिरण्यनाभोऽभूद्योगाचार्यस्तु जैमिनेः ॥ ३ ॥ ॥

नवमे एकादशः ॥ ११ ॥ द्वादशे रामपुत्रस्य कुशस्यान्वय उच्यते ॥ एवमिक्ष्वाकुपुत्रस्य शशादस्येरितोऽन्वयः ॥ कुशस्य रामपुत्रस्य अतिथिस्तस्मा
सुतोऽभवत् ॥ १ ॥ अर्कसंभवः अर्कस्यांशात्संभूतः ॥ २ ॥ हिरण्यनाभः कथंभूतः जैमिनेः शिष्यो योगाचार्यः ॥ ३ ॥

राम
२६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदाह। यतः सकाशात् कौशल्यो याज्ञवल्क्य ऋषिराध्यात्मं योगमध्यगात् महांतं उदयाः सिद्धयो यस्मिन् । तं हृदयग्रंथिभेदकं च ॥ ४ ॥ ५ ॥ मरुं
विशिनष्टि यो सावितिं पुनर्भावयिता भावयिष्यति । ६ । पित्रा अप्रतिमन्युना ॥ ७ ॥ ९ ॥ नतस्मादमित्रजित् ॥ १२ ॥ १३ ॥ निष्ठां वंशस्य स्थितिस्तस्मात्

शिष्यः कौशल्य आध्यात्मं याज्ञवल्क्योध्यगाद्यतः । योगं महोदयमृषिर्हृदयग्रंथिभेदकं ॥ ४ ॥ पुष्यो हिरण्यनाभस्य ध्रुवसंधिस्त
तोभवत् । सुदर्शनोग्निवर्णश्च शीघ्रस्तस्य मरुः सुतः । योऽसावास्ते योगसिद्धः कलापग्राममास्थितिः । कलेरंते सूर्यवंशं नष्टं भा
वयिता पुनः ॥ ६ ॥ तस्मात्प्रसुश्रुतस्तस्य संधिस्तस्याप्यमर्षणः । महस्वांस्तत्सुतस्तस्मात् विश्वसाह्वोन्वजायत । ततः प्रसेन
जित्तस्मात्तक्षको भविता पुनः ॥ ७ ॥ ततो बृहद्बलो यस्तु पित्रा ते समरे हतः । एते हीक्ष्वाकुभूपाला अतीताः शृण्वनागतान् ॥ ८ ॥ बृ
हद्बलस्य भविता पुत्रो नाम बृहद्रणः । उरुक्रियस्ततस्तस्य वत्सवृद्धो भविष्यति ॥ ९ ॥ प्रतिव्योमस्ततो भानुर्दिवाको वाहिनीपतिः ।
सहदेवस्ततो वीरः बृहदश्वाथ भानुमान् ॥ १० ॥ प्र तीकाश्वो भानुमतः सुप्रतीकोथ तत्सुतः । भविता मरुदेवोथ सुनक्षत्रोथ पु
ष्करः ॥ ११ ॥ तस्यांतरिक्षः तत्पुत्रः सुतपास्तदमित्रजित् । बृहद्राजस्तु तस्यापि बर्हिस्तस्मात्कृतंजयः ॥ १२ ॥ रणंजयस्तस्य सुतः संजयो
भविता ततः । तस्माच्छाक्योथ शुद्धोदो लांगलस्तत्सुतः स्मृतः ॥ १३ ॥ ततः प्रसेनजित्तस्मात् क्षुद्रको भविता ततः । रणको भविता तस्मा
त्सुरथस्तनयस्ततः ॥ १४ ॥ सुमित्रो नाम निष्ठांत एते बार्हद्बलान्वयाः । इक्ष्वाकूणामयं वंशः सुमित्रांतो भविष्यति ॥ १५ ॥ यतस्तं प्राप्य
राजानं संस्थां प्राप्स्यति वै कलौ ॥ १५ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे श्रीरामचरितवर्णनं नाम द्वादशोऽध्यायः ॥ १२ ॥

तः तदेवाह । इक्ष्वाकूनामयमिति । १४ । इति नवमे द्वादशः ॥ इक्ष्वाकोरेव पुत्रस्य निमेर्वंशस्त्रयोदशे । वर्ण्यते जनिरेयत्र बुधराजजनकादयः ॥ १ ॥

माश्रितः ॥

कु ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰न॰
२७

निमेरौरसः पुत्रो नाभूदिति दर्शयिष्यन् कथा... माह॥ निमिरेसेकादशभिः। सत्रमारभ्य वसिष्ठं ऋत्विजं प्रवृतवान् तं शक्रस्य मखं निर्वर्त्य प्रति
पालय प्रतीक्षस्वेति। गृहपतिर्निमिः॥ २॥ इदं जीवितं चलं अस्थिरं विद्वान्॥ ३॥ इन्द्रस्य मखं निर्वर्त्य आगतो गुरुः। शिष्यस्य व्यतिक्रममन्या
यं वीक्ष्य निमेर्देहः पततात् इत्यशपत्॥ ४॥ ५॥ उर्वशीदर्शनात् स्कन्नं रेतस्ताभ्यां कुंभे निषिक्तं तस्मात् प्रपितामहो वसिष्ठो जज्ञे तद्देहं मित्रा

श्रीशुक उवाच॥ निमिरिक्ष्वाकुतनयो वसिष्ठमवृतर्त्विजं। आरभ्य सत्रं सोप्याह शक्रेण प्राग्वृतोस्मि भो॥ १॥ तं निर्वर्त्याग
मिष्यामि तावन्मां प्रतिपालय। तूष्णीमासीद्गृहपतिः सोपीन्द्रस्याकरोन्मखं॥ २॥ निमिश्चलमिदं विद्वान् सत्रमारभतात्म
वान्। ऋत्विग्भिरपरैस्तावन्नागमद्यावता गुरुः॥ ३॥ शिष्यव्यतिक्रमं वीक्ष्य निर्वर्त्य गुरुरागतः॥ अशपत्पतताद्देहो नि
मेः पंडितमानिनः॥ ४॥ निमिः प्रतिददौ शापं गुरवेऽधर्मवर्तिने॥ तवापि पतताद्देहो लोभाद्धर्ममजानतः॥ ५॥ इत्युत्ससर्ज स्वं
देहं निमिरध्यात्मकोविदः॥ मित्रावरुणयोर्जज्ञे उर्वश्यां प्रपितामहः॥ गंधवस्तुषु तद्देहं निधाय मुनिसत्तमाः॥ समाप्ते स
त्रयागे च देवानूचुः समागतान्॥ ७॥ राज्ञो जीवतु देहोयं प्रसन्नाः प्रभवो यदि॥ तथेत्युक्ते निमिः प्राह मा भून्मे देहबंधनं॥ ८॥ त
यस्य योगं न वांछंति वियोगभयकातराः॥ भजंति चरणांभोजं मुनयो हरिमेधसः॥ ९॥ देहं नावरुरुत्सेहं दुःखशोकभयाव
हं॥ सर्वत्रास्य यतो मृत्युर्मत्स्यानामुदके यथा॥ १०॥ देवा ऊचुः॥ विदेह उष्यतां कामं लोचनेषु शरीरिणां॥ उन्मेषणनिमेषा
भ्यां लक्षितोऽध्यात्मसंस्थितः॥ ११॥

वरुणयोरिति। तथा च श्रुतिः। कुंभे रेतः सिषिचतुः समानमिति॥ ६॥ ७॥ यदि प्रसन्नाः प्रभवः समर्थाश्च तर्हि जी
वत्विति ऊचुः॥ ८॥ यस्य देहस्य योगं न वांछंति। अपि तु मोक्षायैव भजंति॥ ९॥ निमिर्विदेह एव उष्यतां वसतु कामं यथेष्टं एवं सति निमिः प्रार्थितं जीवितमप्यन
सन्न विष्यति। न च देहबंध इति भावः। स च अध्यात्मसंस्थितो लोचनयोः स्थितः सन् उन्मेषणनिमेषाभ्यां तस्य वर्तकत्वेन लक्षितो वर्तत इति शेषः॥ ११॥

यम
२७

शुभा २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं सूतादपि निमेर्देहे। वंशप्रवृत्तिं दर्शयति अराजकं भयमिति।१२। तस्मान्मथनान्निर्गताणिनामाम्माह जन्मनाऽसाधारणेन जनएव जनकः। य
था। स्वदेहवाराजनकत्वात्स निमिर्जनकोऽभूदित्यर्थः। मिथिलायेन निर्मितेस नेन मुत्स्यस [illegible] यतिकं।।१३।।१४।। तस्य पिता।।१५।। तस्य केशिध्वज

अराजकं भयं नृणां मन्यमाना महर्षयः। देहं ममंथुः स्म निमेः कुमारः समजायत।१२ जन्मना जनकः सोऽभूत् वैदेहस्तु विदेहजः।।
मिथिलो मथनाज्जातो मिथिला येन निर्मिता।१३ तस्मादुदावसुस्तस्य पुत्रोऽभून्नंदिवर्द्धनः। ततः सुकेतुस्तस्यापि देवरातो महीप
ते।१४ तस्माद्बृहद्रथस्तस्य महावीर्यः सुधृत्पिता। सुधृतेर्धृष्टकेतुर्वै हर्यश्वोऽथ मरुस्ततः।१५ मरोः प्रतीपकस्तस्माज्जातः कृति
रथो यतः।। देवमीढस्तस्य सुतो विश्रुतोऽथ महाधृतिः।१६ कृतिरोमस्ततस्तस्मान्महारोमा च तत्सुतः। स्वर्णरोमा सुतस्तस्य ह्रस्वरोमा
व्यजायत।१७ ततः शीरध्वजो जज्ञे यज्ञार्थं कर्षतो महीं। सीता सीराग्रतो जाता सीरध्वजः स्मृतः।१८ कुशध्वजस्तस्य पुत्रस्ततो धर्म
ध्वजो नृप। धर्मध्वजस्य द्वौ पुत्रौ कृतध्वजमितध्वजौ।१९ कृतध्वजात्केशिध्वजः खांडिक्यस्तु मितध्वजात्। कृतध्वजसुतो राजन्नात्म
विद्याविशारदः।२० खांडिक्यः कर्मतत्त्वज्ञो भीतः केशिध्वजाद्द्रुतः। भानुमांस्तस्य पुत्रोऽभूच्छतद्युम्नस्तु तत्सुतः।२१ शुचिस्तु तनय
स्तस्मात्सनद्वाजस्ततोऽभवत्। ऊर्ध्वकेतुः सनद्वाजादजोऽथ पुरुजित्सुतः।२२ अरिष्टनेमिस्तस्यापि श्रुतायुस्तत्सुपार्श्वकः। ततश्चित्र
रथो यस्य क्षेमधिर्मिथिलाधिपः।२३ तस्मात्समरथस्तस्य सुतः सत्यरथस्ततः। आसीदुपगुरुस्तस्मादुपगुप्तोऽग्निसंभवः।२४ वस्वनं
तोऽथ तत्पुत्रो युयुधो यत्सुभाषणः। श्रुतस्ततो जयस्तस्माद्विजयोऽस्मादृतः सुतः।२५ शुनकस्तत्सुतो जज्ञे वीतहव्यो धृतिस्ततः। बहुलाश्वो
धृतेस्तस्य कृतिरस्य महावशी।२६ एते वै मैथिला राजन्नात्मविद्याविशारदाः। योगेश्वरप्रसादेन द्वंद्वैर्मुक्ता गृहेष्वपि।२७।।
इति श्री०भाग०नवम० निमिवंशानुचरितं त्रयोदशोऽध्यायः

सत्यानुमान।।२१।। ततस्तस्मात्सुपार्श्वकः।।२३।। अग्निसंभवः अग्नेरंशात्संभूतः।।२४।। यद्वा सुभा

सुभाषणः।२५।२६। योगेश्वराः याज्ञवल्क्यादयः तेषां प्रसादेन।२७।।
इति नवमे त्रयोदशः १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०न०
२७

चतुर्दशाद्विंशतिः सोमवंशमाहात्म्यान्वितः ॥ यस्मिन्नैलादयो भूपाः कीर्त्यन्ते पुण्यकीर्तयः ॥१॥ चतुर्दशे गुरोः पत्नीं तारायां सोमजाद्बुधात् जातः श्रै
लः षड्वर्ष्यां मायुर्मुख्यानजीजनत् ॥२॥ दृग्भ्यः आनंदाश्रुभ्यः अत एवामृतमयः किलेत्याश्चर्ये पाठान्तरे दृग्भ्यः नेत्रात् वक्ष्यमाणदर्पस्य कारणमा

श्रीशुक उवाच ॥ अथातः श्रूयतां राजन्वंशः सोमस्य पावनः ॥ यस्मिन्नैलादयो भूपाः कीर्त्यन्ते पुण्यकीर्तयः ॥१॥ सहस्रशि
रसः पुंसो नाभिह्रदसरोरुहात् ॥ जातस्यासीत्सुतो धातुरत्रिः पितृसमो गुणैः ॥२॥ तस्य दृग्भ्योऽभवत्पुत्रः सोमोऽमृतमयः कि
ल ॥ विप्रौषध्युडुगणानां ब्रह्मणा कल्पितः पतिः ॥३॥ सोऽयजद्राजसूयेन विजित्य भुवनत्रयं ॥ पत्नीं बृहस्पतेर्दर्पात्तारा
नामाहरद्बलात् ॥४॥ यदा स देवगुरुणा याचितोऽभीक्ष्णशो मदात् ॥ नात्यजत्तत्कृते जज्ञे सुरदानवविग्रहः ॥५॥ शुक्रो
बृहस्पतेर्द्वेषादग्रहीत्सासुरोडुपं ॥ हरो गुरुसुतं स्नेहात्सर्वभूतगणावृतः ॥ सर्वदेवगणोपेतो महेन्द्रो गुरुमन्वया
त् ॥ सुरासुरविनाशोऽभूत्समरस्तारकामयः ॥७॥ निवेदितो गिरसा सोमं निर्भर्त्स्य विश्वकृत ॥ तारां स्वभर्त्रे प्रायच्छदंत
र्वत्नीमवैत्पतिः ॥८॥
जौ

हः ॥ विप्रेति ॥३॥ सोमस्य पुत्रो बुध इति कथाद्वारेणाह ॥ पत्नीमिति सार्द्धैर्नवभिः ॥४॥ तत्कृते तन्निमित्तं सुराणां दानवा
नां च ॥५॥ विग्रहे कारणमाह शुक्र इति ॥ असुरैः सहितः उडुपमग्रहीदित्यर्थः संधिरार्षः गुरोः सुतं बृहस्पतिमग्रहीत् अंगिरसः स रा म
२७
२॥ कात् आस विग्रहो हरश्चेति हि प्रसिद्धिः ॥६॥७॥ निवेदितो विज्ञापितः विश्वकृत ब्रह्मा अवैत् अबुध्यत ॥८॥

६

बृहस्पतिराह। त्यज त्यजेति परैराहितं गर्भं गर्भेन्नेत्यकेन स्वीकरिष्यतीति विस्मितौ प्रत्याह वा हमिति। सांतानिकः संतानार्थी सांतानिके इति पा
ठे हि सत्पुत्रेप्सुर्यः। ११ रहः एकांते। १३ पुरूरवस उर्वश्यामायुः प्रमुखाः षट् पुत्रा जाताः शतविक्रमः अथाग्राह। तस्येत्यादि नायावक्स्मात्ति। १४

स जन्तस्य सुतः स वृत्तेम ... ह्यचिरादाहितं परैः। नाहं त्वां तन्मसा कुर्यां विश्वं संतानिके सति। १५ तत्याज व्रीडिता ताराकुमारं कनक कोऽ
प्रभं स्पृहामांगिरसस्चक्रे कुमारे सोम एव च। १७ ममायं न तवेत्युच्चैः तस्मिन् विवदमानयोः। पप्रच्छुरृषयो देवा नैवोचे व्री
डितानु सा। ११ कुमारो मातरं प्राह कुपितोऽलीक लज्जया। किं न वोचस्यसद्वृत्ते आत्मावद्यं वदाशु मे। १२ ब्रह्मा तां रह आहूय
समप्राक्षीच्च सांत्वयन्। सोमस्येत्याह शनकैः सोमस्तं तावदग्रहीत्। १३ तस्यात्मयोनिरकृत बुध इत्यभिधां नृप। बुद्ध्या गंभीरया
येन पुत्रेणापोडुराण्मुदं। १४ ततः पुरूरवा जज्ञे इलायां य उदाहृतः। तस्य रूपगुणौदार्यशीलद्रविणविक्रमान्। १५ श्रुत्वोर्वशीं
द्रभवने गीयमानान् सुरर्षिणा। तदंतिकमुपेयाय देवी स्मरशरार्दिता। १६ मित्रावरुणयोः शापादापन्ना नरलोकतां। निशम्य
पुरुषश्रेष्ठं कंदर्पमिव रूपिणं। १७ धृतिं विष्टभ्य ललना उपतस्थे तदंतिके। स तां विलोक्य नृपतिः ह... र्षेणोत्फुल्ललोचनः।
१८ उवाच श्लक्ष्णया वाचा देवीं हृष्टतनूरुहः। राजोवाच। स्वागतं ते वरारोहे आस्यतां करवाम किं। संरमस्व मया साकं रतिर्नौ
शाश्वतीः समाः। १९ उर्वश्युवाच। कस्यास्त्वयि न सज्जेत मनो दृष्टिश्च सुंदर। ... यदंगांतरमासाद्य च्यवते ह रिरंसया। २०

ननु देवी कतो मनुष्यसांतिकमुपगच्छेत् तत्राह। मित्रावरुणयोः शापान्नरलोकतां मनुष्यतावमापन्ना सती। १७। १९। नौ आवयोः स्थिति तिर
१९। यस्य तवांगांतरं ... आसाद्य रिरंसया रंतुमिच्छया हृत्स्फुटं न च्यवते नोपयाति यद्यस्मादिति वा। २०॥

वरः

ना० न०
२९

९१

ग्णपाबमानेनाषात्तं गमिषे जिगमिषोस्तस्मान्नाषाबंधमाह। एतावितिश्लोकं। उरणकौमेखौ न्यासौ निक्षेपरूपौ रक्षत्वश्लाघ्यः सर्वस्त्रीणां
वरःस्मृतः अतो विजातीयत्वदोषइतिनाव। २२ देवीरचतं मेनकस्मात् अमृतं वा आज्यइति श्रुतेः देवानां चामृतप्राशित्वात् मैथुनादमत्र वि
वासमंत्वाने हि विपीइतिप्रतिपदे चूर्णीहतवान् २३ नदेवाहत्प्रहोइति २४ पद्मकिंजल्कस्यगंधइवगंधो यस्याः तस्याः सुरवामोदेन सुषित:

एतावुरणकौराजन्न्यासौरक्षत्वमानद संरंभेन वतासाकं श्लाघ्यः स्त्रीणां वरः स्मृतः २२ श्रुतं मे वीर नह्यस्य नेतेत्वान्यत्र मैथु
न्यात् विवासमंतत्रथेतिप्रतिपेदे महामनाः २३ अहोरूपमहो नाबीनरलोकविमोहनं कोनसेवेत मनुजो देवीं तां स्वयमाग
तां २४ तयासपुरुषश्रेष्ठो रमयंसा यथार्हतः रेमेसुरविहारेषु कामं चैत्ररथादिषु २५ रममाणस्तयादेव्या पद्मकिंज
ल्कगंधयां तत्सुखामोदमुषितो मुमुदेहगणान्बहून् २६ अपश्यन्तुर्वशीं मिश्रो गंधर्वानिममनोदयत् उर्वशीरहितं
मह्यं मास्थानंनातिशोभते २७ ततपेत्य महारात्रेतमसिप्रत्युपस्थिते उर्व रूपाउरणौजह्नुर्न्यस्तौ राज्ञिजायया २८
निशम्याक्रंदितं देवी पुत्रयोर्नीयमानयोः हतास्म्यहं कुनाथेन नपुंसा वीरमानिना २९ यद्विश्रंभादहं नष्टा हृतापत्याच द
स्युभिः यः शेते निशिसंत्रस्तो यथानारी दिवापुमान् इतिवाक्सायकैर्विद्धः प्रतोत्रैरिवकुंजरः निशि निस्त्रिंशमादाय वि
वस्त्रोभ्यद्रवद्रुषा ३१ ते विसृज्योरणौतत्रव्यद्योतंतस्म विद्युतः आदायमेषावायांतं नग्नमैक्षतसापतिं ३२
कलोक्तिः सन २६ म
हंसस्य २७ ० महारात्रेमध्यरात्रे महानिशाद्वेघटिके रात्रेर्मध्यमयामयोरिति स्मृतेः २८ जिगमिषोस्तस्याः परुषोक्तिमाह हतास्मी तिसार्धेन नानुपुंसा नपुंस
केन २९ यथानारीतथासंत्रस्तः शेते ३० विद्युतः विशिष्टद्युतिमंतः व्यद्योतंतदीप्तिमकुर्वत यद्वा तदैवतडितः प्रकाशंतेस्मेत्यर्थः नग्नमैक्षतत्रतोनाषाधं गा
न्निर्जगामेतिज्ञेयं ३२

साम
२९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३३। तस्याः सखीश्च पंचवीक्ष्य सूक्तं वचनं शोभनं हयेजायेत्यादि ३४ तदेवार्थतआह। अहो इति द्वाभ्यां अनिर्वृत्य सुखं कृत्वा निर्वृतिमप्राप्य। पाठां
तरे मां निर्वृतिमगमयित्वा संवादानुत्क्त्वा वचांसि कृणवावहै गोष्ठीः करवावहै ३५ सुदेहो अतिकमनीयोयं मम देहः ३६ पुरूरवो मा मृ
थाइत्यादिसूक्तं तदर्थतआह। मा मृथाइति चतुर्भिः। मा म्रियस्व पुरुषोऽसि अतो धैर्यमावहेति भावः इमे वृका। प्रसिद्धाः ३

लो

देवी पिशाचयनेजायाम प्रपन्निमनाइव। तस्मिन्नो विकलः शोचन् बभ्रामोन्मत्तवन्महीं ३३ स तां वीक्ष्य कुरुक्षेत्रे सरस्वत्यां च त
त्सखीः पंच प्रहृष्टवदनाः प्राह सूक्तं पुरूरवाः ३४ अहो जाये तिष्ठ तिष्ठ घोरे न त्यक्तुमर्हसि मां त्वमद्याप्यनिर्वृत्य वचांसि कृ
णवावहै ३५ सुदेहोयं पतत्यत्र देवि दूरं हृतस्त्वया खादंत्येनं वृका गृध्रास्त्वत्प्रसादस्य नास्पदं ३६ उर्वश्युवाच॥ मा मृथाः

वृका एगो

पुरुषोऽसि त्वं मा स्म त्वाद्युर्वृका इमे क्वापि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ३७ स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः
घ्नंत्यल्पार्थेपि विश्रब्धं पतिं भ्रातरमप्युत ३८ विधायालीकविश्रंभमज्ञेषु त्यक्तसौहृदाः नवं नवमभीप्संत्यः पुंश्चल्यः स्वैरवृत्तयः
३९ संवत्सरांते हि भवानेकरात्रं मयेश्वर वत्स्यत्यपत्यानि च ते भविष्यंत्यपराणि भो ४० अंत वत्नीमुपालक्ष्य देवीं स प्र
ययौ पुरीं पुनस्तत्र गतोब्दांते उर्वशीं वीरमातरं ४१ उपल भ्य मुदा युक्तः समुवास तया निशां अथैनमुर्वशी प्राह कृ
पणं विरहातुरं ४२ गंधर्वानुपधावेमान्तुभ्यं दास्यंति मामिति तस्य संस्तुवतस्तुष्टा अग्निस्थालीं ददुर्नृप ४३ उर्वशीं मन्यमा
नस्तां सोबुध्यत चरन्वने

ह्रियाणि वा त्वा इति त्वां मा स्म अघुः न खादेयुः इंद्रियवशो मा भवेत्यर्थः ३७ प्रियेति त्रिभिः साहसं यासां ३८ सांत्वयति संव
त्सरेति ४० अपराणीति वचनाद्दंतर्वत्नीमुपालक्ष्य ज्ञात्वा ४१ गंधर्वेभ्यो अग्निनाकस्थितत्वात स्वरागद्र उर्वशीं भाव्यं समस्थिवायेण अग्निस्थालीं ददुः ४३ स तु
तां स्थालीमेव उर्वशीमेव मन्यमानः तया सहितो वने विचरन्नेयमुर्वशी किंतु अग्निस्थालीत्यबुध्यत ४४॥

बी ९५ सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रि

ना॰न॰ ३०

ततश्च तां स्थालीं वने स्थापयित्वा गृहान् गत्वा निशि नित्यं तामेवाध्यायतस्तस्य मनसि त्रेतायां त्रयी वर्त्तते कर्म्मबोधकं वेदत्रयं प्रादुरभूत्
४५ ततः स्थालीस्थानं गतः सन् सम्यक् शमीगर्भे जातमश्वत्थं विलक्ष्य अस्मिन् तस्य [illegible]रस्मीति विशेषेण लक्षयित्वा तेनाश्वत्थेन द्वे अरणी कृत्वाग्निं मे
मंथेति शेषः शमीगर्भादग्निं मंथयतेति श्रुतिः ४६ मंथनप्रकारमाह अधरारणिं उर्वशीं ध्यायन् उत्तरां चारणीमात्मानं ध्यायन् उभयोर्मध्ये
यत्काष्ठं तत्प्रजननं पुत्रं ध्यायन् तथा च मंत्रः उर्वश्य[illegible]पुरसि पुरूरवा इति ४७ तस्य तेन कृतान्निर्मंथनात् विभावसुरग्निः कृतिः कथंभू

स्थालीं न्यस्य वने गत्वा गृहा[illegible]नाध्यायतो निशि त्रेतायां संप्रवृत्तायां मनसि त्रय्यवर्त्तत ४५ स्थालीस्थानं गतोश्वत्थं शमी
गर्भं विलक्ष्य सः तेन द्वे अरणी कृत्वा उर्वशीलोककाम्यया ४६ उर्वशीं मंत्रतो ध्याय[illegible]नधरारणिमुत्तरां आत्मानमुभयोर्मध्ये
यत्तत्प्रजननं प्रभुः ४७ तस्य निर्म्मथनाज्जातो जातवेदा विभावसुः त्रय्या स विद्य[illegible]या राज्ञा पुत्रत्वे कल्पितस्त्रिवृत् ४८ ते
नायजत यज्ञेशं भगवंतमधोक्ष[illegible]जं उर्वशीलोकमन्विछन् सर्वदेवमयं हरिं ४९ एक एव पुरा वेदः प्रणवः सर्ववा
ङ्मयः देवो नारायणो नान्य एकोग्निर्वर्ण एव च ५०

तः जातवेदो धनंत्रोग्नंपयस्मात् सत्रय्या विद्यया विहितेनाधानसंस्कारे
ण त्रिवृत् आहवनीयादिरूपः सन् राज्ञा पुरूरवसा पुत्रत्वे कल्पितः पुण्यलोकप्रापकत्वात् ४८ तदाह तेनेति ४९ ननु नादिर्वेदत्र
यबोधितो ब्राह्मणादीनामिज्याद्यनेकदेवयजनेन स्वर्गप्राप्तिहेतुः कर्म्ममार्गः कथं सादिरित्यपेक्षायामेव तत्राह एक एवेति द्वाभ्यां पुराकृत राम
युगे सर्ववाङ्मयः सर्वासां वाचां बीजभूतः प्रणव एक एक एव देवश्च नारायण एक एवाग्निश्चैक एव लौकिकः वर्णश्चैक एव हंसो नाम ३५० ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदत्रयीतुपुरूरवसःसकाशादासीत्। एविवानुशापाश्वयंमावः। कृतयुगेसत्वप्रधानाःप्रायशः। सर्वेपिध्याननिष्ठाः। रजःप्रधानेतुत्रेता
युगेवेदादिविनाशेनकर्म्ममार्गःप्रकटोबभूवेत्यर्थः॥ ५१॥ इतिनवमेचतुर्दशः॥ ॥ ततपंचदशेगाधिरैलपुत्रान्वयेजनि। महौहित्रसुतोरामः
कार्त्तवीर्य्यमहन्नृरुषा। एतत्तुयहत्वापाप्मादिक्रमेणश्रुतायुःप्रकृतिषंसंवंशानाह॥ श्रुतायोरित्यादिना। एकसंज्ञःश्वमितः तन्संज्ञः।२

पुरूरवसएवासीत्त्रयीत्रेतामुखेनृप। अग्निनाप्रजयाराजालोकंगांधर्वमेयिवान्॥ ५१॥ ॥ इतिश्रीभागवतेमहापुराणेन
वमस्कंधेऽशोपाख्यानेचतुर्दशोध्यायः॥ १४॥ ॥ श्रीबादरायणिरुवाच। ऐलस्यचोर्वशीगर्भात्षडासन्नात्मजानृप
आयुःश्रुतायुःसत्यायूर योथविजयोजयः॥ १॥ श्रुतायोर्वसुमानपुत्रःसत्यायोश्चश्रुतंजयः। रयस्यसुतएकश्चजयस्यत
नयोमितः॥ २॥ भीमस्तुविजयस्याथकांचनोहोत्रकस्ततः। तस्यजह्नुःसुतोगंगांगंडूषीकृत्ययोपिबत्॥ ३॥ जह्नोस्तुपुरु
स्तस्याथबलाकश्चात्मजोजकः। ततःकुशःकुशस्यापिकुशांबुर्मूर्त्तयोवसुः॥ ४॥ कुशनाभश्चचत्वारोगाधिरासीत्कुशांबुजः। त
स्यसत्यवतींकन्यामृचीकोयाचतद्विजः॥ ५॥ वरंविसदृशंमत्वागाधिर्भार्गवमब्रवीत्। एकतःश्यामकर्णानां हयानांचंद्र
वर्चसां॥ ६॥ सहस्रंदीयतांशुल्कंकन्यायाःकुशिकावयं। इत्युक्तस्तन्मतंज्ञात्वागतःसवरुणांतिकं। आनीयदत्वातान
श्वानुपयेमेवराननाम्॥ ७॥

जह्नोःपुरुःतस्यबलाकःतस्याजकः।३। गाधेःपुत्रोविश्वामित्रोब्रह्मर्षिरभूदितिवक्तुं ध्यायांतेवक्ष्यति गा
धेरभूत्महातेजाइत्यादिना।४। तत्रजातानतुतपोद्योतत्वेनभृगुवंशसंनवंस्यर्चीकस्यचरितंप्रसक्तानुप्रसक्तेनचपरशुरामाक्तास्यचरितमाह॥
तस्यसत्यवतीमित्यादिना। विसदृशंस्वस्याननुरूपं। भार्गवंभृगुवंश्यमृचीकंदक्षिणवामयोरेकतःश्यामःकर्णोयेषांसर्वस्मिन्नंगेचंद्रस्येववर्चोयेषांनचेदस्म
भिपर्यातिसमस्तकन्यायाःयतःकुशिकाःकौशिकावयं॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰न॰
३१

उभयैः पत्न्यै ब्राह्मैर्मंत्रैः श्वश्र्वै क्षात्रैरित्यर्थः ।९। यावत्स्नातुं मुनिर्निर्गतः । तावन्मातुर्याचनया स्वस्नेहात् पुत्र्याः सत्यवत्याश्चरुं श्रेष्ठं मत्वा तया मा
तास्तत्यवती याचिता सती । ब्राह्ममंत्राभिमंत्रितं स्वचरुं मात्रे प्रयच्छत् प्रादात् । मातुः चरुं क्षात्रमंत्राभिमंत्रितं स्वयं स्वादत् ।१०। कष्टं जुगुप्सितं तदेव
हा तेपुत्रो घोरोन विष्यति । भ्राता तु ब्रह्मवित्तमो न विष्यतीति ।११। एवं मा भूदिति प्रसादितो भार्गव आह । अथ तर्हि पौत्रो घोरो भविष्यति ।१२

सऋषिः प्रार्थितः पत्न्या श्वश्र्वा चापत्यकाम्यया । श्रपयित्वोभयैर्मंत्रैश्चरुं स्नातुं गतो मुनिः ।९। तावत्सत्यवती मात्रा स्वचरुं याचि
ता सती । श्रेष्ठं मत्वा तयायच्छन्मात्रे मातुरदत्स्वयं ।१०। तद्विज्ञाय मुनिः प्राह पत्नीं कष्टमकारषीः । घोरो दंडधरः पुत्रो भ्राता ते ब्र
ह्मवित्तमः ।११। प्रसादितः सत्यवत्या मैवं भूदिति भार्गवः । अथ तर्हि भवेत्पौत्रो जमदग्निस्ततोऽभवत् ।१२। सा चाभूत्सुमहा
पुण्या कौशिकी लोकपावनी । रेणोः सुतां रेणुकां वै जमदग्निरुवाह यां ।१३। तस्यां वै भार्गवऋषेः सुता वसुमदादयः ।
यवीयान् जज्ञ एतेषां राम इत्यभिविश्रुतः ।१४। यमाहुर्वासुदेवांशं हैहयानां कुलांतकं । त्रिः सप्तकृत्वो य इमां चक्रे निःक्षत्रि
यां महीं ।१५। दुष्टं क्षत्रं भुवो भारमब्रह्मण्यमनीनशत् । रजस्तमोवृतमहन् फल्गुन्यपि कृतेंऽहसि ।१६। राजोवाच । किं तदंहो भ
गवतो राजन्यैरजितात्मभिः । कृतं येन कुलं नष्टं क्षत्रियाणामभीक्ष्णशः ।१७। श्रीशुक उवाच । हैहयानामधिपतिरर्जुनः क्ष
त्रियर्षभः । दत्तं नारायणांशांशमाराध्य परिकर्मभिः ।१८।

९ जमदग्निः पुत्रो भविष्यतीत्यर्थः ।१२। सा च सत्यवती कौशिकी नद्यभूत् भार्गवऋषेर्जमदग्नेः
।१३।१४। अनीन शत् नाशयामास । तदेवाह । रजस्तमोवृतमिति । पापं तदंहसि ।१५।१६। कार्त्तवीर्यार्जुनेन कृतमपराधं वक्तुं तस्य दर्प राम सुताः
हेतुमैश्वर्यादिकमाह । हैहयानामिति । परिकर्मभिः परिचर्याभिः दत्तात्रेयमाराध्य ।१८। ३१

त्रं

अथातद् सिद्धियादिकं चलेनो१९ यत्र यस्मिन्नैश्वर्ये अणिमादयो गुणाः।१९ रेवां नर्मदां जले रमिनर्मदा।२१ रावणो दिग्विजये माहिष्मत्याः समीपे नर्म
दायां देवपूजां कुर्वन्नुतेन प्रवाहस्यावरोधात् प्रतिस्रोतसः सस्याः तस्यास्सरितो जले विशाविनिंस्त्रिशो विरमालाद्वतस्य तद्वीर्यं निसेहे। २२वत
अकृतकिल्बिषः क्रीडन्तमनिमवितुं प्रवृत्त।सन् गृहीतः माहिष्मत्यां स्वपुर्यां कपिरिव संनिरुद्धश्च पुनश्चावज्ञया येन मुक्तः।२३। इदानीं

बाहून्दत्वा शतं लेने दुर्धर्षत्वमरातिषु। अथाहतेंद्रियोजः श्रीतेजोवीर्ययशोबलं।१९। योगेश्वरत्वमैश्वर्यं गुणायत्राणिमा
दयः। चचाराव्याहतगतिर्लोकेषु पवनो यथा।२०। स्त्रीरत्नैरावृतः क्रीडन्नरेवांनसि महोत्कटः। वैजयंती स्रजं बिभ्रत् रुरोध
सरितं तु जैः।२१। विशाविनिंस्त्रशिबिरं प्रतिस्रोतःसरिज्जलैः। नामृष्यत्तस्य तद्वीर्यं वीरमानी दशाननः।२२। गृहीतो लीलया स्त्रीणां
समक्षं कृतकिल्बिषः। माहिष्मत्यां संनिरुद्धो मुक्तो येन कपिर्यथा।२३। स एकदा तु मृगयां विचरन् विपिने वने। यदृच्छयाश्रमप
दं जमदग्नेरुपाविशत्।२४। तस्मै स नरदेवाय मुनिरर्हणमाहरत्। ससैन्यामात्यवाहाय हविष्मत्या तपोधनः।२५। स वीरस्तत्र
तद्दृष्ट्वा आत्मैश्वर्यातिशायनं। तन्नाद्रियताग्निहोत्र्यां साभिलाषः स हैहयः।२६। हविर्धानीमृषेर्दर्पात् नरान् हर्तुमचोदयत्।
तेन माहिष्मतीं निन्युः सवत्सां क्रन्दतीं बलात्।२७। अथ राजनि निर्याते राम आश्रम आगतः। श्रुत्वा तत्तस्य दौरात्म्यं चुक्रोधा
हिरिवाहतः।२८ तत्कृतमपराधं दर्शयन्नाह। स एकदेत्यादिना।२३। अर्हणमातिथ्यादि हविष्मत्या कामधेन्वा।२५। ततस्त्वर्हणं नाद्रियत
तस्मिन्नातुष्यत यतोग्निहोत्र्यां होमधेनौ साभिलाषः। स हैहयः हैहयैः सह वर्तमानः।२६। दर्पाद्धितो ऋषेर्हविर्धानीं अग्निहोत्रधेनुं हर्तुं
नरान् अचोदयत्।२७।२८।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सतूणं कार्मुकं चर्म्म चादाय ॥ २९ ॥ पऐणेयं चर्म्म कृत्वा जिनमंबरं यस्य ३० ॥ ३१ ॥ प्रहरत् परस्य वधो यस्य मनश्च श्व निलश्च तयोरिवौजो वीर्यं यस्य
परेषां चक्र सैन्यं सूदयतीति तथा छिन्ना भुजा ऊरवः कंधराश्च येषां हताः सूता वाहना येषां ते वीरा रिपवस्तु ॥ ३२ ॥ विहक्लान् चर्म्मादयो यस्य ३३
पंचशतेषु धनुःषु भूमोर्जुनो रामाय संदधे एकमेव धनुर्यस्मिन्सः पाठांतरे एक एव बंधः संधानं येषां ते रिपुभिः ना निधन्नु षिसमं सहत क्रुणमे

घोरमादाय परशुं सतूणं चर्म्म कार्मुकं ॥ अन्वधावत दुर्धर्षो मृगेंद्र स्वयूथपं ॥ २९ ॥ तमापतंतं भृगुवर्यमोजसा धनुर्धरं बाणप
रैस्वधायुधं ॥ ऐणेयचर्म्माबरमर्कधामभिर्युतं जटाभिर्ददृशे पुरीं विशत् ॥ ३० ॥ अचोदयद्धस्तिरथाश्वपत्तिभिर्गदासिबाण
र्ष्टिशतघ्निशक्तिभिः ॥ अक्षौहिणीः सप्तदशातिभीषणास्ता राम एको भगवानसूदयत् ॥ ३१ ॥ यतो यतोसौ प्रहरत्परश्वधो मनो
निलौजाः परचक्रसूदनः ॥ ततस्ततश्छिन्नभुजोरुकंधरा निपेतुरुर्व्यां हतसूतवाहनाः ॥ ३२ ॥ दृष्ट्वा स्वसैन्यं रुधिरौघकर्दमे र
णाजिरे रामकुठारसा यकैः ॥ विवृक्णचर्म्मध्वजचापविग्रहं निपातितं हैहय आपतद्रुषा ॥ ३३ ॥ अथार्जुनः पंचशते
धेंतु षु बाहुभिर्धनुःषु बाणान् युगपत्स संदधे ॥ रामाय रामोस्त्रभृतां समग्रणीस्तान्येकधन्वेषुभिराच्छि नत्समं ॥ ३४ ॥ पुनः
स्वहस्तैरचलान्मृधेंघ्रिपानु क्षिप्य वेगादभिधावतो युधि ॥ भुजान् कुठारेण कठोरनेमिना चिछेद रामः प्रसभं त्वहे
रिव ॥ ३५ ॥ कृ तबाहोः शिरस्तस्य गिरेः शृंगमिवाहरत् ॥ हते पितरि तत्पुत्रा अयुतं दुद्रुवुर्भयात् ॥ ३६ ॥ अग्निहोत्रीमुपावर्त्य
सवत्सां परवीर हा ॥ समुपेत्याश्रमं पित्रे परिक्लिष्टां समर्प्पयत् ॥ ३७ ॥

बाछित्वा ॥ ३४ ॥ मृधे साधनभूतान चलान्वृक्षान्पांश्चोत्क्षिप्य अ
निधावतः ॥ तस्य भुजान् चिछेद अहेः फणा इवेत्यर्थः ॥ ३५ ॥ ३६ ॥ समर्प्पयत् [illegible] छिन्ना ॥ ३७ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋईणतां पृश्पतां ॥४०॥ सौरीस्सर्वस्य ब्रह्मतेजा ॥४१॥ तीर्थसंसेवया चकारांह्यमनियमैश्वा अच्युते चेतना चिंतं यस्समस्ता ॥४२॥ इति नवमे पंचदशः ॥ षोडशे

धार्जुनसुतैर्जमदग्नौ हते सुकुः । रामात् क्षत्रवधः शोको विश्वामित्रस्य चान्वयः ॥१॥ किंचिदीषत् चित्ररथे गंधर्वराजे स्पृहा यस्याः सा ॥ किंचित्स

स्वकर्म तत्कृतं रामः पित्रे भ्रातृभ्य एव च । वर्णयामास तच्छ्रुत्वा जमदग्निरभाषत ॥३९॥ राम राम महाबाहो भवान्पापमकारषी
२ त् । अवधीन्नरदेवं यत्सर्वदेवमयं वृथा ॥३८॥ वयं हि ब्राह्मणास्तात क्षमयार्हणतां गताः । यया लोकगुरुर्देवः पारमेष्ठ्यमिया
त्पदं ॥४०॥ क्षमया रोचते लक्ष्मीर्ब्राह्मी सौरी यथा प्रभा । क्षमिणामाशु भगवांस्तुष्यते हरिरीश्वरः ॥४१॥ राज्ञो मूर्धाभिषिक्तस्य वधो
ब्रह्मवधाद्गुरुः । तीर्थसंसेवया चांहो जह्यंगाच्युतचेतनः ॥४२॥ इति श्रीभागवते महापुराणे नवमस्कंधे पंचदशोध्यायः ॥१५॥
श्रीशुक उवाच ॥ पित्रोपशिक्षितो रामस्तथेति कुरुनंदन । संवत्सरं तीर्थयात्रां चरित्वाश्रममाव्रजत ॥१॥ कदाचिद्रेणुका याता
गंगायां पद्ममालिनं । गंधर्वराजं क्रीडंतमप्सरोभिरपश्यत ॥२॥ विलोकयंती क्रीडंतमुदकार्थं नदीं गता । होमवेलां न सस्मार
किंचिच्चित्ररथस्पृहा ॥३॥ कालात्ययं तं विलोक्य मुनेः शापविशंकिता । आगत्य कलशं तस्थौ पुरोधाय कृतांजलिः ॥४॥ व्यभि
चारं मुनिर्ज्ञात्वा पत्न्याः प्रकुपितोऽब्रवीत् । घ्नतैनां पुत्रकाः पापामित्युक्तास्ते न चक्रिरे ॥५॥ रामः संचोदितः पित्रा भ्रातॄन्मात्रा सहावधी
त् । प्रभावज्ञो मुनेः सम्यक् समाधेस्तपसश्च सः ॥६॥

स्पृहावती ॥३॥ कलशं पुरोधाय अग्रे निधाय ॥४॥ व्यभिचारं मानसं ज्ञात्वा ॥५॥ आज्ञातिलंघिनां भ्रा
तॄणां मातुश्च वधे संचोदितः सन् । मुनेर्यस्समाधिस्तपश्च तयोः प्रभावज्ञः ॥ यद्यहं मातृहिंसामपि शक्तुं समर्थः यदि तु हन्मां तर्हि पिता तुष्टः सन् तानपि जीव
यितुं समर्थ इति जानन्निसर्थः ॥६॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०न० ३२

ननु तिनिदितं तत् कथं कृतवान् तत्राह पितुर्विधातिति ॥ ८ पूर्वोक्त एवाभिप्रायः सर्वक्षत्रियवधे कारणं वृक्षमाह ॥ अर्जुनस्य सुतादयः आदि
ना ॥ १० ॥ न गणयति स्म आवेशिता धीर्येन तं ॥ ११ ॥ दुःखादीनां वेगेन विमोहितः ॥ १५ ॥ ब्रह्मघ्नैर्विहता श्रीर्यस्यास्तां राजन् मरणमस्ते पांशी पुंभिर्महिष्म

वैरेण छंदयामास सप्रीतः सत्यवतीसुतः । बद्धे हतानां रामोपि जीवितं चास्मृति वधे ७ उत्तस्थुस्ते कृताञ्जलिनो निद्रा पायस्वांजमा
पितुर्विधांस्तपो वीर्यं रामस्यांके सुरुद्वधं ॥ ८ ॥ अर्जुनस्य सुता राजन् स्मरंतः स्वपितुर्वधं । रामवीर्यपराभूता लेभिरे शर्म न क्वचि
त् ॥ ९ ॥ एकदाश्रमतो रामे सभ्रातरि वनं गते । वैरं सिसाधयिषवो लब्धच्छिद्रा उपागमन् ॥ १० ॥ दृष्ट्वाग्न्यगार आसीनमावेशितधियं
मुनिं । भगवत्युत्तमश्लोके जघ्नुस्ते पापनिश्चयाः ॥ ११ ॥ याच्यमानाः कृपणया राममात्रातिदारुणाः । प्रसह्य शिर उत्कृत्य निन्युस्ते
क्षत्रबंधवः ॥ १२ ॥ रेणुका दुःखशोकार्ता निघ्नंत्यात्मानमात्मना । राम रामेहि तातेति विचुक्रोशोच्चकैः सती ॥ १३ ॥ तदुपश्रुत्य दूरस्था
हा रामेत्यार्त्तवत्स्वरं । त्वरयाश्रममासाद्य ददृशे पितरं हतं ॥ १४ ॥ ते दुःखरोषामर्षार्तिशोकवेगविमोहितः । हा तात साधो
धर्मिष्ठ त्यक्त्वास्मान्स्वर्गतो भवान् ॥ १५ ॥ विलप्यैवं पितुर्देहं निधाय भ्रातृषु स्वयं । प्रगृह्य परशुं रामः क्षत्रांताय मनो दधे ॥ १६ ॥ गत्वा
माहिष्मतीं रामो ब्रह्मघ्नविहतश्रियं । तेषां सशीर्षभी राजन् मध्ये चक्रे महागिरिं ॥ १७ ॥ तद्रक्तेन नदीं घोरामब्रह्मण्यभयावहां । हेतुं
कृत्वा पितृवधं क्षत्रे मंगलकारिणि ॥ १८ ॥ त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः । समंतपंचके चक्रे शोणितोदान् ह्रदान्नव
१९

सांमध्ये महांतं गिरिं चक्रे ॥ १७ ॥ तेषां रक्तेन नदीं अब्रह्मण्यानां भयावहां घोरां नदीं चक्रे तथापि सर्वक्षत्रियवधे किं कारणं तदाह हेतुं कृत्वे
ति सोवेनाप्यमंगलकारिणि अन्यायवर्त्तिनि सति ॥ १८ ॥ णां समस्तात्तो रेणुका याः दुःखावेशाद् उरस्ताडनं कृतवंतं गोरामस्तां वक्ष्यतं सप्तमुक्तारि
त्रिः
तवान् पुनः स्मिमिति ॥ १९ ॥ स्यमंतपंचके कुरुक्षेत्रे

राम ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुहत

संज्ञानंस्मृतिः। तदेवलक्षणंचिह्नंयस्यतंस्वदेहेलब्धामऋषीणांमंडलेसप्तमऋषिरस्तु। २४। ब्रह्मवेदंवेदप्रवर्त्तकेषुसप्तर्षिषुएकतमोनविष्णु
तीसर्गः। २५। नृवीनारमहत्नारमेवाह। नृपानिति। तदेवंप्रसंगात्प्रसक्तंसमाप्यप्रस्तुतमाह। गाधेरिति। महातेजाविश्वामित्र। तिसर्वे
लिंगसमवायन्यायेनत्राणंकृत्उपरधानी। विवन्मधुछंदसएवोच्यंतेइत्यादितयोश्रुतिः। तस्यविश्वामित्रस्यैकशतंपुत्राआसुः। पंचाशा
य च
पितुःकायेनसंधायशिरआदायबर्हिषि। सर्वदेवमयंदेवमात्मानमयजत्प्रभुः। २०। ददौप्राचींदिशंहोत्रेब्रह्मणेदक्षिणांदि
शं। अध्वर्यवेप्रतीचींवैउद्गात्रेउत्तरांदिशं। २१। अन्येभ्योवांतरदिशःकश्यपायचमध्यतः। आर्यावर्त्तमुप इष्टेसदस्यसत्त
तःपरं। २२। ततश्चावभृथस्नानविधूताशेषकिल्बिषः। सरस्वत्यांब्रह्मनद्यांरेजेव्यभ्रइवांशुमान्। २३। स्वदेहंजमदग्निस्तुलब्ध्वा
संज्ञानलक्षणंऋषीणांमंडलेसोभूत्सप्तमोरामपूजितः। २४। जामदग्न्योपिभगवान्रामःकमललोचनः। आगामिन्यंतरेराज
नूवर्त्तयिष्यतिवैबृहत्। २५। आस्तेद्यापिमहेंद्राद्रौन्यस्तदंडःप्रशांतधीः। उपगीयमानचरितःसिद्धगंधर्वचारणैः। २६।
एवंभृगुषुविश्वात्माभगवान्हरिरीश्वरः। अवतीर्यपरंभारंभुवोहन्बहुशोनृपान्। २७। गाधेरभून्महातेजाःसमिद्धइ
वपावकः। तपसाक्षात्रमुत्सृज्ययोलेभेब्रह्मवर्चसं। २८। विश्वामित्रस्यचैवासन्पुत्राएकशतंनृप। मध्यमस्तुमधुछंदामधु
छंदसएवते। २९।
देवश्रायांसोमधुछंदसः। पंचाशत्कानीयांसइत्यादि। तत्रचविश्वामित्रपुत्रेषुभार्गवस्याजीगर्त्तस्यदेवरातस्यज्येष्ठत्वम
वगम्यते तथाआश्वलायनबोधायनादिभिःकौशिकानांदेवरातप्रवरत्वमुक्तं। प्रवरश्चविश्वामित्रेववंशोऽवांतरभेदंनतुवंशांतरं तथाच
स्मृतिः एकएवऋषिर्यावत्प्रवरेष्वनुवर्त्तते। तावत्समानगोत्रत्वंविनाभृग्वंगिरोगणादिति। ३०।

तम

बा॰न॰
३४

॥

तत्कुतो भृगुवंश्यानवस्य देवरातस्य कौशिकप्रवरत्वमित्याशंक्य तदुपपादयन्नाह। पुत्रं कृत्वेत्यादि। यावत्समानि पूर्वमजीगर्तसुतस्त्वे मध्यमस्ते
न पितृ साम ममतां विहाय विक्रीतत्वात्तस्य स्वरूपया सुतानाह। ज्येष्ठ एष प्रकल्प्यतामिति ३० एतदेव स्पष्टयितुं विशिनष्टि यश्च विश्वामित्रं सुमुचे
ऽमुच्यत ३१ नागवीपि गाधिपुत्राधेर्देवराजेषु देवरात इति ख्यातः। तत्र सच्छ्रेष्ठत्वं कुशलं न मेनिरे। मध्यमस्यानर्थविहतत्वं दृष्ट्वा नांगीकृतवं
तः मुनिर्विश्वामित्रः ३३ पंचाशत् कनिष्ठैः साकं मम धर्मो मधुछंदा उवाच नोऽस्माकं यत्श्रेष्ठ कर्तुं निष्ठत्वं वाञ्च वा पितासंजानीते

पुत्रं कृत्वा शुनःशेपं देवरातं च नामवि। आजीगर्तिं सुतानाह ज्येष्ठ एष प्रकल्प्यतां ३० यो वै हरिश्चंद्र मखे विक्रीतः पुरुषः पशुः
स्तुत्वा देवान्प्रजेशादीन्मुमुचे पाशबंधनात् ३१ यो रातो देवयज्ञने देवैर्गाधिसुतापसः। देवरात इति ख्यातः शुनःशेपः
मनार्गवः ३२ ये मधुछंदसो ज्येष्ठाः कुशलं मेनिरे न तत्। अशापत्तान्मुनिः क्रुद्धो ह्यासन्वतदुर्जनाः ३३ स होवाच मधु
छंदाः सार्धं पंचाशता ततः। यन्नो नवान्संजानीते तस्मिंस्तिष्ठामहे वयं ३४ ज्येष्ठं मंत्रदृशं चक्रुस्तामन्वंचो वयंस्म हि। वि
श्वामित्रः सुतानाह वीरवंतो न विष्यथ ३५ ये मानं मेनुगृह्णंतो वीरवंतमकर्त मां ३६।

मन्पते तस्मिन्वयं तिष्ठामेति ३४ एवमुक्कामंत्रदृशं कस्मन्नूनं कतमस्मामृतानामित्यादि मंत्राणां द्रष्टारं शुनःशेपं ज्येष्ठं चक्रुः कथं चक्रुः तदा
ह। वयं सर्वे तामन्वंचस्म हि। अनुगतारः कनिष्ठाः स्म इत्यर्थः। ततः प्रसन्नो विश्वामित्रस्तान्सुतानाह वीरवंतः पुत्रवंतो न विष्यथ ये यूयं मेमा
नं मानमनुगृह्णंतः अनुवर्तमानाः संतः मां वीरवंतं पुत्रवंतं अकर्त कृतवंत इत्यर्थः ३६। राम
३४

CC-0. In Public Domain.Kavikulguru Kaljdas Sanskrit University Ramtek Collection

एष

हेकुशिकाःदेवरातः वीयुष्मदीयःकौशिकएवयतःवीरः। मत्पुत्रः। तमेनंसमन्वितअनुगच्छत अन्येचाष्टकादयस्तस्यसुताआसन्। उपसंहरति। एवमिति॥ एकेशप्ताः एकेनुगृहीताः अन्यस्तुपुत्रत्वेनस्वीकृतः। इत्येवंकौशिकगोत्रंपृथग्विधंनानाप्रकारंजातं। तच्चप्रवरांतरमापन्नं प्राप्तंहियस्मात् एवंदेवरातज्येष्ठत्वेनतत्प्रकल्पितं।३८ इतिनवमेषोडशः॥ ॥आयोःसप्तदशेत्वैलज्येष्ठपुत्रस्यपंचसुसुतेषुक्षत्रवृद्धादि

एषवःकुशिकावीरोदेवरातस्तमन्वित॥ अन्येचाष्टकहारीतजयक्रतुमदादयः ३७ एवंकौशिकगोत्रंतुवैश्वामित्रैःपृथग्विधं प्रवरांतरमापन्नंतद्धिचैवंविकल्पितं ३८॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेषोडशोऽध्यायः॥ ॥श्रीशुकउवाच॥ यः पुरूरवसःपुत्रआयुस्तस्याभवन्सुताः। नहुषःक्षत्रवृद्धश्चरजीरंभश्चवीर्यवान्॥१ अनेनाइतिराजेंद्रशृणुक्षत्रवृ[illegible]धोन्वयं क्षत्रवृद्धसुत[illegible]स्यासन्सुहोत्रस्यात्मजास्त्रयः।२ काश्यःकुशोगृत्समदइतिगृत्समदादभूत॥ शुनकःशौनकोयस्यबह्वृच प्रवरोमुनिः।३ काश्यस्यकाशिस्तत्पुत्रोराष्ट्रोदीर्घतमःपिता॥ धन्वंतरिर्दीर्घतमसआ[illegible]युर्वेदप्रवर्त्तकः।४ यज्ञभुग्वासुदेवां[illegible]शःस्मृतमात्रार्तिनाशनः। तत्पुत्रःकेतुमानस्यजज्ञेभीमरथस्ततः।५ दिवोदासोद्युमांस्तस्मा[illegible]त्प्रतर्दनइतिस्मृतः। सएवशत्रुजिद्वत्सऋतध्वजइतीरितः।६ तथाकुवलयाश्वेतिप्रोक्तोलर्कादयस्ततः॥७

ततुएणंविंशवर्धनंइदृश्रीकल्पावतारप्रस्तावात्पूर्वंवंशानुक्रमणमस्मादिकमेणप्रकात्रमिति। यस्यवंशेकल्पावतारस्तस्यवंशोऽविविक्तत्वादेतेनि रूप्यते। अतःपुरूरव[illegible]सःपुत्राणांपंचानांकष्टानांवंशानुक्रेदानींप्रथमस्यवंशमाहायशति। एवंनहुषस्यपातिपदउभन्तिषपिजूष्ठस्य। क्षत्रवधःक्षत्रवृद्धस्य।३ दीर्घतमसःपिता।४ स्मृत[illegible]मात्रएवार्तिरोगदुःखंनाशयतीतितथा।५ ततःप्रतर्दनादित्रिभिर्नामभिस्तस्मात्सकाशादलर्कादयः

७

भा०न०
३५

संत:
ण संततिः सत्यकेतोर्धृष्टकेतुः तस्मात्सुकुमारस्तस्माद्वीतिहोत्रः तस्य भार्गः अतो भार्गात् भार्गभूमिः ९ १० काश्यपः काशेर्वंश्याः काशेः प्रपिता
महस्य क्षत्रवृद्धस्यान्वयं अयंते यांतीति तथा ११ ततः अनेनसः शुद्धो जज्ञे १२ कृतकृत्यः स यतः आत्मवान् ज्ञानी अतः पुत्रोत्पादनं कृत

षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च। नालर्कादपरो राजन् बुभुजे मेदिनीं युवा ७ अलर्कात्संततिस्तस्मात्सुनीथोथ सुकेत
नः धर्मकेतुः सुतस्तस्मात्सत्यकेतुरजायत ८ धृष्टकेतुः सुतस्तस्मात्सुकुमारः क्षितीश्वरः वीतिहोत्रोस्य भर्गोतो भार्गभूमि
रभून्नृप ९ इतीमे काशयो भूपाः क्षत्रवृद्धान्वयायिनः रंभस्य रभसः पुत्रो गंभीरश्चाक्रियस्ततः ११ तस्य क्षेत्रे ब्रह्म जज्ञे शृणु वं
शमनेनसः शुद्धस्ततः शुचिस्तस्माच्चित्रकृद्धर्मसारथिः १२ ततः शांतरजा जज्ञे कृतकृत्यः स आत्मवान् रजेः पंचशतान्या
सन् पुत्राणाममितौजसां १३ देवैरभ्यर्थितो दैत्यान् हत्वेंद्रायाददाद्दिवं इंद्रस्तस्मै पुनर्दत्वा गृहीत्वा चरणौ रजेः १४ आत्मान
मर्पयामास प्रह्लादाद्यरिशंकितः पितर्युपरते पुत्रा याचमानाय नो ददुः १५ त्रिविष्टपं महेंद्राय यज्ञभागान् समाददुः गुरुणा हू ५
यमानेग्नौ बलभित्तनयान् [illegible] १७ ततः कृतः कृतस्यापि जज्ञे हर्यवनो नृपः सहदेवस्ततो हीनो जयसेनस्तु तत्सुतः १८ संकृ
तिस्तस्य च जयः क्षत्रधर्मा महारथः क्षत्रवृद्धान्वया भूपाः शृण्वथ वंशं च नाहुषं १९ ॥ इति श्रीभागवते महापुराणे नव
मस्कंधे सप्तदशोऽध्यायः ॥१७॥ तनयान्रजेः॥ अवधीद्भ्रंशितान्मार्गान्न कश्चिदवशिष्यते॥ कुशात्प्रतिः क्षात्रवृद्धात्संजयस्तत्सुतो जयः॥

वानित्यर्थः १४ तेषां मतिभ्रंशाय गुरुणा बृहस्पतिना अभिचारविधानेनाग्नौ हूयमाने सति १६ सिंहावलोकनेनाह क्षात्रवृद्धात् क्षत्रवृद्धपौत्रा राम
त्कुशात् प्रतिः प्रतेः संजयः १७ १८ १९ ॥ इति नवमे टीकायां सप्तदशोऽध्यायः ॥१७॥ ॥ ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टादशे ययातिस्तु ना(मां) कुषस्य कथोच्यते। यस्य पंचसु पुत्रेषु कनीयान् यहीकरां॥ तस्य राजस्य परिणाम मन धविहत्वं केती तिनथा तत्र हेतुः यत्रेति
२ स्थानात् स्वर्गति द्विजैर गस्त्यादिभिः॥३ यवीयसोन्वात्तनादिशात्। काव्यस्य शुक्रस्य वृषपर्वणश्च कन्याभ्यां कृतदारः सन्॥४ नात्र प्रातिलोमतावि

श्रीशुक उवाच॥ यतिर्ययातिः संयातिरायतिर्वियतिः कृतिः। षडिमे नहुषस्यासन्निंद्रियाणीव देहिनां॥ राज्यं नैच्छद्यतिः पित्रा दत्तं तत्परिणामवित्। यत्र प्रविष्टः पुरुष आत्मानं नावबुध्यते॥२ पितरि भ्रंशिते स्थानादिंद्राण्या धर्षणाद्द्विजैः। प्रापितेऽजगरत्वं वै ययातिरभवन्नृपः॥३ चतसृष्वादिशद्दिक्षु भ्रातॄन् भ्राता यवीयसः। कृतदारो जुगोपोर्वीं काव्यस्य वृषपर्वणः॥४ राजोवाच॥ ब्रह्मर्षिर्भगवान् काव्यः क्षत्रबंधुश्च नाहुषः। राजन्यविप्रयोः कस्माद्विवाहः प्रातिलोमकः॥५ श्रीशुक उवाच॥ एकदा दानवेंद्रस्य शर्मिष्ठा नाम कन्यका। सखीसहस्रसंयुक्ता गुरुपुत्र्या च भामिनी॥६ देवयान्या पुरोद्याने पुष्पितद्रुमसंकुले। व्यचरत्कलगीतालिनलिनीपुलिनेऽबला॥७ ता जलाशयमासाद्य कन्याः कमललोचनाः। तीरे न्यस्य दुकूलानि विजह्रुः सिंचतीर्मिथः॥८ वीक्ष्य व्रजंतं गिरिशं सह देव्या वृषस्थितं। सहसोत्तीर्य वासांसि पर्यधुर्व्रीडिताः स्त्रियः॥९ शर्मिष्ठाजानती वासो गुरुपुत्र्याः समव्ययत्। स्वीयं मत्वा प्रकुपिता देवयानीदमब्रवीत्। अहो निरीक्ष्यतामस्या दास्याः कर्म ह्यसांप्रतं॥

द्वयोः ईश्वरघटनादिति दर्शयन् कथामाह। एकदेत्यादिना प्रतिज्ञयाहृतरुच हस्तं तेन। गुरोः शुक्रस्य पुत्र्या देवयान्या च सम सह चरति इति रन्वयः॥६ कलगीता अलयो येषु तानि नलिनीपुलिनानि यस्मिन् पुरोद्याने तस्मिन् अबला शर्मिष्ठा। सिंचतीः सिंचंत्यः॥८ अजानती स्वीयं मत्वा गुरुपुत्र्या वासः समव्ययत् पर्यधात्॥१० असांप्रतं अन्याय्यं॥११॥ ॥

भा॰न॰
३६

अन्यायमेव ब्राह्मण्योत्कर्षवर्णनेन व्यनक्ति यैरिति त्रिभिः। ये ब्राह्मणाः परस्य पुंसो मुखं मुखाद्धुत्पन्नत्वेन तद्विग्रहत्वेन श्रेष्ठा इत्यर्थः। ज्योतिर्ब्रह्म पंथा
वेदमार्गः ॥१२॥ तदेवं ब्राह्मणमात्रमेव तावत्पूज्यं तत्रापि वयं भृगवः अस्याश्च पिता नः शिष्यः एवं सत्यपि त्वं अस्माभिधार्यं वासः इयमसती धृतवती
॥१९॥२०॥ निषिद्धोयं प्रतिलोमसंबंध इति चेत्तत्राह एष इति ॥२१॥ ब्राह्मणमेव त्वं वृणीहि किमनेनाग्रहेणेति चेत्तत्राह न ब्राह्मण इति बृहस्प

यैरिदं तपसा सृष्टं मुखं पुंसः परस्य ये। धार्यते यैरिह ज्योतिः शिवः पंथाः प्रदर्शितः ॥१२॥ यान्वंदंत्युपतिष्ठंते लोकनाथाः सुरेश्व
राः। भगवानपि विश्वात्मा पावनः श्रीनिकेतनः ॥१३॥ वयं तत्रापि भृगवः शिष्योस्या नः पितासुरः ॥ अस्मद्धार्यं धृतवती शूद्रो
वेदमिवासती ॥१४॥ एवं क्षिपंतीं शर्मिष्ठा गुरुपुत्रीमभाषत। रुषा श्वसंत्युरगीव धर्षिता दष्टदच्छदा ॥१५॥ आत्मवृत्तमविज्ञाय
कत्थसे बहु भिक्षुकि। किं न प्रतीक्षसेस्माकं गृहान्बलिभुजो यथा ॥१६॥ एवंविधैः सुपरुषैः क्षिप्त्वाचार्यसुतां सतीं। शर्मिष्ठा
प्राक्षिपत्कूपे वासश्चादाय मन्युना ॥१७॥ तस्यां गतायां स्वगृहं ययातिर्मृगयां चरन् ॥ प्राप्तो यदृच्छया कूपे जलार्थी तां ददर्श ह
॥१८॥ दत्त्वा स्वमुत्तरं वासस्तस्यै राजा विवाससे। गृहीत्वा पाणिना पाणिमुज्जहार दयापरः ॥१९॥ तं वीरमाहौशनसी प्रेमनि
र्भरया गिरा। राजंस्त्वया गृहीतो मे पाणिः परपुरंजय ॥२०॥ हस्तग्राहोपरो मा भूद्गृहीतायास्त्वया हि मे ॥ एष ईशकृतो वी
र संबंधो नौ न पौरुषः ॥२१॥ यदिदं कूपमग्नाया भवतो दर्शनं मम ॥ न ब्राह्मणो मे भविता हस्तग्राहो महाभुज ॥२२॥ कचस्य
बार्हस्पत्यस्य शापाद्यमशपं पुरा ॥२२॥

स्ततेस्सुतः कचः शुक्रात् मृतसंजी[नीवि]विद्यामध्यगात् ॥ तदा च देवयानी तं पतिं चकमे स च गुरुपुत्रीमनभ्यु
पेतिनितामुद्वहत् । ततश्च कुपिता सती नवेयं विद्या निष्फला भवितेति शशाप स च तव ब्राह्मणः। पतिर्न भवितेति तां शशाप तदेतदाह यमशपं
तस्य च शापात् ॥२३॥ राम
३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रापितं

अत्राखीयत्वात् अनभिप्रेतमपि दैवेनोपकृतं बुद्ध्वा तत्कृतं तस्यां सकामं स्वमनश्च बुद्ध्वा तस्य धर्मे मदीयं मनः प्रविशेदिति तस्या वचः प्रतिज्ञयाङ्गी
गीकृतवान् ।२४। शर्मिष्ठासंबंधोपि दैववशादेवात्र वृत्त इति दर्शयन्नाह । गते राजनीति नवभिः । उक्तं निशुकीत्यादि । कृतं कूपे प्रक्षेपादि ।२५
कापोतीं तु छन्दवृत्ति ।२६। प्रत्यनीका दैवाश्च विवक्षिताः । जयं प्राप एणीयाद्यस्मात् अनभिप्रेतं यस्य तथाभूतं ज्ञात्वा प्रत्यनीकानां विवक्षितमिति वा ।२७

ययातिरनभिप्रेतं दैवोपहृतमात्मनः । मनस्तु तत्कृतं बुद्ध्वा प्रतिजग्राह तद्वचः ।२४। गते राजनि सा वीरे तत्र स्म रुदती पितुः । न्यवेदय
त्ततः सर्वमुक्तं शर्मिष्ठया कृतं ।२५। दुर्मना भगवान्काव्यः पौरोहित्यं विगर्हयन् । स्तुवन्वृत्तिं च कापोतीं दुहित्रा प्रययौ पुरात्
२६। वृषपर्वाणमाज्ञाय प्रत्यनीकविवक्षितं । गुरुं प्रसादयन्मूर्ध्ना पादयोः पतितः पथि ।२७। क्षणार्धमन्युर्भगवान् शिष्यं चाचष्ट
भार्गवः । कामोस्याः क्रियतां राजन्नेनां त्यक्तुमिहोत्सहे ।२८। तथेत्युक्ते व्यवस्थिते प्राह देवयानी मनोगतं । पित्रा दत्ता यतो यास्ये सानुगा
यातु मामनु ।२९। स्वानां तत्संकटं वीक्ष्य तदर्थस्य च गौरवं । देवयानीं पर्यचरत् स्त्रीसहस्रेण दासवत् ।३०। नाहुषाय सुतां द
त्वा सह शर्मिष्ठयोशनाः । तमाह राजन् शर्मिष्ठामधास्तल्पेन कर्हिचित् ।३१। विलोक्यौशनसीं राजन् शर्मिष्ठा सप्रजां क्वचि
त् । तमेव वव्रे रहसि सख्याः पतिमृतौ सती ।३२। राजपुत्र्यार्थितोपत्ये धर्मं चावेक्ष्य धर्मवित् । स्मरन् शुक्रवचः काले दिष्टमेवाभ्य
पद्यत ।३३।

सानुगा स्वसखीसहिता शर्मिष्ठा मामनु यात्विति ॥ तत्र तस्माद्विगतात् शुक्रलोकात् संकटं वीक्ष्य । तत्र तस्मादवस्थितादर्थस्य प्रयोजनस्य गौरवं च वीक्ष्य १२८
तल्पेन अधाः वोपगच्छेरित्यर्थः ।३२। अपत्यार्थमृतुकाले प्रार्थनात्तस्याः कामपूरणं धर्ममवेक्ष्य । शुक्रस्य वचः स्मरन् दिष्टं दैवप्रापितमेव तत्संग
मम्भ्यपद्यत न तु कामत इत्यर्थः ।३३। [illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तो सो

चा०त० ३७ ३४। आसूर्याः शर्मिष्ठायाः अन्तर्गृहसकाशात् ३५ उपमंत्रयन् ३६ विकृतं रूपं करोतीति तथा ३७ ते दुहितरं कामैरप्राप्य तृप्तिं कामानां नो गौरि
तिवा शुक्र आह त्वं हि यो निधास्यति निर्धारयिष्यतीति सवयसा कामं व्यत्यस्य तां यथेष्टं जराम् स यं यातु व्यत्ययं नीयतामिति वा यद्वा व्यत्य
यस्मिन् विद्वः तां जरां व्यत्यस्य संगमयेत्यर्थः ३८ प्रतिजग्राह व्यवस्थानं जरा यावद्व्यवस्थितिर्येन सः ३९ यतो न धर्मज्ञा अनित्ये च यौवने नित्य बु
स्य

यदुं च तुर्वसुं चैव देवयानी व्यजायत। द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥ ३४ गर्भसंभवमासु यत्निर्दृं विज्ञाय मानिनी देवया
नी पितुर्गेहमयोत्क्रोधविमूर्छिता ३५ द्विजा मनुगतः कामी वचोभिरुपमंत्रयन् न चशसादयितुं शेके पादसंवाहनादिभिः ३६ शु
क्रस्तमाह कुपितः स्त्रीकामानृत पूरुष तां जरा विशता मंद विरूपकरणी नृणां ३७ ययातिरुवाच अतृप्तोस्म्यहं कामानां
ब्रह्मन् दुहितरि स्मते मत्प्रसन्नां यथाकामं वयसा योतिधास्यति ३८ प्रतिजग्राह व्यवस्थानः पुत्रं ज्येष्ठमवोचत यदो तात प्र
तीच्छेमां जरां देहि निजं वयः ३९ मातामहस्य तां वृक्षं न तृप्तो विषयेष्वहं वयसा त्वदीयेन रंस्ये कतिपयाः समाः ४० यदुरु
वाच नोत्सहे जरया स्थातुमंतराप्राप्तया तव अविदित्वा सुखं ग्राम्यं वैतृष्ण्यं नैति पूरुषः ४१ तुर्वसुं द्रुह्युमनुं त्रिधा द्रुह्यु श्चानुश्च
भारत प्रत्याचख्युरधर्मज्ञास्ततः शेवेनिवृद्धयः ४२ अपृच्छत्कनीयं पूरुं वयसोनं गुणाधिकं नत्वमग्रजवद्वत्स मां प्रत्याख्यातु
मर्हसि ४३ पूरुरुवाच को नु लोके मनुष्येन्द्र पितुरात्मकृतः पुमान् प्रतिकर्तुं क्षमो यस्य प्रसादाद्विन्दते परं ४४ उत्तम
श्चिंतितं कुर्यात् प्रोक्तकारी च मध्यमः अधमोऽश्रद्धया कुर्यादकर्ता उच्चरितं पितुः ४५
य: यौधरत्वं जरां किमहीप्ससीत्यत्राह प्रत्याख्यानं मातृत्यागः इत्याह नत्वमिति ३ आत्मकृतः स्वदेहकर्त्तुः प्रत्युपकारं कर्तुं को नु क्षमः ४४ तथापि पितु राम
र्यच्चिंतितं तत्कार्यः स उत्तमः यस्तु प्रोक्तकारी स मध्यमः यस्त्वश्रद्धया कुर्यात् सोऽधमः अकर्ता पितुरुच्चरितं तु पुरीषप्राया ४५ ३७

जुजुषे सेवितवान् ॥४५॥ यथोपजोषं यथाप्रीति जुजुषे ॥४६॥ नानेव नाति । यावदिंद्रियप्रवृत्तिः ॥ वस्तु परमेनानाति स्वप्नमायायामं महितो मनोरथः ए
वंसर्गः ॥४९॥५०॥ मनःसुखं कामभोगं कदिंद्रियैः कुत्सितैः पराङ्मुखैरिंद्रियैः ॥५१॥ ॥ इति नवमे ष्टादशः ॥ ॥ कृतविज्ञो ययातिः स्वचेष्टितं तत्त
जोपमं । देवयानीसमाश्वास्य विरक्तो मुक्तिमाप्तवान् । तु कतोगामजा हासस्तत्र जव त्तमात्मनः । विडंबयन् त्रिया प्राह निर्वेदयितुमात्मवान्

इति प्रमुदितः पूरुः प्रत्यगृह्णाज्जरां पितुः । सोऽपि तद्वयसा कामान् यथावज्जुजुषे नृप ॥४६॥ सप्तद्वीपपतिः सम्यक् पितृवत् पाल
२ यत्प्रजाः । यथोपजोषं विषयान् जुजुषे व्याहतेंद्रियः ॥४७॥ देवयान्यप्यनुदिनं मनोवाक्देहवस्तुभिः । प्रेयसः परमां प्रीतिमुवा
ह प्रेयसी रहः ॥४८॥ अयजद्यज्ञपुरुषं क्रतुभिर्भूरिदक्षिणैः । सर्वदेवमयं देवं सर्ववेदमयं हरिं ॥४९॥ यस्मिन्निदं विरचितं व्यो
म्नीव जलदावलिः । नानेव नाति विनाति स्वप्नमायामनोरथः ॥५०॥ तमेव हृदि विन्यस्य वासुदेवं गुहाशयं । नारायणमणीयांसं
निरा[illegible]शीरजयत्प्रभुं ॥५१॥ एवं वर्षसहस्राणि मनःषष्ठैर्मनःसुखं । विदधानोऽपि नातृप्यत्सार्वभौमः कदिंद्रियैः ॥५२॥ ॥ इति श्री
भागवते महापुराणे नवमस्कंधे अष्टादशोऽध्यायः ॥ ॥ श्रीशुक उवाच ॥ स इत्थमाचरन् कामान् स्त्रैणोऽपह्नवमात्मनः । बुद्ध्वा प्रि
यायै निर्विण्णो गाथामेतामगायत ॥१॥ शृणु भार्गव्यमूं गाथां मद्विधाचरितां भुवि । धीरा यस्यानुशोचंति वने ग्रामनिवासिनः ॥२॥
बस्त एको वने कश्चित् विचिन्वन् प्रियमात्मनः । ददर्श कूपे पतितां स्वकर्मवशगामजां ॥३॥ कामानाचरन्नुपतुंजातः गाथामिति
हासां मद्विधेन धर्मस्य हर्षेणाचरितामनुष्ठितां । मद्विधस्याचरितं यस्या मिति वा यस्य ग्रामनिवासिनः कामिनो मद्विधस्याचरितं वने स्थिताः
धीराः शोचंतीति तस्या गाथां शृणु आत्मानमनुलक्ष्याह । बस्त इति । प्रियामनुलक्ष्याह । अजामिति वने संसारे प्रियं विषयं ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोधसि तटे विषण्णायेण मृगादिकस्तु हस्तनी र्थ निर्गमाय मार्गं मधत्त ४ बह्व्य इति श्राम्यिष्टा प्रमुखाः कामयामासुः कांतं प्रति कामिनीः कामवस
५ पीवानं तुष्टिरमश्रु बकुलं रतिसमर्थमिसर्थः मीढ़ां सरेतः सेक्तारं॥ यानेको विदं अनितिंज्ञं अतएव श्रेष्टं नावबुध्यत नान्वबुध्यत॥ ह्यात्मा
मिन मितिश्रुकानि श्रायेणाह ७ इडविडाकारं बह्वजा तिश्रा संधितुं प्रसादयितुं ८ वृषणमठिणत जरयासंवी गा समर्थमकरोत

तस्मात्तु वरणी पाय बस्तः कामी विचिंतयन् व्यधत्त तीर्थमुत्कृत्य विषाणाग्रेण रोधसि ४ सोनीर्यकूपात्तु श्रोणीं तु मे वच कमे किल
तयावृतं समनुवीक्ष्य बह्वी जाः कांत कामिनी ५ पीवानं श्मश्रुलं श्रेष्टं मीढ़ां सं यानकोविदं स एको जवृषस्तासां बह्वीनां रतिवर्ध
नः ६ रिमे कामग्रहग्रस्त आत्मानं नावबुध्यत तमेव प्रेष्टतमया रममाणम यान्यया ७ विलोक्य कूपसंवग्ना मृष्यद्वस्तक
मतत् तं दुर्हृदं सुहृद्रूपं कामिनं क्षणसौहृदं इंद्रियाराममुत्सृज्य स्वामिनं दुःखिता ययौ ७ सोपि चानुगतः स्त्रैणः कृपणः
स्तां प्रसादितुं कुर्वन्निडविडाकारं नाशक्नोत् पथि संधितुं ७ तस्मात्तत्र द्विजः कश्चिद् अजास्वाम्यच्छिनद्रुषा लंबतं वृषणं भू
यः संदधेर्थाय योगवित् १० संबद्धवृषणः सोपि ह्यजया कूपलब्धया कालं बहूतिथं भद्रे कामैर्नाद्यापि तुष्यति ११ तत
थाहं कृपणः सुभ्रु भवत्याः प्रेमयंत्रितः आत्मानं नाभिजानामि मोहितस्तव मायया १२ यत्पृथिव्यां व्रीहियवं हिर
ण्यं पशवः स्त्रियः न दुह्यंति मनः प्रीतिं पुंसः कामहतस्य ते १३ न जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव
भूय एवाभिवर्धते १४ स्वर्थायस्तपुत्राः कामभोगाय योगवित् उर्पयत्त जराव्यस्य येन रतिः किं दद्राविस्तर्थः १० कूपलब्धया सह कामै
: सेव्यमानैर्न तु तृप्यति ११ न तु तर्हि पुनरपि बहवो विषयाः सेव्यतां ततो मनसि प्रीति कामोपशांत्या मोहो निवर्त्स्यति चेत्तत्राह १२ यदिति व्रीयामानदु
ह्यंति न प्रयच्छंति १३ हविषा घृतेन कृष्णवर्त्माग्निरिव १४ राम ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्हि करणकेनोपायेन वा मनसः संपूर्णप्रीतिः स्यात् । यथा कामोपशमः स्यादित्यत आह । यदेति षड्भिः । अमंगलं भावं रागद्वेषादिवैषम्यं । १४ ।
दुःखानि नितरां वहतीति तथा तां । १५ । स्त्रीसंनिधानं तु सर्वथा त्याज्यमित्याह । मात्रेति । अविविक्तं संकीर्णमासनं यस्य स तथा । कर्षति आकर्ष
ति । १६ । १७ । ननु दुःखमात्यागस्यातिदुःकरत्वात् कथं ब्रह्मणि मनस आधानं स्यात् । तत्राह । दृष्टमिति । यो नानुध्यायेत् न संविशेत् न चोप

यदा न कुरुते भावं सर्वभूतेष्वमंगलं । समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः । १४ । या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न
जीर्यते । तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् । १५ । मात्रा स्वस्रा दुहित्रा वा नाविविक्तासनो भवेत् । बलवानिंद्रियग्रामो वि
द्वांसमपि कर्षति । १६ । पूर्णं वर्षसहस्रं मे विषयान् सेवतोऽसकृत् । तथापि चानुसवनं तृष्णा तेषूपजायते । १७ । तस्मादेतामहं त्य
क्त्वा ब्रह्मण्यध्याय मानसं । निर्द्वंद्वो निरहंकारश्चरिष्यामि मृगैः सह । १८ । दृष्टं श्रुतमसद्बुद्ध्वा नानुध्यायेन्न संदिशेत् । संसृतिं चात्म
नाशं च तत्र विद्वान् स आत्मदृक् । १९ । इत्युक्त्वा नाहुषो जायां तदीयं पूरवे वयः । दत्त्वा स्वजरसं तस्मादाददे विगतस्पृहः । २० ।
दिशि दक्षिणपूर्वस्यां द्रुह्युं दक्षिणतो यदुं । प्रतीच्यां तुर्वसुं चक्र उदीच्यामनुमीश्वरं । २१ । भूमंडलस्य सर्वस्य पूरुमर्हत्तमं विशां ।
अभिषिच्याग्रजांस्तस्य वशे स्थाप्य वनं ययौ । २२ । आसेवितं वर्षपूगान् षड्वर्गं विषयेषु सः । क्षणेन मुमुचे नीडं जातपक्ष इव
द्विजः । २३ । स तत्र निर्मुक्तसमस्तसंग आत्मानुभूत्या विधुतत्रिलिंगः । परेऽमले ब्रह्मणि वासुदेवे लेभे गतिं भागवतीं प्रतीतः ।
२४

दिशेत् तत्र दृष्टश्रुतयोरनुध्यानादौ संसृतिरात्मनाशश्च भवति । १९ । २० । २१ । तस्य पूरोर्वशे स्थापयित्वा । २२ । विषयेषु शब्दादिषु आसेवितं षड्वर्गं षडिंद्रि
यसुखं मुमुचे तत्याज यद्वा विषयेषु आसेवितं सेवां कारितं षण्णामिंद्रियाणां वर्गं मुमुचे नीडं पैत्तत्तित्यर्थः । २३ । विधुतं निरस्तं त्रिगुणात्मकं लिंगं येन प्रती
तः प्रख्यातः । २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०न०
३९

प्रस्तोभमेवाह परिहासमिवेति यदा प्रस्तोभं नूनं निहन्ति मां गे बोध्यान्हनं मेने २६ कथं मम्मा वेश्यपतदाह नमस्कृति नमस्यादिभिः समावेश्येस्यर्थः। कृष्णे
वाच नमस्करोति २७॥ इति नवमे एकोनविंशः॥ विंशे पितृप्रसादाप्तराज्यासनमहोत्सवे। पूरोर्वंशे हि दौष्यन्तेर्भरतस्येर्यते यशः॥१ तत्सुतः अहं
यातिः सुतः ३ धर्मेयुश्च सत्येयुश्च व्रतेयुश्च धर्मसत्यव्रतेयवः ४ वनेयुश्चावमः स्मृतः। एवं दशैते रतेयुप्रमुखास्तस्य रौद्राश्वस्य घृताच्यामप्स

श्रुत्वा गाथां देवयानी मेने प्रस्तोभमात्मनः। स्त्रीपुंसोः स्नेहवैक्लव्यात्परिहासमिवेरितं॥२५॥ सा सन्निवासं सुहृदां प्रपायामिव ग
च्छतां विज्ञायेश्वरतंत्राणां मायाविरचितं प्रभोः॥२६ सर्वत्र संगमुत्सृज्य स्वप्नौपम्येन भार्गवी। कृष्णे मनः समावेश्य व्यधुनोल्लिंगमा
त्मनः॥२७॥ नमस्तुभ्यं भगवते वासुदेवाय वेधसे। सर्वभूताधिवासाय शांताय बृहते नमः॥२८॥ इति श्रीभागवते महापुराणे
नवमस्कंधे एकोनविंशोऽध्यायः॥१९॥ ॥श्रीबादरायणिरुवाच॥ पूरोर्वंशं प्रवक्ष्यामि यत्र जातोऽसि भारत॥ यत्र राजर्षयो वं
श्या ब्रह्मवंश्याश्च जज्ञिरे॥१ जन्मेजयो ह्यभूत्पूरोः प्रचिन्वांस्तत्सुतस्ततः॥ प्रवीरोऽथ मनुस्युर्वै तस्माच्चारुपदोऽभवत्॥२ तस्य सु
द्युरभूत्पुत्रस्तस्माद्बहुगवस्ततः। संयातिस्तस्याहंयाती रौद्राश्वस्तत्सुतः स्मृतः॥३॥ ऋतेयुस्तस्य कक्षेयुः स्थंडिलेयुः कृतेयु
कः। जलेयुः संततेयुश्च धर्मसत्यव्रतेयवः॥४ दशैतेऽप्सरसः पुत्रा वनेयुश्चावमः स्मृतः। घृताच्यामिंद्रियाणीव मुख्यस्य जग
दात्मनः॥५॥ ऋतेयो रंतिनावोऽभूत्त्रयस्तस्यात्मजा नृप। सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः॥६॥ तस्य मेधातिथिस्तस्मा
त्प्रस्कण्वाद्या द्विजातयः। पुत्रोऽभूत्सुमते रेभ्यो दुष्यंतस्तत्सुतो मतः॥७॥ दुष्यंतो मृगयां यातः कण्वाश्रमपदं गतः। तत्रासीनां स्वप्र
भया मंडयंतीं रमामिव॥८॥ विलोक्य सद्यो मुमुहे देवमायामिव स्त्रियं॥९॥ इति प्रभाजातानाम्प्सरसः इति घृताच्यामस्यैर्थे कक्षावतितिदृष्टांर
तः जगदात्मनः जगत आत्मभूतस्य मुख्यस्य प्राणस्येंद्रियाणीव॥ दुष्यंतस्य शकुंतलायां भरतपुत्रो भवदिति कथा वर्णयत दुष्यंतो मृगयामिति पंच
दशाभिः तामाश्रमं मंडयंतीं स्त्रियं विलोक्य मुमुहे॥ अमुह्यत्॥९॥ राम
३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्याद्दर्शनेन प्रमुदितोऽत एव सन्निवृत्तः परिश्रमो यस्य । १० पौरवाणां चेकेन ह्युधर्मेरिमतो । अतो मच्चेतसः त्वयि रमणादेवाहं त्वां राजन्मतनयां वे
१२ त्ति विश्वामित्रस्यात्मजाहं मेनकायां जाता तया स्वस्वर्गगमनेऽत्र त्यक्ता अतो राजन्यकन्यैवाहमित्यर्थः । १३ किंकरवाणि मेत्यादि वाक्यात्तदभिप्रा

बे

वृत्ता तां वरारोहां नटैः कतिपयैर्हतैः । तद्दर्शनप्रमुदितः संनिवृत्तपरिश्रमः ॥ १० प्रच्छकामसंतप्तः प्रहसन्स्निग्धया गिरा । कांते या
कमलपत्राक्षि कस्यासि किं दयं गमे ॥ ११ किं वा चिकीर्षितं तत्र वनवासान्निवृत्ते । अकं राजन्यतनयां विद्ध्यहं त्वां सुमध्यमे ॥ १२ ॥ न
वे हि वृत्तिः पौरवाणामधर्मे रमते क्वचित् ॥ शकुंतलोवाच ॥ विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने । वेदैतद्भगवान्कण्व एवाधी
र किंकरवाणि ते ॥ १३ आस्यतां प्रवरविद्वाद्गृह्यतामर्ह्यमेव नः । तुष्यतां संततिनीवारा राष्ट्रं तां यदि रोचते ॥ दुष्यंत उवाच ॥
उपपन्नमिदं सुभ्रु मतायाः कुशिकात्मजे । स्वयं हि वृणते राज्ञां कन्यकाः सदृशं वरं ॥ १४ ॥ अमित्युक्ते यथाधर्ममुपयेमे श
५१ त्र कुंतलां ॥ गांधर्वविधिना राजा देशकालविधानवित् ॥ १६ अमोघवीर्यो हि नृपो महिष्यां वीर्यमादधे ॥ श्वोभूते स पुरं यातः कालेनासू
त सा सुतं ॥ १७ क एवः कुमारस्य वने च केम प्रमुदिताः क्रियाः ॥ बध्वा मृगेंद्रान्स तरसा क्रीडन्नित्यं स बालकः ॥ १८ तं दुरस्ययविक्रां
तमादाय प्रमदोत्तमा ॥ हरेरंशांशसंभूतं भर्तुरंतिकमागमत् ॥ १९ यदा न जगृहे राजा भार्यापुत्रावविहितौ ॥ अथ एवं तांमस
वृत्तानां रवे वागमशरीरिणी ॥ २० माता भस्त्रा पितुः पुत्रो येन जातः स एव सः ॥ भरस्व पुत्रं दुष्यंत मावमंस्थाः शकुंतलां ॥ २१

युंजात्वाद ॥ उपपन्नमिति । १५ गांधर्वविधिना मिथः समयपूर्वकेण । १६ दुरस्ययं विक्रांतविक्रमणं यस्य । १८ । २० भस्त्रा चर्मपात्रं तद्वत् माता
आधारपात्रं पितुरेव तु पुत्रं तत्र हेतुः येनेति आत्मा पुत्रनामासीति श्रुतेः । भरस्व पुष्णाण । अनेन भरतनाम निरुक्तं । २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच॥ रेतोधा रेतःसेक्ता वंशकृत् पुत्रो यमक्षयात् पितरं नयति। तारयति। तथा च श्रुतिः पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः। तस्मात्पु
त्र इति प्रोक्तः स्वयमेव स्वयंभुवेति॥ पाठांतरे मात्र पित्रोः पुत्रं प्रति विवादे यमक्षयात् धर्म्मनिर्णेतुर्यमस्य सभायाः सकाशात् रेतोधा रेतःसेक्ता
पितैव धर्म्मेण विजित्य पुत्रं नयति न तु माता स्पर्द्धः। तत्स्मृत्वा तस्य पुत्रोऽस्तीति कृतवानिति विज्ञेयं २२ चक्रवर्त्ती बभूवेति शेषः। वसन्महिमा गीयते
तदर्थेते श्लोका अनिर्गीता इत्यादि बह्वृचश्रुत्या। हरेरंशभुवः अंशाज्जातस्य २३ तत्र लिंगमाह चक्रमिति २४। गंगायां अनुक्रमेण पंचपं
चाशता वाजिभिरीजे। पुरोधाय पुरोहितं कृत्वा यमुनायामनु च यमुनायामानुलोम्येन अष्टाधिकसप्ततिमेध्यान् अश्वान् बबंध। किं कुर्वन् व

रेतोधाः पुत्रो नयति नरदेव यमक्षयात्। त्वं चास्य धाता गर्भस्य सत्यमाह शकुंतला। २२। पितर्युपरते सोपि चक्रवर्त्ती महायशाः।
महिमा गीयते तस्य हरेरंशभुवो भुवि। २३। चक्रं दक्षिणहस्तेस्य पद्मकोशोस्य पादयोः। ईजे महाभिषेकेण सोभिषिक्तोऽधि
राड्विभुः। पंचपंचाशता मेध्यैर्गंगायामनु वाजिभिः। मामतेयं पुरोधाय यमुनायामनु प्रभुः। २५। अष्टसप्तति मेध्याश्वा
न्बबंध प्रददद्वसु। भरतस्य हि दौष्यंतेरग्निः साचीगुणे चितः। सहस्रं बद्वशो यस्मिन् ब्राह्मणा गा विभेजिरे। २६॥

वसु धनं प्रकर्षेण ददत् साचीगुणे प्रकृष्टगुणवति देशे अग्निः चितो भूत्। यस्मिन्नग्निचयने देशे वा सहस्रं ब्राह्मणाः भरतेन भूरिदानेन दत्ताः
गाः बद्वशः प्रत्येकं बद्वं विभेजिरे विभज्य जगृहुः। चतुर्विंशत्यधिकेः त्रयोदशसहस्रैरेकं बद्वं भवति। तथा हि। हिरण्येन परीवृतान् कृष्णान् शुक्ल
दतो मृगान् मष्णारे भरतो ददाच्छतं बद्वानि सप्त चेति श्रुत्युक्तानि सप्ताधिकशतं बद्वानि श्रीशुकेनोत्तरश्लोके चतुर्दशलक्षत्वेन संगृही
तानि अत्र दाक्षिण्येन मष्णारे नियुतानि चतुर्दशेति एवं चतुर्दशलक्षाणां सप्ताधिकशतभागो बद्वमिति उक्तं इयं च बद्वसंख्या श्लोकेन संगृह्यते चतु
र्दशानां लक्षाणां सप्ताधिकशतांशकः बद्वं चतुरशीत्या सहस्राणि त्रयोदश चार्द्वं॥ 

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवानामपि मायां वै नवं स्त्रग्वगात्। अवसरोत। यतः गुरुं हत्वं हरिरश्वायमौ मातः तदंश्वा नवतात्। मायवन्नर इतिपाठे क्त्वं श्रुत्वनुसारेण मायव
तां मे षः हरिरेवा सहस्त्रमर्षः। २८ मृगानश्वेष राजानू नजमं वृ मृगादयो गजजातिनिरा। मश्वारिस्त्वस्य स्रुतिपदस्य व्यास्यानं कर्मणी तिकस्मिं अ
श्विकर्म विशेषे केचित्तु मश्वारेतीर्थे इति व्याचक्षते ३० पुरा देवान् जित्वा येऽसुरास्सौ कां सिरसातलादि स्थाना नितेजिरे तेः आणिनिर्वलि
निर्देव स्त्रियो रसात लं नीताः सती: पुनराहरन्। आत्मिश्याणिनिः रत्नैर्मनुष्यादिनिः। महनीत्र इतिवा पाणि निरिति पाठे प्राणयो सुरास्ते

त्रयस्त्रिंशच्छतं यज्ञानवध्या विस्मापयन्नृपान्। दौष्यंतिरस्यगान्मायां देवानां गुरुमायया। २८ मृगानस्यज्ञ दत्तः क्ष स्मानू हिरण्येन
परिहृतान्। आदात कर्माणि मश्वारे निघुता निचतुर्दश। २९ न रतस्य महत्कर्म न पूर्वे नापरे नृपाः। नैवा पुर्नैव प्राप्स्यं तिवाहुभ्यां
त्रिदिवं यथा। ३० किरातहूणान्स्ववनानं धान्कंकानू ‍ ‍ कशाल्वकान्। त्रवर्त्सपानन्नृपान्प्राहरन्म्लेच्छान् दिग्विजये खिला
न्। ३१ जित्वा पुरा सुरा देवान्ययेरसौकां सितेजिरे देवस्त्रियो रसां नीताः आणिनिः पुनराहरन्। ३२ सर्वकामान् दुदुहतुः प्रजा
नां तस्य रोदसी समाः त्रिणव साहस्री र्दिक्षु चक्रमवर्तयत। ३३ सममखाद्दलोकपालात्व मैश्वर्यमधिराट्स्त्रियं चक्रं वा सब
लितं प्राणान्मृषेसुपरराम ह। ३४ तस्यासन्नृपवैदर्भ्यः पत्न्यः तिस्रः सुसंमताः। ज‌ ध्नुः सा गन्नयात् पुत्रान्नानुरूपा इती
रिते ३५॥ नीताः सती: यद्यपण्योपोहृतास्ते हृतान् पश्चात्पाहरदित्यर्थः ३२। ३। त्रिणव साहस्रीः समाः सप्तविंशति सहस्त्रं वत्सरान् चक्रं से
नाश्चाज्ञावा ३३। तस्यैव सर्गपणे मोहप्रकारमाह। सइति मृषे पतिविचार्येति शेषः ३४ नानुरूपाः सहक्षानन्नवंती तित्रज्ञाईरिते मतिव्यन्वि
रज्ञां कयास्मांस्त्यक्षतीति वयात् पुत्रान्नजध्नुः। पुनः पुत्राणां दर्शनवै ‍ माद्दत्र्यपानु संधानेन त्यजेत् नान्य ये त्या शयेन हतवत्यः ३५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वितथे वंशे सति तदर्थं क्रतुना यं मरुत्स्तोमेन यागेन यजतस्तस्य प्रसन्नाः सन्तो मरुतो भरद्वाजं नाम पुत्रमुपाददुः समर्पयामासुः ३५ मरुतां भरद्वाज
गमप्रकारं प्रदर्शयित्वाह द्वाभ्यामन्तर्वत्नीमिति चतुर्भिः । अन्तर्वत्न्यां गर्भिण्यां भ्रातुरुतथ्यस्य पत्न्यां ममतायां वीर्येण मैथुनाय कदाचित्प्रवृत्तो बृहस्पतिः त
द्द्वितीयगर्भस्थेनावकाशाभावादाक्रोशपूर्वकं गर्भस्थेन वारितः ततः क्रुद्धो बृहस्पतिरन्धो भवेति तं गर्भं शप्त्वा बलात् वीर्यं न्यषिञ्चत् ॥ ततो बृहस्प
तेः शापादन्धस्य दीर्घतमसोऽन्धत्वात्तेन च तद्वीर्यं पार्ष्णिप्रहारेण योनेर्बहिर्निःसारितं भूमौ पतितं सद्य एव कुमारोऽभवत् ३६ तं च परवी
र्यजं भर्तुस्त्यागात् विशङ्किता सती त्यक्तुकामां ममतां प्रति सुराः एनं बृहस्पतेर्ममतायाश्च विवादरूपं श्लोकं जगुः अत आह । तस्य नाम निरुच्यते

तस्यैवं वितथे वंशे तदर्थं यजतः सुतं । मरुत्स्तोमेन मरुतो भरद्वाजमुपाददुः ३५ अन्तर्वत्न्यां भ्रातृपत्न्यां मैथुनाय बृहस्पतिः ।
प्रवृत्तो वारितो गर्भं शप्त्वा वीर्यमवासृजत् ३६ तं त्यक्तुकामां ममतां भर्तृत्यागविशङ्किताम् । नाम निर्वचनं तस्य श्लोकमेनं सुरा
जगुः ३७ मूढे भर द्वाजमिमं भर द्वाजं बृहस्पते । यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयं ३८

येन तं तन्नामनिर्वचनेनैव भर्तुस्त्यागशङ्कामपाकर्तुमित्यर्थः ३८ तत्र पुत्रं त्यक्तुकामां ममतां बृहस्पतिराह हे मूढे इमं पुत्रं भर पुषाण अन्यथा विन
मीत्यर्थः इति तत्राह । भरद्वाजं एकस्य क्षेत्रेऽन्यस्य बीजादिति द्वयोः सकाशाज्जातं अतस्त्वमप्यमुं पुत्र इति न तस्मान्ममायत्तं केत्यर्थः एवमुक्ता सती तं प्रत्या
ह हे बृहस्पते त्वमिमं भर यतः द्वाजं द्वाभ्यां मम तवास्माकं जातं अतो नाहमेकाकिनी भरामीत्यर्थः यतः यस्मादेवमुक्त्वा पितरौ ममताबृ
हस्पती विवदमानौ पुत्रं परित्यज्य यातौ । ततो हेतोरयं भरद्वाज इति पाठान्तरे यत्तस्य त्यागदुःखात्पितरौ यातावित्यर्थः ३८

राम
४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वितथं व्यभिचारसंभवात् । तमात्मजं वितथं निरर्थकं मत्वा ममतामसृजत । तमाज । भागांतरे त्यक्तं । प्रथमजं तु वीर्यजातमेव सुतस्यात्म
जं मत्वा बृहस्पतेर्जातं तत्याजेत्यर्थः । एवं तयोस्त्यक्तं मरुतो बिभ्रतु । त्यक्त्वा किं मरुतः तदेवं मरुद्भिः भरणीयं भरतस्यान्वये वितथे सति दृश्यः ॥ ४० ॥
नवमे विंशोऽध्यायः ॥ । एकविंशे तु दौष्यन्तेः सुतस्यान्वय उच्यते । रंतिदेवाजमीढादेर्यत्र कीर्तिः प्रकम्यते ॥ भरतस्यान्वये वितथे सति दृश्वा
तयसंज्ञो नरराजः स च ब्राह्मणोऽपि भरतस्य दत्तः पुत्रो जात इति तद्वंशोऽनुक्रम्यते ॥ वितथस्य सुतो मन्युः । तस्मात् बृहत्क्षत्र जय महावी

चोद्यमाना सुरैरेवं मत्वा वितथमात्मजं । व्यसृजन्मरुतो बिभ्रन् दत्तोऽयं वितथेऽन्वये ॥ ४० ॥ इतिश्रीभागवते महापुराणे नवमस्कंधे विं
शोऽध्यायः ॥ २० ॥ ॥ श्रीशुक उवाच ॥ वितथस्य सुतो मन्युर्बृहत्क्षत्रो जयस्ततः । महावीर्यो नरो गर्गः संकृतिस्तु नरात्मजः ॥ गुरुश्च रं
तिदेवश्च संकृतेः पांडुनंदन । रंतिदेवस्य हि यश इहामुत्र च गीयते ॥ २ ॥ वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षतः । निःकिंचनस्य
धीरस्य सकुटुंबस्य सीदतः ॥ ३ ॥ व्यतीयुरष्टचत्वारिंशदहान्यपिबतः किल । घृतपायससंयावं तोयं प्रातरुपस्थितं ॥ ४ ॥ कृच्छ्रप्रा
प्तकुटुंबस्य क्षुत्तृड्भ्यां जातवेपथोः । अतिथिर्ब्राह्मणः काले भोक्तुकामस्य चागमत् ॥ ५ ॥ तस्मै संव्यभजत्सोऽन्नमादृत्य श्रद्धयान्वि
तः । हरिं सर्वत्र संपश्यन् स भुक्त्वा प्रययौ द्विजः ॥ ६ ॥ अथान्यो भोक्ष्यमाणस्य विभक्तस्य महीपतेः । विभक्तं व्यभजत्तस्मै वृष
लाय हरिं स्मरन् ॥ ७ ॥

र्यनरगर्गाः पंच पुत्रा बभूवुः ॥ १ ॥ २ ॥ वियद्वित्तस्य वियतो गगनात् दैवोद्यमं विना दैवादुपस्थितमेव वित्तं भोग्यं यस्य ॥ य
था । वियद्वृत्त्यं यं प्राप्नुवन् वित्तं भोग्यं यस्य तद्विवाह ॥ बुभुक्षतोऽपि सतो लब्धं लब्धं ददतः । तस्य पंच यतितिः किंचन स्यात् यदि मासार्धैः पंचदशभिः
दुःखपिबतो जलपानमप्यकुर्वतः घृतादिच यावन्नं दैवे कांतो यं च ॥ ४ ॥ ५ ॥ ६ ॥ अथान्यो वृषलोऽतिथिरागमत् । विभक्तस्य कुटुंबार्थमन्ना
दिकं विभक्तवतः ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना.न.
४२

८८

मगणायश्वयूपसहितायँतुवेषंत्रवरितं॥ एकमेवनपर्ष्यतीति॥७॥११॥ तथा परदुःखासहिष्णुतयासर्वेषांदुःखंस्वयंमेवकुमास्मास्ते॥ नेति॥ प्राणि
मात्रस्यदुःखंदृष्ट्वाहंविमुक्तोगतिमप्यहंनकामयेतर्हिकिंकामयसेतदाह॥ अखिलदेहभाजामार्त्तिदुःखंतत्त्वेनोक्तरूपेणांतःस्थितः॥
सन्नहंप्रपद्येतात्मुयामितिएवंकामयेयेनदुःखेनोक्तामयाहेतुभूतेनतेसर्वेऽदुःखासवंति॥१२॥ नतुदुःखंकिमितिप्रार्थयसे॥ परदुःखनिवृत्तिसे

मतिर्भूतेतमन्योगादतिथिः स्वमितिराहृतः॥ राजन्मेदीयतामत्रंमगणायबुभुक्षते॥८॥ सत्याहसोवशिष्टंयत्बहुमानपुरस्कृतं॥
नत्वद्दत्वानमस्यत्केयसःश्वपतयेविभुः॥९॥ पानीयमात्रमुद्वेषंतच्चैकपरितर्पणं॥ पास्यतःपुक्कसोभ्यागात्तोयंदेह्यशुभस्यमे॥१०॥ तस्य
तांकरुणांवाचंनिशम्यविपुलश्रमां॥ कृपयाभृशसंतप्तइदमाहामृतंवचः॥११॥ नकामयेहंगतिमीश्वरात्परामष्टर्द्धियुक्तामपुनर्भवंवा॥ ३ राग
आर्त्तिप्रपद्येखिलदेहभाजामंतःस्थितोयेनभवंत्यदुःखाः॥१२॥ क्षुत्तृट्श्रमोगात्रपरिश्रमश्चदैन्यंक्लमःशोकविषादमोहाः॥
सर्वेनिवृत्ताःकृपणस्यजंतोर्जिजीविषोर्जीवजलार्पणान्मे॥१३॥ एवंप्रभाष्यपानीयंम्रियमाणःपिपासया॥ पुक्कसायाददाद्धीरो रा
निसर्गकरुणोनृपः॥१४॥ तस्यत्रिभुवनाधीशाःफलदाःफलमिच्छतां॥ आत्मानंदर्शयांचक्रुर्मायाविष्णुनिर्मिताः॥१५॥ सवै रू
तेभ्योनमस्कृत्यनिःसंगोविगतस्पृहः॥ वासुदेवेभगवतिभक्त्याचक्रेमनःपरं॥१६॥

वमम सर्वदुःखनिवृत्तिरित्याह॥ क्षुत्तृडितिकृपणस्यजंतोर्जीवनहेतोःजलस्यार्पणात् मेसर्वेक्षुत्तृडादयोनिवृत्ताः॥१३॥ इत्येवंसंभाष्य
॥१४॥ त्रीनुवनाधीशाःब्रह्मादयःमायांतदीयधैर्यपरीक्षार्थंप्रथमंमायया हफलादिरूपेणप्रवर्तिताःसंतइत्यर्थः॥१५॥ परंकेवलंवासुदेवेम
त्यानमस्थक्केनतुतान् किमपियाचितवान्॥१६॥ राम
४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनन्यराधसः ईश्वरादतिरिक्तफलांतरानपेक्षस्य अप्रत्यलीयत आत्मन्येव लीनाभूत्।१७। एवमन्युसुतस्य नरस्य वंशमुक्त्वा तत्सुतस्यैव गर्गस्य वंशमाह। गर्गा
दिति। महावीर्यस्य वंशमाह। दुरितक्षयः तस्य त्रय्यारुणिः कविः पुष्करारुणिश्चेति त्रयः पुत्राः कथंभूताः ये अत्र एतद्वंशे ब्राह्मणगतिं ब्राह्मणरूपतां ग
ताः। मन्युपुत्राणां पंचानां श्रेष्ठस्य वंशमाह बृहत्क्षत्रस्येति यत्र येन हस्तिनापुरं कृतमित्यर्थः।२०। अजमीढादयस्त्रयो हस्तिनः पुत्राः।२१। अजमीढाद्विद्वा
न् पुत्रो बृहदिषुर्नामाभवत्।२२।२३। पारस्य तनयो नीपः नीपस्य पुत्रशतं।२४। स कृत्व्यां संज्ञायां शुककन्यायां ब्रह्मदत्तं जनयामास तदुक्तं हरिवं

ईश्वरालंबनं चित्तं कुर्वतोनन्यराधसः। मा यागुणमयो राजन् स्वप्नवत्प्रत्यलीयत।१७। तत्प्रसंगानुभावेन रंतिदेवानुवर्तिनः। अभवन्
योगिनः सर्वे नारायणपरायणाः।१८। गर्गाच्छिनिस्ततो गार्ग्यः क्षत्राद्ब्रह्म ह्यवर्तत। दुरितक्षयो महावीर्यात्तस्य त्रय्यारुणिः कविः।१९।
पुष्करारुणिरित्यत्र ये ब्राह्मणगतिं गताः। बृहत्क्षत्रस्य पुत्रोभूद्धस्ती यद्धस्तिनापुरं।२०।२०। अजमीढो द्विमीढश्च पुरुमीढश्च हस्तिनः। अ
जमीढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः।२१। अजमीढाद्बृहदिषुस्तस्य पुत्रो बृहद्धनुः। बृहत्कायस्ततस्तस्य पुत्र आसीज्जयद्रथः।२२। त
त्सुतो विशदस्तस्य सेनजित्समजायत। रुचिराश्वो दृढहनुः काश्यो वत्सश्च तत्सुताः।२३। रुचिराश्वसुतः पारः पृथुसेनस्तदात्मजः। पारस्य त
नयो नीपस्तस्य पुत्रशतं त्वभूत्।२४। स कृत्व्यां शुककन्यायां ब्रह्मदत्तमजीजनत्। स योगी गवि भार्यायां विष्वक्सेनमधात्सुतं।२५।

शादिषु पराशरकुलोत्पन्नः शुको नाम महायशाः। व्यासादरण्यां संभूतो विधूमोग्निरिव ज्वलन्। स तस्यां पितृकन्यायां वीरिण्यां जनयिष्यति कृष्णं
गौरं प्रभुं शंभुं तथा भूरिश्रुतं जयं। कन्यां कीर्तिमतीं षष्ठीं योगिनीं योगमातरं। ब्रह्मदत्तस्य जननीं महिषीं त्वणुहस्य चेति यद्यपि शुकस्यैवं विधो गृ
हसंगो निरतः तथापि विरहातुरं व्यासमनुयांतं दृष्ट्वा छायाशुकं निर्माय गतवान् तदभिप्रायेणैव गार्हस्थ्यादिव्यवहार इत्यविरोधः। ब्रह्मदत्तो यो
गी गवि विष्वक्सेनं स्वकन्यायां।२५।

रवि वाचि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स एव योगतंत्रं चकार। बार्हदीषवः बृहदिषोः बृहत्पारमेदी दीर्घत्वमार्षं २६ सुपार्श्वस्ततस्तु पार्श्वस्य पिता २७ प्राच्यसाम्नां षट्संहितां जगौ। विनव्याप्यापि
तवान् २८। अजमीढस्य वंशमाः प्रियमेधादयः केचिद्ब्राह्मणा बभूवुः ३०। बृहदिषुश्चान्तयः इत्यनियास्येति वंशाद् यमुक्तं तस्यैव वंशानंतरमाह नवि

जैगीषव्योपदेशेन योगतंत्रं चकार ह। उदक्सेनस्ततस्तस्मात् भल्लादो बार्हदीषवाः २६। यवीनरो द्विमीढस्य कृतिमान् तत्सुतः स्मृ
तः। नाम्ना सत्यधृतिर्यस्य दृढनेमिः सुपार्श्वकृत् २७ सुपार्श्वात्सुमतिस्तस्य पुत्रः संनतिमांस्ततः। कृती हिरण्यनाभाद्यो योगं प्राप्य जगौ स्म
षट् २८ संहिताः प्राच्यसाम्नां वै नीपो ह्युग्रायुधस्ततः। तस्य क्षेम्यः सुवीरोऽथ सुवीरस्य रिपुंजयः २९ ततो बहुरथो नाम पुरमीढोऽप्रजो
ऽभवत्। नलिन्यामजमीढस्य नीलः शांतिः सुतस्ततः ३० शांतेः सुशान्तिस्तत्पुत्रः पुरुजोऽर्कस्ततोऽभवत्। भर्म्याश्वस्तनयस्तस्य पंचासन्
मुद्गलादयः ३१ यवीनरो बृहदिषुः कांपिल्यः संजयः सुताः। भर्म्याश्वः प्राह पुत्रा मे पंचानां रक्षणाय हि ३२ विषयाणामलमिमे इति
पंचालसंज्ञिताः। मुद्गलाद्ब्रह्मनिर्वृत्तं गोत्रं मौद्गल्यसंज्ञितं ३३ मिथुनं मुद्गलाद्भार्म्याद्दिवोदासः पुमानभूत्। अहल्या कन्यका यस्यां
शतानंदस्तु गौतमात् ३४ तस्य सत्यधृतिः पुत्रो धनुर्वेदविशारदः। शरद्वांस्तत्सुतो यस्मादुर्वशीदर्शनात्किल ३५ शरस्तंबेऽपतद्रेतो
मिथुनं तदभूच्छुभं। तद्दृष्ट्वा कृपयाऽगृह्णाच्छंतनुर्मृगयां चरन्। कृपः कुमारः कन्या च द्रोणपत्न्यभवत्कृपी ३६ ॥ इति श्री
भागवते महापुराणे नवमस्कंधे एकविंशतितमोऽध्यायः ॥२१॥

दंसी ३

पं चामी

ग्यामितियावत्समाप्ति ३० ३१ मुद्गल एकः यवीनरादयश्चत्वारस्तेषां पांचा ३२ ३
भार्म्यात् भर्म्याश्वपुत्रात्। मिथुनं चाहतदेवाह दिवोदासः पुमान् अहल्या च कन्या केति ३६ ॥ इति नवमे एकविंश ॥२१॥

राम
ध३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वाविंशे तु दिवोदासवंश्यमुख्याः प्रवर्णिताः। ऋक्षवंशे जरासंधपार्थदुर्योधनादयः॥ १ तस्य सोमकस्य पुत्राणां शतं बभूव तेषां जंतुर्ज्येष्ठः। १ यवीयान्
पृषतः॥ अजमीढस्यैव वंशांतरमाह य इति ततः संवरणात् कुरुः॥ ४ तस्य कृतिनः उपरिचरो वसुः तस्य वसोः बृहद्रथो मुख्यो येषां ते॥ ५

श्रीशुक उवाच॥ मित्रेयुश्च दिवोदासाच्च्यवनस्तत्सुतो नृप॥ सुदासः सहदेवोऽथ सोमको जंतुजन्मकृत्॥ तस्य पुत्रशतं तेषां य
वीयान्पृषतः सुतः। द्रुपदो द्रौपदी तस्य धृष्टद्युम्नादयः सुताः॥ धृष्टद्युम्नाद्धृष्टकेतुर्भार्म्याः पंचालका इमे॥ योऽजमीढसुतो ह्य
न्य ऋक्षः संवरणस्ततः॥ ३॥ तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः॥ परीक्षित्सुधनुर्जह्नुर्निषधाश्च कुरोः सुताः॥ ४
सुहोत्रोऽभूत्सुधनुषश्च्यवनोऽथ ततः कृती॥ वसुस्तस्योपरिचरो बृहद्रथमुखास्ततः॥ ५॥ कुशांबमत्स्यप्रत्यग्रचेदिपाद्याश्च
चेदिपाः॥ बृहद्रथात्कुशाग्रोऽभूदृषभस्तस्य तत्सुतः॥ ६ जज्ञे सत्यहितोऽपत्यं पुष्पवांस्तत्सुतो जहुः॥ अन्यस्यां चापि भार्या
यां शकले द्वे बृहद्रथात्॥ ७ ते मात्रा बहिरुत्सृष्टे जरया चाभिसंधिते॥ जीव जीवेति क्रीडंत्या जरासंधोऽभवत्सुतः॥ ८ ततश्च
सहदेवोऽभूत्सोमापिर्यच्छ्रुतश्रवाः॥ परीक्षिदनपत्योऽभूत्सुरथो नाम जाह्नवः॥ ९ ततो विदूरथस्तस्मात्सार्वभौमस्ततोऽभव
त्॥ जयसेनस्तत्तनयो राधिकोऽतोऽयुतो ह्यभूत्॥ १०॥ ततश्चाक्रोधनस्तस्माद्देवातिथिरमुष्य च॥ ऋष्यस्तस्य दिलीपोऽभूत्प्रतीप
स्तस्य चात्मजः॥ ११ देवापिः शांतनुस्तस्य बाह्लीक इति चात्मजाः॥ पितृराज्यं परित्यज्य देवापिस्तु वनं गतः॥ १२॥

तानिग्रहः कुशांबेति तत्सुतः पुष्पवान् जज्ञे तस्यापत्यं सत्यहित इति योज्यं ६ ७ जरयाराक्षस्या॥ ८ यत् यस्मात् सोमापेः श्रुतश्रवाः कुरोः पुत्रः प
रीक्षिदनपत्यः जाह्नवः जह्नोः पुत्रः॥ ९॥ अतो राधिकादयुतोऽभूदित्यर्थः॥ तस्य प्रतीपस्य देवापिः शंतनुर्बाह्लीकाः॥ १२॥

प्राक् पूर्वजन्मनि सहानिषत् इति संज्ञा यस्य सः ॥१३॥ यदा देवो न ववर्ष तदा शंतनुस्तत्र कारणं ब्राह्मणान् पप्रच्छ ॥१४॥ ब्राह्मणैरेवमुक्तः दाराग्निहो
त्रसंयोगं कुरुते ऽग्रजे स्थिते। परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः इति स्मृतेः। योऽग्रजस्तव स पतितो न तस्मिन् त्वयं त्वाहृत्योपि परिवेत्तैव नवर्ति
अतस्त दोषपरिहाराय राज्यमग्रजाय देहि। ततो वृष्टिर्भविष्यतीत्येवमुक्तः ॥१५॥ शंतनुर्वनं गत्वाऽग्रजं छंदयामास। राज्ञः प्रजापालनादि परो धर्मः
अतस्त्वं राज्यं स्वीकुर्विति प्रार्थितवान्। ततः पूर्वमेव तस्य मंत्रिणा अश्मसारव संज्ञेन देवापिः पा षंडीकृत्य राजानर्हणं कर्तुं ये प्रहिताः विप्रा

अनवृष्टौ शंतनुराजा अकसहानिष मज्जितः। यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः ॥१३॥ शांतिमाप्नोति चैवाग्र्यां कर्म
णा तेन शंतनुः। समा द्वादश तद्राज्ये न ववर्ष यदा विभुः ॥१४॥ शंतनुर्ब्राह्मणैरुक्तः परिवेत्तात्वमग्रभुक् राज्यं देह्यग्रजा
यास्तु पुरराष्ट्रविवृद्धये ॥१५॥ एवमुक्तो द्विजैः श्रेष्ठं छंदयामास सोऽब्रवीत्। तन्मंत्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितो गिरा ॥१६॥ विवस्वा
न्निवादान्वै तदा देवो ववर्ष ह। देवापियोगमास्थाय कलापग्राममाश्रितः ॥१७॥ सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति
१८ बाह्लीकात्सोमदत्तोऽभूद्भूरिर्भूरिश्रवास्ततः ॥१८॥ शलश्च शंतनोरासीद्गंगायां भीष्म आत्मवान्। सर्वधर्मविदां श्रेष्ठो महा
भागवतः कविः ॥१९॥ वीरयूथाग्रणीर्येन रामोऽपि युधि तोषितः। शंतनोर्दासकन्यायां जज्ञे चित्रांगदः सुतः ॥२०॥

नैः पाषंडमताश्रयया गिरा वेदात् विभ्रंशितः सन् ॥१६॥ विवदवादस्यातिवादान् निंदावचनानि सोऽब्रवीत्। ततस्तस्य पातित्येन राज्यानर्हत्वे ज्या
ते शंतनोर्दोषाभावात् देवो ववर्षेत्यर्थः ॥१७॥ ततः सोमदत्तात् भूरिः भूरिश्रवाः शलश्चेति त्रयः ॥१८॥ १९ एमोजा मत्स्यगंधा दासकन्यामिति ति
परिचरस्य वसोर्वीर्येण मत्स्यगर्भादुत्पन्ना कन्या दासैः कैवर्तैः पालिता अतो दासकन्येति प्रसिद्धा यां मत्स्यवत्यां ॥२०॥




CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाम्ना तत्समाननाम्ना चित्रांगदेन गंधर्वेण युद्धे हतः। यस्यां सत्यवत्यां शंतनुपरिग्रहात्पूर्वमेव वेदाः गुप्ता येन। यतोहं जातः इदं श्रीभागवतं चाध्यगां
अधिगतवानस्मि। २२ स्वयंवरात् भीष्मेण बलादुपानीते २४ मात्रा सत्यवत्या उक्त इति निषेधाभावमाह। अपतिरपत्यलिप्सुर्देवराद्गुरुप्रयुक्तात्
श्रीर नर्तुमती यादि वचनात् २५ दुःशला नाम कन्या च जज्ञे २६ अरण्ये मृगव्याजापान्मैथुने रुद्धस्य प्रतिबद्धस्य २७ सत्यदस्राभ्यामश्विभ्यां पंचमो युयुधि

विचित्रवीर्यश्चावरजो नाम्ना चित्रांगदो हतः। यस्यां पराशरात्साक्षादवतीर्णो हरेः कला ॥२१॥ वेदगुप्तो मुनिः कृष्णो यतोहमिदमध्यगां
हित्वा स्वशिष्यान्पैलादीन्भगवान्बादरायणः ॥२२॥ मह्यं पुत्राय शांताय परं गुह्यमिदं जगौ। विचित्रवीर्योथोवाह काशिराजसुते ब
लात् ॥२३॥ स्वयंवरादुपानीते अंबिकांबालिके उभे। तयोरासक्तहृदयो गृहीतो यक्ष्मणा मृतः ॥२४॥ क्षेत्रेऽप्रजस्य वै भ्रातुर्मात्रोक्तो बा
दरायणः। धृतराष्ट्रं च पांडुं च विदुरं चाप्यजीजनत् ॥२५॥ गांधार्यां धृतराष्ट्रस्य जज्ञे पुत्रशतं नृप। तत्र दुर्योधनो ज्येष्ठो दुःशला चापिक
न्यका ॥२६॥ शापान्मैथुनरुद्धस्य पांडोः कुंत्यां महारथाः। जाता धर्मानिलेंद्रेभ्यो युधिष्ठिरमुखास्त्रयः ॥२७॥ नकुलः सहदेवश्च मा
त्प द्र्यां नासत्यदस्रयोः। द्रौपद्यां पंच पंचभ्यः पुत्रास्ते पितरोऽभवत् ॥२८॥ युधिष्ठिरात्तिबंध्यः श्रुतसेनो वृकोदरात्। अर्जुनाच्छ्रुतकी
र्तिस्तु शतानीकस्तु नाकुलिः ॥२९॥ सहदेवसुतो राजन्श्रुतकर्मा तथापरे। युधिष्ठिरात्तु पौरव्यां देवकोऽथ घटोत्कचः ॥३०॥ भीर
मसेनाद्धिडिंबायां काल्यां सर्वगतस्ततः। सहदेवात्सुहोत्रं तु विजयासूत पार्वती ॥३१॥ करेणुमत्यां नकुलो नरमित्रं तथार्जुनः। इ
रावंतमुलूप्यां वै सुतायां बभ्रुवाहनं। मणिपूरपतेः सोपि तत्पुत्रः पुत्रिकासुतः ॥३२॥

ष्ठिरादिभ्यः पंचाभवन् २८ ॥ २९ ॥ तथापरे भार्यांतरेषु ३०
काशी चान्या भीमस्य भार्या तस्यां ततो भीमसेनात् सर्वगतो नाम पुत्रो भवदित्यर्थः ३१ उलूप्यां नागकन्यायां मणिपूरप तेः सुतायां पुत्रिकाधर्मेणेदत्ता
यां बभ्रूवाहनमसूत अतस्तत्पुत्र सन्नपि सः पुत्रिकासुतः। मातामहसुत इत्यर्थः ३२ श्रीकृष्ण ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.न.
४५

तुरसंज्ञं पुरोहितं लब्ध्वा॥३७॥ न विद्यानाहतस्य पुत्र इति। यावत्समाप्ति याज्ञवल्क्यात् क्रियाज्ञानं परं चात्मज्ञानं शौनकात् प्राप्स्यति। अस्त्रज्ञानं च

नवृतातः सुनन्दायामस्मिन्मनुरजायत। सर्व्वातिरथजिद्वीरस्तस्य रायांततो नवान् ३३ परिक्षीणेषु कुरुषु द्रौणेर्ब्रह्मास्त्रतेजसा त्वं
च कृष्णानुभावेन सञ्जीवो मोचितोन्तकात् ३४ तवेमे तनयास्तात जनमेजयपूर्व्वकाः। श्रुतसेनो भीमसेन उग्रसेनश्च वीर्य्यवान् ३५
जनमेजयस्त्वां विदित्वा तक्षकान्निधनं गतं सर्प्पान्वै सर्प्पयागाग्नौ स होष्यति रुषान्वितः ३६ कावषेयं पुरोधाय तुरं तुरग
मेधयाट्। समंतात्पृथिवीं सर्व्वां जित्वा यक्ष्यति चाध्वरैः ३७ तस्य पुत्रः शतानीको याज्ञवल्क्यात्त्रयीं पठन्। अस्त्रज्ञानं क्रिया
ज्ञानं शौनकात्परमेष्यति ३८ सहस्रानीकस्तत्पुत्रस्ततश्चैवाश्वमेधजः। असीमकृष्णस्तस्यापि नेमिचक्रस्तु तत्सुतः ३९
गजाह्वये हृते नद्यां कौशाम्ब्यां साधु वत्स्यति उक्तस्ततश्चित्ररथस्तस्माच्छुचिरथः सुतः। ४० तस्माच्च वृष्टिमांस्तस्य सुषेणोथ
महीपतिः। सुनीथस्तस्य भविता नृचक्षुर्यत्सुखीनलः ४१ परिप्लवः सुतस्तस्मान्मेधावी सुनयात्मजः। नृपंजयस्ततो
दूर्व्वस्तिमिस्तस्माज्जनिष्यति। तिमेर्बृहद्रथस्तस्माच्छतानीकः सुदासजः॥४२॥

कुलाचार्यादि तिष्ठस्यं। याज्ञवल्क्यात्त्रयीमधीत्य कृपादस्त्राण्यवाप्येति वैशम्पायनोक्तेः क्वचित्तु अस्त्रज्ञानं कृपादित्येव पाठः ३९।४०। यत्तस्मात्सुखी
नलः पुत्रः ४१ तस्मात्परिप्लवात्सुनयः। तस्मान्मेधावीत्यर्थः। तस्मात्सुदासः ततः शतानीक इत्यर्थः॥४२॥

राम
४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य
४३।४४।४६ बृहद्रथस्य जरासंधः तस्य सहदेवमार्जारिः यस्मान्मार्जारिः श्रुतश्रवा॥४५।४९ सहस्रसंवत्सरमेते भाव्याः नृपालाः ततःपरं भाव्यान् द्वा
दशस्कंधे वक्ष्यति॥४९॥ इति नवमे द्वाविंशः॥ त्रयोविंशे तु नो द्रुह्योस्तुर्वसोश्चान्वयः क्रमात्। यदोश्च वंशोऽनुक्रांतो यावत्स्यामघसंभवःत

शतानीकात्तु दुर्दमनस्तस्यापत्यं वहीनरः। दंडपाणिर्निमिस्तस्य क्षेमको भविता नृपः॥४३॥ ब्रह्मक्षत्रस्य वै प्रोक्तो वंशो देवर्षिस
त्कृतः। क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ॥४४॥ अथ मागधराजानो भवितारो वदामि ते॥ भविता सहदेवस्य मार्जारि
र्यच्छ्रुतश्रवाः॥४५॥ ततो युतायुस्तस्यापि निरमित्रोऽथ तत्सुतः। सुनक्षत्रः सुनक्षत्राद्बृहत्सेनोऽथ कर्मजित्॥४६॥ ततः सुतंजया
द्विप्रः शुचिस्तस्य भविष्यति। क्षेमोऽथ सुव्रतस्तस्माद्धर्मसूत्रः समस्ततः॥४७॥ द्युमत्सेनोऽथ सुमतिः सुबलो जनिता ततः। सु
नीथः सत्यजिदथ विश्वजिद्यद्रिपुंजयः॥४८॥ बार्हद्रथाश्च भूपाला भाव्याः साहस्रवत्सरं॥ ॥इति श्रीभागवते महापुराणे न
वमस्कंधे द्वाविंशोऽध्यायः॥२२॥ ॥श्रीशुक उवाच॥ अनोः सभानरश्चक्षुः परोक्षश्च सुतास्त्रयः। सभानरात्कालनरः सृंजय
स्तत्सुतस्ततः॥१॥ जनमेजयस्तस्य पुत्रो महाशालो महामनाः॥ उशीनरस्तितिक्षुश्च महामनस आत्मजौ॥२॥ शिबिर्वनः शमि
र्दक्षः चत्वारोशीनरात्मजाः॥२॥ ल

तदेवं ययातेः पुत्राणां पंचमस्य पूरोर्वंशोऽनुक्रांतः इदानीं चतुर्थस्य वंशमनुक्रामति अनोरिति कर्णस्य जगतीपतेरित्यंतेन तस्य जनमेजयस्य म
हाशालः महामनाः चत्वार उशीनरात्मजाः संधिरार्षः॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सदुष्कंतः स्ववंशं पौरवं ॥ वंशं ॥ ९ ॥ प्रथमस्य महस्वजितस्त्वात्मजः ॥ २१ ॥ २२ ॥ कुंतेः सोहंजिः सोहंजेर्महिष्मान् महिष्मतो भद्रसेनकः ॥ तस्य दुर्मदो

वृषाद्दर्भः सुवीरश्च मद्रः कैकेय इत्यात्मजाः ॥ शिबेश्चत्वार एवासन् तितिक्षोश्च रुषद्रथः ॥ ४ ॥ ततो हेमोऽथ सुतपा बलिः सुतपसोऽभवत्
अंगवंगकलिंगाद्याः सुह्मपुंड्रांड्रसंज्ञिताः ॥ ५ ॥ जज्ञिरे दीर्घतमसो बलेः क्षेत्रे महीक्षितः ॥ चक्रुः स्वनाम्ना विषयान् षडिमान् प्रा[illegible]च्य
कांश्चते ॥ ६ ॥ खनपानोंऽगतो जज्ञे तस्माद्दिविरथस्ततः ॥ सुतो धर्मरथो यस्य जज्ञे चित्ररथोऽप्रजः ॥ ७ ॥ रोमपाद इति ख्यातस्तस्मै दशर
थः सखा ॥ शांतां स्वकन्यां प्रायच्छदृष्यशृंग उवाह तां ॥ ८ ॥ देवे वर्षति यं रामा आनिन्युर्हरिणीसुतं ॥ नाट्यसंगीतवादित्रैर्विभ्रमालिंग
नार्हणैः ॥ ९ ॥ स तु राज्ञोऽनपत्यस्य निरूप्येष्टिं मरुत्वतः ॥ प्रजामदाद्दशरथो येन लेभेऽप्रजः प्रजाः ॥ १० ॥ चतुरंगो रोमपादात् पृथुलाक्ष
स्तु तत्सुतः ॥ बृहद्रथो बृहत्कर्मा बृहद्भानुश्च तत्सुताः ॥ ११ ॥ आद्यात् बृहन्मनास्तस्माज्जयद्रथ उदाहृतः ॥ विजयस्तस्य संभूत्यां ततो
धृतिरजायत ॥ १२ ॥ ततो धृतव्रतस्तस्य सत्कर्माधिरथस्ततः ॥ योऽसौ गंगातटे क्रीडन् मंजूषांतर्गतं शिशुं ॥ १३ ॥ कुंत्यापविद्धं कानीनमन
पत्योऽकरोत्सुतं ॥ वृषसेनः सुतस्तस्य कर्णस्य जगतीपते ॥ १४ ॥ द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः ॥ आरब्धस्तस्य गांधारस्तस्य
धर्मस्ततो धृतः ॥ १५ ॥ धृतस्य दुर्मनस्तस्मात् प्रचेताः प्राचेतसं शतं ॥ म्लेच्छाधिपतयोऽभूवन्नुदीचीं दिशमाश्रिताः ॥ १६ ॥ तुर्वसोश्च सुतो
वह्निर्वह्नेर्भर्गोऽथ भानुमान् ॥ त्रिभानुस्तत्सुतोऽस्यापि करंधम उदारधीः ॥ १७ ॥ मरुतस्तत्सुतोऽपुत्रः पुत्रं पौरवमन्वभूत ॥ दुष्कंतः स पुन
र्भेजे स्ववंशं राज्यकामुकः ॥ १८ ॥ ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशं नरर्षभ ॥ वर्णयामि महापुण्यं सर्वपापहरं नृणां ॥ १९ ॥ यदोर्वंशं नरः श्रु
त्वा सर्वपापैः प्रमुच्यते ॥ यत्रावतीर्णो भगवान् परमात्मा नराकृतिः ॥ २० ॥ यदोः सहस्रजित्क्रोष्टा नलो रिपुरिति श्रुताः ॥ चत्वारः
सूनवस्तत्र शतजित्प्रथमात्मजः ॥ २१ ॥ महाहयो वेणुहयो हैहयश्चेति तत्सुताः ॥ धर्मस्तु हैहयसुतो नेत्रः कुंतेः पिता ततः ॥ २२ ॥

राम
४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतवीर्यस

धनकश्चेति दौ पुत्रौ कृतवीर्यस्य जनकः कृतवीर्यादयश्चत्वारो धनकस्यात्मजा इत्यर्थः ॥२२॥२५॥ अनष्टमविनाशं वित्तं येन तथाविधं स्मरणं यस्य सः अ
क्षय्यं षड्वसु षडिन्द्रियविषयं बुभुजे ॥२६॥ और्वस्य तेजसा सगरेणोपसंहृतमित्यर्थः ॥२७॥२८॥ तेषां तालजङ्घपुत्राणां ज्येष्ठः तस्य मधोः पुत्रशतं वृष्णि
ज्येष्ठं यस्मिन् यतो मधोर्वृष्णेश्च हेतोरिदं कुलं ॥३१॥ चतुर्दशमहारत्नानि तत्र कानिचिच्छ्रेष्ठानि यस्य सः तानि च मार्कण्डेयपुराणे वर्णितानि ॥
गजवाजिरथस्त्रीषु निधिमाल्याम्बरद्रुमाः ॥ शक्तिपाशमणिच्छत्रविमानानि चतुर्दशेति दशानां पत्नीसहस्राणां नार्यः तस्य प्रत्येकं लक्षं लक्षं

सोहंजिरभवत्कुन्तेर्महिष्मान्भद्रसेनकः ॥ दुर्मदो भद्रसेनस्य धनकः कृतवीर्य्यसूः कृताग्निः कृतवर्मा च कृतौजा धनकात्मजाः ॥२३॥
अर्जुनः कृतवीर्य्यस्य सप्तद्वीपेश्वरोऽभवत् ॥ दत्तात्रेयाद्धरेरंशात्प्राप्तयोगमहागुणः ॥२४॥ न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः
यज्ञदानतपोयोगैः श्रुतवीर्यदयादिभिः ॥२५॥ पंचाशीतिसहस्राणि ह्यव्याहतबलः समाः ॥ अनष्टवित्तस्मरणो बुभुजेऽक्षय्यषड्वसु ॥२६॥
तस्य पुत्रसहस्रेषु पंचैवोर्वरिता मृधे ॥ जयध्वजः शूरसेनो वृषभो मधुरूर्जितः ॥२७॥ जयध्वजात्तालजंघः तस्य पुत्रशतं त्वभूत्
॥ क्षत्रं यत्तालजंघाख्यमौर्वतेजोपसंहृतं ॥२८॥ तेषां ज्येष्ठो वीतिहोत्रो वृष्णिः पुत्रो मधोः स्मृतः ॥ तस्य पुत्रशतं त्वासीद्वृष्णिज्येष्ठं य
तः कुलं ॥२९॥ माधवा वृष्णयो राजन्यादवाश्चेति संज्ञिताः ॥ यदुपुत्रस्य च क्रोष्टोः पुत्रो वृजिनवांस्ततः ॥ स्वाहितोऽतो विषद्गु
र्वै तस्य चित्ररथस्ततः ॥ शशबिन्दुर्महायोगी महाभोजो महानभूत् ॥३१॥ चतुर्दशमहारत्नश्चक्रवर्त्यपराजितः ॥ तस्य प
त्नीसहस्राणां दशानां सुमहायशाः ॥३२॥ दशलक्षसहस्राणि पुत्राणां तास्वजीजनत् ॥ तेषां तु षट्प्रधानानां पृथुश्रवस
आत्मजः ॥३३॥ ध[र्मो] नामोशना तस्य हयमेधशतं स्म या ॥ तत्सुतो रुचकस्तस्य पंचासन्नात्मजाः शृणु ॥ पुरुजिद्रुक्मरु
क्मेषुपृथुज्यामघसंज्ञिताः ॥३५॥
मिलित्वा तासु पुत्राणां दशलक्षसहस्राणि जनयामास पृथुश्रवाः पृथुयशा इत्यादयः षट् प्रधानाः श्रेष्ठा येषां तेषां मध्ये
पंच आत्मजा आसन्नतान्नश्रृणु तानेवाह पुरुजिदिति ॥३५॥

भा॰न॰
४७

नार्यानयाद्दैवैकनार्यस्यवंध्यापतेःकामिद्यस्यापुत्रस्तत्रयमेवपुत्रप्रदमनवदितिद्रर्थयन्नाह आमयत्सितियदिमेसपत्नीस्यात् वर्हिस्नुषेयं
युक्तेतापिनत्वतस्त्रीसाद्यस्मसपत्नीचेति ३७ आतिनयमाकुलस्त्राहह जनयिष्यसीतिनार्यानयप्रकंपमानस्त्विवसर्वांगिस्पराज्ञःप्राएसंक
टटमालोक्यास्तुकंपितास्तेनदृष्टंविकुकालमाराधितांविश्वेदेवाःपितरश्चतथेत्यत्व मोदंत ३ण तवश्चदेवताप्रसादेनेष्यिष्यसीतिप्रतिव
जेन
सामयस्त्वप्रजोप्यस्मानार्यंशैव्यापतिर्नयात नाविंदतशत्रुनवनात्तोस्यांकन्यामहारषीत ३५ रथयस्मांतांनिरीक्ष्याह शैव्या
पतिममर्षिता केयंकुहककमतस्थानंरथमारोपितेतिवे ३६ स्नुषातवेत्यभिहितेस्मयंतीपतिमब्रवीत अहंवंध्यासपत्नी
चस्नुषामेयुज्यतेकथं ३७ जनयिष्यसियंराज्ञितस्येयमुपयुज्यते अन्वमोदंतनविश्वेदेवाःपितरएवचे ३८ शैव्यागर्न
मधात्कालेकुमारंसुषुवेशुनंसविदर्नइतिप्रोक्तउपयेमेस्नुषांसती ३९ इतिश्रीभागवतेमहापुराणेनवमस्कं
धेयदुवंशानुकथनेत्रयोविंशोध्यायः २३ ॥श्रीशुकउवाच॥ तस्मांविदर्भोजनयत्पुत्रौनाम्नाकुशक्रथौ तृतीयं
रोमपादंचविदर्भकुलनंदनं १ रोमपादसुतोबभ्रुर्बभ्रोःकृतिरजायत उशिकस्तत्सुतस्तस्माच्चेदिश्चैद्यादयोनृप
२
चनमुद्धर्त्तगुणेनचनिहत्वरजस्कापित्रौच्यागर्नमधात् तस्यचमहिमापराशरादिभिरुक्तःयोक्तंनार्यावरापास्तुयेकेचितत्वविष्यंत्ययोम्र
नाः तेषांतुत्वंमघाःश्रेष्ठःशैव्यापतिरनूनृपइति ३९ इतिनवमेत्रयोविंशः ॥२३॥ चतुर्विंशेविदर्भस्यपुत्रत्रयसमुद्भवाः वंशमन्वा
मुखाप्रोक्ताः रामकृष्णोद्भवावधिचेद्यादयदमघोषादयः ॥२॥ भा॰
रम
४७

ततोदशारथाच्छकुनिः पुराणांतरादेवमादिविशेषोद्रष्टव्यः ।४। ततः कुरुवशादनुः ।५। अनोः पुत्रः पुरुहोत्रः ।६। महाभोजश्चेत्येवं सप्तमारिषहे स्वा
य ।७। ८ ।९। ततस्तद्रूपदेशेनयेपंचषष्ट्यादिसंख्याः पुरुषाः तेऽमृतत्वंमोक्षं प्राप्ताः ।१०।११। तस्यपुत्रो युधाजितः सिनिरनमित्रः ।१३। [illegible]सत्यक। सम सात्यकिः
क्रथस्य कुंतिः पुत्रोऽभूत्धृष्टिस्तस्याथ निर्वृतिः ततो दशार्होनाम्नाभूत्तस्य व्योमसुतस्ततः ।३। जीमूतो विकृतिस्तस्य यस्य भीमर
थः सुतः ततो नवरथः पुत्रो जातो दशरथस्ततः ।४। करंभिः शकुनेः पुत्रो देवरातस्तदात्मजः देवक्षत्रस्ततस्तस्य मधुः कुरुवशादनु
।५। पुरुहोत्रस्त्वनोः पुत्रस्तस्यांशुः सात्वतस्ततः भजमानो भजिर्दिव्यो वृष्णिर्देवावृधोऽंधकः ।६। सात्वतस्य सुताः सप्त महाभोजश्च मारिष भ
ध जमानस्य निम्लोचिः किंकिणो धृष्टिरेव च ।७। एकस्यामात्मजाः पत्न्यामन्यस्यां च त्रयः सुताः शताजिच्च सहस्राजिद् अयुताजिदिति
प्रभो ।८। बभ्रुर्देवावृधसुतस्तयोः श्लोकौ पठन्त्यमू यथैव शृणुमो दूरात्संपश्यामस्तथांतिकात् ।९। बभ्रुः श्रेष्ठो मनुष्याणां देवै
र्देवावृधः समः पुरुषाः पंचषष्टिश्च षट्सहस्राणि चाष्ट च ।१०। येऽमृतत्वमनुप्राप्ता बभ्रोर्देवावृधादपि महाभोजोऽतिधर्मात्मा भोजा
आसन्तदन्वये ।११। वृष्णेः सुमित्रः पुत्रोऽभूत् युधाजिच्च परंतप शिनिस्तस्यानमित्रश्च निम्नोऽभूदनमित्रतः ।१२। सत्राजितः
प्रसेनश्च निम्नस्याप्यासतुः सुतौ अनमित्रसुतो योऽन्यः शिनिस्तस्याथ सत्यकः ।१३। युयुधानः सात्यकिर्वै जयस्तस्य कुणिस्ततः
युगंधरोऽनमित्रस्य वृष्णिः पुत्रोऽपरस्ततः ।१४। श्वफल्कश्चित्ररथश्च गांदिन्यां च श्वफल्कतः अक्रूरप्रमुखा आसन् पुत्रा द्वादश विश्रु
ताः ।१५।
कस्य पुत्रो युयुधानः तस्य जयस्तस्य कुणिः ततः कुणेर्युगंधरः अनमित्रस्यैवापरः वृष्णिर्नाम पुत्रः ।१६। अक्रूरः प्रमुखो येषामित्येतत्कुणसंवि
शानो बकुली हि ।१७।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ नं॰ अतोक्रूरातिरिक्तान् पादत्रयाद्दर्शयति। आसंग इति प्रयुरेकः विदूरथाद्याश्चान्ये चबहवः। विदूरथधामाद्याइतिपाठे आद्यशब्देन विदूरथोप्यु
४८ क्तः ततश्च शूरो विदूरथात्सीदितिवक्ष्यमाणं निर्दोषं संपद्यते। १७ कुकुरादयश्चत्वारोंधकसुताइतिज्ञेयं। तथा च पराशरः कुकुरभज

आसंगः सारमेयश्च मृदुरो मृदुवित् गिरिः। धर्मवृद्धः सुकर्मा च क्षेत्रोपेक्षोरिमर्दनः। १६ शत्रुघ्नो गंधमादश्च प्रतिबाहुश्च द्वादश।
तेषां स्वसा सुचीराख्या द्वावक्रूरसुतावपि। १७ देववानुपदेवश्च तथा चित्ररथात्मजाः। पृथुर्विदूरथाद्याश्च बहवो वृष्णिनंदनाः। १८
कुकुरो भजमानश्च शुचिः कंबलबर्हिषः। कुकुरस्य सुतो वह्निर्विलोमा तनयस्ततः। १९ कपोतरोमा तस्यानुः सखा यस्य च तुंबरुः
। अंधकादुंदुभिस्तस्मादविद्योतः पुनर्वसुः। २० तस्याहुकश्चाहुकी च कन्या चैवाहुकात्मजौ। देवकश्चोग्रसेनश्च चत्वारो
देवकात्मजाः। २१ देववानुपदेवश्च सुदेवो देववर्धनः। तेषां स्वसारः सप्तासन् धृतदेवादयो नृप। २२ शांतिदेवोपदेवा च श्रीदेवा
देवरक्षिता। सहदेवा देवकी च वसुदेव उवाह ताः। २३ कंसः सुनामा न्यग्रोधः कंकः शंकुः सुहूस्तथा। राष्ट्रपालोथ सृष्टिश्च
तुष्टिमानौग्रसेनयः। २४ कंसा कंसवती कंका शूरभू राष्ट्रपालिका। उग्रसेनदुहितरो वसुदेवानुजस्त्रियः। २५

भजमानश्च शुचिः कंबलबर्हिषः इत्ययमंधकस्य पुत्रा इति। १९ अनेनरंधकः अंधकात् दुंदुभिरिस्यपितुश्चत्वारो देवकोज्ञेयं। २० २१ धृतदेवाद्याः रिर्याः सांशांतिदेवादीनां षण्णां वाः स राम
त्तोग्रसेनयः उग्रसेनस्य सुताः २३। ४ वसुदेवस्य ये अनुजा देवभागादयस्तेषां स्त्रियो नार्याः अंधकसुतानां चतुर्णां प्रियमस्य कुकुरस्य वंशानुकः। २५ ४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वितीयस्य भजमानस्य वंशमाह। शूरो विदूरथादिति। भजमानाच्च विदूरथः पुत्रोऽभवत्। विदूरथाच्च शूर इति पराशरादिवचनात्। यद्वा दृष्टुर्विदूरथा
द्यश्चेति। पूर्वोक्तविदूरथात्मजात् विदुरथात्। ३६। देवमीढस्य यः शूरो नाम पुत्रः तस्य देवमीढो हृदीकस्यैव सुतः। यथाह पराशरः। तस्यापि हृत
वर्मशान्तनुदेवमीढुषाद्याः पुत्रा बभूवुः देवमीढस्य शूरः। तस्यापि मारिषा नामपत्न्यभवत्। २७ तस्यां चासौ दश पुत्रान् अजनयत्। वसुदेवप्रभृतीनिति
आनकदुंदुभेः २९। हरेः प्रादुर्भावस्य स्थाने। पृथायाः कन्यकावस्थायां कर्णोत्पत्तिप्रकारमाह। कुंते॥ रिति पंचभिः। कदाचित् गृह [illegible] मागतं दुर्वाससं

शूरो विदूरथादासीद्भजमानः सुतः स्वतः। शिनिस्तस्मात्स्वयंभोजो हृदीकस्तत्सुतोऽभवः। ३६ देवबाहुः शतधनुः कृतधर्मेति तत्सुताः॥
देवमीढस्य शूरस्य मारिषानामपत्न्यभूत्। २७ तस्यां स जनयामास दश पुत्रानकल्मषान्। वसुदेवं देवभागं देवश्रवसमानकं २८
सृंजयं श्यामकं कंकं शमीकं वत्सकं वृकं। देवदुंदुभयो नेदुरानका यस्य जन्मनि २९ वसुदेवं हरेः स्थानं वदंत्यानकदुंदुभिं॥
पृथा च श्रुतदेवा च श्रुतकीर्तिः श्रुतश्रवाः। ३० राजाधिदेवी चैतेषां भगिन्यः पंच कन्यकाः। कुंतेः सख्युः पिता शूरो ह्यपुत्रस्य पृथा
मदात्। ३१ साप दुर्वाससो विद्यां देवहूतिं प्रतोषितात्। तस्या वीर्यपरीक्षार्थमाजुहाव रविं शुचिः। ३२ तदैवोपागतं देवं वीक्ष्य विस्मय
मानसा। प्रत्ययार्थं प्रयुक्ता मे याहि देव क्षमस्व मे ३३ अमोघं दर्शनं देवि आधत्से त्वयि चात्मजं। योनिर्यथा न दुष्येत कर्ताहं ते सुमध्य
मे ३४॥

पृथापरिचर्यादिना तोषयामास। ततश्च सा तस्माद्देवहूतीं देवानाह्वातुं विद्यामवाप। तदाह सापेति। ३१ देवमुपागतं वीक्ष्य साऽऽह प्रत्ययार्थं
परीक्षार्थं मया विद्या प्रयुक्ता न तु त्वया किंचित्कार्यमस्ति निसंधिना अतो याहि इत्येवमुक्तो रविरुवाच। ३३ अमोघं देव दर्शनमिति। कथमाह मिति
चेच्चाह यथा योनिर्न दुष्येत तथाहं कर्ता करिष्यामि ३४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.न.
४९

स्याकंस्यौ विंदानुविंदौ ३९ ते देवं वसुदेवस्य भगिनीनां पतीन् पुत्रांश्चोत्क्रात तस्या त्रयोणां नवानां पत्नीः पुत्रांश्चाह दिवनागस्येति नवभिः श्लोकार्द्धैः ४० ४४

इति तस्यां स आधाय गर्भं सूर्यो दिवं गतः। सद्यः कुमारः संजज्ञे द्वितीय इव भास्करः ३५ तं सात्यजन्नदीतोये कृच्छ्राल्लोकस्य बिभ्यती प्र
पितामहस्तामुवाह पांडुर्वै सत्यविक्रमः ३६ श्रुतदेवां तु कारूषो वृद्धशर्मा समग्रहीत् यस्यामभूद्दंतवक्र ऋषिशप्तो दितेः सुतः ३७ कै
केयो धृष्टकेतुश्च श्रुतकीर्तिमविंदत संतर्दनादयस्तस्यां पंचासन् कैकयाः सुताः ३८ राजाधिदेव्यामावंत्यौ जयसेनोऽजनिष्ट ह दमघो
षश्चेदिराजः श्रुतश्रवसमग्रहीत् ३९ शिशुपालः सुतस्तस्याः कथितस्तस्य संभवः देवभागस्य कंसायां चित्रकेतुबृहद्बलौ ४० कं
सवत्यां देवश्रवसः सुवीर इषुमांस्तथा कंकायामानकाज्जातः सत्यजित्पुरुजित्तथा ४१ सृंजयो राष्ट्रपाल्यां च वृषदुर्मर्षणादिकान्
हरिकेशहिरण्याक्षौ शूरभूम्यां च श्यामकः ४२ मिश्रकेश्यामप्सरसि वृकादीन् वत्सकस्तथा तक्षपुष्करशालादीन् दुर्वाक्ष्यां वृक आद
धे ४३ सुमित्रार्जुनपालादीन् शमीकात्तु सुदामिनी कंकश्च कर्णिकायां वै ऋतधामजयावपि ४४ पौरवी रोहिणी भद्रा मदिरा रोचना इला
देवकीप्रमुखाश्चासन् पत्न्य आनकदुंदुभेः बलं गदं सारणं च दुर्मदं विपुलं ध्रुवं वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ४
६ सुभद्रो भद्रबाहुश्च दुर्मदो भद्र एव च पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन् ४७ नंदोपनंदकृतकशूराद्या मदिरात्मजाः
कौशल्या केशिनं त्वेकमसूत कुलनंदनं ४८ रोचनायामतो जाता हस्तहेमांगदादयः इलायामुरुवल्कादीन् यदुमुख्यानजीजन
त् ४९ विपृष्ठो धृतदेवायामेक आनकदुंदुभेः शांतिदेवात्मजा राजन् प्रशमप्रसितादयः ५० राजन्यकल्पवर्षाद्याः उपदेवा
सुता दश वसुहंससुवंशाद्याः श्रीदेवायास्तु षट् सुताः ५१ वसुदेवस्य पत्नीः पुत्रांश्चाह पौरवीत्येकादशभिः ४५ ४७ ४० कौशल्यानंद्या ५२

श्री

राम
४९

अष्टमस्तु स्वयमेवासीत्। न तु कर्मादिना हेतुनावाभ्यां जनितो वा यतो सौ हरिः ॥५४॥५५॥ तदेवोपपादयति यदेति त्रिभिः ॥५६॥ ईशस्य मायानियंतुः
परस्य स्वतंत्रस्य द्रष्टुः साक्षिणः आत्मनः सर्वव्यापकस्य नन्वेवं सति तस्य मायाविनोदं विना जन्मनः कर्म्मणो वा हेतुः संभवतीत्यर्थः ॥५७॥ किंच यस्य माया
नु चेष्टितं पुंसो जीवस्याग्रहः तस्य सर्वजीवानुग्राहकस्य कुतः कर्मादिपारतंत्र्येण जन्मादि संभवः। अनुग्रहमेवाह हि यस्मात् तदिव स्थित्याद्यस्यते

देवरक्षितया लब्धा नव चात्र गदादयः। वसुदेवः सुतानष्टावादधे सहदेवया ॥५२॥ पुरुविश्रुतमुख्यांस्तु साक्षाद्धर्मो वसूनिव। वसु
देवस्तु देवक्यामष्टपुत्रानजीजनत् ॥५३॥ कीर्त्तिमंतं सुखेणं च भद्रसेनमुदारधीः। ऋजुं संमर्द्दनं भद्रं संकर्षणमहीश्वरं ॥५४॥ अष्ट
मस्तु तयोरासीत्स्वयमेव हरिः किल। सुभद्रा च महाभागा तव राजन् पितामही ॥५५॥ यदा यदेह धर्मस्य क्षयो वृद्धिश्च पाप्मनः। तदा
तु भगवानीश आत्मानं सृजते हरिः ॥५६॥ न ह्यस्य जन्मनो हेतुः कर्म्मणो वा महीपते। आत्ममायां विनेशस्य परस्य द्रष्टुरात्मनः॥
५७॥ यन्मायाचेष्टितं पुंसः स्थित्युत्पत्त्यप्ययाय हि। अनुग्रहस्तन्निवृत्तेरात्मलाभाय चेष्यते ॥५८॥ अक्षौहिणीनां पतिभिरसुरैर्नृप
लांछनैः। भुव आक्रम्यमाणाया अभाराय कृतोद्यमः। कर्म्माण्यपरिमेयानि मनसापि सुरेश्वरैः। सह संकर्षणेन चक्रे भगवान्मधुसू
दनः ॥६०॥

प्रलये लीनोपाधेर्जीवस्य धर्म्मादिसंभवाद् उपाधिसृष्ट्यादिना धर्मादिसंपादनेनानुग्रहः। तथा आत्मलाभाय मोक्षाय चेष्यते तत्र हेतुः॥
तेनैव स्वरूपमायेन तस्य स्थित्यादेः निवृत्तेः ॥५८॥ तस्य चेष्टितं नृसेरनुग्रहमित्याह अक्षौहिणीनामिति द्वाभ्यां अभाराय भारपरिहाराय सुरेश्वरैर
पि मनसाप्यपरिमेयाणि अवितर्क्याणि संकर्षणसहितश्चक्रे ॥६०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा०न० ५० संकल्पमात्रेण नृभारहरणसमर्थस्यापि कर्म्मकरं यशो विस्तारयन् भक्तानुग्रहार्थमित्याह कलाविति द्वाभ्यां । दुःखशोकतमांसि नुदती तितथा
तद्यशो व्यतनोत् । यस्मिन् सतां कर्णपीयूषे यशोरूपे तीर्थवरे श्रोत्रमेवांजलिः पानसाधनं यस्य स पुरुषः सकृदपि उपस्पृश्य स्पृष्ट्वा आचमनमात्रे
छ्वा तत्सौंदर्यस्पृहवृत्तिः कर्मवासनां धुनुते ॥ ६२ ॥ तदेवाह द्वाभ्यां भोजादिभिः श्लाघनीयमीहितं यस्य ॥ सर्वैरंगैरम्यया मूर्त्या च ॥ ६३ ॥ ६४ ॥ तत

कल्यौजनिष्यमाणानां दुःखशोकतमोनुदं । यशनुग्रहाय भक्तानां सुपुण्यं व्यतनोद्यशः ॥ ६२ ॥ यस्मिन् सत्कर्णपीयूषे यशस्तीर्थव
रे सकृत् । श्रोत्रांजलिरुपस्पृश्य धुनुते कर्म्मवासनां ॥ ६२ ॥ भोजवृष्ण्यंधकमधुशूरसेनदशार्हकैः । श्लाघनीयेहितः शश्वत् कुरु
सृंजयपांडुभिः ॥ ६३ ॥ स्निग्धस्मितेक्षितोदारैर्वाक्यैर्विक्रमलीलया । नृलोकं रमयामास मूर्त्या सर्वांगरम्यया ॥ ६४ ॥ न यस्यान
नं मकरकुंडलचारुकर्णभ्राजत्कपोलसुभगं सविलासहासं । नित्योत्सवं न ततृपुर्दृशिभिः पिबंत्यो नार्यो नराश्च मुदिताः कु
पिता निमेश्च ॥ ६५ ॥

पूर्दृशिनार्यं सुखशोभामाह । यस्याननं दृशिभिर्नेत्रैः पिबंत्यो नार्यो नराश्च न ततृपुर्न तृप्ताः । निमेषोन्मेषमात्रमप्यवधानमसहमाना अतस्तत्कर्तुर्निमेः कु राम
पिताश्च बभूवुः । कथंभूतमाननं मकरकुंडलाभ्यां चारुकर्णौ भ्राजंतौ कपोलौ च तैः सुभगं सविलासो हासो यस्मिन् नित्योत्सवो यस्मिन् ॥ ६५ ॥ ५०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाग श्रीकृष्णस्य चरितं मध्यस्तो वर्णयति जात इति द्वाभ्यां। जातो विजेतरूपेण पश्चात्पुरुषो मनुष्याकारः सन् व्रजं गतः। व्रजवासिनां एधिता ऋ
५८ र्धयिता ते पुत्रदारेषु सुतानां शतान्युत्पाद्य। आत्मनिगमं स्वकीयं वेदमार्गं॥ ६६॥ अंतः समुत्थेन कलिना निमित्तेन गुरुभारं क्षपयन् दृष्ट्वैव व

ता

जातो गतः पितृगृहाद्व्रजमेधितार्थो हत्वा रिपून्सुतशतानि कृतोरुदारः। उत्पाद्य तेषु पुरुषः क्रतुभिः समीजे आत्मानमात्म
निगमं प्रथयन्जनेषु॥ ६६॥ पृथ्व्याः स वै गुरुभरं क्षपयन् कुरूणामंतःसमुत्थकलिना युधि भूपचम्वः। दृष्ट्या विधूय विजये
जयमुद्विघोष्य प्रोच्योद्धवाय च परं समगात्स्वधाम॥ ६७॥ ॥ इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां मष्टा
दशसाहस्त्र्यां नवमस्कंधे श्रीसूर्यसोमवंशपात् यदुवंशानुकीर्त्तनं नाम चतुर्विंशोऽध्यायः॥ २४॥ ॥

पृथ्व्या भूपचमूर्विधूय विजये जयं। अर्जुनेन जितमित्येवमुद्घोषं कृत्वा परं तत्वमुद्धवायोपदिश्य स्वधाम सम्यक्केनैव रूपेण जगामेति॥ ६७॥ ॥ इ राम
ति श्रीश्रीधरस्वामिविरचितायां श्रीभागवतभावार्थदीपिकायां नवमस्कंधे चतुर्विंशोऽध्यायः॥ ॥ ५९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ टी॰ १

॥श्रीगणेशायनमः॥ ॥विश्वसर्गविसर्गादिनवलक्षणलक्षितं॥ श्रीकृष्णाख्यंपरंधामजगद्धामनमामतत्॥१॥ दशमेदशमंलक्ष्यमाश्रिताश्रयविग्रहं
॥क्रीडद्यदुकुलांभोधौपरानंदमुदीर्यते॥२॥ दशमेकृष्णसत्कीर्तिवितानायानुवर्ण्यते॥ धर्मग्लानिनिमित्तस्तुनिरोधोदुष्टभूभुजां॥३॥ प्राकृतादिचतुर्धायो ष्ट
निरोधःसचवर्णितः॥ तत्रत्रसंगतःसृष्टिसंहारादिनिरूपिणे॥४॥ कृतानवतिरध्यायादशमेकृष्णकार्तये॥ आदौचतुर्भिरध्यायैर्ब्रह्मप्रार्थनयाव
ने॥ न्यारंहंतुर्हरेर्जन्मसप्रसंगंनिरूप्यते॥५॥ गोकुलेमथुरायांचद्वारवत्यांततःक्रमात्॥ कृष्णलीलास्त्रिधाप्रोक्तातत्रादौदेस्वस्वनेकधा॥६॥

ॐनमोगोपीनाथाय॥ ॥राजोवाच॥ ॥कथितोवंशविस्तारोभवतासोमसूर्ययोः॥राज्ञांचोभयवंशानांचरि
तंपरमाद्भुतं॥१॥यदोश्चधर्मशीलस्यनितरांमुनिसत्तम॥तत्रांशेनावतीर्णस्यविष्णोर्वीर्याणिशंसनः॥२॥अ
वतीर्ययदोर्वंशेभगवान्भूतभावनः॥कृतवान्यानिविश्वात्माताानिनोवदविस्तरात्॥३॥ ॥ ॥

सपंचत्रिंशताध्यायैवृंदावनादिषु॥ गोकुलेवसतोलीलावर्ण्यतेसुरदुष्करा॥७॥ एकेनयमुनावारिएकत्रूरेणकृतास्तुतिः॥ एकादशभिराख्यातालीला
मधुवनेकृता॥८॥ शेषैद्वारवतीलीलातन्निर्माणादिवर्ण्यते॥ एवंनवतिरध्यायादशमेविशदाकथाः॥९॥ तत्रतुप्रथमेकंसःसमस्कंदेवकीसुतात्॥ श्रुत्वा
नोतोवधीत्तस्याःसद्गर्भानितिवर्ण्यते॥१०॥ कृष्णावतारचरितश्रवणामृतनिर्वृतः॥ उक्तानुवादतोसम्यक्पाराजापृच्छतितत्पुनः॥११॥ कथितोवंश राम:
विस्तारइति॥१॥ अंशेनेतिप्रतीत्यभिप्रायेणोक्तं॥२॥ ननुक्तानितस्यवीर्याणिजातोगतः॥ पितृगृहात्व्रजमेधितायेंइत्यादिना॥ सत्यं॥ पुनर्विस्तरेणवदेत्याह १
॥३अवतीर्येति॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्रलोकेत्रिविधाजनाः मुक्तामुमुक्षवोविषयिणश्चतेषांमध्येअत्रनकस्याप्यलंप्रत्ययइत्याह ॥ निवृत्ततर्षैरिति ॥ गततृष्णैर्मुक्तैरित्यर्थः ॥ मुमुक्षू-
णामयमेवोपायइत्याह ॥ भवौषधादिति ॥ विषयिणांपरमोविषयोऽयमेवेत्याह ॥ श्रोत्रमनोभिरामादिति ॥ अपगतासुकृपस्मात्तमात्मानंहंतीतिप-
शुघ्नःतस्मात् ॥ पशुघातिनइतिवा ॥ ४ ॥ किंच ॥ अस्मत्कुलदैवतंश्रीकृष्णः अतस्तत्कथैवनित्यंश्रोतव्येत्याशयेनाह ॥ पितामहाइति ॥ अमरान्ज-
यंतियेतैः ॥ देवव्रतोभीष्मः तदाद्यैरतिरथैः तिमिंगलतुल्यैर्दुरत्ययं ॥ वत्सपदमिवअल्पंकृत्वातुछालंतातरन्स्म ॥ यःश्रीकृष्णएवप्लवोयेषांते ॥ तस्यवी-

निवृत्ततर्षैरुपगीयमानात्भवौषधात्श्रोत्रमनोभिरामात् ॥ कउत्तमश्लोकगुणानुवादात्पुमान्विरज्येतविनापशुघ्नात् ॥ ४ ॥
पितामहामेसमरेऽमरंजयैर्देवव्रताद्यातिरथैस्तिमिंगलैः ॥ दुरत्ययंकौरवसैन्यसागरंकृत्वाऽतरन्वत्सपदंस्मयत्प्लवाः ॥ ५ ॥ द्रौण्य-
स्त्रविप्लुष्टमिदंमदंगंसंतानबीजंकुरुपांडवानां ॥ जुगोपकुक्षिंगतआत्तचक्रोमातुश्चमेयःशरणंगतायाः ॥ ६ ॥ वीर्याणि
तस्याऽखिलदेहभाजामंतर्बहिःपूरुषकालरूपैः ॥ प्रयच्छतोमृत्युमुतामृतंचमायामनुष्यस्यवदस्वविद्वन् ॥ ७ ॥ ॥

र्याणिवदस्वेतितृतीयश्लोकगतेनान्वयः ॥ ५ ॥ नकेवलंपांडवानेवारक्षत्इदंममशरीरमपिरक्षितवानित्याह ॥ द्रौण्यस्त्रविप्लुष्टमिति ॥ द्रौणेरश्वत्थाम्नोब्रह्मा-
स्त्रेणदग्धमिदंमच्छरीरंच ॥ कुरूणांचपांडवानांचसंतानस्यनिदानं ॥ ममामातुःकुक्षौप्रविष्टोधृतचक्रोयोजुगोपेति ॥ ६ ॥ अखिलदेहभाजांसर्वप्राणिनां
अंतश्चबहिश्चपुरुषरूपेणकालरूपैश्च अंशाद्यभिप्रायेणबहुवचनं ॥ मृत्युंसंसारंउतअपिअमृतमपिप्रयच्छतोवीर्याणिवदस्वब्रूहि ॥ अयंभावः
॥ अंतर्यामिरूपेणांतर्दृष्टीनांमुक्तिंबहिर्दृष्टीनांचकालरूपेणमृत्युंददाति ॥ यतःअतोऽतर्दृष्टानतद्वीर्याण्येवश्रोतव्यानीति ॥ ७ ॥ ॥ श्रीरामः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० पू० २

ननु बलं गादं सारणं च दुर्मदं विपुलं ध्रुवं ॥ वसुदेवस्तु रोहिण्यां कृतादीनुदपादयदिति ॥ रोहिण्यास्तनयो रामः प्रोक्तः ॥ वसुदेवस्तु देवक्यामष्टपुत्रानजीजनत् ॥ कीर्तिमंतं सुषेणं च भद्रसेनमुदारधीः ॥ ऋजुं संमर्दनं भद्रं संकर्षणमहीश्वरं ॥ अष्टमस्तु तयोरासीत्स्वयमेव हरिः किलेति पुनर्देवक्या गर्भसंबंधस्तस्यैवोक्तः स कुतो घटत इत्याक्षेपः ॥८॥ कस्मादिति भगवतः कंसभयशंकाऽसंभवादित्यर्थः ॥९॥ मातुर्भ्रातरं कंसं तस्माद्वधानर्हं अहो साक्षात्कस्मादवधीत् ॥१०॥११॥

रोहिण्यास्तनयः प्रोक्तो रामः संकर्षणस्त्वया देवक्या गर्भसंबंधः कुतो देहांतरं विना ॥८॥ कस्मान्मुकुंदो भगवान्पितुर्गेहाद्व्रजं गतः ॥ क्व वासं ज्ञातिभिः सार्द्धं कृतवान्सात्वतां पतिः ॥९॥ व्रजे वसन्किमकरोन्मधुपुर्यां च केशवः ॥ भ्रातरं चावधीत्कंसं मातुरद्धातदर्हणं ॥१०॥ देहं मानुष्यमाश्रित्य कति वर्षाणि वृष्णिभिः ॥ मधुपुर्यां सहावात्सीत्पत्न्यः कत्यभवन्प्रभोः ॥११॥ एतदन्यच्च सर्वं मे मुने कृष्णविचेष्टितं ॥ वक्तुमर्हसि सर्वज्ञ श्रद्दधानाय विस्तृतं ॥१२॥ नैषातिदुःसहा क्षुन्मां त्यक्तोदमपि बाधते ॥ पिबंतं त्वन्मुखांभोजच्युतं हरिकथामृतं ॥१३॥ सूत उ० ॥ एवं निशम्य भृगुनंदन साधुवादं वैयासकिः स भगवानथ विष्णुरातं ॥ प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं व्याहर्तुमारभत भागवतप्रधानः ॥१४॥ श्रीशुक उ० ॥ सम्यग्व्यवसिता बुद्धिस्तव राजर्षिसत्तम ॥ वासुदेवकथायां ते यज्जाता नैष्ठिकी रतिः ॥१५॥ वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि ॥ वक्तारं पृच्छकं श्रोतॄंस्तत्पादसलिलं यथा ॥१६॥ ॥ ॥

ननु क्षुत्तृड्भ्यां पीडितस्य न वक्तुं श्रवणे वा का शक्तिस्तत्राह ॥ नैषेति ॥ त्यक्तोदकस्यापि मम जीवनं हरिकथामृतपाननिमित्तं तदुपरमे सद्य एव जीवितं न स्यादित्यर्थः ॥१३॥ एवं साधुवादं समीचीनं प्रश्नं ॥ भागवतप्रधानः भागवतेषु श्रेष्ठः ॥१४॥ व्यवसिता कृतनिश्चया ॥ यत् यतो बुद्धेः ॥१५॥१६॥ ॥ ॥

रामः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र तावत्प्रथमं भगवदवतारकारणमाह ॥ भूमिरित्यादिनवभिः श्लोकैः ॥ दृप्तनृपव्याजायेदैत्यास्तेषामनीकशतानामयुतैर्येर्भूरि भारस्तेनाक्रांता ॥१७॥ विभोरंति

भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः ॥ आक्रांता भूरिभारेण ब्रह्माणं शरणं ययौ ॥१७॥ गौर्भूत्वाश्रुमुखी खिन्ना क्रंदंती करुणं वि
भोः ॥ उपस्थितांतिके तस्मै व्यसनं स्वमवोचत ॥१८॥ ब्रह्मा तदुपधार्याथ सह देवैस्तया सह ॥ जगाम स त्रिनयनस्तीरं क्षीर
पयोनिधेः ॥१९॥ तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिं ॥ पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः ॥२०॥ गिरं समाधौ गगने स
मीरितां निशम्य वेधास्त्रिदशानुवाच ह ॥ गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामाशु तथैव मा चिरं ॥२१॥ पुरैव पुंसा
भा वधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यतां ॥ स यावदुर्व्या भरमीश्वरः स्वकालशक्त्या क्षपयंश्चरेद्भुवि ॥२२॥ वसुदेवगृहे^ श्वरे
साक्षात् भगवान्पुरुषः परः ॥ जनिष्यते तत्प्रियार्थं संभवंतु सुरस्त्रियः ॥२३॥ वासुदेवकलानंतः सहस्रवदन
ः स्वराट् ॥ अग्रतो भविता देवो हरेः प्रियचिकीर्षया ॥२४॥ विष्णोर्माया भगवती यया संमोहितं जगत् ॥ आदिष्टा प्र
भुणांशेन कार्यार्थे संभविष्यति ॥२५॥ श्रीशुक उ० ॥ इत्यादिश्यामरगणान् प्रजापतिपतिर्विभुः ॥ आश्वास्य च महीं गी
र्भिः स्वधाम परमं ययौ ॥२६॥

केउपस्थितासती ॥१८॥१९॥२०॥ पौरुषीं पुरुषस्य भगवतो गां वाचं मे मत्तः आशु शृणुत मा चिरं अविलंबितं तथैव विधायतां चेति ॥२१॥ वि
ज्ञापनात् पुरैव पुंसार्[illegible]श्वरेण ज्ञातः [illegible]तापः ॥२२॥२३॥ देवकीगर्भसंकर्षणाय यशोदामोदनादिकार्यार्थं यशोदायां संभविष्यति ॥२६॥

॥ श्री रामाकृष्णायनमः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०द०पू० नोजेंद्रबंधनागारे अवताराय प्रस्तावकयामाह ॥ शूरसेनस्त्वादिनायावदध्यायसमाप्तिः ॥ मथुरां आवसन् मथुरायां वसन् ॥ विषयान् देशान् ॥ २७ ॥ २८ ॥ सूर्ययानवी
३ द्याणे प्रयाणार्थे ॥ २९ ॥ रश्मीन् प्रग्रहान् ॥ ३० ॥ पारिबर्हं उपस्करं ॥ ३१ ॥ ३२ ॥ ३३ ॥ आनाप्य रेरेकंसेतिसंबोध्य इंताह निष्पति ॥ ३४ ॥ कुलपांसनः कुलदूषणः ॥ आरब्ध

शूरसेनो यदुपतिर्मथुरामावसन्पुरीं ॥ माथुरान् शूरसेनांश्च विषयान्बुभुजे पुरा ॥ २७ ॥ राजधानी ततः सा भूत्सर्वया
दववृष्णुनां ॥ मथुरा भगवान्यत्र नित्यं संनिहितो हरिः ॥ २८ ॥ तस्यां तु कर्हिचिच्छौरिर्वसुदेवः कृतोद्वहः ॥ देवक्या सूर्य
५ यासार्द्धं प्रयाणे रथमारुहत् ॥ २९ ॥ उग्रसेनसुतः कंसः स्वसुः प्रियचिकीर्षया ॥ रश्मीन् हयानां जग्राह रौक्मै रथशतै
र्वृतः ॥ ३० ॥ चतुःशतं पारिबर्हं गजानां हेममालिनां ॥ अश्वानामयुतं सार्द्धं रथानां च त्रिषट्शतं ॥ ३१ ॥ दासीनां सु
कुमारीणां द्वेशते समलंकृते ॥ दुहित्रे देवकः प्रादात्याने दुहितृवत्सलः ॥ ३२ ॥ शंखतूर्यमृदंगाश्च नेदुर्दुंदुभयो दिवि ॥ प्र
याणप्रक्रमे तावत् वरवध्वोः सुमंगलं ॥ ३३ ॥ पथि प्रग्रहिणं कंसमाभाष्याहाशरीरवाक् ॥ अस्यास्त्वामष्टमो गर्भो हंता यां
वहसे बुध ॥ ३४ ॥ इत्युक्तः स खलः पापो भोजानां कुलपांसनः ॥ भगिनीं हंतुमारब्धः खड्गपाणिः कचेऽग्रहीत् ॥ ३५ ॥
तं जुगुप्सितकर्माणं नृशंसं निरपत्रपं ॥ वसुदेवो महाभाग उवाच परिसांत्वयन् ॥ ३६ ॥ ॥ श्रीरामः ॥ ॥ रामः

:उद्युक्तः ॥ कचं केशाबंधे ॥ ३५ ॥ नृशंसं क्रूरं ॥ महाभाग इति अयं भावः ॥ स्वजन्मनि हर्षेण देवैस्तैरानकदुंदुभिघोषेणोद्भाविनगवदवतारेणश्लाकप्रतीकारतासंभवतीति ॥ सांत्वयन् स्व ३
त्याभपाविषयत्वेनोपपत्तिभिः श्लाममार्गेण संबोधयन् ॥ ३६ ॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३७॥ मरणभयेनदुःखमितिचेत्तथापिमरणस्यापरिहरणीयत्वाद्देहांतरस्यावश्यंभावित्वात्तत्रापिचभोगप्रेमास्पदत्वाद्देहानामविशेषात्तद्भयेनपापाचरणमयुक्तमित्य
भिप्रेत्याह॥ मृत्युर्जन्मवतामित्यादि॥ देहेनसहैवविधात्राललाटेलिखित्वादिति॥ तथापिकालविलंबार्थंदुःखमितिचेत्तत्राह॥ अद्यवेति॥ अवश्यंभाविनोमर
णेविलंबमात्रायपापाचरणमयुक्तमितिभावः॥३८॥ किंच॥ अस्मिन्देहेगतेयदिदेहांतरंनस्यात्तदायुष्येतपापेनापितत्पालनंनचतदस्तीत्याह॥ देहे

[illegible] वसुदेवउवाच॥ ॥श्लाघनीयगुणःशूरैर्भवान्भोजयशस्करः॥ सकथंभगिनींहन्यात्स्त्रियमुद्वाहपर्वणि॥३७॥ मृत्यु
र्जन्मवतांवीरदेहेनसहजायते॥ अद्यवाब्दशतांतेवामृत्युर्वैप्राणिनांध्रुवः॥३८॥ देहेपंचत्वमापन्नेदेही कर्मानुगोऽवशः॥ दे
हांतरमनुप्राप्यप्राक्तनंत्यजतेवपुः॥३९॥ व्रजंस्तिष्ठन्पदैकेनयथैवैकेनगच्छति॥ यथातृणजलूकैवंदेहीकर्मगतिंगतः॥४०

पंचत्वमापन्नइति॥ आपन्नप्राये॥ कर्मवशादयत्नतएवप्रथमंदेहांतरंप्राप्यपश्चात्पूर्वंवपुस्त्यजति॥३९॥ अत्रदृष्टांतः व्रजन्निति॥ एकेनअग्रतोनिर्दिष्टेनप
दातिष्ठन्॥ ध्रुवमवष्टभ्यदेहंबिभ्रत्॥ पश्चादन्येनपूर्वप्रदेशादुत्थाप्यपुरोनिहितेनगच्छतितद्वत्॥ अत्रचस्वाकारपरित्यागोनात्यंतभिन्नविषयावितिस्य
दृष्टांतरमाह॥ यथातृणजलूकेति॥ साहितृणांतरमवष्टभ्यपूर्वंतृणंत्यजति॥ एवंवैकर्मपथेवर्तमानोऽन्योजीवोऽपि॥४०॥ ॥श्रीरामायनमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० द० पू०
४

देहविषयावेवस्वाकारपरित्यागौदर्शयितुंदृष्टांतांतरमाह॥स्वप्नइति॥दृष्टंराजादिदर्शनंश्रुतंइंद्रादिश्रवणंताभ्यामाहितसंस्कारेणमनसातदेवानुचिंत्यंतेन इ इद
ष्टश्रुतसदृशंदेहंराजादिरूपंकिमपिअनिरुक्तंप्रपद्यते॥क्षणांतरेचतदेवाहमितिप्रपद्यतेमन्यते॥ततश्चजाग्रद्देहादपगतस्मृतिर्भवतिपुरुषोयथेति॥जा
ग्रत्येवदर्शयितुंदृष्टांतांतरमाह॥मनोरथेनेति॥अत्रापिदृष्टश्रुताभ्यामित्यादिसर्वंयोज्यं॥तथाचवक्ष्यति॥जंतोर्वैकस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः॥ज
न्मत्वात्मतयापुंसःसर्वभावेनभूरिद॥विषयस्वीकृतिंप्राहुर्यथास्वप्नमनोरथः॥स्वप्नंमनोरथंचेत्थंप्राक्तनंनस्मरत्यसावित्यादि॥तद्वदत्रापिकर्मवशाद्देहांतरं

स्वप्नेयथापश्यतिदेहमीदृशंमनोरथेनाभिनिविष्टचेतनः॥दृष्टश्रुताभ्यांमनसानुचिंतयन्प्रपद्यतेतत्किमपिह्यपस्मृतिः॥४१॥यतोय
तोधावतिदैवचोदितंमनोविकारात्मकमापपंचसु॥गुणेषुमायारचितेषुदेह्यसौप्रपद्यमानःसहतेनजायते॥४२॥ ॥श्रीरामः॥॥

प्राप्यप्राक्तनंत्यजतीति॥४१॥ननुविचित्रदेहहेतूनांकर्मणांकृतत्वाद्देहविशेषप्राप्तौकिंकारणमतआह॥यतोयतइति॥देहस्यपंचत्वसमयेपंचसुगु
णेषुभूतेषुमायारचितेषुमाययानानादेहरूपेणरचितेषुदैवेनफलाभिमुखेनकर्मणाचोदितंनानाविकारात्मकंमनोमयंदेहंदेवतिर्यगादिरूपंप्रतिधा
वति॥धावच्चसत्यंयमापअभिनिवेशेनप्राप्तंतत्रतत्रअसौदेहीजायते॥ननुमनसःकर्तृत्वात्तदेवजायतांनत्वकर्तात्मेत्यतआह॥ ॥प्रपद्यमानइति
॥तदेवाहमितिमन्यमानस्तेनसहजायतइति॥२४२॥ ॥

रामः
४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु सत्वं न विष्णत्वेव किमपि देहमात्रं तथाप्यस्याति प्रियस्य राजदेहस्य रक्षणायात्नत्वमपि क्रियत इति चेत्तत्राह ॥ ज्योतिरिति ॥ अदृश्यं शब्दादिज्योतिः ॥ उदकयुक्ते
षु पार्थिवेषु घटादिषु ॥ यद्वा उदकेषु पार्थिवेषु तैलघृतादिषु च प्रतिबिंबेन स्थितं समीरस्य वायोर्वेगमनुगतं कंपादियुक्तं प्रतीयते यथा एवं स्वाविद्यारचि
तेषु गुणेषु देहेषु सौ रागेणानुगतः प्रविष्टो मुह्यति अभिनिवेशं प्राप्नोति अयं भावः ॥ आत्मनस्तावद्देहाद्यध्यासात्तन्मोक्षं सहते न जायत इति ॥ त
तश्चान्योन्यधर्माध्यासात् ॥ यथा देहधर्माः कार्श्यादय आत्मनि प्रतीयंते एवमात्मधर्माः प्रेमास्पदत्वादयोऽपि देहादिष्विति ॥ राजसूकरदेहयो

ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभाव्यते ॥ एवं स्वमायारचितेष्वसौ पुमान् गुणेषु रागानुगतो विमुह्यति ॥ ४३ ॥ तस्मान्न क
स्यचित् द्रोहमाचरेत्स तथाविधः ॥ आत्मनः क्षेममन्विछन् द्रोग्धुर्वै परतो भयं ॥ ४४ ॥ एषा तवानुजा बाला कृपणा पुत्रिकोपमा ॥ हं
तुं नार्हसि कल्याणीमिमां त्वं दीनवत्सल ॥ ४५ ॥ श्रीशुक उ० ॥ एवं स सामभिर्भेदैर्बोध्यमानोपि दारुणः ॥ न न्यवर्त्तत कौरव्य पुरुषा
दादनुव्रतः ॥ ४६ ॥ निर्बंधं तस्य तं ज्ञात्वा विचिंत्यानकदुंदुभिः ॥ प्राप्तं कालं प्रतिव्योढुमिदं तत्रान्वपद्यत ॥ ४७ ॥ ॥ श्रीरामः ॥ ॥

दै

विशेषाभावात् व्यर्थो मृत्युप्रतीकार इति ॥ ४३ ॥ एवमुक्तं सामोपायमुपसंहरन्नेदमाह ॥ तस्मादिति ॥ परत इति ॥ अभिद्रुह्यमानात्तत्संबंधिनश्च यमा
दपि इहामुत्र च भयमिति भेदो दर्शितः ॥ ४४ ॥ पुनः साममाह ॥ एषेति ॥ पुत्रिकोपमा दारुमयी वाऽचेतनप्राया ॥ ४५ ॥ बोध्यमानः उपदिश्यमानः ॥
स्वयं दारुणः पुनः पुरुषादात् दैत्याननुसरत इति ॥ ४६ ॥ आनकदुंदुभिरिति पदं महानाग इत्यत्रोक्ताभिप्रायं ॥ प्रतिव्योढुं प्रतिकर्त्तुमित्यर्थः ॥ इदं व
क्ष्यमाणमुपायमपत्यार्पणं अन्वपद्यत ज्ञातवान् ॥ ४७ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पू०
५

नतुखलोऽयमेतन्नमन्येतेत्याशंक्याह ॥ स्वयमेव मृत्युरिति ॥ ४८ ॥ तस्मादुपेक्षो दोषपरिहारार्थमेवं करिष्यामीत्याह ॥ मादायेति ॥ मृत्यवे कंसाय ॥ नन्विदमपि नै
वन्याय्यमित्याशंक्याह ॥ सुता इति ॥ अस्यां यदि सुता मे जायेरन् तदा यज्ञावितस्त्रक्ननावितं उतावज्ञवेदेव ॥ तदंतरायद्वयमेव म्रियेत तदा न किंचिदन्याय्यं ॥ ४९ ॥ य
दि च सुता न विष्यंति न चायं म्रियेत तदा मत्पुत्रादेवास्य मरणमिति विपर्ययो वा किं न स्यात् ॥ ननु प्रौढस्य कंसस्य तव बालकात्कथं मृत्युः स्यात् तत्राह ॥ गतिरि
ति ॥ धातुः अस्यास्त्वाष्टमो गर्भोऽहं तेसुकवतः ॥ अत इदानीमपत्यार्पणपरैवमंत्रः ॥ तथा सति उपस्थितो मृत्युरयं तावन्निवर्त्तेत ॥ निवृत्तः पुनः कालांतरे आ

मृत्युर्बुद्धिमतापोह्यो यावद्बुद्धिबलोदयं ॥ यद्यसौ न निवर्त्तेत नापराधोऽस्ति देहिनः ॥ ४८ ॥ प्रादाय मृत्यवे पुत्रान्मोचये कृपणामिमां ॥ सुता मे यदि
जायेरन्मृत्युर्वा न म्रियेत चेत् ॥ ४९ ॥ विपर्ययो वा किं न स्यात् गतिर्धातुर्दुरत्यया ॥ उपस्थितो निवर्त्तेत निवृत्तः पुनरापतेत् ॥ ५० ॥ अग्नेर्य
थादारुवियोगयोगयोरदृष्टतोऽन्यन्न निमित्तमस्ति ॥ एवं हि जंतोरपि दुर्विभाव्यः शरीरसंयोगवियोगहेतुः ॥ ५१ ॥ एवं विमृश्य तं पापं या
वदात्मनिदर्शनं ॥ पूजयामास वै शौरिर्बहुमानपुरःसरं ॥ ५२ ॥ प्रसन्नवदनांभोजो नृशंसं निरपत्रपं ॥ मनसा दूयमानेन प्रहसन्निद मब्रवीत् ॥ ५३ ॥

पतेच्चेत् तदा नापराधो ममेत्यर्थः ॥ अथवाऽस्य मत्सुतादुपस्थितो मृत्युः अस्यावधाद्यो निवर्त्तेत स पुनरनेन मन्मत्रेण न वेदेवेति ॥ यद्वाग
तिर्धातुर्दुरत्ययेत्येतस्य प्रपंच उपस्थित इति ॥ ५० ॥ प्राणिनामदृष्टं च पुनर्दुर्वितर्क्यमिति सदृष्टांतमाह ॥ अग्नेरिति ॥ वने दृष्टो न प्रदहन् वह्निः सन्निहिता
तानपि वृक्षान्परित्यज्य कदाचित् दूरस्थानपि दहतीत्यतामेव ज्ञात्वा ॥ नह्यस्य प्राणे दृष्टव्यतिरेकेण किंचिन्नियामकमस्ति यथा ॥ एवं जंतोर्जन्ममरणयोरपि
हेतुर्दुर्विभाव्यः ॥ अचिंत्यः ॥ ५१ ॥ यावदात्मनिदर्शनं स्वमरणावधि विचार्यः ॥ ५२ ॥ तस्य विस्मापनाय विकसितमुखांभोजः प्रहसन्नब्रवीत् ॥ ५३ ॥ ॥

राम:
५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्र यथा अशरीरिणा वागाह ॥ तथाहि निश्चितं अस्याः सकाशात्तेभयं नास्ति ॥ यतःयेभ्यः पुत्रेभ्यस्तेभयमुत्थितं ॥ अष्टमोऽहंतेसुतेभ्योन्यापेक्षयासर्वेष्वष्टमानवेयुरित्यद्भुतं तंते
नस्याः पुत्रान्समर्प्पयिष्ये ॥५४॥ निवर्त्तते निवृत्तः ॥ तद्वाक्येसार उपपत्तिस्तद्वित् ॥५५॥ प्रसूतिकालेप्राप्ते ॥ सर्वः सर्वात्माभगवानेवदेवतायस्याः सातथा ॥ सर्वदेवता
मयातिवा ॥ भगवदाश्रयत्वात् ॥५६॥ ५७॥ सत्येवैपुत्रंकथमर्प्पितवानित्यपेक्षायामाह ॥ किंदुःसहमिति ॥ साधूनांसत्यसंधानां ॥ पुत्रलालनसुखापेक्षा कथं

वसुदेव उवाच ॥ ॥नह्यस्यास्तेभयंसौम्ययद्वैसाहाशरीरवाक् ॥ पुत्रान्समर्प्पयिष्येस्यायतस्तेभयमुत्थितं ॥५४॥ श्रुक उ० ॥ ॥स्व
सुर्वधान्निवृत्तेकंसस्तद्वाक्यसारवित् ॥ वसुदेवोपितंप्रीतःप्रशस्यप्राविशद्गृहं ॥५५॥ अथकालउपावृत्तेदेवकीसर्वदेवता ॥ पु
त्रान्प्रसुषुवेचाष्टौकन्यांचैवानुवत्सरं ॥५६॥ कीर्त्तिमंतंप्रथमजंकंसायानकदुंदुभिः ॥ अर्प्पयामासकृच्छ्रेणसोनृतादतिविह्व
लः ॥५७॥ किंदुःसहंनुसाधूनांविदुषांकिमपेक्षितं ॥ किमकार्यंकदर्याणांदुस्त्यजंकिंधृतात्मनां ॥५८॥ दृष्ट्वासमत्वंतच्छौरेःस
त्येचैवव्यवस्थितं ॥ कंसस्तुष्टमनाराजन्प्रहसन्निदमब्रवीत् ॥५९॥ प्रतियातुकुमारोयंनह्यस्मादस्तिमेभयं ॥ अष्टमाद्युवयोर्गर्भात्
मृत्युर्मेविहितःकिल ॥६०॥ तथेतिसुतमादाययावानकदुंदुभिः ॥ नाभ्यनंदतवाक्यमसतोविजितात्मनः ॥६१॥ ॥ ॥

त्यक्तेत्यत आह ॥ विदुषामिति ॥ भगवानेवतत्त्वंनान्यदितिजानतामित्यर्थः ॥ ननुस्वयंनातेसतिकंसोबालंनहन्यादितिमत्वानीतवानितिकिंनस्यादितिनेत्याह ॥ किमका
र्यमिति ॥ ननुदेवकीकथंपुत्रंत्यक्तनेत्यत आह ॥ दुस्त्यजमिति ॥ विजितधृतआत्माहरियैस्तेषां ॥५८॥५९॥६०॥ ॥६१॥ ॥श्रीरामा॰कृष्णायनमः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० पू०
६

कंसस्य शांतिर्देवकार्यं तु गुणानुभवतीति नारदस्य प्रत्यवस्थानं तदाह ॥ नंदाद्या इत्यादि त्रयेण ॥ ६२ ॥ उभयोर्वसुदेवनंदकुलयोः ॥ ६३ ॥ वधोद्यमं देवकृतमिति शेषः ॥ ६४ ॥ ६५ ॥ निगडैः शृंखलैः
अजनो विष्णुस्तच्छंकया ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे टीकायां प्रथमोध्यायः ॥ १ ॥ ॥ द्वितीये कंसघाताय देवक्या गर्भगो हरिः ॥ ब्रह्मादिभिः स्तुतः

नंदाद्या ये व्रजे गोपा याश्चामीषां च योषितः ॥ वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः ॥ ६२ ॥ सर्वे वै देवताप्राया उभयोरपि भारत ॥ ज्ञातयो बंधुसु
हृदो ये च कंसमनुव्रताः ॥ ६३ ॥ एतत्कंसाय भगवान् शशंसाभ्येत्य नारदः ॥ भूमेर्भारायमाणानां दैत्यानां च वधोद्यमं ॥ ६४ ॥ ऋषेर्विनिर्गमे कं
सो यदून्मत्वा सुरानिति ॥ देवक्या गर्भसंभूतं विष्णुं च स्ववधं प्रति ॥ ६५ ॥ देवकीं वसुदेवं च निगृह्य निगडैर्गृहे ॥ जातं जातमहन्पुत्रं त
योरजनशंकया ॥ ६६ ॥ मातरं पितरं भ्रातॄन्सर्वांश्च सुहृदस्तथा ॥ घ्नंति ह्यसुतृपो लुब्धा राजानः प्रायशो भुवि ॥ ६७ ॥ आत्मानमिह संजा त्रा
तं जानन्प्राग्विष्णुना हतं ॥ महासुरं कालनेमिं यदुभिः स व्यरुध्यत ॥ ६८ ॥ उग्रसेनं च पितरं यदुभोजांधकाधिपं ॥ स्वयं निगृह्य बुभुजे शूरसेनान्म जेभू
हाबलः ॥ ६९ ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे प्रथमोध्यायः ॥ १ ॥ ॥ श्रीशुक उ० ॥ ॥ प्रलंबबकचाणूरतृणावर्तमहाशनैः ॥
मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः ॥ १ ॥ अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः ॥ यदूनां कदनं चक्रे बली मागधसंश्रयः ॥ २ रामः
॥ ते पीडिता निविविशुः कुरुपांचालकैकयान् ॥ शाल्वान्विदर्भान्निषधान्विदेहान्कोशलानपि ॥ ३ ॥ ॥ श्रीरामाय नमः ॥ ६

सोचासांत्वितेति निरूप्यते ॥ १ ॥ यदुभिः स व्यरुध्यतेत्युक्तं तमेव विरोधं प्रपंचयति ॥ त्वरया देवकीगर्भान्यत्र संचारेण भगवतः प्रवेशं वक्तुं प्रलंबेत्यादि सार्धत्रयेण ॥ महाशनो अघासु
रः ॥ २ ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुरुंधाना अनुवर्त्तमानाः ॥४॥ धामकलातेजस्तत्संभोगर्भोबभूव ॥ किंतद्धामित्यत आह ॥ यमनंतमिति ॥ हर्षशोकविवर्द्धनः ॥ आनंदरूपपोष्यावतारार्णत्वाद्धर्षः पूर्वगर्भसाधा
रणदृष्ट्याच शोक इति ॥५॥६॥ ननु सा योगोक्ता तेकिमित्यास्तेऽत आह ॥ अन्याश्चेति ॥ नकेवलं सैव ॥ अन्या अपीति ॥ विवरेषु अलक्ष्यस्थानेषु ॥७॥ जठरे संतं ॥ ननुगर्भ
आकृष्यमाणः कथं न वेदित्यत आह ॥ मामकं धामेति ॥ ततः ततः ॥८॥ किमर्थमेकोंवेर्यमित्यत आह ॥ अनंतरमेवेत्यर्थः ॥ अंशभागेनेति ॥ अंशैः शक्तिभिः भ
जते अधितिष्ठति ॥ सर्वान्निब्रह्मादित्वंबपर्यंतानित्यंशा भागः तेन परिपूर्णेन रूपेणेत्यर्थः ॥ यद्वा ॥ अंशेन ज्ञानैश्वर्यबलादिभिर्भजयति यो जयति ॥ स्वा

एके तमनुरुंधाना ज्ञातयः पर्युपासते ॥ मथुरायांस्थिताश्चैव ये क्रूराद्याविशांपते ॥ हतेषु षट्सु बालेषु देवक्या औग्रसेनिना ॥४॥ स
समो वैष्णवं धाम यमनंतं प्रचक्ष्यते ॥ गर्भो बभूव देवक्या हर्षशोकविवर्द्धनः ॥५॥ भगवानपि विश्वात्मा विदित्वा कंसजं भयं ॥ यदू
नां निजनाथानां योगमायां समादिशत् ॥६॥ गच्छ देवि व्रजं भद्रे गोपगोभिरलंकृतं ॥ रोहिणी वसुदेवस्य भार्यास्ते नंदगोकुले ॥ अ
न्याश्च कंससंविग्ना विवरेषु वसंति हि ॥७॥ देवक्या जठरे गर्भं शेषाख्यं धाम मामकं ॥ तत्संनिकृष्य रोहिण्या उदरे संनिवेशय ॥८॥
अथाहमंशभागेन देवक्याः पुत्रतां शुभे ॥ प्राप्स्यामि त्वं यशोदायां नंदपत्न्यां भविष्यसि ॥९॥ ॥ श्रीरामाकृयनमः ॥ ॥

यानितितथा तेनेति ॥ यद्वा ॥ अंशेन पुरुषरूपेण मायया भागो भजनं ईक्षणं यस्य तेन ॥ यद्वा ॥ अंशेन मायया गुणावतारादिरूपा भागा भेदा यस्य तेन ॥ य
द्वा ॥ अंशा एव मत्स्यादिरूपाः भजनीयाः भक्तसाक्षात्स्वरूपं यस्य तेन ॥ यद्वा ॥ अंशैर्ज्ञानबलादिभिर्भजनमनुवर्त्तनं भक्तेषु यस्य तेन ॥ सर्वथा परिपूर्णेन रूपेणेति विव
क्षितं ॥ कृष्णस्तु भगवान्स्वयमिति वचनादिति ॥ तां प्रोत्साहयति ॥ प्राप्स्यामि त्वं यशोदायामिति अक्षरजनसार्द्धचतुष्टयेन ॥९॥ ॥ श्रीरामाकृयनमः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० ६० पू०
७

सर्वान्सुत्रादान्कामयंतेयेतेषांवरांइश्वरांश्रेष्ठांनियंत्रीं॥ अर्च्चकानांसर्वान्कामवरान्प्रददातियातां॥ १०॥ ११॥ १२॥ त्वद्विक्रमेणाचतस्यव्यपदेशान्नविष्यतीत्याह॥ गर्न्नसंकर्षणादित्यादि
ना॥ रामेतिचसंवोधनंकरिष्यंति॥ त्वयासंकल्षेनतेनलोकस्यस्मरणात्रसुत्पादनात्॥ १३॥ तथेतिपुनरपिॐमित्यादरेणप्रतिगृह्य॥ गांपृथ्वीं॥ १४॥ विस्त्रंसितः विम्लष्टः विश्रस्तइ
त्यर्थः॥ इतिविचुक्रुशुः॥ नत्रतद्विडरित्यर्थः॥ आचत्वर्थाद्दुत्नावेस्त्रावः पातः पंचमषष्ठयोरतऊर्ध्वप्रसूतिः स्यादितिवचनात्॥ १५॥ मनआविवेशमनस्याविर्बभूव॥ जाया

अर्च्चिष्यंतिमनुष्यास्त्वांसर्वकामवरेश्वरीं॥ धूपोपहारबलिभिःसर्वकामवरप्रदां॥ २०॥ नामधेयानिकुर्वंतिस्थानानिचनराभुवि॥ दुर्गेतिन्नद्रकालीतिवि
जयावैष्णवीतिच॥ २१॥ कुमुदाचंडिकाकृष्णामाधवाकन्यकेतिच॥ मायानारायणीशानाशारदेत्यंबिकेतिच॥ २२॥ गर्न्नसंकर्षणात्त्वंवैप्राहुःसंकर्षणंभ
वुवि॥ रामेतिलोकरमणाद्बलंबलवदुच्छ्रयात्॥ २३॥ ॥ शुकउवाच॥ ॥ संदिष्टैवंभगवतातथेत्योमितितद्वचः॥ प्रतिगृह्यपरिक्रम्यगांगतातत्तथा
करोत्॥ २४॥ गर्न्नेप्रणीतेदेवक्यारोहिणींयोगनिद्रया॥ अहोविस्त्रंसितोगर्न्नइतिपौराविचुक्रुशुः॥ २५॥ भगवानपिविश्वात्माभक्तानामभ
यंकरः॥ आविवेशांशभागेनमनआनकदुंदुभेः॥ २६॥ सबिभ्रत्पौरुषंधामभ्राजमानोयथारविः॥ दुरासदोतिदुर्द्धर्षोभूतानांसंबभू
व॥ २७॥ ततोजगन्मंगलमच्युतांशंसमाहितंशूरसुतेनदेवी॥ दधारसर्वात्मकमात्मभूतंकाष्ठायथानंदकरंमनस्तः॥ २८॥ ॥ श्रीरामः॥

नामिवनधातुसंबंधइत्यर्थः॥ २६॥ धामश्रीमूर्त्तिः॥ २७॥ जगन्मंगलंजगतोमूर्त्तिमन्मंगलं॥ अच्युतांशं॥ अच्युताश्च्युतिरहिताअंशाःऐश्वर्यादयोयस्यतं॥ यद्वा
अच्युतस्यअंशाइवांशाःभक्तानुग्रहार्थंपरिच्छिन्नवपुरित्यर्थः॥ सम्यग्भूतमेवाहितंवेधदात्मयार्पितं॥ देवीद्योतमानाशुद्धसत्वेत्यर्थः॥ सर्वात्मकंसर्वस्यात्मानं॥ अत
एवात्मभूतंसर्वस्मिन्नादावेवसंतं॥ मनस्तःमनसैवदध्रौरधारणायाधत्तवती॥ अत्रानुरूपंदृष्टांतमाह॥ यथाकाष्ठाप्राचीदिक्आनंदकरंचंद्रमिति॥ २८॥ ॥ ॥

राम०
७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वजगन्निवासस्य श्रीहरेर्निवासभूतासत्यः पिनितरां सर्वजनाह्लादकतया नरेजे किं त्वस्य यमेवानंदमन्वभवत्॥ यतः कंसस्य गृहे रुद्धा अन्यैर्नन्दगृहपते॥ घटादिषु रुद्धा अ
निशिखरोपर्वतयासती श्रोभमाना सरस्वती ह्यानरवले स्तानवंचके रुद्धयथा॥ अन्येषामनुपकारिणा नराजते तद्वत्॥१९॥ प्रनयान्नवनं विरोचयंती॥ आनितः अंत
राकृत्रिमध्येयस्याः तां॥ एषविरोचमानः ध्रुवं हरिरेव॥ यत्प्यास्मात् इदत्रा इयं पुरा पूर्वं नासीत्॥२०॥ ननु संति सामादयउपायाः॥ नेति स्वयमेवाह॥ अयमर्थ
तंत्रो देवकार्यप्रधानः विक्रमं न विहंति॥ महद्धे पराक्रमं करिष्यत्येवेत्यर्थः॥ यद्यातर्हि इयमिदानीमेव हन्यतामिति विचिंत्याह॥ अर्थेतंत्रोः पिपुमान् स्वं विक्र

सादेवकी सर्वजगन्निवासनिवासभूतानितरां नरेजे॥ गोनेंद्रगेहे स्तिमिरिरिवकृष्णा सरस्वती ह्यानरवलेयथासती॥१९॥ तां वान्यकंसः
प्रनयानितांतरां विरोचयंती नवनं शुचिस्मितां॥ आहेषमे प्राणहरो हरिर्गुहां ध्रुवं श्रितोयन्नपुनरेयमीदृशी॥२०॥ किमद्यतस्मिन्नकर
णीयमाशु मेयदर्थतंत्रो न विहंति विक्रमं॥ स्त्रियाः स्वसुर्गुरुमत्यावधोयं यशः श्रियं हंत्यनुकाल्पमायुः॥२१॥ सएषजीवन्खलु संपरे
तो वर्त्तेतयोः स्वंतनृशंसितेन॥ देहेमृतेतं मनुजाः शपंति गंता तमोंधं तनुमानिनो ध्रुवं॥२२॥ इतिघोरतमाद्भावात् संनिवृत्तः स्वयंप्रभु
॥ आस्तेप्रतीक्षंस्तज्जन्म हरेर्वैरानुबंधकृत्॥२३॥ आसीनः संविशंस्तिष्ठन् भुंजानः पर्यटन्महीं॥ चिंतयानो हृषीकेशमपश्यत्तन्
मयं जगत्॥२४॥ ब्रह्माभवश्च तत्रैत्य मुनिभिर्नारदादिभिः॥ देवैः सानुचरैः साकं गीर्भिर्वृषणमैडयत्॥२५॥ ॥श्रीरामा॥ ॥

मं न विहंति न नाशयति॥ स्त्रीवधे तन्नाशः स्यादितिभावः॥ तदेवाह स्त्रिया इति॥ गुरुपमत्या गुर्विण्याः॥२१॥ किंच॥ सएषजीवन्नपि मृतः स्यात्॥ तदेवाह॥ नृशंसितेन क्रौ
र्येण यो वर्त्तेत॥ तं जीवंतमेव मनुजाः शपंति दुर्वाक्यैर्धिक्कुर्वंति॥ सच देहे मृते तनुमानिनः पापिनो नरकं गच्छति॥ अथवा त्रापप्रकारमेवाह॥ तनुमानिनोऽस्य
देहे मृते यं ध्रुवमंधंतमो गमिष्यतीति॥२२॥ संविशन् शयानः॥२३॥२४॥ रम्याभिर्गीर्भिः॥ वृषणं कामवर्षिणं॥ ऐडयत् तुष्टुवुः॥२५॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा०टी०पू०
८

प्रतिश्रुतंसत्यंकृतमितिकृष्णः॥ससत्येनैवप्रथमंस्तुवंति॥सत्यव्रतमिति॥सत्यंव्रतंसंकल्पोयस्यतंसत्यसंकल्पमित्यर्थः॥सत्यपरंसत्यंपरंश्रेष्ठंप्राप्तिसाधनंयस्मिन्तं॥त्रि
सत्यंत्रिष्वपिकालेषुसृष्टेःपूर्वंप्रलयानंतरंचस्थितिसमयेचसत्यंअव्यभिचारेणवर्त्तमानं॥तदेवाह॥सत्यस्ययोनिमिति॥सच्छब्देनपृथिव्यप्तेजांसि॥तच्छब्देनवा
य्वाकाशौएवंसच्चत्यच्चभूतपंचकं॥तत्सत्यमित्याचक्षतइतिश्रुतेः॥तस्ययोनिंकारणं॥अनेनपूर्ववर्त्तमानतोक्ता॥तथासत्येतस्मिन्निवनिहितंअंतर्यामितयास्थि
तं॥अनेनस्थितिसमयेपिसमयेपिसत्त्वमुक्तं॥तथासत्यस्यसत्यंतस्यैवसत्यस्यसत्यंपारमार्थिकंतत्त्वात्अशेषवशिष्यमाणंरूपंअनेनप्रलयेप्यवधियत्वेनस
त्यत्वंदर्शितं॥एवंत्रिसत्यत्वमुपपादितं॥तथाऋतसत्यनेत्रं॥ऋतंसुनृतावाणी॥सत्यंसमदर्शनं॥तथाभगवताव्याख्यास्यमानत्वात्॥सत्यंचसमदर्शनंऋतंचसू
नृतावाणी।कविभिःपरिकीर्तितेति॥तयोर्नेत्रंनयनंसाधनंनेतारंप्रवर्त्तकमितियावत्॥एवंसर्वप्रकारेणसत्यात्मकंत्वांभगवन्वयंशरणंप्रपन्नाःप्राप्ताइति॥

सत्य

सत्यव्रतंसत्यपरंत्रिसत्यंसत्यस्ययोनिंनिहितंचसत्ये॥सत्यस्यसत्यंऋतसत्यनेत्रंसत्यात्मकंत्वांशरणंप्रपन्नाः॥२६॥एकायनोसौद्विफल
स्त्रिमूलश्चतूरसःपंचविधःषडात्मा॥सप्तत्वगष्टविटपोनवाक्षोदशच्छदीद्विखगोह्यादिवृक्षः॥२७॥ ॥श्रीरामायनमः॥ ॥

२७॥ननुभवंतोऽपिलोकेश्वरामत्तुल्याएवकिमितिमांशरणंप्रपद्यंते॥नैवंवाच्यंत्वमेवैकःसर्वेश्वरः॥सर्वसृष्ट्यादिकारणत्वात्॥वयंतुत्वदेकशरणाएव॥लोका
दिरूपंद्वैतंचसर्वंत्वद्व्यतिरेकेणनास्तीतिवक्तुंद्वैतंप्रपंचंवृक्षत्वंरूपकेणनिरूपयंति॥एकायनइति॥असौप्रपंचआदिवृक्षःवृक्षइतिवृक्षःसमष्टिर्व्यष्टिर्देहरूपः
॥कथंभूतः एकायनएकाप्रकृतिरयनमाश्रयोयस्यसः॥द्वेसुखदुःखेफलेयस्यसः॥त्रयोगुणामूलानियस्यसः॥धर्मार्थकाममोक्षाश्चत्वारोरसायस्यसः॥पंचेंद्रियाणि
विधाज्ञानप्रकारायस्य॥सःषडूर्मयःकोशावाआत्मनःस्वभावायस्यसः॥पंचभूतानिमनोबुद्धिरहंकारश्चेत्यष्टौविटपाःशाखाविस्तारायस्यसः॥नवद्वाराणिअक्षाःछि
द्राणियस्यसः॥दशप्राणाःछदाःपत्राणिविद्यंतेयस्यसः॥दशच्छदी॥द्वौजीवेश्वरौखगौयस्मिन्सःद्विखगः॥२७॥ ॥श्रीरामाकृष्णायनमः॥ ॥ ॥

राम:
८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंरूपस्य संसारवृक्षस्य सतः कार्यस्य त्वमेक एव प्रसूतिः प्रकर्षेण सूतिर्जन्म यस्मात्स त्वं कारणमित्यर्थः ॥ त्वं संनिधानं त्वमेव संनिधानं सम्यग्निधीयते स्मिन्निति लयस्थानं ॥ त्व
मेवानुग्रहश्च अनुगृह्णातीति पालकः ॥ ननु ब्रह्मविष्णुरुद्रा एवंभूताः प्रसिद्धाः कथमहमेवेति चेत्तत्राह ॥ त्वन्माययेति ॥ संहृतं पिहितं चेतो ज्ञानं येषां ते त्वामेव नाना प्रपद्यंति
॥ ये तु विपश्चितो विद्वांसस्ते तथा न प्रपद्यंति ॥२८॥ ननु देवकीपुत्रं मां कथमेवं वर्णयंतीति ॥ अयथेति चेत्तत्राह ॥ बिभ्रर्षीति ॥ अवबोधैकस्वरूपः आत्मा त्वमेव रूपाणि मू
र्तीर्बिभर्षि धत्से न तु त्वं कस्यापि पुत्र इत्यर्थः ॥ क्षेमाय पालनाय ॥ सतां धर्मवर्त्तिनां सुखकराणि ॥ खलानाम नष्टाणि नाशकानि ॥२९॥ न केवलमेतावत् भक्तानां मोक्षा
र्थमप्यस्त्याह ॥ त्वयीति ॥ त्वयि समाधिना आवेशितचेतसा निमित्तेन त्वत्प्रसादपोतेनाश्रितेनैके मुख्याः विवेकिनः ॥ महद्भिः कृतेन स्वयमेव तया संपादितेन ॥ यद्वा ॥ इदम

त्वमेक एवास्य सतः प्रसूतिस्त्वं संनिधानं त्वमनुग्रहश्च ॥ त्वन्मायया संहृतचेतसस्त्वां प्रपद्यंति नाना न विपश्चितो ये ॥२८॥ बिभ्रर्षि रूपा
ण्येकबोध आत्मा क्षेमाय लोकस्य चर[illegible]स्य ॥ सत्त्वोपपन्नानि सुखावहानि सतामनष्टाणि मुहुः खलानां ॥२९॥ त्वय्यंबुजाक्षाखि
लसत्त्वधाम्नि समाधिनावेशितचेतसैके ॥ त्वत्प्रसादपोतेन महत्कृतेन कुर्वंति गोवत्सपदं भवाब्धिं ॥३०॥ स्वयं समुत्तार्य मुहुस्तरं मुमु
क्षून्भवार्णवं नो मम दत्तसौहृदाः ॥ भवत्पदांभोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवान् ॥३१॥ ॥ श्रीरामाय नमः ॥ ॥

पि मायामयमित्यनादरं परित्यज्येदमेवमहत्त्वं बोधकृष्टमिति मनसि कृतेन बहुमतेनेत्यर्थः ॥ भवाब्धिं तुच्छां कुर्वंति अनायासेनैव भजनानुसारिणां तेषां मुक्तिरित्यर्थः ॥
३०॥ ननु तेन पोतेन पूर्वे चेत्पारंगताः तर्हि दानींतनानां का गतिरित्यत्राह ॥ स्वयमिति ॥ अयमर्थः ॥ हे द्युमन् स्वप्रकाश ॥ त्वत्प्रसादपोतस्यापि प्रमात्रेण भवांबुधौ वत्सपदमा
त्रे जाते तस्त्वन्निरपेक्षं स्वयमेवान्येषां नाम्नां दुस्तरमपि भवार्णवं समुत्तार्य भवत्पदांभोरुहरूपां नावमात्रमेव निधाय भक्तिमार्गसंप्रदायं प्रवर्त्त्येत्यर्थः ॥ पारं याताः ॥ तत्किं ॥ यतो
दत्तसौहृदाः सर्वभूतेषु प्रीतियुक्ताः अतस्तेन्येषां तरणाय निधायेति ॥ कथं मत्प्रसादपोतेनाश्रयणमात्रेण तीर्णा अत उक्तं भवान् सदनुग्रहः सतो भक्ताननुगृह्णातीति ॥३१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०द०पू० ननुविवेकिनांकिंमज्जनेनमुक्ताएवहितेतत्राहुः॥येन्यइति॥विमुक्तमानिनःविमुक्तावयमितिमन्यमानाः॥त्वयिअस्तोनिरस्तोअतएवासन्योभावः तस्माद्भक्तेर
नावादित्यर्थः॥नविशुद्धाबुद्धिर्येषांतेतथा॥यद्वा॥त्वयिअस्तभावाः इतिच्छेदः॥अस्तमतयःवादेष्वेवविशुद्धबुद्धयः॥कृच्छ्रेणबहुजन्मतपसापरंपदंमोक्षसन्नि
९ हितंतेतत्फलतपःश्रुतादिभिः॥ पतंतिविघ्नैरभिभूयंते॥नआदृतौयुष्मदंघ्रयोयैस्ते॥३२॥त्वदीयास्तुनकदाचिदपिपतंतीत्याहुः॥तथानेति॥विनायकावि

येन्येरविंदाक्षविमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः॥ आरुह्यकृच्छ्रेणपरंपदंततःपतंत्य
धोनादृतयुष्मदंघ्रयः॥३२॥तथानतेमाधवतावकाःक्वचिद्भ्रश्यंतिमार्गात्त्वयिबद्धसौहृदाः॥त्वया
भिगुप्ताविचरंतिनिर्भयाविनायकानीकपमूर्द्धसुप्रभो॥३३॥सत्त्वंविशुद्धंश्रयतेभवान्स्थितौश
रीरिणांश्रेयउपायनंवपुः॥वेदक्रियायोगतपःसमाधिभिस्तवार्हणंयेनजनःसमीहते॥३४॥ ॥

घ्नहेतवःतेषामनीकानिस्तोमास्तानियेपांतियेतेषांमूर्द्धसुविचरंतिविघ्नानाक्रम्यपंतीत्यर्थः॥३३॥सतांसुखावहानिरूपाणिधारयसीत्युक्तं॥किंतद्विरूपाणीति॥तत्के राम:
नप्रकारेणसुखावहत्वमित्यपेक्षायामाहुः॥सत्त्वंविशुद्धमिति॥सत्त्वंवपुःश्रयत इत्यन्वयः॥श्रेयउपायनंकर्मफलदातृ॥कथंयेनवपुषाजनस्तवार्हणंपूजामीहतेक ९
रोति॥कैः वेदक्रियायोगाश्चतपश्चसमाधिश्चतैःचतुराश्रमधर्मैरित्यर्थः॥वपुषोनाश्रयणेऽर्हणासंभवान्नकर्मफलसिद्धिःस्यादिति॥३४॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वय्यंबुजाक्षेत्यादिना श्लोकत्रयेण ॥ न भवद्भक्तानामेव मोक्षो नान्येषामित्युक्तं ॥ तत्र कर्मफलं नक्किं विना मा भूत् ॥ मोक्षस्तु ज्ञानैकसाध्यत्वात्किं न स्यादिति सानुशयात् प्राहुः ॥ स
त्त्वं न चेदिति ॥ हे धातः इदं सत्त्वं निजं तव वपुर्न भवेच्चेत् तर्हि विज्ञानं विशिष्टं अपरोक्षज्ञानं न भवेदित्यनुषंगः ॥ कथंभूतं अज्ञानभिदापमार्जनं अज्ञानं च तत्कृता भिदा च त
योरपमार्जनं निवर्तकं ॥ यद्वा ॥ अज्ञानं भिनत्तीत्यज्ञानभित् विज्ञानं मार्जनं आपप्राप्तमेवेति ॥ ननु जडानां बुद्ध्यादीनां यतः प्रकाशः तद्ब्रह्मेति ज्ञानं भवेदेव ॥ न गुण
प्रकाशैः गुणावच्छिन्नैः प्रकाशैर्भवान् सर्वसाक्षी पूर्णः ॥ केवलमनुमीयते ॥ कल्प्यते ॥ न तु साक्षात्क्रियत इत्यर्थः ॥ अनुमानप्रकारमाहुः ॥ प्रकाशते यस्य च येन वा गुण
प्रकाशैः गुणावच्छिन्नैः प्रकाशैर्भवान् सर्वसाक्षी पूर्ण इति ॥ यस्य संबंधी अयं बुद्ध्यादिगुणः प्रकाशते यो गुणसाक्षीत्येवं ॥ येन वा बुद्ध्यारूढेन प्रमात्रा बुद्ध्यधिष्ठा-

सत्त्वं न चेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनं ॥ गुणप्रकाशैरनुमीयते भवान्प्रकाशते यस्य च येन वा गुणः ॥ ३५ ॥ न नामरू
पे गुणजन्मकर्मभिर्निरूपितव्ये तव तस्य साक्षिणः ॥ मनोवचोभ्यामनुमेयवर्त्मनो देव क्रियायां प्रतियंत्यथापि हि ॥ ३६ ॥ ॥ ॥

त्रा निमित्तेन बाह्यो गुणः प्रकाशते स त्वमनुमीयत इत्यर्थः ॥ शुद्धसत्त्ववपुषि त्वयि सेव्यमाने तु तदाकारेंऽतःकरणे त्वत्प्रसादेन साक्षात्कारो भवेदिति भावः ॥ ३५ ॥ एवं तावद्भक्तानामस्तु
दयापवर्गार्थं रूपाणि बिभर्षीत्युक्तं ॥ तान्यपि न जना यानि केवलं न तु ज्ञातुं शक्यंते अनंतत्वादतर्क्यत्वाच्च मनोवचसोरगोचरत्वादित्याहुः ॥ न नामरूपे इति ॥ गुणाश्च जन्मा
नि च कर्माणि च तैर्निरूपितव्ये निरूपणार्हे न भवतः ॥ कुतः ॥ अनुमेयं वर्त्म मार्गो यस्य तव ॥ तत्रापि हेतुः ॥ तस्य साक्षिण इति ॥ न हि साक्षिणस्तत्त्वं मनोवचोगोचर इ
त्यर्थः ॥ हे देव बहुधा द्योतमान ॥ अथापि क्रियायां उपासनादिलक्षणायां त्वां प्रतियंति उपासकाः साक्षात्कुर्वंति ॥ हि प्रसिद्धं ॥ ३६ ॥ ॥ श्रीरामकृष्णाय नमः ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०टी०पू०
१०

तस्मात्ज्ञोवमोहरस्तुपसंहरति॥ अत एवेति॥ अन्यानपि संस्मारयन्॥ क्रियासु देवार्चनादिषु॥ ३७॥ विशेषतः श्रीकृष्णावतारमभिनंदति॥ दिष्ट्येति॥ दिष्ट्यानंद॥ नवपदः पादन्यतायाः ईश्वरस्य तव जन्ममात्रेणापनीत एव॥ किंच॥ त्वत्पदैः कोमलैः पदैः सुरोत्स्नैर्वन्नांकुत्रादिषु नलक्षणैः गां पृथ्वीं द्यां स्वर्गं च तव त्वया नुकंपितां॥ ३८॥ ननु तव जन्मनात्यारोपनीत्यारोपनीत इत्युक्त्या ममापि किंजीवस्य संसारउक्तः॥ नहि न इत्याह॥ नेति बत हे ईश॥ असंसारिणस्ते जन्मनः कारणं क्रीडां विना न तर्क

अ एवन् गणन्संस्मरयं श्रवितयन्नामानि रूपाणि च मंगलानि ते॥ क्रियासु यस्त्वच्चरणारविंदयोराविष्टचेता न भवाय कल्पते॥ ३७॥ दिष्ट्याहरेऽस्याः भवतः पदोभुवो भारोपनीतस्तव जन्मनेशितुः॥ दिष्ट्यांकितां त्वत्पदकैः सुशोभनैर्द्रक्ष्याम गां द्यां च तवानुकंपितां॥ ३८॥ न तेऽभवस्येश भवस्य कारणं विना विनोदं बत तर्कयामहे॥ भवो निरोधः स्थितिरप्यविद्यया कृता यतस्त्वय्यभयाश्रयात्मनि॥ ३९॥ मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्रविबुधेषु कृतावतारः॥ त्वं पासि नस्त्रिभुवनं च यथाधुनेश भारं भुवो हर यदूत्तम वंदनं ते॥ ४०॥ दिष्ट्यांब ते कुक्षिगतः परः पुमानंशेन साक्षाद्भगवान् भवाय नः॥ मा भूद्भयं भोजपतेर्मुमूर्षोर्गोप्ता यदूनां भविता तवात्मजः॥ ४१॥ ॥श्रीरामायनमः॥ ॥

याम॥ किंच॥ हे अभय आश्रय न भयमाश्रयतः इति तथा तस्संबोधनं हे नित्यमुक्तेत्यर्थः॥ तव जन्मकारणं नास्तीति किं वक्तव्यं यतो जीवात्मन्यपि भवादयः त्वयि विषये या अविद्या तया कृता न परमार्थतः संतीति॥ ३९॥ प्रस्तुतं प्रार्थयते॥ मत्स्याश्वेति॥ नोऽस्मान् त्रिभुवनं चान्यदा यथा पासि तथाऽधुनापि पाहीति॥ वंदनं त इति वदंतः सर्वे शिरोभिः प्रणमंति॥ ४०॥ देवकीं प्रत्याहुः॥ दिष्ट्येति॥ नोऽस्माकं भवाय उद्भवाय साक्षात्परः पुमांस्ते कुक्षिंगतः॥ अतो भयं मा भूदिति॥ ४१॥ ॥ ॥

राम०
१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्परूपमनिदंसर्वप्रत्यग्गन्तं॥ यथायथावत॥ तस्मा दंचयित्वाएताविहस्थास्यात इतिमन्यमानाब्रह्मेशानौपुरोंधायपुरतः कृत्वायपुरिति॥४२॥ ॥इतिश्रीभागवतेदशमस्कं
धेटी॰ द्वितीयोध्यायः॥२॥ ॥तृतीयेनिजरूपेणसंभूतस्तुहरिःस्वयं॥ पित्र्यांसंस्तुतोनीतःपित्राज्ञातेनगोकुलं॥१॥ अथेतिमंगलार्थं॥ यर्हिसर्वगुणोपेतःकालोबभू
वतदादेवक्याविष्णुराविरासीदित्यष्टमश्लोकगतेनान्वयः॥ परमशोभनत्वमेवाह॥ यहीत्यादिना॥ अजनात्नारायणाज्जन्मयस्यप्रजापतेस्तस्यऋक्षंरोहिणीनक्षत्रं॥

शुकउवाच॥ ॥इत्यभिष्टूयपुरुषंयद्रूपमनिदंयथा॥ ब्रह्मेशानौपुरोधायदेवाःप्रतिययुर्दिवं॥४२॥ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेगर्भग
तविष्णोर्ब्रह्मादिकृतस्तुतिर्नामद्वितीयोध्यायः॥२॥ ॥शुकउवाच॥ ॥अथसर्वगुणोपेतःकालःपरमशोभनः॥ यर्ह्येवाजनजन्मर्क्षंशांतर्क्षग्रहतार
कं॥१॥ दिशःप्रसेदुर्गगनंनिर्मलोडुगणोदयं॥ महीमंगलभूयिष्ठपुरग्रामव्रजाकराः॥२॥ नद्यःप्रसन्नसलिलाह्रदाजलरुहःश्रियः॥
द्विजालिकुलसंनादस्तवकावनराजयः॥३॥ ववौवायुःसुखस्पर्शःपुण्यगंधवहःशुचिः॥ अग्नयश्चद्विजातीनांशांतास्तत्रसमिंधत॥४॥
मनांस्यासन्प्रसन्नानिसाधूनामसुरद्रुहां॥ जायमानेऽजनेतस्मिन्नेदुर्दुंदुभयोदिवि॥५॥ जगुःकिंनरगंधर्वास्तुष्टुवुःसिद्धचारणाः॥ विद्याध
र्यश्चननृतुरप्सरोभिःसमंतदा॥६॥ मुमुचुर्मुनयोदेवाःसुमनांसिमुदान्विताः॥ मंदंमंदंजलधराजगर्जुरनुसागरं॥७॥ ॥ ॥

कथंभूतं॥ शांतानिऋक्षाणिअश्विन्यादीनिग्रहाश्चतारकाश्चयस्मिन्तत्॥ यर्हीतिसर्वत्रानुषज्यते॥१॥ निर्मलानामुडुगणानामुदयोयस्मिन्तत्तथा॥ मंगलभूयिष्ठाः
पुरादयोयस्यांमह्यांसा॥२॥ जलरुहैःश्रीःशोभायेषांते॥ द्विजालिकुलानांसंनादायेषुतेस्तवकोयासुताः॥ समिंधतअडागमोत्रइष्टव्यः॥ समैंधतेतिसम्यग्दीप्ता
बभूवुरित्यर्थः॥४॥ असुरद्रुहांकंसादिव्यतिरिक्तानांसर्वप्राणिनां॥ देवानांचेति॥ अजनेजायमानेतदाआसन्नःप्रसवोयस्मिन्तस्मिन्तस्मिन्समये॥५॥६॥ साग
रेगर्जितेतिसति॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० पू०
११

तमसा उद्भूते घनतमसि निशीथे ॥ यथा यथावत् ॥ ऐश्वरेणैव रूपेण ॥ ८ ॥ तमद्भुतं बालकं वसुदेव ऐक्षतेति द्वितीयश्लोकेनान्वयः ॥ अद्भुतत्वे हेतुगर्भाणि विशेषणानि ॥
अंबुजेक्षणमित्यादिनि ॥ श्रीवत्सलक्ष्माणं ॥ गलेन शोभते गलशोभः कौस्तुभो यस्मिन् ॥ ९ ॥ परिष्वक्तं सहस्रं कुंतलं किरीटकुंडलादौ त्विषा स्फुरत् दपरिमितं
केशा इत्यर्थः ॥ १० ॥ विस्मयेनोत्फुल्ले विशिष्टे लोचने यस्य सः ॥ गवामयुतमसंकल्पयत् ॥ मनसा दत्तवान् कंसनिगडात् तस्य दानासंभवात् ॥ स्पृष्टौ हे त्रुः कृष्णावता
र निशीथे तमउद्भूते जायमाने जनार्दने ॥ देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः ॥ आविरासीद्यथा प्राच्यां दिशींदुरिव पुष्कलः ॥ ८ ॥ तम
द्भुतं बालकमंबुजेक्षणं चतुर्भुजं शंखगदार्युदायुधं ॥ श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं पीतांबरं सांद्रपयोदसौभगं ॥ ९ ॥ महार्हवैदूर्य
किरीटकुंडलत्विषा परिष्वक्तसहस्रकुंतलं ॥ उद्दामकांच्यंगदकंकणादिभिर्विरोचमानं वसुदेव ऐक्षत ॥ १० ॥ स विस्मयोत्फुल्लविलो
चनो हरिं सुतं विलोक्यानकदुंदुभिस्तदा ॥ कृष्णावतारोत्सवसंभ्रमोऽस्पृशन्मुदा द्विजेभ्योऽयुतमाप्लुतो गवां ॥ ११ ॥ अथैनमस्तौदवधा
र्य पूरुषं परं नतांगः कृतधीः कृतांजलिः ॥ स्वरोचिषा भारत सूतिकागृहं विरोचयंतं गतभीः प्रभाववित् ॥ १२ ॥ वसुदेव उ० ॥ ॥ वि
दितोसि भवान्साक्षात्पुरुषः प्रकृतेः परः ॥ केवलानुभवानंदः स्वरूपः सर्वबुद्धिदृक् ॥ १३ ॥ ॥ श्रीरामाकृष्णायनमः ॥ ॥
रेति ॥ मुदा आप्लुतो व्याप्तः स्नात इति वा ॥ ११ ॥ कृतधीः शुद्धबुद्धिः ॥ १२ ॥ प्रथमं पुत्रबुद्ध्या पश्यन् तां परित्यज्याह ॥ अहो विदितोसीति ॥ कथं विदितोस्मि ॥ भवान्प्रकृतेः परः पु
रुष इति ॥ ननु किमत्राश्चर्यं ॥ पुरुषस्य प्रकृतेरन्यत्वादेवेति ॥ अत आह ॥ साक्षादिति ॥ प्रत्यक्षत इत्यर्थः ॥ नन्वत्र किं सन्निकृष्टं प्रत्यक्षत उपलभ्यते किं चित्रमित्यत आ
ह ॥ केवलेति ॥ केवलश्चासावनुभवश्च आनंदश्च तावेव स्वरूपं यस्य सः ॥ किंच ॥ सर्वबुद्धिदृक् ॥ नह्येवंभूतो दृश्यो भवतीत्यर्थः ॥ १३ ॥ ॥ श्रीरामाकृष्णायनमः ॥ ॥

राम:
११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुदेवक्याजठरेप्रविष्टस्यकिमियमितिस्तुतिःक्रियतेअतआह॥सएवेति॥एं सएवउक्तस्वरूपएवत्वंनदेवक्याजठरेप्रविष्टइत्यर्थः॥ननुविश्वंसृष्ट्वातदनुप्रविष्टस्यकिमेतद
उअतआह॥स्वप्रकृत्येति॥स्वमाययासृष्ट्वातदनुत्वमप्रविष्टएवेति॥ननुतर्हिकथंस्तुत्योच्यते॥तत्सृष्ट्वातदेवानुप्राविशदितिअतआह॥प्रविष्टइवेतिभाव्यसे
निरूप्यसेप्रत्यक्तत्त्वतोवासद्रूपेणवाप्रविष्टइवलक्ष्यसे॥१४॥अत्रदृष्टांतः॥यथेति॥इमे॰विकृताभावामहदादयोयथातथेति॥दृष्टांतंविवृणोति॥तेविकृतैरिति॥

सएवस्वप्रकृत्येदंसृष्ट्वाग्रेत्रिगुणात्मकं॥तदनुत्वंह्यप्रविष्टःप्रविष्टइवभाव्यते॥१४॥मे॰विकृता
भावास्तथातेविकृतैःसह॥नानावीर्याःपृथग्भूताविराजंजनयंतिहि॥१५॥सं॰न्निपत्यस
मुत्पाद्यदृश्यंते॰नुगताइव॥प्रागेवविद्यमानत्वान्नतेषामिहसंभवः॥१६॥ ॥श्रीरामः॥॥

तेविकृतैःषोडशविकारैःसहसन्निपत्यविराजंब्रह्मांडंजनयंति॥संनिपतनेहेतुः॥यतःपृथग्भूताःसंतोनानावीर्याविशिष्टकार्यसमर्थानभवंति॥अतःसं
निपत्येति॥एवंसमुत्पाद्यानुगताःप्रविष्टाइवदृश्यंतेनपुनःप्रविष्टाः॥कुतःप्रागेवकारणतयाविद्यमानत्वान्नतेषामिहसृष्टेकार्येपश्चात्संभवःप्रवेशइति॥१५
१६॥ ॥श्रीपरमात्मनेपुरुषोत्तमाय॥ ॥श्रीरामायनमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० द० पू०
१२

दार्ष्टांतिकेऽतिदिशति॥ एवंभवानिति॥ ननुयद्येवमप्रच्युतस्वरूपएवकारणतयाकार्येषुवर्तेत तर्हितेष्विंद्रियैरिंद्रियैर्गृह्यमाणेषुममग्रहणंकिंनास्तितत्राह॥ बुद्ध्यनुमेयल-
क्षणैरिति॥ बुद्ध्यारूपादिज्ञानेनानुमेयंलक्षणंस्वरूपंयेषांतैर्गुणैरिंद्रियैर्ग्राह्यैर्गुणैःसहसन्नपिवर्त्तमानोपितद्गुणाग्रहः तैर्गुणैःसहग्राह्यसे॥ अयंभावः॥ नहिग्राह्यैः
सहभावमात्रंग्रहणेकारणं॥ किंत्विंद्रियाणांशक्तिःसाचकार्येलुप्तैर्गुणैःसहसन्नपिवर्त्तमानोप्रिकसमधिगम्याप्यथाकार्यमेवकल्प्यते॥ अतोयथाचक्षुषा
रूपग्रहणेरसादिग्रहणंनास्तितथैवविषयग्रहणेत्वद्ग्रहणमपीति॥ अविषयत्वेनचग्रहणानर्हत्वमुक्तमेवसर्वबुद्धिदृगित्यत्र॥ एवंतावत्प्रागेवविद्यमानत्वात्प्रवेशो

एवंभवान्बुद्ध्यनुमेयलक्षणैर्ग्राह्यैर्गुणैःसन्नपितद्गुणाग्रहः॥ अनावृतत्वाद्बहिरंतरंनतेस
र्वस्यसर्वात्मनआत्मवस्तुनः॥१७॥ ॥श्रीरामाकृष्णायनमः॥ ॥श्रीरामायनमः॥

नास्त्येवेत्युक्तं॥ किंच॥ परिछिन्नस्यनाडेपक्ष्यादेरिवप्रवेशोनभवेत्तवत्वनावृतत्वादपरिछिन्नत्वेनबहिरंतरभेदोनास्ति॥ कुतःप्रवेशइत्याह॥ अनावृतत्वादिति॥ अना-
वृतत्वेहेतुमाह॥ सर्वस्येति॥ नहिसर्वस्वरूपस्यअन्यदावरकमस्ति॥ सर्वात्मनः नह्येकेनावृतोऽन्यस्यात्माभवेत्॥ आत्मवस्तुनइतिआत्मनोवस्तुतश्चेतिहेतुद्वयं॥ अतसा-
तत्यगमनइत्यस्मात् अततिव्याप्नोतीत्यात्मानहिव्यापकस्यावरणंघटते॥ तथावस्तुनःपरमार्थस्यावस्तुनाआवरणंनघटतइत्यर्थः॥ तस्मात्त्वंतर्यामितयाप्रवेशो
नमुख्योस्ति॥ कुतस्तरांगर्भप्रवेशः॥ अतःकेवलानुभवानंदस्वरूपएवत्वंविदितोसात्माश्चर्यंममनागमइत्यर्थः॥१७॥ ॥श्रीरामाकृष्णायनमः॥ ॥ रामः
१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेतद्देहचतुष्टयं प्रपंचस्यावस्तुत्वे घटेत तत्तु न संभवति ॥ सत्यत्वेन प्रतीतेरित्याशंक्याह ॥ य इति ॥ आत्मनो दृश्येषु गुणेषु देहादिषु स्वव्यतिरेकतः आत्मव्यतिरेकेण पृथक्
सत्त्वं यद्देहादिरिति व्यवस्यते निश्चिनोति यः पुमान् स अबुधः अविद्वान् ॥ व्यतिरेकदर्शनात् ॥ किंच ॥ मनीषितं विचारितं तत् देहादि सर्वं यतः विनाऽनुवादं वाचारंभण
मात्रं विना सम्यग् न भवति ॥ अतोऽवस्तुत्वेन त्यक्तं बाधितमेव वस्तुबुध्या उपाददत् स्वीकुर्वन्नबुध इत्यर्थः ॥ १८ ॥ एवं परमेश्वरद्रूपस्य तद्व्यतिरेकेणासत्त्वमुक्तं ॥
परमेश्वरोपादानत्वादपि तद्व्यतिरेकेणासत्त्वमित्याह ॥ त्वत्तोऽस्येति ॥ न चैवं सत्यपि विकारित्वमित्याह ॥ अनीहादिति ॥ अगुणत्वादनीहत्वं ततो विकारित्वमित्यर्थ

य आत्मनो दृश्यगुणेषु सन्निति व्यवस्यते स्वव्यतिरेकतोऽबुधः ॥ विनानुवादेन च तन्मनीषितं सम्यक् यतस्त्यक्तमुपादद
त्पुमान् ॥ १८ ॥ त्वत्तोऽस्य जन्मस्थितिसंयमान्विभो वदंत्यनीहादगुणादविक्रियात् ॥ त्वयीश्वरे ब्रह्मणि नो विरुध्यते तदा॰
श्रयत्वादुपचर्यते गुणैः ॥ १९ ॥ स त्वं त्रिलोकस्थितये स्वमायया बिभर्षि शुक्लं खलु वर्णमात्मनः ॥ सर्गाय रक्तं रजसोप
बृंहितं कृष्णं च वर्णं तमसा जनात्यये ॥ २० ॥ त्वमस्य लोकस्य विभो रिरक्षिषुर्गृहेऽवतीर्णोऽसि ममाखिलेश्वरः ॥ राज
न्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमाना निहनिष्यसे चमूः ॥ २१ ॥ ॥ श्रीरामाकृष्णायनमः ॥ ॥ ॥

ः॥ नन्वनीहत्वे कथं कर्तृत्वं कर्तृत्वे वा कुतोऽविकारित्वं तत्राह ॥ त्वयीश्वर इति ॥ ब्रह्मत्वादविकारित्वं ॥ ईश्वरत्वात्कर्तृत्वमिति ॥ नन्वेतदपि विरुद्धमेव नेत्याह ॥
तदाश्रयत्वादिति ॥ गुणैः कुर्वद्भिः त्वयि सृष्ट्यादिकर्तृत्वमुपचर्यते ॥ गुणाश्रयत्वात् ॥ यथा भृत्यकृतं राज्ञा जानाति ॥ १९ ॥ एवंभूतस्यैव तव यथाविश्वस्थितिसर्ग
लयार्थं त्रिवर्णगुणावताराः ॥ एवमयं भूभारापनयनार्थमिति ज्ञातमित्याह ॥ स त्वमिति श्लोकद्वयेन ॥ २० ॥ रिरक्षिषुः ॥ रक्षितुमिच्छुः अवतीर्णोसि कुले
न वर्षेन ॥ अतः साधूनां रक्षणार्थं राजन्यसंज्ञा ये असुरकोटियूथपास्तैर्निर्व्यूह्यमाना इतस्ततश्चाल्यमानाश्चमूः सेना निहनिष्यसि संहरिष्यसि ॥ २१ ॥॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ पू॰
१३

किंतु तथाप्यप्रमत्तेन त्वया त्रातव्यमित्याह ॥ अयंत्विति ॥ असत्पथैः खलैः ॥ समर्पितं कथितं ॥ अभिसरति आगमिष्यति ॥ २२ ॥ उपाधावत् ॥ अस्तौत् ॥ त्वयैवत्नयत्रं कैव
तावन्नास्तीति श्लोकचतुष्टयेनाह ॥ देवकी किंचिद्दर्शयितुं रूपमिति ॥ यत्तत्किमपिरूपं वस्तु प्राहुर्वेदाः ॥ किं चिदस्तु तदाह ॥ अव्यक्तं अत्र हेतुः ॥ आद्यं कारणं ॥ किं
परमाणवः ॥ न ब्रह्म बृहत् ॥ किं प्रधानं ॥ न ज्योतिः चेतनं ॥ किं वैशेषिकाणामिवत्तानगुणं ॥ न निर्गुणं ॥ किं मीमांसकानामिवत्तानपरिणामि ॥ न ॥ निर्विकारं ॥
किंपुष्करान्तादीनामिवत्राक्तिविक्षेपेण परिणामि ॥ न सत्तामात्रं ॥ तर्हि किं सामान्यं ॥ न निर्विशेषं ॥ तर्हि किं कारणत्वात्सक्रियं ॥ न ॥ निरीहं संनिधिमात्रेण

अयंत्वसत्यस्तवजन्मनौगृहे श्रुत्वाग्रजांस्तेन्यवधात्सुरेश्वर ॥ स तेवतारं पुरुषैः समर्पितं श्रुत्वाधुनैवाभिसरत्युदायुधः ॥ २२ ॥ ॥ श्री
शुक उवाच ॥ ॥ अथैनमात्मजं वीक्ष्य महापुरुषलक्षणं ॥ देवकी तमुपाधावत्कंसाद्भीता शुचिस्मिता ॥ २३ ॥ ॥ देवक्युवाच ॥ ॥ रूपं यत्त
त्प्राहुरव्यक्तमाद्यं ब्रह्म ज्योतिर्निर्गुणं निर्विकारं ॥ सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद्विष्णुरध्यात्मदीपः ॥ २४ ॥ ॥ कारणं ॥ एवंभूतं किमपि

कार्यकल्पं यद्वस्तु स एव साक्षात्त्वं विष्णुरिति ॥ अपरोक्षत्वेनाह ॥ अध्यात्मदीप इति ॥ बुध्यादिकरणसंघातप्रकाशक इत्यर्थः ॥ अथवा अव्यक्तं न केनापि प्रकारेण व्यज्यत इत्य
व्यक्तं ॥ कथं ॥ तत्प्रकारान्वक्तुं व्यज्यत इत्याह ॥ आद्यं सर्वस्य कार्यस्याद्यं अनादीत्यर्थः ॥ तथा ब्रह्म ज्योतिर्निर्गुणं निर्विकारमिति चतुर्भिः पदैर्देशेन प्रकाशनेन च गुणेन
च विकारेण च व्यक्तिं निराकरोति ॥ तथा सत्तामात्रमिति विशेषेण निर्विशेषमिति सामान्येन निरीहमिति क्रियया च व्यक्तिं निराकरोति ॥ अन्यत्समानं ॥ एवंभूत
स्पतवनत्रपरां केतिभावः ॥ २४ ॥ ॥

रामः
१३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच महाप्रलयेप्यवशिष्यमाणस्त्वमतो न भयमित्याह॥ नष्टे लोके इति॥ चराचरे लोके महाभूतेषु लीनेते ष्वप्यादिभूतं भूतसूक्ष्मं प्रविष्टेषु॥ तस्मिन्नपि व्यक्ते अव्यक्तं प्रधानं प्राप्ते॥ अशेषाक्के प्रधाने संहृता प्रलायस्य एवं मयाज्ञानमिदमस्ति पश्चाद्देवमुद्बोधनायमिति सः अशेषसंज्ञः॥ शेषसंज्ञ इति वा॥ २५॥ किंच॥ एवं प्रलयहेतुर्योयं कालः एनं हे व्यक्तबंधो प्रकृतिप्रवर्त्तक॥ तस्य प्रलयावधिभूतस्य ते तव चेष्टां लीलां॥ चेष्टते विपरिवर्त्तते॥ मर्त्य इति॥ लोकान्प्रति॥ यदछयाकेना

नष्टे लोके द्विपरार्द्धावसाने महाभूतेष्वादिभूतं गतेषु॥ व्यक्तेऽव्यक्तं कालवेगेन याते भवानेकः शिष्यते शेषसंज्ञः॥ २५॥ योयं कालस्तस्य तेऽव्यक्तबंधो चेष्टामाहुश्चेष्टते येन विश्वं॥ निमेषादिर्वत्सरांतो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये॥ २६॥ मर्त्यो मृत्युव्यालभीतः पलायन्लोकान्सर्वान्निर्भयं नाध्यगच्छत्॥ त्वत्पादाब्जं प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैति॥ २७॥ स त्वं घोरादुग्रसेनात्मजान्नस्त्राहि त्रस्तान्भृत्यवित्रासहासि॥ रूपं चेदं पौरुषं ध्यानधिष्ण्यं मा प्रत्यक्षं मांसदृशां त्वं कृषीष्ठाः॥ २८॥ जन्म ते मय्यसौ पापो मा विद्यान्मधुसूदन॥ समुद्विजे भवद्धेतोः कंसादहमधीरधीः॥ २९॥ उपसंहर विश्वात्मन्नदो रूपमलौकिकं॥ शंखचक्रगदापद्मश्रिया जुष्टं चतुर्भुजं॥ ३०॥ ॥॥

+र्त्तते॥ पुनः पुनर्वर्त्तमानस्य महायानं द्विपरार्द्धरूपः॥ यस्य चेष्टामाहुः तं त्वां क्षेमधाम अभयस्थानं प्रपद्ये शरणं व्रजे॥ २६॥ क्षेमधाम त्वमेव + पिनाग्गोदयेन॥ हे आद्य॥ २७॥ प्रस्तुतं विज्ञापयति॥ स त्वमिति॥ नःस्माकं वित्रासं हंतीति तथा वित्रासहा॥ भृत्यवदिति वा छेदः॥ पौरुषं ऐश्वरं॥ ध्यानधिष्ण्यं ध्यानास्पदं॥ मांसदृशां सचक्षुषां प्रत्यक्षं मा कृथाः॥ २८॥ भवत एव हेतोर्निमित्तभूतात्कंसादहमुद्विजे बिभेमि॥ यतोऽधीः॥ अधीरचित्ता॥ २९॥ ३०॥ ॥ श्रीरामाय नमः॥॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पू०
२४

किमिन्द्रूपसंदर्शयं॥एवंभूतेनमयापुत्रेणतवमहती श्लाघास्यादितितत्राह॥विश्वमिति॥निशांतेप्रलयावसानेयथावकाशमसंकोचतः॥असंभावितत्वादुपहास्यतैवस्यादित्यर्थः॥
३१॥चतुर्भुजरूपेणाविर्भावेकारणंतावदाह॥त्वमेवेत्यादिचतुर्दशभिः॥पूर्वसर्गेप्रथमजन्मनि॥अभूः आसीः पृश्निर्नामस्वायंभुवेमन्वंतरे॥तदायंवसुदेवः॥३२॥तेपाथेतपःकृत

विश्वंयदेतत्स्वतनौनिशांतेयथावकाशंपुरुषःपरोभवान्॥बिभर्तिसोयंममगर्भगोऽभूदहोन्टलोकस्यविडंबनंहितत्॥३१॥ ॥श्री
भगवानुवा०॥ ॥त्वमेवपूर्वसर्गेभूः पृश्निःस्वायंभुवेसति॥तदायंसुतपानामप्रजापतिरकल्मषः॥३२॥युवांवैब्रह्मणादिष्टौप्रजासर्गेय
दाततः॥संनियम्येंद्रियग्रामंतेपाथेपरमंतपः॥३३॥वर्षवातातपहिमघर्मकालगुणाननु॥सहमानौश्वासरोधविनिर्धूतमनोम
लौ॥३४॥शीर्णपर्णानिलाहारावुपशांतेनचेतसा॥मत्तःकामानभीप्संतौमदाराधनमीहतुः॥३५॥एवंवांतप्यतोस्तीव्रंतपःप
रमदुष्करं॥दिव्यवर्षसहस्राणिद्वादशेयुर्मदात्मनोः॥३६॥तदावांपरितुष्टोहममुनावपुषानघे॥तपसाश्रद्धयानित्यंभक्त्याचहृ
दिभावितः॥३७॥प्रादुरासंवरदराड्युवयोःकामदित्सया॥व्रियतांवरइत्युक्तेमादृशोवांवृतःसुतः॥३८॥अजुष्टग्राम्यविषया
वनपत्यौचदंपती॥नववाथेपवर्गंमेमोहितौदेवमायया॥३९॥ ॥श्रीरामकृष्णायनमः॥ ॥श्रीरामायनमः॥॥ राम:
२४

वंतौ॥३३॥३४॥३५॥तप्यतोःआचरतोः॥ईयुर्गतानि॥मदात्मनोःमच्चित्तयोः॥३६॥अमुनावपुषाप्रादुर्भूतोस्मि॥वरदराट्वरदेषुश्रेष्ठइत्यर्थः॥तेनसकृत्स्मरणेणचवारं
वारमाविर्भावेकारणमुक्तंमादृशोमयासदृशःसुतः॥कामस्यदित्सयादातुमिच्छया॥३७॥३८॥मेमत्तोपियुवांअपवर्गंनववाथेतेनव्रतवंतौ॥३९॥ ॥ ॥ ॥

वरं दत्वाम्नयि गते ॥४०॥४१॥ अदित्यां कश्यपाद्वामन आसमिति यत्तदपि तद्रूपयोर्युवयोरहमेव पुनरासमित्यर्थः ॥४२॥४३॥ प्राकृप्रथमं तावदेतद्रूपं मे जन्मेति स्मरणाय यत्नानायद
र्शितं ॥ मद्भावं मयि ब्रह्मणि ॥ अनंतरं त्वदिच्छया बालोऽपि भविष्यामीति भावः ॥४४॥ ननु त्वयि प्रसन्नेऽपि कमोक्षयोर्वयोः पुनः पुनर्जन्मेत्य तः परं न भविष्यतीत्याह ॥ युवामिति ॥४५॥४
६॥ यदि कंसाद्बिभेषि तर्हि मां गोकुलं नय यशोदायाश्च तां कन्यां मन्मायामानयेति प्रथममेव भगवतो वसुदेवो यदागंतुमैच्छत् तदैव अजापि या योगमाया सानंदजाय

गते मयि युवां लब्ध्वा वरं मत्सदृशं सुतं ॥ ग्राम्यान्भोगानभुंजाथां युवां प्राप्तमनोरथौ ॥४१॥ अदृष्ट्वान्यतमं लोके शीलौदार्यगुणैः स
मं ॥ अहं सुतो वामभवं पृश्निगर्भ इति श्रुतः ॥४२॥ तयोर्वां पुनरेवाहमदित्यामास कश्यपात् ॥ उपेंद्र इति विख्यातो वामनत्वाच्च वामनः ॥४
३॥ तृतीयेऽस्मिन्भवेऽहं वै तेनैव वपुषाथ वां ॥ जातो भूयस्तयोरेव सत्यं मे व्याहृतं सति ॥४३॥ एतद्वां दर्शितं रूपं प्राग्जन्मस्मरणाय मे ॥ नान्यथा स्म
मद्भवं ज्ञानं मर्त्यलिंगेन जायते ॥४४॥ युवां मां पुत्रभावेन ब्रह्मभावेन चासकृत् ॥ चिंतयंतौ कृतस्नेहौ यास्येथे मद्गतिं परां ॥४५॥ ॥ शुक
उ०॥ ॥ इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया ॥ पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः ॥४६॥ ततश्च शौरिर्भगवत्प्रचो
दितः सुतं समादाय स सूतिकागृहात् ॥ यदा बहिर्गंतुमियेष तर्ह्यजा या योगमायाऽजनि नंदजायया ॥४७॥ तया हृतप्रत्ययसर्ववृत्ति
षु द्वाःस्थेषु पौरेष्वपि शायितेष्वथ ॥ द्वारस्तु सर्वाः पिहिता दुरत्यया बृहत्कपाटायसकीलशृंखलैः ॥४८॥ ॥ ॥ ॥

यानिमित्तभूतया अजनि जाता ॥४७॥ हृताः प्रत्ययार्थाः सर्ववृत्तयो येषां ॥ अथवा हृताः प्रत्ययाः अन्याश्च सर्ववृत्तयो येषां जाग्रतामपि ॥ तथाभूतेषु द्वारपा
लेषु सत्सु ॥ बृहत्सु कपाटेषु लोहकीलकयुक्तशृंखलैः ॥ बृहद्भिः कपाटादिभिः दुरत्यया इति वा ॥४८॥ ॥ श्रीरामाकृष्णायनमः ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वमेव व्यवर्धत विवृता इत्यर्थः ॥ व्यक्रियंतेति वक्तव्ये गुणश्छांदसः ॥ रवेर्निमतात् ॥ ४८ ॥ गंभीरोरुतोयौघतस्य जवेन वेगेन ऊर्मयस्तैः फेनिलोफेनव्याप्ता ॥ भयानकैरावर्त्तैर्भ्रांतैर्व्याप्तापि ॥ श्रियः पतेः सीतापतेः ॥ ५० ॥ निद्रया अन्वया ॥ ५१ ॥ प्रतिमुच्य बध्वा ॥ पदोः पादयोः ॥ लोहं निगडं आस्लेस्म ॥ ५२ ॥ जातं किंचिदिति केवलं अबुध्यत न तु पुत्रः कन्या वेति ॥ यो

ताः रुत्वा वा देवसुदेव आगते स्वयं व्यवर्धत यथा तमो रवेः ॥ ववर्ष पर्जन्य उपांशु गर्जितः शेषोऽन्वगाद्वारि निवारयन्फणैः ॥ ४९ ॥ मघोनि वर्षत्यसकृद्यमानुजा गंभीरतोयौघजवोर्मिफेनिला ॥ भयानकावर्त्तशताकुला नदी मार्गं ददौ सिंधुरिव श्रियः पतेः ॥ ५० ॥ नंदव्रजं शौरिरुपेत्य तत्र तान्गोपान्प्रसुप्तानुपलभ्य निद्रया ॥ सुतं यशोदाशयने निधाय तत्सुतामुपादाय पुनर्गृहानगात् ॥ ५१ ॥ देवक्याः शयने न्यस्य वसुदेवोथ दारिकां ॥ प्रतिमुच्य पदोर्लोहमास्ते पूर्ववदावृतः ॥ ५२ ॥ यशोदा नंदपत्नी च जातं परमबुध्यत ॥ न तल्लिंगं परिश्रांता निद्रयापगतस्मृतिः ॥ ५३ ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे कृष्णजन्मनिरूपणं नाम तृतीयोध्यायः ॥ ॥ श्रीशुक उ० ॥ ॥ बहिरंतः पुरद्वारः सर्वाः पूर्ववदावृताः ॥ ततो बालध्वनिं श्रुत्वा गृहपालाः समुत्थिताः ॥ १ ॥ ते तु तूर्णमुपव्रज्य देवक्या गर्भजन्म तत् ॥ आचख्युर्भोजराजाय यदुद्विग्नः प्रतीक्षते ॥ २ ॥ स तल्पात्तूर्णमुत्थाय कालोयमिति विह्वलः ॥ सूतीगृहमगात्तूर्णं प्रस्खलन्मुक्तमूर्धजः ॥ ३ ॥ तमाह भ्रातरं देवी कृपणा करुणं सती ॥ स्नुषेयं तव कल्याण स्त्रियं मा हंतुमर्हसि ॥ ४ ॥ बहवो हिंसिता भ्रातः शिशवः पावकोपमाः ॥ त्वया दैवनिसृष्टेन पुत्रिकैका प्रदीयतां ॥ ५ ॥ नन्वहं ते ह्यवरजा दीना हतसुता प्रभो ॥ दातुमर्हसि मंदाया अंग मे मां चरमां प्रजां ॥ ६ ॥ ॥ ॥ गतनिद्रया च मोहितेति ॥ ५३ ॥ ॥ इति श्रीभागवते दशमस्कंधे तृतीयोध्यायः ॥ ३ ॥ ॥ चतुर्थे चंडिकावाक्यमाकर्ण्यातिभयाकुलः ॥ दुर्मंत्रिभिर्हितं मेने कंसो बालादिहिंसनं ॥ १ ॥ तदष्टमजन्म ॥ २ ॥ कालोयमत्र ॥ ३ ॥ ॥ ४ ॥ ॥ ५ ॥ अंग हे भ्रातः ॥ ६ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दानदानवत् दानादपि दानवत् भूतया ॥ पुत्रस्याऽन्यत्र नीतत्वात् ॥ स्वचयोगमायैवेति ज्ञातत्वात् ॥ याचितोपि आविछिदे आत्मस्पजमाह ॥७॥ अपोथयत् ॥ बलेन चिक्षेप
॥८॥ सद्य एव देवी भूत्वा ॥९॥ १०॥ ११॥ कृपणानिति ॥ अन्यान् शिशून् हनिष्यतीति तस्माद्वारयति ॥ पागंतरे मामां कृपणान्वृथाऽहिंसीः हिंसितवानसीति ॥ १२॥ बहुनामनिकेतेषु

॥श्रीशुक उ०॥ ॥उपगुह्यात्मजामेवं रुदंत्या दीनदीनवत् ॥ याचितस्तां विनिर्भर्त्स्य हस्तादाचिच्छिदे खलः ॥७॥ तां गृहीत्वा चरणयोर्जातमात्रां
स्वसुः सुतां ॥ अपोथयच्छिलापृष्ठे स्वार्थोन्मूलितसौहृदः ॥८॥ सा तद्धस्तात्समुत्पत्य सद्यो देव्यंबरं गता ॥ अदृश्यतानुजा विष्णोः सायु
धाष्टमहाभुजा ॥९॥ दिव्यस्रगंबरालेपरत्नाभरणभूषिता ॥ धनुःशूलेषुचर्मासिशंखचक्रगदाधरा ॥१०॥ सिद्धचारणगंधर्वैरप्स
रःकिंनरोरगैः ॥ उपाहृतोरुबलिभिः स्तूयमानेदमब्रवीत् ॥११॥ किं मया हतया मंद जातः खलु तवांतकृत् ॥ यत्र क्व वा पूर्वशत्रुर्मा हिं
सीः कृपणान्वृथा ॥१२॥ इति प्रभाष्य तं देवी माया भगवती भुवि ॥ बहुनामनिकेतेषु बहुनामा बभूव ह ॥१३॥ तयाऽभिहितमाक
र्ण्य कंसः परमविस्मितः ॥ देवकीं वसुदेवं च विमुच्य प्रश्रितोऽब्रवीत् ॥१४॥ अहो भगिन्यहो भाम मया वां बत पाप्मना ॥ पुरुषाद इवा
पत्यं बहवो हिंसिताः सुताः ॥१५॥ स त्वहं त्यक्तकारुण्यस्त्यक्तज्ञातिसुहृत्खलः ॥ कांल्लोकान्वै गमिष्यामि ब्रह्महेव मृतः श्वसन् ॥१६॥ दै
वमप्यनृतं वक्ति न मर्त्या एव केवलं ॥ यद्विस्रंभादहं पापः स्वसुर्निहतवाञ्छिशून् ॥१७॥ मा शोचतं महाभागावात्मजान्स्वकृ
तंभुजः ॥ जंतवो न सदैकत्र दैवाधीनास्तदासते ॥१८॥ ॥

॥१३॥ परमविस्मितः कथं देव्या वाग्भवनाज्जातेति ॥१४॥ भाम हे भगिनीभर्तः ॥ पुरुषादो राक्षसो यथा स्वापत्यमेव हिनस्ति तद्वत् ॥१५॥ १६॥ १७॥ हे महाभागौ ॥ स्वकृतंभुजः
स्वारब्धकर्मभोक्तॄन् ॥ किंच ॥ जंतवः प्राणिनः सदा नासते ॥ किंतु अल्पकालमेव ॥ तदापि एकत्र नासते किंतु वियुज्यंते ॥ यतो दैवाधीनाः ॥१८॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ पू॰
२६

सदानासत इत्यन्येन यदुक्तं जन्ममरणादि तदपि देहानामेव नात्मन इत्याह ॥ भुवीति ॥ भूतानि देहा एव यांति अपयांति च भवंति न भवंति चेदित्यर्थः ॥ यथा भुवि नैमानि
घटादीनि तद्वत् ॥ एतेषु भूतेषु जन्मादिभिर्विक्रियमाणेषु अयमात्मा परोक्षतया प्रत्यभिज्ञायमानो न विपर्येति विपर्ययं न प्राप्नोति ॥ एकरूप एव वर्त्तत इत्यर्थः ॥ भौ-
मेषु विक्रियमाणेषु यथा भूस्तथेति ॥ १९ ॥ एवं विचार्यमाणे सति न शोकाद्यवकाश इत्याह ॥ अज्ञानतस्तु न निर्वृत्तिरित्याह ॥ यथेति यथायथावत् ॥ अनेवंविदः
एवमजानतः आत्मविपर्ययः देहात्मबुद्धिर्न निवर्तते ॥ यतो विपर्ययाद्देहो भवति देहाहंकारेण ह्यात्मनि परिच्छिन्ने सति इदंकारास्पदं भिन्नं भवति ॥ यतो भे-
भुवि नैमानि भूतानि यथा यांत्यपयांति च ॥ नायमात्मा तथैतेषु विपर्येति यथैव भूः ॥ १९ ॥ यथानेवंविदो भेदो यत आत्मविपर्ययः ॥ देहयोगवियो-
गौ च संसृतिर्न निवर्त्तते ॥ २० ॥ तस्माद्भद्रे स्वतनयान्मया व्यापादितानपि ॥ मानुशोच यतः सर्वः स्वकृतं विंदतेऽवशः ॥ २१ ॥ यावद्धतोऽस्मि हंतास्मी-
त्यात्मानं मन्यतेऽस्वदृक् ॥ तावत्तदभिमान्यज्ञो बाध्यबाधकतामियात् ॥ २२ ॥ क्षमध्वं मम दौरात्म्यं साधवो दीनवत्सलाः ॥ इत्युक्त्वाश्रुमुखः पा-
दौ नृपालः स्वस्रोरथाग्रहीत् ॥ २३ ॥ ॥ ॥ देहात्मत्वादिदेहैर्योगश्च वियोगश्च ॥ ततः संसृतिः सुखदुःखे इति यावदज्ञानं न निवर्त्तत इत्यर्थः ॥ २० ॥ एवमुक्त-
प्रकारेण न ते तव तनयाः अहं तु तान्न घातितवान् ॥ यद्यपि अज्ञानदृष्ट्या स्वतनयान्मया व्यापादितानपि मानुशोचेति स्वांतयति ॥ तस्मादिति ॥ अज्ञानाश्रयति-
मेव कर्मवादमाह ॥ यत इति ॥ २१ ॥ कथं तर्हि ब्राह्मणादिदेहेषु हंतृत्वस्य च पापस्य श्रवणं अज्ञानमूलमेवाह ॥ यावदिति ॥ अस्वदृक् देहाभिमानी ॥ तदभिमानी
तस्य देहस्य हननमात्मनि अभिमन्यमान इत्यर्थः ॥ २२ ॥ नृपालः कंसः ॥ स्वस्रोरिति स्वसृशब्देन द्विवचनान्तेन पत्न्या मिथुनेन दारा मिथुनलक्षणया स्वसृतत्पत्योरभिधा-
नं ॥ लिंगसमवायेन प्राणानत उपदधातीतिवत् ॥ देवकीवसुदेवयोः प्रत्येकं पादमग्रहीदित्यर्थः ॥ नृपालशब्देन वा कथंचिद्वसुदेवाभिधानं ॥ २३ ॥ ॥

राम:
२६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मसौहृदं प्रियवादिना दर्शयन् ॥२४॥२५॥२६॥ स्वपरभेददर्शने किं भवति तदाह ॥ शोकहर्षेति ॥ भावैः देवनिमित्तभूतैर्मिथो घ्नन्तं पृथक् दृशात्मानं परं पृथक् दृशास्तेन ॥
परपति किं त्वहमेव हंता ततश्चेति मन्यंतरन्त्यर्थः ॥ २७॥ विशुद्धं यथा भवति ॥ २८॥२९॥ नातिकोविदाः दृष्टमात्रमतयः न दीर्घदर्शिनः ॥ ३०॥ न निर्गता ॥

मोचयामास निगडाद्विश्रब्धः कन्यकागिरा ॥ देवकीं वसुदेवं च दर्शयन्नात्मसौहृदं ॥२४॥ भ्रातुः समनुतप्तस्य क्षांतरोषं च देवकी ॥ व्यसृजद्व-
सुदेवश्च प्रहस्य तमुवाच ह ॥२५॥ वसुदेव उवाच ॥ ॥ एवमेतन्महाभाग यथा वदसि देहिनां ॥ अज्ञानप्रभवाहंधीः स्वपरेति भिदा यतः ॥
२६॥ शोकहर्षभयद्वेषलोभमोहमदान्विताः ॥ मिथो घ्नंतं न पश्यंति भावैर्भावं पृथग्दृशः ॥ २७ ॥ ॥ श्रीशुक उवाच ॥ ॥ कंस एवं प्रस-
न्नाभ्यां विशुद्धं प्रतिभाषितः ॥ देवकीवसुदेवाभ्यामनुज्ञातो विशद्गृहं ॥२८॥ तस्यां रात्र्यां व्यतीतायां कंस आहूय मंत्रिणः ॥ तेभ्य आ-
चष्ट तत्सर्वं यदुक्तं योगनिद्रया ॥२९॥ आकर्ण्य भर्तुर्गदितं तमूचुर्देवशत्रवः ॥ देवान्प्रति कृतामर्षा दैतेया नातिकोविदाः ॥३०॥ ॥
दैत्या ऊचुः ॥ ॥ एवं चेत्तर्हि भोजेंद्र पुरग्रामव्रजादिषु ॥ अनिर्दशान्निर्दशांश्च हनिष्यामोद्य वै शिशून् ॥३१॥ किमुद्यमैः करिष्यंति दे-
वाः समरभीरवः ॥ नित्यमुद्विग्नमनसो ज्याघोषैर्धनुषस्तव ॥३२॥ अस्यतस्ते शरव्रातैर्हन्यमानाः समंततः ॥ जिजीविषव उ-
त्सृज्य पलायनपरा ययुः ॥३३॥ केचित्प्रांजलयो दीना न्यस्तशस्त्रा दिवौकसः ॥ मुक्तकच्छशिखाः केचिद्भीताः स्म इति वादिनः ॥
॥३४॥ न त्वं विस्मृतशस्त्रास्त्रान्विरथान्भयसंवृतान् ॥ हंस्यन्यासक्तविमुखान्भग्नचापानयुध्यत ॥३५॥ ॥ श्रीरामः ॥ ॥

निर्दशादिना निर्येषां तान् अन्यांश्च ॥३१॥ ॥३२॥ अस्यतः विध्यतः सतः ॥ उत्सृज्य शरणांत्यक्त्वा ॥३३॥ ॥३४॥ ॥अन्यासक्तान्
विमुखांश्चेति ॥ न हंसि न हिनस्सि ॥३५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षेमे निर्भयदेशे शूरैः ॥ असंयुगा युद्धरहितस्तत्र विकत्थनैः प्रौढिवादो येषां तैः ॥ ननु हरे विष्णोर्मित्रं नो भवेदिति चेत्तत्राहुः ॥ रहोजुषेति ॥ सर्वस्याप्यंतः प्रविष्टेन क्वचिदपि बहिरदृष्टेनेत्यर्थः ॥ पुरुषस्य
वैराग्यदर्शितमिल्लाहतव नमोकोपस्यते नशंभुनावा ॥ ३६ ॥ यद्यप्युद्यमैर्देवानकिंचिदपि कर्तुं समर्थास्तथापि नो तिरनुसरणीया वेत्याहुः ॥ तथापीति ॥ ३७ ॥ रूढपदः बद्धमूलः ॥ ३८

यु किं क्षेमशूरैर्विबुधैरसंयुगविकत्थनैः ॥ रहोजुषा किं हरिणा शंभुना वा वनौकसा ॥ किमिंद्रेणाल्पवीर्येण ब्रह्मणा वा तपस्यता ॥ ३६ ॥ तथापि
देवाः सापत्न्यान्नोपेक्ष्या इति मन्महे ॥ ततस्तन्मूलखनने नियुंक्ष्वास्माननुव्रतान् ॥ ३७ ॥ यथामयोंऽगे समुपेक्षितो नृभिर्न शक्यते रू
ढपदश्चिकित्सितुं ॥ यथेंद्रियग्राम उपेक्षितस्तथा रिपुर्महान्बद्धबलो न चाल्यते ॥ ३८ ॥ मूलं हि विष्णुर्देवानां यत्र धर्मः सनातनः ॥ तस्य
च ब्रह्मगोविप्रास्तपो यज्ञाः सदक्षिणाः ॥ ३९ ॥ तस्मात्सर्वात्मना राजन्ब्राह्मणान्ब्रह्मवादिनः ॥ तपस्विनो यज्ञशीलान्गाश्च हन्मो
हविर्दुघाः ॥ ४० ॥ विप्रा गावश्च वेदाश्च तपः सत्यं दमः शमः ॥ श्रद्धा दया तितिक्षा च क्रतवश्च हरेस्तनूः ॥ ४१ ॥ स हि सर्वसुराध्यक्षो ह्यसु
रद्विड्गुहाशयः ॥ तन्मूला देवताः सर्वाः सेश्वराः सचतुर्मुखाः ॥ ४२ ॥ अयं वै तद्वधोपायो यदृषीणां विहिंसनं ॥ ॥ श्रीशुक उ० ॥ ॥ एवं
दुर्मंत्रिभिः कंसः सह संमंत्र्य दुर्मतिः ॥ ब्रह्महिंसां हितं मेने कालपाशावृतोऽसुरः ॥ ४३ ॥ संदिश्य साधुलोकस्य कदने कदनप्रियान् ॥ कामरू
पधरान्दिक्षु दानवान्गृहमाविशत् ॥ ४४ ॥ ते वै रजःप्रकृतयस्तमसा मूढचेतसः ॥ सतां विद्वेषमाचेरुरारादागतमृत्यवः ॥ ४५ ॥ आयुः
श्रियं यशो धर्मं लोकानाशिष एव च ॥ हंति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः ॥ ४६ ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे चतुर्थोऽध्या
यः ॥ ४ ॥

देवानां मूलं विष्णुः ॥ स च यत्र धर्मस्तत्रास्ते ॥ धर्मस्य मूलं वेदादय इति ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ किंच विप्रादयो हरेरेव तनवो यस्मात्तस्मादयमेवोपाय इत्याहुः ॥ अयमिति
४३ ॥ ४४ ॥ आरात्समीपमागतो मृत्युर्येषां ते ॥ ४५ ॥ सतां विद्वेषो न मत्कमात्र हेतुः किंतु बहुनर्थकारीत्याह ॥ आयुः श्रियमिति ॥ ४६ ॥ ॥ इति भा० दशमे टी० चतुर्थोऽध्यायः ॥ ४ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचमे जातकं नंदः सूनोः कृत्वा महोत्सवं ॥ गत्वाथ मथुरां प्राप वसुदेवागमोत्सवं ॥ महामना उदारचित्तः ॥१॥२॥ नियुते द्वे लक्षे सप्ततिलपर्वतांश्च प्रादात् ॥ कथंभूतान्
रत्नौघैः रत्नसमूहैः शातकौंभांबरैः सुवर्णरसाक्तैरंबरैश्चावृतान् ॥ द्रव्याणां गोहिरण्यादीनां मध्ये केषांचिद्दानैरेव शुद्धिरिति दर्शयितुं प्रतिनियतानि शोधकानि दर्शयं-
स्तेनोदाहरति ॥ कालेनेति ॥ कालेन भूम्यादि ॥ स्नानेन देहादि ॥ शौचेन अमेध्यलिप्तादि ॥ संस्कारैर्गर्भादि ॥ तपसा इंद्रियादि ॥ इज्यया ब्राह्मणादि ॥ दानेन द्रव्याणि ॥ संतुष्ट्या म-

॥ श्रीशुक उवाच ॥ ॥ नंदस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः ॥ आहूय विप्रान् वेदज्ञान् स्नातः शुचिरलंकृतः ॥१॥
वाचयित्वा स्वस्त्ययनं जातकर्मात्मजस्य वै ॥ कारयामास विधिवत् पितृदेवार्चनं तथा ॥२॥ धेनूनां नियुते प्रादात् वि-
प्रेभ्यः समलंकृते ॥ तिलाद्रीन् सप्त रत्नौघशातकौंभांबरावृतान् ॥ कालेन स्नानशौचाभ्यां संस्कारैस्तपसेज्यया
॥ शुध्यंति दानैः संतुष्ट्या द्रव्याण्यात्मात्मविद्यया ॥४॥ सौमंगल्यगिरो विप्राः सूतमागधवंदिनः ॥ गायकाश्च जगुर्ने-
दुर्भेर्यो दुंदुभयो मुहुः ॥५॥ व्रजः संमृष्टसंसिक्तद्वाराजिरगृहांतरः ॥ चित्रध्वजपताकास्रक्चैलपल्लवतोरणैः ॥६॥ गा
वो वृषा वत्सतरा हरिद्रातैलरूषिताः ॥ चित्रधातुबर्हस्रग्वस्त्रकांचनमालिनः ॥७॥ ॥ श्रीरामाय नमः ॥ ॥

नः ॥ आत्मा आत्मविद्ययेति ॥४॥ सौमंगल्यगिरः स्वस्तिवाचका विप्रादयो बभूवुः ॥ तत्र सूताः पौराणिकाः मागधा वंशशंसकाः बंदिनस्त्वमलप्रज्ञाः प्रस्तावसदृशो-
क्तयः ॥५॥ संमृष्टानि संसिक्तानि च द्वाराणि अजिराणि अंगणानि गृहांतराणि गृहमध्यानि च यस्मिन् स तथा ॥ चित्रध्वजेषु पताकानां स्रजां चैलपल्लवतोरणानि च
तैर्भूषितः ॥६॥ हरिद्रातैलरूषिता लिप्ताः ॥ विचित्रा धातवश्च बर्हस्रजश्च वस्त्राणि च कांचनमालाश्चालंकारतया विद्यंते येषां ते तथाभूता गावादयो बभूवुरित्यर्थः
॥७॥

महा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आकल्पा अलंकाराः ॥९॥ नवकुंकुमकिंजल्कैर्मुखपंकजेषु भूतिः श्यार्या सांताः ॥१०॥ सुमुक्ष्मनिउज्वलिता निमणिमयानि कुंडलानि यासां निष्कापदकानि कंठेषु या
सांतास्ताश्च ॥ अशिखाभ्यः च्युता निर्माल्यवर्षाणि यासां ताः ॥ नंदालयं व्रजतीः व्रजंत्यः पथि विरेजुः ॥ सवलयाः कंकणभूषिताः ॥ व्यालोलैः कुंडलादिभिः शोभनाया

महार्हवस्त्राभरणकंचुकोष्णीषभूषिताः ॥ गोपाः समाययू राजन्नानोपायनपाणयः ॥८॥ गोप्यश्चाकर्ण्य मुदिता यशोदायाः सुतोद्भवं ॥ आत्म
नं भूषयांचक्रु वस्त्राकल्पांजनादिभिः ॥९॥ नवकुंकुमकिंजल्कमुखपंकजभूतयः ॥ बलिभिस्त्वरितं जग्मुः पृथुश्रोण्यश्चलत्कुचाः ॥१०॥
गोप्यः सुमृष्टमणिकुंडलनिष्ककंठ्यश्चित्रांबराः पथि शिखाच्युतमाल्यवर्षाः ॥ नंदालयं सवलया व्रजतीर्विरेजुर्व्यालोलकुंडलपयोध
रहारशोभाः ॥११॥ ता आशिषः प्रयुंजानाश्चिरं पाहीति बालके ॥ हरिद्राचूर्णतैलाद्भिः सिंचंत्योजनमुज्जगुः ॥१२॥ अवाद्यंत विचित्रा
णि वादित्राणि महोत्सवे ॥ कृष्णे विश्वेश्वरे ... नंते नंदस्य व्रजमागते ॥१३॥ गोपाः परस्परं हृष्टाः दधिक्षीरघृतांबुभिः ॥ आसिंचं
तो विलिंपंतो नवनीतैश्च चिक्षिपुः ॥१४॥ नंदो महामनास्तेभ्यो वासोलंकारगोधनं ॥ सूतमागधवंदिभ्यो येन्ये विद्योपजीविनः ॥१५॥
तैस्तैः कामैरदीनात्मा यथोचितमपूजयत् ॥ विष्णोराराधनार्थाय स्वपुत्रस्योदयाय च ॥१६॥ रोहिणी च महाभागा नंदगोपाभिनंदि
ता ॥ विचरद्दिव्यवा...सः स्रक्कंठाभरणभूषिता ॥१७॥ तत आरभ्य नंदस्य व्रजः सर्वसमृद्धिमान् ॥ हरेर्निवासात्मगुणै रमाक्रीडम
भून्नृप ॥१८॥ गोपान् गोकुलरक्षायां निरूप्य मथुरां गतः ॥ नंदः कंसस्य वार्षिक्यं करं दातुं कुरूद्वह ॥१९॥ ॥ ॥ ॥ 

सांता ॥११॥ जनं समचिंत्य ॥ अजनमुज्जगुरिति वा ॥१२॥१३॥१४॥ तेभ्यः गोपेभ्यः प्रादात् ॥१५॥ यथोचितमन्यानपि अपूजयत् ॥१६॥१७॥ हरेर्निवासेन ये आ
त्मनि गुणाः सर्वप्रियत्वादयस्तैः रमाया आक्रीडं विहारस्थानं ॥१८॥ वार्षिक्यं प्रतिवर्षदेयं ॥१९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्रातरं स्मरतारेयं ॥ तद्दवमोचनं तस्यानंदस्य वसतिस्थानं ॥२०॥२१॥ पुनर्नवः पुनर्नूतनत्व ॥ तत्र हेतुगर्भं विशेषणं ॥ संसारकं चक्रे वर्त्तमान इति ॥२४॥ दुर्लभत्वमेवाह ॥ नै
कत्रैति ॥ प्रियस्यासौ संवासश्च प्रियसंवासः ॥ हे प्रियेति वा ॥ स्त्रोतस ओघेनोह्यमानानां प्लवानां तिप्लवाः तृणकाष्ठादयस्तेषां यथा एकत्र स्थितिर्नास्ति तद्वत् ॥२५॥ क
च्चिदिति पश्वादिरूपे तस्मिन्वने निर्दोषगो पयोदध्यादिप्रभूतगोपिकास्ता न्यादिनापुत्र स्नेमविव त्वया पृच्छति ॥ प्रसक्तधीः स्वात्मजयोरित्फक्कत्वात् ॥२६॥ नवब्दा

वसुदेव उपश्रुत्य भ्रातरं नंदमागतं ॥ ज्ञात्वा दत्तकरं राज्ञे ययौ तदवमोचनं ॥२०॥ तं दृष्ट्वा सहसोत्थाय देहः प्राणमिवागतं ॥ प्रीतः प्रियतमं दो
र्भ्यां सस्वजे प्रेमविह्वलः ॥२१॥ पूजितः सुखमासीनः पृष्ट्वाऽनामयमादृतः ॥ प्रसक्तधीः स्वात्मजयोरिदमाह विशांपते ॥२२॥ वसुदेव उ
वाच ॥ दिष्ट्या भ्रातः प्रवयस इदानीमप्रजस्य ते ॥ प्रजाशाया निवृत्तस्य प्रजा यत्समपद्यत ॥२३॥ दिष्ट्या संसारचक्रेऽस्मिन्वर्त्तमानः पुनर्भवः ॥
उपलब्धो भवानद्य दुर्लभं प्रियदर्शनं ॥२४॥ नैकत्र प्रियसंवासः सुहृदां चित्रकर्मणां ॥ ओघेन व्यूह्यमानानां प्लवानां स्त्रोतसो यथा ॥२५॥
कच्चित्पशव्यं निरुजं भूर्यंबुतृणवीरुधं ॥ बृहद्वनं तदधुना यत्रास्से त्वं सुहृद्वृतः ॥२६॥ भ्रातर्मम सुतः कच्चिन्मात्रा सह भवद्व्रजे ॥ तातं
मन्वानो भवद्भ्यां उपलालितः ॥२७॥ पुंसस्त्रिवर्गो विहितः सुहृदो ह्यनुभावितः ॥ न तेषु क्लिश्यमानेषु त्रिवर्गोऽर्थाय कल्पते ॥२८॥ नंद उ
वाच ॥ ॥ अहो ते देव[illegible]कापुत्राः कंसेन बहवो हताः ॥ एकावशिष्टावरजा कन्या सापि दिवं गता ॥२९॥ ॥ ॥ ॥

मुपलालितः सुतः का ॥ कच्चिद्वर्त्तत इति शेषः ॥२७॥ पुत्रादर्शनक्लेशनाह ॥ पुंस इति ॥ सुहृदो बंधून्प्रत्यनुभावितः ॥ संपादितो यस्त्रिवर्गः स हि पुंसो विहितः युक्तः शास्त्रे
पावाप्रोक्तः ॥ न स्वमात्रपर्यवसितः ॥ अतस्तेषु क्लिश्यमानेषु सुखायन भवतात्यर्थः ॥२८॥ नंदो वसुदेवं सांत्वन्नाह ॥ अहो इति ॥२९॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०टी० अदृष्ट एव निष्ठा समाप्तिर्यस्य सः॥ यद्दैवपुत्रादिसुखप्रदं अदृष्टं हीयते तद्दैवं तेपुत्रादयोन नवंतामित्यर्थः॥ अदृष्टपरमः तथा अदृष्टमेव परमं यस्य सः॥ यद्यपि पुत्रादयो
१९ वियुक्तास्तथापि तानदृष्टमेव पुनः संगमयतीत्यर्थः॥ एवमदृष्टमात्मनस्तत्त्वं अव्यभिचारिकारणं सुखदुःखयोर्यो वेद स न मुह्यति॥ ३०॥ तस्मादिदानीं त्वया न दुः
खं भावनीयं॥ मृतानामपि वियुक्तानामपि च कालांतरे दर्शनयोगयोः संभवात् अस्मादादिभिरपि कालांतरे तद्वियोगसत्त्यपि तिनंदस्य दैवावगोषा नाविसूचि
का॥ तां बुध्वा वसुदेवो दुःखं त्यक्त्वा नंदमाह॥ करो वैवरति॥ वःयुष्माभिः॥ ३१॥ अनोभिः शाकटैः॥ ३२॥ ॥इति श्रीभागवते महापुराणे दशमस्कंधे टीकायां पंच

नूनं ह्यदृष्टनिष्ठोयमदृष्टपरमो जनः॥ अदृष्टमात्मनस्तत्त्वं यो वेद स न मुह्यति॥ ३०॥ वसुदेव उ०॥ ॥करो वै वार्षिको दत्तो राज्ञे दृष्टा वयं [illegible] वैचे॥
नेह स्थेयं बहुतिथं संत्युत्पाताश्च गोकुले॥ ३१॥ श्रीशुक उ०॥ ॥इति नंदादयो गोपाः प्रोक्तास्ते शौरिणा ययुः॥ अनोभिरनडुद्युक्तैस्तम
नुज्ञाप्य गोकुलं॥ ३२॥ ॥इति श्रीभागवते महापुराणे दशमस्कंधे वसुदेवसंगमो नाम पंचमोऽध्यायः॥ ५॥ श्रीशुक उ०॥ ॥नंदः पथि
वचः शौरेर्न मृषेति विचिंतयन्॥ हरिं जगाम शरणमुत्पातागमशंकितः॥ १॥ कंसेन प्रहिता घोरा पूतना बालघातिनी॥ शिशूंश्चचा
रनिघ्नंती पुरग्रामव्रजादिषु॥ २॥ न यत्र श्रवणादीनि रक्षोघ्नानि स्वकर्मसु॥ कुर्वंति सात्वतां भर्तुर्यातुधान्यश्च तत्र हि॥ ३॥ सा खे
८ चर्येकदोपेत्य पूतना नंदगोकुलं॥ योषित्वा माययात्मानं प्राविशत्कामचारिणी॥ ४॥ ॥ ॥मोऽध्यायः॥ ५॥ ॥षष्ठेस्तखुर्गिरा नंदो ब्रजं ग रामः
छन्मनां पथि॥ दृष्ट्वा तु राक्षसीं तस्या मृत्यं कृत्वा च विस्मितः॥ १॥ श्रीकृष्णविषये शंकमानं राजानं प्रति अविषये प्रहृत्ता सैवमरिष्यतीति सूचयन्नाह॥ नयत्रे १९
ति॥ यत्र श्रीकृष्णस्य श्रवणादीनि न संति तत्रैव तासां शक्तिः॥ सा त्वत्र स्मिन्नेव सति का शंकेति भाव॥ ३॥ योषित्वा वेषतो भूत्वा नारीमिव आत्मानं विधाय॥
ननु निर्लज्जा निर्विशंका च सतीकथं प्रसयं प्रविष्टा अत आह॥ कामचारिणीति॥ न हि कामचारिण्या दुश्चिंत्यमित्यर्थः॥ ४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तांवनितांपतिंद्रष्टुं आगतां अतिरूपवतीं श्रियमिव गोप्योऽमंसतेत्युत्तरश्लोकेनान्वयः॥ श्रीसामान्यानि विशेषणानि॥ केशबंधव्यतिषक्तमल्लिकां धम्मिल्लसंसक्तमल्लि
काकुसुमां॥ बृहता नितंबेन स्तनाभ्यां च उन्नयंतं आक्रांतमिव कृशं मध्यमुदरं यस्याः तां॥ सुवाससं रमणीये वाससी यस्यास्तां॥ कंपितयोः कर्णभूषणयोः त्वि
षा उल्लसद्भिः कुंतलैर्मंडितमाननं यस्यास्तां॥५॥ वल्गुस्मितापांगविसर्गवीक्षितैः वल्गुरम्यं स्मितं येषु तैस्तथाभूता अपांगविसर्गा येषु तैर्वीक्षितैर्व्रजौकसां
मनो हरंतीं॥ अतो गोपा कृतमनस्त्वेन तां॥ न निवारितवंत इत्युक्तं भवति॥ गोप्यश्च श्रियमिव मत्वा तूष्णीं आसन्॥ अतः केनाप्यनिवारिता सती प्रविवेशे

तां केशबंधव्यतिषक्तमल्लिकां बृहन्नितंबस्तनकृच्छ्रमध्यमां॥ सुवाससं कंपितकर्णभूषणत्विषोल्लसत्कुंतलभूषिताननां॥५॥ वल्गु
स्मितापांगविसर्गवीक्षितैर्मनो हरंतीं वनितां व्रजौकसां॥ अमंसतांभोजकरेण रूपिणीं गोप्यः श्रियं द्रष्टुमिवागतां पतिं॥६॥ बा
लग्रहस्तत्र विचिन्वती शिशून् यदृच्छया नंदगृहेऽसदंतकं॥ बालं प्रतिच्छन्ननिजोरुतेजसं ददर्श तल्पेऽग्निमिवाहितं भसि॥७॥ ति
विबुध्य तां बालकमारिकाग्रहं चराचरात्मा स निमीलितेक्षणः॥ अनंतमारोपयदंकमंतकं यथोरगं सुप्तमबुद्धिरज्जुधीः॥८॥ ॥

ति भावः॥६॥ बालग्रहः॥ पूतना॥ असदंतकं बालं ददर्श॥ असतामंतकं दृष्ट्वा कार्यं न विनेमितत्राह॥ प्रतिच्छिन्ननिजोरुतेजसं तैः संबालनाद्यं न प्रति
छन्नं तिरस्कृतं निजं उरु तेजो येन तं॥ कमिव भस्मन्याहितमग्निमिवेति॥७॥ चराचरात्मत्वा देवतां विबुध्य निमीलितेक्षण आसीत् स्वयमनंतं उष्टना
मंतकं सां कमारोपयत्॥ बालं त्वा॥ यथोरगं सुप्तमबुद्धिश्चासौ रज्जुधीश्च सः आज्ञातो रज्जुबुध्या गृह्णाति यथा तद्वदिति॥८॥ ॥श्रीरामः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० द० पू० नतु यत्नोदारो हि एषोतां कथं नन्यवारयतां तत्राह ॥ तामिति ॥ वामं वलु जननन्यारव चेष्टितं यस्यास्तां वरस्त्रियं चमसउसैव अंतरागउ मध्ये वाह्य अंतस्ते ह्यो व हिर्मार्ई वेचद
२० शंतः ॥ कोशपरिछदासिवत् ॥ मृदु चित्रचर्म्ममयः कोशः परिछदः आवरणं यस्य असेः खड्ग उस्य तद्वत् ॥ तन्वनयाच धर्षिते अभिभूते अहमस्य जननी इयं वेति मोहि
ते च सत्यो जननी जनन्यो निरीक्ष्यमाणे एकके वलमतिष्टतां न तु निवारितवत्यो ॥ ९ ॥ तस्मिन्स्थाने दुर्न्निवार्यं विषं यस्मिन् तं स्तनं ॥ तं श्रीकृष्णं अंकमादाय तस्मै

तां ता [illegible] क्ष्या चिन्नामतिवामचेष्टितां वा नृपांतराकोशपरिछदासिवत् ॥ वरस्त्रियं तत्वनयाचधर्षिते निरीक्ष्यमाणे जननी अतिष्टतां ॥ ९ ॥ त
स्मिंस्तनं दुर्ज्जरवीर्यमुल्वणं घोरांकमादाय शिशोर्ददावथ ॥ गाढं कराभ्यां भगवान् प्रपीड्य तत्प्राणैः समं रोषसमन्वितोऽपिबत् ॥ १० ॥ सा मुंच मुं
वि चालमिति प्रभाषिणी निपीड्यमाना खिलजीवमर्मणि विवृत्य नेत्रे चरणौ भुजौ मु [illegible] र्निःस्विन्नगात्रा क्षिपती रुरोद ह ॥ ११ ॥ तस्याः स्वनेना
तिगभीररंहसा साद्रिर्मही द्यौश्च चाल सग्रहाः ॥ रसा दिशश्च प्रतिनेदिरे जनाः पेतुः क्षितौ वज्रनिपातशंकया ॥ १२ ॥ निशाचरीत्थं व्यथितस्त
नाव्यसुर्व्यादाय केशांश्चरणौ भुजावपि ॥ प्रसार्य गोष्ठे निजरूपमास्थिता वज्राहतो वृत्र इवापतन्नृप ॥ १३ ॥ पतमानोपि तद्देहस्त्रिगव्यूत्यंतरद्रुमान्
॥ चूर्णयामास राजेन्द्र महदासीत्तदद्भुतं ॥ १४ ॥ ॥ त्रिगव्यूतिं ॥ अथ अनंतरमेवाप्रपीड्य केवलं विषमपथ्यामिति मत्वेव च तस्याः प्राणैः सहापिबत् ॥ १० ॥ चरणौ भुजौ रामः २०
जौ च मुहुर्मुहुः क्षिपंती ॥ निःस्विन्नानि स्वेदयुक्तानि गात्राणि यस्याः सा ॥ ११ ॥ रसा रसातलानि च ॥ १२ ॥ व्यादाय मुखं विवृत्य निजरूपं आस्थिता मरणसमये क २०
पटमयुक्तमिति वा ॥ १३ ॥ पतन्नपि तस्मा देहः षट्क्रोशमध्यवर्त्तिनो द्रुमांश्चूर्णाचकार ॥ १४ ॥ ॥

ईषामात्रोग्रदंष्ट्रास्यं ईषालांगलदंडः तत्प्रमाणा उग्रा दंष्ट्रा यस्मिन् तन्नयानतमास्यं यस्मिन् तत् तस्याः कलेवरं वीक्ष्य गोपा गोप्यश्च तत्रसुः संत्रासहेतुत्वेन पुनरष्टभिः प
देः विशिनष्टि ॥ गिरिकंदरवन्नासिके यस्मिन् तत् ॥ गिरेः च्युतोस्थूलोपलो ताविव स्तनौ यस्मिन् तत् ॥ रौद्रं घोरं ॥ प्रकीर्णा अरुणा मूर्धजा यस्मिन् तत् ॥१५॥ अं
धकूपाविव गंभीरे नेत्रे यस्मिन् तत् ॥ पुलिनवदारोहौ जघने ताभ्यां भीषणं ॥ बद्धाः सेतव इव भुजौ उरू अंघ्री च यस्मिन् तत् ॥ शून्यतोयह्रद इव उदरं यस्मि
न् तदिति ॥१६॥ पूर्वमेव तस्याः शब्देन जाताः पुनर्दर्शनेन नातित्रसुरित्याह ॥ पूर्वं त्विति ॥ तस्या निस्वनितं शब्दस्तेन निर्भिन्नानि हृत्कर्णमस्तकानि येषां

ईषामात्रोग्रदं[ष्ट्रा]स्यं गिरिकंदरनासिकं ॥ गंडशैलस्तनं रौद्रं प्रकीर्णारुणमूर्धजं ॥१५॥ अंधकूपगभीराक्षं पुलिनारोहभीषणं ॥ बद्धसेतु
भुजोर्वंघ्रि शून्यतोयह्रदोदरं ॥१६॥ संतत्रसुः स्म तद्वीक्ष्य गोपा गोप्यः कलेवरं ॥ पूर्वं तु तन्निःस्वनितभिन्नहृत्कर्णमस्तकाः ॥१७॥ बा
लं च तस्या उरसि क्रीडंतमकुतोभयं ॥ गोप्यस्तूर्णं समभ्येत्य जगृहुर्जातसंभ्रमाः ॥१८॥ यशोदारोहिणीभ्यां ताः समं बालस्य सर्वतः
॥ रक्षां विदधिरे सम्यग्गोपुच्छभ्रमणादिभिः ॥१९॥ गोमूत्रेण स्नापयित्वा पुनर्गोरजसार्भकं ॥ रक्षां चक्रुश्च शकृता द्वादशांगे
षु नामभिः ॥२०॥ गोप्यः संस्पृष्टसलिला अंगेषु करयोः पृथक् ॥ न्यस्यात्मन्यथ बीजंन्यासमकुर्वत ॥२१॥ अव्यादजोंघ्रिमणि बालस्य
टं मांस्तव जान्वथोरू यज्ञोऽच्युतः कटितटं जठरं हयास्यः ॥ हृत्केशवस्त्वदुर ईश इनस्तु कंठं विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कं ॥२२॥

ते ॥१७॥१८॥१९॥ द्वादशांगेषु ललाटादिषु केशवादिद्वादशनामभिः ॥२०॥ अनाचांता एव प्रथममतिसंभ्रमेणैवं रक्षां कृत्वा किंचित् लब्धाश्वासाः पुनस्तात्पर्येण बी
जन्यासमकुर्वतेत्याह ॥ गोप्य इति ॥ संस्पृष्टसलिलाः आचांताः ॥ आत्मनि प्रथममंगेषु करयोश्च पृथक् ॥ अजादिकादशबीजानां मध्ये करशुद्धौ त्राणि करयो
ः संधिषु चत्वारि चत्वारि तथा ॥ अघ्र्यादावेकैकस्मिन्नंगे अजादिकैकं बीजं न्यस्य बालस्याप्यंगेषु तथैवाकुर्वत ॥२१॥ अंघ्री जानुनी जानुनी भुजं भुजौ ॥ कं शिर
॥२२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द० टीपू०
२१

तथादिक्षुरक्षामकुर्वन्नित्याह॥ चक्र्यग्रत इति॥ चक्रसहितो हरिस्त्वाग्रतोऽस्तु॥ सहगदो गदासहितो हरिस्तव पश्चादस्तु॥ त्वत्पार्श्वयोर्धनुरसीमधुहा असिधरो जनश्च॥
शंखधर उरुगाय एव कोणेषु॥ क्षितौ अधस्तात्॥२३॥ एवं दिग्रक्षां कृत्वांगरक्षामकुर्वन्नित्याह॥ इंद्रियाणीति॥२४॥ आत्मानमहंकारं॥२५॥२६॥ सन्यवेशयत्शा

चक्र्यग्रतः सहगदो हरिरस्तु पश्चात्त्वत्पार्श्वयोर्धनुरसीमधुहाजनश्च॥ कोणेषु शंख उरुगाय उपर्युपेंद्रस्तार्क्ष्यः क्षितौ हलधरः पुरु
षः समंतात्॥२३॥ इंद्रियाणि हृषीकेशः प्राणान्नारायणोवतु॥ श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोवतु॥२४॥ पृश्निगर्भस्तु ते बुद्धि
मात्मानं भगवान्परः॥ क्रीडंतं पातु गोविंदः शयानं पातु माधवः॥२५॥ व्रजंतमव्याद्वैकुंठ आसीनं त्वां श्रियः पतिः॥ भुंजानं यज्ञभु
क्पातु सर्वग्रहभयंकरः॥२६॥ डाकिन्यो यातुधान्यश्च कूष्मांडा येऽर्भकग्रहाः॥ भूतप्रेतपिशाचाश्च यक्षरक्षो विनायकाः॥२७॥
कोटरा रेवती ज्येष्ठा पूतना मातृकादयः॥ उन्मादा ये ह्यपस्मारा देहप्राणेंद्रियद्रुहः॥२८॥ स्वप्नदृष्टा महोत्पाता वृद्धबालग्रहाश्च ये
॥ सर्वे नश्यंतु ते विष्णोर्नामग्रहणभीरवः॥२९॥ श्रीशुक उ०॥ ॥इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणं॥ पाययित्वा स्तनं माता सं
निवेशयदात्मजं॥३०॥ तावन्नंदादयो गोपा [illegible] मथुराया व्रजं गताः॥ विलोक्य पूतनादेहं बभूवुरितिविस्मिताः॥३१॥ नंदा
दय ऊचुः॥ ॥नूनं बत ऋषिः संजातो योगेशो वा समास सः॥ स एव दृष्टो ह्युत्पातो यदाहानकदुंदुभिः॥ श्रीशुक उ०॥ ॥कलेवरं परशुभि
श्छित्वा तत्ते व्रजौकसः॥ दूरे क्षिप्त्वावयवशो न्यदहन्काष्ठवेष्टितं॥३३॥ दह्यमानस्य देहस्य धूमश्चागुरुसौरभः॥ उत्थितः कृष्णनिर्भु रामः
क्तसपद्याहतपाप्मनः॥३४॥ ॥श्रीरामाकृष्णायनमः॥ ॥पाययामास॥३०॥३१॥ विस्मयमेव॥ नूनमिति॥ बतविस्मये॥ सांप्रतं संकृ २१

षिस्तपःप्रभाववान्॥ योगेशो ज्ञानी वा समभ्य॥ यतः स एव दृष्ट इति॥३२॥३३॥ विस्मयांतरमाह॥ दह्यमानस्येति॥ कृष्णेन निर्भुक्तः अतएव सपद्याहतः पाप्मा यस्य॥३४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसंगात् कैमुतन्यायेन भक्तिवैभवमाह ॥ पूतनेति ॥ ३५ ॥ श्रद्धया आश्लिष्टं रूपेण ॥ भक्त्या प्रेम्णा ॥ रक्ताः स्निग्धास्तन्मातरो तिवत्सहरणलीलाभिप्रायेण बहुवचनं ॥ गोगोपिका ६
स्तद्धमातरो ऽनवन्निति ॥ ३६ ॥ ४३ ॥ एतत् अर्भकं अर्भचरितं ॥ किं तत्पूतनामोक्षमिति ॥ ४४ ॥ अनुहैम्नकुलानोत्राः पूतनायाश्रि शुछलात् ॥ स्तन्या ऽपीत्यानतः प्रा

पूतना लोकबालघ्नी राक्षसी रुधिराशना ॥ जिघांसयापि हरये स्तनं दत्वाप सद्गतिं ॥ ३५ ॥ किं पुनः श्रद्धया भक्त्या कृष्णाय परमात्मने ॥ य
च्छन् प्रियतमं किं नु रक्तास्तन्मातरो यथा ॥ ३६ ॥ पद्भ्यां भक्तहृदिस्थाभ्यां वंद्याभ्यां लोकवंदितैः ॥ अंगं यस्याः समाक्रम्य भगवानपिबत्स्त
नं ॥ ३७ ॥ यातुधान्यपि सा स्वर्गमवाप जननीगतिं ॥ कृष्णभुक्तस्तनक्षीराः किमु गावोनुमातरः ॥ ३८ ॥ पयांसि यासामपिबत्पुत्रस्नेहस्नुता
न्यलं ॥ भगवान्देवकीपुत्रः कैवल्याद्यखिलप्रदः ॥ ३९ ॥ तासामविरतं कृष्णे कुर्वतीनां सुतेक्षणं ॥ न पुनः कल्पते राजन् संसारो ऽ
ज्ञानसंभवः ॥ ४० ॥ कटधूमस्य सौरभ्यमवघ्राय व्रजौकसः ॥ किमिदं कुत एवेति वदंतो व्रजमाययुः ॥ ४१ ॥ ते तत्र वर्णितं गोपैः पूतना
गमनादिकं ॥ श्रुत्वा तन्निधनं स्वस्ति शिशोश्चासन् सुविस्मिताः ॥ ४२ ॥ नंदः स्वपुत्रमादाय प्रेत्यागतमुदारधीः ॥ मूर्ध्न्युपाघ्राय परमां
मुदं लेभे कुरूद्वह ॥ ४३ ॥ य एतत्पूतनामोक्षं कृष्णस्यार्भकमद्भुतं ॥ शृणुयाच्छ्रद्धया मर्त्यो गोविंदे लभते रतिं ॥ ४४ ॥ ॥ इति श्री
भागवते महापुराणे दशमस्कंधे पूतनामोक्षो नाम षष्ठोध्यायः ॥ ६ ॥ ॥

णैः प्राणाहुतिमं कल्पयत् ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे टीकायां पूतनामोक्षो षष्ठोऽध्यायः ॥ ६ ॥ ॥ श्रीरामाय नमः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्क्षिपन्शकटं व्योम्नि तृणावर्त्तमधःक्षिपत्॥ दर्शयन्विश्वमास्ये च कृष्णः क्रीडतिस्म मे॥१॥ कृष्णलीलासुधासिंधुसंप्लवानंदनिर्भरः॥ नृपस्तदेव संप्रष्टुं राजान्यद
भिनंदति॥२॥ येनेति॥ येनयेनमत्स्याद्यवतारेण प्रियानि कर्माणि करोति तानि नः कर्णसुखावहानि मनःप्रीतिकराणि च नवं सेव॥१॥ तथापि यत्शृण्वतः पुं
सः पुरुषमात्रस्य अरतिर्मनोग्लानिः तन्मूलवृत्ता विविधा तृष्णा च अपगच्छति तया सत्वं शुद्ध्यति हरौ भक्तिः हरिदासैः सख्यानि च भवंति॥ तदेव हारं हरेश्चरितं मनोहरं वा

राजोवाच॥ ॥येनयेनावतारेण भगवान्हरिरीश्वरः॥ करोति कर्णरम्याणि मनोज्ञानि च नः प्रभो॥१॥ यच्छृण्वतोऽपैत्यरतिर्वितृष्णा
सत्वं च शुध्यत्यचिरेण पुंसः॥ भक्तिर्हरौ तत्पुरुषे च सख्यं तदेव हारं वद मन्यसे चेत्॥२॥ अथान्यदपि कृष्णस्य तोकाचरितमद्भुतं॥ मानु
षं लोकमासाद्य तज्जातिमनुरुंधतः॥३॥ ॥श्रीशुक उ०॥ ॥कदाचिदौत्थानिककौतुकाप्लवे जन्मर्क्षयोगे समवेतयोषितां॥ वादि
त्रगीतद्विजमंत्रवाचकैश्चकार सूनोरभिषेचनं सती॥४॥ नंदस्य पत्नी कृतमज्जनादिकं विप्रैः कृतस्वस्त्ययनं सुपूजितैः॥ अन्नाद्यवा
सःस्रगभीष्टधेनुभिः संजातनिद्राक्षमशीशयच्छनैः॥५॥ औत्थानिकौत्सुक्यमना मनस्विनी समागतान्पूजयती व्रजौकसः॥ नै
वाशृणोद्वै रुदितं सुतस्य सा रुदन्स्तनार्थी चरणावुदक्षिपत्॥६॥ ॥

वद मन्यसे चेत् अनुग्रहं यदि करोषीति॥२॥ अस्यौत्सुक्येन पुनर्विशिनष्टि॥ अथेति॥ आनुरूप्यतोऽनुकुर्वतः॥३॥ उत्थानं शिशोरंगपरिवर्त्तनं तन्निमित्तकरणाय यः कौतुकाप्लवे उ
त्सवाभिषेके तथा तस्मिन्नेव दिने जन्मर्क्षस्यापि योगे अतिमहोत्सवे समवेतयोषितां मिलितपुरंध्राणां मध्ये वादित्रादिभिः शोभितमभिषेचनं यशोदा चकार॥४॥
अन्नादिभिः सुपूजितैः विप्रैः कृतमंगलं॥ संजाता निद्रा अक्षिणोर्यस्य तं अशीशयत् शायितवती शकटस्याधस्तात्प्रेंखे॥५॥ उदक्षिपत्॥ उर्द्ध्वं चालितवान्॥६॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदधःशयानस्य शिशोरल्पकस्यासौ प्रवालवन्मृदु अस्यैंघ्रिस्तेन हतं शकटं व्यवर्त्तत विपरीतमपतत् ॥ कथंविधं ध्वस्तानि नानारसवंति कुप्यभाजनानि स्वर्णरजता
तिरिक्तकांस्यादिमयानि यथा भवंति तथा ॥ चक्रे च अक्षश्च चक्राक्षाः व्यत्यस्ता यस्य व्यस्तचक्राक्षाः यस्मिन् विभिन्नः कूबरो युगंधरो यस्य तत् च तच्च यथा भवति तथा व्य
वर्त्ततेति ॥७॥ अद्भुतदर्शनेन आकुला बभूवुः ॥ तदेवाह ॥ कथमिति ॥ विपर्यगात् विपरीतमपतदिति ॥८॥९॥ न श्रद्दधिरे विश्वासं न जग्मुः ॥ उत अपि वा

नो अधःशयानस्य शिशोरनोऽल्पकप्रवालमृद्वं[illegible]घ्रिहतं व्यवर्त्तत ॥ विध्वस्तनानारसकुप्यभाजनं व्यत्यस्तचक्राक्षविभिन्नकूबरं ॥७॥ दृष्ट्वा
यशोदाप्रमुखा व्रजस्त्रिय औत्थानिके कर्मणि याः समागताः ॥ नंदादयश्चाद्भुतदर्शनाकुलाः कथं स्वयं वै शकटं विपर्यगात् ॥८॥ ऊ
गोपानू २ चुरव्यवसितमतीन् गोपान् गोपाश्च बालकाः ॥ रुदतानेन पादेन क्षिप्तमेतन्न संशयः ॥९॥ न ते श्रद्दधिरे गोपा बालभाषितमित्युत ॥ अ
प्रमेयं बलं तस्य बालकस्य न ते विदुः ॥१०॥ रुदंतं सुतमादाय यशोदा ग्रहशंकिता ॥ कृतस्वस्त्ययनं विप्रैः सूक्तैः स्तनमपाययत् ॥१
१॥ पूर्ववत्स्थापितं गोपैर्बलिभिः सपरिच्छदं ॥ विप्रा हुत्वार्चयांचक्रुर्दध्यक्षतकुशां[illegible]बुभिः ॥१२॥ येसूयानृतदंभेर्ष्याहिंसा
मानविव[illegible]र्जिताः ॥ न तेषां सत्यशीलानामाशिषो विफलाः कृताः ॥१३॥ ॥ श्रीरामाय नमः ॥ त्स्यैतन्न भवति ॥ एते च बालाः किं

जानंतीति ॥१०॥ रक्षोघ्नैः सूक्तैः कृत्वा ॥११॥ भगवत्प्रभावानभिज्ञविप्रचेष्टितं विडंबयन्नाह ॥ पूर्ववदित्यादिना ॥ बलिभिः शाकटैः ॥ यद्वा अष्टदिक्पालबलिभिः सहितं सप
रिकरं यथापूर्वं स्थापितं ॥ विप्रा दध्यादिभिरर्चयामासुः ॥ हुत्वाग्न्यादिहोमं विधाय ॥१२॥ असूया गुणेषु दोषाविष्करणं ॥ ईर्षा अक्षांतिस्तेषामाशिषः कृतास्तैः प्रयुक्ताः ॥
॥१३॥॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिएवमभिप्रेत्यसामर्ग्यजुर्भिरूपाकृतैः॥संस्कृतैः॥पवित्रऔषधयोयेषुजलेषुतैःकृत्वाविधिद्विजोत्तमैः॥कर्तृभिनरभिषिच्यअभिषेकंकारयित्वा॥२४॥हुत्वाह्वा
वयित्वा॥२५॥गावगाश्चप्रदात्॥अन्वयुंजतआशिषोयुयुजुः॥२६॥ताः तथैवबभूवुरित्यर्थः॥२७॥उतउत्थियमङ्पादेनशकटस्योम्निलाया॥तृणावर्त्तपदापाअनु

इतिबालकमादायसामर्ग्यजुरुपाकृतैः॥जलैःपवित्रौषध्याद्विजोत्तमैः॥२४॥वाचयित्वास्वस्त्ययनंनंदगोपसमाहितः॥कृत्वाचाग्निंद्विजाति
भ्यःप्रादादन्नंमहागुणं॥२५॥गावःसर्वगुणोपेतावासःस्रक्रुक्ममालिनः॥आत्मजाभ्युदयार्थायप्रादात्तेचान्वयुंजत॥२६॥विप्रामंत्रवि
दोयुक्तास्तैर्याःप्रोक्तास्तयाशिषः॥तानिष्फलानविष्यंतिनकदाचिदपिस्फुटं॥२७॥एकदारोहमारूढंलालयंतीसुतंसती॥गिरिमाणं॥
शिशोर्वोढुंनसेहेगिरिकूटवत्॥२८॥भूमौनिधायतंगोपीविस्मिताभारपीडिता॥महापुरुषमादध्यौजगतामासकर्मसु॥२९॥दैत्यो
नाम्नातृणावर्त्तःकंसभृत्यःप्रचोदितः॥चक्रवातस्वरूपेणजहारासीनमर्भकं॥२०॥गोकुलंसर्वमावृण्वन्मुष्णंश्चक्षूंषिरेणुभिः॥
ईरयन्सुमहाघोरशब्देनप्रदिशोदिशः॥२१॥मुहूर्तमभवद्गोष्ठंरजसातमसावृतं॥यशोदानापश्यत्तत्रपुत्रंयत्रन्यस्तवतीयतः॥२२॥
नापश्यत्कश्चनात्मानंपरंचापिविमोहितः॥तृणावर्त्तनिसृष्टाभिःशर्कराभिरुपद्रुतः॥२३॥ ॥श्रीरामाभ्युदयाननमः॥ ॥

सुतं२

यपातयदर्भकः॥आरोहमुत्संगं॥२८॥तृणावर्त्तास्यमसुपरिहारायकृष्णैवात्मनउत्संगादुत्तरायकृतभारमजानत॥उत्पातशंकयामहापुरुषमादध्यौ॥आत्मस्योदरवर्त्ति
नांजगतांभारेणपीडिताविस्मिताचसती॥यद्वाजगतांमध्येकर्मसुआसबभूव॥तत्रुजगदुदरंतेवेदेत्यर्थः॥२९॥२०॥ईरयन्निनादयन्नित्यर्थः॥यतःयत्रन्यस्तवतीतस्मि
न्स्थानेनापश्यत्॥२२॥२३



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खरपवनचक्रात्पांसुवर्षस्सति॥२४॥उपारतः पांसुवर्षस्य वेगो यस्मिन्तथाभूते पवने सति॥ तत्र तस्या रुदितमनुनिशम्य गोप्यो रुरुदुः॥२५॥ वात्याचक्रवातः तद्रूपधरः सन्नंह
रन्नशांतरयः॥ कथंचिन्नाभौगतः ततः परं गंतुं नाशक्नोदित्यर्थः॥२६॥ गुरुमत्तयातिगौरवेण तं तथा अश्मानं अश्मवंतं पर्वतप्रायं मन्यमानस्तेनैव आत्मनो गलेगृहीत्वा तं

रतिखरपवनचक्रपांसुवर्षे सुतपदवीमबलाविलक्ष्यमाता॥ अतिकरुणमनुस्मरंत्यशोचत्भुवि पतितामृतवत्सका यथा गौः॥ २४॥ रुदितमनुनिशम्य तत्र गोप्यो भृश [illegible] मनुतप्तधियो श्रुपूर्णमुख्यः॥ रुरुदुरनुपलभ्य नंदसूनुं पवनउ
पारतपांसुवर्षवेगे॥२५॥ तृणावर्तःशांतरयो वात्यारूपधरोहरन्॥ कृष्णं नभोगतो गंतुं नाशक्नोद्भूरिभारभृत्॥२६॥ तम
श्मानं मन्यमान आत्मनो गुरुमत्तया॥ गले गृहीत उत्स्रष्टुं नाशक्नोदद्भुतार्भकं॥२७॥ गलग्रहणनिश्चेष्टो दैत्यो निर्गतलो
चनः॥ अव्यक्तरावो न्यपतत्सह बालो व्यसुर्व्रजे॥ २८॥ तमंतरिक्षात्पतितं शिलायां विशीर्णसर्वावयवं करालं॥ पुरं यथा रु
द्रशरेण विद्धं स्त्रियो रुदंत्यो ददृशुः समेताः॥२९॥ प्रादाय मात्रे प्रतिहृत्य विस्मिताः कृष्णं च तस्योरसि लंबमानं॥ तं स्वस्ति
मंतं पुरुषादनीतं विहायसा मृत्युमुखात्प्रमुक्तं॥ ३०॥ गोप्यश्च गोपाः किल नंदमुख्याः लब्ध्वा पुनः प्रापुरतीव मोदं
॥ अहो बतात्यद्भुतमेष रक्षसा बालो निवृत्तिं गमितोऽभ्यगात्पुनः॥ ३१॥ हिंस्रः स्वपापेन विहिंसितः खलः॥
साधुः समत्वेन भयाद्विमुच्यते॥३२॥ ॥ श्रीरामाकृष्णायनमः॥ ॥

त्यक्तुमिच्छन्नपि नाशक्नोदित्यर्थः॥२७॥२८॥ तस्योरसि लंबमानं कृष्णमादाय मात्रे प्रतिहृत्य समर्प्य विस्मिता अभवन्बभूवुरिति॥२९॥ विहायसा गगनमार्गेण पुरुषादेन नीतं तथापि मृ
त्युमुखात्प्रमुक्तं पुनर्लब्ध्वा मोदं प्रापुरिति॥३०॥ रक्षसा रक्षसा हर्षकथयामासुः॥ अहो बतेति॥ निवृत्तिं गमितो मृत्युं प्रापितः॥ कोऽत्र विस्मय इत्युत्पत्त एवैतदिति ते एव केचिदाहुः॥ हिंस्र इति॥
॥३२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नः अस्माभिः चार्णीकृतं ॥ पूर्वं वा पाकूपत उगादिनिर्माणं ॥ ३१ ॥ पंचयता गतिहोत्रादि ॥ दन्तेरानं ॥ यत्यस्मात्तपादैः ॥ प्रणायत्तूर्ध्वयत् ॥ ३२ ॥ कृष्णावर्त्तगमे दृष्टगौरवं वाक्यं किं नो प्रसूं ॥ शावी
धयन् दर्शयामास जृंभमाणो मुखे जगत् ॥ ३४ ॥ पीतः प्रायः स्तनो येन तस्य ॥ ३५ ॥ नगान् गिरान् तत् दुहितॄर्नदीः ॥ ३६ ॥ ३७ ॥ ॥ इति श्रीभागवते दशमस्कंधे टी० सप्तमोध्यायः ॥ ७ ॥ ॥ अष्ट

किं न स्तपश्चीर्णमधोक्षजार्चनं पूर्तेष्टदत्तमुत भूतसौहृदं ॥ यत्संपरेतः पुनरेव बालको दिष्ट्या स्वबंधून् प्रणयन्नुपस्थितः ॥ ३२ ॥ श्रीशुक उ० ॥ ॥ दृष्ट्वाद्भुतानि बहुशो नंदगोपो बृहद्वने ॥ वसुदेववचो भूयो मानयामास विस्मितः ॥ ३३ ॥ एकदार्भकमादाय स्वांकमारोप्य भामिनी ॥ प्रस्नुतं पाययामास स्तनं स्नेहपरिप्लुता ॥ ३४ ॥ पीतप्रायस्य जननी सा तस्य रुचिरस्मितं ॥ मुखं लालयती राजन् जृंभतो ददृशे इदं ॥ ३५ ॥ खं रोदसी ज्योतिरनीकमाशाः सूर्येंदुवह्निश्वसनांबुधींश्च ॥ द्वीपान्नगांस्तद्दुहितॄर्वनानि भूतानि यानि स्थिरजंगमानि ॥ ३६ ॥ सा वीक्ष्य विश्वं सहसा राजन् [illegible] संजातवेपथुः ॥ संमील्य मृगशावाक्षी नेत्रे आसी[illegible]त्सुविस्मिता ॥ ३७ ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे कृष्णाबालकमोक्षो विश्वदर्शनो नाम सप्तमोध्यायः ॥ ७ ॥ श्रीशुक उ० ॥ ॥ गर्गः पुरोहितो राजन् यदूनां सुमहातपाः ॥ व्रजं जगाम नंदस्य वसुदेवप्रचोदितः ॥ १ ॥ तं दृष्ट्वा परमप्रीतः प्रत्युत्थाय कृतांजलिः ॥ आनर्चाधोक्षजधिया प्रणिपातपुरःसरं ॥ २ ॥ सूपविष्टं कृतातिथ्यं गिरा सूनृतया मुनिं ॥ नंदयित्वाब्रवीद्ब्रह्मन् पूर्णस्य करवाम किं ॥ ३ ॥ महद्विचलनं नॄणां गृहिणां दीनचेतसां ॥ निःश्रेयसाय भगवन् कल्पते ना[illegible]न्यथा क्वचित् ॥ ४ ॥ ॥

मे नामकर्मास्य बालकस्य उक्तं कुले ॥ महद्ब्राह्मणानां नियोगे च विश्वासरूपं निरूप्यते ॥ १ ॥ विश्वरूपादि बालस्य निःश्राम्यात्रां किं नः पितुः ॥ नामकृतः गर्गवाक्येन निर्जनत्वमसुचयत् ॥ ३ ॥ पूर्णस्य कृतार्थस्य निनो गृहमागतस्य तात्राह ॥ महद्विचलनमिति ॥ महतां स्वाश्रमादन्यत्र चलनं न स्वार्थं किंतु गृहिणां मंगलाय ॥ ननु तर्हि तत एव महद्दर्शनार्थं किमिति नागच्छतीति तत्राह ॥ दीनचेतसां कृपणानां त्वणमपि गृहं त्यक्तुं मंदाकुर्वतामित्यर्थः ॥ ४ ॥ ॥



CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वया बलयोर्नामकरणादि करणीयमिति वक्तुं तस्य ज्ञानातिशयमाह ॥ ज्योतिषामयनमिति ॥ यदतींद्रियज्ञानसाधनं ज्योतिषामयनं तत्प्रतिपादकं ज्योतिःशास्त्रमित्यर्थः ॥ तस्मात्त्वा
स्वतः प्रणीतं ॥ येनान्योपि पुमान् परावरं परं कारणं पूर्वजन्मकृतं कर्म ॥ अवरं कार्यमस्मिन्जन्मनि तस्य विफलं तदेव ॥ उक्तं च ज्ञाके ॥ यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः
प्राप्तिं व्यंजयति शास्त्रमेतत्तमसि द्रव्याणि दीप इवेति ॥५॥ विवक्षितमाह ॥ त्वं हीति ॥ दैवसोमंत्रविच्चात्वं अतो नामकरणादिसंस्कारान्कर्तुमर्हसीत्यर्थः ॥ नन्वेतद्गुरुणा करणी-
यमिति चेत्तत्राह ॥ नृणामिति ॥६॥ अस्मत्साक्षितं नंदं प्रति गुरुर्भ्रमेतत्कार्यमित्यभिप्रायेण प्रत्याचक्षाण एवाह ॥ यदूनामिति ॥ भवतु तथापि त्वमत्रागतः इति को विवेद इति चे-

ज्योतिषामयनं साक्षात् यत्तत् ज्ञानमतींद्रियं ॥ प्रणीतं भवता येन पुमान्वेद परावरं ॥५॥ त्वं हि ब्रह्मविदां श्रेष्ठः संस्कारान्कर्तुमर्हसि ॥ बा-
लयोरनयोर्नृणां जन्मना ब्राह्मणो गुरुः ॥६॥ ॥गर्ग उवाच॥ ॥यदूनामहमाचार्यः ख्यातश्च भुवि सर्वदा ॥ सुतं मया संस्कृतं ते मन्यते देवकी-
सुतं ॥७॥ कंसः पापमतिः सख्यं तव चानकदुंदुभेः ॥ देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति ॥८॥ इति संचिंतयन् श्रुत्वा देवक्या दारिकावचः ॥
अपि हंता गताशंकस्तर्हि तन्नोऽनयो भवेत् ॥९॥ नंद उवाच ॥ ॥ अलक्षितोस्मिन् रहसि मामकैरपि गोव्रजे ॥ कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्व-
कं ॥१०॥

दत आह ॥ ख्यातश्चेति ॥ ततः किमत आह ॥ सुतमिति ॥ कंसो मन्यते मन्येत कल्पयेदित्यर्थः ॥७॥ ननु यदुकुमार इति ॥ कथंचिज्ज्ञानात्तत्र वसुदेवस्य सुतस्तत्रापि देव-
क्यां जात इति कुतो न जानीयात्तत्राह ॥ पापमतिरित्यादि द्वेव ॥८॥ किमयाह तयामं इत्यादि देवकीकन्यावचः श्रुत्वा देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हतीति नित्यं संचिंतयन् सामा-
न्येन कश्चिदस्तीति तावद्वायुवयोश्च सख्यं संचिंतयन् त्वद्गृहे न वेदितिस्मं नाव्यमस्संस्कारलिंगेन च आगताशंकः आगता आशंका यस्य सः ॥ अपि यदि हंता हनिष्यति तर्हि तत्तदा नो
महान् अनयः स्यात् इति ॥९॥ द्विजातिसंस्कारं द्विजातीनामावश्यकर्त्तव्यसंस्कारमात्रं केवलं स्वस्तिवाचनपूर्वकं कुर्वंति ॥१०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० पू०
२५

यदुनामपृथग्भावात्तत्कृतस्निग्धेहेतोर्विप्रतिपद्यमाना नां यदूनामपृथग्भावात् नाशो न वनं तस्मात् अन्योन्यस्निग्धतया सर्वैकमत्यकरणात्संकर्षण उतिरत्यर्थः॥ सम्यक्कर्षति एका
करोतीतिसंकर्षणमप्युपतात्यर्थः॥ गर्गः संकर्षणंतु न प्रकाशयति॥१२॥ अस्य तव पुत्रस्य अतः श्रीकृष्णस्यैकं नाम न विष्यति॥१३॥ प्रागयमितिसामान्योक्त्या कृषिरयं जन्मांतर

श्रीशुकउवाच॥ ॥एवंसंप्रार्थितो विप्रः स्वचिकीर्षितमेव तत्॥ चकार नामकरणं गूढो रहसि बालयोः॥११॥ गर्गउवाच॥ ॥अयं हि रोहिणीपुत्रो
रमयन्सुहृदो गुणैः॥ आख्यास्यते राम इति बलाधिक्याद्बलं विदुः॥ यदूनामपृथग्भावात्संकर्षणमुशंत्यपि॥ मुशलानालवासा चतुल्लायुधरति
स्मृतः॥१२॥ आसन्वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनुः॥ शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः॥१३॥ प्रागयं वसुदेवस्य क्वचिज्जातस्तवा तां
त्मजः॥ वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते॥१४॥ बहूनि संति नामानि रूपाणि च सुतस्य ते॥ गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः॥१
५॥ एष वः श्रेय आधास्यद्गोपगोकुलनंदनः॥ अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ॥१६॥ पुरानेन व्रजपते साधवो दस्युपीडिताः॥ अराज
के रक्ष्यमाणा जिग्युर्दस्यून्समेधिताः॥१७॥ य एतस्मिन्महाभागाः प्रीतिं कुर्वंति मानवाः॥ नारयोऽभिभवंत्येतान्विष्णुपक्षानिवासुराः॥१
८॥ तस्मान्नंदात्मजोऽयं ते नारायणसमो गुणैः॥ श्रिया कीर्त्यानुभावेन गोपायस्व समाहितः॥१९॥ श्रीशुकउवाच॥ ॥ इत्यात्मानं स
मादिश्य गर्गे च स्वगृहं गते॥ नंदः प्रमुदितो मेने आत्मानं पूर्णमाशिषां॥२०॥ ॥गतेनामकथयतीति नंदो मन्यते स्म अत एनं वासुदेव इति संप्र रामः
चक्षत इति॥१४॥ गुणानुरूपाणि ईश्वर सर्वज्ञ इत्यादीनि कर्मानुरूपाणि गोपतिर्गोवर्द्धनोद्धरण इत्यादीनि तानि सर्वाण्यहमपि नो वेद जना अपि नो विदुरिति॥१५॥ जात २५
कफलमाह॥ एष इति॥ अधास्यत्॥ आधास्यति॥१६॥ अनेन रक्ष्यमाणाः समेधिता अवरस्यून्जिग्युरिति॥१७॥१८॥१९॥ इति चात्मानं प्रति समादिश्य॥ आत्मानं कृष्णलब्धं॥ [illegible]
शिषां आशीर्भिः॥२०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बालक्रीडाचमत्कारैः कृष्णो रामेण संयुतः ॥ परमानंदमाधत्त व्रजे नंदयशोदयोः ॥ १ ॥ पूर्णत्वमेव दर्शयन्नाह ॥ कालेनेति ॥ २१ ॥ अनुकृष्य पुनः पुनराकृष्य सरीसृपंतौ अतिशी
येन वलंतौ ॥ कथं घोषाः कटिपादभूषणकिंकिण्यादयस्तेषां प्रघोषेण रुचिरं यथा तथा ॥ तेषां घोषाणां नादेन हृष्टमनसौ ययोस्तौ ॥ लोकं जनं ततस्ततो गच्छंतं जनं अनुसृत्य
त्रिचतुराणि पदानि अनुगम्य मुग्धवत् प्रभीतवत् मात्रोरंतिकं समीपं उपेयतुः उपजग्मतुः ॥ २२ ॥ तदा च तन्मातरौ निजसुतौ दोर्भ्यामुपगुह्य प्रमोदं ययतुः ॥ कथंभूते घृण

कालेन व्रजताऽल्पेन गोकुले रामकेशवौ ॥ जानुभ्यां सह पाणिभ्यां रिंगमाणौ विजह्रतुः ॥ २१ ॥ तावंघ्रियुग्ममनुकृष्य सरीसृपंतौ
घोषप्रघोषरुचिरं व्रजकर्दमेषु ॥ तन्नादहृष्टमनसावनुसृत्य लोकं मुग्धप्रभीतवदुपेयतुरंतिमात्रोः ॥ २२ ॥ तन्मातरौ निजसु
तौ घृणया स्नुवंत्यौ पंकांगरागरुचिरावुपगृह्य दोर्भ्यां ॥ दत्वा स्तनं प्रपिबतोः स्म मुखं निरीक्ष्य मुग्धस्मिताल्पदशनं ययतुः प्र
मोदं ॥ २३ ॥ यर्ह्यंगनादर्शनीयकुमारलीलावंतर्व्रजे तदबलाः प्रगृहीतपुच्छैः ॥ वत्सैरितस्तत उभावनुकृष्यमाणौ प्रेक्षंत्य
उज्झितगृहा जहृषुर्हसंत्यः ॥ २४ ॥ शृंग्यग्निदंष्ट्र्यसिजलद्विजकंटकेभ्यः क्रीडापरावतिचलौ स्वसुतौ निषेद्धुं ॥ गृह्याणि कर्तुम
पि यत्र न तज्जनन्यौ शेकात आपतुरलं मनसोऽनवस्थां ॥ २५ ॥

॥ या कृपया स्नुवंत्यौ पयः पूर्णपयोधरे स्नुत्यौ पंकेनांगरागेण च रुचिरौ ॥ कथंभूतं मुखं नि
रीक्ष्य ॥ मुग्धं मंदस्मितं यस्मिन् अल्पा दशना यस्मिंस्तच्च तत् ॥ २३ ॥ यर्हि अंगनानां दर्शनीया कुमारलीला ययोः तथाभूतौ जातौ तदा तदंतर्व्रजे व्रजमध्ये ॥ तदबला व्रजां
गनास्तौ प्रेक्षंत्यः प्रेक्षमाणाः उज्झितगृहकृत्याः संत्यो जहृषुः हृष्टा बभूवुः ॥ कथंभूतौ तासां प्रतिगृहीतानि पुच्छानि येषां तैर्वत्सैरितस्ततोऽनुकृष्यमाणौ ॥ २४ ॥
अतिचपलौ तौ शृंग्यादिभ्यो निषेद्धुं गृहोचितानि कर्माणि च कर्तुं यत्र यदा तज्जनन्यौ न शेकाते ॥ तदाऽलं मनसोऽनवस्थामापतुरिति गृहसौख्यस्य पराकाष्ठा दर्शिता ॥ २५ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गो० द० पू०
२६

॥२६॥२७॥२८॥ कृष्णचापलचौर्याणि सर्वैर्वा विख्यातमतः॥ प्रजल्पंत्यः समागत्य गोप्यो गोप्यै सुदंदुः॥ अस्मिन्समये श्रीदेव्याकाले क्रोशे संजातत्रासः॥ स्तेयं चौ
र्यम्॥ तेन तद्दत्तं॥ तत्रापि स्वादुने तरत्॥ दधिस्वपयश्चात्ति॥ किंच॥ नोत्तन्मर्कान्मर्कटयन् प्रति विभज्य ददाति॥ तेषाममपि मध्येऽमलेन को पिना त्रिचेत्तर्हि भांडं॥
भिनत्ति॥ क्वचित् द्रव्यस्यालाभे सति॥ सः गृहं धत्ता मातिकु पितो याति॥ यद्वा॥ सगृहाग डिणास्तेनः कुपितस्तेषां तोकान्पर्यंकादिषु सुप्तान् पक्रोशपरो दयित्वा
यातीति॥२९॥ कल्पितैः स्तेययोगैरिसुक्तं तत्र पंचयति॥ हस्ताग्राह्यरति॥ तुंगशिक्यस्थभांडेषु अंतर्निहितरध्यादौ वयुनं ज्ञानं यस्य सः छिद्रं रचयति॥ तद्
कालेनाल्पे नराजर्षैरामः कृष्णश्च गोकुले॥ अघृष्टजानुभिः पद्भिर्विचक्रमतुरंजसा॥२६॥ ततस्तु भगवान्कृष्णो वयस्यैर्व्रजबालकैः॥ स
ह रामो व्रजस्त्रीणां चक्रीडे जनयन्मुदं॥२७॥ कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलं॥ शृण्वंत्याः किल तन्मातुरिति होचुः समागताः॥२८॥
गोप्य ऊचुः॥ ॥वत्सान्मुंचन् क्वचिदसमये क्रोशसंजातहासः स्तेयं स्वाद्वत्त्यथ दधिपयः कल्पितैः स्तेययोगैः॥ मर्कान्भोक्ष्यन्विभजति स चेन्ना
त्ति भांडं भिनत्ति द्रव्यालाभे स गृहकुपितो यात्युपक्रोश्य तोकान्॥२९॥ हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यैश्छिद्रं ह्यंतर्निहितवयुन
ः शिक्यभांडेषु तद्वित्॥ ध्वांतागारे धृतमणिगणं स्वांगमर्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु सुव्यग्रचित्ताः॥३०॥ एवं धार्ष्ट्यान्युशति कु
रुते मेहनादीनि वास्तौ स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथास्ते॥ इत्थं स्त्रीभिः सभयनयन श्रीमुखालोकिनीभिर्व्याख्यातार्था प्रहस्ति
तमुखी नह्युपालब्धुमैच्छत्॥३१॥
तच्छिद्ररचनादिवत्॥ ध्वांतयुक्ते गृहे स्वांगमेवार्थप्रदीपं रचयति॥ विशेषतो धृतमणिगणं॥ यर्हि यस्मिन्काले॥३०॥ रे रे चौर र
त्याक्रुष्टः सन् उशति जल्पति त्वमेव चोरः॥ अहं गृहस्वामी त्यादिना धार्ष्ट्यानि प्रागल्भ्यानि॥ अथवा उशति लोकमनायेयशोदे॥ यद्वा॥ उशति वास्तौ स्वर्चिते गृहे मेह
नादीनि पुरीषोत्सर्गादीनि कुरुते॥ एवं स्तेयोपायैः विरचिता कृतिः कर्म येन सः॥ त्वत्समीपे सुप्रतीकः साधुरिवास्ते॥ सभयेन नयनेन यस्मिन् तच्च तच्छ्रीयुक्तं मुखं च तद
लोकिनीभिर्व्याख्यातार्था प्रख्यात जन्मफलात् तत्कर्मफलाद्वा उपालब्धुं अर्हे भुं नैच्छत्॥३१॥

राम०
२६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कदाचिदपराधांतरे उपालब्धस्तदा उमरहरस्यैश्वर्यं अत्र हि इति कथयन्नाह ॥ एकदेति ॥ ३२ ॥ उपालब्धा निर्भर्त्स्य ॥ भयेन संभ्रांतं प्रेक्षणे च पलनिरीक्षणे अक्ष
पायस्य सः ॥ ३३ ॥ अदांतात्मन् चपलगात्र ॥ रहः एकांते ॥ ३४ ॥ नाहं भक्षितवानिति निह्नवाह्यं किंचिन्मया न भक्षितमकृत्वा वादा वे वस्सर्वमसत्या इति भावः ॥ समक्षं
प्रत्यक्षं ॥ ३५ ॥ व्यादेहि मुखं प्रसारयेति ॥ व्यादत्त प्रसारितवान् ॥ ३६ ॥ तत्र तस्मिन्मुखे विश्वं ददर्शो ददर्श ॥ तत्प्रपंचयति ॥ जगत् जंगमं ॥ स्थास्नु स्थावरं
॥ खं अंतरिक्षलोकं ॥ सादिद्वीपाब्धिभूगोलं भूर्लोकं ॥ वायुः प्रवहः अग्निर्वैद्युतः इंदुश्च तारकाश्च तत्सहितं ॥ ३७ ॥ ज्योतिश्चक्रं स्वर्लोकं ॥ वैकारिका

एकदाक्रीडमानास्ते रामाद्यागोपदारकाः ॥ कृष्णोमृदंभक्षितवानितिमात्रेन्यवेदयत ॥ ३२ ॥ सागृहीत्वाकरेकृष्णमुपालभ्यहितैषि
णी ॥ यशोदाभयसंभ्रांतप्रेक्षणाक्षमभाषत ॥ श्रीयशोदोवाच ॥ ॥ कस्मान्मृदमदांतात्मन्भवान्भक्षितवान्रहः ॥ वदंतितावकाह्ये
ते कुमारास्तेऽग्रजोप्ययं ॥ ३४ ॥ श्रीकृष्णउवाच ॥ ॥ नाहंभक्षितवानंबसर्वेमिथ्याभिशंसिनः ॥ यदिसत्यगिरस्तर्हिसमक्षंपश्यमेमुखं
॥ ३५ ॥ यद्येवंतर्हिव्यादेहीत्युक्तःसभगवान्हरिः ॥ व्यादत्ताव्याहतैश्वर्यःक्रीडामनुजबालकः ॥ ३६ ॥ सातत्रददृशेविश्वंजगत्स्था
स्नुचखंदिशः ॥ साद्रिद्वीपाब्धिभूगोलंसवाय्वग्नींदुतारकं ॥ ३७ ॥ ज्योतिश्चक्रंजलंतेजोनभस्वान्वियदे[illegible]वच ॥ वैकारिकाणींद्रि
याणिमनोमात्रागुणास्त्रयः ॥ ३८ ॥ एतद्विचित्रंसहजीवकालस्वभावकर्माशयलिंगभेदं ॥ सूनोस्तनौवीक्ष्यविदारितास्येव्रजंसहा
त्मानमवापशंकां ॥ ३९ ॥

णि देवाः मन इति वैकारिकत्वाच्चैतन्यगृहीतमपि देववैलक्षण्यात्पुनरुक्तं ॥ इंद्रियाणि च तैजसानि ॥ मात्राः तामसाः शब्दादयः ॥ ३८ ॥
एवमेतद्विचित्रं विश्वं सह एकदेव वीक्ष्य ॥ विचित्रतामाह ॥ जीवश्च गुणक्षोभकः ॥ कालश्च परिणामहेतुः स्वभावश्च जन्महेतुः कर्म च तत्संस्कार आश
यश्च एते लिंगानां चराचरशरीराणां भेदो यस्मिन् तत् ॥ व्रजं च सह आत्मानं स्वसहितं कचिद्दृश्य ॥ सूनोस्तनौ अस्ये विदारिते आस्य तत्र शंकामवाप ॥
॥ ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० टी०
२७

तामाह ॥ किं स्वप्न इति ॥ परितो विलोक्याह ॥ नायं स्वप्नः ॥ तर्हि किं देवमाया हरेर्माया ॥ तथा चेदन्ये किं न पश्यन्ति ॥ तर्हि किं वा मदीय एव कश्चिद्बुद्धिमोहः विपर्यास
ः ॥ दर्पणे मुखवत् ॥ एवं तर्हि अयं बालकोपि कथमंतः प्रतीयते अंतर्बहिश्चैकरूपेण च कथं जगत् प्रतीयते ॥ तथा सति बिंबप्रतिबिंबयोरविपरस्प
रं वैपरीत्येन प्रतीतिः स्यादित्याशंक्यान्यथा वितर्कयति ॥ अथो इति ॥ अथवा ममामुष्यार्भकस्यापि सतो यः कश्चनाचिंत्य आत्मयोगः स्वायमै
श्वर्यं औत्पत्तिकः स्वाभाविकः ॥ ४० ॥ चरमं पक्षमाश्रित्यायमीश्वर इति निश्चित्याह ॥ अथो इति ॥ चेतः चित्तं ॥ चित्तादिभिर्न वितर्कगोचरं जगत् ॥

॥ यशोदोवाच ॥ ॥ किं स्वप्न एतदुत देवमाया किं वा मदीयो बत बुद्धिमोहः ॥ अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आ
त्मयोगः ॥ ४० ॥ अथो यथावन्न वितर्कगोचरं चेतोमनःकर्मवचोभिरंजसा ॥ यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणतास्मि
तत्पदं ॥ ४१ ॥ अहं ममासौ पतिरेष मे सुतो व्रजेश्वरस्याखिलवित्तपा सती ॥ गोप्यश्च गोपाः सह गोधनाश्च मे यन्माययेत्थं कुमति
ः स मे गतिः ॥ ४२ ॥ ॥ श्रीशुक उ० ॥ ॥ इत्थं विदिततत्त्वायां गोपिकायां स ईश्वरः ॥ वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः ॥ ४३ ॥

यदाश्रयं यदधिष्ठानं ॥ येन करणाधिष्ठात्रा ॥ यतो बुद्धिवृत्त्यभिव्यक्तात् ॥ नन्विदमवितर्क्यं न वस्तु तत्पदं कीदृक् आह ॥ सुदुर्विभाव्यमिति ॥ इदमत्यंतमचिंत्यमित्य
र्थः ॥ ४१ ॥ एवं प्रपंचप्रतीत्योन्नीतं तत्त्वं श्रुत्वा जीवसंसृतिहेतुमायाश्रयत्वेनोल्लपंत्याह ॥ अहमिति ॥ यशोदानामाहं ॥ असौ मम पतिः ॥ अमुष्य व्रजेश्वरस्या
खिलवित्तपाः अधिष्ठात्री अहं सती जाया ॥ एष बालो मे सुतः ॥ गोप्यादयश्च मदीयाः ॥ इत्थं कुमतिर्यन्मायया स एष मे शरणं इति ॥ ४२ ॥ वैष्णवीं स्वीयां ॥ ४३ ॥

राम:
२७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रवृद्धेनस्नेहेनकलिलंव्याप्तंहृदयंयस्याःसापुरेवासीत्॥४४॥मायाबलीदेकमाह॥त्रय्येति॥त्रय्याइंद्रियादिरूपेणउपनिषद्भिर्ब्रह्मेति॥सांख्यैःपुरुषइति॥योगैःपरमात्मेति॥
सात्वतैर्भगवानिति॥उपगीयमानंमहात्म्यंयस्यतं॥४५॥अतिविस्मयेनपृच्छति॥नंदइति॥महोदयंमहानुदयउद्भवोयस्मात्तत्॥४६॥ययोःप्रसन्नोऽवतीर्णस्तौपितरावपियन्नाप

सद्योनष्टस्मृतिर्गोपीसारोप्यारोहमात्मजं॥प्रवृद्धस्नेहकलिलहृदयासयथापुरा॥४४॥त्रय्याचोपनिषद्भिश्चसांख्ययोगैश्चसात्वतैः॥उपगीयमा
नमाहात्म्यंहरिंसाऽमन्यतात्मजं॥४५॥ ॥राजोवाच॥ ॥नंदःकिमकरोद्ब्रह्मन्श्रेयएवंमहोदयं॥यशोदाचमहाभागापपौयस्याःस्तनंहरिः॥
४६॥पितरौनान्वविंदेतांकृष्णोदारार्भकेहितं॥गायंत्यद्यापिकवयोयल्लोकशमलापहं॥४७॥ ॥श्रीशुकउ०॥ ॥द्रोणोवसूनांप्रवरोधर
यासहभार्यया॥करिष्यमाणआदेशान्ब्रह्मणस्तमुवाचह॥४८॥द्रोणउ०॥ ॥जातयोर्नौमहादेवेभुविविश्वेश्वरेहरौ॥भक्तिःस्यात्पर
मालोकेययांजोदुर्गतिंतरेत्॥४९॥अस्त्वित्युक्तःसभगवान्व्रजेद्रोणोमहायशाः॥जज्ञेनंदइतिख्यातोयशोदासाधराभवत्॥५०
॥ततोभक्तिर्भगवतिपुत्रीभूतेजनार्दने॥दंपत्योर्नितरामासीद्गोपगोपीषुभारत॥५१॥कृष्णोब्रह्मणआदेशंसत्यंकर्तुंव्रजेविभु
॥सहरामोवसंश्चक्रेतेषांप्रीतिंस्वलीलया॥५२॥ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेविश्वरूपदर्श
नोनामअष्टमोध्यायः॥८॥ ॥श्रीरामाकृष्णायनमः॥ ॥श्रीरामाकृष्णायनमः॥ ॥ ॥

विंदेतां॥कृष्णस्योदारंमहत्अर्भकेहितंबाललीलां॥यच्चकवयोगायंति॥तैर्द्योःविंदत्सकिंश्रेयोऽकरोदिति॥४७॥ब्रह्मणआदेशान्गोपालादि
लक्षणान्॥४८॥४९॥सएवेहद्रोणोजज्ञेसचनंदइतिख्यातः॥साचधरायशोदाऽभवत्॥५०॥गोपगोपीनामपिवस्तुस्वभावादस्त्येवभक्तिःतयोःपुन
र्नितरामिति॥५१॥स्वलीलयापुत्रभावानुकारिण्या॥५२॥ ॥इतिभागवतेदशमस्कंधेअष्टमोध्यायः॥८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवमे पय उत्सिक्ते गत्वा गोप्यथ तत्कृतं॥ विलोक्य तां उत्संगादिरुष्टं दाम्ना बबंध तं॥१॥ तनूदरास्थितं विश्वं दृष्ट्वा विस्मितचेतसः॥ बंधनं द्व्यंगुलापूर्त्या पूर्णतामनवदृश्य
यत्॥२॥ स्वयं दधि निर्ममंथ॥१॥ तदा चागायतेति चकारान्वयः॥२॥ सूत्रनद्धं कौ चाबद्धं रज्ज्वोराकर्षणश्रमो ययोस्तयोर्भुजयोश्चलंतौ कंकणौ च॥ कबराद्विगलंत्यो

॥श्रीशुक उवाच॥ ॥एकदा गृहदासीषु यशोदानंदगेहिनी॥ कर्मांतरनियुक्तासु निर्ममंथ स्वयं दधि॥१॥ यानि यानीह गीतानि तद्बाल
चरितानि च॥ दधिनिर्मंथने काले स्मरंती तान्यगायत॥२॥ क्षौमं वासः पृथुकटितटे बिभ्रती सूत्रनद्धं पुत्रस्नेहस्नुतकुचयुगं जा
तकंपं च सुभ्रूः॥ रज्ज्वाकर्षश्रमभुजचलत्कंकणौ कुंडले च स्विन्नं वक्त्रं कबरविगलन्मालती निर्ममंथ॥३॥ तां स्तन्यकाम
आसाद्य मथ्नंतीं जननीं हरिः॥ गृहीत्वा दधिमंथानं न्यषेधत्प्रीतिमावहन्॥४॥ तमंकमारूढमपाययत्स्तनं स्नेहस्नुतं सस्मितमी
क्षती मुखं॥ अतृप्तमुत्सृज्य जवेन सा ययावुत्सिच्यमाने पयसि त्वधिश्रिते॥५॥ संजातकोपः स्फुरितारुणाधरं संदश्य द
द्भिर्दधिमंथभाजनं॥ भित्त्वा मृषाश्रुर्दृषदश्मना रहो जघास हैयंगवमंतरं गतः॥६॥ उत्तार्य्य गोपी सुशृतं पयः पुनः प्रवि
श्य संदृश्य च दधिमत्रकं॥ भग्नं विलोक्य स्वसुतस्य कर्म तज्जहास तं चापि न तत्र पश्यती॥७॥ उलूखलांघ्रेरुपरि व्यव
स्थितं मर्काय कामं ददतं शिचि स्थितं॥ हैयंगवं चौर्यविशंकितेक्षणं निरीक्ष्य पश्चात्सुतमागमच्छनैः॥८॥ ॥ ॥

यशि

यस्याः सा॥३॥४॥ अधिश्रिते चुल्ल्यामारोपिते॥ उत्सिच्यमाने अतितापेनोद्रिच्यमाने॥५॥ दृषदश्मना शिलापुत्रेण॥ अंतरं गृहमध्यं गतः सन्नू रहः एकांते नवनीतमभक्ष
यत्॥६॥ सुशृतं सुतप्तं॥ दधिमंथानस्थानं प्रविश्य भिन्नं संदृश्य दृष्ट्वा जहास॥७॥ उलूखलांघ्रेः परिवर्त्तितस्योलूखलस्योपरि शिचि शिक्ये॥ चौर्येण विशंकितं च चलमीक्षणं य
स्य तं॥८॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तपसाएकाग्र्येण॥ईरितंतदाकारतांनीतं॥अतएवब्रह्मंयोग्यंप्रवेष्टुंयोगिनांमनोपियंनापत॥अथवाअन्वधावत्केवलंनचाप॥यतोयोगिनांमनोपियंप्रवेष्टुं
नंब्रह्ममिति॥९॥अन्वंचमानांएवंब्रह्ममनुगच्छंती ता॥बृहत्योःचलंत्योःश्रोण्योर्भरेणाक्रांताल्पागतिर्यस्याःसा॥विस्रंसितात्केशबंधाच्युतैःप्रसूनै
रनुगतिरनुगमनंयस्याःसा॥यद्वा॥जावेनकंपितात्केशबंधात्तुरःपतितानिप्रसूनानिअनुपश्चाद्गतिर्यस्याःसा॥परामृशात् धृतवती॥१०॥अंजन्म
षिणी॥अंजनासर्वतःप्रसरंतीमषीययोःतेअक्षिणीस्वपाणिनाकषंतंसंमर्दयंतंनाशयंतंरुदतःछां॥दृशः॥भाषयंतीभयमुत्पादयंती॥अवागु

तामात्तयष्टिंप्रसमीक्ष्यसत्वरस्ततोवरुह्यापससारभीतवत्॥गोप्यन्वधावन्नयमापयोगिनांक्षमंप्रवेष्टुंतपसेरितंमनः॥९॥अन्वंचमानाजननी
बृहच्चलच्छ्रोणीभराक्रांतगतिःसुमध्यमा॥जवेनविस्रंसितकेशबंधनच्युतप्रसूनानुगतिःपरामृशत्॥१०॥कृतागसंतंप्ररुदंतमक्षिणीकषंत
मंजन्मषिणीस्वपाणिना॥उद्वीक्षमाणंभयविह्वलेक्षणंहस्तेगृहीत्वाभिषयंत्यवागुरत्॥११॥त्यक्त्वायष्टिंसुतंभीतंविज्ञायार्भकवत्सला॥इ
येषकिलतंबद्धुंदाम्नातद्वीर्यकोविदा॥१२॥नचांतर्नबहिर्यस्यनपूर्वंनापिचापरं॥पूर्वापरंबहिश्चांतर्जगतोयोजगच्चयः॥१३॥ ॥ ॥

रत्॥अतर्जयत्॥११॥इयेषऐच्छत्॥अतद्वीर्यकोविदातस्यज्ञानवानभिज्ञा॥१२॥अकोविदत्वमेवाह॥बंधनंहिबहिःपरिहितेनदाम्नाअंतरावृतस्यभवति॥तथापू
र्वापरविभागवतोवस्तुनःपूर्वतोदामधृत्वापरितःपरिवेष्टनेनभवतिनत्वेतदस्त्यात्॥नचांतरिति॥किंच॥व्यापकेनव्याप्यस्यबंधोभवतिनत्वविप
रीतमित्याह॥पूर्वापरमिति॥किंच॥तद्व्यतिरिक्तस्यचज्ञानाभावान्नदाम्नबंधस्त्स्यात्॥जगच्चयइति॥१३॥ ॥श्रीरामायनमः॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं मर्त्यलिंगमधोक्षजं आत्मानं मर्त्यवद्बबंधेति ॥१४॥ द्व्यंगुलोनं द्वाभ्यामंगुलाभ्यामूनमपूर्णं ॥१५॥१६॥ स्मितं कुर्वतीनां मध्ये स्वयमपि हसंती विस्मयमाप ॥१७॥१८॥ न चैवं
स्वातंत्र्यभिन्नं नेत्याह ॥ एवं संदर्शितेति ॥ सेश्वरमिदं विश्वं यस्य वशे श्रेयः परधानमित्यर्थः ॥१९॥ नायं भगवत्प्रसादमन्येति न कालनंते ॥ इदं त्वतिचित्रमिति सरोमांचितमाह

तं मत्वात्मजमव्यक्तं मर्त्यलिंगमधोक्षजं ॥ गोपिकोलूखले दाम्ना बबंध प्राकृतं यथा ॥१४॥ तद्दाम बध्यमानस्य स्वार्भकस्य कृतागसः ॥ द्व्यंगु
लोनमभूत्तेन संदधेन्यच्च गोपिका ॥१५॥ यदासीत्तदपि न्यूनं तेनान्यदपि संदधे ॥ तदपि द्व्यंगुलं न्यूनं यद्यदादत्त बंधनं ॥१६॥ एवं स्वगेह
दामानि यशोदा संदधत्यपि ॥ गोपीनां सुस्मयंतीनां स्मयंती विस्मिताभवत् ॥१७॥ स्वमातुः स्विन्नगात्राया विस्रस्तकबरस्रजः ॥
दृष्ट्वा परिश्रमं कृष्णः कृपयासीत्स्वबंधने ॥१८॥ एवं संदर्शिता ह्यंग हरिणा भक्तवश्यता ॥ स्ववशेनापि कृष्णेन यस्येदं सेश्वरं वशे ॥
१९॥ नेमं विरिंचो न भवो न श्रीरप्यंगसंश्रया ॥ प्रसादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदात् ॥२०॥ नायं सुखापो भगवान् देहिनां
गोपिकासुतः ॥ ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह ॥२१॥ कृष्णस्तु गृहकृत्येषु व्यग्रायां मातरि प्रभुः ॥ अद्राक्षीदर्जु
नौ पूर्वं गुह्यकौ धनदात्मजौ ॥२२॥ पुरा नारदशापेन वृक्षतां प्रापितौ मदात् ॥ नलकूवरमणिग्रीवाविति ख्यातौ श्रियान्वितौ ॥२३
॥ ॥ इति श्रीभागवते दशमस्कंधे गोपीप्रसादो नाम नवमोध्यायः ॥९॥ ॥ ॥ नेममिति ॥ विरिंच्यः पुत्रोपि भवः स्वात्मापि श्रीर्जायापि ॥२० राम: २९
॥ फलितमाह ॥ नायमिति ॥ देहिनां देहाभिमानिनां ॥ तापसादीनां ज्ञानिनां निवृत्ताभिमानानामपीति ॥२१॥ नत्वेवं दुस्याप्यन्यमोचकत्वमाह ॥ कृष्णस्त्विति ॥
२२॥२३॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे टीकायां नवमोध्यायः ॥९॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दत्तामेऽपात यदिगंब्लंतरायमलार्जुनौ ॥ तत्र तान्यांच देवाभ्यां रुद्रः स्तुत इत्यार्यते ॥१॥ यद्विगर्हितं कर्म येन वा देवर्षेर्भगवतो तमस्यापितमः क्रोधस्तदेतत्क-
थ्यतामिति ॥१॥२॥३॥ गंगायामंतर्मध्ये ॥ कथंभूते ॥ अंभोजानां वनानि तेषां राजयस्ता विद्यंते यस्मिन् ॥४॥ अपश्यत् दृष्ट्वा च क्षीबाणौ मत्तौ समबुध्यत
॥५॥ कृतरसमत आह ॥ तं दृष्ट्वेति ॥ अनुग्रहार्थाय अनुग्रह इत्यमदनाशः ॥ अर्थश्चश्रीकृष्णदर्शनं तदर्थमिदं वक्ष्यमाणं न ह्यन्य इत्यादि ॥७॥ जोष्या

राजोवाच ॥ ॥ कथ्यतां भगवन्नेतत्तयोः शापस्य कारणं ॥ यत्तद्विगर्हितं कर्म येन वा देवर्षेस्तमः ॥१॥ श्रीशुक उवाच ॥ ॥ रुद्रस्यानुचरौ भू-
त्वा सुदृप्तौ धनदात्मजौ ॥ कैलासोपवने रम्ये मंदाकिन्यां मदोत्कटौ ॥२॥ वारुणीं मदिरां पीत्वा मदाघूर्णितलोचनौ ॥ स्त्रीजनैरनुगाय-
द्भिश्चेरतुः पुष्पिते वने ॥३॥ अंतः प्रविश्य गंगायामंभोजवनराजिनि ॥ चिक्रीडतुर्युवतिभिर्गजाविव करेणुभिः ॥४॥ यदृच्छया च देव-
र्षिर्भगवांस्तत्र कौरव ॥ अपश्यन्नारदो देवौ क्षीबाणौ समबुध्यत ॥५॥ तं दृष्ट्वा व्रीडिता देव्यो विवस्त्राः शापशंकिताः ॥ वासांसि पर्यधुः शीघ्रं विव-
स्त्रौ नैव गुह्यकौ ॥६॥ तौ दृष्ट्वा मदिरामत्तौ श्रीमदांधौ सुरात्मजौ ॥ तयोरनुग्रहार्थाय शापं दास्यन्निदं जगौ ॥७॥ ॥ श्रीनारद उ० ॥ ॥ दा
न ह्यन्यो जुषतो जोष्यान्बुद्धिभ्रंशो रजोगुणः ॥ श्रीमदादाभिजात्यादिर्यत्र स्त्री द्यूतमासवः ॥८॥ हन्यंते पशवो यत्र निर्दयैरजितात्मभि-
ः ॥ मन्यमानैरिमं देहमजरामृत्युनश्वरं ॥९॥ ॥ नृप्रियान् विषयान् जुषतः सेवमानस्य पुंसः श्रीमदादन्यः आभिजात्यादिः सत्कुलविद्यादिजनि-
तो मदः अन्यो वा रजोगुणः रजःकार्यः हास्यहर्षादिरूपो न दितया बुद्धिभ्रंशः बुद्धिं भ्रंशयतीति तथा किंतु श्रीमद एवेति ॥ तदाह ॥ यत्रेत्यादि चतुर्भिः ॥ यत्र श्रीमदे ॥
८ ॥ यत्र श्रीमदे इमं नश्वरं देहं अजरामृत्यु अजरश्च अमृत्युश्च यथा मन्यमानैः ॥९॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०द०पू०
३०

नरदेवन्नृदेवसंज्ञितमपिश्वादिभिर्भक्षितं विट्संज्ञितं॥ दग्धंचेद्भस्मसंज्ञितं॥ अन्यदाकृमिसंज्ञितं॥ तत्कृते तदर्थं योनुतध्रुक्द्रोग्धा॥ यतोभूतद्रोहान्निरयोभवति॥
सकिंस्वार्थंवेदनवेदैवेत्यर्थः॥१०॥ निषेक्तुःपितुः॥ मातुर्वामातामहस्यपुत्रिकाकरणे॥११॥ अव्यक्तप्रभवाप्ययं अव्यक्तात्प्रभवस्तस्मिन्नेवाप्ययोयस्यतं
॥आत्मसात्कृत्वा आत्मेतिमत्वा॥ असतोमूढादृते॥१२॥ एवंश्रीमद्विचेष्टितंतत्प्रतिकारंनिश्चिनोति॥ असतइति॥ परंश्रेष्ठं॥ दारिद्र्यमेवकेवलमितिवा

देवसंज्ञितमप्यंतेकृमिविड्भस्मसंज्ञितं॥ भूतध्रुक्तत्कृतेस्वार्थंकिंवेदनिरयोयतः॥१०॥ देहःकिमन्नदातुःस्वंनिषेक्तुर्मातुरेववा॥ मातुःपितुर्वाबलिनः
क्रेतुरग्नेःशुनोपिवा॥११॥ एवंसाधारणंदेहमव्यक्तप्रभवाप्ययं॥ कोविद्वानात्मसात्कृत्वाहंतिजंतूनृतेऽसतः॥१२॥ असतःश्रीमदांधस्यदारिद्र्यं
परमांजनं॥ आत्मौपम्येनभूतानिदरिद्रःपरमीक्षते॥१३॥ यथाकंटकविद्धांगोजंतोर्नेच्छतितांव्यथां॥ जीवसाम्यंगतोलिंगैर्नतथाऽविद्धकं
टकः॥१४॥ दरिद्रोनिरहंस्तंभोमुक्तःसर्वमदैरिह॥ कृच्छ्रंयदृच्छयाप्नोतितद्धितस्यपरंतपः॥१५॥ नित्यंक्षुत्क्षामदेहस्यदरिद्रस्यान्नकांक्षिणः
॥इंद्रियाणिप्रशुष्यंतिहिंसापिविनिवर्तते॥१६॥ दरिद्रस्यैवयुज्यंतेसाधवःसमदर्शिनः॥ सद्भिःक्षिणोतितंतर्षंततआराद्विशुद्ध्यति॥१
७॥ साधूनांसमचित्तानांमुकुंदचरणैषिणां॥ उपेक्ष्यैःकिंधनस्तंभैरसद्भिरसदाश्रयैः॥१८॥ तदहंमत्तयोर्माध्व्या वारुण्याश्रीमदांध
योः॥ तमोमदंहरिष्यामिस्त्रैणयोरजितात्मनोः॥१९॥ यदिमौलोकपालस्यपुत्रौभूत्वातमःप्लुतौ॥ नविवाससमात्मानंविजानातःसुदु
॥कुतइत्यआह॥ आत्मौपम्येनेति॥ ततोनद्रुह्यति॥ मुखम्लान्यादिलिंगैःसर्वेषांजीवानांसुखदुःखेसमेइतिज्ञातवानित्यर्थः॥१४॥ किंचदारिद्र्यंमो र्मदौ॥२०॥
हमपिसाधयतीत्याह॥ दरिद्रइतिश्लोकचतुष्टयेन॥ निरहंस्तंभोनिर्गतअहंकाररूपःस्तंभोयस्मात्सः॥१५॥१६॥ युज्यंतेस्वतएवसंगंइच्छंते॥ तर्षंतृष्णां॥१७॥ ननुसा
धूनामपिधनिकएवप्रियःस्यान्नदरिद्रइति॥ तत्राहसाधूनामिति॥ धनेनस्तंभोगर्वोयेषांतैः॥१८॥ तमोमदंअज्ञानकृतंमदं॥ तमःप्लुतौतमोव्याप्तौ॥१९॥२०॥

राम:
३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वापत्तिअतः अर्हत इति॥अनुग्रहस्तु तिस्यातां नैवमित्यादिना॥मत्प्रसादेन स्मृतिः स्यात्॥२१॥स्वर्लोकतां देवत्वं पुनर्लब्ध्वा मदनुग्रहात् तत्र ध्रुवक्त्वा नविष्यत इति
॥२२॥२३॥प्रस्तुतमाह॥ऋषेरिति॥२४॥किमिति सत्यं कर्तव्यं तत्राह॥देवर्षेरिति॥यद्यतः तत्र तः॥२५॥यमयोर्यमलयोः सहजातयोः अन्तरेण मध्यस्यतन्म
ध्यप्रवेशमात्रेण॥२६॥अनु अंचता नयन्तकृ॥तत्र हेतुः दामोदरेणेति॥उत्कलितः उत्पाटितः अंघ्रिबंधो ययोस्तौ॥परमस्य श्रीकृष्णस्य विक्रमितं विक्रमस्तेनातिति
वेपः पंको येषु ते स्कंधप्रवालविटपा ययोस्तौ॥२७॥ककुभः प्रति सर्वतः स्फुरंतौ विस्पष्टौ॥यद्वा दिशः प्रकाशयंतावित्ति॥कुजयोः वृक्षयोः स्थितो गिरार्यथा

अतोऽर्हतः स्थावरतां स्यातां नैवं यथा पुनः॥स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात्॥२१॥वासुदेवस्य सान्निध्यं लब्ध्वा दिव्यशरच्छते॥वृत्ते स्वर्लो
कतां भूयो लब्धभक्ती भविष्यथः॥२२॥शुक उ०॥ ॥एवमुक्त्वा स देवर्षिर्गतो नारायणाश्रमं॥नलकूवरमणिग्रीवावासतुर्यमलार्जुनौ॥२३॥ऋ
षेर्भागवतमुख्यस्य सत्यं कर्तुं वचो हरिः॥जगाम शनकैस्तत्र यत्रास्तां यमलार्जुनौ॥२४॥देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ॥तत्तथा
साधयिष्यामि यद्गीतं तन्महात्मना॥२५॥इत्यंतरेणार्जुनयोः कृष्णस्तु यमयोर्ययौ॥आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलं॥२६॥बालेन निःकर्षय
तान्वगुलूखलं तद्दामोदरेण तरसोत्कलितांघ्रिबंधौ॥निःपेततुः परमविक्रमितातिवेपस्कंधप्रवालविटपौ कृतचंडशब्दौ॥२७॥तत्र श्रिया परमया
ककुभः स्फुरंतौ सिद्धावुपेत्य कुजयोरिव जातवेदाः॥कृष्णं प्रणम्य शिरसाखिललोकनाथं बद्धांजलिः विरजसाविदमूचतुः स्म॥२८॥कृष्णकृष्ण
महायोगिंस्त्वमाद्यः पुरुषः परः॥व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः॥२९॥ ॥

मूर्तिमानुपैतितयोपेत्य विरजसौ निर्मदौ॥२८॥गोपालं मां
सुवां देवौ किमिति प्रणतावितिचेत् तत्राहतुः॥हे कृष्ण कृष्ण महायोगिन् अचिंत्यप्रभावस्त्वं न बालः किंतु परः पुरुषः॥यत आद्यः कारणन्तत्रापि न निमि
त्तमात्रं किंतूपादानमपि त्वमेवेत्याशयेनाहतुः॥व्यक्ताव्यक्तमिति॥स्थूलसूक्ष्ममिदं ते रूपं विदुः॥२९॥ ॥श्रीरामाकृष्णाय नमः॥ ॥॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० पू०
३१

नियंतापित्वमेवेत्यूचतुः॥ त्वमेक इति॥ देहः असवः प्राणाः आत्माहंकारः इंद्रियाणि च तेषामीश्वरः॥३०॥ न त्वस्य कालो निमित्तं प्रकृतिरुपादानं प्र-
कृतेर्जातो महान्विश्वात्मतयोपरिणमते पुरुषः कर्ता नियंता च किमत्राहमत आहतुः॥ त्वमेव काल इत्यादिना सार्धेन॥ यतो भगवानीश्वरो विष्णु-
स्त्वमतः कालोनामत्वंलोलो॥ प्रकृतिः शक्तिः॥ पुरुषोंशः॥ महान्कार्यं अतस्त्वमेव सर्वमित्यर्थः॥ ननु त्वमेव चेत्सर्वं तर्हि घटादिज्ञानेनेव तज्ज्ञा-
नं किं न भवति न भवति न भवति चेत्सर्वोपि ब्रह्मविस्यात् अत आहतुः॥ गृह्यमाणैरिति॥ दृश्यत्वेन वर्तमानैर्बुद्ध्यहंकारेंद्रियादिभिः ईश्यस्त्वं न गृह्यस इति

त्वमेकः सर्वभूतानां देहास्वात्मेंद्रियेश्वरः॥ त्वमेव कालो भगवान्विष्णुरव्यय ईश्वरः॥३०॥ त्वं महान्प्रकृतिः साक्षाद्रजःसत्वत-
मोमयी॥ त्वमेव पुरुषोऽध्यक्षः सर्वक्षेत्रविकारवित्॥३१॥ गृह्यमाणैस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः॥ कोन्विहार्हति विज्ञातुं प्राक्-
सिद्धं गुणसंवृतः॥३२॥ तस्मै तुभ्यं भगवते वासुदेवाय वेधसे॥ आत्मद्योतगुणैश्छन्नमहिम्ने ब्रह्मणे नमः॥३३॥ यस्यावता-
रा ज्ञायंते शरीरेष्वशरीरिणः॥ तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः॥३४॥ स भवान्सर्वलोकस्य भवाय विभवाय च॥ अवती-
र्णोंऽशभागेन सांप्रतं पतिराशिषां॥३५॥ नमः परमकल्याण नमः परममंगल॥ वासुदेवाय शांताय यदूनां पतये नमः॥३६॥ ॥

भावः॥ ननु तर्हि त्वाबोधानात्वैवेत्याहतुः॥ कोन्विहेति॥ जीवायुत्पत्तेः प्रागेव स्वप्रकाशतया सिद्धं त्वां को वा जानाति॥ गुणसंवृतः देहाद्यावृतः॥
३२॥ अतो दुर्ज्ञेयत्वात्केवलं प्रणमतः तस्मै तुभ्यमिति॥ आत्मनः स्वस्मात् द्योतः प्रकाशो येषां तैर्गुणैश्छन्नो महिमा यस्य॥ अग्नेरिव रविः तस्मै॥३३॥
अशोऽहमीश्वर इति कृतो ज्ञातं तत्राहतुः यस्येति॥२४॥ भवायोद्भवाय॥ विभवाय विगतो भवो यस्मिन् तस्मै कैवल्यायेत्यर्थः॥३५॥ ॥३६॥ ॥

राम:
३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नौ आवां॥ अनुचरः कुबेरो नारदो वा तस्य किंकरौ॥ भगवतस्तव दर्शनं॥ ३७॥ तत्र गतयोरावयोः पूर्वस्वभावो माभूत्॥ किंतु वाणी गुणानुकथन इत्यादि॥ नः अस्मदीययोरिति द्विवच
नस्थाने बहुवचनं॥ अस्मत्संगिनां सर्वेषामपीति वा बहुवचनं॥ तव निवासभूतं यं यं तेषां जगत्तस्य प्रणामे त्वन्निवासभूतमिति बहुमानेन जगतः प्रणामे शिरोऽस्त्वित्यर्थः॥
भवत्तनूनां भवतो मूर्तीनां॥ ३८॥ संकीर्तितः संस्तुतः॥ ३९॥ वाग्भिर्[illegible] श्रीविभ्रंशरूपोऽनुग्रहः कृत इति॥ ४०॥ युक्तमेवैतदित्या

अनुज्ञातौ हि तौ भूमन्संस्तवानुचरकिंकरौ॥ दर्शनं नौ भगवत ऋषेरासीदनुग्रहात्॥ ३७॥ वाणी गुणानुकथने श्रवणौ कथायां हस्तौ च कर्मसु मनस्तव
पादयोर्नः॥ स्मृत्यां शिरस्तव निवासजगत्प्रणामे दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनां॥ ३८॥ श्रीशुक उ०॥ ॥ इत्थं संकीर्तितस्ताभ्यां भगवान्गोकु
लेश्वरः॥ दाम्ना चोलूखले बद्धः प्रहसन्नाह गुह्यकौ॥ ३९॥ श्रीभगवानु०॥ ॥ [illegible]
ज्ञातं मम पुरैवैतदृषिणा करुणात्मना॥ यच्छ्रीमदांधयोर्वाग्भिर्विभ्रंशोऽनुग्रहः कृतः॥ ४०॥ साधूनां समचित्तानां सुतरां मत्कृतात्मनां॥ दर्शनान्नो
भवेद्बंधः पुंसोऽक्ष्णोः सवितुर्यथा॥ ४१॥ तद्गच्छतं मत्परमौ नलकूवर सादनं॥ संजातो मयि भावो वामीप्सितः परमोऽभवः॥ ४२॥ श्रीशुक उवा
च॥ ॥ इत्युक्तौ तौ परिक्रम्य प्रणम्य च पुनः पुनः॥ बद्धोलूखलमामंत्र्य जग्मतुर्दिशमुत्तरां॥ ४३॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे द्रु
मपातनो नाम दशमोऽध्यायः॥ १०॥

३॥ साधूनां स्वधर्मवर्तिनां॥ समचित्तानामात्मविदां॥ सुतरां मत्कृतात्मनां मय्यर्पितचित्तानां तेषां कृपातिरेकात्सुतरामित्युक्तं॥
सवितुर्दर्शनादक्ष्णोर्यथा बंधो न भवेत्तद्वत्॥ ४१॥ प्राधान्यादेकस्य संबोधनं॥ हे नलकूवर युवां तत्तस्मात्सादनं सदनं स्वनिकेतनं मत्परमौ संतौ गच्छतं॥ युवयोरपेक्षितो मयि प्रेमा
जात एव॥ अभवः न भवो यस्मिन्सः॥ ४२॥ बद्धोलूखलं बद्धमुलूखलं यस्मिंस्तं॥ ४३॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे द्रुमपातनो नाम दशमोऽध्यायः॥ १०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकांदत्रोसमागत्यवृंदावनमथा॰र्भकैः॥ वत्सपान्पालयता॰नेनहतौवत्सबकासुरौ॥१॥ निर्घातोवज्रपातइतिजनितभयेनशंकिताः॥२॥ तद्धत्स्तंभप्रत्यक्षंततपुरतोद
शामपिपतनकारणमविज्ञायबभूवुः॥२॥ लक्ष्यैकारणंदर्शयति॥ उलूखलमिति॥ ज्जमप्रकारमाह॥ कस्येदंराद्भसादेःकर्म॥ कुतोवाकारणात्॥ अहोअश्चर्यं
॥ इतिकातराःभाताःसंतोबभूवुरित्यर्थः॥३॥ मध्यगेनवृक्षयोर्मध्यगतेननकेवलमेतावत्॥ दृष्टाःत्यांनिर्गतौदिव्यौपुरुषावप्यचक्ष्महि॥ दृष्टवंतोवयमिति

॥श्रीशुकउवाच॥ ॥गोपानंदादयःश्रुत्वाद्रुमयोःपततोरवं॥ तत्राजग्मुःकुरुश्रेष्ठनिर्घातभयशंकिताः॥१॥ भूम्यांनिपतितौ
तत्रददृशुर्यमलार्जुनौ॥ बभ्रमुस्तदविज्ञायलक्ष्यंपतनकारणं॥२॥ उलूखलंविकर्षंतंदाम्नाब द्धंचबालकं॥ कस्येदंकुतआ
श्चर्यमुत्पातइतिकातराः॥३॥ बालाऊचुरनेनेतितिर्यग्गतमुलूखलं॥ विकर्षतामध्यगेनपुरुषावप्यचक्ष्महि॥४॥ नतेतदु
क्तंजगृहुर्नघटेतेतितस्यतत्॥ बालस्योत्पाटनंतर्वोःकेचित्संदिग्धचेतसः॥५॥ उलूखलंविकर्षंतंदाम्नाबद्धंस्वमात्मजं॥ वि
लोक्यनंदःप्रहसद्वदनोविमुमोचह॥६॥ गोपीभिःस्तोभितोनृत्यद्भगवान्बालवत्क्वचित्॥ उद्गायतिक्वचिन्मुग्धस्तद्वशो॰
दारुयंत्रवत्॥७॥ बिभर्तिक्वचिदाज्ञप्तःपीठकोन्मानपादुकं॥ बाहुक्षेपंचकुरुतेस्वानांचप्रीतिमावहन्॥८॥ ॥ ॥

॥४॥ केवलंतार्किकान्नगृहुरेव॥ अन्येतुसंदेहयुक्ताबभूवुरिति॥५॥ भगवन्मायाविमोहितस्यनंदस्याचरितमाह॥ उलूखलमिति॥६॥ ज्ञात्वासंतेमायामिश्रं
कमानो॰तीवबाल्यमनुकरोतिस्मतदाह॥ गोपीभिरिति॥ स्तोभितःकरतलादिनाप्रोत्साहितः॥७॥ इदमानयेत्युक्तःआनेतुमसमर्थइवबिभर्तिकेवलंपी
ठादिबाहुक्षेपकरचालनंचतद्विदांचेतिचकारस्यान्वयः॥८॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत् ऐश्वर्यं विंदंति ये तेषां ॥ ए एवं व्रजस्य हर्षमुवाहेति ॥ १ ॥ रंडं वृंदावनं गंडुमंतः कृत्स्नेन यंत्रिताः स्वतंत्रा इव नंदाद्या मंत्रमेतममंत्रयन् ॥ व्रजकार्यं गोकुलस्य हितकृत्यं ॥ १ ॥

दर्शयंस्तद्देदां लोक आत्मनो त्वस्य वत्सपतां ॥ व्रजस्योवाह वै हर्षं भगवान् बालचेष्टितैः ॥ ९ ॥ सरात्रौ रगतं कृष्णं भग्नार्जुनम याकयन् ॥ जन्मर्क्षमयन व तो विप्रेभ्यो देहि गाः शुचिः ॥ १० ॥ परप फ्ल पवयसांस्तेमात्भम षान् स्वलंकृतान् ॥ त्वं च स्नातः कृताहारो विरह स्व स्वलंकृता ॥ ११ ॥ नोपयातां यदाहूतौ क्रीडासंगेन पुत्रकौ ॥ यशोदां प्रेषयामास रोहिणी पुत्रवत्सलां ॥ १२ ॥ कृच्छ्रं यशोदातमक्रोषशेषरं मत्वा सुतं स्नेहनि बद्धधीर्नृप ॥ इस्नेग राखा राम मच्युतं नीत्वा स्ववार्द्दं कृतवत्स यो दयं ॥ १३ ॥ क्रीडंतं सा सुतं बालैरतिवेलं सहाग्रजं ॥ यशोदाभ्नो हवा कृष्णं पुत्रस्नेहस्तुतं स्तना ॥ १४ ॥ कृष्ण कृष्णारविंदाक्ष तात एहि स्तनं पिब ॥ अलं विहारैः क्षुत क्षांत क्रीडाश्रांतोसि पुत्रक ॥ १५ ॥ हे रामागच्छ ताताशु सानुजः कुलनंदन ॥ प्रातरेव कृताहारस्तद्भवान् भोक्तुमर्हति ॥ १६ ॥ प्रती ... त ते त्वां दाशार्ह भो क्ष्य माणो व्रजाधिपः ॥ एह्यावयोः प्रियं धेहि स्वगृहान्यातम बालकः ॥ १७ ॥ ॥ श्रीशुक उ० ॥ ॥ गोपवृद्धा महोत्पातानतुभूय वृहद्वने ॥ नंदादयः समागम्य व्रजकार्यममंत्रयन् ॥ १८ ॥ तत्रोपनंदनामाह गोपो ... ज्ञानवयोधिकः ॥ देशकालार्थतत्त्वज्ञः प्रियकृद्रामकृष्णयोः ॥ १९ ॥ उ० ... च्छातव्यमितोस्माभिर्गोकुलस्य हितैषिभिः ॥ आयांत्यत्र महोत्पाता बालानां नाशहेतवः ॥ २० ॥ मुक्तः कथंचिद्राक्षस्या बालघ्न्या बालकोह्यसौ ॥ हरेरनुग्रहान्नूनमनश्चोपरि नापतत् ॥ २१ ॥ चक्रवातेन नीतोयं दैत्येन विपदं वियत् ॥ शिलायां पतितस्तत्र परित्रातः सुरेश्वरैः ॥ २२ ॥ यन्नम्रियेत द्रुमयोरंतरं प्राप्य बालकः ॥ असावन्यतमो वापि तदप्यच्युतरक्षणं ॥ २३ ॥ ॥ ॥

२१ ॥ २२ ॥ २३ ॥ विपदं वनां पक्षिणां पदं विहारस्थानं वियत् ॥ विगतप्रतिष्ठं वा ॥ २४ ॥ अन्यतमो वाकश्चिद्बालः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ २२ ॥ तत्रापि अच्युतेनैव रक्षणमासीत् ॥ २३ ॥

भा० द० पू०
३३

अरिष्टः अनर्थः॥ इतः स्थानात्॥२४॥ पशव्यं पशुभ्यो हितं॥ नवानि काननानि स्वांतराणि विद्यंते यस्मिन्तत्॥२५॥२६॥ एकधियः विप्रतिरहिताः॥ व्रजान्शकटव्यूहान्॥ रू

यावदौत्पातिकोरिष्टोव्रजंनाभिनवेदितः॥ तावद्बालानुपादाययास्यामोन्यत्रसानुगाः॥२४॥ वनंवृंदावनंनामपशव्यंनवकाननंव॥ गो
पगोपीगवांसेव्यंपुण्याद्रितृणवीरुधं॥२५॥ तत्तत्राद्यैवयास्यामःशकटान्युंक्तमाचिरं॥ गोधनानिपुन्यग्रतोयांतुभव
तांयदिरोचते॥२६॥ तच्छ्रुत्वैकधियोगोपाःसाधुसाध्वितिवादिनः॥ व्रजान्स्वान्स्वान्समायुज्यययूरूढपरिच्छदाः॥२७॥
वृद्धान्बालान्स्त्रियोराजन्सर्वोपकरणानिच॥ अनःस्वारोप्यगोपालायत्ताआत्तशरासनाः॥२८॥ गोधनानिपुरस्कृ
त्यशृंगाण्यापूर्यसर्वतः॥ तूर्यघोषेणमहताययुःसहपुरोहिताः॥२९॥ गोप्योरूढरथानूत्नकुचकुंकुमकांतयः॥ कृष्ण
लीलाजगुःप्रीतानिष्ककंठ्यःसुवाससः॥३०॥ तथायशोदारोहिण्यावेकंशकटमास्थिते॥ रेजतुःकृष्णरामाभ्यांतत्कथा
श्रवणोत्सुके॥३१॥ वृंदावनंसंप्रविश्यसर्वकालसुखावहं॥ तत्रचक्रुर्व्रजावासंशकटैरर्धचंद्रवत्॥३२॥ वृंदावनंगोवर्द्ध
नंयमुनापुलिनानिच॥ वीक्ष्यासीदुत्तमाप्रीतीराममाधवयोर्नृप॥३३॥

॥ढाःशकटारोपिताःपरिच्छदायेस्ते॥२७॥ यत्ता
ःकृतप्रयत्नाः॥२८॥२९॥ नूत्नैःकुचगतैःकुंकुमैःकांतिर्यासांताः॥ नूत्नेषुकुचेषुयत्कुंकुमंतेनकांतिर्यासामितिवा॥३०॥३१॥ व्रजावासंगोकुलवसतिस्थानं॥
॥३२॥३३॥

राम०
३३

स्वकालेन तद्योगकालेन ॥ २४ ॥ कौमारलीलां निरूपयति ॥ अविदूर इत्यादिना ॥ २५ ॥ क्षेपणैः बिल्वामलकादिभिः ॥ किंकिणीयुक्तैः पादैः क्षिपतः ताडयतः ॥ व
त्सपालाः एव द्विजन्मानः वस्त्रकंबलादिपिहिताः वृषरूपमनुकुर्वंति ॥ तैः सह स्वयमपि तथैव वृषायमाणौ ॥ नर्दंतौ तदनुकारिशब्दान् कुर्वंतौ ॥ युयुधातरस्त्वर्थः

एवं क्रीडौ कस्मां प्रातिर्यच्छंतौ बालचेष्टितैः ॥ कलवाक्यैः स्वकालेन वत्सपालौ बभूवतुः ॥ २४ ॥ अविदूरे व्रजभुवः सह गोपालदारकैः
॥ चारयामासतुर्वत्सान्नानाक्रीडापरिच्छदैः ॥ २५ ॥ क्वचिद्वादयतो वेणुं क्षेपणैः क्षिपतः क्वचित् ॥ क्वचित्पादैः किंकिणीभिः
क्वचित्कृत्रिमगोवृषैः ॥ २६ ॥ वृषायमाणौ नर्दंतौ युयुधाते परस्परं ॥ अनुकृत्य रुतैर्जंतूंश्चेरतुः प्राकृतौ यथा ॥ २७ ॥ कदाचि
द्यमुनातीरे वत्सांश्चारयतोः स्वकैः ॥ वयस्यैः कृष्णबलयोर्जिघांसुर्दैत्य आगमत् ॥ २८ ॥ तं वत्सरूपिणं वीक्ष्य वत्सयूथगतं हरिः ॥ दर्श
यन्बलदेवाय शनैर्मुग्ध इवासदत् ॥ २९ ॥ गृहीत्वापरपादाभ्यां सहलांगूलमच्युतः ॥ भ्रामयित्वा कपित्थाग्रे प्राहिणोद्गतजी
वितं ॥ ४० ॥ स कपित्थैर्महाकायः पात्यमानैः पपात ह ॥ तं वीक्ष्य विस्मिता बालाः शशंसुः साधु साध्विति ॥ ४१ ॥ देवाश्च परि
संतुष्टा बभूवुः पुष्पवर्षिणः ॥ तौ वत्सपालकौ भूत्वा सर्वलोकैकपालकौ ॥ ४२ ॥ सप्रातराशौ गोवत्सांश्चारयंतौ विचेरतुः
॥ ४३ ॥

॥ २६ ॥ रुतैः शब्दैः जंतून् हंसमयूरादीन् ॥ २७ ॥ २८ ॥ मुग्ध इव अजानन्निव आसदत् समीपमागमत् ॥ २९ ॥ अपरपादाभ्यां सलांगूलं यथा
भवति तथा गृहीत्वा ॥ ४० ॥ ४१ ॥ सर्वेषां लोकानामेकौ मुख्यौ पालकौ लोकपालकौ प्रातराशः प्रातर्भोज्यं अन्नं सहितौ ॥ ४२ ॥ ॥ ४३ ॥ ॥ श्रीरामाकृष्णाय नमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्यासंसमीपं॥४४॥४६॥राम आदिर्येषांतेनत्रामः॥४७॥४८॥तुंडयोःचंचोः॥वीरणवद्गंतघिरणविशेषवत्॥४९॥समूडिरे छुबुः॥आनकैःशंखैःअन्यैश्चसंस्त
वैःसह॥५०॥स्वस्थानमागतंप्राणमिवलब्ध्वा॥प्रणीयएकाकृत्स॥५१॥अतिप्रियेणप्रा॥आदृताःसादराः॥प्रेत्यागतमिवकालोत्तराद्गतमिव॥तृषितान्यत्रस्नानिअ

सवस्वंवत्सकुलंसर्वेपाययिष्यंतएकदा॥गत्वाजलाशयाभ्यासंपाययित्वापपुर्जलं॥५४॥तेतत्रददृशुर्बालामहासत्ववेमस्थितं॥तत्रसुवज्रनिर्भिन्नांगि
रेःशृंगमिवच्युतं॥५५॥सवैबकोनाममहानसुरोबकरूपधृक्॥आगत्यसहसाकृष्णंतीक्ष्णतुंडोग्रसद्बली॥५६॥कृष्णंमहाबकग्रस्तंदृष्ट्वारा
मादयोर्भकाः॥बभूवुरिंद्रियाणीवविनाप्राणंविचेतसः॥५७॥तंतालुमूलंप्रदहंतमग्निवद्गोपालसूनुंपितरंजगद्गुरोः॥चच्छर्दसद्योतिरुषाऽ
क्षतंबकस्तुंडेनहंतुंपुनरभ्यपद्यत॥५८॥तमापतंतंसनिगृह्यतुंडयोर्दोर्भ्यांबकंकंससखंसतांपतिः॥पश्यत्सुबालेषुददारलीलयामु
दावहोवीरणवद्दिवौकसां॥५९॥तदाबकारिंसुरलोकवासिनःसमाकिरन्नंदनमल्लिकादिभिः॥समीडिरेचानकशंखसंस्तवैस्तद्वीक्ष्य
गोपालसुताविसिस्मिरे॥५०॥मुक्तंबकास्यादुपलभ्यदारकारामादयःप्राणमिवेंद्रियोगणः॥स्थानागतंतंपरिरभ्यनिर्वृताःप्रणीय
वत्सान्व्रजमेत्यतज्जगुः॥५१॥श्रुत्वातद्विस्मितागोपागोप्यश्चातिप्रियादृताः॥प्रेत्यागतमिवौत्सुक्यादैक्षंततृषितेक्षणाः॥५२॥
अहोबतास्यबाहवोमृत्यवोऽभवन्॥अप्यासीद्विप्रियंतेषांकृतंपूर्वंयतोभयं॥५३॥ ॥श्रीरामाकृयनमः॥ ॥

मृतंपिबंतीवईक्षणानियेषांते॥२५॥अहोबतेत्यादिश्लोकत्रयस्यरतिनंदाहयरत्सनेनान्वयः॥अपिएवमपितेषामवानिष्टमासात्॥यतस्तैःपूर्वमन्येषांभयंकृतं
॥५३॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथघोरदर्शना अपिनाभिनवंति न धर्षयंति ॥५४॥ गर्गो यदाह तस्मात्त्वं दात्मजो यं तेना नारायणसमो गुणैरित्यादि ॥५५॥५६॥ वत्सयूथगतं हत्वा वत्सदंष्ट्रासुरं ह
रिः ॥ मुनियूथगतं बाहून्नग्न एषं दंभिनो बकं ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे एकादशोध्यायः ॥११॥ ॥ द्वादशे तु महासर्पव
पुर्ईरमघासुरं ॥ वत्सपालगिलं क्रुद्धो गलेरन्निति वर्ण्यते ॥१॥ महाबकगलक्रीडा केवलस्य न कौतुकं ॥ उक्तं ॥ इतीवाघासुरमुखे समरवः प्राविशद्धरि

अथाप्यभिनवंत्येनं नैधं ते घोरदर्शनाः ॥ निर्यांसयेनमासाद्य न शपेत्पग्नौ पतंगवत् ॥५४॥ अहो ब्रह्मविदां वाचो नासत्याः संति कर्हिचित् ॥ गर्गो य
दाह भगवानन्ववाविंतथैव तत् ॥५५॥ इति नंदादयो गोपाः कृष्णरामकथां मुदा ॥ कुर्वंतो रममाणाश्च नाविंदन्भववेदनां ॥५६॥ ॥ इति श्रीभा
गवते महापुराणे दशमस्कंधे वत्सबकोवधो नामैकादशोध्यायः ॥११॥ शुक उवाच ॥ ॥ क्वचिद्वनाशाय मनो दधद्व्रजात्प्रातः समुत्थाय वयस्य
वत्सपान् ॥ प्रबोधयन्शृंगरवेण चारुणा विनिर्गतो वत्सपुरःसरो हरिः ॥१॥ तेनैव साकं पृथुकाः सहस्रशः स्निग्धाः सुशिग्वेत्रविषाण
णवेणवः ॥ स्वकान्सहस्रोपरिसंख्ययान्वितान्वत्सान्पुरस्कृत्य विनिर्ययुर्मुदा ॥२॥ कृष्णवत्सैरसंख्यातैर्यूथीकृत्य स्ववत्सकान् ॥ चारयंतोर्भ
लीलाभिर्विजह्रुस्तत्र तत्र ह ॥३॥ फलप्रवालस्तबकसुमनःपिच्छधातुभिः ॥ काचगुंजामणिस्वर्णभूषिता अप्यभूषयन् ॥४॥ ॥

:॥२॥ क्वचित्कदाचिद्वनाशाय वन एव प्रथमं भोजनं कर्तुं ॥१॥ तेनैव शृंगरवेण श्रीकृष्णेन वा ॥ पृथुका बालाः ॥ स्निग्धाः स्नेहयुक्ताः ॥ शिक् शिक्यं ॥ रम्याः शिग्वेत्रादयो ये
षां ते ॥ ५ सहस्राधिकसंख्यायुक्तान्वत्सान् ॥२॥३॥ काचादिभिः पूर्वमात्रभिर्भूषिता अपि फलादिभिरात्मानमभूषयन्नित्यर्थः ॥४॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पू०
३५

मुल्लंतश्चोरयंतः॥५॥ यदि दूरंगतः रुल्लो नवतितत्तातिा॥६॥ ध्मांतः वादयंतः॥ नंगैः सह॥७॥ विछायाभिः॥ कलापिभिः मयूरैः॥८॥ कोशावालान् हृच्चशा॰
खासुलंबमाना निवानरलांगूल्ला निआकर्षयंतः॥ लांगूल्लमसुंचतः तैः सह हुमानारुइंत॥ विक्रुर्वतः दंतदर्शनं स्रूविजं नादिभिस्तैः रुइविकारान् कु
र्वतः॥ पलाशिषु वृक्षेषु प्लवंतः शाखायाः शाखांतरमुरुछंतः॥९॥ प्रतिछायाः प्रतिबिंबानि॥१०॥ तान तिविस्मितः स्त्रीकहृयेनाभिनिंदति॥१॰

मुल्लंतोः न्योन्मशिक्या हीन्सा तानाराच्चविचिक्षिपुः॥ तत्रत्या श्च पुनर्दूराद्दसंतश्च पुनर्ददुः॥५॥ यदि दूरंगतः रूल्लो वनशो नेच्चणा
यतं॥ अहं पूर्वमहं पूर्वमिति संस्पृत्य परेमिरे॥६॥ केचिद्देणुन्वादयंतोध्मांतः शृंगाणिकेचन॥ केचिन्नृंगैः प्रगायंतः कूजंतः कोकि
लैः परैः॥७॥ विछायाभिः प्रधावंतोगछंतः साधु हंसकैः॥ बकैरुपविशंतश्च नृत्यंतश्च कलापिभिः॥८॥ [illegible] कर्षतकौ
शावालानारोहंतश्च तैर्द्रुमान्॥ विक्रुर्वंतश्च तैः साकं प्लवंतश्च पलाशिषु॥९॥ साकं भेकैर्विलंघंतः सरित्स्रस्रवसंप्लुताः
॥ हसंतश्च प्रतिछा[illegible]नि[illegible]याः शपंतश्च प्रतिस्वनान्॥१०॥ इत्थं सतां ब्रह्मसुखानुभूत्या दास्यंगतानां परदैवतेन॥
मायाश्रितानां नरदारकेण साकं विजह्रुः रुतपुण्यपुंजाः॥११॥ ॥श्री श्रीरामायनमः॥ ॥ त्थमिति॥ सतां विदुषां ब्रह्म

चतत्सुखंच अनुभूतिश्च तयास्वप्रकाशपरमसुखेनेत्यर्थः॥ भक्तानां परदैवतेन आत्मप्रदेन नाथेन॥ मायाश्रितानां तु नरदारकतया प्रतीयमानेन सह विजह्रु
॥ रुतानां पुण्यानां पुंजाः राशयो येषां ते॥ ब्रह्मविदां तदनुभव एव॥ भक्तानामतिगौरवेणैव भजनं॥ इतरेतर सह सख्येन विजह्रुः॥ अहो भाग्यमित्यभिप्रायः॥११॥ रामः
३५

बहुजन्मभिः कृच्छ्रेण धृत आत्मा मनो यैस्तैरपि ॥२२॥ सुखक्रीडनवीक्षणेनक्षमायस्यसः ॥ कथंभूतः ॥ यस्यांतः अंतरं छिद्रं ॥ पीतामृतैरपितेनोमृत्युमतो तैरमरैः प्रतीक्ष्य
ते कदायंमरिष्यतीति कदावेति ॥ यद्वा ॥ कथंभूतं सुखक्रीडनं ॥ यत् अंतर्हृदये अमरैः प्रतीक्ष्यतेति विचिंत्यते ॥ पीतामृतैरपि निजजीवितेप्सुभिः ॥ अयंभाव ॥ नामृतपा
नमात्रेण जीवनं सफलं भवति ॥ किंतु भगवत्क्रीडानुस्मरणेनेति ॥ तदेवनित्यमंतश्चिंत्यतइति ॥२३॥ कृष्णमुखानर्भकान्दृष्ट्वासइतिव्यवस्य निश्चित्याजगरंवपुर्धृत्वा

यत्पादपांशुर्बहुजन्मकृछ्रधृतात्मभिर्योगिभिरप्यगम्यः ॥ सएषयद्दृग्विषयः स्वयंस्थितः किंवर्ण्यतेदिष्टमहोव्रजौकसां ॥२२॥ अथाघ
नामाभ्यपतन्महासुरस्तेषांसुखक्रीडनवीक्षणाक्षमः ॥ नित्यंयदंतर्निजजीवितेप्सुभिः पीतामृतैरप्यमरैः प्रतीक्ष्यते ॥२३॥ दृष्ट्वार्भका
न्कृष्णमुखानघासुरः कंसानुशिष्टः सबकीबकानुजः ॥ अयंतुमेसोदरनाशकृत्तयोर्द्वयोर्ममैनंसबलंहनिष्ये ॥२४॥ एतेयदा
मत्सुहृदोस्तिलापः कृतास्तदानष्टसमाव्रजौकसः ॥ प्राणेगतेवर्ष्मसुकानुचिंताप्रजासवः प्राणभृतोहियेते ॥२५॥ इतिव्यव
[illegible]स्याजगरंबृ[illegible]हद्वपुः सयोजनायाममहाद्रिपीवरं ॥ धृत्वाद्भुतंव्यात्तगुहाननंतदापथिव्यशेतग्रसनाशयाखलः ॥२६॥ ॥

तेषांग्रसनाशयापथिव्यशेतेतित्रितयेनान्वयः ॥ कंसेनानुशिष्टः प्रहितः ॥ बकीकापूतना ॥ कथंव्यवस्यतदाह ॥ अयंत्वितिसार्द्धेन ॥ ममतयोर्द्वयोः स्थानेएनंकृष्णंस
बलंससैन्यंवत्सवत्पालसहितंहनिष्यामि ॥२४॥ ननुतथापिव्रजस्थास्त्ववशिष्येरन्नेत्याह ॥ एतइति ॥ तिलापः कृताः तिलोदकतयाकल्पिताः ॥ वर्ष्मसुदेहे
षु ॥ प्रजाएवासवोयेषांतेतथा ॥२५॥ सयोजनायामंयोजनप्रमाणेनदैर्घ्येणयुक्तंचतन्महाद्रिवत्पीवरंच ॥ व्यात्तंप्रसारितंगुहातुल्यमाननंयस्मिन्तत् ॥२६॥

यस्य सः ॥ ४७ ॥ यशोदानंदसूनुनेति यशोदासूनुना नंदसूनुनेति बहूनामुक्तिः सर्वे वदन्ति ॥ यद्वा ॥ केचित्तु यशोदासूनुना अपरे नंदसूनुनेति ॥ यद्वा ॥ यशोदा

ऊचुश्च सुहृदः कृष्णं स्वागतं तेऽतिरंहसा ॥ नैकोऽप्यभोजि कवल एहीतः साधु भुज्यतां ॥ ४५ ॥ ततो हसन् हृषीकेशोऽभ्यवहृत्य सहा
र्भकैः ॥ दर्शयंश्चर्माजगरं न्यवर्तत वनाद्व्रजं ॥ ४६ ॥ बर्हप्रसूननवधातुविचित्रितांगः प्रोद्दामवेणुदलशृंगरवोत्सवाढ्यः ॥
वत्सान्गृणन्ननुगगीतपवित्रकीर्तिर्गोपीदृगुत्सवदृशिः प्रविवेश गोष्ठं ॥ ४७ ॥ अद्यानेन महाव्यालो यशोदानंदसू
नुना ॥ हतोऽविता वयं चास्मादिति बाला व्रजे जगुः ॥ ४८ ॥ ॥ राजोवाच ॥ ॥ ब्रह्मन्परोद्भवे कृष्णे इयान्प्रेमा कथं भवेत्
॥ योऽभूतपूर्वस्तोकेषु स्वोद्भवेष्वपि कथ्यतां ॥ ४९ ॥ ॥ शुक उ० ॥ ॥ सर्वेषामपि भूतानां नृप स्वात्मैव वल्लभः ॥ इतरेऽपत्यवित्ता
द्यास्तद्वल्लभतयैव हि ॥ ५०

नंदयतीति यशोदानंदः स चासौ सूनुश्चेति तथा तेन ॥ अस्मात् महाव्यालात् पंचाविता रक्षिताः ॥ ४८ ॥ व्रजौकसां स्वतोकेषु स्नेह इव
स्याष्टमवत्सं ॥ वानैर्नितिः सामवर्षं देयया कृष्णेव पूर्ववत्तस्यादिनास्वतोकेभ्योऽपि परपरपुत्रे कृष्णे प्रेमाधिक्यमुक्तं तत्र पृच्छति ॥ ब्रह्मन्निति ॥ ४९ ॥ श्रीकृष्ण
स्य स्वात्मत्वात्तस्मिन्नात्मनायेन्यः प्रेमाधिक्यं युज्यत इति वक्तुं प्रथमं तावदात्मनः स्वतः प्रेष्ठत्वमन्येषां तु तदुपाधिकमिति दर्शयति पंचभिः ॥ सर्वेषामि
ति ॥ ५० ॥

राम ५१

उतः तथार्देहर्शनादित्याह ॥ तद्दिति ॥ तस्मादेवकारणात्स्वकोस्वन्मनि अहंकारास्पदेपिदेहे ॥ ५२ ॥ आत्माध्यासतारतम्येनप्रेमतारतम्यंदर्श
मानंतन्निबंधनमेवेतिदर्शयितुंमूढामूढभेदेनविशेषमाह ॥ देहात्मवादिनारतिहात्मनां ॥ तंदेहमनुभवंति ॥ येपुत्रादयस्तेतुननतयाप्रियतमाइत्यर्थः ॥ ५२
यत्यस्माज्जीर्यत्यपि आसन्नमरणेपिजीविताशाभवति ॥ अयंभावः ॥ नजाविष्यताति निश्चितेपिदेहेयत्प्रेमास्पदत्वंतदात्मगतमेवसंगच्छतइति

तस्माजेंद्रय [illegible] थास्मिंदेहःस्वस्वकात्मनिदेहिनां ॥ तंतथाममतालंबिपुत्रवित्तगृहादिषु ॥ ५२ ॥ देहात्मवादिनांपुंसामपिराजन्यसत्तम ॥ यथा
देहःप्रियतमःस्तथानह्यनुयेचतं ॥ ५२ ॥ देहोपिममताभाक्चेत्तर्ह्यसौनात्मवत्प्रियः ॥ यज्जीर्यत्यपिदेहेस्मिन्जीविताशाबलीयसी ॥ ५३
॥ तस्मात्प्रियतमःस्वात्मासर्वेषामपिदेहिनां ॥ तदर्थमेवसकलंजगदेतच्चराचरं ॥ ५४ ॥ कृष्णमेनमवेहित्वमात्मानमखिलात्मनां ॥ जग
द्धितायसोप्यत्रदेहीवाभातिमायया ॥ ५५ ॥ वस्तुतोजानतामत्रकृष्णंस्थास्नुचरिष्णुच ॥ भगवद्रूपमखिलंनान्यद्वस्त्विहकिंचन ॥ ५६ ॥

॥ अथवायत्यस्मिन्देहेजीर्यत्यपिजीविताशाऽविवेकदशायामासीत्सापिविवेकिनोयदाममताभग्नवतितदातत्क्षणातावास्थेति ॥ ५३ ॥ तदर्थमेवसक
लंप्रियमित्यर्थः ॥ ५४ ॥ प्रस्तुतमाह ॥ कृष्णमेनमिति ॥ ५५ ॥ नकेवलमात्मनामात्मा अपितुजगज्जनामपीत्याह ॥ वस्तुतइति ॥ सर्वजगत्कारणमि
तिकृष्णंजानतांपुंसांस्थावरजंगमंचसर्वंभगवद्रूपंभगवानेवस्वरूपंयस्यतत्नान्यत् ॥ ५६ ॥ ॥ श्रीरामाकृष्णायनमः ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पू०
५२

ऊतम्भतितराउ॥ सर्वेषामिति॥ नानार्थः परमार्थः॥ नवस्तीति नवत्यरिणामं मा मास्तु वत्कारणं तस्मिन्॥ तस्यापि भगवान्कृष्णो नवत्कारणं॥ अतः किमेत
त् श्रीकृष्णव्यतिरिक्तं वस्तुरूप्यतां॥ ५७॥ तस्माच्छ्रीकृष्णस्यैव परमार्थत्वात्तदेकशरणानां अयत्नसिद्धो मोक्ष इति प्रकरणार्थमुपसंहरति॥ समाश्रिता इति॥ पुण्यं यस्य
स पुण्ययशाः स चासौ मुरारिश्च तस्य पादपल्लवप्लवं सत्वं ये सम्यगाश्रिताः महत्पदं महतां पदं मा श्रयं॥ यद्वा॥ महच्च तत्पदं चेति तथा॥ तेषां भवांबुधिर्वत्सपदमात्रं भ
वति॥ किंच॥ परं पदं श्रीवैकुंठाख्यं पदं स्थानं भवति॥ विपदां यत्पदं विषयस्तत्तु पुनः कदाचिदपि तेषां न भवति न वतः पुनरावृत्तिरित्यर्थः॥ ५८॥ ५९॥ सुहृद्भिश्च

सर्वेषामपि वस्तूनां भावार्थो भवति स्थितः॥ तस्यापि भगवान्कृष्णः किमतद्वस्तुरूप्यतां॥ ५७॥ समाश्रिता ये पदपल्लवप्लवं महत्पदं पुण्ययशो मु
रारेः॥ भवांबुधिर्वत्सपदं परं पदं पदं पदं यद्विपदां न तेषां॥ ५८॥ एतत्ते सर्वमाख्यातं यत्पृष्टोऽहमिह त्वया॥ यत्कौमारे हरिकृतं पौगंडे परिकीर्तितं॥ ५९॥ एत
त्सुहृद्भिश्चरितं मुरारेरघार्दनं शाद्वलजेमनं च॥ व्यक्तेतरद्रूपमजोर्वभिष्टवं शृण्वन्गृणन्नेति नरोऽखिलार्थान्॥ ६०॥ एवं विहारैः कौमा
रैः कौमारं जहतुर्व्रजे॥ निलायनैः सेतुबंधैर्मर्कटोत्प्लवनादिभिः॥ ६१॥ इति श्रीभागवते महापुराणे दशमस्कंधे चतुर्दशोऽध्यायः॥ १४॥ ॥

रितं मुहृत्तो ऽघोन्मथिः अघस्यादानिरूपादिनोक्तं अघार्दनं च शाद्वलजेमनं भोजनं च व्यक्तेतरं व्यक्तात्पंचात् इतरत्स्वरूपमत्वा केवलवत्सतत्पालरूपं॥ य राम:
द्वाव्यक्तेतरः चिद्विलासः तं रूप्यत इति रूपं॥ अजस्योरुमहान्भिष्टवः स्तवस्तं॥ ब्रह्मकृतां स्तुतिं॥ एतच्छृण्वन्गृणन्नरः सर्वपुरुषार्थान्प्राप्नोति॥ ६०॥ इति श्री ५२
परमानंदनसिंहपषट्टः॥ व्याकरोच्छ्रीधरस्वामी यथामति विधेः स्तुतिः॥ ६१॥ ॥ इति श्रीभागवते पुराणे दशमस्कंधे टी० ॥ चतुर्दशोऽध्यायः॥ १४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः पंचदशे धेनुपालनं धेनुकार्दनं ॥ कालीयह्रदे लतीभी परत्राणं च निरूप्यते ॥ १ ॥ अहिवक्त्रप्रवेशेन हृष्यारिक्लान्सखीन् ततः ॥ ह्रदस्य प्रवेशाय समक्षफलं ताला
लिसंकुलं ॥ २ ॥ पशुपालसंमतौ ॥ पशूपालानां वा संमतौ ॥ ईषद्वयोबला तितिरेकमनुलतवंताविस्यर्थः ॥ अतो वचक्रतुः सर्वतः प्रसर्पणेन ॥ २ ॥ स्वयशोग
णद्भिः स्तवनं प्राविशत् ॥ ३ ॥ तद्वनं निरीक्ष्य रंतुं मनो दधे ॥ कथंभूतं ॥ मंजुघोषायैः लिमगद्विजाः भ्रमरमृगपक्षिणः तैराकुलं व्याप्तं ॥ महन्मनः प्रख्यपयः

॥ श्रीशुक उ० ॥ ॥ ततश्च पौगंडवयः श्रितौ व्रजे बभूवतुस्तौ पशुपालसंमतौ ॥ गाश्चारयंतौ सखिभिः समं पदैर्वृंदावनं पुण्य
मतीव चक्रतुः ॥ १ ॥ तन्माधवो वेणुमुदीरयन्वृतो गोपैर्गृणद्भिः स्वयशो बलान्वितः ॥ पशून्पुरस्कृत्य पशव्यमाविशद्विहर्तु
कामः कुसुमाकरं वनं ॥ २ ॥ तन्मंजुघोषालिमृगद्विजाकुलं महन्मनःप्रख्यपयः सरस्वता ॥ वातेन जुष्टं शतपत्रगंधिना
निरीक्ष्य रंतुं भगवान्मनो दधे ॥ ३ ॥ स तत्र तत्रारुणपल्लवश्रिया फलप्रसूनोरुभरेण पादयोः ॥ स्पृशच्छिखान्वी
क्ष्य वनस्पतीन्मुदा स्मयन्निवाहाग्रजमादिपूरुषः ॥ ४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अहो अमी देववरामरार्चितं पा
दांबुजं ते सुमनःफलार्हणं ॥ नमंत्युपादाय शिखाभिरात्मनस्तमोपहत्यै तरुजन्म यत्कृतं ॥ ५ ॥ ॥ ॥

सरस्वता ॥ महतां मनसा प्रख्यं तुल्यं स्वच्छं पयो यस्मिन् तत्सार आश्रयत्वेनास्तियस्य तेन वातेनेति शैत्यमुक्तं ॥ शतपत्रगंधिनेति परिमलवत्वं ॥ जुष्टं वनमि
तिमाधंच सूचितं ॥ ३ ॥ अरुणपल्लवश्रियासह स्पृशंत्यः शिखाः शाखाग्राणि येषां तान् ॥ ४ ॥ तरुजन्म येन तमसा कृतं तस्य तमसः पापस्यापहत्यै नाशा
य ॥ अथवा येन त्वया ईश्वरेण सर्वोपकारपरं कृतं जन्म कृतं तं त्वां नमंति ॥ एवं श्लाघ्यमपि जन्म नियदस्ता नरूपं तमोस्ति तस्यापहत्यै ॥ ५ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पू०
५३

हे अनघ वने गूढमपि त्वां न त्यजंति ॥ त्वयि मनुष्यवेषेण निगूढे सति मुनयोप्यलिवेषेण निगुढास्त्वां भजंतीत्यर्थः ॥६॥ स्यान्न हि सतां निसर्ग इति ॥ यदलि
स्वस्मिन्नतर्कितमागताय महते समर्प्यंतीति ॥७॥ तृणवीरुधश्चातव पादैस्पृश्येतामिति तथा ॥ करजाभिस्पृष्टाः मृष्टाः नखैः स्पृष्टाः ॥ सदयैरवलोकनैः ॥ श्री

॥ एतेऽलिनस्तव यशोऽखिललोकतीर्थं गायंत आदिपुरुषानुपदं भजंते ॥ प्रायो अमी मुनिगणा भवदीयमुख्या गूढं वनेपि न ज
हत्यनघात्मदैवं ॥६॥ नृत्यंत्यमी शिखिन ईड्य मुदा हरिण्यः कुर्वंति गोप्य इव ते प्रियमीक्षणेन ॥ सूक्तैश्च कोकिलगणा गृहमा
गताय धन्या वनौकसस्ते हि सतां निसर्गः ॥७॥ धन्येयमद्य धरणी तृणवीरुधस्त्वत्पादस्पृशो द्रुमलताः करजाभिमृष्टाः
॥ नद्योऽद्रयः खगमृगाः सदयावलोकैर्गोप्योंतरेण भुजयोरपि यत्स्पृहा श्रीः ॥८॥ शुक उ० ॥ एवं वृंदावनं श्रीमस्त्रीतः प्रीत
मनाः पशून् ॥ रेमे संचारयन्नद्रेः सरिद्रोधःसु सानुगः ॥९॥ क्वचिद्गायति गायत्सु मदांधालिष्वनुव्रतैः ॥ उपगीयमानचरितः स्रग्वी ॥
संकर्षणान्वितः ॥१०॥ क्वचिच्च कलहंसानामनुकूजति कूजितं ॥ अभिनृत्यति नृत्यंतं बर्हिणं ह्रासयन् ॥११॥ ॥सखीन्॥

रपि यस्मै स्पृहयति केवलं तेन भुजयोरंतरेण वक्षसा गोप्यो धन्या इति ॥८॥ एवं श्रीमद्वृंदावनं प्रति प्रीतः सन् अद्रेः समीपवर्तिसरित्तटेषु संचारयन् सानु
गः प्रीतमना रेमे ॥९॥ तामेव चरितमाह ॥ क्वचिदित्यादि दशभिः ॥१०॥ बर्हिणं नृत्यंतमन्वभिनृत्यतीति ॥ बर्हिणमभिमुखो नृत्यतीति वा ॥ सखीन्
ह्रासयन् ॥११॥ ॥

राम:
५३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२२॥ चकोरारीरानुनुकुर्वैरेति॥ कदाचिच्च सखानां मध्ये व्याघ्रसिंहयोस्तान्मां नातवऋवति सखेषु पलायमानेषु पलायत स्पर्धः॥ तयोः सखानां बलो ईकाणां
नातवऋवतातिवा॥२३॥ आर्यमग्ननं विश्रमयति विगतश्रमं करोति॥२४॥ मिथोनत्सादीन्कुर्वतो गोपान्प्रशशंसतुः॥२५॥२६॥ व्यजनैः पल्लवादिनि

मेघगंभीरया वाचा नामभिर्दूरगान्पशून्॥ क्वचिदाकृतिप्रीत्या गोगोपालमनोज्ञया॥२२॥ चकोरक्रौंचचक्राह्वभारद्वाजांश्च बर्हिणः॥ अ
तुरौति स्म सत्वानां नातव्याघ्रसिंहयोः॥२३॥ क्वचित्क्रीडापरिश्रान्तं गोपोगोपनिबर्हणं॥ स्वयं विश्रमयत्यार्यपादसंवाहना[दि]भिः॥२
४॥ नृत्यतो गायतः क्वापि वल्गतो युध्यतो मिथः॥ गृहीतहस्तौ गोपालान्हसंतौ प्रशशंसतुः॥२५॥ क्वचित्पल्लवतल्पेषु नियुद्धश्रमकर्शि
तः॥ वृक्षमूला श्रयः शेते गोपोत्संग उपबर्हणः॥२६॥ पादसंवा[ह]नं चक्रुः केचित्तस्य महात्मनः॥ अपरे हतपाप्मानो व्यजनैः समवी
जयन्॥२७॥ अन्ये तदनुरूपाणि मनोज्ञानि महात्मनः॥ गायंति स्म महाराजन्स्नेहक्लिन्नधियः शनैः॥२८॥ एवं निगूढ आत्मगतिः स्व
मायया गोपात्मजत्वं चरितैर्विडंबयन्॥ रेमे रमालालितपादपल्लवो ग्राम्यैः समं ग्राम्यवदीशचेष्टितः॥२९॥ श्रीदामा नाम गोपालो रा
मकेशवयोः सखा॥ सुबलस्तोककृष्णाद्या गोपाः प्रेम्णेदमब्रुवन्॥३०॥ राम राम महाबाहो कृष्ण दुष्टनिबर्हण॥ इतो ऽविदूरे सुम
हद्वनं तालालिसंकुलं॥३१॥ फलानि तत्र भूरीणि पतंति पतितानि च॥ संति किंत्ववरुद्धानि धेनुकेन दुरात्मना॥३२॥ ॥ ॥

मितैः॥२७॥२८॥ ईशचेष्टितः रतिगूढस्वभावत्वेप्यंतरांतराईशस्यैव चेष्टितानि दर्शयतेयस्मिन्सः॥२९॥ ईशचेष्टितत्वमेव दर्शयितुमाह॥ श्रीदामेति
॥ स्तोककृष्णः कश्चित्॥३०॥ तालालिसंकुलं॥ तालानां पंक्तिभिर्व्याप्तं॥३१॥३२॥॥

तव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२३॥२४॥विषूचीनःसर्वतःप्रसृतः॥२५॥२६॥२७॥२८॥सनगंसवृक्षं॥२९॥प्रत्यग्गन्यांपश्चिमान्यां॥काज्ञाब्दमितिगर्दभजातिशब्दानुकरणं॥पर्यस
रत्परितोधावदित्यर्थः॥३०॥उपक्रोष्टागर्दभः॥पराक्प्रतिमुखः॥अपरौपश्चिमौ॥बलायबलंहंतुं॥३१॥तृणराजस्तालः॥३२॥३३॥उक्तसृष्टेनरवरदेहे

सोऽतिवीर्योसुरोरामहेकृष्णखररूपधृक्॥आत्मतुल्यबलैरन्यैर्ज्ञातिभिर्बहुभिर्वृतः॥२३॥तस्मात्कृतनराहाराद्भीतैर्नृभिरमित्र
हन्॥नसेव्यतेपशुगणैःपक्षिसंघैर्विवर्जितं॥२४॥विद्यंतेऽभुक्तपूर्वाणिफलानिसुरभीणिच॥एषवैसुरभिर्गंधोविषूचीनोविगृह्य
ते॥२५॥प्रयच्छतानिनःकृष्णगंधलोभितचेतसां॥वांछास्तिमहतीरामगम्यतांयदिरोचते॥२६॥एवंसुहृद्वचःश्रुत्वासुहृत्प्रिय
चिकीर्षया॥प्रहस्यजग्मतुर्गोपैर्वृतौतालवनंप्रभू॥२७॥बलःप्रविश्यबाहुभ्यांतालान्संपरिकंपयन्॥फलानिपातयामाससमतंग
जरवौजसा॥२८॥फलानांपततांशब्दंनिशम्यासुररासभः॥अभ्यधावत्क्षितितलंसनगंपरिकंपयन्॥२९॥समेत्यतरसाप्रत्य
बलि ग्द्वाभ्यांपद्भ्यांबलंबली॥निहत्योरसिकाशब्दंमुंचन्पर्यसरत्खलः॥३०॥पुनरासाद्यसंरब्धउपक्रोष्टापराक्स्थितः॥चरणावपरौ
राजन्बलायप्राक्षिपद्रुषा॥३१॥सतंगृहीत्वाप्रपदोर्भ्रामयित्वैकपाणिना॥चिक्षेपतृणराजाग्रेभ्रामणत्यक्तजीवितं॥३२॥तेना
हतोमहातालोवेपमानोबृहच्छिराः॥पार्श्वस्थंकंपयन्भग्नःसचान्यंसोपिचापरं॥३३॥बलस्यलीलयोत्सृष्टखरदेहहताहताः॥तालाश्च हाता रामः
कंपिरेसर्वेमहावातेरिताइव॥३४॥नैतच्चित्रंभगवतिह्यनंतेजगदीश्वरे॥ओतप्रोतमिदंयस्मिंस्तंतुष्वंगयथापटः॥३५॥ ॥ ॥ ५४

नहतैर्हताःचकंपिरेअकंपंत३४॥यस्मिन्निदंविश्वंओतंऊर्ध्वंतंतुषुपटइवग्रथितं॥प्रोतंतिर्यक्तंतुषुपटवदेवसंग्रथितंसर्वतोऽनुस्यूतंवर्त्ततइत्यर्थः॥३५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३६॥३७॥घनैर्नमनरवत्नुवस्तलं रराज॥ तत्र फलप्रकारसंकीर्णं इति दैत्यदेहैश्च सततालग्नैः संकीर्णमित्यरुणाभ्येतन तालवनस्य दुरूपसंपादनं॥३८॥३९॥
आदन् अनन्तायन्॥४०॥४१॥गोरजोभिः स्फुरितेषु कुंतलेषु बद्धबर्हवन्यानि प्रसूनानि चयस्य रुचिरम् आननं चारुहासस्य यस्य तं च तं च दिदृक्षितदृशः दिदृक्षिता

ततः कृष्णं च रामं च ज्ञातयो धेनुकस्य ये॥ क्रोष्टारोभ्यद्रवन् सर्वे संरब्धा उत बान्धवाः॥३६॥ तांस्तानापततः कृष्णो रामश्च नृप लीलया। गृ
हीतपश्चाच्चरणान् प्राहिणोत्तृणराजसु॥३७॥ फलप्रकरसंकीर्णं दैत्यदेहैर्गतासुभिः॥ रराज भूः सतालाग्रैर्घनैरिव नभस्तलं॥३८॥ त
योस्तु समहत्कर्म निशाम्य विबुधादयः॥ मुमुचुः पुष्पवर्षाणि चक्रुर्वाद्यानि तुष्टुवुः॥३९॥ अथ तालफलान्यादन् मनुष्या गतसाध्वसाः॥
तृणं च पशवश्चेरुः हतधेनुककानने॥४०॥ कृष्णः कमलपत्राक्षः पुण्य[illegible] श्रवणकीर्तनः॥ स्तूयमानोनुगैर्गोपैः साग्रजो व्रजमा
व्रजत्॥४१॥ तं गोरजः स्फुरितकुंतलबद्धबर्हवन्यप्रसूनरुचिरेक्षणचारुहासं॥ वेणुं क्वणंतमनुगैरनुगीतकीर्तिं गोप्यो दिदृक्षितदृशो
भ्यगमन् समेताः॥४२॥ पीत्वा मुकुंदमुखसारघमक्षिभृंगैस्तापं जहुर्विरहजं व्रजयोषितोह्नि॥ तत्सत्कृतिं समधिगम्य विवेश गोष्ठं सव्रीड
म
हासविनयं यदपांगमोक्षं॥४३

दृशिनोत्कंगसुक्कादर्शीयासां ताः॥४२॥ मुकुंदस्य मुखपद्मगतसारघं मधु॥ अक्षियो विरहस्तुस्मा ज्जातं तापं सचतासांस
कृतिपूजां॥ कौसत्कृतिं कथं वा लुतां तामाह॥ सव्रीडेति॥ सलज्जेन हासेन विनयोयथा न वर्तित तथा न वर्तित तथा॥ यदेतत्॥ किं अपांगमोक्षं कटाक्षदर्शनं
॥तयातां सत्कृतिं प्राप्येति॥४३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुंसं॥५०॥ संप्रतिसद्य एव स्ता प्राप्ता स्मृतिर्यैस्ते संप्रतस्मृतयः॥ यद्वा॥ सम्यक्प्रतीता प्रतिप्रा स्मृतिर्यैस्ते तथेति॥५१॥५२॥ ॥इति श्रीभागवते महापुरा
णे दशमस्कंधे टीकायां पंचदशोध्यायः॥१५॥ ॥षोडशे कालियस्योक्तो निग्रहो यमुनाह्रदे॥ तत्पत्नीभिः स्तुतेनाथ कृष्णेनानुग्रहः कृतः॥१॥ इ

तयोर्यशोदारोहिण्यौ पुत्रयोः पुत्रवत्सले॥ यथाकामं यथाकालं व्यधत्तां परमाशिषः॥४४॥ गताध्वानश्रमौ तत्र मज्जनोन्मर्दनादिभिः॥
नीवीं वसित्वा रुचिरां दिव्यस्र गंधमंडितौ॥४५॥ जनन्युपहृतं प्राश्य स्वाद्वन्नमुपलालितौ॥ संविश्य वर शय्यायां सुखं सुषुपतुर्व्र
जे॥४६॥ एवं स भगवान् कृष्णो वृंदावनचरः क्वचित्॥ ययौ राममृते राजन् कालिंदीं सखिभिर्वृतः॥४७॥ अथ गावश्च गोपाश्च निदा
घातपपीडिताः॥ दुष्टं जलं पपुस्तस्यास्तृषार्ता विषदूषितं॥४८॥ विषांभस्तदुपस्पृश्य दैवोपहतचेतसः॥ निपेतुर्व्यसवः सर्वे सलिलां
ते कुरूद्वह॥४९॥ वीक्ष्य तान्वै तथाभूतान् कृष्णो योगेश्वरेश्वरः॥ ईक्षयामृतवर्षिण्या स्वनाथान् समजीवयत्॥५०॥ ते संप्रतीतस्मृ
तयः समुत्थाय जलांतिकात्॥ आसन्सुविस्मिताः सर्वे वीक्षमाणाः परस्परं॥५१॥ अन्वमंसत तद्राजन् गोविंदानुग्रहेक्षितं॥ पी
त्वा विषं परेतस्य पुनरुत्थानमात्मनः॥५२॥ ॥इति श्रीभागवते महापुराणे दशमस्कंधे पंचदशोध्यायः॥१५॥ ॥श्रीशुक
कृष्णा उ०॥ ॥विलोक्य दूषितां कृष्णां कृष्णः कृष्णाहिना विभुः॥ तस्या विशुद्धिमन्विच्छन् सर्पं तमुदवासयत्॥१॥ ॥श्रीरामाय नमः॥

तारासभं दैतेयानजघ्नग्ध्वा तालफलान्यलं॥ प्राप्तोऽनन्तफणारंगे कालो यस्य कलानिधिः॥२॥ उदवासयत् निःसारितवान्॥१॥ ॥श्रीरामः॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बहूनियुगान्यावासोयस्यतमद्रिं॥सवैअद्रिःअमलचरोपितस्मिन्नंतर्जलेयथायेनप्रकारेणासीत्॥अथवाबहूनियुगान्यावासोयथाभवतितथातेनप्रका
रेणसर्वैतत्रासीदितिकथ्यतामिति॥२॥गोपालेनयदुदारचरितंतदेवास्मत्अतःकथ्यतामिति॥३॥श्रप्यमाणंपच्यमानंपयोयस्यसः॥अतउपरिगच्छतःखगायस्मि
न्पतंति॥४॥किंच॥किंविप्रुष्मताअंबुकणयुक्तेनविषोदकतरंगस्पर्शमारुतेनस्पृष्टायस्यतीरगाम्नायंतेसरुद्रआसीदिति॥५॥तंकालियंचंडोवेगोयस्यत

राजोवाच॥ ॥कथमंतर्जलेऽगाधेन्यगृह्णाद्भगवानहिं॥सवैबहुयुगावासंयथासीद्विप्रकथ्यतां॥२॥ब्रह्मन्भगवतस्तस्यभू
म्नःस्वच्छंदवर्त्तिनः॥गोपालोदारचरितंकस्तृप्येतामृतंजुषन्॥३॥श्रीशुकउ०॥ ॥कालिंद्यांकालियस्यासीद्ध्रदःकश्चिद्विषा
ग्निना॥श्रप्यमाणपयायस्मिन्पतंत्युपरिगाःखगाः॥४॥विप्रुष्मताविषोदोर्मिमारुतेनाभिमर्शिताः॥म्रियंतेतीर
गायस्यप्राणिनःस्थिरजंगमा[illegible]॥५॥तंचंडवेगविषवीर्यमवेक्ष्यतेनदुष्टांनदींचखलसंयमनावतारः
॥कृष्णःकदंबमधिरुह्यततोतितुंगमास्फोट्यगाढरशनोन्यपतद्विषोदे॥६॥सर्पह्रदःपुरुषसारनिपातवेगसंक्षोभितोर
गविषोछ्वसितांबुराशिः॥पर्यक्प्लुतोविषकषायबिनाषणोर्मिर्धावन्धनुःशतमनंतबलस्यकिंतत्॥७॥ ॥ ॥

द्विषमेववीर्यंयस्यतं॥कंदंबमितिन्ताविना॥आत्मचरणस्पर्शनैर्गेपेनसएकस्मारेनशुष्कः॥अमृतमाहरतागरुत्मताक्रांतत्वादितिपुराणांतरं॥आस्फोट्यबा
हुंकरतलेनाहत्य॥गाढादृढंबद्धारशनाकटिबंधनवस्त्रंयेनसः॥६॥तदासर्पस्यह्रदःपुरुषश्रेष्ठस्यपतनस्यापतनवारेणसंक्षोभितानांउरगाणांविषैरुच्छ्वातोंबुराशि
र्यस्यसः॥विषेणकषायाकृतानयंकराऊर्मयोयस्यसः॥पर्यक्परिधावन्धनुःशतंप्लुतःप्रसृतः॥नैतच्चित्रमित्याह॥अनंतबलस्येति॥७॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० द० टी०
५६

नुजदंडाहतोदकघोषंश्रुत्वा॥ ततः स्वसदनाभिनवंचनिराहृप्तदसहमानः समसरत्समाजगाम॥८॥ प्रेक्षणीयस्यसुकुमारस्यघनवदुज्वलस्यतं॥ श्री
वत्सपीतवसनेकृदेविहरतः श्रीवत्सेनसंयुक्तमुज्वलस्यातंवक्षंयस्यतं॥ भुजयानोगेन॥ चछाद अवेष्टयत्॥९॥ सः प्रियोयेषांतेतस्त्रियाः तेचतेसखायश्चेतित

तस्यह्रदेविहरतोनुजदंडघर्षणवाघोषमंगवार्णविक्रमस्य॥ आश्रुत्यतत्स्वसदनाभिनवंनिरीक्ष्यचत्तुश्रवाः समसरत्त
दमृष्यमाणाः॥८॥ तंप्रेक्षणीयसुकुमारघनावदातंश्रीवत्सपीतवसनं [illegible] स्मितसुंदरास्यं॥ क्रीडंतमप्रतिभयंकमलो
दरांघ्रिंसंदश्यमर्मसुरुषानुजयाचछाद॥९॥ तंनागभोग [illegible] परिवीतमदृष्टचेष्टमालोक्यतत्प्रियसखापशुपान्नृशा
र्ताः॥ कृष्णेर्पितात्मसुरुदर्थकलत्रकामादुःखानुशोकभयमूढधियोनिपेतुः॥१०॥ गावोवृषावत्सतर्यः क्रंदमानाः सुदु
ःखिताः॥ कृष्णेन्यस्तेक्षणाभीताः रुदंत्यइवतस्थिरे॥११॥ अथव्रजेमहोत्पातास्त्रिविधाह्यतिदारुणाः॥ उत्पेतुर्भुविदिव्या
त्मन्यासंन्नभयशंसिनः॥१२॥ तानालक्ष्यभयोद्विग्नागोपानंदपुरोगमाः॥ विनारामेणगाः कृष्णंज्ञात्वाचारयितुंगतं॥१३॥ तैर्दुर्निमि
त्तैर्निधनंमत्वाप्राप्तमतद्विदः॥ तत्प्राणास्तन्मनस्कास्तेदुःखशोकभयातुराः॥१४॥ आबालवृद्धवनिताः सर्वेंगपशुवृत्तयः॥ निर्जग्मु
र्गोकुलाद्दीनाः कृष्णदर्शनलालसाः॥१५

था॥२०॥२१॥ नुविकंपादयः॥ दिग्युल्कापातादयः॥ आत्मनिवामनेत्रस्फुरणादयः॥ आसन्नंनयंशंतिसूचयंतीत्येषांते॥२२॥
तानानेलक्ष्यगोकुलान्निर्जग्मुरितिनिरूपितायेनान्वयः॥ भयोद्विग्नाः भयहेतुस्योद्भीताः॥ भयेनकंपमानाइतिवा॥२३॥ नतंविदंतीत्यतद्विदः॥२४॥ पशुवृत्तयः अतिवत्सलाः॥२५॥
॥ कातरानुद्गीतान्॥२६॥ ॥

रामः
५६

भगवंतं लक्षयंति॥ यानि पदानि तैः॥ सूचितया पदव्या मार्गेण॥१७॥ पदैर्मार्गस्तान प्रकारमहतरति॥ विश्वपतेः श्रीकृष्णस्य अन्येषां पदानां अंतरांतरे मध्ये मध्ये
तृणदर्भादेन॥ गवां क्षतानां मार्गे सत्वरा अप्रमत्ता योगिनस्तद्रुपाध्यपवादेन यथा परतं मृगयंति तद्वदिति भावः॥१८॥ ततेत श्रसर्पत्रारावे हितं कृष्णं दुरान्विरा

तेऽन्वेषमाणा दयितं कृष्णं सूचितया पदैः॥ भगवल्लक्षणैर्जग्मुः पदव्या यमुनातटं॥१७॥ ते तत्र तत्राब्जयवांकुशा
निध्वजोपपन्नानि पदानि विश्वपतेः॥ मार्गे गवामन्यपदांतरांतरे निरीक्ष्यमाणा ययुरंग सत्वराः॥१८॥ अंतर्ह्रदे नु जग
भोगपरीतमारात्कृष्णं निरीहमुपलभ्य जलाशयांते॥ गोपांश्च मूढधिषणान्परितः पशूंश्च संक्रंदतः परमकश्मलमापुरा
र्ताः॥१९॥ गोप्योऽनुरक्तमनसो भगवत्यनंते तत्सौहृदस्मितविलोकगिरः स्मरंत्यः॥ ग्रस्तेऽहिना प्रियतमे च भृशं दुःखतप्ताः
शून्यं प्रियव्यतिहृतं ददृशुस्त्रिलोकं॥२०॥ ताः कृष्णमातरमपत्यमनुप्रविष्टां तुल्यव्यथाः समनुगृह्य शुचः स्रवंत्यः॥ तास्ता
ः व्रजप्रियकथाः कथयंत्य आसन् कृष्णाननार्पितदृशो मृतकप्रतीकाः॥२१॥ कृष्णप्राणान्निर्विशतो नंदादीन्वीक्ष्य तं ह्र
दं॥ प्रत्यषेधत्स भगवान् रामः कृष्णानुभाववित्॥२२॥ इच्छं स्वगोकुलमनन्यगतिं निरीक्ष्य सस्त्रीकुमारमतिदुःखित
मात्महेतोः॥ आज्ञाय मर्त्यपदवीमनुवर्तमानः स्थित्वा मुहूर्तमुदतिष्ठदुरंगबंधात्॥२३॥ ॥श्रीरामायैकृष्णायनमः॥

इति गोपाश्च पशूंश्च तया निरीक्ष्यार्ताः परं मोहं प्रापुः॥१९॥ प्रियेण श्रीकृष्णेन विरहितं त्रैलोक्यं शून्यं ददृशुः॥२०॥२२॥ अनन्यगतिमात्मानं इच्छं निरीक्ष्य॥
अत एव आत्महेतोः कुलमतिदुःखितमाज्ञाय उरंगबंधादुदतिष्ठदित्यन्वयः॥२३॥॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० ६० पू०
५७

तस्यप्रथ्यमानेनवपुषाव्यथितात्मशारीरोनुजंगः कुंडलामुन्मुच्यतंस्स्काकुपितः स्वफणात्नुन्नमप्यश्वसनक्केवलमीक्षमाणस्तस्थौ॥ कथंभूतः श्वसनरं
ध्रेषुनासाविवरेषुविषयंयस्यतथं वराषोमंडकपाकनाज्ञनेतक्ष्संतप्तानिस्तघृणिर्ईक्षणानियस्यतथोल्मुकानिमुखेषुयस्यसचसचसच॥२४॥ हरो भ्रक्क
उंस्तमसुंसर्पपरिसस्सारपरितोबभ्राम॥ अतिकरालाविषाग्नियुक्तादष्टिर्यस्यतात्जिह्वयाद्विशिखयेतिप्रतिमुखमेव॥२५॥ परिभ्रमेणैवद्वतमोनोयस्य

तम्प्रथ्यमानवपुषाव्यथितात्मनोगस्स्तस्कोन्नमप्यकुपितः स्वफणान्नुजंगः॥ तस्थौश्वसनश्वसनरंध्रविषोबरीषस्तब्धक्षणोल्मुक
मुखोहरिमीक्षमाणः॥२४॥ तंजिह्वयाद्विशिखयापरिलेलिहानं दैस्सक्षिणा अतिकरालविषाग्निदष्टिं॥ क्रोउन्नमुंपरिससारय
थाखगेंद्रोबभ्रामसोप्यवसरंप्रसमीक्षमाणः॥२५॥ एवंपरिभ्रमहतौजसमुन्नतांसमानस्यतत्पृथुशिरस्वधिरूढ आद्यः
॥ तन्मूर्धरत्ननिकरस्पर्शातिताम्रपादांबुजोऽखिलकलादिगुरुर्ननर्त॥२६॥ तंनर्तुमुद्यतमवेक्ष्यतदातदायगंधर्वसि
द्धसुरचारणदेववध्वः॥ प्रीत्यामृदंगपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसोपनेदुः॥२७॥ यद्यच्छिरोननमतेंग
शतैकशीर्ष्णस्तत्तन्ममर्दखलदंडधरोंघ्रिपातैः॥ क्षीणायुषोभ्रमतउल्बणमास्यतोसृक्‌नस्तोवमन्परमकश्मलमाप

तं॥ उन्नतावंसौयस्यतं॥ तस्यमूर्धसुयेरत्ननिकरास्तेषांस्पर्शेनाताम्रारुणंपादांबुजंयस्यसः॥ ननुकथंचंचलेषुशिरःसुनन नागः॥२८॥
र्ततत्राह॥ अखिलकलानामादिगुरुः॥२६॥ शतैकशीर्ष्णः शतंएकानिमुखानिशीर्षाणियस्यतस्यक्षीणायुषोपिपुनर्नमतोयद्यच्छिरोनन
मतेस्तध्वतानत्युडातिनृत्यच्छलेनांघ्रिपातैस्तत्तन्ममर्द॥ तदाचआस्यतोमुखेभ्यः नस्तोनासाविवरेभ्यश्चासृग्वमन्॥२८॥ ॥ ॥

राम:
५७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनरपि रुषा उच्चैर्निःश्वसतीयं यमस्य सुत्कमतितन्नम्रदायातेनानुनमयन् ॥ तस्मिन्नवसरे रुष्टैर्गंधर्वादिभिः शेषासनः पुराणः पुरुषश्च वस
पशोदानंदनः पुष्पैः पूजितः ॥ यद्वा तदा गंधर्वादिभिः पुष्पैः सुपूजितो गोपो पुराणः पुमानिव दृश्यते ॥ यद्वा पुष्पैः सुपूजितश्च वप्रसन्नः सन्
दमयांबभूव हितं कृतवान् इत्यर्थः ॥ २९ ॥ अरणं शरणं ॥ ३० ॥ गर्जं जगंतियस्य तस्य अतिनरेण अवसन्नमाक्रांतं ॥ पार्ष्णिः पादपृष्ठं ॥ आद्यंत्रो

तस्याक्षिभिर्गरलमुद्वमतः शिरः सुयद्यस्मसुन्नमतितिनिःश्वसतो रुषोच्चैः ॥ नृत्यन्पदानुनमयन्दमयांबभूव पुष्पैः प्रपूजित इवेह पुमान्पुराणः
॥ २९ ॥ तच्चित्रतांडवविरुग्णफणातपत्रो रक्तं मुखैरुरुवमन्नृप भग्नगात्रः ॥ स्मृत्वा चराचरगुरुं पुरुषं पुराणं नारायणं तमरणं मनसा
जगाम ॥ ३० ॥ कृष्णस्य गर्भजगतोतिभरावसन्नं पार्ष्णिप्रहारपरिरुग्णफणातपत्रं ॥ दृष्ट्वाहिमाद्यमुपसेदुरमुष्य पत्न्य आर्ताः ॥
श्लथवसनभूषणकेशबंधाः ॥ ३१ ॥ तास्तं सुविग्नमनसोथ पुरस्कृतार्भाः ॥ कायं निधाय भुवि भूतपतिं प्रणेमुः ॥ साध्व्यः कृतां
जलिपुटाः शमलस्य भर्तुर्मोक्षेप्सवः शरणदं शरणं प्रपन्नाः ॥ ३२ ॥ नागपत्न्य ऊचुः ॥ ॥ न्याय्यो हि दंडः कृतकिल्बिषेस्मिंस्तवा
वतारः खलनिग्रहाय ॥ रिपोः सुतानामपि तुल्यदृष्टेर्धत्से दमं फलमेवानुशंसन् ॥ ३३ ॥ ॥
कृष्णं ॥ श्लथं तो विश्रंसमानावसनादयो यासां
॥ ३१ ॥ ताः शरणं प्रपन्नाः सत्यस्तं प्रणेमुः ॥ सुविग्नमनसः विह्वलचित्ताः ॥ भुवि तितस्मिन्नस्थाने जलादधस्ताद्वा ॥ तदेवाह शमलस्य पापात्मनोपि भर्तु
र्मोक्षेप्सवः ॥ भर्तृर्यच्छमलं तस्य वा ॥ भूतपतिं प्राणिमात्रस्य पतिं ॥ शरणदमाश्रयप्रदं ॥ ३२ ॥ प्रथमं तावत्कुपितं भगवंतं दंडानुमोदनेनोपशमयंत्यः स्तु
वंति न्याय्यो हीति ॥ तत्र दंडानुमोदनं षड्भिर्दशभिश्च हरेर्नतिः ॥ प्रार्थना पंचभिः श्लोकैः स्तुतः पन्नगयोषितां ॥ न च निग्रहानुग्रहलक्षणं वैषम्यं तवास्तीत्याहुः
॥ धत्से दमतिमिति ॥ अनुशंसन् आलोचयन् ॥ ३३ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० टी० पू०
५८

निग्रहोप्यनुग्रहतयोक्तः ॥ इदानीमनुग्रह एवायं न निग्रह इत्याह ॥ अनुग्रह इति ॥ नोऽस्माकं ॥ यस्मादमुष्य सर्पत्वं दत्तवते ॥ तस्मात्तन्मूलपापनिवर्तको दंडोनु
ग्रह एव ॥ क्रोधत्वेन प्रतीयमानोपि पार्थः ॥ ३४ ॥ महांश्चायमनुग्रह इति ॥ तस्य पूर्वपुण्यप्रमभिनंदति ॥ तप इति ॥ स्वयं मानरहितेन अन्येभ्यो मानदेन च ॥
सर्वैर्जीव्यत इति सर्वजीवः ॥ ३५ ॥ न तप आदि निमित्तमेषचाप्योदयः ॥ किंचित्तत्संततवक्रपादेन निमित्तमित्याह ॥ कस्मादनुभाव इति त्रयेण ॥ तप आदि

अनुग्रहोऽयं भवतः कृतो हि नो दंडोऽसतां ते खलु कल्मषापहः ॥ यद्दंदशूकत्वममुष्य देहिनः क्रोधोऽपि
तेऽनुग्रह एव संमतः ॥ ३४ ॥ तपः सुतप्तं किमनेन पूर्वं निरस्तमानेन च मानदेन ॥ धर्मोऽथवा सर्वजनानु
कंपया यतो भवांस्तुष्यति सर्वजीवः ॥ ३५ ॥ कस्यानुभावोऽस्य न देव विद्महे तवांघ्रिरेणुस्पर्शाधिकारः ॥ यद्वां
छया श्रीर्ललनाचरत्तपो विहाय कामान्सुचिरं धृतव्रता ॥ ३६ ॥ न नाकपृष्ठं न च सार्वभौमं न पारमेष्ठ्यं न रसा
धिपत्यं ॥ न योगसिद्धीरपुनर्भवं वा वांछंति यत्पादरजःप्रपन्नाः ॥ ३७ ॥ तदेष नाथाप दुरापमन्यैस्तमोजनि
ः क्रोधवशोऽप्यहीशः ॥ संसारचक्रे भ्रमतः शरीरिणो यदिच्छतः स्याद्विभवः समक्षः ॥ ३८ ॥ ॥ ॥

नाथस्यादयोपि यस्याः श्रियः प्रसादमिच्छंति ॥ सा श्रीर्ललनापि श्रीरेव ललना उत्तमस्त्री यस्य तवांघ्रिस्पर्शाधिकारस्य वांछया तप आचरत् ॥ अस्य सर्पस्य
किं कृत इति को वेत्ति नास्त्यर्थः ॥ ३६ ॥ यत्तव पादरजःप्रपन्नाः प्राप्ताः पारमेष्ठ्याद्यपि नेच्छंत्यंते ॥ ३७ ॥ अतो तदेव अप्रयत्नत एव प्राप ॥ अन्यैः श्रियादिभिरपि
॥ पुनः कथंभूतपादरजः यदिच्छतः सेव्यं मे भवतीति प्रार्थयतः वा समक्षः प्रत्यक्ष एव विभवः ॥ अपेक्षितार्थसंपद्भवति ॥ ३८ ॥ ॥ ॥ ॥

रामः
५८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमस्तुभ्यं भगवते अचिंत्यैश्वर्यादिगुणाय ॥ तदुपपादनाय दशभिः श्लोकैर्विशेषणानि ॥ पुरुषाय पूर्वं तर्यामिरूपेण वर्त्तमानाय ॥ महात्मने एवमपि नाति
परिछिन्नाय ॥ कुतः भूतावासाय आकाशाद्याश्रयाय ॥ तदपि कुतः ॥ भूताय पूर्वमपि सते ॥ कुतः परायकारणाय ॥ किंच ॥ परमात्मने कारणाता ।
ताय ॥३९॥ कारणत्वं कारणातीतत्वं च समर्थयितुमाहुः ॥ ज्ञानविज्ञाननिधये ज्ञानं ज्ञप्तिः विज्ञानं चिच्छक्तिः तयोर्निधये ताभ्यां पूर्णाय ॥ क
थं तथात्वं अत उक्तं ॥ ब्रह्मणे नंतशक्तये ॥ ब्रह्मणे कथं भूताय अगुणाय अविकाराय ॥ कथं [illegible]यां नंतशक्तये प्राकृताय प्रकृतिप्रवर्त्तकाय ॥
अप्राकृतायेति वा ॥ अप्राकृता अनंतशक्तियुक्ताय ॥ अयमर्थः ॥ अगुणत्वादविकारं ब्रह्म तत्सन्निमात्रत्वात्कारणातीतं प्रकृतिप्रवर्त्तकोऽनं

नमस्तुभ्यं भगवते पुरुषाय महात्मने ॥ भूतावासाय भूताय पराय परमात्मने ॥३९॥ ज्ञानविज्ञाननिधये ब्रह्मणे नंतश
क्तये ॥ अगुणायाविकाराय नमस्ते प्राकृताय च ॥४०॥ कालाय कालनाभाय कालावयवसाक्षिणे ॥ विश्वाय तदुपद्रष्ट्रे तत्
कर्त्रे विश्वहेतवे ॥४१॥ भूतमात्रेंद्रियप्राणमनोबुध्याशयात्मने ॥ त्रिगुणेनाभिमानेन गूढस्वात्मानुभूतये ॥४२॥ ॥

तशक्तिः ॥ विज्ञाननिधित्वादीश्वरः कारणं तद्भजयात्मने नमः इति ॥४०॥ अनंतशक्तित्वात्कालशक्त्या विश्वसृष्ट्यादिरूपेण नमस्यंति ॥ कालाय
कालरूपाय ॥ कालनाभाय कालशक्त्याश्रयाय कालावयवानां सृष्ट्यादिसमयानां साक्षिणे ॥ ततश्च विश्वाय विश्वरूपाय ॥ तर्हि किं जडोऽहं नहि ॥
तदुपद्रष्ट्रे ॥ न च द्रष्टृमात्राय ॥ किंतु तत्कर्त्रे ॥ न च कर्तृमात्राय ॥ विश्वहेतवे ॥ सर्वकारकरूपाय ॥४१॥ तदेवाहुः ॥ भूतमात्रेंद्रियप्राणबु
ध्याशयात्मने ॥ आशयश्चित्तं ॥ भूतादिरूपाय ॥ अतः सर्वकारकरूपायेति ॥ अहंकारात्मकतया नमस्यंति ॥ त्रिगुणेनेति ॥ एवं सृष्टे कार्ये
यस्त्रिगुणोभिमानस्तेन गूढाः स्वांशा भूतानामात्मनामनुभूतिर्येन तस्मै ॥४२॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं च अहंकारानावृततरतिस्तुवंति॥ नमोऽनंताय अहंकारापरिच्छेदात्॥ अतः सूक्ष्माय अदृश्यत्वात्॥ अत एव कूटस्थाय॥ उपाधिकृतविकाराभावात्॥ अत ए
व विपश्चिते सर्वज्ञाय॥ एवं वस्तुतः स्तुत्वा॥ चिंत्यमायत्वेन स्तुवंति॥ नानावादानुरोधाय अस्ति नास्ति सर्वज्ञः किंचिज्ज्ञः बद्धः मुक्तः अनेकः एकः॥ इत्यादिना
नावादाननुरुणद्धि मायया अनुवर्त्तते यस्तस्मै किंच॥ वाच्यवाचकशक्तये अभिधानाभिधेयशक्तिभेदादपि नानात्वेन प्रतीतायेत्यर्थः॥ ४३॥ अनावृत
त्वमेव द्रढयंतरेणापि समुच्चयंतः स्तुवंति॥ नमः प्रमाणमूलाय चक्षुरादीनां चक्षुरादिरूपाय॥ अत एव कवये स्वयं तु निरपेक्षज्ञानाय॥ कुतः शास्त्रयोनये
वेदात्मकनिश्वासाय॥ किंच॥ प्रवृत्ताय निवृत्ताय निगमाय नमो नमः॥ ४४॥ किंच॥ अनावृतैश्वर्यत्वादेव चतुर्मूर्त्तिरूपेण सर्वोपास्यत्वेन नमंति

नमोऽनंताय सूक्ष्माय कूटस्थाय विपश्चिते॥ नानावादानुरोधाय वाच्यवाचकशक्तये॥ ४३॥ नमः प्रमाणमूलाय कव
ये शास्त्रयोनये॥ प्रवृत्ताय निवृत्ताय निगमाय नमो नमः॥ ४४॥ नमः कृष्णाय रामाय वसुदेवसुताय च॥ प्रद्युम्नायानिरु
द्धाय सात्वतां पतये नमः॥ ४५॥ नमो गुणप्रदीपाय गुणात्मच्छादनाय च॥ गुणवृत्त्युपलक्ष्याय गुणद्रष्ट्रे स्वसंविदे॥ ४६॥ ॥

नमः कृष्णायेति श्लोकेन॥ रामाय संकर्षणाय स॥ वसुदेवसुताय॥ वसुदेवशापितं शुद्धं सत्त्वं तस्मिन्प्रकाशमानाय वासुदेवायेत्यर्थः॥ सात्वतां उपास
कानां पतये॥ सालोक्यादिना पालकाय॥ एवं चतुर्मूर्त्तये कृष्णाय तुभ्यं नमस्यंति॥ ४५॥ ननु तथाप्येकस्यैकं कथं चतुर्मूर्त्तित्वं तदाह॥ नमो गुणप्रदीपायेति॥ गु
णा अंतःकरणानि तानि प्रदीपयंति प्रकाशयंति तथा तस्मै चित्ताय धिष्ठातृत्वेन चतुर्मूर्त्तिरित्यर्थः॥ ननु तथाप्येकस्यैव कथं चतुर्द्धा अत आह॥ गुणात्मच्छा
दनाय च तैरेव गुणैरुपासकानां फलवैचित्र्याय आत्मानमाच्छाद्य नानात्वेन प्रतीतायेत्यर्थः॥ ननु कथं तर्हि प्रतीतिरत उक्तं॥ गुणवृत्त्युपलक्ष्याय चित्तादीनां चे
तनाध्यवसायादिवृत्तिभिरुपलक्ष्याय॥ उपलक्षणमेवाह॥ गुणद्रष्ट्रे तत्साक्षिण कथंचिदुपलक्ष्याय एवं न तु ते परत्वादाह॥ स्वसंविदे अगोचरायेत्यर्थः॥ ४६॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अगोचरत्वमुपलक्ष्यतं चद्दर्शयंत्योनमंति॥ अव्याकृतविहाराय अतर्क्यमहिम्नरत्यर्थः॥ सर्वव्याकृतसिद्धये सर्वकार्योत्पत्तिप्रकाराहेतुत्वेनोपलक्षणयो
गपायेत्यर्थः॥ उपलक्षणांतरमाहुः॥ हृषीकेशाकरणप्रवर्त्तक॥ किंविषयलिप्सया॥ नमुनये आत्मारामाय॥ किंसाधनवशेन॥ नहिनहि॥ मौनशी
लिने मौनमात्मारामतातत्स्वभावोप॥ ४७॥ कुतः परावरगतिज्ञाय स्थूलसूक्ष्माद्यानां गतिज्ञत्वेन नक्वापि सज्जमानायेत्यर्थः॥ अपि च सर्वाध्य
क्षाय सर्वस्याधिष्ठात्रे॥ कुतएतत॥ अविश्वाय न विश्वं यस्मिन्॥ तन्निषेधावधये विश्वाय च तद्विवर्त्ताधिष्ठानायेत्यर्थः॥ किंच तद्द्रष्ट्रे अध्यासापवा
दसाक्षिणे॥ अपि च॥ अस्य च विश्वाध्यासस्य तदपवादस्य चाविद्याविद्यात्मांहेतवे॥ यद्वा॥ अविश्वाय विश्वतैजसप्राज्ञरहिताय॥ विश्वाय मायया स्वांशे

अव्याकृतविहाराय सर्वव्याकृतसिद्धये॥ हृषीकेश नमस्तेस्तु मुनये मौनशीलिने॥ ४७॥ परावरगतिज्ञाय सर्वाध्यक्षाय ते न
मः॥ अविश्वाय च विश्वाय तद्द्रष्ट्रेस्य च हेतवे॥ ४८॥ त्वं ह्यस्य जन्मस्थितिसंयमान्प्रभो गुणैरनीहोकृतकालशक्तिधृक्॥ त कि
त्तत्स्वभावान्प्रतिबोधयन्सतः समीक्षयामोघविहार ईहसे॥ ४९॥ ॥ ॥ स्तत्तदवस्थाप॥ तद्द्रष्ट्रे तासामवस्थानां भावाभावसा
क्षिणे॥ अन्यत्समानं॥ तस्मात्सर्वगतिज्ञत्वं सर्वाधिष्ठत्वात्मारामत्वादिभिर्निरतिशयैश्वर्यायत्तुभ्यं नमः इति॥ विशेषणैरसंकीर्णैः पंच पंचा
शतानुतः अहिस्त्रीभिः प्रसन्नो वस्तासामिवस्तासामिवनवेहरिः॥ ४८॥ एवं तावद्दुरात्मनुमोदनेन नमस्कारैश्च भगवंतं प्रसाद्येदानीं त्वदधीना
नां प्राणिनां कोपराधस्त्वात्रापवत्यः प्रार्थयंते॥ त्वं हीति॥ अस्य लोकस्य जन्मादिकमेवाकृत अकरोः॥ ततश्च तांस्तान्संस्काररूपेण स्वतः स्वभावान्प्रो
त्साहनप्रतिबोधयन्नीहसे क्रीडसि॥ यद्वा॥ अस्य जन्मादीन्त्वमीहसे इत्यन्वयः॥ कथंभूतः॥ अकृता अनादिर्या कालशक्तिस्तां धारयत॥ तितथा॥
अन्यत्समानं॥ ४९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतस्यतवैवामूस्तनवः तत्पंतरतिक्रा डोपस्कराः॥ तथापितवाधुनाशांताःप्रियाः॥ कुतः सतांधर्मपरिपालनेछयाईहतः प्रवर्त्तमानस्य अतस्त्वानवित्रंस्थातुं
स्थितस्य॥५०॥एवंचतवाप्रियाचरणाद्यपराधःतर्हिसोढव्यइति॥५१॥५२॥युष्मदनुग्रहे अन्येषांमत्कृतेवेतिचेन्नोत्पादुः॥ विधेहीति॥त्वदाज्ञयाप्राणिनो

तस्यैवतेमूस्तनवस्त्रिलोक्यांशांता अशांताउतमूढयोनयः॥ शांताःप्रियास्तेह्यधुनावितुंसतांस्थातुश्चतेधर्मपरीप्सयेहतेवः
॥५०॥ अपराधःसकृद्भर्त्रासोढव्यःस्वप्रजाकृतः॥ क्षंतुमर्हसिशांतात्मन्मूढस्यत्वामजानतः॥५१॥ अनुगृह्णीष्वभगवन्प्राणां
स्त्यजतिपन्नगः॥ स्त्रीणांनःसाधुशोच्यानांपतिःप्राणप्रदीयतां॥५२॥ विधेहितेकिंकरीणामनुष्ठेयंतवाज्ञया॥ कृच्छ्रद्धयानुतिष्ठ
न्वैमुच्यतेसर्वतोभयात्॥५३॥ ॥श्रीशुकउवाच॥ ॥इत्थंसनागपत्नीभिर्भगवान्समभिष्टुतः॥ मूर्छितंभग्नशिरसंविससर्जां
घ्रिकुट्टनैः॥५४॥प्रतिलब्धेंद्रियप्राणःकालियःशनकैर्हरिं॥ कृच्छ्रात्समुच्छ्वसन्दीनःकृष्णंप्राहकृतांजलिः॥५५॥ ॥कालिय
उवाच॥ ॥वयंखलाःसहोत्पत्त्यातामसादीर्घमन्यवः॥ स्वभावोदुस्त्यजोनाथलोकानांयदसद्ग्रहः॥५६॥ त्वयासृष्टमिदंवि
श्वंधातर्गुणविसर्जनं॥ नानास्वभाववीर्यौजोयोनिबीजाशयाकृतिः॥५७॥ वयंचतत्रभगवन्सर्पाजात्युरुमन्यवः॥ कथंत्यजा
नाद्यामेतिभावः॥५३॥५४॥५५॥ यदसद्ग्रहइतियतःस्वभावोऽसत्ग्रहरूपः॥५६॥यतःस्वभावादसतिदेहा मस्त्वन्मायांदुःस्त्यजांमोहिताःस्वयं५८ रामः ६०
दौयोग्रहःसदुस्त्यजइति॥५६॥गुणैर्विविधतयासृज्यतइतिगुणविसर्जनं॥तत्रापिनानास्वभावादयोयस्यतत्॥५७॥जात्याजन्मनैवउरुर्मन्युर्येषांतेवयंक
थंत्यजामः॥५८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्धियस्मात्तत्रत्वन्मायात्यागेनवानैवकारणमित्यनुग्रहं विधेहि मम नयस्व वादंतोति ॥ ईश्वरत्वां निग्रहं वा विधेहीति ॥५९॥ यतो गोभिर्नृभिश्च नदी भुज्य
तइति ॥६०॥ न युष्मत्तो भयमाप्नुयात्सस युष्माभिर्न पंनोत्पादनायमित्याह ॥६१॥ इतोपि त्वयो निर्गंतव्यमित्याह ॥ योस्मिन्निति ॥ त्वयि स्थिते त्वं न भवतीति नाव

भवान्हि कारणं तत्र सर्वज्ञो जगदीश्वरः ॥ अनुग्रहं निग्रहं वा मन्यसे तद्विधेहि नः ॥५९॥ ॥श्रीशुक उवाच॥ ॥इत्याक र्ण्य वचः
प्राह भगवान्कार्यमानुषः ॥ नात्र स्थेयं त्वया सर्प समुद्रं याहि मा चिरं ॥ स्वज्ञात्यपत्यदाराढ्यो गोनृभिर्भुज्यते नदी ॥६०॥ य एतत्संस्मरे
न्मर्त्यस्तुभ्यं मदनुशासनं ॥ कीर्तयन्नुभयोः संध्योर्न युष्मद्भयमाप्नुयात् ॥६१॥ योस्मिन्स्नात्वा मदाक्रीडे देवादींस्तर्पयेज्जलैः ॥ उ
पोष्य मां स्मरन्नर्चेत्सर्वपापैः प्रमुच्यते ॥६२॥ द्वीपं रमणकं हित्वा ह्रदमेतमुपाश्रितः ॥ यद्भयात्स सुपर्णस्त्वां नाद्यान्मत्पादलांछि
तं ॥६३॥ ॥श्रीशुक उवाच॥ ॥एवमुक्तो भगवता राजन्नद्भुतकर्मणा ॥ तं पूजयामास मुदा नागपत्न्यश्च सादरं ॥६४॥ दिव्यांबरस्र
ग्मणिभिः परार्ध्यैरपि भूषणैः ॥ दिव्यगंधानुलेपैश्च महत्योत्पलमालया ॥ पूजयित्वा जगन्नाथं प्रसाद्य गरुडध्वजं ॥६५॥ तत
:प्रीतोभ्यनुज्ञातः परिक्रम्याभिवंद्य तं ॥ सकलत्रसुहृत्पुत्रो द्वीपमब्धेर्जगाम ह ॥६६॥ तदैव सामृतजला यमुना निर्विषाभवत् ॥
अनुग्रहाद्भगवतः क्रीडामानुषरूपिणः ॥६७॥ ॥इति श्रीभागवते महापुराणे दशमस्कंधे कालियनिर्वापणो नाम षोडशोऽध्यायः

॥६२॥ न च तव गुरुड नयं न वेदित्याह ॥ द्वीपमिति ॥६३॥६४॥६५॥६६॥६७॥ ॥इति श्रीभागवते महापुराणे दशमस्कंधे टीकायां षो ॥१६॥
डशोऽध्यायः ॥१६॥ ॥नागं समदर्शी नागालयं तं निरयापयत् ॥ बंधून्स्वद्दुरवतः श्रीतान्सुमांस्तत्र दवाद्पात् ॥१॥ ॥श्रीरामाळयनमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० पू०
६१

असमंजसं अप्रियं ॥१॥ उपहार्यैर्नवैः सर्पजनैः सर्पायत्तैर्जनैः ॥ वानस्पत्यः वानस्पतेर्मूलेदेयः नागानां तद्बाधपरिहाराय यो बलिर्निरूपितः उपकल्पितः ॥
२॥ ते च नागाः स्वंस्वं तं नागं जनैर्दत्तं सुपर्णाय प्रयच्छंति ॥ ततो नाताः गोपीथाय परत्रणाय ॥३॥ विषवीर्यान्यायो मदः तेनाविष्टः काद्रवेः कद्रुपुत्रः गरुडं कदर्थी
कृत्य अविगणय्य ॥ उपहार्यैः सुपर्णनवैः सर्पाएवजनास्तैः नागानां संबंधाय स्मिल्लोके को नागो दायते तया नूतो यो बलिः सुपर्णाय निरूपितः ॥ तत्रस्वं

सि राजोवाच ॥ ॥ नागालयं रमणकं कस्मात्तत्याज्य कालियः ॥ कृतं किं वा सुपर्णस्य तेनैकेनासमंजसं ॥१॥ ॥ श्रीशुक
उ० ॥ ॥ उपहार्यैः सर्पजनैर्मासिमासीह यो बलिः ॥ वानस्पत्यो महाबाहो नागानां प्राङ्निरूपितः ॥२॥ स्वंस्वं भागं प्रयच्छं
ति नागाः पर्वणि पर्वणि ॥ गोपीथायात्मनः सर्वे सुपर्णाय महात्मने ॥३॥ विषवीर्यमदाविष्टः काद्रवेयस्तु कालियः ॥ क
दर्थीकृत्य गरुडं स्वयं तं बुभुजे बलिं ॥४॥ तच्छ्रुत्वा कुपितो राजन्भगवान्भगवत्प्रियः ॥ विजिघांसुर्महावेगः कालियं समुपा
द्रवत् ॥५॥ तमापतंतं तरसा विषायुधः प्रत्यभ्ययादुच्छ्रितनैकमस्तकः ॥ दद्भिः सुपर्णं व्यदशद्ददायुधः करालजिह्वो
च्छ्वसितोग्रलोचनः ॥६॥ तं तार्क्ष्यपुत्रः स निरस्य मन्युमान्प्रचंडवेगो मधुसूदनासनः ॥ पक्षेण सव्येन हिरण्यरो
रोचिषा जघान कद्रूसुतमुग्रविक्रमः ॥७॥ ॥ श्रीरामाकृष्णाय नमः ॥ ॥ स्वं नागं सर्वे नागाः प्रयच्छंति कालियस्तु न रामः
प्रयच्छति । किं त्वन्यैर्दत्तमपि तं बलिं स्वयमेव बुभुजे ॥४॥ ५॥ विषमेवायुधं यस्य सः प्रत्यभियातः यो द्रुं प्रतिजगाम ॥ उच्छ्रितनैकमस्तक उन्नतानेकफणः न्य ६१
ददायुधः दंतायुधः ॥ करालजिह्वः श्वासावुच्छ्वसितोग्रलोचन श्च उच्छ्वसितानि उन्नंभितान्युग्राणि लोचनानि यस्य सः ॥६॥ तार्क्ष्यपुत्रो गरुडः ॥ मधुसूदन
स्यासनं यस्मिन् सः ॥७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्पः

तस्यगरुडस्याऽगम्यं अगाधतयाचदुरासदं ॥८॥ तदगम्यत्वेकारणमाह ॥ तत्रेति ॥ निवारितोपि ॥ ९ ॥ २० ॥ २१ ॥ लेलिहः ॥ अतस्तत्रावात्सीत ॥ २२ ॥
जांबूनदंसुवर्णंतेनालंकृतं ॥ २३ ॥ असवः ऐंद्रियाणि ॥ प्रमोदनिभृतात्मानः आनंदपूर्णमनसः ॥ २४ ॥ लब्धेहाः लब्धचेष्टाः ॥ २५ ॥ नगाः वृक्षाः अपिपूर्वं

सुपर्णपक्षाभिहतः कालियोऽतीवविह्वलः ॥ ह्रदं विवेशो कालिंद्यास्तदगम्यंदुरासदं ॥८॥ तत्रैकदाजलचरंगरुडोभक्ष्यमीप्सि
तं ॥ निवारितः सौभरिणाप्रसह्यक्षुधितोऽहरत ॥ ९ ॥ मीनान्सुदुःखितान्दृष्ट्वादीनान्मीनपतौहते ॥ कृपयासौभरिःप्राहतत्रस्थ
क्षेममाचरन ॥ १० ॥ अत्रप्रविश्यगरुडोयदिमत्स्यान्सखादति ॥ सद्यः प्राणैर्वियुज्येतसत्यमितद्ब्रवीम्यहं ॥ २१ ॥ तंकालियःपरंवेद
नान्यकश्चनलेलिहः ॥ अवात्सीद्गरुडाद्भीतः कृष्णेनचविवासितः ॥ २२ ॥ कृष्णंह्रदाद्विनिःक्रांतंदिव्यस्रग्गंधवाससं ॥ महामणि
गणाकीर्णंजांबूनदपरिष्कृतं ॥ २३ ॥ उपलभ्योत्थिताः सर्वेलब्धप्राणाइवासवः ॥ प्रमोदनिभृतात्मानोगोपाः प्रीत्याऽभिरेभिरे ॥
२४ ॥ यशोदारोहिणीनंदोगोप्योगोपाश्चकौरव ॥ कृष्णंसमेत्यलब्धेहा आसन्लब्धमनोरथाः ॥ २५ ॥ रामश्चाऽच्युतमालिंग्यजहा
सा ऽस्यानुभाववित ॥ नगागावोवृषावत्सालेभिरेपरमांमुदं ॥ २६ ॥ नंदंविप्राःसमागत्यगुरवःसकलत्रकाः ॥ ऊचुस्तेकालि
यग्रस्तोदिष्ट्यामुक्तस्तवात्मजः ॥ २७ ॥ देहिदानंद्विजातीनांकृष्णनिर्मुक्तिहेतवे ॥ नंदः प्रीतमनाराजन्गाःसुवर्णंतदादिशत ॥ २८ ॥
यशोदापिमहाभागानष्टलब्धप्रजासती ॥ परिष्वज्याऽकमारोप्यमुमोचाऽश्रुकलांमुहुः ॥ २९ ॥ तांरात्रिंतत्रराजेंद्रक्षुत्तृड्भ्यांश्रमकर्षिताः ॥
ऊषुर्व्रजौकसोगावःकालिंद्याउपकूलतः ॥ ३० ॥ ॥ मुक्ताःसंतःसद्यएवविरूढारस्यर्थः ॥ २६ ॥ तेविप्राऊचुःस्पष्टं ॥ २७ ॥ २८ ॥ नष्टलब्धप्रजानष्टप्रायापुन
र्लब्धाप्रजायस्याः ॥ २९ ॥ श्रमेणकर्षिताः उपकूलतः कूलप्रांते ॥ ३० ॥ ॥

द्विनिःक्रांतमि तिपाठः

वः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पू०
६२

॥२३॥ कालाग्नेः मृत्युरूपाद्ध्येः ॥ नमत्त्वोर्बिभिमः ॥ किंत्वत्वच्चरणवियोगाद्बिभ्याऽरूः ॥ नशक्नुमरति ॥२४॥ २६॥ विमोहानलिदं ऊनततः संशरणंगतान् ॥ गोपाः
नपादः नंतोः स्वावनंतवनवह्नितः ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे टीकायां सप्तदशोध्यायः ॥१७॥ ॥ ॐ हंशे ततो ग्रीष्मे वसंतगुणलक्षिते ॥ श
स्य अघातयद्बलेनालं प्रलंबं लीलया हरिः ॥१॥ हत्वानंतं फणागारेषु कालियसकौतुकं ॥ बलं प्रलंबवत्तुंगां समारोहयदमित्रहा ॥२॥ गोपालछद्ममायया

तदा शुचिवनोद्भूतो दावाग्निः सर्वतो व्रजं ॥ सुप्तं निशीथ आवृत्य प्रदग्धुमुपचक्रमे ॥२१॥ तत उत्थाय संभ्रांता दह्यमाना व्रजौकसः ॥ कृष्णं
ययुस्ते शरणं मायामानुषमीश्वरं ॥२२॥ कृष्ण कृष्ण महाभाग हे रामामितविक्रम ॥ एष घोरतमो वह्निस्तावकान्ग्रसते हि नः ॥२३॥ सु
दुस्तरान्नः स्वान्पाहि कालाग्नेः सुहृदः प्रभो ॥ न शक्नुमस्त्वच्चरणं संत्यक्तुमकुतोभयं ॥२४॥ इत्थं स्वजनवैक्लव्यं निरीक्ष्य जगदीश्वरः ॥
तमग्निमपिबत्तीव्रमनंतो नंतशक्तिधृक् ॥२५॥ अथ कृष्णः परिवृतो ज्ञातिभिर्मुदितात्मभिः ॥ अनुगीयमानो न्यविशद्व्रजं गो
कुलमंडितं ॥२६॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे कालियदमनो नाम सप्तदशोध्यायः ॥१७॥ ॥ श्रीशुक उ० ॥
व्रजे विक्रीडतोरेवं गोपालछद्ममायया ॥ ग्रीष्मो नामर्तुरभवन्नातिप्रेयान्शरीरिणां ॥१॥ स च वृंदावनगुणैर्वसंत इव लक्षितः ॥
यत्रास्ते भगवान्साक्षाद्रामेण सह केशवः ॥२॥ यत्र निर्झरनिर्ह्रादनिवृत्तस्वनझिल्लिकं ॥ शश्वत्तच्छीकरर्जीषद्रुममंडलमंडितं ॥३॥ ॥ रामः १
हारनि१ ६२

गोपालनमेव छद्म यस्यां तया ॥१॥२॥ वसंतसाम्यमाह ॥ चतुर्भिः ॥ यत्र ग्रीष्मेपि निर्झराणां निर्ह्रादेन घोषेण निवृत्तस्वनाः छन्नध्वनयो झिल्लिकाः
कणेरुध निस्वनकीटा यस्मिंस्तथा भूतं वृंदावनं भवति ॥ किंच ॥ शश्वत् ग्रीष्मेपि निर्झराणां शीकरैः अंबुकणैः ऋजीषा स्निग्धा ये द्रुमास्तेषां मंडलेन मंडितं ॥३॥ मंडले:

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यानि२

यत्रनाघोवनेवानिदाघोनामग्रीष्मः तेनतत्कालानवह्न्यर्कांशांचनवर्तियोद्भवः तापः ॥ अतिशाद्वले अतिहरितत्रणकार्णे ॥ यद्वा ॥ अतिक्रांतःशाद्वलोऽपि
स्थाने ॥४॥ ननुशाद्वलमेवकुतस्तत्राह ॥ अगाधेति ॥ अगाधानितोयानियासांतासांह्रदिनीनांतटस्पर्शिभिरूर्मिभिः पुलिनैर्द्रवत्पुरीषपंकोयस्यास्तस्याभुवः

सरित्सरःप्रस्रवणोर्मिवायुनाकह्लारकंजोत्पलरेणुहारिणा ॥ नविद्यतेयत्रवनौकसांदवोनिदाघवह्न्यर्कभवोतिशाद्वले ॥४॥ अगाध
तोयाह्रदिनीतटोर्मिभिर्द्रवत्पुरीष्याः पुलिनैः समंततः ॥ नयत्रचंडांशुकराविषोल्बणाभुवोरसंशाद्वलितंचगृह्णते ॥५॥ वनंकुसु
मितंश्रीमन्नदच्चित्रमृगद्विजं ॥ गायन्मयूरभ्रमरंकूजत्कोकिलसारसं ॥६॥ क्रीडिष्यमाणस्तत्कृष्णोभगवान्बलसंयुतः ॥ वे
णुंविरणयन्गोपैर्गोधनैः सं वृतोऽविशत् ॥७॥ प्रवालबर्हस्तबकस्रग्धातुकृतभूषणाः ॥ रामकृष्णादयोगोपानन्नृतुर्युयुधु
र्जगुः ॥८॥ कृष्ण स्यनृत्यतः केचिज्जगुःकेचिदवादयन् ॥ वेणुपाणितलैश्शृंगैः प्रशशंसुरथापरे ॥९॥ गोपजातिप्रति ३
छन्नादेवागोपालरूपिणः ॥ ईडिरेकृष्णरामंचनटाइवनटंनृप ॥१०॥ भ्रामणैःलंघनैःक्षेपैः आस्फोटनविकर्षणैः ॥ चि
क्रीडतुर्नियुद्धेनकाकपक्षधरौक्वचित् ॥११॥ क्वचिन्नृत्यत्सुचान्येषुगायकौवादकौस्वयं ॥ शशंसतुर्महाराजसाधु
साध्वितिवादिनौ ॥१२॥ ॥ श्रीरामाकृष्णायनमः ॥ ॥ ॥ रसंशाद्वलितंशाद्वलरूपतांचविषवदुल्बणा अपि
सूर्यरश्मयोनिगृह्णंतेनहरंति ॥५॥ तद्वनंनदंतश्चित्रामृगाद्विजाश्चयस्मिन् ॥ गायंतोमयूराभ्रमराश्चयस्मिन् ॥ कूजंतःकोकिलाःसारसाश्चयस्मि
वे१ न् ॥६॥ ततअविशत् ॥ विंश ॥७॥ ॥१०॥ काकपक्षाः चूडाकरणात्प्राक्तनकेशाः ॥ भ्रामणादिप्रकारैः नियुद्धेबाहुयुद्धेनचिक्रीडतुः ॥११॥१२॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० पू०
६३

क्वणैः क्वणन्त्स्तफलैः॥ अस्पृश्यपल्लवनेत्रवंधस्व तदाद्यैः॥ मर्गाणां खगानां च चेष्टया॥२३॥ दर्दुरप्लावैः मंडुकप्लुतिभिः॥ स्पंदोलिकया दोलालंबनेन॥ नृपाणा
मिव लीलया॥२४॥ नद्यद्रिद्रोणायः कुंजानि चरानेषु चारयतोः सतोः॥ तद्वने तस्मिन्वने॥ तयोर्जिहीर्षया॥२५॥२६॥ यथायथं वयोबलाद्यनुरूपं द्वंद्वीभूय॥

क्वचिद्विल्वैः क्वचित्कुंभैः क्वचामलकमुष्टिभिः॥ अस्पृश्यनेत्रबंधाद्यैः क्वचिन्मृगखगेहया॥२३॥ क्वचिच्च दर्दुरप्लावैर्विविधैरुपहा
सकैः॥ कदाचित्स्पंदोलिकया कर्हिचिन्नृपचेष्टया॥ एवं तौ लोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने॥२४॥ नद्यद्रिद्रोणिकुंजेषु काननेषु स
रस्सु च॥ पशूंश्चारयतोर्गोपैस्तद्वने रामकृष्णयोः॥ गोपरूपी प्रलंबोऽगादसुरस्तज्जिहीर्षया॥२५॥ तं विद्वानपि दाशार्हो भगवान्
सर्वदर्शनः॥ अन्वमोदत तत्सख्यं वधं तस्य विचिंतयन्॥२६॥ तत्रोपाहूय गोपालान्कृष्णः प्राह विहारवित्॥ हे गोपा विहरिष्या रि
मो द्वंद्वीभूय यथायथं॥२७॥ तत्र चक्रुः परिवृढौ गोपा रामजनार्दनौ॥ कृष्णसंघट्टिनः केचिदासन्रामस्य चापरे॥२८॥ आचेरु
र्विविधाः क्रीडा वाह्यवाहकलक्षणाः॥ यत्रारोहंति जेतारो वहंति च पराजिताः॥२९॥ वहंतो वाह्यमानाश्च चारयंतश्च गोधनं॥
भांडीरकं नाम वटं जग्मुः कृष्णपुरोगमाः॥३०॥ रामसंघट्टिनो यर्हि श्रीदामवृषभादयः॥ क्रीडायां जयिनस्तांस्तानूहुः कृष्णा
दयो नृप॥३१॥ उवाह कृष्णो भगवान्श्रीदामानं पराजितः॥ वृषभं भद्रसेनस्तु प्रलंबो रोहिणीसुतं॥३२॥ अविषह्यं मन्यमान रामः
ः कृष्णं दानवपुंगवः॥ वहन्द्रुततरं प्रागादवरोहणतः परं॥३३॥॥ ॥२७॥ परिवृढौ नायकौ॥ तत्र केचन कृष्णसंघट्टिनः कृष्णपक्षीयाः॥२८॥२९॥ ६३
वाह्यमानाः पृष्ठेनोह्यमानाः॥३०॥३१॥३२॥ कृष्णदृष्टिवंचनाय अवरोहणं मर्यादा॥ ततः परं दूरमगात्॥३३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धरणिधरेंद्रवद्गौरवं यस्य तं ॥ निजं आसुरं वपुः आस्थितः ॥ पुरटपरिच्छदः सुवर्णालंकारः ॥ तडिद्द्युमान् विद्युद्भ्राजमानरत्नालंकारोपमा ॥ उडुपतिवाडितिरा
मोपमा ॥ [illegible] ॥ उडुपतिं वहतीत्युडुपतिवाट् ॥ यदि यथोचितस्थानेषु स्थिता विद्युतो न वर्तते उपरि चोडुपतिस्तदा सांबुदो यथा नातितद्
द्वनाविस्पर्थः ॥२४॥ अलमतिवेगेन ॥ प्रदीप्ते दृशौ यस्मिन् तत् ॥ भ्रुकुटितटसंलग्ना उग्रा दंष्ट्रा यस्मिन् तत् ॥ प्रदीप्तदृक् ॥ भ्रुकुटीतटं यस्मिन् ॥ उग्रा दंष्ट्रा य

तमुद्वहन् धरणिधरेंद्रगौरवं महासुरो विगतरयो निजं वपुः ॥ स आस्थितः पुरटपरिच्छदो बभौ तडिद्द्युमानुडुपतिवाडिवांबुदः ॥२
४॥ निरीक्ष्य तद्वपुरलमंबरे चरत् प्रदीप्तदृग्भ्रुकुटितटोग्रदंष्ट्रकं ॥ ज्वलच्छिखं कटककिरीटकुंडलत्विषाद्भुतं हलधर ईषदत्रसत् ॥२५ स्कं १
अथागतस्मृतिरभयो रिपुं बलो विहाय सार्थमिव हरंतमात्मनः ॥ रुषाहनच्छिरसि दृढेन मुष्टिना सुराधिपो गिरिमिव वज्ररंहसा ॥२६॥ न
स आहतः सपदि विशीर्णमस्तको मुखाद्वमन् रुधिरमपस्मृतोऽसुरः ॥ महारवं व्यसुरपतत् समीरयन् गिरिर्यथा मघवत आयुधा
हतः ॥२७॥ दृष्ट्वा प्रलंबं निहतं बलेन बलशालिना ॥ गोपाः सुविस्मिता आसन् साधु साध्विति वादिनः ॥२८॥ आशिषोऽभिगृ
णंतस्तं प्रशशंसुस्तदर्हणं ॥ प्रेत्यागतमिवालिंग्य प्रेमविह्वलचेतसः ॥२९॥ पापे प्रलंबे निहते देवाः परमनिर्वृताः ॥ अभ्यवर्षन्
बलं माल्यैः शशंसुः साधु साध्विति ॥३०॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे प्रलंबवधो नामाष्टादशोऽध्यायः ॥१८॥ ॥

स्मिन् ॥ तच्च तच्चेति ॥ ज्वलंत्यः शिखाः केशाः यस्मिन् तत् ॥२५॥ आगतस्मृतिरभय एव ॥ आत्मनः सार्थं गोसंघमिव विहाय हरंतं रिपुं अहनत् ॥ यद्वा ॥ विहायसा आ
काशमार्गेण आत्मनः प्राप्तं अर्थमिव हरंतमिति ॥ वज्ररंहसा वज्रवेगेन मुष्टिना ॥२६॥ अपस्मृतः गतस्मृतिः ॥ महारवं समीरयन् ॥२७॥२८॥ तदर्हणं प्रशंसा
र्हं ॥२९॥३०॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे टीकायां अष्टादशोऽध्यायः ॥१८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊनविंशे निविष्टं तु गोपगोकुलमच्युतः॥ मुंजारण्यमरण्याग्नेरत्रस्तन्निपातनः॥१॥ दूरचारिण एव॥ वनाद्वनांतरं निर्विशंत्यो दावेन तर्षितास्तृषिताः॥ क्रंदंत्यः ईषी
काटवीं अत्युच्छ्रितघनतृणविशेषारण्यं निर्विविशुः॥२॥ कृष्णरामौ आदिर्येषां तेनन्त्रतौ॥३॥ तासां गवां खुरैर्दच्छिन्नैस्तृणैः गोष्पादैरंकितैश्च तत्प्रदेशैः तृणै

॥ श्रीशुक उवाच॥ ॥ क्रीडासक्तेषु गोपेषु तद्गावो दूरचारिणीः॥ स्वैरं चरंत्यो विविशुस्तृणलोभेन गह्वरं॥१॥ अजा गावो महिष्यश्च
निर्विशंत्यो वनाद्वनं॥ ईषीकाटवीं विविशुः क्रंदंत्यो दावतर्षिताः॥२॥ तेऽपश्यंतः पशून्गोपाः कृष्णरामादयस्तदा॥ जातानुतापा न विदुर्वि-
चिन्वंतो गवां गतिं॥३॥ तृणैस्तत्खुरदच्छिन्नैर्गोष्पदैरंकितैर्गवां॥ मार्गमन्वगमन्सर्वे नष्टाजीव्या विचेतसः॥४॥ मुंजाटव्यां भ्रष्टमार्गं क्रंद-
मानं स्वगोधनं॥ संप्राप्य तृषिताः श्रांतास्ततस्ते संन्यवर्तयन्॥५॥ ता आहूता भगवता मेघगंभीरया गिरा॥ स्वनाम्नां निनदं श्रुत्वा प्रति-
नेदुः प्रहर्षिताः॥६॥ ततः समंताद्वनधूमकेतुर्यदृच्छयाभूत्क्षयकृद्वनौकसां॥ समीरितः सारथिनोल्बणोल्मुकैर्विलेलिहानः
स्थिरजंगमान्महान्॥७॥ तमापतंतं परितो दवाग्निं गोपाश्च गावः प्रसमीक्ष्य भीताः॥ ऊचुश्च कृष्णं सबलं प्रपन्ना यथा हरिं
मृत्युभयार्दिता जनाः॥८॥ कृष्ण कृष्ण महावीर्य हे रामामितविक्रम॥ दावाग्निना दह्यमानान्प्रपन्नांस्त्रातुमर्हथ॥९॥ नू-
नं त्वद्बांधवाः कृष्ण न चार्हंत्यवसीदितुं॥ वयं हि सर्वधर्मज्ञ त्वन्नाथास्त्वत्परायणाः॥१०॥ श्रीशुक उवाच॥ ॥ वचो निशम्य कृप-
णं बंधूनां भगवान्हरिः॥ निमीलयत मा भैष्ट लोचनानीत्यभाषत॥११॥ तथेति मीलिताक्षेषु भगवानग्निमुल्बणं॥ पीत्वा मुखेन
तान्कृच्छ्राद्योगाधीशो व्यमोचयत्॥१२॥ ॥ गवां मार्गमन्वगमन्सर्वे नष्टाः॥ आजीव्याः गतजीविका साधनाः॥४॥ मुंजाटव्यपि सैव॥५॥६॥
गोपानां नाशहेतुर्वनवह्निः सर्वतः प्रादुरभूत्॥ सारथिना वायुना॥७॥११॥ कृच्छ्रात् गह्वरप्रदेशात् दूरश्रमादिजनितात् तत्क्षणमेव भांडीरं नीत्वा तान्
मोचयदित्यर्थः॥१२॥ ॥

राम:
६४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षणेनैव नांडीरं प्रापितास्तत्र अत्यत एव पुनर्भ्रांत्या विस्मिताः ॥ १३ ॥ १८ ॥ श्रीदामादिस्वगोपानां स्वागमारूप्यरूप्यतं ॥ स्वैश्वर्यमाविष्करोद्वनवह्निनिपात
तः ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे टीकायां ऊनविंशतितमोध्यायः ॥ १९ ॥ ॥ विंशे प्रावृट्शरच्छोभावर्णनेन वनोचिताः ॥ प्रावृट्का ऊनिरू
प्यंते गोपरामयुजोहरेः ॥ १ ॥ इयादेयोपमानेन प्रावृट्शरदृतुश्रियोः ॥ वर्णनं त्वद्भुतैश्वर्यं ... लीलाविवक्षया ॥ २ ॥ तत्र प्रावृड्वर्णनं तत आदिह विंश

पु

ततश्च तेऽक्षीण्युन्मील्य पुनर्भांडीरमापिताः ॥ निशाम्य विस्मिता आसन् आत्मानं गाश्च मोचिताः ॥ १३ ॥ कृष्णस्य योगवीर्यं तद्
योगमायानुभावितं ॥ दावाग्नेरात्मनः क्षेमं वीक्ष्य ते मेनिरेऽमरं ॥ १४ ॥ गाः संनिवर्त्य सायाह्ने सह रामो जनार्दनः ॥ वेणुं विरणयन्
गोष्ठमगाद्गोपैरभिष्टुतः ॥ १५ ॥ गोपानां परमानंद आसीद्गोविंददर्शने ॥ क्षणं युगशतमिव यासां येन विनाऽभवत् ॥ १६ ॥ तयोस्तद
द्भुतं कर्म दावाग्नेर्मोक्षमात्मनः ॥ गोपाः स्त्रीभ्यः समाचख्युः प्रलंबवधमेव च ॥ १७ ॥ गोपवृद्धाश्च गोप्यश्च तदुपाकर्ण्य विस्मिता
ः ॥ मेनिरे देवप्रवरौ कृष्णरामौ व्रजं गतौ ॥ १८ ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे दावाग्निपानो नामैकोनविंशति
तमोध्यायः ॥ १९ ॥ ॥ श्रीशुक उ० ॥ ॥ ततः प्रावर्तत प्रावृट् सर्वसत्वसमुद्भवा ॥ विद्योतमानपरिधिर्विस्फूर्जितनभस्त
ला ॥ १ ॥ सांद्रनीलांबुदैर्व्योम सविद्युत्स्तनयित्नुभिः ॥ अस्पष्टज्योतिराछन्नं ब्रह्मेव सगुणं बभौ ॥ २ ॥ ॥ ॥ ॥

त्पा ॥ सर्वेषां प्राणिनां समुद्भव उत्पत्तिर्यतो जीवनतश्च यस्यां सा प्रावृट् ॥ विद्योतमानाः परिधयः परिवेषा दिशो वा यस्यां सा ॥ विस्फूर्जितं संक्षुभितं नभ
स्तलं यस्यां सा ॥ १ ॥ सांद्रैर्निबिडैर्नीलांबुदैर्विद्युद्गर्जितसहितैराछन्नं ॥ सगुणं गुणैराछन्नं जीवाख्यं ॥ विद्युद्गर्जितांबुदानां सत्वरजस्तमोभिरुप
मा ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा० टी० पू०
६५

पर्जन्यः सूर्यः ॥ स्वगोभिः रश्मिभिः ॥ कालेय यौवितसमये ॥ अत्र रात्रौ पमाकरादानतः समये पुनर्दानं तस्य सूचिता ॥ ३ ॥ अस्य विश्वस्य प्राणनं आप्यायनकरं
जीवनमुदकं मुमुचुः ॥ कृपालवो यथा तप्तं जनं निराहृत्य अनुकंपमानाः तदाप्यायनाय स्वजीवनमपि त्यजंतीति इत्यं महांतो मेघास्तडिन्नेत्रैः तप्तं निराहृत्य विश्वं वायुभि
र्वेपिता जीवनं मुमुचुरिति ॥ ४ ॥ तपसा ग्रीष्मेण कृत्वा देवमीढा पर्जन्यसिक्ता ॥ वर्षीयसी उच्छूना पुष्टा ॥ काम्यं तपो यस्य तस्य ॥ तनुः कामान् संप्राप्य यथेति ॥

अश्नीमा सान्निपातं यद्भूम्यां श्वो दमयंवसु ॥ स्वगोभिर्मोक्षुमारे नेपर्जन्यः काल आगते ॥ ३ ॥ तपः कृत्वा देवमीढा आसीद्वर्षी
यसी मही ॥ यथैव काम्यतपसस्तनुः संप्राप्य तत्फलं ॥ ४ ॥ तडित्वंतो महामेघा श्वं उच्छ्वसन्नवेपिताः ॥ प्राणनं जीवनं ह्यस्य मुमुचुः कृ
रुणा इव ॥ ५ ॥ निशामुखेषु खद्योतास्तमसा नांति नग्नतां ॥ यथा पापेन पाषंडा न हि वेदाः कलौ युगे ॥ ६ ॥ श्रुत्वा पर्जन्यनिनदं म
डुका विसृजन् गिरः ॥ तूष्णीं शयाना प्राग्यद्वत् ब्राह्मणा नियमात्यये ॥ ७ ॥ आसन्नुत्पथवाहिन्यः क्षुद्रनद्योऽनुशुष्यतः ॥ पुंसो
यथाऽस्वतंत्रस्य देहद्रविणसंपदः ॥ ८ ॥ हरिता हरिभिः शष्पैरिंद्रगोपैश्च लोहिता ॥ उच्छिलिंध्रकृतच्छाया नृणां श्रीरिव भूर
भूत ॥ ९ ॥ क्षेत्राणि सस्यसंपद्भिः कर्षकाणां मुदं ददुः ॥ धनिनामुपतापं च दैवाधीनमजानतां ॥ १० ॥ ॥ श्रीरामः ॥ ॥

५ ॥ ६ ॥ नित्यकर्मावसाने आचार्यनिर्दिष्टं श्रुत्वा तच्छिष्याध्यायया अधीयते तद्वदिति ॥ ७ ॥ अनुशुष्यतः अनुशुष्यंत्यः ॥ अस्वतंत्रस्य इंद्रियपरतंत्रस्य राम: १
निरंकुशस्येति वा ॥ ८ ॥ हरिभिः नीलैः शष्पैर्बालतृणैः नीलवर्णा ॥ क्वचित्क्वचिदिंद्रगोपैः कीटविशेषैर्लोहिता ॥ तत्र तत्र उच्छिलींध्रैः छत्राकारै ६५
रुद्भिदैः कृतच्छाया ॥ नृणां राज्ञां श्रीः सेनासंपदिव ॥ ९ ॥ क्षेत्राणीति ॥ तदा हि वृष्टेर्विच्छेदे लसंतः प्रियं वाग्वादयो मुदं ददातीति ॥ विच्छेदे शुष्यंतोऽनुता
पं चेति ॥ १० ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अविक्लिन्नः अविनष्टः॥ यथा हरिनिषेवयेति॥ हरिसेवायां महत्त्वादिसमग्र एव सर्वे रुचिरा नवंति तस्याः परमधर्मत्वात् परमसुखत्वाच्चेत तद्ददिति॥२१॥ कामाक्तं
कामवासनायुक्तमिति श्वसनोर्मिसाम्यं॥ गुणैर्विषयैर्युज्यत इति सरित्संगतिसाम्यं॥२२॥ अधोक्षजवर्गचेतो येषां ते॥२३॥ असंस्कृता अहुणाः॥ नान्यस
माना इत्यसंस्कृतसाम्यं॥ कालेन चाहता रतिस्तृणाच्छादनसाम्यं॥२३॥ यथा कामिन्यः पुंश्चल्यः॥२५॥ निर्गुणं ज्यारहितमपि गुणि निगर्जितशाष्ववति।

जलाशयस्त्वलोकस्तः सर्वैर्नववारिनिषेवणात्॥ अविक्लिन्नः चिरं रूपं यथा हरिनिषेवया॥२१॥ सरिद्भिः संगतः सिंधुश्चुक्षुभे श्वस
नोर्मिवान्॥ अपक्वयोगिनश्चित्तं कामाक्तं गुणयुग्यथा॥२२॥ गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः॥ अभिभूयमाना व्यस
नैर्यथाधोक्षजचेतसः॥ मार्गा बभूवुः संदिग्धास्तृणैश्छन्ना ह्यसंस्कृताः॥ नाभ्यस्यमानाः श्रुतयो द्विजैः कालहता इव॥२४॥
लोकबंधुषु मेघेषु विद्युतश्चलसौहृदाः॥ स्थैर्यं न चक्रुः कामिन्यः पुरुषेषु गु ष्विव॥२५॥ धनुर्वियति माहेंद्रं निर्गुणं च गुणि णि
न्यभात्॥ व्यक्ते गुणव्यतिकरे ऽगुणवान्पुरुषो यथा॥२६॥ न रराजोडुपः छन्नः स्व त्स्ना राजितैर्घनैः॥ अहंमत्या भासित ज्यो
या स्वभासा पुरुषो यथा॥२७॥ मेघागमोत्सवा हृष्टाः प्रत्यनंदञ्छिखंडिनः॥ गृहेषु तप्ता निर्विण्णा यथाच्युतजनागमे॥२८॥
पीत्वापः पादपाः पद्भिः आसन्नानात्ममूर्तयः॥ प्राक्क्षामास्तपसा श्रांता यथा कामानुसेवया॥२९॥॥ अजातः अशोभत॥ गुण

व्यतिकरात्मके व्यक्ते प्रपंचे अगुणवान्निर्गुणः पुरुषो यथेति॥२६॥ स्वभासा भासितया अहंमत्येति स्वचैतन्येनैव प्रकाशितेनाहंकारेण छन्नो नावभा
या॥ यद्वा अहं विद्वान्दाता वेत्ता शूर इति स्वप्रतासै वारोपितयेति॥२७॥ गमे नोत्सवो येषां अतो हृष्टाः॥२८॥ नानात्ममूर्तयः॥ अनेकरूपदेहाः॥२९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पू० अश्रांतानि पंकंकंटकादियुक्तानि रोधांसि तटानि येषां तेष्वपि नृपुः नितरामवसन् ॥ सारसाः चक्रवाकाः ॥ आश्रांतानि घोराणि अनुपरतानि वाक्यानि येषु तेष्वपि
६६ गृहेषु ॥२०॥ ईश्वरे इंद्रे ॥२१॥ नुन्नाः प्रेरिताः ॥ आशिषः कामान् विप्रपतयो राजानः वणिजांपतयो वा द्विजेरिताः पुरोहितैरुक्ताः ॥२२॥ प्रावृषि कृतां क्रीडां वर्णयंति ॥
सरःस्वशांतरोधस्सु न्यूषुरंगापि सारसाः ॥ गृहेष्वशांतकृत्येषु ग्राम्या इव दुराशया ॥२०॥ जलौघैर्निरभिद्यंत सेतवो वर्षतीश्वरे ॥
पाषंडिनामसद्वादैर्वेदमार्गाः कलौ यथा ॥२१॥ व्यमुंचन्वायुभिर्नुन्ना भूतेभ्योऽथामृतं घनाः ॥ यथाशिषो विश्पतयः काले का
ले द्विजेरिताः ॥२२॥ एवं वनं तद्वर्षिष्टं पक्वखर्जूरजंबुमत् ॥ गोगोपालैर्वृतो रंतुं सबलः प्राविशद्धरिः ॥२३॥ धेनवो मंदगा
मिन्य ऊधोभारेण भूयसा ॥ ययुर्भगवताहूता द्रुतं प्रीत्या स्नुतस्तनीः ॥२४॥ वनौकसः प्रमुदिता वनराजीर्मधुच्युतः ॥ ज
लधारा गिरेर्नादादासन्ना ददृशे गुहाः ॥२५॥ क्वचिद्वनस्पतिक्रोडे गुहायां चाभिवर्षति ॥ निर्विश्य भगवान्रेमे कंदमूलफ
लाशनः ॥२६॥ दध्योदनं समुपानीतं शिलायां सलिलांतिके ॥ संभोजनीयैर्बुभुजे गोपैः संकर्षणान्वितः ॥२७॥ शाद्वलो
परि संविश्य चर्वतो मीलितेक्षणान् ॥ तृप्तान्वृषान्वत्सतरान्गाश्च स्वोधोभरश्रमाः ॥२८॥ प्रावृट्श्रियं च तां वीक्ष्य सर्वकाल
तमुदावहां ॥ भगवान्पूजयांचक्रे आत्मशक्त्युपबृंहितां ॥२९॥ ॥ एवं वनमिति सप्तभिः ॥ वर्षिष्टं समृद्धं ॥२३॥२४॥ वनौकसः पुलिंदाः राम:
काचवोहृदि॥एनंकुमारमुद्दिश्यगर्गोमेयदुवाचह॥१५॥वर्णास्त्रयःकिलास्यासन्गृह्णतोनुयुगंतनूः॥शुक्लोरक्तस्तथापीतइदानीं
कृष्णतांगतः॥१६॥प्रागयंवसुदेवस्यक्वचिज्जातस्तवात्मजः॥वासुदेवइतिश्रीमानभिज्ञाःसंप्रचक्षते॥१७॥बहूनिसंतिनामानि
रूपाणिचसुतस्यते॥गुणकर्मानुरूपाणितान्यहंवेदनोजनाः॥१८॥एषवःश्रेयआधास्यद्गोपगोकुलनंदनः॥अनेनसर्वदुर्गाणि
यूयमंजस्तरिष्यथ॥१९॥पुरानेनव्रजपतेसाधवोदस्युपीडिताः॥अराजकेरक्ष्यमाणाजिग्युर्दस्यूनसमेधिताः॥२०॥यएतस्मिन्महा
भागाःप्रीतिंकुर्वंतिमानवाः॥नारयोभिभवंत्येतान्विष्णुपक्षानिवासुराः॥२१॥तस्मान्नंदकुमारोयंनारायणसमोगुणैः॥श्रियाकी
र्त्यानुभावेनतत्कर्मसुनविस्मयः॥२२॥इत्यद्धा मांसमादिश्यगर्गेचस्वगृहंगते॥मन्येनारायणस्यांशंकृष्णमक्लिष्टकारणं॥२३॥
इतिनंदवचःश्रुत्वागर्गगीतंव्रजौकसः॥मुदितानंदमानर्चुःकृष्णंविगतविस्मयाः॥२४॥ ॥श्रीरामाकृष्णायनमः॥ ॥

मांप्रतिसमादिश्यगर्गेस्वगृहंगतेसति॥तदानीतथामन्यमानोपिइदानींकृष्णंनारायणस्यांशंमन्ये॥अत्रहेतुः॥अक्लिष्टकारिणमिति॥२३॥२४॥॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोवर्द्धनोद्धरणं सपरिकरमनुस्मरन् प्रकटितैश्वर्यस्य श्रीकृष्णस्य प्रीतिं प्रार्थयते ॥ देवइति ॥ यज्ञविप्लवेन सौरुट्तया देवे इंद्रे वर्षति सति वज्राश्मवर्षानिले
र्शनिभिः शर्कराता वा वायुभिः सीदन्तः पालपशुस्त्रिसीदंतः पालाः पशवः स्त्रियश्च यस्मिन् तत् ॥ तथा आत्मा स्वयमेव शरणं यस्य तत् द्रोष्ठं दृष्ट्वा अनु
कंपी उत्स्मयन् प्रौढिमाविः कुर्वन् शैलमुत्पाट्य अबलो बालो लीलया उच्छिलिंध्रं यथा तथा एकेन करेण बिभ्रत् दधत् ॥ गोष्ठमपात् पालितवान् ॥ एवं
महेंद्रमदभित् ॥ गवामिंद्रस्तु कृष्णा ध्यायायें च स्मरति ॥ सएवं भूतः श्रीकृष्णो नः प्रीयात् प्रायतामिति ॥ षड्विंशे दशमे व्यक्तः षड्विंशो दशमो हरिः ॥ व्यनेकु

देवे वर्षति यज्ञविप्लवरुषा वज्राश्मवर्षानिलैः सीदत्पालपशुस्त्रि आत्मशरणं दृष्ट्वानुकंप्युत्स्मयन् ॥ उत्पाट्यैककरेण शैलमबलो लीलो
च्छिलिंध्रं यथा बिभ्रद्गोष्ठमपान्महेंद्रमदभित्प्रीयान्न इंद्रो गवां ॥२५॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे षड्विंशतितमोऽध्यायः
॥२६॥ ॥ श्रीशुक उवाच ॥ ॥ गोवर्द्धने धृते शैले आसाराद्रक्षिते व्रजे ॥ गोलोकादाव्रजत्कृष्णं सुरभिः शक्र एव च ॥१॥ विविक्त उप
संगम्य व्रीडितः कृतहेलनः ॥ पस्पर्श पादयोरेनं किरीटेनार्कवर्चसा ॥२॥ दृष्टश्रुतानुभावोस्य कृष्णस्यामिततेजसः ॥ नष्टत्रिलोकेश
मद इ[illegible] इदमाह कृतांजलिः ॥३॥ ॥

पंचविंशं मां चतुर्विंशतितः पृथक् ॥२५॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे टीकायां षड्विंशोऽध्यायः ॥
२६॥ ॥ सप्तविंशे तदा कृष्णस्य सुरभिः पूर्वं परं ॥ वर्णयन्ति सुरभींद्राभ्यां अभिषेकमहोत्सवः ॥१॥ गोवर्द्धने धृते शैले इति शक्रस्य नये नागमने हेतुः ॥ आसाराद्रक्षि
ते व्रज इति सुरभेर्हर्षणागमने ॥१॥ तत्रेंद्र आगत्य किं कृतवान् तदाह ॥ विविक्त उपसंगम्येत्यादिना ॥ अथाह सुरभिरित्यतः प्राक् तेनेन गतं येन ॥ विविक्ते एकांते ॥
पादयोः पस्पर्श नमस्कार ॥२॥ अस्य कृष्णस्य श्रुत आसौ अनुभावश्च श्रुतानुभावो येन सः इंद्रः नष्टत्रिलोकेशोऽहमिति मदो यस्य सः ॥३॥ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रममापराधंक्षमस्वेतिवक्तुंतवतावत्तावदपराधोनास्त्येवत्वयानुग्रहणएवकृतःस्यादित्याह॥चतुर्भिः॥विशुद्धसत्वमिति॥धामस्वरूपंशांतंएकरूपं॥अतश्चतपोमयंप्रचुरज्ञानंस
र्वज्ञमित्यर्थः॥अतः॥ध्वस्तरजस्तमस्कंध्वस्तेअविद्यमानेरजस्तमसीयस्मिन्॥अतएवायंअस्मदादिषुदृश्यमानःमायाकार्यरूपःगुणसंप्रवाहःगुणैःसंप्रोह्यतइ
तितथासंसारइत्यर्थः॥सतेतवनविद्यते॥यतःअतःअग्रहणेनाज्ञानेनानुबध्यतइतितथासर्वज्ञस्यतेनास्तीत्यर्थः॥अज्ञानसंबंधोवा॥४॥यदाअज्ञानंतत्
दे३ कृतसंबंधोनस्तस्तदातत्कृतानांलोभादीनांकावार्तेत्याह॥कुतोन्विति॥तत्कृताःदेहसंबंधकृताः॥तद्धेतवःपुनरन्यस्यदेहस्यहेतवः॥ननुज्ञानिनामपितेदृश्यं
तेअतआह॥अबुधलिंगभावाःअज्ञानिनांगमकाः॥यावद्रागादिमत्वंतावत्ज्ञानित्वमेवनसिद्धमित्यर्थः॥लोभाद्यभावेपिमन्मानभंगोद्दंडार्थमित्याह॥तथापि॥

इंद्रउवाच॥ ॥विशुद्धसत्वंतवधामशांतंतपोमयंध्वस्तरजस्तमस्कं॥मायामयोयंगुणसंप्रवाहोनविद्यतेतेग्रहणानुबंधः॥४॥
कुतोनुतद्धेतवईशतत्कृतालोभादयोयेबुधलिंगभावाः॥तथापिदंडंभगवान्बिभर्तिधर्मस्यगुप्त्यैखलनिग्रहाय॥५॥पितागुरुस्त्वं
जगतामधीशोदुरत्ययःकालउपात्तदंडः॥हितायचेच्छातनुभिःसमीहसेमानंविधुन्वन्जगदीशमानिनां॥६॥येमद्विधाज्ञाजगदीशमा
निनस्त्वांवीक्ष्यकालेभयमाशुतन्मदं॥हित्वार्यमार्गंप्रभजंत्यपस्मयाईहाखलानामपितेनुशासनं॥७॥सत्वंममैश्वर्यमदप्लुतस्यकृ
तागसस्तेविदुषःप्रभावं॥क्षं तुंप्रभोथार्हसिमूढचेतसोमैवंपुनर्भून्मतिरीशमेसती॥८॥ ॥श्रीरामाकृष्णायनमः॥ ॥

ति॥५॥ननुत्वद्दंडेचममगोपपुत्रस्यकाशक्तिःकिंचकारणंकोवादंडोमयाचरितस्ततआह॥पितेति॥जगतांत्वंपिताजनकः॥गुरुरुपदेष्टा॥अधीशःनियंता॥इति
दंडधारणेहेतुत्रयं॥कालत्वात्समर्थःतस्मादुपात्तदंडोलीलावतारैःसमीहसेतवसमीहालीलैवजगदीशमानिनामस्माकंमानंधुनन्नित्यर्थः॥६॥कथमेतत्
दित्यतआह॥यइति॥ममद्विधाज्ञाअज्ञाश्चते॥अतोजगदीशमानिनः॥कालेभयकालेपियथाधुनैवातिदृष्टेत्वामभयान्नयमगणयंतंवीक्ष्यआशुतन्मदंज
गदीशाहमितिमदंहित्वाविगतगर्वाःसंतःआर्यमार्गंभक्तिलक्षणंभजंति॥अतस्तवेहैवखलानांअनुशासनंदंडइत्यर्थः॥७॥एवंभगवत्स्वरूपंअभिप्रायंचानुवर्ण्य
क्षमापयति॥सत्वमिति॥मेभूताअसतीमतिर्मेपुनर्माभूदितिप्रार्थनांतरं॥८॥ ॥

वे

हितायकल्याणायस्वेच्छातनुभिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महान् अयमपराधः कथं क्षंतव्य इति चेत्तत्राह ॥ तवेति ॥ स्वयं नृ नराणां पुनश्च उरुभारजन्मनां बहूनां भाराणां जन्म येभ्यस्तेषामभवाय नाशाय ॥ युष्मच्चरणसेविनां तु भवाय
॥ अतो मम त्वत्सेवकत्वात्त्वत्पापराधिनोपि क्षंतव्यमिति भावः ॥ १९ ॥ क्षमापयन्नमस्करोति ॥ नमस्त इति ॥ तुभ्यं भगवते कृष्णाय नमः ॥ पुरुषाय सर्वांतर्यामिणे ॥ महात्मने अंतस्त्वबेः
प्यपरिछिन्नाय ॥ कुतः वासुदेवाय सर्वनिवासाय ॥ सात्वतां यादवानां पतये ॥ २० ॥ तर्हि किमहं यादवः न ॥ स्वछंदोपात्तदेहाय स्वेषां भक्तानां छंदेन रक्षोः । यौस्वात्तदेहाय
॥ तत्रापि विशुद्धं ज्ञानमेव मूर्त्तिर्यस्य तस्मै ॥ कुतः मायया सर्वस्यै कुतः सर्वस्य बीजाय कारणाय ॥ अतः सर्वभूतात्मने नमस्त इति ॥ २१ ॥ कृतागसं त्वमेनेनो कृमपराधं निवेद

तवावतारोऽयमधोक्षजेह स्वयं नराणामुरुभारजन्मनां ॥ चमूपतीनामभवाय देव भवाय युष्मच्चरणानुवर्तिनां ॥ १९ ॥ नमस्तुभ्यं भगवते पुरुषा
य महात्मने ॥ वासुदेवाय देवाय सात्वतां पतये नमः ॥ २० ॥ स्वछंदोपात्तदेहाय विशुद्धज्ञानमूर्तये ॥ सर्वस्मै सर्वबीजाय सर्वभूतात्मने नमः ॥
२१ ॥ मयेदं भगवन् गोष्ठनाशायासारवायुभिः ॥ चेष्टितं विहिते यज्ञे मानिना तीव्रमन्युना ॥ २२ ॥ एवं संकीर्तितः कृष्णो मघोना भगवानमुं ॥ मेघगंभीरया वाचा प्रहसन्निदमब्रवीत् ॥ २३ ॥ श्रीभगवानुवाच ॥ मया तेऽकारि मघवन्मखभंगोनुगृह्णता ॥ मदनुस्मृतये नित्यं मत्तस्येंद्रश्रिया भृशं ॥ २५ ॥ मामैश्वर्यश्रीमदांधो दंडपाणिं न पश्यति ॥ तं भ्रंशयामि संपद्भ्यो यस्य चेच्छाम्यनुग्रहं ॥ २६ ॥ गम्यतां शक्र भद्रं वः क्रियतां मेनुशासनं ॥ स्थीयतां स्वाधिकारेषु युक्तैर्वः स्तंभवर्जितैः ॥ २७ ॥ अथाह सुरभिः कृष्णमभिवंद्य मनस्विनी ॥ स्वसंतानैरुपामंत्र्य गोपरूपिणमीश्वरं ॥ २८ ॥ सुरभिरु० ॥ कृष्ण कृष्ण महायोगिन् विश्वात्मन्विश्वसंभव ॥ भवता लोकनाथेन सनाथा वयमच्युत ॥ २९ ॥ त्वं नः परमकं दैवं त्वं
न इंद्रो जगत्पते ॥ भवाय भव गोविप्रदेवानां ये च साधवः ॥ ३० ॥ ॥

पति ॥ मयेदमिति ॥ आसारवायुभिर्गोष्ठनाशाय मयेदं मत्कृतं विचेष्टितं कृतं ॥ २२ ॥ तथापि नो ईशात्वया
नुगृहीतोस्मि ॥ अनुग्रहं दर्शयति ध्वस्तस्तंभ इति द्वयोर्घमरति च ॥ २३ ॥ २४ ॥ इंद्रेण स्वाभिप्राये निवेदिते भगवानपि तथैवात्मनोभिप्रायं आह ॥ मयेति ॥ इंद्रश्रिया देवराज्येन ॥ २५ ॥ २६ ॥ व
:युष्माभिर्बहुवचनं वरुणादिसहितत्वाभिप्रायेण ॥ कुतः गंतव्यं स्वर्गेपि तत्रैवेश्वरत्वादिति चेत्तत्राह ॥ स्थीयतामिति ॥ मदनुशासनेन यथापूर्वं तत्र स्थीयतामित्यर्थः ॥ युक्तैरप्रमत्तैः स्तंभव-
र्जितैर्निरहंकारैः ॥ २७ ॥ स्वसंतानैर्गोभिः सह कृष्णमित्यादिना संबोध्या ॥ २८ ॥ इंद्रेणाहता अपि त्वत्सनाथा वयं कृताः रक्षिता इत्यर्थः ॥ २९ ॥ त्वं नः परमं दैवं देवतं देवता अतः हे जगत्प

ते ॥ गोविप्रदेवानां ये अन्ये च साधवस्तेषां भवाय अभ्युदयाय त्वमेव इंद्रो भव ॥ ३० ॥ ॥

त्वयेशानुगृहीतोस्मि ध्वस्तस्तंभो हतोद्यमः ॥ ईश्वरं गुरुमात्मानं त्वामहं शरणं गतः ॥ १३ ॥ ८

१

ते

ननु भवतामिंद्रोस्त्येवेति चेदत आह ॥ इंद्रमिति ॥ अलं पुरंदरस्येंद्रतयेत्यर्थः ॥ ननु देवैरिंद्रो भवति कथमहं भवेयमिति चेदत आह ॥ अवतीर्णोसीति ॥ २१ ॥ सुरभिरात्मनः पयसा
ऽभ्यषिंचत् ॥ इंद्र आकाशगंगाया जलैरभ्यषिंचत् ॥ २२ ॥ देवमातृभिरदित्यादिभिः ॥ देवैर्मातृभिश्चेति वा ॥ गाः पशून् गां स्वर्गं वा इंद्रत्वेन विंदति तिष्ठतीति गोविंद इत्यभ्यधा
त्तनामकृतवानित्यर्थः ॥ इंद्र त्वमसि देवानां त्वं गवामिंद्रतां गतः ॥ गोविंद इति लोके त्वां गास्यंति तु नृविमोः ॥ २३ ॥ २४ ॥ देवनिकायेषु केतवः श्रेष्ठः दर्शनीयाः मुख्या इत्यर्थः ॥ गा नवाः

इंद्रं नस्त्वाभिषेक्ष्यामो ब्रह्मणा नोदिता वयं ॥ अवतीर्णोसि विश्वात्मन् भूमेर्भारापनुत्तये ॥ २१ ॥ श्रीशुक उ० ॥ ॥ एवं कृष्णमुपामंत्र्य सुर-
भिः पयसात्मनः ॥ जलैश्चाकाशगंगाया ऐरावतकरोद्धृतैः ॥ २२ ॥ इंद्रः सुरर्षिभिः साकं नोदितो देवमातृभिः ॥ अभ्यषिंचत दाशार्हं गोविंद
इति चाभ्यधात् ॥ २३ ॥ तत्रागतास्तुंबरुनारदादयो गंधर्वविद्याधरसिद्धचारणाः ॥ जगुर्यशो लोकमलापहं हरेः सुरांगनाः संननृतुर्मु
दान्विताः ॥ २४ ॥ तं तुष्टुवुर्देवनिकायकेतवो ह्यवाकिरंश्चाद्भुतपुष्पवृष्टिभिः ॥ लोकाः परां निर्वृतिमाप्नुवंस्त्रयो गावस्तदा गामनयन्प
योद्रुतां ॥ २५ ॥ नानारसौघाः सरितो वृक्षा आसन्मधुस्रवाः ॥ अकृष्टपच्यौषधयो गिरयो बिभ्रदुन्मणीन् ॥ २६ ॥ कृष्णेभिषिक्त ए-
तानि सत्वानि कुरुनंदन ॥ निर्वैराण्यभवंस्तात क्रूराण्यपि निसर्गतः ॥ २७ ॥ इति गोगोकुलपतिं गोविंदमभिषिच्य सः ॥ अनुज्ञा
तो ययौ शक्रो वृतो देवादिभिर्दिवं ॥ २८ ॥ ॥ इति श्रीभागवते पुराणे दशमस्कंधे सप्तविंशो ऽध्यायः ॥ २७ ॥ ॥ श्रीशुक उवाच ॥ ॥

वः गां पृथिवीं पयोभिर्द्रुतामार्द्रमनयन् ॥ अप्लुतां कुर्वन्नित्यर्थः ॥ २५ ॥ नानारसौघाः क्षीरादिवाहिन्यः ॥ अकृष्टपच्याः कर्षणं विनैव पक्वा ओषधयो व्रीह्यादय आसन् ॥ यद्वा ॥ अकृ
ष्टपच्या ओषधयो येषु ते गिरयः ॥ उन्मणीन् गर्भगतान् मणीन् उत्कृतान् बहिः प्रकटान् अबिभ्रत अबिभरुः ॥ २६ ॥ २७ ॥ २८ ॥ ॥ इति श्रीभागवते महापुराणे
दशमस्कंधे टीकायां सप्तविंशो ऽध्यायः ॥ २७ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टाविंशे ततो नंदानयनं वरुणालयात्॥ वैकुंठदर्शनं चाथ गोपानामनुवर्ण्यते॥१॥ गोवर्द्धनं समुद्धृत्य वशीकृत्वा महेश्वरं॥ नंदानयनतः कृष्णो वरुणं च वशं नयेत्॥
२॥ कलामात्रायां द्वादश्यां पारणादराभिनिवेशेनासुरीं वेलामविज्ञाय अरुणोदयात्पूर्वमेव स्नानार्थं जलेन निशि उदके प्रविष्टं॥ तदनभिज्ञो वरुणस्य भृत्यो ऽनयदि-
ति॥ तथा च शास्त्रं॥ कलार्द्धां द्वादशीं दृष्ट्वा निशीथादूर्ध्वमेव हि॥ आमध्याह्नात्क्रियाः सर्वाः शंतनुनां शासनादिति॥ वरुणपतिश्च वरुणः॥ अजानता मामकेनेति भगव- कर्तव्याः
द्धर्ममजानतेत्यर्थः॥२॥ स्वानां भगवद्धर्मपराणां अभयदः मानैष्टिस्वनयं ददत्॥३॥ सपर्यया अर्हणेन॥४॥ अद्येदानीं मे मया देहो निभृतः धृतः॥

एकादश्यां निराहारः समभ्यर्च्य जनार्दनं॥ स्नातुं नंदस्तु कालिंद्यां द्वादश्यां जलमाविशत्॥१॥ तं गृहीत्वानयद्भृत्यो वरुणस्या-
सुरोंतिकं॥ अविज्ञायासुरीं वेलां प्रविष्टमुदकं निशि॥ चुक्रुशुस्तमपश्यंतः कृष्ण रामेति गोपकाः॥२॥ भगवांस्तदुपाश्रुत्य पि-
तरं वरुणाहृतं॥ तदंतिकं गतो राजन्स्वानामभयदो विभुः॥३॥ प्राप्तं वीक्ष्य हृषीकेशं लोकपालः सपर्यया॥ महत्या पूज-
यित्वाह तद्दर्शनमहोत्सवः॥४॥ वरुण उवाच॥ ॥अद्य मे निभृतो देहो ऽद्यैवार्थो ऽधिगतः प्रभो॥ त्वत्पादभाजो भगवन्नवा-
पुः पारमध्वनः॥५॥ नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने॥ न यत्र श्रूयते माया लोकसृष्टिविकल्पना॥६॥ ॥ ॥

यद्यात्वद्दर्शनं जातं तद्देहसाफल्यं प्राप्तमित्यर्थः॥ यद्वा॥ निभृतः पूर्णमनोरथस्त्वर्थः॥ किंच॥ अद्यैवार्थोऽधिगतः सर्वरत्नाकरपतिनापि इतः पूर्वं नैवंविधोऽर्थः॥ किंच॥ सं- रामः
सारोपि निवृत्तएवेत्याशयेनाह॥ त्वत्पादभाज इति अध्वनः पारं मोक्षं॥५॥ भगवते निरतिशयैश्वर्याय॥ ब्रह्मणे पूर्णाय॥ परमात्मने सर्वजीवनियंत्रे॥ तत्र- ८३
हेतुः॥ न यत्रेति॥ लोकसृष्टिं विकल्पयति॥ या माया सा यत्र न श्रूयते अविद्यमानेव तिष्ठतीत्यर्थः॥६॥ ॥श्रीरामाकृष्णायनमः॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वगतिं

१ ममाप्यनुग्रहं कृष्ण कर्तुमर्हस्यशेषदृक्॥१॥

अजानतामइत्येनलपित्राहरणंयत्कृतंतददिति॥७॥नंदंविमुच्यसमर्पयतिगोविंदेति॥८॥९॥अतींद्रियंअदृष्टपूर्वंलोकपालस्यमहोदयमैश्वर्यं॥१०॥औत्सुक्ययुक्ता
काधर्येषांते॥अपिकिंस्वस्थानं॥सूक्ष्मांदुर्ज्ञांब्रह्माख्यांचउपधास्यति॥नः अस्मान्प्रापयिष्यतीतिसंकल्पितवंतइत्यर्थः॥११॥इतिएवंभूतंस्वीयानांसंकल्पं॥अखिलदृ
कृत्सर्वज्ञः स्वयमेवविज्ञायतेषांसंकल्पसिद्धयेकृपयाएतद्वक्ष्यमाणंअचिंतयत॥१२॥अविद्यादेहाद्यहंबुद्धिः॥ततःकामः॥ततःकर्म॥ततउच्चावचासुदेवतिर्य

अजानतामामकेनमूढेनाकार्यवेदिना॥आनीतोयंतवपितातद्भवान्क्षंतुमर्हसि॥७॥गोविंदनीयतामेषःपितातेपितृवत्सल॥
॥८॥ ॥श्रीशुकउ०॥ ॥एवंप्रसादितःकृष्णोभगवानीश्वरेश्वरः॥आदायागात्स्वपितरंबंधूनांचावहन्मुदं॥९॥नंदस्त्वतींद्रियं
दृष्ट्वालोकपालमहोदयं॥कृष्णेचसंनतिंतेषांज्ञातिभ्योविस्मितोब्रवीत्॥१०॥तेचौत्सुक्यधियोराजन्मत्वागोपास्तमीश्वरं अपिनः
स्वगतिंसूक्ष्मामुपाधास्यदधीश्वरः॥११॥इतिस्वानांसभगवान्विज्ञायाखिलदृक्स्वयं॥संकल्पसिद्धयेतेषांकृपयैतदचिंतयत्॥१२॥
जनोवैलोकएतस्मिन्नविद्याकामकर्मभिः॥उच्चावचासुगतिषुनवेदस्वांगतिंभ्रमन्॥१३॥इतिसंचिंत्यभगवान्महाकारुणिकोहरिः॥
दर्शयामासलोकंस्वंगोपानांतमसःपरं॥१४॥सत्यंज्ञानमनंतंयद्ब्रह्मज्योतिःसनातनं॥यद्धिपश्यंतिमुनयोगुणापायेसमाहिताः॥

गादिषुभ्रमन्स्वीयांगतिंनवेद॥१३॥स्वंब्रह्मस्वरूपंलोकंवैकुंठंस्वस्वं च तमसःप्रकृतेःपरं॥१४॥देहादिपिहितानांदर्शनमशक्यमितिप्रथमं ॥१५॥ ॥
देहादिव्यतिरिक्तंब्रह्मस्वरूपंदर्शयामासेत्याह॥सत्यमिति॥सत्यंअबाध्यं॥ज्ञानंजडं॥अनंतंअपरिच्छिन्नं॥ज्योतिःप्रकाशं॥सनातनंशाश्वत्सिद्धं॥गु
णापायेगुणापोहेज्ञानिनोयत्पश्यंतितद्रूपमेवदर्शयामास॥१५॥॥

नमः२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंब्रह्महृदंब्रह्मैवहृदःस्वहृदः॥तत्रनिमग्नस्यविशेषविस्तानानात्वात्॥तंब्रह्मह्रदंतेतुनीताःप्रापिताःतस्मिन्मग्नाश्च॥उत्तराध्योक्तंविशेषमाह॥पुनःकृष्णेनोद्धृताः
समाधेरिवोत्थापिताःसंतोब्रह्मणस्तस्यैवलोकंवैकुंठमरव्यंददृशुरिति॥ननुब्रह्मनिमग्नानांपुनर्लोकदर्शनमघटितमेवेत्याशंक्याह॥यत्रयस्मिन्कृष्णेनिमित्तेसतिपू
र्वमक्रूरोऽध्यगात्दृष्टवान्॥शुकपरीक्षित्संवादाख्यानत्वाद्भूतनिर्देशःनत्वद्भुतैश्वर्येभगवतिकिंचिदप्यसंभावितमितिभावः॥अथवा॥अक्रूरोयत्रददृशिवान्तत्
स्ययमुनाह्रदस्यब्रह्मह्रदइतिनामतंह्रदंनीताःसंतोब्राह्मणोलोकंददृशुः॥पुनश्चकृष्णेनोद्धृताःपूर्ववत्तंदृष्ट्वाविस्मिताबभूवुरितिव्यवहितान्वयः
प्रसिद्धकल्पनाचसोढव्येति॥१६॥१७॥ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधटीकायांअष्टाविंशोध्यायः॥२८॥ ॥ऊनत्रिंशेतुरासा-

तेतुब्रह्महृदंनीतामग्नाःकृष्णेनचोद्धृताः॥ददृशुर्ब्रह्मणोलोकंयत्राक्रूरोध्यगात्पुरा॥१६॥नंदादयस्तुतंदृष्ट्वापरमानंदनिर्वृताः॥कृ
ष्णंचतत्रछंदोभिःस्तूयमानंसुविस्मिताः॥१७॥ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेनंदानयनगोपाब्रह्मलोकदर्शनोनामअ
ष्टाविंशोध्यायः॥२८॥ ॥श्रीशुकउ०॥ ॥भगवानपितारात्रीःशरदोत्फुल्लमल्लिकाः॥वीक्ष्यरंतुंमनश्चक्रेयोगमायामुपाश्रितः॥१॥

र्यमुक्तिप्रत्युक्तयोरहरेः॥गोपिस्त्रीभिःरासःसंरंभेतस्यचांतर्द्धिकौतुकं॥१॥ब्रह्मादिजयसंरूढदर्पकंदर्पदर्पहा॥जयतिश्रीपतिर्गोपीरासमंडलमंडनः॥१॥
ननुविपरीतमिदंपरदारविनोदेनकंदर्पविजेतृत्वमतोतेः॥मैवं॥योगमायामुपाश्रितःआत्मारामोप्यरीरमत्॥साक्षान्मन्मथः॥आत्मन्यवरुद्धसौ
रतरतोत्थादिषुस्वातंत्र्याभिधानात्॥तस्माद्रासक्रीडाविडंबनंकामविजयख्यापनायेत्येवतत्त्वं॥किंच॥शृंगारकथापदेशेननिशेषतोनिवृत्तिप
रे रेयंपंचाध्यायीतिव्यक्तीकरिष्यामः॥ताःरात्रीःशारदीयाताबल्लावजंसिद्धामयेमारंस्यथ॥इत्युपारतिचप्रतिश्रुत्ताःरत्यर्थः॥२॥ ॥ ॥
लि१



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदातस्मिन्नेवक्षणेतस्मीनयेउडुराजस्थंमउदगात्॥ उदितः॥ किंकुर्वन्। दीर्घकालेनदर्शनंयस्यसः॥ सप्रियायामुखमरुणेनकुंकुमेनयथाविलिंपतितथाप्रा
च्याःककुभःदिशःमुखंशांततमैः सुखतमैः करैः रश्मिभिः॥ अरुणेनउदयरागेणविलिंपन्नरुणांकुर्वन्नित्यर्थः॥ सः प्रसिद्धउडुराजः॥ तथाचर्षणी
नांजनानांशुचस्तापग्लानीः मृजन् अपनयन्॥ २॥ कुमुत्कुमुदंविकसनीयंविद्युतेयस्यतंकुमदंतमुखंउमंडलंयस्यतं॥ रमायाआननस्यानेवआ
नायस्यतं॥ नवकुंकुममिवारुणंदृष्ट्वा॥ तयावनंचतस्यकोमलैर्गोभिःरश्मिभिरंजितंदृष्ट्वाकलंमधुरंजगौ॥ अगायत्॥ कथं॥ वामामनोहरादृशो

तदोडुराजःककुभःकरैर्मुखंप्राच्याविलिंपन्नरुणेनशंततमैः॥ सचर्षणीनामुदगाच्छुचोमृजन्प्रियःप्रियायाइवदीर्घदर्शनः॥२
॥ दृष्ट्वाकुमुद्वंतमखंडमंडलंरमाननाभंनवकुंकुमारुणं॥ वनंचतत्कोमलगोभिरंजितंजगौकलंवामदृशांमनोहरं॥३॥ नि
शम्यगीतंतदनंगवर्धनंव्रजस्त्रियःकृष्णगृहीतमानसाः॥ आजग्मुरन्योन्यमलक्षितोद्यमाःसयत्रकांतोजवलोलकुंडलाः
॥४॥ दुहंत्योभिययुःकाश्चिद्दोहंहित्वासमुत्सुकाः॥ पयोधिश्रित्यसंयावमनुद्वास्यापराययुः॥५॥ परिवेषयंत्यस्तद्धित्वापाययं
त्यःसुतान्पयः॥ शुश्रूषंत्यःपतीन्काश्चिदश्नंत्योपास्यभोजनं॥६॥ ॥श्रीरामाः॥१॥
यासांतासांमनोहरंयथा॥३॥ असापत्न्याद्
न्योन्यमलक्षितः॥ नज्ञापितउद्यमोयाभिस्ताःसकांतोयत्रतत्रगीतध्वनिमार्गेणजग्मुः॥ जवेननवेगेनलोलानिकुंडलानियासांताः॥४॥ श्रीकृष्ण
सूचकराघ्दश्रवणेनतत्स्मरणविनानांतत्क्षणमेवत्रैवर्गिकंकर्मनिवृत्तिंद्योतयंत्यःस्वाद्धावसितंकर्मविहायययुः॥ तदाह॥ दुहंत्यःइति॥ पयःपयः स्थालीस्थं
चुल्ल्यांअधिश्रित्यतत्क्वाथमप्रतीक्षमाणाःकाश्चिद्ययुः॥ संयावंगोधूमकृष्णान्नपक्वमनुद्वास्यअनवतार्य॥५॥६॥ ॥श्रीरामाकृष्णायनमः॥॥

क२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० पू०
८५

अन्याः प्रमृजंत्यः अंगं उद्वर्तनादिकं कुर्वंत्यः ॥ काश्चकाश्चित् ॥ श्रीकृष्णस्तु सर्वार्थकर्मतरासक्तमनसामन्ययास्तमपि फलं लभेवेति द्योतयन्नाह ॥ व्यत्यस्तेति ॥ स्वा
नतः स्वरूपतश्चार्द्धधारणेन विपर्ययं प्राप्तानि वस्त्राभरणानि यासां ताः ॥ ७ ॥ न च तस्याः लक्ष्मनसां विघ्नाः प्रभवंतीत्याह ॥ तावार्यमाणा इति ॥ ८ ॥ न
लब्धो विनिर्गमो याभिस्ताः ॥ प्रागपि [illegible] तद्भावनायुक्तास्तदा नितरां दध्युरित्यर्थः ॥ ९ ॥ किंच ॥ ताः तदानीमेवं तं परमात्मानं श्रीकृष्णं ध्यानतः प्राप्ताः सत्यो
गुणमयं देहं जहुरित्याह ॥ श्लोकद्वयेन ॥ दुःसहेति ॥ ननु कथं जहुः परमात्मेति ज्ञानाभावान्नावादित्याशंक्याह जारबुध्यापीति ॥ न हि वस्तुशक्तिर्बु

लिंपंत्यः प्रमृजंत्योन्या अंजंत्यः काश्च लोचने ॥ व्यत्यस्तवस्त्राभरणाः काश्चित्कृष्णांतिकं ययुः ॥ ७ ॥ ताः वार्यमाणाः पतिभिः
पितृभिर्भ्रातृबंधुभिः ॥ गोविंदापहृतात्मानो न न्यवर्तंत मोहिताः ॥ ८ ॥ अंतर्गृहगताः काश्चिद्गोप्योऽलब्धविनिर्गमाः ॥
कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ॥ ९ ॥ दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ॥ ध्यानप्राप्तांता [illegible] श्लेषनिर्वृत्या च्यु
क्षीणमंगलाः ॥ १० ॥ तमेव परमात्मानं जारबुध्यापि संगताः ॥ जहुर्गुणमयं देहं सद्यः प्रक्षीणबंधनाः ॥ ११ ॥ ॥ ॥

द्धिमपेक्षते ॥ अन्यथामत्वापि पीतामृतवदिति भावः ॥ ननु तदपि प्रारब्धकर्मबंधने सति कथं जहुस्तत्राह ॥ सद्यः प्रक्षीणबंधना इति ॥ ननु कथं भोगमंतरे
ण प्रारब्धकर्मक्षाणं भोगेनैव सद्यः क्षीणमित्याह ॥ दुःसहेति ॥ दुःसहो यः प्रेष्ठविरहस्तेन तीव्रः तापः तेन धुतानि गतान्यशुभानि यासां ताः तदप्राप्तिपरमदुःख
भोगेन पापं क्षीणमित्यर्थः ॥ तया ध्यानेन प्राप्ताच्युतस्याश्लेषेण या निर्वृत्तिः परमसुखभोगः तया क्षीणमंगलं पुण्यबंधनं यासां ताः ॥ अतो ध्यानेनाप्तपर
मात्मप्राप्तेः तत्कालसुखे वा सांनिःशेषकर्मक्षयात् गुणमयं देहं जहुरिति ॥ १० ॥ ११ ॥ ॥

१ खदुः १

राम: १
८५

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु यथा पतिपुत्रादीनां वस्तुतो ब्रह्मत्वेऽपि न तद्भजनान्मोक्षः तथा बुध्याभावात्॥ एवं कृष्णेऽपि ब्रह्मबुध्यभावेन तत्संगतिः कथं मोक्षहेतुः इति शंकते॥ कृष्णं विदु
रिति॥ परं केवलं कांतं कमनीयं॥१२॥ परिहरति उक्तमिति॥ अयं भावः॥ जीवेष्वावृतं ब्रह्मत्वं कृष्णस्य रूपाकिंचित्वादनावृतं ततो न तत्र बुध्यपेक्षेति भाव
ः॥१३॥ ननु देहः कथमनावृतः स्यादत आह॥ नृणामिति॥ गुणात्मनः गुणनियंतुः भगवत एवंरूपाभिव्यक्तिरतो न देहस्तादृग्रूपं अत्र वक्तुं युज्यत इति भावः

राजोवाच॥ ॥ कृष्णं विदुः परं कांतं न तु ब्रह्मतया मुने॥ गुणप्रवाहोपरमस्तासां गुणधियां कथं॥१२॥ श्रीशुक उ०॥ ॥ उक्तं पुर
स्तादेतत्ते चैद्यः सिद्धिं यथा गतः॥ द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः॥१३॥ नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप॥ अ
व्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः॥१४॥ कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव च॥ नित्यं हरौ विदधतो यांति तन्मयतां हि ते॥१५॥
श्वरे न चैवं विस्मयः कार्यो भवता भगवत्यजे॥ योगेश्वरैः कृष्णे यत एतद्विमुच्यते॥१६॥ तादृ ष्ट्वांतिकमायाता भगवान् व्रजयोषितः॥ अ
वदद्वदतां श्रेष्ठो वाचः पेशैर्विमोहयन्॥१७॥ ॥ श्रीभग उ०॥ ॥ स्वाग तं वो महाभागाः प्रियं किं करवाणि वः॥ व्रजस्यानाम
यं कच्चिद्ब्रूतागमनकारणं॥१८॥ रजन्येषा घोररूपा घोरसत्वनिषेविता॥ प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः॥१९॥ ॥ ॥

॥१४॥ अतो यथा कथंचित्तदासक्तिः कारणमित्याह॥ काममिति॥ ऐक्यं संबंधं सौहृदं भक्तिं॥१५॥ न च भगवतोयमिति भारस्त्याह॥ न चैवमिति॥ यतः
श्रीकृष्णादेतत्स्थावरादिकमपि मुच्यते॥१६॥ प्रस्तुतमाह॥ तादृष्टेति॥ वाचः पेशैर्वाग्विलासैः॥१७॥ सर्वाः ससंभ्रममागताः विलोक्य सनयनिवार
मुक्ति ॥ व्रजस्येति॥१८॥ लज्जयामंदहसितमालक्ष्याह॥ रजन्येषेति॥१९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० द० पू०
८६

किंच॥ मातर इति॥ विचन्वंति मृगयंते बंधूनां साध्वसं मा कुरुतेत्यर्थः॥ २०॥ ईषत्प्रणयकोपेनान्यतो विलोकयंतीः प्रत्याह॥ दृष्टमिति॥ राकेशस्य पूर्णचंद्रस्य करैः रंजितं॥ यमुनास्पर्शिनोऽनिलस्य लोला मंदगतिः तया एजंतः कंपमानास्तरूणां पल्लवाः तैः शोभितं॥ २१॥ सतीः हे सत्यः॥ २२॥ संभ्रमेरच्चुमितद्दश्च प्रत्याह॥ अथवेति॥ यंत्रिता शायाः वशीकृतचित्ताः हे सत्यः उपपन्नं युक्तं प्रियं ते प्रीता नवंति॥ २३॥ दृष्टादृष्टनयप्रदर्शनेन निवर्तयति॥ भर्तुरित्यादि श्लोकत्रयेण॥ २४॥ २५॥ नि

मातरः पितरः पुत्रा भ्रातरः पतयश्च वः॥ विचन्वंति ह्यपश्यंतो मा कृढ्वं बंधुसाध्वसं॥ २०॥ दृष्टं वनं कुसुमितं राकेशकररंजितं॥ यमुनानिललीलैजत्तरुपल्लवशोभितं॥ २१॥ तद्यात मा चिरं गोष्ठं शुश्रूषध्वं पतीन्सतीः॥ क्रंदंति वत्सा बालाश्च तान्पाययत दुह्यत॥ २२॥ अथवा मदभिस्नेहाद्भवत्यो यंत्रिताशयाः॥ आगता ह्युपपन्नं वः प्रीयंते मयि जंतवः॥ २३॥ भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमायया॥ तद्बंधूनां च कल्याण्यः प्रजानां चानुपोषणं॥ २४॥ दुःशीलो दुर्भगो वृद्धो जडो रोग्यधनोऽपि वा॥ पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी॥ २५॥ अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयावहं॥ जुगुप्सितं च सर्वत्र औपपत्यं कुलस्त्रियाः॥ २६॥ श्रवणाद्दर्शनाद्ध्यानान्मयि भावोनुकीर्तनात्॥ न तथा संनिकर्षेण प्रतियात ततो गृहान्॥ २७॥ श्रीशुक उ०॥ इति विप्रियमाकर्ण्य गोप्यो गोविंदभाषितं॥ विषण्णा भग्नसंकल्पाश्चिंतामापुर्दुरत्ययां॥ २८॥ कृत्वा मुखान्यव शुचः श्वसनेन शुष्यद्बिंबाधराणि चरणेन [illegible] नुवंल्लिखंत्यः॥ अस्रैरुपात्तमषिभिः कुचकुंकुमानि तस्थुर्मृजंत्य उरुदुःखभराः स्म तूष्णीं॥ २९॥ ॥ ॥ न

रा० म०
८६

फल्गु नश्यत्पुष्यं तो विंबं बिंबफलसदृशा अधरा येषु मुखेषु तानि अव अवांचि कृत्वा तथांगुष्ठेन महीं विलिखंत्यः॥ तयागृही + कृच्छ्रं दुःसंपाद्यं॥ औपपत्यं जारसौख्यं॥ २६॥ किंच॥ श्रवणादिति॥ २७॥ २८॥ चिंतां प्राप्तानां स्थितिमाह॥ कृत्वेति॥ शुचः शोकाद्धेतोः श्वसनेन + तकज्जलैरस्रैः कुचकुंकुमानि क्षालयंत्यस्तूष्णीं स्थिताः॥ यत उरुदुःखभरो यासां ताः॥ २९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच॥ प्रेष्ठमिति॥ किंचित्स्वरं नेण कोपाविष्टेन गगह्वरगिरीयासांताः॥ अब्रुवैतस्मसंरंभेकारणं॥ प्रेष्ठमित्यादि॥ प्रियेतरमिवप्रतिनाषमाणंप्रत्याचक्षाणं॥ १०
॥ नृशंसंक्रूरं॥ दुरवग्रहंस्वछंदं॥ पादमूलंनकासेवितवताः अस्मान्तनजस्त्वमात्मजेति॥ ३१॥ अपिच॥ यदुक्तंपत्यपत्येत्यादित्वयाधर्मविदेतिसोपहासं॥ एव
मेतदुपदेशानांपदेविषयेत्वय्येवास्तु॥ उपदेशापदत्वेहेतुः॥ ईशाइति॥ विविदिषावाक्येनसर्वोपदेशानामीशापरत्वावगमात् इतिभावः॥ ईशत्वेहेतुः॥
आत्मात्माकिलनवानिति॥ योगपस्याहिसर्वस्यनोक्तात्मैवेशाइति॥ अतः प्रेष्ठोबंधुश्चभवानेवेतिसर्वबंधुषुकरणायंत्वय्येवास्त्वितिसर्थः॥ अथवाधर्मो

प्रेष्ठंप्रियेतर मिवप्रतिनाषमाणंनृशंसंतदर्थविनिवर्तितसर्वकामाः॥ नेत्रेविमृज्यरुदितोपहतेस्मकिंचित्संरंभगगह्वरगिरोऽब्रु
वतानुरक्ताः॥ ३०॥ ॥ गोप्यऊचुः॥ ॥ मैवंविभोर्हतिभवान्गदितुंनृशंसंसंत्यज्यसर्वविषयांस्तवपादमूलं॥ भक्ताभजस्वदुर
वग्रहमात्मनास्मान्देवोयथादिपुरुषोभजतेमुमुक्षून्॥ ३१॥ यत्पत्यपत्यसुहृदामनुवृत्तिरंगस्त्रीणांस्वधर्मइतिधर्मविदात्वयो
क्तं॥ अस्त्वेवमेतदुपदेशपदेत्वयीशेप्रेष्ठोभवांस्तनुभृतांकिलबंधुरात्मा॥ ३२॥ ॥ श्रीरामाकृष्णायनमः॥ ॥॥

पदेशानांपदेस्थानेधर्मोपदेष्टरित्वयिस्मति॥ अस्मासुचधर्मंति जिज्ञासमानासुसतीषुत्वयाधर्मविदायदुक्तंएवमेतदस्तु॥ ननुत्वंधर्मोपदेष्टा किंतुन
वानात्मेति॥ अथवायदुक्तंएतदुपदेशपदेतस्मैचरेपुरुषेऽस्तु नामत्वयित्तु ईशोस्वामिनिस्मति एवंकाक्षानैवमित्यर्थः॥ यतस्त्वंतनुभृतांत्वमात्मा फलरूप
रति॥ यद्वा॥ यदुक्तंपत्यादिसुश्रूषणंधर्मइत्येवमेतत्त्वय्येवास्तु॥ कुतः उपदेशापदेसुश्रूषणा॥ यत्वेनोपदिश्यमानानांपत्यादीनांपदेअधिष्ठाने॥ कु
तः॥ ईशोऽरम्बरमधिष्ठानंविनाकोपिपतिपुत्रादिर्नामनास्तीतिअनन्यसमानंअजमितिविस्तरेण॥ ३२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰पू॰
८७

एतत्सदाचारेण दृढयंत्सः प्रार्थयंते॥ कुर्वंतिहेति॥ कुशलाः शास्त्रनिपुणाः तथा च शास्त्रं किं प्रजया करिष्यामो येषां नोऽयमात्मा लोक इत्यादि॥३३॥ किंचि॥ प्रतिपातेति॥
यदुक्तं तदशक्यं त्वयैव चित्रादीनामपकृतत्वादित्याह॥ चित्रमिति॥ यदस्माकं चित्रमेतावंतं कालं सुखेन गृहेषु निर्विशति तत्त्वया परकृतं॥ करावपि योगरत्नसे निर्विरा
गतः तावपि॥ सुखात्मना त्वयेति वा॥३४॥ अतः अंगहे श्रीकृष्ण नोऽस्माकं तवाधरामृतपूरकेण॥ तवैव हासस्मितेनावलोकनेन कलगीतेन च जातो यो
रुच्छयाग्निः कामाग्निः तं सिंच॥ नो चेद्वयं तावदेको ग्निः तथा विरहाज्ज निष्पते यो ग्निस्तेन चोपयुक्तदेहा दग्धशरीराः योगिन इव ते पद

कुर्वंति द्विलयि रतिं कुशलाः स्व आत्मन्नित्यप्रिये पति सुतादिभिरार्तिदैः किं॥ तन्नः प्रसीद परमेश्वर मा स्म छिंद्या आशां धृतां त्वयि
द चिरोरविंदनेत्र॥३३॥ चित्तं सुखेन भवता पहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये॥ पादौ पदं न चलतस्तव पादमूलाद्याम
: कथं व्रजमथो करवाम किं वा॥३४॥ सिंचांग नस्त्वदधरामृतपूरकेण हासावलोककलगीतजहृच्छयाग्निं॥ नो चेद्वयं विरहजाग्नि जा
न्युपयुक्तदेहा ध्यानेन याम पदयोः पदवीं सखे ते॥३५॥ यर्ह्यंबुजाक्ष तव पादतलं रमाया दत्तक्षणं क्वचिदरण्यजनप्रियस्य
स्य॥ अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमंजः स्थातुं त्वयाभिरमिता बत पारयामः॥३६॥ ॥श्रीरामाकृष्णायनमः॥॥

वामं तिकं ध्यानेन याम प्राप्नुयाम॥३५॥ ननु स्वपतीनेवोपगच्छत तत एनमग्निं सिंचेयुरिति तत्राहुः॥ यर्हीति॥ रमाया लक्ष्म्याः दत्तक्षणं दत्तोत्सवं दत्ताव रामः
सरं वा॥ तदपि क्वचिदेव न सर्वदा॥ अरण्यजनाः प्रियायस्य स तस्य तव अरण्यजनप्रियत्वादरण्ये क्वचित् यर्हि अस्प्राक्ष्म स्पृष्टवत्यो वयं॥ तत्र च त्वया ८७
भिरमिता आनंदिताः सत्यः तदारभ्य अन्यसमक्षं स्थातुमपि न पारयामः उच्छास्तेन रोचं तरस्तथैः॥३६॥ ॥श्रीरामाकृष्णायनमः॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वत्पादसौभाग्यं स्वतिचित्रमित्याहुः॥ श्रीरिति॥ वक्षसि असापत्न्यं स्थानं लब्ध्वापि तुलस्याः सपत्न्याः सहतव पादांबुजरजः कामयते स्म॥ भृत्यैः सर्वैर्जुष्टमिति सौ
भाग्यातिरेकोक्तिः॥ यस्याः स्ववीक्षणे श्रीरात्मनो विलोकयत्वित्येतदर्थं अन्येषां ब्रह्मादीनां तपोभिः प्रयासः सा तव पादरजस्तद्वत्॥ वयमपि प्रपन्ना इति॥ ३७॥ हे
वृजिनार्दन दुःखखंडन॥ त्वदुपासने त्वद्भजन एव आशा यासां ताः वयं वसतीर्गृहान् विसृज्य योगिनः स्व प्राप्ताः॥ तव सुंदरस्मितविलसितनिरीक्षणेन यस्तीव्रः का
मस्तेन तप्तचित्तानां॥ हे पुरुषरत्न दास्यं देहि॥ ३८॥ ननु गृहस्वाम्यं विहाय दास्यं किमिति प्रार्थ्यते अत आहुः॥ वीक्ष्येति॥ अलकावृतं केशैः तैरावृतं मुखं तया कुंड

श्रीर्यत्पदांबुजरजश्चकमे तुलस्या लब्ध्वापि व‍क्षसि पदं किल भृत्यजुष्टं॥ यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयासस्तद्वद्वयं च तव पादरज
ः प्रपन्नाः॥ ३७॥ तन्नः प्रसीद वृजिनार्दन तेंघ्रिमूलं प्राप्ता विसृज्य वसतीस्त्वदुपासनाशाः॥ त्वत्सुंदरस्मितनिरीक्षणतीव्रकामतप्तात्म
नां पुरुषभूषण देहि दास्यं॥ ३८॥ वीक्ष्यालकावृतमुखं तव कुंडलश्रीगंडस्थलाधरसुधं हसितावलोकं॥ दत्ताभयं च भुजदंडयुगं विलोक्य वक्षः
श्रियैकरमणं च भवाम दास्यः॥ ३९॥ कास्त्र्यंग ते कलपदामृतवेणुगीतसंमोहितार्यचरितान्न चलेत्त्रिलोक्यां॥ त्रैलोक्यसौभगमिदं
च निरीक्ष्य रूपं यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन्॥ ५०॥ ॥ श्रीरामः॥ ॥ लौ॥ श्रीर्यया। तेगंडस्थले यस्मिन् अधरे सुधा य यो:
स्मिन् तच्च तच्च मुखं वीक्ष्य॥ दत्ताभयं भुजदंडयुगं च वक्षः श्रिया एकमेव रमणं रतिजनकं वीक्ष्य दास्य एव भवामेति॥ ३९॥ ननु गुरुस्मितमौपपत्यमित्यत्र आ
हुः॥ कास्त्रीति॥ अंगहे कलमव्यक्तकला निपदानि यस्मिन् तत्तदायतं दीर्घं मूर्छितं स्वरालापनेन दस्तेन पागं तदेकलपदामृतमयं वेणुगीतं तेन संमोहिता का वा स्त्री आर्यचरितान्नि
मी जधर्मान्न चलेत्॥ पन्मोहिताः पुरुषा अपि चलिताः॥ किंच त्रैलोक्यसौभगमिति यत्पतः अबिभ्रन् अबिभ्रुः॥ तद्यौतकशब्दश्रवणमात्रेणापि ताबन्निजधर्मत्यागो यु
क्तः॥ किं पुनस्त्वद्दर्शनेनेति भावः॥ ५०॥ ॥

भा० द० टी० ८८

व्यक्तं निश्चितं ॥४१॥ विक्लवितं परवत्प्रलपितं गोपीररीरमत् रमयामास ॥४२॥ प्रियस्येक्षणेनोत्फुल्लानि मुखानि यासां ताभिः॥ उदारहासस्य द्विजाश्च तेषु कुंदकुसुमवद्दीध
तिर्यस्य सः॥ एणांकश्चंद्रः॥४३॥४५॥ बाहुप्रसारश्च परिरंभश्च करादीनामालभनं स्पर्शश्च नर्मपरिहासश्च नखाग्रपातश्च तैः॥ क्ष्वेल्या क्रीडया च॥ अवलोकैश्च हसितैश्च॥

व्यक्तं भवान्व्रजभयार्तिहरोभिजातो देवो यथादिपुरुषः सुरलोकगोप्ता॥ तन्नो निधेहि [illegible] करपंकजमार्तबंधो तप्तस्तनेषु शिरःसु
च किंकरीणां॥४१॥ श्रीशुक उवाच॥ ॥इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः॥ प्रहस्य सदयं गोपीरात्मारामोप्यरीरमत्॥४२॥ ताभिः समे
ताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः॥ उदारहासद्विजकुंददीधितिर्व्यरोचतैणांक इवोडुभिर्वृतः॥४३॥ उपगीयमान उद्गाय
न्वनिताशतयूथपः॥ मालां बिभ्रद्वैजयंतीं व्यचरन्मंडयन्वनं॥४४॥ नद्याः पुलिनमाविश्य गोपी[illegible]भिर्हिमवालुकं॥ रेमे तत्तरलानंद
कुमुदामोदवायुना॥४५॥ बाहुप्रसारपरिरंभकरालकोरुनीवीस्तनालभननर्मनखाग्रपातैः॥ क्ष्वेल्यावलोकहसितैर्व्रजसुंदरीणा
मुत्तंभयन्रतिपतिं रमयांचकार॥४६॥ एवं भगवतः कृष्णाल्लब्धमाना महात्मनः॥ आत्मानं मेनिरे स्त्रीणां मानिन्योभ्यधिकं भुवि॥
४७॥ तासां तत्सौभगमदं वीक्ष्य मानं च केशवः॥ प्रशमाय प्रसादाय तत्रैवांतरधीयत॥४८॥ ॥इति श्रीभागवते महापुराणे दशमस्कं
धे एकोनत्रिंशोध्यायः॥२९॥ श्रीशुक उ०॥ ॥अंतर्हिते भगवति सहसैव व्रजांगनाः॥ अत[illegible]प्यंस्तमचक्षाणाः करिण्य इव यूथपं॥१॥ ॥ रामः ९९

कामं तासां सुद्दीपयन् ताः रमयामास॥४६॥ महात्मनो विमुक्तचित्तात्॥४७॥ तत्सौभगमदं सौभाग्येन मदं अस्वाधीनतां मानं गर्वं केशवः कश्च ईशश्च केशौ तौ वशयत इति
तथा सः॥४८॥ ॥इति श्रीभागवते दशमस्कंधे टीकायां एकोनत्रिंशोध्यायः॥२९॥ ॥त्रिंशे विरहसंतप्तगोपीभिः कृष्णमार्गणं॥ उन्मत्तवद्भुनिपतेर्नमतोभिर्वनेवने
॥१॥ अचक्षाणा अपश्यंतः॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गत्या च अनुरागस्मितान्यां विभ्रमेक्षितानि सविलासनिरीक्षितानि तैश्च ॥ मनोरमा आलापाश्च विहाराः क्रीडाश्च विभ्रमाः अन्ये च विलासाः तैश्च रमापतेर्गत्यादिभिरेतैराक्षि
प्तान्याकृष्टानि चित्तानि यासां ताः ॥ अतः तस्मिन्नेव आत्मा यासां ताः ॥ तस्य विविधा चेष्टा जगृहुः ॥ तदनुकरणेनाक्रीडन् ॥ २ ॥ अपि च गतिस्मितेति ॥ प्रियस्य गत्यादिषु प्रति
रूढा आविष्टा मूर्तयो यासां ताः ॥ अतः कृष्णविहारविभ्रमाः कृष्णस्येव विहारविभ्रमाः क्रीडाविलासा यासां ताः ॥ अहमेव कृष्ण इति परस्परं निवेदितवत्यः ॥ ३ ॥ किंच गायं

गत्यानुरागस्मितविभ्रमेक्षितैर्मनोरमालापविहारविभ्रमैः ॥ आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः ॥ २ ॥ गतिस्मि
तप्रेक्षणभाषणादिषु प्रियाः प्रियस्य प्रतिरूढमूर्तयः ॥ असावहं त्वित्यबलास्तदात्मिका न्यवेदिषुः कृष्णविहारविभ्रमाः ॥ ३ ॥ गायंत्य उच्चैरमु
मेव संहता विचिक्युरुन्मत्तकवद्वनाद्वनं ॥ पप्रच्छुराकाशवदंतरं बहिर्भूतेषु संतं पुरुषं वनस्पतीन् ॥ ४ ॥ दृष्टो वः कच्चिदश्वत्थप्लक्षन्यग्रोध नो मनः ॥
नंदसूनुर्गतो हृत्वा प्रेमहासावलोकनैः ॥ ५ ॥ कच्चित्कुरबकाशोकनागपुन्नागचंपकाः ॥ रामानुजो मानिनीनामितो दर्पहरस्मितः ॥ ६ ॥
कच्चित्तुलसि कल्याणि गोविंदचरणप्रिये ॥ सह त्वालिकुलैर्बिभ्रद्दृष्टस्तेऽतिप्रियोऽच्युतः ॥ ७ ॥ ॥ त्य इति ॥ वनाद्वनांतरं गच्छंत्यो वि

चिक्युः अमृगयन् ॥ उन्मत्तवत्यत्वमाह ॥ वनस्पतीन् पप्रच्छुः ॥ भूतेषु अंतरं मध्ये संतं पुरुषं बहिश्च संतमिति ॥ ४ ॥ तत्र प्रपंचयति नवभिः ॥ तत्र महत्वाद्देते पृष्टे
युरित्याशयाः अश्वत्थादीन् पृच्छंति ॥ दृष्ट इति ॥ प्रेमहासविलासितैरवलोकनैरस्माकं मनो हृत्वा चोर इव गतो ॥ वः युष्माभिः किं दृष्ट इति ॥ ५ ॥ महांतः पुष्पैर्बहूपकारिण
श्चेति कुरबकादीन् पृच्छंति कच्चिदिति ॥ हे कुरबकादयः दर्पहरं स्मितं यस्य सः ॥ इतो गतः ॥ कच्चिद्दृष्ट इति ॥ ६ ॥ अलिकुलैः सह त्वालां व बिभ्रत् ॥ तवातिप्रियेः त्वया किं
दृष्ट इति ॥ ७ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० टी० पू०
८९

केशवस्यांघ्रिस्पर्शेनोत्स

गुणातिरेके पि नम्रता दिमाः पश्येयुरितिपृछंति ॥ मालतीति ॥ हे मालती मल्लिके नातियूथिकेवः युष्माभिः किं आ दर्शि दृष्टः ॥ करस्पर्शेणवः प्रीतिं जनयन् किं यातरति ॥
अत्र मालती जात्योरवांतरविशेषो द्रष्टव्यः ॥ ८ ॥ फलादिभिः सर्वप्राणिसंतर्पका एते पश्येयुरिति पृछंति ॥ चूतेति ॥ चूतांम्रयोरवांतरजातिभेदः ॥ नीपकदंबयोश्च ॥ हे चू
ताद्वयः हे येन्येच परार्थनविकाः ॥ परार्थमेव नवो जन्म येषां ते ॥ यमुनोपकूलाः तस्याः कूलसमीपे वर्तमानाः तीर्थवासिन इत्यर्थः ॥ ते नवंतः रहितात्मनां शून्यचेत
सां नः कृष्णपदवीं कृष्णस्य मार्गं शंसंतु कथयंतु ॥ ९ ॥ हे क्षितिक्षितेन त्वया किं तपः कृतं ॥ यो त्वं केशवांघ्रिस्पर्शोत्सवो वो यस्याः सा ॥ कुतः अंगरुहैः रुः पुलकिता रोमां

[illegible] मालत्यदर्शि वः कच्चिन्मल्लिके जातियूथिके ॥ प्रीतिं वो जनयन्यातः करस्पर्शेन माधवः ॥ ८ ॥ चूतप्रियालपनसासनकोविदार
[illegible] र्क बिल्वबकुलांम्रकदंबनीपाः ॥ येन्ये परार्थनविका यमुनोपकूलाः शंसंतु कृष्णपदवीं रहितात्मनां नः ॥ ९ ॥ किं ते कृतं क्षितितत
पो वत केशवांघ्रिस्पर्शोत्सवोत्पुलकितांगरुहैर्विभासि ॥ अप्यंघ्रिसंभव उरुक्रमविक्रमाद्वा आहो वराहवपुषः परिरंभणेन ॥ १० ॥
अप्येणपत्न्युपगतः प्रिययेह गात्रैस्तन्वन् दृशां सखि सुनिर्वृतिमच्युतो वः ॥ कांतांगसंगकुचकुंकुमरंजितायाः कुंदस्रजः कुलपते रिह वाति गंधः ॥ ११ ॥
चितविभासि शोभसे ॥ तत्र विशेषं पृछंति ॥ अपि किं अयमुत्सवः अंघ्रिसंभवः ॥ अधुना तवैकदेशांघ्रिस्पर्शसंभूतः ॥ यद्वा नैतावत् किं तु उ
रुक्रमविक्रमात्पूर्वमेव त्रिविक्रमस्य पदा सर्वाक्रमणात् ॥ अहो अथवा नैतावदेव अपि तु ततोपि पूर्वं वराहस्य वपुषः परिरंभणेनेति ॥ अतस्त्वया नूनं दृष्टस्तं द
र्शयेति ॥ १० ॥ हरिणपादत्प्रिप्रसन्या कृष्णदर्शनं संभाव्याहुः ॥ अपीति ॥ हे सखि एणपत्नि हरिणि अपि किं उपगतः ॥ गात्रैः सुंदरैः मुखबाह्वादिभिः ॥ प्रियया सहेति
यदुक्तं तत्र द्योतकं ॥ कांतायाः अंगसंगः तेन तत्कुचकुंकुमेन रंजितायाः कुंदकुसुमस्रजो गंधः कुलपतेः श्रीकृष्णस्य वाति आगछति ॥ ११ ॥ ॥ श्रीरामः ॥ ॥

राम
८९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फलभारेण नतांस्तरूंस्तल्लक्षं दृष्ट्वा प्रणता इति मत्वा प्रियया सहितस्य गतिविलासं संभावयंत्यः पृच्छंति ॥ बाहुमिति ॥ तुलसिकाया अलिकुलैः अतस्तदामोदमदांधै
रन्वीयमानः अनुगम्यमान इह चरन्निति ॥ १२ ॥ काश्चिदाहुः ॥ हे सख्यः इमा लताः लक्ष्मेनसंगतान्नन्नमतइमाः पृच्छत ननु स्वपतिसंगतौ तत्संगतिर्दुर्घटा न वन
स्पतेः परुषबाहुना श्लिष्टा अपि अहो नाय्यं नूनं तन्नखैरेव स्पृष्टाः यत उत्पुलकानि बिभ्रति ॥ न हि स्वपतिसंगतौ ईदृक्पुलकसंभव इति भावः ॥ १३ ॥ उन्मत्तक
वत्सप्रछुरित्येतत्प्रपंचितं ॥ इदानीं रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिका इति यदुक्तं तत्प्रपंचयति ॥ इतीति ॥ उन्मत्तवचो गोप्य उन्मत्तवचसश्च ता

कालि

बाहुं प्रियांस उपधाय गृहीतपद्मो रामानुजस्तुलसिकालिकुलैर्मदांधै ॥ अन्वीयमान इह वस्तरवः प्रणामं किंवाभिनंदति चरन् प्रणयावलो
कैः ॥ १२ ॥ पृच्छतेमा लता बाहूनप्याश्लिष्टा वनस्पतेः ॥ नूनं तत्करजस्पृष्टा बिभ्रत्युत्पुलकान्यहो ॥ १३ ॥ ॥ शुक उवाच ॥ ॥ इत्यु
न्मत्तवचो गोप्यः कृष्णान्वेषणकातराः ॥ लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः ॥ १४ ॥ कस्याश्चित्पूतनायंत्याः कृष्णायंत्य
पिबत्स्तनं ॥ तोकायित्वा रुदत्यन्या पदाहन् शकटायतीं ॥ १५ ॥ दैत्यायित्वा जहारान्यामेका कृष्णार्भभावनां ॥ रिंगयामास काप्यंघ्री क
र्षती घोषनिस्वनैः ॥ १६ ॥ कृष्णरामायिते द्वे तु गोपायंत्यश्च काश्चन ॥ वत्सायितीं हंति चान्या तत्रैका तु बकायितां ॥ १७ ॥ ॥ ॥

: गोप्यश्च ॥ कृष्णान्वेषणेन कातरा इति विकलाः अनुचक्रुरनुकृतवत्यः ॥ १४ ॥ कस्याश्चिदित्यादिचतुर्भिरनुकरणं प्रपंच्यते ॥ ततश्चतुर्भिस्तन्मयत्वं ॥ पु
नरेकेनानुकरणमिति विवेकः ॥ पूतनायंत्याः पूतनावदाचरंत्याः ॥ कृष्णवदाचरंती स्तनमपिबत् ॥ तोकायित्वा तोकवदात्मानं कृत्वा ॥ १५ ॥ ॥
दैत्यायित्वा दैत्यवत्तृणावर्तवदात्मानं कृत्वा एका तु कृष्णार्भभावनां कृष्णस्यार्भबाल्यं भावयति या तां अन्यां जहार ॥ १६ ॥ १७ ॥ ॥ श्रीरामः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ती धा

दूरगाः दूरे वर्त्मनि गाः । यद्वत् यथा कृष्णः तथा आह्वयतं कृष्णमनुवर्तयंती अनुवर्तमानां ॥ अनुकुर्वतीमिति वा पाठः ॥ १८ ॥ १९ ॥ यतंती यत्नं कुर्वतीति ॥ अंबरं उत्तरीयं व
स्त्रं ऊर्ध्वं निरधे ऊर्ध्वं धृतवती ॥ २० ॥ २१ ॥ अपिदध्वं निमीलयत ॥ २२ ॥ सुदृक् सुनयना आस्यं पिधाय ॥ सुदृक् वराहत्ती वा ॥ भीतिविडंबनं भयानुकरणं ॥ २३ ॥ एवं पुन

आहूय दूरगा यद्वत् कृष्णस्तमनुकुर्वतीं ॥ वेणुं क्वणंतीं क्रीडंतीमन्याः शंसंति साध्विति ॥ १८ ॥ कस्यांचित्स्वभुजं न्यस्य चलंत्याहापरा ननु ॥
कृष्णोऽहं पश्यत गतिं ललितामिति तन्मनाः ॥ १९ ॥ मा भैष्ट वातवर्षाभ्यां तत्त्राणं विहितं मया ॥ इत्युक्त्वैकेन हस्तेन यतंत्युन्निदधेऽम्बरं ॥
२० ॥ आरुह्यैका पदाक्रम्य शिरस्याहापरां नृप ॥ दुष्टाहे गच्छ जातोऽहं खलानां ननु दंडधृक् ॥ २१ ॥ तत्रैकोवाच हे गोपा दावाग्निं पश्यतो
ल्बणं ॥ चक्षूंष्याश्वपिदध्वं वो विधास्ये क्षेममंजसा ॥ २२ ॥ बद्धान्यया स्रजा काचित्तन्वी तत्र उलूखले ॥ भीता सुदृक् पिधायास्यं भेजे
भीतिविडंबनं ॥ २३ ॥ एवं कृष्णं पृच्छमाना वृंदावनलतास्तरून् ॥ व्यचक्षत वनोद्देशे पदानि परमात्मनः ॥ २४ ॥ पदानि व्यक्तमेतानि नंद
सूनोर्महात्मनः ॥ लक्ष्यंते हि ध्वजांभोजवज्रांकुशयवादिभिः ॥ २५ ॥ तैस्तैः पदैस्तत्पदवीमन्विच्छंत्योऽग्रतोऽबलाः ॥ वध्वाः पदैः सुपृ
लो क्तानि विलोक्यार्ताः समब्रुवन् ॥ २६ ॥ कस्याः पदानि चैतानि याताया नंदसूनुना ॥ अंसन्यस्तप्रकोष्ठायाः करेणोः करिणा यथा ॥ २७
॥ अनयाराधितो नूनं भगवान् हरिरीश्वरः ॥ यन्नो विहाय गोविंदः प्रीतो यामनयद्रहः ॥ २८ ॥ ॥श्रीरामाल्लयनमः ॥ ॥ रामः
९०

रपि वृंदावने लतास्तरून् कृष्णं पृच्छंत्यः वनोद्देशे वनप्रदेशे व्यचक्षत अपश्यत ॥ २४ ॥ २५ ॥ सुपृक्तानि संमिश्राणि ॥ २६ ॥ तेन अंसन्यस्तः प्रकोष्ठो यस्याः ॥ करेणो
र्हस्तिन्याः ॥ २७ ॥ रहः एकांतस्थानं ॥ २८ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे आल्यः सख्यः अहो धन्या अतिपुण्याः गोविंदांघ्र्यब्जरेणवः॥ तत्र हेतुः यानिति॥ अस्माभिरप्येतद्वै विंविषेके एतत्थैवत्स्नाः प्राप्तुं शक्यत इति भावः॥२९॥ अन्या आ
हुः॥ तस्या इति॥ गोपानां सर्वस्वं॥ अयं भावः॥ न वेदे वयं यदि तस्याः पदानि संपृक्तानि न नवेयुः तानि नो दुःखं कुर्वंतीति॥३०॥ तदसंपृक्तान् केवल कृष्णपादरेणूरे
व विचिन्वंत्यस्तान् दृष्ट्वा पुनरन्यं तं समतपन् तदाहुः श्लोकत्रयेण॥ न लक्ष्यंत इति॥ खिद्यंती सुजाते सुकुमारे अंघ्रितले यस्यास्तां उन्निन्ये स्कंधमारोपितवान्॥३१॥

धन्या अहो अमी आल्यो गोविंदांघ्र्यब्जरेणवः॥ यान् ब्रह्मेशो रमा देवी दधुर्मूर्ध्न्यघनुत्तये॥२९॥ तस्या अमूनि नः क्षोभं कुर्वंत्युच्चैः पदानि
यत्॥ यैकापहृत्य गोपीनां रहो भुंक्तेच्युताधरं॥३०॥ न लक्ष्यंते पदान्यत्र तस्या नूनं तृणांकुरैः॥ खिद्यत्सुजातांघ्रितलामुन्निन्ये प्रेयसीं
प्रियः॥ इमान्यधिकमग्नानि पदानि वहतो वधूं॥ गोप्यः पश्यत कृष्णस्य भाराक्रांतानि कामिनः॥३२॥ अत्रावरोपिता कांता पुष्पहेतो
र्महात्मना॥ अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृतः॥ प्रपदाक्रमणे एते पश्यतासकले पदे॥३२॥ केशप्रसाधनं त्वत्र कामिन्याः
कामिना कृतं॥ तानि चूडयता कांतामुपविष्टमिह ध्रुवं॥३३॥ रेमे तया चात्मरतः आत्मारामोप्यखंडितः॥ कामिनां दर्शयन्दैन्यं स्त्री
णां चैव दुरात्मतां॥३४॥ इत्येवं दर्शयंत्यस्ताश्चेरुर्गोप्यो विचेतसः॥ यां गोपीमनयत्कृष्णो विहायान्याः स्त्रियो वने॥३५॥ सा च मेने
तदात्मानं वरिष्ठं सर्वयोषितां॥ हित्वा गोपीः कामयाना मामसौ भजते प्रियः॥३६॥ ॥ प्रपदाभ्यां आक्रमणं ताभ्यां संमर्दो नं ययोः॥ अत ए
वासकले पदे पश्यतेति॥३३॥ तस्याः कृष्णजान्वंतरुपविष्टायाश्चिकुरं दृष्ट्वाहुः॥ केशप्रसाधनमिति॥ कांतामधिकृत्य तानि प्रसूनानि चूडयता चूडानुकारेण बध्नता इह ध्रु
वमुपविष्टं॥३४॥ रेमे इत्यादि शुकोक्तिः॥ आत्मरतः स्वतस्तुष्टः॥ आत्मारामः स्वक्रीडः॥ अखंडितः स्त्रीविभ्रमैरनाकृष्टोपि॥ तयाचेत्किमिति रेमे तत्राह॥ कामि
नामिति॥३४॥३५॥ स्त्रीणां दुरात्मतामाह॥ सा चेति द्वाभ्यां॥ कामो यानमागमनसाधनं यासां ताः॥ गोपीर्हित्वा मां भजत इति हेतोरात्मानं वरिष्ठं मेन इति॥३६॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० पू०
९१

कामिनांदैन्यंदर्शयति॥एवमुक्त इति॥अखंडितत्वमाह॥ततश्चेति॥तस्याःस्कंधारोहेउद्यतायामंतर्हित इत्यर्थः॥३८॥अनुतापमाह॥हानाथेति॥३९॥अ
न्विछंत्यःमृगयमाणाःअविदूरतःसमीपे॥४०॥४१॥ततस्तयापिसहितालक्ष्म्यान्वेषणायवनमविशन्॥ततोहरेरन्वेषणान्निवृत्ताः॥४२॥ए
वंतमप्राप्ताअपिस्वगृहान्नैवस्मृतवत्यः॥तदात्मिकाः॥सएवआत्मायासांतास्तन्मय्यइत्यर्थः॥४३॥किंतुपूर्वयत्रश्रीकृष्णेनसंगतिरासी

ततोगत्वावनोद्देशंदृप्ताकेशवमब्रवीत्॥नपारयेऽहंचलितुंनयमांयत्रतेमनः॥३७॥एवमुक्तःप्रियामाहस्कंधआरुह्यतामि
ति॥ततश्चांतर्दधेकृष्णःसावधूरन्वतप्यत॥३८॥हानाथरमणप्रेष्ठक्वासिक्वासिमहाभुज॥दास्यास्तेकृपणायामेसखेद
र्शयसन्निधिं॥३९॥अन्विछंत्योभगवतोमार्गंगोप्योऽविदूरतः॥ददृशुःप्रियविश्लेषमोहितांदुःखितांसखीं॥४०॥तयाक
थितमाकर्ण्यमानप्राप्तिंचमाधवात्॥अवमानंचदौरात्म्याद्विस्मयंपरमंययुः॥४१॥ततोविशन्वनंचंद्रज्योत्स्नायावद्वि
भाव्यते॥तमःप्रविष्टमालक्ष्यततोनिववृतुःस्त्रियः॥४२॥तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः॥त
द्गुणानेवगायंत्योनात्मागाराणिसस्मरुः॥४३॥पुनःपुलिनमागत्यकालिंद्याःकृष्णभावनाः॥समवेताजगुःकृष्णंतदा
गमनकांक्षिताः॥४४॥ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेकृष्णविश्लेषव्याकुलगोपालतलक्ष्म्यान्वेषणंनामत्रिंशोध्याय
॥३०॥

त्तदेवकालिंद्याःपुलिंद्याःपुलिनमागत्यकृष्णंभावयंतिध्यायंतीतितथाताः॥कृष्णस्यागमनंकांक्षितंयासांताः संमिलिताःसत्यःकृष्णमेवजगुरि॥त
ति॥४४॥ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांत्रिंशत्तमोध्यायः॥३०॥एकत्रिंशेनिराशास्ताःपुनःपुलिनमागताः॥कृष्णमेवानुगायंत्यःप्रा
र्थयंतेतदागमं॥१॥ ॥

राम:
९१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्व२

जयतीति॥ हे दयित ते जन्मना व्रजः अधिकं यथा भवति तथा जयति उत्कर्षेण वर्त्तते॥ यस्मात्त्वमत्र जातस्तस्मादिंदिरा लक्ष्मी रत्र हि श्रयते अजस्रं तत्र वर्त्तते॥ एवं व्रजे
सर्वस्मिन्मोदमाने अत्र तु तावकाः त्वदीया गोपाजना यित्वदर्थमेव कथंचिद्धृतासवः धृता असवो यैस्ते त्वां विचिन्वते॥ अतस्त्वया दृश्यतां प्रत्यक्षीभूयतामिति॥ यद्वा
अस्माभिर्भवान् दृश्यतां॥ यद्वा एवं त्वया दृश्यतामेते विचिन्वन्तरंति॥ अत्र स्वतंत्राणां बहूनां वक्तृत्वादपरा आहुरिति सर्वश्लोकेष्ववतारणा॥ तथापि संगतिरु
च्यते॥१॥ तत्र विचिन्वंतं मम किमिति चेत्तत्राहुः॥ शरदिति॥ शरदुदाशये शरत्काले नसरसि साधु॥ जातसत्सरसिजोदरश्रीमुषा साधुजातं सम्यग्जातं यत्सत्स
रसिजं सुविकसितं पद्मं तस्योदरे गर्भे या श्रीस्तां मुष्णाति हरतीति तथा तया दृशा ~~श्रीमुषा साधुना~~ दृशा नेत्रेण॥ हे सुरतनाथ संभोगपते॥ वरद अभीष्टप्रद॥ अशु

गोप्यऊचुः॥ ॥जयतितेधिकंजन्मनाव्रजः श्रयतइंदिराशश्वदत्रहि॥ दयितदृश्यतांदिक्षुतावकास्त्वयिधृतासवस्त्वांविचिन्वते॥१॥
शरदुदाशयेसाधुजातसत्सरसिजोदरश्रीमुषादृशा॥ सुरतनाथतेशुल्कदासिकावरदनिघ्नतोनेहकिंवधः॥२॥ विषजलाप्ययाद्व्या
लराक्षसाद्वर्षमारुताद्वैद्युता नलात्॥ वृषमयात्मजाद्विश्वतोभयादृषभतेवयंरक्षितामुहुः॥३॥ ॥श्रीरामाल्लयनमः॥

ल्कदासिकाः अमूल्यदासीः निघ्नतो मारयतस्तेन त्वया क्रियमाणः इह लोके अयं वधो न भवति किं किं शस्त्रेणैव वधो वधः किं दृशा वधो वधो न भवति किं तु भवत्ये
व॥ अतस्त्वद्दृशा परं तत्प्राणप्रत्यर्पणाय त्वया दृश्यतामिति भावः॥ त्वया दृश्यतामिति यथासंभवं सर्वत्रैवानुषंगः॥ किंच बहुभ्यो मृत्युभ्यः कृपया रक्षित्वा कि
मितीदानीं दृशा मन्मथं प्रेष्य घातयसीत्याहुः॥ विषेति॥ हे ऋषभ श्रेष्ठ॥ विषमयाज्जलाद्धीः अप्ययो नाशस्तस्मात्॥ तथा व्यालराक्षसादघासुरात् वर्षान्मारुता
त्॥ वैद्युतानलात् अशनिनिपातात्॥ वृषो ऽरिष्टस्तस्मात्॥ मयात्मजाद्व्योमात्॥ विश्वतः अन्यस्मादपि सर्वतो भयाच्च कालियदमनादिना रक्षिताः किमिदानी
मुपेक्षसे इति भावः॥३॥ अपि च विश्वपालनायावतीर्णस्य तव नक्कोपेक्षा ऽस्तं तमनुचितेत्याशयेनाहुः॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गो॰ टी॰ पू॰
१२

नखल्विति॥ हे सखे त्वं भवान् खलु निश्चितं यशोदासुतो न भवसि किंतु सर्वप्राणिनां बुद्धिसाक्षी॥ ननु सखि इत्थं न भवति तत्राहुः॥ विषनसा ब्रह्मणा विश्वपालनाय प्रार्थितः
सन् सात्वतां कुले उदेयिवान् उदितः इति॥ ४॥ तस्मात्त्वदङ्कानामस्माकमेतत्प्रार्थनाचतुष्टयं संपादयेत्याहुः॥ विरचितामयमित्यादिचतुर्भिः॥ हे वृष्णिधुर्य सं
सृतेर्भयात्शरणमीयुषां शरणं प्राप्तानां प्राणिनां विरचितं दत्तमभयं येन तत्तथा॥ हे कांतकामदं वरदं॥ तथा श्रियः करं गृह्णातीति तथा॥ यद्वा त्वत्करस
रोरुहं नः शिरसि धेहि॥ ५॥ हे व्रजजनार्तिहन्॥ हे वीर निजजनानां यः स्मयो गर्वस्तद्ध्वंसनं नाशकं स्मितं यस्य हे तथाभूत हे सखे॥ नवत्किंकरीर्नो ऽस्मा^

^न खलु गोपिकानंदनो भवान् अखिलदेहिनामंतरात्मदृक्॥ विषनसा ऽर्थितो विश्वगुप्तये सख उदेयिवान् सात्वतां कुले॥ ४॥ विरचि
ताभयं वृष्णिधुर्य ते शरणमीयुषां संसृतेर्भयात्॥ करसरोरुहं कांत कामदं शिरसि धेहि नः श्रीकरग्रहं॥ ५॥ व्रजजनार्तिहन् वीर
योषितां निजजनस्मयध्वंसनस्मित॥ भज सखे भवत्किंकरीः स्म नो जलरुहाननं चारु दर्शय॥ ६॥ प्रणतदेहिनां पापकर्ष
णं तृणचरानुगं श्रीनिकेतनं॥ फणिफणार्पितं ते पदांबुजं कृणु कुचेषु नः कृंधि हृच्छयं॥ ७॥ मधुरया गिरा वल्गुवाक्यया बुध^
मनोज्ञया पुष्करेक्षण॥ विधिकरीरिमा वीर मुह्यतीरधरसीधुनाप्याययस्व नः॥ ८॥ ॥ श्रीरामाभ्युदयनमः॥ ॥

न भज आश्रयास्मेति निश्चितं॥ प्रयथमं ताम्रकमलरूपाननं चारु योषितां नो दर्शय॥ ६॥ अविशेषेण प्रणतानां पापकर्षणं पापघ्नं तृणचरान् पशून् अनुगच्छ
ति॥ रूपयेतितथा॥ सौभाग्येन श्रियो निकेतनं॥ वीर्यातिरेकेण फणिनः फणासु अर्पितं ते पदांबुजं नः कुचेषु कृणु कुरु॥ किमर्थं हृच्छयं कामं कृंधि छिं
धि॥ ७॥ हे पुष्करेक्षण तवैव मधुरया गिरा वल्गूनि वाक्यानि यस्यां तथा॥ बुधानां मनोज्ञया आरुह्यया गंभीरयेत्यर्थः॥ मुह्यतीरिमाः नः विधि
कराः किंकरीरधरसीधुना आप्याययस्व संजीवयेति॥ ८॥ ॥

सी

गोंदेहिनी रामः
१२

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

ण
किंच अस्माकं त्वद्विरहे प्राणसमेव मरणं किंतु त्वत्कथामृतं पाययद्भिः सुकृतिभिर्वंचितमित्याहुः ॥ तवेति ॥ कथैवामृतं ॥ अत्र हेतुः ॥ तप्तजीवनं ॥ प्रसिद्धामृतादुत्कर्षमाहुः ॥ क
विभिर्ब्रह्मविद्भिरपीडितं स्तुतं देवभोग्यं त्वमृतं तैस्तुच्छीकृतं ॥ किंच ॥ कल्मषापहं कामकर्मनिरसनं तत्त्वमृतं नैवंभूतं ॥ किंच ॥ श्रवणमंगलं श्रवणमात्रेण मंगलं श्र
वणमात्रेण मंगलप्रदं तत्त्वनुष्ठानापेक्षं ॥ किंच ॥ श्रीमत् सुशांतं तत्तु मादकं ॥ एवंभूतं त्वत्कथामृतं आततं यथा भवति तथा भुवि ये गृणंति निरूपयंति ते जनाः ॥ भू
रिदाः बहुदातारः जीवितं ददतीत्यर्थः ॥ यद्वा एवंभूतं त्वत्कथामृतं ये तु भुवि गृणंति ते भूरिदाः पूर्वजन्मसु बहु दत्तवंतः सुकृतिन इत्यर्थः ॥ एतदुक्तं भवति ॥ ये केवलं क
थामृतं गृणंति ते पिता वदंति धन्याः ॥ किं पुनर्ये त्वां पश्यंति अतः ॥ प्रार्थयामहे त्वया दृश्यतामिति ॥ ९ ॥ ननु तर्हि मत्कथाश्रवणेनैव निर्वृता भवत किं मद्दर्शनेन ॥ त्वद्वि

तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहं ॥ श्रवणमंगलं श्रीमदाततं भुवि गृणंति ये भूरिदा जनाः ॥ ९ ॥ प्रहसितं प्रिय प्रेमवीक्ष
णं विहरणं च ते ध्यानमंगलं ॥ रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयंति हि ॥ १० ॥ चलसि यद्व्रजाच्चारयन् पशून् नलिनसुंदरं
नाथ ते पदं ॥ शिलतृणांकुरैः सीदतीति नः कलिलतां मनः कांत गच्छति ॥ ११ ॥ दिनपरिक्षये नीलकुंतलैर्वनरुहाननं बिभ्रदा
वृतं ॥ घनरजस्वलं दर्शयन् मुहुर्मनसि नः स्मरं वीर यच्छसि ॥ १२ ॥ ॥ नास्मच्चुंबितचित्रावयं तत्रापि शांतिं न विंदाम इत्याहुः ॥ प्रहसित
मिति ॥ हे प्रिय कुहक कपट ॥ संविदः संकेतनर्माणि ॥ किंच त्वयि विषमतिप्रेमार्द्रचित्ताः त्वं पुनरस्मासु केन हेतुना कपटमाचरसीत्याहुः श्लोकद्वयेन ॥ चलसीति ॥ हे नाथ
जो कांत यद्यदा व्रजाच्चलसि पशूंश्चारयन् तदा तन्नलिनसुंदरं कोमलं ते पदं शिलैः कणिशैः तृणैः अंकुरैश्च सीदति क्लिश्यते दुःखं ददातीति नो मनः कलिलतां अचांचल्यं गच्छति प्राप्नोति
॥ एवंभूतास्त्वदुःखत्रांकितचित्रावयं ॥ ११ ॥ तं तु दिनपरिक्षये सायंकाले नीलकुंतलैरावृतं ॥ घनरजस्वलं गोरजःछुरितं वनरुहाननं अलिमालाकुलपरागच्छुरितप
द्मतुल्यमाननं बिभ्रत तच्च मुहुर्मुहुर्दर्शयन् नो मनसि केवलं स्मरं यच्छसि अर्पयसि न तु संगं ददासीति करे पदद्रतिभावः ॥ १२ ॥ अतो मधुनामकम् ॥ ॥
८१३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतोऽधुनाकपटं विहायैवं कुर्विति प्रार्थयंते श्लोकद्वयेन॥ प्रणतकामदं रत्नि॥ हे आधिहंतः हे रमण पद्मजेनार्चितं॥ आपदि ध्येयं ध्यानमात्रेण पन्निवर्त्तकं॥ शंतमं च सेवासमये
च्चापि सुखतमं॥ तव चरणपंकजं कामतापशांत्यै नः स्तनेष्वर्प्पयेति॥१३॥ अपिच॥ हे वीर तेऽधरामृतं नो वितर देहि॥ स्वरितेन नादितेन वेणुना सुष्ठु चुंबितमिति ना
दामृतवासितमिति भावः॥ इतररागविस्मारणं नृणामितरेषु सार्वभौमादिसुखेषु रागमिच्छां विस्मारयति विलापयतीति तथा तत्॥१४॥ किंच त्वत्क्षणमपि
त्वदद्दर्शने दुःखं दर्शने सुखं दृष्ट्वा सर्वसंगपरित्यागेन यत परवत्वं यत्वामुपागताः तं त्वं कथमस्मांस्त्यक्तुमुत्सहसे रतिसकरुणमूचुः अटतीति द्वयेन॥ य

प्रणतकामदं पद्मजार्च्चितं धरणिमंडनं ध्येयमापदि॥ चरणपंकजं शंतमं च ते रमण नः स्तनेष्वर्प्पयाधिहन्॥१३॥ सुरतवर्द्धनं शो
कनाशनं स्वरितवेणुना सुष्ठु चुंबितं॥ इतररागविस्मारणं नृणां वितर वीर नस्तेऽधरामृतं॥१४॥ अटति यद्भवानह्नि काननं
त्रुटिर्युगायते त्वामपश्यतां॥ कुटिलकुंतलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशां॥१५॥ पतिसुतान्वयभ्रातृबांधवानति
विलंघ्य तेंत्यच्युतागताः॥ गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि॥१६॥ ॥ श्रीरामाख्यय नमः॥ ॥

त्वं यदा भवानह्नि काननं वृंदावनं प्रति अटति गच्छति॥ तदा त्वामपश्यतां प्राणिनां त्रुटिः क्षणार्द्धमपि युगवद्भवति॥ एवमदर्शने दुःखमुक्तं॥ पुनश्च कथं चिद्दिनांते तेत
व श्रीमन्मुखं उत्कंठयैवेक्षमाणानां तेषां दृशां प

क्ष्मकृद्ब्रह्माणं जडो मंद एवाऽनिमिषमात्रमप्यंतरमसहमानि तद्दर्शनसुखमुक्तं॥१५॥ तस्मात् हे अच्युत पत
न् सुतान् अन्वयान् तत्संबंधिनः भ्रातॄन् बांधवांश्चातिविलंघ्य तव समीपमागता वयं॥ कथंभूतं तस्य गतिविदः अस्मदागमनं जानतः॥ गीतगतार्थं जानतः॥
गतिविदो वयं वा तव उद्गीतेन उच्चैर्गीतेन मोहिताः॥ हे कितव शठ एवंभूता योषितो निशि स्वयं आगताः त्वामृते कस्त्यजेत्को पात्यर्थः॥१६॥ ॥ ॥

राम:
९३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतस्त्वयात्यक्तानामस्माकं प्राकृतनत्वदर्शनं निदानसंयोगस्य त्वत्संगत्यैव चिकित्सां कुर्वित्याहुः येन रहसीति॥ श्रियो धाम वक्षः मते हृदि श्यालं उर श्रवीक्ष्यातिस्पृहा वेंनेति॥ व
याच मुहुर्मनो मुह्यति॥१७॥ तवव्यक्तिरभिव्यक्तिर्व्रजवनौकसां सर्वेषां अविशेषेण वृजिनहंत्री दुःखनिरासना॥ विश्वमंगलं सर्वमंगलरूपा च अतस्त्वत्स्पृहात्मनां त्व-
त्स्पृहारूपाणां मनसां नः मनाक् ईषत् किमपि त्यज मुंच कार्पण्यं मा कुर्वन् देहीत्यर्थः॥ किं तत्॥ स्वजनहृद्रोगाणां यदतिगोप्यं निषूदनं निर्हरणं कर्मौषधं तत्त्वमेव वेत्सि॥
तिगूह्याभिप्रायं॥१८॥ अतिप्रेमधर्षिता रुदंत्य आहुः॥ यदिति॥ हे प्रिय यत्ते तव सुकुमारं पदाम्बुजं कठिनेषु कुचेषु संमर्दनशंकिताः शनैः शनैर्दधीमहि धारयेमवयं॥

रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणं॥ बृहदुरः श्रियो वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः॥१७॥ व्रजवनौकसां व्यक्तिरं त्र
गते वृजिनहंत्र्यलं विश्वमंगलं॥ त्यज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनं॥१८॥ यत्ते सुजातचरणांबुरुहं स्तनेषु-
भीताः शनैः प्रिय दधीमहि कर्कशेषु॥ तेनाटवीमटसि तद्व्यथते न किं स्वित् कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः॥१९॥ ॥इति श्री-
भागवते महापुराणे दशमस्कंधे एकत्रिंशोध्यायः॥३१॥ ॥शुक उ०॥ ॥इति गोप्यः प्रगायंत्यः प्रलपंत्यश्च चित्रधा॥ रुरुदुः
सुस्वरं राजन् कृष्णदर्शनलालसाः॥१॥ ॥श्रीरामाकृष्णायनमः॥ ॥तेनाटवीमटसि॥ नयसीति पाठे॥ पश्चात्त्वाकांचिदन्यां वा- नं

आत्मानमेव वा नयसि प्रापयसि॥ तत्तत्पदांबुजं वा कूर्पादिभिः सूक्ष्मपाषाणादिभिः किंस्विन्न व्यथते॥ कथं नु नाम न व्यथेतेति॥ भवानेवायुर्जीवो यासां तासां नो
धीर्भ्रमति मुह्यतीति॥१९॥ ॥इति श्रीभागवते महापुराणे दशमस्कंधे एकत्रिंशोध्यायः॥३१॥ ॥द्वात्रिंशे विरहालापविक्लिन्नहृदयो हरिः॥ तत्रावि
र्भूय गोपीस्ताः सांत्वयामास मानयन्॥१॥ स्वप्रेमामृतकल्लोलविह्वलीकृतचेतसः॥ सदयं नंदयन् गोपीः कृतो नंदनंदनः॥२॥ इति गोप्य इति॥ इत्येवं
प्रलपंति चित्रधा अनेकधा सुस्वरं उच्चैः॥ कृष्णदर्शनलालसाः तिस्पृहा यासां ताः॥१॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साक्षान्मन्मथमथः ॥ जगन्मोहनस्य कामस्यापि मनसो भवः कामः साक्षात्तस्यापि मोहकः स्वरूपैः ॥२॥ तन्वः करचरणादयः ॥३॥ अंजलिना संहतहस्तद्वयेन ॥४॥५॥
भ्रुकुटिमाबध्य कुटिलीकृत्य ॥ प्रेमसंरंभेण प्रणयकोपावेशेन विह्वला विवशा ॥ दशनच्छदो धरोष्ठः ॥ कटाक्षेपैः नेत्रैः आक्षेपाः परिभवास्तैस्ताडयंतीवैक्षत ॥६॥ अनिमि
षद्भ्यां अनिमिलंतीभ्यां दृग्भ्यां आपीतमपि सम्यग्दृष्टमपि पुनः पुनर्जुषाणा नातृप्यत ॥७॥ हृदिकृत्य हृदयं नीत्वेत्यर्थः ॥८॥ प्राज्ञं ईश्वरं प्राप्य यथा मुमुक्षवो जनाः ॥

तासामाविरभूच्छौरिः स्मयमानमुखांबुजः ॥ पीतांबरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥२॥ तं विलोक्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोऽब
लाः ॥ उत्तस्थुर्युगपत्सर्वास्तन्वः प्राणमिवागतं ॥३॥ काचित्करांबुजं शौरेर्जगृहेंऽजलिना मुदा ॥ काचिद्दधार तद्बाहुमंसे चंदनभूषि
तं ॥४॥ काचिदंजलिनागृह्णात्तन्वी तांबूलचर्वितं ॥ एका तदंघ्रिकमलं संतप्ता स्तनयोरधात् ॥५॥ एका भ्रुकुटिमाबध्य प्रेमसंरं
भविह्वला ॥ घ्नंतीवैक्षत्कटाक्षेपैः संदष्टदशनच्छदा ॥६॥ अपरानिमिषद्दृग्भ्यां जुषाणा तन्मुखांबुजं ॥ आपीतमपि नातृप्यत्सं
तस्तच्चरणं यथा ॥७॥ तं काचिन्नेत्ररंध्रेण हृदिकृत्य निमील्य च ॥ पुलकांग्युपगुह्यास्ते योगीवानंदसंप्लुता ॥८॥ सर्वास्ताः के
शवालोकपरमोत्सवनिर्वृताः ॥ जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनाः ॥९॥ ताभिर्विधूतशोकाभिर्भगवानच्युतो वृतः ॥ व्यरोच
ताधिकं तात पुरुषः शक्तिभिर्यथा ॥१०॥ ताः समादाय कालिंद्याः निर्विश्य पुलिनं विभुः ॥ विकसत्कुंदमंदारसुरभ्यनिलषट्पदं ॥११ रामः
९४

यद्वा प्राज्ञं ब्रह्म तं प्राप्य यथा संसारिणः ॥ यद्वा प्राज्ञं सौषुप्तं प्राप्य यथा विश्वतैजसावस्थानाः ॥९॥ पुरुषः परमात्मा शक्तिभिः सत्त्वादिभिर्यथा ॥ यद्वा उपासकः पुरु
षो ज्ञानवीर्यबलादिभिः ॥ यद्वा पुरुषो ऽनुशायी प्रकृत्याद्युपाधिभिर्वृतो यथा विरोचत तद्वत् ॥१०॥ विकसत्कुंदमंदारैः सुरभिर्यो ऽनिल स्तस्मात् षट्पदा यस्मि
नि न् ॥११॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वि

शरच्चंद्रांशूनां संदोहैः समूहैः ध्वस्तं दोषातमः रात्रिगतं तमो यस्मिन् तत्॥ अतः शिवं सुखकरं॥ कृष्णायाः हस्तरूपैस्तरलैस्तरंगैराचिता आस्तृताः कोमला वालुका यस्मिन् एवंभूतं पुलिनं ताः समादाय निविश्य तत्र ताभिर्वृतोधिकं रोचत इति पूर्वेणान्वयः॥१२॥ ताश्च मनोरथानामंतं ययुः॥ पूर्णकामा बभूवुः॥ श्रुतयो यथेति॥ अयमर्थः॥ यथा कर्मकांडे श्रुतयः परमेश्वरमप्राप्य स्वर्गादिकामानुबंधेन पूर्णा न भवंति। ज्ञानकांडे तु परमेश्वरं दृष्ट्वा तदानंदपूर्णाः कामानुबंधं जहतीति तद्वदिति॥ आप्तकामा अपि प्रेम्णा तमभजन्नित्याह॥ स्वैरिति॥ अचीक्लृपन् रचयामासुः॥ आत्मबंधवेंतर्यामिणे॥१३॥ गोपीसभागतस्ताभिः समानितः संपूजितः कासशु

शरच्चंद्रांशुसंदोह। ध्वस्तदोषातमः शिवं॥ कृष्णाया हस्ततरलाचितकोमलवालुकं॥१२॥ तद्दर्शनाह्लादविधूतहृद्रुजो मनोरथां
तं श्रुतयो यथा ययुः॥ स्वैरुत्तरीयैः कुचकुंकुमांकितैरचीक्लृपन्नासनमात्मबंधवे॥१३॥ तत्रोपविष्टो भगवान्स ईश्वरो
योगीश्वरांतर्हृदिकल्पितासनः॥ चकास गोपीपरिषद्गतोर्चितस्त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत्॥१४॥ सभाजयित्वा तमनंग
दीपनं सहासलीलेक्षणविभ्रमभ्रुवा॥ संस्पर्शनेनांककृतांघ्रिहस्तयोः संस्तुत्य ईषत्कुपिता बभाषिरे॥१५॥ गोपिका ऊ
चुः॥ ॥भजतोनुभजंत्येक एक एतद्विपर्ययं॥ नोभयांश्च भजंत्यन्य एतन्नो ब्रूहि साधु भो॥१६॥ ॥ ॥

शुते॥ त्रैलोक्यलक्ष्म्याः शोभायाः एकमेव पदं स्थानं तद्वपुर्दधत्॥ दर्शयन्॥१४॥ सहासलीलेक्षणेन विभ्रमो विलासो यस्यां तया भ्रुवा उपलक्षिताः॥ संस्पर्शनेन
व संमर्दनेन॥१५॥ तत्र नर्मगर्भिताः स्वतत्त्वं तं तद्वचनेनैव आपादयितुं कामा गूढाभिप्राया लोकवृत्तांतमिव पृच्छंति॥ भजत इति॥ भजतः प्राणिनः अनु अनंतरं केचित् भ
जनानुसारेण भजंति॥ केचिद्धि तद्विपर्ययं यथा भवति तथा तद्भजनानपेक्षमभजतोपि भजंति॥ अन्ये तु नोभयानिति॥१६॥ ॥श्रीरामकृष्णाय नमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पू०
९५

विदिताभिप्रायउत्तरमाह॥ मिथइति॥ हेसख्यः उपकारप्रत्युपकारतयोयेमिथोभजंतेतेतेभ्यं नभजंतिकिंत्वात्मानमिव॥कुतः यस्मात्स्वार्थएवैकांततउद्यमोये
षांतेतत्रचनसौहृदं अतोनसुखं॥ नचधर्मोदृष्टोहेशाठोमहिष्यादिभजनवत्स्वार्थः॥१७॥ येत्वभजतोभजंतितेद्विविधाकरुणाःस्निग्धाश्च॥तत्र
उदूर्ध्वयथाक्रमंधर्मकामौभवतइत्याह॥ भजंत्यभजतइति॥१८॥ तृतीयप्रश्नोत्तरं॥ भजतोपीति अयमर्थः॥तेचत्वविधाः॥एकेआत्मारामाःअ
परागदृशः॥ केचिदाप्तकामाःविषयदर्शनेपिपूर्णकामत्वेनभोगेछारहिताः॥अन्ये अन्ये अकृतज्ञाःसंमूढाः॥अन्येगुरुद्रुहः अतिक

॥श्रीभगवानुवाच॥ ॥मिथोभजंतियेसख्यःस्वार्थैकांतोद्यमाहिते॥नतत्रसौहृदंधर्मःस्वार्थार्थंतद्धिनान्यथा॥१
७॥भजंत्यभजतोयेवैकरुणाःपितरोयथा॥धर्मोनिरपवादोत्रसौहृदंचसुमध्यमाः॥१८॥भजतोपिनवैकेचिद्भजंत्य
भजतःकुतः॥आत्मारामाह्याप्तकामाअकृतज्ञागुरुद्रुहः॥१९॥नाहंतुसख्योभजतो[illegible]जंतून्भजाम्यमीषाम
नुवृत्तिवृत्तये॥यथाधनोलब्धधनेविनष्टेतच्चिंतयान्यन्निभृतोनवेद॥२०॥ ॥श्रीरामालयनमः॥॥
पि

ठिनाः॥सपितायस्तुपोषकइतिन्यायादुपकर्तागुरुस्तद्रुहःतस्मैद्रुह्यंतीतितथाते॥१९॥अत्रचरमकोटिगतमात्मानंमत्वाभक्तिसंभवितोच्चैः परस्परगुढस्मितगुढ
स्मितमुखीस्ताःदृष्ट्वाह॥ नाहंत्विति॥ हेसख्यः अहंतुतेषांमध्येनकोपि किंतुपरमकारुणिकः॥परमसुहृच्च॥ कथंअमीषांभजतामनुवृत्तिवृत्तयेनिरंतर
ध्यानप्रवृत्त्यर्थंतान्नभजामि॥एतत्सदृष्टांतमाह॥ यथेति॥तस्यधनस्यैवचिंतयानिभृतःपूर्णोव्याप्तइतियावत्॥अन्यत्क्षुत्पिपासाद्यपिनवेद॥२०॥ ॥

रामः९
९५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंमदर्थोज्झितलोकवेदस्वानांमदर्थेउज्झितः लोकः युक्तापेक्षाद्धर्मप्रतीक्षणात्स्वाः ज्ञातयश्चस्नेहत्यागात्तयाभिस्तासांवोयुष्माकंपरोक्षंअदर्शनंयथाभ
वतितथाभजतायुष्माभिर्मालापानश्रएवंतैवतिरोहितमंतर्ध्यानेनस्थितं॥ ततस्तस्मात्हेअबलाः हेप्रियाः मामांअसूयितुंदोषारोपेणद्रष्टुंयूयंमार्हथनयोग्या रो
स्थ॥२१॥ आस्तांमिदंपरमार्थंत्वश्रृणुतेत्याहनेति॥ निरवद्यसंयुजांनिरवद्यासंयुक्संयोगोयासांतासांवः२ विबुधायुषापिचिरकालेनापिस्वीयंसाधुकृ
त्यंप्रत्युपकारंकर्तुंनपारयेनशक्नोमि॥ कथंभूताः यायाभवत्योदुर्जराः अजराः यागेहश्रृंखलाः ताः संवृश्च्यच्छित्वामामांअभजन्तासां॥ मच्छि

एवंमदर्थोज्झितलोकवेदस्वानांहिवोमय्यनुवृत्तयेऽबलाः॥ मयापरोक्षंभजतातिरोहितंमासूयितुंमार्हथतत्प्रियंप्रियाः॥२
१॥ नपारयेहंनिरवद्यसंयुजांस्वसाधुकृत्यंविबुधायुषापिवः॥ यामाभजन्दुर्जरगेहश्रृंखलांसंवृश्च्यतद्वःप्रतियातुसाधुना
॥२२॥ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेद्वात्रिंशत्तमोध्यायः॥३२॥ ॥श्रीशुकउ०॥ ॥ इत्थंभगवतोगोप्यःश्रु
त्वावाचःसुपेशलाः॥ जहुःविरहजंतापंतदंगोपचिताशिषः॥१॥ तत्रारभतगोविंदोरासक्रीडामनुव्रतैः॥ स्त्रीरत्नैरन्वितःप्री
तैरन्योन्याबद्धबाहुभिः॥२॥
न्नंत्वबहुषुप्रेमयुक्तयानैवमेकनिष्ठंतस्माद्वोयुष्माकंमेवसाधुकृत्येनततयुष्मत्साधुकृत्यंप्रतियातुप्रतिकृतंभव
तुयुष्मत्सौशील्येनैवममानृण्यंनतुमत्कृतप्रत्युपकारेणेत्यर्थः॥२२॥ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांद्वात्रिंशोध्यायः॥३२॥ त्रयस्त्रिं
शेततोगोपामंडलीमध्यगोहरिः॥ प्रियास्तारमयामासरुदिनाबनकेलिभिः॥१॥ तत्रदा। अंगहेराजन्तस्यभगवतोंगेनवपुषाकरचरणाद्यवयवैर्वाउपचि
ताःसमृद्धाआशिषोयासांताः॥१॥ रासक्रीडांरासोनामबहुनर्त्तकीयुक्तोनृत्यविशेषःतांक्रीडांअन्योन्यमाबद्धाःसंग्रथिताबाहवोयैस्तैःसह॥२॥

भा०द०पू० तस्या हित्वम जिन येन दर्शयति ॥ रासोत्सव इत्यत्र चतुष्ट्याधिकेन साद्धेन ॥ तासां मंडलरूपेणावस्थितानां द्वयो द्वयोर्मध्ये प्रविष्टेन ॥ तेनैव कंठे गृहीतानां ॥ अन्यत आ- व
१६ लिंगितानां ॥ कथं भूतेन यं सर्वाः स्त्रियः स्वस्वनिकटं मामेवाश्लिष्टवानिति मन्येरन् तेन ॥ एतदर्थं द्वयो द्वयोर्मध्ये प्रविष्टेनेत्यर्थः ॥ न त्वेकस्य कथं तथा प्रवेशः स-
र्वासां नि इतरत्र लोभात्कृतः स्वैकनिकटत्वाभिमानस्तासामित्यत उक्तं योगेश्वरेणेति अचिंत्यशक्तिनेत्यर्थः ॥ ३ ॥ तावत्तत्क्षणमेव ॥ औत्सुक्येनापहृतमनसां
सस्त्रीकाणां देवानां विमानशतैः संकीर्णं नभो बभूव ॥ ४ ॥ ५ ॥ सप्रियाणां कृष्णसहितानां तुमुलः संकीर्णः ॥ ६ ॥ महामरकतो नीलमणिर्विहैमानां मणीनां म

रासोत्सवः संप्रवृत्तो गोपीमंडलमंडितः ॥ योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ॥ प्रविष्टेन गृहीतानां कंठे स्वनिकटं स्त्रियः ॥ ३ ॥ द्वयोः
यं मन्येरन् नभस्तावद्विमानशतसंकुलं ॥ दिवौकसां सदाराणामौत्सुक्यापहृतात्मनां ॥ ४ ॥ ततो दुंदुभयो नेदुर्निपेतुः पुष्पवृष्ट-
यः ॥ जगुर्गंधर्वपतयः सस्त्रीकास्तद्यशोमलं ॥ ५ ॥ वलयानां नूपुराणां किंकिणीनां च योषितां ॥ सप्रियाणामभूच्छब्दस्तुमुलो रासमंडले ॥ ६ ॥ मुलो रास
तत्रातिशुशुभे ताभिर्भगवान् देवकीसुतः ॥ मध्ये मणीनां हैमानां महामरकतो यथा ॥ ७ ॥ पादन्यासैर्भुजविधुतिभिः सस्मितै-
र्भ्रूविलासैर्भज्यन्मध्यैश्चलकुचपटैः कुंडलैर्गंडलोलैः ॥ स्विद्यन्मुख्यः कबररशनाग्रंथयः कृष्णवध्वो गायंत्यस्तं तडित इव ता मे-
घचक्रे विरेजुः ॥ ८ ॥ ॥

ध्ये मध्ये ताभिः स्वर्णवर्णाभिराश्लिष्टाभिः शुशुभे गोपीद्वयमध्ये प्रायेणावाविनैवमध्यपदावृत्तिमेकवचनं ॥ ७ ॥ स यथा ताभिः शुशुभे ॥ त- रामः
था ता अपि तेन विरेजुरित्याह ॥ पादन्यासैरिति ॥ भुजविधुतिभिः करचलनैः भज्यमानैर्मध्यैः चलद्भिः कुचैश्च पटैश्च गंडलोलैः गंडेषु लोलैः ॥ स्विद्यन्मुख्यः स्विद्यंति स्वेदमु- १६
खानि यासां ताः ॥ कबरेषु रशनासु च ग्रंथयो यासां ताः ॥ यद्वा ॥ तेषु तासु च ग्रंथयः शिथिलग्रंथय इत्यर्थः ॥ तत्र नानामूर्तिः कृष्णो मेघचक्रमिव तास्तु बहुवि-
धास्तडित इव स्वेदस्तु धारा इव गीतं गर्जितमिव चेति यथासंख्यमूह्यं ॥ ८ ॥ ॥

स्फुरंति मु

नृत्यमाना: नृत्यंत्य: रक्तकंठ्य: नानारागैरनुरंजितकंठ्य: कृष्णस्याभिमर्शेन संस्पर्शेण मुदिता: ॥ इदं विश्वं ॥९॥ मुकुंदेन सह स्वरजाती: षड्जादिस्वरालापपृथगती:
अमिश्रिता: कृष्णोन्नीताभिरसंकीर्णा: प्रीयमाणेन संमानिता ॥ तत्तालसुल्लपनमेव ध्रुवं ध्रुवाख्यं तालविशेषं कृष्णेनोन्निन्ये उन्नीतवती ॥१०॥ एवं नृत्यगाता

उच्चैर्जगुर्नृत्यमाना रक्तकंठ्यो रतिप्रिया: ॥ कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतं ॥९॥ काचित्समं मुकुंदेन स्वरजातीरमिश्रि
ता: ॥ उन्निन्ये पूजिता तेन प्रीयता साधु साध्विति ॥१०॥ तदेव ध्रुवमुन्निन्ये तस्यै मानं च बह्वदात् ॥ काचिद्रासपरिश्रांता पा
र्श्वस्थस्य गदाभृत: ॥ जग्राह बाहुना स्कंधं श्लथद्वलयमल्लिका ॥११॥ तत्रैकांसगतं बाहुं कृष्णस्योत्पलसौरभं ॥ चंद
नालिप्तमाघ्राय हृष्टरोमा चुचुंब ह ॥१२॥ कस्याश्चिन्नाट्यविक्षिप्तकुंडलत्विषमंडितं ॥ गंडं गंडे संदधत्या अदात्तांबूल
गा२ चर्वितं ॥१३॥ नृत्यंती [illegible] यती काचित्कूजन्नूपुरमेखला ॥ पार्श्वस्थाच्युतहस्ताब्जं श्रांताधात्स्तनयो: शिवं ॥१४॥ गो
प्यो लब्ध्वाच्युतं कांतं श्रिय एकांतवल्लभं ॥ गृहीतकंठ्यस्तद्दोर्भ्यां गायंत्यस्तं विजह्रिरे ॥१५॥ दिना श्रीकृष्णेन संमानिता नांता सामतिप्रीति

विलसितं प्रत्याह ॥ काचिदिति । श्लथयंति वलयानि मल्लिकाश्च यस्या: सा ॥११॥ उत्पलस्य सौरभमिव सौरभं यस्य तं तं बाहुं ॥१२॥ नाट्येन नृत्येन विक्षिप्तयोश्चलयो
: त्विषा णत्विषा मंडितं गंडं कपोलं तथाच्युतस्य गंडे संदधत्या: संयोजयंत्या: ॥१३॥ कूजंतो नूपुराणि मेखला च यस्या: सा ॥१४॥ एवमन्या अपि गोप्यो यथा नानाविलासैर्विजह्रु यथा
रित्याह ॥ गोप्य इति ॥१५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्नाद्र्दकेषु गायकेषु च सत्स्वाकेषु गंधर्वकिंनरादिषु रसावेशेन मुख्येषु नृत्यत्सु चान्यामेव वाद्यादिसंपत्तिं दर्शयन् रासमंडलमभात् ॥ कर्णोत्पलेति ॥ कर्णोत्पलैश्च
अलकविटंकै रत्नकालंकृतैः कपोलैश्च घर्मैश्च वक्त्रेषु श्रीः शोभा यासां ताः घोषाः किंकिण्यः वलयनूपुरघोषैः वाद्यैर्वादित्रैः ॥ स्वकेशेभ्यः स्रस्ताः स्रजो यासां ताः ॥ एतेन
तालंगतिसंभ्रमः केशाः सशिरःकंपं पादेषु पुष्पवृष्टिमिवाकुर्वन्निसुखेष्टितं ॥ भगवतासह ननृतुः ॥ कान्तभ्रमरा एव गायका यस्यां रासरसनायां ॥२६॥ यथा गोप्यो ना
नाविधैर्भगवता सह विजह्रुः एवं भगवानपि स्वविलासैस्ताभिः सहरेमे रत्याह ॥ एवमिति ॥ तद्विलासानभिनयंस्तस्यैव रतौ दृष्टांतः ॥ यथार्भकरति ॥ स्वप्रतिबिंबैर्बि

कर्णोत्पलालकविटंककपोलघर्मवक्त्रश्रियो वलयनूपुरघोषवाद्यैः ॥ गोप्यः समं भगवता ननृतुः स्वकेशस्रस्तस्रजो भ्रमरगायकरासगो॰ स्त्र
ष्ठ्यां ॥२६॥ एवं परिष्वंगकराभिमर्शस्निग्धेक्षणोद्दामविलासहासैः ॥ रेमे रमेशो व्रजसुंदरीभिर्यथाऽर्भकः स्वप्रतिबिंबविभ्रमः ॥२७॥ त
दंगसंगप्रमुदाकुलेंद्रियाः केशान्दुकूलं कुचपट्टिकां वा ॥ नांजः प्रतिव्योढुमलं व्रजस्त्रियो विस्रस्तमालाभरणाः कुरूद्वह ॥२८॥ कृष्णविक्री
डितं वीक्ष्य मुमुहुः खेचरस्त्रियः ॥ कामोर्द्दिताः शशांकश्च सगणो विस्मितोऽभवत् ॥२९॥ ॥

भ्रमः क्रीडा यस्य स इव ॥ अनेनैतद्दर्शितं ॥ स्वीयमेव सर्व
कलाकौशलं सौगंध्यलावण्यमाधुर्यादि च तासु संचार्य ताभिः सह रेमे ॥ यथाऽर्भकः स्वप्रतिबिंबैरिति ॥२७॥ तास्तु भगवद्विलासैराकुला बभूवुरित्याह ॥ तदंगेति ॥ तस्यांगसंगेन प्र
हृष्टासुतस्मातिस्तया आकुलान्यव्यग्राणींद्रियाणि यासां ताः विस्रस्तबंधान् केशादीनंजसा प्रतिव्योढुं यथापूर्वं धर्तुं नालं न समर्था बभूवुः ॥ विस्रस्ता माला आभरणानि च या
सां ताः ॥२८॥ न केवलं ता एवाकुलेंद्रियाः किंतु देव्योऽपीत्याह ॥ कृष्णविक्रीडितमिति ॥ किंच शशांकश्चेति ॥ अनेनैतत्सूचितं ॥ शशांकेन विस्मितेन गतौ विस्मृतायां ततः प्रा
कृताः सर्वेऽपि ग्रहाः तत्र तत्रैव तस्थुः ततश्चातिदीर्घासु रात्रिषु यथासुखं विजह्रुः ॥२९॥ ॥ ॥ ॥॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचकृत्वेति॥अयंभावः॥कात्यायिनिमहामायेमहायोगिन्यधीश्वरि॥नंदगोपसुतंदेविपतिंमेकुरुतेनमः इतिप्रत्येकंताभिः प्रार्थनात्॥भगवतापियातावलानांतंमिह्यामयेमा
रंस्यथक्षपाः इतितथैवप्रतिश्रुतत्वाच्चतावंतमात्मानंकृत्वारेमेइति॥यावतीर्याबल्यः॥२०॥रूपातिशयमाह॥तासामिति॥२१॥ततोगवतिकृष्णनांगोपीनांचरितमा-
ह॥गोप्यइति॥स्फुरत्सांस्वर्णकुंडलानांचत्विषागंडेषुयास्त्रीस्तयासुधितेनअमृतायितेनहाससहितेननिरीक्षणेनचकृष्णस्यपत्युःकृष्णस्यमानंदधत्यःपूजां
कुर्वंत्यःतत्कर्माणिजगुः॥तस्यकररूहैर्नखैःस्पर्शेनप्रमोदोयासांताः॥२२॥अथजलकेलिमाह॥ताभिरिति॥तासामंगसंगेनघृष्टसंमर्दितायाःस्रक्

श्री कृत्वातावंतमात्मानंयावतीर्व्रजयोषितः॥रेमेसभगवांस्ताभिरात्मारामोपिलीलया॥२०॥तासामतिविहारेणश्रांतानांवदना
निसः॥प्रामृजत्करुणःप्रेम्णाशंतमेनांगपाणिना॥२१॥गोप्यःस्फुरत्पुरटकुंडलकुंतलत्विङ्गंडश्रियासुधितहासनिरीक्षणे
न॥मानंदधत्यऋषभस्यजगुःकृतानिपुण्यानितत्कररुहस्पर्शप्रमोदाः॥२२॥ताभिर्युतःश्रममपोहितुमंगसंगघृष्टस्रजः
सकुचकुंकुमरंजितायाः॥गंधर्वपालिभिरनुद्रुतआविशद्वाःश्रांतोगजीभि[illegible]रिभराडिवभिन्नसेतुः॥२३॥सोंभ
स्यलंयुवतिभिःपरिषिच्यमानःप्रेम्णेक्षितःप्रहसतीभिरितस्ततोंग॥वैमानिकैःकुसुमवर्षिभिरीड्यमानोरेमेस्वयंस्वरतिरात्र
गेंद्रलीलः॥२४॥ततश्चकृष्णोपवनेजलस्थलप्रसूनगंधानिलजुष्टदिक्तटे॥चचारभृंगप्रमदागणावृतोयथामदच्युतद्विर
दःकरेणुभिः॥२५॥

तस्याः अतएवतासांकुचकुंकुमेनरंजितायाःसंबंधिभिर्गंधर्वपालिभिः गंधर्वपाः गंधर्वपतयइवगायंतोयेऽलयःतैरनुद्रुत
ःअनुगतःसन्वाःउदकंआविशत्॥भिन्नसेतुःविदारितवप्रःस्वयंचातिक्रांतलोकवेदमर्यादः॥२३॥स्वरतिःआत्मारामोपि॥अत्रगोपीमंडलेअं
नस्तिवा॥२४॥स्थलजलक्रीडेदर्शितेवनक्रीडांदर्शयति॥ततश्चेति॥यमुनायाउपवनेजलस्थलप्रसूनानांगंधोयस्मिन्तेनानिलेनजुष्टानिदिशांत
टानिअंतरायस्मिन्॥यद्वा॥दिशश्चतटंस्थलंचयस्मिन्तस्मिन्वने॥भृंगाणांप्रमदानांचगणैरावृतः॥२५॥ ॥श्रीरामाकृष्णायनमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ पू॰
९८

रासक्रीडानिगमनं ॥ एवमिति ॥ सत्यकामः सत्यसंकल्पः अनुरागिस्त्रीकदंबस्थः एवं सर्वा निशाः सेवितवान् ॥ शरत्काव्यकथारसाश्रयाः शरदि भवाः काव्येषु
कथ्यमाना ये रसास्तेषामाश्रयभूता निशाः ॥ यद्वा ॥ निशा रतिर्द्वितीयाः संततसंयोगे । शृंगाररसाश्रयाः शरदि प्रसिद्धाः काव्येषु याः कथास्ताः सिषेवे इति ॥ एवम
प्यात्मन्येवावरुद्धः ॥ सौरतः चर्मधातुर्न तु स्खलितो यस्येति कामजयोक्तिः ॥ २६ ॥ २७ ॥ प्रतीपं प्रतिकूलं अधर्ममित्यर्थः ॥ आचरत् कृतवान् ॥ न चेदमधर्म ध
मात्रं कलंजभक्षणादिवत् किंतु महत्तमसाहसमित्याह ॥ परदाराभिमर्शनमिति ॥ २८ ॥ आप्तकामस्य नार्यैर्धर्मरतिश्चेत् ॥ यद्येवं कामाभावान्निंदितं केनाभि म

एवं शशांकांशुविराजिता निशाः स सत्यकामोऽनुरताबलागणः ॥ सिषेव आत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथा
रसाश्रयाः ॥ २६ ॥ राजोवाच ॥ ॥ संस्थापनाय धर्मस्य प्रशमायेतरस्य च ॥ अवतीर्णो हि भगवानंशेन जगदीश्वरः ॥ २७ ॥
कें स यं धर्मसेतूनां वक्ता कर्ताभिरक्षिता ॥ प्रतीपमाचरद्ब्रह्मन्परदाराभिमर्शनं ॥ २८ ॥ आप्तकामो यदुपतिः कृतवान्वै जु
गुप्सितं ॥ किमभिप्राय एतन्नः संशयं छिंधि सुव्रत ॥ २९ ॥ श्रीशुक उ० ॥ ॥ धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साह
सं ॥ तेजीयसां न दोषाय वह्नेः [illegible] सर्वभुजो यथा ॥ ३० ॥ नैतत्समाचरेज्जातु मनसापि ह्यनीश्वरः ॥ वि
नश्यत्याचरन्मौढ्याद्यथारुद्रोऽब्धिजं विषं ॥ ३१ ॥ ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित् ॥ तेषां यत्स्ववचोयुक्तं बुद्धिमांस्तत्स

प्रायेणाकृतवानिति पृच्छति ॥ आप्तकाम इति ॥ २९ ॥ परमेश्वरे कैमुत्यन्यायेन परिहर्तुं सामान्यतो महतां वृत्तमाह ॥ धर्मव्यतिक्रम माचरेत् ॥ ३२ ॥ राम:
रति ॥ साहसं च दृष्टं प्रजापतीन्द्रसोमविश्वामित्रादीनां ॥ तच्च तेषां तेजस्विनां दोषाय न भवतीति ॥ ३० ॥ तर्हि यद्यदाचरति श्रेष्ठः इति न्यायेनान्योपि कुर्यादि ९८
त्याशंक्याह ॥ नैतदिति अनीश्वरः देहादिपरतंत्रः ॥ यथारुद्रव्यतिरिक्तो विषमाचरन्नश्यत्येव ॥ ३१ ॥ कथं तर्हि सदाचारस्य प्रामाण्यं अत आह ॥ ईश्वराणा
मिति ॥ तेषां वचः सत्यं ॥ अतस्तदुक्तमाचरेदेव ॥ आचरितं तु क्वचित्सत्यं ॥ अतः स्ववचोयुक्तं तेषां वचसा यद्यद्युक्तं अविरुद्धमाचरितं तत्तदेवाचरेत् ॥ ३२ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं

ननु तर्हि तेपि किमेवं साधु समाचरंति तत्राह ॥ कुशलेति ॥ प्रारब्धकर्मक्षपणमात्रमेव तेषां लक्ष्यं नान्यदित्यर्थः ॥ ३३ ॥ प्रकृतमाह ॥ किमुतेति ॥ कुशलाकुशलान्वयो न विद्य कुशला
ते इति किं पुनर्वक्तव्यमित्यर्थः ॥ ३४ ॥ एतदेव स्फुटीकरोति यस्य पादपंकजपरागस्य निषेवणेन तृप्ताः ॥ यद्वा ॥ यस्य पादपंकजपरागे निषेवा येषां ते तथा ते च ते तृप्ताश्चेति
नद्धा इत्यर्थः ॥ तथाप्यात्मनि निष्ठाः ॥ न नह्यमानाः बंधनं न प्राप्नुवंतः ॥ ३५ ॥ परदारत्वं गोपीनामंगीकृत्य परिहृतं तदानीं भगवतः सर्वान्तर्यामिणः परदारसेवानामनवकाशः

कुशलाचरितेनैषामिह स्वार्थो न विद्यते ॥ विपर्ययेण वानर्थो निरहंकारिणां प्रभो ॥ ३३ ॥ किमुताखिलसत्वानां तिर्यङ्मर्त्यदिवौकसां ॥
कुशला ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः ॥ ३४ ॥ यत्पादपंकजपरागनिषेवतृप्ताः योगप्रभावविधुताखिलकर्मबंधाः ॥ स्वैरं चरंति मुनयो
पि न नह्यमानास्तस्येच्छयात्तवपुषः कुत एव बंधः ॥ ३५ ॥ गोपीनां तत्पतीनां च सर्वेषामेव देहिनां ॥ योंतश्चरति सोध्यक्षः क्रीडनेनेह देह
भाक् ॥ ३६ ॥ अनुग्रहाय भक्तानां मानुषं देहमास्थितः ॥ भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत् ॥ ३७ ॥ नासूयन् खलु कृष्णाय
नृ मोहितास्तस्य मायया ॥ मन्यमानाः स्वपार्श्वस्थान्स्वान्स्वान् दारान्व्रजौकसः ॥ ३८ ॥ ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिताः ॥
अनिच्छंत्यो ययुर्गोप्यः स्वगृहान्भगवत्प्रियाः ॥ ३९ ॥ ॥ श्रीरामाय नमः ॥ ॥ चेदित्याह ॥ गोपीनामिति ॥ योंतश्चरत्यध्यक्षो

बुध्यादिसाक्षी स एव क्रीडनेन देहभाक् ॥ ननु अस्मदादिवल्पः येन दोषः स्यादिति ॥ ३६ ॥ नन्वेवं चेत् आप्तकामस्य निंदिते कुतः प्रवृत्तिरित्यत आह ॥ अनुग्रहा
येति ॥ शृंगाररसेनाकृष्टचेतसोऽतिबहिर्मुखानपि स्वपरान्कर्तुमिति भावः ॥ ३७ ॥ नन्वन्येपि भिन्नाचाराः स्वचेष्टितमेवं मन्येवेति वदंति तत्राह ॥ ना
सूयन्निति ॥ एवंभूते स्वमायावैभवतया कुर्वतः पापाशंकेयेति भावः ॥ ३८ ॥ ब्रह्मरात्रे ब्राह्मे मुहूर्ते उपावृत्ते प्राप्ते ॥ ३९ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवतः कामबाणरूपरासक्रीडाश्रवणादेः कामविजयफलमाह ॥ विक्रीडितमिति ॥ चिरेण धीरः सन् रुद्रोगं कामं आशु अपहिनोति परित्यजतीत्यर्थः ॥ ४० ॥ से ति
[illegible]परमानंदसंविश्राधरनिर्मिता ॥ श्रीभागवतभावार्थदीपिका दशमाश्रया ॥ १ ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे टीकायां त्रयस्त्रिंशोऽ
ध्यायः ॥ ३३ ॥ चतुस्त्रिंशे अहिनाग्रस्तं नंदं हरिरमूमुचत् ॥ विद्याधरं चागिरःशापात् शंखचूडं तथावधीत् ॥ १ ॥ रासात्परं ततः कामं किंकरिलं तं काम स

विक्रीडितं व्रजवधूभिरिदं च विष्णोः श्रद्धान्वितोऽनुशृणुयादथ वर्णयेद्यः ॥ भक्तिं परां भगवति प्रतिलभ्य कामं हृद्रोगमाश्वपहिनो-
त्यचिरेण धीरः ॥ ४० ॥ ॥ इति श्रीभागवते दशमस्कंधे त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ शुक उ० ॥ ॥ एकदा देवयात्रायां गोपाला जातकौतु- यात्रा
काः ॥ अनोभिरनडुद्युक्तैः प्रययुस्तेंऽबिकावनं ॥ १ ॥ तत्र स्नात्वा सरस्वत्यां देवं पशुपतिं विभुं ॥ आनर्चुरर्हणैर्भक्त्या देवीं च नृपतेंऽबिकां
॥ २ ॥ गावो हिरण्यं वासांसि मधु मध्वन्नमादृताः ॥ ब्राह्मणेभ्यो ददुः सर्वे देवो नः प्रीयतामिति ॥ ३ ॥ ऊषुः सरस्वतीतीरे जलं प्राश्य धृतव्र-
ताः रजनीं तां महाभागा नंदसुनंदकादयः ॥ ४ ॥ कश्चिन्महानहिस्तस्मिन्विपिनेऽतिबुभुक्षितः ॥ यदृच्छयागतो नंदं शयानमुरगो ग्र-
कृष्ण सात् ॥ ५ ॥ स चुक्रोशाहिना ग्रस्तः कृष्ण कृष्ण महानयं ॥ सर्पो मां ग्रसते तात प्रपन्नं परिमोचय ॥ ६ ॥ तस्य चाक्रंदितं श्रुत्वा गोपालाः सह- तं
सोत्थिताः ॥ ग्रस्तं च दृष्ट्वा संभ्रांताः सर्पं विव्यधुरुल्मुकैः ॥ ७ ॥ अलातैर्दह्यमानोऽपि नामुंचत्तमुरंगमः ॥ तमस्पृशत्पदाभ्येत्य भगवान्सात्वतां तै
दः ॥ अनुग्रहं च तं निरूपयति विद्याधराधिपं ॥ तदेवं कामानुग्रहवशेन कामजयं प्रतिपादयतैव विद्याधरजयं प्रतिपादितं तत्प्रसंगं दर्शयति ॥ एकदेति ॥ पंतिः ॥ ४ ॥ रामः
॥ २ ॥ गावः गाः मधुमधुरं मध्वन्नं मधुनासहितमन्नं ॥ ३ ॥ जलमात्रं प्राश्य उपोषिताः तां निशां तत्र ऊषुर्न्यवसन् ॥ ४ ॥ महानहिरजगरः अगः उरसा गच्छन्निति लक्षितं सु- ११
कं भाग्यसौभाग्यं ॥ ५ ॥ ६ ॥ विव्यधुस्ताडयामासुः उल्मुकैः ज्वलत्काष्ठैः अलातैस्तैरेव ॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विद्याधरैरर्चितं पूजितं ॥९॥ गोपेष्वात्मन ऐश्वर्यं प्रकाशयितुमविद्वानिव तमपृच्छत् ॥१०॥ दीप्यमानेन वपुषा समवस्थितं ॥११॥ यः परयाश्रोभया प्रकाशते स भवान्कः रति ११

स वै भगवतः श्रीमान् पादस्पर्शहताशुभः ॥ भेजे सर्पवपुर्हित्वा रूपं विद्याधरार्चितं ॥९॥ तमपृच्छद्धृषीकेशः प्रणतं समवस्थितं ॥ दीप्य

मानेन वपुषा पुरुषं हेममालिनं ॥१०॥ को भवान्परया लक्ष्म्या रोचतेऽद्भुतदर्शनः ॥ कथं जुगुप्सितामेतां गतिं वा प्रा[पि]तोऽवशः ॥११ पि

॥ सर्प उवाच ॥ ॥ अहं विद्याधरः कश्चित्सुदर्शन इति श्रुतः ॥ श्रिया स्वरूपसंपत्त्या विमानेनचरन्दिशः ॥१२॥ ऋषीन्विरूपानंगिरस

ः प्राहसं रूपदर्पितः ॥ तैरिमां प्रापितो योनिं प्रलब्धैः स्वेन पाप्मना ॥१३॥ शापो मेऽनुग्रहायैव कृतस्तैः करुणात्मभिः ॥ यदहं लोक

गुरुणा पदा स्पृष्टो हताशुभः ॥१४॥ तं त्वाहं भवभीतानां प्रपन्नानां भयापहं ॥ आपृच्छे शापनिर्मुक्तः पादस्पर्शादमीवहन् ॥१५

॥ प्रपन्नोऽस्मि महायोगिन्महापुरुष सत्पते ॥ अनुजानीहि मां देव सर्वलोकेश्वरेश्वर ॥१६॥ ब्रह्मदंडाद्विमुक्तोऽहं सद्यस्तेऽच्यु

ला तद्दर्शनात् ॥ यन्नाम गृह्णन्नखिलान् श्रोतॄनात्मानमेव च ॥ सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते ॥१७॥ इत्यनुज्ञाप्य दाशार्हं

परिक्रम्याभिवंद्य च ॥ सुदर्शनो दिवं यातः कृच्छ्रान्नंदश्च मोचितः ॥१८॥ निशाम्य कृष्णस्य तदात्मवैभवं व्रजौकसो विस्मितचेतसस्त

तः ॥ समाप्य तस्मिन्नियमं पुनर्व्रजं नृपाययुस्तत्कथयंत आदृताः ॥१९॥ ॥ ॥१२॥ प्राहसं उपहसितवानस्मि ॥ प्रलब्धैः उपहसितैः ॥

महायैवेन पापेन निमित्तेन ॥१३॥ यत् यतः शापात् ॥१४॥ आपृच्छे संलोकं गंतुं अनुज्ञां याचे ॥ अमीवहन् दुःखनाशन ॥१५॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० पू०
१००

अलिदेहं नि[illegible]यागुन्मत्तसुदर्शनं ॥ तदद्भुमादिनं तल्लः शंखचूडमताउयत् ॥ ३१ ॥ तत्प्रसंगमाह ॥ कदाचिदिति ॥ २० ॥ विरजोंबरावित्ति ॥ विरजसी निर्मले अंबरे ययो
[illegible] ॥ २१ ॥ किंच ॥ निशाप्रवेशं सत्कुर्वंतौ ॥ उदित उडुपस्तारकाश्च यस्मिन् तत् ॥ मल्लिकागंधेन मत्ता अलयो यस्मिन् तत् ॥ २२ ॥ अनिबद्धत्वादन्यैर्युगपत्कल्पयित्वम

॥ कदाचिदथ गोविंदो रामश्चाद्भुतविक्रमः ॥ विजह्रतुर्वने रात्र्यां मध्यगौ व्रजयोषितां ॥ २० ॥ उपगीयमानौ ललितं स्त्रीजनैर्बद्धसौहृदैः ॥ स्वलंकृतानुलिप्तांगौ स्रग्विणौ विरजोंबरौ ॥ २१ ॥ निशामुखं मानयंताबुदितोडुपतारकं ॥ मल्लिकागंधमत्तालिजुष्टं कुमुदवायुना ॥ २२ ॥ जगतुः सर्वभूतानां मनःश्रवणमंगलं ॥ तौ कल्पयंतौ युगपत् स्वरमंडलमूर्छितं ॥ २३ ॥ गोप्यस्तद्गीतमाकर्ण्य मूर्छिता नाविदन्नृप ॥ स्रंसद्दुकूलमात्मानं स्रस्तकेशस्रजं ततः ॥ २४ ॥ एवं विक्रीडतोः स्वैरं गायतोः संप्रमत्तवत् ॥ शंखचूड इति ख्यातो धनदानुचरोऽभ्यगात् ॥ २५ ॥ तयोर्निरीक्षतो राजंस्तन्नाथं प्रमदाजनं ॥ क्रोशंतं कालयामास दिश्युदीच्यामशंकितः ॥ २६ ॥ क्रोशंतं कृष्ण रामेति विलोक्य स्वपरिग्रहं ॥ यथा गा दस्युना ग्रस्ता भ्रातरावन्वधावतां ॥ २७ ॥ मा भैष्टेत्यभयारावौ [illegible] शालहस्तौ तरस्विनौ ॥ आसेदतुस्तं तरसा त्वरितं गुह्यकाधमं ॥ २८ ॥ द

॥॥॥ शक्यमपि तौ स्वरमंडलमूर्छितं युगपत्कल्पयंतौ ॥ मनः श्रवणयोर्मंगलं यथा भवति तथा जगतुः अगायतामिति ॥ २३ ॥ मूर्छिताः तद्गीतलालननिचित्ताः ॥ स्रंसत्स्रस्तपतद्दुकूलं यस्मात्तमात्मानं देहं ॥ स्रस्ताः केशेभ्यः स्रजो यस्य तं च ततो नाविदन् ॥ २४ ॥ २५ ॥ निरीक्षितोर्निरीक्षमाणयोः ॥ तौ नाथौ यस्य तं कालयामास इवाग्रेऽरयामास ॥ २६ ॥ दस्युना व्याघ्रेण ॥ २७ ॥ मा भैष्टेत्यभयं मा मा भूत् इत्यभयवाचौ ॥ २८ ॥॥

रामः
१००

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३०॥शिरसासहचूडामणिंजहारेत्यर्थः॥३१॥३२॥ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांचतुस्त्रिंशोध्यायः॥३४॥पंचत्रिंशेवनंयातेकृष्णेगोकुलयोषितः॥युग्म
श्लोकैरनुगायंतेननिन्युर्दुःखेनवासरान्॥१॥एवंरात्रिषुकृष्णेनस्वैरंअभिरमितानांदिवातद्विरहितानामनुगानेनदिननिर्गमप्रकारमाह॥गोप्यइति॥दुःखेनकृच्छ्रे
ण॥वामबाहुकृतवामकपोलइत्यादिनिशादशयुगलानीति॥२॥हेगोप्यः वामेबाहौतन्मूलेकृतअर्पितोवामकपोलोयेनसः॥वलितेनर्तितेभ्रुवौयेनसवलि

सवीक्ष्यतावनुप्राप्तौकालमृत्यूइवोद्विजन्॥विसृज्यस्त्रीजनंमूढःप्राद्रवज्जीवितेच्छया॥२९॥तमन्वधावद्गोविंदोयत्रयत्रसधाव
ति॥जिहीर्षुस्तच्छिरोरत्नंतस्थौरक्षन्स्त्रियोबलः॥३०॥अविदूरइवाभ्येत्यशिरस्तस्यदुरात्मनः॥जहारमुष्टिनैवांगसहचूडाम
णिंविभुः॥३१॥शंखचूडंनिहत्यैवंमणिमादायभास्वरं॥अग्रजायाददात्प्रीत्यापश्यंतीनांचयोषितां॥३२॥ ॥इतिश्रीभा
गवतेपुराणेदशमस्कंधेचतुस्त्रिंशोध्यायः॥३४॥श्रीशुकउ०॥ ॥गोप्यःकृष्णेवनंयातेत[illegible]मनुद्रुतचेतसः॥कृष्णलीलाःप्रगा ला:
यंत्योनिन्युर्दुःखेनवासरान्॥१॥गोप्यऊचुः॥ ॥वामबाहुकृतवामकपोलोवल्गितभ्रुरधरार्पितवेणुं॥कोमलांगुलिभि
राश्रितमार्गंगोप्यईरयतियत्रमुकुंदः॥२॥व्योमयानवनिताःसहसिद्धैर्विस्मितास्तदुपधार्यसलज्जाः॥काममार्गणसमर्पितचि
त्ताःकश्मलंययुरपस्मृतनीव्यः॥३॥ ॥
कुं तल्पः॥मुंदः अधरेअर्पितंवेणुंकोमलाभिरांगुलिभिराश्रितामार्गाःसप्तस्वरच्छिद्राणियस्यतं॥यत्रयदाईरयतिवादयति॥२॥तत्
व्योमयानानांविमानानांवनिताःसिद्धैःस्वपतिभिःसहवर्तमानाअपितद्वेणुरवमुपधार्यआकर्ण्यप्रथमंविस्मिताः॥ततःकाममार्गणेनस्मरेणसमर्पितानिचित्तानिया
भिस्ताःतत्परवशाइत्यर्थः॥सलज्जाःसत्यःकश्मलंमोहंययुः॥अत्रलिंगं॥अपस्मृताविस्मृतानीव्योयाभिरिति॥अतएवंनृत्यत्कृष्णस्यविरहंकथंसहामहेइति
सर्वत्रवाक्यशेषः॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हंत हे अबला[illegible]दं चित्रं शृणुत ॥ हारहासः हारवद्विशदो हासो यस्य सः ॥ यद्वा ॥ वेणुवादेनाधीव स्वनेन रमतः ॥ हारेषु स्फुरन् हासो यस्य ॥ हारवद्धावल्लसितो नमा
नो हासो यस्य सः ॥ यद्वा हाराणां हासः स्वविशदास्फूर्तिर्यस्मिन्नुरसीति ॥ उरसि स्थिरा विद्युदिव लक्ष्मीर्यस्य सः ॥ यर्हि यदा कूजितवेणुः नादितवेणुर्भवति ॥ ३ ॥ तत
दा व्रजे ये पशवः मृगा गावश्च वेणुवाद्येन हृतानि चेतांसि येषां ते आराद्दूरादेव दंतैर्दष्टाः कवलास्तृणग्रासाः यैः ते धृता उत्तंभिताः कर्णाः यैस्ते निद्रिताः स्वलिखितचित्रमि
वासन् अविदूषांतिरश्चामिदमिति चित्रमित्यर्थः ॥ ४ ॥ किंच ॥ अचेतनानामपि स्मरत सुतरां तावच्चित्रमाहुः ॥ हे आलि सखि बर्हिणो मयूरस्य स्तबका मयूरपिच्छाः

हंत चित्रमबलाः शृणुतेदं हारहास उरसि स्थिरविद्युत् ॥ नंदसूनुरयमार्तजनानां नर्मदो यर्हि कूजितवेणुः ॥ ३ ॥ वृंदशो व्र
जवृषा मृगगावो वेणुवाद्यहृतचेतस आरात् ॥ दंतदष्टकवला धृतकर्णा निद्रिता लिखितचित्रमिवासन् ॥ ४ ॥ बर्हिणः
स्तबकधातुपलाशैर्बद्धमल्लपरिबर्हविडंबः ॥ कर्हिचित्सबल आलि सगोपैर्गाः समाह्वयति यत्र मुकुंदः ॥ ५ ॥ तर्हि भग्न
गतयः सरितो वै तत्पदांबुजरजोऽनिलनीतं ॥ स्पृहयतीर्वयमिवाबहुपुण्याः प्रेमवेपितभुजाः स्तिमितापः ॥ ६ ॥ ॥ ॥

धातवो गैरिकादयः पलाशानि पल्लवाश्च तैर्बद्धश्चासौ मल्लानां परिबर्हः परिकरस्तं विडंबयति ॥ अनुकरोतीति तथा स मुकुंदो गोपैः सह वेणुनेत्युपरितनं अ
त्रापि ज्ञातव्यं ॥ यत्र यदा गाः समाह्वयति ॥ ५ ॥ तर्हि तदा तत् ध्वनिश्रवणादनिलेनानीतं तस्य पादांबुजरजः स्पृहयंत्यः [illegible] भग्नगतयः सरितः वै निश्चितं ॥ व
यमिव ताः अपि बहुपुण्याः यतो न प्राप्नुवंति ॥ केवलं प्रेम्णा वेपिताः कंपिता भुजास्तरंगा यासां ताः ॥ स्तिमिता निश्चला आपो यासां ताः ॥ गोप्योऽपि लोचनयोः स्तिमितिमित
५१
जला भवंतीति ॥ ६ ॥ ॥ श्रीरामः ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० द० पू०
१०२

ति २

मेघोपरि रसिवतरत्याहुः॥सउबलइति॥त्वोव्रजदेव्योगोप्यः सउबलः सरामः लक्षः॥स्वगिनिर्मितास्यामवतंसाभ्यांकर्णभूषणाभ्यांविलासोयस्य॥यद्वा॥सु
कोफलमूत्रगापाउेनविलासेोयस्येति॥चिनितः सानुषुगिरेस्तटेषुवर्त्तमानः॥स्वयंजातहर्षोविश्वंउर्षयन्यदावेणुरवेणोपरंनतिनिनादयतिर्नोपूरयतीत्यर्थः॥११
तदामेघः मउतः श्रोत्रलङ्घस्यातिक्रमणेशंकितचेतोयस्यसः॥ नपुनरुपरितोयातिनचोच्चैर्गर्जतिकिंत्वतत्रैवस्थितः सन्वेणुरवंअनुमंदंगर्जति॥किंच॥सु
रुदंविश्वार्तिहरणादिसाम्यात्सुरुतल्लस्तंसुमनोभिरभ्यवर्षत॥अदृश्यैर्देवैः क्रियमाणंकुसुमवर्षंमेघेकल्पयित्वोक्तं॥तुषारोवाकुसुमतयाकल्पि
सउबलःस्रगवतंसविलासःसानुषुत्तिितिन्नतोव्रजदेव्यः॥हर्षयन्यर्हि वेणुरवेणजातहर्षउपरंनतिविश्वं॥११॥ मउदति
क्रमणशंकितचेतामंदमंदमनुगर्जतिमेघः॥सुरुदमभ्यवर्षसुमनोभिश्छायायाचविदधत्प्रतपत्रम्॥१२॥ विविधगोप
चरणेषुविदग्धोवेणुवाद्यउरुधानिजशिक्षाः॥तवसुतः सतियदाधरबिंबेदत्तवेणुरनयत्स्वरजातीः॥१३॥सवनशस्तद
पधार्यसुरेशाःशक्रशर्वपरमेष्ठिपुरोगाः॥कवयआनतकंधरचित्ताःकश्मलंययुरनिश्चिततत्वाः॥१४॥ ॥ ॥
तःसएववादेवतारूपोभ्यवर्षदिति॥प्रतपाद्यातपात्त्रायतेतिमितपत्रंतच्छाययाकर्वन्निति॥१२॥अपिचमहदेतदाश्चर्यमित्याहुः॥विविधेति॥हे
सतियशोदेतवसुतोनानागोपक्रीडासुविदग्धोनिपुणःवेणुवाद्येविषयेनिजैवशिक्षायासुताःस्वोत्प्रेक्षिताःनत्वन्यतःकृता इत्यर्थः॥स्वरजातीनिषादर्ष
भादिस्वरालापस्येदान्अनयत्उन्नीतवान्॥१३॥ततस्ताःस्वरजातीः॥सवनशःमंद्रमध्यमतारभेदेन॥यतोगातधनिरागतःतत आनताकंधरायैः
तःतत आनतकंधराचित्तंचयेषांते॥उपधार्यसम्यगाकर्ण्यकवयःकोविदाअपिते॥तनिश्चितंवतत्वंतत्वंतद्भेदोयैस्तेकश्मलंमोहंययुरिति॥१४॥ ॥ ॥

दं०

राम०
१०२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थावरेषु पा[illegible] चिह्नं दद्युपतरस्त्याहुः ॥ अनुचरैर्गोपैर्वादिभिर्वा ॥ मुग्धानां वाक्यं आदिपुरुष इवेति ॥ अचलभूतिः निश्चलश्रीः वेणुना तत्रस्थागानेन ॥ ७
॥ तद्भरप्रणतभारेण विटपाः शाखा यासां ता वनगता लताः ॥ स्वस्मिन् विष्णुं प्रकाशमानं सूचयंत्य इव मधुधाराः ववृषुः ॥ स्मेति विस्मये ॥ तरवश्च तथा तत्स्थ-
तीनामपि तथैवानंद इति भावः ॥ एतानि विष्णुव्यक्तिलक्षणानि ॥ ८ ॥ किंच सरसि कमलवनेषु विहरंतां पक्षिणामपि मन आकर्षणं तद्गीतं किंपुनर

अनुचरैः समनुवर्णितवीर्य आदिपुरुष इवाचलभूतिः ॥ वनचरो गिरितटेषु चरंतीर्वेणुनाह्वयति गाः स यदा हि ॥ ७ ॥ वन-
लतास्तरव आत्मनि विष्णुं व्यंजयंत्य इव पुष्पफलाढ्याः ॥ प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः ससृजुः स्म ॥ ८ ॥
दर्शनीयतिलको वनमालादिव्यगंधतुलसीमधुमत्तैः ॥ अलिकुलैरलघु गीतमभीष्टमाद्रियन् यर्हि संधितवेणुः ॥ ९ ॥
सरसि सारसहंसविहंगाश्चारुगीतहृतचेतस एत्य ॥ हरिमुपासत ते यतचित्ता हंत मीलितदृशो धृतमौनाः ॥ १० ॥ ॥

त्येषामित्याहुः ॥ दर्शनीयतिलक इति ॥ दर्शनीयस्तिलको यस्य दर्शनीयानां सुंदराणां मध्ये मुख्य इति वा ॥ वनमालायां या दिव्यगंधा तुलसी तस्याः मधुना म-
त्तैरलिकुलैरलघु उच्चैरभीष्टमनुकूलं गीतं ॥ आद्रियन् आदरेण गृह्णन् यर्हि अधरे संधितवेणुर्भवति ॥ ९ ॥ तर्हि ये सरसि सारसा हंसाः ॥ अन्ये च विहं-
गाः चारुणा गीतेन हृतचेतस एत्य तत आगत्य हरिं उपासत अभजंत ते तत्समीपे उपविविक्षुर्वा ॥ हंतेति विषादे ॥ १० ॥ ॥ श्रीरामचंद्राय नमः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्माकंत्वमीदृशं किंब्रूमस्स्वस्थाः ॥ निजपदाब्जदलैरिति ॥ ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषां तैर्निजानि पदान्येवाब्जदलानि तैर्व्रजभुवः खुरतोदं
य खुरोत्क्रमणव्यथां शमयन् ॥ वर्ष्मणा धुर्यो गजस्तद्वद्गतिर्यस्य स कल्पो वादितवेणुः सन्यव्रजति ॥ १५ ॥ तेन निमित्तेन सविलाससवीक्षणे नार्पितो मनोभववेगो या
सुताः वयं कुजा द्रुमास्तेषां गतिं गमिताः स्तम्भं मोहेन न विदामः कबरं वा वसनं वेति ॥ १६ ॥ किंच ॥ मणिधरः मणीन्ग्रथितान्गोगणनार्थं धरता

तिन्नपदाम्बुदलैर्ध्वजवज्रनीरजाङ्कुशविचित्रललामैः ॥ व्रजभुवः शमयन्खुरतोदं वर्ष्मधुर्यगतिरीरितवेणुः ॥ १५ ॥ व्रजति
तेन वयं सविलासवीक्षणार्पितमनोभववेगाः ॥ कुजगतिं गमिता न विदामः कश्मलेन कबरं वसनं वा ॥ १६ ॥ मणिधरः क्वचि
दागणयन्गा मालया दयितगंधतुलस्याः ॥ प्रणयिनोनुचरस्य कदांसे प्रक्षिपन्भुजमगायत यत्र ॥ १७ ॥ क्वणितवेणुरव
वंचितचित्ताः कृष्णमन्वसत कृष्णगृहिण्यः ॥ गुणगणार्णमनुगत्य हरिण्यो गोपिका इव विमुक्तगृहाशाः ॥ १८ ॥ ॥ ॥

तिमणिधरः क्वचिद्दिव्यैर्मणिभिरासमं ताः गाः गणयन् ॥ तथा दयितगंधायास्तुलस्यास्तस्या मालया सह वर्तमानः प्रणयितः प्रियस्यानुचरस्यांसे भुजं प्रक्षिपन्
यत्र यदा कदाचिदगायत ॥ १७ ॥ तदा क्वणितवेणुरवेण वंचितान्यपहृतानि चित्तानि यासां ताः कृष्णस्य हरिणस्य गृहिण्यः एणीनार्यः गुणगणसमुद्रं कृष्णमनुगत्य प्राप्य
ताः कृष्णमेव [illegible] अन्वासत तेनन्यवर्तत इत्यर्थः ॥ कुतः यतो विमुक्ता गृहाशाः याभिस्ताः ॥ गोपिका इव ता अपि दृश्ये वमे वान्वासतेति ॥ १८ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० द० टी० पू० तदेवं नंदात्मजः शिशुक्रीडितासार्यांकृगोधनानिपरावृत्य यमुनायां क्रीडतस्तस्य सौभाग्यमनुवर्णयंति ॥ ॐ ददामल्लतकौतुकवेषरतिगोपीनामुत्सवाय कृं ददामभि ना
१०३ :स्तंत कौतुकनोत्सवेनवेषो लंकारो येन सः ॥ हे अनघे यशोदे ॥ तव वत्सः पुत्रः नंदसूनुः लाल्यः ॥ यद्वा सदैव बलः ॥ कथयंत्यः काश्चित्तव वत्सः रतिकाश्चिन्नंदसूनुरिति चाहुः
॥ नर्मदः हर्षदः सत्वयद्याविजहारक्रीडतिस्म ॥ १९ ॥ तदा मलयजस्पर्शेन मलयजस्य चंदनस्येव सुरभिः शीतश्च यः स्पर्शः तेन तं लब्धंमानयन्ननुकूलं यथा तथोपवा
तिवानयति ॥ यद्वा मलयजो दक्षिणो वायुः ॥ यद्वा मलयजस्य कलभेन स्वांगे नु लिप्तस्पर्शेन मानयन्निति ॥ किंच ॥ बंदिनः इव स्तावकाः संतः गंधर्वादिगणा वाद्य

ॐ ददामल्लतकौतुकवेषो गोपगोधनवृतो यमुनायां ॥ नंदसूनुरनघे तव वत्सो नर्मदः प्रणयिनां विजहार ॥ १९ ॥ मंदवायुरुप
वात्यनुकूलं मानयन्मलयज स्पर्शेन ॥ बंदिनस्तमुपदेवगणा ये वाद्यगीतबलिभिः परिवव्रुः ॥ २० ॥ वत्सलो व्रजगवां यदग
ध्रो वंद्यमानचरणः पथि वृद्धैः ॥ कृत्स्नगोधनमुपोह्य दिनांते गीतवेणुरनुगेडितकीर्तिः ॥ २१ ॥ उत्सवं श्रमरुचापि दृशीनामु
न्नयन्खुररजश्छुरितस्रक् ॥ दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः ॥ २२ ॥ ॥ श्रीरामाकृष्णायनमः ॥ ॥

गीतपुष्पवर्षादिभिः परिवव्रुः परित उपासत ॥ २० ॥ आयांतमालोक्य रूष्यंत्यः परस्परमूचुः ॥ वत्सल इति ॥ व्रजस्य गवां च ॥ यद्वा व्रजे निवसतां गवां अनुकंप्या नाम
स्माकमित्यर्थः ॥ वत्सलो हितकृत् ॥ कुतः यद्यस्माद्गध्रः अगं धरतीति गोवर्द्धनोद्धरणः ॥ बहुशो रक्षणपास्योपलक्षणमेतत् ॥ वृद्धैर्ब्रह्मादिभिः ॥ पथीति वंद्यमानचरणः र रामः
तिर्चेतसा यं श्रीग्रामागंतुं नंदत्तात्यर्थः ॥ उपोह्य एकीकृत्य ॥ गीतयुक्तो वेणुर्यस्य सः ॥ २१ ॥ श्रमयुक्तयापि कांत्या नेत्राणां हर्षं उन्नयन्नुच्चैः प्रापयन् खुररजोभिः ॥ २ १०३
छुरिता व्याप्ता स्रक् यस्य ॥ सुहृदामस्माकं आशिषो मनोरथस्य दित्सया दातुमिच्छया ॥ देवकीजठरे भवतीति तथा ॥ स एवोडुराजश्चंद्रः निर्वृत्तिहेतुत्वेन स एष
एतीति ॥ २२ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतिसंभ्रमेण काश्चित्समीपमायांतं वकर्थयंति ॥ ईषन्मदेन विघूर्णिते विदलिते लोचने यस्य सः ॥ बदरपांडुवदनः ईषत्पक्वबदरवत्पांडुरं वदनं यस्य सः ॥ अत्र हेतुः कनककुंडलयो
र्लक्ष्म्या कांत्या मृदुकोमलौ गंडौ यस्मिंस्तद्वदनं मंडयन् ॥ कोमलं गंडस्थलं वाशोभयन्निति ॥ २३ ॥ यदुपतिर्देवकीनंदनरूरिति च प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मज इत्यादि
गर्गवाक्यप्रसिद्ध्योक्तं ॥ यद्वा सरस्वत्युदेयिवान्स्नात्ववांकुले इति च सात्वाकाश्चिद्दृंतातिशोत्साह्यगजेंद्रगति श्चंद्रद्रवप्रसन्नवक्त्रो व्रजगवामस्माकमनं तद्दिनतापं च शमयन्नु
पयाति ॥ एष समीपमायातीति ॥ २४ ॥ एवं विरहदुःखेनापि तु अहोरूपलीलाराववगायंसः ॥ तस्मिन्चित्तं चेतनाजीवितं यासां ताः ॥ तस्मिन्नेव मनः संकल्परूपं

मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदां वनमाली ॥ बदरपांडुवदनो मृदुगंडं मंडयन्कनककुंडललक्ष्म्या ॥ २३ ॥ यदुपतिर्द्विरद
राजविहारो यामिनीपतिरिवैष दिनांते ॥ मुदितवक्त्र उपयाति दुरंतं मोचयन्व्रजगवां दिनतापं ॥ २४ ॥ श्रीशुक उ० ॥ ॥ एवं
व्रजस्त्रियो राजन्कृष्णलीला[illegible]नुगायतीः ॥ रेमिरे ऽहःसु तच्चित्तास्तन्मनस्का महोदयाः ॥ २५ ॥ ॥ इति श्रीभागवते महापु
राणे दशमस्कंधे वृंदावनक्रीडायां गोपीकागीतं नाम पंचत्रिंशोऽध्यायः ॥ ३५ ॥ श्रीशुक उ० ॥ ॥ अथ तर्ह्यागतो गोष्ठमरि
ष्टो वृषभासुरः ॥ महीं महाककुत्कायः कंपयन्खुरविक्षतां ॥ १ ॥ ॥ ॥

यासां ताः ॥ अतो महानुदय उत्सवो यासां ताः ॥ अथवा महानुदय उत्सवो यासां ताः ॥ अहःसु अपि रेमिरे ॥ २५ ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे टीका
यां पंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ षट्त्रिंशे निहिते रिष्टे नारदोक्त्या बलाच्युतौ ॥ वधैतौ ज्ञात्वा कंसोऽक्रूरमथादिशत् ॥ १ ॥ गोपीरासांतरायातं रासक्रीडनिहस
सः ॥ अ[illegible]नंदाम्हदुष्टमरिष्टकं ॥ एवं देवगंधर्वादिगानन्त्यवाद्यकुसुमवर्षादिभिः कृष्णं प्राप्य दष्टव्रजस्य परमोत्सवे वर्त्तमाने तदिरुद्धार्थांतरा
धिकारार्थमथ[illegible] ॥ तर्हि तदा वृषभाकृतिरसुरः ॥ तं वर्णयति सार्द्धत्रयेण ॥ महांतौ ककुत्कायौ यस्य सः ॥ खुरैर्विदारितां महीं कंपयन् ॥ १ ॥ ॥ ॥ देवसु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० पू०
१०४

रंहमाणः ख[…]षंदं कुर्वन् ॥ विलिखन् विदारयन् ॥ उद्यम्य ऊर्ध्वं कृत्वा ॥ वप्राणि तटानि उत्क्षिपन् ॥२॥ किंचित्किंचिच्छकृत्मध्रेम ध्येरषदोषत्सुराषं मुंचन् ॥ त
याभून्मुस्त[…]स्तब्धलोचनः अनिमिषलोचनः ॥ यस्य ध्वनिना गवां नारीणां च ॥ तत्र आचतुर्थाद्वै स्त्रावः पातः पंचमषष्ठ्योः ॥ अतऊर्ध्वं प्रसूतिः स्यादिति विनागः ॥३॥

रंहमाणः खरतरं पदा च विलिखन् महीं ॥ उद्यम्य पुच्छं वप्राणि विषाणाग्रेण चोद्धरन् ॥२॥ किंचित्किंचिच्छकृन्मुंचन्मूत्रयन् स्तब्धलोचनः ॥ यस्य नि च
र्ह्रादितेनांग निष्ठुरेण गवां नृणां ॥ पतंत्यकालतो गर्भाः स्रवंति स्म भयेन वै ॥३॥ निर्विशंति घना यस्य ककुद्यचलशंकया ॥ तं तीक्ष्णशृंगमुद्वीक्ष्य गोप्यो
गोपाश्च तत्रसुः ॥४॥ पशवो दुद्रुवुः भीता राजन्संत्यज्य गोकुलं कृष्णकृष्णेति ते सर्वे गोविंदं शरणं ययुः ॥५॥ भगवानपि तद्वीक्ष्य गोकुलं भय
विद्रुतं ॥ मा भैष्टेति गिराश्वास्य वृषासुरमुपाह्वयत् ॥६॥ गोपालैः पशुभिर्मंद त्रासितैः किमसत्तम ॥ बलदर्पहाहं दुष्टानां त्वद्विधानां दुरात्म
नां ॥७॥ इत्यास्फोट्याच्युतोऽरिष्टं तलशब्देन कोपयन् ॥ सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः ॥८॥ सोऽप्येवं कोपितोऽरिष्टः खुरेणाव
निमुल्लिखन् ॥ उद्यत्पुच्छभ्रमन्मेघः क्रुद्धः कृष्णमुपाद्रवत् ॥९॥ अग्रन्यस्तविषाणाग्रः स्तब्धासृग्लोचनोऽच्युतं ॥ कटाक्षिप्याद्रव
त्तूर्णमिंद्रमुक्तोऽशनिर्यथा ॥१०॥ ॥श्रीरामाकृष्णायनमः॥ ॥ ककुदि गलपृष्ठशृंगे ॥४॥ कृष्णकृष्णेति ॥५॥६॥७॥ इत्येवंब
दन् आस्फोट्य करतलेन बाहुमास्फाल्य तेन तलशब्देन कोपयन् ॥ भुजाभोगं भुजः स एव भोगः सर्पदेहाकारं भुजमित्यर्थः ॥ स्वयमच्युतः अन्योन्दुष्टान् हरतीति रामः
हरिः ॥८॥ उद्यता ऊर्ध्वं गच्छता पुच्छेन भ्रमंतो मेघा यस्मिन् सः ॥९॥ अग्रेन्यस्ते विषाणाग्रे येन सः ॥ स्तब्धे असृक् रक्तवल्लोचने यस्य सः ॥ कटाक्षिप्य कटा १०४
क्षेण तिर्यक् निरीक्ष्य ॥१०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मत्स्यपोवाह प्रतिलोमं व्यनुदत् ॥२१॥ अपविद्धः अपक्षिप्तः आपतत् आगतवत् ॥ स्विन्नाः निस्वेदयुक्ताः निषन्नसर्वांगा निश्वसनः ॥ क्रोधमूर्छितः क्रोधेन व्याप्तः ॥२२॥
कृत्वा विषाणमुत्पाट्य तेनैव जघान ॥ स च अपतत् ॥२३॥ मूत्रं शकृत् मूत्रं शकृच्च एकवद्भावः ॥ तदुत्सृजन् समुत्सृजन् त्यजन् इत्यर्थः ॥ पादांश्च क्षिपन् इतस्ततश्चालयन् ॥
अनवस्थितेक्षणः प्रचलितनेत्रः कृच्छ्रं कष्टं जगाम ॥ कृ अथ निर्ऋतिमृत्योः क्षयं निवासं जगाम ॥ कृच्छ्रं यथा भवति तथा मृत इति वा ॥२४॥ नयनोत्सवः नयनानां मूर्ति

गृहीत्वा शृंगयोस्तं वा अष्टादशपदानि सः ॥ प्रत्यपोवाह भगवान्गजः प्रतिगजं यथा ॥२१॥ सोऽपविद्धो भगवता पुनरुत्थाय सत्वरः ॥
आपतत्स्विन्नसर्वांगो निश्वसन्क्रोधमूर्छितः ॥२२॥ तमापतंतं स निगृह्य शृंगयोः पदा समाक्रम्य निपात्य भूतले ॥ निःपीडयामास
यथार्द्रमंबरं कृत्वा विषाणेन जघान सोऽपतत् ॥२३॥ असृग्वमन्मूत्रशकृत्समुत्सृजन् क्षिपंश्च पादाननवस्थितेक्षणः ॥ जगा
म कृच्छ्रं निर्ऋतेरथ क्षयं पुष्पैः किरंतो हरिमीडिरे सुराः ॥२४॥ एवं ककुद्मिनं हत्वा स्तूयमानः स्वजातिभिः ॥ विवेश गोष्ठं सबलो गो
पीनां नयनोत्सवः ॥२५॥ अरिष्टे निहते दैत्ये कृष्णेनाद्भुतकर्मणा ॥ कंसायाथाह भगवान्नारदो देवदर्शनः ॥२६॥ यशोदायाः सुतां क
न्यां देवक्याः कृष्णमेव च ॥ रामं च रोहिणीपुत्रं वसुदेवेन बिभ्यता ॥ न्यस्तौ स्वमित्रे नंदे वै याभ्यां ते पुरुषा हताः ॥२७॥ ॥ श्रीरामः ॥ ॥

मानुत्सवः ॥२५॥ कामं व्रजे च संततं कृष्णं तेन तु विस्मृतं ॥ नारदः स्मारयामास कंसं दूतगिरेव तु ॥ तदाह ॥ अरिष्ट इति ॥ देवदर्शनः देवर्षिः ॥ यद्वा ॥ एवं कृते एवं भविष्यतीति
साक्षाद्देवदर्शनं यस्य सः ॥२६॥ अपि तेवतारे दर्शनो कृष्णमाह ॥ यशोदाया इति ॥ देवक्या अष्टमगर्भत्वेन प्रसिद्धां कन्यां यशोदायाः सुतामाह ॥ यशोदायाः सुतत्वे
न प्रसिद्धं [illegible] याः सुतमाह ॥ रोहिणीपुत्रं रामं च ॥ देवक्याः सप्तमं सुतमाह ॥ यद्वा ॥ नंदसुतत्वेन प्रसिद्धं रामं वसुदेवभार्यायाः रोहिण्याः पुत्रमाह ॥ वसुदेवसुतौ
तत्राह ॥ वसुदेवेनेति ॥२७॥

व चेत्कथं व्रजं गतौ

॥१८॥ लिख[illegible]॥ हतेवसुदेवेतौपलायेतां अतोबध्यतामितिमंत्रंवदतानारदेननिवारितइति॥१९॥२०॥२१॥२२॥मूर्यंममनिदर्शितः॥विधात्रानारदेनवा॥व्र
जेगंतुं[illegible]ताबाउ॥नवद्यामिति॥२३॥मंचास्तुंगस्तंनादिरचितस्थानानि॥२४॥अहितौशत्रू॥२५॥मादुषेवरदाय॥२६॥अर्थतंत्रस्त अर्थसिद्धांतमेकजाना
निशाम्यतद्भोजपतिः कोपात्प्रचलितेंद्रियः॥निशातमसिमादत्तवसुदेवजिघांसया॥२८॥निवारितोनारदेनतत्सुतौमृत्युमात्मनः॥ज्ञा
त्वालोहमयैःपाशैर्बबंधससहनार्यया॥२९॥प्रतियातेत्वदेवर्षौकंसआभाष्यकेशिनं॥प्रेषयामासहन्येतांनवतारामकेशवौ॥३०॥ततो
मुष्टिकचाणूरशलतोषलकादिकान्॥अमात्यान्हस्तिपांश्चैवसमाहूयाहभोजराट्॥३१॥भोभोनिशाम्यतामेतद्वीरचाणूरमुष्टि
कौ॥नंदव्रजेकिलासातेसुतावानकदुंदुभेः॥२२॥रामकृष्णौततोमह्यंमृत्युःकिलनिदर्शितः॥भवद्भ्यामिहसंप्राप्तौहन्येतांम
ल्ललीलया॥२३॥मंचाःक्रियंतांविविधामल्लरंगपरिश्रिताः॥पौरजानपदाःसर्वेपश्यंतुस्वैरसंयुगं॥२४॥महामात्रत्वयाभ
द्ररंगद्वार्युपनायतां॥द्विपःकुवलयापीडोजहितेनममाहितौ॥२५॥आरभ्यतांधनुर्यागश्चतुर्दश्यांयथाविधि॥विशसंतुपशू
न्मेध्यान्भूतराजायमीढुषे॥२६॥इत्याज्ञाप्यार्थतंत्रज्ञआहूययदुपुंगवं॥गृहीत्वापाणिनापाणिंततोक्रूरमुवाचह॥२७॥भोभो
दानपतेमह्यंक्रियतांमैत्रमादृतः॥नान्यस्त्वत्तोहिततमोविद्यतेभोजवृष्णिषु॥२८॥अतस्त्वामाश्रितःसौम्यकार्यगौरवसाधनं॥य
थेंद्रोविष्णुमाश्रित्यस्वार्थमध्यगमद्विभुः॥२९॥गच्छनंदव्रजंतत्रसुतावानकदुंदुभेः॥आसातेताविहानेनरथेनानयमाचिरं॥३०॥
तात्पर्यंतत्रसंताः॥२७॥दानपतेअक्रूर॥मैत्रंमित्रकृत्यंत्वयाक्रियतां॥ततोऽन्यआदतःसादरोहिततमस्त्वनविद्यतइति॥२८॥२९॥३०॥ ॥ ॥ ॥ राम:
२०५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तौमेमत्कनिंतरांस्पृहः ॥ वैकुंठसंश्रयेदेवैः ॥३१॥ किंतत्तत्राह ॥ घातयिष्यइति ॥ कालकल्पेनमत्कुतुल्येनवैद्युतोपमैरशनितुल्यैः ॥३२॥३३॥३४॥ नष्टकंटका
नष्टशत्रुः ॥ ननुकतिपयासुरुद्धेननष्टकंटकाःकथंस्यामित्यत्राह ॥ जरासंधइति ॥३५॥३६॥३७॥ मनोषितंविचारितंसध्यक्सम्यक् ॥ स्वावद्यंमरणं ॥ तन्मार्जनं ॥ तथाप्येता

निस्पृहः किलमेमृत्युर्देवैर्वैकुंठसंश्रयैः ॥ तानानयसमंगोपैर्नंदाद्यैःसाभ्युपायनैः ॥३१॥ घातयिष्यइहानीतौकालकल्पेनहस्तिना ॥ य
दिमुक्तौततोमल्लैर्घातयेवैद्युतोपमैः ॥३२॥ तयो[illegible]र्निहतयोस्तप्तान्वसुदेवपुरोगमान् ॥ तद्बंधून्निहनिष्यामिवृष्णिभोजदशा
र्हकान् ॥३३॥ उग्रसेनंचपितरंस्थविरंराज्यकामुकं ॥ तद्भ्रातरंदेवकंचयेचान्येविद्विषोमम ॥३४॥ ततश्चैषामहीमित्रभवित्रीनष्टकं
टका ॥ जरासंधोममगुरुर्द्विविदोदयितःसखा ॥३५॥ शंबरोनरकोबाणोमय्येवकृतसौहृदाः ॥ तैरहंसुरपक्षीयान्हत्वाभोक्ष्येम
हींनृपान् ॥ एतज्ज्ञात्वानयक्षिप्रंरामकृष्णाविहार्भकौ ॥ धनुर्मखनिरीक्षार्थंद्रष्टुंयदुपुरश्रियं ॥३७॥ अक्रूरउ० ॥ ॥ राजन्मनीषि
तंसध्र्यक्कृतंस्वावद्यमार्जनं ॥ सिद्ध्यसिद्ध्योःसमंकुर्याद्दैवंहिफलसाधनं ॥३८॥ मनोरथान्करोत्युच्चैर्जनोदैवहतानपि ॥ युज्यते
हर्षशोकाभ्यांतथाप्याज्ञांकरोमिते ॥३९॥ एवमादिश्यचाक्रूरंमंत्रिणश्चविसृज्यसः ॥ प्रविवेशगृहंकंसस्तथाऽक्रूरःस्वमा
लयं ॥४०॥ इतिभागवतेदशमस्कंधेषट्त्रिंशोध्यायः ॥३६॥ ॥

वानति[illegible]कार्यइतिनिविष्यंसूचयन्नाह ॥ सिद्ध्यसिद्ध्योरिति ॥३८॥ पुरुषकारस्यव्यभिचारमाह ॥ मनोरथानिति ॥४०॥ इतिभागवतेमहापुराणेदशमस्कंधेषट्त्रिंशोऽय
॥३६॥ सप्त[illegible]केत्रिंशच्युतोभाविकमभिः ॥ नारदेनस्तुतःकृष्णोऽजून्व्योमासुरमथावधीत ॥१॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पू०
१०६

वृषवेषासुरं सद्रे[illegible]त्रयवेषिणं॥ कंसप्राणसमं हत्वा कंसं व्यसुमिवाकरोत्॥ केशीत्विति॥ प्रथमश्लोकेनयएवंभूतः केशीत्यन्वयः तं भगवानुपाकयत् इति द्वितीयेनान्व
यः॥ मृगयन् सौ निर्जरयन् स्लथयन् विदारयन्नित्यर्थः॥ सटाभिः केसरैरवधूतानि ताः स्त्रतः॥ भ्राम्यन्ति विमानानि चैतैः संकीर्णं नभः कुर्वन्॥ हेषितैरस्पृशाति
त्रोखे भीषितमखिलं विश्वं येनसः॥१॥ तद्धेषितैः नैरितिनिष्ठुरैर्हेषितैः वालैः पुच्छलोमभिर्विघूर्णिताः परिभ्रामिता अंबुदा येनतं॥ आजौ संग्रामार्थमात्म ये
नं स्वलं अन्वेषयः पुरतो निर्गतः॥ सन्नुपाकयत्॥ स्वसमीपमाजुहाव॥ सच केशी तन्निशाम्य मृगेन्द्रवन्नादमकरोत्॥२॥ ततः स केशी तं स्वछंद

श्रीशुकउवाच॥ ॥ केशी तु कंसप्रहितः खुरैर्महीं महाहयो निर्जरयन्मनोजवः॥ सटावधूताभ्रविमानसंकुलं कुर्वन्नभो हेषितभीषिताखिलः लज्ञाषि
॥१॥ तं त्रासयंतं भगवान्स्वगोकुलं तद्धेषितैर्वालविघूर्णिताम्बुदं॥ आत्मानमाजौ मृगयंतमग्रणीरुपाकयत्स व्यनदन्मृगेन्द्रवत्॥२
स तं निशाम्याभिमुखं मुखेन खं पिबन्निवाभ्यद्रवदत्यमर्षणः॥ जघान पद्भ्यामरविंदलोचनं दुरासदश्चंडजवो दुरत्ययः॥३॥
तद्वंचयित्वा तमधोक्षजो रुषा प्रगृह्य दोर्भ्यां परिविध्य पादयोः॥ सावज्ञमुत्सृज्य धनुःशतांतरे यथोरगं तार्क्ष्यसुतो व्यवस्थितः॥४॥ ॥ ॥

दष्टामुखेन खं पिबन्निव मुखं व्यादाय विवृत्य अभिमुखमभ्याजगाम॥ किंच॥ अत्यमर्षणः॥ अतिकुपितैः॥ अत्यंतमसहमानो वा॥ प्रत्युत पद्भ्यां जघान॥ दुरा राम:
सदः अन्यैरभिभवितुमशक्यः॥ दुरत्ययः उद्यतः सन् दुरतिक्रमः॥ अत्रडेत्रः॥ चंडजवः॥२॥ तत्पदहननं वंचयित्वा तं चरणनाय प्रसारितयोः पादयोर्हस्ता १०६ जन
भ्यां गृहीत्वा परिविध्य भ्रामयित्वा व्यवस्थितः तथैव स्थितो बभूव॥४॥ ॥ श्रीरामाकृष्णायनमः॥ ॥ श्रीरामचयनमः॥ ॥ ॥

२ विशालनेत्रो विकटास्यकोटरो बृहद्गलो नीलम २
२ हांबुदोपमः॥ दुराशयः कंसहितं चिकीर्षुर्व्रजं स २
२ नंदस्य जगाम कंपयन्॥१॥२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यादाय मुखं प्रसार्य वेगेन हरिं प्रत्यद्रवत्॥ सोऽपि हरिरीषत् हसन् उत्तरं सव्यं भुजं॥ निर्भयत्वे दृष्टांतः॥ यथोरगं बिले इति॥५॥ ततः किं तदाह। दंता इति॥ चर्वणाय भगवद्भुजं स्प
र्शंतानि तथा॥ ते व्यादानेन ये विहताः॥ अयोल्मोऽस्पृष्टानीति स्पष्टाः॥ यद्वा तप्तमयं अतितप्तं लोहादि स्पृष्टानीत्यर्थेति॥ आमयो जलोदरं॥६॥ लेंडं पुरीषमुत्सृजन्॥७॥ क
र्कटिकाफलं इव पक्वं सा घ्यं तं विदीर्णं भवति तद्वद्विदीर्णात्तस्य देहात् विगतप्राणात्॥ अविस्मितो गर्वरहितः॥ अयत्नेन कृतो ऽरिर्येन सः॥८॥ कंसाय कृष्णमादिश्य पतनहुस्पा
दिपैः शुभैः॥ कंसघातादि कृष्णस्य कार्यमावेदयन् मुनिः तदाह॥ देवर्षिरित्यादिना॥ न चायं सूचकः किंतु सर्वसुहृदित्याह॥ भागवतप्रवर इति॥१०॥ अस्मन्नह

स लब्धसंज्ञः पुनरुत्थितो रुषा व्यादाय केशी तरसाऽपतद्धरिं॥ सोऽप्यस्य वक्त्रे भुजमुत्तरं स्मयन् प्रवेशयामास यथोरगं बिले॥५॥ दंता निपेतु
र्भगवद्भुजस्पृशास्ते केशिनस्तप्तमयस्पृशो यथा॥ बाहुश्च तद्देहगतो महात्मनो यथामयः संववृधे उपेक्षितः॥६॥ समेधमानेन स कृष्णबाहु
ना निरुद्धवायुश्चरणांश्च विक्षिपन्॥ प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लेंडं व्यसृजन् क्षितौ व्यसुः॥७॥ तद्देहतः कर्कटिकाफलोपमा
द्व्यसोरपाकृष्य भुजं महाभुजः॥ अविस्मितोऽयत्नहतारिरुत्स्मयैः प्रसूनवर्षैर्वर्षद्भिरीडितः॥८॥ देवर्षिरुपसंगम्य भागवतप्रवरो नृ
प॥ कृष्णमक्लिष्टकर्माणं रहस्येदमभाषत॥९॥ कृष्ण कृष्णाप्रमेयात्मन् योगेश जगदीश्वर॥ वासुदेवाखिलावास सात्वतां प्रवर प्रभो॥१०

स्यं वैरिणि कंसे सूचितवानिति मा शंकीत्याह॥ कृष्ण कृष्णेत्यादिना॥ अयं भावः त्वमीश्वरो नृनारदैत्यसंहाराय अवतीर्णोसि॥ अतस्तदनुरूपाचरणेन विश्वं परिपा
लयेति॥ तत्र त्वयि नावज्ञयत्र शंकैव नास्तीत्याह॥ अप्रमेयात्मन् अपरिच्छिन्नस्वरूप॥ योगेश अचिंत्यप्रभाव॥ जगदीश्वर नियंतः॥ वासुदेव सर्वभूतेषु वर्त्तमान॥ अखि
लावास स[illegible]॥ संप्रति सात्वतानां प्रवर श्रेष्ठ॥ प्रभो सर्वशक्ते॥१०॥ ॥ श्रीरामचंद्राय नमः॥ ॥ श्रीरामाय नमः॥ ॥ ॥

भ नि १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथमेकंरूपे[illegible]र्षिदत आह ॥ त्वमात्मेति ॥ नहित्वं जीववत्परिछिन्नः किंतु सर्वभूतानामंतरएको ऽनुस्यूत आत्मा ॥ अंतरनुस्यूतत्वे दृष्टांतः ॥ एधसां काष्ठानामंतर्ज्योति
रिवेति ॥ न[illegible]स्थितोपि तैर्नदृश्यस इत्याह ॥ गूढ इति ॥ अत्र हेतवः ॥ गुहाशयः बुद्धेरप्यंतरः ॥ किंच ॥ साक्षी ॥ नहि साक्षी दृश्यत इत्यर्थः ॥ अपिच महापुरुषः अंतः
अपरिछिन्नमतिभिर्नज्ञायस इत्यर्थः ॥ तर्हि सर्वांतरत्वे किं प्रमाणमत आह ॥ ईश्वर इति ॥ नह्यीश्वरं विना परतंत्राणां जीवानां प्रवृत्तिर्घटत इत्यर्थः ॥२१॥ अ
हमीश्वरः अतः सर्वमीशितव्यमित्येतदेव कुतः अत आह ॥ आत्मनेति ॥ साधनांतरनिरपेक्ष एव ॥ आत्माश्रयः स्वतंत्रः ॥ माययात्मशक्त्या नवान्गु

त्वमात्मा सर्वभूतानामेको ज्योतिरिवैधसां ॥ गूढो गुहाशयः साक्षी महापुरुष ईश्वरः ॥२१॥ आत्मनात्माश्रयः पूर्वं मायया ससृजे गुणा
न् ॥ तैरिदं सत्यसंकल्पः सृजस्यत्स्यवसीश्वरः ॥२२॥ स त्वं भूधरभूतानां दैत्यप्रमथरक्षसां ॥ अवतीर्णो विनाशाय साधूनां रक्षणाय च ॥२३॥
दिष्ट्या ते निहतो दैत्यो लीलयायं हयाकृतिः ॥ यस्य हेषितसंत्रस्तास्त्यजंत्यनिमिषा दिवं ॥२४॥ चाणूरं मुष्टिकं चैव मल्लानन्यांश्च हस्ति
नं ॥ कंसं च निहतं द्रक्ष्ये परश्वोह[illegible]नि ते प्रभो ॥२५॥ तस्यानु शंखयवनमुराणां नरकस्य च ॥ पारिजातापहरणमिंद्रस्य च पराजयम् ॥२६॥

णान्ससृजे सृष्टवान् ॥ तैः सृष्टैर्गुणैरिदं विश्वं सृजसि ॥ अत्सि संहरसि ॥ अवसि पालयसि ॥ ननु स्रष्ट्रादिक्रियाषट्कारकसाध्यैव दृष्टेत्यत आह ॥ सत्यसंकल्प इति ॥ नहि संक
ल्पैकसाध्ये बहिःसाधनापेक्षेति भावः ॥ अतस्त्वमीश्वरोस्तीत्युपसंहारः ॥२२॥ प्रस्तुतमाह ॥ स त्वमिति ॥ भूधरभूतानां नुवंधरंतीति भूधरा राजानस्तद्रूपाणां ॥२३॥ २४॥ परश्वोह
नीति ॥ अद्यैवाक्रूर एष्यति ॥ श्वो मथुरां गंतासि ॥ परश्वश्चाणूरादींस्त्वया निहतान्द्रक्ष्यामीति सिद्धवन्निर्देशो विज्ञापनप्रकारविशेषः ॥२५॥ तस्यानुतदनंतरं शंखः पंच
जनः वधं द्रक्ष्यामीति शेषः ॥ भाविनिर्देशमात्रमेतन्नत्वानंतर्यविवक्षितं ॥२६॥ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३।२

॥२७॥ नार्यया जांबवत्या सह॥ स्वधामतः महाकालपुरात्॥२८॥२९॥ द्वारकामावसन् द्वारकायां वसन् करिष्यति॥३०॥ अमुष्य विश्वस्य न्नारस्य वा॥३१॥ एवं विज्ञा
प्सरूताभिनंदनं भगवंतं नमस्यति द्वयेन विशुद्धविज्ञानघनमिति॥ केवलं नैकमूर्त्तिं॥ अतएव स्वसंस्थया स्वरूपसम्यक्स्थित्यैव परमानंदरूपया सम्यगाप्ताः सर्वेऽर्था येन तं॥
आप्तकामतोक्ता सत्यसंकल्पतामाह॥ अमोघवांछितमिति॥ ननु वांछा चेदस्ति तर्हि दुर्निवारा संसृतिः अत आह॥ स्वतेजसेति॥ चिच्छक्त्या नित्यनिवृत्तो मायाकार्यरूपो

उद्वाहं वारकंन्यानां वीर्यशुल्कादिलक्षणं॥ नृगस्य मोक्षणं पापाद् द्वारकायां जगत्पते॥२७॥ स्यमंतकस्य च मणेरादानं सह नार्यया॥ मृतपु
त्रोपादानं च ब्राह्मणस्य स्वधामतः॥२८॥ पौंड्रकस्य वधं पश्चात्काशिपुर्याश्च दीपनं॥ दंतवक्रस्य निधनं चैद्यस्य च महाक्रतौ॥२९॥
यानि चान्यानि वीर्याणि द्वारकामावसन् भवान्॥ कर्त्ता द्रक्ष्याम्यहं तानि गेयानि कविभिर्भुवि॥३०॥ अथ ते कालरूपस्य क्षपयिष्णो
रमुष्य वै॥ अक्षौहिणीनां निधनं द्रक्ष्याम्यर्जुनसारथेः॥३१॥ विशुद्धविज्ञानघनं स्वसंस्थया समाप्तसर्वार्थममोघवांछितं॥
स्वतेजसा नित्यनिवृत्तमा[य]यागुणप्रवाहं भगवंतमीमहि॥३२॥ त्वामीश्वरं स्वाश्रयमात्ममायया विनिर्मिताशेषविशेषकल्पनं॥
क्रीडार्थम[ा]त्तमनुष्यविग्रहं नतोऽस्मि धुर्यं यदुवृष्णिसात्वतां॥३३॥ ॥श्रीरामः॥ ॥

गुणप्रवाहो यस्[मा]त्तं॥ अतो भगवंतं निरतिशयैश्वर्यं॥ ईमहि शरणं व्रजेमेति॥३२॥ ननु त्रिकालज्ञस्त्वं कथं मत्प्रपंचं न जानासि चेत्कथं अगुणप्रवाहं ब्रवीषि इत
त्याह॥ त्वा[मी]श्वरं अन्यस्य वशयितारं॥ स्वाश्रयं अन्यस्यावष्टंभं॥ अत आत्माधीनया मायया विनिर्मिता अशेषविशेषा महदादयः यादवरूपा वा कल्प
प्या नायेन तं॥ धुर्यं श्रेष्ठं॥ नतोऽस्मीति॥३३॥ ॥
त

भा॰ द॰ पू॰ प्रातरेव केशिवधं ... नंतरं नारदोक्तमंगीकृत्य पुनस्तथैव पश्चाच्चारतां व्योमो हतः॥ यद्वा॥ व्योमवधः पूर्वमेव कृतोऽपि विषधारिवधप्रसंगादत्रोच्यते इति द्रष्टव्यं॥ केचित्तु नःशं

१०८ खचूडवधानंतरं ... पर्वतिचतमाह॥ एकदेति॥२६॥२७॥ मेषवदाचरितान् स्वयं चोरवदाचरितः सन् अपोवाह अपकृष्य निनाय॥२८॥ पिदधे छादितवान्॥ शरणदः आश्रयप्रदः

श्रीशुक उवाच॥ ॥एवं यदुपतिं कृष्णं भागवतप्रवरो मुनिः॥ प्रणिपत्याभ्यनुज्ञातो ययौ तद्दर्शनोत्सवः॥२४॥ भगवानपि गोविंदो हत्वा

केशिनमाहवे॥ पशूनपालयत्पालैः प्रीतैर्व्रजसुखावहः॥२५॥ एकदा ते पशून्पालाश्चारयंतोऽद्रिसानुषु॥ चक्रुर्निलायनक्रीडाश्चोर

पालापदेशतः॥२६॥ तत्रासन् कतिचिच्चोराः पालाश्च कतिचिन्नृप॥ मेषायिताश्च तत्रैके विजह्रुरकुतोभयाः॥२७॥ मयपुत्रो महामा

यो व्योमो गोपालवेषधृक्॥ मेषायितानपोवाह प्रायश्चोरायितो बहून्॥२८॥ गिरिदर्यां विनिक्षिप्य नीतं नीतं महासुरः॥ शिलया पि

दधे द्वारं चतुःपंचावशेषिताः॥२९॥ तस्य तत्कर्म विज्ञाय कृष्णः शरणदः सतां॥ गोपान्नयंतं जग्राह वृकं हरिरिवौजसा॥३०॥ स नि

जं रूपमास्थाय गिरींद्रसदृशं बली॥ इच्छन्विमोक्तुमात्मानं नाशक्नोद्ग्रहणातुरः॥३१॥ तं निगृह्याच्युतो दोर्भ्यां पातयित्वा महीत

ले॥ पश्यतां दिवि देवानां पशुमारममारयत्॥३२॥ गुहापिधानं निर्भिद्य गोपान्निःसार्य कृच्छ्रतः॥ स्तूयमानः सुरैर्गोपैः प्रविवेश स्व

गोकुलं॥३३॥ ॥इति श्रीभागवते महापुराणे दशमस्कंधे सप्तत्रिंशोऽध्यायः॥३७॥ ॥श्रीरामः॥ ॥ ॥

आश्रयप्रदः॥ हरिः सिंहः॥३०॥३१॥ पशुमारं पशुमारो यथा भवति तथा अनिश्वासमित्यर्थः॥३२॥ स्तुतिर्गोपैः स्तूयमानः उपरि वैमानिकैर्देवैरिति॥३३॥ ॥इति श्रीभा

गवते महापुराणे दशमस्कंधे सप्तत्रिंशोऽध्यायः॥३७॥ ॥अष्टत्रिंशे यथाऽध्याये त्वक्रूरो गोकुलं गतः॥ तत्रैव रामकृष्णाभ्यां गृहं नीत्वा सुसंस्कृतः॥१॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मे १

प्रातः केशिवधे स्वप्ने व्योमे? रूपां निर्गते मुनौ॥ तातो — व्योमेंइते क्रूरः सायं गोकुलमागमत्॥ तदेवं नारदेन कंसवधादिकार्ये विज्ञापिते श्रीकृष्णो मथुरां गंतुं सुघतो वर्तते तदा अक्रू
रोपि गोकुलमगादित्याह॥ अक्रूरोपीति॥ ३८॥१॥ अपीति संभावनायां अर्हते योग्याय॥ २॥ स्वस्य स्वल्पस्य दर्शने संभव मात्रांका पुनः संभावयति। ममैतदिति द्वयेन॥ विषया
त्मनः विषयाविष्टचित्तस्य। शूद्रजन्मयस्य तस्य ब्रह्मकीर्तनं वेदोच्चारणं यथेति॥ ४॥ अथवा मैवं किंतु अधमस्यापि तस्यापि मम स्याद् एवकुतस्तत्र आह॥ क्रियमाणः काल

श्रीशुक उवाच॥ ॥ अक्रूरोपि च तां रात्रिं मधुपुर्यां महामतिः॥ उषित्वा रथमास्थाय प्रययौ नंदगोकुलं॥ १॥ गच्छन् पथि महाभा
गो भगवत्यंबुजेक्षणे॥ भक्तिं परामुपगत एवमेतदचिंतयत्॥ २॥ किं मयाचरितं भद्रं किं तप्तं परमं तपः॥ किं वा थाप्यर्हते दत्तं यद्द्र
क्ष्याम्यद्य केशवं॥ ३॥ ममैतद्दुर्लभं मन्ये उत्तमश्लोकदर्शनं॥ विषयात्मनो यथा ब्रह्मकीर्तनं शूद्रजन्मनः॥ ४॥ मैवं ममाधमस्या
पि स्यादे[illegible]च्युतदर्शनं॥ ह्रियमाणः कालनद्या क्वचित्तरति कश्चन॥ ५॥ ममाद्यामंगलं नष्टं फलवांश्चैव मे भवः॥ यन्नमस्ये भ
ध गवतो यो[illegible]ध्येयांघ्रिपंकजं॥ ६॥ कंसो बताद्या[illegible]कृत मे [illegible]नुग्रहं द्रक्ष्येंघ्रिपद्मं प्रहितोऽमुना हरेः॥ कृतावतारस्य दुरत्ययं
तमः पूर्वे[illegible] तरन्यन्नखमंडलत्विषा॥ ७॥ ॥ श्रीरामचंद्राय नमः॥ ॥ श्रीरामाहल्लाय नमः॥ ॥ ॥

नद्येति अयं[illegible]॥ यथा नद्या ह्रियमाणानां तृणादीनां किंचित्कदाचित्तरति॥ तथा कर्मवर्त्मनि कालेन ह्रियमाणानां जीवानामपि मध्ये कश्चित्तरेदिति संभवतीति॥ ५॥ अतो
नया प्रवृत्त्या मम [illegible]मंगलं ध्रुवं नष्टमेवेति ज्ञायते॥ भवो जन्म च सफलं जातमिति॥ यत्यतः नमस्करिष्यामि॥ ६॥ अमंगलनाशसूचकांतरमाह॥ कंस इति॥ बतेत्याश्चर्ये॥ अन
निखिलः कृ[illegible]मात्यंतं अनुग्रहं कृतवान्। यतोऽमुनाप्रहितो हरेरंघ्रिपद्मं द्रक्ष्यामीति॥ पूर्वे अंबरीषादयः तमः संसारमेव तरन्ति तीर्णाः॥ ७॥ ॥ ॥ ॥
नोह ल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ पू॰ अंघ्रिपद्मं विनामयति॥ यदिति। ब्रह्मादिभिरर्चितमिति परमैश्वर्यमाह॥ श्रिया चेति सौ नाग्पातिशयं मुनिभिर्नक्षमहिते रिति परमपुरुषार्थत्वं। गोचारणायेति॥ रूपाणु
१०९ तं॥ यरु...मितिप्रेममात्रसुलभत्वं॥८॥ मनोरथांतरं करोति॥ इच्छामीति॥ रौ नमानैकपोलौ नासिका च यस्मिन् तत्तस्मित सहितः अवलोको यस्मिन् अरुणैकं पं
नवलोचनेय...मेन् तच्च तच्चमुखं॥ गुडालकावृतं वक्रकेशावृतं॥ तदानीमेव मुकुंदस्य रूपस्य तलाई॥ प्रदक्षिणमिति॥९॥ पुनरपरमन्यच्चिंतयति॥ अप्यद्येति॥
रयुषः प्राप्तवतः॥ लावण्यस्य धाम आश्रयः तस्य विलोः॥ यदा विलोर्लावण्यपुंजं यद्रामवपुः तस्योपलंभनं दर्शनं भविष्यति॥ अपि यद्येवं स्यात्तर्हि मद्गं ममस
दृशोर्लोचनस्य फलं स्यादिति न अपितु स्यादित्यर्थः॥१०॥ यर्हीति तेति चतुर्भिः कुलकं॥ तत्रैवं शंकाननुस्मदादिवदेवकर्तृत्वं नो कदि धर्मैस्तत्र तत्र प्रतीय

यदर्चितं ब्रह्म...भवादिभिः सुरैः श्रिया च देव्या मुनिभिः ससात्वतैः॥ गोचारणायानुचरैश्चरद्वने॥ यद्गोपिकानां कुचकुंकुमांकितं॥८॥
इच्छामि नूनं सुकपोलनासिकं स्मितावलोकारुणकंजलोचनं॥ मुखं मुकुंदस्य गुडालकावृतं प्रदक्षिणं मे प्रचरंति वै मृगाः॥९॥ अ
प्यद्य विष्णोर्मनुजत्वमीयुषो भारावताराय तनुं वो निजेच्छया॥ लावण्यधाम्नो भवितोपलंभनं मह्यं न न स्यात्फलमंजसा दृशः॥१०॥ य
र्हीक्षिताहंरहितोऽप्यसत्सतोः स्वतेजसापास्ततमोभिदाभ्रमः॥ स्वमायया त्मन्रचितैस्तदीक्षया प्राणाक्षधीभिः सदनेष्वभीयते॥११॥ ॥

मानस्य कथं विभुत्वमिति भामामात्रां कांक्षोक्तत्रयेणापाकुर्वंश्चातुर्थेन तमहं इच्छामीति मनोरथं करोति॥ तथाहि यर्हीक्षितेति॥ ईक्षणमात्रकर्ता॥ असत्सतोः कार्यकारणयोरीक्षि यो: रामः ११ १०९
तार्ईक्षणमात्रेण कर्ताप्यहंकाररहितः॥ अहंकाररहितः॥ तथा पास्ततमोभिदाभ्रमः॥ तमः स्वाज्ञानं ततो भिदा भेदः॥ ततो भ्रमः॥ अभिनिवेशादिः अपास्ता अपा
कृतास्तमआदयो यस्मिन्॥ सः कुतएतत्तत्राह॥ स्वतेजसा चिच्छक्त्या नित्यस्वरूपसाक्षात्कारेण॥ तथापि स्वमायया स्वाधीनया मायया तदीक्षया तस्यैव ईक्ष
यातस्यैवेक्षया प्राणाक्षधीभिः सहितैः आत्मन् आत्मनि स्वस्मिन्नेव रचितैः जीवैः सदनेषु वृंदावनतरुषु गोपागारेषु चलीलया कर्माणि कुर्वन्सन्नभवदभीयते
आभिमुख्येन प्रतीयते११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुसर्वथाऽहंकारादिरहितस्यात्मारामस्य फललिप्साकृत इत्याशंक्य परानुग्रहार्थं तत्राद्यायेनाह ॥ यस्येति ॥ अखिलानि अखिलस्य वा अमीवानि पापानि घ्नंति तान्यखिलामी-
वहानि तैः ॥ तथा सुमंगलैः शोभनानि मंगलानि येभ्यस्तैः ॥ गुणाः करुणादयः कर्माणि जन्मादि च तैर्विमिश्रा युक्ता वाचो जगत्प्राणंति जीवयंति शुंभंति शोभयंति ॥
पुनंति पवित्रयंति ॥ व्यतिरेकमाह ॥ या इति ॥ तैर्विरहिताः ताः स्वलंकृता अपि वस्त्राद्यलंकृतशववच्छोभमानाः मताः सतां संमताः ॥२२॥ स्वयं रचितान्
सेतून् वर्णाश्रमधर्मान् पालयताममरवर्याणां सुखकर्त्रा सन्नवतीर्णः यत् यत्र ॥२३॥ त्रैलोक्यस्य एकमेकांतं ॥ दृशिर्दृष्टिस्तद्वतां महानुत्सवो यस्मात् ॥ यद्वा महानु-

यस्याखिलामीवहभिः सुमंगलैर्वाचो विमिश्रा गुणकर्मजन्मभिः ॥ प्राणंति शुंभंति पुनंति वै जगत् यास्तद्विरक्ताः शवशोभना मताः ॥२२॥ पुनंति
सचावती[illegible]र्णः खिल सत्वतान्वये स्वसेतुपालामरवर्यशर्मकृत् ॥ यशो वितन्वन् व्रज आस्त ईश्वरो गायंति देवा यदशेषमंगलं ॥२३॥ तं
त्वद्य नूनं म[illegible]तां गतिं गुरुं त्रैलोक्यकांतं दृशिमन्महोत्सवं ॥ रूपं दधानं श्रिय ईप्सितास्पदं द्रक्ष्ये ममासन्नुषसः सुदर्शनाः ॥२४॥ अथाव- ष
रूढः सपदी[illegible]शयो रथात् प्रधानपुंसोश्चरणं स्वलब्धये ॥ धिया धृतं योगिभिरप्यहं ध्रुवं नमस्य आभ्यां च सखीन् वनौकसः ॥२५॥ अप्यंघ्रि- स
मूले पतितस्[illegible] मे विभुः शिरस्यधास्यन्निजहस्तपंकजं ॥ दत्ताभयं कालभुजंगरंहसा प्रोद्वेजितानां शरणैषिणां नृणां ॥२६॥ ॥

सवएव ॥ अत[illegible]श्रियाईप्सितमास्पदं एवंभूतं रूपं श्रीमूर्तिं दधानं तमीश्वरं द्रक्ष्यामीति । अत्र लिंगं । उषसः प्रभातसमयाः सुदर्शनाः शुभदर्शनाः सुखं प्रभाता रजन्यः शुभं
सूचकं[illegible]र्थः ॥२४॥ किंच अथ दर्शनानंतरं सपदि तत्क्षणमेव रथादवतीर्णः सन् प्रधानयोः पुरुषयो रामकृष्णयोश्चरणं योगिभिरप्यात्मलाभाय ॥ केवलं धि-
यैव धृतं सा[illegible]हं[illegible]नमस्यामि ॥ आभ्यां सहानयोः सखीन् गोपांश्च नमस्यामीति ॥२५॥ किंच । अपीति । अधास्यत् धास्यति ॥ तद्विनावयति ॥ दत्ताभयमिति सार्द्धेन ॥२६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० पू०
११०

बलिनातावत्पदत्त[illegible]परिमितमूदानसमर्पयेतस्यहस्तेउदकंनिहितं॥ कौशिकंइंद्रः तेनापिकदाचित्किंचिन्निहितमितिज्ञातव्यंमुमुक्षूणांसंसारस्यनिवर्तकंसका
मानामभ्युदयप्रदंचेत्युक्तं॥ अनुरक्तानांपरमसुखदंचेत्याह॥ यद्वा॥ वाशब्दोवितर्के॥ विहारेरौंक्रिडायां॥ सौगंधिकस्यगंधइवगंधोयस्यतत्सौगंधिकगंधि॥१७॥ एवंप स
रमानुगृहंसं[illegible]व्यपुनरप्यसंनवमात्रंबपपरिहरति॥ नमयीति॥ यद्यप्यहंकंसेनप्रहितः अतस्तस्यदूतः तथापिमयिअरेरयमितिबुद्धिंनत्रपैष्यति॥ नकरिष्यति
तात्पर्थः॥ यत[illegible]श्वदकूसर्वज्ञः अतोममचेतसोंऽतश्चबहिश्चयदाहितंचेष्टितंएतद्यःक्षेत्रज्ञअंतर्यामीनित्यज्ञानेनेक्षते॥ अयंभावः॥ चेतसोबहिरिव
समर्हणंयत्र[illegible]विधायकौशिकस्तथाबलिश्चापजगत्त्रयेंद्रतां॥ यद्वाविहारेव्रजयोषितांश्रमंस्पर्शेनसौगंधिकगंधमपानुदत्॥१७॥ न
मय्युपैष्यत्य[illegible]बुद्धिमच्युतःकंसस्यदूतःप्रहितोपिविश्वदृक्॥ योंतर्बहिश्चेतसएतदीहितंक्षेत्रज्ञईक्षत्यमलेनचक्षुषा॥१८॥ अप्यं
घ्रिमूलेऽव[illegible]तंकृतांजलिंमामीक्षितासस्मितमार्द्रयादृशा॥ सपद्यपध्वस्तसमस्तकिल्बिषोवोढामुदंवीतविशंकऊर्जितां॥१९॥
सुरुत्तमं[illegible]तिमनन्यदैवतंदोर्भ्यांबृहद्भ्यांपरिरप्स्यतेथमां॥ आत्माहितीर्थीक्रियतेतदैवमेबंधश्चकर्मात्मकउच्छ्वसित्यतः॥२०॥ ल
ब्ध्वांगसंगंप्रणतंकृतांजलिंमांवक्ष्यतेक्रूरततेत्युरुश्रवाः॥ तदावयंजन्मभृतोमहीयसानैवादृतोयोधिगमुष्यजन्मतत्॥२१॥

कंसमनुवर्तेअंतस्तुकृष्णमेव॥ तदेतदसौहृदिस्थोजानातीति॥ यद्वा॥ एतस्यजगतर्रहितंमिति॥ अतः॥१८॥ अपियदिअंघ्रिमूलेचरणोपांतेऽवहितंसंयतेंद्रियम्
तेनार्द्रयादृशामांईक्षिताद्रक्ष्यति॥ तर्हिसपद्येवविनष्टखिलकल्मषाः परांमुदंवोढाप्राप्स्यामीति॥१९॥ अथमांपरिरप्स्यतेआलिंगिष्यतियदा॥ तदैवमेआत्मादेहः रामः
तीर्थीक्रियतेऽतिपवित्राकरिष्यतेउच्छ्वसितिशिथिलोभविष्यतीति॥ अतोदेहात्॥२०॥ ततमोतातेति॥ तदाजन्मभृतःसफलजन्मानः॥ उअन्यथातज्जन्मैवन ११०
भवनवतात्वाह॥ महीयसेति॥ महीयसाश्रीकृष्णेनयोनादृतःतस्यजन्मधिक्॥ अमुष्यजंतोः॥२१॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु सुहृदादिषु परिष्वंगसंप्रश्नादयो ज्ञातधर्माः कथं मीश्वरे संगच्छंते अत आह ॥ न तस्येति ॥ दयितः प्रियः ॥ तद्विपरीतोऽप्रियः ॥ सुहृत्तमो हितः ॥ तद्विपरीतो द्वेष्यः ॥ एतत्सर्वं व्य
तिरिक्तउपेक्ष्य इति ॥ दयितादयो न संतीति सत्यं ॥ तथापि निजकान्भजते ॥ तत्र च यथा ये निजकास्तांस्तथा भजते ॥ ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहमिति भगवद्वचनात् ॥ अवि
षमत्वेपि निजकेन्य एव फलं ददाति ॥ तत्र दृष्टांतः ॥ यद्वत्सुरद्रुम इति ॥ २२ ॥ यो मयांजलिः करिष्यते तस्मिन्नेव भवनं ज्ञातं मां ॥ आज्ञानि समस्तान्यर्थादिसत्कृतानि
येन तं मां ॥ २३ ॥ सत्त्वमार्गमपि निवेदत तथापि रथेन प्राप्त इति ॥ २४ ॥ अखिलैर्लोकपालैः किरीटेषु जुष्टा अमलाः पादरेणवो यस्य तस्य ॥ क्षितिकौतुकानि निहितैरलंका

न तस्य कश्चिद्दयितः सुहृत्तमो न चाप्रियो द्वेष्य उपेक्ष्य एव वा ॥ तथापि निजकान्भजते यथा तथा सुरद्रुमो यद्वदुपाश्रितोऽर्थदः ॥ किंचा
ग्रजो मां वनतं यदूत्तमः स्मयन्परिष्वज्य गृहीतमंजलौ ॥ गृहं प्रवेश्याप्तसमस्तसत्कृतं संप्रक्ष्यते कंसकृतं स्वबंधुषु ॥ २३ ॥ इति संचिं
तयन्कृष्णं श्वफल्कतनयोऽध्वनि ॥ रथेन गोकुलं प्राप्तः सूर्यश्चास्तगिरिं नृप ॥ २४ ॥ पदानि तस्याखिललोकपालकिरीटजुष्टामलपा
दरेणोः ॥ ददर्श गोष्ठे क्षितिकौतुकानि विलक्षितान्यब्जयवांकुशाद्यैः ॥ २५ ॥ तद्दर्शनाह्लादविवृद्धसंभ्रमः प्रेम्णोर्ध्वरोमाश्रुकलाकुलेक्षणः ॥
रथादवस्कंद्य स तेष्वचेष्टत प्रभोरमून्यंघ्रिरजांस्यहो इति ॥ २६ ॥ देहंभृतामियानर्थो हित्वा दंभं भियं शुचं ॥ संदेशाद्यो हरेर्लिंगदर्शनश्रवणादिभिः ॥
रूपाणि ॥ २५ ॥ तद्दर्शनेन य आह्लादः तेन विवृद्धः संभ्रमो यस्य सः ॥ प्रेम्णा ऊर्ध्वानि रोमाणि यस्य सः ॥ अश्रूणां कलाभिर्लेशैराकुले ईक्षणे यस्य सः ॥     ॥ २७ ॥
अवस्कंद्य अवप्लुत्य तेषु पदेष्वचेष्टत व्यलुठत ॥ अहो इति दुर्लभतां भावयन् ॥ २६ ॥ ननु किमर्थमेवं व्यलुठत् ॥ नास्ति प्रेमसंभवे फलो दृष्टा इत्याह ॥ देहंभृतामिति ॥ देहभृ
तामेतावानेव पुरुषार्थः कंसस्य संदेशाद्धारान्हरेर्लिंगदर्शनश्रवणादिभिर्योयमक्रूरस्य वर्णित इति ॥ संदेश आघोयस्यार्थस्य सया यावानक्रूरस्य जात इति वा ॥ २७ ॥ ॥

ध्यै

भा०द०पू०
१११

ततः कृष्णरामं च ददर्श ॥ गावो दुह्यंते ऽस्मिन्निति गोदोहनं तस्थानं गतौ प्राप्तौ ॥ २८ ॥ २९ ॥ अनुक्रोशो ऽनुकंपा तद्विलसितस्मितयुक्तमीक्षणं ययोः तौ ३१ ॥ उदारा
रुचिरा क्रीडा ययोस्तौ ॥ स्रग्विणौ रत्नस्रग्भिरलंकृतौ ॥ ३२ ॥ प्रधानश्च तौ पुरुषौ ॥ प्रकृतिपुरुषात्मकौ वा ॥ कुतः आधीतदपि कुतः ॥ जगदेन ॥ अतएव जगत्पती ॥
विपरीतौ वा चतुर्वर्गपदानां हेतू हेतुमद्भावः ॥ जगत्यर्थे पृथिव्या भारापनयनाय स्वांशेन मूर्त्तिभेदेन बलकेशवौ संतौ ॥ ३३ ॥ स्वप्रभया विगततिमिरा दिशः कुर्वा
ददर्श कृष्णरामं च व्रजे गोदोहनं गतौ ॥ पीतनीलांबरधरौ शरदंबुरुहेक्षणौ ॥ २८ ॥ किशोरौ श्यामलश्वेतौ श्रीनिकेतौ बृहद्भुजौ ॥ सुमु
खौ सुंदरवरौ बालद्विरदविक्रमौ ॥ २९ ॥ ध्वजवज्रांकुशांभोजैः चिह्नितैरंघ्रिभिर्व्रजम् ॥ शोभयंतौ महात्मानौ सानुक्रोशस्मितेक्षणौ ॥ ३०
॥ उदाररुचिरक्रीडौ स्रग्विणौ वनमालिनौ ॥ पुण्यगंधानुलिप्तांगौ स्नातौ विरजवाससौ ॥ ३१ ॥ प्रधानपुरुषावाद्यौ जगद्धेतू जगत्पती ॥ अ
वतीर्णौ जगदर्थे स्वांशेन बलकेशवौ ॥ ३२ ॥ दिशो वितिमिरा राजन्कुर्वाणौ प्रभया स्वया ॥ यथा मारकतः शैलो रौप्यश्च कनकाचितौ ॥ ३
३ ॥ रथात्तूर्णमवप्लुत्य सो ऽक्रूरः स्नेहविह्वलः ॥ पपात चरणोपांते दंडवद्रामकृष्णयोः ॥ ३४ ॥ भगवद्दर्शनाह्लादबाष्पपर्याकुलेक्षणः ॥ पु
लकाचितांग औत्कंठ्यात्स्वाख्याने नाशकन्नृप ॥ ३५ ॥ भगवांस्तमभिप्रेत्य रथांगांकितपाणिना ॥ परिरेभे ऽभ्युपाकृष्य प्रीतः प्रणतवत्सलः ॥ ३
६ ॥ संकर्षणश्च प्रणत [illegible] मुपगुह्य महात्मना ॥ गृहीत्वा पाणिना पाणी अनयत्सानुजो गृहं ॥ ३७ ॥ ॥ श्रीरामालयनमः ॥

णौ ॥ कनकाचितौ सुवर्णव्याप्तविचित्रालंकारयोः शैलसादृश्यपार्श्वमुक्तं ॥ ३३ ॥ ३४ ॥ भगवद्दर्शनाह्लादेन यद्बाष्पं तेन पर्याकुले ईक्षणे यस्य सः स्वाख्याने अक्रूरो ऽहं नमस्क — रामः२ १११
रोमीति कथने नाशक्नोत् ॥ ३५ ॥ अक्रूरो ऽयमेतदर्थमागत इति ज्ञात्वा कंसहननसामर्थ्यद्योतयन्निव रथांगेन चक्रेण अंकितो यः पाणिस्तेनाभ्युपाकृष्य तमालिंगितवान् ॥ ३
६ ॥ पाणी अंजलिरूपेण संहतावेव गृहीत्वा ॥ ३७ ॥ ॥ पुलकैराचितं व्याप्तमंगं यस्य सः २
तर

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

मधुपर्कएवार्हणं॥ तस्मिन्वायदुचितमर्हणमाहरत्॥ आनीयसमर्पितवान् रत्नर्थः॥ ३८॥ ३९॥ ४०॥ सत्कृतंसंमानितं॥ निरनुग्न हेक्रूरे। कथंकेनप्रकारेणास्य।
जीवेतेर्षः॥ सौनः पशुघातास्रएवपालकोयेषां अवानांमेषाणांतस्वतनुल्याहत्यर्थः॥ ४१॥ निरनुग्न हतामाह॥ यो ग्वधीदितितोकानतोकोनि॥ असुतृपु असूनेवतर्प
पयतियः॥ अतः रवलः॥ तस्यकंसस्यप्रजानां॥ हे अक्रूर। येषांजावनमात्रमपिदुर्लभंतेषांवः किंकुशलंविचारयामीति॥ ४२॥ मधुरयावाचा रह्छुंसत्कृतः॥ तयैव
पृष्ठाथस्वागतंतस्मैनिवेद्यप्रवरासनं॥ प्रक्षाल्यविधिवत्पादौमधुपर्कार्हमाहरत्॥ ३८॥ निवेद्यगांचातिथयेसंबाह्यश्रांतमादृतः॥ अ
न्नंबहुगुणंमेध्यंश्रद्धयोपाहरद्विभुः॥ ३९॥ तस्मैभुक्तवतेप्रीत्यारामः परमधर्मवित्॥ मुखवासैर्गंधमाल्यैः परांप्रीतिंव्यधात्पुनः॥ ४०॥ पप्रछ
ग्र सत्कृतंनंदः कथंस्थनिरनुग्रहे॥ कंसेजीवतिदाशार्हसौनपालाइवावयं॥ ४१॥ योग्वधीत्स्वसुस्तोकान्क्रोशंत्या असुतृप्खलः॥ किंनु।
स्वित्तत्प्रजानांवः कुशलंविमृशामहे॥ ४२॥ रह्छुंसूनृतयावाचानंदेनसुसभाजितः॥ अक्रूरः परिपृष्टेनजहावध्वपरिश्रमं॥ ४३॥ ॥
इतिश्रीभागवतेमहापुराणेदशमस्कंधे अक्रूरागमने अष्टत्रिंशोध्यायः॥ ३८॥ ॥ श्रीशुकउ०॥ ॥ सुखोपविष्टःपर्यंकेरामकृ
ष्णोरुमानितः॥ लेभेमनोरथान्सर्वान्पथियान्सचकारह॥ १॥ किमलभ्यंभगवतिप्रसन्नेश्रीनिकेतने॥ तथापितत्पराराजन्नहिवांछं
तिकिंचन॥ २॥ सायंतनाशनंकृत्वाभगवान्देवकीसुतः॥ सुहृत्सुवृत्तंकंसस्यपप्रछान्यच्चिकीर्षितं॥ ३॥ ॥ श्रीरामकृष्णायनमः॥ ॥
वाचापरिपृष्टेनस्नेहेन अध्वनिपरिश्रमंसंसारश्रमं॥ ४३॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांअष्टत्रिंशोध्यायः॥ ३८॥ ॥ नवत्रिंशेपुरोग
छत्यच्युतेगोपिकोक्तयः॥ अक्रूरः॥ अक्रूरेणायकालिंगांविष्णुलोकस्यदर्शनं॥ १॥ नकानामनोरथाः सत्यानभवंतीतिद्योतयन्नाह॥ सुखोपविष्टइति॥ रामकृ
ष्णाभ्यांउरुअधिकंमानितः॥ १॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बंधयोऽसपिंडाः

हे तात हे सौम्य स्वागतं यथा तथा आगतः॥ स्वज्ञातिबंधूनां स्वेसुरुदः॥ ज्ञातयः सपिंडाः संबंधिनः तेषामपि किं॥ अनमीवं अपापं अदुःखं सुखमिति यावत्॥ अनाम
यमारोग्यं॥४॥ एवं प्रश्नोपि ममनातिसंगतः स्यात्॥ किंविति॥ अंग ॰अक्रूर॥ पृच्छेपृच्छामि॥ नः अस्माकं कुलस्यामयेरोगे नो मातुलरतिनामयस्पतस्मिन्॥ नः स्वानां
तातीनां तस्य प्र सुच॥५॥ अस्मत् अस्मिन्निमित्तं ह निनं दुःखं॥ आर्ययोः निरपराधयोः यद्धेतोः यो ॰ईमेव हेतुः तस्मात्॥६॥ हे सौम्य स्वानां वोदं अ घममसंजातं त

श्रीरुक्म उवाच॥ ॥ तात सौम्यागतः कच्चित्स्वागतं भद्रमस्तु वः॥ अपि स्वज्ञातिबंधूनामनमीवमनामयं॥४॥ किं नु नः कुशलं पृच्छे
एधमाने कुलामये॥ कंसे मातुलनाम्न्यंग स्वानां नस्तत्प्रजासु च॥५॥ अहो अस्मदभूद्भूरि पित्रोर्वृजिनमार्ययोः॥ यद्धेतोः पुत्रमरणं यद्धेतोर्बं
धनं तयोः॥६॥ दिष्ट्याद्य दर्शनं स्वानां मह्यं वः सौम्य कांक्षितं॥ संजातं वर्ण्यतां तात तवागमनकारणं॥७॥ पृष्टो भगवता सर्वं वर्णयामास माध
वः॥ वैरानुबंधं यदुषु वसुदेववधोद्यमं॥८॥ यत्संदेशो यदर्थं वा दूतः संप्रेषितः स्वयं॥ यदुक्तं नारदेनास्य स्वजन्मानकदुंदुभेः॥९॥ श्रुत्वा
ऽक्रूरवचः कृष्णो बलश्च परवीरहा॥ प्रहस्य नंदं पितरं राज्ञा दिष्टं विजज्ञतुः॥१०॥ गोपान्समादिशत्सोपि गृह्यतां सर्वगोरसः॥ उपाय
नानि गृह्णीध्वं युज्यंतां शकटानि च॥११॥ यास्यामः श्वो मधुपुरं दास्यामो नृपते रसान्॥ द्रक्ष्यामः सुमहत्पर्वः यांति जानपदाः किल॥ एवमा
घोषयत्क्षत्त्रा नंदगोपः स्वगोकुले॥१२॥ ॥ ॥

दिष्ट्यानंदं॥७॥ माधवः मधोर्वंशजः॥८॥ यः धनुर्मखछद्मासंदेशो यस्य यदर्थं चाणूरादिभिर्घातनार्थं॥ अस्य श्रीकृष्णस्य पुरतो वर्णयामासेत्यर्थः॥ स्वजन्म कृष्णजन्म॥
आनकदुंदुभेः सकाशात्॥९॥ विजज्ञतुः विशेषेण ज्ञापयामासतुः॥१०॥ सोपि नंदोपि गोपान्समादिशत्॥ तदेव दर्शयति॥ गृह्यतामित्यादिना॥ गोरसः क्षीरादिः॥ उपायना
नि उत्तमवस्तूनि॥११॥ रसान् घृतादीन्॥ राष्ट्रछलेनेदं सूचयति॥ अचिकित्स्यस्य रोगस्य चिकित्सार्थं रसान् दास्याम इति॥ क्षत्त्रा व्रजरक्षाधिकृतेन आघोषयत्॥ सर्वतो घोषितवा
न्॥१२॥

श्रीः

शुक उवाच

रामः
११२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताःकृष्णैकजीवनागोप्यः॥ तत्रदाशार्हक्रूरमागतमुपश्रुत्येति॥२३॥ व्याख्यालिंगान्याह॥ पंचभिः॥ काश्चिदिति॥ तेनश्रवणेनकृतोहृत्तापःतेनयःश्वासस्तेनम्लानामुख
श्रीर्यासांताःबभूवुरिति॥ दुकूलानिचवलयानिचकेशग्रंथयश्च॥ संस्रंतोदुकूलादयोयासांताः तथाभूताःकाश्चनबभूवुरिति॥२४॥ तस्यश्रीकृष्णस्यानुध्यानेननिवृत्ता॥
अशेषाश्चक्षुरादिवृत्तयोयासांताःस्वमंलोकंदेहमपिनजानंतिस्म॥ मुक्ताइवेति॥२५॥ अपरास्त्रियःसौरेर्गिरःस्मरंत्यःसंमुमुहुः॥ कथंभूताः अनुरागेणयत्स्मितंतेन

गोप्यस्तास्तदुपश्रुत्यबभूवुर्व्यथिताभृशं॥ रामकृष्णौपुरींनेतुमक्रूरंव्रजमागतं॥२३॥ काश्चित्तत्कृतहृत्तापश्वासम्लानमुखश्रियः॥
संस्रंसद्दुकूलवलयकेशग्रंथ्यश्चकाश्चन॥२४॥ अन्याश्चतदनुध्याननिवृत्ताशेषवृत्तयः॥ नाभ्यजानन्निमंलोकमात्मलोकंगताइ
व॥२५॥ स्मरंत्यश्चापराःशौरेरनुरागस्मितेरिताः॥ हृदिस्पृशश्चित्रपदागिरःसंमुमुहुःस्त्रियः॥२६॥ गतिसुललितांचेष्टांस्नि
ग्धहासावलोकनं॥ शोकापहानिनर्माणिप्रोद्दामचरितानिच॥२७॥ चिंतयंत्योमुकुंदस्यभीताविरहकातराः॥ समेताःसंघशः
प्रोचुरश्रुमुख्योऽच्युताशयाः॥२८॥ गोप्यऊचुः॥ अहोविधातस्तवनक्वचिद्दयासंयोज्यमैत्र्याप्रणयेनदेहिनः॥ तांश्चाकृता
र्थान्वियुनंक्ष्यपार्थकंविक्रीडितंतेऽर्भकचेष्टितंयथा॥२९॥ ॥श्रीरामाकृष्णायनमः॥ ॥श्रीरामचंद्रायनमः॥

ईरिताः॥ हृदिस्पृशंतीतिहृदिस्पृशःमनोज्ञाः॥ चित्राणिपदानियासुताः॥२६॥२७॥ विरहेणकातराविह्वलाः॥ अच्युतेआशयश्चित्तंयासांताः॥२८॥ हेस्र
संगतिंविधायवियोजयतीतिविधातारंप्रत्येकमाक्रोशंत्यआहुः॥ अहोइति॥ मैत्र्याहिताचरणेनप्रणयेनस्नेहेनचअकृतार्थान्अप्राप्तभोगानपितान्वियुनं
क्षिवियोजयसि॥ तस्मात्तवदया॥ बालिशोऽपित्वमित्याहुः॥ अपार्थकमिति॥२९॥ ॥श्रीरामायनमः॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० द० पू०
२२३

विगर्हितं च तत्वेदं कर्मेत्याहुः॥ यस्त्वमिति॥ शोकमपनुदता निःशोकापनोदः स चासौ स्मितलेशश्च गुरुहासः तेन सुंदरं मुकुंदस्य वक्त्रं सकलप्रदर्पपुनस्पर्शेऽन्य पारोक्ष्यमद्य त्व-
तां करोषि॥ अत[illegible]वकृतं कर्म असाधु निंद्यमित्यर्थः॥२०॥ किंच॥ दत्तापहासित्वेनातिक्रूरस्त्वमित्याहुः॥ क्रूरस्त्वमिति॥ नत्वक्रूरो हरति नाहमिति चेदत आहुः॥ अक्रूरसमा-
ख्ययेति॥ नहि [illegible]वं कर्तुमन्यः प्रभवति अतो नामांतरेण स्म धूर्तत्वमेवागतोसि॥ त्वं हे हरामि न युष्मच्चक्षुरिति चेत् नेत्यन्वयात् तेन चक्षुषा मधुद्विषः एकदेशो नेत्रवक्त्रा-
दौ त्वदीयं समग्रं तस्य हरिनैपुण्यमस्मदस्य दृष्टवत्सो वयं तच्चक्षुः॥ अयं भावः॥ मम सर्वं रहस्यमाभिर्ज्ञातमिति अमर्षेण वत्सलत्वं वियोजयन्त्यस्मान् अधा करोषीति॥२१॥

यस्त्वं प्रदर्श[illegible]सितकुंतलावृतं मुकुंदवक्त्रं सुकपोलमुन्नसं॥ शोकापनोदस्मितलेशसुंदरं करोषि पारोक्ष्यमसाधु ते कृतं॥२०॥ क्रूर-
स्त्वमक्रूरसमाख्ययास्म नश्चक्षुर्हि दत्तं हरसे बतान्यवत्॥ येनैकदेशेऽखिलसर्गसौष्ठवं त्वदीयमद्राक्ष्म वयं मधुद्विषः॥२१॥ न नंदसूनुः क्ष-
णभंगसौहृदः समीक्षते नः स्वकृतातुरा बत॥ विहाय गेहान्स्वजनान्सुतान्पतींस्तद्दास्यमद्धोपगता नवप्रियः॥२२॥ सुखं प्रभाता
रजनीयमाशिषः सत्या बभूवुः पुरयोषितां ध्रुवं॥ याः संप्रविष्टस्य मुखं व्रजस्पतेः पास्यंत्यपांगोत्कलितस्मितासवं॥२३॥ ॥ ॥

विधातारं विहाय परस्परमूचुः॥ न नंदसूनुरिति॥ बत खेदे क्षणभंगं अस्थिरं सौहृदं यस्य सः॥ गृहादीं विहाय अद्धा साक्षात्तस्मै एव दास्यमुपागताः॥ स्वकृतातुराः तत्कृते
नैव स्मितादिना परवशाः अपि नः अस्मान्न समीक्षिष्यते नवं नवं प्रियं यस्य सः अत एनं निवारयाम इति भावः॥२२॥ सेर्ष्यमूचुः॥ सुखं प्रभातेति॥ व्रजस्पतेः श्रीकृ-
ष्णस्य मुखं पास्यंति आदरेण द्रक्ष्यंति॥ कीदृशं तत्॥ अपांगेन नेत्रांतेन उत्कलितं उज्जृंभितं स्मितमेवासवो रसो यस्मिन् तत्॥ यद्वा॥ अपांगोत्कलितस्मितेन आसव-
रूपं यन्मुखं तत तस्य पानं मुखमेव संभावयति॥२३॥ ॥

राम:
२२३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुनुदिरे त्राणि दिनानि तथा न बत्तनाम ॥ तथाप्यस्मत्स्नेहारूढः पित्रादिभिश्च परावर्त्तित आगमिष्यतीत्याशंक्याहुः ॥ हे अबलाः तासां मधुवन्मंजुभिर्भाषितैर्वशीकृत
चित्ताः ॥ तथा तासां सलज्जस्मितैर्विलोलैर्भ्रमन् ॥ परवान् पित्रादिपरतंत्रोपि ॥ यद्वा ॥ व्रजे परे स्नेहबांधवाः संति यस्य स तथा ॥ मनस्वी धीरोपि ग्राम्या अविदग्धाः नः कथं प्र
तियास्यते प्रत्येष्यति न कथंचिदित्यर्थः ॥ २४ ॥ किंच ॥ अस्मद्दुःखस्य नाशो न्यएव वा भविष्यतीत्याहुः ॥ अद्येति ॥ तत्र पुरे दाशार्हादीनां दृशो दृष्टेर्महानुत्सवो भविष्य
ते भविष्यति ॥ ये देवकीसुतं द्रक्ष्यंति ॥ तथा ये चाध्वनि गच्छंतं द्रक्ष्यंति तेषामपि दृशो भविष्यतीति ॥ यद्वा ॥ दशारतिर्द्विधा या ॥ यांते दृशो नेत्राणि महोत्सवः भविष्यते ॥ प्राप्स्य

तासां मुकुंदो मधुमंजुभाषितैर्गृहीतचित्तः परवान्मनस्व्यपि ॥ कथं पुनर्नः प्रतियास्यते ऽबला ग्राम्याः सलज्जस्मितविभ्रमैर्भ्रमन् ॥ २४ ॥ अद्य
ध्रुवं तत्र दृशो भविष्यते दाशार्हभोजांधकवृष्णिसात्वतां ॥ महोत्सवः श्रीरमणं गुणास्पदं द्रक्ष्यंति ये चाध्वनि देवकीसुतं ॥ २५ ॥ मैतद्विधस्याक
रुणस्य नाम भूदक्रूर इत्येतदतीव दारुणः ॥ योसावनाश्वास्य सुदुःखितं जनं प्रियात्प्रियं नेष्यति पारमध्वनः ॥ २६ ॥ अनार्द्रधीरेष स
मास्थितो रथं तमन्वमी च त्वरयंति दुर्मदाः ॥ गो[illegible]पा अनोभिः स्थविरैरुपेक्षितं दैवं च नोद्य प्रतिकूलमीहते ॥ २७ ॥ ॥ ॥ ॥

ता ॥ प्राप्स्यथ स्यन्नवतेरात्मनेपदत्वात् ॥ २५ ॥ अक्रूरं प्रकोपं त्या आहुः ॥ मैतद्विधस्येति ॥ एषा विधा यस्य विध्यानं कर्म यस्य ॥ अत एव निःकृपस्याक्रूर इति शोभनं नाम भूत् ॥ त
त्र हेतुः ॥ अतीव[illegible]रूणः इत्यादि प्रियात्प्राणादपि प्रियतरं श्रीकृष्णं अध्वनः पारं अस्माद्दृग्गोचरस्थानादतिदूरदेशं नेष्यति ॥ २६ ॥ अतोधिगस्मज्जीवितमित्याहुः ॥ अ
नार्द्रधीरिति ॥ अ[illegible]नार्द्रा कृपिना धीर्यस्य स तावदेषकृष्णो रथमारूढः ॥ अस्यापि विनयमालक्ष्य स्थविरैश्चोपेक्षितं तेन बिनिवारितवंत इत्यर्थः ॥ किंच ॥ दैवं चेति
॥ अयं भावः ॥ यद्यस्माकं दैवमनुकूलं भवेत्तर्हि विघ्नैः कश्चिदेतेषां मध्ये प्रतिरुंध्येत ॥ अकस्माद्वज्रपातो वा भवेत् ॥ अन्यथा किंचिदनिष्टं स्यात् ॥ न तु तदस्तीति ॥ २७ ॥

मा
ति
किंचि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परस्परंसंमंत्र्यस्माउसममधिरूह्याहुः॥निवारयामासेत्ति॥अकरिष्यन्किंकरिष्यंति॥निमिषार्द्धदुस्त्यजात्मुकुंदसंगाद्विध्वंसितानि॥वियोगितानि॥अतएवदीनानिचे
तांसियेषांस्त्रियास्ताः॥एवंभूतानामस्माकंनमत्योरपिनयमित्यर्थः॥२८॥इतोपिकाकूरणादवरणंस्मा इसमेवावलंबनीयमित्याहुः॥हेगोप्यःयस्यललितंस्मितंच॥वल्गु
मंत्रश्चलीलावलोकश्च।परिरंभणंच॥अनुरागेणएतानियस्यांरासगोष्ठ्यांरासक्रीडासभायांनःअस्माभिःक्षणदारात्रयःक्षणमिवनीताः॥तममुंश्रीकृष्णंविनादु
त रंतंमः विरहदुःखंकथंनु अतितरेमनकथंचिदित्यर्थः॥२९॥किंच॥आस्तांतमोऽतितरणंजीवनमेवकथंस्यादित्याहुः॥यइति॥अह्नःक्षयेदिवावसाने॥खु ना

निवारयामःसमुपेत्यमाधवंकिंनोऽकरिष्यन्कुलवृद्धबांधवाः॥मुकुंदसंगान्निमिषार्द्धदुस्त्यजाद्दैवेनविध्वंसितदीनचेतसां॥२८॥य
स्यानुरागललितस्मितवल्गुमंत्रलीलावलोकपरिरंभणरासगोष्ठ्यां॥नीताःस्मनःक्षणमिवक्षणदाविनातंगोप्यःकथंन्वतित
रेमतमोदुरंतं॥२९॥योह्नःक्षयेव्रजमनंतसखःपरीतोगोपैर्विशन्खुररजश्छुरितालकस्रक्॥वेणुंक्वणन्स्मितकटाक्षनिरी
क्षणेनचित्तंक्षिणोत्यमुमृतेनुकथंभवेम॥३०॥ ॥श्रीशुकउ०॥ ॥एवंब्रुवाणाविरहातुराभृशंव्रजस्त्रियःकृष्णविषक्तमा
नसाः॥विसृज्यलज्जांरुरुदुःस्मसुस्वरंगोविंददामोदरमाधवेति॥३१॥स्त्रीणामेवंरुदंतीनामुदितेसवितर्यथ॥अक्रूरश्चोदयामा रामः१

ररजोभिश्छुरिताधूसराअलकाःस्रक्चयस्यसःव्रजंविशन्स्मितेनयत्कटाक्षनिरीक्षणंतेनचित्तंक्षिणोतिहरति॥अमुंश्रीकृष्णंवि सकृतमैत्र्यादिकोरथं॥३२॥ २२४
नातावत्कथंनभवेमजीवेमेति॥३०॥कृष्णेविषक्तानिमानसानियासांताः॥सुस्वरंमुच्चैः॥३१॥क्रूरमक्रूरतःश्रुत्वाकंसंकंसनिषूदनः॥गोपीमनोरथारामःसंपूरयंययौ॥ सरामः
स्त्रीणामितिता।अनादृत्यकृतमैत्र्यादिकःमैत्रंमित्रदैवत्यंसंध्योपासनंकृतंतदादिकर्मयेनसः॥३२॥ ॥श्रीरामकृष्णाभ्यांनमः॥ ॥

ते न२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वन्वसंक्रंत अन्वगछत्॥३३॥ अनुरंजिताः पराश्वस्त्वनिरात्तणा दिभिः किं चिरानंदिताः॥ प्रत्यादेशं प्रत्यारव्यानं॥३४॥ तप्यता संतप्यमानाः आयास्येशो प्रमागमिष्यामि विदूतवा
नैः॥३५॥ श्वात्त्वस्मनुस्थापिता आत्मनश्चित्ता नियाभिस्ताः॥ लेरव्यमयपुत्रिकाइवनिश्चला॥३६॥३७॥ हृत्ताणां रंदंसम्‌हुमुपब्रज्य॥३९॥ शत्रुत्याः शंकितः सन्नरथोपरिनिवे

गोपास्तमन्वसज्जंत नंदाः द्याश्चकैस्तत॥ आदायोपायनं भूरिक्तुंभान्‌गोरसंसंभृतान्॥३३॥ गोप्यश्च दयितं कृष्णमनुब्रज्यानुरंजिता
॥ प्रत्यादेशं भगवतः कांक्षंत्यश्चावतस्थिरे॥३४॥ तास्तथा तप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः॥ सांत्वयामास सप्रेमैरायास्य इति दौत्य
कैः॥३५॥ यावदालक्ष्यते केतुर्यावद्रेणू रथस्य च॥ अनुप्रस्थापितात्मानो लेख्यानीवोपलक्षिरे॥३६॥ ता निराशा निववृतुर्गोविंद ३।
विनिवर्तने॥ विशोका अहनी निन्युर्गायंत्यः प्रियचेष्टितं॥३७॥ भगवानपि संप्राप्तो रामाक्रूरयुतो नृप॥ रथेन वायुवेगेन का
लिंदीमघनाशिनीं॥३८॥ तत्रोपस्पृश्य पानीयं पीत्वा मृष्टं मणिप्रभं॥ वृक्षखंडमुपव्रज्य सरामो रथमाविशत्॥३९॥ अक्रूरस्ता
वुपामंत्र्य नि[...]रथोपरि॥ कालिंद्या ह्रदमागत्य स्नानं विधिवदाचरत्॥४०॥ निमज्य तस्मिन्सलिले जपन्ब्रह्म सनातनं॥ तावेव
ददृशेऽक्रूरो रामकृष्णौ समन्वितौ॥४१॥ तौ रथस्थौ कथमिह सुतावानकदुंदुभेः॥ तर्हि स्वित्स्यंदने न स्त इत्युन्मज्य व्यचष्टसः॥४२॥
तत्रापि च यथापूर्वमासीनौ पुनरेव सः॥ न्यमज्जद्दर्शनं यन्मे मृषा किं सलिले तयोः॥४३॥ भूयस्तत्रापि सोऽद्राक्षीत्स्तूयमानमहीश्वरं॥
सिद्धचारणगंधर्वैरसुरैर्नतकंधरैः॥४४॥ सहस्रशिरसं देवं सहस्रफणमौलिनं॥ नीलांबरं बिसश्वेतं शृंगैः श्वेतमिव स्थितं॥४५॥ ॥ ॥

नृप॥४०॥ ब्रह्मवेद[...]पन्॥ कथमेतौ बालौ कुतौ मत्ताविति शंकितचेतसे॥ अक्रूराय जले रूपमस्याश्चर्यं व्यदर्शयित॥४१॥४२॥४३॥ सिद्धादिभिः स्तूयमानं॥४४॥ सहस्रं शिरांसि
यस्य तं सहस्रफणेषु मौलयो यस्य संतातिन यातं॥ नीले अंबरे यस्य तं॥ बिसवत्कमलकंदवत् श्वेतं॥ शृंगैः शिखरैः श्वेतं कैलासमिव स्थितं॥४५॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्योत्संगे कुंडलीकृतदेहार्द्दविलोक्यपित्येकादशोनाम्नोकेनान्वयः ॥४६॥ शोननेत्रकौयस्य उन्नतानासिकायस्य तं च तं च ॥ शोननीकपोलौयस्य अरुणोधरोयस्य
तं च तं च ॥४७॥ तुंगावंसौयस्य ॥ उन्नरः स्थलेश्रीर्यस्य तं च तं च ॥ वलित्रयशान्तोदरं ॥ वलयः तिर्यक्कुनिम्नारेखायस्य संतितद्वलिवत् ॥ तच्चतत्पत्रवत् ॥ अश्व
त्थदलसदृशमुदरं यस्य तं ॥४८॥ कटितटं च श्रोणिश्च करनसदृशमूरुद्वयं च ॥ दृढ उच्चतत्कटितटश्रोणिकरनोरुद्वयं च तेनान्वितं ॥ यद्वा दृढ उच्चकटितटश्रोणिभ्यां

तस्योत्संगे घननृपामंपातकौशेयवाससं ॥ पुरुषं चतुर्भुजं शांतं पद्मपत्रारुणेक्षणं ॥४६॥ चारुप्रसन्नवदनं चारुहासनिरीक्षणं ॥ सु
नसं चारुकर्णसुकपोलारुणाधरं ॥४७॥ प्रलंबपीवरभुजं तुंगांसोरःस्थलश्रियं ॥ कंबुकंठं निम्ननाभिं वलिमत्पत्रोदरं ॥
४८॥ दृढकटितटश्रोणिकरनोरुद्वयान्वितं ॥ चारुजानुयुगं चारुजंघायुगलसंयुतं ॥४९॥ तुंगगुल्फारुणनखव्रातदीधिति
भिर्वृतं ॥ नवांगुल्यंगुष्ठदलैर्विलसत्पादपंकजं ॥५०॥ सुमहार्हमणिव्रातकिरीटकटकांगदैः ॥ कटिसूत्रब्रह्मसूत्रहारनूपुरकुंडलैः ॥
५१॥ भ्राजमानं पद्मकरं शंखचक्रगदाधरं ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं ॥५२॥ सुनंदनंदप्रमुखैः पार्षदैः सन
कादिभिः ॥ सुरेशैर्ब्रह्मरुद्राद्यैर्नवभिश्च द्विजोत्तमैः ॥५३॥ प्रल्हादनारदवसुप्रमुखैर्भागवतोत्तमैः ॥ स्तूयमानं पृथग्भावैर्वचोभिरमलात्मभि
:॥५४॥ 
करनोरुद्वयेन चान्वितं ॥४९॥ तुंगौ ईषदुन्नतौ गुल्फौ अरुणनखव्रातश्च तेषां दीधितिभिः ॥ तथा नवाः कोमला अंगुल्य अंगुष्ठेच तान्येव दैः पंकजं यस्य तं ॥५०॥
महार्हमणिव्रातायेषु तैः किरीटादिभिः ॥५१॥५२॥ पृथक्पृथक् भावो ऽभिप्रायो येषां तैः तत्र पार्षदैः स्वामीति स्तूयमानं सनकादिभिर्ब्रह्मेति ॥ ब्रह्माद्यैर्महेश्वर इति
॥ मरीच्यादिभिर्द्विजोत्तमैः परः प्रजापतिरिति ॥ प्रल्हादनारदवसवः प्रमुखा येषां तैः परं दैवतमिति च ॥ श्रेष्ठैर्वचोभिरिति वा ॥५४॥ ॥ ॥ ॥

भ्राजितैश्च विलक्षोभमानं पाद

विद्याः विद्येजीवानांमुक्तिहेतू।।माया तयोःकारणं।।शक्तिरूपादिनासंवितृज्ञानं।।अभिरस्याभिश्चनिषेवितं।।५५।।विलोक्यसुभृशंप्रीतः अस्मत्कृत्तोऽस्मा
वेवंभूतःपरमेश्वरइतिज्ञात्वेति।।५६।।५७।।इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांएकोनचत्वारिंशोऽध्यायः।।३९।। ।।चत्वारिंशेततोक्रूरंस्तवंमत्वेश्वरे
श्वरं।।प्रणम्यतत्त्वात्तुष्टावसगुणागुणभेदतः।।१।।नारायणंप्रणमतिनतोस्मीति।।हेतुत्वानंनतोस्मि।।त्वमस्मात्पिरबाःकृतोमांबालंनतोसितन्नाहे।।आद्यंपुरुषं

श्रियापुष्ट्यागिराकांत्याकीर्त्यातुष्ट्येलयोर्जया।।विद्ययाःविद्ययाशक्त्यामायया भिर्निषेवितं।।५५।।विलोक्यसुभृशंप्रीतोनतभावपर
मयायुतः।।हृष्यत्तनूरुहोनावपरिक्लिन्नात्मलोचनः।।५६।।गिरागद्गदयास्तौषीत्सत्वमालंब्यसात्वतः।।प्रणम्यमूर्ध्नावहितःकृतां
जलिपुटःशनैः।।५७।। ।।इतिश्रीभागवतेमहापुराणेदशमस्कंधेएकोनचत्वारिंशोऽध्यायः।।३९।। ।।अक्रूरउवाच।। ।।न
तोस्म्यहंत्वाखिलहेतुहेतुंनारायणंपुरुषमाद्यमव्ययं।।यन्नाभिजातादरविंदकोशाद्ब्रह्माविरासीद्यतएषलोकः।।१।।भूस्तोयम
ग्निःपवनःखमादिर्महानजादिर्मनइंद्रियाणि।।सर्वेंद्रियार्थाविबुधाश्चसर्वेयेहेतवस्तेजगतोंगभूताः।।२।। ।। ।। ।।

अव्ययंच।।अनादिनिधनमित्यर्थः।।कुतएतत्।।अखिलहेतूनांहेतुं~~सम्य~~।।सत्तुनारायणोनाहमितिचेत्तत्राह।।नारायणंत्वां।।किंनारायणइतिमांस्तौ
षिकाऽत्रस्तुतिःसत्यमेवेत्याह।।यन्नाभिजातादिति।।यतोब्रह्मणः।।१।।अखिलहेतुत्वंप्रपंचयति।।भूरिति।।खंस्यादिरहंकारः।।अजामायातस्याःआदिःपु
रुषःएतेयेजगतोहेतवस्तेसर्वेतेतवांगभूताःअंगाच्छरीरात्रिर्भूताः।।उपपसर्जनभूतावा।।२।। ।। ।। ।। ।।

हं

२हेतु२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी०द०पू० १२६

नन्वतिरस्कृतिः कथं क्रियते ॥ अहमेवान्यत उत सन्नस्त्वत्परतंत्रश्चेति चेदित्याशंक्य तत्वैषामायातत्वपारमार्थ्यं तु न कोपि वेदेत्याह ॥ नैत इति ॥ एते अजा आदिर्येषां
ते ॥ आत्मनस्ते स्वरूपं न विदुः ॥ अनात्मतया जडत्वेन कारणेन ॥ जडत्वे हेतुः ॥ गृहीताः प्रत्यक्त्वादिलिंदृशः ॥ न ह्यजडो दृग्गोचर इति भावः ॥ ननु जडा मां मा जानंतु भि
जीववस्तुतास्यतात्पत आह ॥ अज इति ॥ स अजो ब्रह्मापि ॥ अजायागुणैरनुबद्ध आवृतः गुण्यतां तं ते स्वरूपं न वेद अन्यः कुतोत्रास्पतातिपद्मप्रत्वादय आ
त्मानः स्वरूपं तत्व स्वरूपं च न विदुर्जडत्वादेव ॥ जीवस्कृतान् आत्मानं च वेत्ति न तु तत्स्वरूपमिति ॥ यथोक्तं ह्य सगुणोदेहो संवीः ज्ञामूनवोन्नतमात्रानात्मानमन्यं च
विदुः परं यत ॥ सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंतमीडे इति ॥ ३ ॥ ननु यदि केपि न जानंति कथं तर्हि संसारनिवृत्तिर्जीवानामित्याशंक्य साक्षात्दृग्गोचर

नैते स्वरूपं विदुरात्मनस्तेह्यजादयो नात्मतया गृहीताः ॥ अजोनुबद्धः सगुणैरजायागुणात्परं वेद न ते स्वरूपं ॥ ३ ॥ त्वां योगिनो यजंत्यद्धा म
हापुरुषमीश्वरं ॥ साध्यात्मं साधिभूतं च साधिदैवं च साधवः ॥ ४ ॥ त्रय्या च विद्यया केचित्त्वां वै वैतानिका जनाः ॥ यजंते विततैर्यज्ञैर्नानारूपा
मराख्यया ॥ ५ ॥

त्वेपि येन केनापि मार्गेण न जहति तांस्त्वं गम्योसीत्याह ॥ त्वां योगिन इति ॥ हे र एष गर्भ्नदयोदयोः ध्यात्माधिभूताधिदैवसाक्षिणं ॥
महापुरुष तदंतर्यामिस्वरूपमीश्वरं च यजंति ॥ तदेवं सांख्ययोगावेकोक्तेत्याकौ ॥ ४ ॥ त्रयीमार्गं कर्मयोगिनः त्वां वैत्वामेव यजंते ॥ ननु ते इंद्रवरुणादि
ख्याहान्यजंते न तु मामित्यत आह ॥ नानाविशेषइत्यादि निरूपाणि येषां ते ये ऽमरास्तेषामाख्यया नाम्ना त्वामेव यजंत इति अयं भावः ॥ ऐंद्रवारुणादि
सूक्तैरिंद्रादयः सर्वैश्वर्येण प्रकारपंतेन च सर्वेश्वरा बहवः संति ॥ अतो नाम्नैवेदेनत्वामेव यजंत इति ॥ तथा च श्रुतिः ॥ सम्प्रथमः संस्कृतिर्विश्वकर्मा
सम्प्रथमो मित्रावरुणो अग्निः ॥ सम्प्रथमो बृहस्पतिश्चिकित्वांस्तस्मा इंद्राय सुतमाजुहोतीति ॥ ५ ॥ ॥ ॥ त्र

रामः १२६

तन्मभेदेन दर्शयति त्रय्या चेति श्लोकद्वयेन वैतानिकाः कर्मयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानयज्ञेनसमाधिना॥६॥सांख्ययोगत्रयीमार्गाउक्ताः॥वैष्णवशैवमार्गावाहद्वयेन॥अन्येचेति॥संस्कृतात्मानः वैष्णवशैवदीक्षयादीक्षिताः संतः॥तेत्वयाभिहि
तेनपंचरात्रादिविधिना॥त्वन्मयाः त्वन्मयत्वेनात्मानंचिंतयंतःवासुदेवैकप्रधानाइतिवा॥वासुदेवसंकर्षणप्रद्युम्नानिरुद्धभेदेनबहुमूर्तिंनारायणरूपेणैकमूर्तिकं
त्वामेवयजंति॥७॥बह्वाचार्यविभेदेनेतिनानाशैवपाशुपतादिमार्गेण॥८॥येत्विंद्रदेवताभक्तास्तेपित्वामेवयजंतीत्याह॥सर्वएवेति॥हेसर्वदेवमय
॥नन्वेतेपरस्परदेवताधिक्षेपकलहव्याकुलचित्ताःकथमेकमेवयजंतीत्युच्यतेतत्राह॥यद्यप्यन्यधियइतिबुद्धिमात्रभेदोनवस्तुमात्रभेदइत्यर्थः॥

एकेत्वाखिलकर्माणिसंन्यस्योपशमंगताः॥ज्ञानिनोज्ञानयज्ञेनयजंतिज्ञानविग्रहं॥६॥अन्येचसंस्कृतात्मानोविधिनाभिहितेनते॥
यजंतित्वन्मयास्त्वांवैबहुमूर्त्यैकमूर्तिकं॥७॥त्वामेवान्येशिवोक्तेनमार्गेणशिवरूपिणं॥बह्वाचार्यविभेदेनभगवन्समुपासते॥८॥स
र्वएवयजंतित्वांसर्वदेवमयेश्वरं॥येप्यन्यदेवताभक्तायद्यप्यन्यधियःप्रभो॥९॥यथाद्रिप्रभवानद्यःपर्जन्यापूरिताःप्रभो॥विशंतिसर्वतः
सिंधुंतद्वत्त्वांगतयोंततः॥१०॥सत्वंरजस्तमइतिभवतःप्रकृतेर्गुणाः॥तेषुहिप्राकृताःप्रोताः आब्रह्मस्थावरादयः॥११॥ ॥ ॥

९॥तस्मात्सर्वेमार्गास्त्वय्येवपर्यवस्यंतीतिसदृष्टांतमाह॥यथेति॥अद्रेःसकाशात्सर्वतःप्रभवंतियाःनद्यःताःपुनःपर्जन्येनापूरिताबहुस्रोतसःसंत्यःसर्वतः
सिंधुमेवविशंतियथा॥तद्वदेतागतयोमार्गाअंततस्त्वामेवविशंति॥१०॥अत्रहेतुमाह॥सत्वमिति॥भवतःशक्तिर्याप्रकृतिःतस्याःसत्वादयोगुणाः॥अतःप्राकृताः प्रकृति
कार्योपाधयोब्रह्मपर्यंताःस्थावरादयोजीवाःस्वोपाधिद्वारातेषुगुणेषुप्रोताःप्रविष्टाः॥तेचप्रकृतौ॥साचत्वयीति॥अतःक्रमेणोपाधिलयात्सर्वेपित्वामेववि
शंतीति॥यद्वा॥भवतःप्रकृतेर्गुणेषुप्रोताब्रह्मादयोनव्यतिरिक्तानसंति॥अतस्त्वमेवसर्वदेवमयइति॥११॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ ८॰ पू॰
११७

नतुनवतःप्रकृतेरितिवदन्ममापिप्रकृतिसंबंधंप्रवाषितेश्वतेषांममचकोविशेषःस्यादित्याशंक्यविशेषमाह॥त्वम्यमिति॥अविषक्तदृष्टयेअलिप्तबुद्धये॥कुतः॥सर्वात्मनेस्वव्यतिरिक्ताभावाद्विषक्तदृष्टयेरित्यर्थः॥किंच॥सर्वधियांसाक्षिणे॥सर्वबुद्धिसाक्षित्वान्नक्वापिबुद्धिलेपइत्यर्थः॥एतेरेवसंसरंतीत्याह॥गुणप्रवाहइति॥देवनृति॥यंचआत्मनोयेषांतेषुदेवादिशरीराभिमानिष्वित्यर्थः॥त्वदविद्ययाकृतोयुगुणप्रवाहःप्रवर्त्ततेअतोमहान्विशेषः॥२२॥सर्वात्मनइत्यनेनोक्तंसगुणंरूपंस्तौति॥अग्निर्मुखमितिदशभ्यां॥अग्न्यादानन्नूर्द्धेश्वरावयवत्वाविधीयतेयोयमग्निःसतवमुखमित्यादिवचनव्यक्त्या॥रं

त्र्यंतंनमस्ते॰स्वविषक्तदृष्टयेसर्वात्मनेसर्वधियांचसाक्षिणे॥गुणप्रवाहोयमविद्ययाःसकृत्प्रवर्त्ततेदेवनृतिर्यगात्मसु॥२२॥अग्निर्मुखं
ते॰वनिरंघ्रिरीक्षणंसूर्योनभोनाभिरथोदिशःश्रुतिः॥द्यौःकंसुरेंद्रास्तवबाहवो॰र्णवाःकुक्षिर्मरुत्प्राणबलंप्रकल्पितं॥२३॥
रोमाणिवृक्षौषधयःशिरोरुहामेघाःपरस्यास्थिनखानितेऽद्रयः॥निमेषणंरात्र्यहनीप्रजापतिर्मेढ्रस्तुवृष्टिस्तववीर्यमिष्य
ते॥२४॥त्वय्यव्ययात्मन्पुरुषेप्रकल्पितालोकाःसपालाःबहुजीवसंकुलाः॥यथाजलेसंजिहतेजलौकसोप्युदुंबरेवामशकामनोम
ये॥२५॥

द्र्यणंचक्षुः॥श्रुतिःश्रवणेंद्रियं॥कंमूर्द्धा॥प्राणश्चबलंचततत्॥२३॥अद्रयःपरस्यतेअस्थिनखानि॥२४॥नकेवलमेतावत्॥किंतुसर्वोप्ययंप्रपंचस्त्वद्वपुरवभूतएवेतिवदन्नेवंसत्यपिप्रपंचस्यविकारास्त्वयिनप्रसज्यंतेतस्यकल्पितत्वादित्याह॥त्वयीतिअव्ययात्मनिपुरुषेपूर्णेलोकादयःसंजिहतेप्रचलंतिहेअव्ययात्मन्नितिवा॥कथंभूतेत्वयिमनोमयेमनःप्रधानेमनोवृत्तिव्यंग्ये॥दृश्यतेत्वग्र्ययाबुद्ध्या॥मनसैवानुद्रष्टव्यइत्यादिश्रुतेः॥जलेयथाजलौकसःसूक्ष्माःप्राणिपउराशयः॥यथावोदुंबरांतःकेशरेषुमशकाःपरस्परवार्त्ताऽनभिज्ञाःएवमनंतानिब्रह्मांडानित्वयिसंचरंतीत्यर्थः॥२५॥ ॥

९ढूजमोदया३

रामः ८
११७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मादेवं नूतं तवस्वरूपं दुरवगाहमिति ॥ त्वदवतारकथामृतैमेवसंतः सेवंतइत्याह ॥ यानियानीति ॥ आमृष्टपरिमार्जिता शुकोयेषां तेस्मि ॥ २६ ॥ अतः स्वयमप्यवतारा

न्नमस्यति ॥ नमइति ॥ हयशीर्षेहयग्रीवायमधुकैटभयोर्मृत्यवेहंत्रे ॥ २७ ॥ अकूपारायकूर्माय ॥ क्षितिमुद्धारोयस्यतस्मै ॥ २८ ॥ २९ ॥ नृगणांपतयेपरशुरामाय ॥ २० ॥

संकर्षणंरामंचव्यूहरूपेणामतिनमस्करोति ॥ २१ ॥ २२ ॥ एवंस्तुत्वाबंधमोक्षंप्रार्थयितुमाह ॥ भगवन्निति ॥ असतिदेहेदोग्गाहंअभिमानोयस्यसः ॥ आसन्नप्रा प्रण

यानियानीहरूपाणिक्रीडनार्थंबिभर्षिहि ॥ तैरामृष्टशुचोलोकामुदागायंतितेयशः ॥ २६ ॥ नमःकारणमत्स्यायप्रलयाब्धिचरायच ॥ ह

यशीर्ष्णेनमस्तुभ्यंमधुकैटभमृत्यवे ॥ २७ ॥ अकूपारायबृहतेनमोमंदरधारिणे ॥ क्षित्युद्धारविहारायनमःशूकरमूर्त्तये ॥ २८ ॥ नमस्तेद्भु

तसिंहायसाधुलोकभयापह ॥ वामनायनमस्तुभ्यंक्रांतत्रिभुवनायच ॥ २९ ॥ नमोभृगूणांपतयेदृप्तक्षत्रवनछिदे ॥ नमस्तेरघुवर्या

यरावणांतकरायच ॥ २० ॥ नमस्तेवासुदेवायनमःसंकर्षणायच ॥ प्रद्युम्नायानिरुद्धायसात्वतांपतयेनमः ॥ २१ ॥ नमोबुद्धायशुद्धायदै

त्यदानवमोहिने ॥ म्लेच्छप्रायक्षत्रहंत्रेनमस्तेकल्किरूपिणे ॥ २२ ॥ भगव[illegible]न्सर्वलोकोयंमोहितस्तवमायया ॥ अहंममेत्यसद्[illegible]हो कर्म कृ[illegible]

भ्राम्यतेकर्मवर्त्मसु ॥ २३ ॥ अहंचात्मात्मजागारदारार्थस्वजनादिषु ॥ भ्रमामिस्वप्नकल्पेषुमूढःसत्यधियाप्रभो ॥ २४ ॥ अनित्याना

त्मदुःखेषुविपर्ययमतिर्ह्यहं ॥ द्वंद्वारामस्तमोविष्टोनजानेत्वात्मनःप्रियं ॥ २५ ॥ ॥ होयस्येतिवा ॥ २३ ॥ नकेवलमयंलोकःअहमपितथैवेत्या

ह ॥ अहंचेति ॥ २४ ॥ मूढत्वमेवप्रकटयति ॥ अनित्येष्विति ॥ विपर्ययमतिरिति ॥ अनित्येकर्मफलेनित्यमितिः ॥ अनात्मनिदेहेआत्मेतिदुःखरूपेगृहादौसुखमितिवि

परीतमतिरित्यर्थः ॥ द्वंद्वेषुसुखदुःखादिषुआरमतिक्रीडतीतितथासः ॥ ननुदुःखेकथंरतिस्तत्राह ॥ तमोविष्टःतमसाव्याप्तः ॥ अतआत्मनःप्रियंप्रेमास्पदंत्वांनजा

नइत्यर्थः ॥ २५ ॥ ॥ ख

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नियं ३

तदेव सदृष्टांतमाह ॥ यथेति ॥ तस्माज्जलादुद्भवंतीति तदुद्भवास्तृणादयस्तैः ॥ तथा मायोत्थैस्त्वामहं हित्वा पराङ्मुखो देहाद्यभिमुखो वर्त्ते इति ॥२६॥ ननु चैवं ज्ञानतः कुतो विषयाभिमुखता तत्राह ॥ नोत्सह इति ॥ कृपणा विषयवासनायुक्ता धीर्यस्य सः ॥ अत एव कामकर्मभ्यां हतं क्षुभितं ॥ इंद्रियैश्च बलिभिर्विषयसंयुक्तैरितस्तत आकृष्यमाणं मनः रोद्धुं न शक्नोमीति ॥२७॥ तदेवमस्वतंत्रो यः सोऽहं तवांघ्रिमुपगतः शरणं प्राप्तः ॥ ननु इंद्रियपरतंत्रस्यैतदपि कुतस्तत्राह ॥ तच्चापीति ॥ हे ईश अंतर्यामिन् ॥ तत् अंघ्र्युपगमनं चातो भवतोऽनुग्रह एव मन्ये ॥ अनुग्रहे सतीति वा ॥ ननु सतां सेवयेदं भवति किं मदनुग्रहेणेत्यत आह ॥ पुंस इति ॥ जीवस्य संसारस्यापवर्गः समाप्तिर्यदा त्वत्कृपया भवेत् ॥ संभावनास्पदं भवति ॥ हे अब्जनाभ ॥ तदा सदुपासनासंपर्यवसितये त्वयि मतिर्भ

यथाऽबुधो जलं हित्वा प्रतिच्छन्नं तदुद्भवैः ॥ अभ्येति मृगतृष्णां वै तद्वत्त्वाहं पराङ्मुखः ॥२६॥ नोत्सहेऽहं कृपणधीः कामकर्महतं मनः ॥ रोद्धुं प्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्ततः ॥२७॥ सोऽहं तवांघ्र्युपगतोऽस्म्यसतां दुरापं तच्चाप्यहं भवदनुग्रह ईश मन्ये ॥ पुंसो भवेद्यर्हि संसरणापवर्गस्त्वय्यब्जनाभ सदुपासनया मतिः स्यात् ॥२८॥ नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे ॥ पुरुषेशप्रधानाय ब्रह्मणेऽनंतशक्तये ॥२९॥

वेत् ॥ त्वत्कृपां विना न सत्सेवा न तरां त्वन्मतिः न तमां मुक्तिरित्यर्थः ॥२८॥ पादयोः पतन् प्रार्थयते द्वयेन नम इति ॥ विज्ञानमेव मात्रा मूर्त्तिर्यस्य तस्मै ॥ अत एव सर्वप्रत्ययहेतवे समस्तज्ञानकारणाय ॥ किंच पुरुषेशप्रधानाय पुरुषस्येशाः सुखदुःखप्रापकाः कालकर्मस्वभावादयः तेषां प्रधानाय नियंत्रे ॥ कुतः ब्रह्मणे परिपूर्णाय ॥ किंच ॥ अनंतशक्तये अनंताः शक्तयो यस्य ॥ यद्वा ॥ अनंता मायाख्या शक्तिर्यस्य तस्मै ॥ अथवा ॥ प्रधानं प्रकृतिः पुरुषस्तत्प्रवर्तकः ॥ ईशः कालः ॥ एतत्त्रितयात्मने ब्रह्मणे ॥ वदंति भगवान् ॥ प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः ॥ सतोऽभिव्यंजकः कालो ब्रह्म तत्त्रितयं त्वहमिति ॥२९॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं

सर्वप्रत्ययहेतुत्वमभिव्यंजनत्वमितिनमस्त इति ॥ वासुदेवायचित्ताधिष्ठात्रे ॥ सर्वभूतक्षयाय क्षयो आश्रयः अहंकारश्च प्राणिनामाश्रयः ततश्चाहंकाराधिष्ठात्रे संकर्षणा
येत्यर्थः ॥ हृषीकेशेतिबुद्धिमनसोरधिष्ठात्रोः प्रद्युम्नानिरुद्धयोरेकीकृत्यग्रहणं ॥ शरणंगतंमांपाहीतिप्रार्थनं ॥ ३० ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीका
यांचत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ एकचत्वारिंशके ऽह्न्य जनकं प्रविशत्पुरं ॥ ततोवरान्दातुंतुष्टः सुदाम्नोवायकस्यच ॥ सशंकमक्रूरमनः प्रमोघस्वधामसंदर्शनसत्कृपा

नमस्तेवासुदेवायसर्वभूतक्षयायच ॥ हृषीकेशनमस्तुभ्यंप्रपन्नंपाहिमांप्रभो ॥ ३० ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेचत्वा
रिंशोऽध्यायः ॥ ४० ॥ श्रीशुक उ० ॥ ॥ स्तुवतस्तस्यभगवान्दर्शयित्वाजलेवपुः ॥ भूयः समाहरत्कृष्णोनटोनाट्यमिवात्मनः ॥ १ ॥ सो
पिचांतर्हितंवीक्ष्यजलादुन्मज्य सत्वरः ॥ कृत्वाचावश्यकंसर्वंविस्मितोरथमागमत् ॥ २ ॥ तमपृच्छद्धृषीकेशः किंतेदृष्टमिवा
द्भुतं ॥ भूमौवियतितोयेवातथात्वांलक्षयामहे ॥ ३ ॥ अक्रूरउवाच ॥ ॥ अद्भुतानीहयावंतिभूमौवियतिवाजले ॥ त्वयिविश्वा
त्मकेतानिकिंमेदृष्टंविपश्यतः ॥ ४ ॥ यत्राद्भुतानिसर्वाणिभूमौवियतिवाजले ॥ तंत्वानुपश्यतोब्रह्मन्किमेदृष्टमिहाद्भुतं ॥ ५ ॥
इत्युक्त्वाचोदयामासस्यंदनंगांदिनीसुतः ॥ मथुरामनयद्रामंकृष्णंचैवदिनात्यये ॥ ६ ॥ ॥ ॥ तः ॥ स्वराजधानींमथुरामपश्यद्दलंल

तानंतमहोत्सवाद्यां ॥ २३ ॥ भूमौवियतिजलेवा ॥ यावंत्यद्भुतानितानित्वय्येवसंति ॥ तंत्वांविपश्यतोमेकिमद्भुतमदृष्टं ॥ अपितुसर्वंदृष्टमित्यर्थः ॥ ४ ॥ ननुमत्वाः शे
ःपूर्वमेवत्वंविस्मितमुखोलक्षितोसि ॥ अतोभूमौवियतिजलेवाकिमप्यद्भुतंदृष्टमेवेतिचेत्तत्राह ॥ यत्राद्भुतानीति ॥ यत्रत्वयिसर्वाण्यद्भुतानितंत्वानुपश्यतोमे
अन्यत्रभूम्यादौकिमद्भुतंदृष्टं त्वांविनानतत्रकिंचिदद्भुतमित्यर्थः ॥ हेब्रह्मन्भूदेपरमेश्वरेत्यर्थः ॥ ब्रह्मन्नितिवापाठः ॥ ५ ॥ गांदिनीसुतः अक्रूरः ॥ ६ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्टिंनाददुः पश्यंतएवस्थिताः इत्यर्थः ॥७॥ रामकृष्णागमनंप्रतीक्षमाणाः स्थिताः ॥८॥ प्रश्रितं विनीतं ॥९॥ स्वगृहंचप्रविशतां ॥ अवमुच्य उत्तार्य विश्राम्ये
त्यर्थः ॥१०॥११॥ साग्रजः सहगोपालैरित्यर्थः ॥१२॥ यच्छौचेनयस्यपादरजसः क्षालनोदकेनगङ्गांगणस्थितेन ॥१३॥ श्लोक्यः पुण्यकीर्तिः ॥ एकांतभक्तानांयागतिस्तां

मार्गेग्रामजनाराजंस्तत्रतत्रोपसंगताः ॥ वसुदेवसुतौवीक्ष्यप्रीतादृष्टिंनचाददुः ॥७॥ तावद्व्रजौकसस्तत्रनंदगोपादयोऽग्रतः ॥
ल पुरोपवनमासाद्यप्रतीक्षंतोऽवस्थिरे ॥८॥ तान्समेत्याहभगवानक्रूरंजगदीश्वरः ॥ गृहीत्वापाणिनापाणिंप्रश्रितंप्रहसन्निव ॥
९॥ भवान्प्रविशतामग्रेसहयानः पुरींगृहं ॥ वयंत्विहावमुच्याथततोद्रक्ष्यामहेपुरीं ॥१०॥ अक्रूरउ॰ ॥ ॥ नाहंभवद्भ्यांरहितः
प्रवेक्ष्येमथुरांप्रभो ॥ त्यक्तुंनार्हसिमांनाथभक्तंतेभक्तवत्सल ॥११॥ आगच्छयामगेहान्नः सनाथान्कुर्वधोक्षज ॥ सहाग्रजः स
गोपालैः सुहृद्भिश्चसुहृत्तम ॥१२॥ पुनीहिपादरजसागृहान्नोगृहमेधिनां ॥ यच्छौचेनानुतृप्यंतिपितरः साग्नयः सुराः ॥१३॥
अवनिज्यांघ्रियुगलमासीच्छ्लोक्योबलिर्महान् ॥ ऐश्वर्यमतुलं लेभेगतिंचैकांतिनांतुया ॥१४॥ आपस्तेंऽघ्र्यवनेनिज्यस्त्रींल्लो
कांछुचयोऽपुनन् ॥ शिरसाधत्तयाः शर्वः स्वर्याताः सगरात्मजाः ॥१५॥ देवदेवजगन्नाथपुण्यश्रवणकीर्तन ॥ यदूत्तमोत्तमश्लो
क नारायणनमोस्तुते ॥१६॥ श्रीभगवानुवाच ॥ ॥ आयास्येभवतोगेहमहमार्यसमन्वितः ॥ यदुचक्रद्रुहंहत्वावितरिष्येसुहृत्प्रियं ॥ ॥१७॥ 

लेभे ॥१४॥ अपुनन्पवित्रीचक्रुः ॥ याभिरद्भिः स्वः स्वर्गंप्राप्ताः ॥१५॥ प्रार्थ्यमानोनमस्करोति देवदेवेति ॥ अतः परमन्यच्छ्रेयोनास्तीतिबद्धाञ्जलिः संबो
त धयति ॥१६॥ आर्योतावत्यदुचक्रायद्रुह्यतीतियदुचक्रध्रुक्तंकंसंहत्वासुहृदांप्रियंवितरिष्येदास्यामि ॥१७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामकृष्णावानीताविति स्वस्ति तं कंसमर्विघ्नसमर्प्येति ॥१८॥ गोपैः परिवारितः ॥ प्राविशत् ॥१९॥ श्रीकृष्णः दृष्टं पुरीमनुवर्णयति चतुर्भिः ॥ ददर्शतामिति ॥ स्फा-
टिकानि स्फटिकमयानि तुंगानि उच्चानि गोपुराणि पुरद्वाराणि चयस्यां तां ॥ बृहंति हैममयानि कपाटानि तोरणानि च यस्यां तां ताम्रं च आरः आरकूटश्च तन्म-
याश्च कोष्ठधान्यागाराश्च शालादयश्च यस्यां तां ॥ परिखाः परितः खातगर्तास्ताभिर्दुरासदां दुर्गमां ॥ उद्यानानि दूरस्थानि वनानि ॥ रम्याणि उपवनानि च नि-
कटानि तैरुपशोभितां ॥२०॥ सौवर्णाः शृंगाटकाश्चतुःपंथाः ॥ हर्म्याणि धनिनां गृहाश्च ॥ निःकुटाः गृहोचिता आरामाश्च तैः श्रेणी नामैकरूपशिल्पो-

श्रीशुक उवाच ॥ ॥ एवमुक्तो भगवतासौ क्रूरो विमना रथ ॥ पुरं प्रविष्टः कंसाय कर्माविद्य गृहं ययौ ॥१८॥ अथापराह्ने भग-
वान् कृष्णः संकर्षणान्वितः ॥ मथुरां प्राविशत् गोपैर्दिदृक्षुः परिवारितः ॥१९॥ ददर्श तां स्फाटिकतुंगगोपुरद्वारां बृहद्धेमक-
पाटतोरणां ॥ ताम्रारकोष्ठां परिखादुरासदामुद्यानरम्योपवनोपशोभितां ॥२०॥ सौवर्णशृंगाटकहर्म्यनिःकुटैः श्रे-
णीसभाभिर्भवनैरुपस्कृतां ॥ वैदूर्यवज्रामलनीलविद्रुमैर्मुक्ताहरिद्भिर्वलभीषु वेदिषु ॥२१॥ जुष्टेषु जालामुखरंध्रकुट्टिमे-
ष्वाविष्टपारावतबर्हिना[illegible]दितां ॥ संसिक्तरथ्यापणमार्गचत्वरां प्रकीर्णमाल्यांकुरलाजतंडुलां ॥२२॥ ॥ ॥

पजाविनां सभाभिः रूपसंवेशनस्थानैश्च ॥ भवनैः सामान्यगृहैश्चोपस्कृतां अलंकृतां अमलः स्फटिकः हरितो मरकतः ॥ वैदूर्यादिरत्नैर्जुष्टेषु वलभ्यादिषु आविष्टैः पाराव-
तैर्बर्हिभिश्च नादितां ॥ तत्र वलभी गृहपुरोभागेषु वक्रासारुछादनानि ॥ वेदयो वलभीनामधोदेशे विरचिताः वृक्षं न वेदिकाः ॥ जालामुखरंध्राणि गवाक्षछिद्राणि ॥ कुट्टिमानि म-
णिबद्धभूमयस्तेष्विति ॥ रथ्या राजमार्गाः ॥ आपणाः पण्यविपणयः मार्गा अन्ये च चत्वराण्यंगणानि ॥ संसिक्तानि रथ्यादीनि यस्यां तां ॥ प्रकीर्णमाल्यादयो यस्यां
तां ॥२२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तयास्वलंकृतानिद्वाराणियेषांतेमध्डायस्यांतां ॥ कैः आपूर्णैः कुंभैः दध्याचंदनेनचर्चितैः सिक्तैः ॥ प्रसूनानांदामानांचावलयोयेषुतैः दृष्टैः फलगुच्छैः उपल
क्षितारंभाः क्रमुकाश्चतत्सहितैः सकेतुभिः केतवोध्वजास्तत्सहितैः ॥ पदिकावितस्तिविस्तारपट्टवस्त्राणितत्सहितैः ॥ तत्रेयंरीतिः द्वारेषुनयतस्तंडुलानासु
परिकुंभाः तत्परितः प्रसूनावलयः ॥ कंठेपदिकाः ॥ मुखेचूतादिपल्लवाः ॥ तदुपरिपात्रांतरेदीपावलयः तत्संनिधौरंभाः क्रमुकाः केतवस्तोरणानिचेति ॥ २३ ॥
नरेंद्रवर्त्मनाराजन्ममार्गेणतांपुरींसंप्रविष्टोविलिधितायातां ॥ २४ ॥ औत्सुक्यमेवाहद्वयेन ॥ काश्चिदिति ॥ विपर्ययकृद्विपरीतंधृतानिवस्त्राणिभूषणानिच

आपूर्णकुंभैर्दधिचंदनोक्षितैः प्रसूनदामावलिभिः सपल्लवैः ॥ सरंभारंभाक्रमुकैः सकेतुभिः स्वलंकृतद्वारगृहांसपदिकैः ॥ २३ ॥ तां
तैस्त संप्रविष्टेवसुदेवनंदनेनृपेयस्मिन्नरेंद्रवर्त्मना ॥ द्रष्टुंसमाजग्मुरलंत्वरिताः पुरस्त्रियोहर्म्याणिचैवारुरुहुर्नृपोत्सुकाः ॥ २४ ॥ काश्चिद्वि
पर्ययधृतवस्त्रभूषणाविस्मृत्यचैकंयुगलेषुयापराः ॥ कृतैकपत्रश्रवणैकनूपुरानांक्त्वाद्वितीयंत्वपरास्तुलोचनं ॥ २५ ॥ अश्नंत्यए
कास्तदपास्यसोत्सवा अभ्यज्यमाना अकृतोपमज्जनाः ॥ स्वपंत्यउच्छायनिशम्यनिःस्वनंप्रपाययंत्योर्भमपोह्यमातरः ॥ २६ ॥ म
नांसिताखामरविंदलोचनः प्रगल्भलीलाहसितावलोकनैः ॥ जहारमत्तद्विरदेंद्रविक्रमोदृशांददच्छ्रीरमणात्मनोत्सवं ॥ २७ ॥ ॥

याभिस्ताः ॥ युगलेषुधार्येषुकुंडलकंकणादिषु एकंविस्मृत्यसमाययुः ॥ कृतमेकमेवपत्रंययोस्तेश्रवणेयासां ॥ एकमेवनूपुरंचरणाभरणंयासांताश्चताश्च ॥ नांक्त्वाए
कस्मिन्नेवलोचनेकज्जलंनिधायैव ॥ २५ ॥ ततभोजनंहित्वा ॥ अभ्यज्यमानाः सखीभिः क्रियमाणतैलाभ्यंगाः ॥ अकृतस्नानाः ॥ अपोह्यनिरस्य ॥ २६ ॥ प्रगल्भाया
लीलाताभिर्हसितानांहृतानिचैतैः ॥ श्रीयंरमयतीतिश्रीरमणस्तेनात्मनावपुषाताखांदृशांउत्सवंददत्मनांसिजहार ॥ २७ ॥ ॥ श्रीरामकृष्णायनमः ॥ ॥ रामः
१२०

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुहुः श्रुतलालनरुतचेतसः स यस्तं दृष्ट्वा तस्य प्रेक्षणं च उस्मितं च तदेव सुधा तया उक्षणं सेचनं तेन लब्धो मानो याभिस्ताः ॥ दृशा उद्ग्रा द्याल्लितेन नेत्रद्वारेणात्मनि मनसि लब्धं प्राप्तं परिष्वज्य तदप्राप्तिजनितमनंतमाधिं व्यथां जहुः ॥ हे अरिंदम निर्जितकाम इति सबोधनं शृंगाररसे निमग्नो माभूरिति

दृष्ट्वा मुहुः श्रुतमनुद्रुतचेतसस्तं तत्प्रेक्षणोत्स्मितसुधोक्षणलब्धमानाः ॥ आनंदमूर्तिमुपगुह्य दृशात्मलब्धं हृष्यत्त्वचो जहुरनंतमरिंदमाधिं ॥२९॥ प्रासादशिखरारूढाः प्रीत्युत्फुल्लमुखांबुजाः ॥ अभ्यवर्षन्सौमनस्यैः प्रमदाबलकेशवौ ॥३०॥ दध्यक्षतैः सोदपात्रैः स्रग्गंधैरभ्युपायनैः ॥ तावानर्चुः प्रमुदितास्तत्र तत्र द्विजातयः ॥३१॥ ऊचुः पौरा अहो गोप्यस्तपः किमचरन्महत् ॥ या ह्येतावनुपश्यंति नरलोकमहोत्सवौ ॥३२॥ रजकं कंचिदायांतं रंगकारं गदाग्रजः ॥ दृष्ट्वायाचत वासांसि धौतान्यत्युत्तमानि च ॥३३॥ देह्यावयोः समुचितान्यंग वासांसि चार्हतोः ॥ भविष्यति परं श्रेयो दातुस्ते नात्र संशयः ॥३४॥ स याचितो भगवता परिपूर्णेन सर्वतः ॥ साक्षेपं रुषितः प्राह भृत्यो राज्ञः सुदुर्मदः ॥३५॥ ईदृशान्येव वासांसि नित्यं गिरिवनेचराः ॥ परिधत्त किमुद्वृत्ता राजद्रव्याण्यभीप्सथ ॥३६॥ याताशु बालिशा मैवं प्रार्थ्यं यदि जिजीविषा ॥ बध्नंति घ्नंति लुंपंति दृप्तं राजकुलानि वै ॥३७॥ एवं विकत्थमानस्य कुपितो देवकीसुतः ॥ रजकस्य कराग्रेण शिरः [illegible]ःकायादपाहरत् ॥३८॥ तस्यानुजीविनः सर्वे वासःकोशान्विसृज्य वै ॥ दुद्रुवुः सर्वतो मार्गं वासांसि जगृहेऽच्युतः ॥३९॥ वसित्वात्मप्रियं वस्त्रं कृष्णः संकर्षणस्तथा ॥ शेषाण्यादत्त गोपेभ्यो विसृज्य भुवि कानिचित् ॥४०॥

॥२९॥ सौमनस्यैः शोभनकुसुमसमूहैः शोभनमनोभावैर्वा ॥३०॥ पौराः पुरस्त्रियः ॥३२॥ रजको वस्त्रनिर्णेजकः ॥ स एव वस्त्राणां रंगमपि कुर्वन् रंगकारः ॥३२॥३३॥ रुषितः कुपितः ॥३४॥ हे उद्वृत्ताः गिरौ वने चरथ ये ते यूयं नित्यं पूर्वं परिधत्तेति संभावनायां लोट् ॥ अनीप्सथ प्रार्थयध्वं ॥३५॥ राजकुलानि

राजकीयाः लुंपतीति संज्ञकं वीति ॥३६॥३७॥ मासः कोशान्वस्त्रपुटकान् ॥३८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा० द० टी० पू० व
१२२

वायकः तंत्रवायविशेषः ॥ वेषमलंकारं ॥ चैलेयैर्वस्त्रमयैराकल्पैर्भूषणैः ॥४०॥ पर्वणि उत्सवे ॥४१॥ इहलोके परमां श्रियं च बलं च ऐश्वर्यं स्मृतिं च इंद्रियं तत्पा
टैः प्रादात् ॥४२॥ ४५॥ क्षेमाय अनयाय ॥ भवाय उद्भवाय ॥४६॥ रजकवधेन वायकानुग्रहेण च युवयोर्विषमदर्शितया नाश्वरतां शंकनीयेत्याह ॥ नहि

ततस्तवायकः प्रीतस्तयोर्वेषमकल्पयत् ॥ विचित्रवर्णैश्चैलेयैराकल्पैरनुरूपतः ॥४०॥ नानालक्षणवेषाभ्यां कृष्णरामौ विरे
जतुः ॥ स्वलंकृतौ बालगजौ पर्वणीव सितेतरौ ॥४१॥ तस्य प्रसन्नो भगवान्प्रादात्सारूप्यमात्मनः ॥ श्रियं च परमां लोके ब
लैश्वर्यस्मृतीन्द्रियं ॥४२॥ ततः सुदाम्नो भवनं मालाकारस्य जग्मतुः ॥ तौ दृष्ट्वा स समुत्थाय ननाम शिरसा भुवि ॥४३॥ तयोरासनमानी
य पाद्यं चार्घ्यार्हणादिभिः ॥ पूजां सानुगयोश्चक्रे स्रक्ताम्बूलानुलेपनैः ॥४४॥ प्राह नः सार्थकं जन्म पावितं च कुलं प्रभो ॥ पितृदेवर्षयो
मह्यं तुष्टा ह्यागमनेन वां ॥४५॥ भवंतौ किल विश्वस्य जगतः कारणं परं ॥ अवतीर्णाविहांशेन क्षेमाय च भवाय च ॥४६॥ न हि वां वि
षमा दृष्टिः सुहृदोर्जगदात्मनोः ॥ समयोः सर्वभूतेषु भजंतं भजतोरपि ॥४७॥ तावाज्ञापयतं भृत्यं किमहं करवाणि वां ॥ पुंसो
ऽत्यनुग्रहो ह्येष भवद्भिर्यन्नियुज्यते ॥४८॥ इत्यभिप्रेत्य राजेंद्र सुदामा प्रीतमानसः ॥ शस्तैः सुगंधैः कुसुमैर्मालां विरचितां ददौ ॥
४९॥ ताभिः स्वलंकृतौ प्रीतौ कृष्णरामौ सहानुगौ ॥ प्रणताय प्रपन्नाय ददतुर्वरदौ वरान् ॥५०॥ सोऽपि वव्रेऽचलां भक्तिं तस्मि
न्नेवाखिलात्मनि ॥ तद्भक्तेषु च सौहार्दं भूतेषु च दयां परां ॥५१॥ ॥ वामिति ॥ आत्मनोर्हेत्वोः ॥ समयोरिति ॥ अत्रापि हेतुद्वयं ॥ सुहृदोरिति ॥ जग
दात्मनोरिति च ॥४७॥४८॥ इत्यभिप्रेत्य इति एवं विज्ञापयन् ॥ अभिप्रेत्य तन्मतं ज्ञात्वा ॥४७॥४८॥४९॥५०॥५१॥ ॥

रामः
१२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्वी

+तं समनुकंप्य चकार कुब्जाम् ॥ धनुश्च स हसा नमयन्बभंज ॥५२॥ ॥ इति श्री भागवते महापुराणे दशमस्कंधे टीकायां एकचत्वारिंशोऽध्यायः ॥४१॥+
अन्वयवर्द्धनीं वंशोऽवृद्धिमतामित्यर्थः ॥ अप्रार्थितं श्री प्रभृतिकं चदत्वा ततो निर्जगामेति ॥५२॥ सैरंध्र्यामधुपुरे रजकं निहत्य कुब्जः प्रदाय च वरान्थवायकाय ॥ मालाकृ
द्विचत्वारिंशके कुब्जोन्नमनं धनुषो भिदा ॥ वधस्तत्र क्षत्रिणां कंसारिष्टं रंगोत्सवादि च ॥१॥ अंगविलेपा श्चंदनादयः गृहीतान्यंगविलेपानां भाजनानि
निपयातां ॥ रसप्रदः ॥ सुखप्रदः ॥१॥ हे अंगने वरोरु इति सोपहासं संबोध्य पृच्छति ॥ त्वं का एतदनुलेपनं कस्य वा ॥ उ ह इति निपातौ त्यूविंद्वेपयुक्ते

इति तस्मै वरं दत्वा श्रियं चान्वयवर्द्धनीं ॥ बलमायुर्यशः कांतिं निर्जगाम सहाग्रजः ॥५२॥ ॥ इति श्री भागवते महापुराणे दशम
स्कंधे एकचत्वारिंशोऽध्यायः ॥४१॥ श्रीशुक उ० ॥ ॥ अथ व्रजन्राजपथेन माधवः स्त्रियं गृहीतांगविलेपभाजनां ॥ विलोक्य
कुब्जां युवतीं वराननां पप्रच्छ यांतीं प्रहसन्रसप्रदः ॥१॥ का त्वं वरोर्वेतदु हानुलेपनं कस्यांगने वा कथयस्व साधु नः ॥ देह्यावयोरंगवि
लेपमुत्तमं श्रेयस्ततस्ते न चिराद्भविष्यति ॥२॥ सैरंध्र्युवाच ॥ ॥ दास्यस्म्यहं सुंदर कंससंमता त्रिवक्रनामा ह्यनुलेपकर्मणि ॥ मद्भा
वितं भोजपतेरतिप्रियं विना युवां कोन्यतमस्तदर्हति ॥३॥ रूपपेशलमाधुर्यहसितालापवीक्षितैः ॥ धर्षितात्मा ददौ सांद्रमुभयोर
नुलेपनं ॥४॥ ततस्तावंगरागेण स्ववर्णेतरशोभिना ॥ संप्राप्तपरभागेन शुशुभातेऽनुरंजितौ ॥५॥ ॥ ॥ ॥

वितर्के ॥ अस्मद्देयम घः फलेत्याह ॥ न चिरादिति ॥२॥ तिस्रः स्थाने वक्राः कस्यो वक्रा इति त्रिवक्रेति नाम यस्याः सा ॥ अनुलेपनसाधनक्रियायां कंसस्य बहुमता दास्यस्मि ॥
३॥ रूपं च अंगसौष्ठवं पेशलं च सौकुमार्यं माधुर्यं च रसिकत्वात् हसितं च ॥ आलापाश्च वीक्षितं च तैर्धर्षितात्मा मोहितचित्ता सांद्रं घनं ॥४॥ स्ववर्णेतरशोभिना श्यामल
रूपयोर्वर्णान्यां इतरः पीतादिवर्णस्तेन शोभितुं शीलं यस्य तेन ॥ संप्राप्तपरभागेन संप्राप्तः परोना नेरूपरितनो भागो येन सः ॥ संप्राप्तपरभोगः शोभातिशयो येनेति
वा ॥ तेनानुरंजितौ ॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० द० पृ०
२२२

स्वदर्शनेसद्यः फलंदर्शयन्॥६॥ तस्याः प्रपदेपादाग्रद्वयंपद्भ्यामापाड्य॥द्वे अंगुल्यौ उत्तानेउत्ताने उन्नतेयस्मिन्पाणौतेनचिबुकेमुखस्याधोभागेधृत्वा॥ध्यात्वंदेहंउ
न्नमयामास॥७॥ तदैवऋजुसमानमंगंयस्याः सा॥ वृहंतौ श्रोणिपयोधरौचयस्याः सा॥मुकुंदस्पर्शनादिति॥मुखंकारणं॥८॥९॥१०॥११॥ आधिविकर्ष
णंमनःपीडात्रामनं॥कंसवधेनसाधितोर्थःसुरुदांप्रयोजनंयेनसः॥ अगदाणां अरूनद्राराणां॥पांथानां प्रवासिनांपरं अयनमाश्रयस्त्वं॥१२॥मध्येधु
प्रसन्नौ गवान्ऋब्जांत्रिवक्रांरुचिराननां॥ऋज्वींकर्तुमनस्तस्के दर्शयन्दर्शनेफलं॥६॥पद्भ्यामाक्रम्यप्रपदेध्यंगुल्युत्तानपाणिना॥
प्रगृह्यचिबुके ध्यात्ममुदनीनमदच्युतः॥७॥ सातदृर्जुसमानांगाबृहच्छ्रोणिपयोधरा॥मुकुंदस्पर्शनात्सद्योबभूवप्रमदो
त्तमा॥८॥ ततोरूपगुणौदार्यसंपन्नाप्राहकेशवं॥उत्तरीयांतमाकृष्य स्मयंतीजातहृच्छया॥९॥एहिवीरगृहंयामोनत्वांत्यक्तुमि
होत्सहे॥त्वयोन्मथितचित्तायाः प्रसीदपुरुषर्षभ॥१०॥ एवंस्त्रियायाच्यमानः कृष्णोरामस्यपश्यतः॥मुखंवीक्ष्यानुगानांच
प्रहसंस्तामुवाचह॥११॥एष्यामितेगृहंसुभ्रुपुंसामाधिविकर्षणं॥साधितार्थोगृहाणांनःपांथानांत्वंपरायणं॥१२॥वि
सृज्यमाध्व्यावाण्यातांव्रजन्मार्गेवणिक्पथे॥नानोपायनतांबूलस्रग्गंधैःसाग्रजोर्चितः॥१३॥ तद्दर्शनस्मरक्षोभादात्मानंना
विदन्स्त्रियः॥विस्रस्तवासःकबरवलयालेख्यमूर्तयः॥१४॥ ततःपौरान्पृच्छमानोधनुषस्थानमच्युतः॥तस्मिन्प्रविष्टोददृ
शेधनुरैंद्रमिवाद्भुतं॥१५॥पुरुषैर्बहुभिर्गुप्तमर्चितंपरमर्द्धिमत॥वार्यमाणोनृभिःकृष्णःप्रसह्यधनुराददे॥१६॥ ॥ ॥

रयागिरा।तांप्रस्थाप्यव्रजन्वणिक्पथेवणिग्भिरर्चितः॥१३॥ लेख्याःचित्रन्यस्ताइवमूर्तयोयासांताः॥१४॥ ॥धनुर्मखशालांपृच्छन्
॥१५॥ ॥प्रसह्यबलात्॥१६॥ ॥ ॥

राम:
२२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निमिषेणातिशीघ्रं॥ मदकरामत्तहस्ती॥२७॥२८॥गृह्यतां बध्यतामिति निर्वेदं तो निघ्नत्व आदत्तवंतः॥२९॥ न केवलं क्रुद्धो॥ किंतु॥ नग्नस्य धनुषः शकलेन हत्वा नमत उग्रे
ति॥२०॥ परतः श्रातर्गतव्यमिति शालासुरादेव पुनर्निःक्रम्य॥२१॥ तेजःप्रभावं प्रागल्भ्यं च एतौ॥२२॥ शाकं शकेटादवमोचनस्थानं॥२३॥ मुकुंदस्य विगमे प्रजाल्पि

मु करेण वामेन स्वलीलया हृतं सज्यं च कृत्वा निमिषेण फलपतां॥ नृणां विलक्ष्यप्रवर्धनं नमध्यतो यथेन्दुदंडं मदकर्युरुक्रमः॥२७॥ धनुषो न
ज्यमानस्य शब्दः स्वरोदसी दिशाः॥ पूरयामास यं श्रुत्वा कंसस्त्रासमुपागमत्॥२८॥ तद्रक्षिणः सानुचराः कुपिता आततायिनः॥ ग
डीतुकामा आवव्रुर्गृह्यतां बध्यतामिति॥२९॥ अथ तान् दुरभिप्रायान् विलोक्य बलकेशवौ॥ क्रुद्धौ धन्वन आदाय शकले तांश्च ज
घ्नतुः॥२०॥ बलं च कंसप्रहितं हत्वा शालामुखात्ततः॥ निःक्रम्य चेरतुर्हृष्टौ निरीक्ष्य पुरसंपदः॥२१॥ तयोस्तदद्भुतं वीर्यं निशम्य पुरवा र
सिनः॥ तेजः प्रागल्भ्यं रूपं च मेनिरे विबुधोत्तमौ॥२२॥ तयोर्विचरतोः स्वैरमादित्योऽस्तमुपेयिवान्॥ कृष्णरामौ वृतौ गोपैः पुराच्छकटमी
उ यतुः॥२३॥ गोप्यो मुकुंदविगमे विरहातुरा या आशासताशिष ऋता मधुपुर्यभूवन्॥ संपश्यतां पुरुषभूषणगात्रलक्ष्मीं हित्वेतरान्नु भजतश्‍ भू
चकमेऽयनं श्रीः॥२४॥ अवनिक्तांघ्रियुगलौ भुक्त्वा क्षीरोपसेचनं॥ ऊषतुस्तां सुखं रात्रिं ज्ञात्वा कंसचिकीर्षितं॥२५॥ ॥ ॥

गमनसमये या आशिषः आशासत सुखं प्रजानातास्त्वनायं अवधृतं तत्र दृश्यो नविष्यते इत्यादियुद्धकंसः॥ ऋताः सत्या बभूवुः॥ पुरुषभूषणस्य श्रीकृष्णस्य गात्रलक्ष्मीं दृष्ट्वा स्त्रीणां॥ भूप
कथं तत्स्य गात्रं श्रीः॥ नु इतरान् ब्रह्मादीन् हित्वा यं आश्रयं श्रीः कामयामास यो गात्रलक्ष्मीमिति वा॥२४॥ अवनिक्तं क्षालितमंघ्रियुगलं ययोस्तौ॥ क्षीरमिश्रमन्नं भु
क्त्वा सुखं न्यवसतां॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० पू०
२२३
परं केवलं गोविंदरामयोर्विक्रीडितं ॥ ततनंतु पराक्रमः कश्चित् ॥२६॥ उभयथा स्वप्नंजागरितं नेदं न ॥ प्रसेकं मस्सोके दौत्यकराणि च ॥ तथा च मंत्रः ईछादुकूलश्च
पद्मनदिरंएपास्तो अयोमुखः ॥ रक्षसां दूत आगतरत्यादि ॥ तथा पुदेत दद्भुतान्यन्यानि स्वप्ने देवो वा चंवदसात्पादिश्च ॥२७॥ तानि दर्शयति श्लोकत्रयेण । जलादौ प्रति
रूपे दृश्यमानेपि स्वशिरसस्तत्रादर्शनं ॥ असत्यपि द्वितीये चक्षुषोः तद्दर्शनं । गुल्मादौ ज्योतिषां चद्वारादीनां द्वित्वं ॥२८॥ छायायां प्रतिबिंबे छिद्रप्रतीतिः ॥ पिहित
कर्णपुटस्य योः तः श्रूयमाणो ध्वनिः सप्राणघोषः तस्याश्रवणं ॥ हृत्स्नेषु स्वर्णवर्षप्रतीतिः ॥ रजकाईमादिषु स्वपदानामदर्शनं ॥ एतानि जागरिता
स्तु कंस धनुषो नंगरक्षिणां स्वबलस्य च ॥ वधं निशम्य गोविंदरामविक्रीडितं परं ॥२६॥ दीर्घप्रजागरो भीतो दुर्निमित्तानि दुर्मतिः ॥
बहून्यचष्टोभयथा मृत्योर्दौत्यकराणि च ॥२७॥ अदर्शनं स्वशिरसः सत्यपि ॥ असत्यपि द्वितीये चंद्रे रूप्यं ज्योतिषां तथा ॥२८॥ छिद्रप्र सः प्रतिरूपे च
तीतिः छायायां प्राणघोषानुपश्रुतिः ॥ स्वर्णप्रतीतिर्वृक्षेषु स्वपदानामदर्शनं ॥२९॥ स्वप्ने प्रेतपरिष्वंगः खरयानं विषादनं ॥ या
यान्नलदमाल्येकस्तैलाभ्यक्तो दिगंबरः ॥३०॥ अन्यानि चेत्थंभूतानि स्वप्नजागरितानि च ॥ पश्यन्मरणसंत्रस्तो निद्रां लेभेन चिंतया रामः
॥३१॥ व्युष्टायां निशि कौरव्य सूर्ये चाद्भ्यः समुत्थिते ॥ कारयामास वै कंसो मल्लक्रीडामहोत्सवं ॥३२॥ ॥ निदुर्निमित्तानि ॥२७॥ स्वप्नान्या २२३
ह ॥ स्वप्न इति ॥ प्रेतैर्मृतैः परिष्वंगः ॥ खरमारुह्य यानं विषभक्षणं ॥ नलदमाला जपाकुसुममाला यस्यास्ति ॥ पततस्ये कंउ र्निमित्रमिति ॥३०॥३१॥ कष्टेन
ता कथंचित् प्रनीयां ॥ पुनः सूर्ये चाद्भ्यः समुत्थित इति ॥ तथा च श्रुतिः ॥ अद्भ्यो वा एति ॥ यउदगात्महतोर्णवात् विभ्राजमानः सलिलस्य मध्यात् ॥ समाह
षभो जो हितो हृः सूर्यो विपश्चित् मनसा पुनातु चेति च ॥३२॥ ॥
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३३॥ यथोपजोषं यथासुखं ॥३४॥३५॥ मल्लताल उच्चरुउपरि उच्चैः श्रूयते येषु तेषु तूर्येषु ॥ उपाध्यायाः मल्लाचार्याः ॥३६॥ उपस्थानं मल्लरंगं ॥३७॥ समाहूताः निवेदितान्युपायनानि
यैस्ते ॥३८॥ ॥इति श्री भागवते महापुराणे दशमस्कंधे टीकायां द्विचत्वारिंशोध्यायः ॥४२॥ ॥त्रिचत्वारिंशके हत्वा गजेंद्रं राममल्लयोः ॥ रंगप्रवेशो मौलाग्यं चाणूरेण च ॥

आनर्चुः पुरुषा रंगं तूर्यनिर्यश्च जघ्निरे ॥ मंचाश्चालंकृतास्त्रग्भिः पताकाचैलतोरणैः ॥३३॥ तेषु पौरा जानपदा ब्रह्मक्षत्रपुरोगमाः ॥ यथो
पजोषं विविशू राजानश्च कृतासनाः ॥३४॥ कंसः परिवृतोमात्यैः राजमंचउपाविशत् ॥ मंडलेश्वरमध्यस्थो हृदयेन विदूयता ॥३५॥ वाद्यमाने
षु तूर्येषु मल्लतालोत्तरेषु च ॥ मल्लाः स्वलंकृता दृप्ताः सोपाध्यायाः समाश्रिताः ॥३६॥ चाणूरो मुष्टिकः कूटः शलस्तोसल एव च ॥ त आसेदुरुपस्थानं व
ल्गुवाद्यप्रहर्षिताः ॥३७॥ नंदगोपादयो गोपा भोजराजसमाहुताः ॥ निवेदितोपायनास्त एकस्मिन्मंच आविशन् ॥३८॥ ॥इति श्री भागवते महापुरा
णे दशमस्कंधे द्विचत्वारिंशोध्यायः ॥४२॥ ॥श्रीशुक उ०॥ ॥अथ कृष्णश्च रामश्च कृतशौचौ परंतप ॥ मल्लदुंदुभिनिर्घोषं श्रुत्वा
द्रष्टुमुपेयतुः ॥१॥ रंगद्वारं समासाद्य तस्मिन्नागमवस्थितं ॥ अपश्यत्कुवलयापीडं कृष्णोंबष्ठप्रचोदितं ॥२॥ बध्वा परिकरं शौरिः समुह्य कुटि
लालकान् ॥ उवाच हस्तिपं वाचा मेघनादगभीरया ॥३॥ अंबष्ठांबष्ठ मार्गं नौ देह्यपक्रम माचिरं ॥ नो चेत्सकुंजरं त्वाद्य नयामि यमसादनं ॥४॥

भाषणं ॥१॥ पूर्वेद्युरेव कृतशौचं शुद्धत्वं निरपराधत्वं याभ्यां तौ ॥ एतदुक्तं भवति धनुर्भंगादिना आवाभ्यां निमित्तैश्च यैः सूचितं पितरौ न मुंचति ॥ आवां च पुनर्जिघांसति ॥ अ
तोस्य मातुलस्य वधेनावयोर्दोषः इत्येवं कृतापराधपरिहाराविति ॥ मल्लानां दुंदुभिनां च निर्घोषं मल्लतालं दुंदुभिघोषं वा ॥१॥ अंबष्ठो पदाद्विपस्तेन प्रचोदितं ॥२॥ परिकरं सुश्ले
षितपरिधानं कृत्वा समुह्यनिबध्य ॥३।४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा० द० पू०
१२४

अंतकोमृत्युः॥ कालस्तन्निमित्तं॥ यमस्तन्नियंता॥ तैरुपमायस्यतं॥ ५॥ विगलितो विच्युतः॥ मुष्टिना निरुत्पात्यलीयत अदृश्योबभूव॥ ६॥ अचक्षाणः अपश्यन्॥ घ्राणाम
वघ्राणं तेनदृष्टिर्दर्शनं यस्यसः॥ लोचनागोचरमपिपक्षयोर्घ्राणेन जानंतीतिप्रसिद्धं॥ परामृश्यात् धृतवान्॥ पुष्करेणशुंडाग्रेणासः स्कंधः॥ प्रसह्यबलेन॥ ७॥ धनुष
ः धनुषां पंचविंशतिर्यावत्तावंतं देशंगजं विचकर्ष आकृष्य नीतवान्॥ कं कं इव विचकर्ष॥ यथानागं सर्पं वर्त्ममानं गजं सुपर्णइव स्वयमिति॥ आविरासी घयाप्राच्यादि

एवं निर्भर्त्सितोऽवरुः कुपितः कोपितं गजं तं॥ चोदयामास कल्पायकालांतकयमोपमं॥ ५॥ करांद्रस्तमनिद्रुत्यकरेणातरसाग्न्रुशता॥ क
राद्विगलितः सोमुनिर्दुत्यंघ्रिषलीयत॥ ६॥ संक्रुध्दस्तमचक्षाणो घ्राणादृष्टिं सकेशवं॥ परामृश्यपरात्पुष्करेणसप्रसह्यविनिर्गतः॥
७॥ पुच्छेप्रगृह्यातिबलं धनुषः पंचविंशति॥ विचकर्षयथानागं सुपर्णइवलीलया॥ ८॥ सपर्यावर्त्तमानेनस[illegible]॥९॥ व्यद
क्षिणतोऽच्युतः॥ बभ्राम भ्राम्यमाणेन गोवत्सेनेव बालकः॥ १०॥ ततोऽभिमुखमभ्येत्य पाणिना हस्तवारणं॥ प्राद्रवन्पातयामास स्पृश्यमा
नः पदे पदे॥ ११॥ सधावन्क्रीडयाभूमौ पतित्वा सहसोच्छितः॥ तं मत्वा पतितं क्रुद्धो दंताभ्यां सोऽहनत्क्षितिं॥ ११॥ स्वविक्रमे प्रतिहते कुंजरेंन्द्र
ोऽत्यमर्षितः॥ चोद्यमानो महामात्रैः कृष्णमभ्यद्रवद्रुषा॥ १२॥ तमापतंतमासाद्य भगवान्मधुसूदनः॥ निगृह्य पाणिना हस्तं पातयामास भू
तले॥ १३॥ ॥

या
श्रीदुःखिपुलश्चर्ति वत्॥ ८॥ सपर्यावर्त्तमानेनेति पुच्छमादिरणं भ्रात्वास्तंगजंतं यदि दक्षिणातः परिवर्त्ततेगजस्तर्हिसव्यतो भ्रामयतिपराः सव्यतः प
रिवर्त्ततेतदादक्षिणतो भ्रामयंस्तेनसहैवभ्राम॥ गोवत्सेनभ्राम्यमाणेनबालकः सावत्सलोपयथा॥ अभ्योवाबालकरवेति॥ ९॥ वारणं गजं प्राद्रवत् प्रकर्षेण समंततो धा
वन्पातयामास॥ यथापततितथातं वंचयन्प्राद्रवन्नित्यर्थः॥ १०॥ किंच॥ सधावन्निति॥ अहनत् अहन्॥ ११॥ ॥१२॥ ॥१३॥ ॥ ॥

न

राम:
१२४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२४॥ रंगंसामाविशात् तदावीरश्रियाबलौ ॥ कथंभूतः ॥ अंसेन्यस्तंविषाणंगजदंतोयेनसः ॥ असृग्मेरकस्यमदस्यचबिंदुभिःपरितोऽंकितः विरूढाउरुताःस्वेदकणिकायस्य
निरूपलक्षितंवदनांबुरुहंयस्यसः ॥२५॥ नकेवलंसएकःसमाविशत्किंतु ॥ हलीगोपैरिति ॥२६॥ तत्रचशृंगारादिसर्वरसकदंबमूर्तिर्निगदांस्तत्रदभिप्रायानुसारेणबभौ ॥ नसाक १
ल्येनसर्वेषामित्याह ॥ मल्लानामिति ॥ मल्लादीनांअज्ञानांदृश्णां अज्ञानादिरूपेणदशधाविदितःसन्सामजोरंगंगतइत्यन्वयः ॥ मल्लादिषुअभिव्यक्तरसाःक्रमेणश्लोके

पतितस्यपराक्रम्यमृगेंद्रइवलीलया ॥ दंतमुत्पाट्यतेनैनंहस्तिपांश्चाहनद्धरिः ॥२४॥ मृतकंद्वीपमुत्सृज्यदंतपाणिःसमाविशत् ॥ अंसन्यस्त
विषाणोऽसृङ्मद बिंदुभिरंकितः ॥२५॥ विरूढस्वेदकणिकावदनांबुरुहोबभौ ॥ हलीगोपैःकतिपयैर्बलदेवजनार्दनौ ॥ रंगंविविश
तूराजन्गजदंतवरायुधौ ॥२६॥ मल्लानामशनिर्नृणांनरवरःस्त्रीणांस्मरोमूर्तिमान्गोपानांस्वजनोऽसतांक्षितिभुजांशास्तास्व
पित्रोःशिशुः ॥ मृत्युर्भोजपतेर्विराडविदुषांतत्त्वंपरंयोगिनांवृष्णीनांपरदेवतेतिविदितोरंगंगतःसाग्रजः ॥२७॥ हतंकुवलयापीडं
दृष्ट्वातावपिदुर्जयौ ॥ कंसोमनस्व्यपितदाभृशमुद्विविजेनृप ॥२८॥ तौरेजतूरंगगतौमहाभुजौविचित्रवेषाभरणस्रगंबरौ ॥ यथान
टावुत्तमवेषधारिणौमनःक्षिपंतौप्रभयानिरीक्षतां ॥२९॥ निरीक्ष्यतावुत्तमपूरुषौजनामंचस्थितानागरराष्ट्रकानृप ॥ प्रहर्षवेगो
त्कलितेक्षणाननाःपपुर्नतृप्तानयनैस्तदाननं ॥३०॥ ॥ नविबध्नंते ॥ रौद्रोऽद्भुतश्चशृंगारोहास्यंवीरोदयातथा ॥ भयानकश्चबीभत्सः
शांतःसप्रेमभक्तिकः ॥ अविदुषांविराट्विकलःअपर्याप्तोराजतइतितथा ॥ अनेनविभक्तउक्तः ॥ विकलत्वंच ॥ कवचसारसर्वशाविज्ञादिनावर्ण्यते ॥२७॥ उद्विविजेभीतो
बभूव ॥२८॥ यथानटावितिनिर्णयंवदर्शितं ॥२९॥ प्रहर्षवेगेनउत्कलितानिउज्जृंभितानिईक्षणानिआननानिचयेषांतेतयोराननंपरंपपुः ॥ नतुतृप्ताःनिराकांक्षानबभूवुरित्य
र्थः ॥३०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेंदेवाह ॥ पिबंतइवेति ॥ श्लिष्यंतः परिष्वंगंकुर्वंतइवलक्षिताइत्यर्थः ॥२१॥ यथादृष्टंधनुर्भंगादि ॥ यथाकृतंगोवर्द्धनोद्धरणादि ॥ तत्तदनतिक्रम्यतदनुरूपमित्यर्थः ॥ प्रत्यक्षंचत
योरूपंगजदंतादिमुक्तं ॥ गुणाःशौर्यादयः ॥ माधुर्यंधैर्यंहसितालापादिप्रागल्भ्यधार्ष्ट्यं तैःस्मारिताइवस्मरणंप्रापिताइत्यर्थः ॥२२॥ विस्मितानांवाक्यान्याह ॥ आहुभिः एतावित्या

पिबंतइवचक्षुर्भ्यांलिहंतइवजिह्वया ॥ जिघ्रंतइवनासाभ्यांश्लिष्यंतइवबाहुभिः ॥२१॥ ऊचुःपरस्परंतेवैयथादृष्टंयथाश्रुतं ॥ तद्रूपगुणमा
धुर्यप्रागल्भ्यस्मारिताइव ॥२२॥ एतौभगवतःसाक्षाद्धरेर्नारायणस्यहि ॥ अवतीर्णाविहांशेनवसुदेवस्यवेश्मनि ॥२३॥ सएषकिलदेवक्यां
जातोनीतश्चगोकुलं ॥ कालमेतंवसन्गूढोववृधेनंदवेश्मनि ॥२४॥ पूतनानेननीतांतंचक्रवातश्चदानवः ॥ अर्जुनौगुह्यकःकेशीधेनु
कोऽन्येचतद्विधाः ॥२५॥ गावःसपालाएतेनदावाग्नेःपरिमोचिताः ॥ कालियोदमितःसर्पइंद्रश्चविमदःकृतः ॥२६॥ सप्ताहमेकह
स्तेनधृतोऽद्रिप्रवरोऽमुना ॥ वर्षवाताशनिभ्यश्चपरित्रातंचगोकुलं ॥२७॥ गोप्योस्यनित्यमुदितहसितप्रेक्षणंमुखं ॥ पश्यंत्योविविध
धांस्तापांस्तरंतिस्माश्रमंमुदा ॥२८॥ वदंत्यनेनवंशोयंयदोःसुबहुविश्रुतः ॥ श्रियंयशोमहत्वंचलप्स्यतेपरिरक्षितः ॥२९॥ अयं
चास्याग्रजःश्रीमान्रामःकमललोचनः ॥ प्रलंबोनिहतोयेनवत्सकोयेबकादयः ॥३०॥ जनेष्वेवंब्रुवाणेषुतूर्येषुनिनदत्सुच
॥ कृष्णरामौसमाभाष्यचाणूरोवाक्यमब्रवीत् ॥३१॥ ॥ ॥॥

दिभिः ॥२३॥ किलेतिसर्वत्रान्वयः ॥२४॥ गुह्यकःशंखचूडः ॥ अन्येचअघासु
रादयः ॥२५॥२६॥२७॥ आश्रमंमरणपर्यंतमयुक्तंसुखं ॥ अश्रमंसुखमितिवा ॥ यद्वा अश्रमंयथाभवतितथातरंतिस्मेति ॥२८॥ अनेनपरिरक्षितोयदोर्वंशः ॥ सुबहुविश्रुतःसन्
श्र्यादिलप्स्यतइतिवदंतीति ॥२९॥ धेनुकबकवत्सासुरेषुविपर्ययोलिपिजनवादेषुनिश्चयात् ॥३०॥ जनेष्वेवंब्रुवाणेषुसत्सुतदसहमानश्चाणूरोऽब्रवीदिति ॥३१॥ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे कृष्ण प्रियं करवामेति ॥ राज्ञि प्राते कृतानि च प्रसादेयुः ॥ ३५ ॥ ३६ ॥ ३७ ॥ यथोचितं नियुद्धं बाहुयुद्धं भवेत् ॥ मल्लसमाधिकृतान् अधर्मो मा स्पृशेदिति सर्वः ॥ हे मल्लेति वा ॥ ३८
॥ सहस्रद्विपानां सत्वं बलं बिभ्रतीति ॥ ३९ ॥ तथा बलिभिर्मा दर्शो सह ॥ अनयोर्धर्मः ॥ विक्रमपराक्रमं कुरु मुष्टिको विक्रमतादिति ॥ ४० ॥ ॥ इति श्रीभागवते महा

हे नंदसूनो हे राम भवंतौ वीर्यसंमतौ ॥ नियुद्धकुशलौ श्रुत्वा राज्ञाहूतौ दिदृक्षुणा ॥ ३२ ॥ प्रियं राज्ञः प्रकुर्वंत्यः श्रेयो विंदंति वै प्रजाः ॥ मनसा
कर्मणा वाचा विपरीतमतोन्यथा ॥ ३३ ॥ नित्यं प्रमुदिता गोपा वत्सपाला यथा स्फुटं ॥ वनेषु मल्लयुद्धेन क्रीडंतश्चारयंति गाः ॥ ३४ ॥ तस्मा
द्राज्ञः प्रियं यूयं वयं च करवामहे ॥ भूतानि नः प्रसीदंति सर्वभूतमयो नृपः ॥ ३५ ॥ तन्निशम्याब्रवीत्कृष्णो देशकालोचितं वचः ॥ नियुद्धमा
त्मनोभीष्टं मन्यमानोभिनंद्य च ॥ ३६ ॥ प्रजा भोजपतेरस्य वयं चापि वनेचराः ॥ करवाम प्रियं नित्यं तन्नः परमनुग्रहः ॥ ३७ ॥ बाला वयं
तुल्यबलैः क्रीडिष्यामो यथोचितं ॥ भवेन्नियुद्धं माधर्मः स्पृशेन्मल्लसभासदः ॥ ३८ ॥ चाणूर उ० ॥ ॥ न बालो न किशोरस्त्वं बलश्च
बलिनां वरः ॥ लीलयेभो हतो येन सहस्रद्विपसत्वभृत् ॥ ३९ ॥ तस्माद्भवद्भ्यां बलिभिर्योद्धव्यं नानयोत्र वै ॥ मयि विक्रम वार्ष्णेय बलेन सह
मुष्टिकः ॥ ४० ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे द्विचत्वारिंशोध्यायः ॥ ४२ ॥ ॥ श्रीशुक उ० ॥ ॥ एवं चर्चित
संकल्पो भगवान्मधुसूदनः ॥ आससादाथ चाणूरं मुष्टिकं रोहिणीसुतः ॥ १ ॥ हस्ताभ्यां हस्तयोर्बद्ध्वा पद्भ्यामेव च पादयोः ॥
विचकर्षतुरन्योन्यं प्रसह्य विजिगीषया ॥ २ ॥ ॥ श्रीरामकृष्णायनमः ॥ ॥
पुराणे दशमस्कंधे टीकायां त्रिचत्वारिंशोध्यायः ॥ ४३ ॥ ॥
चत्वारिंशके तु मल्लकंसादिमर्दनं ॥ कंसयोषित्समाश्वासस्ताभ्यां पित्रोश्च दर्शनं ॥ १ ॥ चर्चितः निश्चित एव संकल्पो यस्य सः ॥ २ ॥ ॥

पा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० द० पृ०

१२६

बाहुमध्यात्कनिष्ठांगुलिव्यतिरेकेणाकृतमुष्टिर्हस्तोऽरत्निः ॥३॥ परिभ्रामणं हस्तादिषु गृहीत्वा परितश्चालनं ॥ विक्षेपो नोदनं ॥ परिरंभो बाहुभ्यां निःपीडनं ॥ अवपातनं अधः
क्षेपः ॥ उत्सर्पणं उत्सृत्य पुरतो गमनं अपसर्पणं पृष्ठतो गमनं ॥ एतैः प्रत्यवरुंधतां प्रत्यावृतवंतौ ॥४॥ उच्छ्रापनं पादौ जानुना च पिंडीकृत्य पतितस्योच्चाटनं ॥ उन्नयनं
हस्ताभ्यामुध्दृत्यनयनं ॥ चालनं कंठादिलग्नस्य निःसारणं ॥ स्थापनं पादादिपिंडीकरणं ॥ एवं परस्परमात्मनो देहस्यापचक्रतुः अपकर्षं कृतवंतौ ॥५॥ तद्युद्धं बला पं
बलवत् ॥ एकतो बलं अन्यतोऽबलं ॥ तद्युक्तं युद्धं विषममित्यूचुरित्यर्थः ॥६॥ तदेवद्रढयति ॥ महानिति ॥ यद्वा ॥ तद्बलाबलवतोर्युद्धं दृष्ट्वा महानयमधर्म इत्यूचु

अरत्नी द्वे अरत्निभ्यां जानुभ्यां चैव जानुनी ॥ शिरः शिरोरसोरस्ताववन्योन्यमभिजघ्नतुः ॥३॥ परिभ्रामणविक्षेपपरिरंभावपातनैः ॥
उत्सर्पणापसर्पणैश्चान्योन्यं प्रत्यरुंधताम् ॥४॥ उच्छ्रापनैरुन्नयनैश्चालनैः स्थापनैरपि ॥ परस्परं जिगीषंतावपचक्रतुरात्मनः
॥५॥ तद्बलाबलवद्युद्धं समेताः सर्वयोषितः सर्वयोषितः ॥ ऊचुः परस्परं राजन्सानुकंपा वरूथशः ॥६॥ महानयं बताधर्म एषां
राजन्सभासदाम् ॥ ये बलाबलवद्युद्धं राज्ञोऽन्विच्छंति पश्यतः ॥७॥ क्व वज्रसारसर्वांगौ मल्लौ शैलेंद्रसन्निभौ ॥ क्व चातिसुकुमारांगौ
किशोरौ नाप्तयौवनौ ॥८॥ धर्मव्यतिक्रमो ह्यस्य समाजस्य ध्रुवं भवेत् ॥ यत्राधर्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ॥९॥ न सभां
प्रविशेत्प्राज्ञः सभ्यदोषाननुस्मरन् ॥ अब्रुवन्विब्रुवन्नाज्ञो नरः किल्बिषमश्नुते ॥१०॥ ॥ श्रीरामाकृष्णायनमः ॥

टीरब रिस्यरित्यन्वयः ॥ बालयोर्बलिवं लैर्वतोश्च युद्धं राज्ञा चेत्सरपेक्ष्य पंवारणीयः ॥ एते तु राज्ञः पश्यतः स्वयमप्यन्विच्छंति अनुमन्यंत इति महानधर्म इत्यर्थः ॥७॥ बलाबलवद्यु रामः १
द्धतां प्रपंचयति पंचभिः ॥ क्वेति ॥ वज्रसाराणि वज्रवत्कठिनानि सर्वाण्यंगानि ययोस्तौ ॥८॥ समाजस्य सभायाः ॥९॥ अपरा ऊचुः ॥ न सभामिति ॥ अब्रुवन्स्तात्वा १२६
पि तूष्णीं तिष्ठन् ॥ विब्रुवन्विपरीतं ब्रुवन् ॥ अतः अज्ञोनामाभिब्रुवन् ॥ अतः प्राज्ञो न सभां प्रविशेदिति ॥१० ॥ ॥ श्रीरामाकृष्णायनमः ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भु
बलात्ः शत्रुमभितं रति॥ शत्रोः सर्वतो धावंतः श्रीकृष्णस्य श्रमवारिणा उपस्थापं वदनांबुजं दत्र पतां॥२५॥ अन्या ऊचुः॥ किं न पश्यते तिसामर्षसक्रोधं॥ हासेन संरंन
आवेशः तेन शोभितं॥२१॥ अन्या ऊचुः॥ पुण्या बतेति॥ न लिंगेन मनुष्यदेहेन गूढः॥ वनस्थानि चित्राणि माल्यानि यस्य सः॥ गिरित्रः शिवः रमा च ताभ्यामर्चितौ अंघ्री
यस्य सः॥ अयं भावः॥ धिगिमां सन्नां यस्यामयं परान्नूयते॥ तास्तु ब्रजेर्वा धन्याः पतो यासु अयं श्रीकृष्णो विविधक्रीडया चरंनिगच्छतीति॥ अशोक एमल्प पुण्या
वयं यतोः स्माभिरन वसरे दृष्टः यं गोप्यस्तु बरू पुण्याः स्ताः स्त्रिभिः॥ गोप्य इति॥ अमुष्य श्रीकृष्णस्य रूपं अंगलावण्येन सारं श्रेष्टं॥ किंच॥ असमोर्द्ध

बलातः शत्रुमभितः कृष्णस्य वदनांबुजं॥ बीक्ष्यतां श्रमवार्युप्तं पद्मकोशमिवांबुभिः॥२१॥ किं न पश्यत रामस्य मुखं माताम्रलोचनं
स
॥मुष्टिकं प्रतिसामर्षहासं रंभशोभितं॥२२॥ पुण्या बत ब्रजभुवो यदयं नृलिंगगूढः पुराणपुरुषो वनचित्रमाल्यः॥ गाः पालयन्सह
बलः क्वणयंश्च वेणुं विक्रीडयांचति गिरित्ररमार्चितांघ्रिः॥२३॥ गोप्यस्तपः किमचरन्यदमुष्यरूपं लावण्यसारमसमोर्द्ध्वमन
न्यसिद्धं॥ दृग्भिः पिबंत्यनुसवाभिनवं दुरापमेकांतधाम यशसः श्रिय ऐश्वरस्य॥२४॥ या दोहनेऽवहनने मथनोपलेपप्रेंखेंखनार्भ लेप
रुदितोक्षणमार्जनादौ॥ गायंति चैनमनुरक्तधियोऽश्रुकंठ्यो धन्या ब्रजस्त्रिय उरुक्रमचित्तयानाः॥२५॥ ॥ ॥ ॥
अ
विद्यते॥म नैसमूर्द्धं नैसमं अधिकं यस्य तत्॥ तदपि नान्येन आभरणादिना सिद्धं किंतु स्वत एव॥ ऐश्वरस्य ऐश्वर्यस्य आक्रांतधाम अव्यभिचारिस्थानं॥ पाठांतरे अमुष्य ईश्वरस्ये स्य
त्यच यः॥ एवं भूतं नित्यनवीनं रूपं याः नेत्रैः पश्यंतीति॥२४॥ किंच॥ याः दोहनादिषु नंदगोपं तिताब्रजस्त्रियो धन्याः॥ प्रेंखेंखनं दोलांदोलनं॥ उक्षणं सेचनं॥ कथं
भूताः उरुक्रमे चित्तं उरुक्रमचित्तं तेनैव यानं सर्वविषयप्राप्तिर्यासां ताः॥ पाठांतरे उरुक्रमं चितयंतः इत्यर्थः॥ कुतः अनुरक्तधियः॥ तत्र लिंगं अश्रुकंठ्यः॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रातरितियाअबलाः अस्यवेणुंनिशाम्यगृहात्तूर्णंनिर्गम्यपथिसस्मितंमुखंपत्रपंतिताः नृरिपुरएषाइति॥१६॥एवंसतपंब्रुवाणासुस्त्रीषुतासांतयनिश्चत्रयेश्रोत्स्नः२श्रा

 त्रुंहंतुंमनश्चक्रे॥१७॥सतयाःस्त्रीणांगिरःश्रुत्वा।पुत्रयोःस्नेहेनयाशुकृतयाआतुरौविह्वलौ।पुत्रयोर्बलमजानंतौपितरावनुतापंप्राप्ताविति॥१८॥१९॥तदानग

प्रातर्भगवानन्नजत आविश्यतश्चसारंगोभिःसमंक्षणयतोऽस्यनिशाम्यवेणुं॥निर्गम्यतूर्णमबलाःपथिनृरिपुएपाःपत्रपंतिसस्मितमुखंसद

यावलोकं॥१६॥एवंप्रलापमाणासुस्त्रीषुयोगेश्वरोहरिः॥शत्रुंहंतुंमनश्चक्रेभगवान्भरतर्षभ॥१७॥सनृपास्त्रीगिरःश्रुत्वापुत्रस्ने

हस्नुचातुरौपितरावन्वतप्येतांपुत्रयोरबुधौबलं॥१८॥तैस्तैर्नियुद्धविधिभिर्विविधैरच्युतेतरौ॥युयुधातेयथाऽन्योन्यंतथैवबलमु

ष्टिकौ॥१९॥भगवद्गात्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः॥चाणूरोभज्यमानांगोमुहुर्ग्लानिमवापह॥२०॥सश्येनवेगउत्पत्यमुष्टी

कृत्यकरावुभौ॥भगवंतंवासुदेवंक्रुद्धोवक्षस्यबाधत॥२१॥नाचलत्तत्प्रहारेणमालाहतइवद्विपः॥बाह्वोर्निगृह्यचाणूरंबहु

शोभ्रामयन्हरिः॥२२॥भूपृष्ठेपोथयामासतरसाक्षीणजीवितं॥विस्रस्ताकल्पकेशस्त्रगिंद्रध्वजइवापतत्॥२३॥तथैवमु

ष्टिकःपूर्वंस्वमुष्ट्याभिहतेनवै॥बलभद्रेणबलिनातलेनाभिहतोभृशं॥२४॥॥ ॥वतोगात्राणांअरत्निजान्वादीनांनिःपातैःप्र 

हारैःवज्रस्यनिःपेषःताडःप्रपातःतद्वन्निष्ठुरैर्भज्यमानांगःश्लथगात्रः॥२०॥श्येनस्येववेगोयस्यसचाणूरःअबाधतअताडयत्॥२१॥२२॥भूपृष्ठेभुवमंडपरिपोथया

मासआस्फालयत्॥इंद्रध्वजोवज्रं॥यद्वाइंद्रध्वजोनामगौडेषुप्रसिद्धः॥कस्मिंश्चिद्दुर्गवेमहांस्तंभोध्वजःपताकायलंकृतःपुरुषास्तिरुछ्रीयते॥सययापतति

तद्वदपतदिति॥२३॥२४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अर्दिताः पीडिताः ॥ उरसुपस्थे ऊरुतले ॥२५॥ २८॥ वलांतौ नत्वादिकं वर्तौ ॥२८॥ साधुसाध्विति वदंतः ॥३०॥ ३३॥ अव्ययः अश्रमः ॥ लघिम्ना लाघवेन ॥३४॥

सुः प्रवेपितः सरुधिरमुद्वमन्मुखतोर्दितः ॥ व्य[illegible]ः पपातोरुपस्थे वाताहत इवांघ्रिपः ॥२५॥ ततः कूटमनुप्राप्तं रामः प्रहरतां वरः ॥ अव
सं धीत्लीलया राजन्सावज्ञं वाममुष्टिना ॥२६॥ तर्ह्येव हि शलः कृष्णपादापहतशीर्षकः ॥ द्विधा विदीर्णस्तोशलक उभावपि निपेततुः
॥२७॥ चाणूरे मुष्टिके कूटे शले तोशलके हते ॥ शेषाः प्रदुद्रुवुर्मल्लाः सर्वे प्राणपरीप्सवः ॥२८॥ गोपान्वयस्यानाकृष्य तैः सं
सृज्य विजह्रतुः ॥ वाद्यमानेषु तूर्येषु वल्गंतौ रुतनूपुरौ ॥२९॥ जनाः प्रजहृषुः सर्वे कर्मणा रामकृष्णयोः ॥ ऋते कंसं विप्रमुख्याः
साधवः साधु साध्विति ॥३०॥ हतेषु मल्लवर्येषु विद्रुतेषु च भोजराट् ॥ न्यवारयत्स्वतूर्याणि वाक्यं चेदमुवाच ह ॥३१॥ निःसारय
तद्दुर्वृत्तौ वसुदेवात्मजौ पुरात् ॥ धनं हरत गोपानां नंदं बध्नीत दुर्मतिं ॥३२॥ वसुदेवस्तु दुर्मेधा हन्यतामाशु सत्तमः ॥ उग्रसे
नः पिता चापि सानुगः परपक्षगः ॥३३॥ एवं विकत्थमाने वै कंसे प्रकुपितोव्ययः ॥ लघिम्नोत्पत्य तरसा मंचमुत्तुंगमारुहत् ॥ स
३४॥ तमाविशंतमालोक्य मृत्युमात्मन आसनात् ॥ मनस्वी सहसोत्थाय जगृहे सोऽसिचर्मणी ॥३५॥ तं खड्गपाणिं विचरंतमाशु
श्येनं यथा दक्षिणसव्यमंबरे ॥ समग्रहीद्दुर्विषहोग्रतेजा यथोरगं तार्क्ष्यसुतः प्रसह्य ॥३६॥ प्रगृह्य केशेषु चलत्किरीटं निपा
त्य रंगोपरि तुंगमंचात् ॥ तस्योपरिष्टात्स्वयमब्जनाभः पपात विश्वाश्रय आत्मतंत्रः ॥३७॥ ॥ श्रीरामाः ॥ ॥ ॥

॥३५॥ ३६॥ दुर्विषहं अविषह्यमुग्रं तेजो यस्य सः श्यानः ॥३६॥ गरिष्ठत्वाय विश्वाश्रयत्वमुक्तं तत्र हेतुः ॥ अब्जनाभः ॥ कृतस्तस्योपर्येव पपात यत आत्मतंत्रः ॥३७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० टी०
१२८

।।३९।। निर्वैरघोनिःकृतिः आनृशंस्यमित्यर्थः ।। तत्कारिणः संतस्ते ऽन्वधावन् ।। ४० ।। तथाता दृक् ।। अतिरंहसो वेगो येषां तान् ।। संयत्तान् उद्युक्तान् ।। ४१ ।। ४२
४३ ।। शोचंत्यो विलापांश्चक्रुः शुचः अश्रूणि ।। ४४ ।। धर्मज्ञेत्यादि निर्विलापे प्रेमसंबोधनानि तेत्वदायावयं ।। ४५ ।। त्वया पत्या [illegible] विरहिता पुरायं न शोभते

तं संपरेतं विचकर्ष नृसो हरिर्यथेनं जगतो विपश्चपतः ।। हा हेति शब्दः सुमहांस्तदाभूदुदीरितः सर्वजनैर्नरेंद्र ।। ३८ ।। स नित्यदोद्विग्न
धियात्मना ध्वरं पिबन्वदन्वा विचरन्स्वपन्श्वसन् ।। ददर्श चक्रायुधमग्नतोयतस्तदेवरूपं दुरवापमाप ।। ३९ ।। तस्यानुजान्भ्रात
रोऽष्टैकं न्यग्रोधकादयः ।। अन्वधावन्नभिक्रुद्धा भ्रातुर्निर्वेशकारिणः ।। ४० ।। तथातिरंहसां स्तांस्तु संयत्तान्नौहिणिसु
तः ।। अहन्परिघमुद्यम्य पशूनिव मृगाधिपः ।। ४१ ।। नेदुर्दुंदुभयो व्योम्नि ब्रह्मेशाद्या विभूतयः ।। पुष्पैः किरंतस्तं प्रीताः शंसंतसु
र्नेनृतुश्च स्त्रियः ।। ४२ ।। तेषां स्त्रियो महाराज सुहृन्मरणदुःखिताः ।। तत्राभीयुर्विनिघ्नंत्यः शीर्षाण्यश्रुविलोचनाः ।। ४३ ।। श
यानान्वीरशय्यायां पतीनालिंग्य शोचतीः ।। विलेपुः सुस्वरं नार्यो विसृजंत्यो मुहुः शुचः ।। ४४ ।। हा नाथ प्रिय धर्मज्ञ करुणानाथ
वत्सल ।। त्वया ह तेन निहता वयं ते स्म गृहप्रजाः ।। ४५ ।। त्वया विरहिता पत्या पुरीयं पुरुषर्षभ ।। न शोभते वयमिव निवृत्तोत्सवमंगला
।। ४६ ।। अनागसां त्वं भूतानां कृतवान्द्रोहमुल्बणं ।। तेनेमां नो दशां नीतो भूतध्रुक्को लभेत शं ।। ४७ ।। येषामिह भूतानामेष वै मन
वाप्ययः ।। यो माचतदवध्याय न कश्चित्सुखमेधते ।। ४८ ।। ।। ।। इति सदध्यानिर्धानं ।। ४६ ।। अनागसामिति त्रपरमार्थ निधानं ।। ४७ ।। एष भ्रातृवध: प्रजवंतस्मादिति प्रभवः ।। अपियं स्यात्पस्मिन्रति अप्ययः सचसच ।। तदवध्यानं तदवज्ञा तत्कर्तुर्यो लंयस्यसः ।। ४८ ।। ।। ।।

स
राम: ९
१२८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सन्मेस

आस्यरूपईषस्पृष्ठा ॥५०॥ पुत्रत्वं तिंविहाय जगदीश्वरावितिज्ञात्वा शंकितौ न सस्वजाते नालिंगितवंतौ किंत्वबद्धांजलीतस्थतुरित्यर्थः ॥ प्रसृद्युद्धत्वा हस्ती इं
महेंद्रान्मल्ललीलयास्विविनस्स चरितं कंसं सबान्धवममारयत् ॥५१॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे टी॰ चतुश्चत्वारिंशोध्यायः ॥४४॥ पं
चचत्वारिंशके थपित्रनंदादिसांत्वनं ॥ उग्रसेनाभिषेकश्च गुरौ वासा सुरागमः ॥१॥ उपलब्धार्थो विदित्वेति अयमर्थः ॥ उपसमीपे आवयोः पुत्रबुध्या
सांसारिकपरमसुखभोगात्पूर्वमेव लब्धार्थो लब्ध आवामीश्वरावितिप्राप्तः परमज्ञानरूपोर्थो याभ्यां तथाभूतौ ज्ञात्वा मायिमं सत्पनयोर्ज्ञानं नामकिं

श्रीशुकउवाच ॥ ॥ राजयोषित आश्वास्य भगवांस्त्रो कनावनः ॥ यामाह लौकिकीं संस्थां हतानां समकारयत् ॥४९॥ मातरं पितरं
चैव मोचयित्वाथ बंधनात् ॥ कृष्णरामौ ववंदाते शिरसास्पृश्य पादयोः ॥५०॥ देवकी वसुदेवश्च विज्ञाय जगदीश्वरौ ॥ कृतसंवंद
नौ पुत्रौ सस्वजाते न शंकितौ ॥५१॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे चतुश्चत्वारिंशोध्यायः ॥४४॥ ॥ श्रीशुक उ॰
॥ ॥ पितरावुपलब्धार्थौ विदित्वा पुरुषोत्तमः ॥ मा भूदिति निजां मायां ततान जनमोहिनीं ॥१॥ उवाच पितरावेत्य साग्रजः सात्वतर्ष
भः ॥ प्रश्रयावनतः प्रीणन्नंब ताते ति सादरं ॥२॥ नास्मत्तो युवयोस्तात नित्योत्कंठितयोरपि ॥ बाल्यपौगंडकैशोराः पुत्राभ्यामभ
वन्क्वचित् ॥३॥ न लब्धो दैवहतयोर्वासो नौ भवदंतिके ॥ यां बालाः पितृगेहस्था विंदंते लालिता मुदं ॥४॥ ॥ दुर्लभं स्यात् ॥ दुर्लभं त्वमपि पु
त्रतया प्रेम ॥ अत इदानीमेव तत्त्वज्ञानं मा भूदिति निजां साधीनां मायां तयोः प्रसारितवानिति ॥१॥ तदेव दर्शयति ॥ उवाचेत्याद्यष्टभिः ॥ प्रीणयन्सादरं ब्रुवन् ॥२॥
अस्मत्तः अस्मान्निमित्तं नित्यमुत्कंठितयोरपि युवयोः पुत्राभ्यामावाभ्यां कृत्वा बालपौगंडकैशोराः तत्तदवस्थानुभवसुखानीत्यर्थः ॥ तेनानुभविनिति । अस्मतः
पुत्राभ्यामिति सामानाधिकरण्येन वा ॥३॥ किंच आवाँ वामेव देवहतानाविन्याह । न लब्ध इत्यवति । पितृगेहस्था बाला यां मुदं विंदंते सा च न लब्धेति । एवं भावत श्लोकद्व

॥ कमुद्वेगवचोभिरकालितामितास्तेति ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पू०
१२९

आवयोः पुनर्द्वयोरस्थिरयालोपेन धर्महानिरपिजातेत्याह॥ सर्वार्थसंभवइति॥ सर्वेषांधर्मार्थकामानांसंभवोयस्मिन्सदेहः यतःयाभ्यांजनितःपोषितश्चतयोःपित्रोर्निर्वेशमानृण्यंम
र्त्यःशतसंवत्सरमात्रेणायुषानप्राप्नोति॥५॥ तन्मध्येपित्रर्थंपुत्रःकल्पःसमर्थःसमर्थन्नपिदेहेनधनेनचपित्रोर्वृत्तिंजीविकांनसंपादयेत्तंप्रेत्यपरलोकंप्राप्तंयमदूताःस्वमां
संखादयंति॥ ईति॥६॥ किंचमात्रादिशुश्रूषामकुर्वन्विफलंजीवितंभवतीत्याह॥ मातरमिति॥ अबिभ्रत् अपुष्णन्॥ श्वसन्नपिमृतकल्पएवेति॥७॥ तत्तस्मान्नौ आव

सर्वार्थसंभवोदेहोजनितःपोषितोयतः॥ नतयोर्यातिनिर्वेशंपित्रोर्मर्त्यःशतायुषा॥५॥ यस्तयोरात्मजःकल्प आत्मनाचधनेनच॥ वृत्तिं
नदद्यात्तंप्रेत्यस्वमांसंखादयंतिहि॥६॥ मातरंपितरंवृद्धंभार्यांसाध्वींसुतंशिशुं॥ गुरुंविप्रंप्रपन्नंचकल्पोबिभ्रच्छ्वसन्मृतः॥७॥ त
न्नावकल्पयोःकंसान्नित्यमुद्विग्नचेतसोः॥ मोघमेतेव्यतिक्रांतादिवसावामनर्चतोः॥८॥ ततक्षंतुमर्हथस्तातमातर्नौपरतंत्रयोः
॥ अकुर्वतोर्वांशुश्रूषांक्लिष्टयोर्दुर्हृदाभृशं॥९॥ ॥श्रीशुकउ०॥ ॥इतिमायामनुष्यस्यहरेर्विश्वात्मनोगिरा॥ मोहितावंकमा
रोप्यपरिष्वज्यापतुर्मुदं॥१०॥ सिंचंतावश्रुधाराभिःस्नेहपाशेनचावृतौ॥ नकिंचिदूचतूराजन्बाष्पकंठौविमोहितौ॥११॥ एवमाश्वा
स्यपितरौभगवान्देवकीसुतः॥ मातामहंतूग्रसेनंयदूनामकरोन्नृपं॥१२॥ आहचास्मान्महाराजप्रजाश्चाज्ञप्तुमर्हसि॥ ययाति
शापाद्यदुभिर्नासितव्यंनृपासने॥१३॥ मयिभृत्यउपासीने भवतोविबुधादयः॥ बलिंहरंत्यवनताःकिमुतान्येनराधिपाः॥
॥१४॥

योःमोघंव्यर्थंअनर्चतोअपूजयतोः॥८॥ रुदाकंसेनक्लृप्ता॥९॥१०॥११॥ आश्वास्यसांत्वयित्वा॥१२॥ तमेवास्ताययेतिमावदेत्याह॥ ययातिशापादिति॥ तवत्र
यादवत्वेपिमदाज्ञयानदोषइतिभावः॥१३॥ ममतादृशाशक्तिर्नास्तिइतिचेत्तत्राह॥ मयीति॥ मत्प्रसादेनसर्वंभविष्यतीतार्थः॥१४॥ ॥श्रीरामाकृष्णायनमः॥ ॥

भी

रामः
१२९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वान् ज्ञातीन् संबंधांश्च दिग्भ्य आनय्येति ॥१५॥१६॥ सिद्धाः पूर्णाः ॥ कृष्णरामाभ्यां गतो निवृत्तो ज्वरस्तापो येषां ते ॥१७॥ सदयस्मितं वीक्षणं यस्मिन् तत् ॥१८॥ प्रवयसो
वृद्धा अपि ॥ अतिशयितं बलमोजश्च येषां ते ॥१९॥२०॥ भृशं आत्मनोप्याधिक्येन पोषितौ ॥ न चाश्चर्यमेतदित्याह ॥ पित्रोरिति ॥ आत्मनो देहादप्यात्मजेष्वभ्यधिका

सर्वान्स्वान्ज्ञातिसंबंधान्दिग्भ्यः कंसभयाकुलान् ॥ यदुवृष्ण्यंधकमधुदाशार्हकुकुरांधकान् ॥१५॥ सभाजितान्समाश्वास्य विदेशावासक
र्शितान् ॥ न्यवासयत्स्वगेहेषु वित्तैः संतर्प्य विश्वकृत् ॥१६॥ कृष्णसंकर्षणभुजैर्गुप्ता लब्धमनोरथाः ॥ गृहेषु रेमिरे सिद्धाः कृष्णरामगत
ज्वराः ॥१७॥ वीक्षंतोऽहरहः प्रीता मुकुंदवदनांबुजं ॥ नित्यं प्रमुदितं श्रीमत्सदयस्मितवीक्षणं ॥१८॥ तत्र प्रवयसोप्यासन्युवा
नोतिबलौजसः ॥ पिबंतोक्षैर्मुकुंदस्य मुखांबुजसुधां मुहुः ॥१९॥ अथ नंदं समासाद्य भगवान्देवकीसुतः ॥ संकर्षणश्च राजेंद्र प
रिष्वज्येदमूचतुः ॥२०॥ पितर्युवाभ्यां स्निग्धाभ्यां पोषितौ लालितौ भृशं ॥ पित्रोरभ्यधिका प्रीतिरात्मजेष्वात्मनोपि हि ॥२१॥ स पिता सा च
जननी यौ पुष्णीतां स्वपुत्रवत् ॥ शिशून्बंधुभिरुत्सृष्टानकल्पैः पोषरक्षणे ॥२२॥ यात यूयं व्रजं तात वयं च स्नेहदुःखितान् ॥ ज्ञाती
न्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखं ॥२३॥ एवं सांत्वय्य भगवान्नंदं सव्रजमच्युतः ॥ वासोलंकारकुप्याद्यैरर्हयामास सादरं ॥२४
॥ इत्युक्तस्तौ परिष्वज्य नंदः प्रणयविह्वलः ॥ पूरयन्नश्रुभिर्नेत्रे सह गोपैर्व्रजं ययौ ॥२५॥ ॥ ॥ ॥

हि प्रीतिरिति ॥२१॥ देवकीवसुदेवयोः पुत्रौ युवां नास्मत्पुत्राविति पिता न वाच्य इत्याह ॥ स पितेति ॥२२॥२३॥ सव्रजं व्रजवासिभिः सहितं ॥ कुप्यानि स्वर्णरजतातिरि
क्तकांस्यादिपात्रादीनि तत्प्रभृतिभिः ॥२५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०टी०
१३०

पुरोधसा गर्गाचार्येण ॥ द्विजसंस्कृतिं उपनयनं ॥२६॥ गोवो गाः ॥ रुक्मस्य माला विद्यंते यासां ताः क्षौमवस्त्रमालावतीः ॥२७॥ याः पूर्वं मनसा नोदत्ता आसन् ता एवा
ददात् । ननु ताः कंसेन हृता सत्यं राजगोष्ठदा छिद्यदत्ता रत्या ताः कंसेनाधर्मतः हृताः ॥२८॥ गायत्रं व्रतं ब्रह्मचर्यं ॥२९॥ प्रकर्षेण भवंतः स्यामिति प्रभवौ ॥ अत एव सर्वज्ञौ ॥ स्वतः सि — से
द्धममलं ज्ञानं प्रच्छादयंतौ नरचेष्टितैः ॥३०॥३१॥ यथा यथाय थाय थावत् उपसाद्य प्राप्य गुरोर्वृत्तिमन्यान् ग्राहयंतौ शिक्षयंतौ ॥ गुरुमुपेतौ उपगतौ वितवंता विसर्थः

अथ शूरसुतो राजन् पुत्रयोः समकारयत् ॥ पुरोधसा ब्राह्मणैश्च यथावद्द्विजसंस्कृतिं ॥२६॥ तेभ्योदाद्दक्षिणां गावो रुक्ममालाः स्वलंकृता — द
॥ स्वलंकृतेभ्यः संपूज्य सवत्साः क्षौममालिनः ॥२७॥ याः कृष्णरामजन्मर्क्षे मनोदत्ता महामतिः ॥ ताश्चाददादनुस्मृत्य कंसेनाधर्मतो हृता
॥२८॥ ततश्च लब्धसंस्कारौ द्विजत्वं प्राप्य सुव्रतौ ॥ गर्गाद्यदुकुलाचार्याद्गायत्रं व्रतमास्थितौ ॥२९॥ प्रभवौ सर्वविद्यानां सर्वज्ञौ जगद
श्वरौ ॥ नान्यसिद्धामलं ज्ञानं गूहमानौ नरेहितैः ॥३०॥ अथो गुरुकुले वासमिच्छंतावुपजग्मतुः ॥ काश्यं सांदीपनिं नाम ह्यवंतिपुर
टी०सै वासिनं ॥३१॥ यथोपसाद्य तौ दांतौ गुरौ वृत्तिमनिंदितां ॥ ग्राहयंतावुपेतौ स्म भक्त्या देवमिवादृतौ ॥३२॥ तयोर्द्विजवरस्तुष्टः शुद्धभावा
नुवृत्तिभिः ॥ प्रोवाच वेदानखिलान् सांगोपनिषदो गुरुः ॥३३॥ सरहस्यं धनुर्वेदं धर्मान्न्यायपथांस्तथा ॥ तथा चान्वीक्षिकीं वि
द्यां राजनीतिं च षड्विधां ॥३४॥ सर्वं नरवरश्रेष्ठौ सर्वविद्याप्रवर्तकौ ॥ सकृन्निगदमात्रेण तौ संजगृहतुर्नृप ॥३५॥ ॥ ॥ — रामः
१३०

॥३२॥ शुद्धो भावो यासु ताभिरनुवृत्तिभिः सांगोपनिषदः अंगानि शिक्षादीनि तैरुपनिषद्भिश्च सहितान् ॥३३॥ सरहस्यं मंत्रदेवताज्ञानसहितं ॥ धर्मान्मन्वादिधर्मशास्त्राणि
॥ न्यायपथान्मीमांसादीन् ॥ आन्वीक्षिकीं तर्कविद्यां ॥ षड्विधां संधिश्च विग्रहो यानमासनं द्वैधमाश्रयश्चेत्येवं षड्विधां राजनीतिं ॥३४॥ सकृन्निगदमात्रेण एकवारं गुरोरुच्चा
रणमात्रेण ॥३५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तावतीः चतुःषष्टिकलाः ॥ ताश्चैशैव तंत्रप्रोक्ता लिख्यंते यथा ॥ गीतं ॥१॥ वाद्यं ॥२॥ नृत्यं ॥३॥ नाट्यं ॥४॥ आलेख्यं ॥५॥ विशेषकच्छेद्यं ॥६॥ तंडुलकुसुमविकाराः ॥७॥ पुष्पास्तरणं ॥
८॥ दशनवसनांगरागाः ॥९॥ मणिभूमिकाकर्म ॥१०॥ शयनरचनं ॥११॥ उदकवाद्यमुदकघातः ॥१२॥ चित्रायोगाः ॥१३॥ माल्यग्रथनविकल्पाः ॥१४॥ शेखरापीडयोजनं ॥१५॥
नेपथ्ययोगाः ॥१६॥ कर्णपत्रभंगाः ॥१७॥ सुगंधयुक्तिः ॥१८॥ भूषणयोजनं ॥१९॥ ऐंद्रजालं ॥२०॥ कौचुमारयोगाः ॥२१॥ हस्तलाघवं ॥२२॥ चित्रशाकापूपभक्ष्यविका
रक्रिया ॥२३॥ पानकरसरागासवयोजनं ॥२४॥ सूचीवायकर्म ॥२५॥ सूत्रक्रीडा ॥२६॥ वीणाडमरुकवाद्यानि ॥२७॥ प्रहेलिका ॥२८॥ प्रतिमाला ॥२९॥ दुर्वचकयोगाः ॥
३०॥ पुस्तकवाचनं ॥३१॥ नाटकाख्यायिकादर्शनं ॥३२॥ काव्यसमस्यापूरणं ॥३३॥ पट्टिकावेत्रवाणविकल्पाः ॥३४॥ तर्ककर्माणि ॥३५॥ तक्षणं ॥३६॥ वास्तुविद्या ॥३७॥

अहोरात्रैश्चतुःषष्ट्या संयत्तौ तावतीः कलाः ॥ गुरुदक्षिणयाचार्यं छंदयामासतुर्नृप ॥३६॥ द्विजस्तयोस्तं महिमानमद्भुतं संलक्ष्य
राजन्नतिमानुषीं मतिं ॥ संमंत्र्य पत्न्या स महार्णवे मृतं बालं प्रभासे वरयांबभूव ॥३७॥ तथेत्यथारुह्य महारथौ रथं प्रभासमासा
द्य दुरंतविक्रमौ ॥ वेलामुपव्रज्य निषीदतुः क्षणं सिंधुर्विदित्वार्हणमाहरत्तयोः ॥३८॥ तमाह भगवानाशु गुरुपुत्रः प्रदीयतां ॥ यो
ऽसाविह त्वया ग्रस्तो बालको महतोर्मिणा ॥३९

रूप्यरत्नपरीक्षा ॥३८॥ धातुवादः ॥३९॥ मणिरागज्ञानं ॥४०॥ आकरज्ञानं ॥४१॥ वृक्षायुर्वेदयोगाः ॥४२॥ मेषकुक्कुटलावकयु
द्धविधिः ॥४३॥ शुकसारिकाप्रलापनं ॥४४॥ उत्सादनं ॥४५॥ केशमार्जनकौशलं ॥४६॥ अक्षरमुष्टिकाकथनं ॥४७॥ म्लेच्छितकविकल्पाः ॥४८॥ देशभाषाज्ञानं ॥४९॥ पुष्पशकटिका ॥५०
निमित्तज्ञानं ॥५१॥ यंत्रमातृका धारणमातृका संवाच्यं ॥५२॥ मानसी काव्यक्रिया ॥५३॥ अभिधानकोशः ॥५४॥ छंदोज्ञानं ॥५५॥ क्रियाविकल्पाः ॥५६॥ छलितकयोगाः ॥
५७॥ वस्त्रगोपनानि ॥५८॥ द्यूतविशेषाः ॥५९॥ आकर्षक्रीडाः ॥६०॥ बालक्रीडनकानि ॥६१॥ वैनायकानां वैजयिकानां वैयासिकानां च विद्यानां ज्ञानानि ॥६४॥ रतिचतुःषष्टिः
कलाः ॥ छंदयामासतुः ॥ उपलेभितें वंतौ ॥३६॥ प्रभासे क्षेत्रे महार्णवे मृतं वरयामास ॥३७॥ ईश्वराविति विदित्वा समुद्रस्तयोरर्हणमाजहारेति ॥३८॥ ३९॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०टी०
१३२

पंचजनस्य स्वस्त्वसुरोऽहाषीत् स च महान्‌ मम साध्य इत्यर्थः॥ ४०॥ ४१॥ ४२॥ सपर्यां पूजां॥ ४३॥ सर्वेषां भूतानां मात्राश्रयो अंतःकरणानि तान्यालयो निवासो यस्य तं॥ ४४॥ निजं कर्म एव बंध
नं यस्य तं॥ तथाभूतमपि मदाज्ञापुरस्कारेणानयतेत्यनेन दोष इत्यर्थः॥ ४५॥ ४६॥ वत्सेति मा धान्येनैकस्य संबोधनं॥ गुरोर्निःक्रयो गुरुदक्षिणा॥ युष्मद्विध योगुरोर्मम कामानां

समुद्र उवाच॥ ॥नैवाहर्षमहं देव दैत्यः पंचजनो महान्‌॥ अंतर्जलचरः कृष्ण शंखरूपधरोऽसुरः॥ ४०॥ जलमाविश्य तं हत्वा नापश्यप्
दुदरेर्भकं तदंगप्रभवं शंखमादाय रथमागमत्‌॥ ४१॥ ततः संयमनीं नाम यमस्य दयितां पुरीं॥ गत्वा जनार्दनः शंखं प्रदध्मौ सहलायुध
:॥ ४२॥ शंखनिर्ह्रादमाकर्ण्य प्रजासंयमनो यमः॥ तयोः सपर्यां महतीं चक्रे भक्त्युपबृंहितां॥ ४३॥ उवाचावनतः कृष्णं सर्वभूताशया
लयं॥ लीलामनुष्य हे विष्णो युवयोः करवाम किं॥ ४४॥ श्रीभगवानुवाच॥ ॥गुरुपुत्रमिहानीतं निजकर्मनिबंधनं॥ आनयस्व महा
राज मच्छासनपुरस्कृतः॥ ४५॥ तथेति तेनोपानीतं गुरुपुत्रं यदूत्तमौ॥ दत्वा स्वगुरवे भूयो वृणीष्वेति तमूचतुः॥ ४६॥ गुरुरुवाच॥ ॥
सम्यक् संपादितो वत्स भवद्भ्यां गुरुनिःक्रयः॥ को नु युष्मद्विधगुरोः कामानामवशिष्यते॥ ४७॥ गच्छतं स्वगृहं वीरौ कीर्तिर्वामस्तु पा
वनी॥ छंदांस्ययातयामानि भवंत्विह परत्र च॥ ४८॥ गुरुणैवमनुज्ञातौ रथेनानिलरंहसा॥ आयातौ स्वपुरं तात पर्जन्यनिनदेन वै
॥ ४९॥ समनंदन्प्रजाः सर्वा दृष्ट्वा रामजनार्दनौ अपश्यंतो बह्वहानि नष्टलब्धधना इव॥ ५०॥ ॥इति श्रीभागवते महापु
राणे दशमस्कंधे पंचचत्वारिंशोऽध्यायः॥ ४५॥ ॥ ॥मध्ये को नु कामो वशिष्यते॥ न कोपि॥ ४७॥ हे वीरौ॥ ४८॥ अनिलवद्रंहो वेगो यस्य तेन॥ प  रामः १३२

र्जन्यो मेघः तद्वन्निनदो यस्य तेन॥ ४९॥ नष्टं अदृष्टं तत्पुनर्लब्धं धनं यैस्त इव॥ ५०॥ ॥इति श्रीभागवते पुराणे दशमस्कंधे टी० पंचचत्वारिंशोऽध्यायः॥ ४५॥ ॥
षट्चत्वारिंशके घोषमुद्धवं प्रेष्यत द्धरिः॥ यशोदानंदयोः स्वैक्ये कृष्णः शोकापनोदनं॥ १॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केकामचारं द्विजातिः सम्परिसमाप्तिसंयतः ॥ गुरोर्ज्ञानमनुप्राप्य सखा गोपा रूपादिशत् ॥२॥ गोपीनां सांत्वनमिति विरहस्य सम्यक् त्रिसाध्यमिति तदर्थं उद्धवं विशिनष्टि ॥ वृष्णी
नामिति ॥ बुद्धिसत्तमः बुध्या ॰ तिश्रेष्ठः ॥१॥२॥ ३॥ गोपीनां विशेषतः संदेशकारणमाह ॥ ता इति ॥ मय्येव संकल्पात्मकं मनो यासां ताः ॥ अहमेव प्राणो यासां ताः ॥ मदर्थे त्यक्ता
दैहिकाः पतिपुत्रादयो याभिस्ताः ॥ ततः किं अत आह ॥ ये त्यक्तलोकधर्मा इहामुत्र सुखे तत्साधनानि च यैस्तांस्तान्बिभर्मि पुष्णामि संवर्द्धयामीत्यर्थः ॥४॥ बतासां

॥ श्रीशुक उवाच ॥ ॥ वृष्णीनां प्रवरो मंत्री कृष्णस्य दयितः सखा ॥ शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः ॥१॥ तमाह भगवान्प्रेष्ठं भ-
क्तमेकांतिनं क्वचित् ॥ गृहीत्वा पाणिना पाणिं प्रपन्नार्तिहरो हरिः ॥२॥ गच्छोद्धव व्रजं सौम्य पित्रोर्नौ प्रीतिमावह ॥ गोपीनां मद्वियो-
गाधिं मत्संदेशैर्विमोचय ॥३॥ ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ॥ मामेव दयितं प्रेष्ठमात्मानं मनसा गताः ॥४॥ ये त्य-
क्तलोकधर्माश्च मदर्थे तान्बिभर्म्यहं ॥४॥ मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः ॥ स्मरंत्योंग विमुह्यंति विरहौ-
त्कंठ्यविक्लवाः ॥५॥ धारयंत्यतिकृच्छ्रेण प्रायः प्राणान्कथंचन ॥ प्रत्यागमनसंदेशैर्बल्लव्यो मे मदात्मिकाः ॥६॥ ॥
श्रीशुक उवाच ॥ ॥ इत्युक्त उद्धवो राजन्संदेशं भर्तुरादृतः ॥ आदाय रथमारुह्य प्रययौ नंदगोकुलं ॥७॥ ॥ श्रीरामः ॥ ॥

वियोगाधिं दर्शयति द्वयेन ॥ मयि ता इति ॥ विरहे णौत्कंठ्येन तेन विक्लवाः परवशाः ॥५॥ गोकुलान्निर्गमनसमये शीघ्रमागमिष्यामीति ये प्रत्यागमनसंदेशाः तैः
॥ मे मदीयाः बल्लव्यो गोप्यः ॥ मदात्मिका इति बतासामात्मा स्वदेहेंद्रियादिस्पात्र हि विरहतापेन दह्येतैव ॥ तस्य मयि वर्त्तमानत्वात्कथंचित्को वंतीति भावः ॥६॥ सं
देशं भवतां वियोगो मे न हि सर्वात्मना क्वचिदित्यादिकं ॥७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च

गो० द० टी० निम्लोचति अस्तंगछतिसति॥ छन्नंयानंयस्येति॥ तदागोपाभिस्तातत्वेकनंदसंगंलब्धवान्रतिसूंयति॥ ८॥ व्रजंवर्णयतिपंचभिः वासिताः पुष्पवंत्योगावतन्निमित्तमभि
१३२ तोयुगद्भिः॥शुष्मिन्निर्मन्त्रैर्गोर्हृषेर्नादितं॥ वास्राभिर्देतुभिः॥ स्वस्वसकावमति॥ ९॥ विलंघद्भिरुत्पतद्भिः॥ गोदोहशब्दैः सद्धान्तितोरवाः मुंचमामुंचनयआनयगद्दाणांदेङ्ा सा

मास्मोनंदव्रजंस्म्रामाल्लिम्लोचतिक्लिावसौ॥ छन्नयानःप्रविशातांपस्मूतांखुररेणुभि॥ ८॥ वासितार्थेभियुद्धद्भिर्नादितंशुष्मिनिर्वृषैः॥ धावं
त्तिश्चवात्सैभिरूधोभारैःस्ववत्सकान्॥ ९॥ उत्सृतैविलंघद्भिर्गोवत्सैर्मंडितंसितैः॥ गोदोहशब्दाभिरवंवेणूनांनिःस्वनेनच॥ १०॥
गायंतीभिश्चकर्माणिशुभानिबलकृष्णयोः॥ स्वलंकृताभिर्गोपीभिर्गोपैश्चसुविराजितं॥ ११॥ अग्न्यर्कातिथिगोविप्रपितृदेवार्चनान्विते गोपी गि
॥ धूपदीपैश्चमाल्यैश्चगोपावासैर्मनोरमं॥ १२॥ सर्वतःपुष्पितवनंद्विजालिकुलनादितं॥ हंसकारंडवाकीर्णैःपद्म डैश्चमंडितं खं
त्रि ॥ १३॥ तमागतंसमागम्यकृष्णस्यानुचरैर्युं॥ नंदः प्रीतः परिष्वज्यवासुदेवधियार्च यत्॥ १४॥ नोनितंपरमा न्नेनसंविष्टंकशि
पौसुखं॥ गतश्रमंपर्यपृछत्पादसंवाहनादिभिः॥ १५॥ कच्चिदंगमहानागःसखानःसूरनंदनः॥ आस्तेक्रूरात्स्वपत्यानांयुक्तो
मुक्तःसुहृद्वृतः॥ १६॥ दिष्ट्याकंसोहतःपापःसानुगःस्वेनपाप्मना॥ साधूनांधर्मशीलानांयदूनांद्वेष्टियःसदा॥ १७॥ अपि
स्मरतिनःकृष्णोमातरंसुहृदःसखीन्॥ गोपान्व्रजंचात्मनाथंगावोवृंदा वनंगिरिं॥ १८॥ ॥ श्रीरामाकृष्णायनमः॥ रामः
१३२

दर्योयस्मिन्तत॥ वेणूनांनिःस्वनेनच॥ १०॥ गायंतीभिर्गोपीभिर्गोपैश्चसुविराजितं॥ ११॥ अग्न्याद्यर्चनान्वितैर्गृहैः धूपादिभिश्चमनोरमं॥ १२॥ षंडंसमूहः॥ १३॥ अर्चयत्पूज
यामास॥ १४॥ १५॥ १६॥ ॥ साधूनामिति॥ कर्म्मणिषष्ठी॥ १७॥ ॥ गावोगाः॥ गिरिंगोवर्द्धनं॥ १८॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्यायास्यति आगमिष्यतीति किं ॥१९॥ श्रीकृष्णोपकारस्मरणादि निरनुपमानंदेनाभिभूयमान आह ॥ दावाग्नेरित्यादिना ॥ वाताद्वर्षाच्चेति ॥ वर्षात्सर्पाच्चेति अन्येभ्य
श्च दुरतिक्रमेभ्यो मृत्युभ्यः श्रीकृष्णेन रक्षिताः स्म ॥२०॥ किं च स्मरतामिति ॥ लीलया अपांगेन निरीक्षितं ॥ अंगहे उद्धव ॥२१॥ न केवलं शिथिला एव किं तु शनैरुपरमंती

आप्यायास्यति गोविंदः स्वजनान्सकृदीक्षितुं ॥ तर्हि द्रक्ष्याम तद्वक्त्रं सुनसं सुस्मितेक्षणं ॥१९॥ दावाग्नेर्वातवर्षाच्च वृषसर्पाच्च रक्षिताः
॥ दुरत्ययेभ्यो मृत्युभ्यः कृष्णेन सुमहात्मना ॥२०॥ स्मरतां कृष्णवीर्याणि लीलापांगनिरीक्षितं ॥ हसितं भाषितं चांग सर्वा नः शि
थिलाः क्रियाः ॥२१॥ सरिच्छैलवनोद्देशान्मुकुंदपदभूषितान् ॥ आक्रीडानीक्षमाणानां मनो याति तदात्मतां ॥२२॥ मन्ये कृ
ष्णं च रामं च प्राप्ताविह सुरोत्तमौ ॥ सुराणां महदर्थाय गर्गस्य वचनं यथा ॥२३॥ कंसं नागायुतप्राणं मल्लौ गजपतिं तथा ॥ अवधिष्टां
लीलयैव पशूनिव मृगाधिपः ॥२४॥ तालत्रयं महासारं धनुर्यष्टिमिवेभराट् ॥ बभंजैकेन हस्तेन सप्ताहमदधाद्गिरिं ॥२५॥ प्रलंबो
धेनुकोऽरिष्टस्तृणावर्तो बकादयः ॥ दैत्याः सुरासुरजितो हता येनेह लीलया ॥२६॥ ॥श्रीशुक उवाच॥ ॥ इति संस्मृत्य नंदः कृष्णानु संस्मृत्य
रक्तधीः ॥ अत्युत्कंठोऽभवत्तूष्णीं प्रेमप्रसरविह्वलः ॥२७॥ यशोदा वर्ण्यमानानि पुत्रस्य चरितानि च ॥ शृण्वंत्यश्रूण्यवास्रा
क्षीत्स्नेहस्नुतपयोधरा ॥२८॥ तयोरित्थं भगवति कृष्णे नंदयशोदयोः ॥ वीक्ष्यानुरागं परमं नंदमाहोद्धवो मुदा ॥२९॥ ॥उद्धव
उवाच॥ ॥युवां श्लाघ्यतमौ नूनं देहिनामिह मानद ॥ नारायणेऽखिलगुरौ यत्कृता मतिरीदृशी ॥३०॥ ॥ ॥ ॥

त्याह ॥ सरिच्छैलेति ॥ सरितश्च शैलाश्च वनोद्देशाश्च तान् ॥ आक्रीडानाक्रीडास्थानानि ॥२२॥ सुराणामर्थाय ॥ महदंशौ गर्गस्य वचनं यथा ॥२३॥ न केवलं तद्वच
नानुसारेणैव व्यवहारसंवादादपीत्याह ॥ कंसमिति ॥२४॥ इभराट् यष्टिमिव तालत्रयप्रमाणं धनुर्बभंज ॥२५॥२६॥२७॥२८॥२९॥३०॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० द० पू०
२३३

अखिलगुरुत्वमेवजनककत्वेननियंतृत्वेनचाह॥ एताविति॥ रामोमुकुंदश्चेत्येतौविश्वस्यबीजयोनीनिमित्तोपादाने॥ ननुपुरुषप्रधानयोर्बीजयोनित्वंप्रसिद्धमतआ
ह॥ पुरुषःप्रधानमिति॥ पुरुषोंशःप्रधानंशक्तिः अतःप्रधानपुरुषावप्येतावेवेत्यर्थः॥ एवंजनककत्वमुक्तं॥ किंच॥ अन्वायन्भूतेषुभूतेष्वनुप्रविश्यभूतानांतद्व्यति
ना तस्यविलक्षणस्यचर्मादेस्तस्यज्ञानस्यचजीवस्यदृष्टोनेश्वरोनियंतारौभवतः॥ कुतः॥ पुराणौ अनादी॥ अनादित्वात्कारणत्वं॥ ततश्चनियंतृत्वमित्यर्थः॥
३१॥ ननुसृष्ट्यादिकर्मविज्ञानमनुष्यादिजन्मदर्शनाच्चतस्यान्येभ्यःकोविशेषइत्याशंक्याह यः॥ यस्मिन्निति द्वाभ्यां॥ कर्माशयंकर्मवासनां॥ निर्दह्यत्स्य त्यक्त्वाब्रह्मम

एतौहिविश्वस्यचबीजयोनीरामोमुकुंदः पुरुषःप्रधानं॥ अन्वायभूतेषुविलक्षणस्यज्ञानस्यवेशात इमौपुराणौ॥ ३१॥ यस्मि
न्जनःप्राणवियोगकालेक्षणंसमावेश्यमनोविशुद्धं॥ निर्दह्यकर्माशयमाशुयातिपरांगतिंब्रह्ममयोक्षवर्णः॥ ३२॥ तस्मिन्भग
वंतावखिलात्महेतौनारायणेकारणमर्त्यमूर्तौ॥ भावंविदुत्वांनितरांमहात्मन्किंवावशिष्टंयुवयोस्सुतप्तं॥ ३३॥ आगमिष्यदीर्घे
णकालेनव्रजमच्युतः॥ प्रियंविधास्यतेपित्रोर्भगवान्सात्वतांपतिः॥ ३४॥ हत्वाकंसंरंगमध्येप्रतीपंसर्वसात्वतां॥ यदाहवःसमा
गत्यकृष्णःसत्यंकरोतितत्॥ ३५॥ माखिद्यतंमहाभागौद्रक्ष्यथःकृष्णमंतिके॥ अंतर्हृदिसभूतानामास्तेज्योतिरिवैधसि॥ ३६॥ ॥ त्य

यःस्वरूपज्ञानवान्॥ अर्कवर्णःशुद्धसत्वमूर्तिःसन्॥ परांगतिंतत्परंयाति॥ ३२॥ अखिलस्यात्मा चहेतुश्चतस्मिन्॥ कारणेनमनुष्याकृतौ॥ महात्मन्परिपूर्णेभवं
तौभक्तिंकिंकुरुतः॥ अतःकृतकृत्यावित्यर्थः॥ ३३॥ प्रस्तुतमाह॥ आगमिष्यतीति॥ पित्रोर्युवयोः॥ ३४॥ यातयूयंव्रजंतातवयंचस्नेहदुःखितान्॥ ज्ञातीन्वोद्रष्टुमेष्या राम:
मोविधायसुहृदांसुखमितियदाहकृष्णस्तत्सत्यंकरिष्यतीति॥ ३५॥ कालविलंबनमसहमानौप्रत्याह॥ माखिद्यतमिति॥ हेमहाभागौ अंतिकेइदानीमेवस २३३
मीपेवाक्ततरत आह॥ अंतर्हृदीति॥ तर्हिसर्वैःकिमितिनदृश्यतेतत्राह॥ ज्योतिरिति॥ तद्यथामथनंविनादृश्यतेतथाभक्तिंविनाद्रष्टुंकृष्णोपतिनावः॥ ३६॥
न

अहो आस्तामेतत्तस्य त्विहागमनं स्वस्याति प्रियान्मित्रादीन्विहायतत्त्वसंगच्छतश्च निमन्येत्त्वाह ॥ नह्यस्येति ॥ अस्य प्रियादयो न हि संति तत्र हेतुः ॥ अमानिनः समान
स्येति च ॥ ३७ ॥ ३८ ॥ सोपि जन्मकर्मादिरहितोपि क्रीडाप्रयोजनः सन् साधूनां परिपालनाय सदसन्मिश्रयोनिषु सात्विकतामसराजसयोनिषु ॥ यद्वा ॥ देवादिमनुष्या-
न्सिंहादियोनिषु कल्पते आविर्भवतीत्यर्थः ॥ ३९ ॥ ननु जन्मकर्मादिरहितस्य कृतस्त्यत आह ॥ सत्वमिति ॥ क्रीडमतीतोपि क्रीडन् ॥ तथापि मायागुणैरीश्वर

नह्यस्यास्ति प्रियः कश्चिन्नाप्रियो वास्त्यमानिनः ॥ नोत्तमो नाधमो वापि समानस्यासमोपि वा ॥ ३७ ॥ न माता न पिता तस्य न भा-
र्या न सुतादयः ॥ नात्मीयो न परश्चापि न देहो जन्म एव च ॥ ३८ ॥ न चास्य कर्म वा लोके सदसन्मिश्रयोनिषु ॥ क्रीडार्थः सोपि साधूनां प-
रित्राणाय कल्पते ॥ ३९ ॥ सत्वं रजस्तम इति भजते निर्गुणो गुणान् ॥ क्रीडन्नतीतोऽत्र गुणैः सृजत्यवति हंत्यजः ॥ ४० ॥ यथा भ्र-
मरिकादृष्ट्या भ्राम्यतीव महीयते ॥ चित्ते कर्तरि तत्रात्मा कर्तेवाहंधिया स्मृतः ॥ ४१ ॥ युवयोरेव नैवायमात्मजो भगवान्हरिः ॥ सर्वे-
षामात्मजो ह्यात्मा पिता माता स ईश्वरः ॥ ४२ ॥ दृष्टं श्रुतं भूतभवद्भविष्यत्स्थास्नुश्चरिष्णुर्महदल्पकं च ॥ विनाऽच्युताद्वस्तुतरां न वाच्यं
स एव सर्वं परमार्थभूतः ॥ ४३ ॥ ॥ श्रीरामाकृष्णायनमः ॥ ॥

त्यर्थः ॥ ४० ॥ आत्मा विद्योपाधेर्जीवस्य कर्तृत्वं दृष्टांतात्कुर्वंस्त-
स्यो विद्ययैव कर्तृत्वमिति सदृष्टांतमाह यथेति ॥ भ्रमणं परिभ्रमणं तयोपलक्षितया दृष्ट्या भूरपि भ्राम्यतीव यथा प्रतीयते ॥ एवं चित्ते कर्तरि सति ॥ तत्र चित्ते अहंधिया आत्मा
ध्यासेन आत्मा कर्तास्मृतो यथा तद्वदिति ॥ ४१ ॥ किं च ॥ युवयोरेव नायमात्मजः किंतु सर्वेषामपि ॥ तत्रापि नात्मज एव किंतु शत्रुमित्रादिरूपोपि ॥ तिसर्वात्मनिरूप
णेन मोहनिवृत्तये संबंधमनैकांतिकी करोति युवयोरेवेति द्वाभ्यां ॥ ४२ ॥ अच्युताद्धि नातरां निनरां तत्व वाच्यं निर्वचनार्हं वस्तु नास्तीति ॥ ४३ ॥ ॥
ये

ध्यरि

ना० द० पू०
२३४

दीपान्निरूप्यप्रद्योत्य॥वास्तून्यदेहल्यादीन्॥४४॥मणिभिः कांच्यादिषु स्थितैः॥रज्जूविकर्षन्भुजेषु कंकणानां स्रजो यासां ताः॥चलंतो नितंबाः स्तना हाराश्च यासां कुंड
लैः त्विषंतः स्फुरंतः कपोला यासां अरुणानि कुंकुमानि येषु तान्याननानि यासां ताः एवंताश्च ताश्च॥४५॥४६॥ तदा व्रजौकसो गोप्यः॥४७॥ सक्रोधमाहुः॥ क्रूर इति॥
अर्थसाधितवानित्यर्थसाधनः॥ तदाहुः येन नीत इति॥४८॥ कंसं घातयित्वा पुनः किमर्थमागत इत्याशंक्य कार्यं संभावयंति॥ किमिति॥ तदा साधितेन कार्येण प्रीत

एवं निशा सा ब्रुवतोर्व्यतीता नंदस्य कृष्णानुचरस्य राजन्॥ गोप्यः समुत्थाय निरूप्य दीपान्वास्तून्समभ्यर्च्य दधीन्यमंथन्॥४४॥ ता दी
प्तैर्मणिभिर्विरेजू रज्जूर्विकर्षद्भुजकंकणस्रजः॥ चलन्नितंबस्तनहारकुंडलत्विषत्कपोलारुणकुंकुमाननाः॥४५॥ उद्गायती
नामरविंदलोचनं व्रजांगनानां दिवमस्पृशद्ध्वनिः॥ दध्नश्च निर्मंथनशब्दमिश्रितो निरस्यते येन दिशाममंगलं॥४६॥ भगवत्यु
दिते सूर्ये नंदद्वारि व्रजौकसः॥ दृष्ट्वा रथं शातकौंभं कस्यायमिति चाब्रुवन्॥४७॥ अक्रूर आगतः किं वा यः कंसस्यार्थसाधकः॥
येन नीतो मधुपुरीं कृष्णः कमललोचनः॥४८॥ किं साधयिष्यत्यस्माभिर्भर्तुः प्रेतस्य निष्कृतिं॥ इति स्त्रीणां वदंतीनामुद्धवोऽगात्कृता
ह्निकः॥४९॥ ॥इति श्रीभागवते महापुराणे दशमस्कंधे षट्चत्वारिंशोऽध्यायः॥४६॥ ॥श्रीशुक उ०॥ तं वीक्ष्य कृष्णानु
ज चरं व्रजस्त्रियः प्रलंबबाहुं नवकंजलोचनं॥ पीतांबरं पुष्करमालिनं लसन्मुखारविंदं मणिमृष्टकुंडलं॥१॥ ॥ ॥ ॥ राम:
२३४

स्य भर्तुः॥ प्रागंतरे प्रेतस्य मृतस्य कंसस्य निष्कृतिमौर्ध्वदैहिकमस्माभिः कृत्वा साधयिष्यति किं अस्मन्मांसैः पिंडान्दास्यतीत्यर्थः॥ एवं वदंतीनां स्त्रीणां॥ ततस्त
स्मिन्नवसरे कृतस्नानादिनियम उद्धव आगत इति॥४९॥ ॥इति श्रीभागवते दशमस्कंधे टी० षट्चत्वारिंशोऽध्यायः॥४६॥ सप्तचत्वारिंशकेऽथ कृष्णसंदेशेन गोपिकाः
॥बोधयित्वोद्धवस्तस्तैर्नंदमनुज्ञाप्यागमत्पुरीम्॥१॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपाच्यंसुंदरंदर्शनंयस्यसः ॥ अच्युतस्येववेषोभूषणंनिभूषणंचयस्यसः ॥ कोयंकुतोवाकस्यचेतिवदंत्यस्तंपरिवव्रुः ॥१॥ पार्षदंसेवकं ॥४॥ पित्रोःप्रियचिकीर्षये
त्यत्रहेतुः ॥ स्नेहानुबंधइति ॥५॥ अन्यथागोव्रजेतस्येत्यत्रहेतुः ॥ अन्येष्विति ॥ अर्थकृताकार्यनिमित्ता विडंबनमनुकरणमात्रंनतुतात्विकीमैत्रीपुंभिः ॥ रितिदृष्टांतो

भप सुविस्मिताःकोयमपाच्यदर्शनःकुतश्चकस्याच्युतवेषणः ॥ इतिस्मसर्वाःपरिवव्रुरुत्सुकास्तमुत्तमश्लोकपदांबुजाश्रयं ॥२॥ तंप्र-
श्रयेणावनताःसुसत्कृतंसव्रीड[illegible]हासेक्षणसूनृतादिभिः ॥ रहस्यपृच्छन्नुपविष्टमासनेविज्ञायसंदेशहरंरमापतेः ॥३॥ जानी-
मस्त्वांयदुपतेःपार्षदंसमुपागतं ॥ भर्त्रेहप्रेषितःपित्रोर्भवान्प्रियचिकीर्षया ॥४॥ अन्यथागोव्रजेतस्यस्मरणीयंचक्ष्महे ॥ स्नेहा- स्म॥न
नुबंधोबंधूनांमुनेरपिसुदुस्त्यजः ॥ अन्येष्वर्थकृतामैत्रीयावदर्थविडंबनं ॥ पुंभिःस्त्रीषुकृता[illegible]त्सुमनःस्विवषट्पदैः ॥६॥ य
निःस्वंत्यजंतिगणिकाअकल्पंनृपतिंप्रजाः ॥ अधीतवि[illegible]द्याआचार्यमृत्विजोदत्तदक्षिणं ॥७॥ खगावीतफलं[illegible]वृक्षंभुक्त्वाचा-
तिथयोगृहं ॥ दग्धंमृगास्तथारण्यंजारोभुक्त्वारतांस्त्रियं ॥८॥ इतिगोप्योहिगोविंदेगतवाक्कायमा[illegible]नसाः ॥ कृष्णदूतेव्रजंयातेउ-
द्धवेत्यक्तलौकिकाः ॥९॥ गायंत्यःप्रियकर्माणिरुदंत्यश्चगतह्रियः ॥ तस्यसंस्मृत्यसंस्मृत्ययानिकैशोरबाल्ययोः ॥१०॥ ॥ ॥

॥६॥ अस्यैवान्यार्थदर्शनैःप्रपंचःनिःस्वमित्यादिना ॥ दत्तादक्षिणायेनतंयाज्यं ॥७॥ पक्षिणोविगतफलंवृक्षंरतांअरमांअन्नुरतामित्यर्थः ॥८॥ त्यक्तलौकिकाःत्यक्तलो-
कव्यवहाराः ॥९॥ प्रियस्यकर्माणिगायंत्यः तथातस्यबाल्यकैशोरयोर्यानिकर्माणितानिसंस्मृत्यसंस्मृत्यगतह्रियःसत्यो रुदंत्यश्चतमपृच्छन्नितिपूर्वक्रिययैवसंबंधः ॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० पू०
१३५

